धर्मो विश्वस्य जगतः प्रतिष्ठा

प्राज्ञपाठशालामण्डलग्रन्थमाला

मीमांसाकोषः

पञ्चमो भागः

(प–व)

संपादकः

केवलानन्दसरस्वती

मार्गशीर्षः कृष्णः १० भौमवासरः शकः १८८२.

Prājña Pāṭhashālā Maṇḍala Grantha Mālā

MĪMĀṂSĀKOṢAḤ

Part V

✦

Edited by

Kevalānandasaraswatī

1960] [Rs. 30

PRINTED BY M. S. SATHE, AT THE PRAJNA PRESS, WAI (SATARA)
&
PUBLISHED BY M. S. SATHE, FOR PRAJNA PATHASHALA MANDAL, WAI (SATARA)

Price Rs. 30

भारतसंघराज्यमुख्येन राष्ट्रपतिना

श्रीराजेन्द्रप्रसादेन

अयं पञ्चमो भागः स्वकरकमलेन

प्रकाशितः ।

मार्गशीर्षः कृष्णः १० शकः १८८२

अनुक्रमणिका

प्रकाशकस्य निवेदनम्

मीमांसाकोषचतुर्थभागस्य प्रकाशनानन्तरं पञ्चमभागप्रकाशनपर्यन्तं वर्षत्रयात्मको दीर्घः कालो व्यतीतः । तत्कारणं च गुरुचरणनिर्मितलेखस्य पुनः संस्कारः कर्तव्य आसीदिति । श्रीदुर्गारामशास्त्रिणा उपाध्ये इत्युपनाम्ना एतत् पुनःसंस्करणकार्यमङ्गीकृत्य अस्य भागस्य पर्याप्तो गुरुलेखः श्रीरङ्गनाथशास्त्रिणा वारंवारं दर्शितपद्धत्या परिशोधितः ।

अस्य पञ्चमभागस्य यथापूर्वं मुद्रितपरिशोधनं च सूक्ष्मेक्षिकया धर्मकोशस्य कार्यकारी-संपादकेन श्रीरङ्गनाथशास्त्रिणा निर्वर्तितम् । श्रीरङ्गनाथशास्त्रिणः एतादृशकार्यनिर्वर्तन-सामर्थ्ये गुरुचरणानामपि विश्वास आसीत् । न्यूनातिरिक्तदोषपरिहाराय गुरुभिस्तेन सह पुनःपुनः विमर्शोऽपि कृतोऽस्ति । गुणवत्तासंपत्तावेव श्रीरङ्गनाथशास्त्रिणश्चित्तसमाधानमि-त्यस्माकमपि चिरकालीनोऽनुभव इति तस्मिन्विश्रभ्य धर्मकोशकार्यमपि वयं संचालयामः ।

अधिकरणादिसंख्या— पञ्चमेऽस्मिन् भागे भाष्याधिकरणानि ९९, संकर्षाधिकरणानि ४३, केवलानन्दीवृत्त्यधिकरणानि १३४, तौतातिताधिकरणानि २५, न्यायाः १२७, लघुसिद्धान्ताश्च ४४८४ भवन्ति ।

अथ प्रथमभागमारभ्य भाष्याधिकरणानि ६९८, संकर्षाधिकरणानि २२७, केवलानन्दीवृत्त्यधिकरणानि ५९०, तौतातिताधिकरणानि ६१, न्यायाः १०३२, लघुसिद्धान्ताश्च १७६४७ इति ।

मार्गशीर्षः कृष्णः १०
शकः १८८२

लक्ष्मणशास्त्री जोशी, तर्कतीर्थः
अध्यक्षः प्राज्ञपाठशालामण्डलस्य
मुख्यसंपादकश्च धर्मकोशस्य

अस्य कोशस्य कर्तुः

श्रीकेवलानन्दयतेश्चरित्रसारः

शान्तस्वान्तो योगजादात्मधर्मात्
सिद्धस्तन्त्रं तारयन् जैमिनेर्यः ।
धन्यं धीरं धारिणं मोक्षलक्ष्म्याः
प्राज्ञाचार्यं केवलं तं प्रणौमि ॥

अस्मद्गुरुः श्रीकेवलानन्दस्वामी 'ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन् । यः प्रयाति त्यजन् देहं स याति परमां गतिम् ॥' (भ. गीता ८।१३) इति भागवतं सिद्धान्तमनुसृत्यान्तकाले अपुनरावृत्तिमाकाङ्क्षन् अक्षरं ब्रह्मणोऽभिधानभूतमोङ्कारमुच्चारयन् तल्लक्ष्यं भगवन्तमनुस्मरन् स्वीयं विनश्वरं देहं परित्यज्य पारमेश्वरं परमं पदं प्राणशे शके १८७८ फाल्गुने शुक्लपक्षे सप्तम्याम् । तेन मीमांसाकोषो विरचितः संन्यासाश्रमप्रवेशानन्तरमेव । 'ब्रह्मचर्यादेव प्रव्रजेत्' इति जाबालश्रुतिमनुसंदधानेन चतुष्पञ्चाशत्तमे वयसि ब्रह्मचर्यं समाप्य स्वयंस्थापितसंस्थायाः 'प्राज्ञपाठशाला'इत्यभिख्यायाः कार्योद्विरम्य संन्यासाश्रम आश्रित आसीत् । परिव्रज्याया अङ्गीकरणोत्तरं अन्तिमोच्छ्वासपर्यन्तं त्र्यर्थचिन्तनपरेण धर्मब्रह्मपरे उभये पूर्वोत्तरमीमांसे विमृश्य विविदिषूणामुपकाराय (१) पदसूची-सूत्रसूचीसहितः अधिकरणसंज्ञाविमर्शयुक्तः पाठभेदचर्चान्वितः जैमिनीयमीमांसासूत्रपाठः (मुद्रितः), (२) मीमांसाकोषः (क्रमशः मुद्रणयन्त्रस्थः), (३) कौषीतकिब्राह्मणारण्यकविषयकोषः (मुद्रितः), (४) ऐतरेयब्राह्मणारण्यकविषयकोशः (मुद्रितः), (५) तैत्तिरीयमन्त्रसूची (अमुद्रिता), (६) तैत्तिरीयशाखाविषयसूची (अमुद्रिता), (७) सत्याषाढसूत्रविषयसूची (अमुद्रिता), (८) शांकरभाष्यपरिभाषाकोषः (अमुद्रितः), (९) अद्वैतसिद्धेर्मराठीभाषान्तरम् (अमुद्रितम्), (१०) नव्यवेदान्तपरमाणुमाला अद्वैतसिद्ध्यन्तर्गतसिद्धान्तवाक्यकोषात्मिका (अमुद्रिता) इत्येते ग्रन्थाः प्रणीताः । तेन प्रणीतानां अमुद्रितानां ग्रन्थानां हस्तलिखितानि प्राज्ञपाठशालामण्डलसंस्थायाः संग्रहे सुरक्षितानि स्थापितानि सन्ति । तेषां मुद्रणं प्रकाशनं च द्रविणलाभानुकूल्ये सति कर्तुमिच्छामः । एतत् सर्वग्रन्थप्रणयनं तेन विनैवान्येषां धनादिरूपं साहाय्यं निर्वर्तितम् , धनपरिग्रहं वान्तनिगरणमिव प्रव्रज्याश्रमानुसारेण मत्वा ।

कौमारावस्थामारभ्य संन्यासाश्रमस्वीकरणकालपर्यन्तमपि देहधारणमात्रपर्याप्तं भैक्षममृतमिव मत्वा जीवितयात्रा तेन निर्वाहिता । यौवने एव संन्यस्तसंकल्पस्य तस्य बाह्यलक्षणपरिवर्तनरूप एव संन्यासपरिग्रह आसीदिति तस्य ब्रह्मचर्यावस्थाचरित्रं सूचयति । तस्य चरित्रसारकथने नात्रानवसरदोषः प्रसरति इति तत् संक्षिप्य कथयामः ।

केवलानन्दसरस्वतीति तस्याभिधा संन्यासाश्रमीया, न पितृकृता । पितृकृतं तन्नाम च नारायण इति । कोङ्कणप्रदेशे कुलाबामण्डले रोहे इति राजकीयोपभागे सुडकोलीग्रामे शके १७९९ मार्गशीर्षशुक्लपक्षे चतुर्थ्यां प्रातः एकादशवादनसमये चित्पावनाख्यायां ब्राह्मणोपजातौ प्रसिद्धे मराठे इत्यभिहिते कुले सदाशिवात्पितुः पार्वत्या मातुश्च नारायणस्य जन्माभूत् । पितुः सदाशिवस्य द्विविधोपजीविकाऽऽसीत् पौरोहित्यं कृषिकर्म चेति । वयसो दशमवर्षपर्यन्तं पितृभ्यां वात्सल्येन परिपाल्यमानो गौरस्तप्तकनकसमकान्तिः सुकुमारो दृढाङ्गश्चायं बालो नारायणः प्राथमिकीं शिक्षां लेखनवाचनगणितरूपां संध्यावन्दन-देवपूजारुद्राध्यायादिब्रह्मकर्मसहितां पितुरेव प्राप्तवान् । भगवद्भक्तिपरायणौ मातापितरौ ईश्वरभजनप्रणिधानपरं धर्मं भागवतोत्तममुनीनां चरित्रकथनद्वारा बाल्यएव पुत्रायोपदिदि-शतुः । एकादशे वयोवर्षे गुरुकुलवासाय प्रोत्साहितो नारायणः अलीबागनगरं समागमत् । देवोपनाम्नः केशवशास्त्रिणः गृहे वर्षद्वयम् , लोण्ढे इत्युपनाम्नः दामोदरशास्त्रिणश्च गृहे वर्षषट्कमुषित्वा संस्कृतसाहित्यम् , किञ्चित् पाणिनीयं व्याकरणम् , हरिकीर्तनपद्धतिम् , संगीतं च नारायणोऽधिजगाम । नारायणः अस्मिन्नष्टवर्षात्मके काले गुरुगृहे वसन् गुरोः कृते गृहसंमार्जनम् , पाकनिष्पत्तिः , गोदोहनम् , पाकादिपात्रशोधनम् , गुरुतत्पुत्र-पत्न्यादीनां वस्त्रधावनम् , गृहोपकरणव्यवस्थापनम् , आपणात् गुरुकुलोपयोगिक्रीत-वस्त्वाहरणं इत्यादीनि कर्माणि शरीरायासमपरिगणय्य अकृतज्ञैर्गुरुसंबन्धिभिः परिचर्या-न्यूनतान्वेषिभिः कृतमधिक्षेपं चोपेक्ष्य गुरोस्तत्संबन्धिनां चित्तप्रसादनाय निरवर्तयद-ध्ययनमात्रकामः ।

दामोदरशास्त्रिणः संनिधौ संस्कृतविद्यामधिगम्याप्यपरितुष्टः उच्चतरशास्त्रस्तरमधि-जिगमिषुर्नारायणः सातारामण्डलस्थं वाईनगरं प्रति प्रस्थितः । शके १८२० आश्विने मलमासे प्रथमसप्ताहे कृष्णातीरस्थवाईनगरमागम्य बहूनां गुरूणां संनिधौ वेदान् शास्त्राणि चाधीतवान् । ऋग्वेदो मेणवलीकरोपनाम्नः विष्णुशास्त्रिणः , यजुर्वेदो रानडे इत्युपनाम्नः बालम्भट्टात् , व्याकरणं करन्दीकरोपनाम्नः विष्णुशास्त्रिणः , नव्यन्यायश्च डेंग्वेकरोपनाम्नः बालशास्त्रिणः अधिगतः । मेणवलीकरः विष्णुशास्त्री पुस्तकमनाश्रित्य ऋग्वेदस्य समग्रस्य साङ्गस्य पदक्रमजटाघनादिविकृतियुतस्य कण्ठत एव पठने समर्थ इति भारते काशीतो रामेश्वरपर्यन्तं विश्रुत आसीत् । रानडे बालम्भट्टः कण्ठतो घनान्तयजुर्वेदाध्यायी श्रौते स्मार्ते च कर्मणि निपुणो धर्मशास्त्रे निष्णातमतिरासीत् । डेंग्वेकरः बालम्भट्टः पुस्तकमनवलम्ब्य शिष्येभ्यो व्याकरणं महाभाष्यपर्यन्तम् , न्यायं च गादाधरीपर्यन्तमध्यापयदकुण्ठितमतिः । स खलु श्रीमद्भागवतपुराणस्य कथासरि-त्सागरस्य मध्ययुगीनभगवद्भक्तप्रणीतमराठीकाव्यानां च संस्मर्ताऽधिवक्ता चाऽऽसीत् । वेदशास्त्रनिष्णातधिषणो महापण्डितोऽप्यसौ पत्नीदुहितृसहितो गृहाश्रमे वसन्नपि ऐहिककाममुक्तः स्थिरमतिः परित्यक्तसर्वपरिग्रहः असंग्रहशीलोऽयाचनेन कस्मादपि दातुरेकाहजीविकां लब्ध्वैव परिसंतुष्टोऽयाचकवृत्त्या जीवन्नायुरत्यवहत् । पण्डितोऽपि

बालैः पामरैश्च जनैः सह संलापरुचिर्नित्यस्वाध्यायशीलो भगवद्ध्यानपरायणो जिजीव वयसो द्व्यधिकसप्ततिवर्षपर्यन्तम् । ततः प्लेगातङ्कनिमित्तेन चेमं लोकं विजहौ ।

शरीरमनोबुद्धिबलसंपन्नोऽव्याजेन धर्माचरणशीलो गुरुपरिचरणपरो भगवच्छरणो नारायणशास्त्रीत्यभिधानेन लोके निर्दिश्यमानो वेदवेदाङ्गान्यधीत्य पाणिनिकणादाक्षपाद-प्रणीतनयानधिगच्छन्नपि सर्वैषा अपराविद्येति मन्वानः ऐहिकामुष्मिकजीवनस्य क्षयिष्णुतां पश्यन् तस्मिन्विरज्यमानो मुमुक्षुः श्रुतविनयसंपन्नं साधुशीलं युवानं योगपट्टाभिषिक्तं संसारादुद्दिधीर्षु वेदान्तपारंगतं प्रज्ञानन्देति विख्यातं गुरुमुपशिश्रिये त्रयोविंशे वयो-वर्षे । नारायणशास्त्री स्वात्मचरित्रलेखे अस्मिन् संदर्भे लिखति-- " इतः परं सद्गुरोः परमहंसस्य प्रज्ञानन्दस्य स्वामिनः संबन्धे किञ्चिल्लेखनीयम् । कथं वा तत्संबन्धे वस्तुतो लेखनं संभवति ? ' यतो वाचो निवर्तन्ते ' इति कृत्वा । ' तथापि स्मर्तॄणां वरद परमं मङ्गलमसि ' इति लेखनीयं किमपि । गुरोः पूर्वाश्रमनाम कृष्णशास्त्रीति । गौरीशंकरपुत्रः परांजपेकुलोत्पन्नः स भ्रातृत्रयसंपन्न आसीत् । विवाहानन्तरमचिरात्तरुण्याः पत्न्याः मरणात्पुनर्विवाहमकृत्वैव स्थितः कृष्णशास्त्री । कृष्णशास्त्रिणः कुले स्वाव्यवहितत्रिपुरुषपर्यन्तं वेदस्य श्रौतयज्ञस्य धर्मादिशास्त्रस्य च प्रावीण्यं अग्निहोत्रानुष्ठानं च प्रावर्तत । स्वयं कृष्णशास्त्रिणा स्ववेदशाखा, श्रौतयाज्ञिकी, ज्योतिष्टोमसामगायनम् , संस्कृतभाषा-व्युत्पन्नता चाधिगता आसीत् । तदात्वे च वाईनगरे प्रसिद्धयोः संन्यासिनोः भूमानन्द-रामानन्दयोः वेदान्तपाठकयोः सविधे शाङ्करं प्रस्थानत्रयभाष्यं कृष्णशास्त्रिणा श्रुतम् । तत्समनन्तरं प्रस्थानत्रयभाष्याध्यापने द्वारकाख्यदेवालये गीताभाष्यमारभ्य कृष्णशास्त्री प्रवृत्तः । पञ्चाधिकत्रिंशत्तमे वयसि शके १८१३ संन्यासाश्रमं प्रविष्टः । रामानन्दशिष्यः ब्रह्मानन्दनामा ब्रह्मचर्यादेव प्रव्रजितो महाविरक्त आसीद्वाईक्षेत्रे । तस्मात् संन्यस्तेन कृष्णशास्त्रिणा योगपट्टः स्वीकृतः प्रज्ञानन्देत्यभिधा च प्राप्ता । वाईग्रामविभागे गङ्गापुर्यां कृष्णातीरस्थप्रस्तरावतारसमीपे वर्तमाने मुरलीधरमठे स्थित्वा प्रज्ञानन्द-स्वामिना वेदान्तप्रवचनमारब्धम् । व्यतीते कियतिचित्समये प्रज्ञानन्देन दातारमठ आश्रितः । स्वामिना एतत्स्थलं पुनः परित्यज्य दातारमठात् पश्चिमायां दिशि अव्यवहितस्थितस्य भग्नप्रायस्य द्रविडकुप्पशास्त्रिस्वामिकस्य गृहे वेदान्तप्रवचनं नित्यं पुनः प्रवर्तितम् । ततः पुनः कालान्तरेण तदपि स्थानं त्यक्त्वा दातारमठादाग्नेय्यां दिशि नवीकृतस्य मारुतिमन्दिरस्य द्वितीयतले प्रस्थानत्रयमपाठयद्देहावसानपर्यन्तम् । वयं प्रत्यहं तत्र प्रणामार्थमगच्छाम । "

" एकदा एकादश्यां तिथौ भाष्यपाठश्रवणेच्छावशात् प्रज्ञानन्दस्वामिनः संनिधावह-मगमम् । ' नाहं मन्ये सुवेदेति नो न वेदेति वेद च । यो नस्तद्वेद तद्वेद नो न वेदेति वेद च ॥ ' इत्येतत्केनोपनिषद्वचनभाष्यस्य प्रवचनं गुरुणा समापितं पाठान्ते । अध्या-त्मानुभवसारभूतं वाक्यमेतत् । ब्रह्मानुभवस्वरूपाविष्कारकरं माहात्म्यमस्मिन्वाक्येऽस्ति । आत्मानुभवानुप्राणिते भाषणे प्रवीण आसीत्प्रज्ञानन्दस्वामी । नारायणशास्त्री तस्य लक्ष्य आसीत् । एतादृशाः श्येना इव अप्रमादेनैव लक्ष्यवेधिनो लक्ष्यान्वेषणे कुशला भवन्ति । विद्धो लक्ष्यः कल्याणमृच्छति । मम स्वामी बहुमानेन मां निर्दिशति स्म । अहं

आ शैशवाद्वेदान्तानुकूलचित्तवृत्तिरासम् । तत्केनोपनिषद्वाक्यप्रवचनं श्रुत्वैव नारायणशास्त्रिणः बुद्धिस्तन्मयी* जाता । 'वाक्यादेवापरोक्षधीः' इति सद्गुरुक्तपैव फलिता ।"

"काशीतो रामेश्वरपर्यन्तं मत्स्वामिनः शारीरकभाष्यप्रवचनख्यातिः प्रसृताऽऽसीत् । बहवो विद्वांसो वाईनगरमागत्य मत्स्वामिनो दर्शनं तत्प्रवचनश्रवणं च कृत्वैव प्रतिन्यवर्तन्त । रात्रौ एकान्तसमये सामानि गायन् 'विठ्ठल विठ्ठल, जय जय विठ्ठल' इति भगवन्नामसंकीर्तनं वा कुर्वन् मत्स्वामी ईश्वरप्रणिधाने रत आसीत् । वाईग्रामे प्लेगोपद्रव उद्भूतः शके १८२६ आश्विने मासि । तस्मिन्नेव मासि शुद्धाष्टम्यां तिथौ प्लेगसंसर्गदोषात् त्रिदोषग्रस्तामिमं देहं हित्वा मम स्वामी ब्रह्मण्यनन्ते लीनः । तदनन्तरं शके १८२७ संवत्सरमारभ्य शांकरगीतोपनिषद्ब्रह्मसूत्रभाष्यप्रवचनायाहं प्रवृत्तः ।"

"स्वाध्यायप्रवचनयोस्तपस्येव च आयुः क्षपणीयं इति अहं निरदीधरं वयसः त्रयोविंशतितमे वर्षे शारीरिकम्, मानसिकम्, बौद्धिकं च बलमनुकूलमिति मत्वा । गृहाश्रमो नावलम्बनीय इत्यपि निरचिनवम् । विना द्रव्यार्जनं न गृहाश्रमः कर्तुं पार्यते, द्रव्यार्जनं च प्रायः सव्याजपूजया लाङ्गूलचालनेन स्वाभिमानराहित्येन च दोषेण विना कर्तुं न पार्यते इत्यहमदर्शम् । अतिदुःसहं पारतन्त्र्यम्, तस्मिन् स्वोन्नतिर्न शक्येति वारंवारं अमंसि, प्रत्यज्ञासि च यावज्जीवं भिक्षया वर्तिष्य इति । त्रयोविंशतितमं वर्षमारभ्य त्रिपञ्चाशद्वर्षपर्यन्तं संन्यासग्रहणक्षणावधि अध्यापनं तप इति मत्वा निरवर्तयम् । स्नानं संध्यां योगाभ्यासं तृतीयप्रहरादौ भिक्षां भोजनं निद्रां च विहाय मम सर्वः कालोऽध्ययनाध्यापनयोर्व्यतीतः । मध्ये मध्ये प्रसङ्गानुसारेण सामाजिके राजकीये चान्दोलनेऽपि किञ्चित्कार्यं मया कृतम् ।"

अयमंशः अस्मद्गुरोः केवलानन्दस्य मराठीभाषायां लिखितात्स्वात्मचरित्रादुद्धृत्यात्र संस्कृतेऽनूद्य च निवेशितः ।

ईशवीयवत्सरे १९०१ अस्मद्गुरुणा अध्यापनं प्रारब्धं गोडबोलेकुलनाम्नः सखम्भट्टस्य गृहे स्थितिं लब्ध्वा । त्रयश्चत्वारो वा विद्यार्थिनः संस्कृताध्ययनार्थं प्रथममागताः । वर्षपञ्चकादुत्तरं तेन गोडबोले–गृहं त्यक्त्वा गङ्गापुर्यां कृष्णातीरस्थप्रस्तरघट्टसंनिधौ वर्तमाने स्वगुरुस्थाने निवासार्थमेत्य प्राज्ञमठाख्या संस्कृतपाठशाला स्थापिता । अस्यां पाठशालायां सामान्यतस्त्रिंशत्संख्याका विद्यार्थिनो न्यवसन्, पञ्चमहाकाव्यानि, वैष्णवभागवतम्, व्याकरणम्, वेदान्तम्, न्यायम्, धर्मशास्त्रमन्यानि च दर्शनानि अध्यैषत च । उत्तमश्रेणीप्रविष्टास्ते प्रथमश्रेणीगतान् विद्यार्थिनः अपाठयन् आचार्यकार्यभागं लघूकर्तुम् । एतेऽध्ययनाध्यापनयोः रता विद्यार्थिनः क्रमशः शिक्षिता अध्यापनकार्यकौशलमपि प्राप्नुवन् । दीपाद्दीपान्तरमिव आचार्यादन्य आचार्योऽनया शिक्षाप्रणाल्या प्रादुरभूत् । भारतीयप्राचीनपद्धतिमनुरुध्यैव प्राज्ञमठे शिक्षाविधिरनुसृतः । परन्तु कण्ठतो दार्ढ्येन पाठधारणस्य महिमा प्राचीनपद्धत्यां यावता आग्रहेण धृत

* ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः । भगवद्गीता १७।२३.

आसीत्तावानाग्रहः अस्मदाचार्येण नावलम्बितः । अतः कण्ठतः कोषधारणं परित्यक्तम् । कोषपाठस्थाने अन्यत्साहित्यं कण्ठतो धारणार्थमध्यापनविषयेषु निवेशितम् । कालिदासादिषूपलभ्यमानोत्तानशृङ्गारोऽपि पाठ्यविषयक्रमाद्वर्जितः । केचिदाधुनिका अपि विषया इतिहासभूगोललौकिकसाहित्यपदार्थविज्ञानादयः पाठ्यक्रमे निवेशिताः । लौकिकव्यवहारे आधुनिकपश्चिमदेशोद्भूतसंस्कृतेश्च ज्ञानमावश्यकमिति हृदि निधाय तद्विषयाणि पुस्तकानि च पाठ्यक्रमेऽन्तर्भावितानि । शास्त्री धर्मोपदेशकश्च वर्तमानदेशकालपरिस्थितिज्ञो यथा भवेत्तथाविधः शिक्षाक्रमोऽस्मदाचार्येण नारायणशास्त्रिणा स्वसंस्थायाः कृते अङ्गीकृतः ।

प्राज्ञमठः प्राज्ञपाठशालाख्यां यथा प्राप्तस्तदत्रावसरप्राप्तं कथ्यते । 'समर्थविद्यालयः' इति नाम्ना विश्रुता राष्ट्रीयपाठशाला पुण्यपत्तनमण्डलस्थ' तळेगावदाभाडे 'ग्रामसंनिहितवने स्थापिताऽऽसीत् विष्णुं गोविन्दपुत्रं विजापूरकरकुलोद्भवं पुरस्कृत्य कैश्चित् स्वदेशं वैदेशिकपारतन्त्र्यादुद्दिधीर्षुभिराधुनिकशिक्षितैः । ईशवीये १९१० वत्सरे ब्रिटिशप्रभुभिः 'समर्थविद्यालयः आङ्ग्लसम्राजः विरोधं ब्रिटिशप्रभुत्वस्य विद्रोहं च राष्ट्रीयशिक्षामिषेण अध्यापयति' इत्यपराधमारोप्य विध्वंसितः । तत्रत्याः कतिपयाः प्रौढा विद्यार्थिनः प्राज्ञमठमागत्य राष्ट्रीयशिक्षाप्रणाल्याः पुनः प्रवर्तनार्थं वेदान्ताध्ययनार्थं च न्यवसन् । स्वदेशनिर्मितमात्रवस्तुक्रयणं परदेशनिष्पन्नवस्तुबहिष्कारः स्वराज्यार्थप्रयत्नो राष्ट्रीयशिक्षाप्रवर्तनं चेति चतुर्विधं कार्यक्रममादृत्य वर्तितव्यमिति एतेषां विद्यार्थिनां समुद्दिष्टमासीत् । तेषु कानडेकुलनामा दिनकरशास्त्री, दिवेकरकुलनामा महादेवशास्त्री च राष्ट्रीयशिक्षाप्रणाल्या प्राज्ञमठे अध्ययनं प्रवर्तनीयमिति मनसि निधाय मुख्याचार्यं नारायणशास्त्रिणं प्रति साहाय्यमकुरुताम् । ईशवीये १९१६ वत्सरे सप्टेम्बरमासे शके १८३६ संवत्सरे आश्विने मासि विजयादशम्यां प्राज्ञमठस्य प्राज्ञपाठशाला इति नामकरणं कृतम् ।

विद्यार्थिनां यत्र विद्याधिगमस्तत्र जीवनम्, न प्रातिस्विके गृहे वासः पाठशालायां च अध्ययनमित्येवं नियमः अस्याः पाठशालायाः कृते विहितः । विद्यार्थिनां वसतिगृहे प्रातरारभ्य रात्रौ शयनपर्यन्तं विद्यार्थिनां विविधाचरणस्य विशिष्टा पद्धतिरप्यनुशासिता । सा यथा– प्रातः उषःकाले प्रबोधनसमनन्तरं प्रातःस्मरणीयस्य वैदिकस्य सूक्तस्य, देवतास्तोत्राणां राष्ट्रभक्तिभावान्वितगीतानां च सर्वैर्विद्यार्थिभिर्नियतसमय उत्थितैरेकत्रावस्थाय पठनम्, दन्तधावनादिशौचक्रिया, शीतोदकस्नानम्, संध्यावन्दनम्, सूर्यनमस्कारादिव्यायामः, शिक्षकाणां शिष्याणां च सामूहिकी प्रार्थना, मध्याह्नभोजनसमयपर्यन्तं माध्यमिकशिक्षाकार्यक्रमानुसारेण उच्चशिक्षाक्रमानुसारेण च वर्गभेदेन पाठग्रहणम्, सर्वेषां सहभोजनम्, मध्याह्ने भोजनोत्तरं विश्रमः, पुनश्च पाठग्रहणं संध्यासमयपर्यन्तम्, संध्यासमये शारीरव्यायामपरा क्रीडा प्राङ्गणे व्यायामगृहे वा, सायंसंध्यावन्दनम्, रात्रिभोजनम्, स्वाध्यायः, शयनं च इत्येवंप्रकारेण विरामदिवस-

व्यतिरिक्तेषु दिवसेषु अध्यापकानामध्याप्यानां च कालविभागेन कार्याणि क्रमनियतानि कृतानि ।

वैदेशिकाङ्ग्लराज्यपारतन्त्र्येण समुत्पन्ना ये दोषाः स्वात्मविश्वासनाशः, प्रज्ञाहानिः, ऐक्यभावनालोपः, परावलम्बनमित्यादयस्तेषां समूलमुत्खननकरी, भारतीयानां स्वधर्मेषु स्वपरंपरागतसंस्कृतौ शश्वन्नीतिधर्मेषु च विवेकयुक्तश्रद्धोत्पादिका या सा राष्ट्रीयशिक्षेति व्याख्याता प्राज्ञपाठशालासंस्थापकैः । पारतन्त्र्येण मृतप्रायस्य राष्ट्रस्य संजीवनं यथा स्यात्तथा नवीनानां विचाराणां प्रवर्तका देशकालपरिस्थितिभेदानुसारेण परंपरापरिवर्तनाय विवेचकबुद्धिवादमाश्रिताः भगवद्भक्तेः राष्ट्रभक्तेश्च समन्वयकारिणा दृढशुद्धभावेन समुपबृंहितचित्ताः शीलवन्तोऽन्धपरंपराविध्वंसिनः परंपरागतसंस्कृतिमूलतत्त्वानामेव संरक्षणाय संनद्धाः पण्डिता धर्मोपदेशका नागरिका एव पारतन्त्र्येण विपन्नस्य दुर्बलस्य भारतराष्ट्रस्य समुद्धाराय प्रभवेयुरिति तादृशनागरिकनिर्माणमेव राष्ट्रीयशिक्षोद्देश इति समुद्घोषितो राष्ट्रीयशिक्षासिद्धान्तः प्राज्ञपाठशालासंस्थापकैः । आङ्ग्लप्रणीतशिक्षापद्धति- वैदेशिकराज्यसेवकनिर्माणयन्त्रमिति सा पद्धतिर्हेया, परन्तु आङ्ग्लभाषासाहित्यान्तर्गतज्ञान- विज्ञानकलाः सर्वथा संग्राह्याः, यतः पाश्चात्त्यज्ञानविज्ञानकलानां परिग्रहेणैव बलशालिनो नवजीवनसंपन्नस्य भारतराष्ट्रस्योदयः संभवति, नान्यथा इति तेषां निश्चय आसीत् । किञ्च या हि आधुनिकविद्याकलासंस्कृतिविमुखानां भारतीयपरंपरागतपूर्वतनाचारविचारानेव सारसर्वस्वं मन्यमानानां 'सामाजिकरूढिरेव पवित्रा कल्याणकारिणी, तद्विरोधः पापावहः' इति श्रद्धावतां मार्गेण न भारतः समुन्नतिपथं प्राप्नुयादित्यपि तैर्निर्णीतमासीत् ।

प्रथमजागतिकमहायुद्धोत्तरं भारते राष्ट्रस्वातन्त्र्यप्राप्तये परंपरागतसामाजिकरूढि- परिवर्तनाय च आन्दोलने प्रवृत्ते, ययोरान्दोलनयोर्महात्मा गान्धी प्रधाननेताऽभवत् । प्राज्ञपाठशालाशिक्षकाः शिष्याश्च राष्ट्रीयस्वातन्त्र्यान्दोलने सामाजिकधार्मिकपरिवर्तना- न्दोलने च साहाय्यं नेतृत्वं चाऽऽचरितवन्तः । नारायणशास्त्रिणा तच्छिष्यमहादेव- शास्त्रिलक्ष्मणशास्त्रिभ्यां च सामाजिकपरिवर्तनान्दोलने मुख्यतः धार्मिकाणां सभासु सामाजिकपरिवर्तनस्य धर्मशास्त्रग्रन्थानालोड्य तर्कपरिबृंहितं समर्थनं कृतमिति परिवर्तनवादिपक्षः अपरिवर्तनवादिरूढिनिष्ठपक्ष इति पक्षद्वयं संस्कृतपण्डितेषु समु- द्भूतम् । धार्मिकसामाजिकसंस्थासु आचारमार्गे च परिवर्तनं न मूलतो धर्मविघातकम्, प्रत्युत धार्मिकतत्त्वसामर्थ्यवृद्धये एव प्रभवति इत्येवंविधां विचारसरणीमनुसृत्य परिवर्तनवादिपक्षे बहवो विद्वांसो महाराष्ट्रे प्रविष्टाः । धर्मशास्त्रेतिहासकारः काणे इत्युपाह्वः वामनसूनुः पाण्डुरङ्गः, दप्तरीत्युपाह्वः लक्ष्मणपुत्रः केशवः नागपूरस्थः, पाठकः श्रीधरशास्त्री, चित्रावः सिद्धेश्वरशास्त्री, भिडे सदाशिवशास्त्री, चापेकरेत्युपाह्वो गोविन्दपुत्रो नारायणः, कोगजे रघुनाथशास्त्री इत्यादिभिः धर्मशास्त्रविद्भिः पण्डितै- र्नैष्ठिकब्रह्मचारिणस्तपोविद्यावदातचित्तस्य नारायणशास्त्रिणो नेतृत्वं स्वीकृत्य धार्मिकेषु सामाजिकेषु चाचारेषु आधुनिककालमनुसृत्य परिवर्तनमपरिहार्यमादरणीयं चेति उद्घोष्य परिवर्तनान्दोलनं प्रचारितम् । हिंदुसमाजगतानां जातीनामुपजातीनां च

परस्परं सहभोजनं विवाहश्च संमतः कृतोऽनेन परिवर्तनपक्षेण । गांधीमहात्मना प्रवर्ति- तास्पृश्यतोच्छेदनान्दोलनोपोद्बलनायैतैः पण्डितैरावेदितम्— अन्त्यजा इति स्मृतिशास्त्रे निर्दिष्टानां जातीनामस्पृश्यता चातुर्वर्ण्येन परम्परया समाचरिता सर्वेण हिन्दुसमाजे- नोच्छेद्येति । उपनयनविवाहादिसंस्काराः सर्वैर्हिन्दुभिः वैदिकमन्त्रैः गृह्यसूत्रानुसारेण कार्याः इत्यभ्युपगतमेतेन धर्मपरिवर्तनवादिपक्षेण । तेषां संस्कारकर्मणां दीर्घविस्तारं परिहाय यथा अनुष्ठानं कर्तव्यं तथा संक्षिप्ता पद्धतिरपि नारायणशास्त्रिणा प्रणीता संन्यासाश्रमप्रवेशानन्तरं केवलानन्देत्यभिख्यां प्राप्तेन ।

सतातनमतावलम्बिनोऽपरिवर्तनवादपक्षीयाः पण्डिताः स्मृतिषूपलभ्यमानानां जात्या- द्याचारधर्माणामदृष्टफलकत्वान्मनुष्यबुद्ध्या परिवर्तनं न सहन्ते । अदृष्टफलकार्यकारण- भावो मनुष्यबुद्धेरगम्य इति निर्धार्य स्मृतिशास्त्रेषूपलब्धानां परस्परविरुद्धवचनानां पूर्व- मीमांसोक्तपद्धत्या विरोधपरिहारं भिन्नस्मृतीनां समन्वयं च स्थापयन्ति, सर्वेषां स्मृत्यवि- रोधिनां कुलधर्मदेशधर्मजात्यादिधर्माणां रूढिस्वीकृतानामपि सनातनत्वमपरिवर्तनीयत्वं च मन्वते । एतद्विरोधेन परिवर्तनवादिपक्षः पूर्वमीमांसोक्तपद्धत्या विरोधपरिहारेऽपरितुष्यन् ऐतिहासिकपद्धतिमङ्गीकरोति, जात्याद्याचारपरिवर्तनं च समर्थयति-- यथा युगे युगे ऋषिभिर्वा शिष्टैर्वा जनैर्वा तत्तद्देशकालपरिस्थितिविशेषानुसारेण लोकहितार्थमनुष्ठातृशक्ति- भेदमधिकारभेदं चावेक्ष्य परम्परागता धर्माचाराः परिवर्तिताः नवीनाश्च प्रवर्तिताः, तथा अधुनाप्याधुनिकैर्विद्वद्भिः सद्भिः परिवर्तनीयाः प्रवर्तनीयाश्चेति ।

अस्मद्गुरुचरणैः परिवर्तनवादपक्षसमर्थनाय ऐतिहासिकपद्धतिरङ्गीकृता । ऐति- हासिकपद्धतिसमर्थनाय धर्मशास्त्रप्रमाणानामन्वेषणप्रवृत्तास्ते वेदस्मृतिपुराणानां वचन- संग्रहः साकल्येन कर्तुमिष्ट इति विचार्य धर्मकोशकार्यालयं प्राज्ञपाठशालामण्डलसंस्थाद्वारा स्थापितवन्तः ईशवीये १९२७ तमे वत्सरे केषाञ्चिदन्तेवासिनां साहकार्येण । ईशवीये १९३१ तमे वत्सरे एतद्धर्मकोशकार्यस्य प्रत्यवायपरिहाराय ऐकाग्र्येण निर्वर्तनाय च संकल्पितम् -- यत् माध्यमिकशिक्षाशाखा प्राज्ञपाठशालाङ्गभूता न रक्षणीया, चित्त- विक्षेपहेतुत्वादल्पफलत्वाच्च । अल्पफलत्वं च माध्यमिकशिक्षाया हि य उद्देशः प्राचीन- भारतीयसंस्कृतितत्त्वरक्षणानुरोधेन राष्ट्रीयशीलशालिनो नागरिका निर्मातव्याः इति तमुद्देशं श्रद्दधानाः शिक्षका न लभन्ते माध्यमिकशिक्षानिर्वाहार्थमिति । अतः माध्यमिकशिक्षाशाखाकार्यमितः परं नाङ्गीकरणीयमिति । इदं नारायणशास्त्रिपादानां मतं नादृतं तत्सहकारिभिरन्यैः संस्थाकार्यवाहैः । अतः प्राज्ञपाठशालामण्डलसंस्थायाः अध्यक्षपदं सदस्यत्वं च सर्वथा परित्यक्तमाचार्यचरणैः । ततश्च ते शके १८५३ विजया- दशम्यां (ईशवीयाब्दे १९३१ तमे ऑक्टोबरमासे २२ दिनाङ्के) प्रातः परिव्राजकाश्रमं प्रविष्टाः ।

प्राज्ञपाठशालासंस्थाप्रपञ्चान्निवृत्तेषु गुरुचरणेषु संस्थायाः सर्वः कार्यभारः मयि न्यस्तः प्राज्ञपाठशालामण्डलकार्यकर्तृभिस्तदध्यक्षपदं मह्यं दत्त्वा । माध्यमिकशिक्षाशाखा

त्स्वष्टव्या इत्येतत् गुरुचरणमतं युक्तमासीदिति मया वर्षत्रयादूर्ध्वं स्वीकृत्य तच्छाखा-कार्यं सर्वेषामैकमत्येन विरमितम्, धर्मकोशकार्यं संस्कृतविद्याशिक्षाकार्यं च अनुवर्तित-मद्ययावत्। गुरुचरणाश्च तदुत्तरं परिव्राजकावस्थायामैकाग्र्येण जैमिनीयबादरायणीय-मीमांसयोर्मनने, तदनुसंधानेन ग्रन्थलेखने, ब्रह्मचिन्तने, ध्यानयोगाभ्यासे च चिरं स्थिताः। प्राप्ते च प्रयाणसमये दीर्घकालं निरन्तरं निरन्तरायं च जपितस्य प्रणवस्यैकाक्षरब्रह्मणो व्याहारमुच्चैः कृत्वा केवले ब्रह्मणि लीनाः। तैः प्रणीतग्रन्थानां मुद्रणप्रकाशनकार्यस्य कर्तव्यता प्राज्ञपाठशालामण्डलसंस्थया गुरुचरणानामृणापाकरणाय स्वीकृताऽस्तीति।

तस्यैतस्य गुरुचरणचरित्रसारस्य संक्षिप्य निवेदनं परिसमाप्यते।

लक्ष्मणशास्त्री जोशी
अध्यक्षः प्राज्ञपाठशालामण्डलस्य
वाई नगरी

ग्रन्थादिसंक्षेपाक्षराणि तद्विवरणं च।

अद्वैत--अद्वैतसिद्धिः श्रीमधुसूदनसरस्वतीप्रणीता मोहमय्यां निर्णयसागरे १९१७ सने मुद्रिता।

अद्वैत. चं---अद्वैतसिद्धेः टीका लघुचन्द्रिका ब्रह्मानन्दी नाम।

अलंकारः---भाट्टालंकारः नाम मीमांसान्यायप्रकाशस्य टीका अनन्तदेवविरचिता। चौखम्बायां १९२१ सने मुद्रितः।

आचारमयूखः---श्री. ज. र. घारपुरे प्रकाशितः, मुम्बई।

आपध---आपस्तम्बधर्मसूत्रम्। प्रश्नः, कण्डिका, सूत्रं इति अङ्कत्रयम्।

आपस्तम्बाचार्यः---प्रसिद्धः कल्पसूत्रकारः।

आभरणम्---शांकरशारीरकभाष्यस्य टीका। अध्याय-पाद-सूत्राङ्काः। क्वचित् तृतीयोऽङ्कः अधिकरणस्य।

आर्षेयब्राह्मणम्--- सामवेदीयम्।

आश्व. गृ --- आश्वलायनगृह्यसूत्रम्, तत्रत्या नारायणवृत्तिश्च।

आश्व. श्रौ --- आश्वलायनश्रौतसूत्रम्। पुण्यपत्तनस्थानन्दाश्रमे मुद्रितम्।

इ--- इत्यादि।

उपदेशसाहस्री--- श्रीशंकराचार्यप्रणीता। रामतीर्थः टीकाकारः। प्रकरणश्लोकाङ्कौ गद्यं पद्यं च।

ऋजु--- ऋजुविमला नाम शाबरभाष्यव्याख्यानरूपायाः प्राभाकरीयबृहत्याः टीका श्रीशालिक-नाथप्रणीता। चौखम्बायां १९२९ सने मुद्रिता।

ऋसं--- ऋग्वेदसंहिता। मण्डलम्, सूक्तम्, ऋक् इत्यङ्कत्रयम्।

ऐब्रा--- ऐतरेयब्राह्मणम्। पुण्यपत्तनस्थानन्दाश्रमे १९३० सने मुद्रितम्। अध्यायः, खण्डः, सूत्रं इत्यङ्कत्रयम्।

ऐब्रासा--- ऐतरेयब्राह्मणस्य सायणप्रणीतं भाष्यम्। पुण्यपत्तनस्थानन्दाश्रमे १९३० सने मुद्रितम्।

कठोप--- कठोपनिषत्।

कणादसूत्रम्--- वैशेषिकदर्शनम्। अध्याय-आह्निक-सूत्राणामङ्काः।

कणिका---न्यायकणिका विधिविवेकस्य टीका वाचस्पतिमिश्रप्रणीता। काशी मेडिकल्हॉल-मुद्रणालये १९०७ सने मुद्रिता।

कर्क--- कर्काचार्यः, कात्यायनश्रौतसूत्रस्य भाष्यकारः।

कल्पतरु --- भामत्याः टीका। अमलानन्दसरस्वतीप्रणीतः, १९१७ सने मोहमय्यां निर्णय-सागरे मुद्रितः। अध्यायः, पादः, सूत्रं इत्यङ्कत्रयम्।

कस्तूरि — कस्तूरिरङ्गाचार्यविरचिता जैमिनिसूत्रवृत्तिः । १९०८ सने मैसूरनगरे मुद्रिता । सा च भाट्टदीपिकापुस्तके एव मुद्रिता ।

कातीयसूत्रम्— कात्यायनश्रौतसूत्रम् ।

काशीखण्डः— स्कन्दपुराणान्तर्गतः । रामानन्दः टीकाकारः । अध्याय-श्लोकाङ्कौ ।

कासं— काठकसंहिता ।

कु., कुतूहलम्— अध्वरमीमांसाकुतूहलवृत्तिः श्रीवासुदेवदीक्षितविरचिता श्रीरङ्ग-वाणीविलासे मुद्रिता । अध्यायः, पादः, अधिकरणम्, सूत्रं इत्यङ्कचतुष्टयम् ।

के.— केवलानन्दसरस्वती । तत्कृता जैमिनिसूत्रवृत्तिश्च ।

कैयटः— व्याकरणमहाभाष्यस्य टीकाकारः । काश्यां मुद्रितः ।

कौ., कौस्तुभ— मीमांसाकौस्तुभः खण्डदेवप्रणीतः । चौखम्बायां १९३९ सने मुद्रितः । अध्यायः, पादः, अधिकरणम्, सूत्रं इत्यङ्कचतुष्टयं पृष्ठाङ्कश्च ।

कौब्रा— कौषीतकिब्राह्मणम् । पुण्यपत्तने आनन्दाश्रमे १९११ सने मुद्रितम् ।

चन्द्रिका— अद्वैतसिद्धेः टीका ब्रह्मानन्दी नाम । निर्णयसागरे मुद्रिता ।

जै— जैमिनिकृतद्वादशलक्षणी । अध्यायः, पादः, अधिकरणम्, सूत्रं इत्यङ्कचतुष्टयम् ।

जैब्रा— जैमिनिब्राह्मणं सामवेदीयम् ।

टुप्— टुप्टीका नाम वार्तिकं कुमारिलभट्टप्रणीतम्, पुण्यपत्तने आनन्दाश्रमे शाबरभाष्येण सह १९३३ सनादौ मुद्रितम् । अध्यायः, पादः, अधिकरणम्, सूत्रं इत्यङ्कचतुष्टयम् ।

तत्त्व, तत्त्वप्रकाशिका — परिभाषेन्दुशेखरटीकायाः भूतेः टीका । २००२ संवति काश्यां मुद्रिता ।

तत्त्वबोधिनी— सिद्धान्तकौमुद्याः टीका निर्णयसागरीया १९२९ सने मुद्रिता ।

तन्त्ररत्नम्— टुप्टीकायाः पार्थसारथिप्रणीता टीका । लिखिता । अध्यायः, पादः, अधिकरणम्, सूत्रं चेति अङ्कचतुष्टयम् ।

ताण्ड्य— ताण्ड्यब्राह्मणं पञ्चविंशं नाम । अध्यायः, खण्डः, सूत्रं चेति अङ्कत्रयम् ।

ताण्ड्यसा— ताण्ड्यब्राह्मणस्य सायणप्रणीतं भाष्यम् ।

तैसं— तैत्तिरीयसंहिता । काण्डम्, प्रपाठकः, अनुवाकः इत्यङ्कत्रयम् ।

तैसंसा— तैत्तिरीयसंहितायाः सायणभाष्यम् ।

तौता— तौतातितमततिलकः भवदेवप्रणीतः मीमांसासूत्रवृत्तिरूपः अधिकरणरचनात्मकः । काश्यां मुद्रितः ।

नीतिमयूखः — श्री. ज. र. घारपुरे- प्रकाशितः, मुम्बई । पृष्ठाङ्कः ।

निरुक्त— यास्काचार्यप्रणीतं निरुक्तम् । अध्यायः खण्डश्च ।

नृ. पू. भा — नृसिंहपूर्वतापिन्याः भाष्यं शांकरम् ।

न्यायनि—न्यायनिर्णयः नाम शांकरशारीरकभाष्यस्य टीका आनन्दगिरिप्रणीता । अध्याय-पाद-सूत्राङ्काः ।

न्या. माला— न्यायरत्नमाला पार्थसारथिमिश्रप्रणीता । चौखम्बायां मुद्रिता ।

न्या. सू— न्यायदर्शनसूत्रम् । अध्यायः, आन्हिकम्, सूत्रं इति त्रयोऽङ्काः ।

पं— पङ्क्तिः ।

पञ्जिका— प्रकरणपञ्जिका श्रीशालिकनाथप्रणीता प्राभाकरमतानुसारिणी । अनेकप्रकरणात्मको ग्रन्थः । चौखम्बायां मुद्रितः ।

पराक्रमः — उपक्रमपराक्रमः अप्पय्यदीक्षितप्रणीतः । लिखितः । पत्रम्, पृष्ठं इत्यङ्कद्वयम् ।

परि— परिभाषा । क्रमाङ्कः ।

परिभाषेन्दुः— परिभाषेन्दुशेखरः नागेशप्रणीतः । काश्यां २००२ संवति मुद्रितः ।

परिमल — भामत्याष्टीकायाः कल्पतरोः टीका । अप्पय्यदीक्षितविरचितः मोहमय्यां निर्णयसागरे १९१७ सने मुद्रितः ।

पा — पाणिनिः । अध्यायः, पादः, सूत्रं इत्यङ्कत्रयम् ।

पुरुषार्थचिन्तामणिः — श्रीविष्णुभट्टविरचितः । मोहमय्यां मुद्रितः ।

पृ— पृष्ठम् ।

प्र. पञ्जिका— प्रकरणपञ्जिका श्रीशालिकनाथप्रणीता । काश्यां विद्याविलासयन्त्रालये १९०४ सने मुद्रिता ।

प्र. वि— प्रभाकरविजयः नन्दीश्वरविरचितः । कलिकातायां १९२७ सने मुद्रितः ।

प्रा. मयूखः — प्रायश्चित्तमयूखः । ज. र. घारपुरे- प्रकाशितः । पृष्ठाङ्कः ।

बाल— बालमीमांसाप्रकाशः शंकरभट्टप्रणीतः । काश्यां विद्याविलासमुद्रणालये १९०२ सने मुद्रितः ।

बिन्दुः— न्यायबिन्दुः तत्सदुपाख्यवैद्यनाथप्रणीतः । मुम्बई गुजरातीमुद्रणालये १९१५ सने मुद्रितः ।

बृहती— शाबरभाष्यस्य प्रभाकरमतानुसारिणी टीका । नव्यप्राभाकरमतमत्र । चौखम्बायां १९२९ सने मुद्रिता ।

बृहस्पतिः— बृहस्पतिस्मृतिः ।

बौध —बौधायनधर्मसूत्रम् । प्रश्नः पटलं सूत्रं च ।

ब्रसू—ब्रह्मसूत्रम् । अध्यायः, पादः, सूत्रं इत्यङ्कत्रयम् । अङ्कचतुष्टये सति तृतीयोऽङ्कः अधिकरणस्य ।

भगी—भगवद्गीता । अध्यायः श्लोकश्च ।

भट्टसोमेश्वरः— तन्त्रवार्तिकटीकायाः न्यायसुधायाः कर्ता ।

भा— शाबरभाष्यम् । आनन्दाश्रमे मुद्रितम् । अध्यायः, पादः, अधिकरणम्, सूत्रं इत्यङ्कचतुष्टयम् । क्वचित् पृष्ठाङ्कः अधिकः ।

भाट्ट— भाट्टदीपिका नव्यमीमांसकखण्डदेवप्रणीता । मैसूर १९०८ सने मुद्रिता । अध्यायः, पादः, अधिकरणमिति अङ्कत्रयम् ।

भाट्टालंकारः— न्यायमीमांसाप्रकाशस्य टीका अनन्तदेवविरचिता । चौखम्बायां १९२१ सने मुद्रितः ।

भामती— श्रीवाचस्पतिमिश्रप्रणीता शांकरशारीरकभाष्यस्य टीका । मुम्बई निर्णयसागरे १९१७ सने मुद्रिता ।

भावनाविवेकः— मण्डनाचार्यप्रणीतः काश्यां १९२३ सने मुद्रितः।

भूतिः— परिभाषेन्दुशेखरस्य टीका श्रीतात्याशास्त्रीपटवर्धनप्रणीता। काश्यां २००२ संवति मुद्रिता।

मणि— भाट्टचिन्तामणिः गागाभट्टविरचितः। तर्कपादमात्रम्। चौखम्बायां १९०० सने मुद्रितः।

मण्डन— मण्डनमिश्रकृता मीमांसानुक्रमणी। चौखम्बायां १९२९ सने मुद्रिता।

मीको— मीमांसाकोशः।

माघ— माघकविकृतं शिशुपालवधं नाम महाकाव्यम्। सर्गः, श्लोकः इत्यङ्कद्वयम्।

मीन्या— मीमांसान्यायप्रकाशः श्रीआपदेवप्रणीतः। चौखम्बायां १९२० सने मुद्रितः।

मीमांसाजीवरक्षा— प्राभाकरमतानुसारिणी शालिकनाथप्रणीता। प्रकरणपञ्जिकापुस्तके अन्ते काश्यां १९०४ सने मुद्रिता।

मुरारिः— अङ्गत्वनिरुक्तिकर्ता। आनन्दाश्रमीये मीमांसादर्शने तृतीये भागे अन्ते १९३१ सने मुद्रिता।

मेधातिथिः— मनुस्मृतेः भाष्यकारः।

याज्ञ, यास्मृ— याज्ञवल्क्यस्मृतिः। अध्यायः, श्लोकः इति द्वौ अङ्कौ।

रत्न, तन्त्ररत्न— तन्त्ररत्नम्। पार्थसारथिमिश्रप्रणीतम्। टुप्टीकावार्तिकस्य टीका। लिखिता। अध्यायः, पादः, अधिकरणम्, सूत्रं इत्यङ्कचतुष्टयम्।

रत्नमाला— न्यायरत्नमाला पार्थसारथिमिश्रप्रणीता। चौखम्बायां मुद्रिता।

रत्नाकरः— न्यायरत्नाकरः श्लोकवार्तिकस्य टीका पार्थसारथिमिश्रप्रणीता। चौखम्बायां १८९८ सने मुद्रितः।

रसायनम्— विधिरसायनं अप्पय्यदीक्षितप्रणीतम्। चौखम्बायां १९०१ सने मुद्रितम्।

रहस्य— भाट्टरहस्यं श्रीखण्डदेवप्रणीतम्। शाब्दबोधविषयकम्। काञ्चीनगरे मुद्रितम्।

लाट्या— लाट्यायनश्रौतसूत्रम्। कलिकातायां १८७२ सने मुद्रितम्।

वा— तन्त्रवार्तिकं आचार्यकुमारिलभट्टविरचितं शाबरभाष्यस्य विवरणात्मकम्। पुण्यपत्तने आनन्दाश्रमे भाष्येण सह १९३१ सने मुद्रितम्। अध्यायः, पादः, अधिकरणम्, सूत्रं चेति अङ्कचतुष्टयम्।

वाक्यार्थ— वाक्यार्थमातृकावृत्तिः शालिकनाथप्रणीता। प्रकरणपञ्जिकापुस्तके एव अन्ते १९०३ सने मुद्रिता।

वाध— वासिष्ठधर्मसूत्रम्।

वि— जैमिनीयन्यायमालाविस्तरः सायणमाधवाचार्यप्रणीतः। पुण्यपत्तने आनन्दाश्रमे १९१६ सने मुद्रितः। अध्यायः, पादः, अधिकरणं चेति अङ्कत्रयम्।

विट्ठल— विट्ठलेशी अद्वैतसिद्धेः चन्द्रिकाटीकायाः टीका। निर्णयसागरे १९१६ सने मुद्रिता।

विवि— विधिविवेकः मण्डनाचार्यप्रणीतः। काश्यां मेडिकल्हॉलमुद्रणालये १९०७ सने मुद्रितः।

वृ— मीमांसासूत्रवृत्तिः सुबोधिनी नाम रामेश्वरसूरिविरचिता। काश्यां मेडिकल्हॉलमुद्रणालये १९२३ सने मुद्रिता।

वैजयन्ती— महादेवकृता सत्याषाढश्रौतसूत्रवृत्तिः। पुण्यपत्तने आनन्दाश्रमे १९०७ सने मुद्रिता।

वैद्यनाथः— शाबरभाष्यीयतर्कपादस्य टीकाकारः। आनन्दाश्रमे १९२९ सने मुद्रिता वैद्यनाथी नाम।

वैद्यनाथी— वैद्यनाथकृता शाबरभाष्यस्य टीका।

व्यवहारमयूखः— श्री ज. र. घारपुरे- प्रकाशितः मुम्बई।

शंकर— शंकरभट्टकृतः मीमांसासारसंग्रहः। काश्यां विद्याविलासमुद्रणालये प्रकरणपञ्जिका-पुस्तकान्ते १९०४ सने मुद्रितः।

शब्दकौस्तुभः— भट्टोजीदीक्षितप्रणीतः।

शांभा— शांकरं भाष्यम्। अध्यायः, पादः, सूत्रं चेत्यङ्कत्रयम्। चतुरङ्कत्वे तु तृतीयोऽङ्कः अधिकरणस्य।

शांश्रौ— शाङ्खायनश्रौतसूत्रम्। अध्यायः, खण्डः, सूत्रं च। कलिकातायां १८८८ सने मुद्रितं सभाष्यम्।

शा— शास्त्रदीपिका पार्थसारथिमिश्रप्रणीता। निर्णयसागरे १९१५ सने मुद्रिता। अध्यायः, पादः, अधिकरणं चेति अङ्कत्रयम्।

शास्त्रप्रकाशिका— बृहदारण्यकोपनिषच्छांकरभाष्यगतवार्तिकस्य आनन्दगिरिकृता टीका आनन्दाश्रमे मुद्रिता।

शेखर— परिभाषेन्दुशेखरः नागेशप्रणीतः। काश्यां २००२ संवति मुद्रितः भूत्यादिसहितः।

श्राद्धमयूखः— श्री ज. र. घारपुरे- प्रकाशितः मुम्बई।

श्रीकर— ब्रह्मसूत्रभाष्यकारः शैवमतानुसारी।

श्लोवा— श्लोकवार्तिकं आचार्यकुमारिलभट्टविरचितम्। तर्कपादः। चौखम्बायां १८९८ सने मुद्रितम्।

संकर्ष— संकर्षकाण्डम्। भास्करभट्टप्रणीता भाट्टचन्द्रिका भाट्टदीपिका वा वृत्तिः। काश्यां मेडिकल्हॉलमुद्रणालये १८९४ सने मुद्रिता।

संक्षेपशारीरकम्— रामतीर्थकृतटीकासहितम्। अध्यायः, श्लोकः इति अङ्कद्वयम्।

संग्रहः— न्यायसंग्रहः। लिखितः।

सत्याषाढः— तैत्तिरीयहिरण्यकेशिशाखीयकल्पसूत्रं आनन्दाश्रमे १९०७ सने मुद्रितम्।

सत्याश्रौ— सत्याषाढीयं श्रौतसूत्रम्। आनन्दाश्रमे १९०७ सने मुद्रितम्।

सदसं— सर्वदर्शनसंग्रहः।

सना. ध. प्र— सनातनधर्मप्रदीपः। श्रीकुकरमुण्डेकरमहाराजप्रेरितैः म. म. अनन्तकृष्ण-शास्त्रिभिः प्रणीतः।

समयमयूखः— श्री. ज. र. घारपुरे इत्येतैः प्रकाशितः, मुम्बई ।

साहस्री— भुवनेशलौकिकन्यायसाहस्री । मुंबई श्रीवेङ्कटेश्वरे मुद्रितः शकः १८३० । साहस्र्यां यो न्यायक्रमाङ्को निवेशितः स एवास्माभिः प्रदर्श्यते ।

सिद्धान्तकौमुदी— भट्टोजीदीक्षितप्रणीता । निर्णयसागरे १९२९ सने मुद्रिता ।

सिद्धान्तचन्द्रिका— तर्कपादस्थशास्त्रदीपिकायाः टीका रामकृष्णप्रणीता निर्णयसागरे १९१५ सने शास्त्रदीपिकया सह मुद्रिता ।

सु., सुधा— न्यायसुधा भट्टसोमेश्वरविरचिता राणकापरपर्याया तन्त्रवार्तिकस्य टीका चौखम्बायां मुद्रिता । अत्र पृष्ठाङ्का एव केवलमुपन्यस्ताः । यत्र च 'सु ३।७ पृ.' इति स्यात् तत्र सुधायाः तृतीयाध्यायस्य सप्तमाष्टमपादात्मके भागे ग्रन्थान्ते मुद्रिते पृष्ठं अमुकं इत्यर्थः । तत्र भागे किल पृथगेव अङ्का मुद्रिता आदित आरभ्य ।

सोम— सोमनाथी मयूखमालिका शास्त्रदीपिकायाष्टीका अर्थवादाधिकरणमारभ्य द्वादशाध्यायान्ता । निर्णयसागरे १९१५ सने शास्त्रदीपिकया सह मुद्रिता । अत्र अध्यायः, पादः, अधिकरणं इति अङ्कत्रयम् ।

मीमांसाकोषः

प

* 'पक्षान्तरैरपि परिहारा भवन्ति'। अन्यथा कृत्वा दोष उक्तः, अन्यथा परिहारः । दार्शपौर्णमासिको यावज्जीवकालः इति कृत्वा दोष उक्तः । नैयमिक इति परिहारः । भा. १२।२।६।२०. * 'पक्षान्तरैरपि परिहारा भवन्ति' इति **महाभाष्यं** ऋलृक्सूत्रे । अत्र **कैयटः**– यथा द्रव्यपक्षे सरूपाणां इत्यस्यारम्भः, जातिपक्षे तु प्रत्याख्यानम् । इति । पक्षान्तरैरपि० वार्तिककृता एवमुक्तं इति विवरणम् । **के.** * 'पक्षान्तरैरपि परिहारा भवन्ति'। 'विभाषा छन्दसि' इति वैकल्पिकमैकश्रुत्यं (सूत्रेषु) अङ्गीकृत्य पक्षान्तरैरपि० इति न्यायेन तत्रतत्राद्युदात्तनिपातनं करिष्यते इत्युक्तं भाष्ये । **शब्दकौस्तुभः** वृद्धिरादैच् .

* **पक्षेतरत्वं** नोपाधिः, साध्यव्यापकत्वग्राहकमानाभावात् । **मणि.** पृ. ३५.

* **पक्षोक्तेनैव** प्रयोजनेन भवितव्यं इति न नियमः । **वा.** ३।४।१४।३७.

* **पक्षता** असत्यां सिद्धौ सत्यां वा, सत्यामनुमित्सायां उभयासत्त्वे वा अनुमितेरुदयात् अनुमित्साविरहविशिष्टायाः सिद्धेरभावः । अनुमित्सा च यादृशयादृशेच्छासत्त्वे अनुमितिः सा सा विवक्षिता । तेन 'प्रत्यक्षभिन्नं वह्निज्ञानं जायताम्' 'आलोकेन वह्निज्ञानं जायताम्' इत्यादीच्छासंग्रहः । अत्रायं निष्कर्षः– तत्साध्यताऽवच्छेदकावच्छिन्नसाध्यविशिष्टतत्पक्षताऽवच्छेदकविशिष्टभिन्नाविषयिका, अनुमितित्वभिन्नप्रमितिविभाजकधर्माविषयकतल्लिङ्गताऽवच्छेदकावच्छिन्नलिङ्गकत्वाप्रकारकत्वे सति तदन्यलिङ्गताऽवच्छेदकावच्छिन्नलिङ्गकत्वाप्रकारिका, तल्लिङ्गताऽवच्छेदकावच्छिन्नलिङ्गकानुमितित्वावच्छिन्नानुद्देश्यकत्वे सति तल्लिङ्गताऽवच्छेदकाविरुद्धधर्मविशिष्टलिङ्गकानुमितित्वावच्छिन्नानुद्देश्यिका, तद्विशिष्टलिङ्गकत्वाप्रकारकत्वे सति तद्विरुद्धधर्मविशिष्टलिङ्गकत्वाप्रकारिका-तल्लिङ्गकालान्यकालाविषयिणी या तदन्यानुमित्सा, तद्विरहविशिष्टसिद्ध्यभावः पक्षता इत्यर्थः ।

अत्र 'तत्साध्यताऽवच्छेदकावच्छिन्नसाध्यविशिष्टतत्पक्षताऽवच्छेदकविशिष्टभिन्नाविषयिका' इति निवेशात् 'पर्वते वह्न्यनुमितिर्जायताम्' 'प्रत्यक्षातिरिक्तं ज्ञानं जायताम्' पर्वते वह्निप्रत्यक्षम्, तद्–व्याप्यपरामर्शः, विषयान्तरे च अनुमितिसामग्र्यभावः, तत्र 'यत्किंचिज्ज्ञानं जायताम्' इतीच्छादीनां संग्रहः । 'अनुमितित्वभिन्नप्रमितिविभाजकधर्माविषयक' इति निवेशात् अनुमितौ प्रत्यक्षत्वभ्रमदशायाम् 'पर्वतो वह्निमान् इति प्रत्यक्षं जायताम्' इतीच्छाया न संग्रहः । तल्लिङ्गताऽवच्छेदकावच्छिन्नलिङ्गकत्वाप्रकारकत्वे सति तदन्यलिङ्गताऽवच्छेदकावच्छिन्नलिङ्गकत्वाप्रकारिका इति निवेशात् धूमत्वावच्छेदेन व्याप्यत्वपरामर्शदशायां द्रव्यत्वावच्छेदेन द्रव्यत्वावच्छिन्नलिङ्गकानुमितीच्छाया न संग्रहः । तल्लिङ्गताऽवच्छेदकावच्छिन्नलिङ्गकानुमितित्वावच्छिन्नानुद्देश्यकत्वे सति तल्लिङ्गताऽवच्छेदकाविरुद्धधर्मविशिष्टलिङ्गकानुमितित्वावच्छिन्नानुद्देश्यिका इति निवेशात् 'धूमेन आलोकेन च वह्न्यनुमितिर्जायताम्' इतीच्छाया न संग्रहः । यत्र द्रव्यत्वस्य लिङ्गताऽवच्छेदकत्वानुल्लेखिनी 'द्रव्येण वह्निमनुमिनुयाम्' इतीच्छा, तस्याः संग्रहश्च । तद्विशिष्टलिङ्गकत्वाप्रकारकत्वे सति तद्विरुद्धधर्मविशिष्टलिङ्गकत्वाप्रकारिका इति निवेशात् यत्र आलोकत्वस्य अवच्छेदकत्वानवगाहिनी 'आलोकेन वह्निमनुमिनुयाम्' इतीच्छा तस्या न संग्रहः । तल्लिङ्गकालान्यकालाविषयिणी इति निवेशात् 'पूर्वकालीनपर्वतीयधूमेन वह्न्यनुमितिर्जायताम्' इतीच्छाया न संग्रहः । 'गौडप्रलापैः स्वकपोलकल्पितैरिच्छासमारब्धमृषार्थकार्यैः । वृथैव कालक्षपणं विचिन्त्य चिन्ता मयोपैक्षि खपुष्पतुल्या ॥' **मणि.** पृ. ३५–३७.

* **पक्षवत्** — यथा पञ्चम्यांपञ्चम्यां भुङ्क्ते इति पक्षान्तरम् (शुक्ले कृष्णे) गम्यते । **भा.** १०।५। १४।५६.

* **पक्षिणो** नाशितव्या इत्यग्निचिद्व्रतम् । यागान्ते अस्य अनुष्ठानम् । **भा.** ५।३।१०।२६.

卐 'द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च' इत्यादिनोक्तं रूपद्वयं निषिध्यते चेत् **पङ्कप्रक्षालनन्यायात्** प्रसज्यप्रतिषेधे गौरवं स्यात् । तथापि कथं पङ्कप्रक्षालनन्यायो न स्यात् । ('प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्' इत्यस्यैव संक्षेपरूपोऽयं न्यायः ।) **न्यायनि.** ३।२।६।२२ ब्रसू.

* सुकृतशब्दस्य सर्वपुण्यविषयत्वात् अग्निहोत्रादीनामपि पुण्यान्तरवत् विनाश्यत्वात् **पङ्कप्रक्षालनन्यायापातात्** आरुरुक्षुणाऽपि तानि नानुष्ठेयानि इति प्राप्यय सिद्धान्तयति । **न्यायनि.** ४।१।१२।१६ ब्रसू.

* **पङ्कजादिशब्दानां** प्रयोगव्यवस्थापकपद्मत्वजात्याद्यधीनान्यवस्थितविषयत्वं दृश्यते । **सु. पृ.** ११००.

* **पङ्कजशब्दस्य** विशिष्टविषयप्रयोगान्यथाऽनुपपत्त्या पद्मत्वैकार्थसमवेतपङ्कजननविशेषनिमित्तत्वावधारणात् व्यवस्था । **सु. पृ.** ४०७.

* **पङ्क्तिः** । पादेषु अक्षराणि ८।८।८।८।८ । उदा० 'दानासः पृथुश्रवसः' (ऋसं. ८।४६।२४) । **के.**

* **पङ्क्त्युत्तरा त्रिष्टुप्** । पादेषु अक्षराणि १०। १०।८।८।८ । उदा० 'एवेन्द्राग्निभ्यामहा' (ऋसं. ५।८६।६) । इयमेव विराट्पूर्वा त्रिष्टुप् । **के.**

* **पङ्क्तिपावनाः** । 'अग्र्याः सर्वेषु वेदेषु सर्वप्रवचनेषु च । श्रोत्रियाश्च यजानाश्च विज्ञेयाः पङ्क्तिपावनाः ॥' (मनुः ३।१८४) । **सु. पृ.** ३३०.
* पङ्क्तिपावनाः । मनुना पङ्क्तिपावनमध्ये 'यश्च व्याकुरुते वाचं यश्च मीमांसतेऽध्वरम् । तावुभौ पुण्यकर्माणौ पङ्क्तिपावनपावनौ ॥' इत्युक्तम्, तत् वेदादेव उपलभ्य उक्तम् । **वा.** १।३।८।२७.

* **पचत्यादिशब्दोच्चारणात्** इयन्तोऽर्थाः गम्यन्ते— भावना—धात्वर्थ—कर्तृ—तत्संख्या—पुरुष—उपग्रह (परस्मैपदात्मनेपदत्वं)—कालविशेषाः । तेषां तु कः शाब्दः कोऽर्थात् इति विभागो न ज्ञायते । लक्षणं चैतावत् योऽर्थान्न गम्यते स शब्दार्थ इति । भावनायास्तावन्न शब्दव्यतिरिक्तं प्रत्यायकं पश्यामः । संभवन्ति हि विनाऽपि भावनया कालसंख्यादयः । **वा.** ३।४।४।१३ पृ. ९१३.

* **पचेः** विक्लेदनफलकाधिश्रयणादिप्रयोजकव्यापारवाचित्वं प्रसिद्धम् । **सु. पृ.** १५०५.

* **पच्यादेश्च** स्वरूपेण कर्मसाकाङ्क्षत्वेऽपि अविवक्षादशायां अकर्मकत्वात् ओदनस्य पच्यते इति भावेऽपि प्रयोगः । **रहस्य. पृ.** ५१.

* **पच्यादिधातोः** विक्लित्यादिफले अनुकूलव्यापारे च प्रत्येकं शक्तिः, न विशिष्टे । व्यापारश्च आत्मनिष्ठः प्रयत्नः, फूत्कारादिः शरीरगता चेष्टा च । अनुकूलत्वस्य संसर्गमर्यादालभ्यत्वात् न तत्र शक्तिः । यावत्सु च व्यापारेषु पचतीतिप्रयोगः, तावत्सु प्रत्येकं शक्तिः । शक्यताऽवच्छेदकं च तावदन्यतमत्वम् । इति **वैयाकरणाः** । **मणि. पृ.** १०४.

['**पञ्च**'शब्दारब्धलघुसिद्धान्तसमाप्त्युत्तरं '**पञ्चम**'-शब्दो द्रष्टव्यः । **के.**]

* **पञ्च** पञ्चनखा भक्ष्याः इति शशादीनां पञ्चानां (शश — शल्यक— गोधा— कच्छप— खड्गानाम्) कीर्तनात् अन्येषां भक्षणं प्रतिषिध्यते परिसंख्यया इत्ययमर्थो वाक्येन गम्यते । **भा.**१०।७।९।२८.

卐 **पञ्च पञ्चनखा भक्ष्या इति स्मृतिन्यायेन** अनुगतविपरीतभाषणप्रतिषेधः अर्थापत्तिसिद्धः स्मर्यते । **वा.** १।३।८।२४ पृ. २५४ । यथा पञ्चनखानां मध्ये पञ्चैव शशादयो भक्ष्या इति नियमे कृते ततोऽन्येषां श्वादीनामभक्ष्यत्वं गम्यते, तथा गवादय एव साधवः इति नियमे कृते अन्येषामसाधुत्वावगतिरित्यर्थः । **सु.** पृ. २६४.

* 'पञ्च पञ्चनखा भक्ष्याः' इयं प्राप्तपरिसंख्या त्रिदोषा स्मार्ता । **बाल. पृ.** २५.

卐 **पञ्चभिर्मिलितैः किं यज्जगतीह न साध्यते इति न्यायः** । अयं पञ्चभिरेकमतिजनैः सर्वमेव साध्यते इति विवक्षायामवतरतीति । **साहस्री.** ९४२.

* **पञ्चाक्षरतद्धितान्तपदवत्त्वं** चोदनालिङ्गं अतिदेशकरम् 'अग्नीषोमीयमेकादशकपालम्' इत्यस्य प्राकृतस्य 'आग्नावैष्णवमेकादशकपालम्' इत्येवंरूपेषु 'द्यावापृथिव्यमेककपालम्' इत्यत्रापि च । **बाल. पृ.** १२०.

* **पञ्चाग्निष्टोमः** संस्थागणः अग्निष्टोमस्य पञ्चकृत्वोऽभ्यासेन जायमानो गणः । तत्र द्वादशाहस्य विध्यन्तः संघत्वलिङ्गात् । स्तोत्राणि तु ज्योतिष्टोमादेव न द्वादशाहात् । **वि.** ८।३।४–५.

* **पञ्चानुगानमध्ये** सामत्रयं अनृक्कम् । **बाल. पृ.** ७२.

* **पञ्चावत्तं** अवदानं जामदग्न्यादीनाम् । (**मीको. पृ.** ६९२ । **संकर्ष.** २।२।६. * पञ्चावत्तं जमदग्नीनां इति तद्गोत्राणामेव भवति । **भा.** ६।७।१२।२८. * पञ्चावत्तं भृगूणाम् । **वा.** १।३।७।१७. * **पञ्चावत्तैव** वपा, यद्यपि चतुरवत्ती यजमानः । **भा.** १०।७।१९।६४.
* **पञ्चावत्ते** अवदाने तृतीयं पश्चार्धाद्गुत्तरार्धाद्वा । (**मीको. पृ.** ६९३ द्रष्टव्यम्) । **संकर्ष.** २।२।९.
* पञ्चावत्ते अवदाने पञ्चममभिघारणात् प्रागेव । (**मीको.** पृ. ६९४ द्रष्टव्यम्) । **संकर्ष.** २।२।८.
* पञ्चावत्ते अवदाने पञ्चममौपभृतस्यैव । (**मीको.** पृ. ६९४ द्रष्टव्यम्) । **संकर्ष.** २।२।७.

* **पञ्चावत्तता** अग्नीषोमीये पशौ वपायामिव हृदयाद्यङ्गेष्वपि । (**मीको.** पृ. १२० अग्नीषोमीये पशौ इत्यत्र द्रष्टव्यम्) । **भा.** १०।७।२०।७२–७३.

* **पञ्चावत्तिनः** 'जामदग्न्या वत्सविदा वार्ष्टिषेणाश्च ते त्रयः । पञ्चावत्तिन एवान्ये सर्वे चतुरवत्तिनः ॥' **गोभिलगृह्ये**— 'जामदग्न्या वत्सविदा वार्ष्टिषेणास्तथैव च । भार्गवाश्च्यावना और्वाः पञ्चावत्तिन ईरिताः ॥' । **वि.** टिप्पणी च १०।७।२०.

* **पञ्चार्षेयस्य** नास्ति आर्षेयवरणविशिष्टकर्माधिकार इति जैमिनिमतम् । अस्ति तस्याप्यधिकार इति ऋष्यन्तरमतम् । पञ्चार्षेयेणापि कर्मणि त्रिप्रवरा एव उच्चार्या इति मतान्तरम् । **भाट्ट.** ६।१।११.

* **पञ्चेन्द्रोपाख्यानम्** । इन्द्रस्य त्वष्टृपुत्रवधात् तेजो धर्ममाविशत्, बलं वायुम्, रूपमश्विनौ, अर्धमात्मन्यतिष्ठत् । ततः पाण्डुपत्न्यां कुन्त्यां धर्मेण तेजो निक्षिप्तं युधिष्ठिरोऽभवत्, वायुनिक्षिप्तं बलं भीमः, इन्द्रनिक्षिप्तं देहार्धमर्जुनः, अश्विभ्यां माद्र्यां निक्षिप्तं रूपं नकुलसहदेवौ । इति पञ्चापि इन्द्रावयवप्रकृतित्वात् इन्द्रा एव इति । **सु. पृ.** ७१३.

* **पञ्चोक्थ्यः** उक्थ्यस्तोत्रेण प्रत्यहं समाप्यमानस्य यागस्य पञ्चकृत्वः करणे जायमानो गणः । तत्र द्वादशाहविध्यन्तः संघत्वलिङ्गात् । स्तोत्राणि तु ज्योतिष्टोमादेव ग्राह्याणि, न द्वादशाहात् । **वि.** ८।३।४–५.

* **पञ्चोक्थ्यादिषु** उक्थ्यादिगतानां स्तोत्राणामतिदेशः । **भा.** ८।३।५।१०–११.

* **पञ्चोक्थ्यादिसंस्थागणेषु** द्वादशाहधर्माणामतिदेशः परन्तु उक्थ्यसंस्थता । **भा.** ८।३।४।८–९.

* '**पञ्चकृत्वः** द्विर्वा अह्नो भुङ्क्ते' इयमधिकरणे षष्ठी कारकविभक्तिरूपा विनियोक्त्री श्रुतिः । **बाल.** पृ. ४५.

卐 **पञ्चकोशावतरणन्यायः** । अयं श्रुतिमात्रसिद्धत्वान्न लौकिकः । **साहस्री.** ८१५. * पञ्चकोशावतरणन्यायः (१।१।६।१२ ब्रसू.) प्रसिद्धो हि स्थूलारुन्धती–शाखाचन्द्रादिन्यायो लोके, पञ्चकोशावतरणन्यायश्श्रोत्रमीमांसायाम् । **शब्दकौस्तुभः स्फोट.** (सर्वं वाक्यं तु स्थूलारुन्धतीन्याये द्रष्टव्यम्) ।

* '**पञ्चदशान्याज्यानि** भवन्ति' इत्यत्र (१।४।२) रूढिपरित्यागेन कथञ्चिन्नामधेयत्वाश्रयणम् । **वाक्यार्थ.** पृ. २०. * **पञ्चदशोऽ**तिरात्रः वीर्यकामस्य । कातीये । **बाल.** पृ. ३४. * पञ्चदशः स्तोमविशेषः । अयं शब्दः पञ्चदशसंख्याकत्वरूपगुणविधायकः । **वि.** १।४।३, * पञ्चदशः स्तोमविशेषः अष्टरात्रे द्वितीयेऽहनि इत्यादौ । ७।३।१०, * पञ्चदशः स्तोमविशेषः ज्योतिष्टोमे । ५।३ १५, * **पञ्चदशस्य** स्तोमस्य विष्टुतिरेवम्, प्रथमात्तृचौ

प्रथमाया ऋचस्त्रिरभ्यासः । द्वितीयावृत्तौ मध्यमायाः, तृतीयावृत्तौ तु उत्तमायाः इति । १।४।३.

* पञ्चदशरात्रं नाहीनः किन्तु सत्रं उपायिचोदनात् 'ये एव भूतिकार्यमिच्छन्तस्ते एनं पञ्चदशरात्रमुपेयुः' इति । भा. ८।२।६।२९-३२. * पञ्चदशरात्रः सत्ररूपः उपायिचोदनत्वात् 'यदन्यतरतोऽतिरात्रस्तेनाहीनः' इत्यहीनत्वोक्तिस्तु स्तुतिः । तथा च तत्र सत्रधर्मातिदेशः । अन्यतरतोऽतिरात्रत्वं अहीनलिङ्गम् । उभयतोऽतिरात्रत्वं सत्रलिङ्गम् । वि. ८।२।६. * पञ्चदशरात्रे अग्निष्टुदेकाहः प्रथममहः । ततो ज्योतिर्गौरायुः इति त्र्यहः । परिशिष्टानि एकादशाहानि द्वादशाहप्रकृतीनि । भा. १२।२।७।२२. * पञ्चदशरात्रे अग्निष्टुन्नाम आग्नेयीसुब्रह्मण्याप्रवर्तकं ज्योतिरादिनाम्ना ऐन्द्रीसुब्रह्मण्याप्रवर्तकेन बाध्यते । बाल. पृ. १३२. * पञ्चदशरात्रे प्रथमाहे सुत्याकालीनसुब्रह्मण्या आग्नेयी, चतुर्दशसु अहःसु च ऐन्द्री । तस्याः प्रत्यहं भेदेनैवानुष्ठानात् । 'उपसत्कालीना तु सुब्रह्मण्या प्रथमाहेऽपि ऐन्द्री एव कार्या भूयसामनुग्रहात्' इति भाष्यमतम् । (प्रथमाहे उभे अपि सुब्रह्मण्ये कर्तव्ये इति शा. भाट्ट. च) । वि. १२।२।७. * पञ्चदशरात्रे या तावत् वसतीवरीग्रहणोत्तरकाला सुब्रह्मण्या, सा प्रतिदिवसं क्रियते (तत्कालात्वावर्तेत० ११।३।११।२३ अत्रत्यन्यायात्) यथादेवतं च अग्निष्टुति आग्नेयी । अन्येषु ऐन्द्री । या तु आतिथ्याऽन्ते उपसत्सु च सुब्रह्मण्या, तत्रापि देवतासंस्कारकत्वात् निगदस्य यथादेवतमेव तन्त्रभेदः । नास्ति तन्त्रेण द्विहोच्चारणम् । तस्मात् द्वे अपि सुब्रह्मण्ये आह्वातव्ये । टुप्. १२।२।७।२२. * पञ्चदशरात्रे सत्रात्मकद्वादशाहधर्माणामतिदेशः । (मीको. पृ. २१२ द्रष्टव्यम्) । भा. ८।२।६।३०-३२.

* पञ्चदशरात्रगते अग्निष्टुति सुब्रह्मण्या ऐन्द्री एव कार्या भूयसामनुग्रहाय । भा. १२।२।७।२२.

* पञ्चदशरात्रस्वरूपम् 'त्रिवृदग्निष्टुदग्निष्टोमः, त्रिरामः, दशरात्र उदयनीयोऽतिरात्रः' इति । वि. ८।२।६.

* पञ्चदशसप्तदशादिपदानां अभ्याससाध्यपञ्चदशत्वादिविशिष्टऋक्समुदाये शक्तिः । मणि. पृ. १६४.

* पञ्चदशस्तोमे आवृत्तगानम् । आवृत्तगानं नाम ऋचामावृत्त्या संख्या यत्र पूर्यते तादृक् सामगानम् । वि. ५।३।४.

* पञ्चनखानां मध्ये पञ्चैव भक्ष्याः इति नियमे कृते ततोऽन्येषां श्वादीनां अभक्ष्यत्वं गम्यते । सु. पृ. २६४.

* पञ्चरात्रे चयनं कर्तुं शक्यते । भा. १०।५। २३।७८.

* पञ्चशरावः ओदन ऐन्द्रः, दर्शे एकदोहनाशे द्वयोरपि वा दोहयोर्नाशे प्रायश्चित्तम् । वि. ६।४।६, तच्च द्रव्यदेवताविशिष्टं कर्मान्तरम्, न तु द्रव्यरूपो दोहस्य प्रतिनिधिः । ६।४।९, तच्च कर्मान्तरमपि पयोऽन्तरेण दध्यन्तरेण चानुष्ठीयमानस्य दर्शस्याङ्गम् । ६।४।१०. * पञ्चशरावः ओदनः । पञ्चशरावाः परिमाणमस्य इति 'तदस्य परिमाणम्' इति (परिमाणार्थकः ठञ्) तद्धितार्थे विवक्षिते 'तद्धितार्थोत्तरपदसमाहारे च' (तद्धितार्थे विषये उत्तरपदे च परतः समाहारे च वाच्ये दिक्संख्ये समस्येते) इति समासे ततः उत्पन्नस्य आर्हीयस्य ठञ्-प्रत्ययस्य 'अध्यर्धपूर्वद्विगोर्लुक्' इति लुकि पञ्चशरावशब्दो निष्पन्नः । सोम. ६।४।९.

पञ्चशरावस्तु द्रव्यश्रुतेः प्रतिनिधिः स्यात् । ६।४।९।२८ ॥

दर्शपूर्णमासयोः 'यस्योभयं हविरार्तिमार्छेत् ऐन्द्रं पञ्चशरावमोदनं निर्वपेत्' इति श्रुतः पञ्चशरावः सांनाय्यहविषः प्रतिनिधिः स्यात् । निर्वापे द्रव्यस्य श्रुतेः श्रवणात् । कर्मान्तरविधिपक्षे तु द्रव्यदेवतासंबन्धो वाक्यात् विधीयेत । वाक्याच्च श्रुतिर्बलवती इति पूर्वः पक्षः । तुशब्दः पञ्चशरावविषये यत् पूर्वमुक्तं तत्रैव विशेषान्तरमत्रोच्यते इति सूचनार्थः ।

चोदना वा द्रव्यदेवताविधेरवाच्ये हि । २९ ॥

पूर्वपक्षं सूत्रेण प्राप्तं वाशब्देन निरस्य सिद्धान्तमाह । सांनाय्यार्तिनिमित्ता चोदना कर्मान्तरविधिः स्यात् ।

द्रव्यदेवताविधेः । 'ऐन्द्रं पञ्चशरावम्' इति द्रव्यस्य देवतायाश्च विधेः सद्भावात् । ननु ऐन्द्रमिति सांनाय्यदेवतयोः इन्द्रमहेन्द्रयोरनुवादः स्यात् । नेत्याह । अवाच्ये हि यस्मात् ते देवते । पक्षे प्राप्तयोः इन्द्रमहेन्द्रयोः ऐन्द्रं इति इन्द्रपदेन वचनं शक्यम् । तस्मात् पञ्चशरावः कर्मान्तरं इति सिद्धान्तः । के.

* पञ्चशरावन्यायः । आर्त्यधिकरणम् । आर्तिन्यायः । हविरार्तिन्यायः एकमेव । (मीको. पृ. ९९२ द्रष्टव्यम्) । भा. ६।४।६।२२-२३. * पञ्चशरावन्यायः द्विविधः । तत्राद्यः किमुभयार्तौ पञ्चशरावः उत अन्यतरार्तावपि इति (६।४।६।२२-२३) । द्वितीयस्तु किं आर्तिदोहप्रतिनिधित्वेनामावास्याकर्मण एव साधनं विधीयते, उत कर्मान्तरं हविरार्तिनिमित्ते चोद्यते इति (६।४।९।२८-२९ अत्र सूत्रं 'पञ्चशरावस्तु') । तृतीयोऽपि ६।४।१०।३०-३१ 'स प्रत्यामनेत् स्थानात्' इति । अत्र पञ्चशरावयागस्य दर्शाङ्गता साधिता । के. * पञ्चशरावन्यायः । पञ्चशरावनिर्वापः कर्मान्तरं हविरार्तौ । भा. ६।४।९।२८-२९. * पञ्चशरावन्यायः (६।४। ६।२२-२३) । समस्तपञ्चशरावन्यायः । पूर्वत्रार्थिकत्वान्निमित्तभावस्य पञ्चशरावन्यायानवतारेऽपि... । सोम. ६।४।८. * समस्तपञ्चशरावन्यायेन अन्यतरानुगममात्रं निमित्तम्, इति प्राप्ते । शा. ६।४।८.

* पञ्चशरावयागः हविरार्तिनिमित्तकः दर्शस्याङ्गम् । (मीको. पृ. २०१९ द्रष्टव्यम्) । भा. ६।४। १०।३०.

* पञ्चशरावयाक्ये अपनयविध्यभावादेव कर्मान्तरम् । भाट्ट. ६।५।१ पृ. २८७.

* पञ्चशारदीयः पञ्चाहविशेषः अहीनः । स च पञ्चसु वर्षेष्वनुष्ठेयः । प्रथमे वर्षे विशाखानक्षत्रयुक्तायाममावास्यायां (प्रायः आश्विनामावास्यायाम्) सप्तदश अल्पवयसः स्त्रीपशवः, सप्तदश उक्षाणश्च विहिताः । तेषु पर्यग्निकृतेषु प्रोक्षितेषु च सत्सु स्त्रीपशूनामालम्भं पुंस्पशूनामुत्सर्गं चाम्नाय पुनर्द्वितीये तृतीये चतुर्थे च वत्सरे तथैवानुष्ठानमाम्नाय पश्चादाम्नायते 'श्रींस्त्रीनेकैकस्मिन्नहन्यालभेरन् पञ्चोत्तमेऽहनि' इति । तत्र वत्सरचतुष्टयगतासु अमावास्यासु योऽयं पशूनामुत्सर्गः, तत्र कर्मशेषत्याग एव नोत्कर्षः । 'श्रींस्त्रीनेकैकस्मिन्' इत्यादि तु संख्या-कालरूपगुणद्वयविशिष्टं कर्मान्तरमेवेति सिद्धान्तः । वि. ११।२।१३.

* पञ्चशारदीयास्तथेति चेत् । ११।२।१३।५४ ॥ इत्येकादशाधिकरणे प्राजापत्योत्सर्गवत् उक्ष्णामपि उत्सर्गः संस्कारनिषेधः इति प्राप्ते, संस्कारनिषेधे सति 'त्रींस्त्रीनुक्ष्णः एकैकस्मिन्नहनि आलभेरन् पञ्चोत्तमे' इति प्राप्ते कर्मणि अनेकगुणविधानात् वाक्यभेदापत्तेः, नवमोपान्त्यव्युत्पादितारण्योत्सर्गवत् कर्मशेषनिषेधे 'न चोदनैकवाक्यत्वात्' (५५) इति सूत्रेण सिद्धान्तयित्वा 'संस्काराणां च दर्शनात्' (५६) इति सूत्रान्तरेण प्रतिवर्षं संस्कारानुवाददर्शनात् कर्मैक्ये च द्रव्याभेदेन पुनः पुनः संस्कारानर्थक्यात् प्रतिवर्षं कर्मसमाप्तिः अवसीयते इत्युक्त्वा, ननु वचनमेतद्भविष्यति इत्याशङ्क्य 'पर्यग्नि करोति' 'पर्यग्निकृतानुत्सृजन्ति' इत्यनेकार्यविधौ वाक्यभेदापत्तेः वत्सतरीषु च प्रकृतिप्राप्तानुवादत्वात् तत्साहचर्येण उक्षस्वपि अनुवादतैव न्याय्या इति भाष्यकृद्वक्ष्यति । सु. पृ. ७११.

पञ्चशारदीयास्तथेति चेत् । ११।२।१३। ५४ ॥

'मारुतीयः पञ्चशारदीयः, यः कामयेत बहुः स्यामिति स एतेन यजेत' इति मरुद्देवताकः पञ्चसु शरत्सु क्रियमाणः पञ्चाहः अहीनः उक्तः । तत्र श्रूयते 'वैशाख्याममावास्यायाम् (विशाखानक्षत्रयुक्तायाममावास्यायां प्रायः आश्विन्याम्) मारुतीः त्रिवत्सा अप्रवीता उपाकरोति' 'सप्तदश पृश्नीरुक्ष्णः, तान् पर्यग्निकृतान् प्रोक्षितान्, इतरा आलभन्ते, प्रेतरानुत्सृजन्ति' इति । तत्र त्रिवत्साः त्रिवर्षा वत्सतर्यः अप्रवीताः अप्रसूताः । पृश्नीन् नानावर्णान् शुद्धान् अल्पशरीरान् वा मतभेदेन । प्रतिवर्षं सप्तदश त्रिवर्षा गावः आलब्धव्याः, सप्तदश उक्षाणश्च पर्यग्नि कृत्वा प्रोक्ष्य उत्स्रष्टव्याः । पञ्चमे तु वर्षे गावः पूर्ववत् आलब्धव्याः, उक्षाणस्तु आलब्धव्या एव, परंतु चतसृषु सुत्यासु त्रयस्त्रयः, पञ्चम्यां तु पञ्च आलब्धव्याः । इति सिद्धान्ते ।

पूर्वपक्षे तु पञ्चस्वपि संवत्सरेषु अभिन्ना उक्षाणः, तत्र आदितश्चतुर्षु संवत्सरेषु केवलं पर्यग्निकरणं प्रोक्षणं च पुनः पुनः कर्तव्यम् । पञ्चमे वर्षे तु आलम्भः । तावत्पर्यन्तं च ते प्रतिपालनीयाः । इति विशेषः । अथ सूत्रार्थ उच्यते । पञ्चशारदीयाः उक्षाणः तथा प्राजापत्यपशुवत् स्युः । प्राजापत्या यथा आदौ उत्सृज्य पश्चात् आलभ्यन्ते तथा उक्षाणोऽपि आदितश्चतुर्षु वर्षेषु उत्सृज्य पञ्चमे वर्षे आलब्धव्याः । तथा च संस्कारप्रतिषेधः इति चेत् पूर्वपक्षी ब्रूयात् ।

न, चोदनैकवाक्यत्वात् । ५५ ॥

सिद्धान्ती आह । न संस्कारप्रतिषेधः । किन्तु कर्मशेषप्रतिषेधः । चोदनैकवाक्यत्वात् । 'सप्तदश मारुतीरुपाकरोति' इति कर्मचोदना, तया 'सप्तदश पृश्नीनुक्षणः' इत्यस्य एकवाक्यत्वम् । तस्मादेकेन अनेन वाक्येन चतुस्त्रिंशत् कर्माणि चोद्यन्ते प्रतिवर्षम् । तत्र सप्तदशानां पर्यग्निकरणान्ते उत्सर्गः क्रियते । सप्तदशासु यथाप्रकृति क्रियते । तस्मादारण्यवत् कर्मशेषप्रतिषेधः इति सिद्धान्तः ।

संस्काराणां च दर्शनात् । ५६ ॥

चतुस्त्रिंशतां पशूनां पर्यग्निकरणं प्रोक्षणं च । तत्र सप्तदशानां स्त्रीगवीनामालम्भः उक्ष्णां चोत्सर्गः इति चतुर्षु वर्षेषु, पञ्चमे तु वर्षे सर्वेषामालम्भः इति संस्कारा दृश्यन्ते पुनः पुनः । तत्र उक्ष्णामभेदे तु पुनः संस्कारो व्यर्थः । तथा च संस्काराणां दर्शनात् अन्ये उक्षाणः इति प्रतीयते । तथा च कर्मशेषप्रतिषेधः, न संस्कारप्रतिषेधः इति सिद्धान्तः । के.

* पञ्चशारदीये आदिमेषु चतुर्षु संवत्सरेषु सप्तदशोक्षाणः पर्यग्निकरणप्रोक्षणाभ्यां समापनीयाः । के. ११।२।१३।५४. * पञ्चशारदीये उक्ष्णामुत्सर्गः कर्मशेषप्रतिषेधः न तु संस्कारकर्मप्रतिषेधः । प्रतिवर्षमन्ये उक्षाणः । भा. ११।२।१३।५४–५६, * पञ्चशारदीये उक्षवाक्ये कर्मशेषप्रतिषेधात् प्रतिसंवत्सरं भिन्नानामेवोक्ष्णामानयनम् । ११।२।१३।५४.

⌛ **पञ्चशारदीयाधिकरणम् ।** पञ्चशारदीये आदिमेषु चतुर्षु संवत्सरेषु सप्तदशोक्षाणः पर्यग्निकरणप्रोक्षणाभ्यां समापनीयाः । पञ्चशारदीये उक्षवाक्ये कर्मशेषप्रतिषेधात् प्रतिसंवत्सरं भिन्नानामेवोक्ष्णामानयनम् ॥

पञ्चशारदीयास्तथेति चेत् । ११।२।१३।५४ ॥

भाष्यम्-- अस्ति पञ्चशारदीयः अहीनः 'मारुतीयः पञ्चशारदीयः, यः कामयेत बहुः स्यामिति, स एतेन यजेत' इति । तत्र श्रूयते 'वैशाख्याममावास्यायां (विशाखायुक्तायाममावास्यायाम्) सप्तदश मारुतीस्त्रिवत्साः (त्रिवत्सराः) अप्रवीताः (अप्रसूताः) उपाकरोति' इति । 'सप्तदश पृश्नीनुक्षणः (नानावर्णान् शुद्धान् अल्पशरीरान् वा), तान् पर्यग्निकृतान् प्रोक्षितान्, इतराः (त्रिवत्साः) आलभन्ते, प्रेतरान् (उक्षणः) उत्सृजन्ति' इति । ततः संवत्सरे राजीवाः (कमलसदृशवर्णाः) आनयन्ति, तांश्चैवोक्ष्णः, तान् पर्यग्निकृतान्, इतरा आलभन्ते, प्रेतरानुत्सृजन्ति' इति । (अत्र बौधायनश्रौतसूत्रे १८।११ प्रकारान्तरं सविस्तरं द्रष्टव्यम् । आश्वलायनश्रौते च ११।२।२९–३०) तत्र सैव चिन्ता किमुक्ष्णामुत्सर्गः आरण्यवत् कर्मशेषप्रतिषेधः, अथवा प्राजापत्यवत् संस्कारकर्मप्रतिषेधः । तेषां च सुत्यासु प्रतिप्रसवः, 'त्रींस्त्रीनुक्ष्ण एकैकस्मिन्नहन्यालभन्ते, पञ्चोत्तमे' इति । यदि कर्मशेषप्रतिषेधः प्रतिवर्षमन्ये उक्षाणः । अथ संस्कारप्रतिषेधः, ततस्ते एव पञ्चवर्षाण्युपरुध्यन्ते, पुनः पुनः संस्क्रियन्ते । अन्त्यासु सुत्यास्वालभ्यन्ते इति । किं तत्र प्राप्तम्? पञ्चशारदीयास्तथेति चेत् । इति चेत्पश्यसि । कथं पञ्चशारदीया इति? पञ्चशारदीयास्तथा, यथा अनन्तराः प्राजापत्याः, संस्कारप्रतिषेध इत्यर्थः । एवं प्रकृतप्रत्ययो भवति । स एवमनुग्रहीष्यते । इतरथा प्रकृतहानमप्रकृतप्रत्ययश्च भवेत् । एवं च तांश्चैवोक्ष्ण इत्यपेक्षावचनं युक्तं भविष्यतीति । प्रायश्चित्तविधानं च, 'यदि कूटः काणो वा भवेत् बार्हस्पत्यं चरुं निर्वपेत्, यदि प्रपतेत् वायव्यं चरुम्, यद्यवसीदेन्नैर्ऋतं चरुम्' इति । निरुद्धानामेतानि निमित्तान्युत्पद्येरन् । तस्मात् संस्कारप्रतिषेधः ।

टुप्— 'सप्तदश मारुतीस्त्रिवत्साः अप्रवीता उपाकरोति । सप्तदश पृश्नीनुक्ष्णः' इति पूर्वासु त्रिहायनीषु या देवता, सा अत्रानुषज्यते (उक्षसु) । तस्मात्

द्रव्यदेवतासंयोगात् चतुस्त्रिंशत् कर्माण्येतानि (अनेन वाक्येन विधीयन्ते । तत्र एतत्–) द्वितीयं वाक्यम् 'तान् पर्यग्निकृतान् प्रोक्षितान्, इतरा आलभन्ते, प्रेतरानुत्सृजन्ति' इति । तत्र तान् इति प्रकृताः (उक्षाणः) परामृश्यन्ते । इतराशब्देन (स्त्रीलिङ्गेन) वत्सतर्य उच्यन्ते । तासां (आलम्भानुज्ञावचनेन लक्षणया) विशसनादि कृत्स्नं चोदकप्राप्तं क्रियते । अतस्तासु संदेह एव नास्ति । 'प्रेतरानुत्सृजन्ति' इत्यनेन (पुंलिङ्गेन) अनड्वाह उच्यन्ते । तेष्वेव संदेहः किं पर्यग्निकरणान्ताङ्गरीत्या अनड्वाहः एकवाक्यतां गत्वा चोदकेन अङ्गानि न गृह्णन्ति, यथा आरण्याः, उत प्राजापत्यानामिव प्रातःसवनकाले संस्काराणां प्रतिषेधः इति । किं तावत् प्राप्तम्? संस्काराणां प्रतिषेधोऽयम् । अस्मिन् काले अनडुहां आलम्भादयो न कर्तव्याः संस्कारा इति । यथा प्राजापत्यानाम् । 'त्रींस्त्रीनुक्ष्णः एकैकस्मिन्नहनि आलभेत' इति (पञ्चसु) सुत्यासु प्रतिप्रसवः । यथा 'ब्रह्मसाम्नि आलभते' इति । कर्मशेषप्रतिषेधे तु 'तांस्तान्' इति च कर्मान्तरं कल्प्येत प्रतिसंवत्सरम् । 'त्रींस्त्रीन्' इति च । तत्र बहु अदृष्टं कल्प्येत । संस्कारप्रतिषेधे तु तेषामेव (अनडुहाम्) द्वितीये (संवत्सरे पर्यग्निकरणान्तम्) संस्कारमात्रं विधीयते, न याग इति ।

न, चोदनैकवाक्यत्वात् । ५५ ॥

भाष्यम्– नैतदेवं संस्कारप्रतिषेध इति । कथं तर्हि? कर्मशेषप्रतिषेधः । कुतः? चोदनैकवाक्यत्वात् । 'सप्तदश मारुतीरुपाकरोति' इति कर्मचोदनैषा, द्रव्यदेवतासंबन्धात् । तयैकवाक्यमेतत् 'सप्तदश पृश्नीनुक्ष्णः' इति । कथं ज्ञायते? सप्तदश पृश्नीनुक्ष्ण इत्येतावदपरिसमाप्तम् । तत्पूर्वापेक्षया परिसमाप्यते, मारुतानालभते इति । एवं सति अनुषङ्गोऽवश्यं भवति । तथा च समत्वाद्वाक्यभेदः । किमुच्यते चोदनैकवाक्यत्वादिति । आह । यदि असौ अस्य शेषत्वेनापेक्ष्यते ततोऽनुषङ्गः । अथायं तस्य, तत एकवाक्यत्वम् । इदं तस्य शेषत्वेनापेक्षिष्यामहे! एतच्चात्र युक्तम्, यदयं तस्य शेषः स्यात्, नासावस्य । तच्छेषत्वे अपेक्षामात्रम् । इतरत्रापेक्षा अनुषक्तव्यं च । अर्थेन च संबध्येत । सप्तदश पृश्नीर्मारुतीरुपाकरोति, सप्तदश च पृश्नीनुक्ष्ण इति चार्थो न वक्तव्यः । प्रचयादेव गम्येत । तस्मादेकेनानेन वाक्येन चतुस्त्रिंशदेतानि कर्माणि चोद्यन्ते । तेषां सप्तदशानां पर्यग्निकरणान्तः उत्सर्गः क्रियते । सप्तदशसु यथाप्रकृति । एवमुत्तरास्वपि चोदनासु । न चोत्सृष्टानां कर्मान्तरे उपयोगो युज्यते । असत्त्वात् यातयामत्वाच्च । तस्मादारण्यवत् कर्मशेषप्रतिषेधः । अन्ये चान्ये चोक्षाणः । पूर्वेषामुक्ष्णामभावात् प्रकृतहानम् । प्रायश्चित्तमप्युपाकृतानां प्रागुत्सर्गात् । अपेक्षावचनमपि तेषामभावात् अन्यान् तादृशानेवापेक्ष्य भवेत्, पृश्नीन् मारुतांश्च । यथा तामेव यवागूं त्र्यहं पिबतीति । तान्येवौषधानि, स एव तित्तिरिरिति ।

टुप्– 'सप्तदश मारुतीः पृश्नीरुपाकरोति' इति द्रव्यदेवतासंयोगात् यागचोदनैषा । 'सप्तदश पृश्नीनुक्ष्णः' इत्यस्य सापेक्षत्वान्निराकाङ्क्षीकरणेन भवितव्यम् । तत्र 'मारुतीरालभते' इति मनसि विपरिवर्तमानेनैव निराकाङ्क्षीक्रियते । अत्र च द्वयी गतिः । यदि वा अनडुहः प्रति 'मारुतीरालभते' इत्यनुषज्यते । अथवा 'मारुतीरालभते' इत्येतत्प्रति अनड्वाहो नीयन्ते । तत्रानड्वाहः सापेक्षाः । यस्मिन्नेव क्षणे त्रिहायन्यः संबध्यन्ते, तस्मिन्नेव अनड्वाहोऽपीति । एवं परस्परापेक्षितः संबन्धो भविष्यति, एकवाक्यत्वं च । इतरथा पूर्वस्मिन् वाक्ये निराकाङ्क्षीकृतस्य पुनराकाङ्क्षा कल्पनीया । ततः पुनः संबन्धः 'तस्मात् एकेन वाक्येन चतुस्त्रिंशत् कर्माणि विधीयन्ते' (इति भाष्यं किञ्चिदक्षरभेदेन) । ननु पूर्वपक्षवाद्यपि चतुस्त्रिंशत् कर्माणि एकवाक्यत्वं चेच्छत्येव, कर्मशेषप्रतिषेधम् (तु) नेच्छति (किन्तु 'पर्यग्निकृतानुत्सृजन्ति' इति संस्कारप्रतिषेधमिच्छति प्राजापत्यवत्) । न च अनेन (भाष्यकारीयेण व्याख्यानेन) सः (पूर्वपक्षवादी) निराक्रियते । तस्मात् कथमेतत् व्याख्येयम् (एकवाक्यत्वात् इति सूत्रम्? उच्यते–) प्राजापत्येषु यः संस्कारप्रतिषेधः, सः 'ब्रह्मसाम्न्यालभते' इत्यस्य (प्रतिप्रसववाक्यस्य) सामर्थ्यात् । अस्मिन् सति अनुवादो वा (संस्कार–) प्रतिषेधो वा 'पर्यग्निकृतानुत्सृजन्ति' इति । इह तु ('त्रींस्त्रीन् अन्वहमालभेत, पञ्चोत्तमेऽहनि' इति

वाक्येन) न शक्यः सुत्याकाले प्रतिप्रसवः कर्तुम् । अत्र (हि) यत् आलभते, तान् पञ्च, तांश्च अन्त्येऽहनि इति (गुणपरत्वे सति अर्थद्वयस्य विधानात्) वाक्यभेदः स्यात् । एवं 'त्रींस्त्रीन्' इत्यपि योज्यम् । तस्मादेतत् सुत्याकालिकं कर्मान्तरम् (तदा च अपूर्वस्यैव विधानात् एकवाक्यता भवति इति सूत्रार्थः । व्याख्यानान्तरमाह-) अपि च यस्य (मते) संस्कारः प्रतिषिध्यते, तस्य द्वितीये संवत्सरे पर्यग्निकरणं न प्राप्नोति (कृतत्वात् । तेन) तत् तावत् विधातव्यम्, उत्सर्गश्च (विधातव्यः) तत्र (अर्थभेदात्) वाक्यभेदः विवक्षाभेदश्च (पर्यग्निकृतान् इत्यत्र स्यात् ।) एकत्र (वत्सतरीषु) प्रकृतिप्राप्तमनूद्यते (पर्यग्निकरणम्), अन्यत्र (अनडुत्सु प्रागेव पर्यग्निकरणस्य कृतत्वात् पुनरप्राप्तेः पर्यग्निकरणान्तरम्-) अप्राप्तं विधीयते । सकृदुच्चरितस्य एतदन्याय्यम् ।

संस्काराणां च दर्शनात् । ५६ ॥

भाष्यम्— संस्कारांश्च प्रतिवर्षं दर्शयति 'तान् पर्यग्निकृतान् प्रोक्षितानितरा आलभन्ते प्रेतरानुत्सृजन्ति' इति । ननु वचनमेतद्भविष्यतीति । न, वाक्यभेदप्रसङ्गात्, पर्यग्निकरणं करोति, पर्यग्निकृतांश्चोत्सृजन्तीति । अपि च वत्सतरीणामुक्ष्णां च युगपत् पर्यग्निकरणमुच्यते । तद्वत्सतरीषु प्रकृतितः प्राप्तत्वादनूद्यते । इतरेषु अप्राप्तत्वाद्विधीयते, एतन्नोपपद्यते । सत्सु संस्कारेषु एतदुभयं न युज्यते । यागे च सत्त्वम् । तस्मादुभयत्र यागः ।

सोम—प्राजापत्यमिवेति दृष्टान्तसंगतिः । सूत्रार्थस्तु— पञ्चशारदीयपशवोऽपि प्राजापत्यवत् उत्कृष्यन्ते इति । १२.

वि— 'उक्षोत्सर्गः किमुत्कर्षस्त्यागो वा,ऽऽद्योऽत्र पूर्ववत् ।, अन्वहत्रित्वयोरुत्तमाहपञ्चत्वयोर्विधौ ॥ वाक्यभेदाद् विशिष्टानामन्येषां कर्मणां विधिः । तस्मादारण्यवच्छेषत्याग उत्सर्ग इष्यताम् ॥'

भाट्ट— पञ्चशारदीयो नाम अहीनः पञ्चाहः 'यः कामयेत बहुः स्यामिति, स एतेन यजेत' इति फले विनियुक्तः । तत्र वैशाख्याममावास्यायाम् 'सप्तदश मारुतीस्त्रिवत्सा अप्रवीता उपाकरोति, सप्तदश पृश्नीरुक्षणः, तान् पर्यग्निकृतान् प्रोक्षितान्, इतरा आलभन्ते, प्रेतरानुत्सृजन्ति, ततः संवत्सरे राजीवा आनयन्ति, तांश्चैवोक्षणस्तान् पर्यग्निकृतान्' इत्यादि पूर्ववत् । तृतीये चतुर्थे च संवत्सरे स्त्रीलिङ्गनिर्देशात् स्त्रीपशूनां सामस्त्येनानुष्ठानं उक्ष्णां च पर्यग्निकृतानामुत्सर्जनमुक्त्वा पञ्चमे संवत्सरे दीक्षित एव 'उक्षणस्त्रींस्त्रीनन्वहमालभेत पञ्चोत्तमेऽहनि' इति श्रुतम् । त्रिवत्साः त्रिवत्सराः, अप्रवीताः अप्रसूताः, पृश्नीः अल्पशरीराः, राजीवाः राजीववर्णाः (राजीवं कमलम्) । अत्र स्त्रियोऽपि गाव एवेति केचित् । अत्रोक्षणवाक्ये मारुतानिति विपरिणतस्य उपाकरोति इत्यस्य चानुषङ्गात्तदपि वाक्यान्तरम् । अस्मिंश्च वाक्ये यथा कर्मभेदः संख्यया तथा कौस्तुभे निरूपितम् । अत्र च 'उपाकरोति' इत्यस्य एकस्यैव स्त्रीषु पुरुषेषु च संबन्धादेकमेवेदं वाक्यं चतुस्त्रिंशत्कर्मणां विधायकमिति भाष्यकारः । वाक्यान्तरत्वं तु युक्तमित्युत्पश्यामः । तत्र किं उक्षसु ये एव प्रथमे संवत्सरे पर्यग्निकृताः उक्षाणः, तेषामेव द्वितीयादिसंवत्सरेषु पर्यग्निकरणादि कृत्वा पञ्चमे संवत्सरे तेषामेव चतसृषु सुत्यासु त्रयाणां त्रयाणामालम्भः पञ्चानां चोत्तमेऽहनीत्येवं प्राजापत्यानामिव आलम्भोत्कर्षः ? उत प्रथमादिवर्षेषु अन्येषामन्येषामुक्ष्णां पर्यग्निकरणान्ताङ्गरीतिविधानेन आरण्यपात्नीवतादितवत्तत्रैव समाप्तिः, पञ्चमे वर्षे तत्तत्सुत्यासु अन्येषामेवालम्भः ? इति चिन्तायाम्, लाघवात् तेषामेवालम्भोत्कर्षः प्राजापत्यवत् । वचनाच्च पर्यग्निकृतानामपि पुनःपुनः पर्यग्निकरणादिः, तच्छब्दबलेन पूर्वोपाकृतानामेव परामर्शात् । उत्सृजतिस्तु आलम्भोत्कर्षादेव प्राप्तोऽनूद्यते । इति प्राप्ते, प्राप्तालम्भानुवादेन 'त्रींस्त्रीनन्वहम्' इति चानेकार्थविधाने वाक्यभेदात् गुणात् कर्मान्तराण्येवैतानि विधीयन्ते, न त्वत्र आलम्भोत्कर्षः । एवम् 'पञ्चोत्तमेऽहनि' इत्यत्रापि अनेकार्थविधिर्बोध्यः । अत एव 'पञ्चोत्तमेऽहनि' इत्यत्र उत्तमेऽहनि पञ्चत्वविधौ अवशिष्टानां द्वादशानां 'समं स्यादश्रुतत्वात्' इति न्यायेनैव अन्वहं त्रयाणांत्रयाणां प्राप्तेः 'त्रींस्त्रीनन्वहम्' इत्यनुवाद इत्यपास्तम् । 'पञ्चोत्तमे' इत्यत्रैव प्राप्तालम्भा-

नुवादेन कालसंख्योभयविधाने वाक्यभेदात् । उत्तमाहरुद्देशेन पञ्चत्वमात्रविधाने विशिष्टोद्देशादालम्भस्यैवाश्रयत्वे प्रमाणाभावाच्च । अतः कालसंख्योभयविशिष्टकर्मान्तराण्येवैतानि सप्तदश वाक्यद्वयेन विधीयन्ते । ततश्चोत्कर्षविध्यभावात् प्रथमादिवर्षेषु भिन्नभिन्नान्येवैतानि कर्माणि पर्यग्निकरणान्ताङ्गविशिष्टानि देवतापदानुषङ्गेण विधीयन्ते । अतश्च प्रतिवर्षं पशुभेदः । पञ्चमे च पर्यग्निकरणान्ताङ्गानामावृत्तिः । तच्छब्दश्च व्यक्तिभेदेऽपि तज्जातीयत्वार्थकः सन् पृश्नित्वादिगुणप्राप्त्यर्थो न विरुध्यते । १२.

मण्डन— 'इज्याश्रयं त्वहीने स्यात् ।' त्रींस्त्रीन् इति विहितं अपूर्वमेव ।

शंकर— 'स्यात् पञ्चशारदीये सा ।' कर्मभिदा ।

* **पञ्चसंचराणि** चातुर्मास्येषु वैश्वदेवे पर्वणि आग्नेयादीनि पञ्च हवींषि सर्वपर्वसु संचरन्ति इति पञ्चसंचराणि इत्युच्यन्ते । ('आग्नेयमष्टाकपालं निर्वपति, सौम्यं चरुम्, सावित्रं द्वादशकपालम्, सारस्वतं चरुम्, पौष्णं चरुम्' इति विहितानि आदिमानि पञ्च) । भा. ७।१।३।१७.

पञ्चसंचरेष्वर्थवादातिदेशः संनिधानात् । ७।१।३।१७ ॥

चातुर्मास्येषु वैश्वदेवे पर्वणि 'आग्नेयमष्टाकपालं निर्वपति, सौम्यं चरुम्, सावित्रं द्वादशकपालम्, सारस्वतं चरुम्, पौष्णं चरुम्' इति पञ्च हवींषि पञ्चसंचराणि नाम सार्थवादवाक्यैर्विहितानि । वरुणप्रघासेषु तु केवलानि हवींष्याम्नाय तत्र वैश्वदेविकं ब्राह्मणमतिदिष्टम् 'एतद्ब्राह्मणान्येव पञ्च हवींषि, यद्ब्राह्मणानि इतराणि' इति । इतराणि वैश्वदेविकानि । तत्र किमर्थवादमात्रस्यायमतिदेशः उत सार्थवादकस्य सविधिकस्य कृत्स्नस्य काण्डस्येति । तत्र पूर्वपक्षमाह । पञ्चसंचरेषु आग्नेयादिषु पञ्चसु हविःषु वरुणप्रघासगतेषु अर्थवादातिदेशः वैश्वदेविकस्य केवलस्य अर्थवादस्यैव अतिदेशः स्यात् । संनिधानात् । अर्थवादस्य विध्येकवाक्यतया संनिहितत्वात् । चतुर्ष्वपि पर्वसु संचरन्ति उपतिष्ठन्ते इति संचराणि, तानि च पञ्च हवींषि ।

सर्वस्य वैकशब्द्यात् । १८ ॥

वरुणप्रघासेषु 'एतद्ब्राह्मण्यान्येव पञ्च हवींषि यद्ब्राह्मणानीतराणि' इति वाक्येन वैश्वदेवपर्वगतस्य सार्थवादकस्य सविधिकस्य काण्डस्य सर्वस्य अतिदेशः स्यात्, न तु अर्थवादमात्रस्य । ऐकशब्द्यात् । एक एवायं 'ब्राह्मणं' इति शब्दः विधीनां अर्थवादानां च । स यथा अर्थवादान् गृह्णाति तथा विधीनपि । एकः शब्दो येषां ते अर्थवादा विधयश्च एकशब्दाः, तेषां भावः ऐकशब्द्यम् । ऐकशब्द्यात् सर्वस्य काण्डस्य अतिदेशः स्यात् । वाशब्दः पूर्वपक्षव्यावृत्त्यर्थः ।

लिङ्गदर्शनाच्च । १९ ॥

वरुणप्रघासगतेषु पञ्चसंचरेषु वैश्वदेवपर्वगतस्य सार्थवादस्य सविधिकस्य सर्वस्य काण्डस्यातिदेशं दर्शयति लिङ्गम् । 'त्रिंशदाहुतयो हूयेरन्, वाजिनो यजन्ति, आहुतीनां संपत्त्यै त्रिंशत्त्वाय' इति वरुणप्रघासेषु त्रिंशतमाहुतीर्दर्शयति । अङ्गप्रधानविध्यतिदेशे सत्येव उत्तरविहारे द्वावाज्यभागौ, अष्टौ हवींषि, नव प्रयाजाः, नव अनूयाजाः, स्विष्टकृत्, वाजिनहोमश्च इति लिङ्गदर्शनमुपपन्नं भवति । यदि विधयो नातिदिश्येरन्, तत् नोपपद्येत । तस्मात् विधयोऽपि अतिदिश्यन्ते ।

विहिताम्नानान्नेति चेत् । २० ॥

पूर्वपक्षी शङ्कते । वरुणप्रघासेष्वपि वैश्वदेविकाः केचित् धर्मा विधीयन्ते । यथा 'अग्निं मथ्नन्ति, प्रसुवो भवन्ति' पुष्पितानि बर्हींषि भवन्ति इत्यर्थः । तेषामतिदेशेन विहितानां पुनराम्नानमनर्थकं स्यात्, यदि विधीनामतिदेशः स्यात् । तस्मात् विहिताम्नानात् न विधीनामतिदेशः, किन्तु अर्थवादानामेव केवलानामिति । इति चेत् ।

नेतरार्थत्वात् । २१ ॥

तन्न, इतरार्थत्वात् । 'अग्निं मथ्नन्ति' 'प्रसुवो भवन्ति' इत्यादयो विधयः इतरार्थाः दक्षिणविहारानुष्ठेयमारुत्याख्यहविरर्थाः, तस्मान्नैतत् ज्ञापकं विधीनामनतिदेशस्य । तस्मात् विधीनां च अर्थवादानां च वरुणप्रघासेषु अतिदेश इति सिद्धान्तः । के.

* पञ्चसंचरेषु वारुणप्राघासिकेषु वैश्वदेविकसार्थवादविधिकाण्डस्यातिदेशः । भा. ७।१।३।१७–२१.

* **पञ्चहोत्रा** हविरभिमर्शनं अमावास्यायाम् । (पञ्चहोतृमन्त्रश्च ' अग्निर्होता पञ्चहोतॄणाम् ' इत्युक्तत्वात् ' अग्निर्होता । अश्विनाध्वर्यू । त्वष्टाऽग्नीत् । मित्र उपवक्ता ' इति मन्त्रः) । **भा.** ८।१।१५।२६.

* **पञ्चहोतृचतुर्होतृमन्त्राभ्याममभिमर्शनं** अपूर्वप्रयुक्तम् , न समुदायप्रयुक्तम् । **भा.** ९।१।५।११–१९, * पञ्चहोतृचतुर्होतृमन्त्रयोः दर्शपूर्णमासहविरभिमर्शनकरणभूतयोः सौर्ययागे विकल्पः । ८।१।१५।२६.

* **पञ्चमेऽध्याये** । ' इहेदानीं क्रमनियमलक्षणमुच्यते । तत् श्रुत्यर्थपाठप्रवृत्तिकाण्डमुख्यैः वक्ष्यते । श्रुत्यादीनां च बलाबलम् ' । **भा.**५।१।१।१.

वा-- श्रुत्यर्थपाठक्रमा उपदेशविषया एव । प्रवृत्तिकाण्डमुख्यक्रमास्तु अतिदेशविषया अपि प्रधानभूताः पदार्थाः । कर्ता गुणभूतः । तस्य प्रतिप्रधानमनुष्ठानं कुर्वतः क्रमः सिद्ध एव । क्रमनियमस्तु चिन्त्यते ।

वि— ' श्रुत्यादिभिः क्रमस्तस्य विशेषो वृद्ध्यवर्धने । श्रुत्यादेर्बलिता चेति पञ्चमाध्यायपादगाः ॥ ' पञ्चमाध्यायस्य प्रथमे पादे श्रुत्यर्थपाठादिभिः क्रमो निरूपितः । द्वितीये वाजपेयगतेषु पशुषु एकैकधर्मसमापनं इत्यादिक्रमविशेषः । तृतीये पञ्चप्रयाजादीनामावर्तनेन ऐकादश्यं इत्यादिवृद्धिः, अदाभ्यग्रहचित्रिण्योरनावृत्तिः इत्यादिः वृद्ध्यभावः । चतुर्थे क्रमनियामकानां श्रुत्यर्थपाठादीनां प्रबलदुर्बलभावः । प्रस्तावना श्लोकः १७.

' द्वितीयादित्रये प्रोक्तं भेदशेषप्रयुक्तिभिः । अनुष्ठेयमनुष्ठानक्रमः पञ्चम ईर्यते ॥ ' वि. ५।१।१.

भाट्ट— तदेवं अङ्गप्रधानसाधारण्येन प्रयोज्यवर्गे निरूपिते अधुना प्रयोगाश्रितः क्रमो निरूप्यते । एकादशे हि अङ्गानां प्रधानानां च एकेनैव प्रयोगविधिना विधानमिति वक्ष्यते । अतश्च एकविधिविधेयत्वेन सर्वसाहित्यस्य विवक्षितत्वात् एकेन कर्त्रा युगपत् सर्वकरणाशक्तेः अवश्यंभाविनि कस्मिंश्चित् क्रमे नियामकानि श्रुति–अर्थ–पठन–स्थान–मुख्य–प्रवृत्त्याख्यानि षट् प्रमाणानि निरूपयिष्यन्ते । ५।१।१,

पञ्चमेऽध्याये – भिन्नप्रयोगपरिगृहीतानां पौर्वापर्यमात्रं प्रसङ्गान्निरूपितम् । व्यवहिताव्यवहितसाधारण्येन पौर्वापर्यमेव अध्यायार्थः इत्यपि ध्येयम् । ५।३।९.

* **पञ्चमलकारः** प्रतिषेधे श्रौतो यथा ' न संतृणत्ति ' ' दीक्षितो न जुहोति ' । **बाल.** पृ. ४०, * पञ्चमलकारः विधौ श्रौतो यथा ' समिधो यजति ' । स्मार्तो यथा मनुः (२।२९) ' प्राङ्नाभिवर्धनात् पुंसो जातकर्म विधीयते । ' 'महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः । ' (२।२८) इति । पृ. ४०.

* **पञ्चमलकाररूपं** तु वर्तमानापदेशेन संदिग्धम् । वा.१।२।२।२२ पृ. १३६.

* **पञ्चमी** (भाट्टचिन्तामणिस्था) । अपादानत्वं पञ्चम्यर्थः ' अपादाने पञ्चमी ' (पा० २।३।२८) इति सूत्रात् । अपादानत्वं च परसमवेतक्रियाजन्यविभागाश्रयत्वम् । विभागहेतुक्रियानाश्रयत्वे सति विभागाश्रयत्वं इति तदर्थः ' ध्रुवमपायेऽपादानम् ' (पा० १।४।२४) इति सूत्रात् । अपायो विश्लेषः विभागवियोगादिशब्दवाच्यः । अन्यस्य विभागवियोगादिक्रियाश्रयस्य विभागादौ सति विभागवियोगाश्रयत्वेन ध्रुवं स्थिरं विभागवियोगादिनिरूपकमिति यावत् , तदपादानमिति सूत्रार्थः । यथा ' वृक्षात् पर्णं पतति ' । अधःसंयोगानुकूलक्रिया पतेरर्थः अधःसंयोगप्रयोजकविभागानुकूलक्रिया वा । एवं च अधःसंयोगानुकूलक्रियानाश्रयत्वे सति तादृशक्रियाजन्यविभागाश्रयत्वात् वृक्षस्य अपादानत्वम् । इत्थं च तत्तद्धात्वर्थताऽवच्छेदकफलजनकक्रियानाश्रयत्वे सति तादृशक्रियाजन्यफलनिरूपकत्वं तादृशक्रियानिरूपकत्वं च इति निष्कर्षः । एवं चौरात् व्याघ्रात् (वा) बिभेति, चौरात् त्रायते, अध्ययनात् पराजयते, यवेभ्यो गां वारयति, मातुर्निलीयते, उपाध्यायादधीते, ब्रह्मणः प्रजाः प्रजायन्ते, हिमवतो गङ्गा प्रभवति इत्यादौ भयादिहेतुचौरव्याघ्रादीनाम् ' भीत्रार्थानां भयहेतुः ' (पा० १।४।२५) ' पराजेरसोढः ' (पा० १।४।२६) ' वारणार्थानामीप्सितः ' (पा० १।४।२७) ' अन्तर्धौ येनादर्शनमिच्छति ' (पा० १।४।२८) ' आख्यातोपयोगे ' (पा० १।४।२९) ' जनिकर्तुः प्रकृतिः ' (पा० १।

४।३०) ' भुवः प्रभवः ' (पा० १।४।३१) इत्याद्यानुशासनिकं मुख्यमेव अपादानत्वम् । अत्र च अपह्नवानुकूलक्रिया बिभेतेरर्थः । तदनुकूलरक्षणं त्रायतेः । ग्लानिजनकक्रिया पराजयतेः । दूरदेशसंयोगानुकूलक्रिया वारयतेः । दर्शनाभावानुकूलक्रिया निलीयतेः । गुरुमुखोच्चारणानूच्चारणानुकूलक्रिया अधीतेः । उत्पत्त्यनुकूलक्रिया जायतेः । प्रकाशजनकवृद्ध्यादिक्रिया प्रपूर्वकभवतेरर्थः ।

तदनाश्रयत्वे सति तत्तत्क्रियानिरूपकत्वात् ' भीत्रार्थानां भयहेतुः ' इत्याद्यनुशासनानां अपादानत्वबोधकता, न तु पञ्चम्या उपपदविभक्तित्वबोधकता इति **वैयाकरणाः मीमांसकाश्च** । अरण्यादेः निरूपकत्वाभावात् नापादानत्वम् । अत एव ' अरण्यात् बिभेति ' इति न प्रयोगः । यदि ' वनात् बिभेति ' इति प्रयोगः, तदा वनपदस्य वनस्थितव्याघ्रादौ लक्षणा । 'मध्यादवद्यति' इत्यादौ विभागप्रयोजकक्रियाऽनाश्रयस्य तन्निरूपकस्य अधोभागस्य अपादानत्वम् । **नैयायिकास्तु** विभागाश्रयत्वमेव अपादानत्वमिच्छन्तः ' व्याघ्रात् बिभेति ' इत्यादौ लक्षणया प्रयोगं क्रियान्तरकल्पनेन वा उपपदविभक्तित्वमिच्छन्ति । एवम् ' धावतोऽश्वात् पतति ' इत्यत्र अश्वस्य उक्तक्रियाश्रयत्वेऽपि तस्य विभागहेतुत्वाभावात् अपादानत्वोपपत्तिः । **न चैवम्** ' मेषान्मेषोऽपसरति ' इत्यत्र मेषस्य कथमपादानत्वम् , उभयकर्मजविभागस्य ऐक्येन तज्जनकक्रियानाश्रयत्वाभावात् इति **वाच्यम्** । विभागजनकक्रियाभेदात् एकक्रियामादाय अपादानत्वम् । ' अन्योन्यस्मात् अपसरतः ' इत्यत्र उभयकर्मजविभागस्य ऐक्येऽपि तत्तज्जनकक्रियामादाय परस्परस्य तदनाश्रयत्वोपपादनात् । ' वृक्षात् वस्त्रं पतति ' इत्यत्र पतनक्रियाधात्वर्थमादाय संगमनीयम् । न चैवम् ' वृक्षात् स्पन्दते ' इत्यापत्तिः । ' गृहाच्चलितः, राज्याच्चलितः ' इत्यादिवत् इष्टत्वात् । **केचित्तु** पञ्चमीजन्यापादानत्वबोधेन द्वितीयाया असाधुत्वात् इत्याहुः । ' बलाहकात् विद्युत् विद्योतते ' इत्यत्र ' निःसृत्य ' इत्यध्याहारेण उपपदविभक्तिः । एवं अन्यादिपदसमभिव्याहारे तु पञ्चमी उपपदविभक्तिः , ' अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते ' (पा० २।३।२९) इति सूत्रात् । अन्यपदेन अन्यार्थकेतरादिपदग्रहणम् । ' कृष्णादन्यस्तिष्ठति, आराद् वनात् , कृष्णादितरः , ऋते कृष्णात् ' । कालदेशसमभिव्याहारे ' ग्रामात् पूर्वः , चैत्रात् पूर्वः ' । अञ्चूत्तरपदं प्राक्प्रत्यगादिपदम् । तत्समभिव्याहारे ' ग्रामात् प्राक् ' । आच्प्रत्ययान्तदक्षिणा(पद)समभिव्याहारे ' दक्षिणा ग्रामात् ' । दूरवाचक–आहिपदसमभिव्याहारे ' दक्षिणाहि ग्रामात् ' । अत्र पञ्चम्यर्थस्य उपपदार्थान्वयः । इदं च प्रभृत्यादिपदानामुपलक्षणम् । भवात् प्रभृति, आरभ्य । ग्रामाद् बहिः । एवं विना–पृथगित्यादिपदसमभिव्याहारे द्वितीयातृतीयाभ्यां विकल्पिता पञ्चमी उपपदविभक्तिः । एवं दूरान्तिकार्थकपदसमभिव्याहारे द्वितीयाषष्ठीभ्यां विकल्पिता पञ्चमी उपपदविभक्तिः, ग्रामस्य ग्रामात् ग्रामं दूरेण, अन्तिकेन इति । **मणि.** पृ. १४०–१४२.

* पञ्चमी (भाट्टरहस्यगता) । पञ्चमी अपि भावनायामेव अन्वेति । तदर्थश्च ' अपादाने पञ्चमी ' (पा० २।३।२८) इति सूत्रात् अपादानत्वरूपः । तच्च ' ध्रुवमपायेऽपादानम् ' (पा० १।४।२४) इति सूत्रनिरुक्तम् । तथाहि । अपाये विभागे , ध्रुवं निश्चलं क्रियानाश्रयं यत् , तत् अपादानसंज्ञं स्यादिति सूत्रार्थः । तथा च क्रियानाश्रयत्वे सति क्रियाजन्यविभागाश्रयत्वं अपादानत्वम् । अस्ति चेदम् ' वृक्षात् पर्णं पतति ' इत्यत्र वृक्षे पतनक्रियानाश्रयत्वात् पतनक्रियाजन्यविभागाश्रयत्वाच्च । अत्र च उदासीने घटे पर्णे च अतिप्रसङ्गवारणार्थं दलद्वयम् । क्रियानाश्रयत्वं च यद्यपि सामान्यतो न क्रियावन्निष्ठभेदप्रतियोगित्वम् । प्रतियोगितासामान्यप्रवेशे पतनवत्यपि पर्णे द्वित्वाद्यवच्छिन्नप्रतियोगिताकभेदसत्त्वात् ' स्वस्मात् पतति ' इति प्रयोगापत्तेः । प्रकृत्यर्थताऽवच्छेदकावच्छिन्नप्रतियोगिताप्रवेशे च ' द्रव्यात् पतति ' इत्यस्य अनापत्तेः पतनवति पर्णे द्रव्यत्वावच्छिन्नभेदाभावात् , तथापि प्रकृत्यर्थताऽवच्छेदकाश्रययत्किञ्चिद्व्यक्तित्वावच्छिन्नप्रतियोगितानिवेशेनैव क्रियावन्निष्ठभेदप्रतियोगित्वं निर्वाच्यम् । तच्च पतमानपर्णव्यक्तिनिष्ठभेदनिरूपितयत्किञ्चित्पर्णव्यक्तित्वावच्छिन्नप्रतियोगिताकत्वम् उदासीने पर्णेऽपि, अतः क्रियाजन्यविभागाश्रयत्वोपादानम् , इति न वृक्षात् पतति पर्णे ' पर्णात् पर्णं पतति '

इति प्रयोगः । अत्र विभागः परसमवेतत्वं च विभक्तिशक्यम् । तत्र च प्रकृत्यर्थो वृक्षो विभागे पदार्थैकदेशे भेदे च समवेतत्व–प्रकृत्यर्थताऽवच्छेदकाश्रयविभागाश्रयीभूतव्यक्तित्वावच्छिन्नप्रतियोगिताकत्वसंसर्गाभ्यां अन्वेति । विभागः परसमवेतत्वं च जनकत्व–स्वरूपसंबन्धाभ्यां पतनरूपधात्वर्थे अन्वेति । तथा च वृक्षसमवेतविभागजनकवृक्षत्वरूपप्रकृत्यर्थताऽवच्छेदकाश्रयविभागाश्रयीभूतव्यक्तित्वावच्छिन्नप्रतियोगिताकत्वसंसर्गेण वृक्षवद्भेदाश्रयसमवेतपतनाश्रयः पर्णमिति शाब्दबोधः । अत्र प्रकृत्यर्थतावच्छेदकाश्रययत्किंचिद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वस्यैव प्रकृत्यर्थस्य वृक्षस्य पञ्चम्यर्थे भेदे संसर्गत्वोक्तौ वृक्षात् पतति पर्णे 'पर्णात् पतति' इति प्रयोगापत्तिः, तत्पतनस्यापि प्रकृत्यर्थताऽवच्छेदकपर्णत्वाश्रययत्किंचिदुदासीनपर्णव्यक्तित्वावच्छिन्नप्रतियोगिताकभेदवत्पतमानपर्णवृत्तित्वात्, पतमानपर्णवृत्तिविभागजनकत्वाच्च । अतः तद्व्यावृत्त्यर्थं प्रकृत्यर्थस्य भेदेन सह अन्वये संसर्गघटकव्यक्तौ पतनजन्यविभागाश्रयत्वं विशेषणमिति केचिन्नैयायिकनव्याः । अन्ये तु (इत्याहुः इति दूरेणान्वयः) गुरुभूतसंसर्गघटितव्युत्पत्तिविशेषकल्पनायां गौरवापत्तेः क्रियाऽनाश्रयत्वं न क्रियावन्निष्ठभेदप्रतियोगित्वम्, किन्तु क्रियावत्प्रतियोगिकभेदाश्रयत्वम्, तदा क्रिया प्रतियोगिताऽवच्छेदिका । भेदश्च अभावीयविशेषणतासंबन्धेनैव अपादानवृत्तिः । तच्च उदासीनपर्णादावपि, इति तद्व्यावृत्त्यर्थं विशेष्यदलम् । तथा च अस्मिन् पक्षे विभागो भेदश्च पञ्चम्यर्थः । तत्र च आधेयतया प्रकृत्यर्थान्वयः । तयोश्च जनकत्वप्रतियोगिताऽवच्छेदकत्वोभयसंसर्गेण धात्वर्थान्वयः । वृक्षवृत्तिविभागजनकवृक्षनिष्ठभेदप्रतियोगिताऽवच्छेदकपतनेत्यादिशाब्दबोधः । अत्र च 'ग्रामादागच्छतः अश्वात् पतति' इत्यत्र अश्वग्रामयोः गमनपतनापादानत्वव्यावृत्त्यर्थं लक्षणे क्रियाविशेषविवक्षा द्रष्टव्या । तेन यन्निष्ठविभागजनकत्वेन यन्निष्ठभेदप्रतियोगिताऽवच्छेदकत्वेन च यत्क्रिया विवक्षिता, तत्त्वं तत्क्रियापादानत्वं इति निष्कर्षः । ततश्च पतनस्य अश्वे एव, गमनस्य च ग्रामे एव अपादानत्वमिति सिध्यति । अत एव 'परस्परस्मात् मेषौ अपसरतः' इत्यत्र उभयकर्मजविभागस्थले विभागस्य एकत्वेऽपि तत्तत्क्रियाविशेषान् आदायैव तदनाश्रयस्य तदपादानत्वं निर्वचनीयम् । विवक्षापदोपादानेन च यदा नोक्तरूपेण विवक्षा, अपितु अवयवावयविविभागस्यैव विवक्षा, तत्र 'वृक्षस्य पर्णं पतति' इत्येव प्रयोगः इति न तत्र अपादानत्वप्रसङ्गः । यत्पदं च यत्पदाभिधेयपरम् । तेन 'वृक्षात् तस्मिन्नेव वृक्षे पर्णं पतति' इत्यत्र सप्तम्यन्तपदाभिधेयत्वविशिष्टस्य नापादानत्वम् । न चैवमपि 'वृक्षं त्यजति' इत्यत्र 'स्पन्दते पर्णम्' इत्यत्र च वृक्षे अपादानत्वापत्तिः, क्रियाजन्यविभागाश्रयत्वात् क्रियानाश्रयत्वाच्च इति वाच्यम् । वृक्षे अपादानत्वसत्त्वेऽपि बलीयस्या कर्मसंज्ञया फलाश्रयत्वसत्त्वेन त्यागकर्मत्वस्यापि सत्त्वात् द्वितीयोत्पत्तेः पञ्चम्यप्रयोगात् । 'स्पन्दते पर्णम्' इत्यत्र 'आसनात् चलितः, राज्यात् चलितः' इतिवत् 'वृक्षात् स्पन्दते' इत्यस्यापि इष्टत्वात् । अत एव 'स्पन्दते' इत्यत्रापादानत्वव्यावृत्त्यर्थम् 'क्रियापदं सकर्मकधातुपरम्' इति केषां चित् समाधानमपास्तम् । 'वृक्षं त्यजति' इत्यत्र एवमनिवारणाच्च । अथवा उभयत्र अपादानत्वव्यावृत्त्यर्थं धात्वर्थताऽवच्छेदकफलभिन्नत्वं विभागविशेषणं वाच्यम् । त्यजेर्हि विभागानुकूलो व्यापारो वाच्यः । अतो विभागस्य धात्वर्थतावच्छेदकत्वात् तद्भिन्नविभागाश्रयत्वाभावेन न वृक्षे अपादानत्वप्रसङ्गः । स्पन्दतेश्च धात्वर्थताऽवच्छेदकफलाभावेन तद्भेदस्य अप्रसिद्ध्या तादृशविभागाप्रसिद्धेः नापादानत्वप्रसक्तिः । अथवा 'यन्निष्ठविभाग' इत्यपहाय 'यन्निरूपित' इति लक्षणे विवक्षितम् । 'वृक्षं त्यजति' इत्यत्र वृक्षनिष्ठो विभागो विवक्षितः, न तु वृक्षनिरूपितः इति नातिप्रसङ्गः । 'वृक्षात् पर्णम्' इत्यत्र च प्रकृत्यर्थस्य निरूपितत्वं विभागे संसर्गः । तथा च वृक्षनिरूपितविभागजनकं वृक्षनिष्ठभेदप्रतियोगितावच्छेदकं यत् पतनं इत्यादिः शाब्दबोधः । 'स्पन्दते' इत्यत्र अपादानत्ववारणाय क्रिया सकर्मिकैव लक्षणे विवक्षिता । 'आसनात् चलितः, सार्थात् हीयते पशुः' इत्यादयः प्रयोगास्तु वक्ष्यमाणावधित्वरूपपञ्चम्यर्थमादाय नेया इत्याहुः (अन्ये तु इति प्राक्तनेनान्वयः) । **वैयाकरणनव्या अपि केचिदेवम्।** वस्तुतस्तु

गुरुभूतशक्यताऽवच्छेदकभेदेन अनेकशक्तिकल्पनापेक्षया प्रकृत्यर्थस्य पञ्चम्यर्थद्वयान्वये व्युत्पत्तिद्वयम्' पञ्चम्यर्थस्य च धात्वर्थद्वयान्वये व्युत्पत्तिद्वयं इति कल्पनापेक्षया च अनुगतव्यवहारसाक्षिकतया अपादानत्वं अखण्डोपाधिरूपमेकं धर्मं निरुक्तापादानत्वसमव्यापकं कल्पयित्वा तत्रैव पञ्चम्याः शक्तिं कल्पयित्वा तस्मिंश्च प्रकृत्यर्थान्वयाय एकाम्, तस्य च आख्यातार्थान्वयाय एकां व्युत्पत्तिं कल्पयितुमुचितम् । प्रकृत्यर्थस्य च तत्र आधेयतया अन्वयः । तस्य च स्वनिरूपकधात्वर्थानुकूलत्वसंसर्गेण कृतौ अन्वयः । तदेवं प्रचुरप्रयोगात् अपादानत्वं पञ्चम्याः शक्यम् । यत्र तु 'वृक्षात् विभजते' इत्यादौ विभागजन्यविभागाश्रयत्वाभावात् नोक्तापादानत्वसंभवः, तत्र लक्षणया स्वरूपसंबन्धविशेषरूपं अवधित्वं पञ्चम्यर्थः । तत्रापि अपाये विभागे, ध्रुवमवधिभूतं अपादानसंज्ञं स्यात् इति वाक्यपदीयादौ सूत्रं व्याख्यातम् । तस्यापि धात्वर्थघटितसंसर्गेण भावनाऽन्वयः । वृक्षनिष्ठावधितानिरूपकविभागानुकूलकृतिः कर्तृवृत्तिः इति शाब्दबोधः । स्वनिष्ठविभागावधित्वस्य स्वस्मिन्नभावाच्च न 'स्वस्मात् विभजते' इति प्रयोगः । सर्वेष्वपि पूर्वोक्तेषु अवधित्वमेव पञ्चम्यर्थः । तस्य च क्वचित् धात्वर्थजन्यविभागद्वारकः अन्वयः, क्वचित् धात्वर्थद्वारकः इत्यपि वा सुवचम् । 'बलाहकात् विद्योतते विद्युत्' इत्यत्र तु निःसरणजन्यं विद्योतनं लक्षणया द्युतेरर्थः । तत्र एकदेशे निःसरणे पञ्चम्यर्थान्वयः । एवं 'कुसूलात् पचति' इत्यत्रापि आदानजन्यः पाकः पच्यर्थः । आदाने च पञ्चम्यर्थान्वय इति परकीयाः । स्वमते तु लक्षणायां एकदेशान्वये च प्रमाणाभावात् पञ्चम्यर्थः अपादानत्वादिरेव स्वनिरूपकनिःसरणादिजन्यविद्योतनानुकूलत्वसंसर्गेण कृत्यन्वयी । 'कुतो भवान्' इत्यादौ प्रश्ने 'पाटलिपुत्रात्' इत्याद्युत्तरे च 'आगतः' इत्यध्याहारेण अन्वयो बोध्यः । यत्तु 'जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्' इति वार्तिकं एतेषां योगे पञ्चमी वाच्या इत्यर्थकम्, तत् लाक्षणिकानुशासनम् । अतः 'पापात् जुगुप्सते विरमति, धर्मात् प्रमाद्यति' इत्यादौ पञ्चमी । अत्र आद्ये निन्दा धात्वर्थः । तच्च विगानम्, पञ्चम्यर्थो विषयित्वम्, प्रकृत्यर्थश्च निरूपितत्वसंसर्गेण तत्र अन्वेति, तच्च स्वाश्रयविगानवत्त्वसंबन्धेन आख्यातार्थे आश्रयत्वे । द्वितीये करणानन्तरं अकरणं धात्वर्थः, पञ्चम्यर्थः पूर्ववत्, आख्यातार्थः आश्रयत्वम्, पञ्चम्यर्थस्य च कृतिद्वारकः अन्वयः । पापविषयककृत्यनन्तरकालीनपापविषयककृत्यभावाश्रयत्वमिति शाब्दबोधः । तृतीये पञ्चम्यर्थो विषयित्वमेव, अनवधानं धात्वर्थः, आख्यातार्थः आश्रयत्वमेव । स्वाश्रयानवधानवत्त्वं आश्रयत्वे पञ्चम्यर्थस्य संसर्गः ।

एवम् 'भीत्रार्थानां भयहेतुः' (पा० १।४।२५) इत्यनुशासनात् भयार्थानां त्राणार्थानां च धातूनां योगे भयहेतुः अपादानसंज्ञः स्यात् इत्यर्थकात् 'चोरात् बिभेति, चोराद्धनिकं त्रायते' इत्यत्र पञ्चमी । अत्र हेतुमत्त्वं पञ्चम्यर्थः । आद्ये भयं धात्वर्थः । द्वितीये भयाभावानुकूलो व्यापारः, न तु भयाभावमात्रं कैश्चिदुक्तम्, तथात्वे धनिकस्य त्वन्मते धात्वर्थताऽवच्छेदकफलाभावेन तदाश्रयत्वरूपकर्मत्वानुपपत्तेः । **अस्मन्मते** तु व्यापारस्य भयाभाव एव कर्म इति तदुपपत्तिः । आख्यातार्थः आश्रयत्वम् । स्वाश्रयधात्वर्थवत्त्वं उभयत्र संसर्गः । चोरहेतुकभयाश्रयत्वम्, चोरहेतुकभयाभावानुकूलव्यापाराश्रयत्वमिति शाब्दबोधः । 'कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे' इत्यादौ तु 'कस्य संयुगे' इत्येवं संयुगघटितसंबन्धेन भावनाऽन्वयात् षष्ठी । न चैवं संयुगस्यैव अपादानत्वापत्तिः, परया अधिकरणसंज्ञया बाधात् । अधिकरणत्वाविवक्षायां तु इष्टापत्तेः । एवं 'पराजेरसोढः' (पा० १।४।२६) इति सूत्रात् पराजेर्धातोर्योगे असह्योऽर्थः अपादानसंज्ञः स्यात् इत्यर्थकात् 'अध्ययनात् पराजयते' इत्यत्र पञ्चमी । अत्र धात्वर्थः अनिष्टम्, पञ्चम्यर्थो जन्यत्वम्, अध्ययनजन्यानिष्टाश्रयत्वमिति शाब्दबोधः । 'शत्रून् पराजयते' इत्यत्र तु शत्रुनिष्ठानिष्टसाधनानुकूलकृत्याश्रयत्वमितिबोधात् द्वितीया । केचित्तु असहनं धात्वर्थः 'अध्ययनं न सहते' इतिविवरणात् इत्याहुः । एवम् 'वारणार्थानामीप्सितः' (पा० १।४।२७) इति सूत्रात् वारणार्थानां योगे ईप्सितोऽर्थः अपादानसंज्ञः स्यात् इत्यर्थकात् 'यवेभ्यो गां वारयति' इत्यादौ पञ्चमी । अत्र पञ्चम्यर्थः प्रतियोगित्वम्,

द्वितीयार्थो वृत्तित्वम्, धात्वर्थश्च विनाशानुकूलव्यापाराभावानुकूलव्यापारः, यत्नश्च आख्यातार्थः, पञ्चम्यर्थस्य स्वनिरूपकविनाशघटितः संसर्गः, द्वितीयार्थस्य धात्वर्थताऽवच्छेदकीभूतव्यापाराभावद्वारकः। तथा च यवप्रतियोगिकविनाशानुकूलो भक्षणादिरूपो यो व्यापारः, तस्य गोवृत्तिः योऽभावः तदनुकूलव्यापारानुकूला कृतिः देवदत्तवृत्तिः इति बोधः पर्यवसितः। अत्र च यवानां वस्तुतः ईप्सितत्वात् पञ्चमी। न चैवं गोरपि ईप्सितत्वात् पञ्चम्यापत्तिः, तस्याः ईप्सिततमत्वेन कर्मत्वोपपत्तेः। एतदर्थमेव हि 'कर्तुरीप्सिततमम्' (पा० १।४।४९) इत्यत्र तमब्ग्रहणं इत्युक्तं कौस्तुभे। धात्वर्थताऽवच्छेदकीभूतस्य विनाशानुकूलव्यापारध्वंसस्य गोमात्रवृत्तित्वात् तत्रैव द्वितीया। एवं 'कूपादन्धं वारयति' इत्यत्र वृत्तित्वं पञ्चम्यर्थः, पतनानुकूलव्यापाराभावानुकूलो व्यापारो धात्वर्थः। तथा च कूपवृत्ति अधःप्रदेशावच्छिन्नसंयोगानुकूलक्रियारूपं यत् पतनम्, तदनुकूलो यः अन्धवृत्तिः व्यापारः तदभावानुकूलो यो व्यापारः तदनुकूला कृतिः चैत्रवृत्तिः इति बोधः पर्यवसितः। एवम् 'पुष्पेभ्य आतपं वारयति' इत्यत्रापि शुष्कीभावानुकूलव्यापाराभावानुकूलव्यापारो धात्वर्थः। पुष्पवृत्तिशुष्कीभावानुकूलव्यापाराभावो य आतपनिष्ठः तदनुकूल– इत्यादिः पूर्ववत् बोधः। 'अग्नेर्माणवकं वारयति' इत्यादौ जन्यत्वं पञ्चम्यर्थः, दाहानुकूल– इत्यादिर्धात्वर्थः। न चैवमननुगमः। अनुभवानुरोधेन लक्षणायामननुगमस्य अदोषत्वात्। यवेभ्यो गां वारयति अन्यथा भक्षयिष्यति, कूपादन्धं वारयति पतिष्यति, पुष्पेभ्य आतपं वारयति शुष्काणि भविष्यन्ति, अग्नेर्माणवकं वारयति दग्धो भविष्यति इति प्रयोजनस्य भेदेन विवरणात्। **अन्ये तु** अनुगमरसिकाः सर्वत्र संयोगजनकव्यापाराभावस्य कर्मकारकवृत्तेः अनुकूलो यो व्यापारः स एव धात्वर्थः। वृत्तित्वं च पञ्चम्यर्थः इत्याहुः। **तन्न**, 'यवेभ्यो गोसंयोगं वारयति, यवेभ्यः कार्मणिकं वारयति' इत्यादौ अनुगमानुपपत्तेः। **ननु** 'वारणार्थानामीप्सितः' (पा० १।४।२७) इति सूत्रे न तावत् ईप्सिते वारयतिक्रियायोगे एव अपादानत्वनियमः 'इष्टादन्नात् अंशं ददाति' इत्यादौ तदभावे अपि दर्शनात्। नापि वारयत्यर्थयोगे ईप्सित एवेति नियमः, 'सर्पात् वारयति, गङ्गास्नानात् वारयति' इत्यादौ अनीप्सितेऽपि दर्शनात्। **इति चेन्न**। निवार्यनिवारकान्यतरस्य ईप्सितः इति तदर्थात्। सर्पादयो हि निवारकस्यापि पुरोवृत्तित्वादिना निवार्यस्य इष्टा एव। पुष्पेभ्य आतपं वारयति इत्यादौ निवार्यस्य अचेतनत्वात् निवारकग्रहणम्। अथवा धात्वर्थताऽवच्छेदकीभूतस्य विनाशानुकूलव्यापाराभावरूपस्य फलस्य यत् फलं विनाशादि, तत्संबन्धित्वेन प्रसक्तस्य यवादेः तद्विपरीतत्वेन निवारकेच्छाविषयः इति तदर्थः इति न कश्चित् विरोधः। वस्तुतस्तु बहुधा एतानि सर्वाणि सूत्राणि भाष्यकारेण प्रत्याख्यातानि। तस्यायमाशयः। 'ध्रुवमपाये' इतिसूत्रे हि न वस्तुत एव क्रियाजन्यो विभागोऽभिप्रेतः, अपितु तार्किकोऽपि, यदि इयं क्रिया न स्यात् तदा कर्मकारकेण अपादानस्य संबन्धः स्यात्, क्रियया तु स निवारितः इति तदभावो जनित इति। तदभिप्रायमेव च अपायपदम्। आवश्यकं च एतादृशं व्याख्यानम् 'असंयुक्तादेव चोरात् पलायितः' इत्येतदर्थम्। ततश्च तत्सूत्रेणैव यवादेरपि अपादानत्वसिद्ध्या सूत्रान्तरवैयर्थ्यमिति। न चैवं गवादेरपि तादृशाभावाश्रयत्वात् अपादानत्वापत्तिः, ईप्सिततमत्वादिप्रयुक्तकर्मसंज्ञया परत्वेन अपादानत्वसंज्ञाया बाधात्, वैपरीत्येन विवक्षायां इष्टापत्तेश्च। न च विवक्षायां उभयोः अपादानत्वापत्तिः, वारयतेः सकर्मकत्वेन अन्यतरस्य कर्मत्वविवक्षाया आवश्यकत्वात्। एवम् 'अन्तर्धौ येनादर्शनमिच्छति' (पा. १।४।२८) इत्यनेन अन्तर्धौ व्यवधाने सति यत्कर्तृकस्य आत्मनो दर्शनस्य अभावमिच्छति, तत् अपादानं स्यात् इत्यर्थकेन 'मातुः निलीयते कृष्णः' इत्यादौ पञ्चमी। अत्र च प्रत्यक्षाभावेच्छापूर्वकः प्रत्यक्षविरोधिव्यापारः धात्वर्थः। वृत्तित्वं पञ्चम्यर्थः धात्वर्थताऽवच्छेदके प्रत्यक्षे अन्वेति। विरोधित्वं तज्जनकलौकिकसंनिकर्षाभावानुकूलत्वम्। कृतिराख्यातार्थः। तथा च मातृवृत्तिस्वविषयकप्रत्यक्षाभावेच्छापूर्वकः यः प्रत्यक्षजनकलौकिकसंनिकर्षाभावानुकूलव्यापारः तदनुकूलकृतिः कृष्णवृत्तिः इति शाब्दबोधः।

व्युत्पत्तिबलेन च प्रत्यक्षे कृष्णविषयत्वस्य बोधः पार्ष्ठिकः। एवं नियमपूर्वकविद्यास्वीकारे वक्ता अपादानसंज्ञः स्यात् इत्यर्थकेन 'आख्यातोपयोगे' (पा० १।४।२९) इति सूत्रेण 'उपाध्यायादधीते' इत्यत्र पञ्चमी। अत्र उच्चारणोत्तरकालीनं अनभ्यस्तोच्चारणं धात्वर्थः। वृत्तित्वं पञ्चम्यर्थः। इदमपि सूत्रं भाष्यकारेण प्रत्याख्यातम्। उच्चारणक्रियाजन्यशब्दजनकस्वसमानजातीयशब्दानां उपाध्यायमुखनिःसृतत्वेन उपाध्यायस्य क्रियाजन्यविभागाश्रयत्वात् 'ध्रुवमपाये' इति सूत्रेणैव तत्सिद्धेः। **न च** एवंविधस्य विभागस्य मुख्यविभागत्वाभावात् नैकविधत्वं अपादानत्वस्य इति **वाच्यम्**। नानाविधानां एवंजातीयकानामपादानत्वानां व्यापकीभूताखण्डोपाधिरूपापादानत्वे एव तात्पर्यात्। अत एव एवंविधाः प्रयोगाः सर्वे शक्ता एव इत्यपि शक्यं वक्तुम्। तज्ज्ञापनमेव च प्रत्याख्यानफलम्। उक्तविधतत्तद्रूपेण निरूढलक्षणया बोधसिद्ध्यर्थं तत्तत्सूत्राणि इति मत्वा अस्माभिः अन्यैश्च तत्तत्सूत्राणि व्याख्यायन्ते। एवं जायमानस्य हेतुः अपादानसंज्ञः स्यात् इत्यर्थकेन 'जनिकर्तुः प्रकृतिः' (पा० १।४।३०) इति सूत्रेण 'ब्रह्मणः प्रजाः प्रजायन्ते' इत्यत्र पञ्चमी। अत्र जन्यत्वं पञ्चम्यर्थः। स च स्वाश्रयवृत्त्युत्पत्तिकत्वसंबन्धेन आख्यातार्थे आश्रयत्वे अन्वेति। अत्र हेतुत्वमुपादाननिमित्तोभयसाधारण्येन विवक्षितम्। तेन 'पुत्रात् प्रमोदो जायते, मृदो घटो जायते' इत्यादौ पञ्चमी। ब्रह्मणस्तु उभयरूपत्वात् पञ्चमी। एवम् 'भुवः प्रभवः' (पा० १।४।३१) इत्यनेन भवनस्य प्रकर्षविशिष्टस्य यः कर्ता, तस्य यः प्रभवनप्रतियोगी, सः अपादानसंज्ञः स्यात् इत्यर्थकेन 'हिमवतो गङ्गा प्रभवति' इत्यत्र पञ्चमी। अत्र प्रकर्षः संयोगध्वंसक्षणाव्यवहितोत्तरक्षणवृत्तित्वम्। धात्वर्थश्चैतत्सर्गीयभारतवर्षस्थभूसंयोगध्वंसासमानकालीनः तादृशभूसंयोगः। प्रतियोगित्वं पञ्चम्यर्थः। तस्य च प्रकर्षार्थसंयोगद्वारकः आख्यातार्थान्वयः। आख्यातार्थः आश्रयत्वम्। धातूपसर्गार्थभूतसर्वसंयोगेषु गङ्गावृत्तित्वं च व्युत्पत्तिबललभ्यम्। तथा च हिमवत्प्रतियोगिकगङ्गासंयोगध्वंसक्षणाव्यवहितोत्तरक्षणवृत्त्येतत्सर्गीयभारतवर्षस्थभू–गङ्गा–संयोगध्वंसासमानकालीनतादृशभूसंयोगाश्रयत्वं गङ्गावृत्ति इति बोधः पर्यवसितः। अत्र वैकुण्ठसंयोगध्वंसक्षणोत्तरं तादृशभूगङ्गासंयोगस्य आद्यस्य जायमानतया 'वैकुण्ठात् भुवि प्रभवति गङ्गा' इतिप्रयोगापत्तिः, अतः अव्यवहितेति। काशीसंयोगध्वंसाव्यवहितोत्तरक्षणे उक्तभूगङ्गासंयोगानां केषां चिज्जायमानत्वात् 'काशीतो गङ्गा भुवि प्रभवति' इतिप्रयोगापत्तेः तादृशसंयोगध्वंसासमानकालीनेति। एवं च आद्यस्यापि तादृशसंयोगस्य तदव्यवहितपूर्वक्षणवृत्तिवैकुण्ठसंयोगध्वंसाद्यव्यवहितोत्तरत्वात् 'वैकुण्ठात् प्रभवति' इतिप्रयोगापत्तेः अनिवारणात्प्रकर्षार्थसंयोगध्वंसक्षणस्यापि आद्यत्वविशेषणं देयम्। वस्तुतस्तु 'वैकुण्ठात् भुवि प्रभवति' इतिप्रयोगस्य इष्टापत्त्यैव परिहर्तुं शक्यत्वात् न तन्निवारणाय पदद्वयदानम्। एवम् 'ल्यब्लोपे कर्मण्यधिकरणे च' इत्यनेन (वार्तिकेन) अर्थाध्याहारादिना गम्यमाने ल्यबन्तकर्मणि अधिकरणे वा पञ्चमी स्यात् इत्यर्थकेन 'प्रासादात् प्रेक्षते' इत्यादौ पञ्चमी। 'प्रासादमारुह्य प्रेक्षते, प्रासादे स्थित्वा प्रेक्षते' इत्यर्थः। अत्र कर्मत्वं अधिकरणत्वं वा पञ्चम्यर्थः। तस्य च स्वनिरूपकारोहणादिभावनोत्तरकालिकत्वादिसंसर्गेण प्रेक्षणभावनायामन्वयः। न च गम्यमानक्रियायाः कथं संसर्गघटकत्वम्, 'कस्मात् त्वम्? नद्याः' इत्यादौ आगतादिपदाध्याहारेण गम्यमानक्रियादेः विशेष्यत्वाद्युपपत्तौ संसर्गघटकत्वस्य सुतरामुपपत्तेः। एवं 'यतश्चाध्वकालनिमानं तत्र पञ्चमी' 'तद्युक्तादध्वनः प्रथमासप्तम्यौ' 'कालात् सप्तमी च वक्तव्या' इत्यादिवार्तिकात् 'वनात् ग्रामो योजनं योजने वा, कार्तिक्या आग्रहायणी मासे' इत्यादौ पञ्चमी। अत्र अवधित्वं पञ्चम्यर्थः। वनावधिकयोजनपरिमितदेशवृत्तिर्ग्रामः इति बोधः फलितः। प्रथमार्थोऽपि अधिकरणत्वमेव। एवम् 'अन्य–आरात्–इतर–ऋते–दिक्शब्द– अञ्चूत्तरपद–आच्–आहि–युक्ते' (पा. २।३।२९) इत्यनेन एभिः शब्दैर्योगे पञ्चमी इत्यर्थकेन 'कृष्णादन्यः' इत्यादौ पञ्चमी। प्रतियोगित्वं चात्र पञ्चम्यर्थः। तस्य च स्वनिरूपकान्योन्याभावद्वारकपरंपरया अध्याहृताख्यातार्थे अन्वयः। अन्य इत्यर्थग्रहणं इति सूचनार्थं पृथक् इतरपदोपन्यासः। अत एव 'कृष्णादितरः, कृष्णात् पृथक्' इत्यपि द्रष्टव्यम्। **न चैवं**

'घटः पटो न, घटस्यान्योन्याभावः, घटस्य संयोगाभावः, घटस्य तादात्म्याभावः' इत्यादावपि पञ्चम्यापत्तिः, 'घटात् विभागः, घटात् भेदः पटस्य' इत्यादाविव धर्ममात्रवाचित्वेऽपि पञ्चम्यापत्तेर्दुर्वारत्वात्। धर्मिविवक्षायामपि 'घटस्यान्योन्याभाववान्' इत्यादौ तदापत्तेर्दुर्वारत्वाच्च इति **वाच्यम्**। पञ्चम्यर्थो हि प्रतियोगित्वं स्वनिरूपकभेदादिघटितसंसर्गेण अस्मन्मते आख्यातार्थान्वयी। तत्र च अन्यादिपदं संसर्गतात्पर्यग्राहकम्। परमते तु तदुपस्थापिते भेदादौ एव अन्वयः इति विशेषः। तदिह अन्यादिपदैः भेदादेर्विशिष्य भेदत्वादिना उपस्थितत्वात् युक्ता तद्योगे पञ्चमी। अन्योन्याभावादिपदैस्तु अन्योन्यादिपदवाच्यतादात्म्याद्यभावत्वेन बोधात् न तद्योगे पञ्चमी। नञोऽपि लाघवेन अभावत्वेनैव वाचकता, न तु भेदत्वादिना अनेकशक्तिकल्पनाऽऽपत्तेः। अत एव 'तदन्यतद्विरुद्धतदभावेषु नञ्' इत्यनुशासनमपि न वृत्तिपरं अन्यलभ्यत्वात्। अतो विशेषबोधः समभिव्याहारविशेषादिना इति न तत्रापि पञ्चमीप्रसक्तिः। अत एव 'घटात् पृथक्त्वम्' इत्यादिप्रयोगा निरपवादाः। **न चैवम्** 'घटः पटो न' इत्यादौ पञ्चम्यनापत्तावपि षष्ठ्यापत्तिर्दुर्वारा इति **वाच्यम्**। 'नियतप्रयोगा हि केचिदव्ययाः' इत्यनुशासनान्तरेण तदनापत्तेः। 'नेयं विभाषा' इत्यादिभाष्यप्रयोगाच्च। 'वनादारात् ग्रामः, ऋते कृष्णान्न किञ्चित्' अत्रापि प्रतियोगित्वं पञ्चम्यर्थः। यस्तु 'पुरुषाराधनमृते' (पुष्पदन्तः) इति प्रयोगः, सः 'ऋते द्वितीया' इति **चान्द्रसूत्रादव**गन्तव्यः। दिशि दृष्टः शब्दो दिक्शब्दः। तेन अत्र लक्षणया देशकालवाचिना योगे पञ्चमी इत्यर्थः। 'पूर्वो ग्रामाद्देशः, चैत्रात्पूर्वः फाल्गुनः' इत्यादौ। अत एव अवयववाचिना योगे न, 'पूर्वं कायस्य'। अञ्चूत्तरपदयोगेऽपि 'प्राक् प्रत्यक् वा ग्रामात्'। आच्योगेऽपि 'दक्षिणा ग्रामात्'। आहियोगेऽपि 'दक्षिणाहि ग्रामात्'। एवम् 'कार्तिक्याः प्रभृति' इति भाष्ये प्रयोगात् प्रभृत्यर्थयोगेऽपि पञ्चमी। 'भवात् प्रभृति सेव्यो हरिः' एवम् 'अपपरिबहिरञ्चवः पञ्चम्या' (पा. २।१।१२) इति समासविधिसामर्थ्यात् बहिर्योगेऽपि सा 'ग्रामात् बहिः।'

एवम् 'पञ्चम्यपाङ्परिभिः' (पा. २।३।१०) इति सूत्रात् एतैः कर्मप्रवचनीयसंज्ञकैर्योगे पञ्चमी इत्यर्थकात् 'अप हरेः संसारः, परि हरेः संसारः, आ मुक्तेः संसारः' इत्यादौ पञ्चमी। अत्र 'अपपरी वर्जने' (पा. १।४।८८) इतिसूत्रात् अनयोः कर्मप्रवचनीयसंज्ञा। अत एव वर्जनार्थकापपरियोगे एव पञ्चमी, लक्षणाद्यर्थयोगे तु द्वितीयैव इत्युक्तम्। आङ्स्तु 'आङ् मर्यादावचने' (पा. १।४।८९) इत्यनेन कर्मप्रवचनीयसंज्ञा। वचनग्रहणात् अभिविधावपि। एवम् 'प्रतिनिधिप्रतिदाने च यस्मात्' (पा. २।३।११) इति सूत्रात् एतदर्थककर्मप्रवचनीययोगे पञ्चमी इत्यर्थकात् पञ्चमी। स च 'प्रतिः प्रतिनिधिप्रतिदानयोः' (पा. १।४।९२) इति सूत्रात् प्रतिरेव। 'प्रद्युम्नः कृष्णात् प्रति' कृष्णप्रतिनिधिरित्यर्थः। मुख्याभावे यः तत्सदृश उपादीयते, स प्रतिनिधिः। प्रतियोगित्वं च अत्र पञ्चम्यर्थः। प्रतिदानम्—दत्तस्य प्रतिनिर्यातनं दानजन्योपकारप्रत्युपकार इति यावत्। 'तिलेभ्यः प्रतियच्छति माषान्'। अत्र कर्मत्वं पञ्चम्यर्थः। तस्य च निपातोपात्तदानभावनायां अन्वयः। तथा च तिलकर्मकदानभावनाजन्योपकारप्रत्युपकारजनकीभूता माषकर्मिका दानभावना चैत्रवृत्तिः इति शाब्दबोधः। एवम् 'अकर्तर्यृणे पञ्चमी' (पा. २।३।२४) इति सूत्रात् कर्तृवर्जितं यत् ऋणं हेतुभूतम्, ततः पञ्चमी इत्यर्थकात् 'ऋणात् बद्धः, शतात् बद्धः' इत्यादौ पञ्चमी। अत्र हेतुत्वं पञ्चम्यर्थः। शतमिह उत्तमर्णाय धार्यमाणत्वात् ऋणरूपमेव। तस्य कर्तृत्वे तु 'शतेन बन्धितः' इत्येवं तृतीयैव। अत्र हि णिजन्तत्वात् बन्धनप्रयोजके ऋणे हेतुत्ववत् 'तत्प्रयोजको हेतुश्च' (पा. १।४।५५) इति चकारेण कर्तृसंज्ञाया अपि करणात् कर्तृत्वावश्यकतया तृतीयान्तत्वमेव। एवम् 'विभाषा गुणेऽस्त्रियाम्' (पा. २।३।२५) इति सूत्रात् गुणे हेतौ अस्त्रीलिङ्गे पञ्चमी वा स्यात् इत्यर्थकात् 'जाड्यात् जाड्येन वा बद्धः' इत्यत्र विकल्पेन पञ्चमी। गुणत्वाभावे स्त्रीलिङ्गे वा 'धनेन कुलम्, बुद्ध्या मुक्तः' इत्यादौ तृतीयैव, 'हेतौ' (पा. २।३।२३) इति सूत्रात्। गुणत्वं चेह परतन्त्रत्वमात्रम्। तेन 'वह्निमान् धूमात्'

इत्यादौ पञ्चमी। 'नास्तीह घटः अनुपलब्धेः' इत्यादौ स्त्रीलिङ्गे तु पञ्चमी 'बाहुलकं प्रकृतेस्तदनुदृष्टेः' (पा. ३।३।१ वा.) इति वार्तिकप्रयोगादनुसंधेयम्। एवम् 'पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम्' इति सूत्रात् एभिर्योगे तृतीया स्यात् पञ्चमीद्वितीये च इत्यर्थकात् 'पृथक् ग्रामात्, ग्रामेण ग्रामं वा' इत्यादौ द्वितीयातृतीयाभ्यां विकल्पेन पञ्चमी। एवं विना-नानायोगेऽपि। अत्र प्रतियोगित्वं सर्वविभक्त्यर्थः। तत्र द्वितीया संनिहितत्वादेव अनुवर्तते, पञ्चमी तु मण्डूकप्लुत्या अनुवर्तनीया, भाष्यकृता तथैव व्याख्यातत्वात्।

एवम् 'करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य' (पा. २।३।३३) इतिसूत्रात् एभ्यः करणे तृतीयापञ्चम्यौ स्यातां इत्यर्थकात् 'स्तोकेन स्तोकाद्वा मुक्तः' इत्यादौ तृतीयया सह पञ्चमी। करणत्वं पञ्चम्यर्थः। द्रव्यरूपसत्त्ववचने तु 'स्तोकेन विषेण हतः' इत्यादौ तृतीयैव। एवम् 'दूरान्तिकार्थेभ्यो द्वितीया च' (पा. २।३।३५) इतिसूत्रात् एभ्यो द्वितीया, चात् पञ्चमीतृतीये इत्यर्थकात् 'ग्रामस्य दूरं दूरात् दूरेण वा' इत्यादौ द्वितीयातृतीयाभ्यां सह पञ्चमी। प्रातिपदिकमात्रार्थे विधिरयम्। न तु अत्र विभक्त्यर्थोऽन्यः कश्चित्। इह सप्तम्यपि 'सप्तम्यधिकरणे च' (पा. २।३।३६) इतिसूत्रे चकारेण 'दूरान्तिकार्थेभ्यः' इत्यनुकर्षणात्। तेन 'ग्रामस्य दूरेऽस्ति' इति प्रयोगोऽपि नानुपपन्नः। अत्र असत्त्ववचनस्य अनुवर्तनात् सत्त्ववचनत्वे न एतद्विभक्तिचतुष्टयनियमः। सत्त्ववचनत्वं चेह सामानाधिकरण्येन प्रातिपदिकार्थविशेषणम्, तेन 'दूरः पन्थाः' इत्यादौ दूरशब्दस्य पथो विशेषणत्वेन तद्विभक्त्यैव विभक्तिः। यद्यपि च अस्मन्मते विशेषणानामपि आख्यातेनैव अन्वयः, तथापि यत्र दूरत्वविशिष्टाभेदः संसर्गघटकः तत्र प्रथमा, यत्र दूरत्वाधारता संसर्गघटिका, तत्र विभक्तिचतुष्टयं इति न कोऽपि विरोधः।

तत् सिद्धं पञ्चम्यर्थः सर्वत्र भावनाऽन्वयी इति। **रहस्य.** पृ. ११२–१२६.

मी. को. ३०४

पञ्जरचालनन्यायः। 'न वायुक्रिये' इत्यधिकरणपूर्वपक्षन्यायोऽयम्। **संग्रहः.** * पञ्जरचालनन्यायः। यथा स्वयत्नैर्दशभिः पक्षिभिरेकक्रियोत्पादनेन पञ्जरचालनं क्रियते, तथा दशभिरिन्द्रियैः प्राणरूपैकक्रियोत्पादनेन देहचालनं क्रियते इति भावः। **साहस्री.** ४१. * पञ्जरचालनन्यायः। ननु पञ्जरचालनन्यायेनैतद्भविष्यति। यथा एकपञ्जरवर्तिनः एकादश पक्षिणः प्रत्येकं प्रतिनियतव्यापाराः सन्तः संभूयैकं पञ्जरं चालयन्ति। एवमेकशरीरवर्तिनः एकादश प्राणाः प्रत्येकं प्रतिनियतवृत्तयः संभूयैकां प्राणाख्यां वृत्तिं प्रतिलप्स्यन्ते। **शांभाष्य.** २।४।५।९ ब्रसू.

पञ्जरमुक्तपक्षिचालनन्यायः। यथा पञ्जरात् मुक्ताः पक्षिणः सदोर्ध्वमेव चलन्ति, एवमेव जीवो देहात् मुक्तः सदोर्ध्वमेव गच्छति इति स एव तस्य मोक्ष इति दिगम्बरैकदेशिनो मन्यन्ते। **साहस्री.** ९.

पञ्जरस्थसिंहन्यायः। यथा—'स्नेहतन्तुमयैः पाशैर्बद्धः संतानरज्जुभिः। पञ्जरस्थो यथा सिंहः समर्थोऽपि वशीकृतः॥' इति। **साहस्री.** ९३७.

* **पटः** भवति इति पट उत्पद्यते इत्यर्थः। निराकाङ्क्षं च पदद्वयम्। यदा च तस्मिन्नेव 'रक्तः' इत्यपरं श्रूयते, तदा रागसंबन्धो भवतीत्यर्थः। भवति च रक्तं प्रति आकाङ्क्षा। **भा.** १।२।१।७ पृ. ११७, * **पट**मभिनवं दृष्ट्वा (तस्य अनित्यता गम्यते)। न चैनं क्रियमाणमुपलब्धवान्। अथ चानित्यमवगच्छति रूपमेव दृष्ट्वा। तन्तुव्यतिषङ्गजनितोऽयं तन्तुव्यतिषङ्गविनाशात् तन्तुविनाशाद्वा विनश्यतीत्यवगच्छति। १।१।६।२१, * 'पटं वय' इति पटवयनसंबन्धो विधेयोऽवगम्यते। 'पटं दीर्घं वय' इति पटस्य दीर्घता विधीयते, दीर्घशब्दप्रयोगात्। २।३।५।१४. * '**पटस्य** शुक्ल इत्यत्र निष्कृष्टो गुण आश्रितः। पटः शुक्ल इति त्वत्र द्रव्यलीनोऽभिधीयते॥' लिङ्गसंख्यादिसंबन्धः स्वाश्रयद्वारेण उपपत्स्यते। **वा.** ३।१।६।१२ पृ. ६८५.

पटाच्छादनन्यायः। विरुद्धयोर्हि श्रुतिस्मृत्योः विकल्पप्रसङ्गेन अवश्यं कल्पनीये अन्यतरप्रमाणत्वे यावत् श्रुतौ पटाच्छादनन्यायेन कल्पयितुमारभ्यते, तावत् स्मृतौ

स्वरूपाश्रयं क्लृप्तमेवोपलभ्य संशयच्छेदे न कदाचिदपि अभूताप्रामाण्याध्यारोपकल्पनोपपत्तिः । वा. १।३।२।३ पृ. १८०.

* पणः द्यूतम् । शतस्य पणते । मणि. पृ.१२६.

⧗ 'पणलभ्यं हि न प्राज्ञः क्रीणाति दशभिः पणैः ।' इति न्यायः । मेधातिथिः २।७९.

⧗ पतङ्गदीपकन्यायः । यथा पतङ्गाख्यः कीटविशेषः स्वप्रीतिपात्रदीपके निजाङ्गदाहकत्वसत्त्वेऽपि तत्र पतनं प्रीतिवशमापन्नो नो जहाति, तथा सन्मित्रस्य व्यवहारः । साहस्री. ३२६.

* पतञ्जलिः मन्वादिसमानः प्रामाण्ये । वि. १।३।९.

⧗ पतन्तमनुधावतोऽपि गत इति न्यायः । यथा पतन्तं कथञ्चिज्जालान्निःसृत्योड्डीय गच्छन्तं पक्षिणमनुधावतो जीवान्तकस्य बद्धोऽपि पक्षी गतः, तथा प्रकृतेऽपि । किंच, प्रकृतन्यायेन हरिहरादेरेकब्रह्मरूपत्वं चेत्तर्हि तत्तन्माहात्म्यपरपुराणादिष्वितरनिन्दा न स्यात्, दृश्यते च सा, तथा च तदन्यथानुपपत्त्या साम्यमपि दुर्लभं ह्येकत्वस्य का कथेति वादिनः शङ्का । साहस्री. १३५. * पतन्तमनुधावतो बद्धोऽपि गतः (पक्षी) इति न्यायः । संग्रहः.

⧗ पतनान्ताः समुच्छ्रया इति न्यायः । यथा ये पदमूर्ध्वं गच्छन्ति तेषां पातोऽप्यवश्यम्भावीति विषये प्रकृतन्यायसंचार इति संक्षेपः । साहस्री. ९२६.

* उतैको बह्वीर्जाया विन्दते । नैका बहून् पतीन् । वा. १।३।४।९ पृ. २२१.

* पतेः (पततेर्धातोः) अर्थः अधःसंयोगानुकूलक्रिया, अधःसंयोगप्रयोजकविभागानुकूलक्रिया वा अर्थः । मणि. पृ. १४०.

⧗ पतिंवरान्यायः । यथा स्वयंवरा कन्या अन्यांस्त्यक्त्वा सर्वोत्तमत्वेनाभिमतं यमभीष्टतमत्वेनादत्ते, न ततोऽन्यत्राभीष्टतमत्वमतिं कुरुते, तथा प्रकृतेऽपीति । साहस्री. ३८९.

* पतिशब्दः सर्वत्र आधिपत्ये प्रयुक्तः आ हिमवत आ च कुमारीभ्यः । भा.९।३।१२।३३.

* पतितयाजनं लोभादङ्गीकृत्य यो याजयिष्यति, तदपेक्षम् 'ब्रह्महा अश्वमेधेन यजेत' इति विधानम्., न तु तद्विधानान्यथाऽनुपपत्त्या याजनमितरेषामपि विहितमिति कल्प्यते । वा. ३।४।१०।२८ पृ. ९६०.

* पत्नी इति हि यज्ञस्य स्वामिनीत्युच्यते । न क्रीता । पत्नीति संबन्धिशब्दोऽयम् । भा. ६।१।४।१७ पृ. १३६२. * पत्नी दर्भमयं वासः परिधत्ते अहतं च । महाव्रते । वि.१०।४।८. * पत्नी पारिणय्यस्येष्टे (इति गौणः प्रयोगः इति पूर्वपक्षः) । (पारिणय्यं गृहगतं भाण्डादिकम्) । भा. ६।१।४।१९, * पत्नी महाव्रते दर्भमयं वासः परिधत्ते, तस्य प्राकृतेन अहतवाससा समुच्चयः । १०।४।७।१३–१५, * पत्नी स्व(धन)वती श्रुत्यनुरोधात् । ६।१।४।२०, * 'पत्नयः उपगायन्ति' इति माहाव्रतिकं धर्मं संवत्सरसत्रे दर्शयति । तेन गवामयनविध्यन्तः संवत्सरसत्रेषु । ८।१।११।१८, * पत्नय उपगायन्ति पिच्छोलाभिः काण्डवीणादिभिः आपातलिकाभिः । महाव्रते प्राकृतानां ऋत्विजां उपगातॄणां पत्नीभिः समुच्चयः । दुन्दुभीनां वादित्ररूपाणां इदमुपगानम् । काण्डवीणादिभिः वादित्रमेव वा उपगानं इदम् । १०।४।५।८–९, * द्विपत्नीको बहुपत्नीकश्चापि यजमानोऽस्ति । ९।३।६।२१, * 'पत्नीं संनह्य' इति पत्नीशब्दः द्विपत्नीके बहुपत्नीके वा प्रयोगे नोहितव्यः । ९।३।६।२०, * 'पत्नीं संनह्य' इत्यत्र द्विबहुपत्नीकप्रयोगे विकृतावपि एकवचनस्य नोहः । (मीको. पृ. १२२८ द्रष्टव्यम्) । ९।३।७।२२, * पत्न्या द्वितीयया विना यजमानेन धनस्य त्यागो नैवावकल्पते । ६।१।४।१७. * पत्नीभिरुपगानकर्त्रीभिः ऋत्विजामुपगाने समुच्चयो महाव्रते । १०।४।५ (मीको. पृ. ११४२ द्रष्टव्यम्) । * पत्न्याः निषिद्धस्य अध्ययनस्य पुनः प्रसवे न किंचिदस्ति प्रमाणम् । भा. ६।१।६।२४, * पत्न्याः यागे यावदुक्तब्रह्मचर्यादावेवाधिकारः । ६।१।६।२४. मीको. पृ. १४८९ 'केशश्मश्रुन्यायः' इत्यत्र द्रष्टव्यम् । * पत्न्याः व्रतश्रपणं दक्षिणेऽग्नौ आम्नातम् । यदा आमयदोषात् मांसं व्रतकार्ये उपादीयते, तदा तन्न दक्षिणाग्नौ श्रपयितव्यम् । ज्योतिष्टोमे । भा. १२।२।१।७. * पत्न्याः श्मश्रूणामभावात् केशानामपि न वपनम्, साहित्यस्य विवक्षितत्वात् । ('केशश्मश्रु वपते' इति ज्योतिष्टोमगतसंस्कारविषयकमिदम्) । भाट्ट. ६।५।२०.

* पत्न्यधिकरणम् । ६।१।४, ९।३।६. (सहाधिकाराधिकरणं पत्नीसंनहनन्यायश्चोभयमपि पत्न्यधिकरणशीर्षकेण उच्यते । 'सहाधिकाराधिकरणम्' 'पत्नीसंनहनन्यायः' इत्यत्रापि द्रष्टव्यम्) । * पत्न्यधिकरणे (६।१।४।१७–२१) पत्न्या अपि पतिधने स्वत्वमुक्तमिति । तस्या अपि तर्हि पत्या सह विभागो भवेद्यदि शाब्दस्तु निषेधो न स्यादिति चेत्, न, 'अधनास्त्रय एवैते भार्या दासस्तथा सुतः ।' इत्यादिना तस्या अधनोक्तेरित्यवेहि । पत्न्यधिकरणं तु इज्यामात्रे सहत्वेन अधिकारसिद्धौ । न तु अधिकरणेन योषिदधनत्ववचनबाधः । तस्य न्यायत्वेन वचनाबाधकत्वात् । विवादचिन्तामणिः पृ. २५४–२५५. * यः पत्न्यधिकरणे (पत्नीसंनहनन्याये) पूर्वपक्षः स इह (अध्रिगुप्रैषगतस्य प्रास्मै इति पदस्य अग्नीषोमीयसवनीययोः समानविधित्वपक्षे न विकारः इत्यधिकरणे) पूर्वपक्षः । यः सिद्धान्तः स इह सिद्धान्तः । ऊह इति पूर्वपक्षः । अविकार इति सिद्धान्तः । भा.९।३।८।२२.

* पत्न्यवेक्षितेन यजमानावेक्षितेन चाज्येन होम उच्यते, तत्रान्यतराभावे वैगुण्यम् । तस्मात् दंपत्योः सहाधिकारः । भा. ६।१।४।१७.

* पत्नीद्वयं एकस्य संभवति न वेति विचारे भाष्ये उक्तम् "यथैव स्मृतिः 'धर्मे चार्थे च कामे च नातिचरितव्या' इति, 'धर्मप्रजासंपन्ने दारे नान्यां कुर्वीत' इति च । एवमिदमपि स्मर्यते एव 'अन्यतरापायेऽन्यां कुर्वीत' इति । 'तस्माद्यस्य न धर्मसंपन्ना, न प्रजासंपन्ना वा पत्नी सोऽन्यां कुर्वीत' इति । 'सोमपो न द्वितीयां जायामभ्यपूयते' ('सोमपाने न द्वितीयां जायामभ्यश्नुते' इति च) द्वितीयामपि जायां दर्शयति" । इति । पत्नीसंनहनाधिकरणादौ बहुपत्नीकत्वं स्वीकृत्यैव च विचारः कृतः । के.

* यत्र चान्यत्राभिधानविप्रतिपत्तिः तत्र पाशन्यायः । यत्र त्वेक एव मन्त्रः तत्र पत्नीन्यायः । 'पवित्रे स्थः' इति यथा । टुप्. ९।३।६।२०. * पत्नीन्यायेन एकत्वस्य प्रत्येकवृत्त्यभिप्रायेणापि उपपत्तिः (अध्रिगुप्रैषे पशुगणे 'अस्य पदो निधत्तात्' इत्यत्र) । के.

* पत्नीरहितस्य क्रतुप्रयोगः अनाचारः । वा. १।३।३।७ पृ. २०४.

* पत्नीशब्दं यज्ञस्वामिन्यां स्मरन्ति एवं यजमानशब्दमपि । [स्मरन्तीति– 'पत्युर्नो यज्ञसंयोगे (पा. ४।१।३३) इत्यादिनेति शेषः । यजमानशब्दमपीति– स्वामिनि स्मरन्तीति पूरणम् । 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' (पा. १।३।७२) इतिस्मृत्या कर्तृगतक्रियाफलवाच्यात्मनेपदान्तत्वात् यजमानशब्दस्य इति शेषः । रत्न.] । टुप्. ६।१।४।१७ पृ. १३६१.

* पत्नीसंनहनं ज्योतिष्टोमाङ्गेष्टिषु पृथक् न कार्यं सौमिकसंनहनेन प्रसङ्गसिद्धत्वात् । वि. १२।१।१३. * पत्नीसंनहनेन सौमिकेन प्रसङ्गसिद्धिः सौमिकेष्टिपश्वादिषु पत्नीसंनहनस्य दार्शिकस्य । १२।१।१३. 'प्रसङ्गसिद्धिः सौमिकेन' इत्यत्र द्रष्टव्यम् ।

⧗ पत्नीसंनहनन्यायः । दर्शपूर्णमासयोः द्विबहुपत्नीके प्रयोगे 'पत्नीं संनह्य' इत्यत्र एकवचनस्य नोहः ॥

अपूर्वे त्वविकारोऽप्रदेशात् प्रतीयेत । ९।३।६।२१ ॥

भाष्यम्— दर्शपूर्णमासयोरामनन्ति 'प्रोक्षणीरासादयेध्माबर्हिरुपसादय, स्रुवं च स्रुचश्च संमृड्ढि, पत्नीं संनह्याऽऽज्येनोदेहि' इति । तत्र पत्नीं संनह्येति चिन्त्यते । अस्ति हि यजमान एकपत्नीको बहुपत्नीकश्च । तत्र सर्वस्य प्रयोगमधिकृत्य पत्नीशब्द उच्चरितः इत्येतत् पाशाधिकरणेनैव (९।३।४) निर्णीतम् । इदं तु संदिह्यते किं द्विपत्नीके बहुपत्नीके च प्रयोगे ऊहितव्यः पत्नीशब्दः, उत नेति । किं प्राप्तम् ? अभिधानार्थत्वान्मन्त्राणां ऊहितव्य इति । एवं प्राप्ते, ब्रूमः । अपूर्वे तु अप्रकृतिपूर्वके कर्मणि, अविकारेण प्रयुज्येत । कुतः ? ईकारान्तं हीदं पत्नीमात्रस्य वाचकम् । तत्र द्विपत्नीके बहुपत्नीके

च प्रयोगे पत्नीशब्दे उपादीयमाने द्विवचनं बहुवचनं च सामर्थ्यात् प्राप्नोति संनहनसंबन्धं कर्तुम् । समाम्नानसामर्थ्यात्तु एकवचनेन क्रियते । न चात्र द्वित्वं बहुत्वं वा विवक्ष्यते, लक्षणत्वेन हि पत्नीशब्दस्य श्रवणात् । न चैकपत्नीकात् प्रयोगात् द्विबहुपत्नीके प्रयोगेऽतिदेशो भवति । यथा तत्र संख्योक्ता, तद्वदिहापीति । तस्मादविकारेण पत्नीशब्दस्य प्रयोगः । अथापि कथंचिदेकत्वं विवक्ष्येत, तथापि द्विबहुपत्नीके प्रयोगे संप्रतिपत्त्यभावादेकवचनार्थमेकवचनम् । तदनेकपत्नीके प्रयोगे अविरुद्धमित्यविकारेण प्रयुज्यते इति ।

टुप्—— यदि पत्नी प्रातिपदिकं प्रधानं बलवत्, ततः एकद्विबहुपत्नीकेषु प्रयोगेषु प्रातिपदिकार्थोऽस्ति इति तद्वशेन विभक्तिरपि एकवचनं त्रिष्वपि आकृतिसंख्याऽभिप्रायं स्यात् । अथ विभक्तिः प्रधानम्, ततो यत्र सा स्वार्थं लभते, तत्रैव पर्यवसितः प्रातिपदिकार्थः, इति द्विबहुपत्नीके मन्त्र एव न स्यात् । इत्येतयोः पक्षयोः किं न्याय्यमित्येतत् पाशाधिकरणे वर्णितमिति यथाप्रातिपदिकानुरोधि वचनमिति । '**अथापि कथञ्चिदेकवचनं विवक्षितम्**' (इतिभाष्यस्य अयमर्थः-) अदृष्टार्थमेकवचनमुच्चारितम्, न समवेतसंख्याभिधानार्थम्, द्विबहुत्वस्यानभिधानात् । यत्र चान्यत्राभिधानविप्रतिपत्तिस्तत्र पाशन्यायः । यत्र त्वेक एव मन्त्रः, तत्र पत्नीन्यायः, 'पवित्रे स्थः' इति यथा । ननु पवित्रयोरुपादीयमानत्वाद्विवक्षितं द्वित्वम् । उपादीयमानता च 'पवित्राभ्यामुत्पुनाति' इत्यादौ तयोरिति । न वयं द्वित्वविवक्षां वारयामः । किं तर्हि ? समवेतं वदति न वदतीति । समवेतवचनत्वे ऊहो विवक्षितः प्रयोजनमिति ।

सोम—— पूर्ववैषम्येण उत्थानात् **संगतिः** । अत्र प्रातिपदिकं त्रिष्वपि प्रवर्तते, वचनं तु एकपत्नीकप्रयोगे इत्यर्धजरतीयाश्रयणमयुक्तम्, प्रकृतिप्रत्यययोः सहप्रवृत्तिनियमात् । तस्मादिह द्विवचनबहुवचनप्रयोगमिच्छता प्रातिपदिकं वचनं च उभयमपि एकपत्नीकप्रयोगाभिप्रायेण आम्नातं इति तस्य प्रकृतित्वम्, इतरयोस्तद्विकृतित्वं चाश्रित्य मुख्य एवोहो वक्तव्यः । स च न संभवति, प्रयोगाणां समानविधित्वात् इति सिद्धान्तः । **सूत्रार्थस्तु**- अपूर्वे प्रकृतौ 'पत्नीम्' इत्यस्य अविकारः, अप्रदेशात् सामानविध्येन अनतिदेशात् प्रतीयेत इति ।

वि—— 'पत्नीमिति द्विपत्न्यादावूह्यं नो वो,ह्यतेऽर्थतः।, नोपदेशस्य सामान्यादतिदेशाप्रवृत्तितः ॥' तस्मादत्र नास्त्यूहः ।

भाट्ट—— अत एव दर्शपूर्णमासयोः 'पत्नीं संनह्य' इत्येकवचनान्तो मन्त्रः एकपत्नीप्रयोगे इव द्विबहुपत्नीकप्रयोगयोरपि अविकारेणैव प्रयोक्तव्यः । **न च** लिङ्गैनैकपत्नीकप्रयोगे एव मन्त्रोऽङ्गं द्विबहुपत्नीकप्रयोगयोस्तूहेनातिदिश्यते इति **युक्तम्** । प्रयोगयोः परस्परं प्रकृतिविकाराभावे प्रमाणाभावात् । लिङ्गस्य वक्ष्यमाणरीत्या सर्वसाधारणत्वाच्च । यत्र हि उपदेशाख्यप्रापकप्रमाणस्य एकमात्रविषयत्वं अन्यत्र च कार्यमुखेनातिदेशतः प्राप्तिः, तत्रैवोहः, न तु प्रापकप्रमाणस्य सर्वविषयत्वे । अत्र च पाशन्यायेन प्रातिपदिकादिलिङ्गस्य सर्वविषयत्वोपपत्तेरेकवचनानुरोधेन संकोचायोगात् नास्य प्रापकप्रमाणस्य एकपत्नीप्रयोगमात्रविषयत्वम् । **न च** ऋतुपशूनां समानविधानत्वकृत्वाचिन्तायाम् 'प्रास्मै' इत्यस्य लिङ्गानुरोधेन मेषीवर्जं संकोचवत् इहाप्येकवचनानुरोधेन मन्त्रसंकोचोपपत्तिरिति **वाच्यम्** । विना कारणं पुल्लिङ्गस्य लक्षणायां प्रमाणाभावेन तत्र संकोचोपपत्तावपि प्रकृते संकोचे प्रमाणाभावात् । नह्यत्र द्विबहुपत्नीकप्रयोगे एकवचनस्य लक्षणा, प्रत्येकव्यक्तिगतैकत्वाभिप्रायेण तदुपपत्तेः । यथैव हि 'शुक्ला घटाः' इत्यादौ शुक्लगुणस्य प्रत्येकवृत्तित्वेनान्वयः, तथैकवचनाभिहितस्य एकत्वस्यापि प्रत्येकव्यक्तिवृत्तित्वेनान्वये न काचित् क्षतिः । न चैवम् 'बहुषु बहुवचनम्' इत्याद्यनुशासनस्य निर्विषयत्वापत्तिः, बहुत्वस्य शाब्दबोधविवक्षायां तदुपपत्तेः । न चैवम् 'पशुना यजेत' इत्यादौ द्वित्रिपशुग्रहणेऽपि बाधकानापत्तिः, प्रथमातिक्रमे कारणाभावेन एकवचनस्य ऐच्छिकपक्षान्तरव्यावृत्तिफलकत्वोपपत्तेः । अतश्च द्विबहुपत्नीकप्रयोगे एकवचनान्तस्यैव मन्त्रस्य प्रयोगोपपत्तेर्न तत्रोहः, न वा 'व्रीहीणां मेध' इतिवत् लोपः इति सिद्धम् ।

मण्डन—— 'पत्नीपदे संनहनाय नोहः ।'

शंकर—— 'नोह्यः पत्न्यैक्यवान् मनुः ।' मनुः मन्त्रः ।

* **पत्नीसंनहनमन्त्रे** द्विपत्नीके बहुपत्नीके वा यजमाने सत्यपि पत्नीशब्दस्य नास्त्यूहः प्रकृतौ । वि. ९।३।६, * पत्नीसंनहनमन्त्रे विकृतावपि द्विबहुपत्नीकयजमानप्रयोगे पत्नीशब्दे नास्त्यूहः । ९।३।७.

* **पत्नीसंयाजा** इति कर्मनाम्नः प्रवृत्तिः तृतीयाऽऽहुतौ देवपत्नीनां देवतात्वात् तद्द्वारा । वि. ३।३।१०. * पत्नीसंयाजा इत्यत्र 'सोमं यजति, त्वष्टारं यजति, देवानां पत्नीर्यजति, अग्निं गृहपतिं यजति' इति सोमादयः पत्नीशब्देन सृष्टिन्यायेन विवक्षिताः । कु. ३।३।१५।१८. * पत्नीसंयाजाः गार्हपत्ये भवन्ति । 'गार्हपत्ये पत्नीसंयाजान् जुहोति' इति श्रुतेः । वि. १०।८।८, * **पत्नीसंयाजान्** वरुणप्रघासेषु अध्वर्युः प्रतिप्रस्थाता च पृथक्पृथक् जुहुयाताम् । ११।२।११, * **पत्नीसंयाजानामुपरि** फलीकरणहोमप्रायश्चित्तहोमकपालोद्वासनैः इष्टिः समाप्यते । १०।७।१२. * पत्नीसंयाजानां वरुणप्रघासेषु द्विरावृत्तिः । ११।२।११. 'वरुणप्रघासेषु पत्नीसंयाजानाम्' इत्यत्र द्रष्टव्यम् । * पत्नीसंयाजानां हारियोजनोत्तरत्वं द्वादशाहे । के. * समिष्टयजुःपत्नीसंयाजानां पाशुकप्रयोगविधिविहितानां क्रमः व्यवधायकाभावविशिष्टप्रकृतिदृष्टपौर्वापर्यादेव सिध्यति । भाट्ट. ५।१।१५. * **पत्नीसंयाजेषु** अग्नीषोमीयपशुगतेषु विकल्पप्राप्तजाघन्याः नियमेन पुनर्विधेश्चरितार्थत्वात् अर्थकर्मत्वमेव । वि. १२।४।६. * **पत्नीसंयाजेषु** आश्रुतप्रत्याश्रुतप्रणववषट्कारभिन्नमन्त्रेष्वेव उपांशुत्वम् । **संकर्ष**. ४।३।१५. **मीको**. पृ. १२०८ 'उपांशुयाजपत्नीसंयाजेषु०' इत्यत्र द्रष्टव्यम् । * पत्नीसंयाजेषु कपालाग्निहोमे (कपाले आहुतिपाते) वैश्वानरो द्वादशकपालः प्रायश्चित्तम् । 'तस्य एकहायनो गौर्दक्षिणा' इति भाष्यम् । 'तस्य एकहायनी गौर्दक्षिणा' इति विस्तरः । शा., भाट्ट. विस्तरवदेव । इदं च दानं कस्मैचित् द्वेष्याय, न ऋत्विजे । इदं चादृष्टार्थम् । **के**. १०।२।१६।४७. * पत्नीसंयाजेषु जाघनी दर्शपूर्णमासपूर्वकं चोदकपरंपरया पशुगणं प्राप्ता । के. * पत्नीसंयाजेषु जाघनी हविष्ट्वेन विधीयते । सा संभवति दर्शपूर्णमासयोः क्रीत्वाऽपि आनीयमाना । नासौ पशुं प्रयोक्ष्यते । तस्मात् नासौ पशौ उत्कृष्यते । आज्येन चेयं विकल्प्यते । **के**. ३।३।१०।२०-२३. * पत्नीसंयाजेषु जाघनीनां विकल्पः ऐकादशिनादिपशुगणेषु । १२।४।६. **मीको**. पृ. १३०९ 'ऐकादशिनादिपशुगणेषु पत्नीसंयाजेषु' इत्यत्र द्रष्टव्यम् ।

* **पत्नीसंयाजाङ्गमेव** आज्येडा । **संकर्ष**. ४।३।१६. **मीको**. पृ. ८८३ 'आज्येडा' इत्यत्र द्रष्टव्यम् ।

* **पत्नीसंयाजाङ्गभूतेन** आज्येन सह विकल्प्यमाना जाघनी दर्शपूर्णमासयोः । **वा**. ३।३।१०।२३, 'आज्येन पत्नीसंयाजा इज्यन्ते' इति शाखान्तरविधिः इति **कुतूहलम्** । ३।३।१५।२०.

* **पत्नीसंयाजाधिकरणे** (३।३।१०।२०) 'पत्नीसंयाजान्तान्यहानि संतिष्ठन्ते' इति द्वादशाहिकं वाक्यं नियमविधिलाघवानुसारात् प्रागुत्तमादह्नः पत्नीसंयाजान्तत्वविधायकं इत्यङ्गीकृतम् । **रसायनं**. पृ. ७५.

* **पत्नीसंयाजान्तत्वमुत्तमाहवर्जमहर्गणे** द्वादशाहे । ९।१।९. **मीको**. पृ. ७६१ 'अहर्गणे द्वादशाहे' इत्यत्र द्रष्टव्यम् । * पत्नीसंयाजान्तत्वं द्वादशाहे उत्तमाहवर्जम् । **भा**. ९।१।९।२९-३२, * पत्नीसंयाजान्तत्वं द्वादशाहिकानामह्नां सामान्येन । विशेषेण तु दशमस्याह्नो मानसान्तता उच्यते 'पत्नीः संयाज्य प्राञ्च उदेत्य मानसाय प्रसर्पन्ति' इति । १०।६।१३।४४.

पत्नीसंयाजान्तत्वं सर्वेषामविशेषात् । ९।१। ९।२९ ॥

द्वादशाहे अहर्गणे 'पत्नीसंयाजान्तानि अहानि संतिष्ठन्ते' इति श्रूयते । अत्र किं सर्वेषामह्नां पत्नीसंयाजान्तत्वम्, उत प्रागुत्तमात् दशममहः वर्जयित्वा इति विचारे पूर्वपक्षमाह । सर्वेषामह्नां पत्नीसंयाजान्तत्वं

स्यात्, अविशेषात् 'पत्नीसंयाजान्तान्यहानि' इति अविशेषेण श्रवणात्। तस्मात् सर्वेषाम्।

लिङ्गाद्वा प्रागुत्तमात्। ३०॥

वाशब्दः पूर्वपक्षव्यावृत्तौ। यदुक्तम्, द्वादशाहे अहर्गणे पत्नीसंयाजान्तत्वं सर्वेषामह्नामिति, तन्न। किन्तु प्राक् उत्तमात् अन्तिमात् अह्नः पत्नीसंयाजान्तत्वं स्यात्, लिङ्गात्। 'पत्नीसंयाजान्तान्यहानि संतिष्ठन्ते, न बर्हिरनुप्रहरति, असंस्थितो हि तर्हि यज्ञः' इति लिङ्गं यस्मिन्नहनि यज्ञः न संस्थितः समाप्तो भवति, तस्मिन् पत्नीसंयाजान्ततां दर्शयति। समाप्तिश्च अन्त्ये अहनि। तस्मात् असमाप्तेः पत्नीसंयाजान्ततायाश्च सामानाधिकरण्यम्। असमाप्तिश्च प्राक् उत्तमात् अह्नः। तस्मात् प्रागुत्तमात् पत्नीसंयाजान्तता इति सिद्धान्तः।

अर्थवादो वा, दीक्षा यथा नक्तंसंस्थापनस्य। ३१॥

द्वादशाहे अहर्गणे पत्नीसंयाजान्तत्वं सर्वेषामह्नामिति पुनः पूर्वपक्षी आह। वाशब्दः सिद्धान्तपक्षं व्यावर्तयति। 'पत्नीसंयाजान्तान्यहानि संतिष्ठन्ते, न बर्हिरनुप्रहरति, असंस्थितो हि तर्हि यज्ञः' इति यत् लिङ्गमुक्तम्, सः अर्थवादः पत्नीसंयाजान्ततास्तुत्यर्थः। संतिष्ठमानेष्वेवाहःसु असंस्थावचनं पत्नीसंयाजान्तताप्रशंसार्थम्। यथा दीक्षा दीक्षाविषयकम् 'वरुणपाशाभ्यां वा एषोऽभिधीयते (बध्यते) यो दीक्षितः। अहोरात्रे वै वरुणपाशौ। यद्दिवा संस्थापयेदनुन्मुक्तो वरुणपाशाभ्यां स्यात्। नक्तंसंस्थाप्यो वरुणपाशाभ्यामेवोन्मुच्यते, आत्मनोऽहिंसायै' इति दीक्षोन्मोचनवचनं नक्तंसंस्थापनस्य अर्थवादः। एवमेतत् चिरेण संस्थानमालोच्य असंस्थितवचनं भवति। तस्मान्न प्रागुत्तमात् पत्नीसंयाजान्तता किन्तु सर्वेषामिति।

स्याद्वाऽनारभ्यविधानादन्त्ये लिङ्गविरोधात्। ३२॥

पूर्वपक्षिणा उक्तं निरसितुं वाशब्दः। स्यादेव प्रागुत्तमात् पत्नीसंयाजान्तता। तस्याः उत्तममहरनारभ्य विधानात्। 'पत्नीसंयाजान्तान्यहानि संतिष्ठन्ते' इति सामान्येनोक्तम्। अन्त्ये अहनि तु असंस्थितत्वरूपस्य लिङ्गस्य विरोधात्। तत्र हि संस्थया भाव्यमेव। कुतूहले तु लिङ्गशब्दोऽत्र न्यायपर एव स्वीकृतः। अन्त्ये अहनि न्यायविरोधात् पत्नीसंयाजान्ततायाः न प्रवृत्तिः इति सूत्रावयवार्थ उक्तः। न्यायश्च भाष्ये— 'पत्नीसंयाजान्तान्यहानि संतिष्ठन्ते इति, नैतदुक्तं भवति, शिष्टमवलुप्यते इति। संतिष्ठन्ते नानुष्ठीयन्ते कर्तृव्यापार एषु उपरमति इति। तेषु सहक्रियमाणेषु अहःसु अवश्यं कस्मिंश्चित् पदार्थे अवस्थाय अवश्यं अपरस्याह्नः पदार्था अनुष्ठातव्याः। अनियमे प्राप्ते पत्नीसंयाजान्ते संस्थाप्यं इति नियम्यते। तच्च अन्त्ये नास्ति। तत्र तु यज्ञपुच्छान्तता भवति। तयैव च पूर्वेषामपि अह्नां यज्ञपुच्छान्तता प्रासङ्गिकी सिद्धा भवति' इति। तस्मात् प्रागन्त्यात् पत्नीसंयाजान्तता, न्यायेन प्राप्ते लिङ्गदर्शनमुक्तम् 'असंस्थितो हि तर्हि यज्ञः' इति। के.

* **पत्नीसंयाजोत्तरं** द्वादशाहगतानां दशमातिरिक्तानामह्नां विरामः। अवशिष्टं हारियोजनादि बर्हिःप्रहरणान्तं कर्म द्वादशेऽहनि पत्नीसंयाजोत्तरं कर्तव्यम्। वि. ९।१।९. * पत्नीसंयाजोत्तरं हविष्कृतः पत्न्याः विसर्गः न प्राक्। के.

* **पत्नीसंयाजगतकपालाभिहोमनिमित्तकवैश्वानरेष्टौ** द्वेष्याय दानं अदृष्टार्थम्। १०।२।१६. (**मीको.** पृ. २१०० द्रष्टव्यम्)।

* **पत्नीसंयाजन्यायः** (पत्नीसंयाजेषु पशुजाघनी हविः। सा च आज्येन विकल्प्यते दर्शपूर्णमासयोः)। ३।३।१०. (**मीको.** पृ. १७५५ 'जाघनीन्यायः' इत्यत्र द्रष्टव्यम्)।

* **पथिकृत्।** 'अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेत् यो दर्शपूर्णमासयाजी सन् अमावास्यां वा पौर्णमासीं वाऽतिपातयेत्' इति नैमित्तिकं निमित्तसद्भावे कार्यम्। वि. ५।३।१२.

* **पथ्यं** बहुकृत्वोऽपि वदितव्यं भवति, न पुनरुक्तता महान् दोषः। ग्रन्थगौरवभयेन पुनरुक्तं नेच्छन्ति। अर्थाग्रहणात्तु बिभ्यतः पुनः पुनरभिधीयमानं बहु मन्यन्त एव। भा. ४।२।४।१३.

* **पदं** अन्तिकादुपनिपतितं वाक्यार्थमुपजनयितुमलं भवति, न दूरादवतिष्ठमानम्। अत्रोच्यते। व्यवहितमपि हि, पराणुद्य व्यवधायकम्, आनन्तर्येण मनसि विपरिवर्तमानं अलमेव भवति विशेषमुपजनयितुम्। यथा 'इतः पश्यसि धावन्तं दूरे जातं वनस्पतिम्। त्वां ब्रवीमि विशालाक्षि या पिनक्षि जरद्गवम्॥' इति। अत्र 'इतः पश्यसि' इति शब्दो बुद्धौ भवति। स दूरे जातं वनस्पतिं इत्येतैः (इत्येवमादिभिः) पदैर्व्यवहितेन जरद्गवं इत्यनेन शब्देन, व्यवधायकान्यपोह्य संबध्यमानः संबध्यते। अर्थानां ह्यर्थवत्त्वेन हेतुना व्यवहितान्यपि वचनानि संबध्यन्ते। यानि पुनः अर्थतो ह्यसमर्थानि, तानि आनन्तर्येऽपि सति न परस्परेण सम्बन्धमर्हन्ति। यथा या पिनक्षि जरद्गवं इत्येवमादीनि। भा. ४।३।५।११.

पदमभ्यधिकाभावात् स्मारकान्न विशिष्यते इति न्यायः। श्लो. वा. शब्दपरिच्छेदे १०७। तत्त्वं-पदलक्ष्यार्थाभेदे अन्यतरपदवैयर्थ्यमिति शङ्कोच्छेदाय प्रवर्तते। लक्ष्यार्थबोधे प्रमात्वसंपादकतया पदान्तरसाफल्यं बोध्यम्। **संग्रहः.** * यथा हि स्मारकाः संबन्धिदर्शनादयः अनधिकविषयाः तथैव पदमपि अनधिकविषयत्वतुल्यत्वात् अप्रमाणमिति। **रत्नाकरः.**

* **पदम्** ('पदे जुहोति' इति वाक्यस्थम्) उत्पत्तिवाक्यशिष्टम्। उत्पत्तिवाक्यशिष्टेन वाक्यान्तरशिष्टं बाध्यते। तस्मात् आहवनीयबाधः। वा. ६।४।४।१३. * पदमेकेन संबद्धं सत् निराकाङ्क्षं भवति, न तदपरेणापि संबन्धमर्हति। भा. ४।३।६।१४. * पदं गकाराद्येव, स एव शब्दः, नान्यत् व्यतिरिक्तमस्ति। **बृहती.** पृ. १२३. * पदं चतुर्विधं रूढं यौगिकं योगरूढं यौगिकरूढं च। समुदायशक्त्या अर्थप्रत्यायकत्वं रूढत्वम्। अवयवशक्त्या अर्थप्रत्यायकत्वं यौगिकत्वम्। समुदायशक्त्या अवयवशक्त्या च एकार्थप्रत्यायकत्वं योगरूढत्वम्। तथैव भिन्नार्थप्रत्यायकत्वं यौगिकरूढत्वम्। यथा घटः, चित्रगुः, पङ्कजम्, मण्डपः इत्यादिशब्देषु। पङ्कजपदात् पङ्कजनिकर्तृत्वपद्मत्वोभयप्रकारकोपस्थितेरानुभविकत्वात्, अन्यथा पङ्कजपदात् भेकादिबोधोऽपि स्यात्, अतो योगरूढिरावश्यकी। अत्र **के चित्।** पङ्कजादिपदानां यौगिकत्वमेव, पङ्कजपदात् अवयवशक्त्या पद्मविशेष्यकपङ्कजनिकर्तृत्वमात्रप्रकारकबोधेन पद्मत्वप्रकारकबोधाभावात्। **न च** एवं पङ्कजपदात् कुमुदभेकादिविशेष्यकपङ्कजनिकर्तृत्वप्रकारकबोधापत्तिः इति **वाच्यम्।** पूर्वतरप्रयोगत्वप्रकारकज्ञानस्य तत्पदजन्यशाब्दबोधे हेतुत्वाङ्गीकारात्। यद्वा पङ्कजनिकर्तृत्वनिष्ठप्रकारतानिरूपितविशेष्यतासंबन्धेन पङ्कजपदावयवशक्तिग्रहजन्यशाब्दबोधं प्रति समवायसंबन्धेन पद्मत्वस्य, पद्ममात्रवृत्तिविषयताया वा, पद्ममात्रवृत्तिविषयतासंबन्धेन ज्ञानस्यैव वा हेतुताऽङ्गीकारात् नोक्तातिप्रसङ्गः, न वा भूतभाविपद्मबोधानुपपत्तिः इत्याहुः। क्वचित् कुमुदादौ प्रयोगस्तु लाक्षणिकः। यद्यपि योगरूढ्यङ्गीकारेऽपि इयं लक्षणा तुल्या, तथापि शक्यताऽवच्छेदकाननुप्रविष्टधर्मेण लक्षणापेक्षया तदनुप्रविष्टधर्मेण लक्षणा लघीयसी। लाघवं च तेन रूपेण अन्वयमात्रकल्पनम्, न तु स्मरणमपीति। एवं यौगिकरूढं मण्डपादिपदम्। योगेन रूढ्या च भिन्नार्थप्रत्यायकत्वात्। योगापेक्षया रूढेः प्राबल्यमपि एतद्विषयमेव। अत एव रथकारादिवाक्ये सौधन्वनापरपर्यायऋभुरूपजात्यन्तरग्रहणमेव सिद्धान्तयिष्यते। इति दिक्। **मणि.** पृ. ७८–७९. * पदं परिपूर्णं पदान्तरमाकाङ्क्षति, ततो वाक्यं भवति। **भा.** १०।२।१४।४४. * पदं प्रकृतिप्रत्ययसमुदायः, नावयवः। **वा.** ३।१।७।१४. पृ. ७१९. * पदं यत् केनचित् पदेन संबध्यते विशेषणत्वेन न तत् पदान्तरेण सह संबन्धमर्हति सकृदुच्चरितम्। यथा भार्या राज्ञः पुरुषो देवदत्तस्य इति भार्याविशेषणत्वेन उच्चार्यमाणो राज्ञ इति शब्दः न पुनः पुरुषशब्देन संबध्यते इति। **भा.** १०।४।८।१६.

पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिण इति न्यायः। पेलवं मृदुलं शिरीषपुष्पं भ्रमरस्य भृङ्गस्य पदं पदस्थितिं सहेत पतत्रिणः पुनः पक्षिणस्तु पदं न सहते इति। कुमारसंभवे स० ५, श्लो० ४। अतिसौकुमार्यविवक्षायामयमवतरतीति। **साहस्री.** ९५४.

* पदं सामान्यवृत्ति, वाक्यं विशेषवृत्ति । भा. ३।१।६।१२ पृ. ६८९. * 'न चाप्यज्ञातसंबन्धं पदं किञ्चित्प्रकाशकम् ।' श्लो. वा. शब्दपरिच्छेदः २९. * न चैकं पदं विशेषणं प्रति उद्देशकं स्तोत्रं प्रति (अन्यं प्रति इति) विधायकं भवितुमर्हति, वचनव्यक्तिभेदात् । भा.१।४।२।३ पृ. ३३२. * **पदानि** नित्यानि । मणि. पृ. ४४. * पदानि विचित्रशक्तीनि एकानेकार्थप्रतीतेः । तथा एषामर्थकथनं कदाचित् पदेनैवान्येन क्रियते, कदाचिद् वाक्येन । तेनापि एकेनानेकेन वा द्विपदेन बहुपदेन वा इति वैचित्र्यम् । तद्यथा कः पिकः ? कोकिलः । क औपगवः ? उपगोरपत्यम्, उपगुना वा स्वकान्तायामुत्पादितः । तथा पचतीत्युक्ते पाकं परगामिफलं एकः कर्ता पूर्वापरीभूतं वर्तमानकाले निर्वर्तयति इति कथ्यते । न चैवं कथयतां वाक्यभेदः प्रसज्यते, न वा अशब्दार्थत्वं अध्यवसीयते । वा. २।१।५।१७ पृ. ४२१. * पदानि संहत्य अर्थमभिदधति वाक्यम् । भा. । यद्यपि च न संहतानां कश्चित् एकोऽभिधेयः, तथापि गम्यमानाभिप्रायेणोक्तम् । अथवा एकलक्ष्यमाणार्थप्रयुक्ततया संघातत्वमापादितानि यदा स्वार्थमभिदधति, तदा तद्भूतान्येव सन्ति वाक्यत्वं प्रतिपद्यन्ते इति । वा. ३।३।७।१४ पृ. ८२४. * पदानि स्वार्थेष्वपि व्याप्रियमाणानि वाक्यार्थप्रतिपत्तिमुपजनयन्ति, न पुनः प्रत्यस्तमितपदविभागं अनवयवमेव वाक्यार्थं वदन्तीति तद्भूताधिकरणे वक्ष्यते । ऋजु. पृ. १४२-१४३. * पदानि हि स्वं स्वं पदार्थमभिधाय निवृत्तव्यापाराणि । अथेदानीं पदार्था अवगताः सन्तः वाक्यार्थं गमयन्ति । भा.१।१।७।२५ पृ. ९६. * समूहावयवास्तु **पदानि** विभागे परस्पराकाङ्क्षन्ति न तु एषामेकार्थत्वं प्रतिपदमर्थभेदात्, समूहस्य च पृथगर्थान्तराप्रसिद्धेः । वा. २।१।१४।४६ पृ. ४४६. * **पदेन** (एकहायन्याः पदेन) आहवनीयो बाध्यते । बाल. पृ. १३२. * 'पूर्वानुभूत एवार्थः स्मर्यते प्रथमं पदात् ।' वा. १।४।१२।२३ पृ. ३५८. * **पदेभ्य** एव पदार्थप्रत्ययः पदार्थेभ्यो वाक्यार्थः । भा.१।१।७।२६. * **पदस्य** कल्प्यस्यापि अभिधानकरणत्वम् । सु. पृ. ६९७. * पदस्य कारकविभक्तीनां च विनियोजकत्वम् । वा. ३।१।७।१३ पृ. ७०० * पदस्य परिपूर्णस्य पदान्तरयोगः । एकदेशनिष्कर्षे च सामर्थ्याभावः । ३।५।१०।३१ पृ. १००७. * पदस्य सर्वस्यैव पदान्तरसंबन्धे सति च शब्दाद्दते तृतीयेन पदेन सत्यां गतौ संनिहितेनापि संबन्धो न युक्तः । नहि भवति भार्या राज्ञः पुरुषो देवदत्तस्य इत्यत्र राजा पुरुषविशेषणम् । असत्यां तु गतौ उपादेयस्य अनेकस्यापि प्रधानेन संबन्धोऽवकल्पते व्यवहितेनापि । व्यवधानादर्थो बलीयानिति । भा. ६।४।६।२३ पृ. १४४५. * पदस्य स्वार्थासमाप्तस्य पदान्तरान्वयो न भवति । सु. पृ. ७२४. * पदस्य हि आकृतिर्नाम एकोऽर्थो भवेत्, न तु तदवयवानां वर्णानां प्रकृतिप्रत्यययोर्वा विभागे साकाङ्क्षत्वम्, अर्थप्रत्यायनशक्त्यभावात् । वा. २।१।१४।४६ पृ. ४४६. * **पदयोः** एकवाक्यस्थत्वे पौर्वापर्येऽपि पदार्थविधिपौर्वापर्यायोगः । सु. पृ. १०२१. * **पदानामावापोद्धाराभ्यां** पदार्थमात्रावगम एव कार्यतया अवसितः (इति एकदेशिमतम्) । ऋजु. पृ. १४१. * पदानां इतरपदार्थान्विते शक्तिः । इतरपदार्थश्च तत्समभिव्याहारेण विशेषतः अननुगत एव । एवं च आकाङ्क्षित-योग्य-संनिहितार्थाभिधायकानां पदानां वाक्यार्थप्रतिपादकत्वं इति **केचित्** । तन्न । मणि. पृ. १७२. * पदानाम् । यद्यपि आवापोद्धाराभ्यां पदानां शक्तिनिर्धारणा, तथापि यथाव्यवहारमेव युक्ता । व्यवहारश्च वाक्यार्थविषय एव दृश्यते । तद्विषयैव च शब्दस्यापि शक्तिः कल्पयितुं युक्ता । तेन वाक्यार्थस्य प्रधानभूतस्य अनेकार्थानुबन्धत्वात् तदनुबन्धभूतार्थावगतिः कारणतयैव आवापोद्धाराभ्यामवसीयते । तेन नान्तरीयकी पदार्थावगतिः । कार्यं तु सर्वपदानामपि वाक्यार्थावगतिरेव । ऋजु. पृ. १४१. * पदानां लौकिकानां सतां न वेदादेव पूर्वोत्तरपदसंबन्धमनवेक्ष्य शक्यतेऽर्थोऽध्यवसातुम् । भा. १।४।७।१०. * पदानां वाक्यार्थावगतेरन्यत् न कार्यमस्ति । यावत् सा वाक्यार्थावगतिः सा प्रथमश्रवणेऽपि भवति । वाक्याद्धि सा भवति, नैकस्मात् पदात् । न च वाक्यस्य द्वितीयश्रवणापेक्षा ।

ऋजु. पृ. १४१. * पदानां वाक्यार्थप्रतिपत्त्यर्थत्वात् श्रौतेनार्थेन वाक्यार्थप्रतीत्यनुपयोगे लाक्षणिकार्थतात्पर्यं युक्तम् । सु. पृ. १३८४. * पदानां संहतानां न कश्चिदेकोऽभिधेयः । वा. ३।३।७।१४ पृ. ८२४. * पदानां समुदायो न प्रत्यायक इत्युक्तम् 'तद्भूतानां क्रियार्थेन समाम्नायः' इत्यत्र । भा. ५।१।४।५, * पदानां साकाङ्क्षत्वात् विधेः स्तुतेश्चैकवाक्यत्वं भवति । १।२।१।७ पृ. ११७. * पदानां साधूनामेव प्रयोगः कर्तव्यः । वि. १।३।९. * '**पदे** जुहोति' अयं विशेषविधिः अदृष्टार्थः । बाल. पृ. २१, क्रत्वर्थः । पृ. १५. * 'पदे जुहोति, वर्त्मनि जुहोति' इति आहवनीयापवादः । संकर्ष. २।४।१४. मीको. पृ. १०२१ 'आहवनीयापवादः' इत्यत्र द्रष्टव्यम् । * **पदे** वर्णानां वाक्ये च पदानां एकार्थप्रतिपादनकार्यकारित्वम् । सु. पृ. ६९३. * **पदेषु** स्मारिका अनुभाविका चेति शक्तिद्वयम् । तत्र स्मारिका जातौ । अनुभाविका कार्यान्विते । इति प्राभाकराः । मणि. पृ. ८२.

* **पदान्तरेण** पदान्तरस्य स्वाभाविकशक्तिनाशेन शक्त्यन्तरानुत्पादकत्वम् । सु. पृ. १०८१, * 'पदान्तरस्य पारार्थ्यादाख्यातं योऽपि मन्यते । वाक्यम्, प्राधान्ययोगेन वाक्यार्थं चापि भावनाम् ॥' (श्लो. वा. वाक्याधिकरणम् पृ. ८६३) इति आख्यातस्य वाक्यतोद्घोषः । पृ. ११८६.

* पदान्तरगतार्थग्रहणनिमित्तः वाक्यभेदः । वा. १।४।२।३ पृ. ३३०.

☞ '**पदावधारणोपायान् बहूनिच्छन्ति सूरयः । क्रम-न्यूनातिरिक्तत्व-स्वर-वाक्य-श्रुति-स्मृतीः ॥**' इति न्यायेन व्यपदेशादिभेदो भविष्यति इत्याशङ्क्य, आह 'स्वरादयश्च' इति । सु. पृ. ३७४. * 'पदावधारणोपायान् बहूनिच्छन्ति सूरयः । क्रम-न्यूनातिरिक्तत्व-स्वर-वाक्य-श्रुति-स्मृतीः ॥' (श्लोकवार्तिकं वाक्याधिकरणे १८३, १।१।७।२४-२६ इदमेव तद्भूताधिकरणम्) । जरा-राजादिषु क्रमभेदात् अर्थान्तरत्वाध्यवसायः । ब्रह्मब्राह्मणादिषु न्यूनातिरेकवशात् अर्थभेदो लोकत एवावगतः । पूर्वपदप्रकृतिस्वरत्वे बहुव्रीह्यर्थत्वं अन्तोदात्तत्वे स्वार्थवृत्तिता स्वरादवगम्यते । शा.१।३।१० पृ. ४९-५० । **सोम**— पचते इति पदं नामधेयत्वेन आख्यातत्वेन च संभाव्यमानम् 'मोक्तुकामः पचते' इत्यत्राख्यातम्, 'पचते दक्षिणां देहि' इत्यत्र शत्रन्तं नाम इति च पदान्तरसमभिव्याहाराग्निश्चीयते इति पदान्तरसमभिव्याहाररूपवाक्यं पदभेदावगमोपायः । श्रुतिपदेन प्रथमान्ताख्यातपदयोः यत् सामानाधिकरण्यं तद्विवक्षितम् । तेन 'यातः पुनरायाति' इत्यत्र आयाति इत्याख्यातपदसामानाधिकरण्यात् यातः इति कर्तरि निष्ठायां प्रथमान्तं नाम इति, 'यातो देवदत्तयज्ञदत्तौ' इत्यत्र द्विवचनान्तनामपदसामानाधिकरण्यात् यातः इति आख्यातं इति निश्चीयते इति सामानाधिकरण्यं पदभेदज्ञानोपायः । काशिकाटीकायां तु 'उद्भिदा यजेत' इत्यत्र उद्भिच्छब्दः तृतीयान्तश्रुतिबलात् भावनाकरणभूतकर्मपर एव न तु खनित्रादिपरः इति निश्चीयते इति अर्थविशेषावच्छिन्नपदभेदः तृतीयया श्रुत्या अवसीयते इति श्रुतेः पदभेदज्ञानोपायत्वमुक्तम् । 'अश्वस्त्वम्' इत्यत्र अश्वः इति पदं नामत्वेन संभाव्यमानं देहोच्छूनतालक्षणविवक्षितार्थलाभाय व्याकरणस्मृत्या लुङि 'टुओश्वि गतिवृद्ध्योः' इत्यस्य मध्यमपुरुषैकवचनान्तं आख्यातं निश्चीयते इति व्याकरणस्मृतिः पदभेदज्ञानोपायः ।

* **पदादिना** विशेषविहितेन ज्योतिष्टोमादौ सामान्यविहिताहवनीयादेर्बाधः । मीको. पृ. १८३९ 'ज्योतिष्टोमादौ वर्त्मादिना०' इत्यत्र द्रष्टव्यम् । भा. १०।८।८।१६.

* **पदोपस्थापितपदार्था** वा पदजन्यपदार्थज्ञानं वा शब्दप्रमाणम् । सोम. १।२।१ पृ. ८.

* **पदैकदेशस्य** धातोः पदान्तरेणान्वेतुमयोग्यत्वात् विधायकपदस्य नञ्पदेनान्वये सति रागप्राप्तं भक्षणप्रवृत्तिमनूद्य निषेधो विधेयः 'न कलञ्जं भक्षयेत्' । वि. ६।२।५.

* **पदैकवाक्यता** विध्यर्थवादयोर्नास्ति । वाक्यैकवाक्यता तु विद्यते । वि. १।२।१.

* **पदकर्म** गवानयनस्य न प्रयोजकं किन्तु क्रय एव प्रयोजकः । पदकर्म न सोमक्रयार्थे नीयमानाया

गोः सप्तमपदस्थाने पांसुषु आज्येन आहुतिं विधाय पांसून् गृहीत्वा तैः पांसुभिः हविर्धानशकटयोः अक्षस्य अञ्जनम् । वि ४।१।१०.

* **पदकर्माधिकरणम्** । मीको. पृ. १० ' अक्षाभ्यञ्जनन्यायः ' इत्यत्र द्रष्टव्यम् । ४।१।१०।२५.

पदकर्माप्रयोजकं नयनस्य परार्थत्वात् । ४।१।१०।२५ ॥

सोमक्रयार्थे मूल्यत्वेन अरुणा पिङ्गाक्षी एकहायनी गौर्नीयते । गमनकाले तस्याः पूर्वकायस्य दक्षिणं पदं यत्र निपतति तत्र हिरण्यं निधाय स्रुवेण आज्यं हुत्वा आज्यमिश्राः पांसवो गृह्यन्ते । तांस्त्रेधा विभज्य एकेन भागेन सोमशकटस्य अक्षः अज्यते । सोमक्रयणीपदपातस्थानगतपांसुग्रहणं पदकर्म इत्युच्यते । इदं यत् सोमक्रयण्याः नयनं तस्य पदकर्म वा प्रयोजकं सोमक्रयो वा प्रयोजकः इति विचारे पदकर्म नयनस्य प्रयोजकं इति उत्सूत्रे पूर्वपक्षे सिद्धान्तयति सूत्रम् । पदकर्म नयनस्य सोमक्रयण्याः नयनस्य अप्रयोजकं न प्रयोजकम् । कुतः ? नयनस्य परार्थत्वात् सोमक्रयार्थत्वात् सोमक्रयाङ्गत्वात् । ' एकहायन्या क्रीणाति ' इति वाक्येन क्रयार्थत्वम्, प्रकृतत्वाच्च पदपांसुभिः संबन्धः । प्रकरणाच्च वाक्यं बलीयः । अथवा एकहायन्या इति तृतीयाश्रुत्यैव क्रयाङ्गत्वम् । श्रुतिश्च प्रकरणात् बलीयसी । के.

* **पदकर्मन्यायः** । ' अक्षाभ्यञ्जनन्यायः ' । ४।१।१०।२५. * पदकर्मन्यायः (अयमेव पदन्यायः) । नापि (' प्रैयङ्गवश्चरुर्भवति ' इत्यत्र अतिदेशप्राप्ते अवघाते) पदकर्मन्यायः (प्रवर्तते) तत्र हि ' तेनाक्षमुपाञ्ज्यात् ' इति तच्छब्दस्य ' सप्तमं पदमध्वर्युरञ्जलिना गृह्णाति ' इत्यत्र च पदशब्दस्य सापेक्षत्वाद्युक्तं परप्रयुक्तक्रयाङ्गभूतैकहायनीनयनोपजीवित्वम् । प्रकृते तु व्रीहिशब्दस्य प्रकृतानपेक्षत्वात् न यागीयव्रीह्युपजीविता इति विशेषः । इदं पूर्वपक्षे । कौ. २।१।४।९ पृ. ६८.

* नियतपदक्रमा हि मन्त्रा भवन्ति । भा. १।२।४।३१-२.

* **पदग्रहणम्** (एकहायनीसप्तमपदपातस्थलस्थपांसूनां ग्रहणम्) हविर्धानशकटाक्षाञ्जनार्थम् । वि. ४।१।१०.

* **पदजातं** सर्वं मिलित्वा वाक्यार्थं प्रतिपादयति इति वैयाकरणदर्शनम् । ऋजु. पृ. १४२.

* **पदद्वयान्वयव्यापारः** पदद्वयसमभिव्याहारलभ्यः । सु. पृ. ८५२.

* **पदन्यायः** । मीको. पृ. १० ' अक्षाभ्यञ्जनन्यायः ' इत्यत्र द्रष्टव्यम् । ४।१।१०।२५. * पदन्यायः । (अयमेव पदकर्मन्यायः ।) ' अन्यमीशम् ' इत्यत्र ईशगतान्यत्वं प्रति पश्यतीति प्रकृतो जीव एव पदन्यायेन प्रतियोगितया संबध्यते । अद्वैत. २।२६।२५, * पदन्यायः । ' पदे जुहोति ' इत्यत्र ' एकहायन्या सोमं क्रीणाति ' इत्युपस्थिता एकहायन्येव संबध्यते, न तु यत् किञ्चित् । २।२५।१५.

* **पदपङ्क्तिः** गायत्री । पादेषु अक्षराणि ५।५।५।५।६ । उदा० ' आमिष्टे अद्य ' (ऋसं. ४।१०।४) । किंवा ५।५।५।४।६ उदा० ' अग्ने तमद्य ' (ऋसं. ४।१०।१) । के.

* **पदपदार्थौ** यावेव लौकिकौ तावेव वैदिकावपि । त्मना-आत्मना, ब्राह्मणासः- ब्राह्मणाः इति क्वाचित्को विशेषस्तु व्याकरणात् ज्ञातव्यः । वि. १।३।१०, * **पदपदार्थयोरेव** वृद्धव्यवहारादिना संगतिर्गृह्यते । (वाक्यवाक्यार्थयोस्तु न पृथक् संगतिग्रहणम् ।) वाक्यं तु आकाङ्क्षायोग्यतासंनिधिवशात् स्वार्थं प्रतिपादयति । १।१।७.

* **पदपदार्थसंबन्धो** नित्यः ' औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धः । ' भा. १।१।५।५.

* **पदपदार्थसंबन्धादिषु** पुरुषसंस्पर्शाभावेन समस्तो वेदः प्रमाणम् । सोम. १।२।१ पृ. ६.

* **पदपदार्थसंबन्धज्ञाने** आर्यप्रसिद्धिविरोधाभावे म्लेच्छप्रसिद्धिरपि आदरणीया । नेम इति अर्धम्, पिकः कोकिलः, तामरसं पद्मं इति म्लेच्छप्रसिद्धया ग्राह्यम् । वि. १।३।६.

* **पदपांसुनाशे** पांस्वन्तरेण हविर्धानशकटाक्षाञ्जनं कार्यम् । न तु तदर्थं पुनः सोमक्रयण्याः गोर्नयनम् । के. ११।३।१३.

* **पदभेदावधारणोपायत्वेन** प्रकृतिप्रत्ययान्वाख्यानस्मृतिरपि इष्टा । (' पदावधारणोपायान् ' श्लो. वा. १।१।७ पृ. ८९६ इति वार्तिकात्) । सु. पृ. ८३३.

* **पदवाक्यदोषयोर्मध्ये** पदे एव दोषकल्पना उचिता । मीन्या.

* **पदविचारः** । पदज्ञानस्य च द्वैधी करणता । चरमपदस्य सर्वपदस्मृतिहेतुसंस्कारोद्बोधकतया लाक्षणिकस्य च शक्तपदस्मृतिहेतुसंस्कारोद्बोधकतया स्वार्थोपस्थितिद्वारा च । अन्येषां तु स्वार्थोपस्थितिद्वारैव इति । तत्र उद्बोधकविधया यत्पदज्ञानजन्यत्वं पदार्थोपस्थितिद्वारा च यत्पदज्ञानजन्यत्वं शाब्दबोधनिष्ठम्, तदन्यतरसंबन्धेन पदज्ञानविशिष्टघटोपस्थितित्वादिना घटादिशाब्दे हेतुत्वम् । लाक्षणिकपदस्य अनुभावकत्वाभावात् तत्स्मृतशक्तपदस्यैव शाब्दबोधहेतुत्वात् इति के चित् । पदं च आनुपूर्वीविशिष्टतद्वर्णसमुदायः । आनुपूर्वी च शक्तताऽवच्छेदिका । सा च टप्रागभावविशिष्टघत्वरूपा, घनाशविशिष्टटत्वरूपा वा । वर्णानां नित्यत्वे तु अव्यवहितोत्तरत्वसंबन्धेन घज्ञानविशिष्टज्ञानविषयटत्वादिरूपा (आनुपूर्वी) । ' सुप्तिङन्तं पदम् ' इति वैयाकरणाः (पा. १।४।१४) । शक्तं पदं इति तु युक्तम् । इदं तु बोध्यम् । पदज्ञानस्य घटशाब्दे केनरूपेण हेतुत्वम् ? न तावत्पदज्ञानत्वेन, व्यभिचारात् । नापि घटपदज्ञानत्वेन, कलशपदादपि घटशाब्दे व्यभिचारात् । किन्तु घटशक्तपदज्ञानत्वेन, न तु वृत्तिमत्पदज्ञानत्वेन, वृत्तित्वस्य शक्तिलक्षणाऽन्यतरगर्भतया गौरवात् । तेन लाक्षणिकस्य अननुभावकत्वम् । अत एव यत्र सर्वाणि लाक्षणिकानि, तद्वाक्यं मूकमेव । ' गङ्गायां घोषः ' इत्यादौ तु यत्किञ्चिच्छक्तपदमादाय अन्वयानुभव इति संप्रदायः । वस्तुतो वृत्तिमत्पदज्ञानत्वेन, घटपदज्ञानत्वेन, घटस्मारकपदज्ञानत्वेन, अन्ततः शाब्दत्वावच्छिन्ने पदज्ञानत्वेनैव वा हेतुत्वम् । तत्पदजन्यपदार्थोपस्थितिरूपव्यापाराभावेन न व्यभिचारः । तेन लाक्षणिकस्यापि अनुभावकत्वं युक्तम् । इति दिक् । मणि. पृ. ७३.

* **पदविधिः** । ' समर्थः पदविधिः ' (पा. २।१।१) । पदयोर्विधिः पदविधिः, तथा सुब्विधिरपि पदत्वसंपादको विधिः पदविधिः । बाल. पृ. १५०.

* **पदविषयं** औत्पत्तिकत्वं मन्यन्ते मीमांसकाः । बृहती. पृ. १०३.

* **पदशक्तिः** । ननु शक्तपदज्ञानत्वेन हेतुता इत्युक्तम् । तत्र केयं शक्तिः इति चेत् । अव्यवधानेन शब्दजन्यप्रतीत्यनुकूला वृत्तिः शक्तिः । अव्यवहितत्वं च अर्थान्तरप्रतीत्यद्वारकत्वम् । इदं च लक्षणावारणाय । तादृशचेष्टावारणाय च अवशिष्टम् । सा च ' अस्मात् पदात् अयमर्थो बोद्धव्यः ' इत्याकारिका ईश्वरेच्छा इति **न्यायविदः** । पदार्थान्तरं इति **मीमांसकाः** । अस्या एव ' संकेतः ' इति व्यवहारः, साक्षाच्छब्दजन्यार्थप्रतीतिसहकारिज्ञानविषयत्वं वा । **वैयाकरणास्तु** बोधकत्वमेव शक्तिः । एवं लाक्षणिकाद्यर्थेऽपि शक्तिरेव । अत एव ' सर्वे सर्वार्थवाचकाः ' इत्याहुः । मणि. पृ. ७३-७४. * पदशक्तिः व्यक्तौ, न तु आकृतौ । आकृतिस्तु पदप्रवृत्तिनिमित्तं इति **नैयायिकाः** । **तन्न** । आकृतावेव शक्तिः, व्यक्तिस्तु क्रियाऽन्वयकाले उपलक्षणीया । ' श्येनचितं चिन्वीत ' ' व्रीहीनवहन्ति ' ' पशुमालभेत ' इत्यादौ । वि. १।३।१० वर्णकं २.

* **पदश्रुत्यपेक्षया** कारकश्रुतेः उपजीवकत्वेन दौर्बल्यम् ' सोमेन यजेत ' इत्यादौ । शेषानेकत्वे इदम् । कौ. ३।३।७।१४ पृ. ३५०.

* **पदश्रुतिबाधः** प्रत्ययश्रुतिबलेन । सु. पृ. ९२.

* **पदसंघस्य** पदार्थातिरिक्तैकार्थवाचिता तद्भूताधिकरणे निरस्ता । सु. पृ. ६८४.

* **पदसमुदायस्य** च पृथगर्थो नास्तीत्युक्तम् । भा. २।१।१४।४६ पृ. ४४६.

* **पदसमूहः** एकदेशाद्विना साकाङ्क्षः न पर्याप्तः स्वस्मै प्रयोजनाय । नैवम् । भवति हि कश्चित् पदसमूहः, योऽर्थवादेभ्यो विनाऽपि विदधाति कं चिदर्थम् । भा. १।२।१।१ पृ. १०७.

* **पदस्फोटः** ' वाक्यार्थे शक्तिः लक्षणा वा ' इति बिन्दौ द्रष्टव्यः ।

* **पदहोमः** सोमक्रयार्थमेकहायन्यां नीयमानायां दैवात् ग्रावणि सप्तमपदपाते ग्रावण्येव कार्यः । अक्षाभ्यञ्जनार्थं तु के चित् पांसवो ग्राह्याः । यथाशक्तिप्रयोगे तु आहवनीये निरधिकरणक एव वा इत्यन्यदेतत् । **भाट्ट.** ४।१।१०.

⌛ **पदातिन्यायः** । यथा बुद्धिबलापरपर्यायचतुरङ्गाख्यक्रीडने पदातिर्ऋजुमार्गेण चलन् हननावसरे वक्रमार्गमुररीकरोति । तथा चोक्तम्– 'ऋजुना पथा चलन्नपि हनने वक्रां गतिं कलयन् । बुद्धिबलाख्यं क्रीडन् पदातिरिव दुर्जनो ज्ञेयः ॥' इति । **साहस्री.** ९७०.

* **पदार्थः** आचमनम्, पदार्थानां च गुणः क्रमः । न च गुणानुरोधेन पदार्थो न कर्तव्यो भवति । अपि च प्राप्तानां पदार्थानामुत्तरकालं क्रम आपतति । यदा पदार्थः प्राप्नोति, तदा क्रम एव नास्ति, केन सह विरोधो भविष्यतीति । **भा.** १।३।३।७ पृ. १९९, * पदार्थः कालानुरोधेन नान्यथात्वमभ्युपगच्छेत् । प्रयोगाङ्गं हि कालः पदार्थानामुपकारकः । अतो न कालानुरोधेन व्यथयितव्यः पदार्थः । १।३।३।७. * पदार्थः पदेतरार्थेऽवगते अवधार्यते तदुत्तरकालं वाक्यार्थः । **टुप्.** ६।१।१।१ पृ. १३४६.

⌛ **'पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन' इति न्यायः** । 'अमहाब्राह्मणः' इत्यत्र आरोपितत्वस्य महत्त्वरूपार्थे अन्वये एकदेशान्वयात् 'पदार्थः०' इतिन्यायविरोधः । महत्त्वविशिष्टे तु तस्यानारोपात् अन्वयो बाधितः । तथा च वाचकत्वपक्षे अन्वयानुपपत्त्या (नञः) द्योतकत्वमभ्युपेयम् । **तत्त्वप्रकाशिका.** पृ. ८५. * 'पदार्थः पदार्थेन अन्वेति, न तु तदेकदेशेन' (इति न्यायः) । ऋद्धस्य राज्ञः पुरुषः इत्यर्थे ऋद्धस्य राजपुरुषः इति न भवति समासस्य विशिष्टैकार्थप्रतिपादकतया तदेकदेशेन राजपदेन ऋद्धपदस्य अन्वयासंभवात् 'पदार्थः पदार्थेन०' इतिन्यायात् । **कु.** १०।८।१।४। अस्यापवादः व्यक्तिन्यायः । **संग्रहः.** * पदार्थः पदार्थेनान्वेति न पदार्थैकदेशेनेति न्यायः । अयं न्यायो मुक्तावल्यां लक्षणाप्रकरणे निर्दिष्टः । तथाहि यदि एकदेशान्वयो न स्वीक्रियते तदा 'गम्भीरायां नद्यां घोषः' इत्यादौ नदीपदस्य गम्भीरनदीतीरे लक्षणा, गम्भीरपदं तु तात्पर्यग्राहकमिति । **साहस्री.** २६५.

* पदार्थः पदार्थधर्मात् प्रबलः । यथा– स्मार्तमपि आचमनं पदार्थः, श्रौतादपि वेदवेदिक्रमात् धर्मात्, प्रबलः । इति वेदवेदिकरणमध्ये क्षुतादौ सति स्मृत्युक्तं आचमनं कार्यम् । **वि.** १।३।४. * पदार्थो हि वाक्यार्थस्य मूलम् । नास्य पृथक् सिद्धिरस्ति इति । तदुक्तम् 'तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात्' इति । **भा.** १०।७।९।२९. * **पदार्थाः** (विकृतौ) अलुप्तोपकाराः प्राप्यन्ते । **टुप्.** १०।१।२।४. * पदार्था अवगताः सन्तः वाक्यार्थं गमयन्ति । विशिष्टार्थसंप्रत्ययश्च वाक्यार्थः । **भा.** १।१।७।२५ पृ. ९६. * पदार्थाः उपकारपृष्ठभावेन गृह्यन्ते । **मीन्या.** * पदार्थाः द्रव्यगुणकर्मसामान्यसमवायशक्त्यभावाः सप्त । संख्याऽपि गुणादिवृत्तित्वात् पदार्थान्तरमित्यन्ये । **मणि.** पृ. २२. * पदार्थाः यस्मिन् वेदे आम्नाताः तत्समाख्यातेन पुरुषेण क्रियन्ते । **भा.** ३।८।२।३. * न चाप्रसिद्धाः **पदार्थाः** वाक्यार्थं निष्पादयन्ति । **वा.** २।२।९।२३ पृ. ५३२. * संकेतानपेक्षैरेव पदैः वैदिकाः पदार्थाः प्रतिपाद्यन्ते । **शा.** १।१।८. * पदार्थेभ्यो वाक्यार्थः प्रतीयते । **भा.** १।१।७।२६, * **पदार्थस्य** उपस्थानं प्रयोगकाले । मन्त्रेणोपस्थितः पदार्थः कर्तव्य इति विज्ञायते, तदर्थस्य मन्त्रस्य आम्नानसामर्थ्यात् वचनाच्च । १२।३।१०।२९. * पदार्थस्य शास्त्रप्रसिद्धस्य प्रामाण्यम्, न म्लेच्छप्रसिद्धस्य । **के.** १।३।५. * पदार्थस्य स्मरणे प्रकृतौ सर्वत्र उपायचतुष्टयं प्रसक्तम्— ब्राह्मण-पद-मन्त्र-सूत्रोपद्रष्टारः । **टुप्.** १०।३।२।१५. * **पदार्थानामुपकारकः** कालः प्रयोगाङ्गत्वात् । **भा.** १।३।३।७ पृ. २००. * पदार्थानां च खलेकपोतन्यायेन शाब्दबोधे अन्वयबोधः । तदुक्तम् । 'वृद्धा युवानः शिशवः कपोताः खले यथाऽमी युगपत् पतन्ति । तथैव सर्वे युगपत् पदार्थाः परस्परेणान्वयिनो भवन्ति ॥' इति । **मणि.** पृ. ७०. * पदार्थानां ज्ञातकालानां प्रवृत्त्या नियमः स्यात् । **भा.** ५।१।१३।२९.

* पदार्थानां परस्परान्वयाकाङ्क्षापर्यवसानेऽपि वाक्यार्थानां परस्परान्वयापेक्षया अन्वयो न विरुद्धः । **सु.** पृ. ५२५. * पदार्थानां प्राप्तानामुत्तरकालं क्रमः आपतति । यदा पदार्थः प्राप्नोति तदा क्रम एव नास्ति । **भा.** १।३।३।७ पृ. १९९. * पदार्थानां वाक्यार्थे प्रामाण्याभ्युपगमः । **शा.** १।२।१ पृ. ८. * पदार्थानां वाक्यार्थावगममूलत्वम् । **वैद्यनाथी.** १।१।७।२५ पृ. ९६. * पदार्थानां वाक्यार्थप्रतीतौ करणत्वम् । **बाल.** पृ. ७०. * पदार्थानां शक्तिमालोच्य कर्मसु विनियोगः । १।४।१४. 'शक्त्यधिकरणम्' इत्यत्र द्रष्टव्यम् । * **पदार्थे** तदनुष्ठाने च यथा वेदः प्रमाणं तथा पदार्थादिक्रमेऽपि वेदः प्रमाणम् । **वि.** ५।१।१.

* **पदार्थातिदेशपक्षे** शास्त्रातिदेशपक्षे वा तन्त्रभेदात् भेदो भवेत् । **वा.** ३।६।२।८.

* **पदार्थानुसमयः** अनेकेषु प्रधानेषु संनिपातिनाम् । **भा.** ५।२।१।१–२. * पदार्थानुसमयः अल्पाश्वप्रतिग्रहे श्रपणादावपि, भूयोऽश्वप्रतिग्रहे तु काण्डानुसमय एव । निर्वापादौ तु उभयत्रापि पदार्थानुसमय एव । **सोम.** (तात्पर्यम्) ५।२।२. * पदार्थानुसमयः अहीनेषु बहुयजमानकेषु अङ्क्ते–अभ्यङ्क्ते–वपति–पावयतीनाम् । **के.** ५।२।२. * पदार्थानुसमयः आग्नेयाग्नीषोमीयनिर्वापयोः । **के.** * पदार्थानुसमयः एकस्मिन् प्रथमं धर्मं कृत्वा द्वितीये तमेव धर्मं कृत्वा तृतीयादौ स एव धर्मः कार्यः । पुनः अन्यो धर्मः प्रथमे द्वितीये तृतीये कार्यः । एवमेवापरे धर्माः कार्याः । एवं पङ्क्तिपरिवेषणन्यायेन धर्माणां धर्मिषु अनुष्ठानं पदार्थानुसमयः । यथा प्राजापत्यपशुषु उपाकरणादयः संस्काराः । **के.** ५।२।१. * पदार्थानुसमयः प्रवृत्तिक्रमविचारस्य बीजम् । **भाट्ट.** ५।२।१. * पदार्थानुसमयः प्राजापत्यपशूनां संनिपत्योपकारकेषु । **के.** ५।२।१।१–३. * **पदार्थानुसमयेन** प्राजापत्यपश्वङ्गानुष्ठानम् । वारुणेषु चतुष्कपालेषु तु काण्डानुसमयेन धर्मानुष्ठानम् । **वि.** ५।२।१–२.

⌛ **पदार्थानुसमयन्यायः** । प्राजापत्यन्यायः । अनेकप्रधानेषु संनिपातिनां पदार्थानुसमयः ॥

संनिपाते प्रधानानामेकैकस्य गुणानां सर्वकर्म स्यात् । ५।२।१।१॥

भाष्यम्— वाजपेये 'सप्तदश प्राजापत्यान् पशूनालभते' इति श्रूयते । अग्नीषोमीये च पशौ पशुधर्माः समाम्नाताश्चोदकेन प्राप्ताः । तेषु संशयः किमेकस्य आदित आरभ्य धर्मान् सर्वान् कृत्वा द्वितीयस्य पुनरादित उपक्रमितव्याः, अथ प्रथमस्तावत् सर्वेषां कर्तव्यस्ततो द्वितीय इति । किं प्राप्तम्? एकैकस्य सर्वे अपवर्जयितव्या इति । कुतः? प्रधानासत्तेरनुग्रहाय । इतरथा प्रधानासत्तिर्विप्रकृष्येत । यथा बहुष्वश्वेषु प्रतिगृहीतेषु ये पुरोडाशाः तेषु नैकजातीयानुसमयः, एवमिहापीति ।

टुप्.— (किमेकस्य इत्यादि भाष्यं आरादुपकारकानपि विषयीकरोतीति मत्वा आह–) आरादुपकारकेषु भेदेन क्रियमाणेषु सौर्यादीनामिव तन्त्रभेदः (प्रयोगभेदः) स्यात् । (तत्र 'वैश्वदेवीं कृत्वा प्राजापत्यैश्चरन्ति' इति सहप्रयोगविधानं विरुध्यते) तस्मात् संनिपत्योपकारका उदाहरणम् । (पूर्वपक्षमाह–) प्रधानकालत्वादङ्गानां एकैकस्मिन् गुणकाण्डमपवृज्यात् । इतरथा हि पदार्थानुसमये (सति) प्रधानात् विप्रकृष्येरन् । प्रकृतौ च पूर्वस्मात् (उपाकरण–)पदार्थात् उत्तरः (अनुष्ठितः) एवमिहापि (काण्डानुसमयेन भवितव्यमिति) ।

सर्वेषां वैकजातीयं कृतानुपूर्व्यत्वात् । २ ॥

भाष्यम्— एकजातीयानुसमयः कर्तव्यः । किमेवं भविष्यति? सहत्वमनुग्रहीष्यते । तत्सहत्वं श्रूयते, वैश्वदेवीं कृत्वा पशुभिश्चरन्तीति । एकस्मिन् काले पशूनां प्रचारः । नन्वेवं सति पूर्वस्य पदार्थस्योत्तरः पदार्थः पश्वन्तरव्यापारेण व्यवधीयते, नैष दोषः । एवमपि कृतमेव आनुपूर्व्यम् । योऽसौ पश्वन्तरे व्यापारः, स एवासौ न पदार्थान्तरम् । पदार्थान्तरेण व्यवधानं भवति ।

टुप्.— सर्वेषां वैकजातीयं कृतानुपूर्व्यात् । (लिखिते रत्ने चैवं पाठः) । यदि एकैकस्मिन् गुणकाण्डमपवृज्येत, तथा सति सहप्रयोगात् ('प्राजापत्यैश्चरन्ति' इति विहितात्) सहेतिकर्तव्यता अनुभवितव्या इत्येतत्

(अवगम्यमानम्) बाध्येत । तस्मात् पदार्थानुसमयः । प्रकृतौ पूर्वपदार्थं कृत्वा उत्तरः कार्यः, इत्येतावदभिसंहितम्, न तु अनन्तरमेवेति । अर्थात् एकत्वात् पशोः आनन्तर्यं संजातम् । इह तु (बहूनाम्) सहभावात् पदार्थाभ्यासः अवश्यम्भावी । द्वितीयः पदार्थः इहापि (प्रकृतिवत्) पाठेन (प्रथमपदार्थेन) पर्युपस्थापितः क्रियते । तस्मात् पदार्थानुसमयः । स्थिते एतस्मिन् प्रवृत्तिक्रमस्य [प्रथमपादोक्तस्य] आरम्भः ।

कारणादभ्यावृत्तिः । ३ ॥

भाष्यम्— अथ यदुक्तम् ' बहुषु पुरोडाशेषु नैकजातीयानुसमयः ' इति । तत्परिहर्तव्यम् । अत्रोच्यते । युक्तं तत्र, यत् कारणादभ्यावृत्तिः । एकजातीयानुसमये हि क्रियमाणे सहस्रस्याधिश्रयणे कृते प्रथमः शुष्येत् । तस्य च प्रथमं न शक्येत कर्तुम् ।

टुप्— (पूर्ववाद्युक्तदृष्टान्तवैषम्यप्रदर्शनार्थं सूत्रमनुभाषितमाक्षिपति–) न दृष्टान्तो युक्तो नापि परिहारः । (तथाहि,) अश्वप्रतिग्रहे (निमित्ते) चतुष्कपाला विधीयन्ते । ' यावतः ' इत्यनेन अश्वेयत्ता उच्यते, ' तावतः ' इति पुरोडाशेयत्ता ('यावतोऽश्वान् प्रतिगृह्णीयात्, तावतो वारुणांश्चतुष्कपालान् निर्वपेत्' इत्यत्र) । एकत्र निमित्तेयत्ता, अपरत्र नैमित्तिकेयत्ता । ' वारुणान् ' इति देवतासंबन्धो विधीयते । कतरेण अत्र (एषां इति रत्ने) साहित्यं विधीयते (चतुष्कपालानाम्) । तस्मात् भिन्ना एवैषां प्रयोगाः । क्रतूपकारस्तु एकः (क्रतूपकार एव केवलमेको न प्रयोगः) । यथा प्रयाजानुयाजानां (एकक्रतूपकारप्रयोजनानामपि) न तन्त्रेणेतिकर्तव्यता (किन्तु प्रयाजान् समाप्य अनुयाजप्रयोगः) एवमिहापि । (येषां तु 'प्रयाजानुयाजानां तन्त्रेणेतिकर्तव्यता' इति पाठः, नञ् न पठ्यते, तेषामयमर्थः, इतिकर्तव्यताशब्देन क्रतूपकार उच्यते, यथा प्रयाजादीनां भिन्नप्रयोगाणामपि एक एव क्रतूपकारः प्रयोजनं भवति, एवमिहापि इति नैतावता प्रयोगैक्यमिति) । वारुणान् इत्यनेन साहित्यमिति चेत्, तन्न । देवता हि अनेनोच्यते (न तत्र बहुत्वं विवक्षितम् । किञ्च वारुणानित्यत्र–) बहुत्वं श्रूयमाणं (विवक्षितं) यागभेदं कुर्यात् यथा प्राजापत्यानिति । तत्र एकस्मिन् अश्वप्रतिग्रहे बहवो वारुणाः प्राप्नुवन्ति । (किञ्च,) पुनरपि नैवास्ति साहित्यम् (साहित्याभावात् नात्र काण्डानुसमयः, न पदार्थानुसमयः प्राप्नोति इति न चोद्यपरिहारौ उभावपि उपपन्नौ) । तस्मात् वचनान्तरमेषां साहित्यप्रतिपादकं द्रष्टव्यमिति ।

शा— ' **एकैको हि पशुः स्वाङ्गान्यन्यपेतान्यपेक्षते । चोदकोऽप्येवमेवातः काण्डानुसमयो भवेत्** ॥ ' उच्यते । ' **वचनेनैककालत्वं पशूनामिह चोदितम् । न तत् प्रयोगवचनाच्चोदकाद् वाऽपि बाध्यते** ॥ '

सोम— पूर्वस्मिन् पादे श्रुत्यादिभिः प्रमाणैः क्रमो निरूपितः । इह तु यथायथं पूर्वोक्तप्रमाणावगम्यं क्रमं स्वीकुर्वन् प्रयोगविधिः अनुष्ठेयानुष्ठातृस्वरूपनिरूपणन्यायोपबृंहणेन क्वचित् पदार्थानुसमयं गृह्णाति, क्वचित् काण्डानुसमयं इति श्रुत्यादिप्रमाणगम्यस्यैव क्रमस्य विशेषपर्यवसानव्युत्पादनात् **पादान्तरत्वमानन्तर्यं** च । काण्डं पदार्थवर्गः । अनुसमयः पश्चात् संगतिः । अत्र भाष्ये ' कारणादभ्यावृत्तिः ' इति सूत्रं बहुषु पुरोडाशेषु यथा काण्डानुसमयः, एवमिहापि इति पूर्वपक्षोक्तदृष्टान्तवैषम्यकथनार्थत्वेन व्याख्याय अधिकरणान्तरपरतयाऽपि व्याख्यातम् । **सूत्रार्थस्तु**— प्रधानानां संनिपाते साहित्ये एकैकस्य पशोः गुणानां सर्वकर्म सर्वत्वेन कार्त्स्न्येन सर्वत्र क्रिया स्यादिति ।

वि— ' वाजपेये किमेकैकपशौ सर्वसमापनम् । सर्वेषु वैकैकधर्म, आद्यः साहित्यसिद्धये ॥, वचनात् पशुसाहित्यं प्रयोगोक्त्या तु कल्प्यते । धर्मसाहित्यमेतच्च सिद्धान्तेऽपि न हीयते ॥ '

भाट्ट— यत्रानेकेषां प्रधानानामङ्गानां वैकेन प्रयोगविधिनोपसंहारात् साङ्गानां साहित्यावगमः, तत्र दर्शपूर्णमासप्राजापत्यादौ किमेकैकस्य प्रधानस्य संनिपत्योपकारकाङ्गकाण्डं कृत्वेतरस्य कर्तव्यमित्येवं काण्डानुसमयः, अथवा एकैकमङ्गमेकैकस्य कृत्वेतरस्य कर्तव्यमित्येवं पदार्थानुसमयः, इति चिन्तायाम्, प्रधानप्रत्यासत्त्यनुग्रहात्प्रकृतितः परस्परसंश्लिष्टानामेव उपाकरणनियोजनादीनामेकैकस्मिन् पशौ प्राप्तत्वाच्च काण्डानुसमय एव । एकप्रयोगत्वं

तु आरादुपकारकाङ्गाभिप्रायेणेति न कश्चिद्विरोधः । इति प्राप्ते, प्रत्यक्षवचनेनैकस्मिन् काले साङ्गानां सर्वेषां प्रयोगविधानात् प्रधानसाहित्यवदङ्गेष्वपि साहित्यावगमात् एकैकाङ्गेन सर्वप्रधानानां युगपदुपकर्तव्यमित्यर्थावगमेनैकमुपाकरणाख्यमङ्गं सर्वपशूनां कृत्वा नियोजनं कार्यम् । प्रधानप्रत्यासत्तिस्तु प्रत्यक्षवचनावगतोक्तसाहित्यानुरोधेनैव कल्पनीया । उपाकरणानन्तरमेव च नियोजनमिति यथाप्रकृत्येवानुष्ठानम् । आवृत्तानावृत्तत्वं तु प्रधानसाहित्यानुरोधेनेति न कश्चिद्विरोधः । अतः पदार्थानुसमयः । प्रवृत्तिक्रमविचारस्त्वेतदधिकरणोत्तरं द्रष्टव्यः ।

मण्डन— ' क्रमः पदार्थेषु गुणे पशूनाम् । '

शंकर— ' पदार्थोऽनुसमीयते । '

* **पदार्थानुसमयन्यायः** । (५।२।१।१–३ ॥) न्यायस्वरूपम् ' प्रत्यक्षवचनेन (' प्राजापत्यैश्चरन्ति ') एकस्मिन् काले साङ्गानां सर्वेषां प्रयोगविधानात् प्रधानसाहित्यवदङ्गेष्वपि साहित्यावगमात् एकैकाङ्गेन सर्वप्रधानानां युगपदुपकर्तव्यं इत्यर्थावगमः ' इति । उदाहरणम्– प्राजापत्यपशुषु एकं उपाकरणाख्यमङ्गं सर्वपशूनां कृत्वा नियोजनं कार्यम्, एवं सर्वत्र । तथा चात्र एकैकमङ्गं एकैकस्य कृत्वा नियोजनं कार्यं इत्येवं पदार्थानुसमयः । इति । **के.**

* ' **पदार्थापेक्षया** पदार्थगुणः क्रमादिर्दुर्बलः ' इति शिष्टाकोपाधिकरणन्यायस्य स्वरूपम् । **के.**१।३।४। ५–७.

* **पदार्थेयत्ता** न केन चित् प्रमाणेन परिच्छिद्यते । **वा.**१।३।३।७ पृ. २००.

* **पदार्थैकदेशेनान्वयो** व्युत्पत्तिविरुद्धः । **सोम.** ३।१।९.

* **पदार्थक्रमः** अर्थादपि । **भा.** ५।१।२।२.

* **पदार्थपूर्वकत्वाच्च** वाक्यार्थस्य, यादृशोऽर्थः पदवेलायामवगतः, तादृश एव उत्तरेण पदेन संबध्यते । **टुप्.** ६।२।२।४ पृ.१३९२.

* **पदार्थप्राप्तिः** उपकारपृष्ठभावेन । **भाट्ट.** १०।१।९ पृ.२०५.

* **पदार्थप्राबल्याधिकरणम्** । वि. १।३।३. ' शिष्टाकोपाधिकरणम् ' इत्यत्र द्रष्टव्यम् ।

* **पदार्थप्राबल्यन्यायस्य** (१।३।४।५–७) स्वरूपं ' अत्यन्तबलवन्तोऽपि पौरजानपदा जनाः । दुर्बलैरपि बाध्यन्ते पुरुषैः पार्थिवाश्रितैः ॥ ' । **वा.** ३।३।७।१४ पृ. ८४१.

* **पदार्थमूलतया** वाक्यार्थप्रामाण्यम् । **भा.** १।१।७।२४–२६.

* **पदार्थसंदेहा**त्तावत् बहवो वृद्धव्यवहारादेव निवर्तन्ते । शेषाश्च निगमनिरुक्तकल्पसूत्रतर्काभियुक्तेभ्यः, सर्वेषामर्थप्रतिपादनपरत्वात् । **वा.** १।३।८।२४ पृ २६६.

* **पदार्थसामर्थ्यजनितो** हि वाक्यार्थो भवति । **भा.** ५।१।११।२१.

* **पदार्थस्मरणशाब्दबोधयोः** समानप्रकारकत्वं तदादिभिन्नपदेषु । इति **के चित्** । **अन्ये** तु तददेर्घटत्वादिनैव शक्तिरिति नानार्थतैव इत्याहुः । **मणि.** पृ.१६३.

🕱 **पद्मपत्रस्थिततोयन्यायः** । उक्तं च– ' पद्मपत्रस्थितं तोयं धत्ते मुक्ताफलश्रियम् । महाजनस्य संपर्कः कस्य नोन्नतिकारकः ॥ ' इति । **साहस्री.** ८०७.

* ' यथा च **पद्मरागादीन्** काचस्फटिकमिश्रितान् । परीक्षका विजानन्ति, (शब्दानां) साधुत्वमपरे तथा ॥ ' **वा.** १।३।८।२७ पृ. २८२.

🕱 **पनसोदुम्बरादिवत् इति न्यायः** । अयं कश्यपसंहितायामुदाहृतः । तथाहि, ननु क चिद्रजोदर्शनं विनापि गर्भसंभवो दृश्यते, क चित्तु सत्यपि रजसि गर्भाऽनुपलम्भः इति । नैष दोषः, गर्भधारणं हि रजोविना न भवतीत्येषा व्याप्तिः, तत्र क चित् प्रकटं क चिदप्रकटमन्तरेऽवतिष्ठते । तत्राप्रकटेऽपि रजसि अन्तर्गतरजस्त्वात् गर्भधारणसंभवः, अतः प्रागुक्तदोषाभावः । अत आह ' वर्षद्वादशकादूर्ध्वं यदि पुष्पं बहिर्नहि । अन्तः पुष्पं भवत्येव पनसोदुम्बरादिवत् ॥ ' इति । **साहस्री.** ५५४.

* ‘ **पम्पाकुलायप्रतिमाश्च** वृक्षाः । ’ (अर्थवाद-मात्रस्य अतिदेशे उदाहरणमिदमुक्तम्– के.) । भा. ७।१।३।१७.

* **पय** एव आमिक्षा वैश्वदेवहविः , दधि तु संस्कारकं इत्यष्टमे (८।२।४) । के. * ‘ पयो वा तत्प्रधानत्वात्० ’ (८।२।४।२२) । यदि चात्र पयो देवता-संबन्धि, ततो विशेषातिदेशः सिध्यति ‘ पयो वा० ’ इति । टुप्. ४।१।९।२३. * नित्यं हि उपसर्जनीभूतं भोजने **पयः** प्रचरति । ननु केवलमपि लोके पय उपभुज्यते । उच्यते । कारणात् केवलाशनम् । व्रतं औषधं वा यस्य स केवलं पय उपयुङ्क्ते । न तु एतत् प्रचुरम् । भा.९।४।९।३८, * ‘ **पयसा** जुहुयात् ’ इति विधिः , ‘ जर्तिलयवाग्वा ’ इत्यादिरर्थवादः अग्निहोत्रे । १०।८।४।७, * पयसा दध्ना वा चरोः श्रपणं क्रियते (क्रियते च दधिपयोभ्यां श्रपणम्) । ९।२।१४।४५, * ‘ पयसा मैत्रावरुणं श्रीणाति ’ इति वचनात् मैत्रावरुणस्यैव पयसा श्रपणं न सर्वेषाम् । ३।६।११।३२, * **पयसः** सांनाय्यगतस्य धर्माणामति-देशोऽग्नीषोमीयपशौ । ८।२।३।१५–१८. * **पयसि** अदितिचरुश्रपणार्थे प्रदेयधर्मा नानुष्ठेयाः प्रायणीये । ९।४।९. मीको. पृ. ९०९ ‘ आदित्यपयोऽधिकरणम् ’ इत्यत्र द्रष्टव्यम् । * पयसि आग्नेये सांनाय्यस्य विध्यन्तः । भा. ८।१।१७।३४. * पयसि आग्नेये सांनाय्यपयो-धर्माणामेवातिदेशः । ८।१।१७. मीको. पृ. २०१ ‘ अतिदेशः ऐन्द्रे० ’ इत्यत्र द्रष्टव्यम् । * पयसि चरुः ज्योतिष्टोमे प्रायणीये । तत्र पयसि प्रदानार्था धर्मा न कर्तव्याः । भा. ९।४।९।३२–४०. * पयसि दधनि च पशुकामेष्टौ प्रदेयधर्मा न भवेयुः । श्रपणार्थे तु प्रणीताधर्मा भवेयुः । के. ९।४।११।४३–४४. * पयसि दधनि च प्रणीताधर्मानुष्ठानं चन्द्राभ्युदितेष्टौ । भा. ९।२।१४।४४–४५, * पयसि दधनि च प्रदेयधर्मानुष्ठानं चन्द्राभ्युदितेष्टौ । ९।४।१०।४१–४२, * इज्यार्थे दधनि **पयसि** च प्रणीताधर्माः पाके उपकुर्वन्ति । ३।१।७।१४ पृ. ७१६.

* **पयआदिषु** मैत्रावरुणादिग्रहेषु श्रपणार्थेषु प्रदेय-धर्मा नानुष्ठेयाः ज्योतिष्टोमे । ९।४।१२. मीको. पृ. १८२४ ‘ज्योतिष्टोमे मैत्रावरुणादि०’ इत्यत्र द्रष्टव्यम् ।

* **पयोग्रहाः** सुराग्रहाश्च सौत्रामण्याम् । ‘ उत्तरेऽग्नौ पयोग्रहान् जुहुति, दक्षिणे सुराग्रहान् ’ । वा. ३।५।३।१४.

* **पयोद्रव्यकत्वं** इष्टिप्रकृतिलिङ्गम् । बाल. पृ. ११९.

* **पयोधर्माणां** सांनाय्यगतानामतिदेशः वैश्वदेव-पर्वगतामिक्षायाम् । ८।२।४. मीको. पृ. २२२ ‘ अतिदेशः वैश्वदेव्या० ’ इत्यत्र द्रष्टव्यम् ।

* **पयोधर्मातिदेश** आमिक्षायाम् । पयोविकारः आमिक्षा । भा. ८।२।४।१९–२३.

* **पयोविकारः** अग्नीषोमीयः पशुः, न दधि-विकारः । भा. ८।२।३।१५–१८.

* **पयोव्रतं** अपररात्रादौ अजीर्णसंभवे न कर्तव्यम्, अन्यथा कर्तव्यम् । वि. ६।८।८, * पयोव्रतं ब्राह्मणस्य दीक्षितस्य ज्योतिष्टोमे क्रत्वर्थम् । ४।३।४. * ‘ पयोव्रतं ब्राह्मणस्य, यवागू राजन्यस्य, आमिक्षा वैश्यस्य ’ अयं कर्तृतः वाचनिकव्यवस्थाविधिः । बाल. पृ. १८. * पयो-व्रतं यवागूव्रतं इत्यादि अन्यस्मिन् भक्षे सत्यपि कर्तव्यम्, अन्यच्च न भक्षणीयमपूर्वार्थत्वात् । वि. ६।८।७.

* **पयोव्रतादि** ज्योतिष्टोमे अपररात्रे न नित्यम् । ६।८।९. मीको. पृ. १७८५ ‘ ज्योतिष्टोमे अपर० ’ इत्यत्र द्रष्टव्यम् । * **पयोव्रतादीनि** ज्योतिष्टोमे नित्यानि । भा. ६।८।८।२८. मीको. पृ. १८४३ ‘ ज्योति-ष्टोमादिषु पयो० ’ इत्यत्र द्रष्टव्यम् । * **पयोव्रतादिना** सौमिकेन ज्योतिष्टोमे प्रायणीयादिषु दार्शिकारण्याशनस्य प्रसङ्गसिद्धिः । भा. १२।१।१४।३०, * **पयोव्रतादे**-रातिदेशिकस्य पृष्ठ्यषडहोपदिष्टमध्वशनेन न बाधः किन्तु समुच्चयः । १०।४।१।१–२ वर्णकं १ . * **पयोव्रता-दीनां** क्रत्वर्थता । ४।३।४. ‘ व्रताधिकरणम् ’ इत्यत्र द्रष्टव्यम् ।

* **पयःसक्तुधानादिषु** प्रदानधर्मा नानुष्ठेया ज्योतिष्टोमे ‘ पयसा मैत्रावरुणं श्रीणाति ’ इत्यादौ । भा. ९।४।१२।४५–५०.

* **पयोहोमन्यायः** । भा. १०।८।४।७. अय-मेव जर्तिलयवागून्यायः । मीको. पृ. १७४९ ‘ जर्तिलयवागून्यायः ’ इत्यत्र द्रष्टव्यम् । * गवामयने, **पयोहोमन्यायेन** तत्र पौर्णमासीवाक्यशेषे ‘ चित्रापूर्ण-मासे दीक्षेरन् मुखं वा एतत्संवत्सरस्य यच्चित्रापूर्णमासः ’ इत्यादौ चैत्र्याः स्तुतत्वात् चैत्री एव दीक्षाकालः । इत्यादिः पूर्वपक्षः । भाट्ट. ६।५।१०.

* **पयोहोमविधेरर्थवादः** जर्तिलयवागूहोमवाक्यम् । भा. १०।८।४।७.

* **पयस्या** पयसि प्रभवा आमिक्षा । तैसा. २।३।१३।२. * **पयस्यां** मैत्रावरुणपात्रे निदधाति ज्योतिष्टोमे । सवनीये विद्यमानायाः एवायं एकदेश-संयोगो न तु अन्यतः । भा. ३।८।१८।३३. * **पयस्यायाः** सवनीये पूर्वसिद्धाया एवैकदेशः मैत्रा-वरुणपात्रे निधेयः ज्योतिष्टोमे, न तु निधानार्थमपूर्व-पयस्योत्पादनम् । वि. ३।८।१९. * **पयस्यायां** प्रणीतानामभावः । ‘ पुरोडाशाभावे प्रणीतानामभावो यथा पयस्यायाम् ’ । भा. ४।२।५।१५.

* **परं** तु **श्रुतिसामान्यमात्रम्** । १।१।८।३१ ॥ इत्यनेन न्यायेन बबरशब्दस्य शब्दानुकारित्वम् , प्रावाहणिशब्दस्य च प्रकर्षेण वहति इति व्युत्पत्ति-मङ्गीकृत्य नित्यवायुपरत्वाङ्गीकारः । कौ. १।२।१।१८ पृ. ३८.

परेणावेदनाद् दीक्षितः स्यात् सर्वैर्दीक्षाभि-संबन्धात् ।५।३।११।२९॥

ज्योतिष्टोमे ‘ दण्डेन दीक्षयति ’ इति दण्डेन दीक्षां निर्वर्तयति इति दण्डो दीक्षार्थ उक्तः । आग्नावैष्णवोऽपि दीक्षार्थः । तत्र किं सर्वैर्दीक्षितो भवति इष्टयन्ते एव वा दीक्षितो भवति इति विचारे पूर्वपक्षमाह । परेण अध्वर्युणा आवेदनात् ‘ अदीक्षिष्टायं ब्राह्मणः ’ इति निर्देशात् ऊर्ध्वं यजमानो दीक्षितः स्यात् । सर्वैः आग्ना-वैष्णवेन पुरोडाशेन , दण्डेन मेखलया कृष्णाजिनेन इत्यादिना च दीक्षाया अभिसंबन्धात् । ततश्च आवेदनो-त्तरं दीक्षितत्वम् । दीक्षितत्वे च सिद्धे ‘ दीक्षितो न ददाति, न जुहोति, न पचति ’ इत्यादीनि दीक्षितव्रतानि प्रतिपत्तव्यानि । अत्र तन्त्ररत्नम्— ‘ आवेदनात् इति पञ्चमीसिद्धौ यत्नः कर्तव्यः सकलशब्दार्थतत्त्वज्ञाननिधिना भगवता महर्षिणा प्रयुक्तत्वात् । तस्मात् ‘एनपा द्वितीया’ इत्यत्र पञ्चम्यपि दृश्यते इति वक्तव्यम् ’ इति । एतन्मते आवेदनात् परेण इत्यन्वयः । आवेदनोत्तरमित्यर्थः । परेण इति एनबन्तमव्ययम् ।

इष्टयन्ते वा तदर्था ह्यविशेषार्थसंबन्धात् । ३० ॥

पूर्वपक्षं सूत्रेण प्राप्तं वाशब्देन निरस्य सिद्धान्तमाह । इष्टयन्ते दीक्षितः स्यात् । हि यस्मात् तदर्था दीक्षार्था सा इष्टिः । दीक्षया च दीक्षितो भवति । ‘ दण्डेन दीक्षयति ’ इत्यादौ तु अविशेषार्थसंबन्धात् । अविशेषेण क्रिया-विशेषशून्येन अर्थेन दण्डादिरूपद्रव्येण संबन्धात् न तेन दीक्षोत्पत्तिः, क्रियारूपत्वाभावात् । तस्मात् इष्टयन्ते एव दीक्षितत्वम् । तत आरभ्य च दीक्षितव्रतानि । ‘ अविशेषाच्चार्थसंयोगात् ’ इति कुतूहलपाठेऽपि उक्त एवार्थः ।

समाख्यानं च तद्वत् । ३१ ॥

दीक्षणीयया इष्टयैव दीक्षितत्वम् , न दण्डाजिन-मेखलादिना इति सिद्धान्ते हेत्वन्तरपरं सूत्रम् । इष्टि-र्दीक्षार्था, इष्टयन्ते च दीक्षितत्वस्य दीक्षितव्रतानां च प्रवृत्तिः । यस्मात् समाख्यानं दीक्षणीया इति समाख्या, तद्वत् पूर्वसूत्रोक्तहेतुवत् इष्टयन्ते दीक्षितत्वसाधकम् । दीक्षयितुं दीक्षासंपन्नं कर्तुं योग्या दीक्षणीया इति हि तत् समाख्यानम् । तच्च दीक्षणीयया इष्टया दीक्षितत्वे संभवति सति उपपद्यते नान्यथा । तस्मात् दीक्षणीया इति समाख्याऽपि इष्टयन्ते दीक्षितत्वं इत्यस्य पक्षस्य साधिका । तस्मात् इष्टयन्ते दीक्षितः स्यात् । के.

* परेणावेदनात् (दीक्षितः स्यात् सर्वैर्दीक्षाऽभि-संबन्धात् । ५।३।११।२९) इत्यधिकरणे तन्त्ररत्ने उक्तम् ‘ आग्नावैष्णवो वाक्येन दीक्षिष्यमाणपदसम-भिव्याहारेण दीक्षार्थः ’ इति । बाल. पृ. ४७. * परेण

पूर्वं बाध्यते पौर्वापर्येण विरोधे । अप्राप्तबाधः । वा. ३।३।७।१४ पृ. ८६०.

परेषां प्रतिषेधः स्यात् । १०।२।३२।७२ ॥

साद्यस्के सोमे 'खलेवाली यूपो भवति' इत्युक्तम् । तत्र खलेवालीत्वात् परेषां अन्येषां यूपधर्माणां जोषणं तक्षणं उच्छ्रयणं इत्येवमादीनां प्रतिषेधः बाधः स्यात् । ते न कर्तव्याः । इति सिद्धान्तः ।

विप्रतिषेधाच्च । ७३ ॥

तत्रैव हेत्वन्तरमाह । तेषु धर्मेषु कृतेषु खलेवाल्याः विप्रतिषेधः कृतो भवेत् । यत् काष्ठं खले बलीवर्दवारणप्रवृत्तं सा खलेवाली । सा तादृश्येवोपादातव्या । तक्षणे क्रियमाणे सा विनश्येत् । जोषणं तु भ्रष्टावसरमेव । निखातैव च खलेवाली, पुनर्निखननं व्यर्थम् । एवमुच्छ्रयणम् । तस्मात् खलेवाल्यां तक्षणादयो धर्मा न कर्तव्याः । के.

परेषु चाग्रशब्दः पूर्ववत्स्यात् तदादिषु । १०।५।१९।६७ ॥

ज्योतिष्टोमे 'आश्विनाग्रान् गृह्णीयादामयाविनः' 'शुक्राग्रान् गृह्णीयादभिचरतः' 'मन्थ्यग्रान् गृह्णीयादभिचर्यमाणस्य' इति ऐन्द्रवायवात् परे ग्रहाः कामाय श्रूयन्ते । तेषु ऐन्द्रवायवात् परेषु च ग्रहेषु अग्रशब्दः पूर्ववत् स्वक्रमस्यस्यैव बोधकः, तदादिषु सः आदौ येषां तदुत्तरेषां ते तदादयः, तेषु तदादिषु अग्रशब्दः स्यात् । यस्य ग्रहस्य यादृशी अग्रता पाठक्रमेण सिद्धा तामेव अनूद्य सस ग्रहो फलाय विधीयते, न तु अग्रता विधीयते । तेन स्वस्वस्थानस्थितानामेव आश्विनादिग्रहाणां तत्तत्फलार्थता स्यात् इति पूर्वः पक्षः ।

प्रतिकर्षो वा नित्यार्थेनाग्रस्य तदसंयोगात् । ६८ ॥

वाशब्दः पूर्वपक्षव्यावृत्तये । आश्विनाग्रताशुक्राग्रतामन्थ्यग्रताः कामाय श्रूयन्ते । तत्र आश्विनादीनां न स्वस्थानस्थितानामेव कामार्थता, किन्तु तेषां ऐन्द्रवायवात् प्राक् प्रतिकर्षः कर्तव्यः फलाय । नित्यार्थेन अग्रस्य नित्यार्था या पाठसिद्धा आश्विनादीनां अग्रता तस्याः तदसंयोगात् तेन आमयावित्वनिरासादिफलेन असंयोगात् संयोगाभावात् । ततश्च स्वस्थानस्थितत्वेन या कथञ्चिदग्रता सा नित्यार्था । अभिचारादिफलार्था च या अग्रता, सा ऐन्द्रवायवात् प्राक् प्रतिकर्षेणैव सेत्स्यति । तस्मात् विशिष्टफलार्थं आश्विनादीनां ऐन्द्रवायवात् प्राक् प्रतिकर्षः इति सिद्धान्तः । अत्र न पूर्ववत् ग्रहविधिः, किन्तु अग्रताया एव विधिः इति मन्तव्यम् ।

प्रतिकर्षं च दर्शयति । ६९ ॥

ज्योतिष्टोमे कामविशेषाय आश्विनाग्रता शुक्राग्रता मन्थ्यग्रता च श्रुता । तत्र आश्विनादीनां ऐन्द्रवायवात् प्राक् प्रतिकर्षः सिद्धान्ते उक्तः । तत्र लिङ्गमाह । लिङ्गं धाराग्रहेषु सर्वादितः आश्विनादीनां प्रतिकर्षं दर्शयति । 'धारयेयुस्तम्, यं कामाय गृह्णीयुः, ऐन्द्रवायवं गृहीत्वा सादयेत्, अथ तं सादयेत्, यं कामाय गृह्णीयुः' इति । इदं लिङ्गं कामाय गृहीते धार्यमाणे ऐन्द्रवायवस्य ग्रहणं दर्शयति । तस्मात् कामार्थानां ग्रहाणां ऐन्द्रवायवात् प्राक् प्रतिकर्षः इति सिद्धान्तः । के.

* परकृतिः अर्थवादः 'इति ह स्माह बट्कुवार्ष्णिः माषानेव मह्यं पचत' इति । बाल. पृ. ५० .

* परकृतिः एककर्तृकोपाख्यानम् । 'इति ह स्माह बट्कुर्वार्ष्णिः माषान् मे पचत' इत्यादि । भाट्ट. ६।७।११. * परकृतिः मन्त्रः 'चित्र इद्राजा राजका इदन्यके यके सरस्वतीमनु । पर्जन्यइव ततनद्धि वृष्ट्या सहस्रमयुता ददत् ॥' (ऋसं. ८।२१।१८) अत्र हे राजकाः राजानः, चित्रो नाम राजा, इत् इति निश्चये । स एव सरस्वतीमनु तद्देशे यके अन्यके यस्मिन्कस्मिंश्चित् अन्यस्मिन् देशे गवां सहस्रम्, अयुता अयुतानि च ददत् इत् ददौ एव । वृष्ट्या ततनत् तन्वन् पर्जन्य इव । हिः प्रसिद्धौ । बाल. पृ. ६१–६२.

परकृतिपुराकल्पं मनुष्यधर्मः स्यादर्थाय ह्यनुकीर्तनम् । ६।७।१२।२६ ॥

'इति ह स्माह बर्कुर्वार्ष्णिः माषान्मे पचत, न वा एतेषां हविर्गृह्णन्ति' इति एककर्तृकवृत्तान्तकथनरूपायां परकृतौ उपवसथेऽहनि माषभक्षणमुक्तम् । 'उल्मुकैर्ह स्म पूर्वे समाजग्मुः, तान् ह असुरा रक्षांसि निजघ्नुः' इति बहुकर्तृकवृत्तान्तकथनपरे पुराकल्पे उल्मुकैः सह

गमनमनिष्टमित्युक्तम् । परकृतिश्च पुराकल्पश्च अनयोः समाहारः परकृतिपुराकल्पम् । तत्र कथितं धर्मजातं तेन शब्देनोक्तम् । तथा च परकृतिपुराकल्पस्थो धर्मः माषभक्षणादिः मनुष्यधर्मः यागकर्तुः मनुष्यस्य धर्मः स्यात् । हि यस्मात् धर्मस्य अनुकीर्तनं कथनं अर्थाय प्रयोजनायैव । तस्मात् उपवसथादौ माषभक्षणं बर्कोर्वार्ष्णेः अन्यैरपि मनुष्यैः कर्तव्यं इति माषपाकस्य विधिरयम्, नार्थवादः इति प्रथमः पूर्वपक्षः ।

तद्युक्ते च प्रतिषेधात् । २७ ॥

परकृतिपुराकल्पोक्तधर्मे उपवसथे माषभक्षणादौ तद्युक्ते विहितमनुष्यधर्मत्वयुक्ते सत्येव प्रतिषेधात् 'तत्तथा न कुर्यात्' इत्यादिप्रतिषेधस्य सफलत्वात् माषभक्षणादेर्मनुष्यधर्मत्वेन विधिरेव स्यात् इति पूर्वपक्षे हेत्वन्तरमाह सूत्रम् । हेत्वन्तरसमुच्चयार्थश्चकारः । कुतूहले तु इदं सूत्रं 'विधौ तु वेदसंयोगात्०' इति सूत्रोत्तरं एकोनत्रिंशत्त्वेन पठितम् । व्याख्या च इत्थम्— वाजपेयप्रकरणे वाजसनेयशाखायां द्विविधः पशुकल्पः श्रुतः । पशुकाले आग्नेयमैन्द्राग्नमैन्द्रमिति त्रीन् क्रतुपशून् उपाकृत्य मारुतीं वशामुपाकरोति सारस्वतीं च मेषीं सारस्वतं च मेषमुपाकृत्य ससदश प्राजापत्यान् पशून् उपाकरोति । पर्यग्निकरणान्ते सारस्वत्यन्तान् पूर्वानालभन्ते, सारस्वतप्रभृतीन् उत्तरान् धारयन्ति । माध्यंदिनस्य सवनस्य मध्यमे उक्थ्यपर्याये ब्रह्मसाम्नि उपाकृते सारस्वतप्रभृतीनुत्तरान् आलभन्ते । 'तेषामनभिघारिताभिर्वपाभिः प्रचरति । सारस्वतस्य वपया प्रचर्य समवदाय प्राजापत्यवपाभिः चरति । हारियोजनेन प्रचर्य सारस्वतप्रभृतीनां हृदयादिदैवतैः प्रचरति । तत्र-त्रेष्टा अनूयाजा भवन्ति, अव्यूढे स्रुचौ अथैषां हविर्भिः प्रचरन्ति । तदु तथा न कुर्यात् । ह्वलति (चलति) वा एष यज्ञो यदेवं कुर्वन्ति । तस्मात् यत्रैव पूर्वेषां वपाभिश्चरेयुः तदितरेषां वपाभिश्चरेयुः, यत्रैव पूर्वेषां हविर्भिः तत्रैव तेषां हविर्भिश्चरेयुः' इति । अत्र यच्छब्दयुक्ते वाक्ये श्रुतस्य पशुकल्पस्य प्रतिषेधो भवति । स च प्रसक्तस्यैव भवति । तस्मादपि एवंजातीयो विधिरेव स्यात्— इति । उक्तकुतूहलोक्तो विषयः कियांश्चित् शतपथे ५।१।३।१–१४ इत्यत्र दृश्यते, न तु सर्व एव । वाक्याक्षरपरिपाटी प्रायः सर्वा अन्यैव च दृश्यते ।

निर्देशाद्वा तद्धर्मः स्यात् पञ्चावत्तवत् । २८ ॥

परकृतिपुराकल्पोक्तः उपवसथे माषभोजनादिर्धर्मः वृष्णिकुलोत्पन्नबर्कुवत् सर्वमनुष्याणां धर्मः विधिः स्यादिति प्रथमपूर्वपक्षं सूत्रद्वयेन प्राप्तं वाशब्देन निरस्यन् अन्यं पूर्वपक्षमाह । वार्ष्णिशब्देन निर्देशात् वृष्णिकुलोत्पन्नानामेव तद्धर्मः, स चासौ धर्मश्च तद्धर्मः माषभक्षणरूपो धर्मः स्यात्, न तु वृष्णिभिन्नमनुष्याणाम् । पञ्चावत्तवत् । 'पञ्चावत्तं जमदग्नीनाम्' इति यथा जमदग्निगोत्राणामेव पञ्चावत्तं भवति, नान्येषां तद्वत् । अथवा निर्देशात् वृष्णिगोत्रनिर्देशात् तद्धर्मः तेषां वृष्णीनां वृष्णिगोत्रोत्पन्नानामेव धर्मः स्यात् इति शब्दार्थः ।

विधौ तु वेदसंयोगादुपदेशः स्यात् । २९ ॥

'माषानेव मह्यं पचत' इत्यर्थवादे वार्ष्णिसंयोगात् विधौ तदनुमितविधौ वृष्णिसंबन्धस्तुत्या सर्वेषामेव मनुष्याणामुपदेशः स्यात् माषपाकस्य । परकृतिपुराकल्पमिति प्रथमसूत्रे केवलं विधिपक्ष उक्तः । न तु तत्र केषां मनुष्याणामित्युक्तम् । इति न पुनरुक्तिः ।

अर्थवादो वा विधिशेषत्वात् तस्मान्नित्यानुवादः स्यात् । ३० ॥

परकृतिपुराकल्पयोः 'इति ह स्माह बर्कुर्वार्ष्णिः माषान् मे पचत' इत्यादौ माषपाकविधिः, वृष्णिगोत्राणामेव विधिः, मनुष्यमात्राणां स विधिः इति पूर्वपक्षत्रयनिरासार्थः वाशब्दः । 'आरण्यमेवाश्नीयात्' इत्यस्य विधेः 'इति ह स्माह' इत्यादिः शेषः । विधिशेषत्वात् अर्थवादः स्यात् । 'गृहपतेरेवाग्निषु निर्मथ्य निर्वपेरन्' इत्यस्य विधेः 'उल्मुकैर्ह स्म पूर्वे समाजग्मुः, तान् ह असुरा रक्षांसि निजघ्नुः' इत्ययं शेषः, तस्मात् सोऽप्यर्थवादः । तस्मात् अर्थवादत्वात् सः नित्यानुवादः स्यात्, न विधिः । इति सिद्धान्तः । के.

* **परकृतिपुराकल्पा** अर्थवादाः । (तत्र एककर्तृकमुपाख्यानं परकृतिः । अनेककर्तृकमुपाख्यानं पुराकल्पः इति वदन्ति) । भा. ६।७।१२।२६–३०.

परकृतिपुराकल्पाधिकरणम् । माषपाकाधिकरणम् । परकृतिपुराकल्पाः अर्थवादाः ॥

परकृतिपुराकल्पं च मनुष्यधर्मः स्यादर्थाय ह्यनुकीर्तनम् । ६।७।१२।२६॥

भाष्यम्— इह परकृतयः, पुराकल्पाश्चोदाहरणम् । यथा 'इति ह स्माह बर्कुर्वार्ष्णिर्माषान्मे पचत, न वा एतेषां हविर्गृह्णन्ति' इति । पुराकल्पः, 'उल्मुकैर्ह स्म पूर्वे समाजग्मुस्तान् ह असुरा रक्षांसि निजघ्नुः' इत्येवमादयः । तेषु संदेहः किमेते मनुष्यधर्मा विधयः, उत तद्गोत्राणाम् । अथवा अर्थवादा इति । किं तावत् प्राप्तम् ? मनुष्यधर्मा विधयः इति । कुतः ? अर्थाय प्रयोजनाय अनुकीर्तनमेतद्भवति । कर्तृमनुष्यसंबन्धकीर्तनेन क्रिया प्रशस्ता भवति । प्रशस्तं च प्रतिपाद्यम् । स एष विधिरेव अनेन प्रकारेण । अतः परैरपि मनुष्यैः कर्तव्य इति गम्यते ।

तद्युक्ते च प्रतिषेधात् । २७ ॥

भाष्यम्— एवंजातीयकस्य विधेः प्रतिषेधो भवति, तत्तथा न कुर्यादिति । प्रसक्तस्य च प्रतिषेधो न्याय्यः । तस्मादपि विधय इति ।

निर्देशाद्वा तद्धर्मः स्यात् पञ्चावत्तवत् । २८ ॥

भाष्यम्— मनुष्यधर्मोऽयं विधिरेवंजातीयक इति गृह्यते । तत्र तु विशिष्टगोत्राणां निर्देशात्तेषामेव धर्म इति गम्यते । स्तुत्या ह्ययं कर्तव्य इति ज्ञायते । स च विशिष्टगोत्राणां श्रूयते । तस्मात् तद्गोत्राणामेव कर्तव्यः । पञ्चावत्तवत् । यथा 'पञ्चावत्तं जमदग्नीनाम्' इति तद्गोत्राणामेव भवति, एवमिहापीति ।

विधौ तु वेदसंयोगादुपदेशः स्यात् । २९ ॥

भाष्यम्— तुशब्दादेषोऽपि पक्षो व्यावर्त्यते । विधौ एतेषामुपदेशः स्यात् । विधौ वेदेन स्तुतिनिर्देशः कृतः । न विध्याश्रये पुरुषे । पुरुषग्रहणं विधिप्रशंसार्थम् । विधिरिति क्रियामाह । एतस्याः क्रियाया भावो यस्मादनेन पुरुषेण क्रियते तस्मात् साधुरिति । न त्वत्र पुरुषः क्रियासंबन्धेन निर्दिश्यते किन्तु स्तोतव्यत्वेन । कुतः एतत् ? स्तुतिपदस्यान्यस्याभावात् । अपि च क्रियानिर्देशो श्रुत्या विधानम्, क्रियापुरुषसंबन्धनिर्देशे वाक्येन । तच्च दुर्बलम् । तस्मात् पुरुषमात्रस्य विधानं प्राप्नोति, न तद्गोत्राणामिति ।

अर्थवादो वा विधिशेषत्वात् तस्मान्नित्यानुवादः स्यात् । ३० ॥

भाष्यम्— एषोऽपि पक्षो वाशब्दाद्विनिवृत्तः । नायं तद्गोत्राणां विधिः, न मनुष्यमात्रस्य वा विधिः, विधिरेव वेति । अर्थवादस्तु । कुतः ? विधिशेषत्वात् । अन्यं त्वत्र विधिमामनन्ति । परकृत्युदाहरणे तावत्, 'तस्मादारण्यमेवाश्नीयात्' इति । पुराकल्पोदाहरणे, 'गृहपतेरेवाग्निषु निर्मन्थ्य निर्वपेरन्' इति । न च द्वयोर्विध्योरेकवाक्यभावोऽस्ति । विधिना हि संबध्यमानयोः परकृतिपुराकल्पवचनयोरन्या वचनव्यक्तिः । अन्या तु स्तुत्यर्थप्रवृत्तयोः । न चोभयं यौगपद्येन संभवति । तस्मादर्थवाद इति ।

शा— कृत्वाचिन्तया अधिकारश्चिन्त्यते । अर्थवादो वेति कृत्वाचिन्तोद्घाटनम् ।

सोम— अपरिमितशब्दवत् इहापि नाविशेषः इति प्रत्यवस्थानात् संगतिः । **सूत्रार्थस्तु**— परकृतिः पुराकल्पः इदं द्वयमपि मनुष्यधर्मः मनुष्यधर्मत्वेन विधेयं स्यात् । तथा सति तत्कीर्तनं प्रयोजनाय भवतीति ।

वि— 'माषान् मे पचतेत्येतद् वार्ष्णिष्वेवाखिलेषु वा । , उक्तेर्विवेश्च तौ पक्षौ, कृत्वाचिन्ताऽर्थवादतः ॥'

भाट्ट— दर्शपूर्णमासयोः 'इति ह स्माह बर्कुवार्ष्णिर्माषान्मे पचत' इति श्रुतम् । इदं चैककर्तृकोपाख्यानपरत्वात् परकृतिः । अयं चारण्याशनविधेः शेषः । बहुकर्तृकोपाख्यानपरं च वाक्यं पुराकल्पः सूत्रे 'उल्मुकैः सह पूर्वे समाजग्मुः, तानसुरा रक्षांसि निजघ्नुः' इति । अयं च 'गृहपतेरेवाग्निषु निर्मन्थ्य निर्वपेरन्' इति निर्मन्थ्याग्निसंसर्गस्तुत्यर्थः उल्मुकसंसर्गनिन्दकः सन् तद्विधेः शेषः । न तु स्वतन्त्रो विधिरित्यौदुम्बराधिकरणे निर्णीतमेव । परकृत्युदाहरणे तु यदा विधिस्तदा कृत्वाचिन्तया विचार्यते । वृष्णिगोत्रोत्पन्नाधिकारिकदर्शपूर्णमासोद्देशेन तत्कर्तृसंस्कारार्थतया वा माषपाकविधिरिति तद्वत एव माषपाकाधिकारो वैश्यनिमित्तकसात्तदश्यवत् । नह्यत्र प्राच्यत्ववत् वृष्णिगोत्रत्वं दुर्वचम्, येन तत्कल्प्यविधेः सामान्यविषयत्वं स्यात् । इति प्राप्ते, स्तुत्युपायत्वेनोपात्तस्य वृष्णिगोत्रत्वस्य विधेयमाषपाकविशेषणत्वकल्पने प्रमाणाभावात् माषपाकमात्रविधानेन सर्वाधिकारः । ११ .

मण्डन— 'माषपाकवचः स्तुतिः ।'

शंकर— 'माषपाके विधिर्नास्ति ।' १४. 'सर्वपुंसां विधौ तु सः ।' १५. पक्षान्तरमिदमिति टिप्पणी ।

* **परकृतिरूपार्थवादत्वं** एककर्तृकोपाख्यानम् । बाल. पृ. १२.

* **परकृतिरूपोपाख्यानार्थवादकल्प्यः** विधिः यथा 'ताभ्यामेतमग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छत्' इति । इन्द्रस्य उपाख्यानमिदम् । बाल. पृ. १२.

* **परतन्त्रोपजीवीन्येतानि** (हविर्धाने औषधगुणकानि ऐष्टिकानि कर्माणि) यथाऽवस्थितं परतन्त्रमुपजीवितुमर्हन्ति, यथा पाशुकान् प्रयाजान् अन्यकालानपि पशुपुरोडाशः उपजीवति, इति पूर्वपक्षः । भा. १२।१।७।१५.

* **परतस्त्वं** अप्रामाण्यस्य बाधकज्ञान-कारणदोषज्ञान-विसंवादज्ञानैर्ग्राह्यत्वम् । बाल. पृ. ६. * परतस्त्वं अप्रामाण्यस्य बाधकज्ञान-कारणदोष-विसंवादज्ञानाधीनत्वम् । अयाथार्थ्यरूपाप्रामाण्यस्य च परतस्त्वम् । कु. ११।१५।५.

* **परदाराभियोगः** अनाचारः । वा. १।३।३।७ पृ. २०३.

* **परनिमित्तकप्रायश्चित्तानुष्ठानम्** (परं परस्माद्वर्तमानं निमित्तं यस्य प्रायश्चित्तस्य, तस्यानुष्ठानमित्यर्थः) अपच्छेदपौर्वापर्ये । भा. ६।५।१९।५४.

* **परपक्षसाम्यापत्तिरेव** नोपपत्तिः । तस्य च तव च उभयोरपि अन्येन पर्यनुयोगात् । वा. २।१।२।५ पृ. ४०४.

* **परप्रकरणे** अन्यधर्मविधेरन्याय्यत्वम् । वा. ३।३।८।१६ पृ. ८६४.

* **परप्रत्यायनार्थो** वाक्यप्रयोगो वक्तॄणाम् । वा. २।१।१४।४६ पृ. ४४४.

* **परप्राबल्यन्यायः**, पूर्वदौर्बल्यन्यायः, पौर्वापर्यन्यायः, पौर्वापर्यबलीयस्त्वन्यायः, अपच्छेदन्यायः इत्येकमेव । भा. ६।५।१९।५४. मीको. पृ. ४९५ 'अपच्छेदन्यायः' इत्यत्र द्रष्टव्यम् ।

'परमतमप्रतिषिद्धमनुमतं भवति' इति न्यायात् इहापि योगशास्त्रप्रसिद्धा मनसः पञ्च वृत्तयः परिगृह्यन्ते, 'प्रमाण-विपर्यय-विकल्प-निद्रा-स्मृतयः' नाम । शांभा. २।४।१२ ब्रसू.

* **परशब्दः** परत्र प्रयुक्तः सन् तद्धर्मानतिदिशति इत्युक्तम् । भा. ७।४।२।८, * परशब्दः परत्र स्तोतुमपि न वर्तते । वा. १।४।१२।३१-१ पृ. ३५५. * **परशब्दस्य** परत्रवृत्तौ तद्वद्भावो गम्यते । स यत्र विज्ञातो भवति, तत्रानूद्यते, यथा 'सिंहो देवदत्तः' इति । यत्र अविज्ञातः, तत्र विधीयते, 'यथा अमी पिष्टपिण्डाः सिंहाः क्रियन्ताम्' इति । भा. ७।३।१।१.

* **परशाखाविहितं** स्वशाखाविहितेन बाध्यते, अयं अप्राप्तबाधः (यथा उदितहोमादि अनुदितहोमादिना) । वा. ३।३।७।१४ पृ. ८६०.

* **परसिद्धेन** परो बोधनीयः इत्यस्मिन्नंशे विरोधाभावात् अप्रतिषिद्धत्वमुक्तम् (मनसो वृत्तिपञ्चकस्य योगशास्त्रसिद्धस्य) । न्यायनि. २।४।५।१२.

* **परस्वत्वापादनं** नाम दातृव्यापार एवासौ । वा. ३।४।१०।२८ पृ. ९६०, * **परस्वत्वापादनात्** प्राक् दानविधानं न पर्यवस्यति, इति प्रतिग्रहमाक्षिपति । ३।४।१०।२८ पृ. ९२९.

* **परकीयैः** पदार्थैरुत्कृष्यमाणैः न दाक्षिणाग्निकौ पिष्टलेपफलीकरणहोमौ उत्कृष्येते ज्योतिष्टोमे । टुपू. ५।१।१५।२८. * **परकीयस्य** दानं नावकल्पते । भा. ३।२।१५।३७ पृ. ७९६. * परकीयस्य द्रव्यस्य क्रतौ विनियुक्तस्य अन्यार्थे विनियोगानौचित्यम् । सु. पृ. ९२८.

* **परमाणुः** । अणोरनुपलम्भ इत्यचोद्यम् । यदेव भवदभिमतं त्र्यणुकमीक्षामहे तदेव परमाणुमाचक्ष्महे, तदवयवानुपलम्भात् तत्कल्पनाहेत्वनुपपत्तेश्च । दृश्यमानावयवस्य च स्थवीयसः तैरेव क्षोदीयोभिः (त्र्यणुकैः)

आरम्भसंभवात्, अमहतोऽपि च गुणादेश्चाक्षुषत्वात् न महिमगुणशालिता तद्धेतुः । तदेकार्थसमवायस्य वा तद्धेतुत्वे त्र्यणुकस्य अग्रहणप्रसङ्गः स्यात् । तदभावात् परस्परापेक्षोभयकारणत्वे वा त्र्यणुकस्य च गुणादेश्च एकैककारणशालिनोः अचाक्षुषता स्यात् । परस्परानपेक्षकारणत्वे तु तृतीयस्यापि प्रकारस्य संभवो दुर्वारः । भवतु वा स्वभावविशेष एव चाक्षुषत्वे हेतुरेकः इति (चाक्षुषत्वे) न परिमाणतो नियमोपपत्तिः । **कणिका.** पृ. ११७. * **परमाणवः** । 'मीमांसकैश्च नावश्यमिष्यन्ते परमाणवः । यद्बलेनोपलब्धस्य मिथ्यात्वं कल्पयेद्भवान् ॥ समूहरूपं प्रत्यक्षमदृश्यैः परमाणुभिः । योऽपह्नुते शशस्यापि सोऽभावं शृङ्गतो वदेत् ॥ समूहपरमार्थत्वे स्थिते तत्सिद्धिहेतुका । यदि नामावगम्येत परमाण्वस्तिता पुनः ॥' **श्लोवा.** अनुमानपरिच्छेदे १८३–१८५. * **परमाणुषु** व्याप्यवृत्तिः संयोगः अङ्गीक्रियते । तत्तद्देशस्य अवच्छेदकत्वसंभवेन अव्याप्यवृत्तिसंयोगस्यापि नानुपपत्तिः इति तार्किकाः । **मणि.** पृ. ४६.

* **परमाणुसमर्थनम्** । संप्रति परमाणुसद्भावः साध्यते । अल्पपरिमाणतारतम्यं क्वचिदवधिमत् परिमाणतारतम्यत्वात्, महत्परिमाणतारतम्यवत् । नित्यश्चासौ अवधिर्युक्तः, अनित्यत्वे तस्यापि कारणवत्त्वेनानवधित्वप्रसङ्गात् । यश्चासौ अवधिः स परमाणुरिति । तथा त्र्यणुकं प्रत्यक्षस्वपरिमाणादल्पतरपरिमाणकार्यद्रव्यारब्धं कार्यद्रव्यत्वात्, घटादिवत् । तथा द्व्यणुकं स्वावयवारब्धं सावयवत्वात्, घटादिवत् इति । **ननु** द्व्यणुकमपि कार्यद्रव्यारब्धं स्यात्, कार्यद्रव्यत्वात्, घटादिवत्, अतो न नित्यरूपपरमाणुसिद्धिः । **नैवम्**, महतः कार्यद्रव्यस्य कार्यद्रव्यारब्धत्वम् । तर्हि तदेव द्रव्यं कारणवत् दृष्टमिति न द्व्यणुकस्य कारणवत्त्वमपि सिध्यति । तथापि यदि कार्यत्वादेव कारणवत्त्वमनुमीयेत, तर्हि कार्यत्वादेव कार्यद्रव्यारब्धत्वमप्यनुमीयताम्, कः पक्षपातहेतुः ? नैवम्, द्व्यणुकस्यापि कार्यद्रव्यारब्धत्वे, तस्यापि कार्यद्रव्यारब्धत्वप्रसङ्गेन अनवस्था प्रसज्येत । अथ क्वचित् कार्यद्रव्यारब्धत्वं नाश्रीयेत, तर्हि प्रथमस्य तथाभावे कः प्रद्वेषः ? इति स एव परमाणुः । अनवस्थायामपि को दोष इति चेत्, अयमेव दोषः, सर्वेषामवयविनां स्वावयवपरंपरायाः क्वचिदपरिनिष्ठितत्वादनन्तावयवप्रसङ्गः । भवत्विति चेत् तर्हि सर्षपमहीधरयोरपि तुल्यपरिमाणत्वप्रसङ्गः, अवयवाल्पत्वावयवमहत्त्वाभ्यां हि सर्वत्रावयविनां परिमाणाल्पत्वमहत्त्वव्यवस्था, अनन्तावयववत्त्वे तु सर्षपोऽप्यनन्तावयवः पर्वतोऽपि तथैवेति तुल्यपरिमाणत्वमपरिहार्यमेव, अतोऽनवस्थादिदोषप्रसङ्गेन द्व्यणुकस्य न कार्यद्रव्यारभ्यत्वं शक्यानुमानम् । **ननु** कार्यस्य कारणद्रव्यानुमानमप्यनवस्थाप्रसङ्गेनैव न घटते । **नैवम्**, अन्यतरव्याप्तिपरित्यागे प्रसक्ते कार्यद्रव्यारब्धत्वमेव परित्याज्यम्, न तु कारणवत्त्वमात्रव्याप्तिः, तस्या अवश्यम्भावित्वात् । तथाहि, कार्यं कारणवदिति सामान्यव्याप्तिमङ्गीकृत्य तत्कारणमपि कार्यरूपमेवेति द्वितीयानुमानेन साध्यते, अतः सामान्यानुमानविरोधे तदुपजीवकविशेषानुमानं ते परित्याज्यं स्यात्, न तूभयोरपि परित्यागः । **भवतु**, द्व्यणुकं परमाणुकं चोभयमपि नाश्रीयताम्, आद्यमेव प्रत्यक्षं महिमगुणशाल्येवावधिर्भविष्यति, परमाणुसाधकानुमानमपि सिद्धसाधनं भवतु । **नैवम्**, विकल्पासहत्वात् । तत् किं आद्यप्रत्यक्षं सावयवमनित्यम्, उत निरवयवं नित्यम् ? यदि सावयवमनित्यम्, तदा तस्यावयववत्त्वेन कारणवत्त्वेन च द्रव्यान्तरानुमानप्रसङ्गीकृतः परमाणुः । निरवयवं नित्यमित्याश्रीयमाणे उत्तरोत्तरसावयवानित्यकार्यद्रव्यस्य कारणत्वं न स्यात् । यत्रत् घटादिकार्यद्रव्यकारणं पिण्डादि तत्तत् सावयवमनित्यं च दृष्टम्, निरवयवस्य चाकाशादेर्द्रव्यारम्भकत्वमपि न दृष्टं अतो निरवयवनित्येनाद्यप्रत्यक्षेणोत्तरोत्तरकार्यारम्भो न सिध्यति । अथ सत्यपि तथा दर्शने उत्तरोत्तरकार्यदर्शनबलान्निरवयवं नित्यमाद्यप्रत्यक्षं कारणमिति कल्प्येत, तर्हि परमाणुरपि नित्यो निरवयव एव कारणं भवतु, द्व्यणुकमपि नित्यद्रव्यकार्यं भवत्विति तुल्यचर्चम् । **ननु** अस्माकं दृष्टविरुद्धनित्यनिरवयवस्य कार्यद्रव्यसमवायिकारणत्वे कल्प्यमानेऽपि उभयसंप्रतिपन्ने आद्यप्रत्यक्षे धर्ममात्रमेव कल्पनीयम्, तव तु द्व्यणुकपरमाणुरूपधर्मिकल्पनं कृत्वा तत्र निरवयवनित्यकारणत्वधर्मकल्पनमपीति न तुल्यत्वम् । **सत्यम्**, दृष्टस्वरूपे

आद्यप्रत्यक्षे न विरुद्धधर्मकल्पनमुचितम्, क्लृप्तहानिप्रसङ्गात् । अदृष्टस्वरूपं परमाण्वादिकमेव कल्प्यते, अतः क्लृप्तहानिपरिहारेणाक्लृप्तकल्पनमेव न्याय्यम्, इतरथा पर्वतधूमस्य कारणत्वेनाग्निकल्पने लाघवमस्तीत्यग्न्यनुमानोच्छेदप्रसङ्गः । अथ धूमजातीयस्याग्निसंबन्धस्यावगतत्वात् क्लृप्तहानिप्रसङ्ग इति चेत्, तर्ह्यत्रापि द्रव्यस्य सावयवानित्यत्वस्वभावस्य क्लृप्तत्वात् तत्परित्यागे क्लृप्तहानिः समैव । एवं क्रियाशक्तीन्द्रियादिष्वपि लाघवादनुमानं न स्यात् । अत एवोक्तम् 'प्रमाणबलकल्प्यानि सुबहूनि' इति । अतः कार्यद्रव्यं समवायिकारणवत् इत्येतावदेवानुमातव्यम्, न महत्कार्यद्रव्यं कारणवत्, नापि कार्यद्रव्यारब्धमिति । किञ्च कार्यद्रव्यं कारणवदिति सामान्यव्याप्त्युपजीवनेन 'महत्कार्यद्रव्यं कारणवत्', 'कारणमपि कार्यद्रव्यमेव दृष्टम्' इत्यादि निक्षेप्तव्यम्, तथा च सति महत्त्वादेर्व्यतिरेकाभावात् प्रयोजकत्वं न संभवति । तथाहि, इतरसामग्रीसंभवेऽपि यस्य व्यतिरेकात् कार्यानुत्पादो दृष्टः, तस्यैव धर्मस्य प्रयोजकत्वम्, अत्र तु कार्यत्वे सत्यपि महत्त्वादिधर्माभावात् कारणवत्त्वाभावः क्वचिदपि न दृष्टः, अतः कारणवदित्येतदेव प्रयोजकम् । किञ्च कार्यद्रव्यं कार्यद्रव्यारब्धमितीयं व्याप्तिरुभयोरपि वादिनोर्व्यभिचारिणी, तव तु आद्यप्रत्यक्षे उत्तरकार्यारम्भके व्यभिचारः, मम तु परममहतः कार्यात् त्र्यणुकात् द्व्यणुकसिद्धिः, द्व्यणुककार्यात् परमाणुसिद्धिः । **ननु** परमाणवस्त्र्यणुकमेवारभन्ताम्, किमन्तर्गडुना द्व्यणुकारम्भेण ? **नैवम्**, महतः कार्यद्रव्यस्य अल्पपरिमाणकार्यद्रव्यान्तरारभ्यत्वं दृष्टमिति तदनुसारेण त्र्यणुकस्य कार्यद्रव्यमेव कारणमनुमेयम्, विशेषव्याप्तेः परित्यागायोगात्, परमाणवश्च नित्या इति न तैस्त्र्यणुकारम्भः । **ननु** अनित्याः परमाणवः मूर्तत्वात्, घटादिवत्, तथा सावयवाः परमाणवः मूर्तत्वात् घटादिवत्, तथा अनित्याः सावयवाः परमाणवः सर्वदिक्संबन्धत्वात्, घटादिवत् इत्येभिर्निराकृताः परमाणवः कथं सिध्यन्ति ? **सिध्यन्त्येव** तैरेव हेतुभिः । एतेषां हेतूनां पक्षधर्मत्वं विना हि न हेतुत्वमिति एतेषां पक्षवृत्तिताऽऽदिसाधकप्रमाणैरेव परमाणवोऽपि सिद्धा भवन्ति, अन्यथैतेषां हेतुत्वमेव न स्यादिति भावः । तथाहि, तत्र पक्षीकृताः परमाणवः सिद्धा असिद्धा वा ? यदि सिद्धाः, तदा धर्मिग्राहकप्रमाणबाधात् बाधितविषया हेतवः । अथासिद्धाः तर्हि आश्रयासिद्धत्वादेव न साध्यसाधकाः । अथ प्रसङ्गापादनमुखेन हेतवः साध्यं साधयन्ति, तर्हि पक्षभूतपरमाण्वङ्गीकारेण चेत् प्रसङ्गः, तथापि धर्मिग्राहकबाध एव । अनङ्गीकारेणेति चेत् तदाऽपि पूर्वोक्ताश्रयासिद्धिस्तदवस्थैव । प्रसङ्गापादनमपि नानुमानविलक्षणं प्रमाणम्, किन्तु अनुमानस्यैव प्रयोगभेदमात्रम्, साधनदूषणलक्षणान्यपि तान्येवेति न विधाऽन्तरं प्रसङ्गापादनमिति सर्वमुपपन्नम् । अयं तु नित्यकारणवादः ब्रह्मकारणत्वपक्षे प्रकृतिकारणत्वपक्षे च तुल्यः । अतः परमाणुकारणवादे ये दोषास्ते सर्वेषामपि समाना इत्युपरम्यते । **प्रवि.** पृ. ४३–४६.

* **परमात्मा** 'तत्सवितुर्वरेण्यम्' इति सवित्रधिष्ठानतच्छन्दवाच्यब्रह्माख्यपरमात्माभिधायिन्या गायत्र्या उत्क्षिप्यमाणेन वारिणा इज्यते । **सु.** पृ. १०१०. * परमात्मा स्वेच्छया परमार्थत एव व्योमादि जनयति । 'इन्द्रो मायाभिः' इत्यादिश्रुतिस्तु प्रपञ्चस्य अनित्यत्वं बोधयति, न मिथ्यात्वादि इति केचित् । **मणि.** पृ. ५०. * 'तथा व्योमशरीरोऽपि **परमात्मा** श्रुतौ श्रुतः । इज्यते वारिणा नित्यं यः खं ब्रह्मेति चोदितः ॥' । **वा.** ३।१।७।१३ पृ. ७०२, * 'शब्दब्रह्मेति यच्चेदं शास्त्रं वेदाख्यमुच्यते । तदप्यधिष्ठितं सर्वमेकेन **परमात्मना** ॥' ३।१।७।१३ पृ. ७०३. * **परमात्मनः** एव वेदान् स्वार्थप्रतिपादने नियन्तुं वेदाख्यक्षेत्राधिष्ठातृत्वेन क्षेत्रज्ञव्यपदेश्यत्वात् नित्यज्ञानत्वोपपत्तिः । **सु.** पृ. १०११, * परमात्मनः कर्मजन्यफलोपभोगार्थं देहानधिष्ठानेऽपि कार्यकारणप्रतिनियमसिद्धयै सर्वस्य जगतः चेतनाधिष्ठानकरणात्, परमात्मनोऽपि 'क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ।' इति देहाख्यक्षेत्रे ज्ञातृत्वाख्यक्षेत्रज्ञत्वस्मृतेः वेदेषु अधिष्ठातृत्वोपपत्तिः । पृ. १००८, * परमात्मनः महाभूताधिष्ठितस्यैव ज्ञानेच्छादिमत्त्वम् 'पञ्चधातून् स्वयं षष्ठ आदत्ते युगपत् प्रभुः ।' इत्यादिस्मृत्यालोचनेन अवगम्यते । पृ. १००९.

* **परमात्मप्राप्त्यवस्था** । अपुनरावृत्त्यात्मकपरमात्मप्राप्त्यवस्थाफलवचनम् ‘ स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते न स पुनरावर्तते ’ इति, न तस्यार्थवादत्वम् । वा. १।३।८।२७ पृ. २८८ .

* **परमापूर्वं** अङ्गापूर्वं प्रधानापूर्वं समुदायापूर्वं इति अपूर्वावान्तरभेदाः । वि. २।१।२ , * परमापूर्वं साक्षात् स्वर्गादिफलजनकम् । इदमेव फलापूर्वमित्युच्यते । २।१।२.

* **परमापूर्वप्रयुक्तं** न भवति अग्नीषोमीयप्राग्भागवर्तिपदार्थधर्मस्य उपांशुत्वम् , किन्तु तत्तत्पदार्थजन्यावान्तरापूर्वप्रयुक्तम् । भा. ९।१।६।२०–२५.

* **परमेश्वरः** । अचिन्त्यशक्तिकपरमेश्वरतत्कर्तृकसृष्टिप्रलयादिकमप्यस्ति इति वार्तिककारैः वैदिकशिरोमणिभिः प्रपञ्चितम् । अनीश्वरवादिनस्तु प्राभाकरादयो वैदिकैरनादृत्याः । कु. १।२।१।१८.

* **परमेष्ठि साम अनृक्म्** । बाल. पृ. ७२.

* **परम्परातिदेशात्** लिङ्गातिदेशः प्रबलः । लिङ्गातिदेशादपि नामातिदेशः प्रबलः, शीघ्रबुद्धिहेतुत्वात् । तेन कौण्डपायिनामयनगताग्निहोत्रश्रपणं प्राजहिते एव न शालामुखीये । वि. १२।१।६.

* **परस्तादनुषङ्गेण** विधिर्यथा ‘ अथैष ज्योतिः ’ ‘ अथैष विश्वज्योतिः ’ ‘ अथैष सर्वज्योतिः ’ ‘ एतेन सहस्रदक्षिणेन यजेत ’ इति । अत्र ‘ एतेन ’ इत्यादि पूर्ववाक्ययोरपि अनुषज्यते । बाल. पृ. २८.

* **परस्तादनुषङ्गमन्त्रः** ‘ चित्पतिस्त्वा पुनातु वाक्पतिस्त्वा पुनातु देवस्त्वा सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः । ’ इति । बाल. पृ. ६०.

* **परस्परैकवाक्यतासामर्थ्यात्मकात्** लिङ्गात् अर्थाभिधानशक्तिरूपं लिङ्गं बलीयः लिङ्गयोर्विरोधे । ‘ स्योनं ते सदनं कृणोमि ’ इत्यत्र । वा. ३।३।७।१४ पृ. ८४०.

‘ परस्परविरोधे हि न प्रकारान्तरस्थितिः । नैकताऽपि विरुद्धानामुक्तिमात्रविरोधतः ॥ ’ इति न्यायः । न च क्रमाक्रमाभ्यामन्यः प्रकारः समस्ति, परस्परविरोधे हीति न्यायेन व्याघातस्योद्भटत्वादिति तत्रैव (सर्वदर्शनसंग्रहे) बौद्धे । **साहस्री**. ६९५.

* **परस्मैपदं** विनियोक्त्री श्रुतिर्यथा ‘ यदि कामयेत वर्षुकः पर्जन्यः स्यान्नीचैः सदो मिनुयात् ’ अत्र परस्मैपदश्रुत्या अध्वर्युव्यापारः परार्थः श्रूयते, तया श्रुत्या तत्सामानाधिकरण्यं कामयतेर्बाध्यते । बाल. पृ. ४१.

* **परस्वत्** । ‘ ईशानाय परस्वत आलभेत ’ इत्यत्र परस्वच्छब्देन आरण्याः पशुविशेषा उच्यन्ते । वि. ९।४।१३.

* **परस्वद्यागे** पर्यग्निकरणान्ताङ्गरीतिविधानेन तदुत्तराङ्गप्रतिषेधः (अश्वमेधे) । भा. ९।४।१३।५१–५५.

* ‘ **पराक्** बहिष्पवमानेन स्तुवन्ति ’ अत्र पराक्शब्देन पाठक्रमो बोध्यते, तेनाभ्यासप्रतिषेधः । वि. १०।५।७, * **पराचीभिः** अनुक्रमेणाम्नाताभिः ऋग्भिः । १।४।३.

* **पराक्शब्दः** अनभ्यासे ‘ पराचीः सामिधेनीरन्वाह ’ । अनभ्यस्ताः सामिधेनीरन्वाहेति । (पूर्वपक्षे इदमुक्तम्) । भा. १०।५।१०।४५। दिग्देशकालवचनो हि पराक्शब्दो भवति । यथा ‘ पराञ्चमग्न्याधेयात् पुनरादधाति ’ इति कालसंयोगे पञ्चमी, नापादाने । १०।५।१०।४७.

* **पराजयतेः** ग्लानिजनकक्रिया अर्थः । मणि. पृ.१४०.

* **परामर्शः** यदि पक्षविशेष्यकः तदा तद्विशेष्यिकैव अनुमितिः । हेतुविशेष्यके तु साध्यविशेष्यिका इति **मणिकृत्** (गङ्गेशः) । उभयविधेनापि पक्षविशेष्यिकैव इति **नव्याः** । अत्र धूमलिङ्गकपर्वतपक्षकवह्निविधेयकानुमितिं प्रति धूमपरामर्शस्य हेतुत्वम् । धूमलिङ्गकत्वं स्वाव्यवहितोत्तरत्वसंबन्धेन धूमज्ञानवत्त्वम् । अव्यवहितोत्तरत्वं च धूमज्ञानाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसानधिकरणत्वे सति स्वाधिकरणत्वरूपम् । तेन अपेक्षाबुद्ध्यात्मकपरामर्शसंग्रहः । एवं तत्तत्परामर्शानां कारणतेति । **ननु** सर्वेषु परामर्शेषु अनुमितिकारणताऽवच्छेदकतया परामर्शत्वं जातिः किमिति नाभ्युपेयते । चाक्षुषत्वादिना

संकर इति चेत् , तर्हि तस्यां जातौ मानसत्वव्याप्यता अङ्गीकार्या । चाक्षुषपरामर्शानन्तरं जायमानायामनुमितौ व्यभिचारवारणस्य मध्ये मानसपरामर्शकल्पनेन संभवात् । **न च** चाक्षुषसामग्र्याः मानसप्रतिबन्धकत्वेन तदानीं मानसोत्पादासंभव इति **वाच्यम्** । फलबलेन चक्षुर्योगाभावेन चाक्षुषसामग्र्यभावस्य सत्त्वात् ।

ननु परामर्शत्वं स्मृतित्वव्याप्यम् । चाक्षुषादिपरामर्शोत्तरोत्पद्यमानानुमितिस्थले भवतः इव स्मरणरूपपरामर्शकल्पनान्न क्षतिः । एवं च स्मरणस्य संशयात्मकत्वाभावेन संशयानन्तरं अनुमित्युत्पादनासंभवात् । विशेषतः परामर्शकारणतायां निश्चयत्वस्य अप्रवेशेन अतिलाघवं **इति चेत्** । चाक्षुषादिपरामर्शोत्तरं उत्पद्यमानानुमितिस्थले स्मरणात्मकपरामर्शकल्पने तज्जनकसंस्कारकल्पने च अतिगौरवापत्तेः । अनुमितिजनकताऽवच्छेदकजातेः संशयात्मकमानसव्यावृत्तत्वकल्पनेन संशयात्मकपरामर्शादनुमित्यापादनासंभवेन विशेषहेतुतायां निश्चयत्वाप्रवेशस्य तुल्यत्वात् । समूहालम्बनात्मकपरामर्शोत्तरं एकानुमितौ तद्व्याप्यवत्तापरामर्शान्तरकल्पनेन समूहालम्बनात्मकपरामर्शे अनुमितिजनकताऽवच्छेदकजातिर्न कल्प्यते । अतो न तत्र द्वितीयाऽनुमितिः । तस्मात् परामर्शत्वं जातिः **इति चेत्** ।

अत्र केचित् , उक्तनयेन इष्टहेतुताज्ञानादौ प्रवृत्तिजनकतावच्छेदकवैजात्यस्यापि मानसत्वव्याप्यत्वेन सिद्धया इष्टसाधनत्वादिपरामर्शविशेषे प्रवृत्तिजनकतावच्छेदकवैजात्येन संकरप्रसङ्गात् । **न च** प्रवृत्तिजनकताऽवच्छेदकवैजात्यं चाक्षुषत्वव्याप्यत्वं इति **वाच्यम्** । परामर्शत्वस्य चाक्षुषत्वादिव्याप्यत्वेन विनिगमनाविरहात् । अतो न परामर्शत्वं जातिरित्याहुः । अत्र **गौतमीयाः** , वह्न्याद्यनुमितौ वह्निव्याप्यालोकवान् पर्वतः इत्यादिविशिष्टपरामर्शस्यैव हेतुत्वम् , न तु आलोको वह्निव्याप्यः , आलोकवान् पर्वतः इति ज्ञानद्वयस्य गौरवात् । यत्र च ज्ञानद्वयादनुमितिः , तत्र विशिष्टज्ञानकल्पनात् न व्यभिचार इत्याहुः । **मीमांसकास्तु** , वह्निव्याप्यधूमवान् पर्वतः इति विशिष्टपरामर्शस्य हेतुत्ववादिनये व्याप्त्यंशे निश्चयत्वं निवेश्य धूमांशेऽपि निश्चयत्वं निवेशनीयम् , तथा च निश्चयत्वस्य तदभावाप्रकारकत्वरूपबहुतरपदार्थघटितत्वेन तेषां परस्परविशेषणविशेष्यभावे विनिगमनाविरहेण कार्यकारणभावबाहुल्यम् । **ज्ञानद्वयवादिनये तु** ज्ञानस्य भिन्नतया निश्चयत्वप्रवेशेऽपि न मिथो विनिगमनाविरहः । तत्र लाघवं इत्याहुः । **न च परामर्शवादिनये** व्याप्त्यवच्छिन्ना या हेतुनिष्ठप्रकारता तन्निरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिनिश्चयत्वेन हेतुत्वकल्पनेन व्याप्त्यंशे निश्चयत्वानिवेशेन नोपदर्शितं गौरवं इति **वाच्यम्** । वह्निव्याप्त्यंशे निश्चयत्वानिवेशे वह्निव्याप्यो धूम इति विशेषणताऽवच्छेदकप्रकारकनिर्णयकाले ‘ व्याप्त्यभावप्रकारकं ज्ञानं जायताम् ’ इतीच्छासत्त्वे व्याप्त्यंशे संशयात्मकतथाविधविशिष्टवैशिष्ट्यबोधोत्पत्तौ बाधकाभावः । तथा च तादृशज्ञाने व्याप्त्यंशे निश्चयत्वनिवेशेन गौरवतादवस्थ्यात् । **न च** तादृशज्ञानस्य आहार्यत्वेन न तस्मादनुमित्यापत्तिः । आहार्यपरामर्शात् अनुमित्यापत्तिवारणार्थं अनाहार्यत्वनिवेशस्य आवश्यकत्वात् इति **वाच्यम्** । अनुमितिजनकताऽवच्छेदककोटौ अनाहार्यत्वस्य अनुगतस्य अशक्यनिर्वचनत्वेन तद्व्यक्तिविश्रान्ततया तथाविधतद्व्यक्तित्वावच्छिन्नभेदकूटस्य अनुमितिजनकताऽवच्छेदककोटौ निवेशमपेक्ष्य व्याप्त्यंशे निश्चयत्वस्यैव तर्कसहत्वात् । तथा च गौरवं तदवस्थं इति दिक् । **मणि**. पृ. ३७–३९.

* **परार्थमनुमानं** प्रतिज्ञाद्यवयवप्रयोगेण परस्य साध्यज्ञानजनकम् । **मणि**. पृ. ३९. * परार्थमनुमानं सामान्यतोदृष्टं विशेषतोदृष्टं चेति द्विविधम् । **बाल**. पृ. ८.

परार्थान्येको यजमानगणे । (१२।४।११।३२) इति **न्यायेन** औदुम्बरीसंमाननवत् यस्यकस्य चित् अग्निषु कृतमपि कर्म सर्वेषां फलिष्यति । पूर्वपक्षः । (परार्थेष्वेको इति क्वचित् पाठः ।) । **सोम**. ६।६।२.

परार्थान्येको यजमानगणे । १२।४।११।३२॥

सत्रे अहीने वा यजमानानां गणे सति यानि परार्थानि कर्माणि क्रत्वर्थानि शुक्रान्वारम्भणं औदुम्बरीसंमाननं

इत्यादीनि, तानि एक एव यजमानः कुर्यात्, न सर्वे कुर्युः। इति सिद्धान्तः। **के.**

' परार्थान्येकेन क्रियेरन्।' (सत्या. श्रौ. १।१।४२)। गार्हपत्योपस्थानं आराादुपकारकं कर्मापि प्रतिपत्ति आवर्तते। 'परार्थान्येकेन क्रियेरन्' इति न प्रवर्तते। तस्य न्यायस्य परार्थकर्मविषयत्वात्। **वैजयन्ती. १।७।१८.** * **' परार्थान्येकेन क्रियेरन्।'** ' पत्नी यदि नान्वास्ते सर्वे पृथिव्याम् '। (सत्या. श्रौ. ३।७।१०२)। सर्वग्रहणं प्रतिपत्ति आवृत्ति-निरासार्थम्। 'परार्थान्येकेन क्रियेरन्' इति न्यायस्य परार्थे एकसंस्कारे प्रवृत्तिः इति मा भूत्। अपि तर्हि (किन्तु) स्वार्थे यत्र भवति एवंरूपे चादृष्टार्थेऽपि कर्मणि। तथा च एकयैव पत्न्या सिध्यति निनयनम्। **वैजयन्ती.**

* **' परार्थे त्वर्थ(र्था)सामान्यम् '** (९।२।१४।४३) इति (उपक्रम्य ' क्रियेरन् वा ' इति) वक्ष्यति, विनाऽपि तादर्थ्येन अभ्युदितेष्टयां दधिपयसोः तदुपकारमात्र-दर्शनात् प्रणीताधर्मप्राप्तिर्भवतीति। **वा. ३।७।१।४.**

परार्थे त्वर्थासामान्यं संस्कारस्य तदर्थत्वात्। ९।२।१४।४३॥

' वि वा एनं प्रजया पशुभिरर्धयति वर्धयत्यस्य भ्रातृव्यं यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति। स त्रेधा तण्डुलान् विभजेत्, ये मध्यमास्तानग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेत्, ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुम्, ये क्षोदिष्ठास्तान् विष्णवे शिपि-विष्टाय शृते चरुम् ' इति प्रजापशुफला अभ्युदयेष्टिरा-म्नाता। तत्र शृते दधनि च प्रणीताधर्माः कर्तव्या न वेति विचारे पूर्वपक्षमाह। तुशब्दः कर्तव्यत्वाभावसूचकः। परार्थे चरुणा सह प्रदानार्थे, शृते दधनि च प्रणीताधर्मा न कर्तव्याः। दधिशृतयोः प्रणीताभिः सह अर्थासामान्यं अर्थसामान्याभावो यतः। संस्कारस्य उत्पवनादेः तदर्थ-त्वात् श्रपणार्थत्वात्। प्रणीताधर्माः श्रपणार्थाः। दधिशृते तु न श्रपणार्थे किन्तु प्रदानार्थे, तस्मात् तयोः प्रणीता-धर्मा उत्पवनादयो न कर्तव्या इति पूर्वः पक्षः। अत्र क्वचित् ' परार्थेन त्वर्थे ' इति तृतीयान्तः पाठः। क्वचित् ' परार्थे न त्वर्थे ' इति सप्तम्यन्तः, यथा आनन्दाश्रमीये सूत्रपाठे। आनन्दाश्रमीये एव तु ३।७।१।४ सूत्रीये वार्तिके " परार्थे त्वर्थसामान्यम् ' इति वक्ष्यति " इति मुद्रितम्। तत्र नञ् नास्ति। चौखम्बान्यायसुधायामेतदेव वार्तिकम् " परार्थे त्वर्थासामान्यम् ' इति पूर्वपक्षमुपक्रम्य वक्ष्यति इति उपक्रमार्थेतिकरणाभ्युपगमेन व्याख्येयम् " इति ग्रन्थेन विवृतम्। सूत्रे तुशब्दस्य विद्यमानत्वात् न-शब्दस्य पृथगपेक्षा नास्त्येव। अथ 'अर्थासामान्यम्' इति सुधास्थः पाठ एव स्वीकार्यः तथा च तत् पदं भाष्ये ' नहि प्रणीतानां दध्नश्च अर्थसामान्यं किञ्चिदस्ति ' इति विवृतम्। सोऽयं भाष्यानुसारी सुधास्थः पाठः स्वीकृतो-ऽस्माभिरत्र। अस्मदीयमीमांसादर्शने स्वीकृतः पाठस्तु परिवर्तनीयः।

क्रियेरन् वाऽर्थनिर्वृत्तेः। ४४॥

पूर्वपक्षं वाशब्दो व्यावर्तयति। दधिशृतयोः प्रणीता-धर्मा उत्पवनादयः क्रियेरन् कर्तव्याः। अर्थनिर्वृत्तेः अर्थस्य चरुश्रपणस्य निर्वृत्तेः निष्पन्नत्वात् श्रपणनिष्पत्त्य-वगमात्। 'शृते चरुं दधन् चरुम्' इत्युक्त्या ज्ञायते एतत् शृते दधनि च चरोः श्रपणमिति। चरौ समवेतत्वात्तु तयोः प्रदानं स्यान्नाम। न तु तयोर्विधानं प्रदानार्थं किन्तु श्रपणार्थमेव। तस्मात् श्रपणार्थासु प्रणीतासु ये धर्मा उत्पवनादयस्ते दधिशृतयोः कर्तव्याः एवेति सिद्धान्तः। **के.**

* **परार्थानुमाने** न पञ्चावयवाः किन्तु त्रय एव। ' उदाहरणपर्यन्तं यद्वोदाहरणादिकम् '। **बाल.** पृ. ८.

* **परार्थत्वं** शेषलक्षणम्। ' यस्तु अत्यन्तं परार्थः, तं वयं शेष इति ब्रूमः '। **भा.** ३।१।२।२ पृ. ६५९. * **परार्थत्वाद्गुणानाम्।** (१।४।१०। १६) पूर्वेण एकसूत्रत्वमपि संभवति (तथा च ' मिथश्चानर्थसंबन्धः परार्थत्वाद्गुणानाम् ' इत्येकसूत्रत्वेन व्याख्येयम्)। **वा.** १।४।११।१६.

* **परावपनं** उलूखलात् शूर्पे अवहतस्य हविषः प्रक्षेपः। **सोम.** ११।३।७.

* **परिः** समन्तार्थः। ' औदुम्बरी परिवेष्टयितव्या ' इत्यत्र परिः समन्तार्थः सर्वतो देशवेष्टनं ब्रूते। **सु.** पृ. १६०.

' परिकल्पितोऽपि मरणाय भवेदुरगो यथा न तु नभो मलिनम् '। जीवकल्पितत्वपक्षेऽपि तादृक्(जीवप्रेरकत्वादि)धर्मविशिष्टतयैव कल्पनेन तस्य (ईश्वरस्य) भ्रमयितृत्वाद्युपपत्तिः, 'परिकल्पितोऽपि०' इति न्यायात्। **अद्वैत.** प्रतिकूलतर्कनिराकरणे पृ. ५०४.

* **परिक्रयः** अन्यकृते कर्मणि स्वयंकर्तृत्वापादन-सामर्थ्यात्मकः। **सु.** ३।८।१ पृ. ५३. * परिक्रयः अन्वाहार्यः इह (सोमे) चोदकेन प्राप्तः सन् न कर्तव्यः। भृतास्ते ऋत्विजः सोमार्थेन परिक्रयेण। तस्मात् (सोमाङ्गदीक्षणीयाऽऽदिषु) अन्वाहार्यो निवर्तते। **भा.** १२।१।१६।३३. * परिक्रयः ऋत्विजां याज-मानं कर्म। **वि.** ३।८।१. * परिक्रयः ऋत्विजां सत्रेषु नास्ति। **भा.** १०।२।११।३६–३९. * परिक्रयः ऋत्विजां स्वामिकर्म। ३।८।१. **मीको.** पृ. १२५२ ' ऋत्विजां परिक्रयः० ' इत्यत्र द्रष्टव्यम्। * परिक्रयः ऋत्विक्कर्मापि, यत्र वचनं तत्र, यथा ' य एतामिष्टकां उपदध्यात् स त्रीन् वरान् दद्यात् ' इति (स्वयमातृण्णा-विषयकमिदम्)। **भा.** ३।८।१।२.

परिक्रयश्च तादर्थ्यात्। १०।२।११।३६॥

चशब्दो वरणदृष्टान्तार्थः। सत्रे वरणवत् परिक्रयोऽपि न कर्तव्यः, दक्षिणा न देया। तादर्थ्यात् सर्वेषामेव स्वार्थत्वात्। सत्रे हि सर्वे यजमानाः, तत्र कः कस्मै किमर्थं दक्षिणां दास्यति। तस्मात् सत्रे न परिक्रय इति सिद्धान्तः।

प्रतिषेधश्च कर्मवत्। ३७॥

सत्रे गवादयः प्रतिषिध्यन्ते ' नह्यत्र गौर्दीयते, न वासो न हिरण्यम् ' इति। प्रतिषेधश्च प्राप्तौ सत्यामुप-पद्यते। कर्मवत् इति मतुब्अयं न वतिः। तथा च सत्रे यस्मात् केषां चित् दक्षिणात्वेन प्रतिषेधः, तस्मात् कर्मवत् प्रतिषिद्धेतरदक्षिणादानरूपकर्मविशिष्टं सत्रं भवति इति प्रतीमः। अतश्च सत्रे परिक्रयः कर्तव्य इति पूर्वः पक्षः।

स्याद्वा प्रासर्पिकस्य धर्ममात्रत्वात्। ३८॥

वाशब्दः पूर्वपक्षनिरासार्थः। सत्रप्रकरणे योऽयं गवादिदानस्य प्रतिषेधः, स प्रासर्पिकस्य स्यात्। प्रासर्पिकेभ्योऽपि शास्त्रीयदानस्य प्रतिषेधोऽयम्। प्रास-र्पिकदानस्य तु धर्ममात्रत्वात्। धर्मार्थं तत्। तस्मात् तत्प्रतिषेधबलेन सत्रे परिक्रयसिद्धिर्न भवितुमर्हति। प्रसर्पकाः नाम प्रसर्पन्ति यज्ञमण्डपेषु तत्रतत्र। यज्ञे अर्थसंशये निर्णायकाः। यज्ञार्थशालोपविष्टाः विद्वांसः शिष्टा ब्राह्मणाः त्रिप्रभृतयः। प्रसर्पकेभ्यो दीयते इति प्रासर्पिकम्। (ज्योत्स्ना १०।१।१०)। सिद्धान्त्येक-देशिना इदमुक्तम्। मुख्यसिद्धान्ती तु उत्तरसूत्रे वक्ष्यति।

न दक्षिणाशब्दात् तस्मान्नित्यानुवादः स्यात्। ३९॥

' नह्यत्र गौर्दीयते, न वासः, न हिरण्यम् ' इति प्रतिषेधः न प्रासर्पिकस्य दानस्य। दक्षिणाशब्दात्। ' अदक्षिणानि सत्राणीत्याहुः, न ह्यत्र गौर्दीयते, न वासो न हिरण्यम् ' इति। दक्षिणाशब्दश्च परिक्रयार्थो भवति। प्रसर्पकेभ्यो दानं तु न दक्षिणा नाम। तस्मात् परिक्रया-र्थस्यैव दानस्य प्रतिषेधोऽयं न प्रासर्पिकस्य। तस्मात् नित्यप्राप्तस्यैव अनुवादोऽसौ ' न सत्रेषु दक्षिणा ' इति। तस्मात् सत्रे नास्ति परिक्रयः इति सिद्धान्तः। **के.**

* **परिक्रयश्च तादर्थ्यात्।** यदि च अदृष्टमृत्विक्त्वं वरणभरणाभ्यां जन्येत, ततः सत्रेऽपि यजमानेषु तत् आधातव्यं तद्विशेषाश्च अध्वर्य्वादयो दीक्षावाक्येऽनूद्यन्ते इति वरणभरणे कर्तव्ये स्याताम्, तत्र ' वरणमृत्विजां० ' ' परिक्रयश्च० ' इति च विरुध्यते। **वा.** ३।७।१६।३३ पृ. १०९८. * परिक्रयो ज्योतिष्टोमे द्वादशशतम् (११२), दर्शपूर्णमासयोः अन्वाहार्यः। स च परिक्रयः स्वामिकर्म। वचनात्तु ऋत्विक्कर्मापि यथा ' य एतामिष्टकामुपदध्यात्, स त्रीन् वरान् (चतु-र्वर्षाः गाः) दद्यात् ' इति। **भा.** ३।८।१।१–२. * परिक्रयः नियते काले भृतिदानेन भृतकदानेन वा मनुष्यस्य शकटादेर्वा पदार्थस्य स्वीकारः। **के.** * चिकीर्षितं कुर्वाणस्य सहायान् उपाददानस्य अयं

विशेष उच्यते **परिक्रयः** । भा. १०।६।१७।६७, * नहि असति दाने परिक्रयः । १०।२।१७।४८, * पुरुषानतिप्रकारेषु बहुषु प्राप्तेषु परिक्रयो नियतः । तस्मात् परिक्रयेण आनतैः सर्वे पदार्थाः कर्तव्याः । ३।७।८।२०. * **परिक्रयेण** वरदानस्य ऋत्विक्कर्मत्वं यदि तावत् शास्त्रीयेण लभ्यते, ततोऽस्त्येव यजमानस्य कर्तृत्वम् । अथ न लभ्यते, ततो लौकिक उपाय इति । **वा.** ३।८।१।२, * **परिक्रयस्य** एतद्रूपं (यत्) ऋत्विजामुत्साहकारित्वम् । ३।४।१७।४९.

* **परिक्रयार्थं** ऋत्विजामुदवसानीये दक्षिणादानम्, तस्य सत्रानङ्गत्वात् । **भा.** १०।२।१२।४०–४१, * परिक्रयार्थे च भर्त्रा भृत्येन सह पणितव्यम् । यथा लोके काष्ठवाहप्रभृतिभ्यो यद्दीयते, तत्र काष्ठवाहाः स्वामिना सह पणन्ते । तेभ्यः स्वामी विभज्य निर्दिशति इदं तुभ्यमिदं तुभ्यमिति । १०।३।१२।५१, * परिक्रयार्थं दानं (यज्ञे), न धर्ममात्रम् । १०।३।१२।५१. * परिक्रयार्थं वा कर्मसंयोगात् । (१०।२।८।२३) इति दशमे अन्वाहार्यद्वादशशतादिदानं कर्मसंयुक्तेभ्योऽभिधानात् इति वक्ष्यति । **वा.** ३।७।८।२०, * **परिक्रयार्था** दक्षिणा अध्वर्य्वादीनां कर्मसंयोगात् । ३।१।६।१२ पृ. ६९७.

* **परिक्रयात्मकस्य** वरदानस्य स्वयमातृण्णोपधाने आर्त्विजत्वं दृष्टम् । **सु.** ३।८।१ पृ. ५४.

* **परिक्रयादिना** कारयन् न कर्तृत्वात् प्रच्यवते । **वा.** ३।७।८।१९.

* **परिक्रयणं** नियतकालं भृत्या स्वीकरणम् । **रहस्य.** पृ. १०९.

* दीक्षितमदीक्षिता दक्षिणा**परिक्रीता** ऋत्विजो याजयन्ति । **भा.** १०।२।८।२७, * **परिक्रीतानां** ऋत्विजां संख्याविशेषनियमः कर्तव्यकर्मानुसारेण । ३।७।९।२१–२४.

* **परिगृहीतद्रव्यापचारे** प्रतिनिधित्वेन तत्सदृशस्यैवोपादानम्, न तु वैकल्पिकद्रव्यान्तरस्य । **वृ.** ६।३।१२।२८–३०. * परिगृहीतद्रव्यापचारे वैकल्पिकद्रव्यान्तरस्य न प्रतिनिधित्वं यथा व्रीह्यपचारे यवानाम् । ६।३।१२. ' वैकल्पिकन्यायः ' इत्यत्र द्रष्टव्यम् ।

* **परिधत्ते** । ननु कौपीनप्रच्छादने परिधत्ते इति भवति । नैतदेवम् । उपरि वाससोऽपि कार्ये परिधत्ते इति भवति । तद्यथा कम्बलं परिधत्ते, रौरवं परिधत्ते इति । **भा.** १०।४।७।१४.

परिपूर्णं पदं पदान्तरेणान्वेति इति न्यायेन प्रथमावगतयागादिव्युत्पत्तिवेलायां भावनाविशेष्यत्वस्योपस्थितत्वात् तत्रैव विशेषणज्ञानरूपसामग्रीसत्त्वेन स्वर्गादिपदार्थान्तराणामपि प्रकारतया अन्वयव्युत्पत्तिकल्पना, न तु अन्यत्र, अन्यगतमुख्यविशेष्यत्वस्य अनुपस्थितत्वेन विशेषणज्ञानाभावात् । **कौ.** २।१।२।५ पृ. ३९, * परिपूर्णं पदं॰ इति न्यायेन प्राजापत्यं इत्येकवचनान्तर्गतस्य सर्वनाम्नः दध्यादिपदान्वयव्यतिरेकेण एकदेशत्वाप्रतीतेः, तदन्वयस्य च ' परिपूर्णं॰ ' इति न्यायेन तद्धितस्यैव पश्चादेकशेषकरणात् यागभेदोपपत्तिः । १।४।३।३ पृ. १७८, * परिपूर्णं॰ इति न्यायेन सोमादिपदानां भावनापदान्वये तस्य परिपूर्णत्वापेक्षणात् । ततः पूर्वमेव यागादेः अङ्गत्वावगतेः तदुत्तरभाविनः सोमाद्यङ्गत्वस्य दौर्बल्यम् । २।१।२।५ पृ. १०. * प्राथमिकभावनाऽन्वये विद्यमाना पदश्रुतिः फलान्वये निर्णायिका लाक्षणिकत्वेऽपि, यागकरणत्वस्य सोमकरणत्वान्वयात् प्राक् भावनायामन्वितत्वेन तदन्वयस्य प्राथम्यात् । अन्यथा तिङन्तपदस्य परिपूर्णत्वाभावेन तदुपस्थापितभावनायां सोमस्यापि अन्वयानुपपत्तेः **परिपूर्णं॰ इति न्यायात् । भाट्ट.** २।१।२ पृ. ८५. * **न च** एवं भावनायां साध्यसाधनेतिकर्तव्यतान्वयेऽपि समानप्रत्ययोपादानश्रुत्या शुद्धायामेव तस्यां विध्यन्वयात् उत्तरकालीनस्य तदंशत्रयस्य विधिसंस्पर्शाभावेन ग्रहैकत्ववत् अविवक्षाऽऽपत्तिः । अंशत्रयान्वयोत्तरं तद्विशिष्टायां भावनायां विध्यन्वयाभ्युपगमे तु **परिपूर्णं पदं॰ इति न्यायभङ्गापत्तिः** इति **वाच्यम्** । शुद्धस्य यत्नस्य विधिविषयत्वानुपपत्तेः । **कौ.** २।१।२।५ पृ. ४४.

* **परिसमाप्तिः** प्रत्यृचं तृचे गेयस्य साम्नः । **भा.** ९।२।३।१४–२०.

परिहृत्यापवादविषयं तत उत्सर्गोऽभिनिविशते इति न्यायः । प्रतिलक्ष्यं भिन्नानां सर्वेषां लक्षणानां तन्त्रेणोच्चारणम् ' इको यणचि ' इति, ततश्च इकामपि तात्पर्यतो निमित्तत्वप्रतिपादनम् । न चैवं श्रीशः इत्यादौ यण्प्रसङ्गः, व्यक्तिपक्षे ' विप्रतिषेधे परमेव ' इति नियमबलेन तद्व्यक्तिविषयकशास्त्रस्यैव विरहकल्पनात् । एवमपवादविषयेऽपि सुश्रियौ इत्यादौ बोध्यम् । परिहृत्यापवादविषयं॰ इति न्यायात् । **शब्दकौस्तुभः** हयवरट्.

* **परिकरबन्धः** । निवीतं के चित् परिकरबन्धं स्मरन्ति । स च सर्वकर्मसु अव्यग्रताकरत्वात् प्राप्तः । इति पूर्वपक्षे । **वा.** ३।४।१।२.

* ' **परिग्रहपरित्यागाविच्छानिच्छाफले** स्थिते । ' पौरुषेयेषु वाक्येषु परिग्रहापरिग्रहौ फलत्वेन प्रज्ञातौ । **वा.** ३।१।७।१३ पृ. ७००.

* **परिग्राहः** वेदेः दर्शादौ ' स्फ्येन वेदिं परिलिखन् परिगृह्णाति ' इति विहितः । **वि.** १०।१।१.

* **परिचक्षा** निन्दा । **सोम.** ७।३।१०.

* **परिचराः** नाम ग्रन्थविशेषाः । ' अरुणपराशरा नाम शाखिनः, तेषां परिचरेषु स्मृतिरूपं ब्राह्मणं भवति । ' । **भा.** ७।१।१।८.

* **परिचोदना** शङ्का । सा च परिचोदना या स्वपक्षं वा स्थापयति परपक्षं वा दूषयति । **टुप्.** ११।१।२।६. * **परिचोदनानां** बह्वीनां मध्ये परिचोदनापरिहारकालेऽपि पूर्वपरिचोदनापरिहारः भवत्येव । **वा.** ३।३।७।१४ पृ. ८२७.

* **परिणयः** । केषु चित् दक्षिणदेशेषु मातुलस्य दुहितरं शिष्टाः परिणयन्ति । सोऽयमाचारः प्रमाणम्, शिष्टाचारत्वात् होलाकाद्याचारवत् इति चेन्न, स्मृतिविरुद्धत्वेन कालात्ययापदिष्टत्वात् । तस्मात् ईदृशस्य आचारस्य अप्रामाण्यम् । **वि.** १।३।५ वर्णकं ३.

* **परिदानाधिकरणम्** । **भा.** ३।४।६।१७. **मीको.** पृ. ६७७ ' अवगोरणन्यायः ' इत्यत्र द्रष्टव्यम् ।

* **परिदृंहणं** यूपधर्मः, 'ब्रह्म दृंह क्षत्रं दृंहेति मैत्रावरुणदण्डेन समभूमि परिदृंहणम् (दृढीकरणम्) कृत्वा ' इत्युक्तत्वात् । **वि.** १०।२।३३.

* **परिदेवनमन्त्रः** ' अम्बे अम्बिकेऽम्बालिके न मा नयति कश्चन । ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् ॥ ' इति । **बाल.** पृ. ५९.

* **परिदेवनरूपः** अर्थवादः ' ये मामधुक्षन्त, ते मां प्रत्यमुञ्चन्त ' इति । **बाल.** पृ. ५०.

* **परिदेवनसरूपः** अर्थवादः ' आहिताग्निर्वा एष सन् नाग्निहोत्रं जुहोति, न दर्शपूर्णमासौ यजते, या आहुतिभाजो देवतास्ता अनुध्यायिनीः करोति ' । इदं यावज्जीवाधिकरणे वार्तिके । **बाल.** पृ. ५०.

* **परिधानीयं** कर्म अन्तिमं अन्त्येष्टिरूपं कर्म । **सोम.** ११।३।१३.

* **परिधिः** अग्निना संबध्यते, अग्निर्हविषा । **भा.** १२।२।११।२७. * परिधिः अङ्गुलीवत् अणीयान् भवति । उत्तरवेद्यां तु स्थविष्ठो भवति पाशुकेषु चातुर्मास्येषु । **वि.** १०।३।३. * परिधिः इति अग्निपरिधानार्थं द्रव्यमुच्यते । **वा.** २।१।४।१२ पृ. ४१४. * परिधिः त्रित्वसंख्याप्रयुक्तो न भवति (' त्रीन् परिधीन्॰ ' इति मन्त्रे) दर्शपूर्णमासयोः, किन्तु अपूर्वप्रयुक्तः । **भा.** ९।१।५।११–१९.

परिधिर्द्व्यर्थत्वादुभयधर्मा स्यात् । १२।२।१०।२६ ॥

पशुमत्सु चातुर्मास्येषु ' परिधौ पशुं नियुञ्जीत ' इति श्रुतम् । स परिधिः उभयधर्मा परिधेः धर्मैः यूपस्य धर्मैश्च विशिष्टः स्यात् । स हि द्व्यर्थः द्वयोरर्थं करोति अग्नेः परिधानम्, पशोश्च प्रतिबन्धम् । तस्मात् अविरुद्धा उभये धर्माः कर्तव्याः । इध्मसंनहनं संमार्जनं जुह्वा अञ्जनं अभ्याश्रावणं इति परिधिधर्माः, यवमतीभिरद्भिः प्रोक्षणं अञ्जनं परिव्याणं इति यूपधर्माः । इति सिद्धान्तः । **के.**

* **परिधिः** । परिधीयते अग्निः तदायतनं वा यैः इति, परिधीयन्ते इति वा, परिधिशब्दो यौगिकः । दर्शादौ अश्वत्थस्य सार्धारत्निपरिमिताः दीर्घाः अङ्गुष्ठमात्रस्थूलाः

समिधयः परिधयः । के. * परिधिः, पशुन्यायेन विवक्षितैकसंख्यत्वात् एक एव संमार्ष्टव्यः पूर्वपक्षे, सिद्धान्ते तु सर्वे । यत्र च परिधिविवृद्धिः (वरुणप्रघासेषु विहारद्वये) तत्र विशेषः । वा. २।१।२।१२ पृ. ४१५. * परिधिर्यूपकार्ये सौमिकेषु चातुर्मास्येषु 'परिधौ पशुं नियुञ्जीत' इति वचनात् । तत्र मध्यमपरिधिरेव यूपकार्यकारी । स च उत्तरवेद्यां स्थविष्ठः । के.१०।३।३. * परिधिः सत्वक्कः उपशयश्च । भा. १२।२।११।२८. * परिधिः 'स्थविष्ठो मध्यमः, अणीयान् द्राघीयान् दक्षिणार्ध्यः, अणिष्ठो ह्रसिष्ठ उत्तरार्ध्यः' इति सत्या. श्रौ. २८।४।६२ । विस्तरे तु 'मध्यमः स्थविष्ठः, दक्षिणतः अणीयान् द्राघीयान्, उत्तरतः अणिष्ठो ह्रसिष्ठः, मध्यतः' वि. १०।५।२६ इत्युक्तम् । अत्र अन्ते मध्यतः शब्दः अयुक्तो भाति । के. * परिधयः । 'गायत्रो मध्यमः परिधिः, त्रैष्टुभो दक्षिणः, जागत उत्तरः' इति । भा. १०।५।२६।८८, * परिधयः पश्वङ्गम्, हारियोजनं अन्यदेव प्रधानम्, न तयोः परस्परेण संबन्धः । तस्मात् 'प्रहृत्य परिधीन् जुहोति हारियोजनम्' इति कालार्थः संयोगः । ४।३।१४।३६. * परिधयः बाणवन्तः यत्र, तत्र बाणवन्त एव संमार्ष्टव्याः सिद्धान्ते, पालाशा उत्पादयितव्याः पूर्वपक्षे । के. * परिधयो यत्र बाणवन्तः, तत्र बाणवन्त एव संमार्ष्टव्याः । २।१।४. 'संमार्गाधिकरणम्' इत्यत्र द्रष्टव्यम् । * 'परिधीन् संमार्ष्टि' इति संमार्जनं गुणकर्म, न प्रधानकर्म । भा. २।१।४।९-१२, * परिधिना प्राकृतपशुनियोजनानुवादेन विहितेन प्राकृतयूपस्य बाधः सौमिकचातुर्मास्येषु । १०।३।३।१८-२२. मीको. पृ. १६९४ 'चातुर्मास्येषु सौमिकेषु०' इत्यत्र द्रष्टव्यम् । * परिधेः यूपकार्ये नियोजने वचनेन विनियोगात् यूपधर्मकरणम् । सोम. ९।२।१४. * परिधेर्यूपत्वे अविरोधिनो यूपधर्मा एव कर्तव्याः यवमतीभिरद्भिः प्रोक्षणं अञ्जनं परिव्याणमिति । विरोधिनश्च तक्षणं उच्छ्रयणं निखननमिति न कर्तव्याः । पशुमत्सु चातुर्मास्येषु । भा. १२।२।१०-११।२६-२९, * परिधौ पशुं नियुञ्जन्ति पशुमत्सु चातुर्मास्येषु । तत्र अवस्थाप्य परिधित्वं नियोजनमुच्यते । तत् परिधित्वानुपमर्देन विज्ञायते । यथा 'खलेवाली यूपो भवति' इति । १२।२।११।२८. * परिधौ पशुनियोजनं गुणविधिः सौमिकेषु चातुर्मास्येषु । पश्वनपगमः दृष्टं प्रयोजनम् । अतः महान् परिधिः कर्तव्यः । (भा. १०।३।३।१८-२२) । के. * परिधौ यूपधर्मानुष्ठानम् । वि. ९।२।१३.

⌛ परिधौ यूपधर्मानुष्ठानाक्षेपस्य समाधानम् ।

पाशुकेषु चातुर्मास्येषु स्थविष्ठे मध्यमे परिधौ अविरुद्धा यूपधर्माः कर्तव्याः, यूपाञ्जनप्रैषे च ऊहो न कर्तव्यः ॥

तदुत्पत्तेस्तु निवृत्तिस्तत्कृतत्वात् स्यात् । ९।२।१३।४१ ॥

भाष्यम्— चातुर्मास्येष्वाम्नायते मध्यमे पर्वणि 'परिधौ पशुं नियुञ्जीत' इति । तत्रोक्तम्, यूपधर्माः परिधौ कर्तव्याः इति, तत् विपरिवर्तते (वर्त्यते) । ते न कर्तव्याः । तदुत्पत्तेः परिधेः आहवनीयपरिधानार्थोत्पत्तेः यूपधर्मा निवर्तेरन् । तत्कृता हि ते अपूर्वप्रयुक्तपशुबन्धनद्वारेण अपूर्वं गच्छन्ति । तत्र यत् बन्धनस्याङ्गभूतमिति श्रुतम्, तत् बन्धनार्थमेव द्रव्यमुत्पन्नम् । यच्च आहवनीयपरिधानार्थमुत्पन्नम्, तस्मिन् पराङ्गभूते बन्धनं कृतं भवति । न तद्धर्माणां द्वारं भवितुमर्हति । नहि तत्र क्रियमाणाः पशोः कृता भवन्ति, न पाशुकस्य । अपिच सत्वक्कः परिधिः अनुच्छ्रयश्च, यूपधर्मैः परिधित्वात् हीयेत । 'यूपायाज्यमानाय' इति च शब्दः ऊह्येत, तत्रायं बाधितः स्यात् । तस्मात् परिधौ यूपधर्मा न स्युरिति ।

आवेश्येरन् वाऽर्थवत्त्वात् संस्कारस्य तदर्थत्वात् । ४२ ॥

भाष्यम्— आवेश्येरन् वा यूपधर्माः परिधौ । बन्धनोपकारसाधने हि विधीयन्ते । यश्च परार्थो बन्धनं नयति निष्पादयति, करोत्यसौ बन्धनोपकारम् । अयं च संस्कारो बन्धनं निष्पादयति, तदर्थोत्पत्तिं अतदर्थोत्पत्तिं वा नापेक्षते । तस्मात् परिधौ यूपधर्माः कर्तव्या इति । यदुक्तं अनुच्छ्रयश्च सत्वक्कश्च परिधिरिति, अत्रोच्यते । ये परिधित्वाविरोधिनो यूपधर्माः, ते करिष्यन्ते, न विरुद्धा इति ।

आख्या चैवं तदावेशाद्विकृतौ स्यादपूर्वत्वात् । ४३ ॥

भाष्यम्— अथ यदुक्तम् 'यूपायाज्यमानाय' इति शब्द ऊहितव्यः स्यादिति, अत्रोच्यते । नोहितव्यो भविष्यति । धर्मावेशात् आख्याऽपि 'यूपः' इति भविष्यति । धर्मनिबद्धा हि सा यथैव यूपे, तथा परिधावपि भवितुमर्हति । तस्मात् नोहिष्यते यूपशब्द इति ।

सोम — आक्षेपिकी **संगतिः** । **सूत्रार्थस्तु**— तदुत्पत्तेः परिधेः आहवनीयपरिधानार्थतया उत्पत्तेः यूपधर्मनिवृत्तिः स्यात्, यूपधर्माणां नियोजनाङ्गत्वकृतत्वात् ।

वि— 'न यूपधर्माः परिधौ सन्ति वा, ऽन्यार्थजत्वतः । ना,विरोधादञ्जनाद्याः स्युर्नियोजनसाधने ॥ '

भाट्ट— परिधौ पुनराक्षिप्य समाधीयते । न परिधेर्यूपस्थानापन्नत्वम् 'परिधौ पशुं नियुञ्जीत' इत्यत्र परिधेर्नियोजनानुवादेन विधौ अतिप्रसङ्गापत्तेः, पशुनियोजनानुवादेन विधौ विशिष्टोद्देशापत्तेः, नियोजनान्तरस्यैवाप्राकृतस्य विधेयत्वात् । अस्तु वा स्थानापत्तिः तथापि न परिधौ यूपधर्माः, सत्यपि परिधेः पशुनियोजनं प्रति सप्तम्या अङ्गत्वे पुरोडाशकपालन्यायेन अग्निपरिधानप्रयुक्तस्यैव परिधेः पशुनियोजनशेषत्वेन तत्प्रयुक्तत्वाभावात्, धर्माणां चापूर्वीयपशुनियोजनप्रयुक्ताधिकरणार्थत्वेन तदप्रयुक्ताधिकरणे परिधौ असंभवात् । न च गौरवेण प्रयुक्तत्वस्य नोद्देश्यतावच्छेदककोटिप्रवेशः, शेषत्वसाधनत्वसंबन्धित्वापेक्षया प्रयुक्तत्वस्यापि तदघटितत्वेन लघुत्वात् । किञ्च अदृष्टघटिते यूपस्वरूपे वैयर्थ्याभावात् धर्माणां छेदनादीनां यूपोत्पत्त्यर्थत्वमेव न त्वपूर्वीयसाधनविशेषार्थत्वमाधानवत् । न च परिधौ यूपत्वमस्ति । तद्धि दृष्टादृष्टसंस्कारसमुदायो वा स्यात् तावत्संस्कारजन्यादृष्टान्तरं वा, तद्विशिष्टं काष्ठं वा, सर्वथा न परिधौ तत्संभवः । परिधानप्रयुक्तधर्माणामपि सत्वक्त्वादीनां तत्रावश्यकत्वस्य वक्ष्यमाणत्वेन जोषणादीनां यूपधर्माणां बाधावश्यम्भावेन तावत्संस्कारसमुदायासंभवात् । नहि यूपशब्दः प्रत्येकमेकैकसंस्कारवाची, अनेकशक्तिकल्पनापत्तेः, कतिपयसंस्कारयुक्ते यूपशब्दप्रयोगाभावाच्च । 'यूपं छिनत्ति' इत्यादेस्तत्तत्संस्कारेण यूपं संपादयेत् इत्यर्थाङ्गीकारेण समुदायादिवाचित्वेऽप्युपपत्तेः । अन्यथा एकैकसंस्कारस्यापि यूपत्वे तज्जनकच्छेदनादीनां विकल्पापत्तेः । अतो यूपत्वोत्पादकानां धर्माणामर्थलोपादेव परिधौ असंभवः । इति प्राप्ते, न तावत् स्थानापत्त्यसंभवः, सत्यपि नियोजनान्तरविधौ प्राकाशाध्वर्युदानवत् प्राकृतनियोजनकार्ये एव तद्विधानेन तदुपपत्तेः । वस्तुतस्तु, यावदतिदेशेन प्राप्यते तावत् पूर्वमेव परिधिविशिष्टप्राकृतनियोजनस्यैव परिधिप्राप्तिफलकतया पशूद्देशेन विधानोपपत्तेः स्थानापत्त्यविरोधः । न च धर्मासंभवः, उद्देश्यस्वरूपे आनर्थक्यप्रसक्तौ शास्त्रस्य महाविषयत्वसिद्ध्यर्थमपूर्वसंबन्धित्वस्यैव उद्देश्यतावच्छेदकत्वात् ! संबन्धित्वं संबद्धाविति प्रतीतिसाक्षिकः सकलतत्संबन्धत्वव्यापकः अखण्डोपाधिरूपो धर्मः, तेन तत्तत्संबन्धान्यतरत्वरूपतया संबन्धत्वस्य न गुरुभूतत्वाशङ्का । वक्ष्यते चैतत् 'अगन्म' इत्यादिमन्त्रस्यापूर्वार्थत्वसिद्ध्यर्थमुत्तराधिकरणे । यत्तु छेदनादीनां यूपत्वोत्पादकतया नायूपे परिधौ धर्मप्राप्तिरिति, तत्र **पार्थसारथिः** 'त्वदुक्तरीत्यैव यूपशब्दस्य दृष्टादृष्टसंस्कारसमुदाये शक्तिः । न तु तावत्संस्कारजन्यादृष्टान्तरे, प्रमाणाभावात् । तावत्संस्काराणामेव च नियोजनाङ्गत्वम् । अतश्च परिधिखलेवाल्यादौ कतिपयधर्मबाधेऽपि धर्मान्तरकरणं नानुपपन्नम्' इति । तन्न । समुदायस्यातिरिक्तत्वे तस्यैव नियोजनाङ्गत्वापत्तेः, संस्काराणां समुदायोत्पादकत्वापत्तौ परिध्यादौ तदभावेन धर्मप्राप्त्यनापत्तेः । अनतिरिक्तत्वे शक्यताऽवच्छेदकभेदेन अनेकशक्तितादवस्थ्यात्, इतरथा लक्षणोच्छेदापत्तेः । अतो लाघवादाहवनीयादिपदवदेव अदृष्टान्तरे तद्विशिष्टकाष्ठे एव वा यूपपदस्य शक्तिः । तच्चादृष्टं नोच्छ्रयणाञ्जनादिसकलसंस्कारजन्यम्, अपितु यूपाहुत्याद्यङ्गकच्छेदनजोषणाष्टाश्रीकरणजन्यमेव । अत एव याज्ञिकानां दीक्षाकाले तावतामेवापकर्षः । युक्तं चैतत् । दीक्षासु 'यूपं छिनत्ति' इत्यत्र यूपोत्पत्त्यनुवादेनैव दीक्षाकालविधानात् । इतरथा यूपच्छेदनोद्देशेन तद्विधाने वाक्यभेदात् । उच्छ्रयणादीनां तु अग्निसंमार्गन्यायेनोत्पन्नयूपसंस्कारकत्वात् अपूर्वसाधनीभूतपशुनियोजनाधारत्व-

लक्षणावश्यम्भावेन अयूपे परिध्यादावपि प्राप्त्युपपत्तिः। उच्छ्रयणमात्रं परं अर्थलोपादिना निवर्तते। न चैवं 'यूपायाज्यमानाय' इति मन्त्रे ऊहापत्तिः, भवन्मतेऽपि समानत्वात्। 'परिधये अज्यमानाय' इत्याद्यूहस्येष्टापत्त्यैव सुपरिहरत्वाच्च। सूत्रस्योहपरत्वेनापि व्याख्यानसंभवात्। १२.

मण्डन-- 'परिधिर्यूपधर्मभाक्।' २०.

शंकर-- 'परिधौ यूपधर्माः स्युः।' २४.

* **परिधौ** यूपपरिध्युभयधर्माणामविरुद्धानां चातुर्मास्येषु पाशुकेषु अनुष्ठानम्। १२।२।१०. **मीको.** पृ. १६९२. 'चातुर्मास्येषु पाशुकेषु॰' इत्यत्र द्रष्टव्यम्। * परिधौ स्वधर्मविरोधे यूपधर्मा नानुष्ठेयाः पाशुकेषु चातुर्मास्येषु। १२।२।११।२७–२९. **मीको.** पृ. १६९२ 'चातुर्मास्येषु पाशुकेषु' इत्यत्र द्रष्टव्यम्।

* **परिध्यधिकरणम्।** चातुर्मास्यप्रघट्टके **मीको.** पृ. १६९२ इत्यत्र द्रष्टव्यम्।

* **परिधिधर्माः** इध्मसंनहनम्, संमार्जनम्, जुह्वा अञ्जनं 'वसुरसि' इत्येवमादिभिः (मन्त्रैः), अभ्याश्रावणम्, सत्वक्कत्वम्, उपशयत्वं च। **भा.** १२।२।१०।२६.

* **परिधिप्रहरणं** परिधीनां आहवनीयाग्नौ प्रक्षेपः। 'अनूच्यमाने शंयुवाके, आहवनीये परिधीन् प्रहरति।' **वि.** १०।७।१२.

* **परिधिमन्त्रगतच्छन्दसामेव** व्यतिक्रमो व्यूढे द्वादशाहे, न तु परिधीनां साक्षात् व्यतिक्रमः। **भा.** १०।५।२६।८८.

* **परिधिरूपगुणस्य** पशुनियोजने विधानं सौमिकेषु चातुर्मास्येषु। **भा.** १०।३।३।१८–२२.

* परिधीयते अग्निः तदायतनं वा यैः इति, परि समन्तात् धीयन्ते इति वा **परिधिशब्दो** यौगिको द्रव्यवाची। **बाल.** पृ. १६६.

* **परिधिसंमार्जने** मन्त्रः सकृत्पठनीयः अपूर्वप्रयुक्तत्वात्। न मन्त्रः परिधिप्रयुक्तः (९।१।५।११–१९)। **के.**

* **परिप्लुपात्रेण** सोमेन धिष्ण्यव्याघारणं ज्योतिष्टोमे। **संकर्ष.** ३।२।१९. **मीको.** पृ. १८३१ 'ज्योतिष्टोमे सोमेन॰' इत्यत्र द्रष्टव्यम्।

* **परिभाषाः** काश्चित् संगृह्यन्ते। व्याकरणे यथा साक्षात् महाभाष्ये एव भूयस्यः परिभाषा उक्ताः, न तथा मीमांसायां भाष्यादिषु प्राचीनेषु भाट्टदीपिकादिषु वाऽर्वाचीनेषु ग्रन्थेषु परिभाषा नाम काचिदप्युक्ता। न्यायास्तु नानाविधा उक्ताः। तथापि भाष्यादौ दृष्टानि कानिचिद्वाक्यानि परिभाषावत् ज्ञायमानानि उपलभ्य परिभाषात्वेन अस्माभिरेव प्रकल्प्य अत्र निवेश्यन्ते। न च भूयसाऽत्र परिभाषात्वं परीक्षितम्। संग्रहश्च वर्णक्रमेण।

* अकर्तव्यानामितिकर्तव्यतया नास्ति संबन्धः। **भा.** ९।१।१।१, * अङ्गाङ्गमपि 'तस्य' इति शक्यते वक्तुम्, यथा 'वाजपेयस्य यूपः' इति। ८।१।३।१०, * अङ्गगुणविरोधे प्रधानगुणो बलवान्। १२।२।९।२५, * अनुवादरूपत्वं सति संभवे न बाधितव्यम्। १२।४।३।७, * अनुष्ठेया क्रिया प्रतीता सती कारकाणि प्रत्याययति। ३।४।४।१३ पृ. ९१३–१४, * अन्तरङ्गबहिरङ्गयोरन्तरङ्गं बलीयः। १२।२।११।२७, * अन्यायश्चानेकार्थत्वम्। (एकस्य शब्दस्य अनेके अर्थाः इति न युक्तं इत्यर्थः)। १।३।९।३०. * अन्यायश्चानेकशब्दत्वम्। (एकस्यार्थस्य वाचका अनेके शब्दाः इति न युक्तमित्यर्थः)। **सूत्रं** १।३।८।२६. * अर्थद्रव्यविरोधे अर्थे प्रत्यादर्तव्यम्। (अर्थः प्रयोजनम्। द्रव्यं प्रयोजनसाधनम्। तयोर्विरोधे प्राप्ते अर्थः स्वीकार्यः। खदिरः पशुबन्धने असमर्थश्चेत् स न ग्राह्यः, तत्समर्थः कदरः प्रतिनिधिर्ग्राह्यः अर्थानुसारात् इति)। **भा.** ६।३।१९।३९. * असाधारणगुणवचने अधिष्ठानमन्तरेणैव गुणः संपादितो भवति। **टुप्.** १०।२।२९।६८. * आख्याते अनुयोगिवृत्तिसंख्यावचनमेव, न तु प्रतियोगिवृत्तिसंख्यावचनम्। **रहस्य.** पृ. ९५. * 'आश्रये प्रवर्तमाने तदाश्रितमपि प्रवर्तते।' यथा पटे आकृष्यमाणे तदाश्रितं चित्रमप्याकृष्यते। यथा च चमसः प्रवर्तते। यथा च 'खादिरं वीर्यकामाय यूपं कुर्यात्' इति। **भा.** ८।१।१४।२३. * कृदभिहितो भावो द्रव्यवद्

भवति। **वा.** ३।१।६।१२ पृ. ६७६, * 'गुणे स्वरूपतो धर्मः प्रधानद्वारतोऽपरः। यत्र स्यात् तत्र विज्ञेयं गुणधर्मस्य बाधनम्॥' ३।३।२।९, * 'गुणवचनानां आश्रयतो लिङ्गवचनानि भवन्ति'। गुणवचनं इति न गुणाभिधानमात्रेणोच्यते। किं तर्हि? गुणमुक्त्वा यो द्रव्ये वर्तते। ३।१।६।१२ पृ. ६८२. * चोदनागतं लिङ्गं प्रापकम्, मन्त्रगतं प्राप्तस्य द्योतकम्। **भा.** ८।१।१६।३१. * 'तुल्यकार्यं तुल्यजातीयं तुल्यस्य बाधकं भवति'। तद्यदि राजसूयचोदनातो राजन्यत्वं प्राप्तं प्रकृतितश्चैकत्वम्, तत्र दशत्वं विधीयमानं सामान्यात् आतिदेशिकत्वाच्च एकत्वं बाधते, न जातिम्, भिन्नकार्यत्वात्। पूर्वपक्षे। **वा.** ३।५।२०।५२. * देवतासामान्यं देशसामान्यात् बलवत्, अन्तरङ्गत्वात्। तेन हविर्गणविशेषस्थाग्नावैष्णवे प्राकृतिकाग्नीषोमीयविध्यन्त एव। **भा.** ८।३।१।२. * द्रव्यसंस्कारविरोधे द्रव्यम्। (अनयोर्विरोधे द्रव्यमादर्तव्यम्। खदिरः तक्षणादिसंस्कारासमर्थोऽपि पशुबन्धनसमर्थश्चेत् स एव ग्राह्यः, न संस्कारादिसमर्थोऽपि कदरः)। **सूत्रं** ६।३।१८।३८. * न अन्यस्योक्तोऽर्थः अन्यस्य भवति। नहि यद्देवदत्तस्य ग्रामाच्छादनादिकम्, तद्यज्ञदत्तस्य भवति। **भा.** ७।१।१।१, * न अविहितमङ्गं भवति। ३।४।४।१३ पृ. ९४१. * नासिद्धो दृष्टान्तो भवति। **वा.** ९।१।७।२३ पृ. १६६६. * 'नास्ति दृष्टेऽनुपपन्नं नाम'। दृष्टा बाला वृद्धेभ्यः (शब्दार्थम्) प्रतिपद्यमानाः। **भा.** १।१।५।५ पृ. ५८, * न आनुमानिकं प्रत्यक्षं बाधते। ७।४।२।१०. * न गुणः आकृष्यमाणो गुणिनमाकर्षति अतादर्थ्यात्। **वा.** ८।१।१३।२०, * 'न चोभयाश्रयं दोषमेकश्चोद्यो विचारयन्'। ३।४।४।१३ पृ. ९१८. * न द्वयोर्नाम्नोः संबन्धोऽस्ति। **टुप्.** ११।१।२।१०। क्रियागर्भत्वात् संबन्धानाम्। **रत्न.** * न द्वयोर्विधीयमानयोः परस्परसंबन्धो भवति। **भा.** ११।१।१।३. * न युगपत् श्रुतिलक्षणावृत्त्युपयोगित्वमवकल्पते। **वा.** ३।४।४।१२ पृ. ९०७. * न विध्यनुवादौ युगपत् संभवतः। **भा.** ११।१।२।९. * न शक्तयः पर्यनुयुज्यन्ते। **वा.** ३।४।४।१३ पृ. ९१५. * न सामर्थ्यमात्रेण वाक्यादृते (वचनादृते) विनियोगा भवन्ति। **भा.** ९।१।१४।४०. * न सामवायिकत्वे (संनिपत्योपकारकत्वे) संभवति आरादुपकारकल्पना युक्ता। **वा.** ३।४।४।१२ पृ. ९०२, * नहि अङ्गधर्माः प्रधानानि संक्रामन्ति। ३।३।२।९ पृ. ८११. * नहि एकस्य शब्दस्यानेकार्थता सत्यां गतौ न्याय्या। (अन्याय्यं चानेकार्थत्वम्)। **भा.** ८।३।६।२२. * नहि कर्मणि उपक्रान्ते तदसमाप्य कर्मान्तरमारब्धुं युक्तम्। **संकर्ष.** ३।१।७. * नहि द्वयोर्विधीयमानयोः संबन्धोऽस्ति। **भा.** ११।१।१।३। अयुक्तमिदं दूषणम्। अरुणादीनामप्ययं दूषणप्रकारः स्यात्। बलीयांश्चायमेव न्यायः यत् भावनया सर्वेषां संबन्ध इति, इतरेतरसंबन्धस्तु आर्थः। **टुप्.** * नहि यत्सिद्ध्यर्थं यत् कल्प्यते तेनैव तद्बाधा उचिता, कल्पकाभावेन आत्मोपमर्दकत्वप्रसङ्गात्। (उपजीव्यविरोधस्य अयुक्तत्वम्, संनिपातपरिभाषा च एतादृशी एव)। **सु.** पृ. ३१. * नहि विधीयमानस्य विशेषणं भवति। यत् कारणं विशेषणमपि अविधीयमानं न भवति। न च द्वयोर्विधीयमानयोः परस्परसंबन्धो भवति। **भा.** ११।१।१।३, * नहि सविशेषणानां वृत्तिर्भवति, न खल्वपि वृत्तस्य विशेषणं प्रयुज्यते। १०।४।१५।३१, * नैमित्तिकी चिकीर्षा नित्यां चिकीर्षां बाधते। १२।२।१३।३३, * 'पक्षान्तरैरपि परिहारा भवन्ति'। अन्यथा कृत्वा दोष उक्तः, अन्यथा परिहारः। दार्शपौर्णमासिको यावज्जीवकालः इतिकृत्वा दोष उक्तः, नैमित्तिक इति परिहारः। पक्षान्तरैरपि परिहारा भवन्ति। १२।२।६।२०, * 'पूर्वावसायिनश्च बलीयांसो जघन्यावसायिभ्यः'। तस्मात् प्रकृतिः पूर्वं प्रयुज्यते (इदं पूर्वपक्षे)। १२।२।१३।३३. * प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतस्तयोः प्रत्ययार्थः प्राधान्येन। **सु.** पृ. १३७१. * प्रधानसंनिधौ गुणः शिष्यमाणः प्रतिप्रधानमुपदिष्टो भवति। **वा.** ३।८।४।१२. * भूतभव्यसमुच्चारणे भूतं भव्यायोपदिश्यते। **भा.** ९।१।४।९. * यच्च विधीयते तस्य स्तुतिः, यस्य स्तुतिर्न तस्य विधानम्। विधिनैव स्तुत्यपेक्षायाः कृतत्वात्। **वा.** ३।४।११।३० पृ. ९६४. * 'यत्प्रसक्त्या यो विचारः तत्समासौ

स एव बुद्धिस्थो भवति ’ इति बुद्धिस्थचमसाधिकरणप्रसङ्गेन चतुर्धाकरणाधिकरणस्य संगतिः। सु. पृ.१०७२. * ‘ यस्य यो धर्मः प्रायेण दृष्टः, स तस्यादृश्यमानोऽपि अनुमीयते ’। यथा यः परार्थान् प्रायेण करोति, अन्यस्मिन्नपि परार्थकरणे स एव संभाव्यते। भा. ८।४।५।१८, * लिङ्गे अविधित्सितेऽपि लिङ्गविशेषनिर्देशोऽनुवादभूतो भवत्येव। यथा शुक्लः पुमान्, शुक्ला स्त्री, शुक्लं नपुंसकम्। शुक्ल एकः, शुक्लौ द्वौ, शुक्ला बहव इति। शुक्लां शाटीमानय इति। यद्यपि शाट्याद्यानयनं न विधीयते शुक्लमात्रसंबन्धमात्रविधित्सा भवति। न तत्र लिङ्गेन विशेषणं क्रियते। तथाप्यनुवादभूतस्त्रीलिङ्गनिर्देशो भवत्येव शुक्लामानयेति। ९।१।९।३३. * ‘ विप्रतिपत्तौ हविषा नियम्येत ’। हविर्देवतयोर्विप्रतिपत्तौ हविषा विध्यन्तो नियम्येत। सूत्रं ८।१।१७। ३२. * विशेष्यं बुद्धौ संनिहितं भवति, न विशेषणम्। तत् विशेष्यं विशेष्य निवर्तते। ‘ राजपुरुषः पूज्यः ’ इत्युक्ते पुरुषः पूज्यो गम्यते न राजा। एवम् ‘ऐन्द्रं पयः’ इत्युक्ते हविर्बुद्धौ संनिधीयते न देवता। भा. ८।१।१७। ३४, * शब्दार्थाधिगमे अभियुक्तोपदेशः प्रमाणम्। ८।२।५।२४, * शब्दलक्षणे कर्मणि यथाशब्दार्थं प्रवृत्तिः। ११।१।४।२६, * श्रुत्यर्थे संभवति न वाक्यार्थो ग्राह्यः, श्रुत्यर्थस्य मुख्यत्वात्। ११।१।१।३, * संयोगिनोरन्यतरो दृश्यमानः इतरमदृश्यमानमपि अनुमानात् बुद्धौ संनिधापयति। यथा अग्निहोत्रं इत्यभिधानं कौण्डपायिनामयने श्रूयमाणं नैयमिकाग्निहोत्रधर्मान् बुद्धौ संनिधापयति। ८।१।२।२, * ‘ सकृत् क्रियया कृतः शब्दार्थः ’ इति न स्यादभ्यासः अग्निचयने सर्वौषधावघातस्य। ११।१।६।२८. * सामान्यशास्त्राणि विशेषविधिविषयं परिहृत्य प्रवर्तन्ते। वा. ३।२।८।२१ पृ. ७७४. * हविर्गुणसामान्यात् हविःसामान्यं बलवत्। शतकृष्णले हविर्गतं वैशद्यं चरुशब्दश्च बलवान्, गुणभूतमाज्यं दुर्बलम्। भा. ८।१।१८।३९.

* **परिभोजनीयं** नाम बर्हिः। ततः पवित्रे विधृती च कर्तव्ये, न तु वेदिस्तरणार्थात् बर्हिषः। दर्शपूर्णमासयोः। भा. ३।८।१७।३३. * **परिभोजनीयाः** शास्त्रीयलवनादिसंस्काररहिताः (यागे उपयोज्यमानाः) दर्भाः। (तादृशदर्भाणां मुष्टिरपि ‘ परिभोजनीया ’ इत्युच्यते)। दर्शपूर्णमासयोः पवित्रं परिभोजनीयदर्भैः संपादनीयम्। वि. ३।८।१८.

* **‘ परिमाणमपि त्वार्थमविस्मरणसिद्धये। स्वयमालोच्यते प्राज्ञैः स्मार्तैः सह तदिष्यते ॥ ’** न केन चित् प्रमाणेन पदार्थेयत्ता परिच्छिद्यते। तत्र यदि तेन विना अन्ये समस्तपदार्थस्मृतिहेतवो न स्युः, तत एतदप्येकं कारणमिति परिमाणमपि स्थाप्येत। तस्यामपि तु अवस्थायां यथा श्रौतमात्रपरिमाणमसमाप्य समाख्यापर्यन्तप्रापितपदार्थगतपरिमाणावधारणं आश्रीयते, तथा स्मृत्याचारपर्यन्तावगतपरिमाणमाश्रयिष्यते इति निर्दोषम्। वा. १।३।३।७ पृ. २००, * परिमाणं नाम प्रयोज्यपदार्थेयत्तारूपं तत्पदार्थविधिसंघातावगतम्। तच्च किं कश्चित् पदार्थो विस्मृतः किं वा सर्वमनुष्ठितमिति संशयनिराकरणाय प्रयोगविधिरपेक्षमाणः स्वीकरोति, अतस्तदपि प्रयोगविधिगम्यम्। कु. १।३।४।५. * परिमाणं यूपस्य पञ्चारत्नित्वादि उपरं वर्जयित्वा ज्ञेयम्। संकर्ष. १।४।८. ‘ यूपादौ पञ्चारत्नित्वादि ’ इत्यत्र द्रष्टव्यम्। * ‘ शास्त्रेण हि पदार्थानां **परिमाणं** त्रिधा गतम्। क्रमेयत्ताऽऽशुनिर्माणरूपं ...... ॥ ’ वा. १।३।३।६ पृ. १९७, * क्रमकाल**परिमाणानि** समस्तपदार्थधर्मत्वेन निश्चितानि। १।३।३।५. * **परिमाणस्य** द्वावन्तौ पारिमाण्डल्यं परममहत्त्वं च। तत्र अत्यन्ताल्पत्वे वर्तमानः परमाणुः अत्यन्तमहत्त्वे च वर्तमानं व्योमादिकं अन्त्यं इत्युच्यते। **रत्नाकरः.** अनुमानपरिच्छेदः श्लो. १७७.

* **परिलेखः** वेदेः दर्शपूर्णमासयोः। ‘ स्फ्येन वेदिं परिलिखन् परिगृह्णाति ’। अयं परिलेखः राजसूये मैत्राबार्हस्पत्ये नास्ति। तत्र हि ‘ स्वयंकृता वेदिर्भवति ’। वि.१०।१।१.

परिवप्यहोमयोः ‘ अभितः पुरोडाशौ ’ इति पूर्वोत्तरकालवादः ॥

‘ स्वाहा देवेभ्यो देवेभ्यः स्वाहेत्यभितो वपां जुहोति ’, ‘ पुनरूर्जा सहरय्येत्यभितः पुरोडाशमाहुती

जुहोति ’ इत्यादौ अभितो वृक्षं निधेहीत्यादाविव देशवादः, अभित इत्यस्य प्रतिसंबन्धिनि पदे द्वितीयाविधानात् यथा वपा पुरोडाशश्च मध्यतो भवति तथा जुहुयादित्यर्थः। इति प्राप्ते, कर्मण एव पूर्वं प्रक्रान्ततया वपापदस्य तद्द्रव्यकयागपरत्वात् तत्पूर्वापरकालवादोऽयम्। न च लक्षणा दोषः, ‘ अभिरभागे ’ इति स्मृत्यैव तदनुमतेः। किञ्च अभितःपदस्य उभयतः इत्यर्थकस्य देशवादे कतरयोर्दिशोर्ग्रहणम्? अनियमे विकल्पापत्तिः। कालवादे तु पूर्वापरयोर्द्वयोरेवोपस्थितेर्न क्षतिः। अत एव ‘ देवेभ्यः स्वाहेत्युपरिष्टात् ’ इति श्रुत्यन्तरे व्यक्तः कालवादः। संकर्ष. १।१।१०.

* **परिवर्तिनी** नाम त्रिवृत्स्तोमस्य विष्टुतिः। सा च एवं आम्नायते। ‘ तिसृभ्यो हिंकरोति स पराचीभिः, तिसृभ्यो हिंकरोति स पराचीभिः, तिसृभ्यो हिंकरोति स पराचीभिः, परिवर्तिनी त्रिवृतो विष्टुतिः ’ इति। पराचीभिः अनुक्रमेण आम्नाताभिः। तिसृभ्य इति तृतीयार्थे पञ्चमी। हिंकरोति गायति। वि. १।४।३.

* **परिवासनं** शाखायाः अग्रार्थमेव, न मूलार्थं दर्शपूर्णमासयोः। परिवासनं छेदनम्। के. (भा. ४।२।३।८–९)। * **परिवासनस्य** (शाखायाः) वत्सापाकरणादि प्रयोजकम्, न कपालोपधानं दर्शपूर्णमासयोः। के. (भा. ४।२।३।८–९).

* **परिवीय** वेष्टयित्वा। व्येञ् संवरणे भ्वादिः। के.

* ‘ **परिवीरसि** ’ इति यूपपरिव्याणकरणमन्त्रं होता पठेत्, कौण्डपायिनामयनेऽग्नीषोमीये पशौ। के. (वि. ३।८।११).

* **परिव्याणमग्निष्ठे** द्वाभ्यां द्वाभ्यामेव रशनाभ्यां क्रमेण। संकर्ष. १।४।१३. मीको. पृ. ७८ ‘ अग्निष्ठे द्वाभ्यां द्वाभ्याम् ’ इत्यत्र द्रष्टव्यम्। * परिव्याणं ‘ आश्विनं ग्रहं गृहीत्वा० ’ इत्यादिवाक्ये पुनः श्रुतं यूपसंस्कारार्थम्, न पशुसंस्कारार्थम्। के. (भाट्ट. ४।४।९)। * परिव्याणं द्वितीयम् ‘ त्रिवृता यूपं परिवीय ’ इति सवनीये पशौ विदधाति। बाल. पृ. ६४. * परिव्याणं यूपस्य रशनया वेष्टनम्। के. * परिव्याणं रशनाद्वयेन युगपत् यूपैकादशिन्यामपि। संकर्ष. १।४।१४. ‘ यूपैकादशिन्यामपि रशनाद्वयेन ’ इत्यत्र द्रष्टव्यम्।

* **परिव्याणान्ते** अञ्जनादि परिव्याणान्तं काण्डम्, यूपस्य घृतेनाञ्जनं समुच्छ्रयणं अवटसमूहनं मूलपरिदृंहणं रशनापरिव्याणं इति। तत्रानेकः पदार्थः, तेन अनुसमयः यूपैकादशिनीपक्षे। वि. ५।२।५.

* **परिव्याणकरणक्रियमाणानुवादिनोः** ‘ परिवीरसि ’ ‘ युवा सुवासाः ’ इति मन्त्रयोः क्रमात् अग्नीषोमीयपरिव्याणाङ्गत्वे प्राप्ते लिङ्गात् सवनीयार्थद्वितीयपरिव्याणाङ्गत्वमपि। लिङ्गं क्रमात् बलवत्। वा. ३।३।७।१४ पृ. ८३७.

* **परिव्याणकरणक्रियमाणानुवादिपरिवीरसि-**परिवीतपदव्यतिरिक्तपदानाम् ‘युवा सुवासाः० आगात् स उ श्रेयान् ॥ ’ इत्येवमादीनां लिङ्गविनियुक्त(परिवीरसि)-परिवीतपदैकवाक्यत्वात् सवनीयपरिव्याणे विनियोगः। वाक्यं क्रमात् बलीयः। वा. ३।३।७।१४ पृ. ८३७.

परिव्याणन्यायः। इतरमन्यस्तेषां इति न्यायः। कुण्डपायिनामयने होत्रा अध्वर्युकर्म परिवीरसीति मन्त्रः पठनीयः ॥

विप्रतिषेधे करणः समवायविशेषादितरमन्यस्तेषां यतो विशेषः स्यात्। ३।८।१०।२१ ॥

भाष्यम्-- अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः। तस्य यूपस्य परिव्याणे मन्त्रौ एकः अध्वर्योः ‘ परिवीरसि ’ इति करणः, अपरो होतुः ‘ युवा सुवासाः ’ इति क्रियमाणानुवादी। तयोश्चोदकपरंपरया कुण्डपायिनामयनं प्राप्तयोः भवति संदेहः। कः पुनरसौ? तत्र ऋत्विक्समास आम्नातः ‘ यो होता सोऽध्वर्युः ’ इति। किं करणं आध्वर्यवं होता कुर्यात्, किं हौत्रं क्रियमाणानुवादिनं इति। किं प्राप्तम्? अनियम इति। इति प्राप्ते, उच्यते। विप्रतिषेधे करणः स्यात् आध्वर्यवः ‘ परिवीरसि ’ इति। न क्रियमाणानुवादी होतुः ‘ युवा सुवासाः ’ इति। कुतः? समवायविशेषात् द्वौ तत्र समवायौ, होतुश्चोदकेन हौत्रेषु, प्रत्यक्षश्रवणेन आध्वर्यवेषु ‘ यो होता सोऽध्वर्युः ’ इति। एवं प्रत्यक्षमध्वर्योः कार्ये चोद्यते। प्रत्यक्षं चानुमानात् बलीयः। तस्मा-

दाध्वर्यवं करणं परिवीरसि इति होता कुर्यात्, अथ हौत्रं विरुद्धं कः कुर्यात् ? 'इतरमन्यस्तेषां यतो विशेषः स्यात्' अन्यो होतृपुरुष एव स्यात्, यस्याव्यापृतता, प्राधान्यविशेषो वा ।

वा—— 'परिवीरसि' 'युवा सुवासाः' इत्येतयोः करणक्रियमाणानुवादिनोः अध्वर्युणा होत्रा च युगपत् प्रकृतौ प्रयुक्तयोः कुण्डपायिनामयने हौत्राध्वर्यवयोः एककर्तृकत्वादशक्तेः अवश्यावहेये अन्यतरस्मिन्, कतरः प्रतिगृह्यतां इति संदेहः । तत्रानियमः प्राप्नोति । यद्वा होतुः सिद्धस्वरूपस्य आध्वर्यवविधानात् अजहत्स्वधर्मतया हौत्रः एव युक्तः (मन्त्रः)। इति प्राप्ते, **अभिधीयते** । एतस्मिन् विप्रतिषेधे करणः प्रयोक्तव्यः । कुतः ? समवायविशेषात् । **केचिदाहुः** प्रधानप्रत्यासत्तिः समवायविशेष इति । बहिरङ्गो हि आरादुपकारकरूपत्वात् क्रियमाणानुवादी, करणस्तु अन्तरङ्ग इति । **तदकारणम्** । यदि हि प्रधानद्वारेण अङ्गेषु कर्ता अवतरेत्, ततः संनिकर्षविप्रकर्षौ उपयुज्येयाताम् । स तु समाख्यया चोदकेन च प्रधानेषु अङ्गेषु च अविशेषेण लक्ष्यते । न च कश्चित् अङ्गगुणविरोधन्यायः, उभयोरङ्गत्वाविशेषात् । न च संनिपातित्वेन क्रियाऽन्तरगतमारादुपकारित्वं दुर्बलीक्रियते । न चायमतीव आरादुपकारकः । क्रियमाणपरिव्याणस्मृत्यविच्छेदेन दृष्टसंस्कारजननात् । तस्मात् आनुमानिकात् हौत्रसंबन्धात् प्रत्यक्षत्वेनैव आध्वर्यवस्य समवायस्य विशेषो भवति । कथम् ? एषा ह्यत्र वचनव्यक्तिः, यदुत होत्रादयः श्रुतिवृत्ताः अध्वर्य्वादिशब्दलक्षितेषु कर्मसु विधीयन्ते । तत्र हौत्रसंबन्धो होतुरानुमानिकः आध्वर्यवसंबन्धस्तु प्रत्यक्षः । यत्तु अजहत्स्वधर्म एव होता आध्वर्यवेण संबध्यते इति, संबध्येत यदि तत्प्रयोगमात्रकृतमेव अस्य होतृत्वं भवेत्, यदि वा हौत्रं प्रति अध्वर्युर्विधीयेत, होतारं वोद्दिश्य अध्वर्युकर्मविधिर्भवेत्, न तु तत् सर्वमस्ति । होता तावत् योग्यतामात्रेणावधारितः सत्यपि च कर्मनिमित्तत्वे अन्यानि सहस्राणि तदुपलक्षणं करिष्यन्ति । न च हौत्रं प्रति अध्वर्युविधिरिह, होत्रध्वर्युशब्दयोः अत्यन्तविभिन्नपुरुषवचनयोः मुख्यसामानाधिकरण्याभावात् अन्यतरस्य अवश्यकल्पनीये लक्षणावृत्तत्वे विरोधनिमित्तत्वाल्लक्षणाकल्पनायाः प्रथमोच्चारिते होतृशब्दे किञ्चिदपि कल्पनाबीजं न पश्यामः ।तेन 'मुख्यं वा पूर्वचोदनात्' इति तं स्वार्थवृत्तमेव गृहीत्वा अध्वर्युशब्दः कर्मलक्षणार्थः अध्यवसीयते । तत्रापि तदुद्दिश्य होता विधीयते । तद्धि क्रत्वर्थत्वेन प्रयोजनवत्, न तथा कर्ता । प्रधानं च एवंजातीयकेषु उद्दिश्यते । ततश्च गुणभूतो होता उपादीयमानः, यः प्रधानाविरोधी धर्मः, तन्मात्रयुक्त एव संबध्यते । यदि तु होतुः आध्वर्यवं विधीयेत, ततस्तस्य कर्माविरुद्धं तत् प्रवर्तते, इति न किञ्चिदपि हौत्रं हापयेत् । अप्राकृतकर्तृसंस्कारत्वप्रसङ्गाच्च आध्वर्यवस्य, नैवं संबन्धः, इति पक्षान्तरमवलम्बितम् । तस्मादाध्वर्यवसंबन्ध एव प्रत्यक्षः प्रधानं च इति सिद्धम् ।

अत्र चोदयन्ति । नैवात्र अन्यतरस्यापि मन्त्रस्य होतृसंबन्धो बाधितव्यः । कुतः ? '**एककालप्रयोगे हि विरोधो मन्त्रयोर्भवेत् । करणः प्राक् क्रियातस्तु, परतश्चेतरः स्थितः ॥**' करणस्य हि 'मन्त्रान्तेन कर्मादिसंनिपातः' (१२।३।१०।२०) इत्यनेन न्यायेन प्राक् परिव्याणात् प्रयोगः । क्रियमाणानुवादिनस्तु तस्मिन् क्रियमाणे । तेन द्वावपि प्रयोक्तुं समर्थो होतेति । **नैतदस्ति** । क्रियमाणता नाम संकल्पादेः कारकप्रचलनात् प्रभृति आ समाप्तेः । अतश्च पूर्वपदार्थसमाप्त्यैव पर्युपस्थापितं चेत् परिव्याणं वर्तते, स एव दीर्घः समस्तः क्रियमाणानुवादिनः कालः । एवमपि करणस्य तादृशादेव प्राक् प्रयोगात् अविरोधः इति यद्युच्येत, तन्न । न हि 'परिवीरसि' इत्ययम्, संकल्पं रशनाऽऽदानं संनिहितं वा यूपं अवयवक्रियामात्रप्रवृत्तं वा परिव्याणं शक्नोति प्रकाशयितुम् । तस्मात् प्रधानक्रियाऽऽरम्भे एव यूपसमीपस्थेन प्रयोक्तव्यः । **ननु** एवमपि दीर्घकाले कर्मणि एकदेशे करणं एकदेशे च क्रियमाणानुवादिनं प्रयुञ्जानो न विरोत्स्यते । कथं न विरुध्यते । यदा 'यूपाय परिवीयमाणायानुब्रूहि' इत्यनेन पाठक्रमात् करणः, प्रैषसामर्थ्याच्च इतरो युगपदेव प्राप्यते, न च क्रियैकदेशे क्रियमाणानुवादिनः प्रयोगः इत्यस्ति प्रमाणम् । स हि रशनाऽऽदानानन्तरं प्रयुक्तेन प्रैषेण प्रयोजितः दीर्घत्वात् आ परि-

व्याणसमाप्तेः कालमवरुणद्धि । तदन्तराले च आध्वर्यवः आपन्नो न कथं चित् अविरोधेनावतिष्ठते । ननु च युगपत्कालता बाध्यतां एककर्तृत्वं वा, इति वरं पदार्थप्राप्तेर्जघन्यत्वात् काल एव बाधितुम्, नान्तरङ्गः कर्तृसंबन्ध इति । **भवेदेतदेवम्**, यदि प्राकृतकालं बाधमानौ मन्त्रौ स्वकार्यान्न प्रच्यवेयाताम् । तयोस्तु य एव कालान्तरे प्रयुक्तः स एव स्वसामर्थ्यप्रतिपाद्यात् अर्थात् प्रच्यवते । सोऽयं लिङ्गविरोध आपद्यते । ननु च 'यो होता सोऽध्वर्युः' इत्यनया श्रुत्या लिङ्गं बाध्येत । बाध्येत यदि श्रुतिः स्यात् । वाक्यं त्विदं तदपि लक्षणया । न हि अत्र कस्यचिच्छब्दस्य श्रवणादिदं गम्यते हौत्राध्वर्यवे समानकर्तृके इति । किं तर्हि ? होत्रध्वर्युशब्दसामानाधिकरण्यात् । सर्वत्र चैष संबन्धो वाक्यलक्षण इत्युक्तम् (३।१।६) । तत्रापि च अध्वर्युशब्दस्य कर्मलक्षणार्थत्वात् विप्रकृष्टता । **ननु** लिङ्गमप्येतत् चोदकापेक्षित्वात् विप्रकृष्टतरं भवेत् । वाक्यं हि अर्थविप्रकर्षात् लिङ्गेन बाध्येत । स चेह विपरीतोऽर्थविप्रकर्षः । न हि चोदकेन अप्राप्तयोर्मन्त्रयोः एककालप्रयोज्यत्वं गम्यते । तस्मादेककर्तृत्वमेव बलीयः इति । **उच्यते** । सत्यमिह चोदकाङ्गीकरणम्, तत्तु मन्त्रस्वरूपे, न लिङ्गे । द्वयोरपि च तदविशिष्टम् । प्राप्ते तु मन्त्रद्वये, लिङ्गं औपदेशिकेनाविशिष्टम् । **स्यादेतदेवं** यदि चोदकः प्रापयेत् । स तु प्रत्यक्षवाक्यशिष्टसमानकर्तृत्वविरोधिमन्त्रद्वयं प्रापयितुमेव न शक्ष्यति । यद्यपि हि वाक्यं लिङ्गस्य नेष्टे, चोदकस्य तु स्वरूपप्रापणे पश्चात् भाविनमपि विरोधमालोच्य शक्तं निरोधं कर्तुम् । ततः छिन्नमूलत्वात् लिङ्गस्य दुर्बलता इति । **उच्यते** । सर्वं हि विरोधवेलायां बाध्यते । न च अनवगतो विरोधो बाधकारणं भवितुमर्हति । तदिह चोदकप्राप्तिवेलायां न कश्चिदपि विरोधो लक्ष्यते । यस्तु प्राप्ते विरोधः, तत्र लिङ्गं बलवत्तरं इत्युक्तमेव । यदि चात्र द्वयोरपि समानकर्तृत्वं वाक्येन विधीयेत, ततोऽपि एतस्य बलीयस्त्वमुद्भाव्येत । इह तु आध्वर्यवस्य होत्रा सह संबन्धो विधीयते, न हौत्रस्यापि । स हि चोदकेन प्राप्नोति । तेन यदि प्रत्यक्षत्वादेतस्य बाधकत्वम्, ततः समाख्याकृतमेव क्रियमाणानुवादिनो होतृसंबन्धबाधनम् । एवं च सति लिङ्गवाक्ययोरविरोधात् न किञ्चिदपि बाधिष्यते, आध्वर्यवप्रयोगश्च सेत्स्यति । यथा तु लिङ्गबलीयस्त्वमाश्रितमासीत्, तथा अन्यदेव अनिष्टमापद्येत । यो हि अस्य वाक्यस्य विषयः स बाध्येत । न चास्य होतृहौत्रसंबन्धो विषयः । कस्तर्हि ? होत्राऽऽध्वर्यवसंबन्धः । ततश्च यथाप्रकृत्येव प्रयोगः स्यात् । तस्मात् समाख्याक्लृप्तमेव आतिदेशिकं संबन्धं बाधित्वा समवायविशेषात् करणः प्रयोक्तव्य इति सिद्धम् ।

शा—— एवं प्राप्ते, ब्रूमः— '**प्रत्यक्षवचनात् प्राप्तिर्होतुराध्वर्यवेषु हि । हौत्रेषु चोदकाद्, वाक्यं चोदकाद्बलवत्तरम् ॥**' (प्राभाकरमतमनूद्य निराचष्टे) यस्तु 'सत्रेषु होत्रादयो न सन्ति, तदभावान्न हौत्रादिषु चोदकतः प्राप्तिः' इत्याह, तस्य 'हौत्रेण होतुश्चोदकात् समवायः' ['द्वौ तत्र समवायौ, होतुश्चोदकेन हौत्रेषु' इति तु भाष्यपङ्क्तिः] इति भाष्यविरोधः । सत्रं हि कुण्डपायिनामयनम् । वक्ष्यति हि (सूत्रकारः) 'सत्रे वोपायिचोदनात्' इति । किञ्चैवम् 'यो होता सोऽध्वर्युः' इति वचनेन किं विधीयते ? नहि होताऽस्ति, योऽध्वर्युकार्ये विधीयेत । अथ हौत्रमाध्वर्यवं च एकः कर्ता कुर्यात् इत्येतावत् विधीयते, तदा उभयोरपि प्रत्यक्षवचनादिष्टत्वेन तुल्यत्वात् आध्वर्यवस्य बलीयस्त्वं न स्यात्, इत्यधिकरणविरोधः । 'प्रत्यक्षविधानादिष्टम्' इति च निबन्धनग्रन्थतो विरुध्यते । इत्यास्तां तावत् ।

सोम—— **सूत्रार्थस्तु**— विरोधे होता करणमन्त्रं ब्रूयात् प्रत्यक्षवचनकृततत्समवाये आनुमानिकापेक्षया विशेषसद्भावात् । न चैतावता क्रियमाणानुवादिनः परित्यागः, किन्तु तमन्यो ब्रूयात् सोऽपि न सर्वः, किन्तु तेषामृत्विजां मध्ये यस्य मैत्रावरुणादेः प्राधान्यविशेषो होतृप्रत्यासत्तिलक्षणोऽस्ति स ब्रूयात् इति ।

वि — 'यो होताऽध्वर्युरेष स्यादित्याध्वर्यवमाचरन् । हौत्रं कुर्यान्न वा, त्यागहेत्वभावात् करोति तत् ॥, होतैको युगपत् कर्मद्वयं कर्तुं नहि प्रभुः । त्यजेच्चोदकतः प्राप्तं हौत्रं वाचनिकार्थकृत् ॥'

भाट्ट—— दैक्षे पशौ यूपपरिव्याणे आध्वर्यवः करणमन्त्रः 'परिवीरसि' इत्ययं श्रुतः । तथा 'युवा

सुवासाः ' इत्ययं क्रियमाणानुवादी हौत्रोऽपि । तौ च द्वावपि ' यूपाय परिवीयमाणायानुब्रूहि ' इति प्रैषवशात् एतदुत्तरपाठाच्च प्रैषाव्यवहितोत्तरक्षणे एककालीनौ । साङ्गपरिव्याणभावनाकरणसमानकालीनत्वाच्च क्रियमाणानुवादित्वाविरोधः । सोमविकृतौ च कुण्डपायिनामयने तथैव प्राप्तौ । तत्र च ' यो होता सोऽध्वर्युः ' इति श्रुतम् । तस्य च सत्रत्वात् सत्रे च आनतिप्रयुक्तवरणजन्यहोतृत्वाध्वर्युत्वादेरानत्यभावेन अभावात् ' यो होता ' इत्यत्र होत्रध्वर्युपदाभ्यां तत्कार्यलक्षणया कार्यद्वयेऽपि एककर्तृकत्वं विधीयते । अतश्च औपदेशिकैककर्तृकत्वबलेन प्राकृतैककालकत्वबाधात् प्रथमतः करणमन्त्रः पश्चादपरः **इत्याद्यः पक्षः** । होतृत्वादेः अध्यवसायमात्रनिमित्तकत्वस्य स्थापितत्वात् सत्रेऽपि तत्संभवेन पदद्वये कर्मलक्षणायां प्रमाणाभावात् जघन्ये एवाध्वर्युपदे तल्लक्षणामङ्गीकृत्य आध्वर्यवपदार्थानां होतृसंस्कारकत्वेन विधानम् । अप्राकृतकार्यकारित्वापत्तेः होतृपदे कर्मत्वलक्षणापत्तेश्च होतैव वा तत्कर्तृत्वेन विधीयते । तथापि तु ' परिधौ पशुं नियुञ्जीत ' इत्यत्र परिधित्वाविरोधेनेव होतृत्वाविरोधेनैव कर्तृत्वविधानात् हौत्रः क्रियमाणानुवाद्येव तेन प्रयोक्तव्यः, अपरस्तु तेन कालान्तरे अन्येन वा तत्पुरुषेण तस्मिन्नेव काले प्रयोक्तव्यः । **इति प्राप्ते,** पुरोडाशकपालवत् अग्निपरिधानार्थस्यैव परिधेः पशुनियोजने विनियोगात् युक्तं परिधिधर्माणां सत्वक्त्वादीनां प्राबल्यम् । प्रकृते तु अध्यवसायनिमित्तहोतृत्वेनैव आध्वर्यवे विनियोगात् होतृकार्यस्य प्रयोजकत्वकल्पने प्रमाणाभावात् आध्वर्यवस्य करणस्यैव प्रत्यक्षवाक्यावगतशेषित्वेन प्राबल्यात् नातिदेशिकसमाख्याप्रमाणकक्रियमाणानुवादिनः प्राथम्यम् । न वा कालान्तरे तस्य होत्रा पाठः, ' स उ श्रेयान् भवति ' इति लिङ्गावगतक्रियमाणानुवादित्वबाधापत्तेः । नापि करणमन्त्राव्यवहितोत्तरक्षणे होत्रा तस्य पाठः, ' यूपाय ' इत्यादिप्रैषे होतुः कर्तृत्वेन प्रैषार्थे तदसंभवात् । अतः तस्मिन् तत्काले एव होतृपुरुषोऽन्यः कश्चित् अन्तरङ्गः अर्ध्यादिः कर्ता । तस्य कार्यान्तरव्यापृतौ तु बहिरङ्गोऽपि ।

सु— क्रियमाणानुवादिनं कः कुर्यात् इत्याशङ्कोत्तरत्वेन ऋत्विजां मध्ये यस्य मुख्यप्रत्यासत्त्याख्यः, प्रत्यासन्नस्य स्वकर्मणि व्यापृतत्वे यस्य अव्यापृतत्वाख्यो वा विशेषः स प्रयुञ्जीयात् इत्येवम् ' इतरमन्यः ' इति सूत्रोत्तरार्धव्याख्यार्थे अथेत्यादि भाष्यम्, कुण्डपायिनामयने अच्छावाकीयाख्याया होत्रायाः उद्गातृकार्यत्वात् ग्रावस्तोत्रीयायाश्च प्रस्तोतृकार्यत्वात् अच्छावाकग्रावस्तुदभावेन मैत्रावरुणव्यतिरिक्तहोतृपुरुषाभावात् प्रकृतोपयोगानुपपत्तेः इत्याशयप्रदर्शनमात्रार्थत्वात् उपेक्षितम् ।

मण्डन–– ' अध्वर्युमन्त्रः करणो विरोधे । '

शंकर–– ' विरोधे करणं होता । '

* **परिव्राट्** ब्राह्मणः वानप्रस्थः इति धर्मभेदात् संज्ञाव्यवस्था । **भा.** ८।२।५।२५.

परिशेषन्यायः । उक्तादन्यः परिशेषः, तस्य न्यायः रीतिः । **संग्रहः .**

* **परिषद् ।** यज्ञे दक्षिणायाः यस्य यावान् भागः आभजति, स्वयमेव यजमानेन विभज्य तस्य तावान् कल्पयितव्यः (भागः) उत परिषदैव विभज्यते इति संदेहः । यजमानेनैवेति सिद्धान्तः । यदि च परिषदं प्रति उच्येत, परिषच्च विभजेत, न स्वामिना सह अपणिष्यत । तत्र परिक्रय एव नाभविष्यत् । **भा.**१०।३।१२।५१.

* **परिसंख्या** इति परेर्वर्जनार्थत्वात् तद्विषया बुद्धिरभिधीयते (वर्जनकरी बुद्धिः परिसंख्या) । साऽपि गर्दभरशनाया आदाने वा स्यात् मन्त्रे वा । उभयथा त्रिदोषी । विधिपरः सन् न गृह्यते इति स्वार्थे जह्यात् । परस्य च वाक्यस्य ' गर्दभरशनां न ' इत्यस्यार्थे कल्पेत । प्राप्तं च रूपादर्थाद्वा मन्त्रमादानं वा बाधेत । इति पूर्वपक्षे । वा. १।२।४।३१–१. * परिसंख्या ' इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते ' एतादृशेषु उदाहरणेषु निर्दोषा प्रवर्तते । प्रपञ्चितं चैतत् वार्तिककारैः ' सामान्यप्रापणाशङ्का वाक्याद् यत्रानुमानिकात् । श्रुत्या प्राप्तिर्विशेषे च परिसंख्या तदाश्रया ॥ निर्दोषत्वं हि तत्रास्या विधाने सति लभ्यते ॥ ' (वा. ३।१।७।१४ पृ. ७१०) ' रूपप्रकरणद्वारा श्रुतिर्यावत्तु कल्प्यते । तावत् प्रत्यक्षया श्रुत्या विधिः शीघ्रं समाप्यते ॥ अप्राप्तविधिरेवायमतो मन्त्रस्य निश्चितः । परिसंख्या फलेनोक्ता न विशेषः पुनःश्रुतेः ॥ ' (विशेषपुनःश्रुतेः इति मूले । वा. पृ. ७११) । ' अश्वश्रुत्यैव शीघ्रत्वान्मन्त्रे प्राग्विहिते सति । निराकाङ्क्षीकृताम्नाये तथा प्रकरणिन्यपि ॥ लिङ्गप्रकरणद्वारा श्रुतिर्नैवाभिधीयते (नैवानुमीयते इति मूलपाठः) । तस्यामप्रमितायां च (तस्यामप्रापितायां च इति मूलपाठः) मन्त्रप्राप्तिर्न गर्दभे ॥ सोऽयमाभाणको लोके यदश्वेन हृतं पुरा । तत् पश्चाद् गर्दभः प्राप्तुं केनोपायेन शक्नुयात् ॥ (वा. पृ. ७११–१२) प्रयोजनं विधेः किं स्यादस्येति तु निरूपणे । न गर्दभाभिधानीतः फलमन्यन्निवर्तनात् ॥ (वा. पृ. ७११) । यद्यश्वरशनाप्राप्तिं केवलामानुमानिकीम् । प्रत्यक्षश्रुतिवत् कुर्यात् ततः सा स्यादनर्थिका ॥ लिङ्गानुमितया श्रुत्या प्राप्नुयाद्रशनाद्वये । स मा प्रापत् तयेत्येवं प्रत्यक्षा त्वरते (त्वरिता इति मूलपाठः) श्रुतिः ॥ ' (वा. पृ. ७१२) इति । प्राप्तपरिसंख्यायां त्रिदोषत्वनियमश्च वार्तिककारैः अत्रैवोदाहरणे स्थित्वा व्यतिरेकमुखेन प्रदर्शितः ' यद्यस्य विनियुक्तस्य प्रत्यक्षा स्यात् पुनःश्रुतिः । ततश्च परिसंख्यानात् प्रसज्येत त्रिदोषता ॥ यदि (यदा इति मूले पाठः) तु प्रतिबद्धत्वात् सामान्यविनियोगकृत् । नैवास्ति श्रुतिरत्रेति (नैव चेच्छ्रुतिरस्तीह इति मूले पाठः) न प्राप्नोति त्रिदोषता ॥ ' (वा. पृ. ७१२) इति । (अत्र मूलापेक्षया श्लोकानां पाठभेदः क्रमभेदश्च कृतः । स तु विवक्षितार्थस्य स्पष्टीभावाय स्यादिति भाति **के.**) । **रसायनम्.** पृ. १६८–१६९. * परिसंख्या । उभयप्राप्तौ एकविधेः परिसंख्याशब्दवाच्यत्वम् । सु. पृ. ९६ . * परिसंख्या । 'तत्र चान्यत्र च प्राप्ते परिसंख्येति कीर्त्यते' । यः पुनः प्राङ्नियोगात् तत्र चान्यत्र च प्राप्नुयात् इति संभाव्यते, यत्र वा यच्च अन्यच्च, सा परिसंख्या । यथा अत्रैव उदाहृते (इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते इति) यथा च गृहमेधीये पञ्चमे पक्षे । अत्रापि च न प्राप्ते सति एषा प्रवर्तते, प्रापकस्य शास्त्रस्य अननुमितत्वात् । कथं तर्हि ? यदि एतद्वाक्यं नाभविष्यत्, तत एनं प्राप्स्यदिति । सर्वस्य प्रत्यक्षस्य वाक्यस्य नानुमानिकवाक्यप्रतिबन्धमात्रं फलमिष्यते । किं हि तेन पठितेन यस्य अन्यतोऽपि अर्थः सिध्यति, तदर्थं गर्दभरशनानिवृत्तिः फलं कल्प्यते । तेन एवं कल्प्यते, कृत्वाचिन्तान्यायेन यदि नाम एवं वाक्यं न भवेत्, ततः कीदृशमनुष्ठानं स्यात् । तत्र मन्त्रप्राप्तिस्तावत् एकान्तेन सिध्येत् अश्वाभिधान्याम् । तद्वदेव तु गर्दभरशनायामपि प्रसज्येत । यदा तु अनेन वाक्येन प्रत्यक्षेण नैराकाङ्क्ष्यात् अविशेषविनियोगसमर्थवाक्यानुमानं निषिद्धम्, तदा केवलाश्वाभिधानीविषयत्वसिद्धिः इति अपौनरुक्त्यात् अर्थवद्वाक्यम् । **वा.** १।२।४।३४. * परिसंख्या दोषत्रयदुष्टा । स्वार्थत्यागः, अन्यार्थस्वीकारः, प्राप्तबाधश्चेति दोषत्रयम् । **के.** * परिसंख्या दोषत्रयवती अपि क्वचित् स्वीक्रियते । सति हि गत्यन्तरे तेषां दोषत्वम् । वि. १०।७।२. * परिसंख्या द्विविधा श्रौती लाक्षणिकी चेति, ' अत्र ह्येवावपन्ति ' इत्यत्र श्रौती, एवकारेण पवमानातिरिक्तस्तोत्रव्यावृत्तेरभिधानात् । ' पञ्च पञ्चनखा भक्ष्याः ' इत्यत्र तु लाक्षणिकी, इतरनिवृत्तिवाचकपदाभावात् । **मीन्या.** * परिसंख्या न भवति याजमानमन्त्राणां ज्योतिष्टोमे । **संकर्ष.** २।२।४. **मीको.** पृ. १८२६ ' ज्योतिष्टोमे यजमानमन्त्राणाम् ' इत्यत्र द्रष्टव्यम् । * परिसंख्या पशौ हृदयादीनामेव अवदानसंबन्धितया श्रूयमाणानां हविष्ट्वेन तदितरावयवानां हविष्ट्वस्य । १०।७।२. ' हृदयादिन्यायः ' इत्यत्र द्रष्टव्यम् । * परिसंख्या मुख्या अन्यनिवृत्तिफलकविधिरूपा । अन्यनिवृत्त्याख्यफलिका तु गौणी । सु. ३।७।१६ पृ. ३२. * परिसंख्या । ' यत्र सामान्यतः प्राप्स्यन् विशेषे श्रूयते पुनः । परिसंख्येष्यते तत्र ... ॥ ' तच्च नानावाक्यत्वे सत्येव भवति । **वा.** ३। १।७।१४ पृ. ७०९. * परिसंख्या, यथा देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामित्युक्त्वा ' पञ्चम्यां विष्णुमित्रो भोजयितव्यः ' इति । तत्र न भोजनं विधीयते, प्राप्तत्वात् । अन्येषां तु (पञ्चम्याम्) निवृत्तिर्विधीयते । **टुप्.** १०।७।१।२८. * एकादशभिरङ्गैः इतरेषामङ्गानां **परिसंख्या** अग्नीषोमीये पशौ । **भा.** १०।७।२।३–९. * न च परिसंख्या, सामान्य-

विशेषभेदानुपादानात् । यदि हि सामान्येन इदं लक्षणम् ('अर्थैकत्वादेकं वाक्यम्०' इत्यादि एकवाक्यतालक्षणम्) क्वचिदभिधाय पुनः केवलपौरुषेयसंबद्धमुच्येत, ततः परिसंख्यावशेन वैदिकानामिदं तावत् न भवति इत्येतावन्मात्रं गम्येत (इदं पूर्वपक्षे) । **वा.** २।१।१४।४६ पृ. ४४४, * 'नियमः परिसंख्या वा न व्यावर्त्याद्विनेष्यते' । १।३।८।२७ पृ. २८२, * 'सामान्यप्रापणाशङ्का वाक्याद्यत्रानुमानिकात् । श्रुतात् प्राप्तिर्विशेषे च परिसंख्या तदाश्रया ॥ निर्दोषत्वं हि तत्रास्या विधाने सति लभ्यते । कल्प्यत्वेन हि तस्यैषा क्लृप्तादाश्रीयते फलात् ॥' समानवाक्यपदपूर्वभागावस्थितप्रातिपदिकप्रापित – सर्वग्रहसंमार्गज्ञानप्रत्याख्यानेन तदधीनात्मलाभप्रत्ययप्रतिपाद्यायाः परिसंख्यायाः त्रिदोषत्वमपरिहार्यम् । ३।१।७।१४ पृ. ७१०. * हृदयादीनामेव अवदानसंबन्धितया श्रूयमाणानां हविष्ट्वेन तदितरावयवानां हविष्ट्वस्य परिसंख्या अग्नीषोमीये पशौ । हृदयादिन्यायः द्रष्टव्यः । **भा.** १०।७।२।३–९, * **परिसंख्यया** प्रतिषेधः स्यात् । यथा 'पञ्च पञ्चनखा भक्ष्याः' इति शशादीनां पञ्चानां कीर्तनात् अन्येषां भक्षणं प्रतिषिध्यते इत्ययमर्थो वाक्येन गम्यते । १०।७।९।२८. * **परिसंख्यायाः** तत्र हि तत् (दोषत्रयम्) परिहर्तुं शक्यते, यत्र परिसंख्यायमानप्राप्तिशास्त्रमक्लृप्तमुत्प्रेक्षामुखं वर्तते । **वा.** ३।४।१४।४१ पृ. ९७९, * **परिसंख्यायां** त्रिदोषत्वमदोषः । 'सर्वत्र हि द्वयोः संबन्धे कृते तत्स्वरूपं संसर्गश्च प्रतीयते अन्यनिवृत्तिश्च । क्वचिच्च किञ्चित् प्रयोजनवशेन विवक्ष्यते । स्वरूपसंसर्गासंभवे च बलादेव विधिः इतरनिवृत्तिप्रयोजनो भवति । अतश्च त्रिदोषत्वं अदोषः स्वार्थस्य प्राप्तत्वेनैव हेयत्वात् प्रतीतस्य च परार्थस्यापरिग्रहे विध्यानर्थक्यात्' । ३।७।१६।३३ पृ. १०९५. * परिसंख्यायां स्वार्थहानिः परार्थकल्पना प्राप्तबाधश्च । **भा.** ६।१।३।८.

* **परिसंख्यार्थमिदं** श्रवणं अङ्गिरसां द्विरात्रे '.वैखानसं पूर्वेद्युर्भवति षोडश्युत्तरे' इति, यदेतत् द्विरात्रस्य उत्तरे गृह्यते, एतत् अङ्गिरसां द्विरात्रस्य गृह्यते नान्यत्रेति । इदं वृत्तिकारमतम् । **भा.** १०।५।१३। ५३–५४.

* **परिसंख्याविधिः** उभयस्य युगपत्प्राप्तौ इतरव्यावृत्तिपरो विधिः । यथा 'पञ्च पञ्चनखा भक्ष्याः' । इदं अपञ्चनखभक्षणनिवृत्तिपरम् । **मीन्या.** * परिसंख्याविधिः चतुर्विधः— जातिविधिः द्रव्यविधिः गुणविधिः क्रियाविधिश्च । पुनरपि द्विविधः शेषिपरिसंख्या शेषपरिसंख्या चेति । पुनर्द्वेधा शाब्दी आर्थी चेति । तत्र आर्थी द्विविधा प्राप्तपरिसंख्या अप्राप्तपरिसंख्या चेति । पुनर्द्विविधा क्रत्वर्था पुरुषार्था चेति । पुनर्द्विविधा दृष्टार्था अदृष्टार्था च । तत्र इतरनिवृत्त्यंशः सर्वत्र अदृष्टार्थ एव । विधेयांशस्तु क्वचित् दृष्टार्थः क्वचिददृष्टार्थः । पुनर्द्विविधा नियमेन तत्र चान्यत्र च प्राप्तौ, अनियमेन तत्र चान्यत्र च प्राप्तौ इति ! **बाल.** पृ. २४–२६, * परिसंख्याविधिः नियमविधिना बाध्यते । पृ. १४३. * परिसंख्याविधिः प्रायेण विनियोगविषय एव । **मणि.** पृ. ९९.

* **परिसंख्याविधिविवेचनं** मणिकृतम् 'विधिः त्रिविधः' इति बिन्दौ मणिग्रन्थे द्रष्टव्यम् । **के.**

* **परिसंख्याव्यावर्तितविषयः** अभ्यनुज्ञाविधिर्यथा 'पञ्च पञ्चनखा भक्ष्याः' इत्यनेन व्यावर्तितानां मार्जारादीनां अभ्यनुज्ञाविधिः 'प्राणात्यये' इत्यादिः (सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् । ३।४।२८ ब्रसू.) । **बाल.** पृ. १७, * परिसंख्याव्यावर्तितविषयः प्रतिप्रसवविधिः भट्टसोमेश्वरमतेन पशुसोमाधिकरणे 'एकादश वै पशोरवदानानि' इति परिसंख्या । तया अङ्गान्तराणि व्यावर्तितानि इति स्विष्टकृत्यपि शेषकार्ये व्यावर्तितान्येव । तत्र 'त्र्यङ्गैः स्विष्टकृतं यजति' इति अङ्गान्तरेषु त्रयाणां प्रतिप्रसवः । पृ. १६.

* **परिसंख्याशब्दवाच्यायाः** बुद्धेरपि प्रवर्तनफलायाः विधित्वाभ्युपगमः । **सु.** पृ. ९७ .

* **परिसंख्यासूत्रे** 'कण्वरथंतरे प्रकृतावान्तरापूर्वेष्वेव कण्वरथंतरयोनिजन्यगुणाभिधानानां विधानोपपत्तेः हिरण्यगर्भमन्त्रवत् अपूर्वान्तराकल्पनात् तत्साधनीभूते बृहद्रथंतरधर्मप्राप्त्यविरोधः' इत्युक्तम् । **कौ.** १।४।३।३ पृ. १९५.

* **परिसामानि** परितः सामानि । अवभृथसामानि अनुबन्ध्यादिसामानि च । **सु.** पृ. ११८३.

* **परिहरणं** युगपत् ब्रह्मभक्षाणां शतकृष्णलचरौ । **भा.** १०।२।४।१७.

* **परिहारः** (समर्पणम्) ब्रह्मणे सर्वभक्षाणां पुरुषान्तरेभ्योऽपनीय शतकृष्णलचरौ । **भा.** १०।२।५। १८–१९.

* लोकानवगतं विवेकं कुर्वन्ति **परीक्षकाः** । **सु.** पृ. ५६२. * नहि यथावगताभ्युपगमात् अन्यत्किञ्चित् साधीयः **परीक्षकाणाम्** । **वा.** १।२।१।१ पृ. १०६–१०७ .

परुषिदिताधिकरणम् । दिग्विभागाधिकरणम् । परुषिदितादीनामनुवादः ॥

परुषिदितपूर्णघृतविदग्धं च तद्वत् । ३।४।३। ११ ॥

भाष्यम्— दर्शपूर्णमासयोराम्नातम् 'यत्परुषि दितं तद्देवानाम्, यदन्तरा तन्मनुष्याणाम्, यत्समूलं तत्पितॄणाम्' इति । तथा 'यो विदग्धः स नैर्ऋतः, योऽशृतः स रौद्रः, यः शृतः स देवत्यः । तस्मादविदहता श्रपयितव्यं सदेवत्वाय' इति । ज्योतिष्टोमे श्रूयते– 'यत्पूर्णं तन्मनुष्याणामुपर्यर्धो देवानामर्धः पितॄणाम्' इति । तथा 'घृतं देवानां मस्तु पितॄणां निष्पक्वं मनुष्याणाम्' इति । तत्र मनुष्यसंबद्धेषु रौद्रे च संदेहः किं मनुष्याणां धर्मा विधयः, उत कर्मधर्मा अनुवादाः । अथ यत्प्रकरणे मनुष्यप्रधानं रौद्रं च तत्र विशेरन्, उताऽऽतिथ्ये, उतार्थवाद इति । किं तावत् प्राप्तम्? एतान्यपि तद्वत् । यो निवीते पूर्वः पक्षः, स एतेषां पूर्वः पक्षः । यो मध्यमः, स मध्यमः । यः सिद्धान्तः, स एव सिद्धान्तः । अर्थवत्त्वात् मनुष्यसंबन्धाच्च विधयो मनुष्यधर्माश्च इति पूर्वः पक्षः । उपरि मूले च अनियमात् लाघवम् । अशृतं रोगदत्वात् रौद्रम् । पूर्णेऽपि श्लक्ष्णत्वात् लाघवम् । एवं आयुतं शिरसि निहितं मनुष्याणां सुखकरमेव । अर्थप्राप्तवात् अनुवादः इत्युत्तरः पक्षः । विधिः कर्मधर्मप्रायात् समाख्यानाच्च कर्मधर्मः इति पक्षः । अन्वाहार्ये दक्षिणासु च इति वाक्यप्रकरणानुग्रहात् पक्षः । आतिथ्ये इति वाक्यभेदप्रसङ्गात् । अर्थवादः इति प्रकरणात् विधिना एकवाक्यत्वादिति । 'पर्व प्रति लुनाति' 'उपरि बिलात् गृह्णाति' 'नवनीतेनाभ्यङ्क्ते' 'अविदहता श्रपयितव्यम्' इत्येभिः सह एषामेकवाक्यभावः । तस्मात् एते न विधयः (किन्तु) अर्थवादाः इति ।

वा— दिग्विभागपरुषिदितघृतादीनां निवीताधिकरणवत् सर्वे प्रकारा अवगमयितव्याः । कां पुनरत्र अतुल्यां शङ्कां व्यावर्तयितुमतिदेशः क्रियते ? किमर्थं वा अधिकरणद्वयमारभ्यते ? तदुच्यते । 'पुराकल्पस्वरूपेण भजत्यर्थानुषङ्गिणा । दिग्विभागस्य संबन्धान्निवीतातुल्यतामतिः ॥ इतरेषां तु षष्ठ्यन्तसंबन्धेऽपि फलोदयः । पुरुषं प्रति विस्पष्टस्तत्क्रियाऽन्तर्गतात्मनाम् ॥' स्वाभाविकं दिगादीनां सर्वक्रियाऽङ्गत्वं न निवीतवदपूर्वं विधातव्यम् । तत्र मनुष्यसंबन्धेऽपि नियमफलमात्रकल्पनमेव, न क्रियाफलकल्पना । तदपि च लौकिकीनामेव क्रियाणां अविघ्नसमापनं अपेक्षावशात् कल्प्यते, नान्यत् स्वर्गादि । तेन एवमाभाति – 'यावत् किञ्चित् मनुष्याः स्वार्थं कर्म अनुतिष्ठन्ति, तत्र प्रतीची उदीची च अङ्गं भवति । यावच्च दर्भलवनम्, तत् अन्तरा कर्तव्यम् । यावत् मीयते, तत् पूर्णेन मातव्यम् । यावच्च स्नेहकार्यम्, तत् सर्वं विलीनेन नवनीतेन निष्पक्व-आयुतशब्दवाच्येन कर्तव्यम् । नैर्ऋतरौद्रयोश्च विदग्धत्व–अशृतत्वे कर्तव्ये' इति । तेन अत्रापि पूर्वतुल्यत्वं साधयितव्यं इत्यारम्भः ।

तत्र मनुष्यधर्मः 'शब्दस्य तत्प्रधानत्वात्' (३।४। १।१) इति विनाऽपि षष्ठीनिर्देशात् 'अभजन्त' इति मनुष्यसंबन्धात् तादर्थ्यम् । इतरेषु षष्ठी एव । तथा 'अपदेशो वा' (३।४।१।२) इति सौकर्यात् प्राप्तिरभिधीयते । पूर्वाह्णे हि पृष्ठतः आदित्यं कृत्वा सुखं व्याप्रियन्ते इति प्रतीचीप्राप्तिः । तथा अन्तरालवन–पूर्णयोः अप्रयत्नसाध्यत्वात् प्राप्तिः । तथा विदग्धे कृष्णत्वात् एकवर्णनिर्ऋत्याख्यपृथिवीसंबन्धप्राप्तिः । अशृते च रोगदत्वात् रौद्रता । नियोगतस्तु अप्राप्तेः सर्वत्र नियमविधिः । प्रकरणसमाख्याभ्यां च कर्मधर्मः । सर्वप्रमाणानुग्रहार्थं प्रकरणे मनुष्यप्रधाने निवेशः । वाक्येन प्रकरणसमाख्ययोः

बाधात् फलकल्पनाभयाच्च आतिथ्यादौ निवेशः। तेनापि सह संबन्धप्रमाणाभावात् प्रकरणे संभविनश्च अनुत्कर्षात् (१।२।२।२४) प्राचीनविधिशेषत्वाच्च अर्थवादः इति सिद्धान्तः । सम्यक्श्रुतयथाविदितविषय–अन्यविषय–स्तुतिविवेकसिद्धिः। ("सम्यक् श्रुतः यथाविदितः अनुवाद्यश्च विषयो यस्याः सा सम्यक्श्रुतयथाविदितविषया स्तुतिः । अन्यः उक्तविपरीतः विषयो यस्याः सा स्तुतिः अन्यविषया । सम्यक्श्रुतयथाविदितविषया चासौ अन्यविषया चासौ इति विशेषणोभयपदः कर्मधारयः। सा चासौ स्तुतिश्च । विवेकेन सिद्धिः विवेकसिद्धिः । तादृशस्तुतेः विवेकसिद्धिः इति विग्रहः। तत्र सम्यक्श्रुतत्वं स्वसंबन्धिसंबन्धित्वेन श्रुतत्वम्। यथा ' यथा प्रतीची उदीची मनुष्याणामुचिता, तथा प्राची देवानाम् ' इत्यत्र। विवेकश्च– ' निवीतोदाहरणे यदि औचित्येन स्तुतिः, ततोऽत्रापि औचित्येन। यदि तत्र विपर्ययेण स्तुतिः अत्रापि विपर्ययेण ' इति। इति **सुधासंक्षेपः** । अग्रे अक्षरशः **सुधा** यथा " विदग्धोदाहरणे वा ' विदग्धाशृतत्वयोः काष्ण्यरोगदत्वापादकत्वेन अप्राशस्त्यात् अविदहनश्रपणमेव प्रशस्तम् ' इत्येवंरूपत्वेन औचित्यविपर्ययरूपत्वाभावात् विदग्धोदाहरणात् विवेकेन उदाहरणान्तरेषु ईदृश्याः स्तुतेः सिद्धिः। " इति।)

सोम–– (दिग्विभागपरुषिदिताधिकरणयोः) अतिदेशाविशेषेऽपि दिग्विभागस्य ' अभजन्त ' इत्याख्यातेन विधित्वस्य झटिति प्रतीतेः विधिप्रतीतितारतम्यात् अधिकरणद्वयस्य **पौर्वापर्यं** बोध्यम्। सूत्रे परुषिदितं इति वाक्यानुकरणत्वात् अलुक्, विदग्धशब्दः अशृतोपलक्षणार्थश्च।

वि–– ' परुषिच्छिन्नमित्युक्त्या बर्हिषस्तु समूलताम्। घृतं दैवं मस्तु पित्र्यमित्युक्त्या नवनीतकम्॥ यो विदग्धः स इत्युक्त्या पुरोडाशस्य पक्वताम्। स्तौति पूर्वोत्तरौ पक्षौ योजनीयौ निवीतवत्॥ '

भाट्ट— दर्शपूर्णमासयोः ' पर्व प्रति लुनाति ' इत्यादिविधेः ' यत् परुषि दि(तं)नं तद्देवानाम्, यदन्तरा तन्मनुष्याणाम्, यत् समूलं तत्पितृणाम् ' इति शेषः। तथा सोमे ' यत् पूर्णं तन्मनुष्याणां यदुपर्यर्धस्तद्देवानाम् ' इति ' उपरि बिलाद्गृह्णाति ' इत्यस्य विधेः। तथा तत्रैव ' नवनीतेनाभ्यङ्क्ते ' इत्यस्य ' घृतं देवानां मस्तु पितृणां निष्पक्वं मनुष्याणाम् ' इति। तथा दर्शपूर्णमासयोः ' अविदहता (श्रपयितव्यः) शृतंकृत्यः ' इति विधेः ' यो विदग्धः स नैर्ऋतः ' इति। तत्र मनुष्यसंयुक्तक्रियाविशेषस्य लवनादेरुपादानात्, तत्र च लवनत्वाद्यवच्छेदेन अन्तरात्वादिगुणानां नित्यप्राप्त्यभावात् विध्यन्तरकल्पनया तत्र तद्विधानम्। न च फलकल्पना, ' तद्यथैवादो मनुष्यराज आगते ' इत्यादौ, ' नयनं दक्षिणं दीक्षितः पूर्वमाङ्क्ते' इत्यादौ च शतशस्तस्या अङ्गीकारात्। अन्यथा तत्तत्स्मृतीनां तत्तदर्थवादोन्नीतविधिमूलकत्वानुपपत्तेः। ' यो विदग्धः ' इत्यत्र तु विदग्धनिर्ऋतिदेवतोभयसंबन्धस्य अप्राप्तत्वात् विध्यन्तरकल्पनायां नैव किञ्चिद्बाधकम्। **इति प्राप्ते,** ' परुषि दि(तं)नम् ' इत्यत्र दितपदस्य वैदिकलवनपरस्य ' अन्तरा ' इत्यत्रानुषङ्गेण तदर्थपरत्वे विकल्पप्रसङ्गात्, अर्थान्तरपरत्वे वैरूप्यापत्तेः अनुषङ्गायोगेन अध्याहारावश्यम्भावात्, ' यदन्तरा ' इति यच्छब्दयोगेन च लोकप्राप्तयादृच्छिकान्तरालवनव्यक्तिमुद्दिश्यैव मनुष्यसंबन्धस्य स्तुत्यर्थमुपदेशप्रतीतेः लौकिकलवनत्वावच्छिन्ने अन्तरात्वस्याप्रतीतेः, तस्य च तद्व्यक्तौ नित्यप्राप्त्या न विध्यन्तरकल्पनम्। ' नयनं दक्षिणं दीक्षितः पूर्वमाङ्क्ते सव्यं हि मनुष्या आञ्जते ' इत्यत्र तु मनुष्यनेत्राञ्जनत्वावच्छेदेनैव सव्यपूर्वकत्वस्य स्तुत्यर्थमुपादानात्, तादृशस्य च नित्यप्राप्त्यभावेन विधिकल्पकत्वमिति विशेषः। यादृशस्य हि स्तुत्यर्थमुपादानम्, तादृशस्य नित्यवदप्राप्तौ विधिकल्पनं नान्यत्र। अत एव ' यो विदग्धः ' इत्यादौ विदग्धत्वनिन्दार्थं तस्य कर्मानर्हत्वफलकनिर्ऋतिसंबन्धमात्रस्य उत्प्रेक्षाविषया संकीर्तनात् निर्ऋतिसंबन्धस्य ' तं यज्ञं निर्ऋतिर्गृह्णाति ' इत्यादौ कर्मानर्हत्वप्रयोजनकत्वावगतेः, उत्प्रेक्षायां च उत्प्रेक्षितार्थस्य प्राप्त्यभावेऽपि क्षतिविरहात्, निर्ऋतेः रक्षोधिपतित्वेन देवानर्हभक्षकत्वस्य प्रमाणान्तरप्राप्तत्वाच्च न विधिकल्पकत्वम्। न हि अयं देवतातद्धितः, येन

तस्या अप्राप्तत्वाद्विधिः कल्प्येत। निन्दार्थे संबन्धसामान्येनापि तदुपपत्तेः। अतो नैते विध्यन्तरकल्पकाः।

मण्डन— ' पूर्णादितन्त्रं विहितं स्तवाय। ' ३.

शंकर–– ' पूर्णतादि च तद्वत् स्यात्। ' ९. (तद्वत् निवीतवत्।)।

❀ **परुषिदितपूर्णघृतविदग्धं च तद्वत्। ३।४। ३।११॥**

दर्शपूर्णमासयोः ' यत् परुषि दितं तद्देवानाम्, यदन्तरा तन्मनुष्याणाम्, यत् समूलं तत् पितृणाम् ' इति श्रूयते। तथा ' यो विदग्धः स नैर्ऋतः, योऽशृतः स रौद्रः, यः शृतः स देवत्यः। तस्मादविदहता श्रपयितव्यं सदेवत्वाय ' इति च। ज्योतिष्टोमे च श्रूयते– 'यत् पूर्णं तन्मनुष्याणाम्, उपर्यर्धो देवानाम्, अधः पितृणाम् ' इति, तथा ' घृतं देवानाम्, मस्तु पितृणाम्, निष्पक्वं मनुष्याणाम्' इति। तत्र मनुष्यसंबद्धेषु रौद्रे च विचारः। तत्र विधयः इति पूर्वः पक्षः। परुषि पर्वणि दितं छिन्नं बर्हिः, पूर्णः सोमरसेन ग्रहश्चमसो वा, घृतं क्षरत् श्च्योतत् आज्यम्, विदग्धः अग्नेरूष्मणा शृतश्चरुः, एतेषां समाहारः। परुषिदितपूर्णघृतविदग्धं च द्रव्यम्, तद्बोधकं वाक्यजातम्, तद्वत् दिग्विभागवाक्यवत् न विधिः किन्तु अर्थवादः। ' पर्व प्रति लुनाति ' ' उपरि बिलात् गृह्णाति ' ' नवनीतेनाभ्यङ्क्ते ' ' अविदहता श्रपयितव्यम् ' इत्येतैः विधिवाक्यैः एकवाक्यत्वात् प्रकरणाच्च। तस्मादेते न विधयः, किन्तु अर्थवादाः इति सिद्धान्तः। ' परुषि ' इति पदं सर्वैरेव पृथङ्मुद्रितम्। तदयुक्तम्। तत्र सोमनाथी–सूत्रार्थग्रन्थे ' परुषिदिनमिति वाक्यानुकरणत्वात् अलुक् ' इति। श्रौतशब्दार्थस्तु– परुषि पर्वणि दितं खण्डितम्। अन्तरा मूलपर्वणोर्मध्ये (इति सोम.)। विदग्धः अग्नेः ऊष्माधिक्येन क्षामः। अशृतः अपक्वः। **के.**

* **परोक्षात्** प्रत्यक्षं बलीयः। ' सामान्येन यत् प्राप्नोति, तत् परोक्षं लक्षणया। यत्तु विशेषेण तत् प्रत्यक्षं श्रुत्या। श्रुतिश्च लक्षणाया बलीयसी, प्रत्यक्षं च परोक्षात् '। **भा.** ३।६।३।१०.

* **परोक्षत्वं** साक्षात्करोमि इत्येतादृशविषयताशालिज्ञानाविषयत्वम्। **मणि.** पृ.११६.

* यथा च अर्थादाक्षिप्यमाणं श्रौतेन निवर्त्यते, तथा **परोक्षवृत्त्याऽपि**। **वा.** २।२।१३।२९ पृ. ५६६.

* **परोपकाराय** प्रपास्तडागानि च, न धर्माय इत्येवावगम्यते। तथा च दर्शनम् ' धन्वन्निव प्रपा असि ' इति (यथा धन्वनि निरुदके कृताः प्रपाः परेषामुपकुर्वन्ति, एवं त्वम्।)। **भा.** १।३।१।२ पृ. १६६.

❀ **परोपकाराय सतां विभूतयः इति न्यायः।** यत्र परोपकारविवक्षा, तत्रास्य प्रवृत्तिरिति। उक्तं च ' परिनिर्मथ्य वाग्जालमिदमेव सुनिश्चितम्। नोपकारात् परं पुण्यं नापकारादघं परम्॥ '। **साहस्री.** १०००.

* **परोपकारश्रुतेः** सर्वसाधारण्यम्। **सु.** पृ. १२७.

❀ **पर्जन्यन्यायः**। यथा पर्जन्यो जलेऽपि वर्षति स्थलेऽपि वर्षति। एवं विवक्षायां प्रवर्ततेऽयं न्यायः। अयम् ' इको झल् ' पा. १।२।९३ इति सूत्रमहाभाष्येऽभिहितः। तद्यथा– कृतकारि खल्वपि शास्त्रं पर्जन्यवत्। तद्यथा पर्जन्यो यावदूनं पूर्णं च सर्वमभिवर्षति इति। किञ्चायं भ. गी. अ. ९ श्लो. ९ टीकायां नीलकण्ठयां व्यवहृतः। तथाहि– ' उदासीनवदासीनम् ' इति। यथा पर्जन्यो बीजविशेषेषु रागं केषु चित् द्वेषं चाकृत्वा उदासीनः सन् वर्षति, एवमीश्वरोऽपि पुण्यवत्सु रागं पापिषु द्वेषं चाकुर्वन् जगत्सृजतीति प्रोक्तमिति। **साहस्री.** ६१६.

* **पर्णता** जुहूपस्थितक्रत्वपूर्वार्था, न तु जुहूस्वरूपार्था। **सोम.** ११।३।२.

* **पर्णतादीनामनारभ्याधीतानां** प्रकृतौ निवेशः, विकृतौ तु अतिदेशेन प्राप्तिः। **बिन्दु.** ३।६।१.

* **पर्णतान्यायः**। (३।६।१)। अत्र प्रकृत्यर्थता उक्ता। अधिकरणं तु **मीको.** पृ. ३७३ ' अनारभ्याधिकरणम् ' इत्यत्र द्रष्टव्यम्। **के.** * पर्णतान्यायः। (४।३।१)। अत्र फलश्रुतिरर्थवाद इत्युक्तम्। **के.** ' पर्णमयीन्यायः ' इत्यत्रापि द्रष्टव्यम्। * अशनायापिपासाशोकमोहजरामृत्यवतीतासंसार्यात्मज्ञानं च क्रतुप्रवृत्तिविरोध्यपि, अतः

कथं तस्य क्रत्वङ्गता **पर्णतान्यायेन** भवेत् । **आभरणं.** ३।४।१।२–३.

* न च गुणकामानां विकृतौ अप्रवृत्तिः, वषट्कारस्य 'एष वै सप्तदशः प्रजापतिः यज्ञे अन्वायत्तः' इत्यनारभ्याधीतवचने साक्षाद्यज्ञोद्देशेन विधानात् **पर्णतान्यायाभावेन** प्रकृतिविकृतिसाधारण्येन उपदिष्टतया विकृतावपि ईदृशगुणकामप्राप्त्युपपत्तेः । **भाट्ट.** १०।२।२१.

* **पर्णतावाक्ये** अव्यभिचरितलिङ्गोपस्थापितक्रतुलक्षणां विधौ अङ्गीकृत्य वाक्यशेषस्य प्राशस्त्यलक्षणाऽपि अङ्गीकर्तव्या । **परिमल.** ३।३।२७।४२ ब्रसू.

* '**पर्णन्यायोऽ**तिदिष्टे स्यात्' । पर्णवाक्यात् पर्णतायाः यावत्क्रतुप्रवेशो जुहूद्वारम् । सा च जुहूः प्रकृतावेव विहिता विकृतिषु सर्वत्रातिदिश्यते । **वि.** ३।७।२०.

* **पर्णमयी** जुहूः (पर्णमयी पलाशकाष्ठजन्या) । **भा.** ३।६।१।१.

* रात्रिसत्रस्थले (४।३।८।१७–१९) प्रकारान्तरेण फलाकाङ्क्षाया अशान्तेः, अगत्या स्तुतिसमर्पकस्यैवार्थवादस्य फलसमर्पकत्वम्, उदुम्बरतापर्णतादीनां तु क्रतूपकारेण फलाकाङ्क्षाशान्तेः नागतिकत्वं इति प्रतिपादनार्थे **पर्णमय्यधिकरणम्** । **के.** * **पर्णमय्यधिकरणे** अपापश्लोकश्रवणादीनां प्रशंसार्थत्वेन उपात्तानां फलत्वाभावः वक्ष्यते । **सु.** १।२।१।७ पृ. ३५, * पर्णमय्यधिकरणे तीर्थस्नाने (तीर्थे एव समानानां भवति इति) फलश्रुतेः फलसमर्थकत्वपूर्वपक्षः निराकरिष्यते । पृ. १४६५. * पर्णमय्यधिकरणे साध्यांशविचारः । औदुम्बरे तु साधनांशद्वारा । **के.** (शा. १।२।२) । * अपापश्लोकश्रवणादीनां फलत्वेन प्रतिपादनं न संभवति 'स्वर्गकामः' इत्यादिवत् कामशब्दसंयोगाभावात् इति **पर्णमय्यधिकरणे** वक्ष्यते । **सोम.** १।२।२. * औदुम्बरत्वादेः यूपार्थत्वेनैव नैराकाङ्क्ष्यं रात्रिसत्रवत् फलानपेक्षत्वात् इति पर्णमय्यधिकरणे वक्ष्यामः । **कौ.** १।२।२।२२. * कर्मिपदनिरपेक्षसमभिव्याहारमात्रप्रमाणकस्य च साध्यत्वस्य पर्णमय्यधिकरणे निराकरिष्यमाणत्वात् फलत्वाभावेन पूतत्वादीनां कर्तृप्रवृत्तिकारणत्वं नास्ति । **सु.** पृ. ४९०. * न चैवंविधेन कामशब्दरहितेन शक्यते फलं प्रतिपादयितुं इति पर्णमय्यधिकरणे वक्ष्यामः (४।३।१।१) । **शा.** १।२।२. * प्रसङ्गात् यज्ञपतिप्रथनं पुरोडाशप्रथनस्य फलत्वेन कीर्त्यते स्तुत्यर्थं वेति जिज्ञासितुं व्याचष्टे । एवं तु मान्त्रवर्णिकफलकल्पनसंभवेन यज्ञपतिप्रथनस्य फलत्वानपायात्, पर्णमय्यधिकरणे निराकृतत्वेन च जिज्ञासाऽनुपपत्तेः अपरितोषात् मन्त्राभिप्रायेण व्याचष्टे । **सु.** १।२।४।३५ पृ. १०७, * मान्त्रवर्णिकफलकल्पनसंभवेन यज्ञपतिप्रथनस्य फलत्वानपायात् पर्णमय्यधिकरणे निराकृतत्वेन च जिज्ञासाऽनुपपत्तिः । पृ. १०७. * वेदाध्ययनमात्रस्य यत् फलाम्नानमिव दृश्यते 'यंयं क्रतुमधीते तेनतेनास्येष्टं भवति' (तैआ. २।१५) इति तस्यापि चतुर्थतृतीयाद्ये पर्णमय्यधिकरणे अर्थवादतां वक्ष्यति । **वैद्यनाथी.** १।१।१।१.

* **पर्णमय्यधिकरणन्यायः** अर्थवादकल्प्यफलविषयः । **सु.** पृ. ८७३. * **पर्णमय्यधिकरणन्यायेन** पूर्णाहुतेराधानाङ्गभूतकर्मरूपत्वात् प्रयाजादिवत् प्रयोजनानपेक्षत्वम् । **कौ.** १।२।१।४. * 'यः सत्राय दीक्षितानां म्रियेत अपि तस्य फलम्' इति फलरूपोऽयमर्थवादः **पर्णमय्यधिकरणन्यायात्** । **रत्न.** ६।३।९।२५.

* **पर्णमय्यधिकरणसिद्धः** अग्निचयनस्य फलवद्फलत्वविचारः । **सु.** पृ. ९४९.

* **पर्णमय्यधिकरणसूत्रे** एव 'खादिरं वीर्यकामस्य यूपं कुर्यात्' इत्येवमाद्यायां फलप्रधानायां श्रुतौ फलमुच्यते इति वदता सूत्रकृता कामपदयुक्तायां श्रुतौ फलार्थत्वं वक्ष्यते । **सु.** पृ. १४६८.

* अनारभ्याधीतत्वात् उपास्तीनां वाक्यात् क्रतुसंबन्ध एव सिध्यति, न फलसंबन्ध इति वक्तुं **पर्णमयीतामुदाहरति** ...... । एतत् पूर्वपक्षे । **कल्पतरु.** ३।३।२७।४२ ब्रसू.

* **पर्णमयीत्वं** क्रत्वर्थम्, न पुरुषार्थमपि, अपापश्लोकश्रवणं तु अर्थवादः । **भा.** ४।३।१।१–३. * **पर्णमयीत्वस्य** क्रतुसंबन्धो वाक्येन । **वि.** ४।३।१, * पर्णमयीत्वस्य फलश्रवणमर्थवादः । ४।३।१.

* सा च फलश्रुतिः ('यस्य पर्णमयी० न स पापं श्लोकं शृणोति') न फलपरा फलवत्क्रत्वर्थत्वात् पर्णतादेः फलशेषत्वायोगात् । अतः सा अर्थवाद एवेति **पर्णमयीत्वाधिकरणे** (४।३।१।१) समर्थितम् । तथा आत्मज्ञानेऽपि फलश्रुतिरर्थवाद एव स्यात् इत्याह (पूर्वपक्षी) । **न्यायनि.** ३।४।१।२ ब्रसू.

पर्णमयीन्यायः । पर्णतान्यायः । (फलश्रुतिः अर्थवादः) ॥

द्रव्यसंस्कारकर्मसु परार्थत्वात् फलश्रुतिरर्थवादः स्यात् । ४।३।१।१ ॥

भाष्यम्–– 'यस्य खादिरः स्रुवो भवति स छन्दसामेव रसेनावद्यति सरसा अस्याऽऽहुतयो भवन्ति' । 'यस्य पर्णमयी जुहूर्भवति, न स पापं श्लोकं शृणोति' इति । 'यस्याऽऽश्वत्थ्युपभृद्भवति ब्रह्मणैवास्यान्नमवरुन्धे' । 'यस्य वैकङ्कती ध्रुवा भवति प्रत्येवास्याऽऽहुतयस्तिष्ठन्ति अथो प्रैव जायते' 'यस्यैवंरूपाः स्रुचो भवन्ति सर्वाण्येवैनं रूपाणि पशूनामुपतिष्ठन्ते, नास्यापरूपमात्मञ्जायते' इति । तथा ज्योतिष्टोमे संस्कारे फलश्रुतिः 'यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते' । तथा 'केशश्मश्रु वपते, दतो धावते, नखानि निकृन्तते, स्नाति, मृता वा एषा त्वगमेध्यं वाऽस्यैतदात्मनि शमलं तदेवोपहते मेध्य एव मेधमेवमुपैति' । कर्मणि फलं श्रूयते 'अमीषू वा एतौ यज्ञस्य यदाघारौ' 'चक्षुषी वा एतौ यज्ञस्य यदाज्यभागौ' 'यत्प्रयाजानुयाजा इज्यन्ते वर्म वा एतद्यज्ञस्य क्रियते वर्म यजमानस्य भ्रातृव्यस्याभिभूत्यै' इति । अत्र संदेहः । किमिमे फलविधय उतार्थवादा इति । किं प्राप्तम् ? फलविधयः, प्रवृत्तिविशेषकरत्वात् फलविधेः । 'यथा खादिरं वीर्यकामस्य यूपं कुर्यात्, पालाशं ब्रह्मवर्चसकामस्य, बैल्वमन्नाद्यकामस्य' इति । यथैते फलविधय एवमिहापि द्रष्टव्यम् । **एवं प्राप्ते, ब्रूमः** । फलार्थवादा इति । कुतः ? परार्थत्वात् । क्रत्वर्थान्येतानि । जुहूः प्रदाने गुणभूता, उपभृदुपधारणे, ध्रुवा आज्यधारणे, अञ्जनवपनादि च यजमाने, आघारावाज्यभागौ प्रयाजानुयाजाश्च आग्नेयादिषु । यदि फलेऽपि गुणभावः स्यात्, अन्यत्रोपदिष्टानामन्यत्र पुनर्गुणभाव उपदिष्ट इति प्रतिज्ञायेत । न चैतन्न्याय्यम् । परार्थता हि गुणभावः । क्रत्वर्थता चैषां शब्देन, जुह्वा जुहोति– जुह्वा होमममिनिर्वर्तयतीति । एवं सर्वत्र । तस्मान्नैते पुरुषार्थाः ।

टुप्–– अपापश्लोकश्रवणार्थिन उपायमन्विच्छतः पर्णमयीत्वमुपायत्वेन विधीयते । जुह्वाश्च जात्याकाङ्क्षायां पर्णमयीत्वं परिच्छेदकत्वेन विधीयते । तत् (पर्णमयीत्वम्) उभे अपि निराकाङ्क्षीकर्तुं शक्नोतीत्युभाभ्यां संभन्त्स्यते । 'एकस्य तूभयत्वे संयोगपृथक्त्वम्' इत्यनारभ्याधीताः (पर्णमयीत्वादि) जातिविशेषाः क्रत्वर्थाः पुरुषार्थाश्च, यथा खादिरतादयः । अथवा 'जुह्वा जुहोति' इति प्रकरणे जुहूर्विहिता 'न स पापं श्लोकं शृणोति' इत्यनेन पुरुषार्थतया विधीयते । सा च साध्यसाधनत्वादृते नोपपद्यत इति वर्तमानापदेशस्यापि विधायिका शक्तिः कल्प्यते । भवतिश्च भावयतिलक्षणार्थ इति । 'यदाङ्क्ते' इत्येवमादिष्वप्येवं योज्यम् ।

एवं प्राप्ते, ब्रूमः । जुह्वां क्रत्वर्थतया विधीयमानायां यदिदं तत्फलमेषोऽर्थवादः स्तावकत्वेन । विश्वजिद्वत्फलमशक्यं कल्पयितुम् । यथा प्रणयनं अभूत् तथाविधां जुहूमाश्रित्य जातितो गुणकामनाऽपि नास्ति, आश्रयस्याविपरिवर्तमानत्वात् । जुहूराश्रय इति चेन्न, द्रव्यत्वात् । औदासीन्यव्यावर्तको ह्याश्रयः । क्रिया च तथा, न द्रव्यम् । दीयमानोऽपि (आश्रयः) वाक्येन दीयते । तत्र वाक्यभेदः । स चाऽऽश्रयान्तरमपेक्षते । न चाऽऽश्रयो विपरिवर्तते । तस्मादवगतक्रत्वर्थायां जुह्वां जातिमपेक्षमाणायां (तदङ्गत्वेन) जातिर्विधीयते । तस्यां विधीयमानायां फलश्रुतिरर्थवादः, परार्थत्वात् ।

उत्पत्तेश्चातत्प्रधानत्वात् । २ ॥

भाष्यम्–– अथोच्येत । पुरुषमपि प्रति गुणभाव उपदिष्टः 'यस्य पर्णमयी जुहूर्भवति, न स पापं श्लोकं शृणोति' इत्येवमादिमिर्वाक्यैरिति । तच्च न । कस्मात् ? उत्पत्तेरतत्प्रधानत्वात् । न तत्र पर्णमय्या जुह्वा अपापश्लोकश्रवणं क्रियत इति कश्चिच्छब्द आह । एतावत् श्रूयते, यस्यासौ भवति न स पापं श्लोकं शृणोतीति । एतावदत्र शब्देन गम्यते, यस्यैवंलक्षणा जुहूस्तस्या-

पापश्लोकश्रवणमिति । तत्र जुह्वा तत् क्रियते जुहूर्वा तदथति नैतच्छब्द आह । **ननु** अनुमानादेतद्गम्यते । ध्रुवं पालाश्या जुह्वा तत्क्रियते, यतस्तस्यां सत्यां तद्भवतीति । **अत्रोच्यते** । नैवंजातीयकं कार्यकारणत्वेऽनुमानं भवति । कार्यकारणसंबन्धो नाम स भवति, यस्मिन्सति यद्भवति यस्मिंश्चासति यन्न भवति तत्रैव कार्यकारणसंबन्धः । इह तु तद्भावे भावो ज्ञातः, नाभावेऽभावः । यस्य पालाशी न भवति तस्यापापश्लोकश्रवणं नास्तीति नैवंजातीयकः शब्दोऽस्ति । तेन न नियोगतोऽवगम्यते, तेनेदं क्रियते इति । लक्षणमेतत्पुरुषस्य गम्यते । तस्मान्नानुमानम् ।

अपि च, यस्यापि जुहूः पालाशी भवति तस्यापि पापश्लोकश्रवणं भवति । कथमवगम्यते ? प्रत्यक्षतः । **ननु** एवं सत्यग्निहोत्रेणापि फलं न साध्येत । न हुतमात्रेण फलं दृश्यत इति । **नैष दोषः** । न हि तत्रोच्यते तावतैव फलं भवतीति । इह तु वर्तमानायां जुहूसत्तायां वर्तमानस्य पापश्लोकश्रवणस्य प्रतिषेधः । तस्मान्न तत्रानुमानम्, इदं कार्यमिदं कारणमिति । अग्निहोत्रादिषु तु शब्देनैव कार्यकारणसंबन्ध उच्यते । तस्मात्तत्र तत्कालेऽदृश्यमानेऽपि फले कालान्तरे फलं भविष्यतीति गम्यते, न त्वेवंजातीयकेषु । तस्मान्नैवंजातीयकेभ्यः फलमस्तीति । **ननु** 'यस्य पालाशी जुहूर्भवति न स पापं श्लोकं शृणोति' इत्येवमुक्ते तत एव तत्फलं भवतीति गम्यते । तस्मादिहापि कालान्तरे फलं भविष्यतीति । **उच्यते** । सत्यं गम्यते । प्रमाणं तत्र किमिति विचारयामः । न तावत् प्रत्यक्षम्, नानुमानम्, नेतरद् दृष्टविषयमुपमानादि । नो खल्वपि शब्द इत्येतदुक्तम् । वाक्यार्थोऽपि पदार्थोपजनितो भवति नान्यथा । तदुक्तम् 'तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात्' इति । तस्मादप्रमाणमूलत्वात् मिथ्याविज्ञानमेतत् । लौकिकेषु तु वाक्येष्वेवं गम्यते । तानि हि विज्ञातेऽर्थे प्रयुज्यमानान्यध्याहार्यं पदानि गौणानि विपरिणतव्यवहितार्थानि च प्रयुज्यन्ते । तस्मात्तत्सादृश्यात् वचनावगम्येष्वप्यर्थेषु भवति तत्त्वरूपो मिथ्याप्रत्ययः, यथा मृगतृष्णादिषु । अपि च वर्तमानापदेशोऽयम् । न चायमर्थो वर्तमानः । तस्मान्न खादिरस्रुवादिसद्भावे तत्फलं भवेत् । तदेवमापतति । खादिरादौ सति भवति तत्फलं नापि भवति । असत्यपि भवति वा न वेति । नैवं विज्ञायते कुतस्तत्फलमिति । तस्मादेवंजातीयकेषूच्चरितेषु न क्वचित् प्रवृत्तिर्न कुतश्चिन्निवृत्तिरिति आनर्थक्यमक्रियार्थत्वात् । अर्थवादे तु सति भवति प्रयोजनं खदिरादेः स्रुवादिषु कर्मार्थेषु प्रयोजनवत्सु । यद्येषां क्रतुं प्रति प्रयोजनवत्ता न स्यात्तत एतदेव फलं कयाचित् शब्दवृत्त्या भवेद्वा न वेति विचार्येत । सति तु पारार्थ्ये नैव क्वाचिच्छब्दप्रवृत्तिराश्रयितुं शक्यते । कैमर्थ्ये हि सा कल्प्येत । तस्मादेवंजातीयका अर्थवादाः । अर्थवादत्वे चावर्तमाने लक्षणया वर्तमानः शब्दः प्रशंसार्थ उपपत्स्यते ।

टुप्— उत्पत्तेश्चातत्प्रधानत्वात् इत्यनेन साध्यसाधनसंबन्धं निराकरोति । न जातिर्नापि जुहूर्विधीयते साधनतया । कुतः ? शब्दाभावात् । अर्थवादो विधायक इति चेदेवं साध्याभावः । उभयपरत्वे वाक्यभेदापत्तेः । तदुक्तम् 'विधौ च वाक्यभेदः स्यात्' इति । रात्रिसत्रवदिति चेत् । उच्यते । तत्रार्थान्तराभावाद्युक्तम् । इह त्वर्थान्तरमस्ति क्रतूपकारः । जुह्वा अपापश्लोकश्रवणं क्रियते इति शब्दात्तावत् संबन्धो नास्ति । यस्य पर्णमयी जुहूस्तस्यापापश्लोकश्रवणमिति, न चैतत् प्रत्यक्षेण गम्यते । व्यभिचरितत्वान्नानुमानम् । तस्मात् क्रतुसंबन्धात् न पुरुषार्थता ।

फलं तु तत्प्रधानायाम् । ३ ॥

भाष्यम्— अथ यदुक्तम् 'यथा खादिरं वीर्यकामस्य यूपं कुर्यात्, वैल्वमन्नाद्यकामस्य, पालाशं ब्रह्मवर्चसकामस्य' इति । युक्तं तेषु । विधिविभक्तिः कुर्यादिति वीर्यखादिरसंबन्धस्य विधात्री । न च वर्तमानापदेशिनी । तस्मात् तत्राविरोध इति । एवं हि पदवाक्यार्थन्यायविदः श्लोकं आमनन्ति— 'कुर्यात् क्रियेत कर्तव्यं भवेत् स्यादिति पञ्चमम् । एतत् स्यात् सर्ववेदेषु नियतं विधिलक्षणम् ॥' इति । विधिविभक्तिं हि विधायिकां लिङ्गं मन्यमानास्त एवं समामनन्ति । अस्ति चात्र विधिविभक्तिः । तस्मादनुपवर्णनमेतदिति ।

टुप्— (साध्यसाधनत्वप्रतिपादनप्रधानायां श्रुतौ युक्तं फलमिति तत् व्याचष्टे—) खादिरादीनां तूभयसंयोगात् युक्ता उभयार्थता ।

सोम— 'क्रत्वर्थपुरुषार्थयोर्जिज्ञासा' इति सूत्रे प्रथमोपात्तक्रत्वर्थपदसूचिता क्रतुप्रयुक्तिः पादद्वयेन विचारिता । इदानीं चरमोपात्तपुरुषार्थपदसूचितफलप्रयुक्तिर्विचार्यते इति पादान्तरत्वं आनन्तर्यं च बोध्यम् । **सूत्रार्थस्तु**— यस्य पर्णमयीति द्रव्ये यदाङ्क्ते इति संस्कारे यत्प्रयाजा इज्यन्ते इत्यर्थकर्मणि च फलश्रुतिः अर्थवादः तेषां क्रत्वर्थात् इति ।

वि— 'जुह्वाः पर्णमयीत्वेन न पापश्रुतिरञ्जनात् । वैरिदृग्वृञ्जनं, वर्म प्रयाजैः, पुरुषाय किम् ॥ क्रतवे वाऽग्रिमो भानात् फलस्य न हि साध्यता । विभाति क्रतवे तस्मादर्थवादः फलं भवेत् ॥'

भाट्ट— अनारभ्य 'यस्य पर्णमयी जुहूर्भवति, न पापं श्लोकं शृणोति' इति श्रुतं द्रव्यम्, सोमे 'यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते' इति श्रुतः संस्कारः, 'यत्प्रयाजानूयाजा इज्यन्ते वर्मैव तद्यज्ञाय क्रियते वर्म यजमानाय भ्रातृव्याभिभूत्यै' इति श्रुतं कर्म च नापापश्लोकश्रवणादिरूपफलार्थं कामशब्दाद्यभावेन वर्तमानापदेशस्य फलपरत्वानुपपत्त्या अर्थवादत्वस्यौदुम्बराधिकरणे साधितत्वात् । न च स्तुतिपरस्याप्यस्य लक्षणया फलपरत्वम्, एकस्यार्थद्वयपरत्वे वाक्यभेदात् । न च रात्रिसत्रवदुपस्थितत्वेन कामपदयुक्तपदान्तरकल्पनया फलपरत्वम्, तद्वदिह वाक्यादिप्रमाणेन जुह्वाद्यर्थत्वस्यावगततया फलाकाङ्क्षाविरहात् । न च कर्मोदाहरणे प्रकरणगम्यक्रत्वर्थत्वापेक्षया स्ववाक्योपस्थितफलपदकल्पनायामेव वैमृधवल्लाघवमिति **वाच्यम्**, विजातीयफलकल्पनातः क्लृप्तक्रतूपकारस्यैव फलत्वौचित्यात् । इष्यत एव हि प्रबलप्रमाणोपस्थितसाकाङ्क्षावश्यकवैकृताङ्गत्यागेनैव दुर्बलनिराकाङ्क्षप्राकृताङ्गग्रहणं विकृतौ क्लृप्तत्वमात्रेण । अतो नैते फलप्रयुक्ता उभयप्रयुक्ता वा । अपि तु क्रतुप्रयुक्ता एवेति फलकामनायामसत्यामप्यनुष्ठेयाः । औदुम्बराधिकरणसिद्धस्याप्यस्यार्थस्य प्रयुक्तत्वरूपप्रयोजनसूचनार्थं पुनरुक्तिः ।

मण्डन— 'द्रव्यादिफलवाक् स्तुत्यै ।'

शंकर— 'द्रव्यादौ न फलार्थता ।'

* **पर्णमयीन्यायेन** 'शोभतेऽस्य मुखं य एवं वेद' इत्यस्य फलपरत्वासंभवेन अर्थवादत्वं सिद्धान्त्यते । **कौ.** १।२।१।३. * उपासनासु फलश्रुतेः **पर्णमयीन्यायेन** अर्थवादतयोपासनानां क्रत्वर्थत्वेन समुच्चयनियमः इति आशङ्का । **भामती.** ३।३।३६।६१ ब्रसू.

* वेदान्तप्रतिपाद्यस्यात्मनः पारार्थ्यक्रत्वव्यभिचारयोरभावात् इह **पर्णमयीन्यायानुन्मेषेण** तदुज्जीवनार्थं अग्रिमश्रुतिलिङ्गादिवर्णनमित्येव व्याख्यातुं युक्तम् । **परिमल.** ३।४।१।२ ब्रसू.

* 'एतदुपोद्बलनार्थम्' इति टीकाग्रन्थः स्वयमस्वतन्त्रस्याचारादेः **पर्णमयीन्यायप्रापकमपेक्ष्य** उन्मेषपरत्वेन व्याख्यातुं न युक्तः, किन्तु देहातिरिक्तस्य वेदान्तप्रतिपाद्यस्यात्मनः परार्थत्वाभावात् अव्यभिचारक्रतुसंबन्धाभावाच्च इह पर्णमयीन्यायस्य अनुन्मेषप्राप्तौ आचारादिकमपेक्ष्य तदुन्मेषपरत्वेन व्याख्यातुं युक्तः । इति आशङ्का । **परिमल.** ३।४।१।२ ब्रसू.

* न तावदार्थवादिकं फलं (सोमे दधिग्रहस्य) **पर्णमयीन्यायविरोधात्** । **भाट्ट.** ४।४।५.

* **पर्यग्निकरणं** गुणकर्म, न प्रधानकर्म । **भा.** २।१।४।९—१२. * पर्यग्निकरणं दर्भज्वालया त्रिः प्रदक्षिणीकरणम् । **वि.** ३।६।७. * पर्यग्निकरणं पुरोडाशधर्मः । तदपि पशौ दृश्यते, 'आहवनीयादुल्मुकेन पशुं पर्यग्नि करोति' इति । **भा.** ८।२।२।१२.

* **पर्यग्निकरणान्ताङ्गरीतिः** उपाकरणमारभ्य पर्यग्निकरणान्तानि यानि पशोरङ्गानि तेषामेकः समुदायः इति । 'पर्यग्निकृतं पात्नीवतमुत्सृजन्ति' अत्र सा रीतिः । **वि.** २।३।८.

* **पर्यग्निकरणान्ताङ्गरीतिविधानेन** तदुत्तराङ्गप्रतिषेधः अश्वमेधे परस्वद्यागे । **भा.** ९।४।१३।५१—५५.

* **पर्यग्निकरणगुणकत्वं** त्वाष्ट्रपात्नीवतस्य 'पर्यग्निकृतं पात्नीवतमुत्सृजन्ति' इति । पर्यग्निकरणोत्तरभावीनि अङ्गानि तु नानुष्ठेयानि । **वि.** २।३।८.

* 'पर्यग्निकृतं पात्नीवतमुत्सृजन्ति' इत्यत्र पर्यग्निकरणान्तत्वस्य गुणस्य विधिः। वि. २।३।८.

पर्यग्निकृतानामुत्सर्गे तादर्थ्यमुपधानवत्। ९।४।१३।५१॥

अश्वमेधे 'ईशानाय परस्वत आलभेत' इति प्रकृत्य 'पर्यग्निकृतानारण्यानुत्सृजन्ति' इति श्रूयते। अयं आरण्यानामालम्भः उत्सर्गार्थ एव, उत पर्यग्निकरणान्तैः संस्कारैः संस्कृत्य उत्स्रष्टव्याः इति कर्मशेषप्रतिषेधः इति विचारे पूर्वपक्षमाह। पर्यग्निकृतानां आरण्यानां उत्सर्गे श्रुते आलम्भस्य तादर्थ्ये तदर्थत्वं बहिर्निःसारणरूपोत्सर्गार्थत्वं प्रत्येतव्यम्। उपधानवत्। यथा अग्निचयने 'एतत् खलु साक्षादन्नं य एष चरुर्य एनमुपदधाति' इति उपधानार्थ एव चरुः उपादीयते। एवमत्रापि उत्सर्गार्थं एव आलम्भः कर्तव्य इति।

शेषप्रतिषेधो वाऽर्थाभावादिडान्तवत्। ५२॥

कर्मशेषप्रतिषेधोऽयम्। उत्सर्गार्थं आलम्भो विधीयते इति पूर्वपक्षव्यावृत्त्यर्थो वाशब्दः। कर्मशेषप्रतिषेधः अर्थाभावात्। उत्सर्गार्थे आलम्भे अर्थाभावः आलम्भवाक्यस्य निष्प्रयोजनत्वं स्यात्। 'ईशानाय परस्वत आलमेत' इति वाक्यमनर्थकं भवेत्। तस्मात् आलम्भवचनेन दानमेव विधीयते। पर्यग्निकृतानिति वचनं अङ्गान्तरप्रतिषेधार्थम्। इडान्तवत्। 'इडान्ता आतिथ्या संतिष्ठते' इति इडोत्तराणामङ्गानां प्रतिषेधस्तद्वत्। तस्मादीशानवाक्यं यागविधिः उत्सर्गवचनं शेषकर्मप्रतिषेधार्थम्।

पूर्ववत्त्वाच्च शब्दस्य संस्थापयतीति चाप्रवृत्ते नोपपद्यते। ५३॥

यथा अश्वमेधे 'ईशानाय परस्वत आलमेत' इति प्रकृत्य 'पर्यग्निकृतानारण्यानुत्सृजन्ति' इति श्रुतम्, तथा ऐकादशिन्यां 'त्वाष्ट्रं पात्नीवतमालभते' इति प्रकृत्य 'पर्यग्निकृतं पात्नीवतमुत्सृजति आज्येन शेषं संस्थापयति' इति श्रूयते। इदं वाक्यद्वयं सदृशम्। तत्र आज्यद्रव्यकपात्नीवतयागः पात्नीवतपशुयागतुल्यः, देवतासाम्यात्। तत्र अप्रवृत्ते अप्रस्तुते यागे 'शेषं संस्थापयति' इत्यत्र 'संस्थापयति' इति, 'शेषम्' इति च शब्दः नोपपद्येत। शब्दस्य पूर्ववत्त्वात् प्रवृत्तिपूर्वकत्वात् यागप्रवृत्तिपूर्ववत्त्वात्। प्रकृते ईशानवाक्यं यदि यागविधिः पर्यग्निवाक्यं च पर्यग्निकरणादुत्तराङ्गप्रतिषेधकं स्यात् तदैव तुल्यश्रुतित्वात् पात्नीवतवाक्यं तदुत्तरपर्यग्निवाक्यं पात्नीवतयागस्य पर्यग्निकरणोत्तराङ्गाभावात् 'आज्येन शेषं संस्थापयति' इति कर्मान्तरविधानं च उपपद्यते। एवं च ईशानवाक्यं यागविधिः पर्यग्निकरणवाक्यं च कर्मशेषप्रतिषेधार्थं इति सिद्धम्।

प्रवृत्तेर्यज्ञहेतुत्वात् प्रतिषेधे संस्काराणामकर्म स्यात् तत्कारितत्वाद् यथा प्रयाजप्रतिषेधेऽग्रहणमाज्यस्य। ५४॥

आलम्भ उत्सर्गार्थं एवेति पूर्वपक्षे दोषमाह सिद्धान्ती। यदि पशुद्रव्यस्य उत्सर्ग एव विधीयेत ततः संस्काराणां उपाकरणादीनामपि अकर्म स्यात् प्रवृत्तेः संस्कारप्रवृत्तेर्यज्ञहेतुत्वात्। यागप्रतिषेधे यागाभावे किमिति संस्काराः क्रियेरन्, तेषां तत्कारित्वात् यज्ञकारित्वात्। प्रतिषेधे संस्काराणां प्रवृत्तेर्यज्ञहेतुत्वात् तत्कारित्वात् संस्काराणामकर्म स्यात्। यथा उपसत्सु 'अप्रयाजास्ता अननुयाजाः' इति प्रयाजप्रतिषेधे प्रयाजार्थस्य आज्यस्य अग्रहणं ग्रहणं न क्रियते, तथा यागाभावे यागार्थाः संस्कारा अपि न क्रियेरन्। न चेदं युक्तम्। तस्मात् ईशानवाक्ये यागविधिरेव स्वीकर्तव्यः, संस्काराश्च कर्तव्याः। शेषकर्मप्रतिषेधस्तु उत्सर्गविधानात्।

क्रिया वा स्यादवच्छेदादकर्म सर्वहानं स्यात्। ५५॥

'पर्यग्निकृतानारण्यानुत्सृजति' इत्यत्र यदि यागस्य अकर्म स्यात्, तदा सर्वहानं सर्वस्य संस्कारादिक्रियामात्रस्यैव हानं त्यागः स्यात्। तच्चायुक्तम्। तस्मात् अवच्छेदात् पर्यग्निकरणोत्तराङ्गमात्रस्य व्यवच्छेदात् विहितदेवतोद्देशेन द्रव्यत्यागरूपस्य यागस्य पर्यग्निकरणान्तस्य च संस्कारकाण्डस्य क्रिया अनुष्ठानं स्यात्। तस्मात् ईशानवाक्येन यागविधिः उत्सर्गवाक्येन च कर्मशेषानुष्ठानप्रतिषेधः इति सिद्धान्तः। वाशब्दः पक्षान्तरमाह। के.

* 'पर्यग्निकृतानामुत्सर्गे०' (९।४।१३।५१) इत्यत्र पर्यग्निकृतानुवादेन उत्सर्गविधिः उत्सर्गानुवादेन वा पर्यग्निकृतविधिः इति चिन्तयिष्यते। सु. पृ. ९३७.

पर्यग्निकृतानामुत्सर्गे प्राजापत्यानां कर्मोत्सर्गः, श्रुतिसामान्यादारण्यवत्, तस्माद् ब्रह्मसाम्नि चोदनापृथक्त्वं स्यात्। ११।२।१२।५१॥

वाजपेये प्राजापत्यान् पशून् प्रकृत्य श्रूयते– 'तान् पर्यग्निकृतानुत्सृजन्ति, ब्रह्मसाम्नि आलभन्ते' इति। अत्र पर्यग्निकृतानां प्राजापत्यानां प्रजापतिदेवताकानां पशूनां उत्सर्गे श्रूयमाणे कर्मोत्सर्गः कर्मण एव उत्सर्गः प्रत्येतव्यः। आरण्यवत् श्रुतिसामान्यात्, अश्वमेधे यथा 'पर्यग्निकृतानारण्यानुत्सृजन्ति' इति श्रुतिः तत्समानैव प्रकृता वाजपेयगता श्रुतिः। एवं श्रुतिसामान्यात् आरण्यवत् प्राजापत्यानामपि कर्मोत्सर्गः। यस्मात् पूर्वं कर्मोत्सर्गः तस्मात् ब्रह्मसाम्नि ब्राह्मणाच्छंसिसामकाले चोदनापृथक्त्वं कर्मान्तरस्य चोदना स्यात्। पूर्वे सप्तदश पशवः उत्स्रष्टव्याः ब्राह्मणाच्छंसिसामकाले च अपरे सप्तदश पशवः आलब्धव्याः। इति पूर्वः पक्षः।

संस्कारप्रतिषेधो वा, वाक्यैकत्वे क्रतुसामान्यात्। ५२॥

सिद्धान्ती आह। नायं कर्मशेषप्रतिषेधः किन्तु संस्कारप्रतिषेधः प्राप्तावसराणां संस्काराणां तदानीं प्रतिषेधः वाक्यशेषेण च ब्रह्मसामकाले प्रतिप्रसवः। क्रतुसामान्यात् क्रतोरेकत्वेन 'पर्यग्निकृतानुत्सृजन्ति' इत्यस्य 'ब्रह्मसाम्न्यालभन्ते' इत्यस्य च वाक्यैकत्वे सति संस्कारप्रतिषेधः प्रत्येतव्यः। येषामेव पूर्वमुत्सर्गस्तेषामेव परस्तात् आलम्भः। तस्मात् आलम्भोत्कर्षः।

वपानां चानभिघारणस्य दर्शनात्। ५३॥

संस्कारप्रतिषेधे हेत्वन्तरमाह सिद्धान्ती। वपानां अनभिघारणस्य अभिघारणाभावस्य दर्शनात् संस्काराणां प्रतिषेधो ज्ञायते। 'सव्या वा एतर्हि वपा यदनभिघृता, ब्रह्म वै ब्रह्मसाम, यद् ब्रह्मसाम्न्यालभते तेनासव्याः, तेनाभिघृताः' इति। सव्या रूक्षा। यदि संस्कारप्रतिषेधः ततो जुह्वाः सवनीयप्रचारेण रेचितत्वात् प्रयाजशेषो नास्ति, तदभावात् अनभिघृतत्वं युज्यते। यदि तु कर्मप्रतिषेधः स्यात् ततो ब्रह्मसाम्नि आलम्भः कर्मान्तरे तत्र प्रयाजाः पुनरिज्येरन्, तेषां शेषः स्यात्, तेनाभिघारणं स्यात् इति अनभिघारणं नोपपद्येत। ततश्च संस्कारप्रतिषेधः, तस्मात् प्राजापत्यानां पशूनां ब्रह्मसामकाले आलम्भोत्कर्षमात्रविधानमिति सिद्धान्तः। के.

* **पर्यनुयोगो** नाम स भवति, यः स्वपक्षं साधयति विपक्षस्य च प्रतीपमाचरति। भा. ३।१।६।१३ पृ. ६९४.

* **पर्यायः**। नहि यो यत्पर्यायः स तेनैव सह प्रयुज्यते। वा. १।२।१।१२ पृ. ३२७. * दर्शपूर्णमासादीनां सर्वकामार्थता **पर्यायेणेति** निर्णयः। एकः प्रयोगः एकस्मै फलाय, अपरः अपरस्मै। भा. ४।३।११।२५–२६. * **पर्यायाणां** सहाप्रयोज्यत्वस्य आनर्थक्यापत्तिप्रयुक्तत्वात् पर्यायत्वस्वरूपस्य अप्रयोजकत्वम्। सु. पृ. ५६०.

* '**पर्यास** इति चान्ताख्या' (५।३।४।८) अन्तिमस्तृचः पर्यासः। ज्योतिष्टोमे बहिष्पवमाने 'पवमानस्य ते कवे०' इति तृचः पर्यासः। वि. ५।३।४.

* **पर्यासोत्तरकालता** बहिष्पवमाने आगन्तूनां स्तोमानाम्। माध्यंदिनार्भवपवमानयोस्तु गायत्र्यादिष्वेव निवेशः साम्नाम्। भा. ५।३।४–५।७–१४.

* **पर्यासशब्दश्चान्तवचनो** लोके दृश्यते, यथा क्षेत्रपर्यासः नदीपर्यासः इति। भा. ५।३।४।८.

* **पर्युदस्तप्रतिप्रसवविधिः** (भट्टसोमेश्वरमते) 'न प्रथमयज्ञे प्रवृञ्ज्यात्' इत्यस्य पर्युदासत्वात् तत्प्रतिप्रसवः 'अग्निष्टोमे प्रवृणक्ति' इति। बाल. पृ. १६.

* **पर्युदासः** अकर्तव्यत्वोक्त्यर्थत्वाभावः इति 'विधीनामेकदेशः स्यात्' इति सूत्रेण अविकल्पाय दशमे (१०।८।१।४) सिद्धान्तितम्। बाल. पृ. ९९. * पर्युदासः अनुयाजमहापितृयज्ञयोः येयजामहस्य होतृवरणस्य च। भा. १०।८।१।१–४. * पर्युदासोऽयं न निषेधः 'नेक्षेतोद्यन्तमादित्यम्' इति। प्रजापतिव्रतेषु। के. ४।१।३।३–६. * पर्युदासः कर्तव्यत्वाकर्तव्यत्वयोः

उदासीनः । **बाल.** पृ. ९९. * पर्युदासः ज्योतिष्टोमे पुरुषार्थदानपाकहोमानां दीक्षितकर्तृकत्वेन । **भा.** १०।८।७।१२–१५. * पर्युदासः तदन्यमात्रसंकोचनार्थः । **सु.** १।२।२ पृ. ८. * पर्युदासः दीक्षितस्य दानहोमपाकप्रतिषेधः । **भा.** १०।८।७।१२–१५. * पर्युदासः नानुयाजेषु इत्यादौ । प्रतिषेधे सति शास्त्रस्य भ्रान्तिः कल्पनीया, विकल्पापत्तेः । द्विरदृष्टकल्पना च । प्रतिषेधादक्रियायां कोऽप्युपकारो भवतीति, विधौ क्रियायाम् । तस्मात् पर्युदासः । तत्र लक्षणा केवला, नादृष्टकल्पना । अदृष्टकल्पनायाश्च लक्षणा ज्यायसी । **टुप्.** १०।८।१।४, * पर्युदासः नानुयाजेषु इत्यादौ । 'समर्थः पदविधिः' इति समर्थयोः समासः । सामर्थ्ये च यदि लिङ्गसंख्यादिकं नापेक्षते राजशब्दः ततः स्यात् । ततः पुरुषेण समस्यते । तस्माल्लिङ्गसंख्यावियुक्तः श्रूयमाणः समासे अव्ययवार्थो गम्यते, प्रतीतेः तुल्यत्वात् । एवं सत्येकः अर्थः । तस्मादुभयोरनुगमः कर्तव्यः । उभयोश्चानुगमाद्वाक्ये पर्युदासः सिद्धः । १०।८।१।४. * पर्युदासः 'नार्षेयं वृणीते' इति महापितृयज्ञे । **भा.** १०।८।१।१–४, * पर्युदासः 'न होतारं वृणीते' इति महापितृयज्ञे । १०।८।१।१–४. * पर्युदासः नञर्थः अन्योन्याभावः । तद्भिन्नत्वे सति तत्सदृशत्वं पर्युदासः । **के.** पर्युदासो नानाविधः मीमांसाबालप्रकाशे सूक्ष्मतया विवेचितः । तच्च सर्वं 'पर्युदासविधिः' इति बिन्दौ द्रष्टव्यम् । **के.** * पर्युदासः पुरुषार्थदानपाकहोमेषु दीक्षितकर्तृकत्वस्य । १०।८।७. **मीको.** पृ. २३०३ 'नदीक्षिताधिकरणम्' इत्यत्र द्रष्टव्यम् । * पर्युदासः भावनाऽतिरिक्ते नञः संबन्धात्, 'नेक्षेतोद्यन्तमादित्यम्' इत्यत्र । **भाट्ट.** ४।१।३. * 'न कलञ्जं भक्षयितव्यम्' इति मम तु **पर्युदास** एव । उपश्लेषलक्षणया श्रुत्या भक्षयतेः कर्तव्यतां तव्यो विदधाति । नकारश्च कर्मव्यवहितत्वात् न कर्तव्यतावचनेन संबध्यते । तस्मात् प्रच्युतः अन्येन संबध्यमानः पर्युदासो भवति । तत्र नायं कलञ्जेन संबध्यते । किं कारणम् ? असमस्तत्वात् । सुबन्तयोः समासे सति पर्युदासो भवति, नासमासे । अतस्तस्मात् पर्युदस्तो धातुना संबध्यते । तत्र सुबन्तत्वाभावाभावात् समासो नास्ति । तस्मात् अभक्षणं कलञ्जादिविशिष्टं फलार्थिना कर्तव्यम् । **टुप्.** ६।२।५।१९. * 'न केसरिणो ददाति' इति नायं प्रतिषेधः किन्तु पर्युदासः । तत्प्रकारश्च दशमे (१०।८।१) 'येमजामहे' इति मन्त्रोदाहरणेन व्युत्पादयिष्यते । ततस्तेन (पर्युदास–)न्यायेन अश्वपर्युदासे सति अश्वव्यतिरिक्तं सर्वस्वं देयमिति विधिनिषेधयोः एकवाक्यतालाभात् नास्ति अश्वस्य पाक्षिकमपि दानम् । **वि.** ६।७।३. * नञ्पदसमभिव्याहृतधातोः स्वविरुद्धार्थे लक्षणा यत्र वाक्ये, स पर्युदासः । **बृ.** ६।२।५।२१. * **पर्युदासेन** प्राकृतं बाध्यते । **बाल.** पृ. १३१. * **पर्युदासे** तदन्यमात्रसंकोचः । **मीन्या.**

* **पर्युदासाधिकरणे** (१०।८।१) नञर्थस्य लाक्षणिकत्वमुक्तम् । **वाक्यार्थ.** पृ. २०. * श्रुत्यन्तरस्थो विशेषः श्रुत्यन्तरे अनाश्रितश्चेत् विकल्पः सर्वत्र स्यात्, स चायुक्तः सत्यां गतौ इति **पर्युदासाधिकरणे** व्युत्पादितम् । **न्यायनि.** ३।३।१६।२७ ब्रसू.

* ननु 'मृडमृद०' (पा. १।२।७) इत्यादेः यथा 'न क्त्वा सेट्' (पा. १।२।१८) इति निषेधनिषेधकत्वं तद्वत् सगुणवाक्यानामपि निर्गुणवाक्यबाधकत्वं किं न स्यादिति चेन्न । दृष्टान्ते **पर्युदासाधिकरणन्यायेन** मृडमृदेत्यादिउत्तरविहितसेट्क्त्वाप्रत्ययकित्त्वनिषेधपरत्वेन एकवाक्यतायां वाक्यभेदेन निषेधनिषेधकत्वाकल्पनात् । **अद्वैत.** २।४।१५९–१६१.

* 'दीक्षितो न जुहोति' इत्यत्र चोदकप्राप्तक्रत्वर्थहोमप्रतिषेधे **पर्युदासाधिकरणपूर्वपक्षन्यायेन** अनिवार्यो विकल्पः । **परिमल.** ३।३।१५।२६ ब्रसू.

पर्युदासन्यायः । येयजामहन्यायः । अनुयाजमहापितृयज्ञयोः येयजामहहोतृवरणयोः पर्युदासः ॥

प्रतिषेधः प्रदेशेऽनारभ्यविधाने च प्राप्तप्रतिषिद्धत्वाद्विकल्पः स्यात् । १०।८।१।१ ॥

भाष्यम्— प्रतिषेधः श्रूयते चोदकेन प्रदिष्टे धर्मे, क्वचिदनारभ्यवादेन प्राप्ते । चोदकेन प्रदिष्टे महापितृयज्ञे, 'न होतारं वृणीते नाऽऽर्षेयम्' इति । तथा अनारभ्यवादेन प्राप्ते 'आश्रावयेति चतुरक्षरम्, अस्तु श्रौषडिति चतुरक्षरम्, यजेति द्व्यक्षरम्, ये यजामह इति

पञ्चाक्षरम्, द्व्यक्षरो वषट्कारः, एष वै प्रजापतिः सप्तदशो यज्ञेष्वन्वायत्तः' इति । ततः 'नानुयाजेषु येयजामहं करोति' इति । तत्रायमर्थः सांशयिकः किं प्रदेशानारभ्यवादयोः प्रतिषेधः, स च विकल्पः उत पर्युदास इति । किं प्राप्तम् ? विकल्प इति, प्राप्तिप्रतिषेधयोः प्रमाणवत्त्वात् । उभौ हि प्राप्तिप्रतिषेधौ प्रमाणवन्तौ । प्राप्तिस्तावत् प्रमाणवती महापितृयज्ञेन यजेत प्रकृतिवदिति । तथा, 'एष वै प्रजापतिः सप्तदशो यज्ञेष्वन्वायत्तः' इति भवति वाक्यं प्राप्तेः प्रतिषेधमनपेक्ष्यमाणं प्रमाणभूतम् । तथा प्रतिषेधः प्रमाणवान् 'न होतारं वृणीते, नाऽऽर्षेयम्, मृत्योरेवैनानुत्सृजति' इति । तथा, 'नानुयाजेषु येयजामहं करोति' इति । सर्वेषु यजिषु येयजामहक्रिया प्राप्ता, न करोत्यनुयाजेष्विति प्रतिषिध्यते । 'येयजामहः कर्तव्यः' इति वचनात् सयेयजामहकः प्रयोगः फलवानिति गम्यते । 'न कर्तव्यो येयजामहः' इति वचनादयेयजामहकः प्रयोगः फलवानिति गम्यते । उभयोः प्रामाण्यादुभयथाऽपि फलमिति गम्यते । तस्मात् विकल्पः । एवं होत्रार्षेयवरणेऽपि । तस्मात् प्राप्तप्रतिषिद्धत्वाद्विकल्पः स्यात् ।

टुप्— 'न होतारं वृणीते' 'नानुयाजेषु येयजामहं करोति' इत्यत्र पूर्वः पक्षः । अयं नञ् श्रुत्या कर्तव्यतां प्रतिषेधति । ये धातुनामनी, ते अपि तामेव विशेषयतः । एवं सर्वाणि पदानि स्वार्थवृत्तानि भवन्ति प्रतिषेधे । पर्युदासे तु लक्षणावृत्तानि भवन्ति, यथा 'अब्राह्मणमानय' इति अत्र नञ् ब्राह्मणपदं च अन्यस्य (क्षत्रियादेः) लक्षणार्थमुच्चार्येते (न स्वार्थम्) । एवमिहापि नञ्शब्दः अनुयाजशब्दश्च अन्यस्य यजतेर्लक्षणार्थौ उच्चार्येयाताम् । तस्मात् पर्युदासो न ग्रहीतव्यः । ननु प्रतिषेधेऽपि पर्युदासफलं (अविकल्परूपं) भवत्येव, यथा 'दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्याय' इति । अत्र ब्राह्मणजातिर्वर्णैरुपात्ता, तदुपलक्षिता व्यक्तिः (न वर्णोपात्ता) । कौण्डिन्ये तु उपात्ता (व्यक्तिः) । तत्र यत् दधिदानं अवर्णं (ब्राह्मणपदवाच्यजातिलक्षितव्यक्त्युद्देशेन विधीयमानं लाक्षणिकं) कौण्डिन्ये प्राप्नोति, तत् वर्णेन (कौण्डिन्यपदोपात्तव्यक्तिविशेषोद्देशेन विधीयमानेन श्रौतेन) तक्रदानेन (विरोधात्) बाध्यते । एवमत्रापि यज्ञसामान्यं ('यजतिषु येयजामहं करोति' इति) वर्णोपात्तम्, विशेषो लक्षणया । 'नानुयाजेषु' इति वर्णोपात्त एव (यज्ञ-)विशेषः । तत्र (विशेषे) श्रूयमाणः प्रतिषेधः (शाब्दत्वेन) सामान्यं (लक्षणावशात् प्रवर्तमानं) बाधते । चोदकस्तु अश्रूयमाणः (एव) कल्पनीयः । कल्पितोऽपि (असौ) अङ्गानि सामान्येन ब्रवीति । (तेन) 'न होतारं वृणीते' इति (एतत्) विशेषेण श्रूयमाणं उपमितकल्पितसामान्यप्राप्तिं बाधते । (इति दूरोत्सारितो विकल्पः) । उच्यते । नकारः (अयं) निवृत्तिं ब्रवीति । सा च (निवृत्तिः) प्रवृत्तिमन्तरेण न संभवति । (सा तु) सामान्यशास्त्रेण वा भवेत् विशेषशास्त्रेण वा । (ततः किं ? इत्यत आह–) यदि अनुयाजेषु येयजामहः (विहितः) न स्यात्, प्रवृत्तिरेव (अत्र) न स्यात् । (नह्यत्र विना शास्त्रेण रागतः प्रवृत्तिः संभवति) । एवं च प्रतिषेधस्य आनर्थक्यमेव स्यात् । (पुनश्चोदयति–) यथा तर्हि 'ब्राह्मणो न हन्तव्यः' इति (प्रवृत्त्यधीनोऽपि प्रतिषेधः, तामेकान्तेन बाधते) एवं (अत्रापि प्रतिषेधेन प्रवृत्तेर्बाधो) भविष्यति । (परिहरति–) नहि । (कुतः ? तत्र हि) अर्थात् हननं प्राप्तं (यथेच्छं) कुर्यां न वेति । (तत्र) यदा करोति, तदा प्रतिषिध्यते (न हन्तव्यः इति । किंच–) तत्र अर्थात् प्राप्तस्य शास्त्रेण नित्यबाधः (युक्तः) । इह (तु) द्वे (अपि) शास्त्रे । तेन द्वे अपि ग्रहीतव्ये । तयोः (च) विरोधात् विकल्पः । चोदकोऽप्येवमेव । अपि चैकस्य (शास्त्रस्य) कर्तव्यता प्रमेया, अपरस्य (तु) निवृत्तिः । तस्मात् (भिन्नविषयत्वात्) न बाध्यबाधकभावः (घटपटबुद्धिवत्) । तस्मात् विकल्पः । न चेदं (प्रतिषेधपक्षे विकल्पाभिधानं) पूर्वपक्षोक्तिमात्रं (किन्तु पारमार्थिकमेव) । तथा च सूत्रभाष्यकारौ आहतुः 'सर्वप्रतिषेधो वाऽसंयोगात् पदेन स्यात्' (९।४।२।२१) इति । तत्र (हि प्रत्यक्ष–) वचनेन प्रतिषिध्यते । ('न चतुस्त्रिंशदिति ब्रूयात्' इति ।) आनुमानिकी प्राप्तिः प्रकरणाम्नानात् । (तथापि)

तत्र विकल्पः (एव सिद्धान्तत्वेन) अभ्युपगतः (दुर्बलाऽपि प्राप्तिः तदधीनात्मलाभेन प्रतिषेधेन तुल्यबलेति । ननु तत्र आनर्थक्यात् पाठस्य युक्तो मन्त्राङ्गीकारः । इह तु सामान्यचोदकयोः विषयान्तरेऽप्यवकाशसंभवात् नानर्थक्यम् । अत आह–) नानर्थक्येन (प्रमाणेन तत्र ऋचः अङ्गीकारः । कुतः ?) आनर्थक्यं हि परित्यागे कारणं नोपादाने । तस्मात् युक्तो विकल्पः ।

अर्थप्राप्तवदिति चेत् । २ ॥

भाष्यम्— इति चेदवगम्यते विकल्पः स्यादिति । तन्न । अर्थप्राप्तवत्स्यात् । तद्यथा लोकेऽर्थप्राप्ते यत्र प्रतिषेधो भवति ' न विषं भक्षयितव्यम् , न सर्पायाङ्गुलिर्देया, न कण्टकः पादेनाधिष्ठेयः ' इति, अक्रियैव तस्यार्थस्य भवति, न विकल्पः ! तेन मन्यामहे विधिप्रतिषेधयोः प्रतिषेधो बलीयानिति । प्राप्ते हि विधौ प्रतिषेधो भवति । येन च नाम प्राप्ते यदुच्यते तत्तस्य बाधकं भवति । तस्मादक्रियैवानुयाजेषु येयजामहस्य, महापितृयज्ञे च होत्रार्षेयवरणस्येति ।

न तुल्यहेतुत्वादुभयं शब्दलक्षणम् । ३ ॥

भाष्यम्— नैतदेवम् । तुल्यो हि हेतुरिह प्राप्तेः प्रतिषेधस्य च । उभयं शब्दलक्षणम् , प्राप्तिरपि प्रतिषेधोऽपि । प्राप्तिरपि प्रतिषेधे प्राप्ते, प्रतिषेधोऽपि प्राप्तौ प्राप्तायाम् । लोके पुनरुभयमर्थलक्षणं प्रत्यक्षतो गम्यमानं गुणदोषकरम् । तत्र विधिप्रतिषेधयोर्यतरो गुणवान् सोऽनुष्ठीयते । न तु शब्दलक्षणे गुणदोषौ शक्येते अवगन्तुम् । तस्मात् यद्यद्वाक्येन प्राप्तं तत्तदुभयमवधार्येत । उभौ च प्राप्तिप्रतिषेधौ प्राप्नुतः । तस्माद्विकल्पस्तत्रतत्रेति ।

अपितु वाक्यशेषः स्यादन्याय्यत्वाद् विकल्पस्य विधीनामेकदेशः स्यात् । ४ ॥

भाष्यम्— अपित्विति पक्षव्यावृत्तिः । वाक्यशेषः स्यात् प्रतिषेधः प्रदेशानारभ्यविधानयोः । नैवमभिसंबन्धः, अनुयाजेषु येयजामहो न कर्तव्य इति । कथं तर्हि ? नानुयाजेष्विति नशब्दोऽनुयाजशब्देन सह संबध्यते, न करोतिना । किमतो यद्येवम् ? नानुयाजेष्वित्येतावदपरिपूर्णं वाक्यम् , तत् साकाङ्क्षं पूर्ववाक्यैकदेशेन संभन्त्स्यते । यदेतत् ' येयजामहं करोति ' इत्युक्तम् , तन्नानुयाजेषु । यावदुक्तं स्यात् अनुयाजवर्जितेषु यजतिषु येयजामहं करोतीति । तस्माद्विधिरेव पर्युदस्तानुयाजकः , नास्ति प्रतिषेध इति न विकल्पो भविष्यति । महापितृयज्ञेऽपि प्रकृतिवदितिवचनात् होत्रार्षेयवरणमिह कर्तव्यं प्राप्तम् । तदुच्यते प्रकृतिवत् कर्तव्यं वरणं वर्जयित्वेति । नशब्दोऽत्र वृणोतेरर्थेन संबध्यते । प्रत्ययार्थस्तु अनुवादः । यदत्र प्रकृतिवत् कर्तव्यं तत् वरणं वर्जयित्वेति । किमर्थं पुनरनुयाजैर्वृञ्धात्वर्थेन च नशब्दः संबध्यते इति ? उच्यते । अन्याय्यत्वाद्विकल्पस्य । अन्याय्यो हि विकल्पः । कथम् ? इह यजतिषु येयजामहं करोतीत्युच्यते । यद्येवमवगम्यते , न शक्यः स विना येयजामहेन यजतिरभिनिर्वर्तयितुम् । तत्र प्रतिषेधवचनमनर्थकम् । प्रतिषेधेऽपि विज्ञाते विधिवचनमनर्थकम् । तस्मादन्याय्यो विकल्पः । नन्वन्यतरस्य विधेरानर्थक्यप्रसङ्गाद्विकल्प आश्रयणीयो भवति । उच्यते । यत्रान्यतरदानर्थक्यमापद्यते, कल्प्येतापि तत्र विकल्पः, यत्र न केन चिदपि प्रकारेणार्थवत्ता संभवति । इह त्वनुयाजसंबन्धपर्युदासेनार्थवत्ता । तस्मान्न विकल्पः । आह । नन्वनुयाजसंबन्धे नशब्दस्य समासः प्राप्नोति । नित्यो ह्यस्य नशब्दस्य सुबन्तसंबन्धेन समास इति वार्तिककारो भगवान् **कात्यायनो** मन्यते स्म । ' वावचनानर्थक्यं च स्वभावसिद्धत्वात् ' इति । नेति भगवान् **पाणिनिः** । स हि, ' विभाषा ' इति प्रकृत्य ईदृशं समासमुक्तवान् । सद्वादित्वाच्च पाणिनेर्वचनं प्रमाणम् । असद्वादित्वान्न कात्यायनस्य । असद्वादी हि विद्यमानमप्यनुपलभ्य ब्रूयात् । तस्मात् पर्युदास इति ।

टुप्— प्रतिषेधे (सति) शास्त्रस्य भ्रान्तिः कल्पनीया, विकल्पापत्तेः । द्विरदृष्टकल्पना च । प्रतिषेधादक्रियायां कोऽप्युपकारो भवतीति , विधौ क्रियायाम् । तस्मात् पर्युदासः । तत्र लक्षणा केवला (नादृष्टकल्पना) । अदृष्टकल्पनायाश्च लक्षणा ज्यायसी । ननु ' अर्थैकत्वात् ' (२।१।१४।४६) इत्ययं न्यायोऽत्र नास्ति, येनैकवाक्यता स्यात् । उच्यते । सत्यमयं न्यायो नास्ति । किन्तु (यथा) ' दध्ना जुहोति ' इति होमः पूर्वेण

वाक्येन प्राप्तो विपरिवर्तते । तत्र दधि विधीयते, भवति चैकवाक्यत्वम् । एवमिहापि, येयजामहं विपरिवर्तमानमनूद्य पर्युदासार्थो विधीयते । पर्युदासस्थले पृथगाख्यातश्रवणात् पदैकवाक्यत्वासंभवेऽपि वाक्यैकवाक्यत्वं संभवत्येव । (तथा) चोदकेऽपि यत् प्रकृतिवत्पितृयज्ञेन यजेत तद्वरणवर्जमिति । अथवा येयजामहः सामान्येन प्राप्यमाण एवानुयाजवाक्येन विशेष्यते (अनुयाजवर्जं येयजामहं करोतीति) । पितृयज्ञेष्वेवमेव । अत्र ग्रन्थः ' नन्वनुयाजसंबन्धे नशब्दस्य समासः प्राप्नोति ' इति । पर्युदासपक्षे समासः स्यात् । न चात्र समासः (येन पर्युदासः स्यात्) । तस्माद्विकल्प एवाऽऽश्रीयते । उच्यते । ' विभाषा ' इति (अनेन) समासो वाक्यं वा भवति । यदि समासलक्षणमेवाऽऽश्रीयेत, राज्ञः पुरुषः इति अपप्रयोगः स्यात् । तस्मात् राज्ञः पुरुष इत्यपि साधु, राजपुरुष इत्यपि, उभयोरप्यनुगमात् । यत्रानुगमो नास्ति तत्रासाधुः प्रयोगः, यथा गावीति । तेनासत्यपि समासे स एवार्थः, समासेऽपि । तेनासमासत्वमदोषः । ' नित्यो ह्यस्य नञः सुबन्तसंबन्धे समासः ' इति । कोऽभिप्रायः ? भिन्नार्थावेतौ वाक्यसमासौ । वाक्येन पुंलिङ्गैकत्वविशिष्टस्य पुरुषः प्रतीयते । समासे तु न ज्ञायते किं द्वयोः पुंसोरुत बहूनामुत स्त्रिया उत नपुंसकस्येति । तस्मात् (वाक्यसमासौ) नैकार्थौ । गोशब्दे त्वेकोऽर्थः प्रतीयते । तत्र यस्यानुगमः स साधुरितरेऽपभ्रंशाः । (यथको गोणीशब्द आवपने साधुर्न सास्नादिमति) । अत्र राजपुरुष इति लिङ्गसंख्यावियुक्ते वाक्ये नित्यं समास एव साधुः । तद्युक्ते राज्ञः पुरुष इति वाक्यमेव । अत आह ' वावचनानर्थक्यं च स्वभावसिद्धत्वात् ' इति । तेन पर्युदासो नास्ति, समासाभावात् । अत्रोच्यते । ' समर्थः पदविधिः ' इति समर्थयोः समासः । सामर्थ्यं च यदि लिङ्गसंख्यादिकं नापेक्षते, राजशब्दस्ततः स्यात् । ततः पुरुषेण समस्यते । तस्माल्लिङ्गसंख्यावियुक्तः (श्रूयमाणः) समासे अवयवार्थो गम्यते, प्रतीतेस्तुल्यत्वात् । एवं सत्येकोऽर्थः । तस्मादुभयोरनुगमः कर्तव्यः । उभयोश्चानुगमाद्वाक्ये पर्युदासः सिद्धः ।

शा–– ' तत्र श्रुत्यर्थलाभाय प्रतिषेधोऽन्यथा पुनः । पदद्वयमपि ह्यन्यपरत्वाल्लक्षणा भवेत् ॥ ' इति प्राप्ते ब्रूमः । ' यत एव विकल्पोऽयं प्रतिषेधे प्रसज्यते । अतस्तत्परिहाराय पर्युदासाश्रयो वरम् ॥ '

सोम–– एवमस्पष्टयोः अर्थलोपप्रत्याम्नाननिबन्धनबाधयोः निरूपणानन्तरं अतिस्पष्टस्य प्रतिषेधनिबन्धनबाधस्य अस्मिन् पादे प्राधान्येन निरूपणमिति **पादान्तरत्वमानन्तर्यं च** । **सूत्रार्थस्तु**– प्रदेशे चोदकेन आर्षेयवरणातिदेशे येयजामहस्य अनारभ्यविधाने च सति ' नार्षेयम् ' ' नानुयाजेषु ' इति नञ् प्रतिषेधार्थकः । ततश्च विहितप्रतिषिद्धत्वात् विकल्पः इति ।

वि–– ' नार्षेयं न च होतारं नानुयाजेष्वितीदृशे । विकल्पः पर्युदासो वा, स्यादाद्यो वचनद्वयात् ॥, अन्याय्यत्वाद् विकल्पस्य विध्यंशः सा निषेधगीः । तेनानुयाजवाक्यस्थस्तदर्थे पर्युदस्यति ॥ '

भाट्ट— तदेवमर्थलोपात् प्रत्याम्नानाच्च बाधो निरूपितः, प्रतिषेधादिदानीं निरूप्यते । महापितृयज्ञेऽतिदेशप्राप्तस्य होतृवरणस्य प्रतिषेधः श्रुतः ' न होतारं वृणीते ' इति । तथा अनारभ्याधीतस्य ' आश्रावयेति चतुरक्षरम्, अस्तु श्रौषडिति चतुरक्षरम्, यजेति द्व्यक्षरम्, ये यजामह इति पञ्चाक्षरम्, द्व्यक्षरो वषट्कारः, एष वै सप्तदशः प्रजापतिर्यज्ञमन्वायत्तः ' इति यज्ञमात्रोद्देशेन विहितस्य येयजामहस्य ' नानुयाजेषु येयजामहं करोति ' इति प्रतिषेधः श्रुतः । तयोः किं नित्यं होतृवरणादिबाधकत्वं उत विकल्पेनेति चिन्तायाम् , न तावदयं ' होतृवरणव्यतिरिक्तं प्रकृतिवत् कुर्यात् ' ' अनूयाजव्यतिरिक्तेषु च यज्ञेषु येयजामहः कर्तव्यः ' इत्येवंविधः पर्युदासः , अत्यन्ताभाववाचिनो नञः प्रधानभूतभावनान्वयसंभवे अन्योन्याभाववाचित्वमङ्गीकृत्य गुणभूतधात्वर्थान्वयाङ्गीकारे प्रमाणाभावात् । अन्योन्याभाववाचकस्य नञस्तद्वति पदार्थान्तरे लक्षणापत्तेश्च । अतः प्रतिषेध एवायम् । तस्य च प्राप्तिसापेक्षत्वात् , प्राप्तेश्च प्रकृते शास्त्रीयत्वात् , शास्त्रप्राप्तस्य चात्यन्तं बाधायोगात् अगत्या ग्रहणाग्रहणवद्विकल्पः । ननु प्रतिषेधस्य प्राप्तिसापेक्षत्वे

किं बीजम्? न तावदभावज्ञानस्य प्रतियोगिज्ञानाधीनत्वात् प्रतियोगिप्राप्त्यर्थं तत्, येयजामहादिरूपस्य प्रतियोगिनो अनूयाजादिषु प्रसिद्ध्यभावेऽपि यागान्तरेषु प्रसिद्धत्वात्। नह्यनुयोगिनि प्रतियोगिप्रसिद्धिरभावबोधे कारणम्, ह्रदे वह्निप्रसिद्ध्यभावेऽपि ह्रदे वह्निर्नास्तीति बोधस्यानुभविकत्वात्। अत एवोद्देश्यप्रसिद्ध्यर्थमेव प्राप्तिसापेक्षत्वमित्यप्यपास्तम्, निषेधाधिकारे प्रतियोगिनमुद्दिश्यानुयोगिवृत्तिनञर्थस्यैव विधेयत्वात्। न च तथापि प्रसक्तपुरुषनिवृत्तिप्रयोजनकत्वात् निषेधस्य प्रसक्त्यभावे वैयर्थ्यापत्तेः तत्परिहारार्थं प्राप्त्यपेक्षत्वमिति **वाच्यम्**। निषेधाभावे सामान्यशास्त्रेण भ्रान्त्या आहवनीयशास्त्रेणेव पदहोमे आहवनीयस्य अनूयाजादिषु येयजामहादीनां प्रसक्तत्वात्। अतश्च यथैव पदशास्त्रं सामान्यशास्त्रस्य तात्पर्यग्राहकं सत् तस्य तद्व्यतिरिक्तविषयतां कल्पयति, एवं निषेधशास्त्रमपि सामान्यशास्त्रस्य तद्व्यतिरिक्तविषयत्वे तात्पर्यग्राहकत्वादेव सार्थकम्। न च सामान्यशास्त्रानालोचनेऽपि पदशास्त्रस्य पदविधायकत्ववत् निषेधशास्त्रस्य प्रसक्त्यभावेन शाब्दबोधाजनकत्वम्, पदशाब्दबोधवदेव प्रतियोगिप्रसिद्धिमात्रेणानुयोगिवृत्त्यभावविषयकशाब्दबोधोपपत्तेः। अतश्च भ्रान्तिप्राप्तस्यापि निषेधोपपत्तेः न प्राप्तेः शास्त्रीयत्वेन विकल्पः। **इति चेन्न।** सकलकारकान्वितभावनारूपाख्यातार्थे एव प्रतियोगितासंसर्गेण नञर्थाभावस्योत्सर्गेणान्वयात् अनूयाजाधिकरणकयेयजामहानुकूलकृतेरेव प्रतियोगितया तत्प्रसिद्धिं विना शाब्दबोधाजनकत्वेनैवास्य तत्प्राप्तिसापेक्षत्वात्। नहि यत्नमात्रस्य प्रतियोगिता संभवति। अतश्च कारकविशिष्टायास्तत्त्वावश्यम्भावे विनिगमनाविरहात् सर्वविशिष्टाया एव तत्। अत एव न येयजामहमात्रस्यैव प्रतियोगित्वं नञः प्रधानभूताख्यातार्थान्वयसंभवे गुणभूततदन्वयस्यान्याय्यत्वात्। अत एव यत्र 'ह्रदे वह्निर्नास्ति' 'नान्तरिक्षे न दिवि' इत्यादौ तद्बाधः तत्रागत्या वह्न्यादेरेव प्रतियोगित्वमङ्गीकृत्य तदुद्देशेनैवानुयोगिवृत्त्यभावविधानम्। यत्र तु न बाधः तत्र निरुक्तकृतेरेव प्रतियोगित्वात् तदुद्देशेनैवाभावमात्रविधिः। अत एव प्रतियोगिप्रसिद्ध्यर्थमिवोद्देश्यप्रसिद्ध्यर्थमपि प्राप्तिसापेक्षता, निषेधस्य तद्व्यतिरेकेण शाब्दबोधस्यैवाजननात्। सा च प्राप्तिः क्वचिद्रागतः, क्वचित् शास्त्रतः। आद्या 'न कलञ्जं भक्षयेत्' इत्यादौ। अन्त्या प्रकृते। सा च प्रमारूपैवेति युक्तो विकल्पः। नहि भ्रमात्मकप्रसिद्धिमादाय तत्संभवः। निषेधशास्त्रानालोचने सामान्यशास्त्रमात्रालोचनेन भ्रमसंभवेऽपि निषेधशास्त्रस्यैव प्रथमालोचने विशेषदर्शनसत्त्वेन सामान्यशास्त्रतो भ्रमानुपपत्तेः, वस्तुतस्तादृशप्रतियोगिनोऽप्रसिद्ध्या तदुद्देश्यकतदभावप्रमानुपपत्तेश्च। न च यस्य सामान्यशास्त्रमात्रालोचनेन भ्रमात्मकेष्टसाधनताज्ञानादनूयाजेषु येयजामहकृतिरुत्पन्ना, तत्पुरुषीयकृतेरेव प्रसिद्धायाः अनूयाजाधिकरणकयेयजामहकृतित्वेन प्रतियोगित्वात् तदभावविषयकप्रमोपपत्तिरिति **वाच्यम्**। एतदात्मनि तत्पुरुषीयकृत्यभावस्य स्वतःसिद्धत्वेन तदंशे विधिवैयर्थ्यात्, पुरुषान्तरीयकृत्यभावस्य एतत्पुरुषीयनिवारणाप्रयोज्यत्वानुपपत्तेश्च। अभावे तत्प्रयोज्यत्वं हि निवारणानुमेयानिष्टसाधनताज्ञानस्य अभावप्रतियोगिभूतकृतिसामग्रीविघटकत्वम्। न चान्यदीयकृतिसामग्री बलवदनिष्टानुबन्धित्वज्ञानाभावरूपा अन्यदीयानिष्टसाधनत्वज्ञानात् विघटयते। अतश्च एतदात्मनिष्ठकृतिसामग्र्यैव एतदात्मनिष्ठानिष्टानुबन्धित्वज्ञानात् निवर्तनीया। सा च निषेधस्य प्रथमालोचने विशेषदर्शनवत्त्वात् भ्रमात्मिका न संभवति। तज्जन्यकृतिस्तु प्रतियोगिभूता अप्रसिद्धैव। अतोऽवश्यं निषेधशास्त्रस्य प्रथमालोचनेऽपि तदपेक्षितप्रतियोगिप्रसिद्ध्यर्थं सामान्यशास्त्रमालोच्यैव अनूयाजाधिकरणकयेयजामहानुकूलकृतित्वावच्छिन्नकृतेरेव सामान्यशास्त्रप्रमितायाः प्रतियोगितामङ्गीकृत्य निषेधशास्त्रार्थावधारणं इत्यङ्गीकर्तव्यम्, अतश्च सामान्यशास्त्रप्रमितस्याप्यत्यन्तं बाधायोगात् विकल्पो युक्त एव। तदा हि सामान्यशास्त्रेण येयजामहस्य फलभूमार्थिने अनूयाजसाद्गुण्यजनकत्वानुमानात्, निषेधेन च फलभूमार्थित्वाभावे येयजामहाभावेऽपि इतराङ्गैः साद्गुण्यजनकत्वस्यानुमानात् उभयोर्ग्रहणाग्रहणवत् अविरोधः। रागप्राप्तनिषेधे तु रागेण कलञ्जभक्षणादौ इष्टसाधनत्वावगमेन प्रसक्तायाः कलञ्जभक्षणानुकूलकृतेरभावे निषेधशास्त्रेण

निवारणाविषयत्वेनावगते अर्थात्तद्विषयस्य कलञ्जभक्षणादेरनिष्टसाधनत्वाक्षेपात् नित्यं तद्भक्षणे अनिष्टोत्पत्तिर्नित्यं च अनिष्टद्वेषात् तन्निवृत्तिरिति वैषम्यम्। अतो होतृवरणयेयजामहादीनां महापितृयज्ञादिषु न नित्यं बाधः। इति प्राप्ते, यत एव प्रतिषेधपक्षे विकल्पोऽष्टदोषदुष्टः, अत एव पर्युदासाङ्गीकरणम्। पर्युदासत्वं चाख्यातार्थव्यतिरिक्तप्रतियोगिताकाभावबोधकवाक्यत्वम्, न तु नञः आख्याततिरिक्तान्वयित्वम् 'न होतारं वृणीते' इत्यत्र होतृवरणव्यतिरिक्तत्वरूपस्य नञर्थस्य आख्यातार्थे एव अन्वयात्। न च तत्रापि 'न होतारं वृणीते' इत्यत्र नञर्थस्यात्यन्ताभावस्यैव होतृवरणे प्रकारत्वेनान्वयः। नञः अन्यान्वयस्य व्युत्पन्नत्वेऽपि अभावप्रतियोगिभूतस्य वरणस्य कृतिसाध्यत्वाभावेन भावनान्वयानुपपत्तेः। अत एव न तस्य विशेषत्वमपि, धात्वर्थस्य नञर्थे अन्वयाव्युत्पत्तेश्च। अतो नञोऽन्योन्याभाववाचकत्वस्यापि सत्त्वात् तत्परत्वमेवाङ्गीकर्तव्यम्। तत्रापि नञ्धातुभ्यां लक्षणया वरणव्यतिरिक्तपदार्थजातस्यैव बोधनात्तस्यैवाख्यातार्थान्वयः। यद्यपि च 'तदन्यतद्विरुद्धतदभावेषु नञ्' इति प्रसिद्धेरन्योन्याभाववत्यपि शक्तिः। तथापि धात्वर्थस्य तत्रान्वयाव्युत्पत्तेर्लक्षणा आवश्यक्येव। सा च विकल्पापेक्षया न दोषः। एवं नानूयाजेष्वित्यत्रापि।

तत्र च यद्यपि नञ्येयजामहपदाभ्यां येयजामहव्यतिरिक्ताङ्गजातस्य लक्षणामङ्गीकृत्य अनूयाजोद्देशेन तद्विधिरूपः पर्युदासोऽपि संभाव्यते। तथापि येयजामहव्यतिरिक्तत्वस्य विशेष्यापेक्षायां विशेष्यभूतानामङ्गानामनारभ्यविधौ अनुपस्थितत्वात् नासौ अङ्गीक्रियते। अपि तु नञनूयाजपदाभ्यामेवानूयाजव्यतिरिक्तं लक्षयित्वा तस्य सप्तम्या उद्देश्यत्वाङ्गीकारात् तदुद्देशेन येयजामहविधिरूपः एव, अव्यवहितत्वात्, तद्विशेष्यस्य यागान्तरस्य सामान्यविधिनोपस्थितत्वात्। अत एवोभयत्रापि पर्युदासे होतृवरणव्यतिरिक्तत्वेनानूयाजभिन्नत्वेनैव च यथाक्रमं विधेयता उद्देश्यता च, न तु प्रयाजत्वादिना, तद्रूपप्रवेशे गौरवात्, तस्य सामान्यशास्त्रैकवाक्यतयैव लाभाच्च। अत एव नात्र पदैकवाक्यता। अपि तु 'पुरोडाशं चतुर्धा करोति' इत्यादिवत् वाक्यैकवाक्यतैव। अत एव तन्मात्रसंकोचार्थादुपसंहारात् तदन्यसंकोचार्थस्य पर्युदासस्य भेदः इति **न्यायसुधाकारः**। न चैवं पर्युदासेऽपि पर्युदसनीयप्राप्तिसापेक्षत्वात् विकल्पापत्तिः, तस्याः पदादाविव तार्किकभ्रान्तिमादायाप्युपपत्तेः। नहि तद्व्यतिरेकेण पर्युदासविधेः प्रतिषेधविधिवत् शाब्दबोधानुपपत्तिः। भेदप्रतियोगिभूतहोतृवरणानूयाजप्रसिद्धिमात्रेण तदुपपत्तेः। न च 'न होतारं वृणीते' इत्यत्र पर्युदासोपपत्तावपि 'नानूयाजेषु' इत्यत्र पर्युदासाङ्गीकारे सुबन्तसंबन्धादननुयाजेष्विति नञो नित्यसमासापत्तिः। सुबन्तसंबन्धे वाक्यस्याप्युपपत्तौ नित्यसमासे प्रमाणाभावात्। यदाऽपि हि वैयाकरणरीत्या समासस्य विशिष्टार्थे शक्तिः, वाक्यस्य च प्रत्येकं विशेषणविशेष्यरूपावयवार्थेषु, तदा भिन्नार्थकत्वेनैव समासविधिना वाक्यस्य साधुत्वानिवारणात् 'नानूयाजेषु' इति वाक्ये न किञ्चिद्बाधकम्। अत एव समासवाक्ययोः विकल्पविधायकविभाषासूत्रप्रत्याख्यानार्थं 'वावचनमनर्थकं स्वभावसिद्धत्वात्' इति **कात्यायन**वचनमपि संगच्छते। स्वभावसिद्धत्वात् भिन्नार्थकत्वरूपन्यायसिद्धत्वादित्यर्थः। वस्तुतस्तु उभयोरपि समासवाक्ययोः विशिष्टार्थगमकत्वस्य तुल्यत्वात् समासविधिना वाक्यस्यासाधुत्वप्रसक्तौ विकल्पविधायकं विभाषासूत्रं पाणिनेः सार्थकमेवेति कात्यायनवचनमेव न्यायविरोधादप्रमाणम्। अत एव विभाषासूत्रात् प्राचीनानां कुम्भकाराद्युपपदादिसमासानां न विकल्पः। अतो नानूयाजेष्विति वाक्यस्यापि साधुत्वात् युक्तस्तत्रापि पर्युदासः।

मण्डन— 'आर्षेये न विकल्पः स्यात्।'

शंकर— 'नार्षेये पर्युदासता।'

* **पर्युदासन्यायस्य** येयजामहन्यायापरपर्यायस्य **स्वरूपम्**– 'दुर्बलोऽपि विधिः तदधीनात्मलाभेन प्रतिषेधेन तुल्यबलो भवति' इति। **बाल.** पृ. १८.

* **पर्युदासविधिः** क्रत्वर्थः 'यजतिषु ये यजामहं करोति, नानुयाजेषु' इति। **बाल.** पृ. २०,

* पर्युदासविधिः दृष्टार्थो यथा 'यजतिषु येयजामहं करोति नानुयाजेषु' अत्र विधेययेयजामहांशे यागप्रकाशकत्वम्। पृ. २१, * पर्युदासविधिः पुरुषार्थः 'नेक्षेतोद्यन्तमादित्यम्' इत्यादिः। पृ. २०,

* पर्युदासविधिः षोडशविधः— १ प्रकृतिगतारादुपकारिपर्युदासः २ विकृतिगतोपदिष्टारादुपकारिपर्युदासः ३ विकृतिगतातिदिष्टारादुपकारिपर्युदासः ४ अपूर्वकर्मगतारादुपकारिपर्युदासः ५ प्रकृतिगतसंनिपात्यदृष्टार्थपर्युदासः ६ प्रकृतिगतप्रतिपत्तिव्यतिरिक्तदृष्टार्थसंनिपातिपर्युदासः ७ प्रकृतिगतदृष्टार्थसंनिपातिप्रतिपत्तिपर्युदासः ८ अपूर्वकर्मगतसंनिपात्यदृष्टार्थपर्युदासः ९ अपूर्वकर्मगतप्रतिपत्तिव्यतिरिक्तदृष्टार्थसंनिपातिपर्युदासः १० अपूर्वकर्मगतदृष्टार्थप्रतिपत्तिसंनिपातिपर्युदासः ११ विकृतिगतोपदिष्टादृष्टार्थसंनिपातिपर्युदासः १२ विकृतिगतोपदिष्टदृष्टार्थप्रतिपत्तिव्यतिरिक्तसंनिपातिपर्युदासः १३ विकृतिगतोपदिष्टदृष्टार्थप्रतिपत्तिसंनिपातिपर्युदासः १४ विकृतिगतातिदिष्टादृष्टार्थसंनिपातिपर्युदासः १५ विकृतिगतातिदिष्टदृष्टार्थप्रतिपत्तिव्यतिरिक्तसंनिपातिपर्युदासः १६ विकृतिगतातिदिष्टदृष्टार्थप्रतिपत्तिसंनिपातिपर्युदासः । उदाहरणानि तु मृग्याणि । (अत्रैव पर्युदासशब्दस्थाने क्रियानिषेधशब्दं संनिवेश्य निषेधः षोडशविधो ज्ञेयः ।) । पृ. २०. * **पर्युदासविधौ** न सर्वत्र पदैकवाक्यता, तथात्वे आख्यातद्वयानन्वयापत्तेः । अपि तु आख्यातद्वयसत्त्वे वाक्यैकवाक्यताऽपि । **भाट्ट.** १०।८।२.

* **पर्युदासस्थले** नञः समासनियमः कात्यायनमतेन । 'अब्राह्मणं आकारयति', 'अधर्मं करोति' इत्यादौ । **के.** (वि. १०।८।२).

* **पर्यूहणं** यूपधर्मः । 'ब्रह्मवनिं त्वा क्षत्रवनिम्० इति प्रदक्षिणं पांसुभिः पर्यूह्य' (कल्पसूत्रम्) । अवटे यूपमुच्छ्रित्य मूले पांसुपूरणं परितः ऊहनम् । वि. १०।२।३३, * पर्यूहणं यूपसंस्कारः पशुभेदेऽपि यूपकाले एव तन्त्रेणानुष्ठेयः । ११।३।४.

* **पर्यूहणादिसंस्काराणां** (साद्यस्के) खलेवाल्यां अनुष्ठानम् । **भा.**१०।२।३३।७३. **मीको.** पृ. १५३६ 'खलेवाल्यां पर्यूहणादि०' इत्यत्र द्रष्टव्यम् ।

* **पर्वणि** नाध्येयम्, अध्ययनधर्मोऽयं न प्रयोगधर्मः, तेन पर्वणि अनध्यायेऽपि कर्मणि मन्त्राः पठनीया एव । **भा.**१२।३।७।१८–१९. * पर्वणि प्रातरग्निहोत्रे हुते पश्चात् दर्शपूर्णमासार्थं अग्निमुद्धृत्यान्वाधानं क्रियते । अत्रोद्धरणे 'वाचा त्वा होत्रा०' इत्यादिः अग्निहोत्रोद्धरणमन्त्रो नास्ति । **वि.** ९।४।९.

* **पर्वकालकर्तव्ययोः** दीक्षासुत्ययोर्मध्ये सुत्या पर्वण्येव, दीक्षा अपर्वण्यपि । ज्योतिष्टोमे । **भा.** १२।२।९।२५ .

* **पर्वशब्दः** आग्नेयादित्रिकसंघपरः, प्रकरणवशात् । भावव्युत्पत्त्या क्रियापरः, प्रियते दीयते अस्मिन् इत्यधिकरणव्युत्पत्त्या तु कालमाचष्टे । **वि.** ९।२।१८, * पर्वशब्दः 'स्रुवेण पार्वणौ जुहोति' इत्यत्र आग्नेयादित्रिकसंघपरः । ९।२।१८. * पृणातेः **पर्वशब्दः** । पृणातिश्च दाने प्रसिद्धः । दानानि च (दर्शपूर्णमासयोः) समुदायाः । **भा.** ९।२।१८।५३.

⌛ पर्वसंधिः तन्त्रमध्ये ग्रहीतव्यः ॥

संधिकालस्याल्पत्वेन साङ्गप्रयोगभावनापर्याप्तत्वाभावेन तत्पर्याप्तये समं स्यादिति न्यायेन तत्पूर्वपरभागयोः समयोराक्षेपात् । 'संधिमभितो यजेत' इति श्रुतेश्च यदैव संधिरपराह्णे रात्रौ वा पतति ततः पूर्वं घटिकाद्वयमारभ्य तत्पश्चाद् घटिकाद्वये इष्टिं समापयेत् । **इति प्राप्ते,** द्वाविज्याकालौ वचनाद् व्यवतिष्ठेते । 'पूर्वेद्युरग्निं गृह्णाति उत्तरमहर्देवता यजते' इति वचनेन प्रयोगस्य द्व्यहकालत्वावगमात् । 'पूर्वां पौर्णमासीमुपवसेदिति पैङ्ग्यमुत्तरामुपवसेदिति कौषीतकं यां पर्यस्तमयमुत्सर्पेत्' इति कौषीतकिब्राह्मणे (३।१) सूर्यास्तमयं परितः इत्यनेनावर्तनात्परतो रात्रौ वा यदि संधिः सोपवासार्होत्तरा पौर्णमासी तस्यामन्वाधानमित्युक्त्वा ततः परेद्युर्यागः इत्युक्तं भवति । आवर्तने ततः पूर्वं वा यदि संधिः सोत्तराऽपि नोपवासार्हा, किन्तु पूर्वैवेत्युक्त्या संधिदिन एव इत्यपि व्यवतिष्ठते । तेन संधिमभितः इत्यस्य विद्युद्वृष्टिमध्ये यथा संधिः पतति तथा तन्त्रं प्रक्रामेदित्यर्थः । आवर्तने यदा संधिः पर्वप्रतिपदोर्भवेदित्यादीनि प्रतिपद्यप्रविष्टायां यदि चेष्टिः समाप्यते इत्यादीनि च गोभिलगार्ग्यादिवचनानि एतमेवार्थं विवृण्वन्ति । **संकर्ष.** ३।१।२.

⌛ **पर्वताधित्यकान्यायः** । यथा 'अधित्यकायामिव धातुमय्यां लोध्रद्रुमं सानुमतः प्रफुल्लम्' इति रघुवंशे । **साहस्री.** २११.

⌛ **पर्वतोपत्यकान्यायः** । 'उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका' इति कोशात् । **साहस्री.**२१२ .

* **पलाशशाखाऽऽहरणम्** 'यत् प्राचीमाहरेत् देवलोकमभिजयेत्' (तैब्रा. ३।२।१) इत्यादिनोक्तम् । तत्र प्राचीशब्देन वृक्षस्य प्राचीदिक्स्था शाखा लक्षणीया, न तु दिगेव वाच्या । **वि.** ४।२।२, * पलाशशाखाऽऽहरणं वत्सापाकरणाङ्गम् । ३।६।८.

* **पलाशशाखाछेदनं** दोहधर्मः । स च सायंप्रातरुभयदोहार्थः । वि. ३।६।८, * पलाशशाखाछेदनं विध्यादिविहितम्, न तु विध्यन्तविहितम् । ३।१।२, * **पलाशशाखाछेदने** 'इषे त्वा' इति मन्त्रः । अत्र छिनद्मि इत्यध्याहारः, 'इषे त्वेति छिनत्ति' इति छेदने विनियोगात् । इष्यमाणाय अन्नाय भोः पलाशशाखे त्वा छिनद्मि इति मन्त्रार्थः । २।१।१५.

* **पलाशशाखामार्जने** 'ऊर्जे त्वा' इति मन्त्रः 'ऊर्जे त्वेत्यनुमार्ष्टि' इति विनियोगात् । ऊर्जे रसाय बलाय वा त्वामनुमार्ज्मि इति मन्त्रार्थः । अनुमार्जनं पत्रलग्नधूल्यादिनिःसारणम् । **वि.** २।१।१५.

⌛ **पवनताडनन्यायः** । असंभववस्तुनि व्यर्थप्रयत्नकरणे अयं प्रवर्तते । नहि यष्ट्यादिना पवनस्य ताडनं सफलं भवति । **साहस्री.** ६६७.

* **पवमानाः** द्वात्रिंशाः (द्वात्रिंशस्तोमकाः) अभिषेचनीयस्य । **भा.** १०।४।१०।२०, * **पवमाने** एव माध्यंदिने आर्भवे च विवृद्धाविवृद्धस्तोमकक्रतूनां सामावापोद्वापौ । १०।४।११।२१–२२, * पवमाने रथंतरं करोति, आर्भवे बृहत् । विश्वजिति सर्वपृष्ठे । १०।६।५।१४.

⌛ पवमाने स्यातां तस्मिन्नावापोद्वापदर्शनात् । १०।४।११।२१॥

विवृद्धाविवृद्धस्तोमकेषु क्रतुषु साम्नां आवापोद्वापौ यत्रकापि वा स्तोत्रे पवमानेष्वेव वा इति विचारे सिद्धान्तमाह । आवापोद्वापौ आर्भवे माध्यंदिने च पवमाने स्याताम् । तस्मिन् पवमाने आवापोद्वापयोः दर्शनात् । 'त्रीणि ह वै यज्ञस्योदराणि गायत्री बृहत्यनुष्टुप्, अत्र ह्येवावपन्ति, अत एवोद्वपन्ति' इति श्रुतौ ।

वचनानि त्वपूर्वत्वात् । २२ ॥

विवृद्धाविवृद्धस्तोमकेषु क्रतुषु साम्नामावापोद्वापौ पवमाने स्तोत्रे एवेत्यत्र पूर्वं लिङ्गमुक्तम् । वचनमुच्यताम्, इति चेदुच्यते । तुः शङ्कां निरस्यति । लिङ्गरूपाणि यानि उक्तानि, तानि वचनान्येवोक्तानि । तदर्थस्य अपूर्वत्वात् अन्यतः अप्राप्तत्वात् । ततश्च पृथक् वचनापेक्षा नास्ति । तानि च 'त्रीणि ह वै यज्ञस्योदराणि गायत्री बृहत्यनुष्टुप् । अत्र ह्येवावपन्ति, अत एवोद्वपन्ति' इति । **के.**

* **पवमानयोरुत्तरयोः** आगम्यमानानां साम्नां गायत्रीबृहत्यनुष्टुप्सु निवेशः, न तु अन्ते विवृद्धस्तोमकत्वे । **भा.** ५।३।५।१३–१४, * पवमानयोरुत्तरयोः विवृद्धस्तोमकत्वे साम्नामागमः इति वक्ष्यते (१०।५।५।१६) । ५।३।५।१३.

* **पवमानाज्यपृष्ठादिस्तोत्रेषु** रथंतर-बृहत्-वैरूपादि साम एकस्यामेव ऋचि न गातव्यम्, किन्तु 'एकं साम तृचे क्रियते स्तोत्रीयम्' इति वचनात् तृचे एव साम गातव्यम् । वि.१०।६।१.

* **पवमानेष्टयः** । 'अग्नये पवमानाय अष्टाकपालं निर्वपेत्, अग्नये पावकाय, अग्नये शुचये' इति आधाने । **भा.** ३।६।४।११. * पवमानेष्टयः अग्न्यङ्गं आधानसिद्धेष्वेवाग्निषु स्वोत्तरभाविक्रतूपयोगितया संस्कारविशेषाधायकाः संमार्गवत्, भाष्यमते । पवमानेष्टयः आधानाङ्गं बृहस्पतिसववत्, अग्नीनां स्थापिका इति वार्तिकमतम् । के. (भाट्ट. ५।३।९) । * पवमानेष्टयः अग्निसंस्कारार्था इत्युक्तम् (३।६।४) । **भा.** ३।६।६।१७. * पवमानेष्टयः आधानाव्यवहितसोमानुष्ठानेऽपि सोमात् प्रागेव कर्तव्याः, अग्निसंस्कारकत्वात् आधानाङ्गत्वादेव वा । के. (टुप्. ५।४।३।५–९) । * पवमानेष्टयः आधानमात्रसंस्कृतेषु अग्निषु कर्तव्याः, न पवमानेष्टिसंस्कृतेषु । वि. ३।६।६. * पवमानेष्टयः इष्टिसंस्कारवर्जितां प्रकृतिमपेक्षन्ते, अविहितत्वात् तस्यामवस्थायां

पवमानेष्टीनाम् । **भा.** ३।६।६।१७. * पवमानेष्टयः केवलाधानसंस्कृतेऽग्नौ । ३।६।६. **मीको.** पृ. ९२४ ' आधाने पवमानेष्टयः ' इत्यत्र द्रष्टव्यम् । * पवमानेष्टयः दर्शपूर्णमासविकृतिः । **वि.** ३।६।४. * **पवमानेष्टीः** कृत्वा अग्निहोत्रादीनि कर्माणि प्रतिपत्तव्यानि, न तु आहितमात्रेषु अग्निषु । ' न क्लिन्नं दारु अभ्यादध्यात् ' इत्यादीनि व्रतानि तु आहितमात्रेष्वेव कर्तव्यानि । **भा.** ५।३।९।२१-२५, * पवमानेष्टीः कृत्वा संस्कृतेष्वग्निषु अग्निहोत्रादीनि नियतानि, ऐन्द्राग्नादीनि च अनियतानि कर्माणि कर्तव्यानि । ५।३।९।२१-२५. * **पवमानेष्टिभिः** समुच्चित्यैवाधानमग्न्युत्पादकम् । **वि.** ५।३।९.

* ' **पवमानेष्टेः प्राक् यजुषा होमो न सर्वसंमतः ' इति न्यायः** । आधानाङ्गभूताग्निहोत्रार्थवादस्थ-मीमांसारूपस्य न्यायस्य विप्रतिषेधात् । अत्र 'पवमानेष्टेः०' इति न्यायविप्रतिषेधो ज्ञेयः । **वृ.** ५।३।९।२१-२५. * **पवमानेष्टीनां** द्वेधा प्रयोगः काम्यो नित्यश्चेति । तत्र काम्यत्वे प्रथमेष्टिः एका, उत्तरयोस्तन्त्रम् । नित्यत्वे तु तिसृणामपि तन्त्रम् । **के.** (वि. ११।४।४) । * पवमानेष्टीनां सद्य एव करणं सोमाधानपक्षे । सोमेनायक्ष्यमाणस्य तु संवत्सरादिकालः । **भाट्ट.** ५।४।३. * **पवमानेष्टिषु** अग्निहोत्रहवणी निर्वापेण बाध्यते । **बाल.** पृ. १३२. * पवमानेष्टिष्वग्निहोत्रहवण्यभावेऽपि निर्वापोऽनुष्ठेयः । १०।२।२७. **मीको.** पृ. १५९२ ' गुणलोपन्यायः ' इत्यत्र द्रष्टव्यम् । * पवमानेष्टिषु आज्यभागयोः गुणवाचकपदरहितस्यैव देवतापदस्याभिधानं कर्तव्यम् । १०।४।१५।३०-३१. **मीको.** पृ. ९२६ ' आधाने पवमानेष्टिषु० ' इत्यत्र द्रष्टव्यम् । * पवमानेष्टिषु आज्यभागदेवौ न सगुणौ । ' वृधन्वान् (बुधन्वान्) आग्नेयः कार्यः, पावकवान् सौम्यः ' इति तु मन्त्रपरम् । (अत्र कल्पसूत्रम्- '' अग्निं स्तोमेन बोधय ' इत्याग्नेयस्याज्यभागस्य पुरोऽनुवाक्या भवति, ' अग्न आयूंषि पवसे ' इति सौम्यस्य '' इति ।) । **वि.** १०।४।१७. * पवमानेष्टिषु केवलस्यैव निर्वापस्य शास्त्रार्थत्वम्, न तु अग्निहोत्रहवणीरूपगुणसहितस्य । **सोम.** १०।२।२७.

* **पवमानेष्ट्यधिकरणम् । न चैवं** आरम्भणीयायां अन्या आरम्भणीया इत्यनवस्था स्यादिति **वाच्यम् ।** ' यावतीः शक्नुयात् कर्तुं यस्मिन्नहनि तावतीः कुर्वतो नानवस्था स्यात् ' इति पवमानेष्ट्यधिकरणपूर्वपक्षोक्तप्रकारेण अनवस्थाऽभावात् । **सोम.** १०।१।४.

* **पवमानेष्ट्यादिषु** देवतानिष्ठगुणवाचिपदस्यापि त्यागादौ प्रयोगः । १०।४।१४।२६-२९. ' पावकाग्निन्यायः ' इत्यत्र अधिकरणं द्रष्टव्यम् ।

* **पवमानेष्ट्याधानादीनां** (आधानगतपवमानेष्ट्यादीनां) श्येनाङ्गानामपि न दृतिनवनीताज्यता । **के.** (भाट्ट. ३।८।२१).

पवमानेष्टिन्यायः । आधानं अग्न्यर्थम् ॥

इष्ट्यर्थमग्न्याधेयं प्रकरणात् । ३।६।४।११ ॥

भाष्यम्-- सन्ति पवमानेष्टयः 'अग्नये पवमानायाष्टाकपालं निर्वपेत्, अग्नये पावकाय, अग्नये शुचये ' इति । तासां प्रकरणे समाम्नातम् ' ब्राह्मणो वसन्तेऽग्निमादधीत ' इति । तत्र संदेहः, किमग्न्याधेयं पवमानेष्ट्यर्थम्, उत नेति । किं प्राप्तम् ? इष्ट्यर्थमिति । कुतः ? प्रकरणात् । तासां प्रकरणे श्रूयते, अतस्तदर्थम् ।

वा-- अनारभ्यवादप्रस्तावेन अग्न्याधेयस्य प्रथमं तावत् अनारभ्यवादत्वमेव प्रतिपाद्यते । प्रकरणेन तावत् पवमानेष्ट्यर्थत्वं प्राप्नोति । श्रुत्या तु शुद्धाग्न्यर्थत्वम् । अतः ' प्रकरणविशेषाद्वा तद्युक्तस्य संस्कारो द्रव्यवत् ' (३।४।५।१५) इति इष्ट्यर्थाग्निसंस्कारत्वात् श्रुतिवाक्यप्रकरणैः अविरुद्धैः इष्ट्यर्थाग्न्यर्थत्वं अवधार्यते । शुद्धाग्न्यर्थत्वे च निष्प्रयोजनत्वात् तद्द्वारेणैव अग्न्याधानग्रहणसामर्थ्यम् । तस्मात् इष्ट्यर्थे सामान्याभिधानम् । अपि च प्रकरणादेव पवमानेष्टिविषयं द्रष्टव्यम् ।

न वा तासां तदर्थत्वात् । १२ ॥

भाष्यम्-- पवमानेष्टयो हि अग्न्यर्थाः । यदि अग्निः इष्ट्यर्थः स्यात् ततस्तदर्थं अग्न्याधेयमिष्टीनामुपकुर्यात् । निष्फलास्तु इष्टयः । तदर्थं अग्न्याधेयमपि निष्फलं स्यात् । कथं पुनरग्न्यर्थता पवमानेष्टीनाम्, निष्प्रयोजनत्वादेव । प्रयोजनवत्त्वाच्च अग्नीनाम् । भाव-

यितव्या अपीष्टयः भूतानामग्नीनामर्थेन क्रियेरन् । तस्मात् अग्न्याधेयं न पवमानेष्ट्यर्थम् ।

वा-- यदि आरादुपकारकमाधानं भवेत्, ततः प्रकरणात् इष्ट्यर्थमिति गम्येत । वाक्यसंयोगात्तु द्वितीयानिर्दिष्टाग्निसंस्कारार्थमेतत् । एवं च सति यदि अग्नयः पवमानेष्ट्यर्था भवेयुः ततः तद्द्वारेण आधानमपि तदर्थं भवेत् । तास्तु निष्फलत्वात् अग्न्यर्था इत्युक्तम् । अतश्च ' गुणानां च परार्थत्वात् ' (३।१।१२।२२) इत्यनेनैव परस्परानङ्गत्वम् । नहि द्वितीयाश्रुतिः प्रकरणेन बाध्यते ।

लिङ्गदर्शनाच्च । १३ ॥

भाष्यम्-- लिङ्गं च दर्शयति यथा अग्न्यर्थाः पवमानेष्टयः इति । किं लिङ्गम् ? ' जीर्यति वा एष आहितः पशुर्यदग्निः, तदेतान्येवाग्न्याधेयस्य हवींषि संवत्सरे निर्वपेत्, तेन वा एष न जीर्यति, तेनैनं पुनर्नवं करोति, तन्न सूक्ष्यम् ' इति ।

वा-- ' तेनैनं पुनर्नवं करोति ' इति च अग्निसंस्कारार्थतां दर्शयति ।

सोम-- **प्रयोजनं पूर्वपक्षे** आधानस्य स्वर्गार्थपवमानेष्ट्यर्थत्वेन अग्निहोत्रदर्शपूर्णमासादिषु आधानकृतस्य कस्य चिदुपकारस्याभावात् विनाऽपि आधानेन अग्निहोत्रादयः कर्तव्याः । **सिद्धान्ते** तु आधानस्य अग्न्यर्थत्वात् अग्निभिर्विना अग्निहोत्रानुष्ठानासंभवात् आधानानन्तरमेव अग्निहोत्रादयः कर्तव्या इति ।

वि-- ' आधानं पवमानादेरिष्टेरङ्गं न वा भवेत् । , अग्नीनामिष्टिशेषत्वात् तद्द्वाराऽस्य तदङ्गता ॥ , अनारभ्य विधानात्तु नाङ्गं कस्य चिदाहितिः । अग्न्यर्थत्वात् तत्समेष्टिरग्नयस्त्वग्निहोत्रगाः ॥ '

भाट्ट-- अग्नीनामतिदेशेन पवमानेष्ट्यङ्गत्वावगमात् तत्संस्कारकत्वेन विहितस्य आधानस्यापि प्रकरणसहकृतवाक्यात् पवमानेष्टिसाधनीभूताग्निसंस्कारकत्वेन विनियुक्तस्य पवमानेष्ट्यङ्गत्वम्, पवमानेष्टीनां विश्वजिन्न्यायेन (४।३।५) फलकल्पना । **इति प्राप्ते,** आधानस्य किं अग्न्युत्पादकत्वं उत संमार्गादिवत् अग्निनिष्ठातिशयमात्रजनकत्वम्, उभयथाऽपि त्वन्मते अग्निहोत्रादिषु आहवनीयाद्युत्पादकाभावात् अतिदेशस्यैवासंभवः । अतः अग्निहोत्राद्यङ्गभूताहवनीयाद्युत्पादकमेव आधानम् । पवमानेष्टयोऽपि अग्न्यङ्गभूताः फलवदाधानाङ्गभूता एव वा प्रकरणात् । ततश्च पवमानेष्टिषु असिद्धत्वात् अग्नेरतिदेशस्यैवाभावः । **प्रयोजनम्**- पवमानेष्टिषु **पूर्वपक्षे** अन्वारम्भणीया, **सिद्धान्ते** प्रधानारम्भत्वात् न इत्यादि ।

मण्डन-- ' नाधानमङ्गं खलु पावमान्याः । '

शंकर-- ' आधानं नेष्ट्यर्थमिष्यते । '

* अन्वारम्भणीयायां तु तृतीयोक्त**पवमानेष्टिन्यायेनापि** न अन्वारम्भणीया । **भाट्ट.** १०।१।४.

* **पवमानेष्टिसंस्कारः** अग्निप्रयुक्तः, न दर्शपूर्णमासप्रयुक्तः । **भा.** ३।६।६।१७.

* **पवमानत्रयविषयेषु** अन्वारोहमन्त्रेषु व्यूढद्वादशाहगतेषु छन्दोव्यतिक्रमः श्रुतः । स न छन्दःपदार्थेषु, किन्तु मन्त्रगतशब्देष्वेव कार्यः । प्राकृतस्य ' गायत्रच्छन्दाः' इत्यस्य स्थाने ' जगतीछन्दाः ' इति वक्तव्यम्, ' त्रिष्टुप्छन्दाः ' इत्यस्य स्थाने ' गायत्रच्छन्दाः ' इति, ' जगतीछन्दाः ' इत्यस्य स्थाने ' त्रिष्टुप्छन्दाः ' इति वक्तव्यमित्यर्थः । **वि.** १०।५।२६.

* **पवमानमन्त्राः** ' श्येनोऽसि गायत्रच्छन्दाः, सुपर्णोऽसि त्रिष्टुप्छन्दाः, सघाऽसि जगतीछन्दाः । अनु त्वाऽऽरभे स्वस्ति मा सं पारय ॥ ' इति । अन्वारोहमन्त्रा एते । **भा.** १०।५।२६।८८.

* **पवमानस्तोत्रं** त्रेधा, प्रातःसवने बहिष्पवमानम्, माध्यंदिनसवने माध्यंदिनपवमानम्, तृतीयसवने च आर्भवपवमानम् । **वि.**९।२।६ वर्णकं २.

* **पवमानहवींषि** अग्न्याधेयप्रकरणाम्नातान्यपि वाक्येन प्रकरणं बाधित्वा अग्नेरेव गुणभूतानि भवन्ति । **भा.** ३।१।१२।२२. * पवमानहवींष्यपि प्राकरणिकेन ' यदाहवनीये जुह्वति ' इति वाक्येन अग्न्यर्थतयैव विनियुज्यन्ते, आधानं अग्न्यर्थतया निरपेक्षेण वाक्येन यद्यपि विहितं तथापि- इत्युक्तं तृतीये । **रत्न.** ५।३।९।२१-२५. * पवमानहवींषि नाधानाङ्गं इति भाष्यमतम् । आधानाङ्गं इति वार्तिकमतम् । **के.** * पवमानहवींषि ।

'यः सोमेनायक्ष्यमाणः अग्निमादधीत, स पुरा संवत्सरात् हवींषि निर्वपेत्' इति कालो निर्दिश्यते। न खलु कश्चिदयक्ष्यमाणः। तस्मात् अनन्तरमयक्ष्यमाणः इति गम्यते। **भा.** ५।४।३।८. * **पवमानहविर्भ्यः** प्राक् अग्निहोत्रं न संभवति। पूर्णाहुत्यन्ते यदग्निहोत्रं सोऽपूर्व एव होमः। **टुप्.**१०।२।२७।६४. * **पवमानहविषां** काम्यप्रयोगे प्रथमस्य तन्त्रभेदः उत्तरयोस्तन्त्रम्, ब्रह्मवर्चसकामत्वे नित्यप्रयोगे च त्रयाणामपि तन्त्रम्। ११। ४।४।१३–१६. **मीको.** पृ.९२३ 'आधाने पवमानहविषाम्' इत्यत्र द्रष्टव्यम्। * पवमानहविषां त्रयाणामेकतन्त्रत्वाभावः (आधाने)। किं तर्हि? तन्त्रभेदः। स च भवन् एवं स्यात्, प्रथमाया भेदः, उत्तरयोस्तन्त्रम्, वचनात्। वचनमिदं भवति– 'अथ यः कामयेत वर्षीयान् श्रेयान् स्यामिति तस्याग्नये पवमानाय निरुप्य, अथ पावकाय शुचये चोत्तरे हविषी समानबर्हिषी निर्वपेत्' इति। **भा.** ११।४।४।१३–१६, * **पवमानहविःषु** 'अग्नये पवमानाय' इत्यादौ सगुणेनैव देवतानिर्देशः कर्तव्यो निगमेषु, न निर्गुणेन। १०।४।१४।२६–२९.

पवमानहविःष्वैकतन्त्र्यं प्रयोगवचनैकत्वात्। ११।४।४।१३॥

आधानगतेषु पवमानहविःषु ऐकतन्त्र्यं तन्त्रेण अनुष्ठानं स्यात्। प्रयोगवचनैकत्वात्, 'अह्नो निरुप्याणि' इति प्रयोगवचनस्य एकत्वात् वचनेन सह प्रयोगावगमात्। तस्मात् तन्त्रं इति पूर्वः पक्षः।

लिङ्गदर्शनाच्च। १४॥

'समानबर्हींषि भवन्ति' इत्यनुवादरूपलिङ्गदर्शनात् पवमानेष्टीनां सह प्रयोगो विज्ञायते। इति पूर्वपक्षी आह।

वचनात्तु तन्त्रभेदः स्यात्। १५॥

सिद्धान्तमाह। नैकतन्त्रता किन्तु तन्त्रभेदः स्यात्। तत्रापि प्रथमाया भेदः, उत्तरयोस्तन्त्रम्। 'यः कामयेत वर्षीयान् श्रेयान् स्यामिति तस्याग्नये पवमानाय निरुप्य अथ पावकाय शुचये चोत्तरे हविषी समानबर्हिषी निर्वपेत्' इति वचनात्।

सहत्वे नित्यानुवादः स्यात्। १६॥

सिद्धान्ती आह। यत्तु सहत्वे 'समानबर्हींषि भवन्ति' इति वचनम्, तत् नित्यानुवादः स्यात्। 'यो ब्रह्मवर्चसकामः स्यात् तस्य सर्वाणि हवींषि निरुप्याणि' इति यः सहप्रयोग उक्तः तस्यायमनुवादः। तस्मात् ब्रह्मवर्चसकामत्वे तिसृणां तन्त्रम्, तदभावे तु द्वेधा भेदः पूर्वोक्तः। इति सिद्धान्तः। **के.**

* **पवमानहविःप्रकरणे** एकं अपरमनारभ्यवादे। इति द्वे ह्येते वाक्ये तुल्यरूपे 'यदाहवनीये जुह्वति' इति। तत्र प्राकरणिकेन निष्पाद्यमानत्वात् संस्कारापेक्षिणः आहवनीयस्य अफलानां पवमानहविःप्रभृतीनां संस्कारत्वेन विधानम्। अनारभ्यवादेन तु निष्पन्नस्य सतः सर्वकर्माण्युद्दिश्य अधिकरणत्वेन विधानम्। **वा.** ३।१।१२।२२.

* **पवित्रे**। 'समौ अप्रच्छिन्नाग्रौ दर्भौ प्रादेशमात्रौ पवित्रे करोति' दर्शपूर्णमासयोः। ते च परिभोजनीयानाम बर्हिषः, न तु वेदिस्तरणाद् बर्हिषः। **भा.** ३।८। १७।३२.

* **पशुः** अग्नीषोमीयश्छाग एव। **भा.** ६।८।१०। ३०–४३. * पशुरग्नीषोमीयः 'स एष उपवसथीयेऽहनि द्विदेवत्यः पशुरालभ्यते'। **रत्न.** ५।४।८।२५.

पशुः पुरोडाशविकारः स्याद् देवतासामान्यात्। ८।२।२।१०॥

ज्योतिष्टोमे अग्नीषोमीयः पशुः किं पुरोडाशविकारः, उत सांनाय्यविकार इति विचारे पूर्वपक्षमाह। पशुः अग्नीषोमीयः पुरोडाशस्य विकारः स्यात् इति अग्नीषोमीयपुरोडाशस्य विध्यन्तः पशौ। देवतासामान्यात्। पौर्णमास्यां अग्नीषोमीयः पुरोडाशः, अयं पशुरपि अग्नीषोमीयः। इति समानदेवतत्वं सामान्यम्। अग्नीषोमीयः पशुः इष्टिविकारः इति प्रथमपादे (८।१।५। १२) निर्णीतमेव। अत्र तु विशेष उच्यते।

प्रोक्षणाच्च। ११॥

पूर्वपक्षे हेत्वन्तरमाह। 'अद्भ्यस्त्वौषधीभ्यो जुष्टं प्रोक्षामि इति पशुं प्रोक्षति' इति पशोः प्रोक्षणमुक्तम्। प्रोक्षणं च पुरोडाशधर्मः। इति पुरोडाशविध्यन्तः स्यात्।

पर्यग्निकरणाच्च। १२॥

पूर्वपक्षे तृतीयं हेतुमाह। 'आहवनीयादुल्मुकं गृहीत्वा तेन पशुं पर्यग्नि करोति' इति पशोः पर्यग्निकरणं श्रुतम्। तच्च पुरोडाशधर्मः। तस्मात् पशुः पुरोडाशविकारः।

सांनाय्यं वा तत्प्रभवत्वात्। १३॥

पूर्वपक्षं सूत्रत्रयेण प्राप्तं वाशब्देन निरस्तं सूचयन् सिद्धान्तमाह। सांनाय्यं पशोः प्रकृतिः स्यात्, न पुरोडाशः। सांनाय्यविकारः पशुः। तत्प्रभवत्वात्। प्रभवति अस्मादिति प्रभवः। तच्छब्देन पशुर्निर्दिश्यते। सः प्रभवः यस्य तत् तत्प्रभवं तादृशत्वात्। पशुरपि पशोर्जायते, सांनाय्यमपि पशोर्जायते। इति उभयोः पशुप्रभवत्वं सामान्यम्। हविःसामान्यं च देवतासामान्यात् बलवत् इत्युक्तम् (८।१।१७।३२–३४)। तस्मात् तत्प्रभवत्वं निर्णायको हेतुः।

तस्य च पात्रदर्शनात्। १४॥

सिद्धान्ते हेत्वन्तरमाह। तस्य सांनाय्यस्य यत् पात्रं उखा नाम, तस्यैव पात्रस्य पशौ दर्शनात् सांनाय्यविकारः पशुः। 'यदि पशुरुखायां पचेत्' इति च पात्रदर्शनम्। तस्मात् अग्नीषोमीयः पशुः सांनाय्यविकार इति सिद्धान्तः। **के.**

* पशुर्मुख्यः। स हि यज्ञं निर्वर्तयति। **भा.** १२।२।११।२७.

पशुः सद्यस्कालः, न व्यहकालः॥

निरूढपश्वादिषु उत्तरवेदेः कालो द्व्यहरूपस्त्र्यहरूपो वा स्यात् चोदकानुग्रहात्। इति प्राप्ते, 'स्नात्वा उप्त्वा केशश्मश्रूणि अरणी समारोप्य निर्मथ्य उदवसाय' इत्यादिना सद्यस्कालत्वस्य वाचनिकत्वात् अतिदेशबाधः। अत एवोत्तरवेद्यां नाग्निहोत्रस्य करणप्रसक्तिः। दैवात् कर्मण उत्कर्षे तु सत्यां प्रसक्तौ, तत्रैव करणमिति कल्पः। **संकर्ष.** ३।२।२७.

* पशुः सांनाय्यविकारोऽपि सन् न दध्नो विकारः, किन्तु पयसो विकारः। सद्यस्कालत्वसामान्यात् पश्वानन्तर्याच्च। **भा.** ८।२।३।१५–१८. * पशुः स्वावयवद्वारा यागसाधनम्। **भाट्ट.** १०।७।१. * पशुः हृदयादीज्याप्रयुक्तः, न तु शकृत्संप्रख्याधलोहितनिरसनप्रयुक्तः। **भा.** ४।१।१२।२७. * **पशवः** इष्टयश्च अग्निष्टोमानुष्ठानात् प्राक् अनुष्ठातुं शक्यन्ते। **के.** (वि. ५।३।१४)। * पशवः औत्पत्तिकेन विभागेन संव्यवहारेषु संख्यायन्ते 'पञ्चभिरश्वैः क्रीतः', 'पञ्चभिर्गोभिः क्रीतः' इति। न व्रीह्यादीनामौत्पत्तिकेन विभागेन संव्यवहारेषु संख्या संकीर्त्यते। निगदाभिप्राया मानाभिप्राया वा भवति। नहि भवति पञ्चभिर्माषैः क्रीत इति। पञ्चभिर्माषाणामाढकैः द्रोणैर्वा कुडवैर्वा खारीभिर्वा इति भवति। **भा.** १०।३।११।४५. * पशवस्त्रय आम्नाता ज्योतिष्टोमे अग्निष्टोमसंस्थे अग्नीषोमीयः सवनीयः अनुबन्ध्यश्चेति। **वा.** ३।६।७।१८. * पशवो निरूढादयः सोमात् प्रागपि कर्तुं शक्यन्ते। **रत्न.** ५।४।८।२५. * पशवः प्राजापत्याः सप्तदश वाजपेये। तेषां चोदकप्राप्ताग्नेयादिक्रतुपशुभिः समुच्चयः। **वि.**१०।४।४, * पशवः साद्यस्क्रे 'सह पशूनालभते' इति सह विहिताः। तत्र पशुषु वेदि–उत्तरवेदि–यूपाः शास्त्रीयसंस्कारनिरपेक्षा गृह्यन्ते 'साद्यस्क्रेषूर्वरा वेदिः (खल उत्तरवेदिः) खलेवाली यूपः' इत्याश्वलायनः (९।७। १३–१४)। ते च पशवः अग्नीषोमीयपशोः विकृतिः। १०।१।५. * **पशुमग्नीषोमीयं** प्रोक्षति 'अद्भ्यस्त्वौषधीभ्यो जुष्टं प्रोक्षामि' इति ज्योतिष्टोमे। **भा** ८।२। २।११. * 'पशुमालभेत' इति एकत्वं विवक्षितम्। पश्वेकत्वाधिकरणम्। **वि.** ४।१।५, * 'पशुमालभेत' इति वाक्यं कर्मणो विधायकम्, न तु अनुवादकम्। पशुसोमाधिकरणम्। २।२।६. * 'पशुं संज्ञपयति' अयं प्रतिप्रसवविधिः दृष्टार्थः। **बाल** पृ. २१. * **पशून्**। 'वसन्ते ललामांस्त्रीन् वृषभानालभते'। **भा.** ८।१।८।१५. * '**पशुना**' इयं सुबन्तैकपदरूपा विनियोक्त्री श्रुतिः। **बाल.** पृ. ४१–४२. * 'पशुना यजेत' अत्रोपादेयपश्वादिगता संख्या विवक्षिता। **के.** (भाट्ट. ४।१।५)। * 'पशुना यजेत' इत्यत्र विभक्त्युपात्तसंख्यायाः प्रातिपदिकार्थं प्रति पदश्रुत्या योग्यतारूपलिङ्गेन च विशेषणत्वमवगम्यते। **भाट्ट.** ४।१।५. * **पशोरग्नीषोमीयस्य** पर्यग्निकरणं ज्योतिष्टोमे 'आहव-

नीयादुल्मुकेन पशुं पर्यग्नि करोति ' इति । **भा.** ८।२। २।१२. * पशोरङ्गान्येव हवींषि, न तु कृत्स्नः पशुः । **वि.** १०।७।१. * पशोरङ्गानि । हृदयं जिह्वा वक्षः दोषौ पार्श्वे गुदं अंसौ शिरः अनूकं अपरसक्थिनी । **भा.** १०।७।१–२।२–६. * पशोरञ्जनं केन चित् काष्ठेन कार्यं स्वरोर्नाशादौ । **भाट्ट.** ४।२।१. * पशोः । अवकीर्णिपशोर्लौकिकाग्नौ अनुष्ठानम् । **भा.** ६।८।४।२२. * पशोः आग्नेयस्य प्रथममुपाकरणम्, न तु अग्नीषोमीयस्य साद्यस्क्रे । **रत्न.** ५।१।६।१३. * पशोः एकैकस्मिन् पार्श्वे त्रयोदश त्रयोदश वङ्क्रयो भवन्ति । वङ्क्रयः पर्शवः पार्श्वास्थीनि । **के.**

पशोरेकहविष्ट्वं समस्तचोदितत्वात् । १०। ७।१।१ ॥

ज्योतिष्टोमादौ अग्नीषोमीयादेः पशोः एकहविष्ट्वम् । एकं च तत् हविश्च एकहविः, तस्य भावः एकहविष्ट्वम् । कृत्स्नः पशुरेकं हविः, न तु प्रत्यङ्गं हविर्भेदः । समस्तचोदितत्वात् समस्तस्य पशोः अग्नीषोमार्थे चोदितत्वात् ' अग्नीषोमीयं पशुमालभते ' इति । तस्मात् कृत्स्नः पशुरेकं हविः । तस्मादेव प्रदानार्थमवदेयं पुरोडाशादिव । इति पूर्वः पक्षः ।

प्रत्यङ्गं वा, ग्रहवदङ्गानां पृथक्प्रकल्पनत्वात् । २ ॥

वाशब्दः पूर्वपक्षं व्यावर्तयति । न कृत्स्नस्य पशोः एकं हविष्ट्वम्, किन्तु प्रत्यङ्गं हविष्ट्वम् । हृदयादीनामङ्गानां पृथक्प्रकल्पनत्वात् पृथक् हविष्ट्वेन प्रकल्पनं येषां तानि अङ्गानि पृथक्प्रकल्पनानि, तादृशत्वात् । ' हृदयस्याग्रेऽवद्यति, जिह्वाया अवद्यति, वक्षसोऽवद्यति ' इति अङ्गादङ्गात् पृथगवदानं श्रूयते । तस्मात् पश्वाकृतिकस्य द्रव्यस्य हृदयादीनि हवींषि । तेभ्योऽवदाय प्रदातव्यम् । ग्रहवत् । यथा सोमे ' ऐन्द्रवायवं गृह्णाति, मैत्रावरुणं गृह्णाति, आश्विनं गृह्णाति ' इति पृथक्प्रकल्पनात् सोमरसो हविः न सोमलता, तद्वत् । तस्मात् प्रत्यङ्गं हविर्भेदः इति सिद्धान्तः । **के.**

* पशोरेकहविष्ट्वं समस्तचोदितत्वात् । इति सूत्रेण ' अग्नीषोमीयं पशुमालभेत ' इति तद्धितेन अष्टाकपालादिवत् समस्तपशोः देवताऽन्वयात् प्रदेयत्वलक्षणहविष्ट्वावगतेः समस्तादवदाने पूर्वपक्षिते, ' प्रत्यङ्गं वा ग्रहणवदङ्गानां पृथक्प्रकल्पनत्वात् ' इति सूत्रेण पशुस्वरूपस्य विशसनेन नाशितत्वात् प्रदेयत्वानुपपत्तेः पृथक्कल्पितेभ्यश्च हृदयादिभ्यः अवदानविधानात् तद्धितोक्तस्य देवताऽन्वयस्य साक्षादसंभवात् अगत्या व्यवहितविषयत्वावगतेः प्रत्यङ्गं हविष्ट्वेन अवदानं सिद्धान्तयिष्यते । **सु. पृ.** ७९९. * पशोरेकहविष्ट्वम् (१०। ७।१।१) इत्यत्र उद्भविष्यति (कथा) किं समस्तादवदातव्यम्, उत प्रत्यङ्गम्, उत एकस्मात् अथवा हृदयादिभ्यः परिगणितेभ्यः इति । **वा.** २।२।६।१९ पृ. ५१७. * पशोः एकादशाङ्गानि हविः । तानि च '१ हृदयम्, २ जिह्वा, ३ वक्षः, ४ यकृत्, ५–६ वृक्कौ (वृक्यौ इति क्वचित्), ७ सव्यं दोः, ८–९ उभे पार्श्वे, १० दक्षिणा श्रोणिः, ११ गुदं तृतीयं (गुदतृतीयोंऽशः) इति दैवतावदानानि ' (अत्र यकृत्-शब्दस्थाने ' तनिम ' इति पाठः भाट्टे. , ' दक्षिणोंऽसः, सव्या श्रोणिः, गुदं तृतीयं इति सौविष्टकृतानि ' इति कल्पसूत्रकारः । ' दोष्णः पूर्वार्धादग्नये समवद्यति, गुदस्य मध्यतः, श्रोण्या जघनतः' इति श्रुतिः) । **वि.** १०।७।३. * पशोः कालः ' य इष्टया पशुना सोमेन वा यजेत सोऽमावास्यायां पौर्णमास्यां वा यजेत ' इति । **भा.** १२।२।९।२५. * पशोद्व्र्यहकालत्वे प्राजहिते एव अग्निहोत्रपाकः । **संकर्ष.** ३।२।२५. **मीको.** पृ. ९५ ' अग्निहोत्रपाकः पशोः ' इत्यत्र द्रष्टव्यम् । * पशोः पञ्चावदानत्वम् । पञ्चावदानत्वं हि पशोः श्रूयते । **भा.** १०।७।२।५. * पशोः प्रदेयप्रकृतित्वमेव, न तु साक्षात् प्रदेयत्वम् । इति पश्ववयवा एव अतिदेशप्राप्तपयोबाधकाः । अवयवेष्वेव च पयोधर्माः । **भाट्ट.** १०।७।१. * पशोः या देवता, सैव पशुपुरोडाशस्यापि । **के.** * पशोः विशसनकर्म हृदयादीनां निष्पत्त्यर्थम्, न जाघन्याः । **भा.** १२।४।६। १३, * पशोः वैशेषिको धर्मः सूक्तवाकप्रैषः ' अग्निमद्य ' इति । आम्नानसामर्थ्यान्नित्योऽसौ, स च मैत्रावरुणेन वक्तव्यः । मैत्रावरुणश्च पशौ अस्ति, पुरोडाशे नास्ति । १२।२।१२।३१, * पशोः सवनीयस्य धर्माणा-

मतिदेशः, ऐकादशिनेषु पशुषु । द्वैरशन्यस्य दर्शनात् । ८।१।७।१४, * पशोः स्वरुणा अञ्जनं स्वरोरुत्पत्ति प्रयोजयति । 'स्वरुणा पशुमनक्ति' । ४।४।१०।२५–२८. * पशोः हृदयाद्यवदानकर्तृत्वं अध्वर्योः प्रतिप्रस्थातुर्वा इति पक्षद्वयम् । पक्षद्वयेऽपि प्रतिप्रस्थातुः इडाभक्षो नास्तीति भाट्टदीपिका विस्तरश्च । प्रतिप्रस्थातृकर्तृकत्वपक्षे तस्य भक्षोऽस्ति इति शास्त्रदीपिका । **के.** * पशोः हृदयाद्यवयवेभ्य एव द्यवदानं गृहीत्वा हूयते । **शा.** १०।७।१. * पशोः हृदयादिरूपहविष्प्रकृतितया यागाङ्गत्वम् । यत्र विशसनम्, तत्र पशुः प्रकृतिद्रव्यम् । **मीन्या.** * पशूनामैकादशिनानां प्रायणीयोदयनीययोः विभज्य (५+६) अनुष्ठानम् । **भा.** १०।६।४।६–१२, * पशूनां काम्यानां सौम्यादीनामनुष्ठाने पाठक्रमो न नियामकः, यथाकामं तु अनुष्ठानम् । ५।३।१२। ३२–३६, * पशूनां त्रयाणां यूपस्तन्त्रमग्निष्टोमे । ' यूपन्यायः ' इत्यत्र अधिकरणं द्रष्टव्यम् । ११।३।३।३–४, * पशूनां प्राजापत्यानां ब्रह्मसामकाले आलम्भोत्कर्षमात्रविधानं वाजपेये । ११।२।१२।५१–५३. * पशौ अग्नीषोमीये ' अध्यूध्नीं होत्रे हरन्ति ' इत्युक्तया अध्यूध्न्या होतुः कृत्स्नस्य इडाभागस्य निवृत्तिः । **भाट्ट.** १०।७।४. **[अग्नीषोमीये इति पदं प्रतिबिन्दु अनुवर्तते इति ज्ञेयम्]** * पशौ अनिज्याशेषैस्त्रिभिरङ्गैः स्विष्टकृद्यागानुष्ठानम् । **भा.** १०।७।३।१०–११, * पशौ अनूयाजीयपृषदाज्यधारणार्थं पात्रं प्रयाजाज्यपात्रात् पृथक् ग्राह्यम् । पात्रभेदन्यायः । ५।२।८।१६. * पशौ इडाभक्षः ' दक्षिणतो निधाय प्रतिप्रस्थाता अवद्यति ' इति प्रतिप्रस्थात्रवदानपक्षे प्रतिप्रस्थातुरपि अस्ति । अध्वर्युणा अवदानमितिपक्षे तु नास्ति इति पार्थसारथिः । तन्निर्मूलमिति, यदि तु याज्ञिकानां तथा आचरणम्, तदा भक्षोत्तरकालीनः प्राकृतः कश्चित् पदार्थः अनुषंधेयः इति च खण्डदेवः । **के.** (**भाट्ट.** १०।७।८) । * पशौ इडाभक्षे ' वनिष्ठुमग्नीधे ' इति वनिष्ठुना अग्नीधः तदितरभागस्य बाधः । **वि.** १०। ७।५. * पशौ दार्शपौर्णमासिको विध्यन्तः, लिङ्गदर्शनात्, ' एकादश प्रयाजान् यजति, एकादशानुयाजान् ' ' स्रौचमाघारमाघार्य जुह्वा पशुमनक्ति ' इति, द्रव्यदेवतारूपव्यक्तचोदनत्वाच्च । **भा.** ८।१।५।१२, * पशौ धर्मवान् निर्मन्थ्योऽग्निराम्नातः ' निर्मन्थ्येनेष्टकाः पचन्ति ' इति । ७।३।७।१८. * पशौ ' परिवीरसि ' इति करणमन्त्रेण अध्वर्युर्यूपस्य परिव्याणं करोति । तत् परिव्याणं होता ' युवा सुवासाः ' इति मन्त्रेण अनुवदति । **वि.** ३।८।११. * पशौ प्रतिप्रस्थातुर्भक्षाभावः ज्योतिष्टोमे । **भा.** १०।७।८।२२–२३, * पशौ मैत्रावरुणस्य अस्ति इडाभक्षः । १०।७।६।१८–१९ । प्रैषानुवचनरूपकर्मद्वयकर्तृत्वेऽपि तस्य न द्वौ भागौ, किन्तु एक एव । ७।२०–२१, * पशौ मैत्रावरुणस्य प्रैषान्तानुवचनेष्वेव कर्तृता ज्योतिष्टोमे । प्रैषानुवचनाधिकरणम् । ३।७। २१।४३–४५, * पशौ वनिष्ठुः अग्नीधः प्राकृतकृत्स्नेडाभक्षं निवर्तयति ज्योतिष्टोमे । वनिष्ठु–अधिकरणम् । १०।७।५।१७, * पशौ वाग्यमस्य पशुपुरोडाशहविष्कृदाह्वानकाले विसर्गः । ११।३।८।१६, * पशौ अग्नीषोमीये (इदं पदं उत्तरत्र नानुवर्तनीयम् ।) विहितैः एकादशप्रयाजैः प्राकृताङ्गान्तराणां न बाधः सोमे । १०।३।१।११–१२.

पशौ अग्नीषोमीये शमिता ऋत्विग्भ्यो न भिन्नः ॥

शमिता च शब्दभेदात् । ३।७।१३।२८ ॥

भाष्यम्— अस्ति शमिता ' शमितारमुपनयीत ' इति । स किं संकीर्तितानाम् (ऋत्विजाम्) अन्यतमः, उत अन्यस्तेभ्यः इति । किं प्राप्तम् ? तेषां वरणे संकीर्तनात् तेषामन्यतमः । इति प्राप्ते, उच्यते । शमिता च शब्दभेदात् । शब्दो भिद्यते । एवंसंज्ञकेन इदं कर्म कर्तव्यमिति । तस्मात् एवंसंज्ञकः उत्पादयितव्यः । अस्य संकीर्तनात् संख्याविवृद्धिः गम्यते । तस्मादन्यः शमिता स्यात् । अपि च ' क्लोमा चार्धं वैकर्तनं च शमितुः । तद् ब्राह्मणाय दद्यात्, यद्यब्राह्मणः स्यात् ' (अत्र ऐब्रा. ' अर्धं चैव वैकर्तस्य क्लोमा च शमितुः ' इति पाठः प्रथमवाक्ये । तद्ब्राह्मणाय इत्यादि तु समानम् । ३१।१।२) इति अब्राह्मणाशङ्का भवति । सा ऋत्विजि नोपपद्यते ।

वा-- शमिता च शब्दभेदात् ॥ (वार्तिककारेण सूत्रपाठमात्रं कृतम्) ।

प्रकरणाद् वोत्पत्त्यसंयोगात् । २९ ॥

भाष्यम्— सत्यं संख्याविवृद्धिर्गम्यते, न तु उत्पद्यमानेषु । या तु अनुत्पत्तिस्तेषु गम्यते, तत्र एकस्य कर्मभेदात् (३।७।९।२३) इत्येवमपि अवकल्पते । यत्तु उक्तं अब्राह्मणाशङ्का भवतीति, यजमानाभिप्राया सा ' यदि अब्राह्मणो यजमानः स्यात् ' इति । ननु ' यदि अब्राह्मणः स्यात् ' इति प्रकृतः शमिता संबध्यते । उच्यते । शमयति (शरीरोष्माणं वारयति संज्ञपयतीत्यर्थः ।) इति शमिता । यौगिक एष शब्दः प्रकृतेष्वपि अवकल्पते । शामित्रमपि आध्वर्यवे समाम्नानात् अध्वर्युणा कर्तव्यम् । तस्मात् शमनात् अध्वर्युः शमिता । एवं सति अप्रकृतो यजमानः संबध्यते ।

वा-- उत्पत्तिगता समाख्या भेदिका भवति । न चेयं तद्गता । तेन ' एकस्य कर्मभेदात् ' इत्येवमेव भवति । नन्वध्वर्य्वादिषु व्याप्रियमाणेषु ' शमिता पशुं कण्ठे गृह्णाति ' इति श्रवणाद्भेदः स्यात् । नैष दोषः । य एव कश्चिदव्यापृतः, स एव ग्रहीष्यति । न च तदा सर्वाध्वर्युपुरुषाणां सर्वर्त्विजां वा व्यापारो विद्यते । तदेतद् वक्ष्यति ' इतरमन्यस्तेषां यतो विशेषः स्यात् ' इति । प्राप्त्यभावाच्च 'यद्यब्राह्मणः स्यात् ' इति लिङ्गमबाधकम् । अतो बलात् यजमानविषयं कल्प्यते । (' यद्यब्राह्मणः स्यात् ' इति वाक्यस्य) यजमानप्रकरणाम्नानाच्च शामित्रस्य न कथञ्चित् अब्राह्मणविषयत्वं विज्ञायते । हिंसात्वात् ब्राह्मणो नेच्छेत् इति चेत्, तुल्यमेतत् अब्राह्मणस्यापि । स हि मन्दप्रतीकारः सुतरां प्रत्यवैति । तेन यथैव शूद्रादिः कथञ्चिदनिच्छन् कार्यते (शामित्रम्), तथैव यो दानादिवशीकृतः (आर्त्विज्यम्) करिष्यति सोऽनुष्ठास्यति (शामित्रम्) इत्यविरोधः । एतेनैव हेतुना आर्त्विज्यं निन्द्यते ।

सोम-- संज्ञाभेदात् प्राप्तान्यत्वापवादात् संगतिः ।

वि— ' तेभ्योऽन्यः शमिताऽनन्यो वा, ऽन्यः संज्ञापृथक्त्वतः । , वरणाभावतो नान्यः संज्ञाभेदात्तु यौगिकः ॥ ' यद्यपि ' शमितार उपेतन यज्ञम् ' इति मन्त्रः अध्वर्युकाण्डे पठितः, तथापि ' परावर्ततेऽध्वर्युः पशोः संज्ञप्यमानात् ' इति अध्वर्योः परावृत्तिश्रवणात् अध्वर्युपुरुषाः प्रतिप्रस्थात्रादयः शमितारः ।

भाट्ट— पशौ ' शमितारमुपनयीत ' इति श्रुतः शमिता तु वरणभेदानाम्नानात् सत्यपि संज्ञाभेदे यौगिकत्वेन प्रकृतेष्वेव ऋत्विक्षु अनृत्विक्षु वा वृतेषु तस्याः उपपत्तेर्नान्यः । तत्राप्यध्वर्योः ' पराङावर्ततेऽध्वर्युः पशोः संज्ञप्यमानात् ' इति वचनेनासामर्थ्यात् तत्पुरुषः प्रतिप्रस्थाता संज्ञपयेत् । न च तस्य हिंसादोषभिया अप्रवृत्तिः । दक्षिणादिलोभेन तदङ्गीकारेण प्रवृत्त्युपपत्तेः । अत एवार्त्विज्यं निन्दन्ति । ब्राह्मणस्य च शामित्रविषये कलौ पृथङ्निषेधो दोषाधिक्यज्ञापनार्थः । अत एव कलौ शामित्रे ब्राह्मणालाभेन शूद्रेण क्रियमाणे ' क्लोमानं शमितुस्तद्ब्राह्मणाय दद्यात् यद्यब्राह्मणः स्यात् ' इति वचनं संगच्छते एव । अब्राह्मणपदं यजमानपरमिति तु प्राञ्चः ।

मण्डन— ' शमिताऽध्वर्युरेव स्यात् । '

शंकर— ' ऋत्विग्भ्यः शमिता नान्यः । '

* पशौ अग्नीषोमीये हृदयाद्यङ्गेष्वपि वपावत् पञ्चावत्तत्वमेव । भा. १०।७।२०।७२-७३.

पशावनालम्भाल्लोहितशकृतोरकर्मत्वम् । ४ । १।१२।२७ ॥

अग्नीषोमीयपशोः हृदयादियागः प्रयोजकः, उत शकृत्संप्रव्याधलोहितनिरसने अपि प्रयोजके इति विचारे सिद्धान्तसूत्रम् । पशौ पशुयागे लोहितस्य शकृतश्च लोहितशकृतोः लोहितनिरसनशकृत्संप्रव्याधयोः अकर्मत्वं अप्रयोजकत्वम् । कुतः ? अनालम्भात् लोहितनिरसनाद्यर्थं पशोरालम्भाभावात् । हृदयादियागार्थमेव हि आलम्भः । तस्मात् हृदयादियाग एव पशोरालम्भस्य प्रयोजकः । के.

* ' पशावनालम्भाल्लोहितशकृतोरकर्मत्वम् ' इत्यधिकरणे प्रधानपूर्वकाला प्रतिपत्तिः ' शकृत् प्रविध्यति ' ' लोहितं निरस्यति ' इत्युक्ता । बाल. पृ. ८२. * पशौ अनूयाजाः एकादश । तत्र प्रथमानुयाजस्य आद्याश्चत्वारो दशमश्चेति अभ्यासः, द्वितीयस्य अष्टमपर्यन्तं पञ्चमप्रभृत्यभ्यासः, तृतीयस्य नवमैकादशौ इति । भाट्ट. ५।३।२.

पशावपीति चेत् । १०।१।९।१९ ॥

' अग्नीषोमीयस्य वपया प्रचर्य अग्नीषोमीयं पशुपुरोडाशमनुनिर्वपति ' इत्युक्तः पशौ पुरोडाशः अपि आज्यभागवत् आरादुपकारकः स्यात्, न देवतासंस्कारार्थः । इति चेत् पूर्वपक्षी ब्रूयात् ।

न, तद्भूतवचनात् । २० ॥

अग्नीषोमीयपशुपुरोडाशयागः न आरादुपकारकः किन्तु पशुदेवतायाः संस्कारकर्म । न च पशौ अन्या देवता पुरोडाशे चान्या, किन्तु एकैव, ' यद्देवत्यः पशुः, तद्देवत्यः पशुपुरोडाशः ' इति तद्भूतवचनात् । तस्मिन् पशौ भूतः विद्यमानो यो देवताविशेषः तस्यैव पशुपुरोडाशेऽपि वचनात् । तस्मात् सैव देवता, पुरोडाशयागश्च तस्याः संस्कारकर्म इति सिद्धान्तः ।

लिङ्गदर्शनाच्च । २१ ॥

पशुपुरोडाशयागः पशुदेवतायाः संस्कारकर्म संप्रतिपन्नदेवताकत्वरूपस्य मन्त्रलिङ्गस्य दर्शनात् । ' इन्द्राय वज्रिणे वृषभमालभेत ' इत्यस्य पशोः पुरोडाशस्य क्रमे ' इन्द्रं स्तुहि वज्रिणं स्तोमपृष्ठम् ' ' स्तुहि शूरं वज्रिणं सुप्रतीतम् ' इति याज्यानुवाक्याद्वयं समाम्नातम् । तत् संस्कारपक्षे युज्यते । तस्मात् पशुदेवतासंस्कारार्थः पुरोडाशयागः इति सिद्धान्तः ।

गुणो वा स्यात् कपालवद्, गुणभूतविकाराच्च । २२ ॥

वाशब्दः सिद्धान्तपक्षं व्यावर्तयति । पुरोडाशदेवता गुणः पशुयागे पुरोडाशयागे च गुणः स्यात् । कपालवत्, यथा कपालं श्रपणेऽपि तुषोपवापेऽपि च गुणः तद्वत् । गुणभूतविकारात् गुणभूतविकारत्वात् अग्नीषोमौ पशुयागे पुरोडाशयागे च गुणभूतौ । तत्र आरादुपकारकभूतस्यैव पुरोडाशयागस्य विकारत्वात् प्राकृतधर्मग्राहित्वात् । चकारो दृष्टान्तार्थः, सौत्रामण्यां आश्विनसारस्वतसुत्रामदेवताकेषु पशुषु ऐन्द्रवारुणसावित्राः पुरोडाशाः पशुप्रकरणात् नोत्कृष्यन्ते, तस्मात्तेषामारादुपकारकत्वमेव । संस्कारपक्षे तु उत्कृष्येरन् । तद्वत् अत्रापि पुरोडाशयागस्य आरादुपकारकत्वम् । प्रधानभूतयोरग्नीषोमयोः गुणत्वं विरुद्धमिति भावः । इति पूर्वः पक्षः ।

अपिवा शेषभूतत्वात् तत्संस्कारः प्रतीयेत स्वाहाकारवत् । २३ ॥

सूत्रप्राप्तपूर्वपक्षव्यावृत्त्यर्थः अपिवाशब्दः । शेषभूतत्वात् देवतायाः यागशेषभूतत्वात् पशुपुरोडाशः तत्संस्कारः तस्याः पशुदेवतायाः संस्कारः प्रतीयेत । स्वाहाकारवत्, यथा स्वाहाकारः पञ्चमप्रयाजरूपः स्वाहाकारयागः स्वयं निष्प्रयोजनः सन् देवतासंस्कारः प्रतीयते तद्वत् । तस्मात् पुरोडाशयागः संस्कारकर्म ।

अङ्गानामर्थसंयोगात् । २४ ॥

पशुपुरोडाशयागः पशुदेवतासंस्कारकर्म । अङ्गानामर्थेन प्रयोजनेन संयोग इह गम्यते वाक्येन । तेन नारादुपकारकम् । आरादुपकारकेभ्यः सामवायिकानि अङ्गानि वरीयांसि भवन्ति इति । तस्मात् संस्कारकर्म पुरोडाशयागः ।

व्यृद्धवचनं च विप्रतिपत्तौ तदर्थत्वात् । २५ ॥

सौत्रामण्यां पशुपुरोडाशदेवतानां विप्रतिपत्तौ सत्यां व्यृद्धवचनं व्यङ्गत्ववचनं तदर्थत्वात् ल्यब्लोपे पञ्चमी, तदर्थत्वं देवतासंस्कारार्थत्वमङ्गीकृत्य उपपद्यते । ' यद्वै सौत्रामण्यां व्यृद्धं तदस्याः समृद्धं यदन्यदेवत्याः पशुपुरोडाशा भवन्ति अन्यदेवत्याः पशवः ' इति । इदं च पशुपुरोडाशस्य संस्कारकर्मत्वे एवोपपद्यते । तस्मात् संस्कारकर्म पशुपुरोडाशः इति सिद्धान्तः ।

गुणेऽपीति चेत् । २६ ॥

पूर्वपक्षी आह । गुणेऽपि व्यृद्धवचनमुपपद्यते इति । गुणपदेन आरादुपकारकाङ्गत्वमुच्यते । पुरोडाशयागे गुणेऽपि आरादुपकारकाङ्गे स्वीकृतेऽपि व्यृद्धवचनमुपपद्यते, व्यृद्धत्वे सत्येव समृद्धतरत्वोक्तेः । इति चेत् पूर्वपक्षी ब्रूयात् ।

नासंहानात् कपालवत् । २७ ॥

पशुपुरोडाशयागस्य आरादुपकारकत्वेऽपि सौत्रामण्यां व्यृद्धवचनं उपपन्नं इति चेन्न । कपालवत्, यथा एकेन कपालेन तुषोपवापे क्रियमाणे अन्यस्य कपालस्य काचिद्धानिर्नास्ति, तथा अन्यया देवतया पुरोडाशयागे

क्रियमाणे पशुयागदेवतायाः असंहानात् संहानस्य हानेरभावात् । पशुदेवतायाः संस्काररूपपुरोडाशयागे अन्यथा देवतया कृते स्मरणरूपसंस्कारलोपात् व्यृद्धवचनं उपपद्यते इति भावः । एवं च सौत्रामण्यां व्यृद्धवचनं अन्यत्र पशुयागे पुरोडाशयागे च एकैव देवता भवतीति लिङ्गदर्शनं भवति इति पुरोडाशयागः पशुयागीयदेवतायाः संस्कारकर्मैव इति सिद्धं भवति ।

ग्रहाणां च संप्रतिपत्तौ तद्वचनं तदर्थत्वात् । २८ ॥

सौत्रामण्यां संप्रतिपत्तौ संप्रतिपन्नदेवताकेषु ग्रहेषु तद्वचनं पुरोडाशवचनं भवति ' नैतेषां पशूनां पुरोडाशा विद्यन्ते ग्रहपुरोडाशा ह्येते पशवः ' इति । वस्तुतस्तु न तावत् न पुरोडाशा विद्यन्ते, विप्रतिपन्नदेवताकैस्तु संस्काराभावमालोच्य एवमुच्यते– ग्रहा एषां पुरोडाशा इति । तदर्थत्वात् देवतासंस्कारार्थत्वात् पुरोडाशानामिव ग्रहाणाम् । तेन ज्ञायते यत्र साक्षात् पुरोडाशा एव भवन्ति तत्र ते पशुदेवतासंस्कारार्था इति । तस्मात् संस्कारार्थः पशुपुरोडाशः ।

ग्रहाभावे च तद्वचनम् । २९ ॥

सौत्रामण्यां आश्विनसारस्वतैन्द्राग्रान् पशुयागान् विधाय तेषां ग्रहपुरोडाशांश्च विधाय बार्हस्पत्यः चतुर्थः पशुयागो विहितः । अयं च पुरोडाशवानेव पशुः ' न ह्येतस्य ग्रहं गृह्णाति ' इति श्रुतत्वात् । एवं चात्र ग्रहाभावे ग्रहस्याभावे तद्वचनं पशुपुरोडाशवचनं पशुयागे पुरोडाशग्रहान्यतरयागस्य संस्कारकर्मत्वे लिङ्गम् । तस्मात् पुरोडाशो देवतासंस्कारार्थः ।

देवतायाश्च हेतुत्वं प्रसिद्धं तेन दर्शयति । ३० ॥

' अग्निभ्यः कामेभ्यः पशव आलभ्यन्ते, कामा वा अग्नयः, आग्नेयाः पुरोडाशा भवन्ति आग्नेया हि पशवः ' अत्र पशुदेवताया अग्नित्वात् पुरोडाशानामपि देवता अग्निरेव इत्याह । ततश्च देवतायाः पशुदेवतायाः पुरोडाशदेवताहेतुत्वं प्रसिद्धं तेन वाक्येन दर्शयति । तस्मात् पुरोडाशः पशुदेवतासंस्कारः ।

अविरुद्धोपपत्तिरर्थापत्तेः शृतवद् गुणभूतविकारः स्यात् । ३१ ॥

यदुक्तम् (२२) गुणभूतयोर्धर्मः प्रधानभूतयोरग्नीषोमयोर्न स्यात् इति, तत्रोच्यते । अग्नीषोमीयपशुपुरोडाशे अग्नीषोमौ प्रधानदेवते । पूर्णमासयागे तु अग्नीषोमौ यागाङ्गम् । एवं च गुणभूतयोरपि अग्नीषोमयोर्धर्माः पशुपुरोडाशे प्रधानभूतयोरपि सतोः उपपद्यन्ते । तदाह उपपत्तिः धर्माणामुपपत्तिः अविरुद्धा न विरुद्धा । अर्थापत्तेः अर्थस्य प्रयोजनस्य आपत्तेः प्राप्तेः सिद्धत्वादित्यर्थः । शृतवत् । यथा अभ्युदितेष्टौ ' शृते चरुम्, दधंश्चरुम् ' इति दधिशृते प्रदानार्थत्वात् प्रधानभूते अपि गुणभूतं प्रणीताकार्यं लभेते । तस्मात् पशुपुरोडाशः पौर्णमासपुरोडाशस्य गुणभूतस्यापि विकारः स्यात् । प्रधानमपि क्वचित् गुणभूतस्यापि धर्मान् लभते इति वक्तव्यमत्र ।

स द्व्यर्थः स्यादुभयोः श्रुतिभूतत्वाद्, विप्रतिपत्तौ तादर्थ्याद् विकारत्वम् । ३२ ॥

यदुक्तं पूर्वपक्षिणा ऐन्द्रवारुणसावित्राणां पुरोडाशानां सौत्रामणीप्रकरणात् उत्कर्षः प्राप्नोतीति (२२) । तत्रेदमुच्यते । स यागः द्व्यर्थः देवतासंस्कारार्थः छिद्रापिधानार्थश्च । उभयोः अर्थयोः श्रुतिभूतत्वात् श्रुत्युक्तत्वात् । विप्रतिपत्तौ विप्रतिपन्नदेवताकेषु पुरोडाशेषु तादर्थ्यात् छिद्रापिधानार्थत्वात् विकारत्वं प्रकरणे एव । न प्रकरणादुत्कर्षः ।

तस्याप्युक्तमर्थवादत्वम् । ३३ ॥

पशुपुरोडाशस्य पशुच्छिद्रापिधानार्थत्वं यदुक्तं सिद्धान्तिना, तस्यापि अर्थवादत्वमुक्तम् । वपोद्धरणेन जातस्य पशोः छिद्रस्य पुरोडाशेन अपिधानं प्रत्यक्षविरुद्धम् । तस्मात् छिद्रापिधानोक्तिः पुरोडाशस्तुत्यर्था इति । इति पूर्वपक्षिणः शङ्का ।

विप्रतिपत्तौ तासामाख्याविकारः स्यात् । ३४ ॥

यदुक्तं पूर्वपक्षिणा छिद्रापिधानार्थत्वस्य अर्थवादत्वमिति । तत्रोच्यते । तर्हि प्रकारान्तरेण सौत्रामणीप्रकरणात् पुरोडाशानामनुत्कर्ष उच्यते । माऽस्तु छिद्रापिधानार्थत्वेन अनुत्कर्षसिद्धिः । तद्यथा । अश्विनौ सरस्वती सुत्रामा

च पशुदेवताः । इन्द्रः वरुणः सविता च पुरोडाशदेवताः । एवं सौत्रामण्यां देवतानां विप्रतिपत्तौ सत्यां तासां पशुदेवतानां याः आख्याः तासां विकारः स्यात् । पशुदेवतावाचकशब्दानां पुरोडाशदेवतावाचकशब्दाः आख्याविकारः स्यात् । तत्र इन्द्रः सुत्रामा पर्यायाविव इति इन्द्रशब्दस्य सुत्रामा इति विकारः । सरस्वतीशब्दस्य विकारः सविताशब्दः । अश्विनौशब्दस्य वरुणशब्दः । एवं च पाशुक्य एव देवताः पौरोडाशिक्यः स्युः इति प्रकरणात् नोत्कर्षः । तस्मात् पुरोडाशयागः संस्कारार्थः ।

अभ्यासो वा प्रयाजवदेकदेशोऽन्यदेवत्यः । ३५ ॥

सौत्रामण्यां पशुदेवतानां आख्याविकाराः ग्रहपुरोडाशदेवताशब्दाः इत्युक्तम्, तत् अपरितोषात् वाशब्दो व्यावर्तयति । न आख्याविकारः । संस्कारपक्षस्तु अन्यथा अवकल्पते । पशुपुरोडाशः पशुयागस्य अभ्यास एव पशुदेवतासंस्कारार्थः । सौत्रामण्यां तु ग्रहाणामेकदेशः अन्यदेवत्योऽपि स्यात् प्रयाजवत् । तद्यथा पशौ चोदकेन प्राप्तानां प्रयाजानां पञ्चत्वस्य स्थाने एकादशत्वं विधीयते । तच्च अभ्यासमन्तरेण नावकल्पते इति अभ्यस्यन्ते प्रयाजाः । तेषामेकदेशः अन्यदेवत्यः प्रकृतिवत् समिदादिदेवत्यः, अपरः एकदेशस्तु अन्यदेवत्यः दुरः उषासानक्ता इत्येवमादिदेवत्यः । तद्वत् सौत्रामण्यां पशुदेवता पशुपुरोडाशे चोदकेन प्राप्नोति पुरोडाशश्च द्रव्यम् । तत्र पशुदेवतायाः द्रव्यान्तरं ग्रहो विधीयते, पशुपुरोडाशस्य च द्रव्यस्य देवताऽन्तरं इन्द्रसरस्वत्यादि विधीयते, यागस्तु अविकृत एवावतिष्ठते । स च यागः पशुं पुरोडाशं चेति द्रव्यद्वयं संपादयितुमभ्यस्यते । तस्मात् पशुपुरोडाशः पशुदेवतायाः संस्कारकर्म नारादुपकारकः इति सिद्धान्तः । के.

* **पशावपीति चेत्** । अत्रेदं चिन्त्यते । ' अग्नीषोमीयस्य वपया प्रचर्य अग्नीषोमीयं पशुपुरोडाशमनुनिर्वपति ' इति अग्नीषोमदेवतासंस्कारार्थतया विहितः पुरोडाशयागः भूतवपायागाभ्यासार्थ एव, उत भाव्यङ्गयागाभ्यासार्थः एव, उत उभयार्थोऽपि इति । तत्र उभयार्थोऽयं तत्संस्कार्यायाः अग्नीषोमदेवतायाः उभयत्र सत्त्वात् इत्याद्यः पक्षः । द्वितीयस्तु वपायागाभ्यासार्थः एव संस्कार्यदेवतायाः उभयत्र सत्त्वेऽपि ' वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत ' इतिवत् ' संस्थाप्य पौर्णमासीं वैमृधमनुनिर्वपति ' इतिवच्च वाक्येन वपायागाभ्यासमात्रार्थत्वावगमात् इति । उच्यते । पुरोडाशयागस्तावत् वाक्यादेव अग्नीषोमदेवतासंस्कारार्थः । तत्र वपायागस्य वाक्यादेव अग्नीषोमदेवतारूपोद्देश्यविशेषणत्वे स्वतन्त्रोद्देश्यत्वे वा वाक्यभेदापत्तिः । बृहस्पतिसववैमृधयोस्तु नायं दोषः । तस्मात् न भाव्यङ्गयागाभ्यासार्थमेव । तत्रोपपत्तिः । संनिपत्योपकार्यं यागापूर्वं प्रधानोत्पत्त्यपूर्वं एव व्याप्रियते इति हि सार्वत्रिकम् । क्वचिदेव तु अगत्या तदुत्पन्नस्यैव प्रधानापूर्वस्य धारणे व्याप्रियते इति कल्प्यते । तदिह भाव्यङ्गयागाभ्यासापूर्वोत्पत्तौ पुरोडाशयागापूर्वस्य व्यापारसंभवे उत्पन्नवपायागाभ्यासापूर्वधारणे व्यापारकल्पना न संभवति । तस्मात् पुरोडाशयागोऽपि उत्तमप्रयाजवत् वक्ष्यमाणदेवतासंस्कारार्थ एवेति । **सिद्धान्तस्तु**– प्रकरणावगतोभयार्थत्वबलेन भूतोपयोगभाव्युपयोगदेवतासंस्कारार्थत्वावश्यम्भावादुत्पन्नस्यापूर्वस्य धारणम्, अनुत्पन्नस्य च उत्पत्तिः इत्यविरोधात् उभयाभ्यासार्थत्वमेवेति । **बाल. पृ. ८३–८४.**

* पशौ ' आज्येन यूपमनक्ति ' इति आज्यं दर्शपूर्णमासगताज्यधर्माणां न ग्राहकम् । **भा.** ७।३।७।१८,

* पशौ आज्यभागप्रतिषेधः अर्थवादः । १०।८।२।५. ' पाशुकाज्यभागन्यायः ' इत्यत्र द्रष्टव्यम् ।

ॐ पशौ उत्तमप्रयाजार्थमपि स्रुगादापनप्रैषस्य आवृत्तिः ॥

पशौ उत्तमप्रयाजस्य कालत उत्कर्षात् सकृत् स्रुगादापनमन्त्रस्य ' घृतवतीमध्वर्यो स्रुचमास्यस्व ' इत्यादेः प्रयुक्तत्वेन तावतैव अध्वर्योः प्रैषार्थप्रतिपत्तेर्जातत्वात् पुनः चरमप्रयाजकाले स्रुगादापननिगदः प्रयोज्यः । **इति प्राप्ते,** प्रैषजनितसंस्कारस्य कर्मकालत्वेन कालभेदेन कर्मणो भेदे सति तदङ्गत्वात् प्रैषोऽप्यावर्तते । ' अग्निं भ्राजस्वन्तं यज ' इति याज्यासंप्रैषस्य आवृत्तिदर्शनात् । **संकर्ष.** ४।४।१०.

* पशौ उभयत इष्टिपक्षवत् अन्यतरत इष्टिपक्षोऽप्यस्ति । **संकर्ष.** ३।२।२३.

पशौ च लिङ्गदर्शनात् । ८।१।५।१२ ॥

अग्नीषोमीये पशौ च इष्टिषु इव दार्शपौर्णमासिक एव विध्यन्तः स्यात् । 'एकादश प्रयाजान् यजति, एकादशानुयाजान्' इति, 'स्रौचमाघारमाघार्य जुह्वा पशुमनक्ति' इति च लिङ्गम् । 'ऐन्द्रं पयः' इति दर्शे, 'अग्नीषोमीयं पशुं' इति च पशौ द्रव्यदेवतावत्त्वम् । **के.**

पशौ च सपुरोडाशे समानतन्त्रं भवेत् । ११।३।८।१८ ॥

अग्नीषोमीये पशौ पशुः पुरोडाशश्च । तत्र हविष्कृदाह्वानकाले वाग्विसर्गः पौरोडाशिके एव हविष्कृदाह्वानकाले, न पाशुके इति सिद्धान्तः । तदाह सपुरोडाशे पुरोडाशेन सहिते सपुरोडाशे पशौ समानतन्त्रं भवेत् समानं एकमेव तन्त्रं भवेत् । तस्मात् सर्वतन्त्रान्ते पौरोडाशिके आह्वानकाले वाग्विसर्गः स्यात् । कृत्वा चिन्तेयम् । नास्ति पशौ हविष्कृत् । **के.**

पशौ तु संशृते विधानात् तार्तीयसवनिकेषु स्यात् सौम्याश्विनयोश्चापवृक्तार्थत्वात् । १२।२।४।१२ ॥

तार्तीयसवनिकेषु तृतीये सवने भवेषु पुरोडाशेषु सौम्याश्विनयोः सौम्ये चरौ आश्विने द्विकपाले च हविष्कृत् भेदेन आह्वातव्या स्यात् । पशौ संशृते पशुश्रपणोत्तरं एतेषां विधानात् । तस्मिन् काले च पाशुकी हविष्कृत् अपवृक्तार्था, अपवृक्तः समाप्तः अर्थः कार्यं यस्याः सा । समाप्तकार्यत्वात् गृहकृत्यार्थं सा गताऽभूत् । तस्मात् पुनराह्वातव्या । इति पूर्वः पक्षः । तुशब्दः पूर्ववैलक्षण्यार्थः ।

योगाद्वा यज्ञाय तद्विमोके विसर्गः स्यात् ।१३॥

तृतीयसवनगतपुरोडाशार्थं सौम्यचर्वर्थं आश्विनद्विकपालार्थं च हविष्कृत् पुनर्नाह्वातव्या । सैव कुर्यात् विद्यमानत्वात् । ननु कृतार्था सा । न कृतार्था, यज्ञाय योगात् यज्ञाय पशुबन्धाय आदावेव तस्या योगात् । तद्विमोके यज्ञविमोके सति तस्या विसर्गः स्यात् न प्राक् । तस्मात् भेदेन नाह्वानं इति सिद्धान्तः । **के.**

* पशौ दैवतस्विष्टकृतयोरवदानं समकालम् । **संकर्ष.** २।२।१८. **मीको.** पृ. ६९३ 'अवदानं समकालं०' इत्यत्र द्रष्टव्यम् । * पशौ 'नांसयोरवद्यति, न शिरसः नानूकस्य नापरसक्थ्योः' इति केषां चिदङ्गानामवदाननिषेधः । **भा.** १०।७।२।६, * पशौ 'न तौ पशौ करोति, न सोमे' इति आज्यभागप्रतिषेधः अर्थवादः, न पर्युदासः । सोमे तस्य नित्यानुवादत्वात् । १०।८।२।५, * पशौ पात्नीवते 'आज्येन शेषं संस्थापयति' इति वाक्येन कर्मान्तरविधानम् । (न तु उत्सृष्टस्य पात्नीवतस्यैव आज्येन समाप्तिः) । ९।४।१४।५६–६०. * पशौ पुंस्त्वादि लिङ्गं विवक्षितम् । ४।१।६।१७. 'लिङ्गाधिकरणम्' इत्यत्र अधिकरणं द्रष्टव्यम् ।

पशौ पुरोडाशस्य शालामुखीये एव श्रपणम् ॥

पशोरिव पशुतन्त्रान्तःपातिनः पुरोडाशस्यापि प्रसङ्गित्वेन शामित्रे एव श्रपणे **प्राप्ते,** शालामुखीये एव स्यात् । तस्य गार्हपत्याहवनीयोभयरूपत्वात् । पुरोडाशे चोदकेन उभयोर्विकल्पेन प्रापणेऽपि संभवति अविरोधेन विधिद्वयानुग्रहेऽन्यतरत्यागस्यानुचितत्वात् । **संकर्ष.** ३।२।२६.

पशौ प्रथमेष्टिपक्षे इष्ट्यर्थं प्रणीत एवाहवनीयः पश्वर्थमपि धार्यः ॥

पशौ उभयत इष्टिपक्षवत् अन्यतरत इष्टिपक्षोऽप्यस्ति । तत्र प्रथमत इष्ट्यभावे पशौ एवाहवनीयप्रणयनं भवतीत्यविवादम् । तदवैरूप्याय प्रथमेष्टिपक्षेऽपि तथैव स्यात् । इष्टौ प्रणीतस्य इष्ट्यपवर्गे लौकिकत्वात् ; **इति प्राप्ते,** देवतापरिग्रहरूपसंस्कारस्य साङ्गपश्वपवर्गे एवापनयात् दीक्षणीयाहवनीयवत् ऐष्टिक एव आऽन्तं धार्यः । **संकर्ष.** ३।२।२३.

* पशौ प्रयाजा एकादश । तत्र प्राकृतिकपञ्चप्रयाजेषु चतुर्थोत्तमप्रयाजयोरेव चतुश्चतुर्वारमावृत्तिः । उभयत्र अभ्यासत्रये च प्राकृतदेवताबाधः लक्षणया वा तद्देवताप्रकाशनमित्यन्यदेतत् । **भाट्ट.** ५।३।२. * पशौ 'बर्हिषा यूपावटमवस्तृणाति' इति । इदं बर्हिः दार्शपौर्णमासिकबर्हिर्धर्मान् न गृह्णाति । **भा.** ७।३।७।१८, * पशौ बहुदेवत्ये अध्रिगुप्रैषगतस्य एकवचनान्त-

मेधपतिशब्दस्य द्विवचनान्तेन विकल्पः । ९।३।१३।४२–४३. **मीको.** पृ. ३४० 'अध्रिगुप्रैषगतस्य मेधपतिशब्दस्य' इत्यत्र द्रष्टव्यम् । * पशौ यागसाधनत्वेन चोदिते हृदयाद्येकादशावदानप्रकृतित्वेन पशुना यागः साधयितव्यः इति वाक्यान्तरवशात् अवगम्यते । **वा.** २।२।७।२१ पृ. ५२४. * पशौ लौकिके यूपस्पर्शे पुरुषार्थं प्रायश्चित्तम् । तत्र 'यदि एकं यूपमुपस्पृशेत् एष ते वायो इति ब्रूयात्, यदि द्वौ एतौ ते वायू इति, यदि बहून् एते ते वायवः' इति विशेषः । **भा.** ९।३।३।९. * पशौ वपा चतुरवत्तिनोऽपि पञ्चावत्तैव 'यद्यपि चतुरवत्ती यजमानः, पञ्चात्तैव वपा कार्या' इति वचनात् । 'आज्यं हिरण्यं वपा हिरण्यं आज्यम्' इति पञ्चावत्तत्वम् । पश्वङ्गेष्वपि पञ्चावत्तत्वम् । **वि.** १०।७।२०.

पशौ वरुणप्रघासेषु च शालामुखीयोऽस्ति ॥

पशौ वरुणप्रघासेषु च प्रकृतितः प्राप्तत्वात् शालामुखीयो न स्यात् । इति **प्राप्ते,** वैशेषिकविधिबलादस्त्येव । अत एव वरुणप्रघासेष्वापस्तम्बमते शालामुखीयो नास्ति बोधायनमते त्वस्तीति व्यवस्था । **संकर्ष.** ३।२।२८.

* पशौ वायव्ये विहितेनाघारमन्त्रेण प्राकृताङ्गान्तराणां न बाधः । **भा.**१०।३।१।१–१२. * पशौ वायव्ये श्वेतगुणस्य नियमविधिः 'वायव्यं श्वेतमालभेत' इति । **वि.** ४।२।१०. * पशौ वायव्ये हिरण्यगर्भमन्त्रस्योत्तराघारे निवेशः । **भा.** १०।३।२।१३–१७, * पशौ वायव्यादौ मनोतामन्त्रः अविकृत एव प्रयोक्तव्यः । १०।४।२१।४२. * पशौ विशसनादिवाक्यपर्यालोचनया अवयवानां हविष्ट्वे सति 'आग्नेयमग्निष्टोम आलभते' इति श्रुतस्य देवतोद्देशेन त्यागस्य वपादिष्वेव पर्यवसानात् 'वपया प्रातःसवने प्रचरन्ति, अङ्गैस्तृतीयसवने' इति युक्तः प्रचारविप्रकर्षविधिः । **सोम.** ११।२।१४. * पशौ शकृत्संप्रवेधः लोहितनिरमनं च पश्वालम्भस्य न प्रयोजके । ४।१।१२. 'शकृल्लोहिताधिकरणम्' इत्यत्र इदमधिकरणं द्रष्टव्यम् । * पशौ 'सं ते प्राणो वातेन गच्छताम्, समङ्गानि यजत्रैः, सं यज्ञपतिराशिषा' इत्यत्र द्वितीयादिमन्त्रे गच्छतां इत्यस्य नानुषङ्गः, गच्छन्तां इति द्वितीये, गच्छतां इति तृतीये अध्याहर्तव्यम् । **वि.** २।१।१८. * पशौ संज्ञप्तहोमो नित्यः । **भा.** ६।८।८।२८, * पशौ सवनीये पशुपुरोडाशः कर्तव्यः । १२।२।२।८–१०, * पशौ (सामिधेनीनाम्) साप्तदश्ये श्रूयमाणे न दार्शपौर्णमासिकी प्रवृत्तिः । (पाञ्चदश्यम्) तत्र विप्रतिषिध्यते, वाचनिकत्वात् साप्तदश्यस्य । ८।४।४।१४. * पशौ सोमापौष्णे यूपः औदुम्बर एवोपदिष्टः । अतिदिष्टस्य तु खादिरस्य बाधः । **वि.** १०।७।१८, * पशौ स्विष्टकृद्विकारः पठितः 'पृषदाज्येन वनस्पतिं यजति' इति । तत्र सर्वेषु निगमेषु असौ वनस्पतिशब्देनैव वक्तव्यः, न पर्यायशब्देन । १०।४।१८, * पशौ (अग्नीषोमीये) हृदयादीनामेव अवदानसंबन्धितया श्रूयमाणानां हविष्ट्वेन इतरावयवानां हविष्ट्वपरिसंख्या । 'हृदयादिन्यायः' इत्यत्र इदमधिकरणं द्रष्टव्यम् । **भा.** १०।७।२।३–९. * पशुषु अतिदेशकराणि प्रकृतिलिङ्गानि आलभतिवत्त्वं प्राणिद्रव्यकत्वं सुत्याकालत्वं पशुगणत्वमित्यादीनि । **बाल.** पृ. ११९. * पशुषु ऐकादशिनेषु सवनीयपशुधर्मातिदेशः । **भा.** ८।१।७।१४. * पशुषु नानाजातीयेषु कुम्भीशूलवपाश्रपणीनां न तन्त्रम्, पाकवैषम्यात् । ११।४।१०।४०–४१. **मीको.** पृ. १९३६ 'तन्त्रं न कुम्भी०' इत्यत्र द्रष्टव्यम् । * पशुषु भिन्नदेवताकेषु एकजातीयेषु कुम्भीशूलवपाश्रपणीनां तन्त्रम् । ११।४।९।३४–३९. **मीको.** पृ. १३०६ 'ऐकादशिनेषु पशुषु' इत्यत्र द्रष्टव्यम् । * पशुषु यूपे खादिरत्वस्य नियमविधिः वाजपेये । **भा.** १०।७।१६।५१–५७. * पशुषु वाजपेयप्राजापत्येषु अभिघारणार्थं प्रयाजशेषधारणतत्पात्रे न कर्तव्ये । **वि.** ४।१।१४. * पशुषु सवनीयादिषु अग्नीषोमीयस्य पशोर्विध्यन्तः, आलभतिचोदनासामान्यात् पशुत्वचोदनासामान्याच्च । **भा.** ८।१।६।१३, * पशुषु सोमाङ्गेषु सोमाङ्गवेद्या दार्शिकवेदेः प्रसङ्गसिद्धिः । १२।१।३।८–९.

पश्वङ्गं रशना स्यात् तदागमे विधानात् । ४।४।९।२२॥

ज्योतिष्टोमे 'आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं

परिवीय आग्नेयं सवनीयं पशुमुपाकरोति ' इति श्रूयते । इयं रशना किं पश्वङ्गम् , उत यूपाङ्गमिति विचारे पूर्वपक्षमाह । रशना पश्वङ्गं स्यात् । कुतः ? तदागमे पश्वागमे पशूपाकरणे प्राप्ते रशनाया विधानात् । उत्पत्तिवाक्ये रशनायाः पशुना संबन्धः श्रूयते । तस्मात् पश्वङ्गं रशना ।

यूपाङ्गं वा तत्संस्कारत्वात् । २३ ॥

सिद्धान्तयति । रशना न पश्वङ्गम् , किन्तु यूपाङ्गं स्यात् । तत्संस्कारत्वात् यूपसंस्काररूपत्वात् रशनायाः । रशना हि यूपस्य यावतीं तावतीं द्रढिम्नो मात्रां संजनयति । तस्मात् यूपाङ्गं रशना ।

अर्थवादश्च तदर्थवत् । २४ ॥

सिद्धान्ते मन्त्रार्थवत्त्वरूपहेत्वन्तरप्रतिपादनार्थं सूत्रम् । चकारः समुच्चयार्थः । तत् अर्थवत् इति व्यत्ययेन छान्दसं नपुंसकत्वम् । रशनायाः यूपाङ्गत्वे सति ' युवा सुवासाः परिवीत आगात् स उ श्रेयान् भवति जायमानः । तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः ॥ ' इति तत् सः मन्त्ररूपः अर्थवादः अर्थवत् अर्थवान् कृतार्थः स्यात् । **मन्त्रार्थस्तु**— युवा परिवीतः रशनया वेष्टितः सन् सुवासाः शोभनवस्त्रवानिव आ अगात् आगतः स्थितः । स उ एवं जायमानः श्रेयान् भवति । धीरासः धीराः धीमन्तः स्वाध्यः शोभना आ समन्तात् धीर्येषां ते स्वाध्यः मनसा यूपं देवयन्तः देवं आदित्यमिव मन्यमानाः कवयः विद्वांसः ऋत्विजः उन्नयन्ति उच्छ्रयन्ति । इति यूपस्य स्तुतिः । **के.**

* **पश्वङ्गं स्वरुः** । **भा.** ४।४।१०।२५–२८.

* **पश्वर्थानुष्ठितप्रयाजादिभिरेव** पशुपुरोडाशस्य अपि उपकारसिद्धेः तदर्थं पृथगङ्गानुष्ठानं न कर्तव्यम् । १२।१।१. ' पशुपुरोडाशाधिकरणम् ' इत्यत्र द्रष्टव्यम् ।

* **पश्वाकृतिः** । अवदानानि हवींषि यागसाधनानि न पश्वाकृतिः । सा हि अवदानप्रकृतिद्रव्यं विशिंषन्ती प्रकृतौ प्रधानस्य उपकृतवती इति विकृतावपि अवदानप्रकृतिद्रव्यं विशिंषन्ती प्रधानस्योपकरिष्यति । **भा.** २।२।७।२१.

* **पश्वादौ** सामिधेन्यादिप्राकृतेतिकर्तव्यतानुष्ठानम् । वि. १०।३।१.

* **पश्वादिफलं** गोदोहनादीनां प्रयोजकम्, न क्रतुः । **के.** (भाट्ट. ४।३।२.)

* **पश्वादिविकृतौ** उपदिष्टैरेकादशप्रयाजादिभिरङ्गैः प्राकृताङ्गान्तराणां न बाधः । **भा.** १०।३।१।१–१२.

* **पश्वालम्भो** यागार्थमुत्पन्नः तदर्थमेव च अनुष्ठीयमानो लोहित-शकृत्कर्मणोरपि उपकरोति । **भा.** ११।१।१।१ पृ. २०९६. * **पश्वालम्भस्य** लोहितनिरसनं न प्रयोजकम्, किन्तु प्रतिपत्तिः अग्नीषोमीये पशौ । **भाट्ट.** ४।१।१२.

* **पशूद्देशेन** गोदोहनं विधीयते इति पशुप्रयुक्तमेव गोदोहनम् । तच्च स्वतन्त्रकामनायामेव कर्तव्यम् । **भाट्ट.** ४।१।२ वर्णकं ३.

पश्वेकत्वाधिकरणम् । तदागमन्यायः । अग्नीषोमीयं पशुं इत्येकत्वं विवक्षितम् ॥

तत्रैकत्वमयज्ञाङ्गभूतमर्थस्य गुणभूतत्वात् । ४।१।५।११ ॥

भाष्यम्— अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः, ' यो दीक्षितो यदग्नीषोमीयं पशुमालभते ' इति । तथा (क्रीतसोमानयनार्थे शकटे–) ' अनड्वाहौ युनक्ति ' इति । तथा अश्वमेधे ' वसन्ताय कपिञ्जलानालभते ' इति । तत्र संदेहः, किं विवक्षितमेकत्वं द्वित्वं बहुत्वं च, उत अविवक्षितमिति । तत्र एकत्वमयज्ञाङ्गभूतम् , न विवक्षितमित्यर्थः । अर्थस्य गुणभूतत्वात् । न आलम्भस्य गुणभूता संख्या नियोजनस्य वा । कस्य तर्हि ? पशोः अनडुहोः कपिञ्जलानां च । विभक्तिर्हि श्रुत्या प्रातिपदिकार्थगतं संख्यार्थं ब्रूते । वाक्येन सा यज्ञाङ्गं ब्रूयात् । वाक्याच्च श्रुतिर्बलीयसी । तस्मान्न यज्ञाङ्गं विवक्षितमिति । आह, मा भूत् यज्ञाङ्गम् , पश्वादीनामङ्गं विवक्षितं तथापि इति । उच्यते, न पश्वादीनामङ्गेन उक्तेनानुक्तेन वा किञ्चित् प्रयोजनमस्ति । यज्ञाङ्गेन हि अविपन्नेन प्रयोजनम् । विपन्नेऽपि हि पश्वाद्यङ्गे अविगुणः एव क्रतुर्भवति । यज्ञाच्च फलम् , न पश्वादेः । तस्मात् पश्वादेर्गुणेन

अज्ञातेन ज्ञातेन वा न किञ्चित् प्रयोजनमस्तीति न तत् विवक्षितम् । यद्धि प्रयोजनवत् तद्विवक्षितमित्युच्यते ।

टुप्— तत्रैकत्वमयज्ञाङ्गमर्थस्य गुणभूतत्वात् ॥ अरुणो गुणः पदान्तरोपात्तत्वात् (अरुणापदेन उपात्तत्वात्) भवति क्रियार्थः । एकत्वस्य विभक्तिश्रुत्या प्रातिपदिकार्थत्वात् न क्रियार्थता । (क्रियार्थता वाक्येन स्यात् इत्यधिकं आनन्दाश्रमीये, नेदं रत्ने) । ' पश्वादीनामङ्गं विवक्षितम् , तथापि ' इति (भाष्यस्य) अन्तर्णीताभिसंबन्धे सकृदुच्चरिताभिप्रायः परिचोदयति (अन्तर्णीतैकत्वस्य पशोः क्रियासंबन्धात् एकत्वविशिष्टपशुविशिष्टो यागः सकृदुच्चरितेन विधिना वारवन्तीयविशिष्टं करोति इत्यर्थः) । अङ्गस्य (यागाङ्गस्य पशोः) यदुपकारकम् (एकत्वम्) भवति, (तत्) प्रणाड्याऽपि (प्रापितायाः) क्रियाया अपि उपकारकम् । ' न पश्वादीनामङ्गेन उक्तेन अनुक्तेन वा किञ्चिदस्ति प्रयोजनम् ' इति (परिहारभाष्यस्य–) कोऽभिप्रायः ? ' पशुसंख्ययोः संबन्धे अस्मिन् विवक्ष्यमाणे क्रियापश्वोः संबन्धो नास्ति ' (इति आनन्दाश्रमीये पाठः । ' संबन्धे एकस्मिन् क्षणे प्रातिपदिकार्थेन संख्याकारकयोः युगपत् विशेषणत्वेन सति क्रियापश्वोः संबन्धो नास्ति ' इति लिखिते रत्ने च पाठः) । क्रियापशुसंबन्धोत्तरकालं पशुसंख्ययोः संबन्धे शुद्ध एव पशुः (क्रियया) संबध्येत (न संख्याविशिष्टः, ततश्च पशुमात्रेण यागस्य सगुणत्वात् संख्याऽनादरः स्यात्) । तन्त्रसंबन्धे सकृदुच्चरितत्वात् (पशुशब्दस्य युगपदेव) पशोः स्वार्थपरार्थता स्यात् । (विरुद्धत्रिकद्वयोपलक्षणमेतत् । तत्र यागस्य संख्यानिवृत्तावपि वैगुण्याभावात् संख्याऽनादरः स्यात् इति यो दोषोऽभिहितः) स दोषः तन्त्रसंबन्धेऽपि तदवस्थ एव (श्रुत्यादिदोषस्तदवस्थ एव इति तु लिखितमुद्रितयोः पाठः अयुक्त एव) । तस्मात् न क्रियाऽङ्गं संख्येति । अत (एव अभिप्रायात् भाष्यकारः—) आह– ' यज्ञाङ्गेन हि अविपन्नेन प्रयोजनम् । विपन्नेऽपि पश्वाद्यङ्गे (इति भाष्यानुसारी रत्नपाठः) अविगुण एव भवति क्रतुः ।

एकश्रुतित्वाच्च । १२ ॥

भाष्यम्— भवति च किञ्चिद्वचनम् , येन विज्ञायते न तद्विवक्षितमिति । ' यदि सोममपहरेयुरेकां गां दक्षिणां दद्यात् ' इति । यदि हि विवक्षितं भवेत् न ' एकाम् ' इति ब्रूयात् , गां इत्येकवचनस्य विवक्षितत्वात् । तथा ' अवी द्वे ' ' धेनू द्वे ' इत्यत्रापि ' द्वे ' इति वचनं ज्ञापकम् । अविवक्षितम् ' अवी ' इति द्वित्वमिति । ' त्रीन् ललामान् ' इत्यत्रापि ' त्रीन् ' इति वचनं लिङ्गम् ' ललामान् ' इति बहुवचनमविवक्षितमिति ।

प्रतीयत इति चेत् । १३ ॥

भाष्यम्— एवं चेत् पश्यसि, अविवक्षिता संख्येति । तन्न । प्रतीयते हि संख्या आख्यातवचनस्याङ्गभूता । यथा ' पशुमानय ' इत्युक्ते एक एवानीयते, ' पशू ' इति द्वौ, ' पशून् ' इति बहवः आनीयन्ते । यश्च प्रतीयते स शब्दार्थः । तस्मात् यज्ञस्य अङ्गभूता संख्या इति शब्दात् गम्यते । न च शब्दात् गम्यमानं ऋते कारणात् अविवक्षितं भवति ।

नाशब्दं तत्प्रमाणत्वात् पूर्ववत् । १४ ॥

भाष्यम्— नैतदेवम् । सत्यं प्रतीयते, न तु अयं शब्दार्थः । व्यामोहादेषा प्रतीतिः । कुत एतत् ? वाक्याद्धि यज्ञाङ्गमित्यवगम्यते । वाक्यं च श्रुत्या बाध्यते । तस्मात् अशब्दार्थोऽयं यज्ञे एकत्वादीति । अशब्दार्थोऽपि हि प्रतीयते । यथा पूर्वो धावतीति, स पूर्वः इत्युच्यते यस्यापरोऽस्ति । तेन पूर्वः इत्युक्ते अपरो गम्यते । न तु ' अपरो धावति ' इति श्रवणात् प्रतीयते । एवमिहापि ' पशुम् ' इत्येकत्वं गम्यते, न तु यज्ञे । यथैव हि पूर्वः इत्युक्ते अपरो गम्यत एव केवलम् , न तु स विधीयते कस्मिंश्चिदर्थे । एवमिहापि संख्या प्रतीयते एव केवलम् , न तु कर्तव्यतया यज्ञे विधीयते न पशौ । कथं न पशौ विधीयते इति चेत् , विधायकस्याभावात् । आख्यातशब्दो विधायको भविष्यतीति । एतदपि नोपपद्यते । द्रव्यदेवतासंबन्धस्य स विधायकः सन् 'आलभते' इति न संख्यासंख्येयसंबन्धं विधातुमर्हतीति । भिद्येत हि तथा वाक्यम् । तस्मादविवक्षिता संख्येति ।

शब्दवत्तूपलभ्यते तदागमे हि तद् दृश्यते तस्य ज्ञानं यथाऽन्येषाम् । १५ ॥

भाष्यम्— तुशब्दः पक्षं व्यावर्तयति । नैतदस्ति, न यज्ञे संख्या शब्देन श्रूयते इति । आख्यातवाच्ये ह्यर्थे उपलभ्यते । लोके ‘ पशुमानय ’ इत्येकवचने सति, एकपशुविशिष्टमानयनं प्रतीयते । पशू आनयेति द्वित्वविशिष्टं गम्यते । तत्र हि एकत्वमपैति, द्वित्वमुपजायते । यस्य चागमे यदुपजायते स तस्यार्थ इति गम्यते । तस्य ज्ञानं यथा अन्येषां शब्दानाम् । ‘ अश्वमानय ’ इत्युक्ते अश्वानयनं प्रतीयते, ‘ गामानय ’ इति गवानयनम् । तत्र अश्वोऽपैति गौश्चोपजायते । तेन ज्ञायते, अश्वशब्दस्य अश्वोऽर्थः, गोशब्दस्य गौरिति । यदुक्तम्, ‘ श्रुत्या वाक्यार्थो बाध्यते ’ इति । उच्यते । न श्रुतिः ब्रूते वाक्यार्थो नास्तीति । केवलं तु प्रातिपदिकार्थगतां संख्यामाह । तादृशी संख्या वाक्येन यज्ञे विधीयते । प्रातिपदिकार्थो हि आख्यातवाच्येन संबध्यते विभक्त्यर्थोऽपि । तथाहि, तद्विशेषणविशिष्ट आलम्भो गम्यते । तत्र एकार्थत्वात् एकवाक्यमवकल्पते । पशौ हि संख्यायां विधीयमानायां एक आख्यातशब्दो न शक्नुयात् आख्यातार्थं विधातुं संख्यासंख्येयसंबन्धं च । तस्मात् यज्ञे विवक्षिता संख्येति ।

टुप्— विभक्तिर्हि लिङ्गसंख्याप्रातिपदिकार्थानां (त्रयाणामपि) श्रुत्यैव क्रियार्थतामाह । क्रिया साध्या, साधनं तत्परिच्छेदकानि च लिङ्गसंख्यादीनि अपेक्षते (क्रियामपि सर्वाणि कारकाणि अपेक्षन्ते) अतः सर्वविशेषणविशिष्टा क्रियैव विधीयते । तत्र (विधि-) प्रत्ययः पूर्वं विशेषणे व्याप्रियते अन्यथाऽनुपपत्त्या (कथमनुपपत्तिस्तदाह–) नहि अगृहीतविशेषणा विशिष्टबुद्धिः इति । (अस्तु नाम वाक्येन क्रियार्थत्वम् , तथापि न दोषः श्रुतिवाक्ययोरविरोधादित्याह–) पश्वेकत्वयोः उपश्लेषलक्षणया (उपपदलक्षणया) श्रुत्या विशेषणविशेष्यभाव एवावगम्यते, न तु तादर्थ्यम् । अतः (श्रुतिवाक्ययोः) एकविषयोपनिपाताभावादविरोधः । तस्मादाह (भाष्यकारः) न श्रुतिर्ब्रूते वाक्यार्थो नास्तीति।

तद्वच्च लिङ्गदर्शनम् । १६ ॥

भाष्यम्— किमिति ? (किं लिङ्गम् ?) ‘ कर्णा याम्याः , अवलिप्ता रौद्राः , नभोरूपाः पार्जन्याः , तेषामैन्द्राग्नो दशमः ’ इति (कर्णाः छिन्नकर्णाः । याम्या यमदेवताकाः । अवलिप्ता गर्विष्ठाः रुद्रदेवताकाः । नभोरूपा नीलवर्णाः पर्जन्यदेवताका इति शब्दार्थः) । यदि त्रित्वं विवक्षितम् , तदा ऐन्द्राग्नो दशमो भवति । तथा ‘ कृष्णा भौमाः , धूम्रा आन्तरिक्षाः , बृहन्तो दिव्याः , शबला वैद्युताः , सिद्धास्तारकाः ’ इति प्रकृत्याह ‘ अर्धमासानां वैतद्रूपम् , यत् पञ्चदशिनः ’ इति । तस्मादपि पश्यामो विवक्षिता संख्येति । यत्तूक्तम् , ‘ एकां गाम् ’ इत्यविवक्षां दर्शयतीति, अत्रोच्यते । गोसंख्यासंबन्धं विधातुमेतदुच्यते । इतरथा हि गोदक्षिणासंबन्धो विहितो गम्येत । तस्मात् विवक्षितेऽपि वाच्यमेतत् । ‘ अवी द्वे ’ ‘ धेनू द्वे ’ ‘ त्रीन् ललामान् ’ इति चानुवादाः ।

टुप्— तद्वच्च लिङ्गदर्शनम् ॥ ‘ गोसंख्यासंबन्धं विधातुमेतदुच्यते । इतरथा गोदक्षिणासंबन्धो विहितो गम्येत ’ (इति परिहारभाष्यमनुभाष्य व्याचष्टे–) ‘ गां दक्षिणां दद्यात् ’ इति तावत् श्रूयेत, (ततः) अश्वादीनां परिसंख्या स्यात् । (चोदयति–) संख्यैव विधीयते, न तु गौः, इति चेत् , तन्न । संख्याविधाने हि सति गोसंख्ययोः संबन्धो विधातव्यः । तद्विधाने च क्रियायामननुप्रवेशः , तत्र अत्यन्तं वाक्यं स्यात् (नात्र श्रुतिलेशः कश्चिदित्यर्थः) । तस्मात् ‘ यत् दक्षिणां दद्यात् , तत् गाम् ’ इतीयं वचनव्यक्तिर्गृह्यते श्रुत्यनुग्रहाय । इतरत्र तु गामुद्दिश्य संख्याविधिरिति गृह्यते । (चोदक आह–) एतदपि (समाधानम्) यद्वा तद्वा (न युक्तमित्यर्थः) । कस्मात् ? क्रियायामेव संख्या न विधीयते, येन गोसंख्ययोः संबन्धो विधातव्यः (स्यात् । एकदेशी समाधत्ते–) उच्यते । संख्या हि विधीयमाना संख्येयद्वारेण (क्रियायाः) साधनं भवति । तत्र बहूनि संख्येयानि, सा न ज्ञायते कस्य परिच्छेदिकेति । (चोदक आह–) अश्वादीनामुत्पत्तौ (दक्षिणोत्पत्तिवाक्ये एकत्व–) संख्या विद्यते (अतः पौनरुक्त्यात्) तत्र न निवेक्ष्यते । गवां तु न विद्यते । (एकदेशी आह–) गवामपि द्वादशशतं विद्यते (अतस्तत्र तद्विरोधान्न निवेक्ष्यते । चोदक आह) चोदकेन चेत् (चोदकेन गवां द्वादशशतप्राप्तिः, नैमित्तिकस्य नित्यविकारत्वात् औपदेशिकेन एकत्वेन प्रत्याम्नायते इति चेत् इत्यर्थः । एकदेशी आह–) इतरेषामपि (अश्वादीनाम्) चोदकेनैव (एकत्वप्राप्तिः । चोदकः स्वाभिप्रायं स्फोरयति–) तेषाम् (अश्वादीनाम्) एकत्वयुक्तानाम् (चोदकादेव प्राप्तेः) अनर्थिका (औपदेशिकी एकत्वसंख्या) इति चेत् । (एकदेश्यपि स्वाभिप्रायमाह–) उच्यते । इयम् (औपदेशिकी संख्या) प्रत्यक्षत्वात् शीघ्रम् (अन्यस्यामप्राप्तायां) प्राप्स्यति (इति नानर्थिका । या त्वातिदेशिकी) सा अनुवादः । (इदमेकदेशिसमाधानं नातीव हृदयङ्गममिति अन्यथा समाधत्ते–) अथवा (यदि) गौरेव केवला (दक्षिणायां) प्राप्नोति, तदा गोविधानमयुक्तम् (स्यात् आनर्थक्यात् । न त्वेतदस्ति) प्राप्नुवन्ति हि अन्यान्यपि (अश्वादिद्रव्याणि) । तस्मात् नास्तीदम् ‘ गौर्न विधीयते, संख्यैव विधीयते ’ इति । अतो नियमात् (अवश्यम्) परिसंख्या स्यात् । अन्येषाम् (अश्वादीनाम्) तन्निवृत्त्यर्थमाह ‘ एकां गाम् ’ इति ।

तथा च लिङ्गम् । १७ ॥

भाष्यम्— एवं च कृत्वा समानश्रुतिकं लिङ्गमपि विवक्षितं भविष्यति । तत्रेदं दर्शनमुपपद्यते ‘ वसन्ते प्रातराग्नेयीं कृष्णग्रीवामालभते, ग्रीष्मे माध्यंदिने सिंहीमैन्द्रीम् , शरद्यपराह्णे श्वेतां बार्हस्पत्याम् ’ इति । तत्र श्रूयते– ‘ गर्भिण्यो भवन्ति ’ इति । गर्भः स्त्रीणां गुणः । तेन स्त्रियो दर्शयति इति भविष्यति । तथा ‘ अश्वः ऋषभो वृष्णिर्बस्तः पुरुषः ’ इति, ‘ ते प्राजापत्याः ’ इति । तत्र श्रूयते ‘ मुष्करा भवन्ति सेन्द्रियत्वाय ’ इति । मुष्करत्वं पुंसां गुणः । तेन पुंप्राप्तिं दर्शयति इति ।

शा— उपादेयभूतपश्वादिगतविभक्त्यभिहितैकत्वादिका संख्या किमयज्ञाङ्गं अविवक्षिता, उत यज्ञाङ्गं विवक्षिता इति संशयः । तत्र ‘ **श्रुत्या पश्वङ्गता तस्याः समानपदरूपया । पदान्तरस्थयागाङ्गभावो वाक्यात्प्रतीयते ॥ दुर्बलं च श्रुतेर्वाक्यमित्यज्ञाङ्गमेकता । तदभावे च यज्ञावैगुण्यात्तदविवक्षितम् ॥** ’ उच्यते । ‘ **समानप्रत्ययस्थेन कारकेणात्मसात्कृता । क्रियायै नीयते संख्या न पश्वङ्गं पदाद्भवेत् ॥** ’ उक्तं च ‘ **यथा पश्वङ्गमेकत्वं पदश्रुत्या प्रतीयते । समानप्रत्ययश्रुत्या बलीयस्या क्रियाङ्गता ॥** ’ इति ।

सोम— यथा ‘स्फ्येन उद्धन्ति’ इत्यादिश्रुत्या उद्धननाद्यर्थानां यज्ञायुधवाक्येन न यज्ञार्थत्वम् , तथा अत्रापि पदश्रुत्या पश्वर्थस्य एकत्वस्य न यज्ञार्थत्वमिति प्रत्यवस्थानात् संगतिः ।

वि— ‘ पशुराऽभ्य इत्यत्र पश्वैक्ये यजनाङ्गता । नास्त्यस्ति वा, ऽऽद्यः स्वपदे श्रुत्या पश्वङ्गतागतेः ॥ , आदौ स्वप्रत्ययोपात्त आसन्नतरकारके । योगः क्रतौ पशौ चेति क्रमे यागाङ्गतोचिता ॥ ’

भाट्ट— ‘ पशुना यजेत ’ इत्यादौ यत्र उपादेयपश्वादिगता संख्या विभक्त्युपात्ता, सा किं विवक्षिता न वेति चिन्तायाम् ‘ सत्त्वप्रधानानि नामानि ’ इति स्मृत्या प्रातिपदिकार्थपश्वादेः विभक्त्युपात्तसंख्याविशेष्यत्वरूपसत्त्वसमाख्यया विभक्त्युपात्तसंख्यायाः प्रातिपदिकार्थं प्रति पदश्रुत्या योग्यतारूपलिङ्गेन च विशेषणत्वावगमात् वाक्यीयक्रियान्वयानुपपत्तेः तदभावेऽपि क्रियाया अवैगुण्यात् न विवक्षिता संख्या । न च एकत्वादेः पश्वन्वयेऽपि तद्विशिष्टस्यैव पशोः कारकान्वयद्वारा क्रियासंबन्धात् लोहितोष्णीषादिवत् पशुविशेषणस्यापि विवक्षोपपत्तिः । संख्याकरणत्वयोः विभक्त्या युगपदुपादानेन संख्यायाः प्रथमतः पश्वन्वयमभिधाय पश्चात् विशिष्टस्य पशोः कारकान्वयाभिधाने विरम्यव्यापारापत्तेः । **न च** त्वयाऽपि संख्यायाः पदश्रुत्या पश्वन्वयाङ्गीकारात् युगपदन्वयद्वयशाब्दबोधस्य विरुद्धत्वात् प्रथमतः शुद्धस्य पशोः कारकान्वयमङ्गीकृत्य पश्चात् संख्यायाः पश्वन्वयाङ्गीकारे तवापि विरम्यव्यापारापत्तिः इति **वाच्यम्** । तथापि भावनाऽन्वितकारकविशेषणविशेषणस्य असमस्तपदस्थले भावनाऽन्वयव्युत्पत्त्यभावेन अविवक्षोपपत्तेः । इतरथा आरुण्यस्यापि आनुशासनिकमत्वर्थलक्षणया एकहायनीं प्रत्येव विशेषणत्वोपपत्तौ प्रथमतः क्रियाऽन्वय-

मभ्युपगम्य पार्ष्ठिकैकहायनीसंबन्धसिद्धान्तभङ्गापत्तेः । अत्र च लौहित्यादेः भावनाऽन्वितकारकविशेषणविशेषणत्वेऽपि समस्तपदत्वात् न क्षतिः । वारवन्तीयादेस्तु क्त्वाशब्दोक्तभावनायामेव अन्वय इति न काचित् क्षतिः । अत एव सोमारुण्यादीनामपि न प्राथमिको धात्वर्थान्वयः । अपितु भावनाऽन्वय एव इत्युक्तं तत्रतत्र । किञ्च न प्रत्ययार्थस्य एकत्वस्य प्रकृत्यर्थे पशुं प्रति प्रकारता, प्रत्ययार्थप्राधान्यभङ्गापत्तेः । अपितु पशोरेव करणत्वं प्रतीव एकत्वं प्रत्यपि प्रकारता । अतश्च एकत्वस्य करणत्ववत् विधेयभावनाया-मप्रकारत्वात् अविवक्षा । इति प्राप्ते, पशोः करणत्वे एवान्वयो न तु एकत्वेऽपि, प्रमाणाभावात् । अतश्च पशोः तद्द्वारा भावनाऽन्वयवत् संख्याया अपि बलीयस्या समानाभिधानश्रुत्या आधेयत्वेन सामानाधिकरण्येन वा प्रथमतः कारकान्वयस्यैव अङ्गीकारात्, पश्चाच्च पदश्रुत्यादिना आधेयत्वसंबन्धेन पश्वन्वयोपपत्तेः निरुक्तव्युत्पत्त्यैव भावनासंबन्धित्वात् विवक्षितत्वम् । न च एवं 'यदि सोममपहरेयुरेकां गां दक्षिणां दद्यात्' इत्यादौ एकपदवैयर्थ्यम्, गामित्यनेनैवैकत्वविधानोपपत्तेरिति वाच्यम् । एकत्वविधिवत् गोत्वविधेरपि प्राप्तदक्षिणाऽनुवादेन 'धेनुर्दक्षिणा' इतिवद्विशिष्टकारकान्तरविधानेन आपत्तौ द्वादशशतसंख्यावत् सामान्यविहिताश्वादीनामपि बाधप्रसङ्गात् तन्निवृत्त्या दानाश्रितस्य एकत्वस्यैव गोरुद्देशेन विधानार्थं एकग्रहणोपपत्तेः । अतो विवक्षितैव संख्या । अत एव 'कर्णा याम्याः, अवलिप्ता रौद्राः, नभोरूपाः पार्जन्याः, तेषामैन्द्राग्नो दशमः' इति दशमत्वदर्शनमुपपन्नम् ।

मण्डन — 'पश्वेकत्वविवक्षा स्यात् ।' ७.

शंकर — 'पश्वेकत्वं तु यागाङ्गम् ।' ८.

* **पश्वेकत्वाधिकरणे** (४।१।५।११–१६) कारकप्राधान्यं वक्ष्यते । कु. २।२।३।६. * एकपदे वचनाद्युक्तसंख्याऽन्वयस्तु समानाभिधानश्रुत्या कारके एव इति **पश्वेकत्वाधिकरणे** वक्ष्यते । **कौ.** ३।१।७।१४ पृ. १७७. * 'पशुना यजेत' इत्यत्र प्रत्यङ्गं प्रधानावृत्त्यभावेन उपादेयसंख्याऽऽकाङ्क्षानुसारेण एकत्वविवक्षा आवश्यकी एव इति वक्ष्यते पश्वेकत्वाधिकरणे । **कस्तूरि.** ३।१।७।१३–१५.

* यत्तु वार्तिके अपचयस्य अग्निमात्रसंस्कारार्थत्वं अभ्युपगम्य उभयत्र ('अग्नेस्तृणान्यपचिनोति') विशेषणाविवक्षा इत्युक्तम्, तत् विनियोगभङ्गे प्रमाणाभावात् अविवक्षोपपादनस्य दुर्घटत्वाच्च उपेक्षितम् । 'पशुना यजेत' इत्यादौ तु उपादेयत्वात् **पश्वेकत्वाधिकरणन्यायेन** विवक्षा इति विशेषः । **कौ.** ३।१।७।१४–१५.

* अत एव **पश्वेकत्वाधिकरणपूर्वपक्षन्यायेन** मुख्यविशेष्यभूतभावनाविशेषणीभूतासु रेवतीषु विशेषणविधिकल्पनायोगात् तासामविवक्षा इत्यपि अनाशङ्क्यम् । मुख्यविशेष्यभूतभावनाविशेषणत्वाभावेऽपि क्त्वाशब्दोक्तभावनाविशेषणत्वस्य सत्त्वेन पश्वेकत्वाधिकरणपूर्वपक्षन्यायाविषयत्वात् । यत्र लिङ्गसंख्यादौ कारकान्वयद्वारा भावनाऽन्वयो व्युत्पत्तिसिद्धः, तत्र तेषां तदनादरेण द्रव्यान्वये, विशेषणविशेषणत्वात् न विधिकल्पना इति तद्विषयोऽसौ न्यायः । न तु यत्रापि कारकातिरिक्तसंबन्धेन समासादौ द्रव्यान्वयद्वाराऽपि भावनाऽन्वयव्युत्पत्तिः । **कौ.** २।२।१२।२६ पृ. २९०, * न पश्वेकत्वाधिकरणपूर्वपक्षन्यायेन देवताया अविवक्षा, तद्वत् इह प्राथमिकभावनाऽन्वयस्य तद्धितभङ्गभयेनाव्युत्पन्नत्वात् । २।२।३।५ पृ. १७४, * पश्वेकत्वाधिकरणपूर्वपक्षन्यायेन संख्याविशिष्टद्रव्यविधाने संख्याया अविवक्षाऽऽपत्तिरित्याशङ्का । १।४।३।३ पृ. १७९, * यद्यपि सक्तूनां प्रथमत एव धात्वर्थे कर्मत्वेन अन्वयः असंभवी तथा सति पश्वेकत्वाधिकरणपूर्वपक्षन्यायेन सक्तूनामविवक्षापत्तेः, तथापि भावनायामेव सोमादिवत् परम्परासंबन्धेन कर्मत्वे अवगते पाश्चात्यः इत्यवगन्तव्यम् । २।१।५।१२ पृ. ७७. * **पश्वेकत्वाधिकरणपूर्वपक्षन्यायस्यापि** क्रियाविशेषणत्वहेतुकविवक्षासिद्धान्तेन अबाधादुपन्यासः । **सु.** पृ. ८६६.

* 'न श्रुतिर्ब्रूते वाक्यार्थो नेति' (केवलं तु प्रातिपदिकार्थगतां संख्यामाह । भा. ४।१।५।१५) इति **पश्वेकत्वाधिकरणभाष्यविरोधमाशङ्क्य** एकाभिधानश्रुतिबलीयस्त्वेन एकपदोपादानश्रुत्यवगतद्रव्यार्थत्वबाधाशयं तत् भाष्यं इत्येवं विरोधपरिहारः । **सु.** पृ. १३८०.

* 'प्राजापत्यान् पशूनालभते' इत्यत्र पदद्वयेऽपि बहुत्वस्य, प्रथमतः करणत्वेन अन्वितस्यापि पार्ष्ठिकः पश्वाख्यद्रव्येणैव अन्वयः **पश्वेकत्वाधिकरणवक्ष्यमाणन्यायेनावगम्यते**, न तु देवतात्वविशिष्टद्रव्येण । **कौ.** २।२।७।२० पृ. २३७.

* **पश्वेकत्वादीनां** कथं तर्हि अङ्गत्वम् ? उक्तं हि पशोः उपादानशेषत्वम् । प्रयुक्तिकृतं च तत् । तदपि नैव प्रयुक्तिकृतम् । किं तर्हि ? विनियोगकृतमेव । ननु विभक्तिभिः प्रातिपदिकार्थो विनियुज्यते, न पुनः एकत्वादयो विभक्त्यर्थाः । सत्यं न विनियुज्यन्ते । न पुनः विनियुक्तोपादानेऽपि नावगम्यते विभक्तिभिः । विनियुक्तस्यैव एकत्वादयो विभक्तिभिरभिधीयन्ते, असंबन्धस्य अनवगमात् । तस्मात् युक्तमुपादानशेषत्वमेकत्वादेः । **बृहती.** पृ. ३–४ । अत्र **ऋजुविमला**—— अत्रायमाशयः । विभक्त्या तावत् प्रातिपदिकार्थो विनियुज्यते । विनियुक्तोऽसौ उपादातव्यः । न च अनवच्छिन्नस्य उपादानं संभवति । तेन अवच्छेदकाकाङ्क्षायां गृहीततद्विशेषणैकत्वादिकमेव तदवच्छेदकं गृह्यते । तेन यत् पूर्वमपि विनियुक्ते प्रातिपदिकार्थमात्रे संख्याऽऽदिकमासीत्, तदुपादानेन विनियुक्तपश्वादिस्थं क्रियते । विनियोगस्तु तस्य तात्स्थ्येनैव । यथा पर्णत्वादयः क्रतुविनियुक्तजुह्वादिद्वारेण विनियुक्तस्थतया क्रत्वङ्गानि । विनियुक्तस्थता तु तत्र जुह्वादीनां अव्यभिचरितक्रतुसंबन्धात् तद्धितश्रुत्यैव, इह तु उपादानात् इति विशेषः । इति ।

* **पश्वेकत्वन्यायः** । ४।१।५। ११–१६. 'पश्वेकत्वाधिकरणम्' **मीको.** पृ. २४९४ इत्यत्र द्रष्टव्यम् ।

* **पश्वेकत्वविवक्षाधिकरणे** (४।१।५) न कारकविशेषणत्वात् गुणानां कारकविभक्तिः, किन्तु कारकत्वादेव इति वक्ष्यते । **वा.** ३।१।६।१२ पृ. ६८८.

* **पश्वेकत्वविवक्षाऽधिकरणन्यायेनैव** द्रढयितुमाह— 'शब्दवत्तूपलभ्यते०' (४।१।५।१५)। यथैव दशापवित्रेण श्रुतः (संमार्गः) नान्येन क्रियते,... तथा (आलम्भः) एकस्य श्रुतः, नानेकस्य कर्तव्यः' (वा. ३।१।७।१४ पृ. ७०४–७०५) । **सु.** पृ. १०१४.

* **पश्वैकादशिन्यां** अध्रिगुप्रैषे मेधपतिशब्दः एकवन्निगदः निवर्तते, द्विवन्निगदश्च ऊहितव्यः, ततो न विकल्पः । **भा.** ९।३।१४।४३.

* **पशुकामः** अग्निष्टुति रेवतीषु वारवन्तीयं अग्निष्टोमसाम कृत्वा यजेत । **भा.** २।२।१२।२७, * पशुकामः अष्टरात्रेण यजेत । 'तस्य विश्वजिदभिजितौ अग्निष्टोमौ अभितः, उभयतो ज्योतिर्मध्ये षडहः (ज्योतिर्गौरायुः आयुर्गौर्ज्योतिः इति) पशुकामो ह्येतेन यजेत' । १२।३।१।१, * पशुकामः उक्थ्यं गृह्णीयात् । ३।६।१६।४३, * पशुकामः साकंप्रस्थायीयेन यजेत । २।३।४।५, * पशुकामः सोमापौष्णं चरुं निर्वपेत् नेमपिष्टम् । ३।३।१५।४२, * **पशुकामस्य** गोदोहनेन अपां प्रणयनं दर्शपूर्णमासयोः । ४।३।२।४. * पशुकामस्य चातुर्मास्यप्रयोगे सहस्रपशुप्राप्तिपर्यन्तं वैश्वदेवमेवाभ्यस्य अथ वरुणप्रघासादीनि पर्वाणि अनुतिष्ठेत् । **संकर्ष.** ३।१।२४. **मीको.** पृ. १६८७ 'चातुर्मास्यानां पशुकाम०' इत्यत्र द्रष्टव्यम् । * पशुकामस्य ध्रुवायां पञ्चाज्यग्रहणम् । **संकर्ष.** २।२।१३. 'सप्तदशाज्यानि पशुकामस्य' इत्यत्र द्रष्टव्यम् । * पशुकामस्य प्राजापत्यः अजस्तूपरः । 'यः प्रजाकामः पशुकामः स्यात् स एतं प्राजापत्यमजं तूपरमालभेत' । तूपरः शृङ्गरहितः । **के.** * पशुकामस्य विश्वजिदतिरात्रः कातीये उक्तः । **बाल.** पृ. ३४. * पशुकामस्य षड्विंशतिमनुब्रूयात् सामिधेनीः दर्शपूर्णमासयोः । **भा.** १०।५।८।२७.

* **पशुकामेष्टिः** 'अग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेत्, इन्द्राय प्रदात्रे पुरोडाशमेकादशकपालम्, दधि मधु घृतमापो धानास्तत्संसृष्टं प्राजापत्यं पशुकामः' इति विहिता । (तैसं. २।३।२।८ 'अग्नये०......दधि मधु घृतमापो धाना भवन्ति... ...प्राजापत्यं भवति...' इत्याकारकं वाक्यम्) । तत्राज्यभागयोः पुरोनुवाक्ये वार्त्रघ्न्यावेव कर्तव्ये न वृधन्वत्यौ, भूयसामनुग्रहात् । **वि.** १२।२।७ वर्णकं २, * पशुकामेष्टिः 'यः पशुकामः

स्यात् सोऽमावास्यामिष्ट्वा वत्सानपाकुर्यात् ' ... ' ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्यात्, ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधनि चरुम्, येऽणिष्ठास्तान् विष्णवे शिपिविष्टाय शृते चरुम् ' इति । अस्मिन् अपूर्वे कर्मणि दधिपयसोः प्रणीताधर्मा एव कार्याः, न तु वत्सापाकरणादयः प्रदेयधर्माः । ९।४।१२. * **पशुकामेष्टौ** दधिपयसोः प्रदेयधर्मा नानुष्ठेयाः । ९।४।११. **मीको.** पृ. २००८ ' दधिपयसोः पशुकामेष्टौ ' इत्यत्र द्रष्टव्यम् ।

* **पशुगणाः** । ' वसन्ते ललामांस्त्रीन् वृषभानालभेत ' । तथा ' मैत्रं श्वेतमालभेत वारुणं कृष्णमपां चौषधीनां च संधावन्नाद्यकामः ' इति । अत्र ऐकादशिनानां विध्यन्तः, नाग्नीषोमीयस्य । **भा.** ८।१।८।१५. * **पशुगणस्य** प्रकृतिः एकादशिनी, एकादशिन्याः प्रकृतिः सवनीयपशुः, सवनीयपशोः प्रकृतिः अग्नीषोमीयः, अग्नीषोमीयस्य प्रकृतिरिष्टिः । **वि.** ८।१।५–८ । तत्रापि सांनाय्यम् । ८।२।२ । तत्रापि पय एव, न दधि । ८।२।३. * **पशुगणे** अध्रिगुप्रैषे एकधाशब्दस्य यावत्त्वचमभ्यासः । ९।३।११. **मीको.** पृ. १२७८ ' एकधाऽधिकरणम् ' इत्यत्र द्रष्टव्यम् । * पशुगणे अध्रिगुप्रैषे समस्तवङ्क्रीयत्ताप्रकाशनार्थं समासेन वचनम् । ९।४।१. **मीको.** पृ. ३४६ ' अध्रिगुप्रैषे पशुगणे समस्त० ' इत्यत्र द्रष्टव्यम् । * पशुगणे अध्रिगुप्रैषगतानां संसर्गिद्रव्यवाचकचक्षुरादिपदानां नोहः । ९।३।१०।२८. **मीको.** पृ. ३४३ ' अध्रिगुप्रैषगतानां संसर्गि० ' इत्यत्र द्रष्टव्यम् । * पशुगणे उपयाजसाधनानां गुदानां समुच्चयः । १२।४।४।८ **मीको.** पृ. ११५८ ' उपयाजगुदसमुच्चयन्यायः ' इत्यत्र द्रष्टव्यम् । * पशुगणे एकस्मिन् पशौ नष्टे दुष्टे वा एक एव पशुरावर्तते, न गणः । **भा.** २।२।७।२१, * पशुगणे एकदेवताके दैवतावदानादिना पदार्थानुसमयः । ५।२।६।१०–१२, ' वाजपेये प्राजापत्यपशुषु ' इत्यत्र अधिकरणं द्रष्टव्यम् । * पशुगणे एकदेवताके वसाहोमानां तन्त्रम् । ११।२।५।२५. 'वसाहोमन्यायः' इत्यत्र अधिकरणं द्रष्टव्यम् । * पशुगणे एकदैवत्ये साहित्यसंपत्तये समानजातीयैः समानजातीयानामनुसमयः दैवतैर्दैवतानामित्येवं कर्तव्यः । ५।२।६। १०–१२.

पशुगणे कुम्भीशूलवपाश्रपणीनां विभुत्वात् तन्त्रभावः स्यात् । ११।४।८।३३ ॥

पशुगणे वाजपेये प्राजापत्येषु पशुषु इत्यादौ कुम्भ्याः अवदानश्रपणार्थायाः कुम्भ्याः, शूलस्य हृदयशूलस्य वपाश्रपण्याश्चेति कुम्भीशूलवपाश्रपणीनां तन्त्रभावः स्यात् तन्त्रं स्यात् । एका कुम्भी एकं शूलं एकैव वपाश्रपणी च । प्रभुत्वात् एकैकस्य कार्यसमर्थत्वात् । इति सिद्धान्तः । **के.**

* पशुगणे जाघन्या पत्नीसंयाजनं दर्शपूर्णमासपूर्वकं चोदकपरम्परया प्राप्तम् । **भा.** १२।४।६।१०.

पशुगणे तस्यतस्यापवर्जयेत् पश्वेकत्वात् । ५।२।६।१० ॥

वाजपेये प्राजापत्यपशूनां सप्तदशानां मध्ये प्रथमत्वेन स्वीकृतस्य पशोः दैवतानि सौविष्टकृतानि ऐडानि च अवदानानि अवदाय ततो द्वितीयस्य ततस्तृतीयस्य इतिरीत्या त्रिविधानि त्रिविधान्यपि अवदानानि अवदेयानि, अथवा सर्वेषां पशूनां आदौ दैवतान्यवदेयानि ततः पुनः सर्वेषामेव सौविष्टकृतानि, ततः पुनः सर्वेषां ऐडानि इडासंबन्धीनि अवदानानि अवदेयानि इति विचारे पूर्वपक्षमाह । पशुगणे प्राजापत्यादौ तस्यतस्य एकैकस्य पशोः अपवर्जयेत् एकैकविधस्य अवदानजातस्य समाप्तिं कुर्यात् । पश्वेकत्वात् प्रत्येकस्मिन् पशौ प्रकृताविव पश्वेकत्वस्य तुल्यत्वात् ।

दैवतैर्वैककर्म्यात् । ११ ॥

सिद्धान्तमाह । दैवतैः इत्युपलक्षणम् । दैवतैः सौविष्टकृतैः ऐडैश्च अवदानैः अनुसमयः कर्तव्यः । सप्तदशानामपि पशूनां दैवतानि अवदानानि अवदाय होमः कार्यः । ततः सर्वेषां सौविष्टकृतानि अवदाय स्विष्टकृद्धोमः कर्तव्यः । ततः सर्वेषां ऐडानि अवदानान्यवदाय शेषकार्यं कर्तव्यम् । ऐककर्म्यात् इत्यत्र वृत्तिकुतूहलयोः एककर्मत्वात् इति पाठः । अर्थस्तु स एव । सप्तदशानामपि पशूनां साहित्योक्तेः एककर्मत्वमवसीयते इति पदार्थानुसमय एवात्र न काण्डानुसमयः ।

मन्त्रस्य चार्थवत्त्वात् । १२ ॥

सिद्धान्ते हेत्वन्तरार्थं सूत्रम् । चकारः समुच्चये । मन्त्रस्य ' त्वं ह्यग्ने प्रथमो मनोता ' इति मनोतासूक्तरूपस्य तन्त्रेणानुवचनेन लाघवरूपफलवत्त्वात् । अन्यथा हि प्रतिपशु पुनःपुनः पाठः प्रसज्येत । तस्मात् पदार्थानुसमयोऽत्रेति सिद्धान्तः । **के.**

* पशुगणे भिन्नदेवताके वसाहोमानां तन्त्रभेदः । ११। २।६।२६. **मीको.** पृ. १३०८ ' ऐकादशिनपशुवसा० ' इत्यत्र द्रष्टव्यम् । * पशुगणे विभिन्नदेवताके यत्र चोदकाविरोधः, तत्र अवदानत्रयं (दैवत–सौविष्टकृत–ऐडेति) होमं च एकस्य कृत्वा परस्यापि अवदानपूर्वकप्रदानान्तरं कार्यम् । स्विष्टकृदिडाभक्षणे तु तन्त्रेणैव । वस्तुतस्तु दैवतावदानस्यापि प्रदानावयवत्वोपपत्तेः विभिन्नदेवताकस्थलेऽपि दैवतावदानादिप्रदानान्तेन अनुसमयः । **भाट्ट.** ५।२।६. * पशुगणे (एकयूपके– भाट्ट) स्वरोः यावत् सर्वपश्वञ्जनं धारणम्, सर्वपशूनां चाञ्जनम् । **सोम.** ४।४।१०. * **पशुगणेषु** ऐकादशिनादिषु पत्नीसंयाजेषु जाघनीनां विकल्पः । १२।४।६. **मीको.** पृ. १३०९ ' ऐकादशिनादिपशुगणेषु० ' इत्यत्र द्रष्टव्यम् । * पशुगणेषु ऐकादशिनपशुधर्माणामतिदेशः । **भा.** ८।१। ८।१५. **मीको.** पृ. २१३ ' अतिदेशः पशुगणेषु० ' इत्यत्र द्रष्टव्यम् ।

* **पशुगणत्वं** पशुप्रकृतिलिङ्गम् । **बाल.** पृ. ११९.

* **पशुगते** निर्मन्थ्ये चयनगतनिर्मन्थ्यशब्दो धर्मान् नातिदिशति । निर्मन्थ्यन्यायः । **भा.** ७।३।७।१८.

* **पशुगतयूपाञ्जनाज्ये** दर्शपूर्णमासगताज्यनाम्ना धर्माणां नातिदेशः । **भा.** ७।३।७।१८.

* **पशुगतयूपावटबर्हिषि** दर्शपूर्णमासगतबर्हिर्धर्माणां नातिदेशः । **भा.** ७।३।७।१८.

पशुचोदनायामनियमोऽविशेषात् । ६।८। १०।३० ॥

ज्योतिष्टोमे ' अग्नीषोमीयं पशुमालभेत ' इत्यत्र पशुचोदनायां पशुविधौ सति अजो वा अनड्वान् वा अश्वो वा अन्यो वा कश्चित् इति अनियमः स्यात् । अविशेषात् । पशुं इत्युक्तम्, पशुविशेषस्तु नोक्तः । तस्मादनियमः स्यात् इति पूर्वः पक्षः ।

छागो वा मन्त्रवर्णात् । ३१ ॥

पूर्वपक्षं सूत्रेण प्राप्तं वाशब्देन निरस्यन् सिद्धान्तमाह । अग्नीषोमीयः पशुः नियमेन छाग एव स्यान्नान्यः । ' छागस्य वपाया मेदसोऽनुब्रूहि ' इति अनुवचनमन्त्रवर्णात् । तथा च मान्त्रवर्णिको द्रव्यनियमविधिः ।

न, चोदनाविरोधात् । ३२ ॥

अग्नीषोमीयः पशुः मन्त्रवर्णात् छागः इति न नियन्तुं शक्यते, चोदनाविरोधात् । ' अग्नीषोमीयं पशुमालभेत ' इति चोदनागतपशुशब्दस्य पशुत्वमर्थः । अन्यो मन्त्रवर्णेन नियम्यते छागः । चोदना च मन्त्रवर्णात् बलवती । तस्मान्न छागनियमः इति पूर्वपक्षिणः शङ्का ।

आर्षेयवदिति चेत् । ३३ ॥

' अग्नीषोमीयं पशुमालभेत ' इत्युक्तं पशुत्वम्, छागं प्रकल्पयितुं विवक्षितमिति सिद्धान्ती दृष्टान्तेन शङ्कते । ' आर्षेयं वृणीते त्रीन् वृणीते ' इति सामान्याऽपि श्रुतिः त्रिष्वेवावतिष्ठते नान्यान् अपेक्षते । एवं आर्षेयमिव आर्षेयवत् पशुत्वमपि छागे एवावतिष्ठते, नान्यान् पशूनपेक्षते । इति चेत् ।

न, तत्र ह्यचोदितत्वात् । ३४ ॥

पूर्वपक्षी आह । न आर्षेयवत् पशुत्वस्य छागे पर्यवसानम् । तत्र छागे हि यस्मात् अचोदितत्वात् चोदितत्वाभावात् । पशुत्वं चोदितम्, छागो न चोदितः । तस्मादनियमः ।

नियमो वैकार्थ्ये ह्यर्थभेदाद् भेदः, पृथक्त्वेनाभिधानात् । ३५ ॥

पूर्वपक्षितं वाशब्देन निरस्यन् सिद्धान्ती आह । अग्नीषोमीयस्य पशोः छागत्वे नियम एव । हि यस्मात् ऐकार्थ्ये पशुच्छागशब्दयोः । चोदनायां पशुमित्युक्तम्, मन्त्रवर्णे च छाग इत्युक्तम् । पशुरिति सामान्यम्, छागादयो विशेषाः । सामान्यविशेषयोश्च 'पशुश्छागः, पशुरुष्ट्रः, पशुर्मेषः, पशुरुस्रः ' इति सामानाधिकरण्यम् । एवं सति छागमन्त्रवर्णस्य पशुचोदनया न विरोधः । तस्मात् अग्नीषोमीयः पशुः छाग एव । यत्र तु पृथक्त्वेन परस्परविरोधेन अभिधानं स्यात्तत्र पृथक्त्वेन अभिधानात्

अर्थभेदः स्यात् । अर्थभेदाच्च मन्त्रलिङ्गविध्यर्थयोः भेदः स्यात् । यथा ऐन्द्या ऋचा गार्हपत्योपस्थाने । प्रकृते तु पृथक्त्वेनाभिधानाभावात् अर्थभेदाभावः । अर्थभेदाभावाच्च मन्त्रचोदनयोर्न भेदः । तस्मात् छाग एव पशुः ।

अनियमो वाऽर्थान्तरत्वादन्यत्वं व्यतिरेकशब्दभेदाभ्याम् । ३६ ॥

पुनः पूर्वपक्षी आह । अनियमः अग्नीषोमीयः पशुः छाग एवेति न नियमः । वाशब्दः नियमव्यावृत्त्यर्थः । अर्थान्तरत्वात् पशुत्वात् छागत्वं पदार्थान्तरम् । तेन पशुश्छाग एवेति नियन्तुं न शक्यते । अन्यत्वं पदार्थान्तरत्वं च व्यतिरेकशब्दभेदाभ्याम् । व्यतिरेकात् शब्दभेदाच्च । यद्यपि छागः पशुरेव तथापि न सर्वः पशुः छाग एव, गवाश्वादेरपि छागभिन्नस्य पशुत्वात् । ततश्च पशुच्छागयोः व्यतिरेको भेदः । छागः, पशुः इति अपर्यायशब्दभेदश्च भवति । नहि एतौ पर्यायौ । तस्मात् अग्नीषोमीयः पशुः छागो वा अन्यो वा अनियमेन ग्राह्यः ।

न वा, प्रयोगसमवायित्वात् । ३७ ॥

सिद्धान्ती पुनराह । न अनियमः । कुतः ? प्रयोगसमवायित्वात् मन्त्रवर्णस्य प्रयोगे समवेतत्वात् । तथा च छागस्यैव नियमः स्वीकर्तव्यः । न च चोदनाविरोधः । पशुच्छागशब्दयोः सामानाधिकरण्येन एकार्थत्वस्योक्तत्वात् ।

रूपाल्लिङ्गाच्च । ३८ ॥

अग्नीषोमीयः पशुः मन्त्रवर्णात् छाग इत्युक्तं सिद्धान्तिना । पूर्वपक्षी तु ब्रूते, भवतु छागः । छागशब्देन तु अश्व एव ग्राह्यः । रूपात् आख्यारूपात् योगादित्यर्थः । छिदेः गमेश्च छागशब्दः प्रसिद्धः । यश्च छिन्नगमनः अश्वः स छागः स्यात् । लिङ्गाच्च । छागशब्दः पुंलिङ्गः अश्वशब्दश्च पुंलिङ्ग एव । एवं रूपलिङ्गाभ्यां छागः अश्वः स्यात् इति ।

छागे न कर्माख्या रूपलिङ्गाभ्याम् । ३९ ॥

सिद्धान्ती आह । रूपलिङ्गाभ्यां छागे कर्माख्या नावकल्पते । गमनच्छेदनकर्मणः आख्या कर्माख्या । छागपदे रूपलिङ्गाभ्यां गमनच्छेदनकर्मणः आख्या भवेत् इति पूर्वपक्षिणा उक्तम्, तन्न युक्तम् । नहि छागशब्दः छिन्नगमनवचनः । समुदायो ह्यसौ पृथगर्थान्तरे प्रसिद्धः । नासौ अवयवप्रसिद्ध्या बाधितव्यः योगाद् रूढेर्बलीयस्त्वात् । तस्मात् नाश्वश्छागः । सुबोधिनीवृत्तौ तु " छागेन कर्म आख्यारूपलिङ्गाभ्यां ' इति पदच्छेदं स्वीकृत्य ' छागेनैव कर्मयोगः । आख्यारूपं रूढिशक्तिः, लिङ्गं पुंलिङ्गं ताभ्याम् । रूढिर्योगमपहरति इति न्यायात् योगशक्तेरप्रवृत्तिः इति भावः " इति व्याख्यातम् ।

रूपान्यत्वान्न जातिशब्दः स्यात् । ४० ॥

ननु छागः छागलः वत्सः एते शब्दा वयोवचनाः । तेन अश्वोऽपि वयोवचनो भविष्यति, इति छागः अश्व एव स्यात् इति चेत् । आह सिद्धान्ती । न अश्वः छागः । छागशब्दो यद्यपि वयोवचनः तथापि अजजातिगतं वयः वदितुं शक्नुयात्, नाश्वजातिगतं वयः । रूपान्यत्वात् छागस्य रूपं छागत्वं अश्वस्य अश्वत्वम् । रूपान्यत्वात् न छागशब्दः अश्ववचनः । किन्तु छागशब्दः जातिशब्दः स्यात् छागत्वजातिमदाश्रयं वयो वदेत् । अतः अग्नीषोमीयः पशुः छागो नाश्वः किन्तु अज एव ।

विकारो नौत्पत्तिकत्वात् । ४१ ॥

ननु अश्वशब्दस्य विकारः छागवाची अजशब्दः । अश्वशब्दस्य किञ्चिदत्रोच्चार्यते किञ्चिदन्यदेव । तस्मात् अश्वोऽपि अजः । अजश्च छागः । उच्यते । न विकारः अजशब्दः अश्वशब्दस्य । औत्पत्तिकत्वात् । औत्पत्तिको नित्य एव नामिनाम्नोः संबन्धः । नहि एकः शब्दः अन्यस्य शब्दस्य विकारः संभवति । तस्मात् अग्नीषोमीयः पशुः छागः अज एव नाश्वादिः ।

स नैमित्तिकः, पशोर्गुणस्याचोदितत्वात् । ४२ ॥

ननु छागशब्दः छिद्रनिमित्तः स्यात् । एवं श्रूयते— ' सुषिरो वा एतर्हि पशुः, यर्हि वपामुत्खिदति ' इति । अत्राह सिद्धान्ती । पूर्वसूत्रात् न इति पदं अनुवर्तते । सः छागशब्दः न नैमित्तिकः न छिद्रनिमित्तकः । पशोः छिद्रत्वस्य गुणस्य अचोदितत्वात् । ' अव्यङ्गं पशुमालभेत ' इति हि चोद्यते । तस्मादच्छिद्रः पशुः । न च अवयवप्रसिद्ध्या समुदायशक्तिर्बाध्यते इत्युक्तम् । तस्मात् अग्नीषोमीयः पशुः अजश्छाग एव ।

जातेर्वा तत्प्रायवचनार्थवत्त्वाभ्याम् । ४३ ॥

वाशब्दः अवधारणायां इति भाष्यम् । छागशब्दः जातेरेव वाचकः । ' विश्वेषां देवानामुस्राणां छागानां मेषाणां वपानां मेदसोऽनुब्रूहि ' इति जातिप्राये छागशब्दस्य वचनात्, समुदायस्य अर्थवत्त्वाच्च । तस्मात् अग्नीषोमीयः पशुः छाग एव नाश्वादिः इति सिद्धान्तः । के.

* **पशुचोदनायामनियमोऽविशेषात्** । इति शाखाऽन्तरीयाणामधिकविधीनां उपसंहारस्यानित्यत्वादेव षष्ठान्त्याधिकरणमर्थवत् । अन्यथा ' अजोऽग्नीषोमीयः ' इति शाखाऽन्तरीयविशेषवचने जाग्रति तदधिकरणानुन्मेषप्रसङ्गात् । कु. ३।१।१५।२७ पृ. २७७.

* **पशुजाघनीवाक्यन्यायः** (३।३।१०) । अनेन न्यायेन इतरनिवृत्तिर्भवति । **संकर्ष.** १।४।१८. **मीको.** पृ. १७५५ ' जाघनीन्यायः ' इत्यत्र द्रष्टव्यम् ।

⌛ **पशुतन्त्रविप्रकर्षन्यायः** । (वा. पृ. ५०६ ' अन्यथा तु पशुतन्त्रविप्रकर्षन्यायेन सकृत् कृतैव उपकुर्यात् ') ॥

पशौ तु चोदनैकत्वात् तन्त्रस्य विप्रकर्षः स्यात् । ११।२।३।१९ ॥ (इष्टिराजसूयाधिकरणस्थमिदम्) ।

भाष्यम्— यदुक्तं पशुवत् इति (यथा पशौ भिन्नकालेष्वपि एकदेशेषु ' वपया प्रातःसवने चरन्ति, पुरोडाशेन माध्यंदिने, अङ्गैस्तृतीयसवने ' इति नाङ्गानामावृत्तिर्भवति तद्वत् – इत्युक्तं पूर्वपक्षिणा) । तत्र ब्रूमः । पशौ युक्ता सकृत् अङ्गानां क्रिया, तत्र हि एकमेव तन्त्रम् । केवलं प्रचारस्य वचनात् विप्रकर्षः । तदैक्यं तु चोदनैकत्वात् । एका तत्र चोदना ' आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीय आग्नेयं सवनीयं पशुमुपाकरोति ' इति । कर्मचोदनायां हि अङ्गानां ग्रहणम्, न प्रचारचोदनायाम् । तदेव हि प्रधानं विप्रकृष्टकालेन प्रचारद्वयेन निर्वर्त्यते, तदर्थानि च कृतान्यङ्गानि । तेषां पुनः क्रियायां हेतुर्नास्ति । तस्मात् विषमः उपन्यासः । अत्र **सुधा**–– (पृ. ७७९) पशुपुरोडाशाङ्गप्रचाराणां कालभेदेऽपि अङ्गानावृत्तिवत् इहापि अनावृत्तिः इत्याशङ्क्य एकस्य कर्मणः प्रक्रमात् प्रभृति आसमाप्तेः एककालत्वात् सवनीयपशोश्च ऐककर्म्यात् प्रयोगाख्यस्य तन्त्रस्य विप्रकृष्टकालत्वेऽपि अङ्गानावृत्तिर्युक्ता इति वैषम्यं वक्ष्यमाणं दृष्टान्तितम् (५०६ पृष्ठे वार्तिककारेण) इति ।

* **पशुत्रयार्थः** स्वरुः तन्त्रं अग्निष्टोमे । ११।३।५।१०–१४. **मीको.** पृ. ७२ 'अग्निष्टोमे पशुत्रयार्थः०' इत्यत्र अधिकरणं द्रष्टव्यम् ।

* **पशुत्रयार्थयूपसंस्काराणां तन्त्रमग्निष्टोमे** । ११।३।४।५–९. **मीको.** पृ. ७४ ' अग्निष्टोमे पशुत्रयार्थयूपसंस्काराणां० ' इत्यत्र अधिकरणं द्रष्टव्यम् ।

* **' पशुत्वान्वयेऽपि गवादौ छागत्वव्यतिरेकात् अर्थैक्ये च पशुः छागः इति शब्दभेदानर्थक्यापत्तेः '** इत्यनेन (६।८।१०) वक्ष्यमाणेन न्यायेन... । (स्पष्टार्थो न्यायः) । सु. पृ. १४४३.

* **पशुद्वयवत्यां** विकृतौ पाशैकत्वपाशबहुत्वाभिधायिनौ मन्त्रौ द्विवचनान्तेन ऊहितव्यौ । ९।३।४।१०–१४. ' पाशन्यायः ' इत्यत्र अधिकरणं द्रष्टव्यम् ।

* **पशुधर्माः** उपाकरणम्, उपानयनम्, अक्ष्णया बन्धः, यूपे नियोजनम्, नयनम्, संज्ञपनम्, विशसनमित्येवमादयः । **भा.** ३।६।७।१८. * पशुधर्माः सौत्यादह्नः प्राचीने औपवसथ्येऽहनि धिष्ण्यनिर्माणादूर्ध्वमाम्नाताः । अग्नीषोमीयस्य च तदेव स्थानं इति संनिधिना पशुधर्मा अग्नीषोमीयपशुना संबध्यन्ते, सवनीयानुबन्ध्ययोस्तु चोदकात् । **वि.** ३।६।७. * **पशुधर्माणामग्नीषोमीयाङ्गत्वं** अनुष्ठानसादेश्यरूपात् क्रमात् । ३।३।५।१२. **मीको.** पृ. १५०९ ' क्रमाधिकरणम् ' इत्यत्र अधिकरणं द्रष्टव्यम् । * पशुधर्माणां वाजपेये प्राजापत्यपशुषु पदार्थानुसमयः । (पदार्थानुसमयन्यायः **मीको.** पृ. २४३७) । ५।२।१।१–३.

पशुधर्माधिकरणम् । अग्नीषोमीयपश्वर्थाः पशुधर्माः ॥

तुल्यः सर्वेषां पशुविधिः प्रकरणाविशेषात् । ३।६।७।१८ ॥

भाष्यम्— ज्योतिष्टोमे पशुरग्नीषोमीयः 'यो दीक्षितो यदग्नीषोमीयं पशुमालभते' इति । तथा सवनीयोऽनुबन्ध्यश्च । सन्ति च पशुधर्माः उपाकरणम्, उपानयनम्, अक्ष्णया बन्धः, यूपे नियोजनं नयनं संज्ञपनं विशसनं इत्येवमादयः । ते किं सर्वेषां अग्नीषोमीयसवनीयानुबन्ध्यानाम्, उत अग्नीषोमीयस्य सवनीयस्य च, उत अग्नीषोमीयस्यैवेति । किं प्राप्तम् ? अविशेषात् सर्वपशूनाम् । कथमविशेषः ? ज्योतिष्टोमप्रकरणे सर्वे पशवः समाम्नाताः । तत्प्रकरणापन्नत्वात् सर्वे पशुधर्मैः संबध्यन्ते । न चैषां तत्र कश्चिद्विशेषः । **एवं प्राप्ते, ब्रूमः** । सवनीयस्यैते धर्मा भवेयुः । तुल्यः सर्वेषां पशुविधिः स्यात्, यदि प्रकरणे विशेषो न भवेत् । भवति तु प्रकरणे विशेषः । सवनीयानां प्रकरणे पशुधर्माः समाम्नाताः । 'आग्नेयः पशुरग्निष्टोम आलभ्यः, आग्नेयो ह्यग्निष्टोमः' 'ऐन्द्राग्नः पशुरुक्थ्य आलभ्यः, ऐन्द्राग्नानि ह्युक्थ्यानि'। 'ऐन्द्रो वृष्णिः षोडशिन्यालभ्यः, ऐन्द्रो वै वृष्णिरैन्द्रः षोडशी'। 'सारस्वती मेष्यतिरात्र आलभ्या, वाग् वै सरस्वती' इति प्रकृत्य पशुधर्मा आम्नाताः । तस्मात् सवनीयस्य प्रकरणात् भवितुमर्हन्ति ।

वा— इदानीं स्थानस्य प्रकरणेन सह पूर्वैश्च विरोधाविरोधौ चिन्त्येते । ज्योतिष्टोमे अग्निष्टोमसंस्थे त्रयः पशव आम्नाताः अग्नीषोमीयः सवनीयः अनुबन्ध्यश्चेति । ते सर्वे कथम्भावैर्धर्मानपेक्षन्ते । तथा औपवसथ्ये अहनि अग्नीषोमप्रणयनोत्तरकालं उपाकरणादयः पशुधर्माः पठ्यन्ते । तेषु चतुर्धा संदेहः किं त्रयाणामपि पशूनामर्थेन आम्नायन्ते, अथ सवनीयार्थेनैव, अथ सवनीयाग्नीषोमीयार्थेन, अथ केवलाग्नीषोमीयार्थेनैवेति । किं प्राप्तम् ? तत्र 'स्थानाच्च पूर्वस्य' (१९) इत्येवमादिसूत्रसंगत्यर्थं असूत्रं तावत् पूर्वपक्षं करोति सर्वार्थाः इति । यदि तु अयमेव पक्षः सूत्रेण परिगृह्येत, ततः उत्तरसूत्राणि असंगतान्येव भवेयुः । यदा पूर्वसूत्रेणैव सर्वार्थत्वं प्रतिज्ञायते तदा किमनेन 'स्थानाच्च पूर्वस्य' इति । प्रकरणाविभागादेव हि पूर्वस्यापि सिद्धिः । श्वस्त्वेकेषां (२०) इत्यपि प्रकरणाभावकथनेन अप्रतिज्ञातकेवलसवनीयार्थता व्यावर्त्यमाना कथं संबध्येत । एवं तदनुसारित्वात् उत्तरसूत्राणामप्यसंगतिः । अथवा सौत्रे एव पूर्वपक्षे केवलसवनीयार्थत्वं असूत्रितं द्वितीयं पक्षं कृत्वा 'श्वस्त्वेकेषाम्' इत्यादि संबन्धनीयम् । तत्तु भाष्यकारेण नाश्रितम् । सर्वाद्यः पक्षः सुखमसूत्रः क्रियते । सौत्रपक्षान्तराले तु तत्संगत्यर्थं असूत्रपक्षाश्रयणं सूत्रकारस्य शून्यहृदयतामापादयति । तस्मादाद्यः एव मुक्तकः पक्षः । तस्योपपत्तिः, पशुधर्मा हि ज्योतिष्टोमप्रकरणे केन चिदपि पशुविशेषेण असंयुक्ताः श्रूयन्ते । कथम् ? '**एतद्देशे ह्यनुष्ठानं वाक्यात् दैक्षस्य यद्यपि । तथाप्युत्पत्तिदेशेऽस्य प्रक्रिया क्रयसंनिधौ** ॥' दीक्षासु हि सोमक्रयसमीपे अग्नीषोमीयः समाम्नायते । तस्य च यद्यपि वचनसामर्थ्यात् पशुधर्मसमीपेऽनुष्ठानं भविष्यति, तथापि प्रकरणेन नैव व्यापृतम् । सर्व(प्र)करणानामुत्पत्तिदेशानतिरेकात् । सवनीयानामपि सुत्याकालमुत्पत्तिवाक्यम् । औपवसथ्ये तु गुणार्थैव श्रुतिः । न च तया प्रकरणं भवति । अनूबन्ध्या तु दूरस्थैव, सोमान्ते क्रियमाणत्वात् । तस्मादवान्तरप्रकरणवाक्यसंयोगाभ्यां अप्रतिबद्धेन ज्योतिष्टोमप्रकरणेन अग्नीषोमीयस्य स्थानं विप्रकृष्टार्थं बाधित्वा ज्योतिष्टोमार्थास्तावदेते इत्येतत्कल्प्यते । तस्य च सोमद्रव्यकत्वात् न पशुधर्मैः किञ्चित् प्रयोजनम्, इति 'आनर्थक्यात्तदङ्गेषु' (३।१।९।१८) इत्येवं अङ्गेष्वेवावतरन्तः अङ्गत्वाविशेषात् त्रिष्वपि (पशुषु) अवतरन्ति । सत्यपि तदङ्गत्वे योग्यत्वाभावात् न दीक्षणीयाऽऽदिषु अवतरणम् । सत्यपि च योग्यत्वे सामान्यसंबन्धाभावात् न तदनङ्गपशूनाम् । तस्मात् त्रयाणां समानं विधानम् । इति **प्राप्ते, अभिधीयते** । स्यादेतदेवम्, यदि ज्योतिष्टोमद्वारेण प्रकरणाविशेषः स्यात् । अस्ति तु विशेषः सवनीयानां औपवसथ्येऽहनि उत्पत्तेः । 'आग्नेयमजमग्निष्टोम आलभेत' 'ऐन्द्राग्नमुक्थ्ये द्वितीयम्' इत्यादिना हि पशुधर्मसमीपे सवनीया उत्पादिताः ।

तस्मात् केवलसवनीयार्था एव । (इति द्वितीयः पूर्वपक्षः) ।

स्थानाच्च पूर्वस्य । १९ ॥

भाष्यम्— यदुक्तं प्रकरणात् सवनीयार्था इति, एतत् गृह्णीमः । क्रमाच्च अग्नीषोमीयस्य । तस्य हि क्रमे औपवसथ्येऽहनि समाम्नातम् । तस्मात् द्वयोरपीति ।

वा— कथं पुनरिदं श्रुतिलिङ्गाधिकरण- (३।३।७) विपरीतमभिधीयते ? नहि तत्र एवमिष्टं प्रकरणात् विदेवनादयो राजसूयार्थाः स्थानाच्चाभिषेचनीयार्था इति । तथा श्रुत्या ऐन्द्री गार्हपत्यार्था, लिङ्गेन इन्द्रार्था इति । युक्तं तत्र प्रकरणाम्नानेन बलीयसा प्रमाणेन निराकाङ्क्षीकृते जघन्यप्रमाणानुत्थानात् समुच्चयानाश्रयणम् । नहि अत्र पुनः कल्पनया विना, शेषस्य न किञ्चित् सिध्यति । नापि शेषिणामिन्द्राग्न्यादीनाम्, उपायान्तरेणापि स्मृतिसिद्धेः । इह पुनः सत्यपि सवनीयसंबन्धात् धर्माणां नैराकाङ्क्ष्ये, अग्नीषोमीयस्य पशुधर्मैर्विना सिद्ध्यभावात् प्राप्त्यन्तरमवश्यं कल्पनीयम्, उभयोरविप्रतिपत्तेः । न चैतस्य तदा दर्शपूर्णमासप्रकृतित्वं भवेत् । यो हि प्रकृतिभूतः पशूनाम्, स दर्शपूर्णमासविकारो भवति । इतरे तु प्राणिद्रव्यकत्वसामान्यात् तद्विकाराः । तत्र किं सवनीयार्थाः, ततः सारूप्यद्वारप्रभवेण अतिदेशेन अग्नीषोमीयो गृह्णाति, अथ उपदेशगन्धेन केन चिदिति, उपदेशान्तर्गतत्वात् क्रमेण विनियोगो युक्तः । षड्विधोपदेशप्रत्यस्तमये हि अतिदेशः कल्प्यते । तस्मात् यथैव अन्यत्र उपदेशातिदेशाभ्यां प्रकृतिविकृत्यर्थत्वं यागगतस्य व्यापारस्य, तथैवेह स्थानप्रकरणाभ्यामुभयार्थत्वम् । अनुबन्ध्यायास्तु सर्वोपदेशाभावात् अतिदेशेनैव प्राप्तिर्भविष्यति । तस्मात् अनुपालम्भः सूत्रस्य ।

श्वस्त्वेकेषां तत्र प्राक्श्रुतिर्गुणार्था । २० ॥

भाष्यम्— एकेषां शाखिनां श्वः सवनीयानामाम्नानम् । तदपेक्ष्य इयमेषां गुणार्था पुनःश्रुतिः । कः पुनर्गुणो यदर्था एषा श्रुतिः ? उच्यते । पशून् संकीर्त्य 'यथा वै मत्स्योऽविदितो जनमवधूनुते, एवमेतेऽप्रज्ञायमाना जनमवधुन्वते' इत्यविज्ञाने दोषमभिधाय, एभिः कथं सवनानि पशुमन्ति इति प्रश्नरूपकेण वपाप्रचारो गुणो विधीयते । तदर्था एषा श्रुतिः वपाप्रचारेण एकवाक्यत्वात् । किमतो यद्येवम् ? न सवनीयानां प्रकरणेन पशुधर्माः, क्रमादग्नीषोमीयार्था एवेति । किं पुनः तत् श्व आम्नानम् ? 'आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीय आग्नेयं सवनीयं पशुमुपाकरोति' इति ।

वा— यदुक्तं स्थानात् अग्नीषोमीयार्था इति एतद् गृह्णीमः । यत्तु प्रकरणात् सवनीयार्था इति, एतन्न मृष्यामहे । कुतः ? '**गुणार्थौपवसथ्येऽह्नि सवनीयपुनःश्रुतिः । उत्पत्तिः प्रक्रिया चैषामाश्विनग्रहणोत्तरा** ॥' 'आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीय आग्नेयं सवनीयं पशुमुपाकरोति' इति हि सवनीयानामुत्पत्तिः । 'श्वः' इति च औपवसथ्ये अहनि स्थितः सुत्यां ब्रवीति । 'कः पुनर्गुणः' इति स्ववाक्ये संयोगाभावात् पृच्छति (भाष्ये) । तद्दर्शयति । सर्वान् सवनीयान् अनुक्रम्य निन्दा श्रूयते 'यथा वै मत्स्यः' इति । यथा वै किल मत्स्यः जले विचरन् अनवधारितगतिः प्रेक्षकजनं अवधुनुते 'किमितो गतः किमगतः' इति । एवमेवैते पशवः क्व क्रियन्तां इत्येवमप्रज्ञायमानाः कर्तृजनं अवधून्वते । तेन पशुकीर्तनं तावत् एवमर्थम्, न विधानार्थमिति गम्यते । साऽपि निन्दा परतः प्रश्नशेषत्वेन नीता । तदेभिः पशुभिः सवनीयसमाख्यातैः कथं सवनानि पशुमन्ति कर्तव्यानि इति । सोऽपि प्रतिप्रश्नरूपविध्यन्तरशेषत्वं प्रतिपद्यते 'वपया प्रातःसवने चरन्ति' इति । तस्मात् एतद्गुणार्था इयं पुनः श्रुतिः । न च सा प्रकरणबुद्धिं करोतीति । किं पुनः तत् श्व आम्नानमिति । आश्विनग्रहणानन्तर्यगुणार्थत्वात् तदपि नोत्पत्तिसमर्थमिति मन्यते (प्रष्टा) । भाष्यकारेण केवलस्य आग्नेयस्य श्व आम्नानं दर्शितं नेतरेषाम् । तत्र के चित् आहुः, प्रदर्शनार्थत्वादस्य आग्नेयग्रहणं अविवक्षितत्वात् सर्वार्थमिति मन्यमानेन इति । वाक्यान्तराणि एवंरूपाणि द्रष्टव्यानि इति **अपरे** । सर्वथा तु केवलाग्नेयप्रदर्शनमेवोपयुज्यते । यद्यपि हि ऐन्द्राग्नादीनामौपवसथ्ये एवोत्पत्तिः तथापि तेषामनित्योत्तरसंस्थार्थत्वात् नैव शक्तिः नित्यवदाम्नातान् पशुधर्मान् ग्रहीतुम्, इति अग्नीषोमीयस्थानमेव बलीयः स्यात् । यस्तु नित्यत्वेन

ग्रहणसमर्थः तस्य प्रकरणाभावः उक्त एव । तस्मान्न सवनीयार्था इति ।

तेनोत्कृष्टस्य कालविधिरिति चेत् । २१ ॥

भाष्यम्— नैतदस्ति क्रमादग्नीषोमीयार्था एवेति । प्रकरणात् सवनीयार्थाः । पूर्वेद्युरेवाम्नानं विधानार्थम् । आश्विनवाक्यं कालगुणविधानार्थम् । कथम् , तेन वपाप्रचारेणोत्कृष्टस्य काल एष विधीयते । प्रातःसवने वपाप्रचारे चोदिते सति पश्वालम्भोऽपि तत्रैव प्राप्नोति । तत्र कालानियमे प्राप्ते ' आश्विनं ग्रहं गृहीत्वा ' इति कालमात्रं विधीयते । ' त्रिवृता यूपं परिवीय उपाकरोति ' इत्यनुवादः । इतरथा परिव्याणस्य कालो विधीयेत उपाकरणस्य च । तत्रानेकगुणविधानात् वाक्यं भिद्येत । तस्मात् सवनीयार्थाः पशुधर्मा: इति ।

वा—– इदानीं कतरत् सवनीयानामुत्पत्तिवाक्यं इत्येतत्परिज्ञानाधीनाधिकरणसिद्धिः । तत्र **पूर्वपक्षवादी** आह, इति चेत् सवनीयप्रकरणाभावं मन्यसे, तदयुक्तम् । कुतः ? **' सवनीयान् पुरोत्पाद्य वपामुत्कृष्य वाक्यतः । तत्राप्यनियमे प्राप्ते तद्विशेषो विधीयते ॥ '** ' वपया प्रातःसवने प्रचरन्ति ' इत्यनेनैव वचनेन उत्कृष्टे प्रधाने, प्रधानदेशत्वादङ्गानां उपाकरणादिष्वपि उत्कृष्टेषु, कालनियमे प्राप्ते सति, आश्विनग्रहणानन्तर्यं विधीयते । तेन तदेव गुणार्थं श्रवणम् । इतरथा हि वाक्यं भिद्येत । परिव्याणोपाकरणयोः कालविधानात् द्रव्यदेवतायुक्तस्य च यागस्य विधेः । **ननु** च अतिदेशप्राप्तमेव परिव्याणम् , तस्मिन्नेव काले यागे विधीयमाने अनूद्येत । **सत्य**मतिदेशेन प्राप्तम्, न तु तदानीं क्रियते । यूपसाधारण्येन ' तत्कालास्तु ' (११।३।४।६) इत्येवं अग्नीषोमीयकालकृतादेव उपकारसिद्धेः । एवं तर्हि साधारण्यादेव प्राप्तं विद्यमानमनूद्येत । न शक्यं तदनुवदितुम्, अप्रत्यभिज्ञानात् । तन्नाम अन्यतः प्राप्तमनूद्यते , यत् ताद्रूप्येण प्राप्तं प्रत्यभिज्ञायते । न च पूर्वेद्युः कृतस्य आश्विनग्रहणोत्तरकालं वर्तमानत्वेन अनुवादो भवति । नहि तदाऽसौ परिव्ययति । न च पूर्वकृतस्य पर्यग्निकृतादिशब्दवत् ईदृशेन शब्देन अनुवादः । पूर्वोत्तरकालकर्मावधिद्वयपरिच्छिन्नत्वात् । एवं तर्हि अस्माद्वाक्यात् प्राप्तमनूद्यताम् ' स आश्विनं ग्रहं गृहीत्वा उपनिष्क्रम्य यूपं परिव्ययति ' इति । तदपि नास्ति, प्रत्यभिज्ञानाभावादेव । यदेतत् अप्राकृतं सवनीयपरिव्याणम् , एतस्य शुद्धस्य श्रवणात् रशनायाश्च प्राकृतपरिव्याणनिबन्धनत्वात् , येनकेनचित् वासःप्रभृतिना करणे सति त्रिवृत्त्वानुवादो न प्राप्नोति । तत्र अनेकार्थविधानात् वाक्यभेदः । तदा च एवं भाष्यग्रन्थः । ' इतरथा हि परिव्याणस्य कालो विधीयेत ' यत्संबन्धित्वेन उपात्तं त्रिवृत् द्रव्यम् , कालो विधीयेत । ' उपाकरणस्य च ' इति उपाकरणकालो द्रव्यदेवताविशिष्टं च कर्म विधीयेत इत्यर्थः । तस्मात् अस्य गुणार्थत्वात् अस्ति पूर्वेद्युः सवनीयानां प्रकरणमिति ।

नैकदेशत्वात् । २२ ॥

भाष्यम्— नैतदेवम् । अग्नीषोमीयार्था एवैते क्रमात् । आश्विनकालं ह्याम्नानं विधानार्थम् । गुणार्थे एतस्मिन् वाक्यं भिद्येत, न विधानार्थे । नहि वपाप्रचारेण उत्कृष्टस्य कालविधिः संभवति । एकदेशो हि वपाद्रव्यम् । तेन संनिपातिनो वपासंस्कारान् उत्कर्षेत् नोपाकरणम् ।

वा—– (अत्रोच्यते,) यदा हि पूर्वेद्युः साङ्गानां सवनीयानामाम्नानम् , तदा तत्रैव सर्वानुष्ठाने प्राप्ते, वचनात् वपाप्रचारादिमात्रं उत्कृष्येत नोपाकरणादीनि । ' तदादि वाऽभिसंबन्धात् ' (५।१।१२।२४) इति ये वपाहोमोत्तरकालाः पदार्थाः, तत्संनिपातिनो वा तन्मात्रस्य उत्कर्षो भवेत्, न प्राग्भाविनामुपाकरणादीनाम् । यानि च अज्ञातकालानि अङ्गानि तेषां प्रधानकालत्वं वक्ष्यते (११।२।१।१) । पश्वङ्गानि तु अवधारितपूर्वेद्युःकालत्वात् न प्रधानकालं गच्छन्ति । तस्मात् वपाप्रचारेण अनुत्कृष्टस्य अनेनैव वाक्येन उत्कर्षः कर्तव्यः । ततश्च गुणवाक्ये सति अनेकार्थविधानात् वाक्यं भिद्येत । उत्पत्तिवाक्ये न दोषः । तस्मादेतत् उत्पत्त्यर्थमिति । न तु इह भाष्यकारेण विधेयानेकार्थत्वं दर्शितम् । एवमेव तु ' गुणार्थे एतस्मिन् वाक्यं भिद्येत ' इत्यभिहितम् । शक्यस्तु इह पूर्वेद्युः प्राप्तोपाकरणोत्कर्षमात्रविधानात् वाक्यभेदः परिहर्तुम् ।

तत्र **केचिदेवं** समर्थयन्ते । " यथा किल ' आग्नेय्या आग्नीध्रम् ' इति ज्योतिष्टोमसंबन्धे तद्विशेषे च विधीयमाने अनेकार्थत्वमुक्तम्, एवमिह वपाप्रचारेण अनुत्कृष्टस्य उपाकरणस्य उत्कर्षश्च कर्तव्यः तद्विशेषश्च इत्यनेकार्थत्वम् " इति । न तु इदमाग्नेयीवाक्यसदृशम् । तत्र हि संबन्धविशेषपरे विधौ सामान्यसंबन्धप्राप्तिमन्यतः अपेक्षमाणे कासुचिदाग्नेयीषु तत्सद्भावात् इतरविषयसामान्यसंबन्धं प्रति अन्यथाऽनुपपत्तिः क्षीयते । अतस्तु वेदेन अनभ्युपेतं तद्विधिं कल्पयतो वाक्यभेदो भवति । न तु इह तादृक् प्रतिपक्षोऽस्ति । यतः सामान्येन उत्कर्षप्राप्तिं दृष्ट्वा विशेषपरस्य अर्थापत्तिकोपः कल्प्येत । तत्रापि चेत्तदर्थापत्तिबाधिनी प्रतिपक्षभूता सामान्यप्राप्तिः नाभविष्यत् नाग्नेयीमात्रप्रमाणं निराकरिष्यत । प्राप्तेऽपि कर्मणि एकपदोपात्तानेकार्थविधिः शोणाद्युदाहरणैः तत्रतत्र प्रतिपादितः । तेन यद्यपि ' आश्विनं ग्रहं गृहीत्वा ' इत्यनेन द्वयमपि प्रातःसवनं आश्विनग्रहोत्तरकालत्वं च विधीयेत, तथापि विधायकस्य एकपदानुसारात् ' तस्यतस्योपदिश्येत ' (२।२।३।६) इत्येतदापत्तिर्नास्ति, किमुत अत्रैकविधाने अर्थादेव इतरसिद्धेः । अत एव भाष्यकारेण अनेकविधिदूषणे अभिहितम् ' न चानेकोऽर्थः परस्परासंबन्धे सति शक्यो विधातुम् ' इति । जानाति ह्यसौ यथा संबद्धानामर्थानां एकस्मिन् विहिते, अन्ये विनैवायासेन प्राप्नुवन्ति । तेन यदि एकस्मिन् विहिते अर्थात् अर्थसहस्रमपरमापद्यते न कश्चित् विरोधो विधेरायासो वा दृश्यते इत्याश्रीयते । तस्य तु अन्यथाऽप्युपपद्यमानत्वमेव एको निराकरणोपायः । न चेहास्ति स पक्षो यत्रैष विधिः सुत्याप्रातःसवनसंबन्धौ अकृत्वा आश्विनग्रहणानन्तर्यं विदध्यात् । तस्माददोषः । न चैव तु एष दोषः , यस्य अनेकद्रव्यदेवताविशिष्टकर्मविधानम् ।

अपिच ज्योतिष्टोमसुत्याप्रातःसवनविशेषकालसंयोगः अपरः कल्पनीयः । सर्वेषु च उत्कर्षापकर्षेषु सामान्यविशेषरूपः अनेकविधिदोषोऽस्ति इति प्राप्तकर्मगुणविध्यसंभवात् कर्मान्तरविधित्वप्रसङ्गः । तद्यथा ' माहेन्द्रस्य स्तोत्रं प्रति अभिषिच्यते ' इत्यत्र अभिषेचनीयस्य माध्यंदिनसवनमाहेन्द्रस्तोत्रकालविधेः अनेकार्थत्वम् । एवम् ' तिष्ठन्तं पशुं प्रयजन्ति ' इत्यादिष्वपि योजनीयम् । अपिच एकस्मिन् पदार्थे अनुष्ठीयमाने विधीयमाने च अर्थान्तरं द्वेधा आपद्यते, किञ्चित् प्रयत्नान्तरसाध्यं किञ्चित् तदनुनिष्पाद्यम् । यथा भक्षविधौ ग्रहणादयः तृप्तिश्च । तत्र यत् प्रयत्नान्तरसाध्यं न च तस्मिन् अकृते विहितकरणं शक्यमित्यवधार्यते । तत्र अर्थापत्तिलभ्यं विधिशक्त्यन्तरं कल्प्यते । या च यावती च शास्त्रीया सा अवगतिर्भवति । यत्तु अनुनिष्पादि बह्वपि पुरुषस्य शास्त्रस्य च व्यापारान्तरमन्तरेणैव सिध्यति, न तेन कश्चित् आयासो भवति । न चेह आश्विनग्रहणानन्तर्ये विधीयमाने अनुष्ठीयमाने वा सुत्याप्रातःसवनादिसंबन्धे भेदेन व्यापारितव्यम् । तेन नात्र कश्चित् उत्कर्षसामान्यं विधत्ते । श्रुतमात्राश्विनग्रहणार्थमात्रे विहिते यदि तदन्तर्गतत्वात् सुत्या-प्रातःसवनाहर्भागविशेषमुहूर्तनाडिकाक्षणलवनिमेषकालत्वद्रव्यसत्त्वादयः प्रसज्यन्ते, किं क्रियताम् ? । अपिच ' शिंशपामानय ' इत्यत्रापि वृक्षत्वद्रव्यत्वसत्ताद्याक्षेपात् वाक्यभेदः स्यात् । अतः पूर्वेद्युः प्राप्तस्य उपाकरणस्य कालान्तरमात्रं आश्विनग्रहणानन्तर्यं विधीयते इत्यदोषः ।

अन्ये तु द्वयोः परिव्याणोपाकरणयोः उत्कर्षात् वाक्यभेदं समर्थयन्ते । **तदपि तु** सुपरिहरम् । केवलपरिव्याणोत्कर्षादेव ' तदादि वाऽभिसंबन्धात् ' (५।१।१२।२४) इत्येवमुपाकरणोत्कर्षसिद्धेः । **तत्र एतत्** स्यात् , ' प्रकृतिप्राप्तो धर्मः उत्कृष्यमाणः तदाद्युत्कर्षं करोति नापूर्वः ' इति । **तदयुक्तम्** । ' कृतदेशात्तु पूर्वेषाम् ' (५।२।१०।२१) इत्यत्र अप्राकृतानामपि विदेवनादीनामपकर्षवर्णनेन ' तथाऽपूर्वम् ' (५।१।१६।२९) इत्यस्य विशिष्टविषयत्वव्याख्यानात् । अथवा ' स आश्विनं ग्रहम् ' इत्येतद्वाक्यप्राप्तापरिव्याणान्तरानुवादात् अवाक्यभेद इति । अथोच्येत, अविशेषितसाधनकत्वात् तत्र त्रिवृत्त्वानुवादो न संभवतीति, तदयुक्तम् । एवं हि सिद्धान्तवाद्यपि पूर्वपक्षवादिना चोदितः स्वयं परिहारं वक्ष्यति (रशनासाधारण्याधिकरणे) सोऽस्यापि भविष्यतीति । ननु च तस्य अपूर्वकर्मविधानादनेकार्थविधिरुपपद्यते नास्त्येति । नैष विशेषः । यत्र हि एकक्रियाविशेषणमनेकमुपादीयते,

तत्र तद्द्वारेण तद्विधिः सुलभः इति विशिष्टविधानन्यायः । यत्र पुनः स्वविशेषणाविशिष्टा क्रिया विधीयते, वाक्यान्तरप्राप्तस्य क्रियान्तरस्य विशेषणम्, तत्र अवश्यावर्तनीयो विधिप्रत्ययः । देवतादिविशिष्टो हि यागो विधीयमानः स्वविशेषणमेव आक्षेप्तुं समर्थः, नाविधीयमानपरिव्याणविशेषणम् । तेन अपूर्वकर्मविधिष्वपि एतद्विवेक्तव्यम्, कतरत् तद्विशेषणम्, कतरत् अन्यविशेषणमिति । तस्मादयमुभयपक्षभाक्त्वात् नैकस्य चोदयितव्यः । तत्रावश्यं सिद्धान्तवादिना उभयोः परिव्याणयोः साधारणी रशना इति परिहारो वक्तव्यः । वक्ष्यति हि ' रशना च लिङ्गदर्शनात् ' (३।६।१०।३१) इति । यद्यत् एतस्य यूपस्य परिव्याणम्, तस्यतस्य एषा वाक्येन विज्ञायते । तथा प्राप्तानुवादात् न वाक्यभेदः । अथवा यत् ' त्रिवृता यूपं परिवीय उपाकरोति ' इति पूर्वेद्युः प्राप्तं उपाकरणस्य परिव्याणानन्तर्यमनूद्य आश्विनग्रहणानन्तर्यं विधीयते । वरं च वाक्यभेदात् व्यवहितकल्पनाश्रयणम् ।

तस्मात् एवं वर्ण्यते । अवश्यं तावत् सवनीयानामेकेनोत्पत्तिः, एकेन च गुणो विधातव्यः । तत्र पूर्वेद्युस्तनस्य तावत् न कश्चित् उत्पत्तिवाक्यत्वे हेतुरस्ति । ननु इतरस्यापि नास्ति । यद्यपि एवं तथापि विकल्पसमुच्चयासंभवात् केन चिद्विशेषेण अन्यतरस्मिन्नाश्रयितव्ये विशेषोऽभिधीयते । पुरस्तात् एतदेव स्थितम्, यथा ' उपादेयो गुणः तिरोहितकर्मानुवादेन शक्यो विधातुम्, नानुपादेयः ' । स हि कुण्डपायिनामयने होमस्येव बलात् कर्मान्तरत्वमापादयति । तदिह वपाप्रचारः उपादेयः सुत्याकालस्थसवनीयानुवादेन शक्यो विधातुम्, किं पुनः प्रातःसवनश्रुत्या तद्देशसवनीयप्रत्यभिज्ञाने सति । श्वस्तने पुनराम्नाने निर्ज्ञातप्रयोजनत्वात् आश्विनग्रहणेन सह अङ्गाङ्गिसंबन्धाभावात् कालार्थे संयोगे तस्यानुपादेयत्वात् कर्मोद्देशेन विध्यनुपपत्तेः अवश्यं कालोद्देशेन कर्म विधेयम् । अथापि आश्विनं प्रति अङ्गत्वेन विधिः, तथापि अङ्गिनः अनुपादेयत्वात् एषैव वचनव्यक्तिः । अतश्च गुणविध्यनुपपत्तेः अवश्यं प्रकरणान्तरन्यायेन उत्पत्तिविधेः अन्येन अनन्तरेण अप्रतिबन्धात् उत्पत्तौ अवधार्यमाणायां कर्मान्तरं स्यात् । तेन अस्य तावत् कालापेक्षया उत्पादकत्वं सिद्धम् । अतश्च इतरस्य परिशेषसिद्धं गुणविधित्वम् । न हि तस्य किञ्चिद्भेदकारणम् । अत एव वपाप्रचारेण उत्कर्षोऽस्ति नास्ति इति विचारितम् । सति हि वपाप्रचारेण उत्कर्षे पूर्वस्यैव प्रातःसवने विपरिवृत्तेः कालं प्रति उपादानं प्रत्यभिज्ञानात् कल्प्येत । यथोक्तम् ' संनिधौ त्वविभागात् ' (२।३।१३।२६) इति । काले च कर्मणि विधीयमाने प्रत्ययस्य संनिकृष्टेऽर्थे व्यापारो भविष्यति । वपाप्रचारकालस्य पुनः सवनीयोत्पत्तिक्रियातः क्रियाऽन्तरविशेषणत्वात् दुष्प्रतिपादो विशिष्टविधिः इति वाक्यभेदः स्यात् । अस्मत्पक्षे पुनः यथा एकवाक्यत्वं भवति तथोक्तम् । एवं च परिव्याणस्यापि प्रकरणलभ्यः अङ्गभावः इहानुवदिष्यते । अन्यथा पुनः विप्रकृष्टतरेण क्रमेण प्राप्तिमपेक्ष्य अनूद्येत । तस्मादयमेव उत्पत्तिविधिः ।

कथं पुनरस्मिन् पक्षे भाष्यकारस्य वाक्यभेदोपन्यासः ? उच्यते । **' कर्मणो भेद एवायं वाक्यभेदोऽभिधीयते । संबन्धे त्वेकवाक्यत्वमर्थान्यत्वेऽपि गम्यते ॥ '** ' वाक्यं भिद्येत ' इति । न तेन एकवाक्यतामियात् यथा ' कर्तृगुणे तु कर्मासमवायाद्वाक्यभेदः स्यात् ' (३।१।१०।१९) इत्यत्र असत्यपि लक्षणतो वाक्यभेदे परस्परासंबन्धाभिप्रायेणोक्तम् । ' साकाङ्क्षं त्वेकवाक्यम् ' (३।१।१०।२०) इत्यत्र च संबन्धमात्राभिप्रायम् । तथेह उत्पत्त्यर्थत्वे सति तदेकवाक्यतां याति, न गुणार्थे इत्युच्यते ।

अर्थेनेति चेत् । २३ ॥

भाष्यम्— आह । अर्थेन हि उत्कृष्टस्य कालो विधीयते । ' मुष्टिना पिधाय वपोद्धरणमासीत आवपाहोमात् ' इति श्रूयते । पूर्वेद्युर्वपोद्धरणं मुष्टिना पिधाय न शक्नुयात् एतावन्तं कालमासीनेन अवस्थातुम्, अवश्यमाहारविहारादयः तेन कर्तव्याः इति ।

न, श्रुत्यविप्रतिषेधात् । २४ ॥

भाष्यम्— नैतदेवम् । श्रुतिविप्रतिषेधे भवेदेवम् । न च श्रुतिविप्रतिषेधः । तृणमुष्टिना पर्णमुष्टिना वा पिधास्यते । ननु आस्ते इत्युपवेशने भवति । नावश्यं उपवेशने एव, औदासीन्येऽपि दृश्यते । तद्यथा ' गृहाणि

परिगृह्य आस्ते, क्षेत्राणि परिगृह्य आस्ते ' इति अनुपवेशनेऽपि भवति व्यापारनिवृत्तौ । इहापि तृणमुष्टिना पर्णमुष्टिना वा पिधाय आवपाहोमात् उदासिष्यते । तस्मात् आश्विनकालमाम्नानं विधानार्थम्, न सवनीयानां प्रकरणे पशुधर्माः । तस्मान्न सवनीयार्थाः ।

स्थानात्तु पूर्वस्य संस्कारस्य तदर्थत्वात् । २५ ॥

भाष्यम्— नास्ति सवनीयानां प्रकरणम्, इत्येवं सति पूर्वेणैव हेतुना स्थानेन पूर्वस्य अग्नीषोमीयस्य भवितुमर्हन्ति । संस्कारोऽयं पशुयागप्रयुक्तः, न ज्योतिष्टोमप्रयुक्तः । ज्योतिष्टोमप्रयुक्तत्वे न विशेषः पशूनां स्यात् । पशुयागा अपि हि धर्मान् प्रयोक्तुमपूर्वत्वात् समर्थाः प्रकरणवन्तश्च । तस्मात् क्रमात् अग्नीषोमीयधर्मा इति ।

वा— सर्वं सवनीयप्रकरणं निराकृत्य पूर्वोक्तेनैव हेतुना सिद्धान्तं निगमयति । यद्वा अवान्तरप्रकरणेन अबाध्यमानं स्थानबाधेनैव महाप्रकरणं सर्वार्थत्वप्रतिपादनाय अवस्थितम्, तन्निवृत्त्यर्थस्तुशब्दः (२५ सूत्रस्थः) । यद्यपि प्रकरणं स्थानात् बलवत्, तथापि उपांशुयाजानुमन्त्रणन्यायेन लिङ्गानुगृहीतक्रम एव अत्र बलीयान् विज्ञायते । योग्यतया हि पशुधर्माः पशुयागमपेक्षन्ते, न सोमयागम् । न च अनपेक्षिताः प्रकरणेन ग्रहीतुं शक्यन्ते । तदङ्गावतरणेन च अत्र विप्रकृष्टतरः श्रुतोऽर्थः । न च षष्ठीप्रतिपाद्यात् संबन्धात् विना, आनर्थक्यतदङ्गन्यायोऽस्ति इत्युक्तम् । ननु च अविहितधर्मान्तरः साकाङ्क्ष एव अग्नीषोमीयः प्रदेशान्तरात् इह आनीयमानः संनिहितान् धर्मान् प्रकरणेनैव गृह्णाति इति न वक्तव्यं स्थानाच्चेति । **नैष दोषः** । यत्र हि प्राकृतैरङ्गैः पूर्यमाणायां विकृतौ तन्मध्येऽप्यपूर्वाणि कानि चित् प्रक्षिप्यन्ते तत्र विकृतौ प्रकरणग्रहणं भवति । अत्र प्रदेशान्तरे उत्पन्नः अग्नीषोमीयः प्राकृतैस्तावत् निष्पतिद्वन्द्वैः क्लृप्तोपकारैश्च निराकाङ्क्षीकृतः । ततः इहानीतः सन् अनन्यप्रयोजनान् धर्मान् साकाङ्क्षान् पश्यन् अनुमितकथम्भावः संबध्यते । स्थानस्य च एतदेव लक्षणम्, यदुत धर्माणां साकाङ्क्षत्वेन प्रधानस्य उत्पाद्य कथम्भावं संबन्धः । तस्मात् सूक्तं स्थानात्तु इति ।

लिङ्गदर्शनाच्च । २६ ॥

भाष्यम्— इतश्च पश्यामः अग्नीषोमीयार्थाः पशुधर्मा इति । कुतः ? लिङ्गदर्शनात् । लिङ्गमस्मिन्नर्थे भवति ' वपया प्रातःसवने चरन्ति, पुरोडाशेन माध्यंदिने सवने ' इति पशुपुरोडाशं दर्शयति । इतरथा समानविधानेषु सर्वेषु पशुषु अग्नीषोमयोर्देवतयोः संस्कारार्थः सन् पुरोडाशः सामर्थ्यात् अग्नीषोमीयस्य भवेत् न सवनीयस्य, तयोर्देवतयोः अभावात्, दर्शयति च । तस्मात् अग्नीषोमीयार्था इति ।

वा— सर्वेषां द्वयोर्वा समानविधानत्वे सवनीये पशुपुरोडाशादर्शनं नोपपद्यते । पुरोडाशस्य हि देवतासंस्कारार्थत्वं वक्ष्यति (१०।१।९।२०) । स च लिङ्गात् अग्नीषोमावेव संस्कर्तुं शक्नोति, नाग्निम् । न च समानविधानत्वेन ऊहः सिद्धान्तवत् संभवति । तस्मात् पुरोडाशादर्शनात् आतिदेशिकाः सवनीयस्य धर्मा इति ।

अचोदना गुणार्थेन । २७ ॥

भाष्यम्— इदं पदोत्तरं सूत्रम् । आह, ननु छिद्रापिधानार्थः पशुपुरोडाशः । नेति ब्रूमः । अचोदना गुणार्थेन । तस्य छिद्रापिधानार्थेन न चोदना, अर्थवादः स इत्युक्तम् । तस्मात् देवतासंस्कारार्थः । तस्य अग्नीषोमीयार्थत्वे सवनीये पुरोडाशस्य दर्शनमुपपद्यते, न साधारण्ये । तस्मात् अग्नीषोमीयार्थाः पशुधर्मा इति ।

वा— सत्यं देवतासंस्कारार्थः सन् न प्राप्नोति, न तु अयं केवलस्तदर्थः । किं तर्हि ? ' शुषिरो वा एतर्हि पशुः ' इत्युपक्रम्य छिद्रापिधानार्थोऽपि । अतश्च विनाऽपि देवताम्, सवनीयस्य छिद्रं पिधातुं पुरोडाशः करिष्यते । तेन समानविधानत्वेऽपि अदोषः इत्युक्ते सूत्रेण उत्तरमाह । न छिद्रापिधानार्थेन अस्य चोदना । विधिवन्निगदानां हेतुवन्निगदानां च एवंजातीयानां अर्थवादत्वेन उक्तत्वात् (१।२।२–३।१९–३०) । नहि छिद्रापिधानं क्रतुना अपेक्षितम्, नापि पुरोडाशयागे कृते दृश्यते । तस्मात् नैतत् प्रयोजनं इति यथोक्तमेव लिङ्गदर्शनं सिद्धम् ।

शा— एवं प्रकरणस्य पूर्वैः सह विरोधाविरोधविचारं सप्रासङ्गिकं समाप्य (३।३।८–३।६।६), अधुना

स्थानस्य पूर्वैः सह विरोधाविरोधौ विचार्येते । पादाद्येन प्रकृतिविकृतीनां समानासमानविधानत्वं विचारितम् । अत्रापि तदेवानुवर्तते । तदिह विचार्यते किमेते धर्माः त्रयाणामपि पशूनां साधारण्येन विधीयन्ते, किंवा सवनीयस्यैव, अथ अग्नीषोमीयसवनीययोः, उत अग्नीषोमीयस्यैवेति । तदर्थं च किं अग्नीषोमीयस्य स्थानं ज्यौतिष्टोमिकेन प्रकरणेन सवनीयावान्तरप्रकरणेन वा विरुध्यते नेति ; तत्सिद्ध्यर्थं च किं सवनीयानां औपवसथ्येऽह्नि प्रकरणमस्ति नास्तीति चिन्तनीयम् । ततोऽपि एतद्विवेक्तव्यम् , किं औपवसथ्येऽह्नि सवनीयोत्पत्तिः, उत सौत्येऽहनीति । **‘ ननु प्रकरणात् स्थानं दुर्बलं तत् कथं ततः । अग्नीषोमीयशेषत्वं धर्माणां स्यात्, तदुच्यते ॥ अग्नीषोमीयशेषत्वं यदुक्तं सत्यमेव तत् । सवनीयार्थतां तेषामवजानीमहे , कुतः ॥ सवनीयस्य धर्मेषु नास्ति प्रकरणं यतः । न खल्वौपवसथ्येऽह्नि सवनीयो विधीयते ॥ यतः प्रकरणं तत्र सवनीयस्य लभ्यते । प्रचारविप्रकर्षाख्यगुणस्य तु विधित्सया ॥ कीर्त्यते सवनीयोऽत्र सौत्ये त्वेष विधीयते । कर्मणश्च विधिर्यत्र तत्र प्रकरणं भवेत् ॥ न तु यत्र गुणार्थेन श्रवणं तत्र विद्यते । तस्मान्न सवनीयस्य प्रक्रिया गुणसंनिधौ ॥ न सर्वेषाममी, नापि सवनीयस्य, नोभयोः । अग्नीषोमीय एवातो विधेर्धर्मा व्यवस्थिताः ॥ अन्यत्र त्वतिदेशेन गच्छन्ति, न विधानतः । विधिस्तु दैक्ष एवेति सूत्रे विधिरुदाहृतः ॥ ’**

सोम-- प्रयोजनं पूर्वपक्षे सवनीयानुबन्ध्ययोः तत्तद्देवत्यपुरोडाशस्य अप्रवृत्तिः । सिद्धान्ते तु अग्नीषोमीयस्य प्रकृतित्वात् तत्र च पुरोडाशस्य दाशमिकन्यायेन संनिपातित्वात्, संनिपातिनां च विकृतिषु ऊहेन प्रवृत्तेः , सवनीयादौ तत्तद्देवताकपशुपुरोडाशप्रवृत्तिः अनुबन्ध्यायामपि अधिगुप्रैषस्य ऊहेन प्रवृत्तिः इति ।

वि-- ‘ अग्नीषोमीयसवनीयानुबन्ध्यपशुष्वमी । उपाकरणमुख्यास्तु धर्माः साधारणा न वा ॥, ज्योतिष्टोमप्रकरणे पाठात् साधारणा अमी । पशुधर्माग्रहात् सोमयागे ते स्युर्निरर्थकाः ॥, अग्नीषोमीयधर्मत्वं तेषां स्थानात् प्रसिध्यति । द्वयोरितरयोः पश्वोः प्राप्यन्ते चोदकेन ते ॥ ’ इति ।

भाट्ट-- ज्योतिष्टोमे क्रयसंनिधौ अग्नीषोमीयः पशुराम्नातः, ‘ स एष औपवसथ्येऽहन्यालब्धव्यः ’ इत्यस्माद्वचनात् चतुर्थेऽहनि अनुष्ठीयते । पशुधर्माश्च तत्रैव पशूपाकरणादयः समाम्नाताः । सवनीयश्च पशुः सौत्येऽहनि समाम्नातः ‘ आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीय आग्नेयं सवनीयं पशुमुपाकरोति ’ इति । अनुबन्ध्यश्च अन्ते समाम्नातः । तदिह किं पशुधर्माणां पशुत्रयसाधारण्यम्, उत सवनीयमात्रार्थत्वम्, उत सवनीयाग्नीषोमीयोभयार्थत्वम् , उत अग्नीषोमीयमात्रार्थत्वमेव इति चिन्तायां महाप्रकरणवशात् ज्योतिष्टोमसंबद्धानां धर्माणां पशुधर्मत्वेन साक्षात् संबन्धायोगात् आनर्थक्यतदङ्गन्यायेन (३।१।९) पशुयागद्वारा जनकत्वावगतेः, तेषां च मध्ये कस्य चित् विशिष्य प्रकरणबाधकबलवत्प्रमाणाभावेन अविशेषात् सर्वार्थत्वं इत्याद्यः (पक्षः) । **द्वितीयस्तु** सत्यपि ज्योतिष्टोमप्रकरणस्य पशुधर्मग्राहकत्वे सवनीयावान्तरप्रकरणेन तद्बाधः । तस्य हि औपवसथ्ये अहन्येव उत्पत्तिः । ‘ आग्नेयः पशुरग्निष्टोमे आलब्धव्यः , ऐन्द्राग्न उक्थ्ये द्वितीयः, ऐन्द्रो वृष्णिः षोडशिनि तृतीयः , सारस्वती मेष्यतिरात्रे चतुर्थी ’ इत्येतैर्वचनैः क्रतुपशूनां विधानात् । तस्य क्लृप्तोपकारप्राकृताङ्गसंबन्धेऽपि अपेक्षितानां पशुधर्माणां संनिहितत्वेन प्राकृताङ्गसंदष्टत्वेन न अवान्तरप्रकरणोपपत्तिः । ऐन्द्राग्नादिपशूनां तु संस्थाधिकरणन्यायेन (३।६।१६) समानविधानत्वाभावादेव न पशुधर्मग्राहकत्वशङ्का । अस्तु वा तेषामपि अवान्तरप्रकरणात् धर्मग्राहकत्वम् , नैतावता सर्वार्थत्वम् । न सौत्येऽहनि तद्विधिः , सवनीयोद्देशेन तस्य आश्विनग्रहग्रहणोत्तरकालत्वमात्रविधायकत्वात् । यूपपरिव्याणस्य ‘ त्रिवृता यूपं परिव्ययति ’ इति सामान्यविधिना ‘ आश्विनं ग्रहं गृहीत्वा उपनिष्क्रम्य यूपं परिव्ययति ’ इति परिव्याणविधिना वा प्राप्तत्वेन अनुवादात् । परिव्याणान्तरे त्रिवृत्त्वस्यापि रशनासाधारण्याधिकरणे (३।६।१०) एव उपपादयिष्यमाणत्वाच्च । न च तथापि

दूरस्थकर्मानुवादेन कालविधिरशक्यः, औपवसथ्ये अहनि विहितानामपि क्रतुपशूनाम् ‘ वपया प्रातःसवने चरन्ति, पुरोडाशेन माध्यंदिने, अङ्गैस्तृतीयसवने ’ इत्यनेन उत्कर्षविधानात् सौत्येऽहनि अनुष्ठीयमानतया उपस्थित्युपपत्तेः । तेन यथैव क्रयसंनिधौ आम्नातस्य अग्नीषोमीयस्य औपवसथ्ये अहनि अनुष्ठीयमानत्वेनैव धर्मग्राहकत्वं सिद्धान्ते, तद्वदिहापि इति न दोषः । न च एवमपि क्व सवनीयविधिः इत्यत्र विनिगमनाविरहः, धर्मबाहुल्यस्य नियामकत्वात् । अतश्च अवान्तरप्रकरणात् सवनीयार्थाः इति । **तृतीयस्तु** सत्यं सवनीयार्थाः, स्थानादग्नीषोमीयार्था अपि । तस्य हि क्रयसंनिधौ विधिदशायामेव क्लृप्तोपकारप्राकृताङ्गैः निराकाङ्क्षीकृतस्य औपवसथ्ये अहनि उत्कृष्टस्य आर्थोपस्थितिमात्रत्वेन स्थानम् । सवनीयवत् वाक्यसंनिध्यभावेन प्रकरणशङ्काऽनुपपत्तेः । अत एव इतिकर्तव्यतात्वेन अयोग्यसंबन्धयोर्वाक्यार्थयोः संनिधिः इति स्थानलक्षणम् । **यद्यपि** चात्र पशुधर्माणां श्रुत्यादिविनियुक्तत्वात् न प्रकरणस्य स्थानस्य वा विनियोजकत्वसंभावना, **तथापि** अपूर्वसाधनत्वलक्षणातात्पर्यग्राहकत्वे एव विनियोजकत्वव्यवहारो भाक्तः इति द्रष्टव्यम् । न चैवमपि प्रकरणेन स्थानबाधापत्तिः, अग्नीषोमीयस्य पशुधर्माकाङ्क्षायामेव अतिदेशकल्पनवत् औपदेशिकस्थानस्यैव विनियोजकत्वकल्पनौचित्यात् । अन्यथा प्रबलौपदेशिकप्रमाणेन प्रकृत्यर्थत्वात् धर्माणां क्वापि विकृत्यर्थत्वानापत्तेः । इन्द्रादेः उपायान्तरेणापि स्मृतिसंभवात् न लिङ्गादेः श्रुतिकल्पकत्वमिति विशेषः । अत उभयार्थत्वम् । **इति प्राप्ते,** न सवनीयस्य अवान्तरप्रकरणम्, सौत्ये अहनि उत्पत्तेः, अन्यथा दूरस्थकर्मानुवादेन कालरूपानुपादेयगुणविधानानुपपत्तेः । न च प्रातःसवने उत्कृष्टत्वादेव उपस्थितिः, आनुष्ठानिकोपस्थितेः अङ्गग्राहकत्वेऽपि प्रकरणान्तरप्रतिबन्धकत्वस्य क्वापि अदर्शनात् । अस्तु वा तत्, तथापि वपाभ्यासमात्रस्य प्रातःसवने उत्कृष्टत्वेऽपि उपाकरणोत्कर्षे प्रमाणाभावात् उपस्थित्यनुपपत्तेः । यद्यपि च उपाकरोतिना याग एव लक्ष्यते, तथापि शक्यार्थस्योपाकरणस्य आश्विनग्रहणोत्तरकालत्वस्य अप्राप्तेः अनुवादानुपपत्तिः । **यद्यपि** च वपाप्रचारोत्तरभाविपदार्थानां तदाद्युत्कर्षन्यायेन (५।१।१२) उत्कर्षः संभाव्यते, **तथापि** न तत्पूर्वभाविनामुपाकरणादीनामुत्कर्षे प्रमाणमस्ति । **वस्तुतस्तु** पूर्वेद्युर्वेदिकरणन्यायेन अपूर्वत्वात् तदुत्तरभाविनामपि नोत्कर्षः ।

वस्तुतस्तु ‘गङ्गायां घोषः’ इत्यादौ शक्यार्थस्य घोषान्वयप्राप्त्यभावेऽपि लक्षणादर्शनात् तस्योत्तरकालत्वप्राप्त्यभावेऽपि उपाकरोतिना वपाभ्यासलक्षणोपपत्तेः पश्वनपक्रमोपयोगियूपदार्ढ्यसंपादकद्वितीययूपपरिव्याणस्य आश्विनग्रहणोत्तरकालविधित एव तदुत्तरभाविवपायागस्यापि आश्विनग्रहणोत्तरकालत्वसिद्धेः एतद्वाक्यवैयर्थ्यभियैव अभ्यासात् एतस्योत्पत्तिविधित्वम् । तत्रापि इतरस्य सर्वस्य द्वितीययूपपरिव्याणादेः वाक्यान्तरप्राप्तत्वात् कालविशिष्टं शुद्धमेव वा द्रव्यदेवताविशिष्टं कर्मैव विधीयते । ततश्च अनेनैव वाक्येन आग्नेयसवनीयस्य एतत्समानजातीयैश्च वाक्यान्तरैः ऐन्द्राग्नादीनां विधानात् औपवसथ्ये अहनि तेषां पुनः श्रवणमनुवादमात्रम् । तथापि ‘ यथा वै मत्स्योऽविदितो जनमवधूनुते, एवमेतेऽप्रज्ञायमाना जनमवधून्वते ’ इत्यर्थवादकृतसंततकरणनिमित्तकनिन्दोपपादकैतच्छब्दापेक्षितपशुसमर्पणार्थे निन्दोन्नीतदोषपरिहारार्थे च ‘ वपया प्रातःसवने चरन्ति ’ इत्यादिना वपाप्रचारोद्देशेन प्रातःसवनादिकालविधिः । खण्डशः कालभेदेनानुष्ठाने हि मध्ये स्मृत्यर्थे अवकाशलाभात् दोषपरिहारः । यद्यपि च अत्रापि कालविधानं दूरस्थकर्मानुवादेन अशक्यं तथापि अर्थवादत एव तदुपस्थितेः न कश्चिद्दोषः । यत्तु प्रचारविप्रकर्षस्य उपादेयस्य गुणस्य सत्त्वात् न दोष इति मूलोक्तं समाधानम् , तत् विप्रकर्षस्य अशाब्दस्य विधेयत्वाभावात् उपेक्षितम् । अतो न सवनीयस्य अवान्तरप्रकरणम् । स्थानात्तु अग्नीषोमीययागाङ्गं पशुधर्माः । न च ज्योतिष्टोमप्रकरणेन स्थानबाधः, पशुधर्माणां श्रुत्यादिभिः पशुसंस्कारकतया विनियुक्तानां अयोग्यतया ज्योतिष्टोमप्रकरणेन अग्रहणात् । अतो यत्रैव श्रुतः संबन्धः, यथा ‘ वाजपेयस्य ’ (३।१।९) इत्यादौ, तत्रैव आनर्थक्यतदङ्गन्यायः, न तु अत्र । एवं सत्यपि यदि तस्यापि पशोः विशिष्य प्रमाणान्तरं अपूर्वसाधन-

त्वोपस्थापकं न स्यात् ततो महाप्रकरणपरिगृहीतानामेषां आनर्थक्यतदङ्गन्यायेन (३।१।९) भवेत् सर्वपश्वर्थत्वम्, न तु एतदस्ति, स्थानेन अग्नीषोमीयार्थत्वात् । तेन सिद्धमग्नीषोमीये उपदेशः, अन्यत्र तु अतिदेश इति । सामानविध्यप्रयोजनं दशमादौ स्पष्टम् ।

मण्डन— 'धर्मास्तु दैक्षस्य पशोः समीपात् ।' समीपात् सामीप्यात् ।

शंकर-- 'पशुसामान्यविध्यन्तः ।'

* **पशुधर्माधिकरणे** (३।६।७।१८–२७) क्रमस्य प्रकरणविरोधपरिहारेण पशुधर्माणां दैक्षार्थत्वे वक्ष्यमाणः अनुष्ठानदेशलक्षणोऽपि क्रमः विनियोगहेतुत्वेन सुज्ञेयो भविष्यति । **के.**

* **पशुधर्मता** सप्तदशारत्नितायाः यूपद्वारा वाजपेये । ३।१।९।१८.

* **पशुनियोजनं** परिधौ गुणविधिः । पश्वनपगमः दृष्टं प्रयोजनम् । महान् परिधिः कर्तव्यः । सौमिकेषु चातुर्मास्येषु । **भा.** १०।३।३।१८–२२. * पशुनियोजनं यूपधर्मः चातुर्मास्येषु (पशुमत्सु) परिधौ कर्तव्यः, 'परिधौ पशुं नियुञ्जीत' । वि. ९।२।१२ । परिधिश्चायं मध्यमः स्थूलः । अत्र तक्षणोच्छ्रायौ न कर्तव्यौ । अञ्जनादयस्तु कर्तव्याः । प्रैषे च 'यूपायाज्यमानाय' इत्येव ब्रूयात् न तु 'परिधयेऽज्यमानाय' इति । ९।२।१३.

* **पशुन्यायः ।** पश्वेकत्वाधिकरणम् । ४।१।५। ११–१६.

* **पशुपुरोडाशः** दार्शपूर्णमासिकात् अग्नीषोमीयात् पुरोडाशात् विध्यन्तं गृह्णाति । **टुप्.** १२।१।१।१. * पशुपुरोडाशः देवतासंस्कारापूर्वोभयार्थः । ४।१।७. **मीको.** पृ. १०१५ 'आश्रयिन्यायः' इत्यत्र द्रष्टव्यम् । * पशुपुरोडाशः देवतासंस्कारार्थः इत्युक्तम् 'अपि वा शेषभूतत्वात्०' (१०।१।९।२३) इत्यत्र । (संस्कारः स्मरणविषयता । तेनादृष्टमपि) । **भा.** १२।२।२।९, * पशुपुरोडाशः पशुतन्त्रमध्ये उत्पन्नः पशुतन्त्रं गृह्णाति । १२।२।५।१४, * पशुपुरोडाशः पाशुकान् प्रयाजान् अन्यकालानपि उपजीवति । १२।१।७।१५. * पशुपुरोडाशः शास्त्रातिदेशात् सामानविध्याच्च पशुधर्माणां मध्ये अग्नीषोमसंस्कारार्थः देवतान्तरे न प्राप्नोति । **वा.** ३।८।१६।३१. * पशुपुरोडाशः सवनीये पशौ अपि कर्तव्यः, देवतासंस्कारार्थत्वात् । १२।२।२।८–१०. 'सवनीये पशौ' इत्यत्र द्रष्टव्यम् । * यद्देवत्यः पशुः तद्देवत्यः **पशुपुरोडाशः । भा.** १०।१।९।२०, * सौत्रामण्यां आश्विन–सारस्वत–सुत्रामदेवताकेषु पशुषु ऐन्द्र-वारुण–सावित्राः **पशुपुरोडाशाः ।** १०।१।९।२२. * **पशुपुरोडाशस्य** अग्नीषोमीयादिसंबन्धिनः श्रपणं शालामुखीये कर्तव्यम्, न तु शामित्रे । १२।१।५।१२. * **पशुपुरोडाशे** (अन्यतः अलभ्योपकाराः) आज्यभागादयः कर्तव्याः । ('न तौ पशौ करोति' इति तु पशौ निषेधो न पशुपुरोडाशे) । १२।१।२।७. 'पौरोडाशिकाज्यभागन्यायः' इत्यत्र द्रष्टव्यम् । * **पशुपुरोडाशेषु** पाशुकैरनुयाजैः प्रसङ्गसिद्धिः अनुयाजानाम् । **वि.** ५।१।१५.

* **पशुपुरोडाशाङ्ग**ेडाभक्षणोत्तरमेव पिष्टलेपफलीकरणहोमौ, न तु अनूयाजैः सहोत्कर्षः । ५।१।१५।२८.

* **पशुपुरोडाशाङ्गप्रचाराणां** कालभेदेऽपि अङ्गानावृत्तिः । **सु.** पृ. ७७९.

* **पशुपुरोडाशाङ्गस्विष्टकृद्यागे** त्यागे निगमेषु च केवलस्यैवाग्नेरभिधानम् । **भा.** १०।४।१८।३६–३७. **मीको.** पृ. १०२ 'अग्नीषोमीयपशुपुरोडाशस्विष्टकृति०' इत्यत्र द्रष्टव्यम् ।

पशुपुरोडाशाधिकरणम् । अग्नीषोमीयपशुपुरोडाशे पाशुकमेव तन्त्रं प्रसज्यते ॥

तन्त्रिसमवाये चोदनातः समानानामैकतन्त्र्यमतुल्येषु तु भेदो विधिप्रक्रमतादर्थ्यात्, तादर्थ्यं श्रुतिकालनिर्देशात् । १२।१।१।१॥

भाष्यम्— अग्नीषोमीये पशौ पुरोडाशः 'अग्नीषोमीयस्य वपया प्रचर्याग्नीषोमीयं पशुपुरोडाशमेकादशकपालं निर्वपेत्' इति ! किं तस्य पृथक्त्वेन अङ्गानि कर्तव्यानि, उत यानि पशौ कृतानि तस्याप्युपकुर्वन्तीति । ततः सूत्रेणैवोपक्रमः । 'तन्त्रिसमवाये... कालनिर्देशात्' । तन्त्रं साधारणो धर्मग्रामः । यथा दर्शपूर्णमासयोराज्यभागादिः

पूर्वः, स्विष्टकृदादिरुत्तरः । येषां प्रधानानाम्, तानि तन्त्रीणि प्रधानानि । तेषां तु समवाये एकदेशकालकर्तृत्वे, चोदनातः समानानां एकवाक्यचोदितानां एकतन्त्रत्वं भवति । यथा दर्शपूर्णमासयोः, यथा च चित्रायामिष्टौ । अतुल्येषु तु भेदः स्यात् । यानि तु चोदनातो न तुल्यानि नानावाक्यैश्चोदितानि, तेषु तु भेदः स्यात् तन्त्रस्य । यथा अत्रैव 'अग्नीषोमीयं पशुमालभेत', 'अग्नीषोमीयं पशुपुरोडाशमेकादशकपालं निर्वपति' इति । किं कारणम् ? विधिप्रक्रमतादर्थ्यात् । विधिर्विधानं तदङ्गानां प्रयोगः, तस्य प्रक्रमः तदर्था प्रवृत्तिः । विधिप्रक्रमतादर्थ्यं विज्ञायते, अयं पश्वर्थः विधिप्रक्रमः, न पुरोडाशार्थ इति । कथं पुनः पश्वर्थत्वं विधिप्रक्रमस्य ? तादर्थ्यं श्रुतिकालनिर्देशात् । श्रुत्या तत्र कालो निर्दिश्यते । अग्नीषोमप्रणयनादनन्तरं पशोः कालः । तत्र हि तस्य चोदना । वपाप्रचारादूर्ध्वं पुरोडाशस्य कालः । पशोरवसरे यो विधिप्रक्रमः स केवलः पश्वर्थो विज्ञायते पुरोडाशस्याप्राप्तत्वात् । अतस्तस्य पृथक् तन्त्रं कर्तव्यम् । लिङ्गं च पश्वर्थतां तन्त्रस्य दर्शयति । 'यदेकादशप्रयाजान् यजति पशुमेव तत् प्रयजति, यदेकादशानुयाजान् यजति पशुमेव तदनुयजति' इति । एवकारकरणात् अवधारणं विज्ञायते, पशुमेव, न पुरोडाशमिति ।

टुप्-- तन्त्रिसमवाये ... निदशात् ॥ (अग्नीषोमीये पशौ) 'अग्नीषोमीयस्य वपया प्रचर्याग्नीषोमीयं पशुपुरोडाशमेकादशकपालं निर्वपति' इति (श्रूयते) । तत्र संशयः किं तस्य (पाशुकेभ्यः अङ्गेभ्यः) पृथगङ्गानि कर्तव्यानि, उत यानि पशोः (अर्थेन कृतानि) अङ्गानि, तानि (एव) तस्यापि उपकुर्वन्ति प्रसङ्गेन इति । ततः एतत्सिद्ध्यर्थं प्रसङ्गोऽस्ति नास्ति इति विचार्यते । (तत्र पूर्वः पक्षः) नास्ति प्रसङ्ग इति । कुतः ? (उत्तरत्वेन सूत्रं योजयति –) तन्त्रिसमवाये (साधारणो धर्मग्रामस्तन्त्रम् । स येषाम्, ते तन्त्रिणः, तेषाम्–) प्रधानानां (आग्नेयाग्नीषोमीयानां पशुपुरोडाशादीनां च) समवाये (एकदेशकालकर्तृकत्वे सति) चोदनातः समानानामेकतन्त्रत्वम् । यानि एकचोदनया चोद्यन्ते (एकया प्रधानचोदनया सह चोद्यन्ते,) तेषां समानतन्त्रत्वम् । यथा दर्शपूर्णमासयोः, यथा च चित्रायामिष्टौ (दध्यादीनाम्) । अतुल्येषु तु भेदः स्यात् । यानि पुनः (प्रधान–) चोदनातो भिद्यन्ते, तेषां भेद एव यथा दर्शस्य पूर्णमासस्य च । तस्मात् द्विप्रकारत्वात् कर्मणां तृतीयः प्रकारो नास्ति । (एवं सामान्यन्यायमुक्त्वा प्रकृते योजयति । पशु–) पुरोडाशः (दार्शपौर्णमासिकात्) अग्नीषोमीयात् (पुरोडाशात्) विध्यन्तं गृह्णाति, पशुरपि सांनाय्यात् । एतावानतिदेशस्य व्यापारः । (तत्र) तयोः (पशु–पुरोडाशयोः) भिन्नचोदितत्वात् न तन्त्रम् । लोके तु युक्तः प्रसङ्गः प्रत्यक्षगम्यत्वात् (उपकारस्य) । **अत्र परिचोद्यते,** चित्रेष्टिः अनुदाहरणम् (तन्त्रित्वेन बहुयागाभावात्) कथम् ? 'दधि मधु घृतं धाना उदकं तण्डुलाः, तत् संसृष्टं प्राजापत्यम्' इति (अत्र) तत् इत्येकवचनान्तं सर्वनाम संसृष्टशब्देन संबध्यते एकवचनान्तेनैव । यदि दध्यादिभिः संबध्येत, बहुवचनान्तं स्यात् (तानि इति) वीप्सा वा (तत्तत् इति), न च वीप्सा श्रूयते, न बहुवचनम् । तस्मात् संसृष्टशब्देन (एव) संबन्धः । संसृष्टस्य च (तच्छब्दनिर्दिष्टस्य) प्रजापतिसंबन्धः (प्रजापतिशब्देन संबन्धः) । संसृष्टं चैकं वस्तु । तस्मात् (द्रव्यदेवतक्यात्) एक एव यागः, कुतस्तन्त्रम् (इति) । **अत्रोच्यते ।** दध्यादिभिः (एव सर्वनाम) संबध्यते (न तु संसृष्टेन) । निर्दिष्टस्य हि प्रतिनिर्देशकं सर्वनाम (भवति), निर्दिष्टानि (चेह) दध्यादीनि प्रथमया विभक्त्या । अतस्तान्येव शब्दोपात्तानि (साकाङ्क्षाणि) परिवर्तमानानि सर्वनाम्ना प्रतिनिर्दिश्यन्ते, न तु केनचित् शब्देन (दध्यादि–) संसर्गो निर्दिष्टः यः सर्वनाम्ना प्रतिनिर्दिश्येत (तस्मात् तेषामेव निर्देशः) । अथ यदुक्तं दध्यादिसंबन्धे बहुवचनं प्राप्नोति वीप्सा वेति । अत्रोच्यते । सर्वनामप्रातिपदिकस्य (हि) निर्दिष्टप्रतिनिदशकत्वे शक्तिः, वचनस्य तु एकार्थप्रतिपादकत्वम् । तस्मादनयोर्विरोधः । तत्र प्रथमोपनिपातात्, लिङ्गसंख्ययोश्च तदर्थत्वात् (प्रातिपदिकार्थत्वात्) यथाश्रुतं प्रातिपदिकं गृह्णीमः । उत्तरकालभावित्वाच्च लिङ्गसंख्ययोरविवक्षैव (युक्ता) । योऽयं 'गुणे त्वन्याय्यकल्पनैकदेशत्वात्' इति (पाशन्यायः ९।३।५।१९) स एवात्रापि न्यायः ।

अथवा एकदेवतत्वात् लक्षणया लक्षितलक्षणया वा उपपन्नमेकवचनं लिङ्गं च । (ननु लक्षणैव दोषः इति चेत्तत्राह–) सर्वत्रैव लक्षणया लिङ्गसंख्ये प्रवर्तेते । (तथाहि वृक्षः वृक्षौ इत्यादौ) प्रातिपदिकं जातिं ब्रूते, लक्षणया तु द्रव्यम् (तद्गतं च लिङ्गसंख्यं गम्यते) ।

गुणकालविकाराच्च तन्त्रभेदः स्यात् । २ ॥

भाष्यम्— अपि च पाशुकाः प्रयाजानुयाजाः गुणतः कालतश्च विकृताः । एकादशसंख्याः पशौ उभयेऽपि । पञ्चभिश्च प्रयाजैः त्रिभिरनुयाजैः पुरोडाशस्य कार्यम् । तथा पृषदाज्येन अनुयाजाः पशोरिज्यन्ते, केवलेनाज्येन च पुरोडाशस्यार्थः । कालविकारोऽपि, आसन्ने हविषि पौरोडाशिकैः प्रयाजैर्भवितव्यम् , पाशुकास्तु तिष्ठति पशौ वर्तन्ते ' तिष्ठन्तं पशुं प्रयजन्ति ' इति वचनात् । उभयेऽपि पुरोडाशस्य पृथक्त्वेनाक्रियमाणाः न यथावत् संपादिता भवेयुः । तस्मादपि तन्त्रभेदः ।

टुप्— इतश्च नास्ति प्रसङ्गः । यतः कालगुणविकृताः प्रयाजानुयाजाः पशौ । तेऽन्यस्य नोपकुर्वन्ति ।

तन्त्रमध्ये विधानाद्वा मुख्यतन्त्रेण सिद्धिः स्यात्, तन्त्रार्थस्याविशिष्टत्वात् । ३ ॥

भाष्यम्–– अथवा नैव भेदेन पुरोडाशस्य तन्त्रं कर्तव्यम् । किं तर्हि ? मुख्यतन्त्रेण सिद्धिः स्यात् । पाशुकमेव तन्त्रं पुरोडाशस्योपकुर्यात् । किं कारणम् ? तन्त्रमध्ये विधानात् । पाशुकस्य तन्त्रस्य मध्ये पुरोडाशो विहितः ' अग्नीषोमीयस्य वपया प्रचर्य अग्नीषोमीयं पशुपुरोडाशमेकादशकपालं निर्वपति ' इति । किमतः ? तन्त्रार्थस्याविशिष्टत्वं भवतीति । तन्त्रस्यार्थः तन्त्रार्थः अङ्गकृत उपकारः, सोऽत्राविशिष्टः पशोः पुरोडाशस्य च संनिधानाविशेषात् । पशावपि क्रियमाणान्यङ्गानि पुरोडाशस्य संनिहितानि । संनिधानाच्च पशोरप्युपकुर्वन्ति प्रदीपवत् । यथा प्रासादे कृतः प्रदीपः संनिधानात् राजमार्गेऽपि उपकरोति । विषम उपन्यासः । स खलु प्रत्यक्षेण ज्ञायते । अयं पुनः अप्रत्यक्षः अङ्गोपकारः कथं शक्यो विज्ञातुमिति । अयमपि शास्त्रदृश्यः, शास्त्रप्रत्ययाद्गम्यते । शास्त्रं चेदं दर्शपूर्णमासवत् कर्तव्यानि इति । तद्वच्चेत् कृतानि किमिति नोपकरिष्यन्ति । दर्शपूर्णमासयोः स्वप्रधानैः एकदेशकालकर्तृकाणि क्रियमाणानि उपकृतवन्ति, इहापि तथाविधान्येव क्रियन्ते, तस्मादिहापि तद्वदेव उपकुर्वन्तीति विज्ञायते । आह, नेह तद्विधानि । दर्शपूर्णमासयोः स्वप्रधानान्युद्दिश्य कृतान्यङ्गानि, इहापि तद्वदेव कर्तव्यानि । न च पुरोडाशमुद्दिश्य इह क्रियन्ते । किं तर्हि ? पशुम् । तस्मात् पुरोडाशस्य न प्रकृतिवत् कृतानि भवन्तीति । उच्यते । प्रकृतौ न शाब्द उद्देशः । नहि तत्र श्रूयते प्रधानान्युद्दिश्य अङ्गानि कर्तव्यानीति । किं तर्हि ? अर्थात् क्रियन्ते, तेषां तत्र चिकीर्षितत्वात् । न चार्थात् कृतं चोदकेन प्राप्यते । यत् कारणम् , विध्यन्तस्य तत्रापेक्षणात् । तेन यत् पठितम्, तत् प्राप्यते, न पाठात् बाह्यम् । तस्मात्तु अनुद्दिश्यापि क्रियमाणानि प्रकृतिवत् कृतानि भवन्ति । एवं सिद्धा प्रसङ्गादुपकारनिर्वृत्तिः । ननु एवं सति तन्त्रलक्षणात् अविशिष्टमेव भवति, न खलु तन्त्राङ्गमेव साधारणम् । इह तु अङ्गकृत एवोपकारः । सोऽपि न साधारणः । अन्यकृतोऽन्यस्य भवति ।

टुप्— अस्ति प्रसङ्गः, तस्य विषयो निरूप्यते । अन्यस्य तन्त्रे प्रतते यदन्यत् (तुल्यधर्मकम्) आपतति कर्म, तस्य कर्मणः (पूर्वभाविकर्मणः) या इतिकर्तव्यता (प्रवृत्ता) सा प्रसज्यते । यथा पशौ प्रतते पुरोडाश आपतति, तस्य पाशुकी इतिकर्तव्यता प्रसज्यते । कथम् ? तदुच्यते । भावयेत्, किम् ? पशूपकारम् । केन ? पुरोडाशयागेन । कथमिति अनेन (कथम्भावेन) यागगतो व्यापारः (अभिलषितः) । स च उपमितलक्षितप्रापणेन (पौर्णमासिकस्य) अग्नीषोमीयस्य यो यागगतो व्यापारः (प्रयाजादिजन्यदृष्टादृष्टोपकारवत्तासंपादनाख्यः) तं (द्रव्यदेवता–)सादृश्येन आकाङ्क्षति । तत्र यदेतत् अग्नीषोमीययागगतव्यापारविशेषनियमनमष्टमलक्षणसिद्धम्, तदुत्पत्तिरिव उत्पत्तिः (प्रथमालोचनत्वात्) तस्य च व्यापारस्य यत् इतरेण (पशुपुरोडाशयागेन) संबन्धकरणम्, सा प्राप्तिः (विनियोगः) । द्वावपि चेमौ (उत्पत्तिविनियोगरूपौ यागगतव्यापारविशेषविषयौ) चोदकव्यापारौ । तत उत्तरकालमुपसंग्रहः । (उपसंग्रहपदार्थमाह–) ' उप ' इति समीपे करणं

(अनुष्ठानम्) ' सम् ' इति (तस्य नानाविधाङ्गजुष्टस्य प्रकारस्य) साकल्येन ग्रहणम् । एष प्रयोगवचनस्य व्यापारः । (प्रकृते आह–) सः (प्रयोगवचनः) इह पाशुकेन प्रयोगवचनेन (समीपे–) कृतत्वात् न भूयः पौरोडाशिकः समीपे करोति । तस्मात् पौरोडाशिकः प्रयोगवचनो लुप्यते । एष प्रसङ्गः । कथं पुनरिदमवगम्यते, पाशुकः प्रयोगवचनः (प्राकृतमुपकारं पुरोडाशस्यापि) समीपे करोतीति ? (उत्तरम्–) ' अग्नीषोमीयं पशुमालभेत ' इत्येतस्मादेव अवगम्यते । कथम् ? (तदाह । अस्य वाक्यस्यायमर्थः–) भावयेत् । किम् ? ज्योतिष्टोमोपकारम् । (अवान्तरोपकारमग्नीषोमीयापूर्वमित्यर्थः) । केन ? पशुयागेन । कथमिति (अंशेन) इतिकर्तव्यता संबध्यते । तत्र यस्मिन्नेव क्षणे ज्योतिष्टोमोपकारो भवने कर्तृत्वं प्रतिपद्यते, तस्मिन्नेव क्षणे करणेन (पशुयागेन) भाव्यते । तस्मिन्नेव च (क्षणे) इतिकर्तव्यता करणमनुगृह्णती (भाव्यमानेन) संबध्यते । तस्मात् त्रयाणामेतेषां तुल्यकालत्वम् , भवन्तं ज्योतिष्टोमोपकारं यागेन इत्थं भावयेदिति । (किमिति तुल्यकालता ? अत आह–) यदि च भूते भविष्यति (वा) भाव्ये करणेतिकर्तव्यते स्याताम्, तयोस्तेन (सह) संबन्ध एव न स्यात् । तत्र यद्यपि उपकारस्य (भाव्यस्य) कालो नावधार्यते, तथापि (त्रयाणामेककाल–) संबन्धात् करणेतिकर्तव्यताकालेन परिच्छिद्यते । पशोश्च दीर्घकालत्वात् तन्मध्यपाती पुरोडाशः समीपे कृतान् (बर्हिस्तरणादिजन्यान्) उपकारान् (प्रयाजादिजन्यानि) अपूर्वाणि च पाशुकेन प्रयोगवचनेन उपसंगृह्णाति (स्वीकरोति प्रयोगवचनेन समीपे कृतानीत्यन्वयः) । न तु स्वयं (पृथक्त्वेन) समीपे करोति । यानि च तेन (पाशुकेन) न समीपे कृतानि तानि (आज्यभागावहन्त्यादीनि) पृथगुपसंगृह्णाति (कथमित्याह–) ' न चेदन्येन शिष्टाः ' इति न्यायात् येऽन्येन न विहिताः (पदार्थाः) तान् विदधाति ।

विकाराच्च न भेदः स्यादर्थस्याविकृतत्वात् । ४ ॥

भाष्यम्–– अथ यदुक्तं गुणकालविकाराच्च तन्त्रभेदः स्यादिति, तत्र ब्रूमः । विकाराच्च न भेदः स्यात् अर्थस्याविकृतत्वात् । अर्थः अङ्गजनित उपकारः, स न विकृतः, यो दर्शपूर्णमासयोः स एव । कथं ज्ञायते ? तदुच्यते । प्रयाजानुयाजास्तावदेते दार्शपौर्णमासिकाः । तत्र प्रयाजानुयाजशब्दौ प्रज्ञातौ । ते च चोदकेन इह प्राप्ताः संनिहिता विद्यन्ते । प्रकृतगामित्वं च शब्दस्य न्याय्यम् । न चैकः शब्दः अनेकार्थो युक्तः । तस्मात् दार्शपौर्णमासिकास्ते । तदुपकारोऽपि एषां दार्शपौर्णमासिक एव । स हि तेषां प्रज्ञातः । यदि च प्राकृतादुपकारात् उपकारान्तरं प्रकुर्युः, ततः अप्राकृतकार्यत्वात् नैव चोदकेन प्राप्येरन् , अपूर्वा भवेयुः । यथा सत्रे गौग्गुलवादिभिरभ्यञ्जनम् । अप्राप्तौ वा अनेनैव प्रयाजा विधीयन्ते, अनेनैव तेषां विकार इति, तत्र द्विकरः शब्दः स्यात् । न च सकृदुच्चरितः शक्नोत्यर्थद्वयं विधातुम् । अपूर्वत्वे च एतेषां प्राकृता अपि चोदकेन प्राप्येरन् । तत्र वैश्वदेवे त्रिंशत्संपत्तिराहुतीनां न युज्यते, ' नव प्रयाजाः, नवानुयाजाः, द्वावाज्यभागौ, अष्टौ हवींषि, अग्नये समवद्यति, वाजिनो यजति, आहुतीनां संपत्त्यै त्रिंशत्त्वाय ' इति । तस्मात् गुणविकारेऽपि अविकृतः प्राकृतः अङ्गोपकारः । तत्कृता एव पुरोडाशस्यापि उपकुर्वन्ति इति न गुणकालविकारेऽपि तन्त्रभेदः । तदानीं तं उभौ प्रार्थयेते पशुः पुरोडाशश्च । उभयोश्च प्रकृतिवत् क्रियन्ते अङ्गानि । तस्मात् सकृत्कृतान्येव उभयोरुपकुर्वन्ति । विकार इदानीं किमर्थः ? पश्वर्थः । पाशुकेषु हि प्रयाजानुयाजेषु श्रूयन्ते । न च पशोः पुरोडाशस्य च साधारणान्यङ्गानि । पाशुकान्येव संनिधानात् पुरोडाशस्यापि उपकुर्वन्तीत्युक्तम् । अपि च पृषदाज्येनापि इज्यमाना अनुयाजाः आज्येन इष्टा भवन्ति । न हि पृषत्त्वं आज्यत्वं नाशयति । यस्य क्षीरेण भोजनमुदितं भवति, यदि तस्मै सशर्करं दीयते, न कश्चित् विरोधो भवति, सशर्करमपि तत् पय एवेति । तथा य एकादश प्रयाजान् यजति, यजत्यसौ तदन्तर्गतान् प्राकृतान् पञ्च । येऽभ्यधिकाः षट्, न तैरिज्यमानैः पञ्च प्राकृता नष्टा भवन्ति । एवं तिष्ठति अपि पशौ क्रियमाणाः प्रयाजाः कृता एव पुरोडाशस्य भवन्ति । क्रमस्तेषां प्राकृतो हापितः, गुणमात्रं च क्रमः, न च गुणानुग्रहार्थं

प्रधानस्यावृत्तिर्युक्ता । न च गुणवशवर्ति प्रधानम् । कामं क्रमविपर्यासनिमित्तं प्रायश्चित्तं भवेत्, नावृत्तिः । प्रायश्चित्तं तर्हि कर्तव्यम् ? क्रियते, 'अयाश्चाग्नेः इति सर्वप्रायश्चित्तं जुहोति' इति । प्रासङ्गिकत्वाद्वा प्रायश्चित्ताभावः । तस्मादविरोधः ।

टुप्— अथ यदुक्तम्, द्रव्यसंख्याकालभेदात् न प्रसज्यते इति, तदुच्यते । सर्वः कथम्भावः उपकारमाकाङ्क्षति, तं तु चोदकः सादृश्येन उत्पादयति प्रापयति च । उत्पादितं प्रापितं च प्रयोगवचनः उपसंगृह्णाति । ते च (उपकाराः) शास्त्राण्यन्तरेण न संभवन्ति, इति शास्त्राणामुत्पत्तिं प्राप्तिं च करोति (शास्त्रग्रहणं पदार्थानामपि उपलक्षणम्) । पूर्ववच्च प्रयोगवचनेन उपसंग्रहः । तदिह पाशुकौ चोदकप्रयोगवचनौ सर्वं (इदं) कुरुतः । पौरोडाशिकस्तु चोदकः उत्पत्तिप्राप्ती करोत्येव । प्रयोगवचनस्तु पाशुकेन प्रयोगवचनेन उपसंगृहीतत्वात् न पृथगुपसंगृह्णाति उपकारान् । न चेदुपसंगृह्णाति, ते पदार्था एवात्र (पुरोडाशे) न सन्ति (न कर्तव्या इत्यर्थः) नतरां पदार्थानां गुणाः । तस्मान्नास्ति वैगुण्यम् । न च संख्याभेदेन द्रव्यभेदेन वा अपूर्वान्तरं भवति । किं तर्हि ? प्राकृती संख्या (पञ्चत्वरूपा) प्राकृतं च द्रव्यं (केवलमाज्यम्) अपनीयते । उपकारस्तु स एव (स्थितः । एवं कालभेदोऽपि न दोष इत्याह—) प्रयाजोपकाराश्च आदौ ये उत्पद्यन्ते, ते च आफलनिर्वृत्तेः (फलभूतपश्वपूर्वनिर्वृत्तिपर्यन्तम्) विद्यन्ते । विद्यन्ते चेत् अदोष एव कालभेदः । (तस्मादस्ति प्रसङ्ग इति) ।

एकेषां चाशक्यत्वात् । ५ ॥

भाष्यम्— एकेषां चार्थानां अशक्या भेदेन क्रिया । यथा वेदेरग्न्युद्धरणस्य व्रतोपायनस्येति । वेदिः कृता अनपवृक्ता तिष्ठति । सा न शक्या कर्तुम् । नहि अर्थः कृतः सन् कर्तुं शक्यते । अथोच्यते, अन्यां करिष्यतीति । आहोपुरुषिकं स्यात् । तिर्यक् चासौ भवेत् । तत्र दिक्कृतं मुह्येत । विहारपृथक्त्वं चाश्रुतमापद्येत । तत्र 'एकदेशकालकर्तृकत्वमङ्गप्रधानानाम्' इति स्थितो न्यायः प्रत्युद्ध्रियेत । एवमग्न्युद्धरणं तदाहवनीयनिर्वृत्त्यर्थम् । सकृदुद्धरणेन च निर्वर्तितोऽसौ । न च निर्वर्तितः शक्यो निर्वर्तयितुम्, यथा कृतः कर्तुम् । अथोच्यते, अन्यं निर्वर्तयिष्यतीति । न तस्मिन्ननुपरते द्वितीयस्तत्र आहवनीयोऽस्ति । यत् कारणम्, गार्हपत्याहवनीयौ उभावेकस्थौ । आहवनीयेऽपयातिते परिशिष्टो गार्हपत्यो भवति । यथा सर्वसाधारणात् ध्रौवाज्यात् उपांशुयाजार्थेऽपयातिते परिशिष्टमन्यदेवतार्थं भवति । विहारपृथक्त्वं च पूर्ववदापद्यते । तत्र पूर्वोक्ता एव दोषाः । तथा व्रतं यद् गृहीतम्, न तत् पुनरुत्स्रष्टुं शक्यते ग्रहीतुम् । अनुत्सृष्टं च तदा प्रधानापवर्गात् ।

एकाग्निवच्च दर्शनम् । ६ ॥

भाष्यम्— एकाग्निं पशोः पुरोडाशस्य च दर्शयति 'मध्येऽग्नेराज्याहुतीर्जुहोति, पुरोडाशाहुतीः पश्चाहुतीश्च' इति । नाग्न्युद्धरणस्य भेदः । तस्मात् पाशुकं तन्त्रं पुरोडाशे प्रसज्यते इति ।

शा — सकृदनुष्ठितमपि अङ्गं बहूनां प्रधानानामेकदेशकालकर्तृकाणां शक्नोति उपकर्तुं इत्येतत् तन्त्रलक्षणोक्तमुपजीव्य किमगृह्यमाणविशेषत्वादेव वा एवं भवति, उत 'अस्मै इदमनुष्ठानम्, नास्मै' इत्येवं गृह्यमाणेऽपि विशेषे अन्यार्थेऽपि अनुष्ठितमपि अङ्गमन्यस्यापि देशाद्यभेदे शक्नोत्युपकर्तुम्, न तादर्थ्येन पुनरनुष्ठातव्यमिति चिन्त्यते । इति तन्त्रप्रसङ्गयोर्हेतुहेतुमत्ता । तत्र '**अङ्गानि पशुकालानि पश्वर्थानीत्यसंशयम् । अनागते पुरोडाशकाले नहि तदर्थता ॥ अन्यार्थानुष्ठितं चाङ्गं नह्यन्यस्योपकारकम् । तदर्थेन कृतं चैव तथा प्रकृतिदर्शनात् ॥**' किञ्च '**विधीयमानं कालादौ कर्म साङ्गं विधीयते । स्वकालेऽतः पुरोडाशः कार्यः सर्वाङ्गसंगतः ॥ गुणकालकृतं चापि वैगुण्यं भाष्य ईरितम् । तेनापि न प्रसङ्गोऽस्तीत्येवं प्राप्तेऽभिधीयते ॥ वितते पाशुके तन्त्रे समाप्तिमागते सति । मध्ये पतन् पुरोडाशस्तत्तन्त्रमुपजीवति ॥ चोदकेन पुरोडाशे यो विध्यन्तः समर्थितः । ऐष्टिकः स पशावेव विततो दृश्यते यदा ॥ तदा तेनैव संतुष्टः पुरोडाशविधिः स्वयम् । प्राकृतानां पदार्थानां न करोत्युपसंग्रहम् ॥**' तस्मादस्ति प्रसङ्गः ।

सोम—सूत्रार्थस्तु— साधारणाङ्ग्रामभाजां समवाये एकदेशकालकर्तृत्वे सति यानि एकचोदनाचोदितानि आग्नेयादीनि तेषामेव ऐकतन्त्र्यं स्यात्, भिन्नचोदनाचोदितेषु पशुपुरोडाशादिषु अङ्गानुष्ठानस्य श्रुत्या अग्नीषोमीयप्रणयनानन्तरलक्षणाकालनिर्देशेन पश्वर्थत्वात् पुरोडाशार्थे तन्त्रभेदः स्यात् इति ।

चि— 'पश्वर्थानुष्ठितैर्नास्ति पुरोडाश उपक्रिया । अस्ति वा, विध्यभावान्नो, ह्यर्थतस्त्वस्तु लोकवत् ॥'

भाट्ट— 'अग्नीषोमीयस्य० निर्वपति' इति श्रुते अग्नीषोमीयपशुयागाङ्गभूते दार्शिकाग्नीषोमीययागप्रकृतिके पशुपुरोडाशयागे किं पाशुकानि प्रयाजादीन्यङ्गानि प्रसज्यन्ते, उत भेदेनानुष्ठीयन्ते इति चिन्तायाम्, न तावत् पौरोडाशिकं चोदकं प्रयोगविधिं च प्रयाजाद्यंशेऽपि अभ्युपगम्य केवलमनुष्ठानप्रसङ्ग एवाभ्युपगन्तुं शक्यः । प्रयोगविधिना वपाप्रचारोत्तरकालविशिष्टसाङ्गपुरोडाशयागप्रयोगविधौ ततः पूर्वकृतप्रयाजादीनां अकालकृतत्वेन उपकारकत्वानुपपत्तेः । **यदि तु** नायं कालविधिः, अपितु पशुपुरोडाशसमाख्यासहकृतानुष्ठानसादेश्यात् वाक्यादेव वा पश्वङ्गत्वावगतौ तत्प्रयोगान्तःपातेनानुष्ठानसिद्धेः अयं क्रमविधिरेव इत्युच्येत, **तथापि** पुरोडाशयागार्थं प्रधानविधिनैवानुष्ठापितानां प्राकृतानामङ्गानां अत्राकरणे वैगुण्यापत्तिरनिवार्यैव । यत्र हि पश्वङ्गानां पुरोडाशाङ्गानां च न वैलक्षण्यम्, तत्र सकृत्करणे वैगुण्याभावेऽपि तन्त्रत्वस्यैवापत्तेः न प्रसङ्गापत्तिः । यत्र वैलक्षण्यम्, यथा पशौ एकादश प्रयाजाः तिष्ठति च पशौ पृषदाज्येनानूयाजाः एकादश वैकृतयाज्यान्तरयुक्ताः, पुरोडाशे तु प्रयाजाः पञ्च हविरासादनोत्तरकालीनाः, अनूयाजाश्च शुद्धाज्येन त्रयः इत्यादि । तत्र त्रित्वादिसंख्यायाः चोदकेनाङ्गत्वप्राप्तौ प्रयोगविधिना चानुष्ठापने कथं पुरुषालस्यवशेनाननुष्ठाने वैगुण्यानापत्तिः ? । अतोऽवश्यं प्रसङ्गवादिना तदंशे शास्त्रस्यैव न व्यापारः इति अभ्युपगन्तव्यम् । अस्तु तर्हि तदंशे चोदकसत्त्वेऽपि प्रयोगविधिलोपः । तथात्वे पुरोडाशोद्देशप्रवृत्तपुरुषकृतौ प्रयाजाद्यनुकूलायां प्रयाजादेः कारकत्वाभावेन पुरोडाशाङ्गत्वानापत्त्या चोदकवैयर्थ्यात् । प्रयाजाद्यनुष्ठानस्य पश्वुद्देश्यकत्वेन पुरोडाशोद्देश्यकत्वाभावात् । **अथ** पुरोडाशयागानुकूलभावनायामेव प्रयाजादेः इतिकर्तव्यतात्वेनान्वयात्तदङ्गत्वमित्युच्येत, **तथापि** अनुष्ठानाभावेऽपि अङ्गत्वबोधकातिदेशस्वीकारे कृष्णलेषु अवघातातिदेशापत्त्या प्राभाकरमतप्रवेशापत्तेः । **अथ** उपकारपृष्ठभावेन पदार्थानामतिदेशात् उपकारलोपे इव अन्यत उपकारलाभेऽपि न पदार्थातिदेशः । उपकारस्य सिद्धत्वेन जनकापेक्षाऽभावे तदंशे अतिदेशकल्पने प्रमाणाभावात् । अत एव पुरोडाशातिदेशेन प्रयाजादिजन्यो विजातीयोपकार एव अतिदिश्यते, न तु तज्जनकप्रयाजादिकमपि । अतश्च पश्वर्थे क्रियमाणप्रयाजादिभिरेव तादृशविजातीयोपकारस्य लब्धत्वात् तेनैव पुरोडाशयागेऽपि योग्यताजननरूपफलोपपत्तेः प्रसङ्गाविरोधः । अत एव कालसंख्याद्यभावकृतं न वैगुण्यमपि । प्रयाजादीनामेवानतिदेशेन तत्पृष्ठभावेन तेषां सुतरामनतिदेशात् । **इति चेत्**, तथात्वेऽपि पशुयागोद्देशेन अनुष्ठितप्रयाजादिजन्यादृष्टानां पशूपकारं प्रत्येव फलोपधायकतया पुरोडाशयागोपकारकत्वानुपपत्तेः । अन्यथा स्वर्गोद्देशेन अनुष्ठितदर्शपूर्णमासादितः पुत्रपुत्र्यादेरपि उत्पत्त्यापत्तेः । अतः पश्वर्थे क्रियमाणप्रयाजाद्यङ्गैः पुरोडाशोपकारकत्वानुपपत्तेः तदर्थं भेदेनानुष्ठेयानि प्रयाजादीनि ; न च 'एकादश प्रयाजान् यजति' इत्यादिना अङ्गप्रधानसाधारणप्रयाजाद्युद्देशेन एकादशत्वादिविधानात् सकृत्कृतैरेव तैः तन्त्रेण उभयोपकारोपपत्तिः । 'एकादश प्रयाजान् यजति, पशुमेव तत् प्रयजति' 'एकादशानुयाजान् यजति, पशुमेव तदनुयजति' इत्यादिना एकादशत्वादीनां पश्वपूर्वसाधनीभूतप्रयाजार्थत्वावगमेन गृह्यमाणविशेषतया तन्त्रत्वानुपपत्तिः । **इति प्राप्ते**, सत्यम् । एकादशत्वादिगुणकं प्रयाजादिकं पश्वर्थमेव । तैरेव तु पशुप्रयोगमध्यवर्तिनः पुरोडाशयागस्य प्रसङ्गेन उपकारसिद्धेः न पृथक् तदर्थमनुष्ठानम् । अत एव प्रसङ्गस्थले अन्यतःसिद्धोपकारलाभात् पुरोडाशप्रयोगविधिलाघवेन नोपकारजनकीभूतं प्रयाजादिकमनुष्ठापयति, न वा तदीयचोदकः तदतिदिशति प्रयोजनाभावात् । अत एव उपकारमात्रांशे एव अतिदेशः । न च तैः पश्वपूर्वानुकूलयोग्यतामात्रस्यैव जननम्, पुरोडाशापूर्वानुकूल-

योग्यताया अपि सामग्रीसत्त्वेनोत्पत्तौ बाधकाभावात्। नहि एकं कारणं युगपत् क्रमेण वा एकमेव कार्यं जनयति इत्यत्र नियामकमस्ति, एकस्यैव घटस्य युगपत् क्रमेण वा रूपरससंयोगाद्युत्पादकत्वदर्शनात्। कामोद्देशेन अनुष्ठितदर्शपूर्णमासजन्यापूर्वात् नित्यप्रयोगीयपापक्षयस्यापि उपपत्तेश्च। सामग्रीभेदस्य प्रकृतेऽपि समानत्वाच्च। एकस्मात् कारणात् युगपत् एककार्यताऽवच्छेदकावच्छिन्नस्य एकस्यैवोत्पत्तिः। इतरथा घटद्वयोत्पत्तिरपि युगपदापद्येत। अत एव 'सर्वेभ्यो दर्शपूर्णमासौ' इत्यादौ अर्थवादोपात्तकामशब्दानुरोधेन प्रवृत्तिप्रयोजककामनाविषयत्वस्यैव उद्देश्यताऽवच्छेदकत्वेन स्थापितत्वात् तदवच्छिन्नस्यैकस्यैव युगपदुत्पत्तिः, नानेकस्य। न च तर्हि क्रमेण तस्योत्पत्तिप्रसङ्गः, पूर्वोत्पन्नकार्येण अपूर्वस्य नाशे उत्तरोत्पत्तौ आपादकाभावात्। न चैवं इहापि प्राथमिकेन पुरोडाशपरमापूर्वेण प्रयाजादिजन्यादृष्टानां नाशात् पाश्चात्यपशुपरमापूर्वोत्पत्त्यनुपपत्तिः, लाघवेन उद्देश्यताऽवच्छेदकावच्छिन्नस्यैव अपूर्वनाशकत्वाङ्गीकारात्। अतोऽत्र कार्यान्तरोत्पत्तौ न किञ्चिद् बाधकं इति युक्त एव प्रसङ्गः। गुणकालादिकृतं वैगुण्यं तु त्वयैव निरस्तम्।

मण्डन— 'अङ्गं पुरोडाश उपैति पाशुकम्।'

शंकर— 'चित्रायां भिन्नकर्मता।' १. 'पश्वङ्गानि प्रसज्यन्ते।' २. (अत्र प्रथमाधिकरणत्वेन यन्निर्दिष्टं तत्, 'येषां तु समवाये एकदेशकालकर्तृत्वे चोदनातः समानानामेकवाक्यचोदितानां एकतन्त्रत्वं भवति। यथा दर्शपूर्णमासयोः। यथा च चित्रायामिष्टौ' इति भाष्यानुसारेण चित्रोदाहरणं गृहीत्वा शंकरभट्टैः किञ्चिदुक्तमिति ज्ञेयम्। **के.**)

* **पशुपुरोडाशादयः** अन्यार्थैरेवाङ्गैः उपक्रियमाणाः न स्वाङ्गान्युपसंगृह्णन्ति, न च तद्धान्या किञ्चिद्वैगुण्यं भवति इति प्रसङ्गलक्षणे (१२) प्रतिपाद्यते। **वा.** ३।६।३।१० पृ. १०३६. * **पशुपुरोडाशादयः** आश्रयिणः पदार्थाः अदृष्टार्थाः, न तु देवतासंस्कारार्थाः। देवताऽऽश्रयात्तु देवतागतं तदपूर्वमिति गम्यते। **भा.** ४।१।७।१८-२०. * **पशुपुरोडाशादीनां** हविर्निर्वापः हविर्धानशकटाभ्यां भिन्ने शकटे, न तु हविर्धानशकटयोरन्यतरस्मिन्। १२।१।७।१४-१६. **मीको.** पृ. १७८६ 'ज्योतिष्टोमे इष्ट्यादौ०' इत्यत्र द्रष्टव्यम्। * **पशुपुरोडाशादौ** देवतादेः गुणत्वेन प्रतीतस्यापि प्रयोजनाकाङ्क्षायां प्राधान्यमिष्यते। **भाट्ट.** ३।४।८ पृ. ३१८.

* **पशुपुरोडाशतन्त्रस्य** प्रसङ्गः अग्निचयने अनुनिर्वाप्येषु देवसुवां हविरादिषु। १२।३।२।३-८. **मीको.** पृ. ३८३ 'अनुनिर्वाप्याधिकरणम्' इत्यत्र द्रष्टव्यम्।

* **पशुपुरोडाशता** च (सौत्रामण्याम्) ग्रहाणां श्रूयते— 'नैतेषां पशूनां पुरोडाशा विद्यन्ते, ग्रहपुरोडाशा ह्येते पशवः' इति। (पशुदेवतावन्तः पुरोडाशा न सन्ति, अन्यदेवत्यास्तु सन्त्येव)। **भा.** ८।२।१।९.

⌛ **पशुपुरोडाशन्यायः**। अग्नीषोमीयपशुपुरोडाशयागः पशुदेवतासंस्कारकः॥

पशावपीति चेत्। १०।१।९।१९॥

भाष्यम्— अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः। 'आ सोमं वहन्त्यग्निना प्रतितिष्ठन्ति, तौ संभवन्तौ यजमानमभि संभवतो वरुणपाशाभ्यां वा एषोऽभिधीयते, यो दीक्षितो यदग्नीषोमीयं पशुमालभते, वरुणपाशाभ्यामेव मुच्यते' इति। तत्रेदं समामनन्ति— 'अग्नीषोमीयस्य वपया प्रचर्य अग्नीषोमीयं पशुपुरोडाशमनुनिर्वपति' इति। तत्र संदेहः किं पुरोडाशयागः आरादुपकारकः, उत देवतासंस्कारार्थः इति। किं तावत् प्राप्तम्? ततः प्रयाजाधिकरणे पराजितोऽपि हेतुः केन चिदपरेण विशेषेण पुनरनुप्राप्यते इति पुनरुपदिश्यते 'पशावपीति चेत्'। इति चेत् पश्यसि किमारादुपकारको देवतासंस्कार इति, पशावपि आरादुपकारकः स्यात्। एतद्धि कर्मणां प्रसिद्धं कार्यम्। अग्नीषोमीयमिति च गुणभूतदेवताकः तद्धितशब्दो भवति। पशावपि तद्धित एव शब्दो वाक्यशेषेण बलवता ज्वलनवचनो व्यपदिश्यते, न नियोगतस्तद्वचनः पशुपुरोडाशे। अतः प्रसिद्धेः आरादुपकारकत्वम्।

टुप्— यस्य प्रधानभूता देवता तस्य धर्मा एव न प्राप्नुवन्ति। तत्र 'अनिरुक्तः स्विष्टकृत्' इति दर्शनं नोपपद्यते। कथं (धर्माः) न प्राप्नुवन्ति? उच्यते। विकृतौ

सादृश्येन धर्मप्राप्तिः विसदृशयोस्तु अग्नीषोमयोः (कथं धर्मप्राप्तिः? इत्यभिप्रायः काक्वा व्यञ्जनीयः। किं वैसादृश्यमित्याह—) प्रकृतौ गुणभूतयोः (अग्नीषोमयोः) धर्मा विहिताः, विकृतौ प्रधानभूतयोः इति विसदृशम् (वैसादृश्यमित्यर्थः)। अयमभिप्रायः परिचोदयतः।

न, तद्भूतवचनात्। २०॥

भाष्यम्— नेति प्रतिषेधकः शब्दः। 'आ सोमं वहन्ति, अग्निना प्रतितिष्ठन्ति' इत्यर्थवादवचन एषः। यद्यर्थवादवचनात् अन्या पशौ देवता, अन्या पुरोडाशयागे इति गम्यते, अर्थवादवचनादेव सैवेत्यवगन्तव्या। एवं ह्याह— 'यद्देवत्यः पशुः तद्देवत्यः पशुपुरोडाशः' इति। तस्मात् अर्थवादसाम्ये देवतासंस्कार इति गम्यते।

लिङ्गदर्शनाच्च। २१॥

भाष्यम्— इतश्च पश्यामः संस्कारकर्म पशुपुरोडाश इति। कुतः? लिङ्गमपि एतमर्थं दर्शयति। 'इन्द्राय वज्रिणे वृषभमालभेत' इत्यस्य पशोः पुरोडाशस्य क्रमे संप्रतिपन्नदेवताकं याज्याऽनुवाक्याद्वयं समाम्नातम्। 'इन्द्रं स्तुहि वज्रिणं स्तोमपृष्ठम्, स्तुहि शूरं वज्रिणं सुप्रतीतम्' इति च। तत् संस्कारपक्षेऽवकल्पते नान्यथा। तस्मात् पशुदेवतासंस्कारार्थः पुरोडाशयाग इति।

गुणो वा स्यात् कपालवद् गुणभूतविकाराच्च। २२॥

भाष्यम्— विशेषविवक्षया पुनस्तमेव हेतुं व्यपदिशति। वाशब्देन पक्षं व्यावर्तयति। गुणः स्यात् देवता; एवमारादुपकारकत्वप्रसिद्धिरनुग्रहीष्यते। अनेकगुणभावश्च कपालवत् भविष्यति। यथा कपालं श्रपणेऽपि तुषोपवपनेऽपि। एवं अग्नीषोमावपि अभिन्नौ पशुयागे पुरोडाशयागे च गुणभूतौ भविष्यतः। एवं च सति दार्शपौर्णमासिकयोः अग्नीषोमयोर्गुणभावेन यागे द्वारभूतयोः धर्मः आम्नातः, इह गुणभूतयोरेवाविरोधेन भविष्यति। इतरथा प्रधानभूतयोः अन्यकार्ययोर्न प्राप्नुयात्। दृश्यते च अनिरुक्तः स्विष्टकृदिति। तस्मादपि आरादुपक्रिया। अपिच सौत्रामण्यां आश्विनसारस्वतसुत्रामदेवताकेषु पशुषु ऐन्द्रवारुणसावित्राः पुरोडाशाः पशुप्रकरणान्नोत्कृष्यन्ते। संस्कारपक्षे उत्कृष्येरन्। छिद्रापिधानार्थतायाश्च उक्तमर्थवादत्वम्। तस्मादपि आरादुपक्रिया।

अपिवा शेषभूतत्वात् तत्संकारः प्रतीयेत स्वाहाकारवत्। २३॥

भाष्यम्— अपिवेति पक्षव्यावृत्तिः। नारादुपकारकं कर्म। तत्संस्कारः प्रतीयेत देवतासंस्कार इति। कुतः? शेषभूतत्वात् देवतायाः प्रयोजनवत्त्वम्। तस्माद्यथा स्वाहाकारयजिर्निष्प्रयोजन इति देवतासंस्कारः प्रतीयते एवमिहापि।

अङ्गानामर्थसंयोगात्। २४॥

भाष्यम्— अर्थेन प्रयोजनेन संयोग इह गम्यते वाक्येन। तेन नारादुपकारकम्, आरादुपकारकेभ्यः सामवायिकान्यङ्गानि वरीयांसि भवन्ति इति। यदुक्तं गुणभूतदेवताकेन तद्धितशब्देन निर्देश इति, प्रधानभूतदेवताकेनापि एवंजातीयकेन शब्देन संबन्धे विधीयमाने निर्देशो भवति। अपिच दृष्टकार्यमदृष्टात् बलीयः। तस्मात् संस्कारकर्मेति। (यद्यपि इदं पृथक्सूत्रत्वेन क्वापि नोपलभ्यते, तथापि भाष्यस्वारस्यात् पृथगेवेति सिध्यति इति अस्माभिः पृथक् कृतमिति ज्ञेयम्। **के.**)

व्यृद्धवचनं च विप्रतिपत्तौ तदर्थत्वात्। २५॥

भाष्यम्— इतश्च संस्कारकर्मेति। सौत्रामण्यां पशुपुरोडाशदेवताविप्रतिपत्तौ व्यृद्धवचनं देवतासंस्कारे एवावकल्पते। 'यद्वै सौत्रामण्यां व्यृद्धं तदस्याः समृद्धम्, यदन्यदेवत्याः पशुपुरोडाशा भवन्ति, अन्यदेवत्याः पशवः' इति।

गुणेऽपीति चेत्। २६॥

भाष्यम्— एवं चेत् पश्यसि संस्कारपक्षे व्यृद्धवचनं अवकल्पते इति। तन्न। संस्कारपक्षेऽपि व्यृद्धवचनं नावकल्पते। नहि तत्र किञ्चित् व्यृद्धम्। विप्रतिपन्नदेवताकैरेव पुरोडाशैः तत् कर्म समृद्धतरं भवति। एवं ह्याह— 'यदन्यदेवत्याः पुरोडाशा भवन्ति अन्यदेवत्याः पशव इति तदस्यां समृद्धं भवति' इति। यश्चोभयोः पक्षयोर्दोषः, न तमेकश्चोद्यो भवति। यथैव

हि संस्कारपक्षे व्यृद्धवचनमर्थवादः एवमितरस्मिन्नपि पक्षे अर्थवादो भविष्यति ।

नासंहानात् कपालवत् । २७ ॥

भाष्यम्— नैतदेवम् । भवदीये पक्षे न किञ्चिदपि हीनम् । यथैव एकेन कपालेन तुषेषु उप्यमानेषु अन्येषां कपालानां न किञ्चिद्धीयते, एवमन्यया देवतया पशुपुरोडाशयागे निर्वर्त्यमाने न किञ्चित् पशुदेवतायां हीयते। तत्र अव्यृद्धे एव व्यृद्धवचनं भवति । मदीये तु पक्षे देवताप्रकाशनमङ्गभूतं हीयते । अन्यदेतदुच्यते यत् व्यृद्धमपि समृद्धं भवतीति । अहीने तु व्यृद्धशब्दे उच्चरिते न शब्दार्थो गृहीत इति ।

ग्रहाणां च संप्रतिपत्तौ तद्वचनं तदर्थत्वात् । २८ ॥

भाष्यम्— इतश्च संस्कारकर्मेति । सौत्रामण्यां संप्रतिपन्नदेवताकेषु ग्रहेषु तद्वचनं भवति पुरोडाशवचनम् । 'नैतेषां पशूनां पुरोडाशा विद्यन्ते ग्रहपुरोडाशा ह्येते पशवः' इति । न तावन्न विद्यन्ते । विप्रतिपन्नदेवताकैस्तु संस्काराभावमालोच्य एवमुच्यते । ग्रहा एषां पुरोडाशाः 'ग्रहपुरोडाशा ह्येते' इति । किं तेषां पुरोडाशैः सामान्यम् ? यदेते देवतासंस्कारार्थाः । यदि पुरोडाशा अपि देवतासंस्कारार्थाः, एवमेतदवकल्पते । तस्मात् संस्कारपक्षः एव श्रेयान् ।

ग्रहाभावे च तद्वचनम् । २९ ॥

भाष्यम्— एवं श्रूयते 'नैतस्य पशोर्ग्रहं गृह्णन्ति पुरोडाशवानेष पशुः' इति पशुपुरोडाशवत्ताहेतुकं ग्रहाभावं ब्रुवन् ग्रहपुरोडाशयोः एकार्थतां दर्शयति । तत्र ग्रहस्य देवतासंस्कारार्थता विज्ञाता । यदि पुरोडाशोऽपि देवतासंस्कारार्थः, एवमेतदवकल्पते ।

देवतायाश्च हेतुत्वं प्रसिद्धं तेन दर्शयति । ३० ॥

भाष्यम्— इतश्च पश्यामः संस्कारकर्मेति । एवं ह्याम्नायते— 'अग्निभ्यः कामेभ्यः पशव आलभ्यन्ते, कामा वा अग्नयः, आग्नेयाः पुरोडाशा भवन्ति, आग्नेया हि पशवः' इति । पशुदेवताहेतुकान् पुरोडाशान् ब्रुवन् देवतासंस्कारार्थतां पुरोडाशानां दर्शयति ।

अविरुद्धोपपत्तिरर्थापत्तेः शृतवद् गुणभूतविकारः स्यात् । ३१ ॥

भाष्यम्— अथ यदुक्तं गुणभूतयोर्धर्मः प्रधानभूतयोरग्नीषोमयोर्न स्यादिति । उच्यते । अविरुद्धा प्रधानभूतयोरपि अग्नीषोमयोर्धर्माणामुपपत्तिः । कुतः ? अर्थापत्तेः । प्रधानभूतावपि प्राकृतं कार्यं यागनिर्वृत्तिं कुर्वाणौ द्वारभूतौ इति धर्मैर्योक्ष्येते शृतवत् । यथा 'शृते चरुम्' 'दधंश्चरुम्' इति प्रदानार्थे दधिशृते प्रणीताकार्यं कुर्वाते इति धर्मैर्युज्येते । न च दोषो भवति ।

स द्व्यर्थः स्यादुभयोः श्रुतिभूतत्वाद् विप्रतिपत्तौ तादर्थ्याद् विकारत्वम् । ३२ ॥

भाष्यम्— अथ यदुक्तं ऐन्द्रवारुणसावित्राणां पुरोडाशानां सौत्रामणीप्रकरणात् उत्कर्षः प्राप्नोति । तत्रेदमुच्यते । स द्व्यर्थो यागो देवतासंस्कारार्थः छिद्रापिधानार्थश्च । उभयोरर्थयोः श्रुतिभूतत्वात् । अतो विप्रतिपन्नदेवताकेषु छिद्रापिधानार्थतया प्रकरणादुत्कर्षो न भविष्यति । तत्प्रकरणगत एवायं विकारो भविष्यतीति ।

तस्याप्युक्तमर्थवादत्वम् । ३३ ॥

भाष्यम्— इति यदुक्तम्, तत्रेदमुच्यते ।

विप्रतिपत्तौ तासामाख्याविकारः स्यात् । ३४ ॥

भाष्यम्— एवं तर्हि अनेन प्रकारेण प्रकरणादनुत्कर्षः । देवतासंस्कारस्तावत् प्रकरणादुत्कर्षेण न शक्यते बाधितुम् । तत्र सौत्रामण्यां संप्रतिपन्नदेवताका एव चोदकेन पुरोडाशाः प्राप्ताः । तत्र इन्द्रादयः शब्दाः पशुदेवतानामेव वाचकाः । कथम् ? एकदेशा हि तेषामिमे वर्णान्तरसहिता उच्चारिता इति गम्यते । शक्नुवन्ति हि एकदेशाः समुदायिनः समुदायं प्रत्याय्य समुदायार्थान् गमयितुम् । यथा गाव्यादयः । यथा च सरस्वतीदेवताके निगदे 'सरस्वति देवनिदो निबर्हय प्रजां विश्वस्य बृसयस्य मायिनः ।' (ऋसं. ६।६१।३) इति बृसयशब्दो बृहच्छब्दार्थं गमयति । किमर्थं पुनरेवं कल्प्यते ? यतो देवतान्तराणि पशुदेवतासंस्कारार्थेषु यागेषु प्रत्याय्यमानानि अनर्थकानि भवेयुः । तस्मात् पशुदेवतानां आख्याविकाराः पुरोडाशदेवताशब्दा इति ।

अभ्यासो वा प्रयाजवदेकदेशोऽन्यदेवत्यः । ३५ ॥

भाष्यम्— संस्कारपक्षे एव वाशब्दो युक्तिं व्यावर्तयति, न पक्षम् । न वा आख्याविकारः । संस्कारपक्षे अन्यथाऽनुपपद्यमाने आख्याविकारा भवन्ति । अनाख्याविकारेष्वपि संस्कारपक्षः अवकल्पते एव । कथम् ? अभ्यास एव पुरोडाशयागस्य भविष्यति । तत्र हि चोदकेन पशुदेवता च प्राप्नोति पुरोडाशश्च । पशुदेवताया अन्यत् द्रव्यं विधीयते ग्रहः । पुरोडाशस्य अन्या देवता । यागस्तु अविकृत एव तिष्ठति । स पशुदेवतासंबद्धश्चैव कर्तव्यो ग्रहसंबद्धश्च । तदुभयमपि अनभ्यस्ते यागे न संभवति इति अर्थादभ्यस्यते यागः । तस्य एकदेशः अन्यदेवत्यः प्रयाजवत् । तद्यथा पशौ पञ्चानां प्रयाजानां चोदकेन प्राप्तानामेकादशसंख्या विधीयते । सा च अन्तरेणाभ्यासं नावकल्पते इति अभ्यस्यन्ते प्रयाजाः । तेषामभ्यस्यमानानां एकदेशे अन्या देवताः दुरः उषासानक्ता इत्येवमादयः । एवमिहापि अभ्यासः पुरोडाशयागस्य । तस्मादनुत्कर्षः संस्कारपक्षेऽपीति ।

टुप्— अस्यां (सौत्रामण्याम्) चोदकेन पशुदेवता (पशुपुरोडाशयागे) प्राप्नोति, पशुपुरोडाशश्च । तत्र पशुदेवतायां द्रव्यान्तरम् (ग्रहः) विधीयते, पशुपुरोडाशस्य च देवताऽन्तरम् (इन्द्रादि विधीयते)। यागस्तु अविकृत एव (अवतिष्ठते) यथाऽभ्युदितेष्ट्याम् । सः (यागः) अभ्यस्यते यथा सोमयागः ।

इमे सूत्रभाष्ये अयुक्ते । अस्यां सौत्रामण्यां (प्रधानभूताः) पशुयागा आम्नायन्ते, देवतासंस्कारद्वारेण च (तेषु चोदकेन) पशुपुरोडाशाः प्राप्नुवन्ति । तत्र वाचनिकोऽयं देवताविधिः । तस्मादप्राकृतकार्याः (पशु–) पुरोडाशयागाः वचनसामर्थ्यात् (भवन्ति)। यो ग्रहो देवतासंबद्धः, स पशुपुरोडाशयागेन न संबध्यते। कथम् ? अविपरिवर्तमानत्वात् । कथमविपरिवृत्तिः ? अविधानात्। कथमविधानम् ? (उत्तरम्–) अत्र (विकृतौ) उपकारा अतिदिश्यन्ते (न पदार्थाः,) यत्र (तु तेषाम्) प्रकरणम्, तत्र विपरिवृत्तिः । तच्च प्रकृतौ (एव)। अभ्युपेत्य ब्रूमः । अस्तु (नाम पुरोडाशयागस्य इह–) प्रकरणं विपरिवृत्तिश्च, तथापि (ग्रहदेवतासंबन्धेन) न संबध्यते (प्रमाणाभावात्) नैतत् सोमयजिना तुल्यम् । तत्र ('सोमेन यजेत' इति) सोमविशिष्टो यागो विधीयते (ऐन्द्रवायवादीनि च) ग्रहणानि सोमयागद्रव्यस्य संस्कारकाणि । तानि (च सर्वाणि) ग्रहणानि प्रकरणेन गृह्यन्ते । अर्थात् तत्र यागाभ्यासः । इह (तु पशु–) पुरोडाशस्य ग्रहदेवताया वा न कश्चित् संस्कारः (क्रियते)। तस्मात् यागान्तरम् (इदम्) । ननु अभ्युदितेष्टिवत् भविष्यति । नैतत् (अभ्युदितेष्ट्या) तुल्यम् । तत्र निमित्ते (चन्द्राभ्युदये सति देवता–) विभागो विधीयते, यागस्तु विद्यते एव । न तु इह तथा (विभागवचनम्), येन अभ्युदितेष्ट्या तुल्यं स्यात् । ननु प्रत्यक्षः पुरोडाशयागः (क्लृप्तः इत्यर्थः), आनुमानिकस्तु (कल्प्यस्तु) ग्रहदेवतासंबन्धेन (यागः)। तस्मान्न (क्लृप्तहानेन) यागान्तरम् (कल्प्यम्)। नैतदेवम् । यदि तस्मिन्नेव यागे केन चित् प्रकारेण निवेशः स्यात्, तथा यागान्तरं न कल्प्येत (न तु संभवति निवेशः) यदि च प्रत्यक्षे यागे सति आनुमानिको न लभ्येत (ततः) दीक्षणीयादीनि अधर्मकाणि भवेयुः । यदि च (सौत्रामण्याम्) एको यागः, तथा (सति) एक एव विध्यन्तः प्राप्नोति । (चोदयति–) द्वे चात्र द्रव्ये (अस्यार्थः— यागभेदेऽपि समानतन्त्रत्वात् प्रयाजादयः सकृदेव कर्तव्याः, द्रव्यसंस्काराणामेव तु आवृत्तिः । ते चैकस्मिन्नपि यागे द्रव्यभेदात् आवर्तन्ते एव इति काऽत्र अनिष्टापत्तिः इति) । उच्यते । तत्र एकस्य (एव द्रव्यस्य) संस्कारः प्राप्नोति, द्वितीयस्य (तु द्रव्यस्य) चोदक एव न (प्राप्नोति । किञ्च–) एकस्य (एव) च प्रदानं भवति, द्वितीयं तु प्रोक्षणादिवत् अदृष्टार्थं (प्राप्नोति) देवतयोस्तु यदि (एकत्र) निवेशः (स्यात्) विकल्पेन स्यात् । (यत्तु प्रयाजवत् स एव यागोऽभ्यस्तः देवताऽन्तरेण युज्यते इति, तदपि न तुल्यमित्याह–) प्रयाजानुवादेन च संख्या विधीयते, (अतः) तत्र यागान्तराशङ्कैव नास्ति । (इह तु यागान्तरमिति वैषम्यम्) । [आनन्दाश्रमीयः टुप्टीकापाठस्तु तन्त्ररत्नेन न संगतः इति न स्वीकृतः]।

शा-- अग्नीषोमीये पशौ पशुपुरोडाशः किं पशोरारादुपकारकः, उत पशुदेवतासंस्कार इति संदेहे आरादुपकारक इति प्राप्तम् । नैवम् ' **दृष्टे स्मरणसंस्कारे सति नादृष्टकल्पना । पशुधर्मैश्च संदंशात् तदङ्गत्वं सुनिश्चितम् ॥** '

सोम-- पूर्ववदिहापि देवताऽन्तरत्वात् असंस्कारकत्वं इत्युत्थितेः **संगतिः** ।

वि-- ' उपकारी संस्कृतिर्वा पुरोडाशः पशूदितः (पशौ उदितः उक्तः) ।, तद्धितोक्त्या द्वयोर्देवभेदादुपकृतिर्मता ॥ , संदंशान्निश्चितेऽङ्गत्वे दृष्टोऽर्थः स्मृतिसंस्कृतिः । देवान्तरं चेद् विकृतावग्नीषोमनिवर्तनम् ॥ '

भाट्ट-- दैक्षे ' अग्नीषोमीयस्य वपया प्रचर्याग्नीषोमीयं पशुपुरोडाशमनु निर्वपति ' इति श्रुतः पशुपुरोडाशयागोऽपि नोद्देशांशेन पशुदेवतासंस्कारकः, उभयत्र तद्धितान्तनिर्देशाविशेषेण उभयोरपि आरादुपकारकत्वावसायात् । **न च** पशुयागस्य ज्योतिष्टोमाङ्गत्वेन फलवत्वात् अस्यैव तदीयदेवतासंस्कारकत्वमिति **वाच्यम्** । सोमप्रकरणाविशेषेण तत्रापि विनिगमनाविरहात्, पशुपुरोडाशसमाख्यायाः पश्वङ्गकत्वेन तदुत्तरकालकत्वेन वा उपपत्तेः । न च वपाऽभ्यासमात्राङ्गत्वं तवाप्यभिप्रेतम् । अतः पूर्ववत् आरादुपकारक एवायम् । एवं च सौत्रामण्यां आश्विनसारस्वतसुत्रामदेवताकेषु पशुषु ' ऐन्द्रवारुणसावित्राः पुरोडाशा भवन्ति ' इत्यादिना अपूर्वा विधीयमाना नोत्कृष्टा भवन्ति । इतरथा यत्र तद्देवत्याः पशुयागाः तत्रोत्कर्षापत्तिः । **इति प्राप्ते,** वाचनिकपशुयागधर्मसंदष्टत्वात् अस्य तदङ्गत्वावगतेः तदीयदेवतासंस्कारकत्वमेव । अत एव पशुपुरोडाशसमाख्याऽपि पश्वङ्गत्वेनैव उपपन्ना, इति न तस्य वपाऽभ्यासमात्राङ्गत्वापत्तिरपि आशङ्क्या । पशुपदस्यापि स्ववाक्ये श्रुतत्वात् न वपाऽभ्यासांशे वैमृधन्यायाशङ्काऽपि । अतश्च ' वपया प्रचर्य ' इत्ययं कालार्थ एव संयोगः क्रमार्थो वा इत्यन्यदेतत् ।

यत्तु सौत्रामण्यां अन्यदेवताकानां उत्कर्षापत्तिरिति, तन्न । इन्द्रादिदेवत्यपशुषु न्यायादेव (' यद्देवत्यः पशुः तद्देवत्यः पुरोडाशः ' इति न्यायात्) तत्तद्देवत्यपुरोडाशसिद्धेः विधिवैयर्थ्यात् । अतश्च तद्वाक्ये न पशुपुरोडाशयागोद्देशेन देवताऽन्तरविधिः , तथात्वे पुरोडाशपदे तद्द्रव्यकयागलक्षणाऽऽपत्तेः । किन्तु पुरोडाशोद्देशेनैव अभ्युदितेष्टिवत् । तत्र च यागापेक्षायां योग्यतयैव पशुपुरोडाशयागस्यैव अतिदेशप्राप्तस्य संबन्धः, अन्यस्य पुरोडाशद्रव्यकत्वाभावात् । अतस्तस्य कार्यग्रस्तभावेन प्राप्तस्यापि वाचनिकदेवताऽन्तरसंबन्धात् प्राकृतकार्यमात्रबाधेऽपि तस्य अप्राकृतकार्यान्तरकल्पनया तत्रैव निवेशात् नोत्कर्षः ।

यानि तु सौत्रामणीप्रकरणे एव तत्तत्पशुदेवत्यानि ' आश्विनं गृह्णाति ' इत्यादिना सुरापयोद्रव्यकाणि ग्रहणानि विहितानि, तेषु ऐन्द्रवायवादिग्रहणेष्विव यागापेक्षायां अतिदेशप्राप्ते पशुपुरोडाशयागे एव देवताविशिष्टग्रहणसंस्कृतद्रव्यविनियोगविधिः नान्यत्र, आश्विनादिदेवत्यत्वस्य अन्यत्र असंभवात् । प्रधानभूतपशुयागेषु च उत्पत्तिशिष्टपश्ववरोधेन द्रव्यान्तरनिवेशानुपपत्तेः । अतो विभिन्नद्रव्यदेवतासंबन्धद्वयात् उत्पन्नवाक्यशिष्टात् प्रयाजैकादशत्वन्यायेन पशुपुरोडाशयागस्य अभ्यासः संपद्यते । तत्र च आश्विनादिदेवत्यस्य प्राकृतमेव कार्यम्, ऐन्द्रादिदेवत्यस्य तु (अश्व्यादिदेवत्यस्य, इन्द्रादिदेवत्यस्य तु इति पाठस्तु युक्तः) अप्राकृतं इति **सूत्रभाष्यकारयोरभिप्रायः । वार्तिककारस्य** तु न तावत् सुराऽऽदिद्रव्यस्य पशुपुरोडाशे विनियोगः संभवी, तस्य एतद्विध्यभावे देवताऽन्तरावरुद्धत्वेन आश्विनादिदेवत्यत्वस्य तत्र प्रकृतौ विकृतौ वा अप्रसिद्धेः । वक्ष्यमाणरीत्या तत्र पुरोडाशद्रव्यकत्वस्यापि औपदेशिकत्वेन सुराऽऽदिद्रव्यस्य निवेशानुपपत्तेश्च । नापि अतिदेशप्राप्तप्रयाजादौ निवेशः, तत्र अङ्गभूतक्लृप्तदेवताऽवरोधेन ग्रहणाङ्गभूतदेवतायाः प्रसङ्गेन उपकारकत्वानुपपत्तेः । अतो गुणात्कर्मान्तरमेव प्राकृतपशुपुरोडाशकार्यापन्नं दर्शपूर्णमासप्रकृतिकं विधीयते । न चैवमावाहनमन्त्रेण देवतास्मरणेऽपि स्वाहाकारादिमन्त्रेण दार्ढ्यार्थं पुनः स्मरणवत् पशुपुरोडाशस्यापि पुनःकरणापत्तिः, प्रकृतौ आम्नानाद्यनुरोधेन तथा कल्पनेऽपि विकृतौ आघारमन्त्रेण प्राकृतमन्त्रबाधस्येव इहापि पशुपुरोडाशबाधोपपत्तेः । **ननु** एवं पशुपुरोडाशस्य सौत्रा-

मण्यामप्राप्तेः कथं तत्र ऐन्द्रादिदेवताऽन्तरविधिः, कथंचित् प्राप्तावपि वा उपकारपृष्ठभावेनैव पदार्थप्राप्तेः । प्रकृते च देवतान्तरविधानेन प्राकृतोपकारस्य वस्तुतः अनतिदेशात् तत्पृष्ठभावेन पशुपुरोडाशयागस्य अतिदेशासंभवात् कथं तत्र देवतान्तरविधिः **इति चेत्** , अत एव ऐन्द्रादिवाक्ये द्रव्यदेवताविशिष्टप्राकृतपशुपुरोडाशयागस्यैव गृहमेधीये ' आज्यभागौ यजति ' इतिवत् अप्राकृतकार्यार्थतया विधेयत्वा(न)ङ्गीकारात् । न च तद्वदिह पशुपुरोडाशयागस्यैव प्रत्यभिज्ञाऽभावः ' यद्वै सौत्रामण्यां व्यृद्धं तदेव समृद्धम् , यदन्यदेवत्याः पशुपुरोडाशाः अन्यदेवत्याः पशवः ' इत्यर्थवादस्यैव प्रत्यभिज्ञापकत्वात् । अतः अप्राकृतकार्ये एव पशुपुरोडाशाः, सुराऽऽदियागास्तु कर्मान्तरमेव प्राकृतकार्यापन्नम् । अत एव ' नैतेषां पशूनां पुरोडाशा विद्यन्ते, ग्रहपुरोडाशा ह्येते पशवः ' इति लिङ्गमपि पुरोडाशाः तज्जन्यदेवतास्मरणानि न विद्यन्ते, अपि तु ग्रहजन्यान्येव तानि इति व्याख्येयम् ।

मण्डन-- ' पशोः पुरोडाश उपस्करोति । '

शंकर-- ' नैवं पशुपुरोडाशः । ' ११. (संनिपाती) ।

* ज्योतिष्टोमे ' तीर्थे स्नाति ' इत्यत्र तीर्थस्नानस्य प्रकरणादेव आरादुपकारकत्वं प्राप्तं **पशुपुरोडाशन्यायेन** दृष्टरूपमलापाकरणार्थत्वलिङ्गेन बाधित्वा क्रतुपुरुषधर्मत्वम् । **भाट्ट.** ३।४।९.

* **पशुपुरोडाशयागः** । इदं दृष्टादृष्टोभयार्थं द्रव्यसंस्कारकं संनिपत्योपकारकं क्रत्वर्थं प्रवृत्तिरूपं वैदिकं कर्म । **बाल.** पृ. ८३-८४. * पशुपुरोडाशयागः पशुयागीयदेवतासंस्कारकः । १०।१।९।१९-३५. **मीको.** पृ. २५१८ ' पशुपुरोडाशन्यायः ' इत्यत्र द्रष्टव्यम् ।

* **पशुपुरोडाशयागादिः** प्रसङ्गी पश्वङ्गस्य प्रयाजादेः स्वोपकारिणोऽपि अप्रयोजकः । **बाल.** पृ. १०८.

* **पशुपुरोडाशयागादिक्रियाया** एकस्याः संनिपत्योपकारित्वसंभवे अनपेक्षितानेकादृष्टकल्पनाऽऽपादकस्य आरादुपकारित्वस्य अयुक्ततैव । **सु.** ३।७ पृ. ६७.

* **पशुपुरोडाशस्थानं** वपाप्रचारात् परतः । अङ्गैरपि तस्य तत्स्थानैरेव भवितव्यं प्रधानदेशत्वात्तेषाम् । **भा.** १२।३।२५.

* **पशुप्रकृतिलिङ्गानि** आलभतिवत्त्वं प्राणिद्रव्यकत्वं सुत्याकालत्वं पशुगणत्वमित्यादीनि । **बाल.** पृ. ११९ .

* **पशुप्रभवगतिमद्**-द्रव्यकत्वं इष्टिप्रकृतिलिङ्गम् । **बाल.** पृ. ११९.

* **पशुप्रयुक्तं गोदोहनं** स्वतन्त्रपशुकामनायामेव कर्तव्यम् । **भाट्ट.** ४।१।२ वर्णकं ३.

* **पशुप्रयोजकत्वं** शकृल्लोहितयोर्नास्ति अग्नीषोमीये पशौ । ४।१।१२।२७.

* **पशुबन्धः** ज्योतिष्टोमोपकारकः । **वा.** १।२।१।४. * ' **पशुबन्धस्य** यज्ञक्रतोः षड् ऋत्विजः ' इति कर्तॄणां नियमविधिः । अर्थापत्त्या तु पाक्षिकी प्राप्तिः (अध्वर्युः प्रतिप्रस्थाता ब्रह्मा होता आग्नीध्रः मैत्रावरुणश्च) । **वि.** ४।२।९. * **पशुबन्धेषु सर्वेषु सर्वेष्टिषु च नारिष्ठहोमाः**, तेषु च स्वाहाकारः । **भा.** ८।४।५।१८.

* **पशुबन्धयाजी** सर्वान् लोकानभिजयति । **भा.** १।२।१।४.

* **पशुमन्ति** त्रीणि सवनानि कर्तव्यानि । तत्रेदं वचनम् ' वपया प्रातःसवने चरन्ति पुरोडाशेन माध्यंदिने सवने अङ्गैस्तृतीयसवने ' इति । **टुप्.** १२।२।१२।३२. * **पशुमत्सु** चातुर्मास्येषु परिधिरुभयधर्मा । तत्र यूपपरिधिधर्मविरोधे परिधिधर्म एव कर्तव्यः, न यूपधर्मः । सत्वक्त्वम् उपशयत्वं च परिधिधर्मः । यूपधर्मश्च तक्षणम् , उच्छ्रयणम् , निखननमिति । १२।२।११।२७-२९. * पशुमत्सु चातुर्मास्येषु परिधिः परिधिधर्मा यूपधर्मा चेति उभयधर्मा स्यात् । तत्र अविरुद्धाः यूपधर्माः यवमतीभिः अद्भिः प्रोक्षणम्, अञ्जनम्, परिव्याणमिति । परिधिधर्माः इध्मसंनहनम् , संमार्जनम् , जुह्वा अञ्जनम् , अभ्याश्रावणमिति । १२।२।१०।२६. * पशुमत्सु चातुर्मास्येषु ' परिधौ पशुं नियुञ्जीत ' इति यूपधर्मः पशुनियोजनं परिधौ कर्तव्यम् । ९।२।१२ । परिधिश्चायं मध्यमः स्थूलः । परिधेश्च तक्षणोच्छ्रायौ न कर्तव्यौ । अञ्जनादयस्तु कर्तव्या एव । प्रैषे तु ' यूपायाज्यमानाय ' इत्येव ब्रूयात् , न तु ' परिधयेऽज्यमानाय ' इति । **वि.** ९।२।१३.

* **पशुयागः** वपापुरोडाशाङ्गप्रचारात्मकः । **सु.** पृ. ६०. * **पशुयागेषु** मनोतामन्त्रः अग्निदेवत्य एव, न तत्र पशुदेवताया ऊहः । मनोतान्यायः । १०।४। २१।४३.

* **पशुयागदिनेऽपि** अग्निहोत्रहोमः सायंतनः नौत्तरवेदिके, दैवात् पशुकर्मणः उत्कर्षे तु औत्तरवेदिके एव । **संकर्ष.** ३।२।२४. **मीको.** पृ. ८६ 'अग्निहोत्रहोमः' इत्यत्र द्रष्टव्यम् ।

* **पशुयूपक्रमाधिकरणे** (पशुसोमाधिकरणे २।२। ६।१७–२०) न्यायोपोद्बलितवचनस्य न्यायविरुद्धवचनतः प्राबल्यं भाष्यकारैरेव वर्णितम् । **संकर्ष.** २।२।९.

* **पशुवत् ।** यथा पशौ भिन्नकालेषु अपि एकदेशेषु 'वपया प्रातःसवने चरन्ति, पुरोडाशेन माध्यन्दिने, अङ्गैस्तृतीयसवने' इति न अङ्गानामावृत्तिर्भवति तद्वत् । ११।२।३।१४ । यथा पशौ सासदश्ये श्रूयमाणे न दार्शपौर्णमासिकी तत्र प्रवृत्तिर्विप्रतिषिध्यते, वाचनिकत्वात् सासदश्यस्य । **भा.** ८।४।५।१४.

* **पशुविकृतिषु** 'द्यावापृथिव्यां धेनुमालभेत, मारुतं वत्सम्, ऐन्द्रमृषभम्' इत्यत्र गोत्वजातिमन्तः एवैते पशवः, न तु अजत्वजातीयाः । १०।२।२९।६९. (धेनुः नवप्रसूतिका । अत्रैकजननक्रियानुयोगिप्रतियोगिनः माता च पुत्रश्च पिता च धेनु–वत्स–ऋषभशब्देन ग्राह्याः । ते च गोत्वजातिमन्त इत्युक्तमेव । **के.**) ।

* **पशुशब्दं** आकृतिवचनं शृङ्गिणि पुच्छवति लोमशे चतुष्पदि द्रव्यविशेषे उपचरन्ति । **भा.** २।२। ६।१७. * **पशुशब्दस्य** नियतलिङ्गत्वेन स्त्रियामपि पुंलिङ्गस्यैव प्रयोगः । **सु.** पृ. १४१४.

* **पशुशीर्षोपधाने** यदन्तरालमुत्पद्यते तत्पूरणार्थमिष्टका न निर्मातव्याः, किन्तु सिकताभिः पूरयितव्यम् । **संकर्ष.** २।१।४.

* **पशुसंज्ञपनमध्वर्युगणस्थेनैव** कार्यम् । **संकर्ष.** १।१।१५. **मीको.** पृ. ३६० 'अध्वर्युगणस्थेनैव॰' इत्यत्र द्रष्टव्यम् ।

* **'पशुसप्तदशत्वस्य** न यागेयत्तया विना । सिद्धिरस्तीति चार्थेन सिद्धः संदिग्धनिर्णयः ॥' **वा.** ३।१।१।१ पृ. ६५०.

* **'पशुसवनीयेषु विकल्पः स्यात्॰'** इत्यत्र द्वादशे उक्तम्— सवनीयपशौ मैत्रावरुणकर्तृकात् 'अग्निमद्य होतारमवृणीतायं सुतासुती यजमानः' इत्यग्नीषोमीयात् अनतिदिष्टात् (अतिदिष्टात्) सूक्तवाकप्रैषात् तन्त्रिणि सवनीयहविरङ्गानां मैत्रावरुणरहितानां प्रसङ्गोपकारित्वे मन्त्रतः कर्तृतश्च विशेषग्रहणमस्ति इति । **बाल.** पृ. १४८.

पशुसवनीयेषु विकल्पः स्याद् वैकृतश्चेदुभयोरश्रुतिभूतत्वात् । १२।२।१२।३०॥

पशुसवनीयेषु सवनीये पशौ सवनीयेषु पशुपुरोडाशेषु च प्रसङ्गे विकल्पः स्यात् । पञ्च प्रयाजा एकादश प्रयाजा वा कार्या इति भावः । वैकृतश्चेत् पशुः वैकृताश्चेत् पुरोडाशाः तदा इत्थम् । वस्तुतस्तु वैकृता एव ते सर्वे न संशयः । कुतो वैकृताः सर्वे ? उभयोः पशुपुरोडाशयोः अश्रुतिभूतत्वात् अङ्गानां अश्रुतेः अश्रवणात् । चोदकगृहीताङ्गकत्वादुभयोः । तस्मात् पशुः सवनीयपुरोडाशाश्च इत्युभयोर्मध्ये कस्य प्रसङ्गः कश्च प्रसङ्गी इत्यत्र विकल्पः इति पूर्वः पक्षः ।

पाशुकं वा, तस्य वैशेषिकाम्नानात्, तदनर्थकं विकल्पे स्यात् । ३१ ॥

वाशब्दः विकल्पपूर्वपक्षं व्यावर्तयति । पाशुकं तन्त्रं सवनीयपुरोडाशेषु प्रसज्यते, न विकल्पः । तस्य पशोः वैशेषिकः धर्मः आम्नातः सूक्तवाकप्रैषः । विकल्पे तु सति तत् वैशेषिकधर्माम्नानं अनर्थकं स्यात् । आम्नानसामर्थ्यात् नित्योऽसौ । तस्मात् पाशुकं तन्त्रं पुरोडाशेषु प्रसज्यते इति सिद्धान्तः ।

पशोश्च विप्रकर्षस्तन्त्रमध्ये विधानात् । ३२ ॥

इतश्च पाशुकं तन्त्रं पुरोडाशेषु प्रसज्यते इत्याह । पशोः तन्त्रस्य विप्रकर्षः श्रूयते– 'वपया प्रातःसवने चरन्ति, पुरोडाशेन माध्यंदिने सवने, अङ्गैस्तृतीयसवने' इति । तस्य तन्त्रस्य मध्ये सवनीयपुरोडाशानां विधानात् असंशयं पाशुकं तन्त्रं पुरोडाशेषु प्रसज्यते, न विकल्पः इति सिद्धान्तः । **के.**

* **पशु–(अग्नीषोमीय–सवनीय)साधारण्यं** रशनाधर्माणाम् । ३।६।१०।३१.

* **पशुसोमयोः** प्रदेयप्रकृतित्वेनैव साधनता । **सु.** पृ. ७९७.

पशुसोमाधिकरणम् । 'अग्नीषोमीयं पशुमालभते', 'सोमेन यजेत' इति आलभनं यागश्च अपूर्वं कर्म विधीयते ॥

द्रव्यसंयोगाच्चोदना पशुसोमयोः प्रकरणे ह्यनर्थको द्रव्यसंयोगो नहि तस्य गुणार्थेन । २।२।६। १७ ॥

भाष्यम्— ज्योतिष्टोमे श्रूयते–– 'यो दीक्षितो यदग्नीषोमीयं पशुमालभते' इति । तत्रेदमामनन्ति 'हृदयस्याग्रेऽवद्यति अथ जिह्वाया अथ वक्षसः' इति । तथा 'सोमेन यजेत' इति, तथा 'ऐन्द्रवायवं गृह्णाति', 'मैत्रावरुणं गृह्णाति', 'आश्विनं गृह्णाति' इत्येवमादि । तत्र संशयः, किमवद्यतिगृह्णातिचोदितानां कर्मणामेव आलभतियजती समुदायस्य अनुवदितारौ, अथ अपूर्वयोः कर्मणोर्विधातारौ इति । किं तावत् प्राप्तम् ? समुदायस्येति । कुतः ? ये इमे आलभतियजतिभ्यां कर्मणी विधीयेयातामिति चिन्त्येते, पूर्वमेव ते अवद्यतिगृह्णातिभ्यामवगमिते । न च अवगमितोऽर्थो विधीयते । हृदयादींस्तु पशुशब्देन अनुवदति, सोमशब्देन च रसम् । तस्मात् 'सोमेन यजेत' इत्यनुवादो यजतिः । यजेत स्वर्गकामो वसन्ते वसन्ते इति फलगुणसंबन्धार्थः । 'पशुमालभेत' इति च आलभतिरग्नीषोमसंबन्धार्थः । अपि च 'दशैतानध्वर्युः प्रातःसवने ग्रहान् गृह्णाति' इति समुच्चयो दृश्यते । तथा 'आश्विनो दशमो गृह्यते तृतीयो हूयते' इति च क्रमः । यदि च अपूर्वौ यागौ विधीयेते, तत्र ऐन्द्रवायवादिभिर्देवता विधीयेरन्, ता एकार्थाः सत्यो विकल्प्येरन्, यथा 'खादिरे बध्नाति' 'पालाशे बध्नाति' 'रोहितके बध्नाति' इति । तत्र क्रमसमुच्चयदर्शने नोपपद्येयाताम् । अथ पुनरस्मिन् समुदायवचने यजतौ सम्यगेतदवक्लृप्तं भवति । तस्मात् समुदायानुवादौ । एवं प्राप्ते, ब्रूमः । अपूर्वयोः कर्मणोः विधानचोदने पशुसोमयोः । कुतः ? सोमशब्दः क्षीरिण्यां लतायां प्रसिद्धो न रसे । आकृतिवचनो हि सोमशब्दो न व्यक्तिवचनः । तथा शृङ्गिणि पुच्छवति लोमशे चतुष्पदि द्रव्यविशेषे पशुशब्दं आकृतिवचनमुपचरन्ति । न च एवमाकृतिकद्रव्याः प्रकृता यागा विद्यन्ते, येषामिमौ समुदायस्यानुवदितारौ भवेयाताम् । **ननु** पशुविकारो हृदयादिः पशुशब्देन अग्नीषोमसंबन्धार्थमनूद्यते । **नैतदेवम्** । पशुरग्नीषोमीयो भवति इत्येतावदुच्यते, नायं प्रकृतो हृदयादिः पशुरिति । तत्र यदि लौकिकस्य पशोर्ग्रहणम्, ततो मुख्यः पशुशब्दः । यदि हृदयादेः, ततो जघन्यो विकारसंबन्धेन । तथा सोमशब्दोऽपि विकारसंबन्धेन अनुवादः स्यात् । तस्मात् अपूर्वे कर्मणी विधीयेयातां नानुवादौ । अथ ऐन्द्रवायवादिषु प्रकृतेषु यागेषु लता विधीयेतेति । उच्यते । न सा शक्या वाक्येन ऐन्द्रवायवी ज्ञातुम् । श्रुत्या हि रसः ऐन्द्रवायवः । तस्मात् द्रव्यसंयोगवचनः प्रकृतेषु यागेष्वपि सत्सु विधातुं अनुवदितुं वा न शक्नुवन् अनर्थकः स्यात् । तस्मादपूर्वकर्मणी विधीयेयाताम्, न प्रकृतानामनुवादौ इति ।

वा— पशोः दुष्प्रतिपादनतरत्वात् पूर्वाभिधानम् । द्वौ चात्र शब्दौ समुदायानुवादत्वेन आशङ्क्येते पशुशब्दः तदग्नीषोमसंबन्धानुमितश्च यजिः । ईदृशं हि एतद्वाक्यं श्रुतानुमितैकदेशनिष्पन्नम्, यत् 'अग्नीषोमीयेण पशुना यजेत' इति । तत्र किं हृदयादीनां पशुशब्दः अनुवादः अवद्यत्यनुमितानां यागानां च यजिः, उत अपूर्वः पशुः यागश्च विधीयते, तत्र इतरे गुणविधयः इति संदिह्यते । तथा ऐन्द्रवायवादिवाक्यैः द्रव्यदेवतासंबन्धानुमिता यागाः तद्गतश्च सोमरसः किं यजतिसोमशब्दाभ्यामनूद्यते किंवा द्रव्ययुक्तं कर्म विधीयते इति । 'किमवद्यतिगृह्णातिभ्यां चोदितानाम्' इति (भाष्यम्) । अनयोः यागपर्यायत्वाभावात् तत्संबन्धानुमितानां तद्गताख्यातप्रत्ययविहितानां वा इत्येतत्प्रदर्शनार्थं तद्भाष्यम् । आलभतिरपि च तदनुमितयज्युपलक्षणार्थः । अथवा अवद्यतौ नैव यागानुवादः इत्युपन्यस्यते । कथं तर्हि ? तदाक्षितस्य संस्पर्शनस्य आलभतिरनुवादः तद्-

द्वारेणैव च प्रत्यवदानं देवतासंयोगात्, तावतां च यागानामनुमानम्, उत पशुसंयुक्तः एको यागोऽनुमीयते इति। तथा सोमेऽपि अयमेव यागो यद्देवतोद्देशेन द्रव्यग्रहणमिति। तथा सति यथाश्रुतेनैव भाष्येण संदेहोपन्यासः।

तत्र पौर्णमासीवदेव समुदायानुवादत्वम्। तथाहि **' यथाऽऽग्नेयादिवाक्यानां न प्राग् यागानुमानतः। स्वार्थपर्यवसायित्वं तथा सोमेऽपि गम्यताम्॥ '** नहि ऐन्द्रवायवं इत्यादिद्रव्यदेवतासंयोगः अननुमिते यागे निराकाङ्क्षी न भवति। न च अपरिपूर्णं वाक्यं वाक्यान्तरमाकाङ्क्षति, येन अनुमानवेलायाम् ' सोमेन यजेत ' इत्ययमनुप्रविशेत्। एतद्विहितस्य वा देवताविरहात् अरूपस्य सतस्तैः देवता विधीयते। यदा तु तैः कल्पितो यजिः तदा नैव यागस्य यागान्तरं रूपं भवति इति बलात् प्रकृतानुवादत्वमापद्यते। यश्चात्र पक्षे विशिष्टविध्याश्रयणदोषः स भवत्पक्षेऽपि अविशिष्टः, सोमद्रव्यकयागविधानात्। अपि च, तव इह च, ऐन्द्रवायवादिवाक्येषु च। मत्पक्षे तु तेष्वेव केवलेषु इति विशेषः। किञ्च, **' यादृशं द्रव्यसंबद्धं भवान् कर्म विधित्सति। तादृशस्याविधेयत्वमनन्तरमुदाहृतम्॥ '** एकत्रैव ईदृशे गुणे श्रूयमाणे विधिशक्तिः संक्रामति इति अग्निहोत्रे (२।२।५) अभिहितम्। अतो न कर्मानुवादबुद्धिरपैति इत्यनुवादत्वं यजेः। तत्र सोमशब्देन द्रव्यमेव गृह्णातिना सामान्याक्षिप्तं नियम्यते। अथवा ' सोमं क्रीणाति ' ' सोममभिषुणोति ' ' सोमं पावयति ' इत्यादिभिः प्राकरणिकैर्गुणवाक्यैः सोमरसे कल्पिते गृह्णातिचोदनाः प्रवृत्ताः इति सोमो न विधीयते। ततश्च स्वाभाविककरणत्वयुक्तयागसामानाधिकरण्यात् ' तत्प्रख्यं चान्यशास्त्रम् ' (१।४।३।४) इति नामधेयी भवति। ननु ज्योतिष्टोमः इत्यपरं नामधेयमस्त्येव। यदि इदमपि अवगम्यते किं नो बाध्यते? तथा च याज्ञिकानां व्यवहारेषु नामद्वयमुपलभामहे। समस्तवाक्यानुवादस्य तु तदेव प्रयोजनम्, यत् प्रयोगवाक्यगतैकत्वोपजननं नाम। तस्मादनुवाद इति। **भवेदत्र** द्रव्यदेवतासंयोगादेवम्, पशौ तु ' वत्समालभेत ' इत्येतत्सदृशेन देवतारहितहृदयादिद्रव्यमात्रसंयोगिना अवद्यतिना कथं यागविधानम्, कथं वा हृदयाद्यनुवादः पशुग्रहणेन इति वक्तव्यम्। उच्यते। **' यथैव पशुसामान्ये मन्त्राच्छागः प्रतीयते। तथैव हृदयादीनां ममासौ प्रकृतिर्मतः॥ '** हृदयादिभिः प्रकृतिद्रव्ये अपेक्षिते मन्त्रवर्णाच्छागे लब्धे तदन्तर्गतं पशुत्वं तावदनूद्यते। तत्र तु देवतायां विहितायां यागो विधीयतां नाम। अथवा ' सांनाय्यं वा तत्प्रभवत्वात् ' इत्यनेनैव न्यायेन अयमवद्यतिः सारूप्यात् सांनाय्यावद्यतिप्रकृतिः। स च दर्शपूर्णमासयागद्रव्यसंस्कारार्थः प्रसिद्धः। तत्र यदि हृदयादीनि यागद्रव्याणि, ततः तत्संयोगभाञ्जि भवन्ति, नान्यथा। तेन यथैव पूतीकानामभिषवसंबन्धे श्रूयमाणे तदर्हत्वान्यथाऽनुपपत्त्या यागसंगतिः अश्रूयमाणाऽपि गम्यते, तथा अत्रेत्युत्प्रेक्ष्यमाणे यागमनुमाय तदनुपपत्तेर्यागोऽप्यस्तीति गम्यते, तथा अनुमितानां च प्रतिद्रव्यमवस्थितानां समुदायोऽनूद्यते। साधारणश्चायं तवापि आनुमानिकयागाभ्युपगमः इति न एतेन अस्मत्पक्षदौर्बल्यम्। सोमयागैकत्वे तुल्यार्थानां इन्द्रवाय्वादीनां विकल्पे सति क्रमसमुच्चयदर्शनं नोपपद्यते। पश्य, **' यथैकबन्धनार्थत्वात्पलाशखदिरादयः। तत्संबन्धे विकल्पन्ते यागेऽस्मिन् देवतास्तथा॥ '** मम तु भिन्नयागविषयत्वात् देवतानां यागानां च अदृष्टार्थानां युगपदेकशब्देन फले विधानात् उपपत्स्यते। पशावपि ' हृदयस्याग्रेऽवद्यति, अथ जिह्वायाः ' इति क्रमदर्शनम्, ' एकादश वै पशोरवदानानि ' इति च समुच्चयदर्शनं सदपि नोपात्तम्, एकयागत्वेऽपि समस्तपशुसाधनत्वेन तदुपपत्तेः। नहि हृदयादिषु असमुच्चीयमानेषु उत्पत्तिवाक्यश्रुतेन समस्तेन पशुना इष्टं स्यात्। यन्मात्रं तत्र वचनान्तरवशेनापनेष्यते, तन्मात्रव्यतिरिक्तेन सर्वेण यष्टव्यं इति न्यायः। सोमे तु नैवं समस्तचोदनोत्पत्तौ अस्ति इति उदाह्रियते। तस्मात् समुदायानुवादौ। इति प्राप्ते, अभिधीयते। **' प्रकृतप्रत्यभिज्ञानं वाक्ये यत्रोपलक्ष्यते। तत्र स्यादनुवादत्वं न चात्रैवं प्रतीयते॥ '** यदि पौर्णमासीवत् अशेषरूपप्रत्यभिज्ञानं भवेत्, ततोऽनुवादः कल्प्येत। यदि वा यजिमात्रस्य अनुवादत्वमिष्यते, ततः परित्यक्तविशेषणोऽनुवादः इत्यवधार्येत। अत्र पुनः प्रकृता हृदयादिद्रव्यका रसद्रव्यकाश्च

यागाः। इमौ च पशुसोमद्रव्यकौ। न चैवं सति प्रत्यभिज्ञानमस्ति इत्यनुवादत्वासंभवः। **तत्र एतत् स्यात्** विकारेषु प्रकृतिवदुपचारात् हृदयादिष्वेव रसे च पशुसोमशब्दौ वर्त्स्येते इति। **तन्न,** विना कारणेन लक्षणाऽनाश्रयणात्। विस्पष्टे हि परशब्दसामानाधिकरण्ये सति अनन्यथासंभवे च जघन्यवृत्तिः शब्दो भवति। न चैतदुभयमप्यस्ति। शक्यं हि मुख्यं पशुसोमद्रव्यं यागान्तरं विधातुम्। न च प्रकृतेषु अनिविशमानौ एतौ शब्दौ नोपपद्येते। तेन यद्यपि तावत् अवद्यतिगृह्णातिभ्यां चोदिता यागाः, तथापि कर्मान्तरत्वप्रसङ्गः। कस्मात् तेष्वेव यागेषु स्वद्रव्यप्रकृत्यपेक्षेषु पशुसोमौ न विधीयेते, तत्राह– **' श्रुत्या हि रस ऐन्द्रवायवः '** इति। पशुस्तावत् देवताविधिपरत्वात् अनुत्पत्तिवाक्ये सति अशक्य एव विधातुम्, इति नैव उपन्यस्यते। सोमलताऽपि वाक्यविधेया श्रौतरसविरोधे सति न संबध्यते। **कथं** पुनः अनुपात्तद्रव्यविशेषेषु ऐन्द्रवायवादिविधिषु रसस्य श्रौतत्वम्, अधिकारलभ्यो ह्यसौ, ततश्च वाक्यप्राप्ता लतैव बलीयसी स्यात्। **उच्यते। ' श्रुत्यैव द्रव्यसंबन्धो देवतातद्धितैः कृतः। अधिकारेण तस्यैव केवलेष्टा विशेष्यता॥ '** ' गुणश्चापूर्वसंयोगे ' इत्यत्राधिकरणे विस्तरेणाभिधास्यते। यथा तद्धितश्रुत्या वाक्यप्रकरणादिलभ्यस्य विशेषस्यैव अस्य–शब्दवाच्यस्य देवतासंबन्धे कृते कोऽसौ द्रव्यविशेष इत्यपेक्षायां वाक्यप्रकरणादिभिः तदवाप्तिः केवला, न तु तैरेव देवतासंबन्ध इति।

किञ्च **' उत्पत्तिवाक्यशिष्टश्च रसो, वाक्यान्तराल्लता। प्रकृतापेक्षिणस्तेन दुर्बलैषाऽवगम्यते॥ '** ततश्च गुणादपि ते भेदः प्राप्नोति। शक्यपरिहारं तु इदम्। कुतः? **' यथैवाष्टाकपालादौ श्रौतेऽपि सति वाक्यतः। व्रीह्यादयो विधीयन्ते तथा सोमो विधास्यते॥ '** विधीयमानं हि दुर्बलं विरुद्धं बाध्यते नानुगुणम्। अनुगुणश्च सोमो रसस्य प्रकृत्यपेक्षिणः तादर्थ्येन संबन्धात्। तद्यथा ' आग्नेयोऽष्टाकपालः ' इति श्रुतिविहितेऽपि अष्टाकपाले सति व्रीहियवौ विधीयमानौ न विरुध्येते, पुरोडाशापेक्षितप्रकृतिरूपत्वात्। नहि व्रीहीन् गृह्णन् अष्टाकपालं न करोति। तेन चात्र न कर्मान्तरता। तथाऽत्र न सोमे गृह्यमाणे रसः परित्यक्तः इत्यविरोधात् पूर्वत्रैव संभवन् न गुणो भेदकः स्यात्। **अपि च** सिद्धान्तेऽपि एतत् तुल्यम्। अनभिषुतलताऽऽदानानभ्युपगमात्। तत्र यथा तव रसप्रकृतिर्लता भवति, तथा पूर्वपक्षेऽपि भविष्यति। **अपि च** विरुद्धतरं तवापद्यते। कथम्? **' उत्पत्तिवचनात् सिद्धा लता चेद्यागसाधनम्। न सा वाक्यान्तरैः पश्चाद् रसीभवितुमर्हति॥ '** रसस्य प्रकृत्या विना निष्पत्त्यभावात् आकाङ्क्षितः प्रकृतिसंबन्धो वाक्यान्तरेणापि क्रियमाणो न विरुध्येत। प्रकृतेस्तु अविकृताया एव सामर्थ्यादनपेक्षिता विकारापत्तिः उत्पत्तिवाक्यविरोधिनी न युक्ता वाक्यान्तरैः कर्तुम्। तस्मात् व्रीहियवमुद्रामुद्रितत्वात् अनुद्घाट्यैव गुणविधित्वं समुदायानुवादमात्रं निराकार्यम्, पशौ तन्मात्रेणापि सिद्धेः। सोमे तु व्रीहिवाक्यतुल्यत्वाशङ्कामधिकां निराकर्तुं उत्तरं सूत्रं प्रस्तोतव्यम्।

अथवा भङ्क्त्वैव पूर्वोपपत्तिं उत्तरयैव निर्णयः। पूर्वसूत्रेण वा पूर्वपक्षं परिगृह्य उत्तरं तु सूत्रं तुशब्दस्थानचशब्दं उत्तरपक्षे योजयितव्यम्। **कथं पुनः** द्रव्यसंयोगात् इत्यनेन पूर्वपक्षोऽभिधीयते। **तदुच्यते।** ' हृदयस्याग्रेऽवद्यति ' ' ऐन्द्रवायवं गृह्णाति ' इत्येताः किं दध्यादिवत् गुणार्थाः श्रुतयः, ततश्च उत्तरयोरुत्पत्तिचोदनार्थत्वम्, उत एता एव कर्मचोदना इति। किं प्राप्तम्? नैताः पूर्ववत् गुणार्थाः पुनःश्रुतयः, किन्तु उत्पत्तिचोदनाः। कथम्? द्रव्यसंयोगात् हृदयादिद्रव्यसंयोगात् तैरेव वाक्यैः चोदना पशुसोमयोः। किं कारणम्? इतरथा हि प्रकरणेन हृदयादिसंयोगो यागाङ्गत्वं प्रतिपद्येत। न चासौ तस्य गुणार्थेन संभवति, उत्पत्तिवाक्यशिष्टपशुलताविरोधात्। **अथवा** पूर्वोक्तेन न्यायेन अन्यत एव पशुसोमयोः सिद्धत्वात् अस्मिन् प्रकरणे पुनरनर्थको द्रव्यसंयोगः त्वत्पक्षे भवेत्। मम तु सोमशब्दो नामधेयम्, अग्नीषोमीयवाक्यं च देवताविधानार्थमिति न किञ्चिदनर्थकम्। तस्मात् अवद्यतिगृह्णातिसंयुक्तैव यागोत्पत्तिचोदना स्यात्।

अचोदकाश्च संस्काराः । १८ ॥

भाष्यम्— एवं तावत् प्रकृतेषु सत्स्वपि नानुवादौ इत्युक्तम् । अथेदानीं प्रकृता एव यागा न सन्तीत्युच्यते । कुतः ? अचोदकाः संस्काराः । न च ऐन्द्रवायवादिभिः यागा विधीयन्ते । तेन ग्रहणमुपकल्पनमात्रं दृष्टार्थम् । उपकल्प्यमाने तु देवतासंकीर्तनमदृष्टाय । अतः ‘ ऐन्द्रवायवं गृह्णाति ’ इति इन्द्रवायुभ्यां संकल्पयति इति एतावदुक्तं भवति । तत्र यागमन्तरेण संकल्पयति इत्येतन्न युज्यते इति यागः कल्प्येत । स एवाम्नातो यागो यस्मिन् सति संकल्पोऽवकल्प्येत । तस्मान्न ‘ ऐन्द्रवायवं गृह्णाति ’ इत्येवमादिभिः यागा विधीयेरन् । प्रकृतानां यागानामभावात् न समुदायशब्दो यजतिः । तथा आलभतिशब्द इति ।

वा— नैव एतौ समुदायानुवादौ, ‘चोदना वाऽप्रकृतत्वात् ’(२।२।४।१०) इत्येतस्मादेव हेतोः । कथं प्रकृता न संभवन्ति ? यतः अवघातिगृह्णातयः न यागानां चोदकाः, किं तर्हि ? संस्कारमात्रविषयः, तन्मात्रपर्यवसानात् । तन्मात्रपर्यवसायिनि वाक्ये निष्प्रमाणकत्वात् न अश्रुतयागकल्पनं शक्यम् । एवं हि स कल्प्यमानः कल्प्येत, ‘ देवतोद्देशेन गृहीतं द्रव्यं न यावत् यागेन संबध्यते न तावत् तद्देवत्यं कृत्यं कृतं भवति ’ इति । तत्र यदैव अन्यथाऽनुपपत्त्या यागं कल्पयितुमारभते, तदैव संनिहितः प्रत्यक्षो यजिः अविशेषात् सर्वान् द्रव्यदेवतासंयोगान् उपपादयितुमुपतिष्ठन् यागान्तरकल्पनाप्रमाणं निरुणद्धि । तस्मिंश्चाप्रतीते कस्य समुदायानुवादो भविष्यति ? । यदुक्तं आग्नेयादिवत् नापरिकल्पिते यजौ वाक्यान्तरापेक्षेति । तत्र ब्रूमः । ‘ **पुंव्यापारनियोगेन वाक्यं सर्वत्र पूर्यते । तदलाभे त्वपूर्णत्वं तल्लाभे वाक्यसंगतिः ॥** ’ ‘ आग्नेयोऽष्टाकपालो भवति ’ इति न यागादन्यः पुंव्यापारः प्रतीयते इति प्राक् तदनुमानात् अपरिपूर्णं वाक्यम् । इह तु ‘ ऐन्द्रवायवं गृह्णाति ’ इति ग्रहणभावनायां पुरुषो नियुज्यते । तत्र प्रागपि यज्यनुमानात् अस्ति विधेर्विषयः इति समाप्यते वाक्यम् । इदं तु अन्यत्, यत् ततः परमपि किञ्चिदपेक्ष्यते । सर्वमेव हि वाक्यं स्वार्थे पर्यवसिते अर्थान्तरापेक्षां न जहाति, न च तावता तदसमाप्तं भवति । या तु असौ अपेक्षा, सा वाक्यान्तरेण पूरयिष्यते इत्यवगमात् न वाक्यान्तरसंबन्धं न सहते । तेन यज्यनुमानवेलायां प्रतिवाक्यम् ‘ सोमेन यजेत ’ इत्यस्योपस्थानं न विरुध्यते । ‘ आग्नेयोऽष्टाकपालः ’ इति तु भवतेः अपुरुषव्यापारात्मकत्वात् प्राक् यजेः न किञ्चित् विहितं न किञ्चित् प्रतिषिद्धम्, इति असमाप्ते वाक्ये, वाक्यान्तरे चानपेक्षिते यजिः अनुमीयमानः न वाक्यान्तरगतः संबध्यते इति वैधर्म्यम् । **अथ** यदुक्तं उत्पत्तिशिष्टयोः पशुसोमयोः न वाक्यान्तरगता विकारापत्तिर्युक्ता इति, **तत्र ब्रूमः** । ‘ **द्रव्येणात्यन्तभिन्नेन सह चिन्त्यं बलाबलम् । हृदयादिरसद्वारमङ्गत्वं पशुसोमयोः ॥**’ यद्यत्र औत्पत्तिकौ पशुसोमौ परित्यज्य अत्यन्तव्यतिरिक्तं किञ्चित् द्रव्यं विधीयते; ततो विरोधः स्यात् । इह तु पशुनैव हृदयादिद्वारेण यागः साध्यते, सोमेन च रसद्वारेण । न च इतिकर्तव्यतासंबन्धे कश्चिद्विरोधः । पशुसोमौ हि यागसाधनत्वेन चोद्यमानौ इतिकर्तव्यतामाकाङ्क्षतः । तत्र च रसहृदयादिनिष्पत्तिद्वारेण इत्येवं कथम्भावः पूर्यते । तेन अनुग्राहकत्वात् न तत्कल्पने विरोधापत्तिः । **यत्तु** प्राकरणिकैः क्रयादिवाक्यैरेव प्राप्तत्वात् इह द्रव्यसंयोगोऽनर्थक इति । **तत्रापि** ‘ अचोदकाश्च संस्काराः ’ इत्येवोत्तरम् । नहि ते विधयः सोमस्य पशोर्वा चोदकाः । किं तर्हि ? तयोरेव संस्कारकाः । तेन चोदितस्य द्रव्यस्य यथाकथञ्चित् उपादानेन यागसाधनत्वे प्रसक्ते क्रयोपात्तेनैव अभिषवादिसंस्कृतेन च साधयितव्यमिति विधीयते । न च मन्त्रवर्णस्यात्यन्ताविहितच्छागप्रापणसामर्थ्यम्, पशुचोदनाविहितस्य तु संदेहापनयनमात्रमुपयुज्यते । न चावघातिः एकान्तेन यागमनुमापयति, विनाऽपि तेन खण्डनमात्रतया लोके वेदे चोपपत्तेः । द्रव्यदेवतासंयोगस्तु न कथञ्चित् यागाद्विना सिध्यति इत्यनुमानवैषम्यम् । न च सांनाय्यावघातिः प्रकृतौ चोदितः, अर्थगृहीतत्वात्, यतस्तद्धर्मप्राप्तिरपि स्यात् । न चास्य यागद्रव्यार्थत्वं इतिकर्तव्यता, येन तदतिदिश्येत । न च ईदृशेऽर्थे सामान्यतोदृष्टं प्रक्रमते । पूतीकाभिषवफलचमसभक्षयोस्तु वाक्यप्रकरणाभ्यां तादात्म्यविज्ञानं इत्यसमानता । सोमवाक्येऽपि विशिष्टविधौ प्रत्यक्षोपात्ते सति आनुमानिकासंभवादेव अतुल्यत्वम् । न च ऐन्द्रवायवादिवाक्येऽपि अष्टाकपालादिवाक्येष्विव गुणवाक्यत्वेऽपि वाक्यभेदः । कुतः ? ‘ **विधेयानेकभावेऽपि देवताग्रहणात्मना । क्रियाऽन्तरप्रसादेन विशिष्टविधिसंभवः ॥** ’ शक्यते हि इन्द्रवाय्वादिविशिष्टग्रहणभावनाविधिः आश्रयितुम् । अर्थप्राप्ते वा ग्रहणे समासोपात्तैकदेवताविधानमात्रमविरुद्धम् । प्रकरणलभ्यश्च प्रधानसंबन्धः, इति गुणवाक्यत्वेऽपि अदोषः । तस्मात् एषां संस्कारत्वात् अन्यतो यागमपेक्षमाणानां अविरुद्धोऽन्येन यागविधिः । एवं च सति ज्योतिष्टोमेन इत्येकवचनं मुख्यमेव भवति । न च सोमशब्दः क्लेशेन अनर्थकं द्वितीयनामत्वं प्रतिपत्स्यते । न च आघाराग्निहोत्रपूर्वपक्षसदृशः समस्तवाक्यानुवादः अनर्थकः आश्रितो भविष्यति । तेन चोदना पशुसोमयोः इति सिद्धम् ।

तद्भेदात् कर्मणोऽभ्यासो द्रव्यपृथक्त्वादनर्थकं हि स्यात् भेदो द्रव्यगुणीभावात् । १९ ॥

भाष्यम् — पशौ वृत्ता कथा दशमे पुनरुद्भविष्यति । सोमे इदानीं वर्तते, कथं क्रमसमुच्चयाविति । इन्द्रवाय्वाद्याः देवता नैवं श्रूयन्ते, इन्द्रवायुभ्यां यागो निर्वर्तयितव्यः, मित्रावरुणाभ्यां यागो निर्वर्तयितव्य इति । यदि एवमश्रोष्यन्त यागं प्रति देवता व्यकल्पिष्यन्त । केवलया हि देवतया तदा यागो निर्वर्त्यते इति विहितमभविष्यत् । अथ पुनरिमा अदृष्टार्थं गृह्णातिसंस्कारं प्रति देवता विधीयन्ते, तत्र इन्द्रवायुसंकल्पात् अन्यो मित्रावरुणसंकल्पः, तेन गृह्णातौ तत्कृताददृष्टात् अदृष्टान्तरमुत्पादयति । एवमपरेष्वपि ग्रहणेषु । तस्मात् समुच्चयः । ग्रहणं च नियतपरिमाणेषु ऊर्ध्वपात्रेषु प्रादेशमात्रेषु नियतपरिमाणेषु उदककलशेषु संस्कृतस्य दशमुष्टिपरिमितस्य कृत्स्नस्य सोमस्य नावकल्पते । यद्यपि चावकल्प्येत, तथापि नित्यवद्विहितानां देवतानां विकल्पपक्षे तावत् प्रयोगवचनो मा बाधि इति अवयवग्रहणमेव न्याय्यम् । कृत्स्नग्रहणे हि तदेव इन्द्रवायुभ्यां संकल्पितं तदेव मित्रावरुणाभ्यां इति नावकल्पेत । तस्मात् कल्पनभेदात् पृथगवस्थितः सोमः नानादेवतत्वादेव नैक्येन शक्यः कर्तुम् । न च असति देवतायागे देवताभ्यः शक्यते संकल्पयितुम् । तस्मात् अवश्यं यथासंकल्पिता देवता यष्टव्याः । तासु चेज्यमानासु ‘ ज्योतिष्टोमेन यजेत ’ इति श्रुतो यागो निर्वृत्त एव भवति, न देवतान्तरमाकाङ्क्षति । कृत्स्नेन च दशमुष्टिना सोमेन यागः श्रुतः, सोऽसति अभ्यासे नावकल्पते इति अर्थात् स गुणो भविष्यति इति अभ्यसितव्यो यागः । नहि अनभ्यस्तः सर्वाभिर्देवताभिः सर्वेण च सोमेन संपन्नो भविष्यति । तस्मिंश्चाभ्यस्यमाने क्रमसमुच्चयौ युक्तावेव भवतः । तस्मात् तयोर्दर्शनं युज्यत एवेति ।

वा-- क्रमसमुच्चययोः पशौ अपरिचोदितत्वात् वृत्ता कथा । पशोरेकहविष्ट्वं (१०।७।१।१) इत्यत्र उद्भविष्यति ! किं समस्तादवदातव्यम्, उत प्रत्यङ्गम्, उतैकस्मात् अथवा हृदयादिभ्यः परिगणितेभ्य इति । सोमे तु परिचोदनापरिहारः अभिधीयते । ‘ **वाक्येन यदि यागस्य श्रूयेरन् देवताः पृथक् । व्यकल्पिष्यन्त, सर्वास्तु युगपद्यागसंगताः ॥ यत्र वाक्येन संबन्धो निरपेक्षेण चोद्यते । तत्र तुल्यार्थवर्तित्वान्नोपपन्नः समुच्चयः ॥** ’ यदि ऐन्द्रवायवेन यजेत, इन्द्रवायुभ्यां यागं निर्वर्तयेत् इति वा श्रूयेत ततः अन्योन्यनिरपेक्षैर्वाक्यैः तुल्यार्थत्वेन ज्ञायमाना विकल्पभाजो भवेयुः । इमाः पुनर्ग्रहणसंबद्धाः श्रुताः प्रकरणेन यागसंबन्धं प्रतिपद्यन्ते । न च प्रकरणव्यापारः पर्यायः (स: ?), येन अन्योन्यनिरपेक्षाः संबध्येरन् । सर्वग्रहणेषु हि युगपत् इतिकर्तव्यतात्वेन गृहीतेषु तद्गता देवताः तन्मात्रेणापर्यवस्यन्त्यः प्रकरणिना यागेन आकाङ्क्षिताः युगपदेव संबध्यन्ते । तत्र नाम विकल्पो युज्यते, यत्र इतरेतरनिरपेक्षाः समानार्थे नियुज्यन्ते । किं कारणम् ? ‘ **प्रत्येकं हि समर्थत्वं वाक्यादेवावधारितम् । सापेक्षत्वे विपद्येतेत्येवं सर्वं विकल्पते ॥** ’ न त्विह प्रत्येकं ज्योतिष्टोमनिर्वर्तनसामर्थ्यं इन्द्रवाय्वादीनामवगम्यते, तादृग्विनियोजकाभावात् । सत्यपि च प्रत्येकं यागनिर्वर्तनसामर्थ्ये तद्विशेषज्योतिष्टोमनिर्वृत्तिः यथावचनं विज्ञायते इति नैव प्रत्येकं तुल्यार्थत्वम् । प्रत्येकं तुल्यार्थाश्च व्रीहियवादयो विकल्पन्ते । वाक्यसंयोगिनो हि ते परस्परनिरपेक्षाः

स्वेनस्वेन वाक्येन विनियुज्यन्ते। **ननु** ‘ऐन्द्रवायवं गृह्णाति’ इति वाक्यमेव विनियोजकमुपलभ्यते। अतश्च ‘मैत्रावरुणम्’ इत्यस्य पूर्वनिरपेक्षमेव देवताविधिसामर्थ्यं विज्ञायते। सत्यम्, ग्रहणं प्रति अन्योन्यनिरपेक्षा विधीयन्ते। न तु तत्रैकार्थत्वम्, अदृष्टार्थत्वात्। कथमदृष्टार्थत्वमिति चेत्, उच्यते। ‘**पूर्वं प्रधानसंबद्धं संस्कारे श्रूयते यदि। तद् दृष्टार्थं विना तेन, यदि वाऽसौ न सिध्यति॥**’ यदि हि प्रथमं यागेन संबद्धाः सत्यो देवताः निर्वापावाहनादिष्विव ग्रहणेषु पुनः श्रूयेरन्, यदि वा ताभिर्विना ग्रहणमेव न निर्वर्तेत ततस्तत्र श्रवणं दृष्टार्थं अनागतस्मृतिरूपेण कल्पेत। न तु इन्द्रवाय्वादयः प्रथमं ज्योतिष्टोमे श्रुताः। नापि तदभावेन ग्रहणं सिध्यति। तत्र एवं सत्यपि यत् देवतायुक्तं ग्रहणं कर्तव्यमिति श्रूयते, तत्र अदृष्टादृते न किञ्चित् प्रयोजनमस्ति। **ननु** च यागस्यैता देवता भविष्यन्तीति ज्ञात्वा विनाऽपि प्रथमविनियोगेन तद्विषयस्मृत्यर्थत्वं विज्ञायते। **नैतदस्ति।** कुतः? ‘**सर्वेण विधिवेलायां प्रयोजनमपेक्ष्यते। तद्वेलायामतः कल्प्यो दृष्टादृष्टार्थनिर्णयः॥**’ ‘ऐन्द्रवायवं गृह्णाति’ इत्येतद्वाक्यप्रवृत्तिकाले ‘किं प्रयोजनम्’ इत्यपेक्षा भवति। तत्र यद्यपि प्रकरणवशात् इतिकर्तव्यतात्मकस्य ग्रहणस्य यागसंबन्धः कथमपि भवति इत्यवधार्यते, तथापि देवतानामन्यसंयुक्तत्वात् अक्रियारूपत्वाच्च न प्रकरणेन यागार्थत्वं विज्ञायते इत्यवश्यं यागसंबन्धनिरपेक्षं तावत् ग्रहणं प्रति प्रयोजनं कल्प्यं इति अदृष्टकल्पनमापद्यते। तस्मिंस्तु शास्त्रवेलायां अवधारिते, यदि अनुष्ठानकाले दृष्टमपि अनुनिष्पादि भवति, केन तन्निवार्यते? न तु तेन शास्त्रप्रवृत्तिः प्रतिबध्यते। तेन प्रतिवाक्यं देवतासंयोगानामदृष्टार्थत्वात् समुच्चयः। तत्र ‘न च यत्समित्संबन्धेन क्रियते तत्तनूनपात्संबन्धेन’ इत्यनेन न्यायेन (भा. २।२।२।२ पृ. ४७२) भेदेन श्रुता देवता ग्रहणसंबद्धा नोपपद्यते यदि ग्रहणं नावर्तेत, इति प्रतिदेवतं सोमो ग्रहीतव्यः। एष तावत् सूत्रार्थः— तद्भेदात् देवतासंयोगभेदात् ग्रहणकर्मणः अभ्यासः देवतासंयुक्तग्रहणसंस्कार्यद्रव्यपृथक्त्वात् अनर्थकं हि संयोगान्तरश्रवणमननुष्ठीयमानमनर्थकं स्यात्। तेन ग्रहणस्य भेदः संस्कार्यं द्रव्यं प्रति गुणभावात्। एतद्देवतावन्ति ग्रहणानि यागप्रक्रमात्मकत्वात् न यागादृते देवतार्थं द्रव्यं संस्कर्तुं शक्नुवन्ति इत्येवमपेक्षिते भविष्यति कश्चिद्यागः, य एतानि द्रव्याणि देवतासंबन्धं आपादयिष्यतीति। यागोऽपि च अविहितदेवताकः श्रुतिलिङ्गवाक्यैः देवतामलभमानः प्रकरणस्य च ईदृशे वस्तुनि अक्रियात्मके व्यापाराभावात् ग्रहणेषु तावत् विनियोजकं भवति। तानि च अपर्यायविधानात् भिन्नादृष्टसंबन्धित्वाच्च युगपत् गृह्यन्ते, तद्वशेन देवतानामपि समुच्चयसिद्धिः। **ननु** प्रकरणगृहीतानामपि एकार्थानां पुरोडाशविभागमन्त्रप्रभृतीनामिष्यत एव विकल्पः। **सत्यमिष्टः**, न तु तत्र प्रकरणं केवलं व्याप्रियते। लिङ्गानुमितया श्रुत्या प्रत्येकं विभागाङ्गत्वे विज्ञाते दर्शपूर्णमासविभागार्थत्वमात्रं प्रकरणाद्भवति, विभागान्तरेऽपि आनर्थक्यात्। तत्र यद्यपि दर्शपूर्णमासौ समुच्चयेन गृहीतः, तथापि न विभागद्वारनिरपेक्षयोः सामर्थ्यमस्ति। यच्च द्वारं, तत् विकल्पेनावरुद्धम्, न समुच्चयगम्यम्। इह पुनर्विपरीतमेतत्। यान्येव हि द्वाराणि ग्रहणानि, तेष्वेव देवताः समुच्चिताः। तत्र प्रत्येकं ग्रहणयोग्योऽपि द्वारसमर्पणवशेन प्रवर्तमानः किमिदानीं करिष्यति?। **ननु** ग्रहणानामपि प्रत्येकं द्रव्यप्रकल्पनरूपेण देवतासमर्पणेन च प्रधानोपकारसामर्थ्यमस्ति इति विभागमन्त्रवत् विकल्पेन भवितव्यम्। भवेदेवम्, यदि पूर्वं नानादेवतः यागोऽवगतः स्यात्, ततस्तदर्थोऽयं द्रव्यप्रकल्पनभेदः इत्यवगम्यते, न तु असौ एवमवगतः, इति प्रकल्पनभेदाम्नानं अदृष्टार्थं विज्ञायते। अवश्यं च गुणात् प्रकल्पनानि भेत्तव्यानि। नहि एकस्मिन् प्रकल्पने युगपत् पर्यायेण वा देवताः संकल्पयितुं शक्यन्ते। यौगपद्यं तावत् क्रमवर्तिन्या वाचा नैव शक्यम्। अदेवताभूत एव समुदायः संकल्पितः स्यात्। नहि इन्द्रवाय्वादिसमुदाये देवतात्वं केन चिदुक्तं प्रतिपदोत्पन्नैस्तद्धितैः प्रत्येकं प्रतीयमानत्वात्। न च क्रमेणोद्देशः। कथम्? ‘**द्रव्यस्य गृह्यमाणस्य देवतोद्देशचोदना। न चैकां देवतां मुक्त्वा तदुद्देशस्य संभवः॥**’ यदि तु

प्रागूर्ध्वं वा ग्रहणात् उद्दिशेत् अचोदितमेव कुर्यात्। किञ्च ‘**एतस्या इति संकल्प उद्देशोऽत्राभिधीयते। अन्यस्मिन् क्रियमाणे च पूर्वस्तत्र विपद्यते॥**’ यद् द्रव्यं इन्द्रवायुभ्यां दातव्यमिति संकल्पितम्, तस्य त्यक्तप्रायत्वात् अनीशो यजमानः कथमिव वक्ष्यति मित्रावरुणाभ्यामेतदेव इति?। तत्रैकामुद्दिश्य देवतान्तरसंकल्पे क्रियमाणे पूर्वदेवतातः तद्द्रव्यमाच्छिन्नं स्यात्। पूर्वसंकल्पालोचनेन वा नैवोत्तरः पारमार्थिकत्वं प्रतिपद्येत इति असत्संव्यवहारमात्रमेव अनुष्ठीयेत, न चोदनार्थः। तेनावश्यं यावद्देवतं ग्रहणभेदः कर्तव्यः। किञ्च ‘**शक्यते चागृहीतेऽपि यत्र क्वचिदवस्थिते। द्रव्येऽस्मिन् देवतोद्देष्टुमित्यदृष्टार्थता विधेः॥**’ देवतोद्देशस्वत्वत्यागात्मको हि यागः, शक्यते च पूयमानावस्थेनापि सोमेन क्रयोत्तरकालं वा सर्वावस्थावियुक्तेनापि निर्वर्तयितुमिति अशेषोत्तरसंस्कारविधानमदृष्टार्थम्। यत्र तु पुरोडाशादि द्रव्यं चोद्यते तत्र यावत् अवहन्त्यादिविधानम्, तत्सर्वं तन्निष्पत्त्यर्थत्वात् दृष्टार्थं भवति। न च ग्रहचमसस्थेन सोमेन यष्टव्यमिति उत्पत्तिचोदना, लतामात्रपर्यवसानात्। तेन आत्मीयादृष्टभेदनिर्वृत्त्यर्थमपि ग्रहणानि समुच्चेतव्यानि। ‘दश मुष्टीर्मिमीते’ इति च प्रकरणे परिमाणं श्रुतम्। अतः ‘सोमेन यजेत’ इत्येतद्वचनमेव विशेष्यते ‘दशमुष्टिना सोमेन यजेत’ इति। स च नियतपरिमाणेन उदकेनाभिषुतः अल्पपरिमाणेषु भिन्नेषु ग्रहचमसेषु न ग्रहणभेदमन्तरेण शक्यते ग्रहीतुं इति भेदेन गृह्यते। तथाऽवस्थेन च यागो निर्वर्तयितव्यः। सोऽपि अनभ्यस्तः तथाऽवस्थितं न शक्नोति सर्वं संभावयितुम्, इति प्रयोजनवशेन अभ्यस्यते। तेन तत्रापि सूत्रम्। तद्भेदात् प्रकल्पितसोमभेदात् यागकर्मणः अभ्यासः स्वीकृतद्रव्यपृथक्त्वात् अशेषमत्यज्यमानं अनर्थकं स्यात्। अतः उत्पत्तौ सकृत् श्रुतस्यापि वाक्यान्तरप्रकल्पितावस्थौत्पत्तिकद्रव्यगुणत्ववशेन अनुष्ठानभेदः। तद्धि द्रव्यमवश्यं यथागृहीतमेव दातव्यम्। पुनरेकीकरणे पूर्वकृतग्रहणभेदवैयर्थ्यप्रसङ्गात्। न च यथासंकल्पिताः स्वैर्भागैः देवताः संबध्येरन्। न च त्यागकाले सर्वाः संकल्पयितुं शक्यन्ते, येनाभ्यासभीतैः सर्वोद्देशेन सकृदेव सर्वं द्रव्यं मिश्रीकृतं दीयेत। तथाकृतेऽपि च भागसंकरः प्राप्नोत्येव। प्रकल्पिते च भागनानात्वे वचनादृते अवश्यं परिहार्या संकरापत्तिः। तस्मात् यथासंकल्पितस्य प्रदानात् सर्वदेवतासमुच्चये सति उपपन्नमेतत् ‘दशैतानध्वर्युः प्रातःसवने ग्रहान् गृह्णाति’ ‘आश्विनो दशमो गृह्यते’ ‘तं तृतीयं जुहोति’ इति। तेन सिद्धमेककर्मत्वम्।

प्रयोजनं पूर्वपक्षे सोमविकारेषु एकस्यैव ग्रहस्य धर्मैः सकृदनुष्ठानेन भवितव्यम्। सिद्धान्ते तु प्रकृतितुल्यमेवानुष्ठानमिति।

संस्कारस्तु न भिद्येत परार्थत्वाद् द्रव्यस्य गुणभूतत्वात्। २०॥

भाष्यम्— यदप्युच्यते यथा ‘खादिरे बध्नाति’, ‘पालाशे बध्नाति’ इति खादिरादयः संस्कारे विकल्पन्ते, तद्वत् देवता विकल्पयिष्यन्ते इति। तच्च नैवं युक्तम्। तत्र संस्कारमभिनिर्वर्तयितुं खादिरादयः श्रूयन्ते। यदि च इन्द्रवाय्वाद्या अपि ग्रहदेवताः यागमभिनिर्वर्तयितुं श्रूयेरन्, ततः अत्रापि विकल्पः स्यात्। न तु एता यागे श्रुताः। तस्मात् समुच्चीयेरन्।

शा— ‘**ऐन्द्रवायवमित्यादिद्रव्यदैवतसंगतेः। याग एव विधातव्यो गृह्णातौ नहि देवता॥**’ त्रेधा पूर्वः पक्षः, सोमशब्देन द्रव्यं विधीयते, प्रकृतिद्रव्यं वा नामधेयं वेति। सर्वथाऽपि आलभतियजती समुदायानुवादः। इति प्राप्तेऽभिधीयते। ‘**द्रव्यान्तरेण संयोगान्नानुवादोऽवकल्पते। तेन यागविधी एतावन्ये गुणविधायिनः॥**’

सोम— दध्यादिवाक्येषु गुणाकृष्टशक्तिकत्वात् न कर्मविधिः, किन्तु कर्मानुवादेन गुणविधिः इत्युक्ते तद्वदेव पशुसोमवाक्ययोरपि न कर्मविधिः इति प्रत्यवस्थानात् **संगतिः**। यद्वा दध्यादिवाक्येषु कर्मविध्यभावेन अग्निहोत्राघारवाक्ययोः अनुवादाभावेऽपि हृदयादि-ऐन्द्रवायवादिवाक्येषु कर्मविध्यवश्यम्भावेन पशुसोमवाक्ययोः अनुवादो भवति इति प्रत्यवस्थानात् **संगतिः**।

प्रयोजनं पूर्वपक्षे ऐन्द्रवायवादिवाक्यानां यागविधायकत्वे तस्य यागस्य स्वार्थतया विनियुक्तदेवताकत्वा-

भावलक्षणाव्यक्तत्वाभावात् विश्वजिदादिष्विव ‘ अव्यक्तासु तु सोमस्य ’ इति न्यायाप्रवृत्तिः । सिद्धान्ते तु तत्प्रवृत्तिः । पशूदाहरणे तु पूर्वपक्षे यागभेदात् विकृतिषु एकस्यैव यागस्य इतिकर्तव्यताप्राप्तेः हृदयादिना तु एकेन यागः, सिद्धान्ते सर्वैः । यद्वा पूर्वपक्षे ‘ सारस्वतं मेषम् ’ ‘ ऐन्द्रमृषभम् ’ इत्यादिषु विशसनादिकमकृत्वा श्रुतमेषादिजातीयेन द्रव्येण अविकृतेनैव यागः कर्तव्यः । विकृतिषु विशसनादीनामनुपदिष्टत्वात् अभिषवादिविधिभिश्चोत्पत्तिशिष्टा लता न रसीकर्तुं शक्यते इत्यादिग्रन्थेन परंपराऽऽश्रयणे श्रुतिविरोधस्योक्तत्वेन तन्न्यायेन मेषवृषभादिष्वपि श्रुतमेषादिजातीयसाधनत्वविरोधप्रसङ्गेन विशसनादीनां चोदकतः प्राप्त्यसंभवात् । सिद्धान्ते तु प्रकृताविव विकृतावपि परंपराऽऽश्रयणेऽपि श्रुतद्रव्यस्य अविरोधात् चोदकानुसारात् हृदयादिभिः यागः इत्यादि ऊह्यम् । **सूत्रार्थस्तु**— पशुसोमवाक्ययोः द्रव्यान्तरसंयोगात् कर्मचोदनाप्रकरणे प्रकृतहृदयाद्यैन्द्रवायवादिवाक्यविहिते यागे सति हि पशुसोमवाक्ययोः द्रव्यसंयोगः अनर्थकः स्यात्, नहि तस्य गुणार्थेन संभव इति ।

वि— ‘यजत्यालभतीत्येतावनुवादौ विधी उत ।, गृह्णात्यवद्यतीत्याभ्यां विहितेऽर्थेऽनुवादिनौ ॥, नानुवादोऽपुरोवादे यज्यालभ्योरतो विधिः । ग्रहणे सोमसंस्कारोऽवदाने पशुसंस्क्रिया ॥ ’

भाट्ट— ‘ अग्नीषोमीयं पशुमालभेत ’ इति श्रुतम्, तथा ‘ सोमेन यजेत ’ इति च । तत्र आद्यविधिप्रकारस्यासंभवात् न पूर्ववत् कर्मविधित्वम् । अपि तु समुदायानुवादत्वमेव । कर्मप्राप्तिस्तु पशौ ‘ हृदयस्याग्रेऽवद्यति, अथ जिह्वायाः ’ इत्यादिभिः । अत्र हि उत्पन्नशिष्टपशुसाध्ये यागे हृदयादीनां साधनत्वानुपपत्तेः न तदुद्देशेन अवदानाख्यसंस्कारविधिः । अतो विहितानां हृदयाद्यवदानानां पशुप्रभवद्रव्यवृत्त्यवदानत्वसादृश्यात् सांनाय्यावदानप्रकृतिकत्वावगतेः सांनाय्यवदेव हृदयादीनां यागसाधनत्वस्य पूतीकवदनुमानात् यावद्-हृदयादियागा एव विधीयन्ते । तांश्च लक्षणया आलभतिना अनूद्य अग्नीषोमदेवता विधीयते । पशुपदं च हृदयादीनां छागप्रकृतिकत्वस्य मन्त्रवर्णात् प्राप्तत्वात् लक्षणया हृदयादिपरम् । अथवा हृदयादिवाक्यविहितावदानाक्षिप्तस्पर्शानेव आलभतिना शक्त्या अनूद्य पशुशब्दलक्षितहृदयादीनां प्रत्येकं देवतासंबन्धे कृते तावन्तो यागाः देवतासंबन्धकल्पिताः तेनैव विधिना विधीयन्ते । सर्वथा पशुपदं समुदायानुवादः । **तथा** सोमेऽपि ‘ ऐन्द्रवायवं गृह्णाति ’ ‘ मैत्रावरुणं गृह्णाति ’ इत्यादिवाक्यैः द्रव्यदेवतासंबन्धानुमितयागविधानं ग्रहणे देवताऽन्वयानुपपत्तेः । द्रव्यं च ‘ अण्व्या धारया गृह्णाति ’ इति प्रकृतं धारासमर्थं द्रवद्रव्यं तद्धितोपात्तम् । सोमवाक्ये तु तत्प्रकृतित्वेन सोमलताविधिः व्रीहिवत् । ‘ सोममभिषुणोति ’ इत्यादिसंस्कारविध्यन्यथाऽनुपपत्त्यैव वा ‘ अध्वर्युं वृणीते ’ इतिवत् सोमप्राप्तेः सोमपदं नामधेयम् । सर्वथा यजिः समुदायानुवादः । तत्प्रयोजनं चास्मिन् पक्षे सोमद्रव्यकयागमात्रानुवादात् अस्तुतशस्त्राणामपि फलसंबन्धः । ज्योतिष्टोमपदं च वैश्वदेववत् गौणम् । समुदायानुवादाभावे हि तद्वशात् सस्तुतशस्त्राणामेव यागानां फलसंबन्धापत्तिः । तेषामेव ज्योतीरूपस्तोमसंबन्धात् । सिद्धान्ते तु यागस्यैकत्वात् फलवाक्यस्थयजिना अभ्यासलक्षणापत्तेः विजातीययागत्वावच्छिन्नस्यैव फलसंबन्धः । ज्योतिष्टोमपदे बहुव्रीह्यर्थस्तु स्वसंबन्ध्यभ्यासघटितसमुदायाश्रयरूपः । अतः समुदायानुवादौ एतौ । **इति प्राप्ते,** पशुपदे हृदयादिलक्षणायां प्रमाणाभावात् तत्रैव विशिष्टयागविधिः । हृदयादिवाक्यैश्च हृदयाद्युद्देशेन संस्कारमात्रम् । पशोश्च न साक्षात् हविष्ट्वेन विधानम् । किन्तु विशसनावदानादिविधिरूपतात्पर्यग्राहकानुरोधेन हृदयादिप्रकृतित्वेनैव । करणत्वस्य साक्षादिव परंपरयाऽपि तात्पर्यग्राहके सति उपपत्तेः । अत एव अतिदेशप्राप्तावदानसंबन्धोऽपि हृदयादीनां हविष्ट्वसिद्ध्यर्थं तदितराङ्गानां हविष्ट्वपरिसंख्यार्थश्चेति कौस्तुभे द्रष्टव्यम् । सोमेऽपि न ऐन्द्रवायवादिवाक्ये यागविधिः, गौरवात् । किन्तु देवताविशिष्टग्रहणस्यैव तद्धितोपात्तद्रव्योद्देशेन विधिः । संभवति च देवतात्वस्य निरूपकतासंबन्धेन ग्रहणे वैशिष्ट्यायोगेऽपि ग्रहणकालीनोच्चारणकर्मीभूतशब्दवृत्तित्वसंबन्धेन ग्रहणे वैशिष्ट्यम् । अतश्च देवतायाः ग्रहणाङ्गभूताया अपि यागापेक्षायां सोमवाक्यविहितयागस्यैव देवताऽपेक्षस्य उपपादकत्वमात्रकल्पनात्

लाघवम् । सोमपदं तु संस्कारविध्यन्यथाऽनुपपत्त्या संभवत्प्राप्तिकत्वेऽपि सक्तुव्यावृत्तिफलकसोमनियमार्थं न विरुध्यते । यथा च एवं सति ग्रहणानां समुच्चयो यागस्य च प्रतिग्रहणमावृत्तिः तथा सर्वं कौस्तुभे एव निरूपितम् । **प्रयोजनं** पशुविकारे हृदयादियागाद्यन्यतमप्रकृतित्वात् नैकादशावदानगणप्राप्तिः पूर्वपक्षे, सिद्धान्ते सा इति द्रष्टव्यम् । सोमे चाव्यक्तत्वसिद्धिरेव ।

मण्डन— ‘ सोमेन (इत्यत्र) यागविधिरस्य गुणो ग्रहोक्तिः । ’

शंकर—‘ पशुसोमवचोस्तथा ’ (यज्विधिः यागविधिः) !

* **पशुसोमाधिकरणं** अभ्यासापवादत्वेन उत्थितम् । **कौ.** २।२।७।२० पृ. २३२, * पशुसोमाधिकरणं आघाराग्निहोत्राधिकरणप्रत्युदाहरणम् । २।२।६।१७ पृ. २०७. * पौर्णमास्यधिकरणा (२।२।३)पवादः **पशुसोमाधिकरणम्** । **वा.** २।१।१।१. * **पशुसोमाधिकरणे** भट्टसोमेश्वरेण शेषपरिसंख्योदाहरणमुक्तम् “ न्यायात् सर्वावयवप्राप्तावपि ‘ एकादश वै पशोरवदानानि ’ इत्यस्य अनन्यप्रयोजनत्वात् अवयवान्तरपरिसंख्याऽर्थत्वाभ्युपगमेन दाशमिकः सिद्धान्तः ” इति, (१०।७।१।१–२) तदेतदस्माभिः दशमे ‘ पशोरेकहविष्ट्वम् ’ इत्यतोऽग्रिमेऽधिकरणे दूषितम् । मिश्रा हि तत्र अस्य ‘ द्विर्द्विरवद्यति ’ इति संख्याविधिना एकवाक्यतामेवाहुः । **यदि** परं हृदयादिवाक्यानामेव ‘इमामगृभ्णन्’ इतिवत् फलतः परिसंख्यात्वं तत्रत्यभाष्यकृदुक्तं वरम्, **तदपि** विशसनेऽपि पशुप्रत्यभिज्ञानात् हृदयादिवाक्याभावे पशोरेव मध्यात् पूर्वार्धाच्च सकृदवदानं प्राप्नुयात् नावयवेभ्यः इति निरस्तम् । यत्तु तत्र मिश्रैः पशोर्विशसनेन साधनत्वायोगात् सर्वावयवेभ्योऽवदानप्रसक्तिरुक्ता, सा आपातत एव इत्युक्तं तत्रैव (अस्माभिः) । तदुक्तं आकृत्यधिकरणवार्तिके (पृ. ३०५।५) ‘ पश्वादिषु अपनीताङ्गेषु विशेषबुद्ध्यभावात् सामान्यरूपैव विशसनादिविशिष्टा बुद्धिर्दृष्टा ’ इति । **बाल.** पृ. २४–२५, * पशुसोमाधिकरणे वत्सस्यैव विनियुक्तदोहाङ्गगोद्रव्योपकारकतया ‘ वत्समालभेत ’ इत्यत्र आलम्भसंस्कार्यत्वमिति भवदेवः । पृ. ८२. * न च **पशुसोमाधिकरणे** पशुसोमयोः प्रणाड्या यागकारकत्वं कथमुक्तमिति **वाच्यम्** । तत्र प्रकृतिविकृत्योः अत्यन्तानतिरिक्ततया हृदयादिगणसोमरसात्मना साक्षादेव पशुसोमयोः यागकारकत्वसंभवेऽपि आरादुपकारकस्य स्तोत्रस्य यागे कारकत्वासंभवात् । **कु.** २।२।१२।२७, * पृष्ठस्तोत्रमेकमनेकं इति पक्षद्वयसद्भावात् एकमिति पक्षमाश्रित्य अङ्गानुरोधात् प्रधानावृत्तिरुदाहृता, बहुयागसमुच्चये एवेदमुदाहरणम्, न तु एकस्य यागस्याङ्गानुरोधादभ्यासे, इति शङ्कां पशुसोमाधिकरणे सोमोदाहरणविषयसिद्धान्तं दर्शयन् परिहरति । **परिमल.** ३।२।२।७ ब्रसू. * प्रमाणान्तरेण अर्थादिना संभवत्प्राप्तिकानां तत्तद्ग्रहाणां तत्तद्देवतासंयोगानां च तत्तद्विधिभिः पुनर्विधानस्य आरादुपकारकविधया क्रत्वर्थफलकत्वं पशुसोमाधिकरणे कौस्तुभे व्यवस्थापितम् । **भाट्ट.** १०।२।१७. * ‘ सोमेन यजेत ’ सोमपदानुवादशङ्का तु सक्तुविनियोगविधिकल्पनाव्यावृत्तिफलकतयाऽपि विध्युपपत्तौ अनुवादत्वे वैयर्थ्यापत्तेः पशुसोमाधिकरणे एव निरस्ता । **कौ.** ३।२।१७।३८. * ‘ हृदयस्याग्रेऽवद्यति ’ इत्यादीनि हृदयादिवाक्यानि तेषामवदानाख्यसंस्कारविधिद्वारा हविष्ट्वबोधकानि सन्ति इतरेषां हविष्ट्वपरिसंख्यार्थानि इत्युक्तं पशुसोमाधिकरणे कौस्तुभे । **भाट्ट.** १०।७।२.

* ऐन्द्रवायवादिविषयो यागानामचोदकाः, यतो ग्रहणलक्षणसंस्कार एवात्र चोद्यते इति **पशुसोमाधिकरणगुणसूत्रार्थः** (२।२।६।१८) । **सोम.** १०।६।१३.

पशुसोमाधिकरणन्यायः । (पशुसोमाधिकरणोक्ता युक्तिः) । **साहस्री.** ८६६.

* **पशुसोमाधिकरणव्युत्पादितः** यजिवाच्यकर्मविधिः । **सु.** पृ. ९३१.

* प्रयाजाभ्यासवत् ग्रहाभ्यासेष्वपि अनुष्ठानभेदचोदनायां धर्मग्रहणशक्तापूर्वभेदात् पशुसोमाधिकरणपूर्वपक्षवत् सिद्धान्तेऽपि सोमविकारेषु एकस्यैव ग्रहणस्य धर्मैः सकृदनुष्ठानेन च भवितव्यं इति प्रकृतितुल्यानुष्ठानं **पशुसोमाधिकरणसिद्धान्तप्रयोजनं** न सेत्स्यति । **सु.** पृ. ७१८.

* **पश्चादाम्नातं** पूर्वाम्नातेन बाध्यते यथा अध्वरकल्पायां आग्नावैष्णवद्वादशकपालस्य ऐन्द्राग्नविकारत्वात् आमावास्यतन्त्रेण सरस्वत्यां आज्यभागायां प्राप्तं पौर्णमासतन्त्रम् । **बाल.** पृ. १४१.

* **'पश्य मृगो धावति'** इत्यादौ पश्य इत्यस्य कर्मान्वयं विना शाब्दबोधाजनकत्वात् युक्तो धावनभावनायाः कर्मत्वेन तस्यामन्वयः । **रहस्य.** पृ. २४.

* **पाकः** अन्वाहार्यस्थानापन्नेऽपि वस्त्रे नानुष्ठेयः आग्रयणे । **१०।३।८।३६.** * पाकः अन्वाहार्यस्थानापन्ने वाससि नानुष्ठेयः आग्रयणे । १०।३।९।३७. * पाकः कृष्णलेषु औष्ण्यरूपः कार्यः । **१०।२।१. मीको.** पृ. १४७५ 'कृष्णलेषु मुख्यपाकासंभवात्' इत्यत्र द्रष्टव्यम् । * पाकः कृष्णलचरौ 'घृते श्रपयति' इति प्रत्यक्षशिष्टत्वात् अदृष्टार्थः कर्तव्यः । **१०।२।१।१–२.** * पाकः नाम 'येयं तण्डुलानां विक्लित्तिः' इति महाभाष्ये विक्लेदनस्य पाकत्वोक्तिः । विक्लित्तिफलस्य अधिश्रयणादिव्यापारसमूहस्य पचिवाच्यत्वम् , नाधिश्रयणादिमात्रस्य एकैकस्य इत्येवमर्थत्वेन 'विक्लित्तिः पाकफलम्' इति प्रयोजनवाच्यर्थशब्दाभ्युपगमेन भाष्यं व्याख्येयम् । **सु.** पृ. १४३४. * पाकः सौर्यचरोः स्थाल्यामेव । १०।१।११. 'सौर्यचरोः पाकः' इत्यत्र द्रष्टव्यम् । * पाको हविर्भूतस्य मांसस्य नियतः । **वि.** १०।७।२.

ॠ पाकस्य चान्नकारितत्वात् । १०।३।९।३७॥

आग्रयणे 'वासो दक्षिणा' श्रुता । तत्र वाससि पाको न कर्तव्यः । पाकस्य हि अन्वाहार्ये अन्नकारितत्वात् । अन्वाहार्यो हि ओदनः अन्नम् । तेन पाकः कारितः । नहि पाकं विना अन्नं भवति । वासस्तु नान्नम् । तस्मात्तत्र पाको न कार्यः । इति सिद्धान्तः । **के.**

* पाकस्य पुरुषार्थस्य दीक्षितकर्तृकत्वपर्युदासः ज्योतिष्टोमे । नदीक्षिताधिकरणम् । १०।८।७।१२–१५.

* **पाकादिक्रियाकर्मणः** तण्डुलादेः क्रियाजन्यातिशयाश्रयत्वदर्शनात् कर्मत्वेन ज्ञानक्रियाकर्मणोऽपि क्रियाजन्यातिशयाश्रयत्वमनुमीयते । **सु.** पृ. ६६१.

* **पाकभेदात्** नानाजातीयेषु पशुषु कुम्भ्यादीनां भेदः । ११।४।१०।४०–४१. **मीको.** पृ. १९३६ 'तन्त्रं न०' इत्यत्र द्रष्टव्यम् ।

* **पाकयज्ञः** पाकं निर्वर्त्य क्रियमाणो यज्ञः । **संकर्ष.** २।४।१०.

ॠ पाकयज्ञेषु 'द्विर्जुहोति, द्विर्निमार्ष्टि, द्विः प्राश्नाति, उत्सृज्याचामति, निर्लेढि' इति धर्मा भवन्ति ॥

पाकयज्ञकरणकभावनायाः कथम्भावाकाङ्क्षायामाक्षेपलभ्यैः संनिपातिभिरेव अङ्गानामिव आकाङ्क्षानिवृत्तिः । इति प्राप्ते, 'द्विर्जुहोति, द्विर्निमार्ष्टि, द्विः प्राश्नाति, उत्सृज्याचामति, निर्लेढि' इति प्रकरणिनः शेषित्वेन विहिता अपि धर्माः पाकयज्ञेऽपि प्राप्नुयुः । 'यद्येतान् नालभेत वायव्यस्यैव शिर उपदध्यात्' इत्येकस्या एव श्रुतेः पशुशीर्षादिविकल्पवायव्यशीर्षोपधानोभयप्रापकत्वदर्शनात् । **संकर्ष.** २।४।१२.

ॠ पाकयज्ञशब्दः दर्विहोममात्रवाचकः ॥

पाकं निर्वर्त्य क्रियमाणो यज्ञ इति व्युत्पत्त्या सोमयागान्यनिखिलयागपरोऽयं शब्दः । इति प्राप्ते, 'यद्वै चातुर्मास्यानां पाकयज्ञः सैव तदेषां पशव्यं गृहमेधीयो ह्येषां पाकयज्ञो न इध्मा बर्हिर्भवति न सामिधेनीरन्वाह न प्रयाजा इज्यन्ते' इत्यादिना ऐष्टिकाङ्गानां अभावबोधनेन दर्विहोममात्रवाचकः । **संकर्ष.** २।४।१०.

ॠ पाकयज्ञशब्दः नाहुतिपर्यायः ॥

पाकयज्ञशब्दस्य आहुत्यादिशब्दवत् स्मार्तश्रौतसाधारण्येन यागमात्रवचनत्वे प्राप्ते, 'मनुर्वै पाकयज्ञीय आसीत् स इममितरं यज्ञमपश्यत्' इत्यादिना वाक्यशेषेण कतिपयाहुतिष्वेव शक्तिग्रहात् न आहुतिपर्यायता । **संकर्ष.** २।४।९.

ॠ पाकयज्ञशब्दः लौकिकहोमानामेव वाचकः ॥

दर्विहोमत्वाविशेषात् लौकिकवैदिकाग्निसाध्यानाम् अखिलानां वाचकः । इति प्राप्ते, लौकिकानामेव दर्विहोमानामेव वाचकः । 'शिबीनां पाकयज्ञः, उशीनराणां पाकयज्ञः' इत्यादेः स्मार्ते एव व्यवहारस्य दर्शनात् । 'यदाऽन्यस्य हविषः स्कन्दयति, सर्वमेतदग्नौ जुहोति' इति विधाय 'अथ कस्मात् द्विर्जुहोति' इत्यादिना 'तदस्य पाकयज्ञस्यैव' इत्यनेन द्विर्होमादिनिर्लेहनान्तपदार्थाः पाकयज्ञीयाः अत्र किमिति क्रियन्ते इत्याक्षेपेण वैदिकानामेषां न पाकयज्ञता इति ध्वननाच्च । **संकर्ष.** २।४।११.

* **पाकहोमयोः** (यवागूपाकाग्निहोत्रहोमयोः) अर्थतः क्रमः । ५।१।२।२.

* **पाकहोमदानानां** दीक्षाकालोत्कर्षः । ६।५।१०।३८–३९. **मीको.** पृ. २१०८ 'दीक्षोत्कर्षे०' इत्यत्र द्रष्टव्यम् ।

* **पाचकादिशब्दाः** न शक्तिपराः, किं तर्हि ? शक्त्यन्तरायोगित्वात् शक्तिमत्पराः । **वा.** ३।४।४।१३ पृ. ९३४.

* **पाञ्चदश्यं** सामिधेनीनां ब्राह्मणराजन्यविषयं दर्शपूर्णमासयोः । साप्तदश्यं तु विकृतिषु वर्णत्रयसाधारणम्, वैश्यस्य च दर्शपूर्णमासयोरपि । ६।६।७।३६–३९. **मीको.** पृ. २८३ 'अधिकारः अध्वरकल्पादिषु०' इत्यत्र द्रष्टव्यम् । * **पाञ्चदश्यस्य** नित्यस्य, वैश्यनिमित्तकस्य च साप्तदश्यस्य प्रतिष्ठाऽर्थेन काम्येन (सामिधेनीनाम्) एकविंशतित्वेन बाधः । **बाल.** पृ. १३३.

* **पाञ्चरात्राद्यागमानां** वैदिकविरुद्धवामागमप्रचुरत्वात् सर्वथैवाप्रामाण्यम् । **कु.** १।३।३।४.

* **पाञ्चसांवत्सरिकावृत्तावपि** चातुर्मास्येषु वैश्वानरपार्जन्यचातुर्होतृहोमानां सकृदेवानुष्ठानम् । **संकर्ष.** ३।१।२१. **मीको.** पृ. १६९२ 'चातुर्मास्येषु पाञ्चसांवत्सरिकावृत्तौ०' इत्यत्र द्रष्टव्यम् ।

* **पाञ्चसांवत्सरिकपक्षेऽपि** चातुर्मास्येषु । **संकर्ष.** ३।१।१९. **मीको.** पृ. १६९१ 'चातुर्मास्येषु पाञ्चसांवत्सरिकपक्षे०' इत्यत्र द्रष्टव्यम् ।

ॠ पाटच्चरलुण्ठिते वेश्मनि यामिकजागरणं इति न्यायः ।

पाटच्चरश्चौरः । यामिकः प्रहरकः । प्रयोजनाऽनुपयुक्तवेलायामयमवतरतीति खण्डने स्पष्टः । **साहस्री.** ६७२.

* **पाटनमन्तरेण** विषव्रणानां नोपशान्तिः । **वि.** ३।८।४.

* योऽपि हि स्रुघ्नान्मथुरां गत्वा मथुरायाः पाटलिपुत्रं व्रजति, सोऽपि स्रुघ्नात् पाटलिपुत्रं याति इति शक्यते वदितुम् । इति भाष्योक्त**पाटलिपुत्रगमनन्यायेन** 'तेजः परस्यां देवतायाम्' इति निर्देशः प्रत्यक्षसिद्धत्वाभावेऽपि उपगन्तव्यः । **आभरणम्.** ४।२।१।५ ब्रसू.

* **पाठः** क्रमं कल्पयन् वस्तुसामर्थ्यं अनुसृत्यैव कल्पयति । **वि.** ५।४।१. * पाठः क्रमबोधकं प्रमाणम् । **मणि.** पृ. १३, **बाल.** पृ. ८. * पाठः न क्रमस्याभिधायकः, किन्तु अन्यथाऽनुपपत्त्या क्रमं कल्पयति । **वि.** ५।४।१. * पाठः भिन्नप्रयोगविधिपरिग्रहस्थले पारायणादौ उपयुज्यते । **भाट्ट.** ५।३।१२. * **पाठं** बाधित्वा श्रुत्यर्थौ क्रमं नियच्छतः । **वि.** ५।४।१. * **पाठस्य** स्मारकक्रमविषयैव क्रमनियामकत्वम् । **भाट्ट.** ५।१।९.

ॠ पाठयोर्मन्त्रब्राह्मणगतयोर्मन्त्रपाठो बलीयान् (भाट्ट.)॥

मन्त्रतस्तु विरोधे स्यात् प्रयोगरूपसामर्थ्यात् तस्मादुत्पत्तिदेशः सः । ५।१।९।१६॥

भाष्यम्— दर्शपूर्णमासयोराग्नेयस्य पूर्वो मन्त्रपाठः, उत्तरो ब्राह्मणस्य । तत्र संदेहः कतमः पाठो बलीयानिति । उच्यते । अनियमः । नियमकारिणः शास्त्रस्याभावादिति । **एवं प्राप्ते, ब्रूमः ।** मन्त्रपाठो बलीयान् । कुतः ? प्रयोगरूपसामर्थ्यात् । प्रयोगाय मन्त्रस्य रूपसामर्थ्यम् । तदस्य सामर्थ्यम्, येन मन्त्रः प्रयुज्यते । तस्य च प्रयुज्यमानस्य क्रमो दृष्टाय भवति । ननु च ब्राह्मणपाठस्यापि तदेव प्रयोजनम् । उच्यते । उत्पत्तिदेशः सः । अपरमपि तस्य प्रयोजनं कर्मोत्पत्त्यर्थं भविष्यति ।

टुप्— मन्त्रतस्तु विरोधे स्यात् ॥ आग्नेयस्य पूर्वो मन्त्रपाठः (उत्तरो ब्राह्मणपाठः), अग्नीषोमीयस्य तु पूर्वो ब्राह्मणपाठः (मन्त्रपाठस्तूत्तरः) । तत्र ब्राह्मणपाठात् किमग्नीषोमीयस्य पूर्वं धर्माः, उत मन्त्रपाठात् आग्नेयस्येति (इति मन्त्रब्राह्मणपाठयोर्बलाबलं चिन्त्यते)।

किं प्राप्तम् ? पूर्वो मन्त्रः उत्तरं (मन्त्रं पाठेन प्रत्यक्षेणैव) उपस्थापयति । (यथा) 'समिधो यजति' इति समाप्यमानः तनूनपातमुपस्थापयति । अतो द्वयोरपि समाम्नायपाठयोः प्रत्यक्षत्वात् अनियमः । इति **प्राप्ते,** (**ब्रूमः**) । मन्त्रपाठो बलीयान् । कुतः ? (ब्राह्मणपाठस्य विप्रकृष्टत्वात् । तथाहि,) 'समिधो यजति' इत्यनेन पदार्थो विहितः । सः अनुष्ठानवेलायां येन वाक्येन विहितः, तत् वाक्यं स्मारयति । तेन वाक्येन स्मृतेन अनुष्ठानवेलायां स पदार्थः स्मारितः सन् अनुष्ठीयते, (अनुष्ठितश्चासौ झटित्येव) द्वितीयं पदार्थं न स्मारयति (अर्थानां ग्रन्थानपेक्षरूपेण पौर्वापर्यस्य अनवक्लृप्तत्वात्) । किं तर्हि ? अनुष्ठानोत्तरकालं योऽसौ कृतः पदार्थः, तमालोचयति । स चालोच्यमानः येन (समिधो यजतीत्यनेन) ब्राह्मणखण्डकेन विहितः, तत् स्मारयति । तच्च (स्मृतम्) स्वादुत्तरं ब्राह्मणखण्डकम् (तनूनपातं यजति इत्येतत् ब्राह्मणखण्डकम्) स्मारयति पाठात् । तत् ब्राह्मणं पुनः पदार्थं विदधाति (पुनःशब्दः तु–शब्दार्थकः) । अनुष्ठानवेलायां तत् (ब्राह्मणम्) स्मारकमपेक्षितव्यम् । अयं (मन्त्रपाठात् ब्राह्मणपाठे) विप्रकर्षः । मन्त्रः पुनः (अन्तःक्रतु प्रयुज्यमानः) परिसमाप्यमानः उत्तरं मन्त्रं पर्युपस्थापयति । स च (उत्तरो मन्त्रः) पर्युपस्थाप्यमानः उत्तरं पदार्थं पर्युपस्थापयन्नेव पर्युपतिष्ठते । तस्मात् तत्र (आलोचना–) अपेक्षाऽभावात् नास्ति विप्रकर्षः । 'उत्पत्तिदेशः सः' इति (सूत्रांशस्य अयमर्थः——) पूर्वः पदार्थो विहितः, उत्तरः पदार्थो विहितः इति विधीयमानानां यः क्रमः, तेन अर्थवान् ब्राह्मणपाठक्रमः, नानुष्ठानक्रमेणेति । (तस्मात् मन्त्रक्रमो बलीयान्) ।

शा— '**विधिक्रमबलीयस्त्वमुत्पत्ताववधारणात् । उत्पन्नेषु नियुक्तेषु मन्त्रे मन्त्रक्रमो भवेत् ॥, नैवं स्मृतिक्रमेणैव ह्यनुष्ठानक्रमो भवेत् । स्मारकक्रमतश्चापि स्मृतीनां क्रम इष्यते ॥ मन्त्राश्चानन्यकार्यत्वात् स्मृत्यर्था विषयः पुनः । विधिनैव कृतार्थत्वान्नावश्यं स्मारका मताः ॥**' तस्मात् मन्त्रक्रमेणैवानुष्ठानम्, तदभावे तु विधिरपि स्मारकः इति तत्रैव तत्क्रमस्य प्रामाण्यम् ।

सोम—— प्रथमावगतत्वात् यथा पूर्वत्र पाठक्रमस्य प्राबल्यमेवं इहापीति प्रत्यवस्थानात् **संगतिः । सूत्रार्थस्तु**—— मन्त्रब्राह्मणक्रमविरोधे मन्त्रपाठक्रमात् पदार्थक्रमः स्यात् प्रयोगसामर्थ्यात् मन्त्रस्य प्रयोज्यपदार्थस्मारणे सामर्थ्यात्, ब्राह्मणपाठस्तु उत्पत्तिदेशः इति न प्रयोगकाले स्मृत्युपयुक्तः इति ।

वि—— 'अग्नीषोमीय आग्नेयात् पूर्वो नो वा, ऽस्तु पूर्वता । ब्राह्मणक्रमतो, मैवं मन्त्रक्रमबलित्वतः ॥ स्मृतिक्रमादनुष्ठानं मन्त्राणां स्मारकत्वतः । प्राबल्यं ब्राह्मणस्यास्ति विधिनाऽपि कृतार्थता ॥'

भाट्ट—— पाठयोस्तु मन्त्रब्राह्मणगतयोर्मन्त्रपाठो बलीयान्, न तु ब्राह्मणपाठः, तस्योत्पत्तिविनियोगविधिगतत्वेन प्रथमोपस्थितत्वेऽपि पाठस्य स्मारकक्रमविषयैव क्रमनियामकत्वोक्तेः, मन्त्रसत्त्वे च तस्यैव स्मारकतया विधानोपयुक्तस्यासमर्थस्य च विधेः स्मारकत्वाभावात् मन्त्रपाठक्रमः एव बलीयान् । तेन याज्याऽनुवाक्यादिमन्त्रपाठक्रमात् आग्नेयस्य प्रथमानुष्ठानम्, पश्चाच्च उपांशुयाजोत्तरमग्नीषोमीयस्य । न तु ब्राह्मणपाठक्रमादग्नीषोमीयस्य प्रथमम्, पश्चादुपांशुयाजोत्तरमाग्नेयस्य । अत एव तत्र पाठक्रमः स्वाध्यायादावुपयुज्यते ।

मण्डन—— 'मन्त्रक्रमो बली तत्र ।' मन्त्रब्राह्मणपाठविरोधे । ११.

शंकर—— 'विधिपाठान्मन्त्रपाठः ।' बली । ११.

* **पाठे** आनुमानिको विधिः प्रत्यक्षेण विधिना बाध्यते । **भा.** ८।४।५।१६.

* **पाठाधिकरणे** ब्राह्मणस्य स्मारकत्वं विधायकत्वं चेत्युभयार्थत्वं वक्ष्यते । सु. पृ. ६६६.

* **पाठादीनां** क्रमापेक्षायां नियामकता तत्रैव, यत्र एकप्रयोगविधिपरिग्रहः अनेकेषाम् । **भाट्ट.** ५।३।१२.

* **पाठोपस्थितस्य** क्रमस्य विनियोजकवाक्यकल्पनया अङ्गत्वे अवगते प्रयोगविधिना प्रयोगविधानम् । **भाट्ट.** ५।१।४.

* **पाठक्रमो**ऽपि पदार्थबोधकवाक्यानां पदार्थक्रमनियामकः । पदार्थबोधकत्वं च क्वचित् अनुष्ठेयपदार्थबोधकत्वम्, क्वचिच्च तत्संबन्धिद्रव्यदेवतादिबोधकत्वम् । तेन च द्विविधेनापि अनुष्ठेयपदार्थक्रमनियमः । **भाट्ट.** ५।१।४, * पाठक्रमः अर्थक्रमेण बाध्यते 'अग्निहोत्रं जुहोति, यवागूं पचति' इत्यादौ । ५।४।१. * पाठक्रमः आतिदेशिकः औपदेशिकमुख्यक्रमात् बलवान् । ५।१।१०।१७–१८. * पाठक्रमः उपदेशविषयः एव । **टुप्.** ५।१।१।१ पृ. १२८७. * पाठक्रमः काम्यानुष्ठाने न नियामकः, किन्तु यथाकाममनुष्ठानम् । ५।३।१२।३२–३६. * पाठक्रमः चोदकाश्रितत्वाद्बलीयान्, मुख्यप्रवृत्तिक्रमौ तु प्रयोगवचनाश्रितत्वात् दुर्बलौ । **टुप्.** ५।१।१०।१८, * पाठक्रमः प्रत्यक्षः, मुख्यक्रमस्तु आनुमानिकः, तेन पाठक्रमो मुख्यक्रमात् बलवान् । तेन दर्शपूर्णमासयोः आज्यनिर्वापः पूर्वं न कार्यः, अग्नीषोमीयनिर्वाप एव आज्यात् पूर्वं कार्यः । ५।१।८।१५.

§ पाठक्रमः मुख्यक्रमापेक्षया बलीयान् ॥

प्रकृतौ तु स्वशब्दत्वाद् यथाक्रमं प्रतीयेत । ५।१।८।१५ ॥

भाष्यम्—— दर्शपूर्णमासयोः पूर्वमौषधधर्माः समाम्नाताः, तत आज्यस्य । तत्र संदेहः किमग्नीषोमीयधर्माणां मुख्यक्रमेण पूर्वमाज्यस्य धर्माः कर्तव्याः, उत यथापाठमिति । मुख्यक्रमानुग्रहेण आज्यस्य पूर्वम् । इति **प्राप्ते, ब्रूमः** । प्रकृतौ यथापाठं प्रतीयेत । स्वशब्दो हि तेषां पाठक्रमः । सोऽन्यथा क्रियमाणे बाधितः स्यात् । सहत्वस्य पुनरुपसंग्राहकः प्रयोगवचनः स्वक्रमेण पदार्थे संनिकृष्यमाणे न बाधितो भविष्यति । अपिच पाठक्रमे स्वशब्दः 'स्वाध्यायोऽध्येतव्यः' इति । मुख्यक्रमे प्रयोगवचनैकवाक्यता सूक्ष्मा ।

टुप्—— (इह तावत् पूर्वाधिकरणापवादरूपेण सिद्धान्तमभिधातुं मुख्यपाठयोर्बलाबलं चिन्त्यते) । आज्यनिर्वापः इहोदाहरणम् । पूर्वेण न्यायेन तथैव (मुख्यक्रमेण अनुष्ठाने) प्राप्ते अपवाद आरभ्यते । पाठक्रमेणानुष्ठानं स्वाध्यायेन (अन्यानपेक्षतया) अवगतत्वात् प्रत्यक्षम् । (मुख्य आनुमानिकः । कल्पना च विलम्बते इत्याह–) सह पदार्थाः कर्तव्याः इति पदार्थेषु अयं धर्मः सहत्वं नाम (अपेक्षितः) । तत्र प्रयोगवचनेन सहत्वमवबोध्यते । सहत्वं (च) अवबोधयन् अन्यथाऽनुपपत्त्या क्रममनुमापयति प्रधानासत्त्यै (प्रधानासत्तिसिद्ध्यर्थम्) । तत्र (अङ्गेषु) यत् अश्रुतक्रमानुमानम्, तत् प्रत्यक्षेण (पाठ–)क्रमेण बाध्यते । ततो यथा– (पाठ–) क्रमं व्यवस्था । (भाष्यं व्याचष्टे–) मुख्यक्रमे प्रयोगवचनेन एकवाक्यता सूक्ष्मा, अश्रुतः क्रमः कल्प्यते इत्यर्थः ।

शा—— '**तत्र मुख्यक्रमादाज्यनिर्वापस्य पुरः क्रिया । पाठतस्त्वौषधस्यैव प्राथम्यमनपेक्षतः ॥**'

सोम —— पूर्वाधिकरणोक्तप्रधानप्रत्यासत्त्यनुग्रहात् मुख्यक्रमः युक्तः । अत एव **संगतिः । सूत्रार्थस्तु**– प्रकृतौ यथाक्रमं यथापाठक्रमं निर्वापक्रमः प्रतीयते, पाठक्रमस्य स्वशब्दत्वात् अङ्गावगमकशब्दधर्मतया प्रत्यक्षेण झटित्यवगमादिति ।

वि—— 'उपांशुयाजे पूर्वत्वमग्नीषोमीयकेऽथवा । धर्मानुष्ठान(ने), आद्योऽस्तु मुख्ययोस्तादृशक्रमात् ॥, युक्तमौषधधर्माणां प्राथम्यं पूर्वपाठतः । पाठक्रमस्याविलम्बादाज्यधर्मास्तु पश्चिमाः ॥'

भाट्ट—— तदेवं षट् प्रमाणानि निरूपितानि । तेषां चाद्याधिकरणोक्तक्रमेण पारदौर्बल्यं द्रष्टव्यम्, न तु सूत्रक्रमेण । तत्र श्रुतिविरोधे अर्थस्यैव अन्यथाकल्पनात् दौर्बल्यम् । अर्थविरोधे पाठस्य वक्ष्यते । एवं वैकृतपाठविरोधे प्राकृतस्थानबाधोऽपि । प्राकृतक्लृप्तस्थानविरोधे प्रधानप्रयोगविध्याश्रितमुख्यक्रमस्य दौर्बल्यं वक्ष्यते एव । मुख्यक्रमविरोधे प्रवृत्तिक्रमस्य दौर्बल्यमपि तथैव ।

तदिह पाठक्रममुख्यक्रमयोः बलाबलं चिन्त्यते । दर्शपूर्णमासयोः आग्नेयोपांशुयाजाग्नीषोमीयरूपमुख्यक्रमात् आज्यस्योपांशुयाजीयस्य प्रथमं निर्वापः, पश्चादग्नीषोमीयद्रव्यस्य । पाठक्रमात्तु विपरीतः क्रमः । तत्र पाठस्य स्मारकवाक्यवृत्तित्वेन प्रत्यक्षत्वात् शीघ्रोपस्थितेश्च बलवत्त्वम् । मुख्यक्रमस्तु मुख्ययोरेव प्रथमं केनापि प्रमाणेनावगम्य तदपेक्षया तत्साहित्यसंपत्तये कल्प्यमानो विलम्बित इति दुर्बलः ।

मण्डन— 'मुख्यात् पाठक्रमो बली।' १०.

शंकर— 'पाठो मुख्यक्रमाद् बली।' ११.

* नैमित्तिको हि **पाठक्रमः** इतरं पाठक्रमं बाधित्वा निविशते। टुप्. ४।३।१६।३९, * पूर्वः पदार्थः समाप्यमानः उत्तरं बुद्धौ अभिनिर्यस्यति इत्ययं पाठक्रमः बाध्यते। ५।१।६।१३, * यत्र आनुपूर्व्येण पदार्था विधीयन्ते स पाठक्रमः। यथा 'हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षसः' इति। ५।१।१।१ पृ.१२८९. * **पाठक्रमेण** एव ऋचः आगमयितव्याः आगमेन संख्यापूरणे, एकविंशे त्रिणवे त्रयस्त्रिंशे चातिरात्रे। **भा.** ५।१।६।१३. * पाठक्रमेण स्थानक्रमो बाध्यते। यथा—सावित्रहोम–उखासंभरणाद्यपूर्वपदार्थान् विधाय दीक्षणीयाऽऽदयः प्राकृताः सगुणाः श्रुताः। तत्र प्राकृतेन दीक्षणीया-प्राचीनेन पदार्थेन उपस्थितानां दीक्षणीयादीनां स्थानेन प्रागनुष्ठाने ततः प्राक् पाठः सावित्रहोमादेः न स्यात् इति (पाठक्रमेण स्थानक्रमो बाध्यते)। इदं 'प्राकृताच्च पुरस्ताद्यत्' (५।२।११) इत्यधिकरणे उक्तम्। **बाल.** पृ. १३७.

पाठक्रमादर्थक्रमो बलीयान् इति न्यायः।

यथा—'अनड्वाहमुदहारि या त्वं हरसि शिरसा कुम्भं भगिनि साचीनमभिधावन्तमद्राक्षीः' इति। तस्य यथेष्टमभिसंबन्धो भवति, उदहारि भगिनि या त्वं कुम्भं हरसि शिरसा, अनड्वाहं साचीनमभिधावन्तमद्राक्षीरिति। अत एव 'आनुपूर्व्येण संनिविष्टानां यथेष्टमभिसंबन्धः' इति न्यायोऽप्यवतरतीति। 'न पदान्त०' (पा. १।१।५८) इति सूत्रमहाभाष्यकैयटयोः स्पष्टः। **साहस्री.** ५९९. * 'पाठक्रमादर्थ०' **इति न्यायेन** 'सुसंभृता त्वा सं भरामि' 'अदित्यै रास्नाऽसि' इति मन्त्रद्वयस्य व्यत्यासेन विनियोगः कल्पे दर्शितः। **तैसंसा.** १।१।२।२. * 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषायां बहिरङ्गस्य प्रथमोपस्थितावपि 'पाठक्रमादार्थक्रमो बलीयान्' **इति न्यायेन** प्रथममन्तरङ्गपदार्थं विविनक्ति। **भूति.** पृ. १६८.

* पाठक्रमात् यथासंख्यरूपात् दधिमन्त्रो मध्यवर्ती मध्यवर्तिनः उपांशुयाजस्याङ्गम्। ३।३।५. **मीको.** पृ. १५०९ 'क्रमाधिकरणम्' इत्यत्र द्रष्टव्यम्। * **पाठक्रमस्य** श्रुत्यर्थक्रमाभ्यां बाधः। क्रमकोपाधिकरणम्। ५।४।१।१.

पाठक्रमाधिकरणम्। पाठक्रमन्यायः। प्रयाजेषु पाठक्रमो नियामकः॥

क्रमेण वा नियम्येत क्रत्वेकत्वे, तद्गुणत्वात्। ५।१।४।४॥

भाष्यम्— दर्शपूर्णमासयोराम्नातम् 'समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिर्यजति, स्वाहाकारं यजति' इति। तत्र संशयः किमनियतेनैव क्रमेण एषामनुष्ठानम्, उत यः पाठक्रमः, स एव नियम्येत इति। किं प्राप्तम्? नियमकारिणः शास्त्रस्याभावात् अनियम इति। **एवं प्राप्ते, ब्रूमः।** क्रमेणैव नियम्येत एकस्मिन् क्रताविति। कुतः? तद्गुणत्वात्। तद्गुणत्वं हि गम्यते पदार्थानाम्। यथा 'स्नायात् अनुलिम्पेत् भुञ्जीत' इति च क्रमेणानुष्ठानमवगम्यते वाक्यात् पदार्थानाम्। यथा च अदृष्टार्थेषूपदिश्यमानेषु कश्चित् ब्रूयात् 'देवाय धूपो देयः, पुष्पाण्यवकरितव्यानि, चन्दनेनानुलेतव्यः, उपहारोऽस्मै उपहर्तव्यः, एवं कृते देवस्तुष्यति' इति। तमन्यः प्रतिब्रूते—'नैतदेवम्, न प्रथमं धूपो दातव्यः, प्रथमं पुष्पाण्यवकरितव्यानि' इति। एवं मन्यते धूपदानस्य प्राथम्यमनेनोक्तमिति। तस्मात् वाचनिक एषामेष क्रम इति।

अशाब्द इति चेत् स्याद्वाक्यशब्दत्वात्। ५॥

भाष्यम्— इति चेत्पश्यसि, अथैवं गम्यमाने अशाब्द एव क्रमः। कथम्? पदार्थपूर्वको वाक्यार्थः। पदेभ्यश्च पदार्था एवावगम्यन्ते न क्रमः। स्यादेतदेवम्, यदि पदानां समूहस्य श्रवणं प्रत्यायकमर्थस्य स्यात्। न तु समुदायः प्रत्यायक इत्युक्तम्, 'तद्भूतानां क्रियार्थेन समाम्नायः' इत्यत्र। तस्मात् क्रमस्य वाचकशब्दाभावात् व्यामोह एष क्रमोऽवगम्यते। एवं पूर्वासक्तिरनुग्रहीष्यते। इतरथा साऽपि विप्रकृष्येत घटीयन्त्र इव। दर्शयिष्यति च 'हृदयस्याग्रेऽवद्यति, अथ जिह्वायाः, अथ वक्षसः' इति। यदि नियामकः पाठक्रमस्ततो न विधातव्यमेतत्। नियामके हि पाठक्रमे पाठक्रमादेव प्राप्नुयात्।

अर्थकृते वाऽनुमानं स्यात् क्रत्वेकत्वे परार्थत्वात्, स्वेन त्वर्थेन संबन्धस्तस्मात् स्वशब्दमुच्येत। ६॥

भाष्यम्— एकस्मिन् क्रतौ एकत्वात् कर्तुः अनेकस्मिन् पदार्थे अर्थकृतत्वात् क्रमस्य। तत्रैष एव क्रमो नियम्येतानुमानेन। कुतः? परार्थत्वाद्वेदस्य। परार्थो हि वेदो यद्यदनेन शक्यते कर्तुं तस्मैतस्मै प्रयोजनायैष समाम्नायते। शक्यते चानेन पदार्थो विधातुम्, शक्यते च क्रियाकाले प्रतिपत्तुम्। तस्माद्वेदः पदार्थोश्च विधातुमुपादेयः, क्रियाकाले च प्रतिपत्तुम्। न गम्यते विशेषः विधातुमयं समाम्नायते न प्रतिपत्तुमिति। अगम्यमाने विशेषे उभयार्थमुपादीयते इति गम्यते। प्रतिपत्तुं चानेन क्रमेण शक्यते नान्येन। अत एव च कृत्वा पाठक्रमापचारे विनष्टः इत्युच्यते। इतरथा हि यज्ञस्य प्रयोजनं तस्मिन्निर्वर्तमाने एव किं नष्टं स्यात्। अदृष्टं कल्प्येत, तच्चान्याय्यं दृष्टे सति। तस्मात् स्वशब्दः क्रमः। य एव पदार्थानां वाचकः शब्दः स एव क्रमस्यापि।

टुप्— 'स्वाध्यायोऽध्येतव्यः' इति (वाक्यस्य तावदयमर्थः) स्वाध्यायाध्ययनेन भावयेत्, (तत्र) किमिति (भाव्यविशेषापेक्षायाम्) तत्र विश्वजिद्वत् फलं न कल्प्यते, न च रात्रिसत्रन्यायेन अर्थवादतः फलम् (कल्प्यम्)। भवितव्यं च फलेन। तस्मात् स्वाध्यायाध्ययनेन यदवबोध्यते, तदत्र फलम् (कर्मावबोधनमेव दृष्टं फलमित्यर्थः)। पदार्थाश्च अनवबुद्धा अनेन बोध्यन्ते (तेषाम्) क्रमश्च। तस्मात् यथा पदार्थस्वरूपमनवबुद्धमवबुध्यते, एवं क्रमोऽपि अनवबुद्ध एव। अतः स्वाध्यायेन पदार्थज्ञानं भावयेत् क्रमज्ञानं चेत्यर्थः। तस्मात् स्वशब्दः (क्रमः प्रतीयते)।

तथा चान्यार्थदर्शनम्। ७॥

भाष्यम्— एवं चान्यार्थं दर्शयति, 'व्यत्यस्तमृतव्या उपदधाति। व्यत्यस्तं षोडशिनं शंसति' 'आश्विनो दशमो गृह्यते। तं तृतीयं जुहोति' इति। यदि अनियमेनोपधानं शंसनं च, व्यत्यस्तवचनमनर्थकं स्यात्। नहि कथञ्चिद्व्यत्यास इति। तथा आश्विनस्य तृतीयस्य होमानुवादो नावकल्प्येत, यदि पाठक्रमेणानियम इति। तथा 'अभिचरता प्रतिलोमं होतव्यम्। प्राणानेवास्य प्रतीचः प्रतियौति' इति क्वचित् प्रतिलोमं विदधदनुलोमं दर्शयति। तदुपपद्यते यदि पाठक्रमेण प्रयोगः। इतरथा सर्वमनुलोमं स्यात्, प्रतिलोमदर्शनं नोपपद्येत। तथा चतुर्थोत्तमयोः प्रतिसमानयतीत्युक्ते सति 'अतिहायेडो बर्हिः प्रति समानयति' इत्युच्यते। तेन बर्हिषश्चतुर्थतां दर्शयति। सा पाठक्रमे नियामके अवकल्पते।

शा— अनियमः इति प्राप्ते, ब्रूमः। **'यथापाठमनुष्ठानं तथैव प्रतिपत्तितः। स्मृतिः प्रयोगवेलायां वाक्यैरेव च कर्मणाम्॥'**

सोम— पूर्ववत् अनियमः इति प्रत्यवस्थानात्, श्रुत्यर्थाभ्यां जघन्यप्रमाणाद्वा **संगतिः। सूत्रार्थस्तु**—एकक्रतुगतत्वे पाठक्रमेणैवानुष्ठानं नियम्येत 'गन्धो देयः, पुष्पाणि देयानि' इत्यादौ पाठक्रमस्य पदार्थक्रमबोधकतया गुणत्वावगमात् इति।

वि— 'प्रयाजेषु क्रमो नास्ति विद्यते वा, न विद्यते। श्रुत्यर्थाभावतो, मैवं क्रमः पाठान्नियम्यताम्॥'

भाट्ट— पदार्थबोधकवाक्यपाठक्रमोऽपि पदार्थक्रमनियामकः। न च विधीनां तत्तत्पदार्थविधायकत्वात् क्रमस्य च स्वाध्यायत्वसिद्ध्यर्थत्वेन अध्ययनविध्युपयुक्तत्वान्न पदार्थक्रमनियामकत्वम्, पदार्थानामनुष्ठानकाले स्मारकापेक्षायां मन्त्रादीनामुपस्थितत्वेन स्मारकत्वनियमात् तत्क्रमेणैव अनुष्ठानक्रमनियमोपपत्तेः। अत एव यत्र मन्त्राम्नानम्, तत्र तत्क्रम एव नियामकः। यत्र तु न तत्, तत्र विधायकत्वेनोपयुक्तस्यापि विधिवाक्यस्यैव उपस्थितस्य स्मारकत्वेन नियमात् तत्क्रमस्यापि पदार्थक्रमनियामकत्वम्। पाठोपस्थितस्य च क्रमस्य विनियोजकवाक्यकल्पनया अङ्गत्वेऽवगते प्रयोगविधिना प्रयोगविधानम्। लक्षणे पदार्थबोधकत्वं च क्वचिदनुष्ठेयपदार्थबोधकत्वम्, क्वचिच्च तत्संबन्धिद्रव्यदेवतादिबोधकत्वम्। तेन च द्विविधेनापि अनुष्ठेयपदार्थक्रमनियमः। अत एव देवताबोधकयाज्याऽऽदिक्रमादपि यागक्रमः। अतः पाठोऽपि क्रमनियामकः अपेक्षितत्वात्। अत एव यत्र न क्रमापेक्षा यथा सांनाय्यादौ एकप्रयोगविधिपरिग्रहेऽपि संप्रतिपन्नैकदेवताकत्वेन सहानुष्ठानात्, यत्र वा भिन्न-

प्रयोगविधिपरिग्रहो यथा तत्तत्काम्यकर्मणाम्, तत्र न पाठो नियामकः। तत्र तु स्वाध्यायत्वसिद्ध्यर्थं एवोपयुज्यते इति द्रष्टव्यम्।

मण्डन— 'समिदादौ क्रमः पाठात्।' ५.

शंकर— 'पाठक्रमात् क्रमश्च स्यात्।' ६.

* **पाठक्रमन्यायः** । ५।१।४।४–७ । पाठक्रमन्यायानुसारेण प्रयोजकप्रधानप्राक्स्मृतिद्वारा प्रथमहविःशेषस्यैव प्राक् स्मृतिः । **सु. पृ. १५४२.**

* **पाठसादेश्यं** द्विविधम्– यथासंख्यपाठः संनिधिपाठश्चेति । ऐन्द्राग्नादीष्टीनां काम्ययाज्यानुवाक्यानां चाङ्गाङ्गिभावः, यथासंख्यपाठात्। वैकृताङ्गानां विकृत्यर्थत्वं संनिधिपाठात् । **मीन्या.**

* **पाणिनिना** नार्थानुशासनं कृतम्, किं तर्हि? यथा लोके अवस्थितोऽर्थस्तथास्थितस्य शब्दानुशासनं कृतम् । **वा. ६।१।६।२२ पृ. १३७४.**

* **पाणिनिकात्यायनपतञ्जल्यो** व्याकर्तारः मन्वादिसमानाः । **वि. १।३।९.**

* **पातञ्जलाः** ईश्वरं जगत्कारणं मन्यन्ते । (इदं चिन्त्यम् । के.) । **सु. पृ. १३१.**

* **'पात्नीवतमुत्सृजन्ति'** इति न कर्मान्तरम्, पूर्वस्यैव उत्सृजतिशब्देन अवच्छेदो विधीयते । उत्सर्गान्तमेवेदं पशुकर्म । २।३।८।१९. * पात्नीवतं ग्रहं आग्रयणात् उपांशुपात्रेण गृह्णाति । **भा. ३।२।१३।३३.** * **पात्नीवतस्य** पशोः पर्यग्निकरणान्तत्वं गुणः 'पर्यग्निकृतं पात्नीवतमुत्सृजन्ति' इति । **वि. २।३।८.**

पात्नीवते तु पूर्वत्वादवच्छेदः । २।३।८।१९ ॥

त्वाष्ट्रं पात्नीवतं विधायाह–'पर्यग्निकृतं पात्नीवतमुत्सृजति' इति। तत्र संदेहः किं त्वाष्ट्रस्य पर्यग्निकृतस्यैष उत्सर्गो विधीयते, उत तस्माद्यागान्तरमिति । आलम्भनिर्वापयोः प्रत्युदाहरणत्वेन यजिमदभिधानं निराकृत्येदानीं प्रकृतोदाहरणेऽपि यजिमदभिधानं निराक्रियते । अत्रायं पूर्वपक्षिणोऽभिसंधिः– यद्यपि 'त्वाष्ट्रं पात्नीवतमालभेत' इति यागं विधाय तं प्रकृत्य श्रूयते 'पर्यग्निकृतं पात्नीवतमुत्सृजति' इति, तथापि पूर्वत्र गुणविधानासंभवात् कर्मान्तरविधिरेवायम् । तथाहि, न तावत् पूर्वस्मिन् यागे विकल्पेन पात्नीवतशब्दोपनीता एका देवता विधीयते, उत्पत्तिशिष्टदेवताऽवरोधात् । नापि पर्यग्निकरणम्, अतिदेशप्राप्तत्वात् । नाप्युत्सर्गः, उत्पत्तिवाक्येनोपलब्धत्वात् । तेन वायव्यवाक्यवत् पत्नीवच्छब्दाभिधेयद्रव्यदेवतान्वयार्थसंक्रान्तोऽयं विधिः कल्पितयजिशब्दप्रतिपाद्यं यागान्तरमेव द्रव्यदेवताविशिष्टं देवतागुणसामान्येन पूर्वयागप्रकृतिकम्, अग्नीषोमीयप्रकृतिकमेव वा विदधाति इति । **एवं प्राप्ते, अभिधीयते** । भवेदेवं यदि प्रकृतगुणविधिर्न संभवेत् । तत्र यद्यप्यन्ये गुणा न विधीयन्ते, तथापि पर्यग्निकरणान्तानि अङ्गान्येव अत्र विधास्यन्ते । तथाहि, कथम्भावाकाङ्क्षी त्वाष्ट्रप्रयोगवचनः प्रकृतौ क्लृप्तोपकारकाण्यङ्गानि अपेक्षमाणः पर्यग्निकृतशब्दोपनीतान्येव तदन्तानि अङ्गानि औपदेशिकानि गृहीत्वा चरितार्थो नातिदेशलभ्यानि अङ्गान्तराण्यपेक्षते । ननु 'इडान्ता आतिथ्या संतिष्ठते' इत्यादिवच्च नात्र पर्यग्निकरणान्ताङ्गप्रतिपादकशब्दोऽस्ति । अतः कथं तदन्ताङ्गविधानम्? उच्यते । पर्यग्निकृतशब्दो हि निर्वृत्तयथाप्रसिद्धपर्यग्निकरणविशिष्टं द्रव्यमुपादत्ते । तच्च पर्यग्निकरणं पूर्वाङ्गेषु कृतेष्वेव प्रकृतौ निर्वृत्तम्, तेन पर्यग्निशब्दोऽत्र प्रकृतचोदनाप्रतिपादितमेव अङ्गकलापमुपनयति । स एवात्र उत्सृजत्याख्यातवर्तिना विधिना उत्सर्गानुवादेन विधीयते, नैवोत्सर्गः । विधिप्रत्ययसंनिधिविशेषेण भाष्यकारेणोक्तम् 'उत्सर्गो विधीयते' इति । न च वाच्यम् 'अतिदेशतोऽपि प्राप्स्यतः किं विधिना' इति । उत्तराङ्गव्यवच्छेदफलत्वेन विधिसाफल्यात् । न चैवं सति परिसंख्या, अतिदेशप्राप्तेः प्रागेव विधिप्राप्तेः । नापि वाच्यम् 'यदुत्सृजन्ति तत्पर्यग्निकृतमित्येतावतैव वाक्यसमाप्तौ पुनः पात्नीवतमिति विशेषणे विशिष्टानुवादात् वाक्यभेदः स्यात्' इति । यतो नोद्देश्यविशेषणं पात्नीवतशब्दार्थः, विनाऽपि विशेषणं प्रकरणादेव पर्यग्निकरणविधेः त्वाष्ट्रसंबन्धात् । किञ्च नित्यानुवादोऽयम् । अनुवादस्य च यद्यपि अन्यत्प्रयोजनं नास्ति, तथापि भिन्नतद्धितान्तपदाभिधेयदेवतयोः समुच्चये एकेनापि तद्धितान्तेन पदेन तदभिधानं शक्यम्, नत्वेकतद्धितान्तपदाभिधेययोः समुच्चितदेवतयोरग्नीषोमयोः अन्यतरपदेनेति

ज्ञापनार्थं प्रकृतप्रत्यभिज्ञाद्योतनमेव प्रयोजनम् । अतः प्रकरणप्रत्यभिज्ञाते त्वाष्ट्रयाग एव पर्यग्निकरणान्ताङ्गरीतिविधानमिति सिद्धम् । तदुक्तम् — **'प्रकृतप्रत्यभिज्ञानात् प्रयोगोऽन्योऽवगम्यते । पर्यग्निकरणात् तस्मिन्नङ्गरीतिर्विधीयते ॥'** इति । (वा.पृ.६०७) ।

नन्वेवं सति गृहमेधीयेन सहास्य को विशेषः? उच्यते, अत्र देवताऽभिधानं निराकृत्य गुणविधित्वव्युत्पादनेन स एव न्यायः स्थिरीक्रियते इति नानुपपन्नं किञ्चित् । **प्रयोजनम्**– पूर्वपक्षे केवलपत्नीवद्देवताकयागान्तरानुष्ठानम् । सिद्धान्ते नेति । **सूत्रं** तु पात्नीवते पत्नीवत्पदयुक्तवाक्ये पूर्ववत्त्वादुपदेशेनैव प्राकृतधर्मवत्त्वसंभवात् पर्यग्निकरणान्ताङ्गातिरिक्ताङ्गानामवच्छेदः फलं विधेरित्यर्थः । **तौता.**

पात्नीवते तु पूर्वत्वादवच्छेदः । २।३।८।१९ ॥

त्वाष्ट्रं पात्नीवतं विधाय 'पर्यग्निकृतं पात्नीवतमुत्सृजन्ति' इत्युच्यते । अत्र किं त्वाष्ट्रस्य पर्यग्निकृतस्य एष उत्सर्गो विधीयते उत तस्माद्यागान्तरम्, उत्सृजतिरपि यजेरभिधानं न वा, उत्सृजतिः गुणविधिः, उत कर्मान्तरं इति विचारे यागान्तरमिति पूर्वपक्षे सिद्धान्तमाह । तुशब्दः पूर्वपक्षं व्यावर्तयति । पात्नीवते 'पर्यग्निकृतं पात्नीवतम्' इति वाक्ये न कर्मान्तरविधिः । किन्तु पूर्वत्वात् प्रकृतप्रत्यभिज्ञानात् पर्यग्निकरणान्ताङ्गकलापविधानेन उत्तराङ्गानामवच्छेदः निवृत्तिरुक्ता । तस्मात् पूर्वस्य कर्मणः अवच्छेदः पर्यग्निकरणान्ताङ्गकलापेन परिसमाप्तिः उत्सृजतिवाक्येनोक्ता इति सिद्धान्तः । **के.**

पात्नीवते तु पूर्ववत् । ३।२।१३।३३ ॥

अग्निष्टोमे प्रातःसवने ऐन्द्रवायवमैत्रावरुणाश्विनाः द्विदेवत्या ग्रहाः सन्ति । तेषु हुतेषु तदीयाः शेषाः आदित्यस्थाल्यामवनीयन्ते । अस्ति च तृतीयसवने आदित्यग्रहः । स च सशेषं हूयते । अस्ति च तृतीयसवने आग्रयणग्रहणविधिः । 'चतसृभ्यो धाराभ्यः आग्रयणं गृह्णाति' 'आग्रयणादुत्सिच्य द्वितीयां धारां करोति' 'आदित्यस्थाल्याः तृतीयाम्' 'आदित्यग्रहसंपातात् चतुर्थीम्' इति । तदेतस्मात् आग्रयणात् पात्नीवतग्रहग्रहणमाम्नातम् 'आग्रयणात् पात्नीवतं गृह्णाति' इति । अथ तस्मिन् पात्नीवते हुते तच्छेषे भक्ष्यमाणे भक्षमन्त्रे कथं देवतानिर्देशः कर्तव्यः इति विचारे पूर्वपक्षमाह । पूर्ववत् पूर्वाधिकरणसिद्धान्तरीत्या पात्नीवते सोमभक्षे सर्वेषां देवतानामुपलक्षणं कर्तव्यम् 'वाग्विन्द्रवायुमित्रावरुणाश्व्यादित्यपत्नीवत्पीतस्य' इति पठनीयम् ।

ग्रहणाद् वाऽपनीतः स्यात् । ३४ ॥

वाशब्दः पूर्वाधिकरणसिद्धान्तवैषम्यं सूचयति । पुनरभ्युन्नीतांशस्यैव उन्नयनेन मित्रावरुणादिदेवताऽन्तरार्थतया तत्संसृष्टस्यापि ऐन्द्रशेषस्य मित्रावरुणादिदेवताऽन्तरसंबन्धाभावात् न पूर्वदेवताऽपनयः इति युक्तम् । 'आग्रयणात् पात्नीवतं गृह्णाति' इति पात्नीवते तु द्विदेवत्यादिशेषसंसृष्टात् आग्रयणात् गृह्यमाणस्य संसृष्टत्वरूपेणैव पत्नीवद्रूपदेवताऽन्तरार्थतया ग्रहणात् पूर्वशेषः पूर्वदेवतासंबन्धादपनीतः स्यात् । तस्मात् पात्नीवतशेषभक्षमन्त्रे 'पत्नीवत्पीतस्य' इत्येवोहः । **के.**

* पात्नीवते त्वष्टुरतन्त्रता । वा. ३।१।१५।२६ । 'पर्यग्निकृतं पात्नीवतमुत्सृजन्ति' इत्यत्र पत्नीवच्छब्दस्य पशूपलक्षणार्थत्वात् त्वष्टुरनादरः 'पात्नीवतेऽनुपूर्वत्वादवच्छेदः' (२।३।८।१९) इत्यत्रोक्तः । सु. पृ. १०७३.

पात्नीवते पशौ 'आज्येन शेषं संस्थापयति' इति वाक्येन कर्मान्तरविधानम् ॥

आज्यसंस्था प्रतिनिधिः स्याद् द्रव्योत्सर्गात् । ९।४।१४।५६ ॥

भाष्यम्– 'पर्यग्निकृतं पात्नीवतमुत्सृजति' इति प्रकृत्य श्रूयते 'आज्येन शेषं संस्थापयति' इति । तत्र संदेहः किमाज्यं पूर्वस्मिन् (कर्मणि) प्रतिनिधीभूतम्, अथवा आज्यद्रव्यकं पूर्वस्मात् कर्मान्तरं विधीयते इति । किं प्राप्तम्? प्रतिनिधिरिति । कुतः? पात्नीवतमिति द्रव्यमुच्यते । उत्सृजति इति तत्रैव उत्सर्गः श्रूयते । शेषं इति उपयुक्तेतरत् विद्यमानं गम्यते । तत् आज्येन संस्थापयति इति पशोः कार्ये आज्यं श्रुतं भवतीति । ननु पूर्वकर्म परिसमाप्तमित्युक्तम् । अत्रोच्यते ।

द्रव्योत्सर्गवचने प्रत्यक्षे, शेषशब्दे वा अपरिहृते पुनरसमाप्तं पूर्वकर्म इत्याशङ्क्यते। तस्मात् प्रतिनिधीयते आज्यं इत्याशङ्कामहे। संस्थापयति इति चापूर्वे नोपपद्यते।

समाप्तिवचनात् । ५७ ॥

भाष्यम्-- इतश्चाशङ्कामहे। समाप्तिवचनमिदं भवति 'संस्थापयति' इति। तेन मन्यामहे यत् पूर्वं पशुना आरब्धम्, तत् उत्सृष्टे पशौ आज्येन परिसमाप्यते इति। अपूर्वस्यात्र कर्मण उच्यमानस्य आरम्भ एव वक्तव्यो भवति। यतस्तु अनभिधाय आरम्भं परिसमाप्तिरेवोच्यते, ततोऽवगच्छामः पूर्वस्यैव परिसमाप्तिः, नापूर्वं कर्म चोद्यते इति।

चोदना वा, कर्मोत्सर्गादन्यैः स्यादविशिष्टत्वात् । ५८ ॥

भाष्यम्-- कर्मान्तरचोदना वा। कुतः? पूर्वस्य कर्मणः परिसमाप्तत्वात्। ननूक्तं द्रव्योत्सर्गे शेषवचने वा अपरिहृते पूर्वकर्मणः असमाप्तिराशङ्किता भवति। अत्रोच्यते। इदं द्वयमपि परिह्रियते। संस्थापयति इति प्रकृतेन पात्नीवतशब्देन संबध्यते। तत्रायमर्थः, 'पात्नीवतं संस्थापयति' इति। स एष यागो विधीयते। संपूर्वश्च स्थापयतिः प्रयुज्यते। अवश्यं कश्चित् धातुः संपूर्वो भावनावचनस्य प्रयोक्तव्य इति। तत्राविरुद्धो भावनायामुच्यमानायां अर्थप्राप्तः संस्थापयतिः आलभतिरिव प्रयुज्यते, शेषशब्दैश्च एवं सादृश्यात् प्रयुज्यते। द्रव्योत्सर्गश्च अविरुद्धः एव यागे उच्यमाने। तस्मात् यथा अन्ये निर्वपत्यादयः कर्मान्तरविधाने भवन्ति, एवं तैरविशिष्टत्वात् संस्थापयतिरपि भवितुमर्हतीति।

अनिज्यां च वनस्पतेः प्रसिद्धां तेन दर्शयति । ५९ ॥

भाष्यम्-- प्रसिद्धां वनस्पतेरनिज्यां अत एव दर्शयति। कथम्? 'यत् त्वष्टारं च वनस्पति(तिं चावा)मावाहयसि, अथ वैतौ यक्ष्यसि, त्वाष्ट्री नवमी प्रयाजेज्या, वानस्पत्या दशमी। अत्रैवैतौ इष्टौ विद्यात्' इति अङ्गान्तरेण अनुग्रहं ब्रुवन् वनस्पतीज्याया अभावं दर्शयति। शेषपरिसमाप्तौ सत्याम् 'वनस्पतिं जुहोति' इति वनस्पतीज्या क्रियते। अथ परिसमाप्तं पूर्वं कर्म, ततो लुप्ता स्यात्, तत्र अभावदर्शनमुपपद्यते। तस्मात् पूर्वकर्म परिसमाप्तम्। इदमपि कर्मान्तरमिति।

संस्था तद्देवतत्वात् स्यात् । ६० ॥

भाष्यम्-- अथ यदुक्तम् 'संस्थापयति इति चापूर्वे नोपपद्यते' इति, तत् परिहर्तव्यम्। अत्रोच्यते। असंस्थायां संस्थावचनमेतत्। तदपि पूर्वं पात्नीवतमिति समानदेवतत्वात्, समाप्तिसादृश्यं ज्ञायते। तत्र तत् पात्नीवतमारब्धम्, इह परिसमाप्तमिति। स एष सादृश्यात् संस्थापयति इति शब्दः अवकल्पते इति।

सोम-- पूर्वाधिकरणे 'आज्येन शेषं (सं)स्थापयति' इतीदं लिङ्गदर्शनेन प्रसक्तम्। तत्र च यागान्तरविधित्वे एव तस्य लिङ्गत्वमुपपद्यते इति तस्य यागान्तरविधित्वसमर्थनात् **संगतिः। सूत्रार्थस्तु--** 'आज्येन शेषं (सं)स्थापयति' इत्यत्र आज्यं प्रतिनिधिः स्यात् पशुद्रव्यस्य उत्सृष्टत्वेन कर्मणो द्रव्यापेक्षत्वादिति।

वि-- 'आज्येन शेषमित्युक्तौ द्रव्यप्रतिनिधिर्भवेत्। कर्मान्यद् वा, ऽग्रिमस्त्यागशेषसंस्थापनोक्तिभिः ॥, अङ्गरीत्या समाप्तत्वाद् देवतोक्त्यनुवर्तनात्। साम्याच्छेषः संस्थितिस्तु याग आलम्भनादिवत् ॥'

भाट्ट-- पात्नीवतवाक्ये पुनराक्षेपः। तत्र हि 'पर्यग्निकृतं पात्नीवतमुत्सृजति' इत्युक्त्वा 'आज्येन शेषं संस्थापयति' इति श्रुतम्। अपूर्वत्वे हि शेषसंस्थाऽनुपपत्तेः पर्यग्निकरणवाक्ये पर्यग्निकरणाव्यवहितोत्तरमेव प्रधानयागकर्तव्यता अपकृष्य विधीयते। तत्करणे च विशसनादिपदार्थलोपेऽपि अन्याङ्गलोपे प्रमाणाभावात् शेषं यत् स्विष्टकृत्प्रयाजादि, तत् आज्येन संस्थापयति इति विधीयते। यद्यपि च प्रयाजादौ आज्यं प्राप्तमेव, तथापि स्विष्टकृद्वनस्पतियागादौ आज्यविधिर्न विरुध्यते। न च विशसनाभावादेव त्र्यङ्गासंभवात् 'यस्य सर्वाणि हवींषि' इत्यनेनैव स्विष्टकृत्यपि आज्यप्राप्तिः शङ्क्या, नाशादिनिमित्ताभावेन तदप्राप्तेः। विशसनस्य अङ्गप्रधानसाधारण्येन त्र्यङ्गार्थमपि प्राप्त्युपपत्तेश्च। वनस्पतियागादौ आज्यविधेरपि उपपत्तेश्च। नहि अत्र कर्मान्तरत्वे किञ्चित् प्रमाणमस्ति, प्रत्युत शेषसंस्थापदयोरनुपपत्तिः।

इति प्राप्ते, 'यत् त्वष्टारं च वनस्पतिं (च) आवाहयसि अथ वैतौ यक्ष्यसि' इति पृष्टे 'त्वाष्ट्री नवमी प्रयाजेज्या, वानस्पत्या दशमी, अत्रैवैतौ इष्टौ विद्यात्।' इति वनस्पतियागस्य अङ्गान्तरेण अनुग्रहवचनेन अभावावगतेः, तस्य च अपूर्वत्वमन्तरेण अनुपपत्तेः न पूर्ववाक्ये प्रधानापकर्षमात्रविधिः, अपितु तदन्ताङ्गरीतिविधिरेव अपूर्वत्वफलकः। यद्यपि चाक्रियमाणस्य वनस्पतियागस्य देवताऽऽवाहनमपि नैव प्राप्यते, तथापि सिद्धवन्निर्देशान्यथाऽनुपपत्त्यैव आवाहनविधिकल्पना। त्वष्टुस्तु प्रधानदेवतात्वादेवावाहनाविरोधः, प्रक्षेपाभावाभिप्रायेण च नवम्या अनुग्रहोक्तिः। अतश्च पूर्वकर्मणि शेषाभावेन आज्यविधानानुपपत्तेः गुणात् कर्मान्तरमेवेदं आज्यद्रव्यकं अनुषक्तपत्नीवद्देवत्यं उपांशुयाजप्रकृतिकम्। शेषसंस्थाशब्दौ तु पूर्वस्य कर्मणः असमाप्तप्रायतया कथञ्चित् अनुवादकाविति। सिद्धस्त्रिविध ऊहः। १३.

मण्डन-- 'संस्थाज्येन पृथग्यजिः।' १४.

शंकर-- 'आज्यशेषवचस्यपि।' यागः। १५.

* **पात्नीवताधिकरणम्** । ३।२।१३।३३-३४. 'पूर्वदेवतानुपलक्षणाधिकरणम्' इत्यत्र द्रष्टव्यम्।
* पात्नीवताधिकरणम्। २।३।८।१९. **मीको** पृ. १९९० 'त्वाष्ट्रपात्नीवताधिकरणम्' इत्यत्र द्रष्टव्यम्।

* (देवताकर्तृक)स्वीकाराङ्गीकरणावश्यकत्वं **पात्नीवताधिकरणादौ** उपपादितम्। **कौ.** ३।२।१८।४०.

* विधिस्थस्य निःसंदिग्धस्य पात्नीवतपदस्य देवतापरत्वोपपत्तेः यागानुमापकत्वं इति **पात्नीवताधिकरणपूर्वपक्षन्यायस्वरूपम्** । **कौ.** २।३।८।१९ पृ. ५५.

* **पात्नीवतग्रहस्य** याज्यामन्त्रः 'ऐभिरग्ने सरथं याह्यर्वाङ्०' इति। **भा.** ३।२।१५।३७. * पात्नीवतग्रहस्य होममन्त्रः 'अग्ना३इ पत्नीवा३न् सजूर्देवेन त्वष्ट्रा सोमं पिब स्वाहा' इति। **वि.** ३।२।१४.
* **पात्नीवतग्रहे** पत्नीवानेव उपलक्षणीयः नान्यदेवता। **वा.** ३।२।१३।३३-३४.

* **पात्नीवतभक्षणाधिकरणम्** । पात्नीवतग्रहभक्षणे पूर्वदेवता इन्द्रादयो नोपलक्षणीयाः, किन्तु 'पत्नीवत्पीतस्य' इत्येव पठनीयम्। (कृत्वाचिन्ता। वस्तुतस्तु 'इन्द्रपीतस्य' इत्येव पठनीयम्। **के.**)। ३।२।१३।३३-३४. 'पूर्वदेवताऽनुपलक्षणाधिकरणम्' इत्यत्र द्रष्टव्यम्।

* **पात्नीवतयागे** साक्षात् पशुरेवाङ्गम्, न तु हृदयादीनि 'पर्यग्निकृतं पात्नीवतमुत्सृजन्ति' इति उत्सर्गविधानात्। **मीन्या.**

* **पात्नीवतसोमभक्षणे** त्रयस्त्रिंशतां देवानां नोपलक्षणम्। कृत्वाचिन्ता। ३।२।१५. **मीको.** पृ. १९६७ 'त्रिंशदधिकरणम्' इत्यत्र द्रष्टव्यम्।

* **पात्नीवतसोमभक्षणमन्त्रे** ('पत्नीवत्त्वष्टृपीतस्य' इति) त्वष्टुर्नोपलक्षणम्। (कृत्वाचिन्ता)। ३।२।१४. **मीको.** पृ. १९८९ 'त्वष्ट्रधिकरणम्' इत्यत्र द्रष्टव्यम्।

* **पात्रं** अनुयाजार्थपृषदाज्यधारणार्थं प्रयाजाज्यपात्राद्भिन्नं अग्नीषोमीये पशौ। ५।२।८।१६. * पात्रं प्रयाजशेषधारणार्थं शेषधारणं च वाजपेयगतप्राजापत्यपशुवपाऽभिघारणार्थं न कर्तव्यम्। ४।१।१४. * पात्रं वारणवैकङ्कतादिजन्यं दर्शपूर्णमासादिसर्वयज्ञेषु विनियुज्यते। **वि.** ३।१।१२. * पवित्रं हि सोमः, न तस्मिन् भक्षिते **पात्रं** व्यापद्यते। तत्र चमसेन शक्यते होतुम्। **भा.** ३।५।७।२२. * **पात्राणि** 'आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्च' इति यज्ञपात्राणां प्रतिपत्तिः। 'दक्षिणे पाणौ जुहूमासादयति'। ततश्च यज्ञपात्राणि प्रथमप्रयोगमारभ्य आमरणान्तं धार्याणि। इति पुनः पुनः प्रयोगान्तरेषु तान्येव प्रयोक्तव्यानि। **वि.** ११।३।१३, * पात्राणि एकस्मिन् प्रयोगे प्रयुक्तान्यपि पुनः प्रयोगान्तरे प्रयोगानर्हाणि न भवन्ति। प्रक्षाल्य ग्राह्याणि। ११।३।१२। तान्येव पात्राणि प्रक्षाल्य पुनः पुनर्ग्राह्याणि, न तु इच्छया भेदः। अन्त्येष्टिपर्यन्तं तद्धारणस्यावश्यकत्वात्। ११।३।१३. * 'पात्राणि तु दहेदग्नौ यजमाने वृथा मृते' अयं क्रियाप्रतिनिधिनियमविधिः। **बाल.** पृ. २३.
* पात्राणि सत्रे साधारणानि पृथगेव कर्तव्यानि। ६।६।६।३३-३४. * **पात्रैः** ऐष्टिकैरेव सौम्यचरोः सवनीयपुरोडाशादीनां च ज्योतिष्टोमे होमः, न तु सौमिकैः चमसादिभिः प्रसङ्गसिद्धिः। १२।१।४।१०-११,
* **पात्राणां** यज्ञावचरवाक्येन प्रकरणादाधानाङ्गत्वबाधः।

सु. पृ. १०६३. * पात्राणां यज्ञियानामाधानमारभ्यैव यावज्जीवं धारणं कर्तव्यम् । ११।३।१४. * पात्रे एकस्मिन् बहुभिः सोमभक्षणे होतुः प्रथमं भक्षः । ३।५।१३।३६–३९.

पात्रेषु च प्रसङ्गः स्याद्धोमार्थत्वात् । १२। १।४।१०॥

सोमे यानि दर्शपूर्णमासप्रकृतीनि कर्माणि यथा सवनीयः पशुः, सवनीयाः पुरोडाशाः, सौम्यश्चरुः इति, तेषां होमः दार्शिकैः पात्रैः कर्तव्यः । पात्रेषु च वेद्यामिव प्रसङ्गः स्यात् । यथा सौमिक्या वेद्या दार्शिक्या प्रसङ्गः, तथा सौमिकैः पात्रैः दार्शिकपात्राणां प्रसङ्गः । होमार्थत्वात् सौमिकान्यपि पात्राणि होमार्थानि । तस्मात्तैः सिद्धिः इति पूर्वः पक्षः ।

न्याय्यानि वा प्रयुक्तत्वादप्रयुक्ते प्रसङ्गः स्यात् । ११ ॥

सोमे यानि दर्शपूर्णमासप्रकृतिकानि कर्माणि, तेषां होमे दार्शपूर्णमासिकानि पात्राणि प्रयोक्तुं न्याय्यानि । दार्शिकैः पात्रैः तादृशो होमः कर्तव्यः । प्रयुक्तत्वात् सौमिकतन्त्रात् प्राक् आज्यासादनान्तस्य प्राकृतस्य तन्त्रस्य प्रक्रान्तत्वात् 'अथ यद्गृहीत्वा आज्यानि सोममासादयेयुः अपघ्नन्ति यजमानम्' इति वाक्येन । अप्रयुक्ते यदि दार्शिकं पात्रं प्रयुक्तं न स्यात् तदा सौमिकैः पात्रैः दार्शिकानां पात्राणां प्रसङ्गः स्यात् । तानि तु अत्र प्रयुक्तान्येव पूर्वं इति दार्शिकैरेव सवनीयपुरोडाशादिहोमः स्यात् इति सिद्धान्तः । **के.**

* पात्रेषु दार्शपौर्णमासिकेषु सवनीयपुरोडाशसौम्यचरुहोमयोः सौमिकैः पात्रैर्न प्रसङ्गः । ज्योतिष्टोमे । १२।१।४।१०–११.

पात्रापात्रविचारस्तु धेनुपन्नगयोरिव, इति न्यायः । यथा– 'तृणात्संजायते क्षीरं क्षीरात्संजायते विषम्' इति । गावस्तृणं खादन्ति क्षीरं ददति । सर्पाश्च क्षीरं पिबन्ति विषं ददति । एवं ज्ञात्वा पात्रापात्रविचारः कर्तव्य इति भावः । **साहस्री.** ७५७.

* **पात्रन्यायेन** प्रधानस्रुगपेक्षया संमार्गस्रुचां भेदेन कर्तुं शक्यत्वात् न प्रसङ्गोपपत्तिः (पात्रभेदन्याय एवायम्। ५।२।८।१६)। **कौ.** २।१।५।१२ पृ. ८५, * न च एवमपि **पात्रन्यायेन** हविरासादनरूपस्य कार्यस्य पृथगनुष्ठेयत्वात् न प्रसङ्गोपपत्तिः, कर्तृप्रचारार्थमनुष्ठितेनैव सौमिकवेदिकरणेन अदृष्टविशेषावच्छिन्नाहवनीयप्रत्यग्देशरूपाया वेदेः सिद्धत्वात् ऐष्टिकवेदिकरणनिवृत्त्या प्रसङ्गोपपादनात् । २।१।५।१२ पृ. ८४–८५.

* सांनाय्य**पात्रप्रोक्षणे** 'शुन्धध्वम्' इत्यादिर्मन्त्रः संनिधिपाठात् विनियुज्यते । **वि.** ३।३।५.

पात्रभेदन्यायः । पात्रन्यायः । अग्नीषोमीये पशौ अनुयाजार्थस्य पृषदाज्यस्य धारणार्थं पात्रं भिन्नम् ॥

विकारे त्वनुयाजानां पात्रभेदोऽर्थभेदात् स्यात् । ५।२।८।१६ ॥

भाष्यम्— अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः । तत्र श्रूयते 'पृषदाज्येन अनुयाजान् यजति' इति । तत्र संदेहः किं प्रयाजानुयाजानामेकं पात्रं आज्यस्य पृषदाज्यस्य च धारणार्थम्, उत भिद्यते । किं प्राप्तम् ? एकमिति । कुतः ? प्रकृतौ एकम् । प्रकृतिवदिहापि एकेन भवितव्यम् । **एवं प्राप्ते, ब्रूमः** । पात्रभेदः स्यात् । कुतः ? अर्थभेदात् । शुद्धस्य प्रयाजा अर्थः, पृषतोऽपि अनुयाजाः । पृषति गृह्यमाणे प्रयाजानां वैगुण्यम्, शुद्धे अनुयाजानाम् । न च एकस्मिन् पात्रे विविक्तं शक्यं कर्तुम् । मर्यादायामपि क्रियमाणायां प्रदीयमानं संसृज्येत । अपि च आकारभेदात् उपभृतः उपभृत्त्वं विहन्येत । पाणिमात्रपुष्करा हि सा एकपुष्करा च । अथोच्येत पृषदाज्यमपि आज्यमेव इति मिश्रत्वं न दोषायेति । नैतदेवम् । प्रकृतौ उत्पवनावेक्षणयोः प्रयोजनमेतत् यत् आज्यस्य अपरेण द्रव्येणासंसर्गः । एवं चेत् अनुपपन्नम्, यत् प्रयाजाः पृषदाज्येन इज्येरन्निति । अपि च एवं सति अवश्यं हविषः का चिन्मात्रा अपनीयते । न च शक्यं प्रयाजकार्ये अवसिते अनुयाजार्थं ग्रहीतुम् । प्रकृतौ एककालं ग्रहणम् । इहापि एककालमेव कर्तव्यम् । तस्मात् पात्रभेद इति ।

टुप्— (पूर्वपक्षमाह—) प्रकृतौ उपभृतः एकत्वम् ('अष्टावुपभृति गृह्णाति' इत्युपादेयगतत्वात्) विवक्षितमिति (हेतोः) तत्रैव पृषदाज्यग्रहणं प्राप्नोति कालान्तरे । तत्र यथा सत्यपि प्रधानकालत्वे अङ्गानां कर्तुरेकत्वाद्विप्रकर्षः, न तु विप्रकर्षदोषात् कर्त्रन्तरमुपादीयते, एवमाज्यपृषदाज्ययोर्भेदेऽपि नैव पात्रान्तरमुपादेयम् । (तदेकत्वानुग्रहार्थं तु विप्रकर्ष एवाङ्गीकर्तव्य इति) **एवं प्राप्ते, ब्रूमः** । यथैव हि प्रकृतौ एकपात्रता विवक्षिता एवमेककालता । इह तु (यत्र द्रव्यभेदात् उभयानुग्रहासंभवः) ऐककाल्यं विवक्षितम् (नैक पात्रत्वम्)। किं कारणम् ? प्रयाजाज्यं गृह्यमाणं मन्त्रब्राह्मणपाठक्रमात् अनुयाजाज्यग्रहणमुपस्थापयति । (एवं तावत् विवक्षितमपि पात्रैकत्वमिह बाध्यते इति सिद्धान्तितम् । मतान्तरमाह–) अथवा, 'अष्टावुपभृति गृह्णाति' इति असंयुक्तोत्पन्नस्य (चतुर्ग्रहणद्वयस्य केवलम्) वाक्यान्तरेण ('यदुपभृति, प्रयाजानुयाजेभ्यस्तत्' इत्यनेन) प्रयाजानुयाजार्थता कृता, न तु उपभृत् (प्रयाजानुयाजाङ्गत्वेन) विधीयते (नतरां तदेकत्वम्)। अर्थलब्धा तु सा (यत्रक्वचन पात्रे ग्रहीतव्ये सति जुहूध्रुवयोः आज्यान्तरधारणे व्यापृतत्वात् अव्यापृता उपभृत् अनूद्यते)। न च अर्थप्राप्तं विवक्षितमित्युच्यते । तस्मात् भिन्नत्वात् द्रव्ययोः अर्थात् पात्रभेदः । (अयं विचारः क्रमलक्षणे कथमुपनिपतितः अत आह–) पूर्वोत्तरपक्षयोः क्रमान्यत्वेन उपनिपातः । (पूर्वपक्षे प्रयाजहोमानन्तरं पृषदाज्यग्रहणम्, सिद्धान्ते तु प्राकृते एव स्थाने इति)।

शा— किं कालभेदेन तस्यामेवोपभृति प्रयाजाज्यं अनूयाजपृषदाज्यं च द्वयं ग्रहीतव्यम्, उत एककाले पात्रभेदेनेति चिन्त्यते । तत्र '**पदार्थत्वात् श्रुतत्वाच्च पात्रैकत्वस्य संग्रहः । गुणत्वात् पाठकल्प्यत्वात् क्रममात्रं तु बाध्यते ॥**' ततः एकस्मिन्नेव पात्रे प्रयाजाज्यं प्रथमं गृहीत्वा प्रयाजेषु हुतेषु पश्चात् पृषदाज्यं ग्रहीतव्यम् । इत्येवं प्राप्ते, उच्यते । '**उभयोर्ग्रहणाङ्गत्वात् पात्रैक्यस्य क्रमस्य च । विकृतौ चानुमानेन प्राप्तेस्तुल्यं बलाबलम् ॥**' तथा च आज्यग्रहणकाले एव पात्रान्तरमुपादाय पृषदाज्यं ग्रहीतव्यम् । ७.

सोम— पूर्वत्र उलूखलैक्यवत् इह उपभृदैक्यं इति प्रत्यवस्थानात् **संगतिः । सूत्रार्थस्तु–** विकारे पशौ अनूयाजानामर्थभेदात् द्रव्यभेदात् पात्रभेदः स्यादिति ।

वि— 'प्रयाजानूयाजसिद्ध्यै पात्रैक्यमुत भिन्नता ।, एकोपभृद् द्वयोरर्थे दृष्टाऽतो विकृतौ तथा ॥, विकृतौ पात्रभेदोऽस्तु शुद्धाज्यपृषदाज्ययोः । एकपात्रे ग्रहाशक्तेर्द्रव्यैक्यं प्रकृतौ द्वयोः ॥' तस्मात् पृथक् पात्रम् ।

भाट्ट— दैक्षे पशौ अनूयाजानाम् 'पृषदाज्येनानूयाजान् यजति' इति पृषदाज्यं श्रुतम् । प्रयाजानां तु शुद्धमेवाज्यं प्रकृतिप्राप्तम् । प्रकृतौ च उपभृति एकस्मिन्नेव पात्रे प्रयाजाङ्गभूतं चतुर्गृहीतं गृहीत्वा तस्मिन्नेव काले अनूयाजार्थं चतुर्गृहीतं गृहीतमासीत् । अत्रापि तथैव ग्रहणे प्रयाजाज्यस्य दधिसंसर्गेण उत्पवनावेक्षणयोः अदृष्टार्थत्वप्रसङ्गेन अप्राकृतकार्यकारितापत्तेः समानयनवेलायां प्रयाजाज्यस्य न्यूनत्वापत्तेश्च । अतोऽवश्यं पात्रैकत्वमनुगृह्य क्रमो बाध्यतां विपरीतं वा इति चिन्तायाम्, पात्रैकत्वस्य श्रुतत्वात् पदार्थत्वाच्च बाधानुपपत्तेः क्रमस्यैव मन्त्रपाठकल्प्यत्वेन पदार्थगुणत्वेन च दौर्बल्यात् शिष्टाकोपाधिकरणन्यायेन (१।३।३।५–६) बाधः । एवम् 'अष्टावुपभृति' इत्येतद्वाक्यावगम्यचतुष्कद्वयसाहित्यबलकल्प्यैककालत्वस्यापि बाधः । **न च** प्रकृतौ तयोः क्लृप्तकल्प्यत्वादिना बलाबलेऽपि विकृतौ अतिदेशेन प्राप्तयोस्तयोः समत्वात् न बलाबलमिति **शङ्क्यम् ।** क्लृप्तकल्प्यत्वादिरूपबलाबलस्य विकृतौ असंभवेऽपि पदार्थतद्गुणत्वादिकृतबलाबलस्य विकृतावपि नियामकत्वोपपत्तेः । संभवति विकृतौ नियामकान्तरासत्त्वे प्राकृतस्यापि बलाबलस्य सप्तदशशरावे चरौ चतुःसंख्यामुष्टिनिष्ठप्राथम्यजघन्यत्वस्येव नियामकता । अतः तस्मिन्नेव पात्रे अनूयाजकरणवेलायां पृषदाज्यग्रहणम् । इति **प्राप्ते,** पात्रैकत्वस्य पदार्थत्वेऽपि अनुष्ठेयपदार्थमात्रवृत्तिक्रमस्य तद्धर्मत्वाभावात्, प्रत्युत साक्षाद्ग्रहणाङ्गभूतक्रमककालाद्यपेक्षया ग्रहणाङ्गभूतपात्राङ्गैकत्वस्य अङ्गगुणविरोधन्यायेन दौर्बल्यात् तदैव उपभृद्द्वयं संपाद्य शुद्धं दधिसंस्कृतं च चतुर्गृहीतद्वयं ग्राह्यम् ।

मण्डन— 'भिन्नं पशौ स्यात् पृषदाज्यपात्रम् ।'

शंकर— 'पृषदाज्ये पात्रभेदः ।'

* **पात्री** तन्त्रेणैका राजसूये नानाबीजेष्टौ । **भाट्ट.** ५।२।७. * **पात्र्याम्** 'स्योनं ते सदनम्' इत्यादिपूर्वार्धरूपमन्त्रेण आज्येन पुरोडाशस्य सदनं कृत्वा 'तस्मिन् सीद' इति मन्त्रेण पुरोडाशासादनं कार्यम्। **वि.** ३।३।८.

* **पाथिकृतादीनां** नैमित्तिकानां यागानां पाठक्रमो न नियामकः, किन्तु यथानिमित्तमनुष्ठानम्। ५।३।१२.

* **पाथिकृतीष्टिर्वैश्वानरेष्टिर्वा** दर्शस्य पूर्णमासस्य वा स्वकाले अकरणे प्रायश्चित्तं विकल्पेन। १२।३।५।१६.

* **पादनिचृत्** गायत्री। पादेषु अक्षराणि ७।७।७। उदा० 'त्वावतः पुरूवसो' (ऋसं. ८।४६।१)। **के.**

* **पादप्रग्रथनेन** ब्रह्मसामगानं गवामयने। **वि.** ९।२।६ वर्णकं ४.

* **पादव्यवस्था** ऋक्षु अपर्यवसितेऽर्थे वृत्तवशेन। **वा.** २।१।१०।३५.

* **पादसंगतिः** । पादानां ऐकार्थ्यनियमाभावात् नावश्यं सर्वत्र पादसंगतिः अपेक्षणीया। एकप्रकरणगतानां तु अधिकरणानां प्रकरणप्रतिपाद्यैकार्थ्यान्वयाय प्रकरणसंगतिः अवश्यापेक्षणीया। **सु. पृ.** ३७०.

* **पादिनः** ऋत्विजः । पादोऽस्ति प्रत्येकं येषां दक्षिणायाश्चतुर्थांशः ते पादिनः। द्वादश गावः पूर्णा दक्षिणा, तत्पादः तिस्रो गावः। उन्नेता अध्वर्योः, पोता ब्रह्मणः, ग्रावस्तुत् होतुः, सुब्रह्मण्यः उद्गातुः, एते पादिनः। **वि.** १०।३।१३.

पानव्यापच्च तद्वत्। ३।४।१२।३२॥

'सोमेन्द्रं चरुं निर्वपेत् श्यामाकं सोमवामिनः' इति श्रूयते। अयं चरुः किं लौकिके सोमवमने यत् सत्तरात्रेषु दशरात्रेषु वा धातुसाम्यार्थं आसेव्यमाने सोमे सति कदा चित् जायमाने, किंवा ज्योतिष्टोमे तद्विकृतिषु वा सोमे पीते जायमाने वमने स्यात् इति विचारे पूर्वपक्षमाह। पानव्यापत् यदि पीतस्य सोमस्य व्यापत् वमनं स्यात् लौकिकविषयम्, तदा इयं श्यामाकेष्टिः स्यात्। तद्वत् अश्वप्रतिग्रहेष्टिपूर्वपक्षवत्। लोके धातुसाम्यार्थमासेविते सोमे वमनेन विनष्टे धातुसाम्यं न स्यात्। इन्द्रियबलहानिः स्यात् इति लौकिके सोमवमने दोषः स्यात्। वैदिके तु न दोषः स्यात्। तत्र हि 'शेषः पातव्यः' इति शास्त्रात् चोदिते निष्पादिते यद्यपि वम्यते तथापि कृतः शास्त्रार्थः इति न दोषः स्यात्। तस्मात् लौकिकस्य सोमपानस्य व्यापदि वमने सोमेन्द्रश्चरुः स्यात् इति पूर्वः पक्षः।

दोषात्तु वैदिके स्यादर्थाद्धि लौकिके न स्यात्। ३३॥

पूर्वपक्षं सूत्रेण प्राप्तं तुशब्देन निरस्यन् सिद्धान्तमाह। वैदिके सोमपाने वमने सति सोमेन्द्रश्चरुः स्यान्न लौकिके। दोषात् वमने दोषश्रवणात् 'इन्द्रियेण वा एष वीर्येण व्यृध्यते यः सोमं वमति' इति। लौकिके हि यस्मात् अर्थात् धातुसाम्यं प्रयोजनमभिप्रेत्य सोमपाने कृते, सत्यपि वमने न दोषः स्यात्। वमनायैव हि तं पिबन्ति लोके। तस्मान्न लौकिके सोमेन्द्रश्चरुः स्यात्। वैदिके दोषात् चरुः, लौकिके तु दोष एव नास्ति इति सिद्धान्तः। **के.**

* **पानव्यापदि** वैदिकस्य पीतसोमपानस्य वमने एव सोमेन्द्रः श्यामाकश्चरुः प्रायश्चित्तम्, न लौकिकस्य। ३।४।१२।३२–३३। स च यजमानस्यैव वमने, न ऋत्विजः। ३।४।१३।३४–३६.

* **पानव्यापदधिकरणम्** । 'वमनाधिकरणम्' द्रष्टव्यम्। ३।४।१२।३२–३३.

* **पापमस्ति** अप्रतिग्राह्यात् प्रतिगृह्णतः वैदिकेऽपि प्रतिग्रहे। **भा.** ३।४।१०।२८. * **पापान्निवर्तयति** प्रतिषेधः। **वा.** ३।४।४।१३ पृ. ९११. * पापान्निवृत्तस्य प्रायश्चित्तश्रवणम्। **सोम.** ६।८।४.

* '**पापक्षयो** हि शुद्धत्वं धर्मयोग्यत्वमेव वा।' **वा.** १।३।२।४ पृ. १८९.

* **पापक्षयक्रतूपकारादिशेष्यर्थं** प्रयुज्यते दर्शादिकं भेदनहोमादिकं च। **बाल. पृ.** १०७.

* **पापफलं** हि (कर्म) अकर्तव्यम्। **भा.** ३।४।१०।२८. * विधेयं कर्म **पापफलं** न संभवति। **वा.** ३।४।१०।२८ पृ. ९५८.

* यदा द्रविडादिभाषायामीदृशी स्वच्छन्दकल्पना तदा **पारसी**बर्बरयवनरौमकादिभाषासु किं विकल्प्य किं प्रतिपत्स्यन्ते इति न विद्मः। **वा.** १।३।५।१० पृ. २२६.

* यज्ञान्तरधर्मभूतपश्चाद्भावावच्छेदकत्वेन ज्योतिष्टोमस्य परार्थतया उपादानात् '**पारार्थ्ये चैक इष्यते**' इत्यनेन **न्यायेन** एकस्यैव ज्योतिष्टोमस्य प्राथम्यावसायात् नैतद्वशेन सर्वशाखास्थानां द्वादशाहानां ज्योतिष्टोमपश्चाद्भावावगतिः। **सु. पृ.** ९८३.

* **पारिप्लवत्वम्** । परितः प्लवन्ते इति परिप्लवाः। ते एव पारिप्लवाः। तेषां भावः पारिप्लवत्वम्, अव्यवस्था इति यावत्। **सोम.** ७।१।१.

पारिषदन्यायः । 'समज्या परिषद् गोष्ठी सभा' इत्यभिधानात् परिषदि सभायां साधुः पारिषदः सभ्यः। तेषामेकस्मिन् मृतेऽपि अवशिष्टैस्तत्कार्यनिर्वाहो यथा भवति, तथा प्रकृतेऽपीत्यर्थः। **साहस्री.** १५.

* '**पार्थिवावयवप्रायाः** शेषतोयाद्यनुग्रहात्। जरायुजाद्यो देहा दृष्टा भुवि चतुर्विधाः॥' **वा.** ३।१।७।१३ पृ. ७०२.

* **पार्थुरश्मं** राजन्यस्य ब्रह्मसाम कुर्यात्। **भा.** ६।१।७।२८। इति द्वादशाहे भवति वचनम्। ६।६।३।१७। इति ज्योतिष्टोमे नैमित्तिकमेव न नित्यम्। ४।३।२।४. (वस्तुतस्तु इदं वचनं द्वादशाहे एव, ज्योतिष्टोमे नौधसं ब्रह्मसाम, न तु बार्हद्गिरादीनि तत्र श्रूयन्ते। भाष्यकारेण ज्योतिष्टोमग्रहणमनास्थया कृतमिति तन्त्ररत्नादौ स्पष्टम्)। * पार्थुरश्मं साम अश्वमेधे समाम्नायते। **टुप्.** ६।१।७।२८.

* **पार्वणौ** होमौ स्रुवेण जुहोति 'स्रुवेण पार्वणौ जुहोति' इत्युक्तत्वात्। **वा.** ३।६।१।१.

पार्वणन्यायः । पार्वणहोमयोर्विकृतौ नातिदेशः॥

पार्वणहोमयोस्त्वप्रवृत्तिः समुदायार्थसंयोगात् तदभीज्या हि। ९।२।१८।५०॥

भाष्यम्— स्तो दर्शपूर्णमासौ। तत्रेदं समामनन्ति 'स्रुवेण पार्वणौ जुहोति' इति। सौर्यादिषु वैकृतेषु कर्मसु भवति संदेहः, किं तेषु पार्वणहोमौ कर्तव्यौ, न वेति। तत इदं तावत् परीक्ष्यम्, किं कालाभीज्या पार्वणहोमौ उत समुदायाभीज्येति। कालाभीज्यायां तयोः प्रवृत्तिः। समुदायाभीज्यायामप्रवृत्तिः। कुतः संशयः? उभयत्र प्रसिद्धेः। उभयत्र हि पर्वशब्दो लोके प्रसिद्धः, काले समुदाये च, आ हिमवत आ च कुमारीभ्यः। किं तावत्प्राप्तम्? कालाभीज्येति। ततः कालगता प्रसिद्धिर्व्यपदिश्यते। **एवं प्राप्ते, ब्रूमः।** पार्वणयोर्वैकृतेषु कर्मस्वप्रवृत्तिः। कुतः? समुदायार्थसंयोगात्। ततः समुदाये प्रसिद्धिर्व्यपदिश्यते। काले प्रसिद्धिं परिहरिष्याम इति। अतः समुदायवाचित्वात् पर्वशब्दस्य समुदायस्याभियष्टव्यत्वात् वैकृतेष्वप्रवृत्तिरिति।

कालस्येति चेत्। ५१॥

भाष्यम्— इति चेत्पश्यसि, कालस्य पर्वशब्दो वाचकः, तस्मात् कालाभीज्येति। तत् परिहर्तव्यम्। आभाषान्तं सूत्रम्। प्रकरणेन विशेष्यते।

(अत्र आनन्दाश्रमीये 'प्रकरणेन विशेष्यते' इति उत्तरसूत्रस्य अवतरणत्वेन सूत्रात् प्राक् मुद्रितम्। जीवानन्दीये बिबलकरीये च 'परेण विशेष्यते' इति पङ्क्तिः, सा च पूर्वसूत्रभाष्यान्ते लिखिता।)

नाप्रकरणत्वात्। ५२॥

भाष्यम्— नास्ति कालस्य प्रकरणम्। अस्ति तु समुदायस्य। तस्मात् प्रकरणेन विशेषेण समुदायवाची गृह्यते, न कालवाची। अत्राह। न प्रकरणेन शक्यते पर्वशब्दस्य कालवाचितां बाधितुम्। दुर्बलं हि लिङ्गात् प्रकरणम्। उच्यते। नायमुभयत्र पर्वशब्दो वर्तते। यदि कालवचनः, तत्संबन्धात् समुदाये गम्यते। यदि वा समुदायवचनः, तत्संबन्धात् काले। अन्यतरवचनो युक्तः, नोभयवचनः। तत्र समुदायवचने कल्प्यमाने प्रकरणमनुगृहीतं भवति। अपिच, पृणातेः पर्वशब्दः। पृणातिश्च दाने प्रसिद्धः। दानानि च समुदायाः। तस्मात् समुदायाभीज्या। एवं शब्दावयवप्रसिद्धिरनुगृहीता भवतीति। तस्माद्वैकृतेषु पार्वणयोरप्रवृत्तिः।

मन्त्रवर्णाच्च। ५३॥

भाष्यम्— मन्त्रवर्णाच्च फलवदनुवादो भविष्यति। 'ऋषभं वाजिनं वयं पूर्णमासं यजामहे' 'अमावास्या सुभगा सुशेवा' इति च। तस्मादपि समुदायाभीज्येति।

तदभावेऽग्निवदिति चेत् । ५४ ॥

भाष्यम्— नैतदस्ति, यदुक्तं वैकृतेष्वप्रवृत्तिरिति । तदभावेऽपि, यद्यपि समुदायवचनोऽयम्, न च वैकृतेष्वयमस्ति समुदायः, तथापि पार्वणहोमौ भवेतामेव । कुतः ? अन्या एवंशब्दिका देवता भविष्यन्ति । समुदायो वा असंनिहितोऽपि यक्ष्यते सौर्याद्युपकारार्थेन । यथा 'अग्निमग्न आवह' इति संनिहितः असंनिहितो वा अग्निर्यागार्थेन आवाह्यते । एवमिहापीति ।

नाधिकारिकत्वात् । ५५ ॥

भाष्यम्— नैतदेवम् । आधिकारिकं हीदं वचनं अधिकारे भवम्, यस्याधिकारस्तस्य गुणं विदधातीति । आग्नेयादीनां चाधिकारः । ते चात्र देवताः । तेषां होमो देवतार्थः । एवं यत्र सा देवता नास्ति, तत्र तदर्थो होमो न करिष्यते । तस्मात् पार्वणहोमयोर्वैकृतेभ्यो निवृत्तिः ।

(के–५०–५५ इति षट् सूत्राणि भाष्ये एकाधिकरणत्वेन व्याख्याय उत्तरे द्वे (५६–५७) सूत्रे अधिकरणान्तरत्वेन व्याख्याते । वार्तिककारेण तु तत् दूषयित्वा प्रकृताधिकरणप्रयोजनप्रतिपादनपरत्वेन ते सूत्रे व्याख्याते । तच्च वार्तिकं अत्र वा अधिकरणे निवेश्यं उत्तरस्मिन् भाष्यकारीयाधिकरणे वा निवेश्यं इति संकटे पतिता वयम् । परन्तु 'पार्वणहोमयोरन्यतरस्यैव' इत्युत्तराधिकरणे एव निवेशितमस्माभिरिति तत्रैव द्रष्टव्यम् ।)

शा— 'स्रुवेण पार्वणौ जुहोति' इति तद्धितश्रुत्या पर्वदेवत्यौ होमौ किं विकृतिषु अतिदिश्येते, नेति संशयः । (तदर्थं च किमारादुपकारकौ होमौ, उत संस्कारार्थौ इति, तदर्थं च किं पर्वशब्दः कालवचनः, उत आग्नेयादिसमुदायपरः इति चिन्ता ।) तत्र '**काले शब्दस्य मुख्यत्वात् कालाभीज्येह मन्यते । (सिद्धान्तमाह–) पृणातेर्दानकर्मत्वात् कर्मण्यपि च मुख्यता ॥**' पृणातेर्दानकर्मणः पर्वशब्दः । स च दीयते अस्मिन् इत्यधिकरणव्युत्पत्त्या कालेऽपि मुख्यः, भावव्युत्पत्त्या कर्मण्यपि ।

सोम— **सूत्रार्थस्तु–** पार्वणहोमयोर्विकृतिषु अप्रवृत्तिः, पर्वशब्दस्य कर्मसमुदायार्थपरत्वात् । तस्मात् तदभीज्येति ।

वि— 'सौर्यादौ पार्वणौ होमौ स्तो न वा, कालदेवकौ । स्तः, संघदेवकौ संघाविकारत्वान्न तत्र तौ ॥' ('ऋषभं वाजिनं वयं पूर्णमासं यजामहे' इत्यादिः पूर्णमासगतपार्वणहोममन्त्रः । 'अमावास्या सुभगा सुशेवा धेनुरिव भूय आप्यायमाना' इत्यादिः दर्शगतपार्वणहोममन्त्रः ।)

भाट्ट— दर्शपूर्णमासयोः 'स्रुवेण पार्वणौ होमौ जुहोति' इति श्रुतम् । तत्र संख्याभिन्नं कर्मद्वयं स्रुवपर्वदेवताविशिष्टं विधीयते । न च हविःसमभिव्याहाराभावात् नायं देवतातद्धितः, संबन्धसामान्यवाचिन एव योग्यतया देवतापरत्वोपपत्तेः । तदिदं होमद्वयं विकृतावतिदिश्यते न वेति चिन्तायाम्, प्रयाजवदतिदेशसंभवः । न च पर्वशब्दवाच्यकर्मसमुदायस्यैवात्र देवताभूतस्य उद्देश्यांशे संस्कारात्, तस्य च विकृतौ अभावान्नातिदेशः, पर्वशब्दस्य काले मुख्यतया कर्मणि लक्षणाङ्गीकारे प्रमाणाभावात् । अतोऽत्र कालस्यैव देवतात्वात्, तस्य चासंस्कार्यत्वात् आरादुपकारकयोरनयोर्युक्त एवातिदेशः । **यदि तु** कालस्यापि कर्माङ्गतयोपयोगात् स्मृतिबलेन सर्वादौ स्मृतस्यापि पुनराकालिकत्वसंभावनानिमित्तकाश्रद्धापरिहारार्थं कर्मवदेव स्मरणोपपत्तेः सामवायिकत्वलाभाय कालसंस्कारकत्वमिष्येत, **तथापि** विकृतौ तत्कालीनायामतिदेशे बाधकाभावात् । अन्यकालीनायामपि पशुपुरोडाशादिवत् ऊहेनातिदेशोपपत्तेर्न काचित् क्षतिः । अस्तु वा पर्वशब्दस्य पृणातेर्दानवाचित्वात् अधिकरणव्युत्पत्त्या कालवाचित्ववत् भावव्युत्पत्त्या कर्मवाचित्वस्यापि संभवात् प्रकरणात्कर्मपरत्वमेव, तथापि पर्वशब्दवाच्यस्यापि आग्नेयादिसमुदायस्य विकृतावपि देवतात्वसंभवादारादुपकारकयोः अनयोरतिदेशे न किञ्चिद्बाधकम् । **यदि तु** संनिपत्योपकारकत्वलाभार्थं देवतासंस्कारकत्वमिष्येत, **तथापि** पर्वत्वस्य दानत्वापरपर्यायस्य प्रत्येकमाग्नेयादिवृत्तितया समुदायवृत्तित्वाभावादपूर्वसाधनत्वेन रूपेण आग्नेयादीनां प्रत्येकमेवोद्देश्यत्वावगतेः हविरभिमर्शनमन्त्रवत् विकृतावतिदेशोपपत्तिः । **न च**

तत्र शब्दत एव हविषामुद्देश्यत्वावगतेः उद्देश्यसाहित्यस्य चाविवक्षितत्वात् युक्तोऽतिदेशः । प्रकृते तु तद्धितशब्देन देवतात्वेन एतेषामुपादानात् साहित्यविवक्षोपपत्तेः । सत्यपि वैमृधन्यायेनोद्देश्यवाचकपदान्तरकल्पनया आग्नेयादीनां प्रत्येकमुद्देश्यत्वे उपादेयतादशायां विवक्षितसाहित्यानामाग्नेयादीनामेव देवतात्वावगमात्, विकृतौ च तेषामनुपयोगित्वेन संस्कार्यत्वानुपपत्तेर्देवतासंस्कारकयोः पार्वणहोमयोरनतिदेशः इति **वाच्यम्** । उद्देश्यसामर्थ्यानुरोधेनाग्नेयादीनामपूर्वसाधनत्वेनैव रूपेण देवतात्वावगतेः विकृतावतिदेशोपपत्तेः । इतरथा स्वाहाकारपशुपुरोडाशादावपि अग्नीषोमत्वादिनैव देवतात्वापत्तेः सौर्यसवनीयादौ तेषामतिदेशानापत्तिः । इदं च सर्वं तद्धितस्य देवताविधायकत्वमङ्गीकृत्योक्तम् । **वस्तुतस्तु** विशिष्टविधौ गौरवापत्तेः, हविःसमभिव्याहाराभावेन च देवतातद्धितत्वानिश्चयात् पर्वणि भवौ पर्वसंस्कारकौ च इत्येवमपि तद्धितोपपत्तेर्योग्यतयाऽपि तदवधारणायोगात् नायं देवतातद्धितः । मन्त्रवर्णादेव तु क्रमावगताङ्गभावात् देवताप्राप्तिसिद्धेः पार्वणपदं नामधेयमेव । अत एव **याज्ञिकानां** 'ऋषभं वाजिनं वयं पूर्णमासं यजामहे' 'अमावास्या सुभगा सुशेवा' इतिमन्त्रगतपूर्णमासामावास्याशब्दयोरेव त्यागवेलायामुद्देशः, न तु पर्वशब्दस्य । एवं च तत्रत्यपूर्णमासामावास्याशब्दयोः काले प्रयोगाभावात् मन्त्रार्थपर्यालोचनया कर्मपरत्वावगतेः एकैकस्य आग्नेयादित्रिकसंस्कारकत्वेऽपि पूर्वोक्तरीत्या पशुपुरोडाशादिवत् सौर्यादावतिदेशे बाधकाभावः । नह्युद्देशांशस्य प्रयोजकसत्त्वे परप्रयुक्तदेवतोपजीवित्यागांशे स्वरूपेण आग्नेयादेर्देवतात्वं संभवति । अतो येनैव अपूर्वसाधनविशेषरूपेण उद्देशांशं प्रति संस्कार्यता, तेनैव रूपेण त्यागांशं प्रति देवतात्वमिति युक्त एव पशुपुरोडाशादेरिव पार्वणहोमयोरपि अतिदेशः । एवं वैमृधेऽपि येनैव रूपेण अपूर्वसाधनविशेषत्वादिना पौर्णमास्या उद्देश्यता, तेनैव रूपेण उत्तरकालप्रतियोगित्वं दृष्टार्थत्वात्, न तु समुदिताग्नेयत्वादिरूपेणेति उद्देश्यताऽवच्छेदककोटौ साहित्यस्याग्नेयत्वादेश्च अविवक्षितत्वात् युक्त एव वैमृधस्यापि विकृतावतिदेशः । अस्तु वा तत्रोद्देश्यताऽवच्छेदककोटौ साहित्याद्यविवक्षायामप्युत्तरकालप्रतियोगित्वे उपादेयत्वात् 'दर्शपूर्णमासाभ्यामिष्ट्वा' इतिवत् विवक्षा । अतश्च सोमे विकृत्युत्तरत्वप्रसङ्गवत् सौर्यादावपि पौर्णमास्युत्तरत्वाभावात् नातिदेशप्रसङ्गः । अन्वारम्भणीयायां तु साहित्यादेरविवक्षा दर्शपूर्णमासत्वस्य उद्देश्यताऽवच्छेदककोटिप्रविष्टत्वाभावादिति युक्तस्तस्या अतिदेशः । प्रकृते पार्वणहोमयोस्तु आश्रयिकर्मत्वेन परप्रयुक्तदेवतोपजीवित्वात् स्वरूपेण आग्नेयादीनां देवतात्वानुपपत्तेर्युक्त एवातिदेशः ।

यत्तु समुदायापूर्वप्रयुक्तत्वात् पार्वणहोमयोः, विकृतौ च सौर्यादौ तदभावादनतिदेश इति । **तन्न,** एवमपि वैश्वदेवादिपर्वणि तत्सत्त्वेन अतिदेशापत्तेः । प्रयाजादेरपि तत्प्रयुक्तत्वेन सौर्यादावनतिदेशापत्तेश्च । नहि प्रयाजादीनां प्रकृतौ परमापूर्वप्रयुक्तत्वम्, द्विःकरणानापत्तेः । अपितु समुदायापूर्वप्रयुक्तत्वमेव । **अथ** तस्य प्रयोजकता न समुदायापूर्वत्वेन, अपितु उत्पत्त्यपूर्वाव्यवहितापूर्वत्वेनेति तेषां सौर्यादावतिदेशः, ततः पार्वणहोमयोरपि तुल्यम् । इति **प्राप्ते,** सत्यमेवम्, तथापि केषामपि **याज्ञिकानां** विकृतौ पार्वणहोमाननुष्ठानात्, आचारस्यैव प्रकृतौ साहित्यस्य आग्नेयत्वादेश्चोद्देश्यतावच्छेदककोटौ विवक्षा, न तु व्रीहित्वादिवदविवक्षा इत्येवंविधतात्पर्यग्राहकत्वावसायात्, तस्य च विकृतौ अभावादनतिदेशः पार्वणहोमादीनाम् । अत एव नाचारेण तत्तद्विकृतिपर्युदासरूपेणानन्तश्रुतिकल्पना, गौरवापत्तेः । सूत्राण्यप्याचारमेव उररीकृत्य समुदायार्थतारूपहेतुपरतया व्याख्येयानि । १७.

मण्डन— 'पार्वणौ वैकृते न स्तः ।' २५.

शंकर— 'पार्वणानतिदेशनम् ।' २९.

* **पार्वणस्थालीपाके** लौकिकीतिकर्तव्यता । **भा.** ७।४।२।२.

* **पार्वणस्थालीपाकादीनि** कर्माणि लौकिकानि । तेषां निर्दिष्टमायतनं औपासनोऽग्निः । न तानि आहवनीये प्रसज्येरन् । भा. १२।२।१।१–३.

☙ पार्वणहोमौ विकृतिषु न भवतः ॥

'पार्वणौ जुहोति' इति होमः कालाभीज्या, इति प्राप्ते, कर्माभीज्यैव । तेन विकृतिषु पौर्णमास्यमावास्यानां

एकसमुदायाभावे न तत्संस्कारकहोमातिदेशः इति नावमिकप्रयोजनम्। **संकर्ष** २।२।३.

⌛ पार्वणहोमयोरन्यतरस्यैव तत्तत्समुदायोपकारकस्य दर्शपूर्णमासयोरनुष्ठानम्॥

उभयोरविशेषात्। ९।२।१९।५६॥

भाष्यम्— इदमिदानीं संदिह्यते। किमुभौ होमौ पौर्णमास्याममावास्यायां च, उत पौर्णमासीहोमः पौर्णमास्यां अमावास्याहोमः अमावास्यायामिति। किं प्राप्तम्? उभावपि उभयत्र। कुतः? उभयोर्हि प्रकरणे उभावपि आम्नातौ। तस्मादुभयत्र भवितुमर्हतः।

यदभीज्या वा, तद्विषयौ। ५७॥

भाष्यम्-- वाशब्दः पक्षं व्यावर्तयति। नैतदस्ति, उभयमुभयत्रेति। यदभीज्या, स तत्र भवेत्। तस्य हि स उपकारकः। अनुपकारक इतरस्य। न च अनुपकारकः कर्तव्यः। समुदायप्रधानौ अत्र होमौ इत्युक्तम्। तस्मात् यदभीज्या, तद्विषयौ भवेतामिति।

टुप्-- (अत्रानन्तरम् 'उभयोरविशेषात्' इत्यादि सूत्रद्वयम्। तत् अधिकरणान्तरमिव [इवशब्दो वार्तिकमनुसृत्य] भाष्यकारेण व्याख्यातम्। तदाक्षिपति-) 'उभौ होमौ पौर्णमास्याममावास्यायां च' इत्येतदयुक्तम् (अधिकरणान्तरकरणं पूर्वपक्षासंभवात्। तदाह-) यदा समुदायस्य संस्कारकौ होमौ अवगतौ, तदा यः पौर्णमासीलिङ्गः (मन्त्रः), स पौर्णमास्यामेव प्राप्नोति, इतरोऽपि (अमावास्यालिङ्गः), सोऽपि तत्रैव (अमावास्यायामेव प्राप्नोति) इति नास्त्यनियमः (अनियमप्रसङ्गः। अथ स्वमतेनाह-) तस्मादन्यथा वर्ण्यते। (पार्वणन्यायाधिकरणस्य ९.२.१८) प्रयोजनसूत्रे एते। यदि पर्वशब्दः कालवचनः, तथा सति कालस्य असंस्कार्यत्वात् आरादुपकारकौ स्याताम्। कथम्? यद्यपि कालस्य कर्माङ्गता अवगम्यते, तथापि सकृदेव (आदौ स्मृत्वा) वेदिते (काले) कर्म प्रस्तूयते। न तस्य भूयोभूयः स्मृत्या प्रयोजनम् (येन कर्ममध्ये स्मर्येत)। यथा अन्यान्यङ्गानि भूयोभूयः स्मारकमपेक्षन्ते, नैवं कालः। तस्मात् कालवचने पर्वशब्दे (सति) अदृष्टार्थौ होमौ प्राप्नुतः। अत आह (भाष्यकारः पूर्वाधिकरणे) 'कालाभीज्यायां विकृतिषु प्रवृत्तिः' इति। (वैकृतेषु इति रत्नपाठः। वस्तुतस्तु एतादृशी पङ्क्तिः भाष्ये नोपलभ्यते। तत्र संशयभाष्ये 'कालाभीज्यायां तयोः प्रवृत्तिः' इति ५१ सूत्रे सिद्धान्तभाष्यान्ते च 'वैकृतेषु अप्रवृत्तिः' इति)। न च प्रकरणादुत्कृष्य कालस्य संस्कारकौ कल्प्येते, फलकल्पनाभयात्। तस्मात् यदि कालवचनः पर्वशब्दः (पूर्वपक्षे), तथा सति (आरादुपकारकौ स्याताम्) आरादुपकारकत्वात् न लिङ्गं व्यवस्थां करोति। अत आह (सूत्रकारः-) उभयोः (पर्वणोः पूर्वपक्षे स्याताम्) अविशेषात् इति। (सिद्धान्ते तु-) समुदायवाचकत्वेन तस्य (समुदायस्य) संस्कार्यत्वात् भवति व्यवस्थाकरणे लिङ्गम्। अत आह- 'यदभीज्या वा तद्विषयौ' इति।

सोम-- पूर्वोक्तार्थे एव विशेषविचारात् **संगतिः।** कालाभीज्यापक्षे उभयोः पर्वणोः उभावपि होमौ स्याताम्, आरादुपकारकत्वेन लिङ्गेन विशेषासिद्धेः इति 'उभयोरविशेषात्' इति सूत्रं पूर्वाधिकरणपूर्वपक्षप्रयोजनकथनपरम्। 'यदभीज्या वा तद्विषयौ' इति सूत्रं च यस्य समुदायस्य यत्र संस्कार्यत्वसंभवः, तद्विषयो होमस्तत्र इति संस्कार्यवशात् व्यवस्था इति सिद्धान्तप्रयोजनकथनपरम्।

वि-- 'संकीर्णौ संघयोर्होमौ न वा, प्रकरणादुभौ। संकीर्णा, वुपकार्यस्य भेदादेतौ व्यवस्थितौ॥'

भाट्ट-- संख्यया कर्मभेदावगतेः एकवाक्योपात्तकर्मद्वयस्यापि संनिधानात् अवान्तरप्रकरणाद्वा एकैकमन्त्रं प्रति शेषित्वावगतेः कर्मद्वयस्यापि पूर्णमासदेवताकतया तत्संस्कारकत्वम्, अमावास्यादेवताकतया चामावास्यासंस्कारकत्वम्। प्रधानद्वयानुरोधेनैव मन्त्रद्वयस्यापि तत्रतत्रावृत्तिः। एकपदोपादानावगतकर्मद्वयसाहित्यवत्त्वाच्च सकृत्स्मृतस्यापि पुनःस्मरणम् 'तां चतुर्भिः' इतिवन्नानुपपन्नम्। नहि अत्र यथाक्रमं पाठः येनैकस्य कर्मण एक एव मन्त्रो भवेत्। एकपदोपादानात्तु उभयोरपि उभयाङ्गत्वम्। अत एव नात्र सूक्तवाकविभागन्यायः। **इति प्राप्ते,** समसंख्याङ्गप्रधानविषये यथाक्रममेव संबन्ध इति न्यायस्यौत्सर्गिकत्वात् एकस्य प्रधानस्यैकेनैव मन्त्रेण निराकाङ्क्षत्वाच्च, अश्रुतमन्त्रावृत्तिकल्पने पुनःस्मारकाकाङ्क्षाकल्पने च प्रमाणाभावात् एकस्य एकसंस्कारार्थत्वमेवेति प्रयोजनवशाद्विभागः। १८.

मण्डन— 'पर्वणोस्तौ व्यवस्थितौ।' २६.

शंकर— 'व्यवस्थोक्ता पार्वणयोः।' ३०.

* 'पार्वणहोमयोस्त्वप्रवृत्तिः' इति विशेषातिदेशापवादः फलनियमकर्तृसमुदायवत् अष्टमे एव वक्तव्योऽपि कथञ्चित् प्रसङ्गात् नवमे उक्तः। प्रमेयं तु आष्टमिकमिति इहैव तत्र किञ्चित् चिन्त्यते। 'स्रुवेण पार्वणौ जुहोति' इति संख्यया कर्मभेदात् द्वौ पर्वदेवत्यौ होमौ विधीयेते। तत्र पर्वशब्दः पृणातेर्दानकर्मणो निष्पन्नः कर्मवचनः। तेन कर्मैव देवता। सा च स्मरणीयत्वेन संस्कार्या। तत्र यदि एकैको होमः षट्कर्मदेवत्यः स्यात् ततः अविद्यमानकर्मांशे अदृष्टार्थता आपद्येत। तत्परिहाराय एकः पौर्णमासीदेवत्यः अपरः अमावास्यादेवत्य इति कल्प्यते। तेन प्रकरणाविशेषेऽपि सूक्तवाकन्यायेन संस्कार्यवशात् व्यवस्था। सौर्यादौ च संस्कार्यस्य समुदायस्याभावात् नातिदेशः इत्यधिकरणार्थः। **बाल.** पृ. १२१-१२२.

⌛ पार्वणहोमयोस्त्वप्रवृत्तिः समुदायार्थसंयोगात् तदभीज्या हि। ९।२।१८।५०॥

दर्शपूर्णमासयोः समामनन्ति 'स्रुवेण पार्वणौ जुहोति' इति। एतौ पार्वणहोमौ सौर्यादिषु विकृतिषु स्यातां न वेति विचारः, पार्वणहोमौ कालाभीज्या समुदायाभीज्या वा इति च विचारः। कालं अभिलक्ष्य इज्या यागः कालाभीज्या। समुदायं पौर्णमासयागत्रयं अमावास्यायागत्रयं चाभिलक्ष्य इज्या समुदायाभीज्या। तत्र सिद्धान्तमाह। पार्वणहोमयोः 'ऋषभं वाजिनं वयम्' इति मन्त्रेण पौर्णमासे स्रुवेण आज्यहोमः 'अमावास्या सुभगा सुशेवा' इति मन्त्रेण अमावास्यायागे स्रुवेण आज्यहोमः इतीमौ पार्वणहोमौ नाम। तयोः सौर्यादौ विकृतौ अप्रवृत्तिः प्रवृत्तिर्न स्यात्। समुदायार्थसंयोगात् पौर्णमासत्रिकेण दार्शिकत्रिकेण च समुदायरूपेण अर्थेन पार्वणहोमयोः संयोगात् संबन्धात्। हि यस्मात् पार्वणहोमौ तदभीज्या तं समुदायं अभिलक्ष्य इज्या यागः। तस्मात् विकृतौ पार्वणहोमयोर्नातिदेशः इति सिद्धान्तः।

कालस्येति चेत्। ५१॥

पार्वणहोमयोः समुदायाभीज्यत्वात् सौर्यादौ विकृतौ नातिदेश इति सिद्धान्ते उक्ते पूर्वपक्षी आह। कालस्य पर्वशब्दो वाचकः, इति कालाभीज्या पार्वणहोमौ। तस्मात् पर्वकाले क्रियमाणे सौर्यादौ तयोरतिदेशः स्यात्। इति चेत्।

नाप्रकरणत्वात्। ५२॥

पूर्वपक्षशङ्कां निषेधति सिद्धान्ती। नेमौ कालाभीज्या। कालस्य अप्रकरणत्वात् प्रकरणेन समुदायवाची पर्वशब्दो गृह्यते न कालवाची। अपिच पृणातेः पर्वशब्दोऽयम्। पृणातिश्च दाने प्रसिद्धः। दानानि च समुदायौ। तस्मात् समुदायाभीज्या पार्वणौ होमौ। तस्मात् वैकृतेषु पार्वणयोरप्रवृत्तिः।

मन्त्रवर्णाच्च। ५३॥

'ऋषभं वाजिनं वयं पूर्णमासं यजामहे' 'अमावास्या सुभगा सुशेवा' इति मन्त्रवर्णात् पूर्णमासामावास्याशब्दाभ्यां यजिसमानाधिकरणाभ्यां पार्वणहोमयोः समुदायाभीज्यत्वावगमः। न तयोः कालाभीज्यता।

तदभावेऽग्निवदिति चेत्। ५४॥

पूर्वपक्षी आह। तदभावे सौर्यादौ तस्य आग्नेयादिसमुदायस्य अभावेऽपि सौर्यादौ असंनिहितयोरपि पार्वणहोमयोः अनुष्ठानं स्यात्। अग्निवत् यथा 'अग्निमग्न आवह' इत्यावाहननिगदे असंनिहितोऽप्यग्निः आवाह्यते। एवमिहापि असंनिहितयोरप्यनुष्ठानम्। इति चेत्।

नाधिकारिकत्वात्। ५५॥

पूर्वपक्षिणा उक्तं निषेधति सिद्धान्ती। न असंनिहितयोः अनुष्ठानम्। आधिकारिकत्वात् अधिकारे भवत्वात् पार्वणयोः। आग्नेयाद्यधिकारे हि तौ पठितौ। तस्मात् सौर्यादौ विकृतौ पार्वणहोमयोर्न प्रवृत्तिः इति सिद्धान्तः। **के.**

* पार्वणहोमयोः स्वाहाकारस्यार्थवत्त्वं प्रकृतावेव। **भा.** ८।४।५।१५.

* **पार्वणहोममन्त्रौ।** 'ऋषभं वाजिनं वयम्। पूर्णमासं यजामहे। स नो दोहतां सुवीर्यम्। रायस्पोषं

सहस्रिणम् । प्राणाय सुराधसे । पूर्णमासाय स्वाहा ॥ ' (तैब्रा. ३।७।५।१३) इति पूर्णमासे । ' अमावास्या सुभगा सुशेवा । धेनुरिव भूय आप्यायमाना । सा नो दोहतां सुवीर्यम् । रायस्पोषं सहस्रिणम् । अपानाय सुराध्रसे । अमावास्यायै स्वाहा ॥ ' १४ । इत्यमावास्यायाम् । अत्र प्रथमवाक्यद्वयेन एकमर्धर्चं कृत्वा अनन्तरवाक्यत्रयेण उत्तरार्धर्चं कृत्वा होमकाले मन्त्रौ प्रयोक्तव्यौ । प्रतिमन्त्रे च होमार्थमेकैकं स्वाहान्तं वाक्यं ब्राह्मणेनैव संयोजितम् । मन्त्रौ तु पङ्क्तिच्छन्दस्कौ पञ्चपदावेव । के.

* **पार्ष्ठिकबोधः** यादृशोपपदद्वयसमभिव्याहारे आगोपालाङ्गनं तदर्थयोः यादृशोऽन्वयोऽवगम्यते तादृशस्यैव तदर्थयोः अन्यान्वयव्युत्पत्तौ पार्ष्ठिकबोधविषयत्वम् । अत एव अरुणैकहायनीस्थले परिच्छेद्यपरिच्छेदकभाव एव पार्ष्ठिकबोधविषयः । **भाट्ट**. १०।४।२.

* विशिष्टकर्मविधित्वेऽपि विशेषणानां **पार्ष्ठिकसंबन्धावगमः** । सहकारितामात्रेण च पार्ष्ठिकसंबन्धायोगः । **कौ**. २।४।२।३०.

पार्ष्णिकान्वयन्यायः । (अरुणाधिकरणोक्तोऽयम्) । क्रमप्रकरणाभ्यां स्तोत्राङ्गत्वेनावगतानामृचां अभिव्यक्तिं कुर्वत् साम तद्द्वारा स्तुतिं निर्वर्तयितुं शक्तमिति श्रुतस्तुत्यर्थत्वनिर्वाहकानुष्ठानविशेषलाभाय पार्ष्णिकान्वयेन स्तुत्यर्थासु ऋक्षु अवतरति । **रसायनम्**. पृ. ६९.

* ' **पालाशं** ब्रह्मवर्चसकामस्य ' यूपं कुर्यात् इति फलविधिः । **भा**. ४।३।१।१, * ' **पालाशे** बध्नाति ' ' खादिरे बध्नाति ' ' रोहितके बध्नाति ' । एकार्थाः सन्तो विकल्प्यन्ते खादिरादयः । २।२।६।१७.

* ' **पावकाग्निनयेनात्र** वक्तव्यौ सगुणाविमौ ' (अग्नीवरुणौ) । **वि**. १०।४।१९.

पावकाग्निन्यायः । विकृतौ देवतानिष्ठगुणवाचिपदस्यापि त्यागादौ प्रयोगः ॥

प्राकृतस्य गुणश्रुतौ सगुणेनाभिधानं स्यात् । १०।४।१४।२६ ॥

भाष्यम्— अस्त्याधानम् ' य एवं विद्वानग्निमाधत्ते ' इति । तत्र पवमानहवींषि श्रूयन्ते ' अग्नये पवमानायाष्टाकपालं निर्वपेत् , अग्नये पावकाय, अग्नये शुचये ' इति । तत्र संशयः क्रियते किं सगुणं अग्नेरभिधानं कर्तव्यम्, उत निर्गुणमिति । किं प्राप्तम् ? प्राकृतस्य निर्गुणस्य सगुणेनाभिधानं कर्तव्यमिति ।

अविकारो वाऽर्थशब्दानपायात्स्याद् द्रव्यवत् । २७ ॥

भाष्यम्— अविकारो वा स्यात् निर्गुणमभिधानम् । कुतः ? अर्थशब्दानपायात् । एवं शब्दः अर्थश्च अनपेतो भवति । य एवासावग्निः, स एव पवमानः पावकः शुचिश्च । या देवता निर्देष्टव्या, सा निर्दिष्टैव भवति असत्यपि गुणवचने । द्रव्यवत् । यथा ' सा वा एषा सर्वदेवत्या यदजा वशा, वायव्यामालभेत भूतिकामः ' इति । अजावशाशब्देन चोदिते कर्मणि छागाशब्देन वाचिषु निगमा भवन्ति । अर्थः शब्दः अनपेत इति कृत्वा । एवमिहापि द्रष्टव्यम् । तस्मात् निर्गुणेनाभिधानं कर्तव्यमिति ।

आरम्भासमवायाद्वा चोदितेनाभिधानं स्यादर्थस्य श्रुतिसमवायित्वादवचने च गुणशासनमनर्थकं स्यात् । २८ ॥

भाष्यम्— अथवा चोदितेन सगुणेनाभिधीयेत । कुतः ? आरम्भासमवायात् । नहि आरम्भेण देवता कर्मणि समवैति । न स्वेन रूपेण देवतायाः कर्मणि साधनभाव इत्युक्तम् । यदि हि रूपेण समवेयात् तथा सति अग्निशब्देन पवमानोऽपि प्रत्याय्यते इति गुणाभिधानं न क्रियेत । कथं तर्हि साधनभावः ? श्रुतिसमवायित्वात् देवतार्थस्य । देवताशब्दस्य च हविषश्च संबन्धः साक्षादुच्यते । यस्य शब्दस्य संबन्धः स शब्दो वदितव्यः । एवमसौ संबन्धः कृतो भवति । यदि च गुणाभिधानं न क्रियते गुणशासनमनर्थकं स्यात् । एवमर्थे हि तत्र शब्द उच्चार्यते, कथमसौ कर्मणि संबध्येतेति । तत्र यदि गुणो न संबध्नीयात् गुणवचनवैयर्थ्यं स्यात् । तस्मात् सगुणेनाभिधानं कर्तव्यमिति ।

द्रव्येष्वारम्भगामित्वादर्थेऽविकारे सामर्थ्यात् । २९ ॥

भाष्यम्— अथ यदुक्तं द्रव्यवदिति, ' सा वा एषा सर्वदेवत्या यदजा वशा, वायव्यामालभेत भूतिकामः ' इति, अजावशाशब्देन चोदिते कर्मणि छागाशब्देन निगमा वाचिषु भवन्ति इति यदुक्तम् , तत् परिहर्तव्यम् । अत्रोच्यते । युक्तं द्रव्येषु आरम्भसमवायः । रूपेण समवायं गच्छति द्रव्यम् । तत्र छागाशब्देन याऽसौ आलब्धा यदि वशा यदि अवशा, तत्र सा अभिधीयते इति गम्यते । तस्मात् अर्थे साधने सति अविकारेऽप्यर्थे वचनसामर्थ्यमुपपद्यते इति विना गुणवचनेन अभिधानं स्यात् चोदकानुग्रहाय । इह श्रुतिसमवायित्वात् अवश्यं चोदकप्राप्तस्य विकारः कर्तव्य इति ।

शा— तत्र संशयः तद्वाचिषु निगमेषु किं एक एवाग्निशब्दो वक्तव्यः , किमुभौ शब्दौ वक्तव्यौ ' अग्नये पवमानाय निर्वपामि ' ' अग्निं पवमानमावह ' ' अग्नेः पवमानस्याहमुज्जितिमनूज्जेषम् ' इति । ' **तत्रैकेनार्थनिर्देशसिद्धेर्नोच्चारणं द्वयोः । स चाग्निशब्द एवैकश्चोदकानुग्रहो भवेत्** ॥ ' स्यादेवं यदि प्रथममर्थं विधाय पश्चाच्छब्दाश्रयणं स्यात् । शब्द एव तु भावनाङ्गत्वेन विधीयते इत्युक्तम् । तस्मादुभयोर्विधानात् उभौ वक्तव्यौ ।

सोम— सिद्धे विधिशब्दनियमे किमेक एव उत सर्वोऽपि इति विशेषचिन्तनात् **संगतिः** । **सूत्रार्थस्तु**— प्राकृतस्याग्नेः पावकादिश्रुतौ तच्छब्देनाभिधानं स्यादिति ।

वि— ' निगमे पावकाग्न्योः किमग्निः स्यादथवोभयम् । , अग्निश्चोदकतो, मैवं वैधोऽग्निः सगुणो यतः ॥ ' तस्मात् अग्निशब्दः पावकादिशब्दश्चेत्युभयं पठनीयम् ।

भाट्ट— अर्थस्य देवतात्वपक्षे शब्दस्य वा देवतात्वपक्षे यत्रार्थद्वयं शब्दद्वयेनोच्यते, यथा ' अग्नये कृत्तिकाभ्यः ' इत्यादौ तत्र द्वयोरेकवाक्योपादानेन समुच्चयप्रतीतेः उभयोरपि त्यागे आवाहनादिमन्त्रेषु वा उच्चारणं निर्विवादमेव । यत्र तु प्राकृत्यां तत्स्थानापन्नायां वा कश्चित् गुणः श्रुतः , ' अग्नये दात्रे ' ' अग्नये पवमानाय ' इत्यादौ तत्र किं गुणवाचकं पदमपि त्यागकाले आवाहनादिनिगमेषु च प्रयोक्तव्यम् , न वेति चिन्तायाम् ' सा वा एषा सर्वदेवत्या यदजा वशा वायव्यामालभेत ' इत्यत्र प्रकृतिप्राप्तद्रव्ये वशात्वगुणविधानेऽपि न तस्य ' छागस्य वपायाः ' इति मन्त्रे वशात्वगुणप्रकाशनार्थे तत्पदप्रयोगः । एवमिहापि विहितेऽपि अर्थरूपदेवतागुणे तत्प्रकाशस्य प्रयोजनाभावात् न तद्वाचकं पदं त्यागकाले आवाहनादिमन्त्रेषु वा उच्चारणीयम् । इति प्राप्ते, वशात्वगुणस्य स्वरूपेण क्रियाऽन्वयवत् इह देवतागुणस्य स्वरूपेण क्रियाऽन्वयाभावात् तद्वाचकशब्दस्यापि अप्रयोगे विधिवैयर्थ्यापत्तेः अर्थदेवतापक्षेऽपि तद्वाचकपदप्रयोग आवश्यक एव । शब्दस्य देवतात्वपक्षेऽपि सुतराम् । यत्र तु द्वयोः पर्यायता पुराणादिपर्यालोचनया एकस्यैव विशिष्टार्थवाचकत्वम् , पदान्तरं तु सामान्यवाचि, यथा ' अग्नये पावकाय ' इत्यादौ पावकशब्दस्य अग्निविशेषरूपाग्निसंततिवाचित्वस्य पुराणादौ प्रसिद्धत्वात् , तत्र पावकपदेनैव विशिष्टार्थप्रतीतिसिद्धौ अग्निपदप्रयोगो यद्यपि अर्थस्य देवतात्वपक्षे तथा नोपपादयितुं शक्यः, तथापि शब्ददेवतात्वस्यैव पूर्वं साधितत्वात् तत्रापि पदद्वयप्रयोगो नायुक्तः ।

मण्डन— ' सगुणा देवता वाच्या । ' १७.

शंकर— ' सगुणायां गुणस्यापि । ' १७. सगुणायां देवतायां विहितायां गुणस्यापि विधिशब्दः वक्तव्यः स्यात् ।

* **पावने** इष्ट्यादौ शुद्ध्यर्थे क्रियमाणे ' एकविंशत्या दर्भपिञ्जूलैः पावयति ' इत्युक्तत्वात् द्विबहुयजमानके एकविंशतिसंख्यया अनुसमयः । **के**. (भा. ५।२।३। ४–५).

पाशाधिकरणम् । अग्नीषोमीये पशौ पाशैकत्वपाशबहुत्वाभिधायिनोर्मन्त्रयोर्विकल्पः ॥ (पाशाधिकरणम् (९।३।५), पाशन्यायः (९।३।४) इति द्वे अधिकरणे । तत्र पाशाधिकरणे विकल्पः साधितः , पाशन्याये तु ऊहः साधितः । तस्मात् सावधानतया उपयोगो ज्ञातव्यः । **के**.)

विप्रतिपत्तौ विकल्पः स्यात् समत्वाद् , गुणे त्वन्यायकल्पनैकदेशत्वात् । ९।३।५।१५ ॥

भाष्यम्— अस्ति पशुरग्नीषोमीयः ' यो दीक्षितो यदग्नीषोमीयं पशुमालभते ' इति । तत्र पाशैकत्वाभिधायी (' अदितिः पाशं प्रमुमोक्त्वेतम् ' तैसं. ३।१।११।११) पाशबहुत्वाभिधायी च (' अदितिः पाशान् प्रमुमोक्त्वेतान् ' मैसं. १।२।१०८, कासं. ३०।४५) मन्त्रौ समाम्नातौ । तयोः किमेकत्वाभिधायी प्रकरणे निविशते, बहुत्वाभिधायी प्रकरणादुत्कृष्यते, उत उभावपि प्रकरणमभिनिविशेते इति । किं प्राप्तम् ? बहुत्वाभिधायी उत्कर्ष्टव्य इति । कुतः ? बहूनां हि स पाशानां मोचकः । न च प्रकरणे बहवः पाशाः सन्ति । तस्मात् प्रकरणे असंबध्यमानो यत्र बहवः पाशास्तत्र नीयेत । यथा ' युवं हि स्थः स्वर्पती इति द्वयोर्यजमानयोः प्रतिपदं कुर्यात् ' इति । ' एते असृग्रमिन्दव इति बहुभ्यो यजमानेभ्यः प्रतिपदं कुर्यात् ' इति प्रतिपद्विधानमुत्कृष्यते । यथा च पौष्णसावित्रसारस्वतद्यावापृथिव्याद्यनुमन्त्रणानि उत्कृष्यन्ते, एवं पाशबहुत्वाभिधाय्यपीति । **एवं प्राप्ते, ब्रूमः ।** विप्रतिपत्तौ एतस्याम् , का विप्रतिपत्तिः ? यत् प्रकृतावेकः पाशः, पाशबहुत्वाभिधायी च मन्त्रः, एतस्यां विप्रतिपत्तौ किं मन्त्रः उत्कृष्यते, नेति । उच्यते । नोत्कर्ष्टव्यः । ननु प्रकृतावन्यो मन्त्रः ; उच्यते । तेन सह विकल्पो भविष्यति । कुतः ? पाशप्रातिपदिकार्थस्य प्रकृतौ विद्यमानत्वादुत्कर्षो न न्याय्यः । ननु बहुपाशवचन एष मन्त्रः । प्रकृतौ त्वेकः पाशः । तस्मात्तत्र न संभवतीति । उच्यते । बहूनप्यसौ पाशान् वदन् बहुत्वाधिष्ठानं द्रव्यं प्रकाशयत्येव । यदि न प्रकाशयेत् , न पाशविशिष्टं बहुत्वं गम्येत । प्रकाशयति चेत् , तावता नः प्रयोजनम् । तस्य ह्युन्मोचनं क्रियते, न बहुत्वस्य, पाशाकृतेर्वा । तस्मात्तस्य प्रकाशनं कर्तव्यम् । तत्प्रातिपदिकेन करिष्यते, नोत्कृष्यते । अथोच्यते । अस्त्येव हि एकवचनान्तं प्रातिपदिकम् , तत् तस्य प्रकाशनं करिष्यतीति । अत्रोच्यते । न हीदं तस्मादन्यत् । यद्येकवचनान्तं प्रातिपदिकं नोत्कृष्यते, प्रकरणादित्युच्यते, सिद्धस्तर्ह्यनुत्कर्षस्तदेवेदमिति । ननु बहुवचनस्य बहुपाशकप्रयोगे अर्थवत्ता, तस्मादुत्कर्ष्टव्यम् । तदुत्कृष्यमाणमेकदेशत्वात् प्रातिपदिकमुत्कर्षतीति । उच्यते । गुणे त्वन्यायकल्पना स्यादिति, न प्रधाने । गुणश्च विभक्त्यर्थः । प्रधानं प्रातिपदिकार्थः । प्रातिपदिकार्थविशेषो विभक्त्या अभिधीयते । सति प्रातिपदिकार्थे विभक्त्यर्थेन भवितव्यम् । न च विकृतौ प्रातिपदिकमस्ति । अनारभ्यापि अभिहितं प्रकृतिं प्रविशति, किमङ्ग पुनः प्रकृतावेव अभिहितम् । तस्मात् यत्र प्रातिपदिकार्थः, तत्र विभक्त्यर्थो भविष्यति । ननु विकृतौ अपि चोदकेन प्राप्तं प्रातिपदिकम् , प्रातिपदिकार्थश्च उच्यते । बाढम् । विप्रकृष्टस्तु चोदकः । बहुवचनसमर्थकं प्रातिपदिकं चोदको नोत्क्रक्ष्यति । तस्मात् प्रातिपदिकमेकदेशत्वात् बहुवचनमाक्रक्ष्यतीति । न च प्रकृतौ अनर्थकमेव बहुवचनम् , पाशाकृतिकस्य हि तदुन्मोचने कर्मसंबन्धं करोति । तस्मात् गुणे बहुवचने अन्यायकल्पना, न प्रधाने प्रातिपदिकार्थे इति । किं पुनरन्याय्यम् ? यत् बहुत्वं गम्यमानमविवक्षितमित्युच्यते तत्कल्प्यताम् , न तु प्रकृतौ प्रातिपदिकस्य प्रातिपदिकार्थाभिधानमन्याय्यं कल्पयितव्यम् । अस्य हि गुणस्य अवाच्यमेव वैकृतं बहुत्वम् , संनिधानाभावात् । तस्मात् प्रकृतौ बहुवचनान्तस्यापि निवेश इति ।

प्रकरणविशेषाच्च । १६ ॥

भाष्यम्— प्रकरणविशेषाच्च एतदध्यवसीयते, प्रातिपदिकं बहुवचनमाकर्षति, न प्रातिपदिकं बहुवचनेनोत्कृष्यते इति । प्रकृतौ हि प्रातिपदिकार्थो विद्यते अग्नीषोमीये पशौ । बहुवचनार्थो विकृतिषु । तस्मादपि बहुवचनान्तस्य प्रकृतौ निवेश इति ।

उत्कर्षो वा द्वियज्ञवत् । १७ ॥

भाष्यम्-- इति यदुक्तं तत् परिहर्तव्यम् ।

अर्थाभावात्तु नैवं स्याद् गुणमात्रमितरत् ।१८॥

भाष्यम्— (तत् परिह्रियते) । युक्तं यत् प्रतिपद्विधानमुत्कृष्यते, नास्ति प्रकृतौ यजमानद्वित्वं यजमानबहुत्वं वा । तत्र न भवेत् विषय एतयोः प्रतिपदोः । इह तु गुणमात्रं नास्ति बहुत्वम् । अन्यत्तु बहुवचनस्य प्रयोजनम् , मुचिना संबन्धः । न चानेकप्रयोजनमन्यतमेन प्रयोजनेन न प्रयुज्यते । नहि, उत्का प्रकाशनेन अप्रयुज्यमाना भस्त्रना न प्रयुज्यते । तस्माद्विषमं प्रतिपद्व्यामिदमिति ।

द्यावोस्तथेति चेत् । १९ ॥

भाष्यम्-- अथ यदुक्तम् , द्यावापृथिव्यादीनामनुमन्त्रणानां यथोत्कर्षः, तथा अस्येति । तत् परिहर्तव्यम् ।

नोत्पत्तिशब्दत्वात् । २० ॥

भाष्यम्— नैतदनुमन्त्रणेन तुल्यम् । नहि दर्शपूर्णमासयोर्द्यावापृथिव्यादीनामुत्पत्तौ शब्दोऽस्ति । अस्ति त्विह पाशस्योत्पत्तौ शब्दः । तस्माद्विषममनुमन्त्रणेनेति ।

शा— एकस्मिन् बहुवचनस्य असमवेतार्थत्वात् उत्कर्षे प्राप्ते, अभिधीयते । **' प्रकृत्यर्थस्य पाशस्य विभक्त्यर्थस्य कर्मणः । उभयोः प्रकृतौ भावान्नोत्कर्षोऽस्यावकल्प्यते ॥ '**

सोम— बहुवचनान्तमन्त्रस्यापि प्रकृतिनिवेशस्य पूर्वोक्तोहनिर्वाहस्य चिन्तनात् **संगतिः । सूत्रार्थस्तु**-- अनुष्ठेयपाशस्य एकत्वात् मन्त्रस्य बहुत्वाभिधायित्वाच्च विप्रतिपत्तौ विरोधे सति न मन्त्र उत्कृष्टव्यः, किन्तु एकवचनान्तेन सह अस्य विकल्पः स्यात्, उभयोरपि पाशविशिष्टकर्मप्रतिपादकत्वेन समत्वात् । गुणे तु बहुवचने अन्याय्यत्वकल्पना । ततश्च एकदेशबहुवचनाश्रयेण नोत्कर्षः इति ।

वि— ' उत्कृष्टव्यो न वा मन्त्रो बह्वर्थो, ऽसंगतत्वतः । उत्कर्षो, न विकल्प्योऽसौ गुणे त्वन्यायकल्पना ॥ '

भाट्ट— बहुवचनान्तपाशमन्त्रस्य दैक्षे एव निवेशमङ्गीकृत्य विकृतौ ऊहश्चिन्तितः (९।३।४ इत्यत्र) । स एव तु इह चिन्त्यते, किं बहुपाशिकायामुत्कर्षः, उत दैक्षे एव निवेशः इति । तत्र बहुत्वप्रकाशनलिङ्गात् अनुष्ठानसादेश्यादेर्बाधे पूषाऽनुमन्त्रणादिवत् विकृतावुत्कर्षः । न च तद्वत् सामान्यसंबन्धबोधकप्रमाणाभावः, ज्योतिष्टोममहाप्रकरणस्यैव आनर्थक्यतदङ्गन्यायसहकृतस्य क्रतुपशुषु सामान्यसंबन्धबोधकस्य सत्त्वात् । न च एवमपि पाशप्रातिपदिकार्थस्य पाशस्य, द्वितीयाऽर्थस्य कर्मत्वस्य, प्रमोचनभावनायाश्च प्रधानभूतायाः, दैक्षेऽपि संभवेन तत्प्रतिपादकपदानां लिङ्गविरोधाभावेन अनुष्ठानसादेश्यादिबाधे प्रमाणाभावात् न गुणभूतबहुवचनमात्रानुरोधेन उत्कर्षकल्पना युक्ता इति **वाच्यम् ।** अनेकेषामपि पदानां एकव्रीह्यादिपदानुरोधेन व्रीहिप्रयोगे एव संकोचवत् उत्कर्षस्याप्युपपत्तेः । इतरथा एकपूषपदानुरोधेन इतरपदानामुत्कर्षानापत्तेश्च । गुणभूतलिङ्गानुरोधेन प्रातिपदिकादेः मेषीवर्जं संकोचवत् गुणभूतवचनानुरोधेनापि तदुत्कर्षोपपत्तेश्च । प्रातिपदिकार्थवत् लिङ्गसंख्यादेरपि कारके एवान्वयेन प्रातिपदिकार्थे प्रति संख्यादेर्गुणत्वे प्रमाणाभावाच्च । एवं च एकवचनान्तपाशमन्त्रेण विकल्पोऽपि अष्टदोषदुष्टो न भवेत् । **इति प्राप्ते,** नात्रोत्कर्षः गुणभूतबहुवचनानुरोधेन प्रधानभूतानां बहूनामुत्कर्षे प्रमाणाभावात्, विभक्त्युपात्तलिङ्गसंख्याऽन्वयित्वरूपसत्त्वसमाख्याऽनुरोधेन पार्ष्ठिकान्वयवेलायां लिङ्गसंख्याऽऽदेः प्रातिपदिकार्थप्राधान्येनैव अन्वयाच्च । न चैवं लिङ्गाद्यनुरोधेन प्रधानभूतबहुतरेतरपदसंकोचस्याप्यनापत्तिः, गुणभूतानुरोधेन प्रधानभूतस्य संकोचेऽपि प्रकरणादिबाधप्रसङ्गेन उत्कर्षे प्रमाणाभावात् । संकोचे तु अवर्जनीयतया नान्तरीयसंनिधिबाधेऽपि उत्कर्षे नान्तरीयकत्वाभावेन तद्बाधस्य अन्याय्यत्वाच्च । पूषादिपदानां तु गुणत्वाभावात्, तद्व्यतिरेकेण इतरपदानां प्रकृतोपयोग्यर्थप्रतिपादकत्वाभावाच्च उत्कर्ष इति वैषम्यम् । प्रकृते तु पशुपाशकर्मकोन्मोचनमात्रप्रकाशनस्यैव उपयोगित्वात् संख्यायाः स्वरूपेण प्रकाशनानपेक्षत्वात् संख्यावाचकपदवैयर्थ्यपरिहारार्थं तस्य पाशसंख्याप्रकाशनोपयोगकल्पनेऽपि नेतरपदानां तद्व्यतिरेकेण प्रकृतोपयोग्यर्थाप्रतिपादकत्वमिति विशेषः । अत एव बहुवचनम् ' सुपां सुलुक् ' (पा० ७।३।३९) इत्येवं स्वशक्यबहुत्वाश्रयीभूतपाशावयवजन्यपाशरूपावयविवृत्तित्वसंबन्धेन एकत्वलक्षणार्थमेव । एवं च फलमुखत्वात् विषमशिष्टोऽपि विकल्पो न दोषाय इति ध्येयम् । इतरथा उत्कर्षपक्षेऽपि एकवचनान्तमन्त्रस्यैव ऊहेन बहुपाशिकायामन्यस्यामिव क्रतुपशुष्वपि बहुवचनान्तत्वोपपत्तेः तत्पाठफलं मन्त्रत्वमात्रसिद्धिरूपं मन्दं स्यात् ।

मण्डन— ' द्वौ चापि मन्त्रौ प्रकृतौ निविष्टौ । '
शंकर— ' बहुपाशार्थः प्रकृतौ । '

* ' पत्नीं संनह्य ' इति चिन्त्यते । अस्ति हि यजमान एकपत्नीको बहुपत्नीकश्च । तत्र सर्वस्य प्रयोगमधिकृत्य पत्नीशब्द उच्चरितः इत्येतत् **पाशाधिकरणेनैव** निर्णीतम् । **भा.** ९।३।६।२०. * प्रकृतौ बहुवचनस्य असमवेतार्थत्वे विकृतावपि अविकृतस्यैव प्रयोगः इति नवमे **पाशाधिकरणे** स्थितम् । **श्राद्धमयूखः** पृ. ७५. * यदि पत्नीप्रातिपदिकार्थः प्रधानं बलवत्, ततः एकद्विबहुपत्नीकेषु प्रयोगेषु प्रातिपदिकार्थोऽस्तीति तद्वशेन विभक्तिरपि एकवचनं त्रिष्वपि प्रवर्तमानं आकृतिसंख्याऽभिप्रायम् । अथ विभक्तिः प्रधानम्, ततो यत्र सा स्वार्थं लभते, तत्रैव पर्यवसितः प्रातिपदिकार्थः, इति द्विबहुपत्नीके मन्त्र एव न स्यात्, इत्येतयोः पक्षयोः किं न्याय्यं इत्येतत् पाशाधिकरणे वर्णितम् । **टुप्**. ९।३।६।२०.

* **पाशाधिकरणन्यायेन** ' गुणे त्वन्याय्यकल्पनैकदेशत्वात् ' इति प्रातिपदिकार्थप्राधान्यात् एकस्मै एव उद्गात्रे चमसो दातव्यः श्रूयते । तस्मादेको भक्षयेत् । **वा.** ३।५।८।२३. * पाशाधिकरणन्यायेन द्विवचनस्याप्रसिद्धत्वेऽपि प्रातिपदिकमात्रप्रसिद्धया कालयोगिनामेव वा अनयोरेव वा द्वित्वस्यापि कथञ्चिदुपपत्तेः फलसंबन्धः, न तु षण्णामेव आग्नेयादीनाम् (इदं पूर्वपक्षे) । **भाट्ट**. २।२।३, * पाशाधिकरणन्यायेन बहुवचनातिरिक्तसकलमन्त्रस्य (उपरवमन्त्रस्य) प्रत्येकावृत्तिप्रतीतेः बहुवचनस्यापि तदनुरोधेन पूजाद्यर्थत्वेन व्याख्यानं द्रष्टव्यम् । ११।४।१९. * पाशाधिकरणन्यायेन लक्षणया, साधुत्वमात्रेण आश्रयनिष्ठतया वा लिङ्गसंख्यान्वयोपपत्तौ प्रातिपदिके लक्षणाऽनापादकत्वम् । **कौ**. ३।१।६।१२ पृ. १५७. * पाशाधिकरणन्यायेन लिङ्गसंख्ययोरपि सामानाधिकरण्येन पार्ष्ठिको जातिगुणसंबन्धः । **भाट्ट**. १।३।१०, * अष्टरात्रे विश्वजिति ' अवभृथादुदेत्य वत्सत्वचं परिधत्ते ' इति एकवचनस्य **पाशाधिकरणन्यायेन** बहुत्वलक्षणयाऽपि उपपत्तौ प्रातिपदिकोपदेशस्य उपरिधारणमात्रविषयत्वसंकोचे प्रमाणाभावात् इति प्राप्ते । १२।३।१, * आग्नेयादीनां षण्णां विद्वद्वाक्यविहितयोश्च कर्मणोः कालयोगस्य अविशेषात् दर्शपूर्णमासपदेन ग्रहणोपपत्तेः, द्विवचनस्य च पाशाधिकरणन्यायेन बहुत्वलक्षणार्थत्वेऽपि बाधकाभावात् अष्टानामेव फलसंबन्धोपपत्तेः न षण्णामेव सः । **कौ**. २।२।३।३ पृ. १६२. * ' एते असृग्रमिन्दवः इति बहुभ्यो यजमानेभ्यः ' (प्रतिपदं कुर्यात्) । अत्र पाशाधिकरणन्यायेन लिङ्गानुरोधेन प्रकरणबाधानुपपत्तेः व्यत्ययानुशासनेन पुंलिङ्गस्य स्त्रीत्वपरत्वावगतेः पत्नीबहुत्वे द्वितीयो मन्त्रः इति पूर्वपक्षः । **भाट्ट**. ३।३।९, * ' ग्रहं संमार्ष्टि ' इत्यत्र गुणभूतैकवचनाद्यनुरोधेन प्रत्यये करणत्वलक्षणाङ्गीकारस्य युगपत् वृत्तिद्वयविरोधवैरूप्यादेश्चान्याय्यत्वात्, तत् वरं अनुवादके एकवचने तस्मिन्नेव पाशाधिकरणन्यायेन लक्षणामात्रम् । ३।१।७, * द्वन्द्वे कस्यापि लक्षणीयत्वाभावात् तत्पुरुषापेक्षया तस्य प्रबलत्वम् । यदि परं एकवचनस्य (रथघोषेण माहेन्द्रस्य स्तोत्रमुपाकरोति) द्वित्वादौ लक्षणा उद्भाव्येत, तथापि तस्या जघन्यैकवचननिष्ठत्वात् पाशाधिकरणन्यायेन अदोषतया तत्पुरुषापेक्षया प्रबलत्वमेव ! १०।४।२, * न चैवमपि ऊहितमन्त्रपाठमात्रस्य प्रयोजनालाभेऽपि ' यदि द्वौ ' इत्यादिविनियोगप्रयोजनाभावः दैक्षसंनिधिपठितानां त्रयाणामेषां पाशाधिकरणन्यायेन तत्रैव विकल्पप्रसक्तौ उत्कर्षसिद्धयर्थत्वात् । इति प्राप्ते (' यद्येकं यूपमुपस्पृशेत् ' इत्यादिवाक्यविषयकमिदम्) । ९।३।३. * न च दर्शपूर्णमासप्रातिपदिकस्य कालयोगिषु प्रसिद्धार्थकत्वेऽपि द्विवचनस्याप्रसिद्धेः, कथं तस्य यज्यवच्छेदकत्वं इति वाच्यम् । प्रातिपदिकप्रसिद्धिसत्त्वे पाशाधिकरणन्यायेन द्विवचनानुरोधेन तत्त्यागानुपपत्तेः । **कौ**. २।२।३।३ पृ. १५५. * नवमाद्यस्य पञ्चदशे अधिकरणे अध्रिगुप्रैषे पुंपशुमादायापि निवेशसंभवात् न लक्षणा आश्रिता. इह तु यजमानद्वित्वस्य प्रकृतौ सर्वथा निवेशनासंभवात् पाशाधिकरणन्यायेन लक्षणैव युक्ता । **भाट्ट**. ३।३।९ टिप्पणी, * ' पृष्ठैरुपतिष्ठते ' इत्यत्र पाशाधिकरणन्यायेन बहुवचनानुरोधेन पृष्ठप्रातिपदिके गौण्यङ्गीकारस्यायुक्तत्वात् बहुवचनेन एकत्वादि लक्षयित्वा चयनाङ्गतया ज्योतिष्टोमपृष्ठविधिरेवायम् । इति प्राप्ते । ७।३।१२. * पृष्ठप्रातिपदिकस्य गौणत्वकल्पनापेक्षया पाशाधिकरणन्यायेन बहुवचनस्य एकत्वलक्षणया स्तोत्रसंबन्धोपपत्तौ तदसंबन्धापादकं गौणत्वकल्पनं नोपपत्तिमत् । **कौ**. १।४।३।३ पृ. १९४. * ' प्रास्मा अग्निं भरत ' पुल्लिङ्गस्य मेष्यामसमर्थत्वेऽपि अस्मै इति प्रातिपदिकार्थचतुर्थ्यर्थयोः प्रधानभूतयोः मेष्यां समवेतत्वात् पुल्लिङ्गस्य च गुणभूतस्य पाशाधिकरणन्यायेन निर्देशमात्रार्थत्वात् समस्तस्य मन्त्रस्य प्रकरणात् मेष्यर्थत्वमपि अविरुद्धम् । इति पूर्वपक्षे । **भाट्ट**. ९।१।१६, * ' प्रोद्गातॄणाम् ' इत्यत्र पाशाधिकरणन्यायेन उद्गातैवैकः पिबेत् उद्गातृशब्दस्य प्रचुरप्रयोगेण उद्गीथापरपर्यायसामद्वितीय(तृतीय) भागोद्गानकर्तरि रूढत्वात्, गुणभूतबहुवचनानुरोधेन त्वदुक्तायाः त्रिविधाया अपि अन्याय्यकल्पनाया पाशाधिकरणन्यायेनानुपपत्तेः, इति पूर्वः पक्षः । ३।५।६ पृ. ७, * विकृतौ द्विबहुपत्नीकप्रयोगयोः एकवचनस्य प्रमाणान्तरानवधृतपत्न्येकत्वावरुद्धप्रयोगविषयेऽपि पाशाधिकरणन्यायेन प्रवृत्त्यवगतिः । ९।३।७.

* विभक्त्यर्थे संख्यायां नामार्थस्य विशेषणत्वासंभवः । अन्यथा **पाशाधिकरणविरोधात्** इति चेत् । **चन्द्रिका**. पृ. ४५०.

पाशन्यायः । पशुद्वयवत्यां विकृतौ पाशैकत्वपाशबहुत्वाभिधायिनौ मन्त्रौ द्विवचनान्तेन ऊहितव्यौ ॥ [पाशाधिकरणम् (९।३।५) पाशन्यायः (९।३।४) इति द्वे अधिकरणे । तत्र पाशाधिकरणे विकल्पः साधितः, पाशन्याये तु ऊहः साधितः । तस्मात् सावधानतया उपयोगो ज्ञातव्यः । **के.**]

अन्यायस्त्वविकारेणादृष्टप्रतिघातित्वादविशेषाच्च तेनास्य । ९।३।४।१०॥

भाष्यम् — अस्ति पशुरग्नीषोमीयः ' यो दीक्षितो यदग्नीषोमीयं पशुमालभते ' इति । तत्र पाशैकत्वाभिधायी मन्त्रः ' अदितिः पाशं प्रमुमोक्त्वेतम् ' (तैसं. ३।१।११।११) । तथा पाशबहुत्वाभिधायी ' अदितिः पाशान् प्रमुमोक्त्वेतान् ' इति (मैसं. १।२।१०८, कासं. ३०।४५) । प्रकृतौ तयोः समुच्चयं वक्ष्यति (उत्तराधिकरणे) । अस्ति द्विपशुर्विकृतिः ' मैत्रं श्वेतमालभेत, वारुणं कृष्णं अपां चौषधीनां च संधौ अन्नकामः ' इति । तत्र चोदकेन पाशाभिधायिनौ मन्त्रौ प्राप्तौ । तयोः संशयः किं बहुवचनान्तः अविकारेण प्रवर्तते एकवचनान्तस्य निवृत्तिः, उत बहुवचनान्तो निवर्तते एकवचनान्त ऊहितव्यः, उत उभयोरपि प्रवृत्तिः अभिधानविप्रतिपत्तिश्च, उत एकवचनान्त ऊहितव्यो बहुवचनान्तोऽपि न निवर्तेत । किं प्राप्तम् ? अन्यायस्तु अविकारेण । अन्यायनिगदः बहुवचनान्तः अविकारेण प्रवर्तते, एकवचनान्तो निवर्तितुमर्हति । कुतः ? नास्य एकस्मिन् पाशे प्रवर्तमानस्य दृष्टः प्रतिघातः । यथैव एकस्मिन् पाशे प्रवर्तते तथा द्वयोरपि प्रवर्तितुमर्हति । नासौ एकस्य वाचको न द्वयोः । एवमार्षश्चोदकोऽनुगृहीतो भविष्यति । इतरथा हि ऊह्यमाने यथाप्रकृति मन्त्रो न कृतः स्यात् । न द्वयोः पाशयोः एकस्मिंश्च पाशे कश्चित् विशेषोऽस्ति । तस्मादविकारेण बहुवचनान्तः प्रयुज्यते, एकवचनान्तस्य निवृत्तिरिति ।

टुप्— ' तयोः समुच्चयं वक्ष्यति ' (इति भाष्यमनुपपन्नम् । नहि समुच्चयो वक्ष्यते । अत आह–) प्रकृतौ उभयोर्निवेश इत्यर्थः (अङ्गत्वाभिप्रायं समुच्चयवचनं न प्रयोगाभिप्रायमित्यर्थः) । ननु अयं पाशमन्त्रः (पाशोन्मोचनस्य) करणत्वात् (द्वयोरपि पाशयोः) पर्यायेण स्यात् । (तेन उभयोरपि मन्त्रयोः) नार्थ ऊहेन । (परिहरति–) जपोऽयं पाशोन्मोचनकाले, क्रियमाणानुवाद्यव वा (न तु करणः । असिद्धे मन्त्रयोः समावेशे कथमिदमधिकरणं चिन्तितमत आह–) अर्थाच्च उत्तरस्मात् (अधिकरणात्) उत्तरमधिकरणम् (इदम्) । प्रकृतौ विचारितायां विकृतेर्विषयः ।

विकारो वा तदर्थत्वात् । ११ ॥

भाष्यम्— वाशब्दः पक्षं व्यावर्तयति । विकारो वा स्यात् । एकवचनान्त ऊहेन प्रवर्तते, बहुवचनान्तनिवृत्तिरिति । कुतः ? तदर्थत्वात् । यौ पाशौ विकृतौ वक्तव्यौ, तौ च प्रयोगवचनानुग्रहात् यौगपद्येन, न पर्यायेण । तत्र न गम्यते विशेषः, पाशशब्दे उच्चरिते कस्य पाशस्याभिधानं कस्य नेति । अविशेषात् द्वयोरपि पाशयोः ।

तत्र तयोः कर्मत्वाभिसंबन्धं द्वितीयाद्विवचनमेव शक्नोति वदितुम्, नान्यत् । तस्मात् द्विवचनमूह्येत । बहुवचनमेकवचनं च निवर्तितुमर्हतः इति ।

अपित्वन्यायसंबन्धात् प्रकृतिवत् परेष्वपि यथार्थं स्यात् । १२ ॥

भाष्यम्-- अपितु इति पक्षो व्यावर्त्यते । न बहुवचनं निवर्त्येत । यथा प्रकृतौ बहुवचनान्तं एकवचनान्तं च प्रवृत्तम् । अन्यायसंबन्धात् बहुवचनान्तम् । एवं विकृतावपि एकवचनान्तं द्विवचनान्तमूह्येत । अन्यायसंबन्धाच्च बहुवचनान्तं प्रवर्तेत । यदि प्रकृतौ प्रातिपदिकार्थमात्रं पक्षे प्रकाशितम्, विकृतावपि तत् पक्षे प्रकाशयितव्यम् । अथ बहुवचनान्तेन एकत्वमुक्तम्, इहापि बहुवचनान्तेन द्वित्वं वक्तव्यम् । तस्मात् अभिधानविप्रतिपत्तिः कर्तव्येति ।

यथार्थं त्वन्यायस्याचोदितत्वात् । १३ ॥

भाष्यम्-- तुशब्दस्तमपि पक्षं व्यावर्तयति । नाभिधानविप्रतिपत्तिः कर्तव्येति । किं तर्हि ? यथार्थं द्विवचनमूहितव्यम् । बहुवचनमेकवचनं च निवर्तेयाताम् । तद्धि द्विपाशाभिधायिनः पाशशब्दात् परं बहुवचनमेकवचनं वा न शक्नोति कर्मसंबन्धं वदितुम् । लोको हि शब्दार्थावगमे प्रमाणम् । न च लोके द्वयोरर्थयोः बहुवचनान्त एकवचनान्तो वा प्रवर्तमानो दृश्यते । तस्मादूहेन द्वयोः पाशयोः बहुवचनान्त एकवचनान्तो वा प्रयोक्तव्यः ।

छन्दसि तु यथादृष्टम् । १४ ॥

भाष्यम्-- कथं प्रकृतौ एकस्मिन् पाशे बहुवचनान्त इति चेत्- (छन्दसि तु यथादृष्टम्) । यावद्दर्शनं प्रामाण्यं अभ्युपगन्तव्यं छन्दसि, न दर्शनमतिक्रमितव्यम् । यो हि दर्शनमतिक्रम्य अन्यदपि कल्पयेत्, न तेन छान्दसं कृतं स्यात्, न लौकिकम्, नापि लक्षणसिद्धम् ।

यदुक्तं चोदकेन अभिधानविप्रतिपत्तिश्चोद्यते इति, नैतदेवम्, अन्यायस्याचोदितत्वात् । (त्रयोदशसूत्रावयवोऽयं तत्र न व्याख्यातः, स इदानीं व्याख्यायते । ' यथार्थं तु ' इति प्रथमावयवस्तु तत्र व्याख्यातः । एवं च त्रयोदशसूत्रव्याख्यामध्ये चतुर्दशं सूत्रं व्याख्यातमिति विचित्रैव क्वचित् व्याख्यापद्धतिर्भाष्यकाराणाम् । के.) नहि चोदकः अन्याय्यां अभिधानविप्रतिपत्तिमभिप्रापयति । किं कारणम् ? प्रकृतौ एकत्वात् पाशस्य प्रयुक्तत्वाच्च बहुवचनान्तस्य, प्रत्यक्षा अभिधानविप्रतिपत्तिः । केयमभिधानविप्रतिपत्तिर्नाम ? यत् अन्यथाऽभिधानम्, अन्यथाऽभिधेयम् । न च प्रकृतौ एकस्मिन् बहुवचनान्तं प्रयुक्तं अभिधानविप्रतिपत्तिं कर्तुम्, किं तर्हि ? यत् तेन शक्यते, तत् कर्तुम् । किं चानेन शक्यते ? अस्य सिद्धे प्रयोगे अर्थमन्विच्छन्तो यदवगम्यते तदर्थः शब्दः इत्यवधारयामः । यस्माच्च पाशद्रव्यस्य मोचनेन संबन्धोऽवगम्यते, तदर्थता शब्दस्य भवितुमर्हति, नैकत्वेन बहुत्वेन वा प्रयोजनम् । इह तु विकृतौ पाशस्य च पाशस्य च यौगपद्येन मोचनेन संबन्धो वदितव्यः । बहुवचनं च द्वयोः पाशयोरन्याय्यम् । कर्माभिधाने इह पुनर्न प्रयोगः सिद्धः । किन्तु प्रयोग एव चिन्त्यते कः शब्दः प्रयोक्तव्य इति । तत्र प्रयोगे अस्मदायत्ते किमिति अवाचकं प्रयोक्ष्यामहे विद्यमाने वाचके । न चायं द्वयोः छन्दसि दृष्टो बहुवचनान्तः । सोऽयं मन्त्रः प्रयुज्यमानः अपभ्रंश एव स्यात्, न छान्दसः । न च बहुवचनं द्वित्वप्रत्ययार्थं लभ्यते लौकिके वैदिके वा । न च अभिधित्सिते द्वित्वे द्वयोर्बहुवचनं भवति । तद्यथा देवदत्तयज्ञदत्ताभ्यां कर्तव्यं इति देवदत्तयज्ञदत्तशब्दद्वयादेव द्वित्वं प्राप्तं न विभक्त्या अभिधास्यते, तथापि द्विवचनमेव भवति न बहुवचनम् । तस्मात् विकृतौ ऊहितव्यमिति ।

सोम-- प्रधानभूतप्रकृत्यूहचिन्ताऽनन्तरं गुणभूतवचनोहचिन्तनात् **संगतिः** । अत्रेदं चिन्त्यम्- पाशमन्त्रस्य पाशोन्मोचनकरणत्वेन द्वयोरपि पाशयोः युगपन्मोचयितुमशक्यत्वेन याज्ञिकैरपि पर्यायेण प्रयोगस्योक्तत्वेन च पर्यायेण प्रयोज्यतया युगपत् पाशद्वयाभिधानस्य अनपेक्षितत्वेन कथं ऊहोदाहरणत्वम् । **न च** क्रियमाणानुवादित्वमेवास्य न करणमन्त्रत्वम्, अतः तन्त्राभिधानसंभवात् ऊहोदाहरणत्वं युक्तमिति **वाच्यम्** । तथा सति द्वादशे क्रियमाणानुवादिनां समुच्चयप्रतिपादनेन प्रकृतौ द्वयोरपि समुच्चयप्रसङ्गात् । **न च** इष्टापत्तिः, अत एव भाष्ये तयोः समुच्चयं वक्ष्यति इत्युक्तं इति **वाच्यम्** । प्रकृतौ उभयोर्निवेशोऽस्ति इत्येतदभिप्रायं भाष्यम्, न तु

एकस्मिन् प्रयोगे उभयोः समुच्चयः इत्यभिप्रायम्, इति टुप्टीकातन्त्ररत्नयोः व्याख्यातत्वेन सूत्रकाराप्रतिपत्तेः । यथायथं ऊहेन अनूहेन च विकल्पेन प्रयोगः इति मूलग्रन्थानुसारेण ग्रन्थकारस्यापि (शास्त्रदीपिकाकारस्यापि) विकल्पस्यैव संमतत्वाच्च । उत्तराधिकरणे सूत्रकारश्चाप्याह ' विप्रतिपत्तौ विकल्पः स्यात् ' इति । अत एव च तन्त्ररत्ने द्वितीयचतुर्थपक्षयोः अनुष्ठाने विशेषाभावेऽपि न्याय्यत्वात् चतुर्थपक्ष एव स्वीकृतः इत्युक्तं संगच्छते । अन्यथा द्वितीयपक्षे बहुवचनान्तस्याप्रवृत्त्या एकस्यैव मन्त्रस्य प्रयोगः । चतुर्थपक्षे तु द्वयोः समुच्चयेन प्रयोग इति अनुष्ठानविशेषसंभवात् अयुक्तमिदं तन्त्ररत्नवाक्यं स्यात् । एतेन जपमन्त्रत्वाश्रयणेनापि ऊहोदाहरणत्वं निरस्तम् । तथापि समुच्चयापरिहारात् जपमन्त्रत्वे दृष्टार्थत्वेन अविवक्षितार्थतया सर्वथा ऊहाप्रसङ्गाच्चेति । तस्मात् उदाहरणान्तरमन्वेष्टव्यं इति । **सूत्रार्थस्तु**- अन्यायः अन्यायनिगदो बहुवचनान्तः अविकारेण प्रयोज्यः, एकस्मिन् बहुवचनस्य प्रतिघातदर्शनात् द्वयोश्चैकस्मात् विशेषाभावात् ।

वि-- ' पाशं पाशान् द्वयोः पश्वोरेको मन्त्रोऽथवा द्वयम् । एकैकत्वे द्वयत्वे किमेकस्योहोऽथवा द्वयोः ॥, एकेनैव कृतार्थत्वादेको मन्त्रस्तदाऽपि च । अविकारेण बह्वर्थ एकार्थः समवायतः ॥, प्राकृतत्वादुभावूह्य एकार्थोऽत्र विवक्षया । बह्वर्थोऽप्यूहनीयोऽत्र द्वयोः शक्तेरक्लृप्तितः ॥ '

भाट्ट-- दैक्षे एव पशुपाशप्रमोचने अनुमन्त्रणद्वयमाम्नातम् । ' अदितिः पाशं प्रमुमोक्त्वेतम् ' इत्येकवचनान्तमेकम्, 'अदितिः पाशान् प्रमुमोक्त्वेतान्' इति बहुवचनान्तमपरम् । तत्र अन्त्यस्यापि विकल्पेन एकपाशिकायामेव प्रकृतौ निवेश इति वक्ष्यते । तदेतन्मन्त्रद्वयं द्विपाशिकायां विकृतौ अतिदेशेन प्राप्तम् । तत्र एकवचनान्तस्य तावत् प्रकृतौ समवेततया पाशसंख्याप्रकाशकत्वात् द्विवचनेनोहः इत्यविवादमेव । न च प्रतिपाशमस्यावृत्तेः अनूहः शङ्क्यः, अस्य अनुमन्त्रणमन्त्रत्वेन तन्त्रेणैव प्रयोगात् । बहुवचनस्य तु प्रकृतौ असमवेतार्थकत्वेन अदृष्टार्थे साधुत्वार्थे वा प्रयोगात् विकृतौ अनूहः । अस्तु वा लक्षणयाऽपि अर्थप्रकाशकत्वे संभवति साधुत्वाद्यर्थकत्वस्य अन्याय्यत्वात् बहुवचनस्य एकत्वलक्षणार्थकत्वम्, तथापि स्वशक्याश्रयावयवजन्यावयविवृत्तिसंख्यात्वसंबन्धेन प्रकृतौ एकत्वलक्षणाया इव विकृतौ द्वित्वलक्षणाया अपि संभवादनूहः । न चेयं (लक्षणा) निषिद्धा, ' सुपां सुलुक् ' इत्यनुशासनेनैव विहितत्वात् । **न च** ' दृष्टानुविधिश्छन्दसि ' इत्यनुशासनात् प्रकृतौ अस्य दृष्टत्वेन एकत्वलक्षकत्वेऽपि विकृतौ अदृष्टत्वेन द्वित्वलक्षकत्वानुपपत्तिः इति **वाच्यम्** । प्रकरणेन प्रकृतौ दृष्टत्ववत् अतिदेशेन विकृतावपि दृष्टत्वात् । इतरथा उत्कर्षेणापि अस्य मन्त्रस्योपपत्तेः एकत्वस्यापि लक्षणाऽनापत्तेः । अतो द्विपाशिकायामपि विकल्पेन द्विवचनवत् बहुवचनप्रयोगः । **इति प्राप्ते**, सत्यं निरुक्तसंबन्धेन द्वित्वलक्षणासंभवः, तथापि सा किम् ' सुपां सु-लुक् ' इत्यनुशासनशिष्टतया निरूढलक्षणा वा स्यात्, गङ्गायां घोष इतिवत् सांप्रतिकी वा । **नाद्यः**, अनुशासनस्य ' दृष्टानुविधिश्छन्दसि ' इत्यनेन यत्रैव पाठाख्यदर्शनं तद्विषयत्वेनैव नियतत्वात् । अन्यथा वैदिकप्रमाणप्रमितमात्रस्य दृष्टपदार्थत्वे विश्वजिति स्वर्गकामपदे ऊहादौ च छान्दसविधिप्रवृत्त्यापत्तेः । अतश्छान्दसविधेः पठितमात्रविषयत्वात् विकृतौ अतिदिष्टमन्त्रे अप्रवृत्तेः नानुशासनिकनिरूढलक्षणया द्वित्वोपस्थितिः । **नान्त्यः**, अनुशासनाविषयीभूतेऽपि बहुवचनस्य लक्षणाऽङ्गीकारे अनुशासनवैयर्थ्यापत्तेः । अस्तु वा सा, तथापि प्रकृतौ यया वृत्त्या एकत्वोपस्थितिः, न तया विकृतौ द्वित्वोपस्थितिः, इति प्राकृतवृत्तिबाधात्तद्द्वारकस्य बहुवचनस्यापि बाधे द्वित्वप्रकाशनरूपकार्यानुरोधेन शक्तद्विवचनप्रक्षेपावश्यम्भावः, ' स्वाधीने शब्दप्रयोगे किमित्यवाचकं पदं प्रयोक्ष्यामहे ' इति न्यायात् । अत एव द्वित्वोपस्थित्यर्थं अङ्गुलिविन्यासोऽपि अनाशङ्क्यः, मन्त्रपदान्तराणामपि अर्थबोधकत्वानापत्तेः । अत एव बहुपाशकस्थले बहुवचनप्रयोगेऽपि न तस्य मन्त्रत्वम् । प्रकृतौ निरूढलक्षणया एकत्वप्रकाशके एव तस्मिन् मन्त्रत्वात् । इह शक्त्या बहुत्वप्रकाशके तस्मिन् मन्त्रत्वानुपपत्तेः ।

मण्डन—— ‘ ऊह्यौ विकृत्यां खलु पाशमन्त्रौ । ’

शंकर—— ‘ ऊह्यौ पाशमनू द्विवत् । ’

* यत्र च अन्यत्राभिधानविप्रतिपत्तिः तत्र **पाशन्यायः**। यत्र तु एक एव मन्त्रः तत्र पत्नीन्यायः ‘पवित्रे स्थः’ इति यथा । **टुप्**. ९।३।६।२०. * अध्रिगुप्रैषे मेधपतये मेधपतिभ्यां इत्यत्र पतिशब्दो यजमानपर एव, न देवतापरः, न च तस्यैकत्वेन द्विवचनानुपपत्तिः, **पाशन्यायेन** तदुपपत्तेः, इति प्राप्ते । **भाट्ट**. ९।३।१२, * दर्शपूर्णमासयोः ‘पत्नीं संनह्य’ इत्येकवचनान्तो मन्त्रः द्विबहुपत्नीकप्रयोगयोरपि अविकारेणैव प्रयोक्तव्यः । पाशन्यायेन प्रातिपदिकादिलिङ्गस्य सर्वविषयत्वोपपत्तेः एकवचनानुरोधेन संकोचायोगात् । ९।३।६. * ‘पत्नीं संनह्य’ इत्यत्र साधारणे तूपदेशे सर्वप्रयोगसमवेतार्थतया पत्नीपदे प्रातिपदिकं कर्मकारकविभक्तिश्च इत्युभयमेव पाशन्यायेन विवक्षितम् । एकवचनं तु अदृष्टार्थम् । तेन अनेकपत्नीकत्वेऽपि नोहः । **वि**. ९।३।६, * परमार्थतस्तु सवनीयपशूनां अग्नीषोमीयविकृतित्वात् अस्त्येव लिङ्गवचनयोः पाशन्यायेन ऊहः । ९।३।८. * यत्र ग्रहमित्यादौ द्वयोरपि प्राप्तिसंभवः एकवचनस्यैव च प्रातिपदिकार्थगतसंख्यालक्षकत्वे **पाशन्यायादि**रूपनियामकास्तिता तत्र नोभयत्र लक्षणा । **कौ**. ३।१।७।१४ पृ. १८३.

* **पाशमन्त्रो** द्विविधः शाखाभेदेन, ज्योतिष्टोमगताग्नीषोमीयपशौ एकवचनान्तो बहुवचनान्तश्च । द्विपशुकविकृतौ च द्वावप्यतिदेष्टव्यौ प्रत्येकं च द्विवचनान्तत्वेन विपरिणामः । **वि**. ९।३।४. * **पाशमन्त्रस्य** (दैक्ष—) प्रकरणे बहुत्वं न कथञ्चित् प्रकारेणास्ति इत्यविवक्षा युक्ता । **वा**. ३।५।८।२४. * पाशमन्त्रस्य बहुवचनान्तस्य प्रकृतौ निवेशः । **भा**. ९।३।५।१६. * ‘पाशान्’ इति बहुवचनान्तस्य मन्त्रस्य प्रकृताविव एकपाशिकायां विकृतावपि लक्षणयैव एकत्वप्रकाशकत्वान्नोहः । **भाट्ट**. ९।३।१. * **पाशमन्त्रयो**रेकवचनान्तबहुवचनान्तयोः द्विवचनान्तेनोहः द्विपशुकायां विकृतौ । ९।३।४। १०–१४.

* **पाशुकं** तन्त्रं पुरोडाशे प्रसज्यते। **भा**. १२।१।१। ६, * पाशुकं तन्त्रं प्रातःसवनीयपुरोडाशेषु प्रसज्यते न विकल्पते । १२।२।१२।३०–३२. * पाशुकं तन्त्रं सूक्तवाकस्य प्रैषेण वैशेषिकेण नियतं सवनीयपुरोडाशेषु । **भा**. १२।२।१५।३५. * **पाशुकः** सूक्तवाकः उत्कृष्यते, तेन देवतापदानामन्वयात् पशुपुरोडाशदैवतानामपि उत्कर्षः । ११।३।१६।५५. * **पाशुकानाम**नुयाजानामुत्कर्षोऽयम् ‘ आग्निमारुतादूर्ध्वमनुयाजैश्चरन्ति ’ इति । न पुरोडाशानुयाजानाम् । **भा**. १२।२।१२।३२. * **पाशुकेषु** चातुर्मास्येषु परिधौ यूपपरिध्युभयधर्माणामविरुद्धानामनुष्ठानम् । १२।२।१०।२६. * पाशुकेषु चातुर्मास्येषु परिधौ स्वधर्मविरुद्धयूपधर्मा नानुष्ठेयाः । १२।२।११। २७–२९. * पाशुकेषु सर्वेष्वङ्गेषु प्रत्यभिघारणम् । **संकर्ष**. २।२।१७ **मीको**. पृ. १५९ ‘ अङ्गेषु पाशुकेषु० ’ इत्यत्र द्रष्टव्यम् ।

पाशुकाज्यभागन्यायः । आज्यभागप्रतिषेधस्य नित्यानुवादत्वेन पशौ आज्यभागप्रतिषेधस्य अर्थवादत्वं सोमे ॥

अपूर्वे चार्थवादः स्यात् । १०।८।२।५॥

भाष्यम्— स्तो दर्शपूर्णमासौ । तत्र आज्यभागौ प्रकृत्य समामनन्ति ‘न तौ पशौ करोति, न सोमे’ इति। तत्रायमर्थः सांशयिकः किं पर्युदासः, उत प्रतिषेधः, अथवा अर्थवाद इति। किं प्राप्तम् ? यथा पूर्वत्र (नानुयाजेषु इत्यत्र) पर्युदासः, तथा तावत् पर्युदासो नावकल्पते । कथम्? दर्शपूर्णमासयोरेतत् श्रूयते । तत्र कः प्रसङ्गो यत् सोमे स्यात् । यदि सोमः पर्युदस्येत संबन्ध एव न स्यात् ‘सोमवर्जितयोर्दर्शपूर्णमासयोः’ इति। तस्मात् चोदकप्राप्तयोः सोमे प्रतिषेधः । ननु अपूर्वः सोमः । नैव तत्र चोदकेन आज्यभागौ प्राप्नुतः । उच्यते। लक्षणाऽर्थः सोमशब्दो भविष्यति, सौमिकेषु दीक्षणीयादिषु पशुबन्धमात्रे च न कर्तव्यौ इति । **एवं प्राप्ते, ब्रूमः** । अपूर्वे चार्थवादः स्यात् इति । अपूर्वे सोमे नैव आज्यभागौ प्राप्नुतः, तस्मान्न तत्र प्रतिषेधः। अथ दीक्षणीयादीन् सोमशब्दो लक्षयति, तत्र अयमेव दोषो भवति, यत् लक्षणा । अपिच प्राप्तप्रतिषिद्धत्वात् दीक्षणीयाऽऽदिषु विकल्पः प्राप्नोति । विकल्पश्च अन्याय्य इत्युक्तम् । तस्मात् संभवति अस्मिन् न विकल्पो भविष्यति। संभवति चायम्

‘ तौ न पशौ करोति ’ इत्यस्यार्थवादत्वेन । कः पुनरत्र प्रशंसाऽर्थः ? सोमे आज्यभागौ न क्रियेते, पशावपि (न क्रियेते) इति । तद्यथा ‘ आदित्यो यूपः ’ इति अञ्जने कृते तेजःसामान्यादुच्यते, एवमिहापि पशौ आज्यभागौ कथं न क्रियेयातामिति, तदर्था प्रशंसेति ।

टुप्—— (भाष्यकारेण ‘ न सोमे ’ इत्यत्र पर्युदासस्तावन्न घटते इत्युक्तम् , तत् ‘ न पशौ ’ इति आद्येऽपि तुल्यमिति दर्शयन् उपपादयति–) ‘ न तौ पशौ करोति, न सोमे ’ इति आज्यभागयोः पर्युदासो न घटते । यदि पशुप्रकरणे इदं श्रूयेत (तथा सति) चोदकेन प्राप्तौ पर्युदस्येयाताम् (आज्यभागवर्जं प्रकृतिवत् कुर्यादिति) । इह तु दर्शपूर्णमासप्रकरणे इदं वर्तते । तत्र यदि इयं वचनव्यक्तिः, ‘ आज्यभागवर्जं दर्शपूर्णमासौ कुर्यात् ’ इति, ततः (आज्यभागयोः) विधानमनर्थकम् (स्यात्) ‘पशौ’ इत्ययं च प्रमादपाठः (स्यात्) । अथोच्येत न आज्यभागाभ्यां नञः संबन्धः (अनाज्यभागौ दर्शपूर्णमासौ इति), किं तर्हि ? पशुशब्देन ‘ यत् दर्शपूर्णमासयोः (आज्यभागौ) कुर्यात् , तत् अपशौ ’ पशुवर्जितयोः इति । एतदपि न (युक्तम् ,) अपशुत्वात् दर्शपूर्णमासयोः । तस्मात् आज्यभागयोः (चोदकप्राप्तयोः) पशौ प्रतिषेधः । ततश्च (पशौ आज्यभागयोः) विकल्पः इति स्थितम् । (पूर्वपक्षस्तु सोमेऽपि दीक्षणीयाऽऽदिषु आज्यभागयोः प्रतिषेध इति । सिद्धान्तमाह–) ‘आनर्थक्यात् तदङ्गेषु ’ इति न्यायोऽत्र नास्ति सोमे येन प्रतिषेधः स्यात् । वाजपेयस्य इति षष्ठ्या (सामान्येन) संबन्धी उपात्तः । तस्य (च) सप्तदशारत्निता विधीयते । संबन्धमात्रं च अङ्गाङ्गस्यापि अस्त्येव इति यूपे निवेशः (युक्तः) । इह तु आधारत्वेन सोमः श्रूयते (न संबन्धिमात्रतया) । न च परम्परासंबन्धे अस्ति आधारत्वम् , इति साक्षादेवायम् (सोमसंबन्धः) प्रतीयते । स च अप्राप्तः (इति प्रतिषेधासंभवः) तस्मात् अर्थवादार्थं सोमग्रहणम् ।

सोम—— पूर्वत्र पर्युदाससंभवात् विकल्पावहप्रतिषेधनिरासेऽपि इह तदसंभवात् प्रतिषेध एव न्याय्यः इत्युक्तेः **संगतिः** । **सूत्रार्थस्तु**- अपूर्वे प्रकृतिरहिते सोमे श्रूयमाणः ‘ न सोमेऽध्वरे ’ इत्ययमर्थवादः स्यात् इति ।

वि— ‘ न सोमेऽध्वर इत्युक्तौ निषेधः पर्युदस्यते (वा) । उतार्थवादो वा, ऽऽद्यः स्यादसमस्तपदोक्तितः ॥ सोमे प्रसक्तिरङ्गेष्टावविकल्पाय मध्यमः । नैवास्त्यत्र समासस्य नियमः पाणिनेर्मते ॥ , पुरैतस्मात् सोमयाग आज्यभागाप्रसक्तितः । न पर्युदासः किन्त्वर्थवादो दृष्टान्तवर्णनात् ॥ ’

भाट्ट—— दर्शपूर्णमासयोराज्यभागौ प्रकृत्य ‘ न तौ पशौ करोति न सोमे ’ इति श्रुतम् । तत्र पशुवाक्ये तावत् पूर्वाधिकरणोक्तरीत्या भाष्यकार– (शबराचार्य–) स्वारस्याच्च यद्यपि पर्युदास इत्येव प्रतीयते, तथापि न तावत् नञ्पशुपदयोः अन्वयाङ्गीकारेण ‘ अपशौ करोति ’ इत्येवंरूपः , तथात्वे दर्शपूर्णमासाङ्गताबोधकप्रकरणकल्प्यवाक्यैकवाक्यताऽऽपत्तेः । तत्र च दर्शपूर्णमासयोरेव उद्देश्यत्वात् , तयोश्च अपशुत्वादेव पर्युदासवैयर्थ्यात् । न हि तेन पशौ अतिदेशनिवृत्तिः सिध्यति । पशुप्रकरणस्थाज्यभागप्रापकातिदेशविधिनैकवाक्यतामङ्गीकृत्य आज्यभागव्यतिरिक्तं प्रकृतिवत् इत्येवंविधः पर्युदासस्तु अतिदेशविधेर्दूरस्थत्वात् दर्शपूर्णमासप्रकरणस्थपर्युदासेन एकवाक्यताऽनुपपत्तेः अयुक्तः । वस्तुतस्तु न सर्वत्र पर्युदासविधौ पदैकवाक्यता , तथात्वे आख्यातद्वयानन्वयापत्तेः । अपितु आख्यातद्वयसत्त्वे वाक्यैकवाक्यताऽपि । अतश्च प्रकृते दूरस्थत्वेऽपि वाक्यैकवाक्यत्वोपपत्तेः नायुक्तः पर्युदासः । न च ‘ आज्यभागव्यतिरिक्तं पशौ कुर्यात् ’ इतिवाक्यस्य विशेष्यविशेषसाकाङ्क्षतया स्वार्थबोधे समाप्त्यभावः , विशेष्यविशेषस्य प्रमाणान्तरावगमोपपत्तौ अनुगतधर्मावच्छिन्नं आदाय शाब्दबोधोपपत्तेः, इतरथा वाक्यमात्रस्य निराकाङ्क्षताऽनापत्तेश्च । अतोऽत्र पर्युदासखण्डनमेवं कार्यम् । विकल्पभिया खलु पर्युदास इष्टः । स चात्र पर्युदासपक्षेऽपि आवश्यकः इति व्यर्थं पर्युदासाङ्गीकरणम् । तथाहि, पशुप्रकरणे ‘ अग्नय आज्यस्यावदीयमानस्यानुब्रूहि, सोमायाज्यस्यावदीयमानस्यानुब्रूहि, अग्नय आज्यं प्रस्थितं प्रेष्य, सोमायाज्यं प्रस्थितं प्रेष्य, होता यक्षदग्निराज्यस्य जुषतां हविर्होतर्यज’ इत्यादि-

प्रैषाणामाम्नानात्, तेषां च लिङ्गात् आज्यभागमात्राभत्वात् आज्यभागयोरपि करणप्रतीतेः विहितप्रतिषिद्धत्वात् विकल्प इति। अतः सिद्धम् 'न तौ पशौ करोति' इत्ययं प्रतिषेधः इति। तदर्थवादश्च 'न सोमे' इति। यथा सोमे आज्यभागौ अप्रसिद्धौ तथा पशावपि इति निन्दा। नहि अयं सोमे आज्यभागयोर्निषेधः पर्युदासो वा संभवति, सोमस्यापूर्वत्वेन तत्र आज्यभागप्रसिद्ध्यभावात्। न च सोमाङ्गभूतदीक्षणीयाऽऽदिषु प्रसक्ताज्यभागपर्युदासः, तथात्वे तत एव पशावपि तत्सिद्धेः 'न तौ पशौ' इत्यस्य वैयर्थ्यात्। पूर्वप्रतिषेधैकवाक्यत्वे संभवति वाक्यभेदस्य अन्याय्यत्वाच्च। अतोऽत्र आज्यभागकर्तव्यतामात्रप्रतियोगिकः अभावः सोमे प्राप्त एव निन्दाऽर्थमनूद्यते। प्रतियोगी च दर्शपूर्णमासादौ प्रसिद्धः, इति सिद्धमस्य 'नान्तरिक्षे न दिवि' इतिवत् नित्यानुवादत्वम्।

मण्डन— 'न सोमे इति सुश्रुतिः।' सुश्रुतिः अर्थवादः। (सुस्तुतिः इति पाठस्तु युक्तः।)

शंकर-- 'न तौ पशाविति न सा।' (सा पर्युदासता)। २. 'न सौम्य इति तु स्तुतिः।' ३.

* प्रकृतितः प्राप्तानामतिग्राह्याणां विकृत्युक्थ्ये प्रतिषेधे **पाशुकाज्यभागन्यायेन** विकल्पापत्तेः पर्युदासपक्ष एवाश्रयणीयः इति पूर्वपक्षः। **संकर्ष.** ३।३।४.

* **पाशुकतन्त्रस्यैव** सवनीयपुरोडाशेषु प्रसङ्गः। १२।२।१२।३०—३२. 'सवनीयादिन्यायः' इत्यत्र द्रष्टव्यम्।

* **पाशुकप्रयोगविधिविहितानां** समिष्टयजुःपत्नीसंयाजानां क्रमः व्यवधायकाभावविशिष्टप्रकृतिदृष्टपौर्वापर्यात्सिध्यति। **भाट्ट.** ५।१।१५.

* **पाशुकवाग्यमस्य** पौरोडाशिकहविष्कृदाह्वानकाले विसर्गः। ११।३।८।१८. **मीको.** पृ. १२२ 'अग्नीषोमीये पशौ वाग्विसर्गः' इत्यत्र द्रष्टव्यम्।

पाषाणेष्टकान्यायः। यथा इष्टकापेक्षया पाषाणस्यातिकठिनत्वम्, तथा प्रकृतेऽपि। अयं न्यायः वैषम्याधिक्यविषयक(अश्मलोष्ट)न्यायापेक्षया स्वल्पवैषम्यविवक्षायां बोध्यः। **साहस्री.** ११२.

* 'पिकमालमेत' इत्यत्र पिकः कोकिलः, अनार्यप्रसिद्धेः। **वि.** १।३।६.

पिकनेमाधिकरणम्। आर्यम्लेच्छाधिकरणम्। क्वचित् म्लेच्छप्रसिद्धार्थस्य प्रामाण्यम्॥

चोदितं तु प्रतीयेताविरोधात् प्रमाणेन। १।३।५।१०॥

भाष्यम्-- अथ यान् शब्दान् आर्या न कस्मिंश्चिदर्थे आचरन्ति, म्लेच्छास्तु कस्मिंश्चित् प्रयुञ्जते, यथा पिक-नेम-सत-तामरसादिशब्दाः। तेषु संदेहः किं निगमनिरुक्तव्याकरणवशेन धातुतोऽर्थः कल्पयितव्यः, उत यत्र म्लेच्छा आचरन्ति स शब्दार्थ इति। शिष्टाचारस्य प्रामाण्यमुक्तम्, नाशिष्टस्मृतेः। तस्मान्निगमादिवशेन अर्थकल्पना। निगमादीनां चैवमर्थवत्ता भविष्यति। अनभियोगश्च शब्दार्थेषु अशिष्टानाम्, अभियोगश्चेतरेषाम्। तस्माद्धातुतोऽर्थः कल्पयितव्यः इति। एवं प्राप्ते, **ब्रूमः**। चोदितमशिष्टैरपि शिष्टानवगतं प्रतीयेत, यत् प्रमाणेनाविरुद्धं तदवगम्यमानं न न्याय्यं त्यक्तुम्। यत्तु शिष्टाचारः प्रमाणमिति, तत् प्रत्यक्षानवगतेऽर्थे। यत्तु अभियुक्ताः शब्दार्थेषु शिष्टा इति। तत्रोच्यते। अभियुक्ततराः पक्षिणां पोषणे बन्धने च म्लेच्छाः। यत्तु निगमनिरुक्तव्याकरणानामर्थवत्तेति, तत्रैषामर्थवत्ता भविष्यति, न यत्र म्लेच्छैरपि अवगतः शब्दार्थः। अपि च निगमादिभिरर्थे कल्प्यमाने अव्यवस्थितः शब्दार्थो भवेत्, तत्रानिश्चयः स्यात्। तस्मात् पिक इति कोकिलो ग्राह्यः, नेमोऽर्धम्, तामरसं पद्मम्, सत इति दारुमयं पात्रम्, परिमण्डलं शतच्छिद्रम्।

वा-- '**ये शब्दा न प्रसिद्धाः स्युरार्यावर्तनिवासिनाम्। तेषां म्लेच्छप्रसिद्धोऽर्थो ग्राह्यो नेति विचिन्त्यते॥' तथा 'निरुक्तव्याक्रियाद्वारा प्रसिद्धिः किं बलीयसी। समुदायप्रसिद्धिर्वा म्लेच्छस्यैवाथ वा भवेत्॥**' म्लेच्छप्रसिद्धिव्यवहर्तृदौर्बल्येऽपि समुदायरूढिबलेन स्वरूपगतेन ज्यायसी प्रतिभाति। '**तत्र प्रयोक्तृदौर्बल्यस्वरूपबलवत्तयोः। किं तु (नु) न्याय्यतरं युक्तं ज्ञातुमित्यत्र चिन्त्यते॥**

तथा, 'निरुक्तव्याक्रियाद्वारा किं शास्त्रस्था बलीयसी। किं वाऽवयवविक्षेपजननात् सैव दुर्बला॥ एवं नानोपपत्तित्वात् संदेहे, तावदुच्यते। निरुक्तव्याक्रियाद्वारा प्रतिपत्तिर्बलीयसी॥ शास्त्रस्था वेत्यनेनासौ कल्प्याऽपि हि बलीयसी। सन्मूलस्य प्रमाणत्वं साध्यस्यापि वरं श्रितम्॥ न सिद्धमप्यसन्मूलमाश्रयेण हि दूषितम्। कथं वेदगतैः शब्दैर्म्लेच्छस्थोऽर्थः प्रतीयते॥ येषां दर्शनमात्रेऽपि वेद एव न पठ्यते। संभाषाऽपि च न म्लेच्छैः सहार्यावर्तवासिनाम्॥ तत्र तेषु प्रसिद्धोऽर्थः कथमार्यैः प्रतीयताम्। एवं च सति यस्यापि प्रसिद्धिर्नोपलभ्यते॥ तस्यापि म्लेच्छदेशेषु सर्वेष्वन्वेष्यतां व्रजेत्। ततश्च निगमादीनां न कश्चिद्विषयो भवेत्॥ अनन्तम्लेच्छदेशांश्च कः सर्वानुपलप्स्यते। य एव स्यादनन्विष्टस्तत्र शङ्का प्रसज्यते॥ अनन्तेषु हि देशेषु कः सिद्धः क्वेति गम्यताम्। निगमादिवशाच्चाद्य धातुतोऽर्थः प्रकल्पितः॥ द्वित्रेष्वहःसु बाध्येत प्रयोगान्म्लेच्छचोदितात्। म्लेच्छाचाराप्रमाणत्वमथ त्वध्यवसीयते॥ आर्यावर्ते ततः शक्या प्रसिद्ध्यन्वेषणक्रिया। तस्याश्चाल्पेन कालेन सदसद्भावनिर्णयः॥ ततश्च निगमादीनां सुज्ञातः स्वार्थगोचरः। तस्मात्तदर्थवत्त्वाय म्लेच्छाचाराप्रमाणता॥ धर्मे चानादरात्तेषां भ्रश्येतार्थोऽपि शब्दवत्। न चास्ति संस्कृतः शब्दः कश्चिन्म्लेच्छापभाषणे॥ संस्कृतप्रतिरूपा हि तद्भाषाऽर्थान्तरे स्थिता। न चावाचकरूपाणां वाचकत्वं कथं चन॥ आर्याश्च म्लेच्छभाषाभ्यः कल्पयन्तः स्वकं पदम्। पदान्ताक्षरोपेतं कल्पयन्ति कदा चन। न्यूनाक्षरं कदाचिच्च प्रक्षिपन्त्यधिकाक्षरम्॥' तद्यथा द्राविडादिभाषायामेव तावद् व्यञ्जनान्तभाषापदेषु स्वरान्तविभक्तिस्त्रीप्रत्ययादिकल्पनाभिः स्वभाषानुरूपानर्थान् प्रतिपद्यमाना दृश्यन्ते। तद् यथा 'ओदनं चोर्' इत्युक्ते चोरपदवाच्यं कल्पयन्ति। 'पन्थानमतर' इत्युक्ते अतरः इति कल्पयित्वा आहुः सत्यं दुस्तरत्वादतरः एव पन्था इति। तथा पाप्शब्दं पकारान्तं सर्पवचनमकारान्तं कल्पयित्वा सत्यं पाप एवासाविति वदन्ति। एवं माल्शब्दं स्त्रीवचनं मालेति कल्पयित्वा सत्यमित्याहुः। वैर्शब्दं च रेफान्तमुदरवचनं वैरिशब्देन प्रत्याम्नायं वदन्ति। सत्यं सर्वस्य क्षुधितस्याकार्ये प्रवर्तनादुदरं वैरिकार्ये प्रवर्तते इति। तद्यदा द्रविडादिभाषायामीदृशी स्वच्छन्दकल्पना, तदा पारसीबर्बरयवनरौमकादिभाषासु किं विकल्प्य किं प्रतिपत्स्यन्ते इति न विद्मः। '**तस्मान्म्लेच्छप्रसिद्धं यत् पदमार्यैर्विकल्प्यते। न कश्चित्तत्र विश्वासो युक्तः पदपदार्थयोः॥ निरुक्तव्याक्रियाद्वारा यस्त्वर्थः परिगम्यते। पिकनेमादिशब्दानां स एवार्थो भविष्यति॥**' इति प्राप्तम्।

'**एवं प्राप्ते, वदामोऽत्र पदं निपुणदृष्टिभिः। विज्ञायेताविनष्टं यत् तत् तदर्थं भविष्यति॥**' देशभाषापभ्रंशपदानि हि विप्लुतिभूयिष्ठानि न शक्यन्ते विवेक्तुम्। '**यत्तु वेदतदङ्गेषु पदं दृष्टमविप्लुतम्। म्लेच्छभाषासु तद्रूपमर्थे क्व चन चोदितम्॥ तत्तथैव प्रतीयेत प्रमाणेनाविरोधतः। पिकनेमादि तद्ध्येवं निपुणैरवधारितम्॥ चोदितं ह्युपदिष्टं वा प्रयुक्तं वा क्रियागतम्। म्लेच्छैरवधृतं पश्चादार्यैर्द्वैभाषिकैः क्वचित्॥ तादृशं तु प्रतीयेत प्रामाण्येनेति निश्चितम्। न तद्धर्मप्रमाणेन वेदाख्येन विरुध्यते॥**' अपिच '**पदार्थपदसंबन्धज्ञानापेक्षप्रवर्तनात्। प्रसिद्धिर्यत्र तत्रस्था वाक्यार्थायानुगम्यते॥ पिकादिशब्दवाच्यं वा म्लेच्छैर्यदवधारितम्। अविरोधात् प्रमाणेन तद्विद्यावेदनोदितम्॥ चोदितं वा प्रमाणेन वेदेनेत्यस्य संगतिः। आर्यैः सहाविरुद्धत्वात् तस्य तैरप्यपेक्षणात्॥**' यथैव क्लोमादयः पश्ववयवा वेदे चोदिताः सन्तः अध्वर्य्वादिभिः स्वयमज्ञायमानार्थत्वात् नित्यं ये प्राणिवधाभियुक्ताः, तेभ्य एवावधार्य विनियुज्यन्ते, यथा च निषादेष्टयाम्, 'कूटं दक्षिणा' इति विहिते ये एवैतेन व्यवहरन्ति, तेभ्य एवार्थतत्त्वं ज्ञात्वा दीयते, तथेह पिकनेमतामरसादिचोदितं सत् वेदादार्यावर्तनिवासिभ्यश्चाप्रतीयमानं म्लेच्छेभ्योऽपि प्रतीयेत लोकावगम्यनित्यशब्दार्थाभ्युपगमाविरोधात्

स्वेनैव प्रमाणेन प्रतीयेतेति । यत्तु शास्त्रबलीयस्त्वात् एतदग्रहणमिति । तन्न । अविरोधे दुर्बलस्यापि ग्राह्यत्वात् यदेवात्यन्तं प्रमाणाभासमेव मृगतृष्णाज्ञानवत् भवति तत् सर्वदैव परिहर्तव्यम्, यत् पुनर्बलवद्विरोधापेक्षमप्रमाणं भवति, तत् विरोधाभावात् प्रमाणमेवेत्यवधारणीयम् । न चैवमादि विरुध्यते, विपरीतार्थप्रसिद्ध्यन्तराभावात् । अत एव वैदिकवाक्यार्थस्वविषयप्रयुक्तपदार्थमात्राभियुक्ततरार्यप्रसिद्धिबलीयस्त्वाश्रयणम् । **'प्रसिद्धौ विद्यमानायां तद्बलीयस्त्वमिष्यते । असत्यां तु बलीयस्त्वं वन्ध्यासुतबलोपमम् ॥'** अष्टकादिषु हि अदृष्टार्थेषु समूलकेषु स्मर्यमाणेषु गवादिपदस्वरूपतदर्थज्ञानेषु च सत्यं आर्याणामाततरत्वाभियुक्ततरत्वे विद्येते । पिकादिषु तु आर्यबलेनैव अवगतस्वरूपमात्रवाचकत्वेषु वाच्यविशेषज्ञानरहितत्वेन आर्येषु निर्व्यापारीभूतेषु पदवत् दृष्टार्थप्रतिपत्त्यर्थानादिशब्दप्रयोगलब्धसंबन्धप्रसिद्धिम्लेच्छप्रयोगेभ्यः अर्थनिर्णये सति, न किञ्चिद्विरुद्धम्, आकाङ्क्षितपदार्थज्ञानं च सेत्स्यति । निगमनिरुक्तव्याकरणैरपि न चैवमादीनामर्थान्तरं किञ्चिदुदाहृतम्, यत् प्राप्य कृतार्थाः सन्त इतरेषां प्रसिद्धिं परित्यजेम । **'कालपनिक्याः प्रसिद्धेश्च या क्लृप्ता सा बलीयसी । तस्यां सत्यां हि नात्मानमितरा लब्धुमर्हति ॥ आश्रयाणां च दौर्बल्यं धर्मं प्रति निरूपितम् । दृष्टार्थव्यवहारेषु कृष्यादाविव तुल्यताम् ॥ तस्माद्यथैव सेवाऽऽदौ गृहादिषु च कौशलम् । म्लेच्छानामधिकं तद्वदभिधेयार्थनिर्णये ॥'** शब्दस्वरूपं तावत्तेऽनभियुक्तत्वात् चिरविनष्टाविनष्टत्वेन न विविञ्चीरन् । यस्तु कथमप्यविनष्ट एव शब्दस्तेषामपि प्रयोगविषयमापन्नः, तस्य च आर्यवदेव अनादिवृद्धव्यवहारपरम्परया अर्थं जानन्ति तत् किं तेषां निराकर्तुं शक्यते । **'पत्रोर्णवारबाणादि यच्च तद्देशसंभवम् । तैरेवाकथितं नाम तच्च को वेदितुं क्षमः ॥'** तस्मान्न तेषां व्यवहारप्रसिद्धौ दौर्बल्यम् । **'निरुक्तादेश्च सिद्धेऽर्थे तन्निमित्तादिमात्रके । व्यापारो न च पूर्वार्धप्रतिपत्तौ स्वरूपतः ॥'** निरुक्तेन तावल्लोकव्यवहारप्रसिद्धान्येव पदानि तद्गतक्रियानिमित्तशब्दप्रयोगभाक्त्वेन निरुच्यन्ते । व्याकरणेनापि प्रसिद्धार्थानामेव अविनष्टस्वरूपान्वाख्यानमात्रं क्रियते, तत्र प्रासङ्गिकमेव कियदप्यर्थनिरूपणम् । तानि स्वविषयादन्यत्र दुर्बलानामपि न बाधकानि । **'यस्य चान्विष्यमाणाऽपि प्रसिद्धिर्न भविष्यति । कामं प्रदर्शितद्वारा तत्र कल्प्याऽऽश्रयिष्यते ॥ विक्षिप्ता बहुरूपा च या संदेहप्रदायिनी । अनन्योपायतामात्रे कचिदेव ग्रहीष्यते ॥ न चार्थप्रत्ययानङ्गनिरुक्ताद्यप्यनर्थकम् । षडङ्गवेदविज्ञानपूर्वकर्मक्रियाफलात् ॥'** यथा महाभारतनिर्वचनान्वाख्याने द्वैपायनेनोक्तम् **'महत्त्वाद्भारवत्त्वाच्च महाभारतमुच्यते । निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते ॥'** इत्येवं निरुक्तव्याकरणाद्यङ्गानुगृहीतवेदाध्ययनजनितकर्मावबोधपूर्वकानुष्ठानायत्तत्वात् स्वर्गादिसिद्ध्यर्थापूर्वसिद्धेः अव्युत्पन्नरूपे च ज्ञातेऽपि निरुक्तावगतधात्वर्थपूर्वकनामार्थज्ञानद्वारवाक्यार्थप्रतिपत्तिपूर्वकानुष्ठानादेव अदृष्टसिद्धिरिति म्लेच्छसिद्धपिकाद्यर्थग्रहणेऽपि निरुक्तादीनामर्थवत्ता सिद्धेति ।

शा— तत्र पूर्वः पक्षः **'म्लेच्छेषु हि पदार्थानां विप्लुतिर्भूयसी यतः । ततस्तेषु प्रसिद्धेऽर्थे न विस्रम्भः कथं चन ॥'** सिद्धान्तस्तु **'पदानि तावदेतानि वेदादिष्वेव दर्शनात् । अविप्लुतानि, तेषां च भाव्यमर्थेन केन चित् ॥ नित्येनार्येष्वसौ नास्ति यतो म्लेच्छेषु विप्लुतिः** (कल्पनीया) । **म्लेच्छप्रसिद्ध एवार्थस्तेषामिति हि निर्णयः ॥'** ६.

सोम— पूर्वोक्तस्य म्लेच्छप्रसिद्ध्यप्रामाण्यस्यापवादात् **संगतिः । सूत्रार्थस्तु**— म्लेच्छैः चोदितमपि प्रतीयेत, ग्राह्यं स्यादिति यावत् प्रमाणेन आर्यव्यवहारेणाविरोधादिति ।

वि— 'कल्प्यः पिकादिशब्दार्थो ग्राह्यो वा म्लेच्छरूढितः !, कल्प्य आर्येष्वसिद्धत्वादनार्याणामनादरात् ॥, ग्राह्या म्लेच्छप्रसिद्धिस्तु विरोधादर्शने सति । पिकनेमादिशब्दानां कोकिलाद्यर्थता ततः ॥' तस्मात् अनार्यप्रसिद्ध्या पिकः कोकिलः, नेमशब्दः अर्धवाची, तामरसशब्दः

पद्मवाची, सतशब्दः शतच्छिद्रघटवाची इति द्रष्टव्यम् । **गुरुमतमाह**— 'अर्थाबोधादप्रमाणं पिकालम्भनचोदना ।, नैवं म्लेच्छप्रसिद्ध्याऽपि तद्बोधादविरुद्धया ॥' इति । ६.

भाट्ट— यत्र पिकनेमसततामरसादिशब्दानां नार्याणामर्थविशेषे प्रसिद्धिः, म्लेच्छेषु तु पिकः कोकिलः, नेमं अर्धम्, सतं बृहत् परिमण्डलं शतच्छिद्रं दारुपात्रम्, तामरसं कमलमित्येवं प्रसिद्धिः, तत्र तत्प्रसिद्धार्थस्यैव ग्रहणम्, न तु निगमनिरुक्तादिना तत्कल्पनम् । न च म्लेच्छेषु शब्दार्थयोर्विप्लुतिदर्शनात् तत्प्रसिद्धेरविस्रम्भणीयता, पिकादिशब्दानां वेदे एव दृश्यमानत्वेन अविप्लुतत्वात् । अतश्च तेषां वाच्याकाङ्क्षायां तत्प्रसिद्धेरपि क्लृप्ततया शक्तिग्राहकत्वम् । अत एव निगमादिप्रसिद्धेरपि आर्यप्रसिद्धित्वेन प्राबल्येऽपि कल्प्यत्वेन दौर्बल्यम्, म्लेच्छप्रसिद्धेश्च म्लेच्छप्रसिद्धित्वेन दौर्बल्येऽपि क्लृप्तत्वेन प्राबल्यम्, प्रमाणबलाबलापेक्षया प्रमेयबलाबलबलीयस्त्वस्य स्थापितत्वात् । अत एव नात्र विशेषेण पूर्वः पक्षः कथितः ।

मण्डन— 'म्लेच्छप्रयोगात् पिकनेमशक्तिः ।' १०.

शंकर— 'पिकनेमादिचिन्ताऽथ ।' ११.

* आर्यम्लेच्छप्रसिद्ध्योः अविरोधे म्लेच्छप्रसिद्धेरपि अस्ति प्रामाण्यं इति **पिकनेमाधिकरणम्** । **कु.** १।३।६।९. * **पिकनेमाधिकरणे** म्लेच्छप्रयोगरूपाचारप्रामाण्यं वक्ष्यते । **कौ.** १।३।४।९. * पिकनेमाधिकरणे स्वरूपबलाबलेन आश्रयबलाबलस्य बाध्यत्वं वक्ष्यते । **सु.** पृ. १७४.

* न च **पिङ्गाक्ष्येकहायनीन्यायः**, तद्वत् इह एकवाक्यत्वाभावेन सहप्रवृत्त्यभावात् । **कौ.** ३।३।३।१०. पृ. ३२८, * उभयत्रापि (वेदद्वये) लिङ्गादिश्रवणात् **पिङ्गाक्ष्येकहायनीन्यायेन** विधित्वे एकत्रैव देवताविधिसमभिव्याहारवति उत्पत्तिविधितात्पर्यकत्वम्, अपरत्र तु सत्यपि उत्पत्तिविधित्वे न तत्तात्पर्यकता, वाक्यान्तरोपात्तगुणविनियोगोपयोगिप्रकरणोज्जीवनार्थत्वात् । ३।३।३।१० पृ. ३२८.

* **पिङ्गाक्षी-एकहायनीशब्दौ** द्वावपि सामानाधिकरण्यात् एकद्रव्यवचनौ । **वा.** ३।१।६।१२ पृ. ६७३.

* **पिच्छोलाभिरुपगायन्ति** पत्नयः महाव्रते (पिच्छोला मयूरपिच्छभूषितो वाद्यविशेषः) । **भा.** १०।४।५।८.

* **पिठरादयः** शूर्पेण सह (होमकरणत्वेन) विकल्प्यन्ते इति प्राप्ते, ब्रूमः । शूर्पस्य होमसाधनत्वं श्रौतम्, तृतीयया तदवगमात् । पिठरादीनां तु आनुमानिकम् । अतः असमानबलत्वात् न विकल्पो युक्तः । **वि.** १।२।३.

* **पिठरपाकवादिनां** (पैठराणाम्) तावत् कार्यद्रव्याण्येव घटादीनि पच्यन्ते, तन्मतेन अभेद एव (शुक्लरक्तघटयोः) । **वा.** ३।१।६।१२ पृ. ६८२.

पिण्डं त्यक्त्वा करं लेढीति न्यायः । यथा विहाय ब्रह्मानन्दं तल्लेशभूतविषयानन्दाद्यनुभवनं व्यर्थमिति । **साहस्री.** ३६१.

पिण्डार्थत्वाच्च संयवनम् । १०।१।१३।५४॥

सौर्ये चरौ प्रणीताभिः संयवनं न कर्तव्यम्, तस्य पिण्डार्थत्वात् । पिष्टानां पिण्डो यथा स्यादित्येवमर्थमद्भिः संयवनं भवति । चरौ पिण्डाभावात् न संयवनम् । इति सिद्धान्तः । **के.**

* **पिण्डपितृयज्ञः** ('अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्ति' इति) । अनारभ्याधीतः पुरुषार्थः, न तु क्रत्वर्थः । ४।४।८।१९–२१.

पिण्डपितृयज्ञः अनाहिताग्नेः औपासनाग्नौ स्यात् ॥

तस्य वैश्वदेवादिवत् पचने अग्नौ लौकिकाग्नावपि अनियमेन अनुष्ठाने प्राप्ते, येषां त्रेताऽग्निसंबन्धो नास्ति, तेषां सर्वेषां कर्मणामनाहिताग्नेः औपासनाग्निसंबन्धदर्शनात् औपासनाग्नावेव पितृयज्ञः । वचनात्तु कतिपयकर्माणि अग्न्यन्तरेऽपि । **संकर्ष.** १।२।१३.

* पिण्डपितृयज्ञः अपूर्वो ह्ययमनङ्गं चेति स्थास्यति (४।४।८।१९–२१ इत्यत्र) । **वा.** ३।७।१।३.

* पिण्डपितृयज्ञः आहिताग्नेः अनाहिताग्नेश्च । **भा.**

६।८।१।८. * पिण्डपितृयज्ञः दर्शेष्टयभावेऽपि कार्यः दर्शविकारेषु च नातिदेशोऽस्य । भाट्ट. ४।४।८.

₹ पिण्डपितृयज्ञः दर्शदिनेऽपि स्वकाले एव ॥

अमावास्यायां पिण्डपितृयज्ञोत्तरमेव दर्शेष्टितन्त्रं प्रक्रान्तव्यम् । सोमयागे दर्शपौर्णमासोत्तरत्वस्यैव 'दर्शो पितृयज्ञोत्तरत्वस्य असम्भ्यमेव प्रथमं निरूप्यताम्' इति पितृप्रार्थितवरदानार्थवादेनावगमितत्वात् । 'यत्पितृभ्यः पूर्वेद्युः करोति, पितृभ्य एव तद्यज्ञं निष्क्रीय यजमानः प्रतनुते' इति श्रुतेश्च । अत एव 'प्रातरग्निहोत्रं हुत्वाऽन्यमाहवनीयं प्रणयति' इति विहितं प्रणयनमपि पितृयज्ञाङ्गमेव । इष्ट्यङ्गत्वे अग्नेः परेद्युः कर्मापवर्गे एव तदपनयेन पितृयज्ञस्याग्न्यभावापत्तेः । न च निशीष्टिवत् दार्शिकप्रणयनोपकार्यत्वम्, पितृयज्ञस्यापूर्वत्वात् । न वा ऐष्टिकानामिव सौमिकप्रणयनोपकार्यत्वम्, तस्य दर्शानङ्गत्वात् । प्रणयनस्य पितृयज्ञाङ्गत्वे तु तदपवर्गे दर्शार्थे पुनः प्रणयनसंभवात्, हुत्वा इति क्त्वाप्रत्ययस्य पूर्वकालमात्रपरत्वेन अपराह्णे एव प्रणेतुमुचितत्वात्, वचनादपकर्षो वा । तस्मात् पितृयज्ञं समाप्यैवान्वाधानम् । इति प्राप्ते, पूर्वाह्णापराह्णकालविहितयोः अन्वाधानपितृयज्ञयोः कालातिक्रमायोगात् प्रणयनस्यापराह्णे करणे प्रातरग्निहोत्रं हुत्वेत्यस्य अनतिप्रयोजनकत्वापत्तेः, पितृयज्ञस्यापूर्वत्वेऽपि दार्शिकप्रणयनेन प्रसङ्गादुपकारसिद्धेः, प्रणयनविध्यनन्तरं दार्शिकानेकपदार्थविधानदर्शनेन च क्रत्वङ्गत्वस्यासंदिग्धत्वात् दर्शतन्त्रप्रक्रमोत्तरमेव स्वकाले पितृयज्ञः । पूर्वेद्युरिति वचसो वरप्रार्थनार्थवादस्य च प्रधानयागाभिप्रायेणोपपत्तेः । संकर्ष. १।२।९.

* पिण्डपितृयज्ञः न दर्शाङ्गम् । अयं स्वर्गार्थ इति मूलानुयायिनः । वस्तुतस्तु नित्य एवायम् । भाट्ट. ४।४।८. * पिण्डपितृयज्ञः यदि पौर्णमास्यामाधानं तदा अनन्तरायाममावास्यायां कर्तव्यः, कुण्डपायिनामयने 'मासं दर्शपूर्णमासाभ्यां यजेत' इत्यत्र न कर्तव्यः । भा. ४।४।८।२१, * पिण्डपितृयज्ञः सफलः । ४।३।५। १०–१२, पिण्डपितृयज्ञः एकफलकः, न सर्वार्थः । ४। ३।६।१३–१४, पिण्डपितृयज्ञः स्वर्गफलकः । ४।३।७। १५–१६.

₹ पिण्डपितृयज्ञः सिनीवालीकुह्वोः संनिपाते उत्तरस्मिन् दिन कार्यः ॥

यदा सिनीवाली कुहूश्चेति द्वे अपि क्रमेणापततः तदाऽपि पूर्वाधिकरणन्यायेन पूर्वस्मिन्नेव पर्वणि पितृयज्ञे प्राप्ते, परस्मिन्नेवेत्युच्यते । 'यदहरेष पुरस्तान्न दृश्यते तदहर्दद्यात्' इति 'यत् पितृभ्यः पूर्वद्युः' इति 'अपराह्णे ददाति' इति वचनत्रयैकवाक्यतया लब्धस्य चन्द्रादर्शनापराह्णविशेषणद्वितयविशिष्टामावास्याकालस्य तत्रैव लाभात् । चन्द्रादर्शने 'अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्ति' इत्येकस्मिन्नेव वाक्ये विशिष्टकालविधिः, प्रतीक्षाविषयतया उपादेयत्वाच्च न विशेषणयोरविवक्षेति तु भाष्ये स्थितम् । न च पूर्वदिने चन्द्रदर्शनाभावस्यैव परदिनापराह्णे अमावास्यायाः अभावादन्यतरपरित्यागावश्यकत्वे यत्पूर्वेद्युरिति वचनानुसारेण चन्द्रादर्शनस्यैव हानं युक्तमिति वाच्यम् । 'यां तिथिं समनुप्राप्योदयं याति दिवाकरः' इति स्मृत्या परदिने अमावास्यायाः पूर्णतोक्तेः । अपराह्णे सूर्याचन्द्रमसोरतीव संनिकर्षात् ।

ननु 'पिण्डान्वाहार्यकं श्राद्धं क्षीणे राजनि शस्यते' इति स्मृत्यन्तरेण चन्द्रादर्शनपदस्य चन्द्रक्षयोपलक्षकत्वेन व्याख्यानात् चन्द्रक्षयस्य च 'अष्टमेंऽशे चतुर्दश्याः क्षीणो भवति चन्द्रमाः । अमावास्याऽष्टमांशे च पुनः किल भवेदणुः ॥' इति स्मृत्या चतुर्दशीयुक्तामावास्यायामेवोपलम्भात् सिनीवाल्यामेव पितृयज्ञः, अत एव 'यदहस्त्वेव चन्द्रमा न दृश्यतेताममावास्यां कुर्वीत' इत्यादिवचनैरन्वाधानस्यापि काले चन्द्रादर्शनस्य विशेषणत्वात् तुल्यन्यायेन परदिने तदनुष्ठाने प्रसक्ते 'पक्षान्तं कर्म निर्वर्त्य वैश्वदेवं च साग्निकः । पिण्डयज्ञं ततः कुर्यात्ततोऽन्वाहार्यकं बुधः ॥' इत्यादिना अन्वाधानपितृयज्ञश्राद्धानां एककर्तव्यताविधानात् अन्वाधानवाक्यस्थचन्द्रादर्शनपदं चन्द्रक्षयोपलक्षकमेवेत्युक्तं कर्मप्रदीपे इति चेत्, न । 'अर्वागस्तमयाद्यत्र द्वितीया तु प्रदृश्यते । तत्र यागं न कुर्वीत सर्वे देवाः पराङ्मुखाः ॥' इति वचनेन सायं चन्द्रदर्शनविशिष्टप्रतिपदि प्रधानयागनिषेधादुभयोरपि चन्द्रादर्शनस्यावश्यकत्वे द्व्यहकालक्रियमाणयोः अङ्गप्रधानयोस्तदसंभवे अङ्गगुणविरोधन्यायेन अन्वाधाने

एव तद्बाधस्य युक्तत्वात् । अत एव 'तद्धैके दृष्ट्वा उपवसन्ति' इति श्रुतिः दृश्यमानेऽपि कदा चिदिति गोभिलश्च । पितृयज्ञस्य तु 'यदहरेष पुरस्तान्न पश्चाच्च दृश्यते' इति श्रुत्यन्तरेण कुह्वामेव विशिष्य विधानान्न स्मृत्या क्षीणचन्द्रोपलक्षकत्वेन व्याख्या युक्ता, अपितु अमावास्यापदस्यैव सूर्याचन्द्रमसोः संनिकर्षपरत्वं पञ्चदशाद्याधिकरणसिद्धं सूत्रोक्तं युक्तम् । न च 'यदहः पश्चाच्चन्द्रमा अभ्युदेति तदहर्यजन् इमाँल्लोकानभिजयति' इत्यादिश्रुतिभिः चन्द्रदर्शनदिने यागनिषेधस्मृतेरपि बाधोऽस्तु इति वाच्यम् । चन्द्रदर्शनदिनं प्रशस्तमपि तद्दर्शनात् प्रशस्ततरात् हीनमेवेति रीत्या अर्तिलग्नवेधुकस्तुतेः क्षीरविधिशेषत्ववत् चन्द्रादर्शनदिने यागविधिशेषत्वेनापि अस्यार्थवादस्योपपत्तेः, अमावास्याऽष्टमांशप्रभृति चन्द्रोदयस्य सत्त्वादुदितमात्रस्य लोकैरदर्शनात् श्रुतिस्मृत्योरविरोधः इति केचित् । तस्मात् सिनीवाल्यामन्वाधानं कुह्वां यागोत्तरं पितृयज्ञः । वरदानार्थवादादिश्च पूर्णयोः पर्वप्रतिपदोरुपपन्नः । संकर्ष. १।२। १०.

* पिण्डपितृयज्ञस्य अतिप्रणीताग्नौ विहितस्य आहवनीयानधिकरणत्वम् । सु. पृ. ७८०.

₹ पिण्डपितृयज्ञे अनाहिताग्निना अतिप्रणीत औपासनो वा उपस्थेयः ॥

'यदन्तरिक्षम्' (–पृथिवीमुत द्यां यन्मातरं पितरं वा जिहिंसिम) इति मन्त्रेण गार्हपत्यस्योपस्थानं पितृयज्ञे विहितम् । तच्च आहिताग्निकर्तृकात् प्रकृतितः अनाहिताग्निकर्तृकविकृतौ प्राप्तं इति तदर्थे गार्हपत्य उत्पादनीयः । प्रकृतौ होमार्थादग्नेः उपस्थेयस्य भिन्नत्वात् । इति प्राप्ते, संस्कारविशेषविशिष्टस्यैव गार्हपत्यत्वात् तादृशस्योत्पादने च अनाहिताग्नित्वभङ्गात् प्रकृतौ आर्थिकस्य भेदस्य चोदकेन अनतिदेशात् आयतनमात्रभेदेऽपि गार्हपत्यदक्षिणाग्न्योरभेदात् 'यस्मिन्नेव प्रदीयते तमेवोपतिष्ठेत' इति वचनाच्च अतिप्रणीताग्नेः औपासनाग्नेर्वा उपस्थानम् । संकर्ष. १।२।१४.

₹ पिण्डपितृयज्ञे अनाहिताग्नेरप्यधिकारः ॥

अग्निसाध्येषु दर्शपूर्णमासादिष्विव पितृयज्ञेऽपि अनाहिताग्नेर्नाधिकारः । यत्तु श्रूयते 'अप्यनाहिताग्निना कार्यमेव, इदं चिन्मे कृतम्, इदमविशत्, इदं चिच्छकवाम, पितरश्चिन्मा ऽऽवेदयन्ति' इति, तदनाहिताग्निनाऽपि एतत्कर्तव्यम्, किं पुनराहिताग्निना, इत्येवमर्थवादत्वेनापि उपपन्नम् । इति प्राप्ते, अवधारणार्थकेन अपिशब्देन कर्तव्यमेवेति स्पष्टविधिना च अनाहिताग्नेरपि अधिकारावगतेः इतरांश एव तत्रार्थवादः । संकर्ष. १।२।१२.

₹ पिण्डपितृयज्ञे उपस्थानमन्त्रस्थगार्हपत्यपदलोपः (आहिताग्नेरिदम्) ॥

तस्मिन्नेव मन्त्रे 'अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुञ्चतु' इति गार्हपत्यशब्दस्य असमवेतार्थत्वेऽपि मन्त्रानुग्रहायाविकारेण प्रयोगे होमाधिकरणत्वेन संस्कार्यत्वात् गार्हपत्यपदं अपनीय आवसथ्यपदप्रक्षेपरूपे ऊहे वा प्राप्ते, गार्हपत्यशब्दमात्रं लुप्यते, तावन्मात्रस्य अनन्वितवचनत्वात् । उपतिष्ठेत इत्यात्मनेपदेन मन्त्रस्य करणत्वेन प्राप्तेः, प्राकृतस्य तस्य गार्हपत्यपदविनिर्मुक्तस्यैव समवेतार्थकत्वात् । अग्नेः अदृष्टपुञ्जरूपस्य अग्न्यन्तरेण प्रत्याम्नायाभावेन पदान्तरप्रक्षेपासंभवात् । अत एव 'न देवताऽग्निशब्दक्रियम्' इति षाष्ठो न्यायः संगच्छते । ईदृशपदघटितमन्त्रस्यैव लोप इति याज्ञिकपक्षः क्वाचित्कस्तु चिन्त्य एव । संकर्ष. १।२।१५.

* पिण्डपितृयज्ञे विशेषाणां अन्यतोऽसिद्धेः तेषामभावे च विधेस्तत्त्वानुपपत्तेः तद्विशेषाभिधायिशब्दकल्पना (तद्विशेषाः विनियोगाधिकारप्रयोगाः) । कणिका. पृ. ३८० * पिण्डपितृयज्ञे 'समूलं बर्हिर्भवति' इति दर्भाणां समूलत्वमुक्तम् । तत्स्तुतये च 'यत् परुषि दितं तद् देवानाम्, यदन्तरा तन्मनुष्याणाम्' इत्यनुवादः । परुषिदिताधिकरणम् । ३।४।३।११.

₹ पिण्डपितृयज्ञाधिकरणम् । पिण्डपितृयज्ञन्यायः । पिण्डपितृयज्ञः पुरुषार्थो न दर्शाङ्गम् ॥

पितृयज्ञः स्वकालत्वादनङ्गं स्यात् । ४।४। ८।१९ ॥

भाष्यम्— अस्ति आमावास्ये कर्मणि पितृयज्ञः ' अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्ति ' इति । तत्र संशयः किमामावास्यस्य कर्मणः पिण्डपितृयज्ञोऽङ्गम्, उतानङ्गमिति । किं प्राप्तम् ? अङ्गम् , फलवत्संनिधानात् निष्क्रयवचनाच्च । **आह**, ननु फलवत्संनिधावफलं तदङ्गं भवति । फलवच्चेदं कल्प्येत स्वर्गेणेति । **उच्यते** । सत्यम् । अमावास्यया एकवाक्यत्वान्न शक्यः स्वर्गः कल्पयितुमिति । **आह** । कालवचनत्वान्न कर्मणैकवाक्यत्वं संभवतीति । **उच्यते** । लक्षणयाऽपि तावत्कर्मैकवाक्यता संभवति । स्वर्गे कल्प्ये न लक्षणा, न श्रुतिः । एवं चामनन्ति, ' यत्पितृभ्यः पूर्वेद्युः करोति, पितृभ्य एतद्यज्ञं निष्क्रीय यजमानो देवेभ्यः प्रतनुते ' इति । अमावास्यां प्रति निष्क्रेतुं प्रतनितुं च श्रूयते । तस्मात्तदङ्गभूतमिति । **एवं प्राप्ते, ब्रूमः** । पितृयज्ञः स्वकालत्वादनङ्गं स्यात् । अनङ्गभूतः पिण्डपितृयज्ञः । कस्मात् ? स्वकालत्वात् । स्वशब्दाभिहितेन कालेनास्य संबन्धः, न कर्मणा लक्षितेनेति । यथा ' दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत ' इति । यथा ' पुरस्तादुपसदां सौम्येन चरन्ति ' इति । अत्र काले एवायं मुख्यः शब्दो न कर्मणि । कर्मणि लक्षणा । श्रुतिश्च लक्षणाया बलीयसी । यच्चोक्तं लक्षणया कर्मैकवाक्यता भविष्यतीति, तच्च न । कस्मात् ? अनुवादे हि लक्षणा न्याय्या, न विधौ । विधिश्चायम् । तस्मान्नामावास्याकर्मणा संबन्धः । एकस्मिन् काले द्वे कर्मणी परस्परेणासंबद्धे इति ।

टुप्— पितृयज्ञः स्वकालत्वादनङ्गं स्यात् ॥ (सिद्धान्तमाह–) ' अमावास्यायामपराह्णे ' इति सामानाधिकरण्यम् (अवगम्यते) । तच्च कालवचनत्वे (सति) उपपद्यते । इतरथा अमावास्याशब्देन आग्नेयादीनि उच्येरन् । तेषामङ्गत्वेन पिण्डपितृयज्ञो विधीयते (विधीयेत) । तस्य अपराह्णः कालः (विधीयते) इत्यनेन द्वारेण सामानाधिकरण्यं कीदृशमपि स्यात् (न स्यादित्यर्थः) । क्लिष्टा चेयं (वैयधिकरण्यद्वारा सामानाधिकरण्य–) कल्पना (न संभवति) । तस्मात् (कालवचनत्वात्) अमावास्याशब्दार्थे (काले) निमित्ते फलाय कर्म विधीयते । (तस्मात् फलप्रयुक्तः पिण्डपितृयज्ञः , न क्रतुप्रयुक्त इति) ।

तुल्यवच्च प्रसंख्यानात् । २० ॥

भाष्यम्— तुल्यवच्चान्यैः प्रधानैः प्रसंख्यायते । ' चत्वारो वै महायज्ञाः अग्निहोत्रम् , दर्शपूर्णमासौ, ज्योतिष्टोमः , पिण्डपितृयज्ञः ' इति महायज्ञैस्तुल्यवत् प्रसंख्यायते । काऽस्य महायज्ञता स्यादन्यतः फलवत्तायाः । तस्मादनङ्गम् ।

प्रतिषिद्धे च दर्शनात् । २१ ॥

भाष्यम्— इतश्चानङ्गम् । प्रतिषिद्धे हि आमावास्ये पिण्डपितृयज्ञं दर्शयति । ' पौर्णमासीमेव यजेत भ्रातृव्यवान् नामावास्याम् , हत्वा भ्रातृव्यममावास्यया यजेत, पिण्डपितृयज्ञेनैवामावास्यायां प्रीणाति ' इति । असत्याममावास्यायां पिण्डपितृयज्ञं दर्शयति । तदनङ्गत्वे उपपद्यते । तस्मादपि नाङ्गं पिण्डपितृयज्ञ इति ।

किं प्रयोजनं चिन्तायाः । यदि पौर्णमास्यामाधानम् , ततोऽनन्तरायाममावास्यायां न क्रियते, यथा पूर्वपक्षः । यथा तर्हि सिद्धान्तस्तथा कर्तव्यः । इदमपरं प्रयोजनम् । कुण्डपायिनामयने ' मासमग्निहोत्रं जुहोति ' ' मासं दर्शपूर्णमासाभ्यां यजेत ' इति । यथा पूर्वः पक्षस्तथा कर्तव्यः पिण्डपितृयज्ञः । यथा सिद्धान्तस्तथा न कर्तव्य इति । श्लोकमप्युदाहरन्ति ' **आधानं पौर्णमास्यां चेद् वृत्ते दर्शे करिष्यते । अनङ्गं पितृयज्ञश्चेत् सत्रे च न करिष्यते ॥** ' इति ।

शा— (सिद्धान्तमाह–) ' **नैवं साधारणत्वेऽपि सामानाधिकरण्यतः । कालवाचित्वमेव स्यात् तत्सापेक्षश्च कर्मणि ॥** ' यद्यपि तावत् (कर्मकालयोः) साधारणः अमावास्याशब्दः , तथापि अपराह्णसामानाधिकरण्यलिप्सया कालवाचित्वमध्यवसीयते ।

सोम— पूर्वत्र (षट्चितिरित्यत्र) अर्थवादोपनीतत्वात् फलस्य अस्तु नैमित्तिकत्वम् । प्रकृते तु अत्यन्तानुपस्थितं फलं कल्पनीयं इत्ययुक्तं इति वैधर्म्येण प्रत्यवस्थानात् **संगतिः** । **सूत्रार्थस्तु**– अमावास्याशब्दस्य कालवाचित्वेन स्वशब्दाभिहितकालयोगित्वात् पितृयज्ञो

नाङ्गं स्यादिति । **प्रयोजनम्**– पूर्वपक्षे दर्शविकारेषु प्रवृत्तिः, सिद्धान्ते तु न प्रवृत्तिः ।

वि— ' क्रत्वङ्गं स्यान्न वा पिण्डपितृयज्ञः , क्रतौ हि सः । अमावास्योक्तितो, मैवं तत्कालोक्तेः पुमर्थता ॥ '

भाट्ट— अनारभ्य श्रुतम् ' अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्ति ' इति । तत्रायं पिण्डपितृयज्ञो दर्शेष्ट्यङ्गम् , अमावास्यापदेन कर्मवाचिना ' तत्र जयान् जुहुयात् ' इतिवत् वाक्याद्दर्शाङ्गत्वप्रतीतेः । यद्यपि चायं कालेऽपि मुख्यः, तथापि फलकल्पनाभियाऽत्र कर्मपरत्वमेव युक्तम् । वस्तुतस्तु यद्यपि काल एव मुख्यः कर्मणि तद्योगान्निरूढलक्षणा, प्रकृते च कालपर एव, अपराह्णसामानाधिकरण्यात्, तथापि ' तस्मात् पितृभ्यः पूर्वेद्युः क्रियते ' इति वाक्ये दर्शेष्टिपूर्वेद्युःकालश्रवणात् वैमृधन्यायेन दर्शेष्टेरुपस्थितत्वात्तदङ्गत्वम् । **इति प्राप्ते**, अमावास्याशब्दस्य कर्मवाचित्वं भवतैव निराकृतम् । लक्षणा तु प्रमाणाभावात् कालसामानाधिकरण्यविरोधाच्च दूरतोऽपास्तैव । पूर्वेद्युर्वाक्यमपि इष्टेरनुपस्थितत्वान्न तत्प्रतियोगिककालं विधत्ते, अपि तु तिथिद्वैधे पूर्वेद्युःकालम् ' ययाऽस्तं सविता याति पितरस्तामुपासते ' इति प्राप्तमनूद्य देवतामात्रम् । के चित्तु द्वैधे चन्द्रदर्शनात् पूर्वेद्युरिति व्याख्याय खण्डपर्वणि परेद्युः पितृयज्ञमनुतिष्ठन्ति । सर्वथा न दर्शाङ्गं पितृयज्ञः । एवं च ' पौर्णमासीमेव यजेत भ्रातृव्यवान्नामावास्याम्, हत्वा भ्रातृव्यममावास्यया यजेत, पिण्डपितृयज्ञेनैवामावास्यायां प्रीणाति ' इति दर्शेष्ट्यभावेऽपि पिण्डपितृयज्ञदर्शनं संगच्छते । एतद्बलेनैव च ' पितृभ्य एव तद्यज्ञं निष्क्रीय यजमानः प्रतनुते ' इत्यादिपिण्डपितृयज्ञार्थवादे यज्ञोपस्थितावपि न क्षतिः ।

यत्तु ' न दर्शेन विना श्राद्धमाहिताग्नेर्द्विजन्मनः । ' इति मनुवचनम् (मनु. ३।२८२) , तत् श्राद्धं कृष्णपक्षश्राद्धं दर्शन अमावास्यया विना आहिताग्नेर्न भवति अनाहिताग्नेरिव तिथ्यन्तरेष्विति व्याख्येयम् । न तु दर्शेन दर्शेष्टिं विना श्राद्ध पितृयज्ञो न भवतीत्येवं व्याख्येयम् , दर्शपदे लक्षणायां प्रमाणाभावात् । तेनायं स्वर्गार्थ इति **मूलानुयायिनः** । वस्तुतस्तु अकरणे सप्तहोतृहोमरूपप्रायश्चित्तस्य आपस्तम्बादिभिः स्मरणात् ज्योतिष्टोमादिक्रतुभिस्तुल्यवद्गणनाच्च नित्य एवायम् । **प्रयोजनं** दर्शाभावेऽपि करणम्, तद्विकारेषु च नातिदेशः । यत्तु भाष्यकारेण पौर्णमास्यामाधाने कृते अग्रिमामावास्यायां दर्शेष्ट्यभावात् पूर्वपक्षे अकरणमित्युक्तम् , तत् द्वादशरात्रिषु पवमानेष्टिपक्षे आधानोत्तरदिने पौर्णमासकालाभावे च बोध्यम् । यदा तु तदुत्तरदिने कालसत्त्वं पौर्णमासस्य, तदा आधानदिने एव सेष्टि सान्वारम्भणीयं पौर्णमासस्यान्वाधानं कृत्वा श्वोभूते पौर्णमासेनेष्ट्वा अग्रिमदर्शेष्ट्यङ्गतयैव पितृयज्ञानुष्ठाने न कश्चिद्विरोधः ।

मण्डन— ' दशयजेर्न गुणः पितृयज्ञः । '

शंकर— ' पितृयज्ञो न दर्शाङ्गम् । '

* **पिण्डपितृयज्ञन्यायः** । ' अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्ति ' इत्यत्रानारभ्याधीतवाक्ये श्रुतः पिण्डपितृयज्ञः क्रत्वर्थः पुरुषार्थो वा इति संशये कर्मवाच्यमावास्याशब्दसमभिव्याहारात् तदङ्गत्वम् । यद्यपि कालस्यापि साधारणोऽयं शब्दः , तथापि फलकल्पनापरिहाराय कर्मवाच्येव । अतः क्रत्वर्थः । इति प्राप्ते, सिद्धान्तः । कालकर्मसाधारणोऽपि अमावास्याशब्दः अपराह्णशब्दसमानाधिकृतः इति कालपर एव । न च साधारण्यम् , काले रूढत्वात् , कर्मणि च तत्संबन्धेन लाक्षणिकत्वात् । तस्मात् स्वर्गफलः पिण्डपितृयज्ञः । **कल्पतरु. १।१।४ पृ. ११२ ब्रसू.**

* **पिण्डपितृयज्ञबर्हिषि** दर्शपूर्णमासबर्हिर्धर्मा न भवन्ति । **भा. ३।७।१।३–४.**

पिण्डपितृयज्ञहोमो दक्षिणाग्नौ, नाहवनीये ॥

पितृयज्ञे एव दक्षिणाग्नौ श्रपितस्यापि हविषः आहवनीये एव होमः, गार्हपत्ये श्रपितस्यापि तथा दर्शनात् । 'यदाहवनीये जुहोति ' इति वाक्यस्य बाधे मानाभावात् ' दक्षिणाग्नेरेकोल्मुकं धूपायत् उद्धरति ' इति वचनान्तरेण प्रणीताग्नेरपि सत्त्वात् , तस्य च पशौ अतिप्रणीतवत् दृष्टार्थत्वाय तत्रैव वा होमः । **इति प्राप्ते**, ' यस्मिन् श्रपयति तस्मिन् जुहोति ' इति वचनेनैव सिद्धान्तः , प्रणीतस्य तु आयतनाद्बहिर्निःसारणेन ततो भिन्नत्वात् । अत एव तस्यादृष्टार्थत्वमपि न दुष्यति, ' ये रूपाणि

प्रतिमुञ्चमानाः' इति मन्त्रे तस्य रक्षोपहननार्थत्वश्रवणात्। संकर्ष. १।२।११.

卐 **पिण्याकयाचनार्थं गतस्य खारिकातैलदातृत्वाभ्युपगम इति न्यायः।** सर्वदर्शनसंग्रहे पूर्णप्रज्ञनये अयं न्यायः। **साहस्री.** ७०९.

* **पिता** पितामहः सोमं न पिबेत् इति (भाष्यम्)। पितुः पितामहस्य वा असोमपत्वं न्यात्यपशोर्निमित्तत्वेनोच्यमानं साहित्याविवक्षया सिद्धम्। **वा.** ३।१।६।१२ पृ. ६९६. * पिता वार्धके पुत्रमुपजीवति। तथा च 'वृद्धौ च मातापितरौ साध्वी भार्या सुतः शिशुः। अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीत्॥' इति स्मृतिः। **के.** * 'पित्रा पितरं वा संजानीते' इयं कर्मणि तृतीया कारकविभक्तिरूपा विनियोक्त्री श्रुतिः। **बाल.** पृ. ४४.

卐 **पित्रनुसृतस्तनन्धयन्यायः।** पिता यथा स्तनन्धयं बालमनुसृत्य वर्तते, तथा विदुषा अज्ञो जनोऽनुसर्तव्यः। **संग्रहः.**

* **पित्रादीनामदेयता** विश्वजिति सर्वस्वदाने। नहि पित्रादीनां शक्यते स्वत्वं परित्यक्तुम्। न चैतत् न्याय्यं यत् पित्रादीनां परिचारकत्वम्। **भा.** ६।७।१।१-२.

* **पितृधने** पुत्राणां लोके समविभागो दृष्टः। **वि.** १०।३।१३.

* **पितापुत्रन्यायः।** तद्यथा स एव कं चित्प्रति पिता भवति, कं चित्प्रति पुत्रो भवति। एवं प्रकृतेऽपि चोद्यमिति 'तस्मिन्निति निर्दिष्टे पूर्वस्य' (पा० १।१।६६) इति सूत्रभाष्ये स्पष्टम्। **साहस्री.** ६०७.

* **पितृमातृमातुलादयः** तत्तत्संबन्धविशेषवाचकशब्देन यथा तुष्यन्ति न तथा स्वनामग्रहणेन, प्रत्युत कुप्यन्त एव। **वि.** १०।४।१४.

卐 **पितृयज्ञः स्वकालत्वादनङ्गं स्यात्। ४।४।८।१९॥**

'अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्ति' इति श्रुतम्। अयं पिण्डपितृयज्ञः किं आमावास्यस्य कर्मणः अङ्गम्, उत नेति विचारे अमावास्यायागाङ्गं पिण्डपितृयज्ञः इति उत्सूत्रे पूर्वपक्षे सिद्धान्तयति। पितृयज्ञः पिण्डपितृयज्ञः अमावास्यायागस्य अनङ्गम्, न अङ्गं स्यात्। स्वकालत्वात्। स्वः स्वीयः काले यस्यासौ स्वकालः, स्वकालत्वात्। अमावास्यैव अस्य स्वः कालः। तत्रायं विहितः। अमावास्यायागकालोऽपि यद्यपि सैव तिथिः, तथापि एकस्मिन् काले द्वे एते कर्मणी परस्परेण असंबद्धे। तस्मादनङ्गम्।

तुल्यवच्च प्रसंख्यानात्। २०॥

पिण्डपितृयज्ञः स्वप्रधान एव, न अमावास्याया अङ्गं इति सिद्धान्ते हेत्वन्तरपरं सूत्रम्। इतरैर्महायज्ञैः तुल्यमिव पिण्डपितृयज्ञस्य प्रसंख्यानं परिगणनं कृतम् 'चत्वारो वै महायज्ञा अग्निहोत्रम्, दर्शपूर्णमासौ, ज्योतिष्टोमः, पिण्डपितृयज्ञः' इति। तुल्यता च फलवत्तया स्वप्रधानत्वम्। तस्मात् नाङ्गम्।

प्रतिषिद्धे च दर्शनात्। २१॥

पिण्डपितृयज्ञः स्वप्रधान एव नामावास्यायागस्याङ्गं इति सिद्धान्ते तृतीयहेतुप्रतिपादनार्थं सूत्रम्। प्रतिषिद्धेऽपि आमावास्ये कर्मणि पिण्डपितृयज्ञानुष्ठानस्य दर्शनात् पिण्डपितृयज्ञो नामावास्याङ्गम्। किञ्च यदा पौर्णमास्यामाधानं तदा अव्यवहितायाममावास्यायां तिथौ अमावास्यायागो न भवति, पिण्डपितृयज्ञस्तु भवति। तस्मात् नामावास्याङ्गं पितृयज्ञः। **के.**

* **पितृयज्ञे** अतिदेशप्राप्तस्य होतृवरणस्य 'न होतारं वृणीते' इति निषेधः श्रूयते। अत्र नञः पर्युदासार्थत्वेऽपि विकल्पः अपरिहार्यः। तस्यापि पर्युदसनीयप्राप्तिसापेक्षत्वात्। अन्यथा 'न सौम्येऽध्वरे' इत्यस्यापि पर्युदासत्वापत्तेः। किञ्च अन्यत एव तदन्येषु प्राप्तेः, तदन्यमात्रसंकोचार्थत्वे च पर्युदासोपसंहारयोरभेदापत्तेः न पर्युदासाख्यविध्यन्तरोपपत्तिः। तस्मात् प्रतिषेध एवायम्। ततश्च विहितप्रतिषिद्धत्वात् विकल्पः इति। तत्र प्राप्तिसापेक्षस्यापि सुरापानादिनिषेधवत् विशेषनिष्ठत्वात् बलीयस्त्वं स्यात् इत्याशङ्क्य विशेषनिष्ठेनापि निषेधेन आत्मलाभायोगापत्तेः सामान्यरूपस्यापि विधेः स्वविषयादपनेतुमशक्यत्वात् अनपनीतस्य च शास्त्रस्य अत्यन्तबाधायोगात् विकल्पो दुष्परिहरः इत्युक्तम् 'न तुल्यहेतुत्वादुभयं शब्दलक्षणम्' (१०।८।१।३) इति।

सिद्धान्तस्तु कर्तव्यत्वप्रतिपादनात्मकविधिविरोधित्वेन अकर्तव्यत्वप्रतिपादनात्मकनिषेधे जाग्रति विकल्पापत्तेः तत्परिहाराय पर्युदासोऽत्र अङ्गीक्रियते। तस्य विषयसमर्पणेन अनुकूलतया विकल्पानासञ्जकत्वात्, तन्मात्रसंकोचनार्थोपसंहारात् तदन्यमात्रसंकोचनार्थस्य पर्युदासस्य स्पष्टं वैलक्षण्यं इति। **सु.** पृ. ८.

卐 **पित्तं यदि शर्करया शाम्यति, कोऽर्थः पटोलेनेति न्यायः।** स्वल्पप्रयत्नेन कार्यसिद्धौ बहुप्रयत्नान्तरं व्यर्थमिति विषयेऽस्य प्रवृत्तिरिति। अत्र पटोलशब्देन पटोलपत्रं गृह्यते, तस्य शीतगुणत्वात्। उक्तं च 'पटोलपत्रं पित्तघ्नं मूलं तस्य विरेचकम्। फलं तस्य त्रिदोषघ्नं नाडी तस्य कफापहा॥' इति। **साहस्री.** ७९९.

* **पित्तधर्मस्य** पीतत्वस्य चाक्षुषरश्मीनां शङ्खप्राप्तौ रश्मिसंयुक्तानां पित्तावयवानामपि शङ्खप्राप्तेः शङ्खसंयुक्तसमवायनिमित्तारोपदर्शनात् सादृश्यादिना केन चित् संबन्धेन आरोपो भवति। **सु.** पृ. ५०८.

* **पित्र्याणि** कर्माणि अपरपक्षे अपराह्णे। ६।८।६।२५. * **पित्र्यायां** अग्निः कव्यवाहनः स्विष्टकृद्देवता आवापिकस्विष्टकृति। तत्र उत्तमानूयाजेऽपि 'देवो अग्निः कव्यवाहनः स्विष्टकृत् सुद्रविणा मन्द्रः कविः' इति मन्त्रे ऊहः, त्यागे च तद्देवतोल्लेखः कर्तव्यः। याज्ञिकास्तु एवं न कुर्वन्ति। तत्र मूलं चिन्त्यम्। **भाट्ट.** १०।४।२०. * पित्र्यायामिष्टौ 'मित्रावरुणौ त्वोत्तरतः' इत्युत्तरपरिधिपरिधानमन्त्रः वाजसनेयिनां कर्कमते 'मित्रावरुणौ त्वा पुरस्तात्' इत्यूह्यते। तथा आहवनीयावेक्षणे 'सूर्यस्त्वा पुरस्तात् पातु' इति प्राकृतो मन्त्रः 'सूर्यस्त्वा दक्षिणतः पातु' इत्यूह्यते। संप्रदायमते तु अत्र मन्त्रद्वयेऽपि ऊहो नास्ति। **बाल.** पृ. १२७. * पित्र्यायां धानासु हन्तिः पूर्वं कर्तव्या। हन्तिं कृत्वा पाकः कार्यः। १०।२।३४।७५.

* **पित्र्येष्टौ** विधिबलात् कर्मैक्येऽपि अनुवाक्याद्वयम्। **सु.** पृ. १०६४.

卐 **पित्र्यकर्मणामपरपक्षादिः कालः॥**

इतरेषु तु पित्र्याणि। ६।८।६।२५॥

भाष्यम्— श्राद्धादीनि अपरपक्षे अपराह्णे च, स्मृतिरूपान्यार्थदर्शनात्। (भाष्यकारेण न व्याख्यातमिति टुप्टीका, तस्मात् अयं ग्रन्थो न भाष्यकारस्येति भाति)।

टुप्— पित्र्याणि (कर्माणि कानि चित्) एतानि— उदकतर्पणमहरहः (कार्यं न दक्षिणायनादिकं कालमपेक्षते)। पिण्डपितृयज्ञः अमावास्यायाम् (सर्वस्याम्)। उभयोः पक्षयोः श्राद्धम् (चन्द्रसूर्योपरागनिमित्तम्। नित्यं च द्रव्यदेशब्राह्मणसंनिधानवशाच्च विहितम्)। पित्र्या चातुर्मास्यकाला (महापितृयज्ञाख्या साकमेधकाले) पौर्णमास्याम्। (नात्र अपरपक्षकालसंभवः)। तानि न नियोगतः इतरेषु (दैवकालेतरेषु। यथासंभवं तु इतरेषु तेषु वा कर्तव्यानि)।

(**वि**— इदमधिकरणं नास्त्येव। **भाट्ट**— इदमधिकरणं पूर्वाधिकरणे एवान्तर्भावितम्।)

मण्डन— 'पित्र्यं कर्माथापराह्णादिकाले।'

शंकर— 'पित्र्यं कृष्णेऽपरायणे।'

卐 **पिपीलिकाभिर्मन्थानगिरिविलेपनन्यायः।** यथा आहुः— 'श्रद्धत्स्व मन्थानगिरिं पर्यलिम्पन्पिपीलिकाः' इति। अश्रद्धेयस्योपन्यासे अयं प्रवर्तते। **साहस्री.** ८७९.

卐 **पिपीलिकागतिन्यायः।** यथा पिपीलिका वृक्षशिरःस्थितमधुरफलरसास्वादने झटित्यशक्ता सत्यपि बह्वायासेन गच्छन्ती कालान्तरे तद्रसमवश्यमास्वादते, तथैव अज्ञानी पुरुषः श्रुतिस्मृतिपुराणविहितकर्मोपासनादिमार्गसंजातशुद्धान्तःकरणतया जन्मान्तरेषु कदा चित् प्राप्तपूर्णज्ञानोऽवश्यं ब्रह्मानन्दमनुभवतीति। **साहस्री.** ५१५.

* **पिपीलिकमध्या** अनुष्टुप्। पादेषु अक्षराणि १२।८।१२। उदा० 'पर्यूषु प्रधन्व' (ऋसं. ९।११०।१)। **के.** * पिपीलिकमध्या उष्णिक्। पादेषु अक्षराणि ११।६।११। उदा० 'हरी यस्य सुयुजा' (ऋसं. १०।१०५।२)। **के.** * पिपीलिकमध्या बृहती।

पादेषु अक्षराणि १३।८।१३ । उदा० ' अभि वो वीर ' (ऋसं. ८।४६।१४) । के.

* नहि स्निग्धस्य स्नेहनं शक्यं कर्तुं पिष्टस्य वा पेषणम् । भा. ९।२।२।३.

* पिष्टनिर्वृत्तिपर्यन्तं पेषणं अभ्यसितव्यम् । यदि सकृदेव उपलायाः प्रकर्षणाकर्षणे कृत्वा उत्सृज्येत यदेषां कार्यं तन्नैव निर्वर्त्येत । भा. ११।१।५।२७.

❃ **पिष्टपेषणन्यायः** । यत्र निष्फला क्रिया तत्रास्य प्रवृत्तिः । **साहस्री.** ३०१. * नहि अविद्वान् विहितोऽस्ति इत्यवश्यं तावदमीषा आत्मीयाः पदार्थाः प्रागेव कर्मप्रक्रमादवगन्तव्याः । तत्र प्रैषः **पिष्टपेषणन्यायेन** अर्थं ज्ञापयितुं अशक्नुवन् अदृष्टार्थो भवति । **वा.** ३।२।४।३१–३.

* व्रतं चोपेतमनुत्सृष्टं पुनरुपेतुमशक्यम् । उपेयमानं च **पिष्टपेषणवदकिञ्चित्करं** स्यात् । **भा.** १२।२।५।१६.

* **पिष्टलेपफलीकरणहोमौ** नाम, दृषदुपलकपालादिषु आश्लिष्टो यः पिष्टलेपः, तमुद्धृत्य जुह्वां चतुर्गृहीते आज्ये प्रक्षिप्य दक्षिणाग्नौ जुहोति, फलीकरणशब्देन तण्डुलकणा उच्यन्ते, तानपि तथा जुहोति इति । **वि.** ५।१।१५. * पिष्टलेपफलीकरणहोमौ पशुपुरोडाशाग्नेडाभक्षणोत्तरमेव ज्योतिष्टोमे, न तु अनूयाजैः सहोत्कर्षः । ५।१।१५. * पिष्टलेपफलीकरणहोमौ प्रतिपत्तिकर्मणी । प्रतिपत्तित्वात् अप्रयोजकौ एव निर्वपणादीनां धर्माणाम् । **भा.** ८।४।५।२७. * **पिष्टलेपफलीकरणहोमयोः** दाक्षिणाग्निकयोः नोत्कर्षः अनुयाजोत्कर्षेऽपि । ५।१।१५. **मीको.** पृ. २०९६ ' दाक्षिणाग्निकहोमानपकर्षाधिकरणम् ' इत्यत्र द्रष्टव्यम् ।

* ' **पीपिवांसं** सरस्वतः ' इति याज्यानुवाक्ये पुंदेवत्ये हौत्रकाण्डे स्त्रीदेवत्यात् पश्चात् पठिते, चित्रायागे पञ्चमहविषः । वि.५।१।७.

❃ **पीलवधिकरणम्** । (१।३।४।९ वा. पृ. २१९–२२०. 'शास्त्रस्था वा०' इति सूत्रान्ते) । अतोऽन्यथा एतदधिकरणं वर्ण्यते । अविद्यमानवाक्यशेषा आर्यम्लेच्छप्रयोगविप्रतिपत्तिभाजः पीलवादिशब्दा एव अत्रोदाहरणम् । आर्या हि पीलुशब्दं वृक्षविशेषे प्रयुञ्जते । तदाह गौतमः– ' पैलवौदुम्बरौ वैश्यस्य दण्डौ ' इति । म्लेच्छास्तु हस्तिनि । तत्र संदेहः किं द्वयोरपि पीलुशब्दाभिधेयत्वम्, उतान्यतरस्याऽभिधेयत्वं अन्यतरस्य गौणत्वमिति । अत्रायं पूर्वपक्षिणोऽभिसंधिः उभावेतावर्थौ पीलुशब्दात् प्रतीयेते । प्रतीतिश्चोभयत्रापि शक्तिं कल्पयति, विशेषाभावात् । न च लौकिकशब्दार्थव्यवहारे आर्यम्लेच्छकृतः कश्चिद्विशेषोऽस्ति । नहि घटादिजातीयेषु आर्या एव परं घटशब्दं प्रयुञ्जते, न म्लेच्छा इति शक्यं वक्तुम् । तस्मादेवंविधेषु शब्दार्थव्यवहारेषु वेदविरोधाभावेन आर्यम्लेच्छयोर्विप्रतिपत्तेः समत्वात् पील्वादिशब्दानामुभयवाचकत्वमिति । **एवं प्राप्ते, अभिधीयते** । आर्याणामेव प्रसिद्धिर्बलीयसी । शास्त्रस्था हि ते पारमार्थिकशास्त्रार्थानुष्ठानाय पारमार्थिकमेव शब्दार्थमवधारयन्ति । तेन येयं आर्याणामनादिशब्दार्थावधारणपरम्परा सैव वाच्यवाचकसंबन्धावधारणे प्रमाणम् । म्लेच्छानां तु यादृच्छिकव्यवहारिणां पारमार्थिकशब्दार्थतत्त्वनिरूपणानभिज्ञानां हस्तिगोचरत्वेन आर्यप्रयुक्तपीलुशब्दार्थवृक्षस्थूलत्वश्यामलत्वसादृश्यात् गाणपीलुशब्दाश्रयणेन मुख्यत्वभ्रमादेव शब्दस्य व्यवहारोपपत्तौ न पारमार्थिकशब्दार्थाध्यवसानम् । तदुक्तम्– ' अभियुक्ततरा येये बहुशास्त्रार्थदर्शिनः । तेते यत्र प्रयुञ्जीरन् , ससोऽर्थस्तत्त्वतो भवेत् ॥ ' इति (वा. पृ. २२०) । तस्मादार्यप्रसिद्धिरेव शब्दार्थावधारणे प्रमाणम् , न म्लेच्छप्रसिद्धिरिति ।

प्रयोजनम्— ' पैलवौदुम्बरौ वैश्यस्य ' इत्यत्र हस्तिभवाश्विदण्डेन सह पीलुवृक्षदण्डस्य विकल्पः पूर्वपक्षे । सिद्धान्ते तु पीलुवृक्षदण्ड एव । **सूत्रं** तु ये ' शास्त्रस्थाः ' तेषामेव प्रसिद्धिर्बलीयसी । तेषामेव शास्त्रार्थानुष्ठानाय शब्दार्थनिरूपणे ' निमित्तत्वात् ' इति । **तौता.**

❃ **पीलवधिकरणम्** । आर्यम्लेच्छप्रयोगविप्रतिपत्तिबलाबलचिन्तनम् ॥ ('शास्त्रस्था वा०' इति सूत्रान्ते) ।

वा— ' **तस्मादन्यदुदाहृत्य विचार्यमिदमीदृशम्** (यस्मात् भाष्योक्तोदाहरणानि न युक्तानि तस्मात् इत्यर्थः) । **यत्र विप्रतिपत्तिः स्यादार्यम्लेच्छ-**

प्रयोगजा ॥ तत्र किं तुल्यता युक्ता किमेकैव बलीयसी । समा विप्रतिपत्तिः स्याद् दृष्टार्थव्यवहारिणाम् ॥ आर्यास्तावद्विशिष्येरन्नदृष्टार्थेषु कर्मसु । दृष्टार्थेषु तु तुल्यत्वमार्यम्लेच्छप्रयोगिणाम् ॥ ' सर्वो हि शब्दः अर्थप्रत्यायनार्थं प्रयुज्यते, अर्थश्च संव्यवहारप्रसिद्ध्यर्थमभिधीयते । ' **तत्र यस्य विशिष्टस्य म्लेच्छेष्वर्थान्तराभिधा । तत्रापि तस्य सामर्थ्यमनाद्येव प्रतीयते ॥ यथैव ह्यार्यगम्येऽर्थे संबन्धानादितामतिः । म्लेच्छगम्ये तथैव स्याद्विशिष्टं हि कारणम् ॥ न प्रयोगावधिस्तस्य म्लेच्छेष्वपि हि दृश्यते । अनाद्योरर्थशक्त्योश्च विशेषो गम्यतां कथम् ॥ यथा च म्लेच्छदेशेऽपि धूमोऽग्नेरवबोधकः । एवं स्वार्थे प्रयोगात् तैरिष्टः शब्दोऽपि वाचकः ॥ तस्मात्पील्वादिशब्दानां वृक्षहस्त्यादिबोधने । समा विप्रतिपत्तिः स्यादार्यम्लेच्छप्रयोगतः ॥** ' इति प्राप्ते, अभिधीयते । 'शास्त्रस्था वा' इति पूर्ववदेव सकलसूत्रव्याख्या योजनीया । (शब्दापभ्रंशवच्च अर्थापभ्रंशस्याप्युपपत्तेः न प्रतीतिप्रयोगमात्रेण एकान्ततः सर्वेषामर्थानां एकस्माच्छब्दात् प्रतीयमानानां वाच्यत्वनिर्णयः संभवति इति कल्पनालाघवात् एकस्यैव वाच्यत्वे निर्णीते, कस्यैकस्य इत्यपेक्षायां शास्त्रस्थानां अभिधेयाभियोगविशेषात् तत्प्रयोगवशेन वाच्यत्वावधारणं इति व्याख्यान्तरमाह–) किञ्च ' **यथा साध्वनुरूपत्वात् प्रमादाशक्तिजेष्वपि । जायते वाचकभ्रान्तिस्तथैव म्लेच्छभाषिते ॥** ' शब्दापभ्रंशवदेव गौणभ्रान्त्यादिप्रयोगनिमित्ता अर्थापभ्रंशा भवन्ति । ते शास्त्रस्थैरेव अविप्लुतार्थक्रियानिमित्तपुण्यार्थिभिः शक्यन्ते साध्वसाधुकार्षापणमध्यादिव तत्परीक्षिभिः विवेक्तुम् । अभियुक्तानभियुक्तज्ञानयोश्च अभियुक्तज्ञानं बलवत् इतरस्य सुलभापवादत्वात् । ' **अतः शास्त्राभियुक्तत्वादार्यावर्तनिवासिनाम् । या मतिः सैव धर्माङ्गशब्दार्थत्वप्रमा मता ॥** ' एतेन आर्यावर्तनिवासिमध्येऽपि ' **अभियुक्ततरा येये बहुशास्त्रार्थवेदिनः । तेते यत्र प्रयुञ्जीरन् ससोऽर्थस्तत्त्वतो भवेत् ॥** ' वा. १।३।४।९ पृ. २१९–२२०.

शा— **लोकप्रसिद्धिगम्यत्वात् शब्दार्थस्योभयोरपि । समा विप्रतिपत्तिः स्याच्छास्त्रार्थे हि बलाबलम् ॥** ' इति प्राप्ते, ब्रूमः । ' **प्रतिपादकतामात्रं म्लेच्छेष्वप्यवगम्यते । अविप्लुतस्तु शब्दार्थः शिष्टेष्वेवावधार्यते ॥** ' १।३।५ वर्णकं २.

सोम— प्रयोजनं पूर्वपक्षे हस्तिनोऽपि पीलुशब्दार्थत्वात् हस्तिवाचकत्वाभिप्रायेण पीलुशब्दप्रयोगस्य अपशब्दप्रयोगत्वाभावात् आहिताग्नेः अपशब्दप्रयोगनिमित्तं प्रायश्चित्तं न भवति, सिद्धान्ते तु भवति इति । **भवदेवस्तु** ' पैलवौदुम्बरौ वैश्यस्य दण्डौ ' इति गौतमस्मृतौ हस्तिभवाश्विदण्डेन सह पीलुवृक्षदण्डस्य विकल्पः पूर्वपक्षे, सिद्धान्ते तु पीलुवृक्षदण्ड एव इत्याह ।

भाट्ट— प्रयोगरूपाचारस्य यत्र आर्यम्लेच्छयोः परस्परमर्थविप्रतिपत्तिः, यथा पीलुशब्दस्य वृक्षविशेषे आर्याणाम्, अन्येषां हस्तिनि । तत्र तुल्यबलत्वं व्यवहारे आर्याणामिव म्लेच्छानामपि, अभियुक्तत्वाविशेषात् अनध्यस्मरणस्य उभयत्रापि समानत्वात् । **इति प्राप्ते, अभिधीयते** । शक्यताऽवच्छेदकभेदेन अनेकशक्तिकल्पनाप्रसङ्गात् एकत्रैव शक्तिर्नोभयत्र । न च विनिगमनाविरहः आर्यप्रसिद्धेरेव नियामकत्वात् । आर्या हि शब्दैकसमधिगम्यधर्माधर्मयोः अविप्लुतिलिप्सया शब्दार्थतत्त्वं विविच्य परिपालयन्ति, न म्लेच्छाः, दृष्टार्थव्यवहारस्य यथाकथञ्चिदपि सिद्धेः । अतः तत्प्रसिद्धया वृक्षविशेषे एव शक्तिः । गजप्रतीतिस्तु लक्षणया शक्तिभ्रमाद्वा ।

यत्र तु नियामकाभावः तत्राऽगत्या अक्षादिशब्देषु उभयत्रापि शक्तिः, आर्याणामेवोभयत्रापि प्रयोगात् । तत्रापि कदाचिद्वाक्यशेषस्य नियामकता । ' यत्रान्या ओषधयो म्लायन्ते अथैते मोदमाना इवोत्तिष्ठन्ति ' इत्यनेनैव यवशब्दस्य दीर्घशूकविशिष्टे शक्तिः, प्रियङ्गुषु तु लक्षणया प्रयोगः । १।३।४.

शंकर— ' पील्वाद्यर्थस्तथाऽऽर्यतः । ' ८.

❃ **पीलुपत्रफलन्यायः** । यथा पीलुवृक्षस्य पत्राणि कटुकानि फलानि च मधुराणि । द्वयोः पत्रफलयोः पीलुजन्यत्वात् साम्यमिति तर्कः । अयं च अत्यन्तासंगतमूर्ख-

वितर्ककथनाविर्भावे प्रवर्तते । एवं च अभेदसाधको हेतुः गोमयपायसीयन्यायवदाभासतां पीलुपत्रफलन्यायवदाभासतां च भजेत् इति बौद्धे । **साहस्री.** ६६८.

* **पीलुशब्दमार्या** वृक्षविशेषे (' अक्रोड ' इति श्रुतमस्माभिः । ' कल्किः ' इति मस्करी) प्रयुञ्जते, म्लेच्छास्तु हस्तिनि । तत्र आर्यप्रसिद्धिर्ग्राह्या धर्माचारे । **के.**

* **पुण्डरीक** इति पौण्डरीक इति वा अहीनविशेषः एकादशरात्रः । तत्र गवामयुतमश्वसहस्रं च दक्षिणा । **वि.** १०।६।१६.

* **पुण्डरीकत्वं** पद्मत्वैकार्थसमवायिशुक्लावान्तरजातिः । **सु. पृ.** १४१०.

* **पुण्यभूः** । ' यथा वा यां भुवं कश्चिदध्यावसति पुण्यकृत् । तत्संपर्कपवित्रत्वात् सेव्यते पुण्यकारणम् ॥ ' **वा.** १।३।३।७ **पृ.** २०७.

* **पुत्रगतपूतत्वादिफलप्रयुक्ता** वैश्वानरेष्टिः । ४।३।१६।३८–३९.

* ' योऽग्नीनाधाय भाग्यज्यानिं **पुत्रज्यानिं** वा जीयेत स पुनरादधीत ' । पुत्रज्यानिः पुत्रहानिः । **भा.** १०।३।५।३०.

पुत्रलिप्सया देवं भजन्त्याः भर्ताऽपि नष्टः इति न्यायः । यथा केचित् वादिनः शङ्कन्ते ननु प्रत्यगभिन्नमेकमेव अद्वितीयं ब्रह्म इति सिद्धान्तो भवतामिति । ' ईश्वरः सर्व एवैते ' इत्युक्त्या तु प्रकृतन्यायेन जीवेशाभेदं साधयितुं प्रवृत्तैर्भवद्भिः सर्ववादिसंमतेशाभेदोऽपि नाशितः स्यात् इति वदन्ति इति । **साहस्री.** ८५.

* **पुत्रवृष्ट्यादि** काम्यकर्मफलं असति प्रतिबन्धे ऐहिकम् , सति तु आमुष्मिकम् । **भा.** ४।३।११।२७–२८ वर्णकं २.

* **पुनरभ्युन्नीताः** । सर्वैश्चमसैः सह अध्वर्युः आदौ होतृयाज्यया हुत्वा ततस्तेषां मध्ये होत्रादीनां मध्यतःकारिणां चमसान् अन्यत्र विनियुज्य अवशिष्टचमसेषु सशेषेष्वेव पुनः सोममभ्युन्नीय तैः क्रमेण मैत्रावरुणादिकतिपयहोत्रकयाज्याभिर्जुहोति । ते पुनरभ्युन्नीताः सोमा उच्यन्ते । **संकर्ष.** २।३।१४. * पुनरभ्युन्नीताः सोमाः शुक्रामन्थिप्रचारे एव सवनमुखीयाः । तेषां होतुर्वषट्कारे अनुवषट्कारे च चतुर्भिर्मध्यतःकारिणां चमसैः हुत्वा होत्रकाणां चमसैः सकृत् सकृत् वषट्कारे एव हुत्वा पुनः सशेषेष्वेव पात्रेषु सोमः अभ्युन्नीतः । एवं हि तत्र अध्वर्युः संप्रेष्यति ' मध्यतःकारिणां चमसाध्वर्यवो वषट्कृतेऽनुवषट्कृते जुहुत । होत्रकाणां चमसाध्वर्यवः सकृद्धुत्वा अभ्युन्नीयोपावर्तध्वम् ' इति । **भा.** ३।२।१२।३०, * **पुनरभ्युन्नीतेषु** अनुवषट्कारे मैत्रावरुणः ' मित्रं वयं हवामहे ' इति मित्रावरुणौ, ब्राह्मणाच्छंसी ' इन्द्र त्वा वृषभं वयम् ' इति इन्द्रम् , पोता ' मरुतो यस्य हि क्षये ' इति मरुतः, नेष्टा ' अग्ने पत्नीरिहावह ' इति त्वष्टारं पत्नीश्च, आग्नीध्रः ' उक्षान्नाय वशान्नाय ' इति अग्निं यजति । ३।२।१२।३०. * पुनरभ्युन्नीतेषु चमसेषु प्रस्थितदेवतायाः इन्द्रस्य मित्रावरुणादीनां चेति सर्वेषामुपलक्षणं भक्षमन्त्रे कर्तव्यम् । न तु इन्द्रस्य अनुपलक्षणम् । ३।२।१२।३०–३१.

पुनरभ्युन्नीतेषु सर्वेषामुपलक्षणं द्विशेषत्वात् । ३।२।१२।३०॥

अत्र विषयभाष्यमविषयत्वाद्विस्तरत्वाच्च उपपाद्यते । तदर्थं एव लिख्यते । ज्योतिष्टोमे ऐन्द्राश्चमसाः । तेषु ब्रह्मादीनामृत्विजां चत्वारश्चमसाः । ते वषट्कारानुवषट्कारा ऐन्द्रग्रहणमानाभ्यामिन्द्रे पर्यवसिताः । अपरे च मैत्रावरुणादीनामृत्विजां षट् चमसाः । तेषु चेन्द्रोद्देशेन वषट्कारमात्रे हुते अर्धावशिष्टे च द्रोणकलशान्मित्रावरुणाद्युद्देशेन गृहीतः सोमरसोऽभ्युन्नीतः । तेन च मित्रावरुणाद्या देवताः षडिज्यन्ते । तानि च मित्रावरुणाद्युद्देशेन क्रियमाणानि प्रदानानि इन्द्रप्रदानविकृतिभूतानीति पूर्वन्यायेनैव सिद्धम् । तेषां षट्चमसानां शेषभक्षणमन्त्रे संदेहः किं ' मित्रावरुणपीतस्य ' इत्यूहः कर्तव्यः उत ' इन्द्रमित्रावरुणपीतस्य ' इति । इदानीं पूर्वपक्षोक्तन्यायानुसारेणैव कृत्वाचिन्तया ऊहविषयविशेषश्चिन्त्यते ।

अत्र सिद्धान्तेनोपक्रमते । इन्द्रोद्देशेन हुतशेषवत्सु चमसेषु देवतान्तरार्थं द्रोणकलशादानीय निक्षिप्तः सोमरसः पुनरभ्युन्नीत इत्युच्यते । तस्य देवतान्तरोद्देशेन होमेऽपि

सति तच्छेषत्वादूहेन सर्व एवेन्द्रमित्रावरुणादय उपलक्षणीया इति ।

अपनयाद्वा पूर्वस्यानुपलक्षणम् । ३१ ॥

अत्रायं पूर्वपक्षः । यद्यपि चमसेष्वैन्द्रशेषत्वमस्ति, तथापि मित्रावरुणोद्देशेन प्रक्षिप्तरससंसर्गादेकतापन्नो रसः कृत्स्न एव मित्रावरुणार्थाश्रावणप्रत्याश्रावणाभ्यामपनीतेन्द्रसंबन्धः प्रदानकाले मित्रावरुणार्थ एव जातः । तेन पूर्वेन्द्रसंबन्धस्यापनीतत्वात् प्रकृतौ चापनीतदेवतासंबन्धस्यानुपलक्षणात् नेन्द्र उपलक्षयितव्यः , किन्तु मित्रावरुणावेव । तेन इन्द्रस्यापनयात् नेन्द्र उपलक्षणीय इति । **एवं प्राप्ते, अभिधीयते ।**

अग्रहणाद्वाऽनपायः स्यात् । ३२ ॥

अयमभिप्रायः । भवेदेवं यदीन्द्रसंबन्धोऽपनीतो भवेत् । देवतान्तरसंबन्धेन हि पूर्वदेवतासंबन्धो नापनीतः देवतान्तरसंबन्धश्च द्रोणकलशादभ्युन्नीयमानस्यैव सोमरसस्य । तस्यैव ग्रहणवेलायां देवतान्तरसंबन्धस्य शास्त्रेण प्रतिपादितत्वात् । यथागृहीतस्यैव द्रव्यस्य देवतोद्देशेन त्यागात् । आश्रावणप्रत्याश्रावणयोरपि तदर्थत्वमेव । तदुक्तम्— **' देवतां यां यदुद्दिश्य द्रव्यं स्वत्वेन गृह्यते । तस्यास्तदेव संबन्धि नान्यत्तन्मध्यपात्यपि ॥ '** इति (वा. पृ. ७९०) ।

तेन यद्यपि संसर्गिद्रव्यत्वेन द्रव्यस्य विभागो नावगम्यते, तथापि शास्त्रगतस्य विभागस्य विद्यमानत्वादिन्द्रार्थगृहीतस्य वचनमन्तरेण मित्रावरुणाद्यर्थत्वेन संकल्पयितुमशक्यत्वान्नानेन संबन्धोऽपनीत इति इन्द्रशेषस्यापि विद्यमानत्वात् सोऽप्युपलक्षयितव्य इति । तस्मात् ' इन्द्रमित्रावरुणपीतस्य ' इत्येवमूहः कर्तव्य इति ।

ननु प्राकृतपदोद्धारेण तस्य स्थाने पदान्तरनिक्षेपः खलु ऊहः । ' इन्द्रमित्रावरुणपीतस्य ' इति तु प्रयोगे प्राकृतमिन्द्रपदं विद्यते एवेति कथमूहः ? उच्यते । इन्द्रमित्रावरुणशेषयोर्भिन्नत्वाच्छब्देन भक्षणमन्त्रस्यापि प्रयोगो भवेत् , स नैवोचितः । तत्र इन्द्रशेषत्वलक्षणार्थेन्द्रपदस्थाने मित्रावरुणादिपदोहो नैव युक्तः । किन्तु शेषयोर्मिश्रितत्वात् तन्त्रे सत्युभयोरपि तन्त्रेणैवात्र प्रयोगः । तत्रेतरपदानां साधारणत्वात् भवतु तन्त्रोच्चारणम् । देवतावाचकस्य तु यथावस्थितेन्द्रपदव्यवहितमित्रावरुणपदस्यैव भिन्नत्वेन तन्त्रोच्चारणसंभवात् ऊहितानूहितपदयोः आवृत्तमेवोच्चारणमिति न दोषः । तेनेन्द्रमित्रावरुणपीतं भक्षयामीत्येवंरूप एव मन्त्रप्रयोग इति सिद्धम् । कृत्वाचिन्ताधिकरणत्वान्नात्र पृथक् प्रयोजनम् । **सूत्रं** तु इन्द्रार्थस्य शेषस्य मित्रावरुणार्थमग्रहणे तत्र इन्द्रस्य देवताया अनपायः स्यादिति । **तौता.**

पुनरभ्युन्नीतेषु सर्वेषामुपलक्षणं द्विशेषत्वात् । ३।२।१२।३० ॥

सन्ति ज्योतिष्टोमे दश चमसाः । तत्र मध्यतःकारिणां होतृब्रह्मोद्गातृयजमानानां वैकल्पिकसदस्ययुक्तानां चमसाः पञ्च, मैत्रावरुणब्राह्मणाच्छंसिपोतृनेष्ट्रच्छावाकाग्नीध्राणां होत्रकाणां च षट् । एते प्रातःसवने शुक्रामन्थिग्रहप्रचारे अच्छावाकसदस्यचमसवर्जं नव चमसाः प्रथममिन्द्राय हूयन्ते । तच्छेषेषु सत्स्वेवाभक्षितेषु पुनरपि द्रोणकलशात् सोममुन्नीय मित्रावरुणादिदेवताभ्यो हुत्वा तेषु चमसेषु हुतशेषः सोमः भक्ष्यते इति स्थितिः । तत्र भक्षणमन्त्रे ' इन्द्रपीतस्य ' इति पदस्य स्थाने ' मित्रावरुणपीतस्य ' इत्येवं रीत्या मित्रावरुणादय एव केवला देवता इन्द्ररहिता उपलक्षणीयाः, उत इन्द्रसहिताः ' इन्द्रमित्रावरुणपीतस्य ' इत्येवं पूर्वहोमदेवता इन्द्रोऽपि च उपलक्षणीयः इति विचारे सिद्धान्तमाह । उन्नीतेषु चमसेषु इन्द्राय हुतेषु मित्रावरुणादिप्रदानार्थे तच्छेषोपरि पुनरुन्नीताः सोमाः पुनरभ्युन्नीताः । तेषु पुनरभ्युन्नीतेषु चमसेषु भक्ष्यमाणेषु इन्द्रस्य मित्रावरुणादीनां च इति सर्वेषां उपलक्षणं कीर्तनं ऊहः कर्तव्यः । द्विशेषत्वात् भक्ष्यमाणस्य शेषस्य ऐन्द्रानैन्द्रोभयप्रदानशेषत्वात् ।

अपनयाद्वा पूर्वस्यानुपलक्षणम् । ३१ ॥

सिद्धान्तमुक्तं वाशब्देन व्यावर्तयन् पूर्वपक्षी आह । पुनरभ्युन्नीतसोमभक्षमन्त्रे पूर्वस्य पुनरभ्युन्नयनात् प्राचीनस्य इन्द्रस्य अनुपलक्षणं उपलक्षणं उच्चारणं न कर्तव्यम् । कुतः ? अपनयात् मैत्रावरुणाद्युत्तरप्रदानदेवताभूतमित्रावरुणादीनां संबन्धे कृते पूर्वस्य इन्द्रस्य अपनीतत्वात् बाधितत्वात् । तस्मात् मित्रावरुणपीतस्य इत्येव वक्तव्यम् , न तु इन्द्रमित्रावरुणपीतस्य इति ।

अग्रहणाद्वाऽनपायः स्यात् । ३२ ॥

सिद्धान्ती पुनराह । वाशब्दः उक्तपक्षनिरासार्थः । पूर्वशेषस्य मित्रावरुणाद्युत्तरदेवताऽर्थत्वेन अग्रहणात् उन्नयनकाले अभ्युन्नीतमात्रस्य करिष्यमाणयागार्थत्वावधारणाच्च । पूर्वदेवताया इन्द्रस्य अनपायः स्यात् अपायो बाधो न स्यात् । तस्मात् पुनरुन्नीतसोमभक्षमन्त्रे इन्द्रमित्रावरुणपीतस्य इति सर्वेषामुपलक्षणं कार्यम् । कृत्वाचिन्ता । के.

* पुनरभ्युन्नीतेषु सर्वेषामुपलक्षणं द्विशेषत्वात् । सोमस्य भक्ष्यमाणस्य द्वयोर्देवतयोः शेषत्वात् शेषोपलक्षणार्थे कीर्तनार्थे प्रकथनं इत्येवं प्रकथनवाचिनः करोतेरर्थे (लक्षणशब्दे) ल्युट्प्रयोगः । सु. पृ. ११४३-४४.

§ पुनरभ्युन्नीताधिकरणम् । ज्योतिष्टोमे होत्रकचमसभक्षमन्त्रेषु मित्रावरुणादिभिः सह इन्द्रोऽपि उपलक्षणीयः ॥

पुनरभ्युन्नीतेषु सर्वेषामुपलक्षणं द्विशेषत्वात् । ३।२।१२।३०॥

भाष्यम्— एवं स्थितं तावदपर्यवसितम् । तत एवं सति चिन्तान्तरं वर्तिष्यते । सन्ति पुनरभ्युन्नीताः सोमाः, शुक्रामन्थिप्रचारे एव सवनमुखीयाः । तेषां होतुर्वषट्कारे अनुवषट्कारे च चतुर्भिर्मध्यतःकारिणां चमसैः हुत्वा होत्रकाणां चमसैः सकृत्सकृत् वषट्कारे एव हुत्वा पुनः सशेषेष्वेव पात्रेषु सोमोऽभ्युन्नीतः । एवं हि तत्राध्वर्युः संप्रेष्यति 'मध्यतःकारिणां चमसाध्वर्यवो वषट्कृतेऽनुवषट्कृते जुहुत । होत्रकाणां चमसाध्वर्यवः सकृद्धुत्वा शुक्रस्याभ्युन्नीय उपावर्तध्वम्' इति । तत्र होत्रका नानादेवता यजन्ति । मैत्रावरुणो मित्रावरुणौ 'मित्रं वयं हवामहे' इति, ब्राह्मणाच्छंसी इन्द्रम् 'इन्द्रं त्वा वृषभं वयम्' इति, पोता मरुतः 'मरुतो यस्य हि क्षये' इति, नेष्टा त्वष्टारं पत्नीश्च 'अग्ने पत्नीरिहाऽऽवह' इति, आग्नीध्रोऽग्निम् 'उक्षान्नाय (उक्षा अन्नं यस्य तस्मै) वशान्नाय' इति । तत्र तैश्चमसैः पूर्वस्मिन् वषट्कारे इन्द्र इष्टः । पुनरभ्युन्नीय मित्रावरुणाद्या देवता इष्टाः । शेषास्तत्रेन्द्रस्य मित्रावरुणादीनां च । तत्र संदेहः किं प्रस्थितदेवतायाश्च इन्द्रस्य मित्रावरुणादीनां च उपलक्षणम्, उत इन्द्रो नोपलक्षयितव्य इति । किं तावत् प्राप्तम्? पुनरभ्युन्नीतेषु सर्वेषामुपलक्षणम् । कस्मात्? द्विशेषत्वात् । चमसेचमसे तत्र द्वयोः शेषः । प्रकृतौ यस्मै हुतं तच्छेषः तत्पीत इत्युक्तम् । इहापि तद्वदेव वदितव्यम् । तस्मात् चमसेचमसे द्वयोरुपलक्षणम् ।

वा-- एवं पूर्वपक्षस्थे एवाधिकरणे कृत्वाचिन्तया ऊहविषयत्वं चिन्तयति । हुतेषु चमसेषु सशेषेष्वेव अभ्युन्नीताः सोमाः पुनरभ्युन्नीता इत्युच्यन्ते । तेषां तु यथा पुनरभ्युन्नीतत्वम्, यथा च ऊहचिन्ताविषयता, तथा विभज्य दर्शयति । सन्ति दश चमसाः । तेषां ये मध्यतःकारिणां ब्रह्मादीनां (ब्रह्म-होतृ-उद्गातृ-यजमानानां) चत्वारः, तैः होतुः वषट्कारानुवषट्कारयोः द्विर्द्विः हुतम् । होत्रकचमसैस्तु (मैत्रावरुण- ब्राह्मणाच्छंसि-पोतृ-नेष्टृ-अच्छावाक-आग्नीध्राः होत्रकाः) सकृत् वषट्कारे एव हुतम् । सर्वेषु च इन्द्रो देवता । ततः चमसेषु-सशेषेष्वेव सोमः अभ्युन्नीय हूयते । कथमवगम्यते? तत् सर्वं प्रैषेण दर्शयति (भाष्यकारः) । तत्र द्वितीये होमे होत्रकाः नाना देवता यजन्ति । मैत्रावरुणः मित्रावरुणौ 'मित्रं वयं हवामहे' इत्यादियाज्याभिरेव दर्शयति । तत्र यदा एते चमसाः हुत्वा भक्षणार्थमानीयन्ते, तदा द्वौद्वौ शेषौ दृश्येते पूर्वहोमशेषश्च ऐन्द्रः, उत्तरश्च मित्रावरुणादिदेवत्यः । तस्य उपलक्षणे क्रियमाणे संदेहः किं प्रस्थितदेवता अतिक्रान्तोऽपि इन्द्रः उपलक्षयितव्यः उत्तराश्च मित्रावरुणाद्याः 'इन्द्रमित्रावरुणपीतस्य' इत्येवम्, उत मित्रावरुणादय एव (अत्र पुनः इन्द्रशब्दोऽपि मुद्रित आनन्दाश्रमादौ, स चायुक्तः) केवला इति । कुतः संशयः? किं देवताऽन्तरसंचारेण पूर्वदेवतासंबन्धः अपनीतः, उत नेति । यदि अपनीतः, ततः केवलमित्रावरुणाद्युपलक्षणम्, अथ अनपनीतः, ततः इन्द्रोऽपि उपलक्षणीयः इति । किं प्राप्तम्? सिद्धान्तेनैव तावदुपक्रमः 'सर्वेषामुपलक्षणं द्विशेषत्वात्' इति ।

अपनयाद्वा पूर्वस्यानुपलक्षणम् । ३१ ॥

भाष्यम्-- अपनीतं प्रस्थितदेवतायाः शेषं मन्यामहे । कुतः? मित्रावरुणादिभ्यः तत्पात्रस्थं अभ्याश्राव्यते । कथमेतत्? उच्यते । मित्रावरुणादयो हीज्यन्ते । तद्यथा आचार्यशेषं देवदत्तो भुञ्जानो यदि शेषं पूर्णकाय प्रयच्छति, पूर्णको देवदत्तमुपलक्षयति देवदत्तशेषं भुञ्जे इति, नाऽऽचार्यशेषम् । तस्मान्न प्रस्थितदेवता इन्द्र उपलक्षयितव्य इति ।

वा-- आश्रावणप्रत्याश्रावणादिभिः प्रदानकाले देवताऽन्तरसंवादात् अस्य द्रव्यस्य अपनीता पूर्वदेवता । न च प्रकृतौ अपनीतदेवतासंबन्धोपलक्षणं कृतम् । तस्मात् इहापि न कर्तव्यमिति ।

अग्रहणाद्वाऽनपायः स्यात् । ३२ ॥

भाष्यम्-- न चैतदस्ति इन्द्रो नोपलक्षणीयः इति । तस्यापि हि असौ शेषः प्रत्यक्षमवगम्यते । ननु अपनीतः इति, उच्यते, नासौ अपनीयते । सकृत् हुतान् चमसान् अभि द्रोणकलशात् गृह्णाति । सशेषः चमसः लक्षणं अन्यस्य उन्नीयमानस्य । न च चमसस्थः होतुमुन्नेतव्यः (उन्नीतः) प्रेषितो वा । यत्तु वक्ष्यमाणा देवताः प्रति आश्राविताः इति, उच्यते, आश्राव्यते तत्र देवताभ्यः, न तु इदं वा तत् वा इति । तेन यत् होतुं गृहीतम्, तत् आश्रावितमिति गम्यते । न च आश्रावणवेलायां देवताऽभिसंबन्धः । यद्यत् देवताभिसंबद्धम्, तत् आश्राव्यते । तस्मात् अस्ति इन्द्रशेषः भक्ष्यते च । अतः सर्वेषामुपलक्षणमिति ।

कृत्वाचिन्तैषा । नात्र प्रयोजनं वक्तव्यम् । पूर्वाधिकरणस्यैव एतत् प्रयोजनमवधार्यते ।

वा-- अथवा नापनीतमिन्द्रस्य देवतात्वम् । कुतः? **'देवतां यां यदुद्दिश्य द्रव्यं स्वत्वेन गृह्यते । तस्यास्तदेव संबन्धि नान्यत् तन्मध्यपात्यपि ॥'** शास्त्रलक्षणो हि देवतासंबन्धः शास्त्रेणैव ग्रहणवेलायां देवताऽर्थत्वं प्रक्रम्यते । यच्च प्रक्रम्यते, तदेव समाप्यते नान्यत् । इह च वचनात् सशेषेषु चमसेषु अन्यत् उत्तरदेवताऽर्थं द्रव्यं ग्रहीतव्यमिति गम्यते । तत्र चमसोपलक्षणत्वेन उपपन्नः शेषः । यदा च ग्रहणवेलायामस्य देवताऽर्थत्वं नावधृतम्, तदा प्रदानवेलायां यथागृहीतहोमात् संनिहितोऽप्यसौ असंकल्पितत्वान्न देवताऽर्थो भवति । न वा अस्य तदानीं संकल्पान्तरमस्ति, वचनाभावात् । न च इतरसंकल्पेन प्रसङ्गात् संस्पृश्यते, विभक्तवेलायां संकल्पितवात् । न च प्रदानकाले पुनः संकल्पान्तरमस्ति । सकृत्संकल्पितस्य पुनः संकल्पयितुमशक्यत्वात् । न हि एकमेव द्रव्यमसकृत् त्यज्यते । तस्मान्न प्रदानकाले संकल्पोऽस्तीति । यद्यपि तावत् देवता प्रत्यक्षं भुञ्जीत, तथापि हंस इवोदकात् क्षीरं पश्चात्तनमेव सा सोमं विविच्य भुञ्जीत, किमुत यदा उद्देशमात्रोपकारिणी देवता पुनरभ्युन्नीतस्यैव उद्दिश्यते, न पूर्वशेषस्य । तेन पुनरभ्युन्नीते दीयमाने पूर्वशेषः केवलमुत्सृज्यते, न तु दीयते । यस्तु भक्षणवेलायां तदेकदेशः कश्चित्, सः अनपनीतेन्द्रसंबन्धित्वात् तथैव उपलक्षयितव्य इति ।

वि— 'ऊहपक्षे यदूह्यं तच्चिन्त्यते न्यायपञ्चके । इन्द्रे हुतेऽथ तच्छेषे होत्रकैश्चमसस्थिते ॥ सोमोऽभ्युन्नीय देवेभ्यो हुत्वा संभक्ष्यते तदा । इन्द्रो न लक्ष्यो लक्ष्यो वा, न शेषेऽन्यार्थता यतः ॥, उन्नीत एव संबद्धो न पूर्वो देवताऽन्तरैः । अत इन्द्रस्य सिद्ध्यर्थं लक्ष्योऽसावितरैः सह ॥'

भाट्ट— सवनमुखीयेषु चमसेषु ऐन्द्रेषु सर्वेषु हुतेषु ये होत्रकाणां मैत्रावरुणादीनां चमसाः, तेषु अभक्षितेषु एव पुनः सोमोऽभ्युन्नीय देवताऽन्तरेभ्यो मित्रावरुणादिभ्यो हुत्वा भक्ष्यते । तत्र पूर्वप्रदानदेवताभूत इन्द्रोऽपि उपलक्षणीयो न वेति चिन्तायाम्, उन्नयनकाले न देवताऽन्तरोद्देशः, येन उन्नीतस्यैव तत्संबन्धात् पूर्वशेषस्य पूर्वदेवतासंबन्धो नापेयात् । प्रदानकाले तु संसृष्टस्यैव देवताऽन्तरसंबन्धात् पूर्वदेवतासंबन्धापनयप्रतीतेर्नोपलक्षणम् । इति प्राप्ते, उन्नयनकाले देवतासंकल्पाभावेऽपि सामर्थ्यादेव उन्नयनस्य करिष्यमाणकर्मार्थत्वप्रतीतेः पूर्वशेषस्य संसृष्टत्वेऽपि एतदर्थत्वे प्रमाणाभावात् अनपनीतसंबन्धा पूर्वदेवताऽपि उपलक्षणीया ।

मण्डन— 'अन्यत्रापि चोद्देत् पुनरुन्नतेषु ।'

शंकर— 'प्रस्थिता देवता नोह्या ।'

* **पुनराधानम्**, अस्तमये उदये वा आहवनीयगार्हपत्ययोर्द्वयोर्नाशे एव न एकैकस्य नाशे । ६।४।८.

* पुनराधानं प्रायश्चित्तं अग्निहोत्रे उभयाग्निनाशे । ६।४।८. **मीको.** पृ. ९४ 'अग्निहोत्रे उभयाग्निनाशे' इत्यत्र द्रष्टव्यम् । * पुनराधानम् 'भाग्ययशःश्रीकामानां

पुनरादधीत ', ' योऽग्नीनाधाय भाग्यज्यानिं पुत्रज्यानिं वा जीयेत स पुनरादधीत ' इति । भा. १०।३।५।३०, * पुनराधाने दक्षिणा ' पुनरुत्स्यूतं वासो दक्षिणा पुनरुत्सृष्टोऽनड्वान् ' इति । १०।३।५।३०. * पुनराधाने नैमित्तिके श्रुतया दक्षिणया सामान्यविहितायाः एकादिदक्षिणायाः बाधः । १०।३।५।३०–३३. * पुनराधाने ' पुनर्निष्कृतो रथो दक्षिणा ' । वि. १०।३।५.

卐 **पुनराधेयमोदनवत् । ६।४।८।२६॥**

अग्निहोत्रे श्रूयते ' यस्योभावग्नी अनुगतौ अभिनिम्लोचेत् यस्य वाऽभ्युदियात् पुनराधेयमेव तस्य प्रायश्चित्तिः ' इति । इदं प्रायश्चित्तरूपं पुनराधेयं ओदनवत् पञ्चशरावत् अन्यतरस्यापि अग्नेरनुगमने स्यात् न केवलं उभयोरेव इति पूर्वः पक्षः । श्रुत्यर्थस्तु यस्य आहिताग्नेः उभौ गार्हपत्याहवनीयौ अग्नी अनुगतौ शान्तौ अभिलक्ष्य, शान्तयोः सतोः इत्यर्थः । निम्लोचेत् अस्तमियात् आदित्यः । यस्य च शान्तौ अभिलक्ष्य उदियात् उदयं प्राप्नुयात् आदित्यः, तस्य प्रायश्चित्तं पुनराधानम्, इति ।

द्रव्योत्पत्तिर्वोभयोः । २७ ॥

पूर्वपक्षं सूत्रेण प्राप्तं वाशब्देन निरस्यन् सिद्धान्तमाह । उभयोः द्रव्योत्पत्तिः उभयोः द्रव्ययोः गार्हपत्याहवनीययोः उत्पत्तिः प्रायश्चित्तम् । तथा च उभयोरनुगमने एव आधानेन उभयोरुत्पत्तिः प्रायश्चित्तम् । न एकैकस्यानुगमने । अत्र उभयोः इति पदस्य समासैकदेशे द्रव्यशब्दे अन्वयः । अथ उभयोः गार्हपत्याहवनीययोः अनुगमने एव द्रव्योत्पत्तिः द्रव्यस्य अग्नेः आधानेन उत्पत्तिः प्रायश्चित्तम् । अन्यतरस्य विनाशे आधाने कृते तु द्वयोरग्न्योरुत्पत्तिर्विरुध्येत एकतमस्य सत्त्वात् । तस्मात् नैमित्तिकं पुनराधेयं समुदायानुगमने एव, न तु अन्यतरस्यानुगमने । के.

* ' पुनराधेयमोदनवत् ' इत्यत्र ' यस्योभावग्नी अनुगतौ अभिनिम्लोचेदभ्युदियाद्वा पुनराधेयं तस्य प्रायश्चित्तम् ' इत्यत्र विधेयसामर्थ्यात् निमित्तविशेषणाग्निसाहित्यविवक्षा लभ्यते इत्युक्तम् । बाल. पृ. १२२.

* **पुनराधेयन्यायेन** (६।४।८ मीको. पृ. ९४ ' अग्निहोत्रे उभयाग्निनाशे॰ ' इति बिन्दौ) विधेयसामर्थ्यानुरोधेन उद्देश्यसंकोचः । मुरारि. पृ. ११८०.

* **पुनरुक्तं** ग्रन्थगौरवभयेन नेच्छन्ति । भा. ४।२।४।१३.

* **पुनरुक्तता** न महान् दोषः । बहुकृत्वोऽपि पथ्यं वदितव्यं भवति । ग्रन्थगौरवभयेन पुनरुक्तं नेच्छन्ति । अर्थाग्रहणात्तु विस्मृतः पुनःपुनरभिधीयमानं बहु मन्यन्ते एव । भा. ४।२।४।१३.

* **पुनरुक्तिः** । उक्तस्य पुनर्वचनमन्याय्यम् । उच्यते । साधोर्वचनं बहुशोऽपि उच्यमानं न्याय्यमेव, असाधोस्तु सकृदपि अन्याय्यम् । आह, सकृद्वचनेन ज्ञातस्य पुनर्वचने न प्रयोजनमस्तीति । उच्यते । भवति अस्मरणमपि प्रयोजनम् । भा. ५।१।१।१ वर्णकम् १.

* **पुनर्जन्म** अस्मिन् देहे स्वर्गस्य भोक्तुमशक्यत्वात् अश्रुताऽपि अन्यदेहोत्पत्तिः अर्थापत्त्या कल्प्यते । वि. ४।३।१२.

* ' **पुनर्निष्कृतो** रथो दक्षिणा ' पुनराधाने । भग्नः सन् पुनः समाहितः पुनर्निष्कृतः । वि. १०।३।५.

* **पुनःपदा** । ' एषा वै प्रतिष्ठिता बृहती या पुनःपदा ' । बृहद्रथंतरयोराधारभूते प्रगाथे प्रथमा या बृहती ' अभि त्वा शूर ' इति, तस्याः ' ईशानमिन्द्र तस्थुषः ' इति चतुर्थः पादः, तं पुनर्गृहीत्वा उत्तराया ऋचः पूर्वार्धेन प्रग्रथ्यते । तेन सा ' पुनःपदा ' नाम भवति । वि. ९।२।६.

* **पुनःश्रवणं** निर्गुणं इतरेषामश्रुतानां परिसंख्यापकं भवति । भा. १०।७।२।४.

* **पुनःश्रुतिप्रयोजनानि** गुणविधिः, परिसंख्या, अर्थवादत्वं (स्तुतिः), अन्यविधानम् । के.

* **पुनःस्तोमस्य** यज्ञस्य । ' रथहविर्धाने (नाम सामनी) पुनःस्तोमस्य यज्ञस्य ' ' अपचितिवत्यः (ऋचः) पुनःस्तोमस्य यज्ञस्य ' । ' पुनःस्तोमस्य सवनं मध्यमं द्वादशं स्मृतम् । काया नवदशस्तोमावभितः सवने उभे ॥ ' (प्रातःसवनं नवस्तोमकम्, तृतीयसवनं दश-

स्तोमकम्, मध्यमं तु द्वादशस्तोमकमित्यर्थः) । भा. १०।४।१०।२०.

* ' **पुमान्** देवदत्तः ' इति पुंस्त्वाभिन्नलिङ्गवान् देवदत्तः इति बोधः । इति वैयाकरणाः । मणि. पृ. १२४. * पुमान् स्त्री नपुंसकमिति द्रव्यविशेषा ह्येते । भा. ३।१।६।१२ पृ. ६८१, * **पुमांसो** द्रव्यवन्तः, न स्त्रियः इति पूर्वपक्षः । स्त्रियोऽपि द्रव्यवत्यः इति सिद्धान्तः । ६।१।३।१०–१६, * **पुंसः** एकस्यैवाधानेऽधिकारः सस्त्रीकस्य । ६।१।५।२२–२३. * पुंसः एकस्यैव स्त्रीसद्वितीयस्य दर्शपूर्णमासादावधिकारः । ६।२।२।३–१३. मीको. पृ. २९३ ' अधिकारः दर्शपूर्णमासादौ॰ ' इत्यत्र द्रष्टव्यम् । * पुंसः एवोपस्थानाद्यधिकारः न स्त्रियाः । केशश्मश्रुन्यायः । ६।१।६. * ' स्त्रियः **पुंसो**ऽतिरिक्ताः तस्मादुतैको बह्वीर्जाया विन्दते नैका बहून् पतीन् ' इति यूपैकादशिन्याम् । वा. ११।३।४।९ पृ. २२१.

* **पुंवन्मिथुने** । आश्वश्रौ. ३।२।१२ । मिथुनमिति स्त्रीपुंसयोः समाहार उच्यते । अस्मिन् समाहारे पुंलिङ्गेनैव ऊहः कर्तव्यः इति नियम्यते । नारायणवृत्तिः .

* ' **पुंवाक्ये**ऽप्यन्यथोक्तत्वं यावन्नान्येन गम्यते । तावद्यथाश्रुतं मुक्त्वा नान्यथात्वपरिग्रहः ॥ ' वा. ३।१।७।१३ पृ. ६९९.

卐 **पुंविषयन्यायः** । (पुमान् जीवः विषयः घटादिः एतौ यथा भिन्नौ, तद्वत् जीवेश्वरावपि भिन्नौ इत्यत्र एष न्यायः) । साहस्री. ८२१.

* **पुंस्त्वादिलिङ्गस्य** विवक्षा ' कृष्णग्रीवामालभते ' ' अश्व ऋषभो वृष्णिः ' इत्यादौ । ४।१।६।१७.

卐 **' पुरोऽध्वर्युर्विभजति ' इति देशवाद एव ॥**

' ऋत्विग्भ्यो वाचं विभजति होतर्यज पोतर्यज नेष्टर्यज ब्रह्मन् यज अच्छावाक यज ' इति प्रैषरूपाया वाचो विभागं विधाय श्रूयते ' तां पुरोऽध्वर्युर्विभजति मैत्रावरुणः पश्चात् ' इति । अत्र पुरःपश्चाच्छब्दौ देशवादौ कालवादौ वा, उभयत्रापि निरूढत्वात् । तेन एकस्मिन्नेव देशे स्थित्वा अध्वर्युमैत्रावरुणौ पूर्वापरकालभेदेन प्रैषान् विभज्य ब्रूयातामेकस्मिन् वा काले प्राक्प्रत्यग्देशभेदेन स्थित्वा । इति विकल्पे प्राप्ते, देशवाद एवायम्, आहवनीयं गच्छतीति प्रकृत्य एतदाम्नानात् । पाटलिपुत्रं गच्छतीत्यादौ तदधिकरणदेशस्योपस्थितत्वात् । तेनोत्तरवेद्यामध्वर्युः, सदसि मैत्रावरुणः प्रेष्यति । संकर्ष. २।३।१२.

* **पुरोऽनुवाक्या** इति समाख्या । पूर्वमनूच्यते इति पुरोऽनुवाक्या । आपेक्षिकः पूर्वशब्दो याज्यामपेक्ष्य भवति । भा. १२।४।२।४. * पुरोऽनुवाक्या (' अग्ने नय सुपथा ' इति) मनोता च कृष्णग्रीवयोः पश्वोः आवर्तते कालभेदात् सौम्येन व्यवायात् । ११।४।२०।५७–५९. * **पुरोऽनुवाक्याः** प्रैषान्तानि अनुवचनानि । न तु केवला अनुवाक्याः । ज्योतिष्टोमे पश्वादौ । वा. ३।७।२१।४३ पृ. ११०७, * ' **पुरोनुवाक्यां** प्रथमं प्रयुङ्क्ते ' इति याज्याधर्मः । ३।२।५।१२ पृ. ७६०. * आसीनः **पुरोऽनुवाक्यामन्वाह** । भा. १०।४।२०।४२.

* **पुरउष्णिक्** उष्णिक् । पादेषु अक्षराणि १२।८।८। उदा॰ ' युञ्जन्ति हरी ' (ऋसं. ८।९८।९) । के.

卐 **पुरस्तादैन्द्रवायवस्याग्रस्य कृतदेशत्वात् । १०।५।२०।७०॥**

ज्योतिष्टोमे फलविशेषाय श्रुतानां आश्विनादिग्रहाणां प्रतिकर्ष उक्तः । स प्रतिकर्षः ऐन्द्रवायवस्य पुरस्तात्, न तु सर्वादितः यतः कुतश्चिद्वा । अग्रस्य कृतदेशत्वात् । कृतो ज्ञातो देशो यस्य तादृशत्वात् । एषोऽग्रस्य देशो विज्ञातो यत् उपांश्वन्तर्यामाभ्यामूर्ध्वं पुरस्तादैन्द्रवायवस्य इति । तस्मात् ऐन्द्रवायवात् पुरस्तात् प्रतिकर्ष इति सिद्धान्तः ।

तुल्यधर्मत्वाच्च । ७१ ॥

ज्योतिष्टोमे फलविशेषार्थे श्रूयमाणा आश्विनाद्यग्रताः ऐन्द्रवायवाग्रतया तुल्यधर्मत्वात् । तुल्यो धर्मो यासां ताः तुल्यधर्माणः । तासां भावस्तुल्यधर्मत्वम्, तस्मात् । तत्र धारासंयोगो दृश्यते तस्मात् धाराग्रहानुद्दिश्य एतदग्रता विधीयते ।

तथा च लिङ्गदर्शनम् । ७२ ॥

ज्योतिष्टोमे फलविशेषार्थे आश्विनशुक्राद्यग्रता विधीयते, सा च आश्विनाद्यग्रता ऐन्द्रवायवात् प्राक् ग्रहणेन,

तथा च लिङ्गस्य दर्शनं भवति ‘ धारयेयुस्तम्, यं कामाय गृह्णीयुः । ऐन्द्रवायवं गृहीत्वा सादयेत्, अथ तं सादयेत्, यं कामाय गृह्णीयुः ’ इति । इदं लिङ्गं काम्यस्य ग्रहण-धारणोत्तरं ऐन्द्रवायवस्य ग्रहणं दर्शयति । तस्मात् काम्यानामग्रतानां ऐन्द्रवायवस्य पुरस्तात् प्रतिकर्ष इति सिद्धान्तः । **के.**

* **पुरस्ताद्बृहती** बृहती । पादेषु अक्षराणि १२। ८।८।८ । उदा० ‘ महो यस्पतिः ’ (ऋसं. १०। २२।३) । **के.**

* ‘ ये **पुरोदञ्चो** दर्भाः , तान् दक्षिणाग्रानास्तृणी-यात् ’ अत्र विधेयस्य दक्षिणाग्रत्वस्य उदगग्रत्वस्तुतिः । ये दर्भाः पुरा दैवे कर्मणि उदञ्च उदगग्रा आसन् तान् प्रेताग्निहोत्रे दक्षिणाग्रान् आस्तृणीयात् इति । **वि.** ३।४।४.

* **पुरापदयोगे** भविष्यदर्थे लटः शक्तिः । **मणि.** पृ. ११६.

* **पुराकल्पः** अनेककर्तृकोपाख्यानम् । **सोम.** ६।७।१२. * पुराकल्पः पूर्वपुरुषाचरितत्वाभिधानम् । **वि.** ३।४।६. * पुराकल्पः मन्त्रः ‘ यज्ञेन यज्ञमयजन्त देवाः ’ इत्यादिः । **बाल.** पृ. ६२. * पुराकल्पः यथा ‘ उल्मुकैर्ह स्म पूर्वे समाजग्मुः तान् ह असुरा रक्षांसि निजघ्नुः ’ इति । **भा.** ६।७।१२।२६. * **पुराकल्पाः** परकृतयश्चार्थवादा एव । ६।७।१२।२६–३०.

पुराकल्पन्यायात् ‘ तस्मात् ब्राह्मणः पाण्डित्यं निर्विद्य ’ इत्यादिवाक्यं श्रवणेन पाण्डित्यादिविधौ स्ताव-कम् । यस्मात् पूर्वे ब्राह्मणाः पाण्डित्यादिसाधनैर्ज्ञानं लब्ध्वा सकलविक्षेपरहितं जीवन्मुक्तिसौख्याभिव्यञ्जकं पारमहंस्यं प्राप्तवन्तः , तस्मादाधुनिकोऽपि पाण्डित्यादि-साधनैर्ज्ञानं संपादयेत् इत्यर्थावगमात् । **आभरण.** ३।४।१४।४७ ब्रसू.

* ‘ **पुराणं** मानवो धर्मः साङ्गो वेदश्चिकित्सितम् ’ (प्रमाणम्) । **वा.** १।३।८।२७ पृ. २८६. * **पुराणेऽपि** मन्त्राः ब्राह्मणं च वर्तते । **मणि.** पृ. ७.

* **पुराणादौ** औपचारिकार्थान्वाख्यानोपपत्तेः यज्ञा-नधिकारिणो भीष्मादेः यष्टृत्वकीर्तनालम्बनानि पूजा-प्रतिष्ठादानानि दर्शयितुम् । **सु.** पृ. ७५०, * **पुराणा-दिषु** पुण्यकर्मणामेव मन्वादीनां सृष्ट्यादौ उद्भवः अभ्युपगतः । पृ. ६०.

* **पुराणस्थोपदेशवाक्यानां** एषैव गतिः । **वा.** १।३।१।२ पृ. १६६ (तत्र यद्धर्ममोक्षसंबन्धि तद्वेदप्रभ-वम् । यत्त्वर्थसुखविषयं तल्लोकव्यवहारपूर्वकमिति ।) ।

* **पुरीषम्** । आहार्यपुरीषतादि वेदेः पुरुषार्थमेव । **भा.** ४।१।२।२ वर्णकं २.

* **पुरुषोऽपि** कर्म प्रति औदुम्बरीसंमानादिषु गुण-भूतः श्रूयते । **भा.** ३।१।३।६. * पुरुषः न कस्य चित् शेष इति बादरिमतम् । पुरुषः कर्मशेषः इति जैमिनिमतम् । **वि.** ३।१।३. * पुरुषः विधिशतेनापि तथा न हि प्रवर्तते यथा लोभेन । **वा.** ३।४।१०।२८ पृ. ९६०. * जीवतोऽपि **पुरुषः** कर्ता, न शरीरम् । स च पतितेऽपि शरीरे पुरुषोऽस्त्येव । **भा.** १०।२। २३।५८. * नहीदृशः पुरुषोऽस्ति योऽवश्यकर्तव्ये फलं न कामयते । मोक्षार्थी इति चेत् , तन्न । तेनापि अवश्यं पापक्षय एव एषितव्यः । तस्मिन् (पापे) सति मोक्षाभावात् । **टुप्.** ६।३।१।२ पृ. १४१०, * नहि फलमन्तरेण पुरुषः प्रवर्तते । केषु चित् साक्षात् केषु चित् पारम्पर्येण । ६।३।१।२ पृ. १४११. * प्रीत्यर्थं हि पुरुषो यतते । **भा.** ६।१।१।२. * ‘ स्मृतिभिः पुरुषो नित्यं कृतो यज्ञोपवीतवान् ’ । **वा.** ३।४ षट्-सूत्र्याम् ३ पृ. ८९६. * **पुरुषाः** ज्ञातं ह्यर्थं परस्मै प्रतिपादयितुं प्रयुञ्जते वाक्यानि । न चाप्रतीतोऽर्थः ज्ञातो भवति, इति प्रमाणान्तरसंवादिना पौरुषेयेण वचनेन भवितव्यम् । **बृहती.** पृ. २२. * **पुरुषं** प्रति फलं उपदिश्यते । **भा.** ३।१।३।५. * पुरुषं हि नियुञ्जानः (नियोगः) साध्यसिद्धिमवगमयति । **बृहती.** पृ. १५९.

‘ पुरुषं हि परित्यज्य नानृतं प्राप्यते क्रतौ । पुरुषे तन्निषिद्धं चेन्निषिद्धं तत् क्रतावपि ॥ ’ इति-वार्तिकवक्ष्यमाणन्यायेन (३।४।४।१२ पृ. ९१०) पुरुषार्थस्यापि ब्रह्मसूत्रस्य (यज्ञोपवीतस्य) प्रौढ्या क्रतावपि प्राप्तेरनुवादोपपत्तिं वक्तुं पुरुषार्थब्रह्मसूत्रस्मृति-रुदाहृता । **सु.** पृ. १३५४.

* **पुरुषेण** हितप्राप्तिर्यथेष्यते अहितनिवृत्तिरपि तथा इष्यते । यथा लोके उपानद्धारणादिका क्रिया कण्टकपरि-हारार्था, एवमिहापि प्रत्यवायपरिहारार्था । **टुप्.** ६।३। १।३ पृ. १४०९, * **पुरुषस्य** अनेका जाया भवन्ति, इत्यत्र श्रुतिः– ‘ यूपैकादशिन्यां द्वेद्वे रशने यूपमृच्छतः , तस्मात् स्त्रियः पुंसोऽतिरिक्ताः । तस्मादुतैको बह्वीर्जाया विन्दते, नैका बहून् पतीन् ’ । **वा.** १।३।४।९ पृ. २२१. * पुरुषस्य आचारतः वासोद्वयं प्राप्यते । **भा.** १२।३।१। २. * पुरुषस्य एकस्यैव स्त्रीसद्वितीयस्याधानेऽधिकारः । ६।१।५।२२–२३. * पुरुषस्य कर्तृत्वादिना यागाद्यु-द्देश्यककृतिकारकत्वात् वाक्यादेव यागाङ्गत्वम् । **भाट्ट.** ३।१।३. * पुरुषस्य जायमानस्य अग्रे शिरो जायते मध्ये मध्यं पश्चात् पादौ, एवं आग्नेयोऽग्रतः, उपांशुयाजो मध्ये, अग्नीषोमीयः पश्चादिति । एतस्मात् सामान्यात् (‘शिरो वा एतद्यज्ञस्य यदाग्नेयो०’) एषा स्तुतिः । **भा.** ४।४।११।३७. * पुरुषस्य (कर्मणि) नियोजनं नाम कार्यबोधनमेव । **ऋजु.** पृ. ३०. * पुरुषस्य प्रतिभामात्रं न प्रामाणिकम् । **कणिका.** पृ. ३३७. * पुरुषस्य प्रत्यवायो निषेधातिक्रमे । ६।२।५।१९–२०. * पुरुषस्य प्रयोजनं फलं ग्रहीतुम् , न यागमभिनिर्वर्तयितुम् । **भा.** ३।७।२।६. * पुरुषस्य फलं प्रति प्राधान्यात् तत्साधनं यागमपि प्रति प्रधानत्वम् , यागं प्रति च गुणभावात् तत्साध्ये फलेऽपि गुणत्वम् । **वा.** ३।१।३।६ पृ. ६६४. * पुरुषस्य स्वत एव प्राप्तान् कामानुद्दिश्य तत्साधनत्वेन ज्योतिष्टोमो विधीयते । **वि.** ४।३।११.

* ‘ **पुरुषान्तरबाधोऽपि** नैवाल्पं भ्रान्तिकारणम् । नहि द्विचन्द्रदिङ्मोहौ न बाध्येते नरान्तरैः ॥ ’ **वा.** १।३।२।३ पृ. १८०.

* **पुरुषान्तरस्थदर्शनपूर्विका** पुरुषान्तराणां प्रवृत्तिः । **वा.** ३।३।७।१४ पृ. ८५७–८५८.

पुरुषापनयात्स्वकालत्वम् । १०।२।६।२१ ॥

शतकृष्णले चरौ शेषभक्षाः इतरेभ्य ऋत्विग्भ्यः अप-नीय ब्रह्मणे एव दातव्या इत्युक्तम् । तदनन्तरं ते सर्वे भक्षाः ब्रह्मणा किं एककाले एव भक्षणीयाः, उत तत्त-द्भक्षकाले इति विचारे सिद्धान्तमाह । पुरुषापनयात्, ल्यब्लोपे पञ्चमी, पुरुषापनयं कृत्वा कृतार्थः शब्दः ‘ ब्रह्मणे परिहरति ’ इति भक्षाणां स्वकालत्वं न निवार-यति । तस्माद्यथाकालमेव ब्रह्मणा भक्षयितव्याः इति । **के.**

* **पुरुषार्थं** गोदोहनम् । ४।१।२ वर्णकं २ । दर्श-पूर्णमासप्रकरणस्थमवगोरणादि । ३।४।६ । द्रव्यार्जनम् । ४।१।२ वर्णकं ३ । पिण्डपितृयज्ञः । ४।४।८ । प्रजापति-व्रतानि । ४।१।३ । प्रायश्चित्तं लौकिके यूपस्पर्शे । ९।३।३ । मलवद्वासःसंवादनिषेधः (मलवद्वासाः रजस्वला) । ३।४।७. * पुरुषार्थे वेद्यादेरनतिदृश्यं स्तरणादि । (दृश्यं चक्षुर्विषयम् । अतिदृश्यं प्रतिबन्धराहित्येन स्पष्ट-दर्शनार्हम् । अनतिदृश्यं तद्भिन्नं सर्वथा दर्शनानर्हं वा) । **भा.** ४।१।२।२ वर्णकं २. * **पुरुषार्थानि** अग्नि-चिद्व्रतानि ‘ वर्षति न धावेत् , न स्त्रियमुपेयात् , पक्षिणो नाशितव्याः ’ इत्यादीनि । इमानि क्रत्वन्ते अनुष्ठेयानि, न चयनमात्रे समाप्ते । ५।३।१०।२६–२८. * **पुरुषार्थः** शरीरे सुवर्णधारणविधिः, न क्रत्वर्थः । ३।४।८।२०–२४. * ‘ पुरुषार्थो हि सर्वेण स्वरसादेव काम्यते । तत्साधन-तदङ्गेषु प्रवृत्तिः प्रार्थनादृते ॥ ’ नहि साधनभूतं पशुं कश्चित् कामयते, विनैव तु कामेन प्रार्थितान्यथाऽनु-पपत्त्या तमुपादत्ते । **वा.** १।४।२।३ पृ. ३३०. * पुरुषाय यः, स **पुरुषार्थः** । **भा.** ४।१।१।१ । यस्मिन् कृते पदार्थे पुरुषस्य प्रीतिरुपजायते स पुरुषार्थपदार्थः । क्रत्वर्थपुरुषार्थयोर्द्वयोरपि साध्यसाधनसंबन्धो वैदिकः किन्तु पुरुषार्थे करणमिच्छातो न नियोगतः, क्रत्वर्थे तु अनिच्छातः, (किन्तु) नियोगतः । ४।१।२।२, * यत्र कर्तव्यतावचनः (प्रत्ययः) तत्र पुरुषार्थः साक्षात् पार-म्पर्येण वा अविनाभूतः । ६।१।१।३ पृ. १३५२. * **पुरुषार्थेन** क्रत्वर्थे बाध्यते, प्राप्तबाधोऽत्र । ३।३। ७।१४ पृ. ८६०. * **पुरुषार्थस्यातिक्रमे** यदाचमन–सावित्रीजप–तप्तकृच्छ्रादिरूपं प्रायश्चित्तम् , तत् तार-तम्यानुसारेण भवति । **सोम.** ३।४।८. * पुरुषार्थस्य गोदोहनादेः सौर्यादौ नातिदेशः । क्रत्वङ्गमेव तु अति-दिश्यते । ८।१।१४।२३–२५. * **पुरुषार्था** च सर्वशास्त्र-प्रवृत्तिः । **वा.** ३।६।३।१० पृ. १०३७. * **पुरुषार्थायाः** अवेष्टे राजसूयात् भिन्नतन्त्रता । ११।४।३।९–१२.

* पुरुषार्थैकसिद्धित्वात्तस्यतस्याधिकारः स्यात् (६।२।१।१) इति षष्ठाधिकरणन्यायेन सत्रिणः प्रत्येकं कृत्स्नं फलं लभन्ते । सु. पृ. ५४४.

पुरुषार्थैकसिद्धित्वात् तस्यतस्याधिकारः स्यात् । ६।२।१।१ ॥

सत्रेषु एकप्रयोगनिर्वाहकं सप्तदशपुरुषनिष्ठं कर्तृत्वं व्यासज्यवृत्ति स्यात् । तथा सति फलमपि सर्वेषां मिलित्वा एकमेव स्यात् न तु प्रत्येकं संपूर्णं इति उत्सूत्रे पूर्वपक्षे सिद्धान्तमाह । तस्यतस्य प्रत्येकम्, अधिकारः ऋद्धिफलस्वाम्यं कार्त्स्न्येन स्यात् न तु सर्वेषामेकं व्यासज्यवृत्ति फलम् । अधिकारस्य पुरुषार्थैकसिद्धित्वात् । पुरुषार्थस्य एकस्य सिद्धिर्यस्मात् सः पुरुषार्थैकसिद्धिः अधिकारः । एकपुरुषार्थसिद्ध्या अधिकारसिद्धिः । सत्रकर्तृत्वं च प्रत्येकं इतरसव्यपेक्षं न व्यासज्यवृत्ति । फलमपि च प्रत्येकमेव संपूर्णं न व्यासज्यवृत्ति ।

अपिचोत्पत्तिसंयोगात् यथा स्यात् सत्त्वदर्शनं तथा भावोऽविभागे स्यात् । २ ॥

सत्रे सप्तदशानां यजमानानामेव ऋत्विक्त्वेन प्रत्येकं सत्रकर्तृत्वं इतरसव्यपेक्षं पृथक्पृथगेव । फलं तु संपूर्णं एकैकेन लब्धव्यम् । अपिच नैतद्विरुद्धम्, यदेकं कर्म बहुभिः क्रियते इति, उत्पत्तिसंयोगात् । 'ऋद्धिकामाः सत्रमासीरन्' इति उत्पत्तिवाक्ये बहुवचनेन एकेन सत्रकर्मणा साकं अनेकेषां कर्तृत्वेन संयोग उक्तः । उत्पत्तिशिष्टत्वादेव एकस्य कर्मणः अनेककर्तृकत्वेऽपि न विरोधः । यथा स्यात् सत्त्वदर्शनं अविभागे । यथा लोके रथलाङ्गलादिवहनरूपस्य कर्मणः अविभागे एकत्वेऽपि सत्त्वानां अश्वबलीवर्दादीनां बहूनां प्राणिनां कर्तृत्वेन दर्शनं स्यात्, तथा भावोऽविभागे स्यात् । तथा सत्त्ववत् सत्ररूपस्य कर्मणः अविभागे एकत्वेऽपि बहूनां कर्तॄणां भावः अस्तित्वं स्यात्, न विरोधः कश्चित् । विरोधशङ्कापरिहारार्थं सिद्धान्तसूत्रं द्वितीयमिदम् । अपिच इति हेतुसमुच्चये ।

सुधायां तु 'अपिचोत्पत्ति...तथा भावविभागे स्यात्' इति पाठः । व्याख्या चेत्थम्– (पृ. ९६२–९६३) 'ऋद्धिकामाः सत्रमासीरन्' इति कर्मिपदस्थेन बहुवचनेन ऋद्धिकामबहुत्वोक्तेः प्रत्येकं ऋद्धिकामत्वावगमात् प्रत्येकं अधिकारमुक्त्वा आख्यातस्थेन बहुवचनेन कर्तृबहुत्वोक्तेः प्रत्येकं कर्तृत्वावगमादपि प्रत्येकमधिकारः इति उत्पत्तौ अनिर्ज्ञातकर्तृसंख्ये कर्मणि कर्तृबहुत्वसंयोगात् इत्यवयवेनोक्ते, प्रत्येककर्तृत्वे कर्त्रन्तरानर्थक्यं आशङ्क्य यथा सत्त्वस्य द्रव्यगवादेः युगपत् बहुभिर्दर्शनं नान्यतरानर्थक्यापादकं तथा भावस्य कर्मणः विभागे पृथक्कर्त्रन्वयेऽपि न कर्त्रन्तरानर्थक्यम् । इति । **के.**

* **पुरुषार्थक्रिययोर्न्यायगम्यो** विकल्पः एकार्थानां काम्येष्टीनाम् । **बाल.** पृ. १५४.

* **पुरुषार्थत्वं** नाम पुरुषनिष्ठप्रत्यवायजनकक्रियाविषयत्वम् । **भाट्ट.** ३।४।८. * पुरुषार्थत्वं फलस्य कामपदोपादानादेव गम्यते । **वा.** ३।१।३।५. * पुरुषार्थत्वं स्वयंप्रार्थितसाध्याधीनानुष्ठानत्वं इति तन्त्ररत्ने । तन्न । इतिकर्तव्यतात्वेन अन्वितत्वं क्रत्वर्थत्वं तद्भिन्नत्वं च करणफलवृत्तिपुरुषार्थत्वं इति शास्त्रदीपिकायाम् । तदपि न । किन्तु स्वयंप्रार्थितवृत्त्युद्देश्यतानिरूपितविधेयताकत्वम् । स्वयंप्रार्थितत्वं च शास्त्रानधीनेष्टसाधनताज्ञानजन्येच्छाविषयत्वम् (स्वर्गस्य देशविशेषरूपत्वपक्षे), शास्त्राधीनेष्टसाधनताज्ञानाजन्येच्छाविषयत्वम् (सुखविशेषरूपत्वे) । **भाट्ट.** ४।१।२.

* **पुरुषार्थदानपाकहोमानां** दीक्षितकर्तृकत्वपर्युदासः ज्योतिष्टोमे । (क्रत्वर्थभिन्नानां प्रतिषेधः) । १०।८।७।१२–१५.

* **पुरुषार्थनिषेधातिक्रमे** पुंसो नरकपाताख्यः प्रत्यवायः । **सु.** पृ. १३९५.

* **पुरुषार्थभूयस्त्वं** च विध्यात्मके वेदे पुरुषप्रवर्तनसौकर्यादिष्यते । **वा.** २।२।१३।२८ पृ. ५६५.

* **'पुरुषार्थसमासत्तेः काम्यं नित्यस्य बाधकम् । विशेषतश्च सामान्ये, पूर्वप्राप्ते प्रवर्तनात् ॥'** पुरुषार्थसिद्ध्यर्थो हि सर्वः प्रयासः इति तत्प्रत्यासन्नं वस्तु बलीयो भवति । **वा.** १।४।११।२१ पृ. ३५२ । **सुधा**– काम्यस्य नित्यबाधकत्वे अयमेव मुख्यो **न्यायः** 'नैमित्तिके तु प्रकृतौ॰' (३।६।३।१०) इति तृतीयाधिकरणे वक्ष्यमाणः । पृ. ४८८. * 'पुरुषार्थसमासत्तेः

काम्यं नित्यस्य बाधकम्' इति न्यायात् (वा. १।४।११।२१) काम्यो गुणः उत्पत्तिशिष्टबाधेनापि शक्यते विधातुम् । **सोम.** १।४।११ पृ. ८३.

पुरुषकल्पेन वा विकृतौ कर्तृनियमः स्याद्, यज्ञस्य तद्गुणत्वादभावादितरान् प्रत्येतस्मिन् विधिकार्त्स्न्यात् । ६।६।७।३६॥

पूर्वाधिकरणे सप्तदशकर्तृसमुदायमुद्दिश्य यत् सत्रकर्म विहितं तत्र ब्राह्मणविशेषाणामेवाधिकारः इत्युक्तम् । अत्र तु ततो वैलक्षण्यं इति सूचनार्थं वाशब्दः । यत्र तु पुरुषकल्पेन विधिः न समुदायकल्पेन, एकैकं पुरुषमुद्दिश्य यः कर्मविधिः तत्र इत्यर्थः । एवं पुरुषकल्पेन पुरुषविशेषकर्तृकत्वेन विधीयमानायां विकृतौ अध्वरकल्पा आग्रयणं पशुः इत्येवमादौ कर्तृनियमः स्यात्, वैश्य एव कर्ता नियम्येत । यज्ञस्य अध्वरकल्पादेः तद्गुणत्वात् सप्तदशसंख्याकसामिधेनीगुणकत्वात् । इतरान् प्रति अभावात् सामिधेनीसाप्तदश्यस्य च वैश्यभिन्नान् ब्राह्मणक्षत्रियान् प्रति अभावात् । नहि तेषां सप्तदश सामिधेन्यो विहिताः । एतस्मिन् वैश्ये एव विधिकार्त्स्न्यात् । सामिधेनीसाप्तदश्यविधेः कृत्स्नता संभवति, वैश्य एव एतत्कर्म कृत्स्नं कर्तुं समर्थः । तस्मात् अध्वरकल्पादिषु येषु यागेषु सप्तदश सामिधेन्यो विहिताः तेषु यागेषु वैश्यस्यैवाधिकारः न ब्राह्मणस्य राजन्यस्य वा इति पूर्वः पक्षः ।

लिङ्गाच्चेज्याविशेषवत् । ३७ ॥

येषु यागेषु सप्तदश सामिधेन्य उक्ताः तेषु वैश्यस्यैवाधिकारो नान्यस्येति पूर्वपक्षे हेत्वन्तरमाह । 'सप्तदशो वै वैश्यः' इति सप्तदशत्वलिङ्गात् वैश्यस्यैव सप्तदशसामिधेनीकेषु यागेषु अधिकारः । चकारो हेतुसमच्चये । इज्याविशेषवत् । यथा 'वैश्यो वैश्यस्तोमेन यजेत' इति वैश्यस्तोमरूपः इज्याविशेषः यागविशेषः वैश्यस्यैव एवं साप्तदश्यमपि तस्यैव ।

न वा संयोगपृथक्त्वाद्, गुणस्येज्याप्रधानत्वादसंयुक्ता हि चोदना । ३८ ॥

पूर्वपक्षं सूत्राभ्यां वाशब्देन निरस्यन् सिद्धान्तमाह । न वैश्यस्यैवाधिकारः, किन्तु अध्वरकल्पादौ त्रयाणामपि वर्णानामधिकारः । संयोगपृथक्त्वात् । पृथगेतौ संयोगौ । 'सप्तदश वैश्यस्य' इत्येकं वाक्यं दर्शपूर्णमासयोः वैश्यनिमित्तकं सामिधेनीनां साप्तदश्यं विधत्ते । 'सप्तदशानुब्रूयात्' इति तु वाक्यान्तरं वर्णानां त्रयाणामपि अध्वरकल्पादिविकृत्यर्थतया चोदकप्राप्तपाञ्चदश्यबाधेन साप्तदश्यं विधत्ते । गुणस्य तु साप्तदश्यस्य इज्याप्रधानत्वात् साप्तदश्यं गुणः यागप्रधानः, न कर्तृप्रधानः । हि यस्मात् चोदना विकृतिषु सामिधेनीसाप्तदश्यविधिः वैश्येन असंयुक्ता । साप्तदश्यविधिः इज्यया संयुक्तः, न पुरुषेण वैश्यादिना इत्यर्थः । तस्मात् सामिधेनीसाप्तदश्यवतीषु इज्यासु त्रयाणामपि वर्णानामधिकारो न वैश्यमात्रस्य इति सिद्धान्तः ।

इज्यायां तद्गुणत्वाद् विशेषेण नियम्येत । ३९ ॥

अध्वरकल्पाऽऽग्रयणादिषु सप्तदशसामिधेनीकेषु यागेषु वैश्यस्यैवाधिकारः इति पक्षं ब्रुवता पूर्वपक्षिणा वैश्यस्तोमदृष्टान्तः प्रदर्शितः इज्याविशेषवत् इति पदेन । तद्वैषम्यमाह सिद्धान्ती । इज्यायां इज्याविशेषे वैश्यस्तोमे तु 'वैश्यो वैश्यस्तोमेन यजेत' इतिश्रुत्या विशेषेण नियम्येत वैश्य एवेति युक्तम् । तद्गुणत्वात् वैश्यस्तोमस्य वैश्यगुणकत्वात् वैश्यकर्तृकत्वात् । अथवा वैश्यस्य वैश्यस्तोमगुणत्वात् वैश्यस्तोमकर्तृत्वात् । वैश्यस्तोमस्य वैश्यकर्तृकत्वस्य श्रुत्या निश्चयादित्यर्थः । अध्वरकल्पाऽऽदिषु तु न तथा इति त्रयाणामप्यधिकारः इति सिद्धान्तः । **के.**

* **पुरुषकारात्** दैवस्य अधिकः प्रभावः । **सु.** पृ. १३२.

* **पुरुषकृतो** न शब्दस्यार्थेन संबन्धः । **भा.** १।१।८।२७.

पुरुषकेशलोमन्यायः । यथा पुरुषात् केशलोमानि संभवन्ति, तथा अक्षरात्संभवतीह विश्वमिति शारीरकभाष्येऽभिहितम् । **साहस्री.** ७६९.

* **पुरुषप्रणीतानि** यानि वाक्यानि तानि पुरुषविवक्षाधीनवचनत्वात् संभवत्प्रमादाभिप्रायान्तरप्रमाणान्तरगम्यार्थानि भवन्ति । तत्र प्रतीतोऽप्यर्थः वक्तुरनभि-

प्रेतत्वात् अविवक्षां लभेत । सा च द्वेधा विज्ञायते । यद्वा वक्तैव कथयति 'अन्यपरं ममेदमभिप्रेतं प्रमादेन वा, तस्मादेतन्मात्रमिह न ग्रहीतव्यम्' इति । यद्वा प्रमाणान्तरवशेन अन्यथाऽर्थे अवधारिते वक्त्रनपेक्षाः श्रोतार एव अभिप्रायान्तरं प्रमादं वा अध्यवस्यन्ति । वा. ३।१।७।१३ पृ. ६९९.

* **पुरुषप्रयत्नस्य** फलार्थता (स्वभावतः)। भा. ६।१।१।१ पृ. १३४६. * पुरुषप्रयत्नस्य फलोद्देश्यकस्य विजातीयस्य अप्राप्तत्वेन विधेयता । भाट्ट. ६।२।२.

* **पुरुषप्रवृत्तिः** । स्वतन्त्रपुरुषप्रवृत्तिः द्विधा लोके दृश्यते । क्वचित् स्वेच्छया अर्थेषु स्वार्थः प्रवर्तते, क्वचिदन्यप्रेरितः 'आचार्यप्रेरितोऽहं गां आनयामि, न स्वेच्छया' इत्यादिव्यवहारदर्शनात् । यद्यपि आचार्यादिरपि अनिच्छन्तं न शक्नोति प्रवर्तयितुम्, तथापि स्वारसिकेच्छारहितमपि शिष्यादिकं स्वप्रवर्तनाबलेन इच्छामुत्पाद्य प्रवर्तयति इति सर्वसाक्षिकम् । तस्मात् शब्दश्रवणानन्तरमाविन्यां प्रवृत्तौ आचार्यादेः प्रवर्तनाज्ञापनेन प्रवर्तकत्वमवसीयते । सु. पृ. २९–३०.

* **पुरुषभेदा** उच्चारणभेदाश्च यथायोगं उदात्तादिभेदैः पटुमृदुत्वादिभेदैश्चोपेतान् ध्वनिविशेषान् उत्पाद्य चरितार्थाः । वर्णास्तु नित्या एव । वि. १।१।६.

* **पुरुषवचनादर्थानिश्चयात्**, वक्तृबुद्धिनिश्चये चानुमानत्वम् । अर्थो हि न कारणं वचनस्य, वक्तृबुद्धिस्तु कारणमेव । कार्यतस्तु कारणावगतिः अनुमानमेव । अनुमानमपि पौरुषेयवाक्यसमुत्थज्ञाने व्युत्पन्नम् । ऋजु. पृ. २४. * पुरुषवचनात् विज्ञातोऽयमनेनार्थः इति निश्चयो भवति । न पुनः प्रमाणान्तरबुद्धिरुपजायते । बृहती. पृ. २५.

* '**पुरुषशीर्षमुपदधाति**' (चयने) इति वचनसामर्थ्यात् शवशिरसां स्पर्शनं स्मृतिविप्रतिषिद्धमपि क्रियते । भा. ६।६।१।२.

* **पुरुषसंस्काराः** पुरुषं प्रति फलप्रतिग्रहणसमर्थं कुर्वन्ति, न यागनिर्वृत्तिसमर्थम् । भा. ३।७।२।६.

* **पुरुषसंस्कारार्थो** वाग्यमः । ३।१।१४।२४.

* **पुरोडाशः** तप्तेषु कपालेषु अधःपाकार्थमधिश्रीयते, उपरि च अङ्गारा अभ्युह्यन्ते । भा. ६।४।५।१७.

❀ पुरोडाशस्त्वनिर्देशे तद्युक्ते देवताभावात् । ५।४।६।१९॥

ब्राह्मणस्य आधानं सोमपूर्वं वा इष्टिपूर्वं वेति विकल्प उक्तः । 'यदेवादः पौर्णमासं हविः तत्तर्हि अनुनिर्वपेत्' इत्यनेन एकमेव हविः सोमादूर्ध्वमुत्कृष्यते इति च पूर्वसूत्रे उक्तम् । इदानीं किं तदेकं हविः इति प्रश्नस्योत्तरमाह । तदेकं हविः अग्नीषोमीयः पुरोडाश एव स्यात् । तुशब्देन इतरहविर्निरासः । केवलस्याग्नेः केवलस्य वा सोमस्य पूर्वे अनिर्देशे निर्देशाभावे सति तद्युक्ते अग्नियुक्ते सोमे देवताभावात् देवतायाः देवतात्वस्य व्यासज्यवृत्तेः भावात् सत्त्वात् अग्नीषोमीयपुरोडाश एव तदेकं हविः सोमादूर्ध्वं उत्कृष्यते इति सिद्धान्तः ।

इदं सूत्रं पूर्वाधिकरणशेषत्वेन व्याख्यातुं युक्तं शक्यं चेति मत्वा अस्माभिस्तथा व्याख्यातम् । भाष्यादौ सर्वत्र तु उत्तराधिकरणाद्यसूत्रत्वेनैवेदं व्याख्यातम् । तत्र सूत्राक्षरार्थस्तु स एव । अवतरणं तु भिन्नम् । तदित्थम् । पौर्णमासगतस्य एकस्यैव हविषः उत्कर्षः सोमात् इति पूर्वमुक्तम् । तत्रेयमाशङ्का । ननु अस्तु एकस्य हविष उत्कर्षः । स तु आग्नेयस्यैव स्यात् 'आग्नेयो वै ब्राह्मणो देवतया' इति अग्नेः पूर्वमुक्तत्वात् 'यदेवादः पौर्णमासं हविः' इति अदःशब्देन आग्नेयोऽपि ग्रहीतुं शक्यः । तथा च आग्नेयस्यैव हविषः सोमादुत्कर्षोऽस्तु इति । तत्राह । पूर्वं अग्नेरुक्तत्वेऽपि सोमोऽप्युक्त एव । प्रत्युत 'सोमेनेष्ट्वा अग्नीषोमीयो भवति' इत्युक्तम् । तथा केवलस्याग्नेः अनिर्देशे सति, तद्युक्ते अग्नियुक्ते सोमे देवताभावात् देवतात्वस्य उक्तत्वात् अग्नीषोमीयः पुरोडाश एव सोमादूर्ध्वं उत्क्रष्टव्यः इति (सिद्धान्तसूत्रमिदम्) । तुशब्दः आग्नेयस्य केवलस्य निरासार्थः ।

आज्यमपीति चेत् । २० ॥

ब्राह्मणस्य आधाने सोमादूर्ध्वं एकं हविः, तच्च अग्नीषोमीयः पुरोडाशः उत्क्रष्टव्यः इत्युक्तम् । तत्रेयमाशङ्का सूत्रेणोच्यते । एकं अग्नीषोमीयं हविः उत्कृष्यताम् । परन्तु तत् आज्यमपि स्यात्, न पुरोडाश एव । उपांशुयाजाज्यमपि अग्नीषोमीयं भवत्येव । इति चेत् ।

न, मिश्रदेवतत्वादैन्द्राग्नवत् । २१ ॥

न उपांशुयाजाज्यं उत्कष्टुं शक्यम् । तस्य मिश्रदेवतत्वात् । तद्धि अग्नीषोमीयं वा प्राजापत्यं वा वैष्णवं वा । यद्यपि यजमानः सोमात् प्राक् अग्नीषोमौ यष्टुं न शक्नोति तथापि प्रजापतिं यक्ष्यति विष्णुं वा । तस्मात् आज्यस्य अग्नीषोमीयत्वेन सोमादूर्ध्वमुत्कर्षेऽपि प्राजापत्यत्वेन वैष्णवत्वेन वा सोमात् प्रागपि संभवात् उपांशुयाजाज्यस्य नोत्कर्षः किन्तु पुरोडाशस्यैव । ऐन्द्राग्नवत् । 'आग्नेयं चतुर्धा करोति' इति चतुर्धाकरणे यथा आग्नेयशब्देन ऐन्द्राग्नः पुरोडाशो न गृह्यते, तस्य मिश्रदेवतत्वात् । तद्धितश्च साकाङ्क्षान्नोत्पद्यते । तथा आज्यमपि । तस्मात् उपांशुयाजः सोमात् नोत्कष्टव्यः । के.

* पुरोडाशः द्विविधः प्रधानं गुणश्च । तत्राग्नेयादिः प्रधानम् । पशुपुरोडाशश्च पशुदेवतासंस्काररूपो द्वितीयः । के. (वि. १०।१।९). * पुरोडाशः न स्विष्टकृद्यागप्रयोज्यः, किन्तु आग्नेययागप्रयुक्तः । ४।१।१३।२८–३२. * पुरोडाशो मध्यमः यवमयः एव त्रैधातव्यायाम् । भा. १०।७।१६।५१–५७. * पुरोडाशः यागे श्रूयते न होमे । सोऽपि द्व्यवदानस्य विहितो न समस्तपुरोडाशस्य । समस्तस्य पुरोडाशस्य देवतां प्रति उत्सृष्टत्वात् विनापि प्रक्षेपात् अस्वत्वव्यवहार उपपद्यते निरवदानाच्च शेषसिद्धिः । वा. ३।४।१४।४१ पृ. ९८३. * पुरोडाशः वारुण्या निष्कासेन बाध्यते । बाल. पृ. १३२. * '**पुरोडाशौ** क्षायतः' इत्यत्र एकस्य बहूनां वा क्षामेऽपि प्रायश्चित्तम्, न द्वयोरेव क्षामे । के. (टुप्. ६।४।६।२३). * **पुरोडाशाः** सवनीयाः अनुसवनं निरुप्यन्ते । भा. १२।२।२।८. * पुरोडाशाः सवनीयाः मांसमयाः षट्त्रिंशत्संवत्सरेषु कर्तव्ये शाक्यानामयने । वि. ३।८।२३. * '**पुरोडाशं** चतुर्धा करोति' इत्यस्य 'आग्नेयं चतुर्धा करोति' इति क्रत्वर्थः उपसंहारविधिः । बाल. पृ. १७. * 'पुरोडाशं पर्यग्नि करोति' इति दर्शपूर्णमासयोः पुरोडाशशब्दः जातिशब्दः एव, न संस्कारशब्दः । भा. १।४।७।१०. * 'पुरोडाशं पर्यग्नि करोति' इति पर्यग्निकरणं गुणकर्म, न प्रधानकर्म । २।१।४।९–१२. * 'पुरोडाशं पर्यग्नि करोति' इति सर्वानेव पुरोडाशान्, न तु एकमेव । एकवचनमविवक्षितम् । ३।१।७।१३–१५.

❀ पुरोडाशाभ्यामित्यधिकृतानां पुरोडाशयोरुपदेशस्तच्छ्रुतित्वाद्वैश्यस्तोमवत् । १०।८।१४।३५ ॥

दर्शपूर्णमासयोः 'पुरोडाशाभ्यामेवासोमयाजिनं याजयेत् यावेतौ आग्नेयश्चैन्द्राग्नश्च, सांनाय्येन तु सोमयाजिनम्' इति श्रूयते । अत्र पुरोडाशाभ्यां इति वाक्यात् अधिकृतानां असोमयाजिनां पुरोडाशयोः उपदेशः प्रतीयते । असोमयाजिनः पुरोडाशयोरधिकारः इत्युपदेशः प्रतीयते इत्यर्थः । तच्छ्रुतित्वात् तस्य असोमयाजिन एव 'असोमयाजिनं याजयेत्' इति श्रवणात् । वैश्यस्तोमवत् यथा 'वैश्यो वैश्यस्तोमेन यजेत' इत्यनेन वैश्यस्यैव वैश्यस्तोमे अधिकारः तद्वत् । तस्मात् 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यस्य 'पुरोडाशाभ्यामेवासोमयाजिनं याजयेत्' इति वाक्यशेषः । असोमयाजी स्वर्गकामः पुरोडाशाभ्यां यजेत इति । इति प्रथमः पूर्वपक्षः ।

न त्वनित्याधिकारोऽस्ति, विधेर्नित्येन संबन्धस्तस्मादवाक्यशेषत्वम् । ३६ ॥

वाक्यशेषपक्षं दूषयित्वा पक्षान्तरमाह । अनित्याधिकारो न तु अस्ति । असोमयाजित्वं हि अनित्यम्, सोमयागोत्तरं तस्य सोमयाजित्वात् । दर्शपूर्णमासौ तु नित्यौ । तथा च अनित्यस्य असोमयाजिनः सतः नित्यदर्शपूर्णमासाधिकारो न संभवति । 'दर्शपूर्णमासाभ्यां यजेत' इति विधेः नित्येनैव संबन्धः । तस्मात् एतस्मात् हेतोः अवाक्यशेषत्वं यत् पूर्वपक्षिणा वाक्यशेषत्वमुक्तं तन्न संभवति । किन्तु असोमयाजिनः स्वर्गकामस्य प्राकृताग्नेयैन्द्राग्नधर्मकौ कर्मान्तरभूतौ आग्नेयैन्द्राग्नौ विधीयेते अधिकौ ।

सति च नैकदेशेन कर्तुः प्रधानभूतत्वात् । ३७॥

'पुरोडाशाभ्यामेवासोमयाजिनम्' इति 'दर्शपूर्णमासाभ्यां यजेत' इत्यस्य वाक्यशेषः इति पक्षं प्रकारान्तरेण दूषयति । सति च वाक्यशेषत्वे एकदेशेन दर्शपूर्णमासैकदेशभूताभ्यां पुरोडाशाभ्यां कर्तुः असोमयाजिनः संबन्धो वक्तव्यः, स च नोपपद्यते । अथवा सति च वाक्यशेषत्वाभावे एकदेशेन पुरोडाशाभ्यां कर्तुः असोमयाजिनः संबन्धः उपपद्यते । कर्तुः प्रधानत्वात् प्रधानत्वेन निर्देशात् । तस्मात् न वाक्यशेषत्वम्, किन्तु कर्मान्तरविधिः ।

कृत्स्नत्वात्तु तथा स्तोमे । ३८ ॥

पूर्वपक्षिणा उक्तं वैश्यस्तोमदृष्टान्तं विघटयति । स्तोमे वैश्यस्तोमे तथा अधिकारश्रुतिशेषत्वं युक्तम् । कृत्स्नत्वात् वैश्यस्तोमस्य । स हि न कस्य चिदेकदेशः, स्वतन्त्रत्वात् । सफलत्वाच्च । पुरोडाशौ तु एकदेशौ न फलसाधकौ । तस्मान्नाधिकारशेषत्वम् । किन्तु कर्मान्तरविधिः ।

कर्तुः स्यादिति चेत् । ३९ ॥

न कर्मान्तरविधिः । किन्तु कर्तुः अङ्गकर्तुः याजयितुः ऋत्विजः 'पुरोडाशाभ्यां असोमयाजिनं याजयेत्' अयं विधिः स्यात् । स चाभ्युदयाय भविष्यति । इति तृतीयः पक्षः । इति चेत् ।

न गुणार्थत्वात्, प्राप्ते च नोपदेशार्थः । ४० ॥

नाङ्गकर्तुः ऋत्विजः उपदेशः । तस्य गुणार्थत्वात् गुणभूतस्य अङ्गस्य अनुष्ठानार्थत्वात् प्रधानकर्तुर्यजमानस्य गुणभूत एव ऋत्विक् । न च तस्य किञ्चित् फलम् । प्राप्ते च याजने अर्थप्राप्ते सति तदनुवादः उपदेशार्थो न भवति । तस्मान्न याजयितुरुपदेशः । तस्मात् कर्मान्तरयोरेव विधिः ।

कर्मणोस्तु प्रकरणे तन्न्यायत्वात् गुणानां लिङ्गेन कालशास्त्रं स्यात् । ४१ ॥

तुशब्दः कर्मान्तरपक्षं व्यावर्तयति । न कर्मान्तरविधिः किन्तु कर्मणोः पुरोडाशकर्मणोः प्रकरणे प्रकर्षेण करणे अनुष्ठाने लिङ्गेन 'असोमयाजिनम्' इति असोमयागेन विशेषलिङ्गेन कालशास्त्रं कालस्य शासनं विधानं स्यात् । सोमयागकरणात् प्राक्काले पुरोडाशाभ्यामेव यजेत, न सांनाय्येन इति । गुणानां सौम्यचर्वादीनां यो न्याय उक्तः 'अपिवा कालमात्रं स्याददर्शनाद्विशेषस्य' (४।४।३।६) इति, तन्न्यायत्वात् सोऽत्रापि न्यायः । तस्मात् कालविधिः । कुतूहले तु– 'पुरोडाशाभ्यामेव' इति परिसंख्यानस्य कर्मभेदस्य कर्तुश्च इति त्रयाणामपि गुणानां निरासस्य वाच्यत्वात् विधेयान्तरालाभात् कालविधिः इत्युक्तम् ।

यदि तु सांनाय्यं सोमयाजिनो न ताभ्यां समवायोऽस्ति विभक्तकालत्वात् । ४२ ॥

तुशब्दः कालविधिपक्षं निराचष्टे । यदि सांनाय्यं सोमयाजिनः निश्चितम्, ततः ताभ्यां पुरोडाशाभ्यां आग्नेयैन्द्राग्नाभ्यां सांनाय्यस्य समवायः नास्ति विभक्तकालत्वात् पुरोडाशयोः कालः सोमयागात् प्राक्तनः, सांनाय्यस्य कालः सोमादूर्ध्वमिति । इति तदर्थं न कालविधेरपेक्षा सिद्धत्वात् । तस्मात् न कालार्थं श्रवणम् । किन्तु कर्मान्तरविधिरेव ।

अपिवा विहितत्वाद् गुणार्थायां पुनःश्रुतौ संदेहे श्रुतिर्द्विदेवतार्था स्याद् यथाऽनभिप्रेतस्तथाऽऽग्नेयो दर्शनादेकदेवते । ४३ ॥

अपिवाशब्दः कर्मान्तरपक्षं व्यावर्तयति । 'पुरोडाशाभ्यामेवासोमयाजिनं याजयेत् यावेतौ आग्नेयश्चैन्द्राग्नश्च' इत्यत्र आग्नेयस्य अनुवादः । अमावास्यायां पौर्णमास्यां च अविशेषेण विहितत्वात् । आग्नेयस्य पुनःश्रुतिः गुणार्था ऐन्द्राग्नविधानार्थमनुवादार्था इति स्वीकार्यम् । ऐन्द्राग्नस्य तु अविशेषेण विधानाभावात् तस्य संदेहे सति प्रकृता श्रुतिः द्विदेवतार्था द्विदेवतस्य ऐन्द्राग्नपुरोडाशस्य विधानार्था । तत्रापि अमावास्यायां तस्य प्राप्तत्वात् पौर्णमास्यां चाप्राप्तत्वात् पौर्णमास्यामेव ऐन्द्राग्नस्य विधिरयम् । 'आग्नेयस्य विहितत्वात् तस्य पुनःश्रुतौ गुणार्थायां सत्याम्, द्विदेवत्यस्य च संदेहे सति द्विदेवतार्था एव प्रकृता श्रुतिः स्यात्' इति सौत्रपदानामन्वय. । आग्नेयस्य तु एकदेवते साकंप्रस्थायीयादावपि 'आज्यभागाभ्यां प्रचर्य आग्नेयेन पुरोडाशेन प्रचरति' इति दर्शनात् पौर्णमास्यामपि विहितत्वाच्च प्राप्तिरस्त्येव इति प्रकृतायां श्रुतौ उच्चारितोऽपि आग्नेयः यथा अनभिप्रेतः स्यात् विधेयत्वेन अभिप्रेतो न स्यात् तथा उच्चारितः । विधेयत्वेन नोच्चारितः, किन्तु ऐन्द्राग्नविधानार्थमनूदितः । तस्मात् आग्नेयस्यानुवादः ऐन्द्राग्नस्य तु पौर्णमास्यां विधिः इति पञ्चमः पक्षः ।

विधिस्तु बादरायणः । ४४ ॥

नैतदेवम् । किन्तु कालविधिरेव इति बादरायण आचार्यो मन्यते स्म । 'तदु संनयेदेव' 'तथेह स्माहुर्गोपायनाः सांनाय्यमेवासोमयाजिनः' इति असोमयाजिनोऽपि सांनाय्यं श्रूयते इति सोमात् प्रागूर्ध्वं च सांनाय्यस्य काल एव इति तद्वैकल्पिकस्य ऐन्द्राग्नस्य सोमात् प्रागूर्ध्वं च प्राप्तौ प्राक्काल एव नियम्यते । तेन प्राक् सोमात् ऐन्द्राग्नसांनाय्ययोर्विकल्पः । तस्मात् ऐन्द्राग्नस्य उभयोः कालयोर्विधिः ।

कुतूहले तु "असोमयाजिनः आग्नेयैन्द्राग्नावनूद्य 'सांनाय्येन तु सोमयाजिनम्' इति सोमयाजिनः सांनाय्यनियमविधिः इति बादरायण आचार्यो मन्यते" इति सिद्धान्तपरं सूत्रमिदं व्याख्यातम् ।

'नैतदेवं आग्नेयेऽनुवादः ऐन्द्राग्ने विधिरिति । उभयोः कालविधिः स्यात्' इति भाष्यात्तु आग्नेयैन्द्राग्नयोरुभयोः सोमात् प्राक्तनकालविधिः इति सूत्रार्थो भाति ।

प्रतिषिद्धविधानाद्वा । ४५ ॥

सिद्धान्तमाह । सोमात् प्राक् प्रतिषिद्धस्य सांनाय्यस्य सोमयाजिनः 'सांनाय्येन तु सोमयाजिनम्' इत्यनेन विधानात् तदर्थोऽयमनुवादः आग्नेयैन्द्राग्नयोः तस्मादुभयोरनुवादः इति सिद्धान्तः ।

तथा चान्यार्थदर्शनम् । ४६ ॥

तथा च आग्नेयैन्द्राग्नयोः कर्मान्तरत्वाभावे अन्यार्थदर्शनं भवति, 'चतुर्दश पौर्णमास्यामाहुतयो हूयन्ते त्रयोदशामावास्यायाम्' इति । कर्मान्तरोत्पत्तौ तु अधिका आहुतयो भवेयुः । तस्मात् उभयोरनुवादः इति सिद्धान्तः । के.

* 'पुरोडाशाभ्यामेवासोमयाजिनं याजयेत् यावेतौ आग्नेयश्चैन्द्राग्नश्च' इति उभयोरनुवादः 'सांनाय्येन तु सोमयाजिनम्' इत्यस्य स्तुत्यर्थः । १०।८।१४।३५–४६.

* **पुरोडाशात्** इज्यार्थात् वचनप्रामाण्यात् स्विष्टकृदिज्यते यागश्च स भवति प्रतिपाद्यते च (प्रतिपत्तिः) पुरोडाशः दर्शपूर्णमासयोः । **भा.** ३।२।५।१५.

* **पुरोडाशस्यापूपत्वात्** कपालगतोष्मणा पाको भवति । **वि.** १०।१।११. * पुरोडाशस्य अवदानं द्विरेव । उपस्तरणाभिघारणसहितस्य तु चतुरवत्तत्वं संपद्यते 'चतुरवत्तं जुहोति' 'द्विर्हविषोऽवद्यति'। १०।८।१२. * पुरोडाशस्य अवदानं मध्यात् पूर्वार्धाच्च । कृत्स्नपुरोडाशगते च मध्यपूर्वार्धे अपादानत्वेन श्रूयेते, न तु अवशिष्टभागगते । ततो मुख्यस्य हविषो नाशे आज्यं प्रतिनिधाय यष्टव्यम् । ६।१।१. * पुरोडाशस्य आग्नेयस्य चतुर्धा कृतस्य निर्देशम् 'इदं ब्रह्मणः, इदं होतुः, इदमध्वर्योः, इदमग्नीधः' इति मन्त्रैः यजमानः कुर्यान्नाध्वर्युः । **वि.** ३।४।२१. * पुरोडाशस्यैव साक्षात् प्रधानभूतयागसाधनत्वं वार्तिकमतेन । भाष्यमतेन तु द्यवदानस्य । **सु. पृ.** २४. * पुरोडाशस्य कपालेभ्यो व्युद्धृत्य वेद्यां आसादनं क्रियते दर्शपूर्णमासयोः । **भा.** १०।१।२०।५८, * पुरोडाशस्य कपालेषु प्रथनं क्रियते दर्शपूर्णमासयोः 'उरु प्रथा उरु प्रथस्व' इति मन्त्रेण । १०।१।१७।५५, * पुरोडाशस्य कालः वपाप्रचारादूर्ध्वम् । १२।१।१।१, * पुरोडाशस्य कृत्स्नस्य दाहे एव प्रायश्चित्तम् । ६।४।५।१७–२१. * पुरोडाशस्य चतुर्धाकरणं आग्नेयस्यैव दर्शपूर्णमासयोः । न तु ऐन्द्राग्नाग्नीषोमीययोः । ३।१।१५, तच्च भक्षार्थमेव । ३।४।१७. * पुरोडाशस्य चतुर्धाकरणे ब्राह्मणा एव निर्दिश्यन्ते दर्शपूर्णमासयोः । 'ब्राह्मणानामिदं हविः सौम्यानां सोमपीथिनाम्, नेहाब्राह्मणस्यास्ति' इति । **भा.** १२।४।१५।४६, * पुरोडाशस्य दर्शपूर्णमासगतस्य धर्माणामतिदेशः सौत्रामणीगतसुराग्रहेषु । ८।२।१।१–९. * पुरोडाशस्य निर्वापावघातपेषणसंयवनपिण्डकरणादिनिष्पादकविधिदर्शनेन प्रयोगकाले निष्पादनावगमः । **सु. पृ.** ७९४. * पुरोडाशस्य पात्र्यां सादनं 'तस्मिन् सीदामृते०' इत्याद्युत्तरार्धात्मकमन्त्रेण कार्यम् । लिङ्गेन वाक्यस्य बाधात् । 'स्योनं ते सदनम्' इत्या-

दिना पूर्वार्धेन तु पात्र्यामाज्येन सदनं कर्तव्यम् । **वि.** ३।३।८, * पुरोडाशस्य पूर्वसिद्धस्यैव शकलं ऐन्द्रवायवपात्रे निधेयं ज्योतिष्टोमे । ३।८।१८. * पुरोडाशस्य श्रपणे 'यः शृतः स दैवः' इत्यनेन विधित्सितस्य यथोचितपाकस्य स्तुतये 'यो विदग्धः स नैर्ऋतः, योऽशृतः स रौद्रः' इत्यनूद्यते । ३।४।३. * **पुरोडाशानां** प्रातःसवनीयानां तन्त्रं प्रातःसवने एवापवृज्यते । इतरे पुनः पुरोडाशाः असंशयं पशोः प्रातःसवनीयानां वा तन्त्रमध्ये पतिताः । **भा.** १२।२। १२।३२, * **पुरोडाशे** अभ्यूहः (साङ्गारभस्मारोपः) क्रियते दर्शपूर्णमासयोः 'वेदेन भस्मना अङ्गारानभ्यूहति' इति । १०।१।१८।५६, * पुरोडाशे अवज्वलनं (ज्वलद्दर्भारोपणम्) क्रियते दर्शपूर्णमासयोः 'दर्भपिञ्जूलैरभिज्वलयति' । १०।१।१९।५७. * पुरोडाशे एकस्मिन्नेव पर्यग्निकरणं पूर्वपक्षे, सर्वपुरोडाशे च वक्तव्यं सिद्धान्ते । **वा.** २।१।४।१२ पृ. ४१५. * पुरोडाशे ऐन्द्रे आग्नेयस्य विध्यन्तः । **भा.** ८।१।१७।३४, * पुरोडाशे जलेन श्लक्ष्णता क्रियते दर्शपूर्णमासयोः 'सं ते तन्वा तनूः सृज्यतां इति त्रिः परिमार्ष्टि' इति । १०।१।१७।५५. * **पुरोडाशेषु** तृतीयसवनगतेषु पाशुकात् भेदेन हविष्कृदाह्वानाभावः ज्योतिष्टोमे । १२।२।४।१२–१३. * पुरोडाशेषु सवनीयेषु पाशुकतन्त्रस्यैव प्रसङ्गः । १२।२।१२।३०–३२. * पुरोडाशेषु सवनीयेषु पिष्टलेपफलीकरणहोमयोः आग्निमारुतादूर्ध्वमुत्कृष्टैरनुयाजैः सह नोत्कर्षः, अनुयाजानां पश्वर्थत्वात्, होमयोः पुरोडाशार्थत्वात्, उभयोः प्रयोगभेदेन संबन्धाभावात् । वि. ५।१।१५. * पुरोडाशेषु सवनीयेषु सौमिकपात्रैर्ग्रहचमसैः दार्शिकपात्राणां जुह्वादीनां प्रसङ्गसिद्धिर्नास्ति । १२।१।४।१०–११. * पुरोडाशेषु सवनीयेषु हविष्कृदाह्वानं न कार्यं ज्योतिष्टोमे । कृत्वाचिन्तेयम् । १२।२।३।११. * पुरोडाशेषु सवनीयेषु हविष्कृदाह्वानमन्त्रः आवर्तनीयः, न तन्त्रम्, कालभेदात् । ११।४।२१.

* **पुरोडाशाभावे** प्रणीतानामभावः यथा पयस्यायाम् । **भा.** ४।२।५।१५.

* **पुरोडाशाभिवासनान्तस्य** दर्शेऽनपकर्षः । वेदेः पूर्वेद्युः करणेऽपि । ५।१।१६.

* **पुरोडाशालङ्करणं** नाम 'देवस्त्वा सविता मध्वाऽनक्तु' इति मन्त्रेण पुरोडाशाभिघारणं स्रुवेण । **सोम.** ५।१।१३.

* **पुरोडाशालङ्कारप्रैषः** 'अग्नीदग्नीन् विहर, बर्हिः स्तृणीहि, पुरोडाशानलङ्कुरु' इति । वि. ५।१।१३.

* **पुरोडाशावदाने** हस्तः करणं सामर्थ्यात् । **वि.** १।४।२०.

* **पुरोडाशादिश्रपणं** ज्योतिष्टोमे शालामुखीये कर्तव्यम्, न शामित्रे । १२।१।५।१२.

* **पुरोडाशकपालं** तुषोपवापं प्रति कारकत्वेन अङ्गमपि न तत्प्रयोज्यम्, न च तद्व्याप्यम् । **भाट्ट.** ४।१।१. * पुरोडाशकपालं पुरोडाशार्थं कपालम् । **भा.** ४।१।११।२६. * पुरोडाशकपालं श्रपणप्रयुक्तम्, न तुषोपवापप्रयुक्तम् । ४।१।११।२६. * '**पुरोडाशकपालेन** तुषानुपवपति' इत्यत्र तु पुरोडाशार्थतया उपादानमेवाश्रित्य भूतसंबन्धोपपत्तिः । **सोम.** १०।२।२७.

‡ पुरोडाशकपालन्यायः । तुषोपवापन्यायः ।

दर्शपूर्णमासयोः कपालं न तुषोपवापप्रयुक्तम्, किन्तु श्रपणप्रयुक्तम् ॥

अर्थाभिधानकर्म च भविष्यता संयोगस्य तन्निमित्तत्वात्, तदर्थो हि विधीयते । ४।१।११।२६ ॥

भाष्यम्— दर्शपूर्णमासयोः श्रूयते 'कपालेषु पुरोडाशं श्रपयति' इति, तथा 'पुरोडाशकपालेन तुषानुपवपति' इति । तत्र संदेहः किमुभयं कपालानि प्रयोजयति पुरोडाशश्रपणं तुषोपवापश्च, उत श्रपणं प्रयोजकम्, न तुषोपवाप इति । किं प्राप्तम्? विनिगमनायां हेतोरभावात् उभयम् । इति **प्राप्ते,** उच्यते । अर्थाभिधानं प्रयोजनसंबद्धमभिधानं यस्य, यथा पुरोडाशकपालमिति, पुरोडाशार्थं कपालं पुरोडाशकपालम् । कथमेतदवगम्यते? पुरोडाशस्तावत् तस्मिन् काले नास्ति, येन वर्तमानः संबन्धः कपालेन स्यात् । तेनैव हेतुना न भूतः । स एष कपालस्य पुरोडाशेन भविष्यता संबन्धः । भविष्यता संबन्धश्च तन्निमित्तस्य भवति । तस्मात् पुरोडाशेन प्रयुक्तं

यत् कपालम्, तेन तुषा उपवप्तव्या इति । एवं च सति चरौ पुरोडाशाभावे यदा तुषानुपवप्तुं कपालमुपादीयते, न तत् पुरोडाशकपालं स्यात् । न चेत्, तेन तुषा उपवप्तव्या भवन्ति । तस्मान्न तुषोपवापः कपालानां प्रयोजकः । प्रयोजकं तु श्रपणमिति ।

टुप्— (सिद्धान्तमाह–) स्वप्रयोजनसंयोगेन पुरोडाशकपालं निर्दिश्यते पुरोडाशस्य कपालमिति । वर्तमानसंयोगे पुरोडाशकपालं मुख्यम् । भूतभविष्यतोः (संयोगयोर्मध्ये) भूते (समाश्रीयमाणे) लक्षणा (स्यात् । कथमित्याह–) आसीत् अन्यस्मिन् काले (संयोगः) । भविष्यति (तु संयोगे) नास्ति लक्षणा । (कथमित्याह–) पात्रासादनकाले प्रयोजनम् (पुरोडाशरूपम्) उररीकृत्य तानि (कपालानि) साद्यन्ते । तस्मात् वर्तते एव तेषां प्रयोजनम् । तस्मात् (लक्षणाऽभावात्) भविष्यतैव संयोगेन यत् (यस्मात्) निर्दिश्य अन्यत्रोपदिश्यते, तत् (तस्मात्) अप्रयोजकम्, परकीयत्वात् द्रव्यस्य । अवघातकाले यत् तुषनिरसनं तदिहोदाहरणम् । (तुषनिरसनमेवोदाहरणम्, न तु वाजसनेयिभिः समाम्नातः प्रणीतानिनयनकालीनस्तुषोपवापः) ।

शा— '**तत्रोपवापशेषत्वं कपालस्य तृतीयया । निर्विवादमतः सोऽपि कपालस्य प्रयोजकः ॥**' (सिद्धान्तमाह–) '**सत्यमस्ति तदङ्गत्वम्, तथापि त्वप्रयोजकः । पुरोडाशप्रयुक्तस्य कपालस्येह चोदनात् ॥**'

सोम— पूर्ववैधर्म्येण प्रत्यवस्थानात् **संगतिः** । **प्रयोजनं** पूर्वपक्षे चरुष्वपि कपालं संपाद्य तेन तुषोपवापः कर्तव्यः, सिद्धान्ते तुषोपवापस्य कपालप्रयोजकत्वाभावात् न कपालेन तुषोपवापः, किन्तु हस्तेन । **सूत्रार्थस्तु**– अर्थेन पुरोडाशलक्षणप्रयोजनेन सह अभिधीयमानं यत् पुरोडाशकपालादि तत्साधनकं तुषोपवापादिकर्मापि अप्रयोजकम् । **न च** कथं कपालस्य पुरोडाशसंबन्धः, संप्रति तदभावात् इति **वाच्यम्** । भविष्यताऽपि पुरोडाशेन तदुद्देशेन आसादनमात्रात् संबन्धोपपत्तेः, तस्य च संबन्धस्य पुरोडाशनिमित्तकत्वात्, तदर्थस्यैव सतः कपालस्य तुषोपवापे विधानेन पुरोडाशप्रयुक्तत्वात् कपालस्य इति ।

वि— 'श्रपणं तुषवापश्च कपालस्य प्रयोजकौ । उत श्रपणमेवाऽऽद्यो वापार्थत्वात् तृतीयया ॥, पुरोडाशकपालेति नाम्ना स्याच्छ्रपणार्थता । प्रयुक्तस्य प्रयुक्तिर्नो तस्य वापे प्रसञ्जनम् ॥'

भाट्ट— दर्शपूर्णमासयोः 'पुरोडाशकपालेन तुषानुपवपति' इति श्रुतम् । तत्र कपालस्य 'कपालेषु पुरोडाशं श्रपयति' इति श्रपणे विनियुक्तस्यापि तृतीयया तुषोपवापार्थत्वेनापि आर्थिकविशेषणविधिना विनियोगादुभयप्रयुक्तत्वम् । न च पुरोडाशार्थकपालत्वेनैव तुषोपवापे विनियोगान्न तुषोपवापप्रयुक्तत्वम्, प्रकृतिविकारभावाभावेन तादर्थ्यसमासायोगात् । षष्ठीसमासे च संबन्धमात्रावगतेः, तस्य च कपालत्वेनैव विनियोगेऽपि पुरोडाशार्थोपात्तस्यैव प्रसङ्गेन ग्रहणोपपत्तेः अनुवादत्वात् । **यदि तु** प्रसङ्गलक्षणाभावात् उपादेयस्थले प्रकृतग्रहणस्य च 'तानि द्वैधम्' इत्यत्र निराकृतत्वात् न पुरोडाशकपालनियमः इत्याशङ्क्येत, **ततोऽस्तु** नाम पुरोडाशसंबन्धविशिष्टस्यैव विधानम् । तत्फलं च तद्भिन्नकपालव्यावृत्तिरेव, न तु अप्रयोजकत्वमपि, संबन्धरूपाङ्गाभावेऽपि अग्निहोत्रहवणीन्यायेन प्रधानभूतकपालबाधानुपपत्तेः चर्वादौ तन्नियमाभावरूपस्य अप्रयोजकत्वफलस्य असंभवात् । **इति प्राप्ते,** पुरोडाशसंबन्धस्य प्रमाणान्तरगम्यस्य आलोचने तत्प्रयुक्तत्वस्यापि अवगतेर्न पुनस्तुषोपवापविधिरपि तत् प्रयुङ्क्ते । अतो लाघवात् अवघातकालीनस्तुषोपवापः परप्रयुक्तकपालोपजीवितया न कपालोपादानासादनयोः प्रयोजकः । निनयनकालीनस्तु कपालधारणस्य प्रयोजको भवत्येव । उपादानस्य तु सोऽप्यप्रयोजकः । **प्रयोजनं** चर्वादौ न कपालनियमः । अग्निहोत्रहवण्यां तु वक्ष्यते ।

मण्डन— 'कपालं न तुषाक्षिप्तम् ।'

शंकर— 'अर्थाभिधानकर्मैवम् ।' सौत्रपदेन अधिकरणार्थ उक्तः । १४.

* पुरोडाशकपालेन इतिवच्च प्रयोजकयुक्ताभिधानाभावात् (व्यतिरेकेण दृष्टान्तः) न व्रीहीणामवघाते **पुरोडाशकपालन्यायः** । **कौ.** २।१।४।९ पृ. ६८.

* **पुरोडाशकपालन्यायेन** निर्वापवाक्ये अग्निहोत्रसंबन्धित्वश्रवणात् तत्प्रयुक्तत्वावगतेः न निर्वापः अग्निहोत्रहवण्याः प्रयोजकः । अत एव 'अग्निहोत्रहवण्या अग्निहोत्रं जुहोति' इत्यत्र 'परिधीन् परिदधाति' इतिवत् पुरोडाशकपालन्यायाभावात् अग्निहोत्रस्य प्रयोजकत्वावगतेः आद्याग्निहोत्रप्रयोगे भूतत्वुत्पत्तेः असंभवेऽपि नाग्निहोत्रहवणीबाधः । **भाट्ट.** १०।२।२६. * 'परिधीन् संमार्ष्टि' इत्यत्र परिधिशब्देन परिधीयते अनेन इति व्युत्पत्त्या अग्निपरिधानोपलक्षितद्रव्याभिधानात् **पुरोडाशकपालन्यायेन** पालाशप्रयोजकत्वात् नोक्तप्रयोजनसिद्धिः । **कौ.** २।१।५।१२ पृ. ८५. * 'परिधौ पशुं नियुञ्जीत' इत्यत्र न परिधौ यूपधर्माः, सत्यपि परिधेः पशुनियोजनं प्रति सप्तम्या अङ्गत्वे पुरोडाशकपालन्यायेन अग्निपरिधानप्रयुक्तस्यैव परिधेः पशुनियोजनशेषत्वेन तत्प्रयुक्तत्वाभावात् । इदं पूर्वपक्षे । **भाट्ट.** ९।२।१२, * 'परिधौ पशुं नियुञ्जीत' इत्यत्र पुरोडाशकपालन्यायेन अग्निपरिधानसाधनरूपपरिधित्वेनैव पशुनियोजनसाधनत्वावगतेः परिधानप्रयुक्तत्वावसायात् तद्धर्माणामेव बलवत्त्वम् । १२।२।११, * यो नाम प्रयोगान्तरकाले रमणीयानि नवानि पात्राणि लभेत तस्येच्छावशेन पूर्वत्यागेनान्योपादानेऽपि न कश्चिद्दोषः स्यात्, दाहस्य पुरोडाशकपालन्यायेन यैः कैश्चिदपि यज्ञपात्रैरुपपत्तेः । इदं पूर्वपक्षे । ११।३।१३.

* न च तथापि क्रयप्रयुक्तत्वविशिष्टैकहायन्या एव तच्छब्देन परामर्शात् **पुरोडाशकपालन्यायापत्तिः**, तथात्वे फलाभावेन (तस्याः षट् पदानि इति—) तच्छब्दवैयर्थ्यापत्तेः तस्य एकहायनीस्वरूपमात्रपरत्वाङ्गीकारात् (इति पूर्वपक्षी) । **भाट्ट.** ४।१।१०.

पुरोडाशगणेऽपि उत्तमयोः पिण्डयोः यथाप्रकृति 'यथाभागं व्यावर्तेथाम्' इति प्रयोगः ॥

अन्त्योपान्त्यपिण्डविभागेऽपि हविर्बहुत्वानपायादूहेन **प्रयोगे प्राप्ते,** यथाप्रकृति अविकृत एव मन्त्रः, पूर्वहविषां व्यावर्तितत्वेन द्वयोरेव हविषोर्व्यावर्तनीयत्वात् । **संकर्ष.** १।३।१९.

पुरोडाशगणे देवतानिर्देशः अन्त्ययोः पिण्डयोः देवताज्ञानार्थो न सर्वेषाम् ॥

पुरोडाशगणे एव देवतानिर्देशो विभागन्यायेन सर्वेषां हविषां स्यात् । इति **प्राप्ते,** महतः पिण्डादेकैकस्य हविषः क्रमेण पृथक्करणात् यागक्रमादेव तत्तद्देवताऽवधारणस्य वृत्तत्वादन्त्योपान्त्यपिण्डयोर्मध्ये कः पिण्डः किंदेवत्य इति निर्धारणायोगात् दृष्टार्थो देवतानिर्देशोऽपि तयोरेव । **संकर्ष.** १।३।२०.

पुरोडाशगणे 'यथाभागं व्यावर्तध्वम्' इत्यूहः कार्यः ॥

यत्र बहूनां पुरोडाशानामेकः पिण्डः, तत्रापि 'यथाभागं व्यावर्तेथाम्' इत्यविकृत एव मन्त्रः प्रयोक्तव्यः, विभागस्य पिण्डद्वैधीकरणार्थत्वात् । इति **प्राप्ते,** 'व्यावर्तध्वम्' 'भगो वो विभजतु' इत्यादिरीत्या ऊहेन प्रयोगः, पिण्डद्वित्वेऽपि हविषां बहुत्वेन तेषां परस्परव्यावृत्तेरभिधेयत्वात् । **संकर्ष.** १।३।१८.

* **पुरोडाशचतुर्धाकरणं** भक्षार्थमेव । ३।४।१७.

* **पुरोडाशद्वयश्रवणं** अनुवादः दर्शपूर्णमासयोः असोमयाजिनः । (द्वयं आग्नेयश्चैन्द्राग्नश्चेति) । १०।८। १४।३५–४६.

* **पुरोडाशधर्माः** पर्यग्निकरणं अग्नीषोमीये पशौ चोदकप्राप्तः (तत्र पुरोडाशस्य द्विचतुरैर्दर्भैः, पशोस्तु आहवनीयोल्मुकेनेति विशेषः) । **भा.** ८।२।२।१२, * पुरोडाशधर्मः प्रोक्षणं अग्नीषोमीयपशौ चोदकप्राप्तः । तत्र 'अद्भ्यस्त्वौषधीभ्यो जुष्टं प्रोक्षामि' इति मन्त्रः । ८।२।२।११. * **पुरोडाशधर्माः** पूर्वं कर्तव्या उपांशुयाजाज्यधर्माः पश्चात्, पाठक्रमप्राबल्यात् । ५।१।८. * पुरोडाशधर्माः— 'पेषणं यवनं वापस्तापश्चोपहितिः प्रथा । मार्जनाभ्यूहनज्वालास्तथा व्युद्धृत्य सादनम् ॥' इति । (एतेषां चरौ बाधः । एते अपूपधर्माः । अपूपश्च नाम पुरोडाशः) । अत्र पेषणं चूर्णनम्, यवनं संयवनं पिष्टस्य उदकेन मिश्रणम् । वापः संवापः उदकमिश्रणाय पिष्टस्य पात्रे प्रक्षेपः । तापः संतापनं कपालानामङ्गारैः प्रतापनम् । उपहितिः उपधानं अङ्गारेषु कपालस्थापनम् । प्रथा प्रथनं कपालेषु अवस्थापितस्य पुरोडाशस्य हस्तसंघट्टनेन सर्वेषु कपालेषु प्रसारणम् । मार्जनं श्लक्ष्णीकरणम् । अभ्यूहनं अध्यूहनं भस्मना अङ्गारैश्च उपर्याच्छादनम् । ज्वालाः दर्भपिञ्जूलैः प्रज्वालनम् । व्युद्धृत्य सादनं कपालेभ्यः पुरोडाशस्य पृथक्कृत्य अन्तर्वेदि अवस्थापनम् । **वि.** १०।१।११.

* **पुरोडाशनिष्पादने** व्रीहीणां ये व्रीहित्वजात्युपलक्षिता अंशाः तेषामेव मुख्यद्रव्यत्वम् । तच्च व्रीहिष्विव नीवारेष्वप्यस्त्येव । तत एव व्रीहीणां नीवाराः प्रतिनिधिः । अयमेव न्यायः सर्वत्र प्रतिनिधिषु । **वि.** ६।३।११.

* **पुरोडाशप्रकृतितया** व्रीहियवयोर्विकल्पः, एकार्थत्वात् । **वि.** १२।३।४.

* **पुरोडाशप्रथने** द्वौ मन्त्रौ 'उरु प्रथस्वेति पुरोडाशं प्रथयति', 'उरु ते यज्ञपतिः प्रथतामिति पुरोडाशं प्रथयति' इति ब्राह्मणाभ्यां विनियुक्तौ । तयोरन्योन्यनिरपेक्षत्वात् विकल्पः, न समुच्चयः । १२।३।१५.

* **पुरोडाशप्रयोजकत्वं** स्विष्टकृतो नास्ति दर्शपूर्णमासयोः । ४।१।१३।२८–३२.

* **पुरोडाशमन्त्रे** 'व्रीहीणां मेध' इत्यत्र नीवारग्रहणे 'नीवाराणां मेध' इत्यूहः कर्तव्यः । परंतु यत्र नैवारश्चरुरेव विहितस्तत्रायमूहः । नीवाराणां प्रतिनिधित्वेन ग्रहणे तु नास्त्यूहः । **के.** (वि. ९।३।१).

* **पुरोडाशयागः** देवतासंस्कारार्थः । १०।१।९। १९–३५.

* **पुरोडाशविधिवाक्यं** दारुपात्रं च सांनाय्ये स्तुत्यर्थम् । **संकर्ष.** १।२।४. 'सांनाय्ये पुरोडाशविधिवाक्यं०' इत्यत्र द्रष्टव्यम् ।

* **पुरोडाशविभागार्थानां** एककार्याणाम् 'पूषा वां विभजतु, भगो वां विभजतु, अर्यमा वां विभजतु' इति मन्त्राणां प्रयोगे विकल्पः दर्शपूर्णमासयोः । १२।३। १३।२९ .

पुरोडाशशकलाधिकरणम् । ज्योतिष्टोमे ऐन्द्रवायवादिपात्रेषु प्रकृतपुरोडाशशकलादीनामेव निधानम् ॥

अपनयस्त्वेकदेशस्य, विद्यमानसंयोगात् ३।८। १८।३३ ॥

भाष्यम्— ज्योतिष्टोमे श्रूयते 'पुरोडाशशकलमैन्द्रवायवस्य पात्रे निदधाति, धाना आश्विनपात्रे, पयस्यां मैत्रावरुणपात्रे' इति । तत्र संशयः किमन्यत एषां क्रियेत, उत प्रकृतेभ्य इति । किं प्राप्तम् ? पूर्वेण न्यायेन अन्यत इति । तत्रोच्यते । तत एकदेशस्यापनयः । कुतः ? विद्यमानसंयोगात् । विद्यते हि तत्र पुराडाशो धानाः पयस्या च । तत्संयोग एव न्याय्यः, नान्यसंयोग इति । पुरोडाशादीनामेव संस्कारः, नैन्द्रवायवादीनाम् । कुतः ? पुरोडाशादिषु द्वितीयादर्शनात् । प्रत्यक्षश्च एकदेशापनयेनोपकारः, नैन्द्रवायवादिसंबन्धेन । एवं प्रकृतानुग्रहो भविष्यति । तस्मात् प्रकृतस्योपदेशेन तत् क्रियेत । न चात्रोपदिष्टोपदेश आशङ्क्यः अनेकगुणभावश्च । अन्येन शकलेन होमः अन्यश्च प्रतिपाद्यते ।

वा— पुरोडाशधानादीनां सवनीययागार्थत्वात् पूर्वेणैव न्यायेन ग्रहणश्रयणार्थमन्ये पुरोडाशशकलादयः । **इति प्राप्ते, अभिधीयते ।** 'एकदेशद्रव्यं च' इत्यनेन अप्रयोजकलक्षणाऽऽपत्तेः अन्यस्य च शकलस्य अभावात् अवदानमात्रे च हुते शेषस्य प्रतिपाद्यमानस्य दृष्टार्थत्वात् द्वितीयानिर्देशानुग्रहान्न कश्चिद्विरोधो दृश्यते । तस्मादत्र प्रकृतोपादानम् ।

वि— 'पुरोडाशस्य शकलमैन्द्रवायवपात्रके । अवदध्यात् पुरोडाशो नवोऽथ सवनीयगः ॥, सिद्धस्य यजनार्थत्वात् नवं संपाद्य तत्क्रिया ।, सवनीयेन तत् कार्यं संस्कार्यत्वाद् द्वितीयया ॥' १९.

भाट्ट— सोमे 'पुरोडाशशकलं ऐन्द्रवायवपात्रे प्रास्यति, आमिक्षां मैत्रावरुणपात्रे, धाना आश्विनपात्रे' इति श्रुतम् । तत्र शकलपदस्य उत्तरार्धादिपदवत् एकदेशवाचित्वेन स्वतन्त्रपुरोडाशाक्षेपकत्वाप्रसक्तेः प्रातःसवनिकसवनीयपुरोडाशान्तरत्वपरत्वं तावन्निर्विवादम् । आमिक्षाऽऽदौ तु तदभावात् 'पयसा मैत्रावरुणं श्रीणाति' इतिवत् लौकिकामिक्षाऽऽदिग्राहकत्वेनोपपत्तौ कल्प्यप्रतिपत्तित्राधेन सवनीयगततद्ग्राहकत्वे प्रमाणाभावः । **इति प्राप्ते,** द्वितीयया प्रासनस्य आमिक्षादिप्रतिपत्तित्वावगमात् तदंशे औपदेशिक्या तया आतिदेशिकप्रतिपत्तित्वाधोप-

पत्तेः प्रातःसवनिकसवनीयसंबन्धिनामेव पुरोडाशादीनां ग्रहणम् ।

मण्डन— ‘ धानाः पयस्या शकलश्च शेषात् । ’ २०.

शंकर— ‘ शकले प्रकृतग्रहः । ’ २२.

* **पुरोडाशशब्दः** जातिवाची न तु संस्कारवाची । ‘ पुरोडाशेन मे माता प्रहेलकं ददाति ’ इत्यादौ यथा । तेन अग्निष्टोमे प्रवर्ग्ये रौहिणौ पुरोडाशौ यवमयौ तूर्ष्णीं कर्तव्यौ । **सोम.** १।४।८. * पुरोडाशशब्दः धानादिषु भाक्तः संनिहितेषु प्रयुक्तो ज्योतिष्टोमे । **भा.** ३।८। २२।४५.

* **पुरोडाशशेषभक्षणं** यजमानपञ्चभिर्ऋत्विग्भिरेव कर्तव्यम्, भक्षणमन्त्रबलात् ‘ यजमानपञ्चमा इडां भक्षयन्ति ’ इति लिङ्गाच्च । **के.** (भा. ६।४।३.)

* **पुरोडाशिनः** अनिष्टप्रथमयज्ञाः । सारस्वते सत्रे ‘ ये पुरोडाशिनः ते उपवसन्ति ’ इत्यत्र । **भा.** २।४।२।८ पृ. ६३४.

* **पुरोरुक्** सौत्रामण्यां सुराग्रहेषु एका ‘ एका पुरोरुक् एका याज्या ’ इति । **भा.** ८।२।१।४.

* **पुरोरुक्शब्दस्य** शस्त्रगतमन्त्रविशेषवाचित्वेऽपि इह (‘ तथा याज्या पुरोरुचोः ’ २।१।५।१९ इत्यत्र) याज्यासाहचर्येण अनुवाक्यावाचित्वम् । **सु.** पृ. ६५५.

* **पुरोहितः** एकस्य राज्ञः एक एव उपादेयत्वेन श्रूयते ‘ पुरोहितं करोति ’ इति । एकत्वं विवक्षितम्, संस्कारशब्दत्वात् पुरोहितशब्दस्य । **भा.** ६।६।२।१३, * पुरोहितः । ‘ एतेन (कुलायेन यागेन) राजपुरोहितौ सायुज्यकामौ यजेयाताम् ’ । ३।३।९।१७. * पुरोहितो राज्ञ एव भवति नाराज्ञः । **वि.** ६।६।२. * **पुरोहितस्य** राज्ञश्च भिन्नकल्पयोरपि कुलाययागे सहाधिकारः । ६।६।२.

पुष्करपलाशन्यायः । यथा पद्मपत्रं जलेन लिप्तं न भवति, तत्समकक्षायामवतरत्ययम् । यथोक्तम्– ‘ पद्मपत्रमिवाम्भसा ’ इति । **साहस्री.** ७२४.

पुष्टलगुडन्यायः । बहूनां शुनां मध्ये एकस्य प्रहारार्थं प्रक्षिप्तेन पुष्टेन लगुडेन इतरेऽपि श्वानो निराक्रियन्ते । तथा सांख्यवादनिराकरणयुक्त्या इतरेऽपि वादिनो निरस्ता भवन्ति । तदुक्तम् ‘ एतेन सर्वे व्याख्याता व्याख्याताः ’ इति । **संग्रहः.**

पुष्पवन्तोपकारन्यायः । ‘ एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ ’ इत्यमरः । पुष्पवन्तशब्दो मतुबन्तः अकारान्तोऽपि । ‘ पुष्प विकसने ’ । भावे घञ् । पुष्पः प्रकाशस्तद्वन्तावित्यर्थः । एकयोक्त्येति वचनात् पुष्पवन्त इति पुष्पवानिति वा सूर्यश्चन्द्रो वा न वक्तव्यः । यथा रोदसी इत्येकयोक्त्या द्यावापृथिव्यावुच्येते इति । अकारान्तपक्षे ‘ अव रक्षणे ’, ‘जॄविशिभ्यां झच्’ ४०६ इत्यौणादिकसत्रेण बाहुलकाज्झच्प्रत्यये ‘ झोऽन्तः ’ (पा. ७।१।३) इत्यन्तादेशे अवन्त इति सिद्धम् । पुष्पस्य प्रकाशस्यावन्तौ रक्षकौ आधाराविति यावत् । शकन्ध्वादित्वात् साधुः । ‘ रविशशिनौ पुष्पवन्ताख्यौ ’ इति ‘धरणीधरशिखरस्थितपुष्पवन्ताभ्याम्’ इत्यादिनाममालादिप्रयोगदर्शनादिति । अत एव प्रकृतन्यायेऽपि पुष्पवन्ताभ्यां कृत उपकारः पुष्पवन्तोपकारः । मध्यमपदलोपिसमास इति । यथा पुष्पवन्ताभ्यां स्वस्वसकाशादन्येभ्यो मङ्गलादिग्रहेभ्यो द्वौद्वौ राशी दत्त्वा स्वपार्श्वे चैकैको राशिः स्थापितः, एवमुदाराशयाः परोपकारतया बहुभ्यो बहु दत्त्वा किञ्चिदवशिष्टेनापि संतुष्य सर्वोपरि विराजन्ते । **साहस्री.** ८९५.

* **पूजयतेः** प्रीत्युत्पादनवाचित्वम् । **सु.** पृ. ७५०.

* **पूजा** पूजनीयं प्रति गुणभूता लोके दृश्यते । **भा.** ९।१।४।६. * पूजा लौकिकः पदार्थः । **टुप्.** ९।१। ४।९ पृ. १६५५. * **पूजायाः** प्रीत्युत्पादनात्मकत्वेन करोत्यर्थत्वम् । **सु.** पृ. ७५०.

* **पूज्यानां** प्रत्यक्षनामग्रहणमयुक्तम् ‘ परोक्षप्रिया इव हि देवाः ’ । **वि.** ३।७।४.

पूतिकूष्माण्डन्यायः । अयं सर्वदर्शनसंग्रहे जैमिनीये । पूतिशब्दोऽत्र दुर्गन्धिवाचकः । पूतिकूष्माण्डवत् अनेकयुक्तिखण्डितो वादोऽपि उच्यते । **साहस्री.** ७७४.

पूतीकाः सोमस्य प्रतिनिधिः श्रौतः ॥

वचनाच्चान्याय्यमभावे तत्सामान्येन प्रतिनिधिरभावादितरस्य । ६।३।१३।३१ ॥

भाष्यम्— इदमामनन्ति ‘ यदि सोमं न विन्देत पूतीकानभिषुणुयात् ’ इति । तत्र संदेहः किमयमभावे निमित्ते विधिः, उत प्रतिनिधिनियम इति । किं प्राप्तम् ? अभावे विधिरिति । कुतः ? विधानात् । नहि प्रतिनिधिर्विधीयते । साध्यसिद्धये साधनं स्वयमेवोपादीयते । इदं तु विधीयते । तत् कल्पान्तरपक्षेऽर्थवद्भवति । तस्मान्न प्रतिनिधिरिति । **एवं प्राप्ते, ब्रूमः ।** प्रतिनिधिः स्यात् । कुतः ? विनष्टे हि साधने साध्यसिद्ध्यर्थं साधनान्तरमुपादीयते, श्रुतस्याभावात् । ननु अन्याय्याः पूतीकाः, अन्यद्धि सदृशतरमस्तीति । तदुच्यते । वचनात् । सदृशे प्राप्ते, बहुषु वा असदृशेषु पूतीका अल्पसदृशा नियम्यन्ते । कथम् ? तद्धि प्रक्रान्तं कर्मावश्यं कर्तव्यम् । तस्यामवस्थायामन्तरेणैव वचनं प्रतिनिधेयं द्रव्यान्तरं प्राप्तमेव । प्राप्ते वचनं न विधिरिति गम्यते । प्राप्तस्यानुवादो भवितुमर्हति । किमर्थमनुवाद इति चेत् । उच्यते । अल्पसादृश्यमप्राप्तम् । तद्विधानार्थमनुवादः । प्रयोजनं पक्षोक्तम् । प्रतिनिधिपक्षे सोमसदृशस्योपादानं पूतीकविनाशे । द्रव्यान्तरविधौ पूतीकसदृशमुपादेयम् ।

सोम— प्रक्रान्तेऽपि प्रयोगे वचनात् द्रव्यान्तरमङ्गमिति प्रत्यवस्थानात् **संगतिः । सूत्रार्थस्तु**— मन्दसदृशत्वात् अन्याय्यमपि पूतीकद्रव्यं वचनात् प्रतिनिधिः स्यात् वचनस्याभावेऽपि इतरस्य मुख्यस्याभावात् तत्सामान्येन प्रतिनिधिरिति ।

वि— ‘ सोमाभावे भवेत् पूतीविधिः प्रतिनिधावुत । नियमो, वचनादाद्यो, लाघवात् तन्नियम्यते ॥ ’

भाट्ट— ‘ यदि सोमं न विन्देत पूतीकानभिषुणुयात् ’ इत्यादौ किं सोमाभावे पूतीकत्वेन रूपेण पूतीकानां विधानम्, उत प्रतिनिधिविधया पूतीकगतसोमावयवानां नियमः । **इति चिन्तायाम्,** प्रतिनिधिनियमे पूतीकपदस्य तद्गतसोमावयवे लक्षणाऽऽपत्तेः अभावे विधिरेवायम् । न च नियमविधिलाघवानुरोधेन तदङ्गीकरणमप्यदोषः, निषादस्थपत्यधिकरणन्यायेन अपूर्वविधिगौरवस्य फलमुखत्वात् । अभावे विधिपक्षेऽपि प्रतिनिधिनियमस्य अर्थसिद्धत्वात् लाघवस्य अस्मन्मतेऽपि सत्त्वाच्च । नहि अयं त्वन्मतेऽपि शाब्दः प्रतिनिधिनियमः । अपितु फलतः । तच्च फलं ममाप्यविशिष्टमेव । किञ्च, सोमाभावे सुसदृशस्यान्यस्यैव प्राप्तेः मन्दसदृशानां पूतीकानां पक्षप्राप्त्यभावादेव नियमविषयत्वानुपपत्तिः । अतः पूतीकत्वेन रूपेण पूतीकानामपि सोमाभावे विहितत्वात् तदपचारे पूतीकसदृशमुपादेयम् । **इति प्राप्ते,** नाभावे विधिरयम् । तथात्वे पूतीकत्वस्य तदवच्छिन्नव्यक्तेस्तदवयवान्तराणां च सोमावयवविजातीयानां करणत्वकल्पनागौरवापत्तेः । प्रतिनिधिनियमे तु क्लृप्तसोमावयवनिष्ठकरणताऽऽक्षिप्तोपादानकपूतीकपरिच्छेदकत्वेन यागोद्देशेन पूतीकत्वनियममात्रविधानात् पूतीकव्यक्त्यवयवानां यागकरणत्वाकल्पनात् लाघवम् । अत एव न लक्षणाऽपि । ‘ पूतीकानभिषुणुयात् ’ इत्यत्र तु तृतीयाया अश्रवणात् द्वितीयया यागप्रयोजकत्वस्यैव निरुक्तसंबन्धेन लक्षणेऽपि न दोषः । यद्यपि च तेन संबन्धेन पूतीकत्वस्य एतद्विध्यभावे न पक्षे प्राप्तिः ! पूतीकानां मन्दसदृशत्वेन सोमाभावे सुसदृशस्यैव प्राप्तेः । तथापि कर्मचोदनया यत्किञ्चित्प्रतिनिधिप्रसक्तौ सदृशन्यायेन नियमकरणात् पूर्वमेव एतद्वचनप्रवृत्त्या नियमोपपत्तेः । अत एव पूतीकगतसोमावयवनियमफलकपूतीकत्वनियमकरणेऽपि न पूतीकानां सुसदृशाभावे उपादानम्, किन्तु सोमाभावे एव, वचनस्यैव शीघ्रप्रवृत्तिकतया नियामकत्वात् ‘ यदि सोमम् ’ इति अनुवादसामर्थ्याच्च । एवं च पूतीकापचारे सोमपूतीकोभयसदृशं ग्राह्यम् । पूतीकत्वस्यापि कारणकोटौ प्रवेशात् ।

यत्तु शास्त्रदीपिकायामेतादृशविषये सोमसदृशमेव ग्राह्यमित्युक्तम्, तत्तन्त्ररत्नविरोधादुपेक्षितम् । तदभावे तु सोममात्रसुसदृशं पूतीकत्वावच्छिन्नसंसर्गस्य सोमावयवाङ्गत्वेन ‘ गुणलोपे च ’ (१०।२।२७।६४) इति न्यायेन बहुतरसोमावयवानामेवानुग्राह्यत्वात् । अभावे विधिपक्षे तु सोमाभावे निमित्ते पूतीकानामेव अङ्गत्वात्तत्सदृशमेवेति विशेषः । अत एव यत्र व्रीह्यादौ तदवयव-

त्वेनैव नीवारप्रतिनिधिः तत्र नीवारत्वस्य अनङ्गत्वात् तदपचारे व्रीहिसदृशमेवोपादेयं न तूभयसदृशमित्यपि सुलभम् । अत एव मूले उभयविधप्रतिनिध्यपचारे अधिकरणद्वयं कृतम् । तत्तु मया स्पष्टत्वादुपेक्षितम् ।

मण्डन–– ‘ पूतीकास्तु नियम्यन्ते । ’

शंकर––– ‘ पूतीकश्च प्रतिनिधिः । ’

* **पूतीकानां** अभिषवसंबन्धे श्रूयमाणे तदर्हत्वा-न्यथानुपपत्त्या यागसंगतिरश्रूयमाणाऽपि गम्यते । **वा.** २।२।६।१७ पृ. ५११.

* **पूतीकापचारे** सोमसदृशस्य एव प्रतिनिधित्वम् , न पूतीकसदृशस्य । ६।३।१५।३२ .

* **पूतीकादिषु** श्रुतेष्वपि प्रतिनिधिषु अभिषव-क्रयादिविधिस्तुल्यः । ३।६।१५।४०.

* **पूतीकासोमयोर्न** वैकल्पिकत्वम् , किन्तु सोमा-भावे पूतीका एव प्रतिनिधिर्नान्यत् । ६।३।१३।३१ .

* ‘ **पूयति** वा एतदृचोऽक्षरं यदेनदूहति, तस्मादृचं नोहेत् ’ इति ऊहनिषेधात् प्राकृतयाज्याऽनुवाक्याद्यूहनिषेधः अयं विकृतिगतातिदिष्टदृष्टार्थसंनिपातिक्रिया-निषेधः । **बाल.** पृ. ३८.

* **पूर्णाहुतिः** अग्निहोत्राद्यङ्गभूताग्न्युत्पादकाधानाङ्गम् । **सु.** पृ. १६. * पूर्णाहुतिः स्रुचि चतुर्गृहीतं गृहीत्वा ‘ सप्त ते अग्ने समिधः ’ इति मन्त्रेण होमः । क्वचित् आज्यग्रहणाधिक्यं मन्त्रान्तरं च । **के.** * **पूर्णाहुतिम**-कृत्वा नहि अग्निहोत्रादयः क्रियन्ते । **भा.** १।२।१।४, * ‘ पूर्णाहुतिं जुहोति ’ इति विधेः ‘ पूर्णाहुत्या सर्वान् कामानवाप्नोति ’ इति शेषः । फलवचनं स्तुतिः अधिकृतापेक्षं च सर्वत्वम् । १।२।१।१६. * **पूर्णाहुते**-रग्निसंस्कारकत्वम् । **वा.** १।२।१।४.

* **पूर्णाहुतिपशुबन्धयोरकृतयोः** इतरकर्मानधिकारः । **वा.** १।२।१।४ । अत्र **सुधा**– अग्निहोत्राद्यङ्गभूताग्न्यु-त्पादकाधानाङ्गत्वात् पूर्णाहुतेः । पशुबन्धश्चात्र अग्नि-ष्टोमाङ्गभूतः अग्नीषोमीयः ।

* **पूर्णमासे** पूर्वमाग्नेयस्य, पश्चात् अग्नीषोमीयस्या-नुष्ठानम् , मन्त्रपाठस्य प्राबल्यात् । ५।१।९. **मीको.** पृ. २५३५ ‘ पाठयोर्मन्त्रब्राह्मणगतयोर्मन्त्रपाठो बली-यान् ’ इत्यत्र द्रष्टव्यम् । * **पूर्णमासे** बर्हिरुपलक्षितः कालः ‘ बर्हिषा वै पौर्णमासे व्रतमुपयन्ति ’ इति विधीयते । (व्रतोपायनं व्रतभक्षणम्) । ‘ अमाषममांसं बहुसर्पिष्कं व्रतं व्रतयति ’ इत्यनेन व्रतस्य पूर्वं विहि-तत्वात् । **भा.** ६।४।१२।३४–३५. * **पूर्णमासे** बर्हिःसंपादनकाले व्रतमुपेयात् । ६।४।१२. **मीको.** पृ. २०६० ‘ दर्शपूर्णमासयोः व्रते० ’ इत्यत्र द्रष्टव्यम् । * पूर्णमासे वार्त्रघ्नीयुगलम् , अमावास्यायां वृधन्वती-युगलं च आज्यभागाङ्गम् । ‘ अग्निर्वृत्राणि ’, ‘ त्वं सोमासि ’ इति वार्त्रघ्न्यौ , ‘ अग्निः प्रत्नेन मन्मना ’, ‘ सोमगीर्भिष्ट्वा ’ इति वृधन्वत्यौ । वार्त्रघ्न्यधिकरणम् । **वि.** ३।१।१३.

* **पूर्णमासयागे** शाखाप्रहरणं नास्ति शाखाया एवाभावात् । **वि.** ४।२।४.

* **पूर्णमासशब्दः** सूर्याचन्द्रमसोर्विप्रकर्षवचनः । **संकर्ष.** ३।१।१. **मीको.** पृ. २०७८ ‘ दर्शपूर्णमास-शब्दौ० ’ इत्यत्र द्रष्टव्यम् ।

* **पूर्णिका** (अवहननकर्त्र्याः कस्याश्चित् दास्यादे-र्नामैतत्) स्वाध्यायकाले अवहन्ति करोति, माणवको-ऽवहन्तिमन्त्रमधीते, नासौ तेन मन्त्रेण तदभिधान-मभ्यस्यति । **भा.** १।२।४।३१–७ .

* ‘ **पूर्वं** परमजातत्वादबाधित्वैव जायते । परस्यान-न्यथोत्पादान्न त्वबाधेन संभवः ॥ ’ श्रुत्यादौ शीघ्रतरत्वात् प्रथमं प्रवृत्ते, लिङ्गादीनि प्रवर्तन्ते । तत्र यदि प्राप्तबाध-सिद्ध्यर्थं पश्चात् प्रवर्तमानमपि लिङ्गं श्रुतिमनुमापयति, ततः सा तुल्यविषयसंनिविष्टां पूर्वामबाधित्वा नात्मानं लभते इति मृगतृष्णिकादिष्विव मिथ्यात्वं कल्पयन्त्येव जायमाना बाधिका स्यात् । **वा.** ३।३।७।१४ पृ. ८५९, * पूर्वं परेण बाध्यते पौर्वापर्येण विरोधे । अप्राप्तबाधः । ३।३।७।१४ पृ. ८६०. * पूर्वं धूमं प्रतिपद्यते पश्चा-दग्निम् । यश्च धूमप्रत्ययेनैव कृतार्थो भवति, नासा-वग्निप्रत्ययमाद्रियते । **भा.** ८।३।३।७ .

पूर्वं हि अपवादा अभिनिविशन्ते, पश्चा-दुत्सर्गाः इति न्यायः । स्पष्टः । **संग्रहः** . , **शेखरः** परि० ६३ च .

* सर्वापेक्षणेषु च पुरस्तादुच्चरितस्य ग्रन्थानुगुण्यात् **पूर्वमालोचनं** भवति । **वा.** ३।१।१४।२४ पृ. ७४०. * **पूर्वः** इति स उच्यते यस्यापरोऽस्ति । तेन ‘ पूर्वो धावति ’ इत्युक्ते अपरो गम्यते । **भा.** ४।१।५।१४.

पूर्वैश्च तुल्यकालत्वात् । १०।८।५।८॥

चातुर्मास्येषु साकमेधेषु द्वितीयदिने त्र्यम्बकनामानः एककपालाः पुरोडाशाः बहवो विहिताः । तथा च सत्याषाढः ‘ यावन्तो यजमानस्य अमात्याः सस्त्रीकाः , तत एकाधिकान् ’ इति (५।५।२) । तत्र ‘ अभिघार्या अनभिघार्या इति मीमांसन्ते ब्रह्मवादिनः ’ इत्युक्त्वा ‘ अभिघार्या एव ’ इति उक्तम् । तथा आधाने ‘होतव्य-मग्निहोत्रं न वा इति मीमांसन्ते ब्रह्मवादिनः ’ इति विचार्य ‘ तूष्णीमेव होतव्यम् ’ इति उक्तम् । अत्रापि पूर्वैः पूर्वाधिकरणोदाहृतैः वाक्यैः तुल्यकालत्वात् तुल्य-रूपत्वात् पूर्ववदेव निर्णयः प्रत्येतव्यः । ‘ अभिघार्या एव ’ इति विधिः इतरत् सर्वं अर्थवादः । तथा ‘ तूष्णीं होतव्यम् ’ इति विधिः इतरत् सर्वमर्थवाद इति । **के.**

पूर्वात् परं बलीयः इति न्यायः । स्पष्टार्थः । **संग्रहः** .

* **पूर्वस्मिन्** पक्षसि गवामयने त्र्यनीका निविशते । सा निविशमाना आद्ये द्वे अहनी वर्जयित्वा भवति, तयोः ऐन्द्रवायवाग्रतायाः प्रत्यक्षाम्नानात् । **टुप्.** १०।५।२५।८५ पृ. १९७९. * ‘ **पूर्वयोः** वर्णयोः (विप्रक्षत्रिययोः) वेदाध्यायिनं हत्वा ’ इति ‘ ब्रह्महा द्वादशाब्दानि ’ इति सामान्यविधेः पुरुषार्थः उपसंहार-विधिः । **बाल.** पृ. १७ .

‘ पूर्वाबाधेन नोत्पत्तिरुत्तरस्य हि सेत्स्यति ’ इति न्यायः । अनेन हि श्रुत्युक्तकालाधिकरणकभोज-नादेः प्रवृत्तिमत्पुरुषविषयतया विहितस्य सदोपवासादि-बोधकवचनसंकोचकतया संकुचितवाक्यार्थस्य यथावद-नुष्ठानेन सिध्यत्येव यथोक्तफलसंपादकत्वमिति बोध्य-मिति । **साहस्री.** ६१४.

* **पूर्वावसायिनश्च** बलीयांसो जघन्यावसायिभ्यः । **भा.** १२।२।१३।३३.

* **पूर्वाम्नातेन** पश्चादाम्नातं बाध्यते । **बाल.** पृ. १४१.

* **पूर्वोत्तरपदार्थयोः** क्रम एव तदन्तत्वतदादित्व-नियामकः । तेन ज्योतिष्टोमे अग्नीषोमीये पशौ प्रयाजा-न्तानामपकर्षः सवनीये च अनुयाजादीनामुत्कर्षः । **सोम.** ५।१।१२.

‘पूर्वजन्मकृतं कर्म तद्दैवमिति कथ्यते’ इति न्यायः । अदृष्टविशेषो धर्मः । स च ‘ पूर्वजन्म० ’ इति न्यायेन पूर्वार्जितकर्मरूपं दैवं वा भवतु अन्यद्वा, सर्वथा धर्माधर्मयोरनुमेयत्वमेव न प्रत्यक्षत्वम् । **सना. ध. प्र.** पृ. ७०.

पूर्वदेवतानुपलक्षणाधिकरणम् । पात्नीव-द्भक्षणे पूर्वदेवतानुपलक्षणम् ज्योतिष्टोमे ॥

पात्नीवते तु पूर्ववत् । ३।२।१३।३३ ॥

भाष्यम्– अस्ति पात्नीवतो ग्रहः , ‘ यदुपांशुपात्रेण आग्रयणात् पात्नीवतं गृह्णाति ’ इति । द्विदेवत्यानां शेषाः आग्रयणस्थाल्यामुपनीताः । ततः पात्नीवतो गृह्यते । अथ हुते पात्नीवते तच्छेषे भक्ष्यमाणे भवति संदेहः किं इन्द्रवाय्वादयः उपलक्षयितव्या न वेति । किं तावत् प्राप्तम् ? उपलक्षयितव्याः । तेषामपि हि असौ शेषः , यथा प्रस्थितदेवताया इति ।

वा––– पूर्वापवादार्थमारम्भः । द्विदेवत्यानां ऐन्द्र-वायवादीनां शेषा आदित्यस्थाल्यां निक्षिप्यन्ते । ततोऽपि पुनः आग्रयणस्थाल्यामागच्छन्ति । ततश्च पात्नीवतग्रहणं श्रूयते ‘ उपांशुपात्रेण पात्नीवतमाग्रयणाद् गृह्णाति ’ इति । तस्य हुतशेषे भक्ष्यमाणे पूर्ववदेव ‘ इन्द्रवायुपत्नीवत्पीतस्य ’ एवमाद्युपलक्षणं कर्तव्यमिति पूर्वपक्षः ।

ग्रहणाद्वाऽपनीतं स्यात् । ३४ ॥

भाष्यम्––– अपनीयते हि स शेषः इह, न यथा-पूर्ववत् । तत्र हि पात्रलक्षणत्वेन संकीर्त्यते, न सोमो ग्राह्यत्वेन । इह तु ‘ आग्रयणात् गृह्णाति ’ इति स्थालीस्थः सोमो निर्दिश्यते होतुं यक्ष्यमाणदेवतां प्रति । ननु स्थाल्यां आग्रयणः अनाग्रयणश्च, तत्र यः तस्मादाग्र-यणाद् गृह्यते, स पात्नीवतः । यस्तु संपातात् , नासौ पात्नीवत इति । उच्यते । आग्रयणोऽपादानम् । तस्मात्

योऽपैति आग्रयणः अनाग्रयणो वा, स सर्वः पात्नीवतः। आग्रयणाच्च एषः सर्वोऽपेतः। **ननु** अनाग्रयणादपि अपेतः। **नैष दोषः**। आग्रयणात्तावदपेतः। तेनासौ पूर्वदेवताभिः पीतः इति न शक्यते वक्तुम्। यो हि इन्द्रार्थस्य सोमस्यावयवः शेषः, स इन्द्रपीतः इति प्रकृतौ उच्यते। इहापि तद्वदेव पूर्वदेवतार्थस्यावयवो वदितव्यः। **ननु** योऽसौ पूर्वदेवताऽर्थः तस्यैवायं अवयवः। **नेति ब्रूमः**। नहि हुतस्यावयवो दृश्यते। **ननु** प्रकृतावपि हुतस्यावयवो न दृश्यते। **उच्यते**। हुताहुतस्य समुदायस्य तत्रावयवः उपलक्ष्यते तद्देवतस्य। **ननु** इहापि समुदाय एव आसीत् तद्देवत्यः, तस्यैवायमवयवः। **नेत्युच्यते**। आसीदयं समुदायस्तद्देवत्यः। इदानीं तस्यावयवः अन्यदेवत्यो जातः। तेन समुदायः तद्देवत्यत्वादपेतः। **आह**, पूर्वदेवतापीतस्यासौ अवयव आसीत् तेन भूतपूर्वगत्या भविष्यति। **उच्यते**। प्रकृतौ न भूतपूर्वगत्या अभिधानं कृतम्। इहापि तद्वदेव न कर्तव्यमिति। **अपिच** इन्द्रदेवत्यः तत्र इन्द्रपीत इत्युक्तम्। अनपनीता च तस्य इन्द्रदेवत्यता। अस्य पुनः पूर्वदेवतासंबन्धः अपगतः। तस्मान्नात्र पूर्वदेवता (इन्द्रवाय्वादयः देवताद्वन्द्वानि) उपलक्षणीयेति।

वा— नैतत् पूर्वेण सदृशम्। कुतः ? '**यस्य ग्रहणवेलायां संनिधिः सोऽपनीयते। संहतेन हि संकल्पः कर्तव्यस्तत्र चोद्यते॥**' आग्रयणप्राप्तेषु हि द्विदेवत्येषु पत्नीवत्संकल्पश्चोद्यते। तत्र यद्यपि तावत् परकीय एव संकल्पः तथापि प्रसङ्गसिद्धिरनिवार्या। किमुत यदा सोऽपि संकल्पनीयः श्रुत एव। तथाहि '**योऽपैत्याग्रयणात् सोमः स पात्नीवत इष्यते। शेषश्चैव ततोऽपैति तेन संकल्प्यते तदा॥**' यदा हि 'आग्रयणं पात्नीवतं करोति' इति श्रूयेत, ततः संनिहितोऽपि अनाग्रयणत्वात् शास्त्रबलेन शेषः कथञ्चित् संकल्पादपनीयेत। अत्र पुनः 'आग्रयणाद् गृह्णाति' इति श्रूयते, न आग्रयणस्य आग्रयणं इति वा। तद्यथा 'वृक्षात् पर्णं पतति' इत्युक्ते कङ्कुरादिपत्रमपि प्रतीयते, वृक्षस्य अपादानमात्रोपक्षीणत्वात्। एवमिहापि आग्रयणात् अपेतत्वं पत्नीवत्संबन्धकारणम्, नाग्रयणत्वम्। समानदेशयोश्च संपाताग्रयणयोः य एवापैति, स एव आग्रयणादपेतः इति शक्यते वक्तुम्। तावच्चेह निमित्तम्। यत्तु तन्मिश्रात् अनाग्रयणादपि अपैति, न तत्प्रतिषेधे विधौ वा उपयुज्यते। नहि अनाग्रयणात् अपेतः न पात्नीवत इति वचनमस्ति। यदि वा अयमर्थः स्यात्, ततो योऽपि आग्रयणः ततोऽपैति, सोऽपि आग्रयणानाग्रयणापेतत्वात् अपात्नीवतः प्राप्नोति। तस्मात् आग्रयणादेव इत्यस्याशक्यत्वात् अप्रमाणकत्वाच्च अवश्यमेवमाश्रयितव्यं आग्रयणात्तावदपेतः इति। तच्च संपातस्यापि अविशिष्टं इति उपपन्नं देवतासंबन्धित्वम्। न च पूर्वदेवतार्थत्वमनपनीय उत्तरसंबन्धोऽवकल्पते इत्युपपन्नं पूर्णकभोजनवदनुपलक्षणम्। 'ननु योऽसौ पूर्वदेवतार्थः, तस्यैवायमवयवः' इति (भाष्यम्) भूतपूर्वगत्यभिप्रायम्। आचार्यस्तु स्वयमेवैनं अभ्युपगमयामीति मन्वानः परिहसति तावत् 'नहि हुतस्यावयवो दृश्यते' इति। नहि हुतादन्यत् तस्या देवताया विद्यते, तस्यापनीतत्वात् इत्यभिप्रायः। परस्तु अव्युत्पन्नाभिप्राय आह 'ननु प्रकृतावपि' इति। संकल्पवेलायां तत्र देवताव्यपदेश इत्युत्तरम्। इतर आह— अत्राप्येवमेवासीत् इति। सिद्धान्तवादी वदति एतदेव प्रकृतिविलक्षणं इति। न च अपनीतस्य तत्रोपलक्षणं कृतम्। इह तु स्फुटमपनीतत्वमुक्तम्। तस्मात् पत्नीवानेवोपलक्षणीय इति सिद्धम्।

सोम— पूर्ववत् प्रत्यवस्थानात् **संगतिः**। प्रातःसवने ऐन्द्रवायव–मैत्रावरुण–आश्विना ग्रहा द्विदेवत्याः। तेषां होमानन्तरं तदीयाः शेषाः आदित्यस्थालीं प्राप्य तृतीयसवने आदित्यस्थालीत आग्रयणस्थालीं प्राप्नुवन्ति।

वि— 'द्विदेवशेष आदित्यस्थाल्या आग्रयणाभिधाम्। स्थालीं प्राप्तस्ततः पात्नीवतस्य ग्रहणे सति॥ तद्भक्षणे द्विदेवाः किं सार्धं पात्नीवतेन ते। उपलक्ष्या न वा, पूर्वन्यायेनास्तूपलक्षणम्॥ अन्य आग्रयणात् पात्नीवतो नैतस्य विद्यते। आकाङ्क्षा पूर्वदेवेषु पत्नीवानेव लक्ष्यते॥'

भाट्ट— द्विदेवत्यानामैन्द्रवायवादीनां शेषा आदित्यस्थाल्यां आगत्य ततोऽपि आग्रयणस्थालीमागच्छन्ति। पात्नीवतश्च आग्रयणाद् गृह्यते। तस्मिन् भक्ष्यमाणे द्विदेवत्या अपि उपलक्षणीयाः पूर्ववत् आग्रयणस्यैव पत्नीवद्देवतासंबन्धात्। **इति प्राप्ते**, 'पात्नीवतमाग्रयणाद् गृह्णाति' इत्यपादानत्वश्रवणात् तस्मादपेतस्य पात्नीवतत्वम्, न तु आग्रयणस्यैव। आग्रयणवच्च अनाग्रयणमपि संसृष्टत्वात् तस्मादपेत इति द्विदेवत्यस्यापि देवताऽन्तरसंबन्धापनयात्, भूतपूर्वावगत्या च प्रकृतौ अनुपलक्षणात् नोपलक्षणीयाः (इन्द्रवाय्वादयः)।

मण्डन— 'पात्नीवते तु प्रवदेन्न पूर्वाम् (देवताम्)।'

शंकर— 'तथा पात्नीवते ग्रहे।' (देवता नोह्या)।

* **पूर्वदौर्बल्यन्यायः**। एकवाक्यस्थानां पदानामन्योन्यज्ञानानपेक्षज्ञानोत्पादकतायां एकवाक्यत्वभङ्गापत्तेः अन्योन्यसापेक्षज्ञानोत्पादकत्वावसायात् पूर्वपदजन्यज्ञानविरोधिनो ज्ञानस्य उत्तरेण पदेनानुत्पादितस्य बाधकत्वानुपपत्तेः नात्र पूर्वदौर्बल्यन्यायः संभवति। **सु.** पृ. ११७२.
* पूर्वदौर्बल्यन्यायः। ६।५।१९. **मीको.** पृ. ४९५ 'अपच्छेदन्यायः' इत्यत्र द्रष्टव्यम्।

* **पूर्वनिमित्तो** हि उत्तरशब्दः उत्तरनिमित्तश्च पूर्वशब्दः। **भा.** १०।३।४।२७.

* **पूर्वपक्षवादिना** सिद्धान्तवादिमतं प्रतिषेद्धव्यं न यत्किञ्चित्। **वा.**३।१।३।६ पृ. ६६३.

* **पूर्वपदार्थक्रम** एव प्रयोगविध्यवगतप्रत्यासत्त्यनुगृहीतोत्तरपदार्थक्रमनियमे प्रमाणम्। अत्र पूर्वेत्युपलक्षणम्, उत्तरेऽपि तौल्यात्। (प्रावृत्तिकक्रमन्यायोऽयम्)। ५।१।५।८–१२.

* **पूर्वपूर्वस्य** प्राबल्यं श्रुतिलिङ्गादीनाम्। ३।३।७।१४.

* **पूर्ववान्** अनुवादो भवति। (पूर्वमस्ति अस्य उत्तरस्य, स पूर्ववान् उत्तरः)। **भा.** ७।१।३।२ पृ. १५२८.

पूर्ववन्तोऽविधानार्थास्तत्सामर्थ्यं समाम्नाये। १।४।११।१७॥

'वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते' इति जातेष्टिः श्रूयते। तत्र 'यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति, यन्नवकपालः त्रिवृतैवास्मिंस्तेजो दधाति, यद्दशकपालो विराजैवास्मिन् अन्नाद्यं दधाति, यदेकादशकपालः त्रिष्टुभैवास्मिन् इन्द्रियं दधाति, यद्द्वादशकपालो जगत्यैवास्मिन् पशून् दधाति। यस्मिन् जाते एतामिष्टिं निर्वपति, पूत एव तेजस्वी अन्नाद इन्द्रियावी पशुमान् भवति' इति अष्टाकपालादयः एकादशकपालपर्यन्ताः कपालविकल्पाः श्रूयन्ते। ते अष्टत्वादयः किं गुणविधयः, उतार्थवादाः इति विचारे पूर्वपक्षमाह। अग्न्यादयो गुणाः पूर्ववन्तः प्रापकशास्त्रवन्तः मन्त्रादिना प्राप्ताः। अतः तेषां अग्निहोत्रादिशब्दाः अविधानार्थाः विधानार्थाः न भवन्ति। प्रकृते तु समाम्नाये अष्टाकपालादिशब्दसमूहे तत्सामर्थ्यं गुणविधानसामर्थ्यं स्यात्। तस्मान्नार्थवादाः, किन्तु गुणविधयः।

अत्र **सुधा**– ये वैश्वदेवादिशब्दाः पूर्ववन्तः वाक्यान्तरेण गुणविशिष्टे कर्मणि पूर्वमुत्पन्ने तद्विरुद्धगुणान्तराभिधायिनः, ते स्ववाक्यस्थेन गुणेन निराकाङ्क्षे कर्मणि तद्विरुद्धगुणान्तराभिधानाशक्तेः अविधानार्थाः। अष्टाकपालादिशब्दानां तु समाम्नायत्वात् सहोच्चारणत्वात् एकवाक्यगतत्वात् उत्पत्त्युत्पन्नशिष्टत्वविशेषानवगमात् वैश्वदेवशब्दस्य पूर्वपक्षे सामर्थ्यं तदेषामस्ति, यस्तु उत्पत्तिशिष्टेन उत्पन्नशिष्टस्य बाधस्तत्रोक्तः, सोऽत्र नास्ति इति सूत्रार्थः।

गुणस्य तु विधानार्थेऽतद्गुणाः प्रयोगे स्युरनर्थका न हि तं प्रत्यर्थवत्ताऽस्ति। १८॥

पूर्वपक्षं तुशब्देन निरस्यन् सिद्धान्तमाह। गुणस्य अष्टत्वादेः विधानार्थे वाक्ये स्वीकृते सति अतद्गुणाः वैश्वानरयागस्य गुणा न भवन्ति अष्टत्वादयः। तस्मात् ते प्रयोगे वैश्वानरानुष्ठाने अनर्थकाः स्युः। हि यस्मात् तं पुरोडाशं प्रति यागं प्रति वा अर्थवत्ता सफलता नहि अस्ति। अर्थवादत्वे तु वैश्वानरयागस्य स्तुतिरुपपद्यते। तस्मात् अष्टाकपालादयः अर्थवादाः इति सिद्धान्तः।

तच्छेषो नोपपद्यते । १९ ॥

तत्राह पूर्वपक्षी । अष्टत्वादिः तच्छेषः तेषां अष्टत्वादीनां अविहितत्वात् शेषः स्तावको वाक्यशेषो नोपपद्यते इति चेत् ।

अविभागाद् विधानार्थे स्तुत्यर्थेनोपपद्येरन् । २० ॥

अष्टाकपालादिवाक्यानां द्वादशकपालवाक्यशेषत्वमाह सिद्धान्ती । विधानार्थे विधीयते इति विधानं कर्मणि ल्युट्, विधिविषयीभूते द्वादशकपाले स्तुत्यर्थेन स्तुतिरूपेण प्रयोजनेन अष्टाकपालादिवादाः उपपद्येरन् । अविभागात् विभागाभावात् द्वादशसु अष्टादीनामन्तर्भावात् । अतो द्वादशकपालस्य स्तुत्यर्थत्वेन अष्टत्वाद्यवयवस्तुतिः उपपद्यते । **सुधायां** तु 'तत्सामीप्याच्च शक्नुवन्ति अष्टादिशब्दाः तदेकदेशप्रतीतिं कर्तुम्' इति वार्तिकानुसारेण अविभागशब्दः सामीप्यवाची इत्युक्तम् ।

कारणं स्यादिति चेत् । २१ ॥

तत्राह पुनः पूर्वपक्षी । अष्टत्वादिकं ब्रह्मवर्चसादिफलस्य कारणं स्यात् । 'पूत एव तेजस्वी' इत्यादिना फलमुच्यते । 'गायत्र्यैवैनम्' इत्यादिस्तुतेः प्रात्यात्मिको विधिः । 'यदष्टाकपालः' इत्यादिभिः सार्थवादकैः प्रत्येकं विहितानां यथासंख्येन पूत एवेत्यादिभिः फलसंबन्धः क्रियते । तस्मात् विधयः । इति चेत् ।

आनर्थक्यादकारणं, कर्तुर्हि कारणानि, गुणार्थो हि विधीयते । २२ ॥

अत्र ब्रह्मवर्चसादिफलार्थत्वेन अष्टाकपालादीनां यागानां विधयः स्युः, न तु द्वादशकपालस्य अवयुत्य स्तुतिः इति 'कारणं स्यात्' इति सूत्रेण पूर्वपक्षिणा उक्ते सिद्धान्ती आह । वैश्वानरमित्यारभ्य पशुमान् भवति इत्यन्तमेकं वाक्यम् । अष्टाकपालादिवाक्योक्तान्येव फलानि 'यस्मिन् जाते एतामिष्टिं' इत्यादिना उपसंहृतानि । तस्मात् अष्टत्वादिकं पुत्रगतब्रह्मवर्चसादिफले अकारणं कारणत्वेन विधानानर्हम् । आनर्थक्यात् निष्फलत्वप्रसङ्गात् । कथम् ? कर्तुः पितुः हि यस्मात् तानि कारणानि पूतपुत्रवत्त्वरूपफलकारणानि भवन्ति । हि तस्मात् अष्टाकपालादिशब्दः न नामधेयम्, न कर्मणि गुणविधिः, नापि फलेषु गुणविधिः, किन्तु गुणार्थः गुणेन स्तुतिरूपेण अर्थः प्रयोजनं यस्य सः वैश्वानरयाग एव विधीयते । तस्मात् अष्टाकपालत्वादिकं अवयुत्यानुवादः अर्थवादः इति सिद्धान्तः । के.

पूर्ववन्तोऽविधानार्थास्तत्सामर्थ्यं समाम्नाये । १।४।१२।१७ ॥

'वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते, यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति, यन्नवकपालस्त्रिवृतैवास्मिंस्तेजो दधाति, यद्दशकपालो विराजैवास्मिन् अन्नाद्यं दधाति, यदेकादशकपालस्त्रिष्टुभैवास्मिन्निन्द्रियं दधाति, यद्द्वादशकपालो जगत्यैवास्मिन् पशून् दधाति । यस्मिन् जात एतामिष्टिं निर्वपति, पूत एव (स) तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवति' इति कपालविकल्पाः श्रूयन्ते । तत्र संदेहः किमष्टत्वादयो गुणविधयः, उतार्थवादा इति । अत्र **प्रभाकरेण** संगतिलोभात् इत्थमधिकरणमुपवर्णितम्– 'यदष्टाकपालो भवति' इत्यादीनां विहितस्मारकत्वाभावात् न मन्त्रत्वेनान्वयः, भावार्थसामानाधिकरण्याभावान्न नामधेयत्वेन, अष्टत्वादिगुणान्वययोग्यभावार्थासंनिधेः नापि गुणविधित्वेन । न च वैश्वानरयागे गुणविधानम्, तस्य द्वादशसंख्याऽवरुद्धत्वेन संख्यान्तरविधानासंभवात् । अष्टत्वादिना विधेयद्वादशसंख्यास्तुत्यसंभवात् नार्थवादत्वेन । इति सर्वथा विधित्वाभावात् अप्रामाण्यमेव 'यदष्टाकपालो भवति' इत्यादीनाम् । इति पूर्वः पक्षः । सिद्धान्तस्तु अर्थवादत्वेन यथाभाष्यमेवेति । **तदयुक्तम्**, वक्ष्यमाणपूर्वपक्षन्यायेन गुणविधित्वेनैवान्वयसंभवात् । इति यथावार्तिकमेव अधिकरणं प्रस्तूयते । गुणविधिप्रतियोगिकं नामधेयत्वं निरूप्य, प्रसङ्गेनेदानीं गुणविधित्वप्रतियोगिकं अर्थवादत्वं निरूप्यते । **अत्रायं पूर्वपक्षिणोऽभिसंधिः** । 'वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते' इत्यत्र द्रव्यदेवताविशिष्टकर्मविधानात् द्वादशकपालविधानं तावत् व्यवस्थितमेव । नापि तदनन्तरश्रुतानां अष्टाकपालादीनामेकादशकपालपर्यन्तानां अन्या गतिरस्ति । यतो न तावत् नामधेयत्वेन अस्य गतिः, द्वादशकपाले कर्मणि अष्टाकपालनाम्नः प्रवृत्तिनिमित्ताभावात् ।

नापि अर्थवादत्वेन, द्वादशकपालस्य अष्टाकपालत्वेन स्तुत्यसंभवात् । **ननु** द्वादशकपाले अष्टाकपालः अन्तर्गत एव, अतो नामधेयत्वमर्थवादत्वं वा भविष्यतीति । **मैवम्** । महासंख्यायामेकत्वातिरिक्तावान्तरसंख्याया अभावात् । अपेक्षाबुद्धिजन्या हि संख्या । नहि यावतः संख्येयानपेक्ष्य द्वादशसंख्योत्पद्यते, तावत एवापेक्ष्य अष्टसंख्याऽप्युत्पद्यते । (यतः ?) संख्यान्तरोपत्तौ न संख्यान्तरोत्पत्तिहेतुभूतबुद्ध्यन्तराभावात् संख्यास्वभावाच्च । नहि संख्या सत्तामात्रेण संख्येयमवच्छिनत्ति, किन्तु संख्याऽन्तरव्यवच्छेदेनैव, इति न द्वादशसंख्यायां अष्टत्वादिसंख्याऽन्तर्गतिः । किन्तु संख्याऽन्तरोत्पत्तियोग्यान्यधिष्ठानानि परं सन्ति । न चाष्टाकपालादिशब्देन अधिष्ठानानि अभिधीयन्ते, येन यथाकथञ्चिदपि नामधेयत्वमर्थवादत्वं वा भवेत् ।

अभ्युपेत्यवादेनाप्युच्यते । अस्तु वा महासंख्यासु अवान्तरसंख्या, तथापि 'अष्टसु कपालेषु संस्कृतः पुरोडाशोऽष्टाकपालः' इति संस्कृततद्धितोऽयम् । न च द्वादशकपालवाक्ये अष्टत्वस्य द्वादशसंख्यापूरकचतुष्ट्वनिरपेक्षस्य पुरोडाशसंस्कारार्थकपालविशेषणत्वमवगतम्, किन्तु चतुष्ट्वापेक्षस्यैव तत् । यदपि अष्टाकपालवाक्येऽपि अष्टत्वस्य चतुष्ट्वापेक्षस्यैवोपादानमभिमतम्, न च तत् संभवति, सापेक्षत्वेन समासतद्धितयोरुत्पत्त्यसंभवात् । अथ चतुष्ट्वनिरपेक्षस्यैव द्वादशकपालान्तर्गतस्याष्टत्वस्य पुरोडाशसंस्कारार्थकपालविशेषणत्वमुच्यते, तथा सति द्वादशकपालवाक्ये तथाभूतस्याष्टत्वस्य प्राप्तत्वान्न नामधेयत्वम्, नाप्यर्थवादत्वम्, किं तर्हि ? गुणविधित्वमेव । तदुक्तम् '**यद्यप्यर्थात्मनाऽस्त्येव महासंख्यास्ववान्तरा । अपरिच्छेदकत्वात्तु नासौ कर्मविशेषणम् ॥**' (वा. पृ. ३४९) इति । तथा '**पूर्वज्ञातार्थवाचित्वे नामधेयार्थवादते । अप्राप्तत्वादिहैते स्युर्वैश्वदेवविकल्पवत् ॥**' (वा. पृ. ३४९) इति । **न च** प्रकृतस्य वैश्वानरयागस्य उत्पत्तिशिष्टद्वादशत्वावरुद्धत्वात् कथं तत्राष्टत्वादिगुणविधानमिति **वाच्यम्** । यस्मादेकमिदं वाक्यमनेकसंख्याविशिष्टवैश्वानरयागविधायकम् । अतः सर्वेषामेवोत्पत्तिशिष्टत्वात् न बलाबले कश्चिद्विशेषः । एकवाक्यविहितत्वेऽपि संख्यास्वभावादेव च विकल्पः । यस्यैव तु द्वादशकपालस्य विहितत्वात् पुनर्विधानं न संभवति तस्यैवान्ते कीर्तनमनुवादार्थमेवेति । अतः पूर्ववन्तो ये विदितपूर्वमर्थमभिदधति ते अविधानार्थाः, अतः अष्टत्वादिसमाम्नाये तत्सामर्थ्यं विधानसामर्थ्यमेवेति ।

एवं प्राप्ते, अभिधीयते—

गुणस्य तु विधानार्थे तद्गुणाः प्रयोगे स्युरनर्थकाः, नहि तं प्रत्यर्थवत्ताऽस्ति ॥ १८ ॥

अयमभिप्रायः । भवेदेवं यदि उत्पत्तिशिष्टद्वादशत्वावरुद्धे वैश्वानरयागे अष्टत्वादयो विधातुं शक्येरन् । **न च** एकवाक्यत्ववशेन सर्वेषामेवोत्पत्तिशिष्टत्वात् न द्वादशत्वेन अवरोध इति **वाच्यम्** । गुणविधौ सति एकवाक्यत्वस्यैवाभावात् । 'अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्' (२।१।१४।४६) इति खलु एकवाक्यत्वलक्षणम् । न चैकार्थत्वम्, परस्परविरुद्धानां संख्यानामेकभावनाऽन्वयित्वासंभवात् । नापि विभज्यमानसाकाङ्क्षत्वम्, परस्परविरोधादेव अन्योन्याकाङ्क्षाया अभावात् । अतो न तावत् द्वादशकपालवैश्वानरयागे गुणविधानं संभवति । नापि विपरिणतवैश्वानरपदानुषङ्गेण 'अष्टाकपालो वैश्वानरो भवति' इति गुणविशिष्टयागान्तरविधानम्, विपरिणतानुषङ्गदोषादेव । अगत्यां हि विपरिणतानुषङ्गः क्रियते । अस्ति चार्थवादत्वेनैव अत्र गतिरिति वक्ष्यामः । तदुक्तम् '**वैश्वानरपदं नापि यागायात्रानुषज्यते । विभक्त्यन्तरयोगित्वान्न चर्तेऽस्मादनर्थकम् ॥**' (वा. पृ. ३५०) इति । **ननु** एवं तर्हि प्रकृतं वैश्वानरयागमाश्रित्य यथासंख्यं पूतत्वादिफले अष्टत्वादयो विधीयन्ताम्, 'गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति' इत्यस्य (इत्यादेः) अर्थवादत्वं भविष्यति । **मैवम्** । 'वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते' इत्युपक्रम्य अन्ते च 'यद् द्वादशकपालो भवति, यस्मिन् जात एतामिष्टिं निर्वपति' इत्युपक्रमोपसंहारयोः द्वादशकपालकीर्तनात् द्वादशकपालविधानपरमेकमिदं वाक्यमवगम्यते । तत्रापि यदि 'गोदोहनेन पशुकामस्य' इतिवदष्टाकपालादौ कामनोपबन्धेन फलसंबन्धः स्फुटतरमवगम्येत, तदा वाक्यभेदः स्वीक्रियेतापि,

किन्तु न चैवमस्ति । अतोऽत्र न गुणफलसंबन्धः, एकवाक्यताबलात् अर्थवादत्वमेवेति । **नच** द्वादशकपाले अष्टाकपालादेरभावस्योक्तत्वात् कथमर्थवादत्वमिति **वाच्यम्** । यतः स्तुतिर्भवन्ती न यथाभूतार्थकीर्तनेनैव भवति, सता असता वाऽर्थेन स्तुत्युपपत्तेः । तदत्रापि द्वादशकपालसंस्कृतपुरोडाशस्य महापरिमाणत्वात् अष्टाकपालादिसंस्कृतपुरोडाशसदृशो भागोऽस्ति इति सादृश्यनिबन्धनेयं स्तुतिः, इत्यर्थवादत्वेनैवोपपत्तेर्न गुणविधानं किन्तु अर्थवादत्वमेवेति । **प्रयोजनम्**, अष्टाकपालादीनां द्वादशकपालेन सह विकल्पेनानुष्ठानं (पूर्वपक्षे) सिद्धान्ते तु नित्यं द्वादशकपालेन एवेति । **सूत्रं तु** गुणस्य तु विधानार्थे अष्टाकपालादिवाक्यानां गुणविधिपरत्वे सति तद्गुणाः यागप्रयोगे अनर्थका भवेयुः । नहि तं यागप्रयोगं प्रति तेषां गुणानामर्थवत्ताऽस्ति तस्य द्वादशत्वावरुद्धत्वादित्यर्थः । **तौता.**

* **पूर्वसस्ये** क्षीणे दीर्घशूकाः (यवाः) प्रियङ्गवश्च भवन्ति । **भा.** १।३।४।९.

* **पूर्वाह्णस्यैव** प्रायेण वैदिकव्यापारकालत्वम् । **सु.** पृ. १३६३.

पूर्वाह्णच्छायान्यायः । यथा दिनपूर्वार्धच्छाया प्रथमं महती पश्चात् क्षीणा, तथा खलस्य मैत्री ज्ञातव्येति भावः । **साहस्री.** ३३१.

* **पूर्वाह्णमध्यंदिनादयः** समस्तप्रयोगकालाः । **वा.** १।३।३।६ पृ. १९७.

* '**पूर्वेद्युरमावास्यायां** वेदिं करोति ' इति वेदिरपकृष्यमाणा हविरभिवासनं नापकर्षति । **टुप्.** ५।१।१६।२९. * ' पूर्वेद्युरमावास्यायां वेदिं करोति ' इयं भावविषया आर्थिकी व्यवस्था । **बाल.** पृ. १९.

* ' **पूषा** प्रपिष्टभागः ' अत्र द्रव्यदेवतयोर्लाभात् यागः कल्प्यते । **वि.** ३।३।२०. * ' पूषा वां विभजतु ', ' भगो वां विभजतु ', ' अर्यमा वां विभजतु ' एषां मन्त्राणां पुरोडाशविभागे विकल्पः न तु समुच्चयः । १२।३।१३।२९.

* **पूषाधिकरणम्** । पौष्णपेषणाधिकरणम् । ३।३।१३।३४.

* **पूषाधिकरणसिद्धान्ताक्षेपपरिहारः** । वाक्यपादान्ये (३।३।१५।३९–४६) ' पूषा प्रपिष्टभागः ' इत्यत्र अनारभ्याधीते सिद्धान्तितम् । भज्यते इति भागः इति व्युत्पत्त्या भक्ष्यं स्वीकार्यं वा भागशब्दार्थः । पूष्णश्च देवताऽधिकरणन्यायेन (९।१।४।६–१०) देवताविग्रहादिपञ्चकनिरासेन भक्षयितृत्वस्वीकर्तृत्वासंभवात् तदुद्देशेन त्याज्यं भागशब्देन लक्ष्यते । तदुक्तम् ' **देवता निष्फला नैव पेषणस्य प्रयोजिका । उपादानं च यागस्य भागशब्देन विद्यते ॥ मुख्यार्थासंभवाद्यागलिलक्षयिषयाऽत्र हि । श्रूयते भागशब्दोऽयं नानुपादानमस्त्यतः ॥** ' (शा. ३।३।१५) इति । तत्र चोदयन्ति, केवलपूषोद्देशेन प्रपिष्टता न विधेया जुह्वादिवत् पूष्णः क्रत्वव्यभिचाराभावेन क्रत्वनुपस्थानेन आनर्थक्यापातात् । न च यागमात्रोद्देशेन प्रपिष्टताविधिः, नित्यवत् पूष्णोऽनुवादस्य प्राप्त्यभावेनायोगात् । अतोऽवश्यं यागविशिष्टपूषोद्देशेन पूषविशिष्टयागोद्देशेन वा प्रपिष्टता विधेया, तत्र च विशिष्टानुवाददोषः । तथा न परं स एव किन्तु ' त्र्यङ्गैः स्विष्टकृतं यजति ' ' वषट्कर्तुः प्रथमभक्षः ' इत्यादाविव एकस्मिन् समासपदे उत्तरपदार्थोद्देशात् पूर्वपदार्थविधेश्च एकप्रसरत्वाभावात् समासविघातोऽपि स्यात् । न च ' यदग्नये च प्रजापतये च सायं जुहोति ' इत्यादौ ' क्षौमे वसानावग्निमादधीयाताम् ' इत्यत्र च यथा सायमनुवादेन वसनानुवादेन च देवतायाः क्षौमस्य च विधौ प्रकरणप्राप्तयोः जुहोत्याधानयोरनुवादात् विशिष्टानुवाददोषपरिहारः, एवं पूषवाक्ये संभवति अप्रकरणाधीतत्वात् । तस्मादिह विशिष्टानुवादकृतवाक्यभेदस्य कः परिहार इति । **अत्र ब्रूमः** । यथा ' लोहितोष्णीषा ऋत्विजः प्रचरन्ति ' इति उष्णीषगतमेव लौहित्यं ऋत्विज उद्दिश्य विधीयते, अन्यथा गैरिकादिना साक्षादेव ऋत्विजां लौहित्यकरणं प्रसज्येत । समासोपात्तविशिष्टार्थविधौ वाक्यभेदश्च नास्ति, लौहित्यमात्रपरश्च विधिर्भवति, ' उष्णीषिणः प्रचरन्ति ' इति प्रकृतितः उष्णीषप्राप्तेः । यथा वा ' एकं साम तृचे क्रियते स्तोत्रीयम् ' इत्यत्रापि स्तोत्रोद्देशेन ऋग्गतमेव त्रित्वं विधीयते, अन्यथा स्तोत्रे एव साक्षात्त्रित्वविध्यापत्तेः त्रीणि स्तोत्राणि क्रियेरन् । यद्यपि च स्तोत्राणामुत्पत्तौ एकत्वं निरधारि, तथापि आवृत्त्या इयं त्रित्वसंख्या संपाद्येत, स्तोत्रावृत्तिश्च न ऋगावृत्तिं विना उपपद्यते इति ऋगावृत्तिरेव स्यात् न तिस्र ऋचः । तस्मात् यादृशी ऋग्गता त्रित्वसंख्या समासात् प्रतीयते, तादृश्येव विधीयते, संख्यामात्रपरश्च विधिर्भवति । एवं पूषवाक्येऽपि भागः त्याज्यं हविरिति यावत् । ततश्च समासावगतं हविर्गतमेव पेषणं पूषोद्देशेन विधीयते पेषणमात्रपरश्च विधिर्भवति । न च हविर्गतं पेषणं अदेवताभूते पूष्णि हविरभावात् शक्यं कर्तुं इति पूष्णो देवतात्वाक्षेपेण देवताभूते एव पूष्णि पेषणं विधीयते इति न विशिष्टानुवाददोषः, न च समासवैरूप्यदोषः इति सर्वं सुस्थम् । इति पूषाधिकरणसिद्धान्ताक्षेपपरिहारः । **बाल.** पृ. १०१–१०२.

पूषानुमन्त्रणमन्त्रन्यायः ॥

संस्कारकत्वादचोदिते न स्यात् । ३।२।१।२ ॥

भाष्यम्–– अथ यदुक्तं पूषानुमन्त्रणादीनामुत्कर्षो न भविष्यतीति, युक्तस्तेषामुत्कर्षः । संस्कारको हि मन्त्रः । सः असति संस्कार्ये अनर्थकः इति यत्रार्थवान् तत्र नाययिष्यते । न च कश्चिद्दोषो भविष्यति ।

वा–– अचोदिते पूषादौ दर्शपूर्णमासयोः यन्मन्त्रा न विनियुज्यन्ते, युक्तमेव तत् । संस्कारस्य संस्कार्यपरत्वात् लिङ्गेन च प्रकरणबाधात् । कथं पुनः एषामुत्कृष्टानां वैदिकैः कर्मभिर्योगः, कथं वा क्रत्वङ्गसामान्यविनियोगमन्तरेण लिङ्गं देवतायामेव केवलायां विनियोजकमिति, तदुच्यते– ' **यागानुमन्त्रणानीति समाख्या क्रतुयोजिनी । तस्माच्छक्त्यनुरोधेन प्राप्तिस्तद्देवते क्रतौ ॥** ' यागानुमन्त्रणसमाख्या हि एषां यागसंबन्धादृते अनुपपद्यमाना यागसामान्याङ्गत्वं गमयति । ' **अतो विशेषचिन्तायामशक्येष्वनियोजनात् । शक्यार्थविनियोगाय लिङ्गव्यापारसंभवः ॥** '

कुतूहलम्–– ' पूष्णोऽहं देवयज्यया प्र प्रजया च पशुभिश्च जनिषीय ' इति मन्त्रो हि पूष्णो देवतायाः प्रकाशनलक्षणसंस्कारजनकः । स च यत्र संस्कार्यस्तत्र गच्छति । दर्शपूर्णमासयोस्तु न पूषा देवतात्वेन चोदितः । ......अतः पूषानुमन्त्रणमन्त्रस्य विकृतौ उत्कर्षो युक्तः ।

* उपवीतं सामिधेन्यङ्गं तदवान्तरप्रकरणात् (तच्च संदंशेन ज्ञायते) इति प्राप्ते, निविद्भिर्व्यवधानात् नोपवीतस्य सामिधेन्यङ्गता । न च **पूषानुमन्त्रणमन्त्रन्यायः** (३।२।१।२), यत्र हि उत्तरकालं बहूनि वाचनिकाङ्गानि, तत्र एकस्य पूषानुमन्त्रणमन्त्रादेः परप्रकरणस्थत्वकल्पना । यत्र तु विच्छेदकानि बहूनि उत्तरकालं च वाचनिकाङ्गं स्वल्पम्, तत्र वाचनिकाङ्गस्य एव अनारभ्याधीतन्यायेन अङ्गत्वोपपत्तेः न प्रकरणानुवृत्तिकल्पना । **भाट्ट.**३।१।११.

* **पूषाद्यनुमन्त्रणानि** दर्शपूर्णमासप्रकरणे असंबद्धान्यपि न पुरस्तात् प्रकरणं विच्छिन्दन्ति । **वा.** ३।१।११।२१ पृ. ७३३, * पूषाद्यनुमन्त्रणानि लिङ्गप्रकरणविरोधे उदाहर्तव्यानि । यावत् प्रकरणेनैकवाक्यत्वं कल्प्यते, तावत् लिङ्गेन श्रुतिः । तथा यावदितरत्र प्रकृताग्न्यादिप्रकाशनसामर्थ्यम्, तावदिह विनियोगः इति बाधः । ३।३।७।१४ पृ. ८३६, * **पूषाद्यनुमन्त्रणेषु** अपकर्षः एवमादीनां (देवतादिवाचिशब्दानाम्) । ३।२।६।१७.

* यत्तु यज्ञावचरग्रहणं तत् प्रकृतयज्ञाभावात् अनारभ्यवादरूपेण सर्वत्र विदधाति । तच्चैतत् **पूषाद्यनुमन्त्रणन्यायेनैव** सेत्स्यति इति नार्थोऽधिकरणेन । **वा.** ३।१।१२।२२ पृ. ७३८.

* **पूषादिपदानां** गुणत्वाभावात्, तद्व्यतिरेकेण इतरपदानां प्रकृतोपयोग्यर्थप्रतिपादकत्वाभावाच्च विकृतौ उत्कर्षः । **भाट्ट.** ९।३।५.

* **पूषशब्दः** ' अदन्तको हि सः ' इत्यादिवाक्यशेषेण वैदिकप्रसिद्ध्या चार्थविशेषे रूढः, न तु पुष्णाति इति व्युत्पत्त्या अग्न्याद्यभिधायी । **मीन्या.**

* ' **पृणीयादिन्नाधमानाय** तव्यान् ' । ऋसं. १०।११७।५ । भोज्यान् पदार्थान् याचमानाय दद्यात् इति विधिः । **सु.** पृ. ६७३.

* ' **पृथक्** चितिं समारुह्य न विप्रा गन्तुमर्हति ' इत्यनेन ' मृतानुगमनं नास्ति ब्राह्मण्या ब्रह्मशासनात् ' इति सामान्यप्रतिषेधस्य उपसंहारः । **बाल.** पृ. ३४.

* ' पृथक्त्वेनामिधानयोर्निवेशः ' ४।४।११। १४ । अत्रत्यन्यायस्वरूपं तु ' तद्(समुदाय)द्वित्वानुसारिणौ दर्शपूर्णमासशब्दौ तद्विषयौ भवतः ' इति । वा. २।२।३।३ पृ.४८१ । सुधा– पौर्णमास्यमावास्याशब्दोक्तसमुदायद्वित्वानुसारित्वाद्दर्शपूर्णमासशब्दयोः समुदायविषयत्वमिति । पृ. ७३२. * ' पृथक्त्वेनाभिधानयोर्निवेशः०' । यागविशेषाणां फलवत्त्वात् फलवत्त्वस्यैव प्राधान्यापरपर्यायमुख्यलक्षणत्वात् संनिहितस्य फलसंयुक्तस्य अङ्गत्वकारणभागित्वात् अश्रुतान्यफलान्वयकल्पने च गौरवापत्तेः आघारादीनां अङ्गतैव युक्ता इति सूत्रार्थः । सु. पृ. ७२३.

* पृथक्त्वनिमित्ता हि ' अयाज्या वै निगदा ऋचैव यजन्तीति ' व्यपदेशा भवन्ति । भा. २।१।१३। ४५.

ऋ पृथक्त्वनिवेशात् संख्यया कर्मभेदः स्यात्॥ २।२।७।२१॥

अस्ति वाजपेयः ' वाजपेयेन स्वाराज्यकामो यजेत ' इति । तत्र प्राजापत्याः पशवः ' सप्तदश प्राजापत्यान् पशूनालभते, सप्तदशो वै प्रजापतिः, प्रजापतेराप्त्यै, श्यामास्तूपरा एकरूपा भवन्ति, एवमेव हि प्रजापतिः समृद्ध्यै ' इति । तत्र संदिह्यते किं सप्तदशैतानि कर्माणि, अथवा सप्तदशपशुकमेकमेव कर्म इति । सपरिकरमभ्यासप्रमाणं प्रतिपाद्य इदानीं संख्यानिबन्धनः कर्मभेदो निरूप्यते । अत्रायं पूर्वपक्षिणोऽभिसंधिः–– प्राजापत्यानित्यत्र द्वेधा विग्रहवाक्यं प्रतिभाति । प्राजापत्यश्च प्राजापत्यश्चेति तद्धितान्तानामयमेकशेषः । अथ पशुश्च पशुश्च पशुश्च पशवः, प्रजापतिर्देवता एषां ताः प्राजापत्या इति कृतैकशेषाणां प्रजापतिदेवतासंबन्धः । तदुक्तम् **' किं न्वयं तद्धितान्तानामेकशेषः कृतो भवेत् । किं वा कृतैकशेषाणां पश्चात्तद्धितसंगतिः ॥ '** इति । (वा. २।२।७।२१ पृ. ५२३) । तदत्र कृतैकशेषाणामेव तद्धितसंगतिरिति युक्तम् । येन हि तद्धितान्तस्यैकशेषः क्रियते, तेन प्रजापतिपशुरूपयोः प्रकृतिप्रत्ययार्थयोर्द्वयोरेव करणीयः, न च तत्र प्रमाणमस्ति । बहुवचनं हि प्रमाणमेकशेषे । तच्च विशेष्यभूतप्रत्ययार्थगतमेव प्रत्यक्षमुपलभ्यते, न तु विशेषणीभूतप्रकृत्यर्थगतम् । तेन प्रत्ययार्थभूतानां पशूनामेकशेषः प्रतीयते इति सप्तदशानां पशूनां एकप्रजापतिदेवतासंबन्धात् सप्तदशपशुद्रव्यकमेकं कर्मेति । तदुक्तम्– **' प्रत्ययार्थबहुत्वं हि प्रत्यक्षमुपलभ्यते । तत्कृतं चैकशेषत्वमिति न प्रकृतौ भवेत् ॥ '** इति । (वा. २।२।७।२१ पृ. ५२३) । एवं च सति कर्मैकत्वात् कल्पनालाघवं भवति । ननु एकयागपरत्वे अतिदेशात् एकदैव एकादशावदानगणः प्राप्यते । तस्य च सप्तदशसु पशुषु यदि एकस्य अवदानगणस्य संबन्धः, तदा षट्सु न स्यात् । अथ मिलितस्य, तदा षोडशसु पशुषु न स्यादिति कथमेककर्मत्वम् । मैवम् । एवं हि मन्यते, नायं साक्षात् यागधर्मः, किन्तु यागसाधनभूतपशुधर्मोऽयं पशुद्वारेण यागोपकारकः । तदत्र यागेनापि स्वसाधनीभूतपशुद्वारेण आकाङ्क्ष्यमाणः प्रतिपशु भेदेनैव अवदानगणः संबध्यते इति सप्तदशपशुद्रव्यकः एक एव याग इति । **एवं प्राप्ते, अभिधीयते** । भवेदेवं यदि कृतैकशेषाणां तद्धितसंबन्धो भवेत् । किं तर्हि ? तद्धितान्तानामेवायमेकशेषः । न च बहुवचनसंबन्धात् प्रत्ययार्थस्य पशोरेव एकशेषो न प्रकृत्यर्थस्य प्रजापतेः, बहुवचनसंबन्धाभावादिति वाच्यम् । यतो बहुवचनसंबन्धयोग्यस्य हि तदभावेन एकार्थपरत्वाभावं गमयति । न चोपसर्जनभूतायाः प्रकृतेः बहुवचनसंबन्धयोग्यता समस्ति । तेनात्र बहुवचनसंबन्धाभावस्य अनिर्णायकत्वात् अयमत्र संदेहः किं कृत्स्नस्यैव प्राजापत्यशब्दस्यायमेकशेषः, अथवा प्रत्ययार्थभूतपशुशब्दस्य इति । तत्र वाक्यशेषगतप्रकृतिशब्दवशादेव निर्णयो भवति । प्रकृतौ हि एकपशुगतस्य एकादशावदानगणस्य एकयागसाधनत्वमेवावगतम् । तदत्र प्रत्येकं सप्तदशपशुगतस्य एकादशावदानगणस्य एकयागसाधनत्वे सति न संभवतीति प्रतिपशु यागभेदोऽवगम्यते । स च तद्धितान्तानामेकशेषपक्षे भवतीति तद्धितान्तानामेकशेषः इति निर्णीयते । यथोक्तम्– पशुधर्मोऽयमेकादशावदानगणो न यागधर्मः । स च यागैकत्वे सति अतिदेशात् प्रतिपशु संभन्स्यते । तदयुक्तम्, तत्र एकादशावदानगणशब्दे नैकादशावद्यतिक्रियागणोऽभिप्रेतः । किं तर्हि ? अवदीयते इति व्युत्पत्त्या एकादशावदेयप्रदेयद्रव्यगणः । न चासौ पशुधर्मः, पशुसंस्कारत्वाभावात्, किन्तु यागसाधनत्वात् यागधर्मः । अतश्च एकयागत्वे सति एकपशुसंबद्धैकादशावदेयगणसंबद्धः, न तु एकपशुसंबद्धः । तथा सति एकपशुगतस्य एकादशावदानगणस्य एकयागसाधनत्वप्रतिपादकातिदेशबाधप्रसङ्गात् । तेन सप्तदशपशूनां यागसाधनत्वसंपत्तये सप्तदशैव एते यागा इति सिद्धम् ।

एतत्तु भाष्यकारेण द्रव्यगताऽपि संख्या कर्मभेदिका इति प्रतिपादयितुमुक्तम् । कर्मगतसंख्या सकृत् श्रुतात् आख्यातपदात् एकभावनाविधानात् कृतार्था, न भावनाभेदमापादयतीति भावनाभेदे प्रमाणाभावात् एकैव भावना विधीयते । **ननु** होमभेदादेव भावनाभेदो भविष्यति । होमभेदश्च ' तिस्र आहुतीः ' इति पृथङ्निवेशित्वसंख्यासंबन्धादेव प्रतीयते । तत्कथं भावनैकत्वमिति ? **मैवम्**, प्रथमं तावत् स्वपदे एकैव होमभावना प्रतीयते । पश्चात्तु पदान्तरसंबन्धावगम्यमानः संख्याभेदः प्रथमावगतैकत्वसंख्याविरोधेन ' एकादश प्रयाजान् यजति ' इतिवत् अभ्यासेनैव उपपन्नत्वान्न भावनास्वरूपभेदमापादयितुमलमित्येकैव भावनेति । **एवं प्राप्ते, अभिधीयते** । भवेदेवं यदि उत्पत्तिगतेयं संख्या न भवेत् । तथाहि, ' तिस्र आहुतीर्जुहोति ' इत्येतेन वाक्येन त्रित्वविशिष्टो होमो विधीयते । न तु विहिते होमे प्रत्ययात् संख्यावत् वाक्यान्तरेण अत्र संख्याविधानम् । याऽपि जुहोतीतिपदात् एकत्वसंख्या प्रतीयते, साऽपि न होमस्य, अपि तर्हि कर्तुरिति कर्तृसमानाधिकरणे स्थास्यति । तेन उत्पत्तिशिष्टत्रित्वसंबन्धास्त्रयो होमाः । तत्र तेषां भेदात् तदनुबन्धास्तिस्रो भावना विधीयन्ते इति सिद्धम् ।

प्रयोजनम्— पूर्वपक्षे सप्तदशपशूनामेकयागसाधनत्वे असक्तत्वात् साधनाभावस्य पदार्थानुष्ठानसमापने सप्तदशसु पशुषु धर्मानुष्ठानम् । तद्वत् संस्कृते एकस्मिन् पशौ विनष्टे व्यासङ्गिसाधनत्वस्यापि नष्टत्वात् पश्वन्तरमुपादाय प्रथमतः पशुधर्मः कर्तव्यः । सिद्धान्ते तु यागभेदे प्रतिपशु साधनताभेदात् एकस्मिन् पशौ नष्टे तन्मात्रस्यैव धर्मावृत्तिर्नेतरेषामिति ।

सूत्रं तु–– पृथक्त्वेन सह संख्यया एकार्थनिवेशात् उत्पत्तिशिष्टया संख्यया कर्मभेदो भवेदित्यर्थः । **तौता.**

ऋ पृथक्त्वनिवेशात् संख्यया कर्मभेदः स्यात् । २।२।७।२१॥

शब्दान्तरेण अभ्यासेन च कर्मभेद उक्तः । इदानीं संख्यया कर्मभेद उच्यते । ' सप्तदश प्राजापत्यान् पशूनालभते ' इति वाजपेये श्रुतम् । तत्र किं सप्तदश एतानि कर्माणि, उत सप्तदशगुणकमेतत् कर्मेति विचारे सिद्धान्तमाह । संख्यया कर्मणां भेदः स्यात् । संख्यया सह पृथक्त्वस्य निवेशात्पृथक्त्वैकार्थनिवेशात् । यत्र उत्पत्तिवाक्ये ' तिस्र आहुतीर्जुहोति ' इत्यादौ कर्मसमानाधिकरणा, देवताविशिष्टद्रव्यसमानाधिकरणा ' सप्तदश प्राजापत्यान् पशून् ' इत्यादौ वा संख्या श्रूयते, तत्र ' स्वाश्रयसमवेतत्वसंबन्धेन स्वाश्रयावधिकं पृथक्त्वम् ' इति नियमात् कर्मणो भेदः स्यात् । तस्मात् सप्तदश यागा एते इति सिद्धान्तः । **के.**

* **पृथक्त्वनिवेशिनी** हि संख्या असति पृथक्त्वे अभ्यासेन कल्प्येत । यावति असंभवो भेदस्य तावत्येव अभ्यस्येत । भा. ५।३।१।२.

* ' **पृथक्त्वनिवेशित्वात्** संख्यया कर्मभेदः स्यात् ' इति वक्ष्यमाणन्यायेन संख्यया कर्मभेदः निश्चितः । **कु.** २।२।२।२ पृ. १५९. * यदि ' पृष्ठैः स्तुवते ' इत्युत्पत्तिः स्यात् तत उत्पत्तिगतया बहुत्वसंख्यया बहूनि पृष्ठानि स्युः । शा. ९।२।१५ । ' **पृथक्त्वनिवेशित्वात्** ' इति न्यायेन इति भावः । **सोम.** ९।२।१५.

* ' पृथिव्यै स्वाहा ' इति पृथिव्यै इत्यनेन देवतोच्यते । तदर्थं ' वषट्कारेण वा स्वाहाकारेण वा देवेभ्योऽन्नं प्रदीयते' इतीदं आम्नानम् । तत्र स्वाहाकारो नियम्यते वषट्कारनिवृत्त्यर्थम् । **टुप्.** १०।८।१०।२०. * ' न पृथिव्यामग्निश्चेतव्यः ' इति पृथिवीनिषेधः हिरण्यनिधानस्तुत्यर्थः, न प्रतिषेधमात्रफलः । **वा.** ११।२।१।१८.

पृथिव्योषधिन्यायः । यथा पृथिव्यामोषधयः संभवन्तीति, तथा प्रकृतेऽपि । **साहस्री.** ७६८.

* यदेतत् मृदारब्धं द्रव्यान्तरं **पृथिवीगोलकं** नाम, (सैषा महाभूमिः) विश्वजिति सर्वस्वदाने न देया । **भा.** ६।७।२।३, * क्षेत्राणामीशितारो मनुष्या दृश्यन्ते, न कृत्स्नस्य **पृथिवीगोलकस्य** । ६।७।२।३.

* **पृथिवीगोलकत्रैलोक्यभ्रमणादिना** वा पुराणोक्तेन केनापि गुणवादेन भूमिष्ठानामेव सतां दृष्टिवशात् यथैव वयमुपरि देवान् पश्यामः एवमधोदेशस्य उपरिवर्तनात् अयमपि लोको देवैरुपरि दृश्यते इति ('उत्ताना वै देवगवा वहन्ति ' इति) उत्तानवहनदृष्टिः । **वा.** १।३।९।३० पृ. २९३.

* यत्तु **पृथिवीविभागकथनं** इतिहासपुराणयोः, तत् धर्माधर्मसाधनफलोपभोगप्रदेशविवेकाय, किञ्चिद्दर्शनपूर्वकं किञ्चिद्वेदमूलम् । **वा.** १।३।१।२ पृ. १६६.

पृथुपाजवत्यौ धाय्ये, अनुपदावाज्यभागौ इत्यनारभ्यवादाः विकृतौ उत्कर्षणीयाः ॥

' पृथुपाजवत्यौ धाय्ये भवतः, अनुपदावाज्यभागौ ' इत्यादयः अनारभ्यवादाः प्रकृतौ निविशेरन् । **इति प्राप्ते,** पञ्चदशसंख्याऽक्षरसंख्याऽऽदिविरोधात् वार्त्रघ्नी वृधन्वत्यवरोधाच्च विकृतौ उत्कृष्येरन् । **संकर्ष.** ४।४।१.

पृथुश्लक्ष्णे वाऽनपूपत्वात् । १०।१।१७।५८॥

' उरु प्रथा उरु प्रथस्वेति पुरोडाशं प्रथयति ' इति पृथुत्वं प्रथनम्, ' सं ते तन्वा तनूः सृज्यताम्, इति त्रिः परिमार्ष्टि ' इति श्लक्ष्णत्वं च पुरोडाशे क्रियते सौर्ये चरौ तु ते पृथुश्लक्ष्णे न कर्तव्ये । अनपूपत्वात् चरोः अपूपलाभावात् । इति सिद्धान्तः । **के.**

* **पृश्निः** अल्पतनुः, ' मारुतीं पृश्निमालभते ' इत्यत्र । **वि.** ४।४।१.

पृश्निप्राणग्रहाः अपि ग्रहा एव ॥

वेदे तत्र व्यवह्रियमाणाः प्राणग्रहाः पृश्निग्रहाश्च नव ग्रहा भवेयुः । प्राणलिङ्गकैर्मन्त्रैर्गृह्यमाणानां इष्टकानां पञ्चशारदीये उपादीयमानानां सप्तदशानां उक्ष्णां च पृश्निवर्णवत्त्वेन तथा व्यपदेशोपपत्तेः । **इति प्राप्ते,** ग्रहपदसामानाधिकरण्येन रूढ्या योगापहारात् तेऽपि ग्रहविशेषा एव । **संकर्ष.** ३।३।१७.

पृश्निप्राणग्रहाणां अनारभ्याधीतानामपि द्वादशाहे प्रायणीयोदयनीययोः दशमेऽहनि च निवेशः ॥

अनारभ्याधीतानां पृश्निप्राणग्रहाणामंश्वदाभ्यादीनामिव प्रकृतौ निवेशे **प्राप्ते,** ' प्रायणीयोदयनीययोः दशमेऽहनि च गृह्यन्ते ' इति वचनात् मानैः ' पृश्निप्राणग्रहान् व्यतिषजति ' इति तत्प्रकरणे पाठाच्च द्वादशोपसत्त्वस्येव ग्रहाणामुत्कर्ष एवेति । **संकर्ष.** ३।३।२०.

पृश्निप्राणग्रहमन्त्राः न यागार्थाः किन्तु सोममानार्थाः ॥

द्वादशाहे ' पृश्निप्राणग्रहान् व्यतिषजति ' इति श्रुतम् । तत्र पृश्निग्रहाणां प्राणग्रहाणां च प्रदानकाले सोमरसग्रहणकाले वा ' वायुरसि ' इत्यादिपृश्निमन्त्रदशकस्य ' अयं पुरो भुवः ' इत्यादिप्राणदशकस्य परस्परसांकर्येण प्रयोगः । **इति प्राप्ते,** जुहोतेरश्रवणाद्देवतानां चाभावेन नैते यागाः । ग्रहशब्दप्रयोगस्तु ' उभावाज्यग्रहान् जपतः ' इत्यादाविव तन्मन्त्रेषु **गौणः** । व्यतिषङ्गोऽपि ' मानैर्व्यतिषजति ' इति वचनान्तरात् अभिषवार्थं अंशुग्रहणरूपे माने क्रयकाले इव ' इन्द्राय त्वा ' इत्यादिभिः प्राकृतैः पञ्चभिर्मन्त्रैः सह वैकृतानां विंशतेः सांकर्यम्, न पुनः प्रदाने एव सांकर्यमित्यत्र मानमस्ति । अत एव व्यतिषङ्गविशदीकरणं कल्पसूत्रेषु ' एकः प्राकृतप्रथममन्त्रः दश पृश्नयः प्रथमे माने । द्वितीयः प्राकृत एकः, दश प्राणग्रहा इति द्वितीयम् । ततः तृतीयपञ्चमयोः पृश्नय एव, चतुर्थे प्राणा एवेत्याकारकः एकः ' । अन्योऽपि प्रकारस्तत्रैव द्रष्टव्यः । **संकर्ष.** ३।३।१९.

* **पृषत्त्वं** नाम चित्रता । सा च आज्यगतो गुणः । स च दधिमेलनेन निष्पद्यते । ' पृषदाज्येनानुयाजान् यजति ' इत्यत्र (' पृषदाज्यं सदध्याज्ये ' इत्यमरः) । **वि.** १०।४।२७.

* **पृषच्छन्दः** चित्रस्य वाचकः । तद्यथा पृषद्रज्जुः, पृषन्मणिः, पृषन्मृगः इति । **भा.** १०।४।२५।५९.

* ' **पृषदाज्येन** अनुयाजान् यजति ' इति पृषत्ता गुणो विधीयमानः प्रत्यनुयाजं भिद्यते । **भा.** १०।६। १७।६४, * पृषदाज्येनापि इज्यमाना अनुयाजाः आज्येनेष्टा भवन्ति । नहि पृषत्त्वं आज्यत्वं नाशयति । १२।१।१।४, * पृषदाज्येन चातुर्मास्येषु अनुयाजान् यजति । १०।४।२५।५०, * पृषदाज्येन वनस्पतिं यजति पशौ । १०।४।१६।३२, * ' **पृषदाज्ये** समुच्चयात् ग्रहणस्य गुणार्थत्वम् । ' पृषत्तासंपादनार्थं दधि । आज्येन च समुच्चयः । १०।७।१९।६९.

पृषदाज्याधिकरणम् । चातुर्मास्येषु अनुयाजीयदेवताप्रकाशनार्थाज्यपनिगमेषु आज्यपशब्दस्यैव प्रयोगः न पृषदाज्यपशब्दस्य ॥

उभयपानात् पृषदाज्ये दध्नः स्यादुपलक्षणं, निगमेषु पातव्यस्योपलक्षणात् । १०।४।२५।५१ ॥

भाष्यम्— सन्ति चातुर्मास्यानि, ' चातुर्मास्यैः स्वर्गकामो यजेत ' इति । तत्रानुयाजान् प्रकृत्य समामनन्ति ' पृषदाज्येनानुयाजान् यजति ' इति । अस्ति तु प्रकृतावावाहनम् ' देवानाज्यपानावह ' इति । तदिह चोदकेन प्राप्तम् । तत्र संशयः, किमविकारेणाऽऽवाहनं कर्तव्यमुत ऊहेनेति । यदा ऊहेन, तदा किं आज्यपान् दधिपानिति कर्तव्यमुत दधिपानिति, अथवा पृषदाज्यपानिति । किं प्राप्तम् ? दध्नोऽप्युपलक्षणं स्यादाज्यस्यापि । कस्मात् ? उभयपानात् । उभयं हि तत् देवतामुद्दिश्य त्यज्यते । यच्च त्यज्यते, तत् पीयते इति मन्त्रेणोक्तम् । यच्च पातव्यं तदुपलक्षितं प्रकृतौ आज्यपानिति । इह आज्यस्यार्थे दधिसर्पिषी श्रूयेते ' अथ पृषदाज्यं गृह्णाति, द्वयं वा इदं सर्पिश्चैव दधि च, द्वन्द्वं वै मिथुनं प्रजननम्, मिथुनमेवैतत्प्रजननं क्रियते ' इति । तुल्यं दधि आज्येनोच्चार्यते । तस्मादुभयमप्युपलक्षयितव्यम्, दधि च आज्यं चेति ।

न वा, परार्थत्वाद् यज्ञपतिवत् । ५२ ॥

भाष्यम्— न वैतदेवं दध्युपलक्षयितव्यमिति । कुतः ? परार्थत्वात् । परार्थं हि पातव्यं द्रव्यं पातॄणामुपलक्षणम् । तत्र आज्येन चेदुपलक्ष्यते, कृतोऽर्थ इति न पुनर्दध्नोपलक्षयितव्यम् । यज्ञपतिवत् । यथा ' य इमं यज्ञमवान् ये च यज्ञपतिं वर्धान् ' इति । यज्ञपतिर्मनुष्याणां होतॄणां प्रशंसार्थः, न स्वार्थं कीर्त्यते इत्यविकारेण प्रयुज्यते । न सर्वान् यजमानान् प्रति आदरः । एवमिहापि पातव्यं पातुर्लक्षणार्थं प्रयुज्यते, न स्वार्थम् । तत्रैकेनापि येनकेनचिल्लक्षिताः पातार इति कृत्वा, न द्वितीयः प्रयोक्तव्य इति ।

स्याद् वाऽऽवाहनस्य तादर्थ्यात् । ५३ ॥

भाष्यम्— स्याद्दध्न उपलक्षणम् । न यज्ञपतिवत् स्यात् । यज्ञपतिशब्दो हि न स्वार्थमुच्चार्यते, इडास्तुत्यर्थेन स उच्यते । आवाहनं पुनः स्मरणार्थम् । तत्र पाताऽपि स्मर्तव्यः, पेयमपि । तस्माच्चोदकानुग्रहाय पेयान्तरमुपलक्षयितव्यमिति ।

न वा, संस्कारशब्दत्वात् । ५४ ॥

भाष्यम्— न वा दध्युपलक्षयितव्यम् । संस्कारशब्दोऽत्र विद्यते आज्यस्य, ' पृषदाज्येनानुयाजान् यजति ' इति । पृषदाज्येन चित्रेणेत्यर्थः । संस्कारेण हि मिश्रणे संस्कृतं चित्रमाज्यं भवति । तां च चित्रतामस्य प्रत्यक्षतो दध्युत्पादयति । तस्मात् परार्थं चित्रतासंजननार्थं न पातव्यम् । अतो नोपलक्षयितव्यमिति ।

स्याद् वा, द्रव्याभिधानात् । ५५ ॥

भाष्यम्— स्याद्वा दध्युपलक्षणम् । द्रव्यं हि दधि तुल्यमाज्येन प्रधानभूतमुपदिश्यते इत्युक्तमस्माभिः । ' अथ पृषदाज्यं गृह्णाति, द्वयं वा इदं सर्पिश्चैव दधि च, द्वन्द्वं वै मिथुनं प्रजननम्, मिथुनमेवैतत्प्रजननं क्रियते ' इति । किम् ? पृषदाज्यं गृह्यते, सर्पिश्चैव दधि चेति । सर्पिषा दध्ना च यागः कर्तव्य इत्यर्थः । पृषदाज्यमिति न द्रव्यान्तरमुच्यते । तस्मात् दधि उपलक्षयितव्यमिति ।

दध्नस्तु गुणभूतत्वादाज्यपानिगमाः स्युर्गुणत्वं श्रुतेराज्यप्रधानत्वात् । ५६ ॥

भाष्यम्— न चैतदस्ति तुल्यं दधि आज्येन प्रधानभूतमिति । ग्रहणे हि तत् तुल्यमाज्येन, न यागे । यागो हि आज्येन चित्रेण श्रूयते । तस्मात् श्रुतेराज्यप्रधानत्वात् यागं प्रति गुणभूतं दधि स्यात् । नहि ग्रहणे श्रूयमाणं यागे श्रुतं भवतीति । दधिग्रहणे श्रूयमाणं न यागार्थं भवति । तत्र श्रुत्या आज्यं करणम्, दधि

वाक्येनेति । किमर्थं तर्हि तत्र दधिग्रहणम् ? गृह्यमाणेन प्रत्यक्षतश्चित्रमाज्यं भवतीति । तस्मादाज्यपानिगमाः स्युः । न दध्न उपलक्षणं कर्तव्यमिति ।

दधि वा स्यात् प्रधानमाज्ये प्रथमान्त्यसंयोगात् । ५७ ॥

भाष्यम्— न चैतदस्ति, आज्यपानिगमा भवेयुरिति, न दध्न उपलक्षणं कर्तव्यमिति । दधिपानित्येव कर्तव्यम् , दध्येवात्र प्रधानम् । कुतः ? आज्ये प्रथमान्त्यसंयोगात् । प्रथमसंयोगः उपस्तरणम् । अन्त्यसंयोगोऽभिघारणम् । ' यदि वसन्ते यजेत, द्विरुपस्तृणीयात् सकृदभिघारयेत्, ओषधयो वै प्रियङ्गवः, ओषधिष्वेव पशून् प्रतिष्ठापयतीति । यदि प्रावृषि यजेत, सकृदुपस्तृणीयात् द्विरभिघारयेत् , वृष्टयैव पशूनभिजिघर्ति ' इति । उपस्तरणं अन्यत्तत्र निधापयितुं क्रियते । परार्थेनैष तत्र शब्दार्थो न ग्रहणमात्रम् । ग्रहणेन अन्यस्याधिकरणसंस्कारे उपस्तृणातीति शब्दो वर्तते, तथा अभिघारयतीति, न ग्रहणमात्रमभिघारणम् । अन्यस्य आभिमुख्येन अभिघारयतीति गम्यते सोऽन्यः आज्यसंयुक्तः कथं स्यादिति । तत् उपस्तरणाभिघारणशब्दाभ्यां दधि प्रधानभूतं गम्यते । आज्यमपि तस्य गुणभूतम् । तस्माद्दध्न एवोपलक्षणं कर्तव्यम् , नाऽऽज्यस्येति ।

अपिवाऽऽज्यप्रधानत्वाद् गुणार्थे व्यपदेशे भक्त्या संस्कारशब्दः स्यात् । ५८ ॥

भाष्यम्— अपिवा नैतदेवं दधि प्रधानं तदुपलक्षयितव्यमिति । आज्यमेव प्रधानम् , तद्धि प्रयोजनवत् , यागसंबन्धात् ' पृषदाज्येनानुयाजान् यजति ' इति । यत्तेनोपस्तीर्यते, तत्र द्रव्यं निष्पद्यते, तच्चैवावत्तं भवति दधि चोपस्तीर्णम् । तत्र शब्दात् आधेयस्य आधारसंस्कारोऽवगम्यते दधिसंस्कारः, न तु संस्कृतस्य प्रयोजनं दध्नः । प्रत्यक्षा तु चित्रता निर्वर्त्यमाना लक्ष्यते । तया च प्रयोजनम् । पृषद्धि तदाज्यं श्रूयते । न च यागे दधि करणं भवितुमर्हति वाक्यप्राप्तम् , आज्ये श्रुतिप्राप्ते प्रत्यर्थिनि । तस्मादुपस्तरणमाज्यग्रहणार्थमेव । ततो दधिग्रहणं भविष्यतीति । अर्थादाधेयाधारसंबन्धे उपस्तरणमिव तद्भवतीति भाक्तः उपस्तृणातिः प्रयुक्तः । तथा अभिघारयतिः । तस्मात् सकृद् द्विरित्येतस्य गुणस्यार्थे व्यपदेशे भक्त्यैष संस्कारशब्दः ' उपस्तृणाति, अभिघारयति, ओषधिष्वेव पशून् प्रतिष्ठापयति, वृष्टयैव पशूनभिजिघर्ति ' इति च । तस्मात् , आज्यपानिगमा एव भवेयुरिति ।

अपिवाऽऽख्याविकारत्वात् तेन स्यादुपलक्षणम् । ५९ ॥

भाष्यम्— अपिवेति पक्षव्यावृत्तिः । न आज्यपानिगमा भवेयुः , पृषदाज्यपानिति वक्तव्यम् । कुतः ? आख्याविकार एव भवति । दधिसर्पिषोरत्र संसर्गः क्रियते । तत्र यो गुण उपजायते, तद्गुणयुक्तस्य संसृष्टस्य आख्याविशेषो भवति पृषदाज्यमिति । यथा ' रागः खाडवः सुरा ' इति । तत्र ह्युपचरितमेकं शब्दमुपलक्षयामः । उपचारात् च अभिधानाभिधेयसंबन्धो गम्यते । तेन च यागनिर्वृत्तिः श्रयते ' पृषदाज्येनानुयाजान् यजति ' इति । तस्मादेवमुपलक्षयितव्यं पृषदाज्यपानिति ।

न वा स्याद् , गुणशास्त्रत्वात् । ६० ॥

भाष्यम्— नैतदेवं स्यात् संसृष्टस्य रागवत् पृषदाज्यशब्दो वाचकः उपचारादिति । सत्यमुपचरितोऽयं तत्र, स तूपचारो लोकादेवावगतः । स गुणः आज्ये भवतीति गम्यते । कुतः ? आज्यशब्दः सर्पिषो वाचकः । पृषच्छब्दश्चित्रस्य । तद्यथा पृषद्रज्जुः , पृषन्मणिः , पृषन्मृगः इति । तयोरुच्चरितयोः चित्राज्याभिधानं गम्यते । तस्मात्तत्रैव स उपचार उपपन्नः । अतश्च आज्यस्यैवोपलक्षणम् , चित्रमचित्रं वा आज्यम् । आज्यशब्देनाभिधीयते एवेति ।

सोम— स्तुतशस्त्रयोः स्तुत्यर्थत्वेन देवताभिधानपरत्वाभावात् अनूहेऽपि निगमानां देवताऽभिधानपरत्वेन सति ऊहे प्राकृताज्यपशब्दस्य बाधः इत्युत्थानात् संगतिः । **सूत्रार्थस्तु**— पृषदाज्ये हविषि सति निगमेषु दध्नोऽपि उपलक्षणं स्यात् , प्रकृतौ पातव्यस्याज्यस्य उपलक्षणत्वात् , इह आज्यदध्नोः उभयोरपि पृषत्त्वेन पानावगमात् इति । २६.

वि— ' चातुर्मास्यातिदिष्टेषु निगमेष्वाज्यपानिति । विक्रियेत न वाऽऽद्येऽपि किं स्याद् दध्याज्यपानिति ॥ दधिपानिति वा यद्वेत्येवं स्यात् पृषदाज्यपान् । , द्रव्यद्वयोक्तेराद्यः स्याद् दधिमात्रहविष्ट्वतः ॥ द्वितीयः स्यात् तृतीयोऽस्तु द्रव्यान्तरविधानतः । , गुणो दध्ना चित्रताऽऽज्ये ततो विक्रियते नहि ॥ ' तस्मात् आज्यस्यैव द्रव्यत्वात् आज्यपशब्दोपेता एव निगमाः पठितव्याः । २७.

भाट्ट— पश्वादौ ' पृषदाज्येनानूयाजान् यजति ' इति श्रुतं पृषदाज्यं प्राकृतस्य द्रव्यस्य तद्गतनैरपेक्ष्यस्य वा निवर्तकं न वेति चिन्तायाम् , पृषदाज्यशब्दस्याज्यदधिभ्यां आरब्धे द्रव्यान्तरे एव शक्तेः अनूयाजोद्देशेन विधीयमानं द्रव्यान्तरं प्राकृताज्यस्य निवर्तकम् , ततश्चावाहनादिमन्त्रेषु ' देवानाज्यपानावह ' इत्यादिषु ' देवानाज्यपृषदाज्यपानावह ' इत्यूहोऽपि । **अथवा** पृषदाज्यशब्दस्य क्लृप्तावयवयोगेनोपपत्तौ द्रव्यान्तरस्य, तत्र चातिरिक्तपदशक्तेश्च कल्पनायां प्रमाणाभावात् , पृषत्पदस्य पृषद्रज्जुरित्यादिप्रयोगानुसारेण चित्रत्वे एव शक्तिः , आज्यपदस्य त्वाज्ये एव । तथापि तु ' द्विरुपस्तृणाति, द्विरभिघारयति, बर्हिषी अन्तर्धाय दधि गृह्णाति' इति पृषदाज्यग्रहणे आज्यस्य दधिसंस्कारकोपस्तरणाभिघारणार्थत्वेन श्रवणात् विधावपि पृषदाज्यपदं लक्षणया दध्येव विधत्ते, इति प्रदानार्थस्य प्राकृताज्यस्य निवर्तकम् । ततश्च ' देवान् आज्यदधिपान् ' इत्यूहः । पक्षद्वयेऽपि आज्यशब्दः प्रयाजाद्यर्थाज्यपर इति । **अथवा** ' पृषदाज्यं गृह्णाति, द्वयं वा इदं सर्पिश्च दधि च ' इति वाक्यशेषानुसारात् विधिस्थपृषत्पदस्यैव दधिलक्षणावगतेः एकवचनस्यापि समाहाराभिप्रायत्वेनोपपत्तेः उपस्तरणाभिघारणवादस्य चोपस्तरणाभिघारणसंबन्धिप्रथमोत्तमस्थानविधिपरत्वेन संस्कारविधिपरत्वाभावादाज्यं दधि चोभयमनूयाजाङ्गम् । ततश्च प्राकृतस्यापि आज्यगतनैरपेक्ष्यस्यैव बाधः , न त्वाज्यस्य । ऊहश्च अनन्तरोक्तपक्षवदेव । न चास्मिन् पक्षे यज्ञपतिशब्दवत् एकेनैव द्रव्येणोपलक्षणसंभवे दधिपदप्रयोगे प्रमाणाभावः , अस्य मन्त्रस्य देवताप्रकाशनार्थत्ववत् द्रव्यप्रकाशनार्थत्वस्यापि अविशेषेण तद्वदिह पारार्थ्याभावात् । आज्यधर्माश्च पक्षद्वयेऽपि दध्नि अविशिष्टाः । प्रथमपक्षे पृषदाज्ये उत्पवनादय इति विशेषः । इति **प्राप्ते,** पृषच्छब्दस्य चित्रत्ववाचिनो दधिलक्षणाऽऽपत्तेः समाहारलक्षणाविधेयानेकत्वकृतगौरवापादकपक्षाङ्गीकरणं न युक्तम् । अतः आज्योद्देशेन पृषत्तामात्रं विधीयते । एकप्रसरताभङ्गभिया वा पृषत्ताविशिष्टाज्यस्यैव अतिदेशप्रवृत्तितः पूर्वप्रवृत्तौ पृषत्तामात्रफलको विधिः । पृषत्ता चोक्तवाक्यशेषानुरोधेन दध्ना, इति न क्वापि लक्षणा । उपस्तरणाभिघारणवादस्तु उपर्यधोभावमात्रेण नानुपपन्नः । नहि उपस्तरणादिशब्दः संस्कारकक्रियाया एव वाचकः इत्यत्र प्रमाणमस्ति, अवघातादिवत् संस्कारकत्वस्य प्रमाणाधीनत्वात् , प्रकृते च तदभावात् । अतो लौकिकस्यैव दध्नः संस्कारकमात्रत्वादाज्यमेव हविरिति न कस्यापि बाधः ऊहो वा ।

मण्डन— ' निगमाश्चाज्यपानिति । ' २८.

शंकर— ' आज्यपान् स्यात् पृषदाज्यके । ' २८.

* **पृषदाज्यग्रहणमाज्यकाले** एव कर्तव्यम् । **शा.** ५।२।७.

* **पृषदाज्यधारणार्थं** पृथक् पात्रं आज्यस्य च पृथक् अग्नीषोमीये पशौ । **के.** ५।२।८।१६.

* **पृषदाज्यशब्दः** चित्राज्यवाची । न हि पृषदाज्यं नाम द्रव्यान्तरं किञ्चिदस्ति । **मीन्या.**

पृष्टाकोटिन्यायः । अयं न्यायो यत्र धर्मादिविषये यन्मात्रं पृच्छयते तन्मात्रं सर्वमेव वक्तुमसमर्थत्वेऽपि तत्र यत्किञ्चिदुपयोगि तत्कथ्यते, तद्विषये प्रवर्तते । उक्तं च धर्मनिबन्धे ' अथ सिद्धे दुरिते का तत्संख्येति प्रायश्चित्तकदम्बाद्युक्तगणना लिख्यते । सा च पृष्टाकोटिन्यायेन वक्तुमशक्याऽपि स्थूलोपाधिविषयत्वेनोच्यते ' इति । **साहस्री**. ५८७. (वस्तुतस्तु 'पृष्ठाकोटन्यायः' एव अयं स्यादिति प्रतिभाति । तथा च भाष्यादिषु पाठः टीकादिषु च विवरणमुपलभ्यते । ' पृष्ठाकोट 'शब्दे वार्तिककृद्भिः सुधाकृद्भिश्च कृतं विवरणं द्रष्टव्यम् । ततश्च विशेषतः अभिधाने यत्र गौरवं अशक्यत्वं च तत्र अस्य प्रयोगः । यथा भाष्ये ' न शक्यं पृष्ठाकोटेन तत्र तत्र उपदेष्टुमिति लक्षणमुक्तम्' । साहस्रीकृद्विवरणमयुक्तमेव प्रतिभाति ।)

* पृष्ठं ज्योतिष्टोमे एकेन साम्ना साधितम् । विकृतौ (गवामयने पृष्ठ्ये षडहे) अपि एकेन साधितव्यं चोदकानुग्रहाय । भा. १०।६।३।५, * बृहद्रथंतरे पृष्ठे (प्रथमाद्विवचनम्) प्रकरणस्य तुल्यत्वात् समानधर्मणी । १०।५।२४।७९. * पृष्ठानि इति 'पृष्ठैः स्तुवते ' इतिविहितकर्मनामधेयं अवयवप्रसिद्ध्या, स्पर्शनात् पृष्ठानि । भा. १।४।२।३ । 'तासां वायुः पृष्ठे व्यवर्तत ' इति यस्मादपां पृष्ठे स्पृष्टे रथंतरादीनि जातानि, तस्मात्तानि पृष्ठानि इत्यर्थवादात् विज्ञातम् । तत्प्रकृतित्वाच्च वामदेव्यादिषु पृष्ठशब्दप्रसिद्धिः । वा. पृ. ३३१-३३२. * पृष्ठानि माहेन्द्रस्तोत्रादीनि चत्वार्येव ज्योतिष्टोमे, न सर्वाणि षडपि । भा. ७।३।३।६. * पृष्ठानि विश्वजिति पवमाने रथंतरम्, आर्भवे बृहत्, वैरूपं होतुः, वैराजं मैत्रावरुणस्य, रैवतं ब्राह्मणाच्छंसिनः, शाक्वरमच्छावाकस्य । ७।३।३।८, * ' पृष्ठैरुपतिष्ठते ' इति चयने श्रूयते । तत्र पृथिवीसमुद्रादिध्यानादयो हिंकारादयो वा पृष्ठधर्मा न कर्तव्याः, किन्तु तैर्मन्त्रैरुपस्थानं कर्तव्यम् । पृष्ठशब्दोऽत्र तदीयमन्त्रपरः । ७।३।१४।३५-३६. * 'पृष्ठैरुपतिष्ठते ' इति पृष्ठशब्दः ऋग्द्रव्यवाचकः । ७।३।१४. मीको. पृ. ३८ ' अग्निचयने पृष्ठैरुपतिष्ठते ' इत्यत्र द्रष्टव्यम् । * ' पृष्ठैरुपतिष्ठते ' । ऐन्द्र्यधिकरणस्थकौस्तुभोक्तन्यायेन लक्षणया अभिधानमेव प्रकृताग्निकर्मकं धातुना विधीयते तत्रैव पृष्ठपदार्थस्य करणत्वम् । (कौस्तुभोक्तमेव ' लक्षणया अभिधानमेव ' इत्यादिना अत्रत्यग्रन्थेन प्रतिपादितम् । उदाहरणान्तरत्वात्तु वर्णानुपूर्वीभेदमात्रम् । इति न कौस्तुभदर्शने मनः खेदनीयम् । के.) । भाट्ट. ७।३।१२. * 'पृष्ठैः स्तुवते ' इत्युपक्रम्य षट् ऋचः आम्नाताः । ' अभि त्वा शूर नोनुमः ' इति आद्या, तत्र रथंतरं साम । ' त्वामिद्धि हवामहे ' इति द्वितीया, तत्र बृहत् । ' कया नश्चित्र आभुवत् ' इति तृतीया, तत्र वामदेव्यम् । ' तं वो दस्ममृतीषहम् ' इति चतुर्थी, तत्र नौधसम् । ' अभि प्र वः सुराधसम् ' इति पञ्चमी, तत्र श्यैतम् । ' तरोभिर्वो विदद्वसुम् ' इति षष्ठी, तत्र कालेयम् । तत्र बृहद्रथंतरयोर्विकल्पः । एवं नौधसश्यैतयोरपि विकल्पः । स च रथंतरपक्षे नौधसम्, बृहत्पक्षे श्यैतं इति व्यवस्थितः । तदेवं ज्योतिष्टोमे नियतानि चत्वारि पृष्ठस्तोत्राणि । ' सप्तदशानि पृष्ठानि ' (प्रकृतौ), ' एकविंशं होतुः पृष्ठम् ' ' त्रिणवं मैत्रावरुणस्य ' ' सप्तदशं ब्राह्मणाच्छंसिनः ' ' पञ्चदशमच्छावाकस्य' (विकृतौ) । कौ. १।४।३।३ पृ. १८९-१९०. * ' पृष्ठैः स्तुवते ' इति स्तोत्रं प्रधानकर्म, न गुणकर्म । भा. २।१।५।१३-२९, * पृष्ठस्य एकस्य पृष्ठकार्ये निवेशः अन्येषां परिसामकार्ये । विश्वजिति सर्वपृष्ठे । १०।६।५।१३-१४, * पृष्ठानां षण्णां षाडहिकानां विश्वजिति सर्वपृष्ठेऽतिदेशः । ७।३।३।६-११. * पृष्ठ्ये (होतुः) बृहतो नियमः कचित् विकृतौ । भा. १०।७।१६।५१-५७. ' वाजपेयादिविकृतौ वैकल्पिकानां० ' इत्यत्र द्रष्टव्यम् ।

᳀ पृष्ठार्थेऽन्यद् रथंतरात् तद्योनिपूर्वत्वात् ऋचां प्रविभक्तत्वात् । १०।४।२२।४४ ॥

वैश्यस्तोमे 'कण्वरथंतरं पृष्ठं भवति ' इति श्रूयते । तत् कण्वरथंतरं कस्यां योनौ गेयं इति विचारे पूर्वपक्षमाह । पृष्ठार्थे पृष्ठस्तोत्रार्थं यत् रथंतरादन्यत् कण्वरथंतरं श्रूयते तत् ' अभि त्वा शूर' इति रथंतरयोनौ स्यात्, तद्योनिपूर्वकत्वात् ज्योतिष्टोमे या रथंतरयोनिर्भवति सैव योनिः कण्वरथंतरस्य इति तद्योनिपूर्वकत्वं कण्वरथंतरस्य । ननु वैश्यस्तोमस्य ज्योतिष्टोमपूर्वकत्वात् बृहतो योनावपि कण्वरथंतरं स्यात् । न । बृहत्साम्नः ऋग्भ्यः कण्वरथंतरस्य ऋचां प्रविभक्तत्वात् भिन्नत्वात् । कण्वरथंतरे रथंतरशब्दो धर्मनिमित्तः । तस्मात् वैश्यस्तोमे कण्वरथंतरं साम रथंतरयोनौ गेयं इति पूर्वः पक्षः ।

स्वयोनौ वा, सर्वाख्यत्वात् । ४५ ॥

पूर्वपक्षं सूत्रप्राप्तं वाशब्देन परिहरन् सिद्धान्तमाह । कण्वरथंतरं स्वयोनौ गेयम् । (पुनानः सोमयोरथ इत्यस्यां इति कु.) सर्वाख्यत्वात्, सर्वविशेषणविशिष्टस्य हि कण्वरथंतरशब्दो वाचकः । प्रस्तावोद्गीथप्रतिहारोपद्रवनिधनवतः सर्वस्य सस्तोभस्वरकालाभ्यासस्य कण्वरथंतरमित्याख्या भवति । तत्र योनिरपि विशेषणम् । तस्मात् स्वयोनौ गेयम् । इति सिद्धान्तः ।

यूपवदिति चेत् । ४६ ॥

कण्वरथंतरे रथंतरशब्दः रथंतरधर्मेषु सत्सु यूपवत् उपपद्यते । यथा यस्मिन् काष्ठे यूपधर्माः सन्ति तस्मिन् यूपशब्दः प्रवर्तते तद्वत् । इति चेत् पूर्वपक्षी ब्रूयात् ।

न, कर्मसंयोगात् । ४७ ॥

कण्वरथंतरशब्दः यूपशब्दवत् कर्मसंयोगात् न प्रवृत्तः । यूपशब्दो हि संस्कारयोगात् प्रवृत्तः । कण्वरथंतरशब्दस्तु न तथा किन्तु रूढोऽयं शब्दः । अतः स्वयोनौ कण्वरथंतरं गातव्यमिति सिद्धान्तः । के.

* ' उक्थ्यो वैरूपसामा, षोडशी वैराजसामा ' इत्यादिषु ' पृष्ठार्थे वा प्रकृतिलिङ्गसंयोगात् ' (१०।६।६।१६) इत्यनेन न्यायेन वैरूपादेः पृष्ठसाधनत्वद्योतनार्थत्वेन साम्नः पृष्ठलक्षणार्थत्वात् दूरापास्ता सामान्तरापेक्षा । सु. पृ. ८९४.

* पृष्ठाकोटः । धरणिगतानेकद्रव्यप्रत्येकनिरीक्षणे पुनः पुनः पृष्ठं कुटिलीक्रियते इति तत्सामान्येन पृष्ठाकोटाभिधानम् । (साहस्रयां तु पृष्ठाकोटिशब्दः, अर्थोऽपि भिन्नः) । वा. २।१।७।३२. * पृष्ठाकोटः पृष्ठस्य आकोटः वक्रत्वं अस्मिन् व्यापारे स पृष्ठाकोटः । सु. पृ. ६७०.

* कः पुनः पृष्ठदेशः ? ऊर्ध्वं माध्यंदिनपवमानात् प्राक् मैत्रावरुणसाम्नः, इदमन्तरालं पृष्ठदेशः । भा. १०।६।५।१३.

* पृष्ठधर्माः सामान्यधर्मा हिंकारादयः, विशेषधर्माः ' रथंतरे प्रस्तूयमाने पृथिवीं मनसा ध्यायेत्, बृहति समुद्रम् ' इत्येवमादयः । भा. ७।३।३।३५.

* पृष्ठप्रतिपदौ: उपवत्यग्रियवत्योः (उपास्मै, प्रयुजो वाचो) प्राकृतयोः नैमित्तिकयोः संसवादिविकृतौ नानुष्ठानम् । १०।५।१६।५९-६१.

* पृष्ठशब्दः अग्निचयनगतो रथंतरादिसामोपेतमन्त्रोपलक्षकः, न स्तोत्रधर्मान् अतिदिशति । ' पृष्ठैरुपतिष्ठते ' इति । ७।३।१४. * पृष्ठशब्दः ज्योतिष्टोमे माध्यंदिनसवनगतस्तोत्रविशेषाणां नामधेयम् । वि. १।४।३. * पृष्ठशब्दः ' पृष्ठैरुपतिष्ठते ' इति ऋग्द्रव्यवाचकः । ७।३।१४. * पृष्ठशब्दः स्तोत्रपर एव, न सामपरः । सोम. ७।३।३. * पृष्ठशब्दः स्तोत्रविशेषवाचकः । प्रगीतमन्त्रसाध्या स्तुतिः स्तोत्रम् । ' पृष्ठैः स्तुवते ' इत्यत्र । वि. २।१।५. * सप्तदशानि (सप्तदशस्तोमकानि) पृष्ठानि इति पृष्ठशब्दः नामधेयम्, न गुणविधिः । भा. १।४।२।३.

* पृष्ठशमनीयः ज्योतिष्टोमविकृतिभूतः ' सत्त्रादुदवसाय पृष्ठशमनीयेन ज्योतिष्टोमेन सहस्रदक्षिणेन यजेरन् ' । अयं न सत्त्राङ्गम् । तत्र सहस्रदक्षिणाऽपि लोपं नार्हति । १०।२।१२. * पृष्ठशमनीयः (उदवसानीयः) सत्त्रसमाप्त्युत्तरं सत्त्रिणामेकैकेनैव ऋत्विगन्तरसंपादनेन कर्तव्यः, न संहत्य । १०।२।१३-१४।४१-४३. * पृष्ठशमनीयेन यागेन सत्त्रसमाप्तिः । सु. पृ. १५३९. * पृष्ठशमनीये ऋत्विग्भ्यो दक्षिणादानं परिक्रयार्थम् । १०।२।१२।४०-४१. * पृष्ठशमनीये कर्तृत्वं न सत्त्रिणामेव यजमानत्वेन, किन्तु अयजमाना ऋत्विजः कर्तारः । तत्र सत्त्रिणामपि ऋत्विक्त्वेन केवलेन परिक्रये न दोषः । के. (वि. १०।२।१३.)

᳀ पृष्ठशमनीये सत्त्रिभ्योऽन्ये ऋत्विजः, न तु ते एव ॥

तत्रान्यानृत्विजो वृणीरन् ।१०।२।१४।४३॥

भाष्यम्— अन्तरा चिन्तान्तरस्य सूत्रं तावत् वर्णयिष्यामः । असिन्नेवोदाहरणे एषोऽर्थः सांशयिकः किं ते एव सत्त्रिणः ऋत्विजः, उतान्ये वा वरीतव्या इति । किं प्राप्तम् ? ते एव । कुतः ? समानकर्तृकता हि गम्यते ' उदवसाय यजेरन् ' इति । ये एव उदवसातारः, ते एव यष्टारः इति भवति प्रत्ययः । यथैव वचनप्रामाण्यात् चोदकप्राप्तामेककर्तृकतां बाधित्वा बहुकर्तृकता भवति, एवं चोदकप्राप्तानन्यान् ऋत्विजो बाधित्वा वचनप्रामाण्यात् ते एव भवितुमर्हन्तीति । एवं प्राप्ते, ब्रूमः । तत्रान्यान् ऋत्विजो वृणीरन् इति । नहि पृष्ठशमनीये ये सत्त्रादुदवसातारः, ते कर्तारो विधीयन्ते । न तेषामुपादेयत्वेन चोदनेत्युक्तम् । न चाविहितमङ्गं भवति । न चानङ्गे हीने विगुणता का चित् भवति । सन्ति च चोदकप्राप्ता अन्ये ऋत्विजः । अपि चात्र यावति कर्त्रभिप्रायं क्रियाफलम्, तावति ते एव कर्तारः ।

तदेतत् उपग्रहविशेषादवगम्यते । न च ऋत्विजः प्रति यागस्य कर्त्रभिप्रायं क्रियाफलम् । तस्मात् नार्त्विज्ये ते एत्र कर्तारः । प्रधानयागे तावत् कर्तॄनवगच्छामः । ऋत्विजः पुनरन्ये वरीतव्या इति ।

टुप्— ये एव उदवसाने कर्तारः, ते एव उदवसानीये विधीयन्ते । (यदि तु अन्येऽपि कर्तारः पृष्ठशमनीयस्य भवेयुः, ततः) सामानाधिकरण्यं न स्यात् । (**इति प्राप्ते,**) उच्यते । प्रधानमात्रे हि (समानकर्तृकत्व–) वचनं (भवति 'यजेरन्' इति) नहि विशेषणं श्रूयते साङ्गस्तैः पृष्ठशमनीयः कार्यः इति । वचनाभावात् किमिति चोदकबाधो भवतीति । प्रधानकर्तृत्वेऽपि (प्रधानभूतयजमानव्यापारकर्तृत्वेऽपि) सामानाधिकरण्यमुपपद्यते एव । (तस्मात् अन्ये ऋत्विजो वरीतव्याः इति ।)

वि— 'तत्रर्त्विजः सत्रिणः किमन्ये वा स्युर्, स्यंबुक्तितः । त एव, यष्टृभेदेऽपि क्रीतत्वादृत्विजः परे ॥ '

भाट्ट— अनङ्गत्वे अङ्गत्वेऽपि वा उदवसानसमानकर्तृकत्वानुरोधात् यजमानैरेव आर्त्विज्यं कर्तव्यम् । न च तस्य प्रधानमात्राभिप्रायत्वेन उपपत्तिः, साङ्गे समानकर्तृकत्वश्रवणेन 'अप्सु अवभृथेन चरन्ति' इत्यादौ अद्भिः आहवनीयादेरिव औपदेशिकेन यजमानकर्तृकत्वेन अङ्गेष्वपि ऋत्विक्कर्तृकत्वबाधात्, दक्षिणादानस्य अदृष्टार्थत्वेनापि उपपत्तेश्च । **इति प्राप्ते,** प्रयोजककर्तृत्वेनापि प्रकृताविव यजमानकर्तृकत्वोपपत्तेः अङ्गत्वे अनङ्गत्वेऽपि वा सौर्यादाविव अतिदेशप्राप्तऋत्विग्बाधे प्रमाणाभावः । एवं च दक्षिणाश्रुतिः आञ्जस्येन उपपद्यते । १०।२।१३.

मण्डन— 'ततोऽन्ये स्युरिहर्त्विजः ।'

शंकर— '(तत्राधिकारः प्रत्येकं–) चेत् सहत्वं तदर्त्विजः ।'

* 'सत्रादुदवसाय पृष्ठशमनीयेन यजेरन्' इत्यत्र हि उदवसानसमानकर्तृकत्वबलेनैव **पृष्ठशमनीये** बहुत्वादेः प्राप्तत्वात् युक्ता साहित्याविवक्षा । **भाट्ट**.५।२।२.

पृष्ठशमनीयन्यायः । उदवसानीयस्य ऋत्विगन्तरसंपादनेन प्रत्येकं कर्तृत्वम् ॥

तेषां तु वचनाद् द्वियज्ञवत् सहप्रयोगः स्यात् । १०।२।१३।४२॥

भाष्यम्— इदमेवोदाहरणम् 'सत्रादुदवसाय पृष्ठशमनीयेन ज्योतिष्टोमेन सहस्रदक्षिणेन यजेरन्' इति । तत्रैषोऽर्थः समधिगतः न सत्राङ्गं पृष्ठशमनीयः इति । अथेदानीमिदं संदिह्यते किं संहत्य तैस्तत् कर्तव्यम्, उत एकैकेनेति । किं प्राप्तम् ? संहत्येति । कुतः ? उपादेयत्वेन यागे चोद्यमानस्य बहुत्वस्य श्रवणात् । स चेदेकेन क्रियेत, बहुत्वसंयुक्तः प्रयोगो न स्यात् । द्वियज्ञवत् । यथा 'एतेन राजपुरोहितौ सायुज्यकामौ यजेयाताम्' इति । यद्यपि राजपुरोहितौ लक्षणत्वेन श्रूयेते, एवमपि यजेयातामिति यागः उपादेयत्वेन । यागे चैतत् कर्तृद्वित्वं श्रूयते, यजेयातामिति । तद्वत् पृष्ठशमनीयेन यजेरन्निति । तस्मात् संहत्य पृष्ठशमनीयं प्रयुञ्जीरन्निति । एवं स्थितं तावत् अपर्यवसितम् ।

टुप्— (पृष्ठशमनीयेन) यजेरन् इत्युपादेयत्वेन श्रुतत्वात् बहुवचनस्य विवक्षा । ननु (इतरेतर–) निरपेक्षाः उदवसाने (कर्तारः) । तथैव स्थितानां च (उदवसानीय–) यागो विधीयते (अतः) स (अपि परस्पर–) निरपेक्षाणामेव । सत्यम् । यद्यपि उदवसाने निरपेक्षाः, तथापि यागे सापेक्षाः (भवन्ति) द्वियज्ञवत् । (यथा) राजपुरोहितौ फलं प्रति प्रधानभूतौ (परस्परनिरपेक्षौ) यागं प्रति (तु) गुणभूतौ (सापेक्षौ)। कथम् ? (उत्तरम्–) यागो हि विधीयमानः कर्तारमाकाङ्क्षति । तत्र (यागे) संख्या श्रूयते स्वपदगता (यजेयातां इति । ततश्च सापेक्षाः कर्तारः ।) सैव (संख्या यागाङ्गत्वेन) विधीयते (न तु कर्ता । कथं तर्हि अनुष्ठानमत आह–) कर्तृगामिनि (उपग्रहविशेषात्) क्रियाफले, अर्थात् क्रियां करिष्यति । ईदृश्यामवस्थायां द्विवचनं विवक्ष्यते । यदि च राजपुरोहितौ द्विवचनविशेषणार्थमुच्चाययाताम्, तथा सति यागं प्रधानभूतं न कश्चित् कुर्यात् । अतस्तयोर्यागः (अङ्गत्वेन) विधीयते, यथा 'मलिनः स्नायात्' इति । अपिच पदवेलायां

(अवसाय इति पदमनपेक्ष्य यजेरन् इति पदालोचनवेलायाम्) बहुवचनं विधीयते । तादृशं च पदान्तरेण संबध्यते । तस्मात् विवक्षितं (यागे) बहुत्वम् । (तद्वशेन च) सापेक्षाश्च कर्तारः (यागे उदवसाने कर्तारो भवन्ति) ।

एकैकशस्त्वविप्रतिषेधात् प्रकृतेश्चैकसंयोगात् । ४४ ॥

भाष्यम्— स्थितादुत्तरम् । तुशब्दः पक्षं व्यावर्तयति । न पृष्ठशमनीयं संहत्य प्रयुञ्जीरन् । किं तर्हि ? एकैकशः । कुतः ? अविप्रतिषेधात् । उदवसानेन हि पुरुषा लक्ष्यन्ते । ये सत्रादुदवस्यन्तीति । तत्र चैकोऽपि उदवसाता भवति । ये च उदवसानलक्षितास्तेषां याग इत्येकैकस्यापि यागो विहितो भवति । न च केन चित् प्रतिषिध्यते । तस्मादेकैकोऽपि यजेत । ननु बहूनां प्रयोग उच्यते । तेन एकैकस्य न भवति । नैष दोषः । एकैकस्यापि न वार्यते । तेन चोदकसामर्थ्यादेकैकशः एव यजेतेति । **आह** । बहुसंयुक्तः प्रयोगः एकैकेन न शक्यते कर्तुमिति । एवमपि न दोषः । नात्र बहुवचनं विधीयते । ये सत्रादुदवसातारस्तेषामेव यागः । ते च बहवः । तेषां बहूनामत्र प्राप्तानामयमनुवादः । एकैकश्येनापि च ते उदवसातारः । तस्मात्तेषां तथैव यागो भविष्यति । यथैवोदवसाने तेषामसंहतानां बहुवचनम्, एवं यागेऽपि असंहतानामेव भविष्यति । **अत्रोच्यते** । न बहुवचनमनुवादः, अप्राप्तत्वात् । नहि बहुवचनं यागे प्राप्तम्, यदनूद्येत । नन्विदानीमेवोक्तमुदवसातॄणां यागः, ते च बहव इति । उच्यते । बहुत्वं तेषामुदवसाने, न यागे ।

ननु वाक्यसामर्थ्यात् यागेऽपि भविष्यति । नेत्याह । परिपूर्णं हि पदं पदान्तरमाकाङ्क्षति, ततो वाक्यं भवति । अयं च यागः प्रागेव बहुवचनेन संबद्धः । न तस्यामवस्थायां वाक्येन उदवसातारः प्राप्ताः । उपादत्ते तु तदा बहुत्वम् । ततो बहुवचनसंयुक्तः पदान्तरगतान् उदवसातॄनपेक्षते । तस्माद्बहुत्वसंयुक्तः प्रयोगः कर्तव्यः । यथा द्वियज्ञे सत्रेषु चेति । **आह** । नैतदेवम् । यत्र केन चित् प्रकारेणानुवादः संभवति, तत्रानुवादो वा स्यात्, विधिर्वेति । यद्यपि अपूर्वत्वादन्यत्र विधिर्यायाननुवादात्, तथाऽपि अत्रानुवाद एव बहुत्वस्य भवितुमर्हति । तथाहि यागसंबन्धो बहूनां न कृतो भवति । तत्र दृष्टमेव प्रयोजनम्, इतरस्मिन् पक्षे बहुत्वस्य यागसंबन्धेऽदृष्टं कल्पनीयं स्यात् । तस्मादनुवाद इति । (स एव ब्रूते आहेति–) आह । द्वियज्ञेऽपि तर्ह्येवमेव प्राप्नोति, सत्रेषु चेति । **अत्रोच्यते** । अस्त्यत्र विशेषः । उदवसाय यजेरन्निति । 'राजपुरोहितौ यजेयाताम्' 'ऋद्धिकामाः सत्रमासीरन्' इति । यत्र क्त्वाऽन्तः शब्दो भवति, तत्र द्वौ प्रयोगौ गम्येते । समानाश्च कर्तारः श्रवणादेव । तत्रोत्तरप्रयोगवचनेन केवलो धात्वर्थो विधीयते । तदाश्रयः प्रयोगः, कर्तारश्च, तद्गता च संख्या, एवं सर्वमेतद्धात्वर्थ विधीयमाने प्राप्तमेवानूद्यते । द्वियज्ञे सत्रेषु च धात्वर्थो विधीयते, प्रयोगोऽपि, कर्तारः, तद्गता च संख्येति, सर्वमेव तत्राप्राप्तम् । नहि राजपुरोहितौ इत्येष शक्नोति प्रयोगं वदितुम्, तत्र च कर्तृत्वम्, तद्गतां संख्याम् । तथा ऋद्धिकामा इति । तस्मादेवंजातीयकेषु संख्या उपादेयत्वेन श्रूयते । अतो द्वियज्ञादिषु नानुवादः । तेषु बहुत्वसंयुक्तः प्रयोगः कर्तव्यः । इह तु न तथा । तस्मादेकैकः पृष्ठशमनीयेन यजेतेति ।

टुप्— इतरेतरनिरपेक्षा उदवसाने कर्तारः, अर्थप्राप्तत्वात् उदवसानस्य, अभाव्यत्वाच्च । यादृशाश्चोदवसाने (कर्तारः), तादृशा एव पृष्ठशमनीये । तस्मात् (तत्रापि) विवक्षितं बहुवचनम् । ननु राजपुरोहितवत् (एकत्र निरपेक्षाः इतरत्र सापेक्षा भवन्ति) इत्युक्तम् । यजेरन् इति च श्रुत्यैव (पदान्तरमनपेक्ष्य) बहुत्वं गम्यते । सत्यं गम्यते, न तु विधीयते । कथम् ? प्राप्तत्वात् (संख्यायाः) । कुतः प्राप्तिः ? क्त्वाश्रवणात् द्वौ प्रयोगौ गम्येते । ये च पूर्वस्मिन् प्रयोगे कर्तारः, त एवोत्तरस्मिन् (इत्यपि तत एव गम्यते)। पूर्वस्मिंश्च त्यागे (सत्रत्यागप्रयोगे उदवसानाख्ये) इतरेतरनिरपेक्षाः (ते) तादृशा एव उत्तरस्मिन् (प्रयोगे । किं तर्हि विधीयते इत्यत आह–) क्रियाविशेषः अप्राप्तः स एव विधीयते (न संख्या । बहुत्वं तु उदवसातॄणामनुवादः इति) ।

सोम— ऋत्विग्बाधवत् एककर्तृकत्वस्यापि अबाधः इत्युत्थितेः **संगतिः । सूत्रार्थस्तु**– तेषां सत्रिणां सहप्रयोगः स्यात्, यजेरन् इति बहुत्ववचनात् । यथा 'राजपुरोहितौ यजेयाताम्' इति द्वित्ववचनात् द्वियज्ञे सहप्रयोगः, तद्वत् इति ।

वि— 'संभूयैकैकशो वाऽत्र यष्टृता, ऽऽद्यो बहूक्तितः ।, द्वियागवद् बहुत्वस्य प्रातेरन्त्योऽस्तु सोमवत् ॥' सोमे ऋत्विग्बहुत्ववत् । १४.

भाट्ट–– अनङ्गत्वेऽपि संहत्यैव करणम्, आख्यातोपात्तस्य बहुत्वस्य उपादेयकर्तृगामित्वेन सत्रवाक्ये इव विवक्षितत्वात् । कथञ्चित् प्राप्तत्वेऽपि संहत्य प्रयोगसिद्ध्यर्थं 'सृष्टीरुपदधाति' 'सोमेन यजेत' इत्यादिवत् विशिष्टविध्यङ्गीकारेण प्रयोजनसिद्ध्यर्थं विध्युपपत्तेश्च । (स्थितं तावदपर्यवसितम् ।...स्थितादुत्तरम्) न पृष्ठशमनीये संहत्य प्रयोगः, बहुत्वस्य प्राप्तत्वेन अविधेयत्वात् । उदवसाने हि अनेकेषां सत्रकर्तॄणां कर्तृत्वं प्राप्तमेव । अतः तत्समानकर्तृकत्वादेव पृष्ठशमनीयेऽपि तत्प्राप्तिः । अतोऽयं तावदनुवादः । क्त्वाप्रत्ययस्य हि पूर्वकालत्ववत् समानकर्तृकत्वमपि अनुशासनबलात् वाच्यम् । **न च** अव्ययकृत्त्वेन अस्य (क्त्वः) भावशक्तत्वात् क्त्वाप्रकृत्यर्थभूतक्रियायाः उत्तरक्रियायामन्वये पूर्वकालत्वसमानकर्तृकत्वयोः संसर्गत्वेनैव बोधोपपत्तेः न तयोः तस्यातिरिक्ता शक्तिः इति **वाच्यम्** । पदार्थानुशासनप्रवृत्तपाणिन्यादेः संसर्गानुशासकत्वविरोधात् ।

किञ्च क्त्वाप्रकृतिभूतधात्वर्थस्यैव उत्तरक्रियासंबन्धः क्त्वा च संसर्गतात्पर्यग्राहकः इत्युच्यते, अथवा क्त्वाऽर्थभाव एव निरुक्तोभयसंसर्गेण उत्तरक्रियायामन्वेति, इति विवेक्तव्यम् । तत्र **न तावत् आद्यः**, क्त्वाज्ञानत्वेनैव तात्पर्यग्राहकत्वे अगृहीतसंकेतस्यापि तात्पर्यग्रहापत्तेः, तात्पर्यग्राहकत्वप्रकारकज्ञानत्वेन तत्त्वे आत्माश्रयापत्तेः, एकत्वादिशक्तद्वितीयाऽऽदेः कर्मत्वादिसंसर्गतात्पर्यग्राहकत्वेनैव उपपत्तौ प्रातिपदिकार्थस्यैव कर्मतादिसंसर्गेण क्रियायामन्वयापत्तेः कर्मत्वादौ द्वितीयाऽऽदेः शक्त्यनापत्तिश्च । अत एव **नान्त्यः**, संख्याया एव स्वसमानाधिकरणकर्मत्वादिसंसर्गेण क्रियाऽन्वयापत्तेः । अतोऽनुशासनबलात् कर्मत्वादिवदेव पूर्वकालत्वादेरपि वाच्यत्वम् । अस्तु वा तत्, तथापि न दोषः । अतः तत् तावदनुवादः । एकेन पदेन अनेकेषामुपादाने प्रतीयमानकर्तृसाहित्यमपि न तावत् उदवसाने विवक्षितम्, निमित्तविशेषणत्वात्, सत्रे संहत्य कर्तृत्वेऽपि तत्त्यागे साहित्यं विनैव कर्तृत्वाच्च । यो हि संयोगादिरूपो व्यासज्यवृत्तिधर्मः, तदभावः प्रत्येकवृत्तिरेव, किमुत यदा सत्रे बहुवचनानुरोधात् प्रत्येकमेव कर्तृत्वम्, कर्तॄणां परं समुच्चयः, तदा तत्त्यागे साहित्याभावे कः संदेहः ? आख्यातोपात्तबहुत्वावगतसाहित्यं तु बहुत्वस्याविवक्षितत्वे अविवक्षितमेव । उदवसाने हि यादृशा निरपेक्षाः कर्तारः, तादृशा एव समानकर्तृकत्वबलेन पृष्ठशमनीये अवगम्यन्ते । अतः प्रथमावगतनैरपेक्ष्यबलेन न साहित्यविवक्षा । न च नैरपेक्ष्यानङ्गीकारेऽपि ल्यबन्तोपात्तसमानकर्तृकत्वाविरोधात् बहुत्वस्य तदवगतसाहित्यस्य च विवक्षोपपत्तिः, विशिष्टविधिगौरवभयेन संभवत्प्रासिकस्य बहुत्वस्य अनुवादाङ्गीकारात् । अत एव पृष्ठशमनीयमात्रविधानात् विधेर्लाघवम् । **न च** संस्कारविध्यन्यथाऽनुपपत्त्यादिना संभवत्प्रातिकस्यापि सोमादेः सक्तुव्यावृत्त्यादिरूपप्रयोजनसिद्ध्यर्थं विशिष्टविध्याश्रयणवत् इहापि साहित्यसिद्ध्यर्थं बहुत्वविध्याश्रयणमिति **वाच्यम्** । सोमादिपदवैयर्थ्यभिया तत्र तथा आश्रयणेऽपि प्रकृते बहुवचनस्य अवर्जनीयतया अनुवादत्वोपपत्तेः । अतः एकैकश्येनैव पृष्ठशमनीयः कार्यः, इति न तत्र प्राकृतकर्त्रैकत्वबाधः ।

मण्डन–– 'तमेकैकः प्रकुर्वीत ।' तं उत्तरं यज्ञं उदवसानीयम् ।

शंकर–– 'तत्राधिकारः प्रत्येकम् ।' तत्र उदवसाने.

* नैमित्तिकस्य च तावत्त्वबहुत्वादेः ('यावतोऽश्वान् प्रतिगृह्णीयात् तावतः' इत्यत्र) **पृष्ठशमनीयन्यायेन** अनुवाद्यगतत्वेनाविवक्षितत्वम्– इति वार्तिके । **भाट्ट**. ५।२।२.

* **पृष्ठसामानि**, पृष्ठस्तोत्रेषु गीयमानानि सामानि । **वि**. १०।६।५. * **पृष्ठसामभिः** षड्भिः पृष्ठ्यः षडहः संपद्यते । **के**. (वि. १०।६।५)

* **पृष्ठस्तुतौ** हि साम विनियुज्यते रथंतरं पृष्ठं भवतीति । **भा**. १०।६।३।५.

* **पृष्ठस्तोत्रमुक्थ्ये** वैरूपमेकमेव । तच्च महेन्द्रस्तोत्रस्थाने षोडशिनि च वैराजम् । 'उक्थ्यो वैरूपसामा एकविंशः, षोडशी वैराजसामा' । **वि**. १०।६।६, * **पृष्ठस्तोत्रं** वैश्यस्तोमे कण्वरथंतरं नाम । प्रकृतौ पृष्ठस्तोत्रे विकल्पितयोर्बृहद्रथंतरयोर्धर्माः, वैश्यस्तोमे विरुद्धा विकल्पेन, अविरुद्धाश्च समुच्चयेन ग्राह्या इति **भाष्यम्** । उभये धर्मा विकल्पेनैवेति **वार्तिकम्** । ९।२।१६, * **पृष्ठस्तोत्राणि** चत्वारि सप्तदशस्तोमकानि माध्यंदिने सवने पवमानानन्तरम् । तत्र रथंतरम् 'अभि त्वा शूर' इति प्रगाथरूपं प्रथमं सूक्तम् । तत्र पूर्वा बृहती उत्तरा पङ्क्तिः (सतःपङ्क्तिः) । वामदेव्यं 'कया नश्चित्र' इति द्वितीयम् । तत्र तिस्रो गायत्र्यः । नौधसं 'तं वो दस्ममृतीषहम्' इति तृतीयं प्रगाथरूपम् । तत्र बृहतीपङ्क्त्यौ (बृहतीसतःपङ्क्त्यौ) । कालेयं 'तरोभिर्वो विदद्वसुं' इति प्रगाथरूपं चतुर्थम् । तत्रापि बृहतीपङ्क्त्यौ (बृहतीसतःपङ्क्त्यौ) । तत्र प्रगाथेषु प्रग्रथनेन तृचत्वसंपादनम् । ९।२।६ वर्णकम् २. * **पृष्ठस्तोत्रे** एव (होतुः) बृहद्रथंतरयोः समुच्चित्य निवेशः संसवे अपचितौ च यागे । १०।६।८।२४–२६. * पृष्ठस्तोत्रे 'गोसवे उभे कुर्यात्' इति बृहद्रथंतरसामद्वयसाध्यता । तत्र च स्तोत्रस्यैकत्वेऽपि साम्नोर्भेदात् धर्मव्यवस्था । ९।२।१७. * **पृष्ठस्तोत्रेषु** ज्योतिष्टोमे बृहत् रथंतरं च विकल्पितं परन्तु उभयधर्माः व्यवस्थिताः कर्तव्याः, न संकरः । बृहद्धर्माः 'उच्चैर्गेयम्', 'बलवद्गेयम्', 'बृहति स्तूयमाने मनसा समुद्रं ध्यायेत्' इति । रथंतरधर्माः 'नोच्चैर्गेयम्, न बलवद्गेयम्', 'रथंतरे प्रस्तूयमाने संमीलयेत्' इति । **वि**. ९।२।१५, * पृष्ठस्तोत्रेषु सप्तदशस्तोमः, तस्य विष्टुतिः तिसृभिः एकया एकया इति प्रथमावृत्तौ, एकया तिसृभिः एकया इति द्वितीयावृत्तौ, एकया तिसृभिः तिसृभिः इति तृतीयावृत्तौ इति । १।४।३.

* **पृष्ठस्तोत्रसाधनतया** वैश्यस्तोमे विहितस्य कण्वरथंतरस्य स्वयोनौ 'पुनानः सोम' इत्यत्र गानम् । १०।४।२२।४४–४७, उत्तरयोरपि स्वयोन्युत्तरयोरेव, न रथंतराद्युत्तरयोः । १०।४।२३।४८–४९.

* **पृष्ठ्यः** षडहः इति नामधेयेनैव षडहसंबन्धिनी ग्रहाग्रता प्राप्नोति गवामयने । **टुप्**. १०।५।२५।८९ पृ. १९८०. * पृष्ठ्यः षडहः गवामयने प्रतिमासं सव्यवधानः आवर्तते । अतः तस्मिन्नावर्तमाने संस्थानिमित्तं रसभोजनमपि प्रतिमासमावर्तते । १०।६।११।३१. * 'पृष्ठ्यः षडहः, द्वौ स्वरसामानौ' इत्यत्र (अष्टरात्रे) स्वरसाम्नोः गवामयनगतस्वरसामधर्मातिदेशः स्वरसामनाम्ना । स्वरसामैककपालामिक्षाधिकरणम् । ७।३।१०।२७. * पृष्ठ्यः षडहः द्वादशाहे द्वितीयादीनि षट् अहानि । **वि**. ८।२।५, * पृष्ठ्यः षडहः द्वादशाहगतः प्रकृतिः, गवामयनगतश्च पृष्ठ्यः षडहो विकृतिः । १०।६।२, * पृष्ठ्यः षडहः द्विविधः, त्रयस्त्रिंशान्तः त्रयस्त्रिंशादिश्चेति । त्रिवृत्–पञ्चदश– सप्तदश–एकविंश – त्रिणव – त्रयस्त्रिंशैः स्तोमैर्युक्तानि षडहानि इति त्रयस्त्रिंशान्तः । विपरीतक्रमेण तु त्रयस्त्रिंशादिः । तत्राद्यो द्वादशाहे गवामयने पूर्वे पक्षसि च । अन्त्यस्तु गवामयने उत्तरे पक्षसि पृष्ठ्ये षडहे । १०।६।९.

पृष्ठ्यस्य युगपद्विधेरेकाहवद् द्विसामत्वम् । १०।६।३।४ ॥

'पृष्ठ्यः षडहो बृहद्रथंतरसामा' इति श्रूयते । अनेन पृष्ठ्ये षडहे द्वे सामनी उक्ते । बृहच्च रथंतरं च सामनी यस्मिन् इति द्वन्द्वगर्भो बहुव्रीहिः । एवं च द्वयोः साम्नोः युगपत् विधेः पृष्ठ्यस्य षडहस्य प्रत्यहं द्विसामत्वं स्यात् । एकाहवत् यथा संसवे गोसवे इत्यादौ एकाहे क्रतौ द्विसामत्वं भवति तद्वत् । इति पूर्वः पक्षः ।

विभक्ते वाऽसमस्तविधानात् तद्विभागेऽविप्रतिषिद्धम् । ५ ॥

पूर्वपक्षनिरासार्थो वाशब्दः । न प्रत्यहं उभयसामत्वं किन्तु विभक्ते सामनी स्याताम् । केषु चिदहःसु रथंतरम्, केषु चिदहःसु च बृहत् । असमस्तविधानात् न समस्तयोः साम्नोः विधानम् । 'पृष्ठ्यः षडहो बृहद्रथंतरसामा' इत्यत्र बृहत् रथंतरं साम यस्मिन् सः इति

त्रिपदो बहुव्रीहिः, न तु द्वन्द्वगर्भो बहुव्रीहिः। तद्विभागे तयोः बृहद्रथंतरयोः अहर्भेदेन विभागेऽपि बृहद्रथंतरसामा इति शब्दः अविप्रतिषिद्धः न विरुद्धः। यथा 'मासं घृततैलाभ्यां देवदत्तो भोजयितव्यः। इत्युक्ते अर्धमासं घृतेन, अर्धमासं तैलेन एवमपि शब्दोऽवकल्पते तद्वत्। किञ्च चोदकमपि एवं अविप्रतिषिद्धम्। एवं विभागे स्वीकृते चोदकानुग्रहोऽपि स्यादित्यर्थः। तस्मात् प्रत्यहं एकैकसामत्वमेवेति सिद्धान्तः। **के.**

पृष्ठ्य रसभोजनमावृत्ते संस्थिते त्रयस्त्रिंशेऽहनि स्यात् तदानन्तर्यात् प्रकृतिवत्। १०।६।९।२७॥

द्वादशाहे त्रिवृदादिः त्रयस्त्रिंशान्तः षडहो भवति। तत्र 'संस्थिते पृष्ठ्ये षडहे मध्वाशयेत् घृतं वा' इति श्रूयते। अथ गवामयने आनुलोम्येन प्रवृत्ते पूर्वे पक्षसि न विचार्यता। प्रातिलोम्येन प्रवृत्ते उत्तरे पक्षसि तु आवृत्ते पृष्ठ्ये षडहे त्रयस्त्रिंशेऽहनि संस्थिते समाप्ते, तद्दिने एव रसभोजनं मधुभोजनं स्यात्। तदानन्तर्यात् प्रकृतौ त्रयस्त्रिंशानन्तरं रसभोजनं वृत्तम्। प्रकृतिवदिहापि। तस्मात् त्रयस्त्रिंशेऽहनि अनुष्ठानोत्तरं रसभोजनं कार्यं इति पूर्वः पक्षः।

अन्ते वा, कृतकालत्वात्। २८॥

पूर्वपक्षं वाशब्देन व्यावर्तयन् सिद्धान्तमाह— न चैतदस्ति त्रयस्त्रिंशानन्तरं रसभोजनमिति। किन्तु षडहस्य अन्ते स्यात्। रसभोजनस्य कृतकालत्वात् 'संस्थिते षडहे मध्वाशयेत्' इति वचनेन कृतः विहितः निश्चितः कालो यस्य तादृशत्वात्। षडहान्तकालोऽस्य निश्चितः। प्रातिलोम्येन प्रवृत्ते च त्रयस्त्रिंशादिः त्रिवृदन्तः षडहः। तस्मिन् संस्थिते रसभोजनं स्यात् न त्रयस्त्रिंशान्ते। तस्मात् त्रिवृदन्ते षडहे समाप्ते मध्वादिभोजनं इति सिद्धान्तः। **के.**

* **पृष्ठ्ये षडहे** अग्न्यतिग्राह्यस्य अतिदेशः। १०।८। ११।२३-२८. * पृष्ठ्ये षडहे उपदिष्टेन मध्वशनेन अतिदिष्टस्य पयोव्रतादेः समुच्चयः। **भा.** १०।४।१।१-२ वर्णकम् १. * पृष्ठ्ये षडहे गवामयनगते पूर्वे पक्षसि प्रथमे तृतीये पञ्चमे चाहनि रथंतरं गातव्यम्, द्वितीये चतुर्थे षष्ठे चाहनि बृहत् गातव्यम्। उत्तरे पक्षसि च प्रथमतृतीयपञ्चमेषु बृहत्, द्वितीयचतुर्थषष्ठेषु रथंतरमिति। **सोम.** १०।६।३. * पृष्ठ्ये षडहे गवामयनगते बृहद्रथंतरयोः प्रत्यहमेकैकस्यव अनुष्ठानम्। १०।६।३. **मीको.** पृ. १५५० 'गवामयने पृष्ठ्ये०' इत्यत्र द्रष्टव्यम्। * पृष्ठ्ये षडहे गवामयनगते सलोमे विलोमे वा अन्ते मध्वशनम्। १०।६।९. * पृष्ठ्ये षडहे चयनाग्निः कर्तुं शक्यते। **भा.** १०।८।११।२३-२८. * पृष्ठ्ये षडहे त्रयस्त्रिंशारम्भणे अन्ते (संस्थिते) मध्वशनं घृताशनं वा न तु त्रयस्त्रिंशेऽहनि संस्थिते। गवामयने उत्तरे पक्षसि। १०।६।९।२७-२८. * पृष्ठ्ये षडहे द्वादशाहगते द्वितीयेऽहनि विवृद्धस्तोमके पञ्चदशे बहिष्पवमाने वृषण्वत्तृचागमः। कालश्च तस्य चोदकप्राप्तानुरूपपर्यासयोर्मध्यम्। **वि.** ५।३।४. * पृष्ठ्ये षडहे द्वादशाहगते षट्सु अहःसु क्रमेण रथंतर–बृहत्–वैरूप–वैराज–शाक्वर–रैवतानि सामानि गातव्यानि। **शा.** १०।६।३. * पृष्ठ्ये षडहे द्वादशाहसत्रगते संस्थिते दीक्षितानां ब्रह्मचारिणामपि मध्वशनं क्रत्वर्थत्वात् कर्तव्यम्। १०।६।१२. * पृष्ठ्ये षडहे प्रत्यहमेकैकं इति षट् सामानि– रथंतरम्, बृहत्, वैरूपम्, वैराजम्, शाक्वरम्, रैवतं चेति। तैर्निष्पाद्यानि षट् पृष्ठस्तोत्राणि। **वि.** ७।३।३. * पृष्ठ्य षडहे प्रत्यहं बृहद्रथंतरयोरेकैकस्यैव अनुष्ठानं गवामयने। १०।६।३। ४-५. * यदपि **पृष्ठ्ये षडहे** श्रूयते 'संस्थिते षडहे मध्वाशयेत्' इति विहितमध्वशनेन प्राकृतपयोव्रतस्य तस्मिन्नहनि निवृत्तिमाशङ्क्य अदृष्टार्थत्वात् एव समुच्चय इत्युक्तम् (भाष्ये), तत् मध्वशनस्य देहवृत्त्यनर्हत्वेन पयोव्रतकार्यकारित्वानुपपत्तेः पूर्वपक्षोत्थानाभावात्सुत्यायां पयोव्रताभावाच्च उपेक्षितम्। अस्तु वा तदपि इहोदाहरणम्। **भाट्ट.** १०।४।१.

* **पृष्ठ्यगतेषु** उक्थ्येषु अतिग्राह्याणां विकल्पः, न पर्युदासः। **संकर्ष.** ३।३।४. **मीको.** पृ. १८९ 'अतिग्राह्याणां पार्ष्ठिकोक्थ्येषु०' इत्यत्र द्रष्टव्यम्।

* **पृष्ठ्यषडहस्य** कर्मान्तरव्यवधानेनावृत्तौ मध्वशनादेरप्यावृत्तिर्गवामयने। १०।६।११।३१. * पृष्ठ्यषडहस्य विजातीयषडहव्यवधानेन आवृत्तौ मध्वशनादेरपि आवृत्तिर्गवामयने। १०।६।११. **मीको.** पृ. १५५३ 'गवामयने विजातीय०' इत्यत्र द्रष्टव्यम्।

* **पृष्ठ्यषडहान्ते** गवामयनगते वैकल्पिकमध्वशनघृताशनयोरनुष्ठानम्। १०।६।९. **मीको.** पृ. १५५२ 'गवामयने पृष्ठ्यषडहान्ते०' इत्यत्र द्रष्टव्यम्।

* **पृष्ठ्यषडहावृत्तौ** सर्वषडहान्ते सकृदेव मध्वाद्यशनम्, न तु प्रतिषडहान्ते गवामयने। १०।६।१०। २९-३०. **मीको.** पृ. १५५४ 'गवामयनादौ पृष्ठ्यषडहावृत्तौ०' इत्यत्र द्रष्टव्यम्।

* **पृष्ठ्यषडहगतरथंतरादिसाम्नां** मध्ये वैरूपस्यैव होतुः पृष्ठे निवेशो विश्वजिति। १०।६।५।१३-१४.

* **पेटिका।** १०।२।१-७ इति सप्तसु अधिकरणेषु कृष्णलचरुविषयको विचारः कृतः इति सप्ताधिकरणरत्नानि अस्यां पेटिकायां भवन्तीति रसायनकारेणेयं कृष्णलपेटिका इत्युक्तम्। यद्यपि ८।१।८ इत्यत्र १०।१।१ इत्यत्रापि च कृष्णलविचार एव तथापि भिन्नदेशत्वात् न पेटिकायामन्तर्भवतः।

अथ क्त्वापेटिका। ४।३।१२-१५ इति चतुर्षु अधिकरणेषु क्त्वाप्रत्ययेन अङ्गत्वं वा बोध्यते कालो वा इति विचारितत्वात् सेयं क्त्वापेटिका नाम।

अथ तत्सिद्धिपेटिका। १।४।१२।२३ सूत्रस्य खण्डषट्कं कृत्वा गौणवृत्तिनिमित्तानि विवेचितानि इति सेयं षडधिकरणात्मिका तत्सिद्धिपेटिका नाम।

अथ ६।३।४-२० इति षोडशसु अधिकरणेषु प्रतिनिधेरेव विचारः कृतः इति सेयं प्रतिनिधिपेटिका महती।

अथ ३।२।९-१८ इति दशसु अधिकरणेषु सोमशेषभक्षविषयक एव विचारः इति सेयं दशाधिकरणी भक्षपेटिका इति भण्यते।

अथ ३।३।७ इत्यस्मिन् अधिकरणे श्रुतिलिङ्गादीनां विनियोजकप्रमाणानां भूयानेव विचारः कृतः इति सेयं श्रुत्यादिपेटिका इत्युच्यते। सूत्रैकत्वेऽपि अवान्तराणि भूयांस्येवाधिकरणानि इति।

अथ १०।५।९-१४ इति षट्सु अधिकरणेषु षोडशिग्रहविषयक एव विचारः इति सेयं षडधिकरणी षोडशिग्रहपेटिका इति प्रचक्षते। यद्यपि च ५।१।१८, १०।६।६ इत्यधिकरणयोरपि षोडशिन एव विचारस्तथापि भिन्नदेशत्वात् तयोर्नास्यां पेटिकायामन्तर्भावं मन्यन्ते।

ननु तर्हि प्रथमोऽध्यायः प्रमाणपेटिका, द्वितीयः कर्मभेदपेटिका, तृतीयः शेषत्वपेटिका, चतुर्थः प्रयुक्तिपेटिका, पञ्चमः क्रमपेटिका, षष्ठः अधिकारपेटिका, सप्तमाष्टमौ अतिदेशपेटिका, नवमः ऊहपेटिका, दशमो बाधपेटिका, एकादशः तन्त्रावापपेटिका, द्वादशः प्रसङ्गपेटिका, एवं संकर्षेऽपि परिचिन्तनीयम्। इति चेत्, सत्यम्, सर्वा द्वादशलक्षणी षोडशलक्षणी वा धर्मपेटिका इति वक्तव्यं स्यात्। किं बहुना विंशतिलक्षणी सर्वा मीमांसैव कर्मज्ञानपेटिका इति वाच्यं स्यात्। न चैतत् मनोरममिति पूर्वोक्तमेव युक्तमिति। **के.**

* **पेषणं** गुणकर्म, तण्डुलाः संस्कार्याः। **वि.** २।१।४. * पेषणं द्विदेवत्ये दर्शयति 'अर्धं पिष्टं भवति अर्धमपिष्टं द्विदेवत्यत्वाय' इति। वचनमिदमप्राप्ते भवति। (सोमापौष्णे चराविदम्)। **भा.** ३।३।१५।४६. * पेषणं नापूर्वजनकं दृष्टफलकत्वात्। नियमांशे तु अपूर्वम्। तेन च विधेयता। **वि.** २।१।३. * पेषणं पुरोडाशार्थं तण्डुलानां कर्तव्यम्, चरौ तु न कर्तव्यम्। पेषणेन हि पिष्टकं वा यवागूर्वा स्यात् खलिर्वा न चरुः। **के.** (भा. १०।१।१२।५०). * पेषणं पौष्णं विकृतौ निवेशनीयम्। ३।३।१३, तदपि चरावेव। १४, तत्रापि पूषैकदेवत्ये एव। १५. * महापितृयज्ञे प्रथमं श्रपणेन धानाः संपाद्य पश्चात् सक्तुभावाय **पेषणं** कार्यम्। **वि.** १०।२।३४, * **पेषणाय** दृषदि तण्डुलावापे 'धान्यमसि धिनुहि देवान्' इति मन्त्रो विहितः। शाक्यानामयने तु दृषदि पेषणाय मांसमावपन् 'मांसमसि' (तरसमसि इति युक्तम्। के.) इति मन्त्रमूहेत्। ९।१।१३ वर्णकम् २. * **पेषणस्य** आपिष्टनिर्वृत्तेरभ्यासः। **भा.** ११।१।५।२७, * पेषणस्य 'तण्डुलान् पिनष्टि' इति नियमविधिः, नानुवादः (दर्शपूर्णमासयोरिदम्)। ४।२। ११।२६. * पेषणस्य बाधः सौर्ये चरौ। १०।१।१२। ५२-५३. 'सौर्ये चरौ पेषणस्य बाधः' इत्यत्र द्रष्टव्यम्।

* **पेषणस्य** मन्ये न बाधो महापितृयज्ञे । वि. १०।२।३४ वर्णकम् २, ' महापितृयज्ञे घानासु० ' इत्यत्र द्रष्टव्यम् । * **पेषणे** दृषदुपलयोः समुच्चयः, परस्परसापेक्षत्वात् । १२।३।४.

* **पेषणान्तेन** कृष्णाजिनास्तरणादिना एकपदार्थेन अनुसमयः राजसूये नानाबीजेष्टौ । भाट्ट. ५।२।७.

* अक्षरग्रहणादीनां **पेषणादिन्यायेन** (पेषणावघातन्यायेन ९।१।३ इत्यर्थः) अवान्तरव्यापारमात्रत्वात् अध्ययनफलत्वं निराकृतम् । ... विहितस्याध्ययनस्य पुरोडाशार्थावघातवत् वाक्यार्थज्ञानार्थत्वावधारणात् तदन्तरालवर्तिनामक्षरग्रहणादीनां पेषणादिन्यायेन अवान्तरव्यापारत्वमात्रं युक्तम् । सु. पृ. २३.

* कृष्णलचरौ श्रपणमात्राङ्गभूतस्य गार्हपत्यादेरपि **पेषणादिप्रतिप्रसवान्तरविधिन्यायेन** प्राप्तौ न किञ्चित् बाधकम् । भाट्ट. १०।२।१.

* **पेषणजन्यमपूर्वं** नास्ति, किन्तु तेन द्रव्यसंस्कारो दृष्टः । पेषणनियमजन्यं तु अपूर्वं स्यात् । वि. २।१।३.

* **पेषणन्यायेन** (९।१।३) कृष्णलेषु कार्या एव भक्षधर्मा भक्षाश्च (चुच्छुषाकारेण) । भाट्ट. १०।२।३.

* **पैठराणां** (पिठरपाकवादिनां नैयायिकानां) कार्यद्रव्याण्येव घटादीनि पच्यन्ते । वा. ३।१।६।१२ पृ. ६८२.

* **पैतृके कर्मणि** (प्रेताग्निहोत्रे) दर्भाणां दक्षिणाग्रत्वम्, दैविके तु कर्मणि प्रागग्रत्वं उदगग्रत्वं वा । वि. ३।४।४.

* **पैप्पलादकं** शाखान्तरम् । भा. २।४।२।८ पृ. ६३१.

* **पैलुकाः** (वा. ३।१।६।१२ पृ. ६८३) । पीलुपाकवादिनः वैशेषिकाः । ते हि पीलुवाच्यपरमाणुषु पाकं वदन्ति, न अवयविनि घटकपालादौ । के.

* **पैलुदारवेण स्नेहेन** माध्यंदिने सवने अभ्यञ्जते (पैतुदारवेण तृतीयसवने इति ताण्ड्यब्राह्मणे) एकोनपञ्चाशद्रात्रे अञ्जनाभ्यञ्जनाख्ये सत्रे सुत्यायाम्, तेन शैत्योत्पत्तिर्भवति । वि. १०।४।७.

* **पैष्टीपानं** क्षत्रियस्य निषिद्धमेव, मधुसीधुपानं तु न निषिद्धम् । सु. पृ. १९५, * पैष्टीपानं वर्णत्रयस्यापि मनुना निषिद्धम् । पृ. १९५.

* **पोता** पुनरभ्युन्नीते ' मरुतो यस्य हि क्षये ' इति मन्त्रेण मरुतो यजति, ततः सोमो भक्ष्यते । वि. ३।२।१२, * पोता ब्रह्मणः पुरुषः ऋत्विक् । चतुर्थवर्गस्थोऽयम् । अयं पादी चतुर्थांशभाक् तिस्रो गा लभते । ' तमुन्नेता दीक्षयति ' । ३।७।१७.

* **पोत्रीया** इति समाख्यानात् समाख्यातपुरुषेण कर्तव्यमिति ज्ञायते । भा. ३।७।२०।४१.

* **पौण्डरीकाणि** (सनालपुष्परूपाणि कमलानि) बर्हींषि भवन्ति मौद्गे चरौ । भा. ९।३।२।३, * **पौण्डरीकः** द्वादशाहप्रकृतिकः, न ज्योतिष्टोमप्रकृतिकः । १०।६।१८।७२. * ' **पौण्डरीकेण** एकादशरात्रेण स्वाराज्यकामो यजेत ' । तत्र ' अयुतं पुण्डरीके दद्यात् अश्वसहस्रमेकादशम् ' । सकृदेव सा दक्षिणा दातव्या, न प्रत्यहम् । १०।६।१७. **पौण्डरीकस्य** अहःक्लृप्तिः । ' अभ्यासङ्ग्यः पञ्चाहः षष्ठस्याहस्त्रयस्त्रिंशे द्वे सवने, षट्त्रिंशमन्त्यम् । (आनन्दाश्रमीये तु ' पञ्चमः षडहः स्यादहस्त्रयस्त्रिंशे द्वे सवने षट्त्रिंशतमन्त्यः ' इति मुद्रितः पाठः अशुद्ध एव । पृ. ४८४) । चतुष्टोमोऽग्निष्टोमः त्रयश्छन्दोमाः, विश्वजित् सर्वपृष्ठोऽतिरात्रः ' इति सत्याषाढः । १७।८।३६ । **भाट्टदीपिकायाम्** (१०।६।१७) मानवसूत्रं तु ' अभ्यासङ्ग्यः षडहः, त्रयश्छन्दोमाः, चतुष्टोमोऽग्निष्टोमः, विश्वजिदतिरात्रः ' इति । अत्र सत्याषाढमानवसूत्रयोः अग्निष्टोमस्य छन्दोमानां च पौर्वापर्यव्यतिक्रमो भवति । अभ्यासङ्ग्यस्य स्वरूपं तु आश्व.श्रौ.वृत्तौ (१०।३।४) उक्तम्— तथाहि ' अभ्यासक्तस्वरूपमुच्यते । प्रथमस्याह्नो द्वे सवने त्रिवृत्स्तोमे भवतः, पञ्चदशं तृतीयसवनम् । द्वितीयस्य पञ्चदशे द्वे सवने, सप्तदशं तृतीयसवनम् । तृतीयस्य सप्तदशे द्वे सवने, एकविंशं तृतीयसवनम् । एवमुत्तरेष्वपि योज्यम् । एवमभ्यासक्तो भवति । ' इति । तथा च चतुर्थस्य एकविंशे द्वे सवने, त्रिणवं तृतीयसवनम् । पञ्चमस्य त्रिणवे द्वे सवने, त्रयस्त्रिंशं तृतीयसवनम् । षष्ठस्य तु त्रयस्त्रिंशे द्वे सवने षट्त्रिंशं तृतीयसवनमिति । के. * **पौण्डरीके** अश्वसहस्रं इति तु प्रत्यक्षोपदेशात् सामान्यप्राप्तनिषेधबाधात् न दोषो विज्ञायते (तेन तत्र न वारुणेष्टिः दातुः) । वा. ३।४।१०।२८ पृ. ९६१. * पौण्डरीके अश्वसहस्रं सत्याषाढमतेन एकादशेऽहनि, भाट्टोक्तमानवसूत्रानुसारेण वा दशमेऽहनि अग्निष्टोमे, अवशिष्टेषु अहःसु च गवां दश सहस्राणि इति विभज्य दक्षिणा दातव्या । तथा च सत्याषाढः ' अन्वहं दश सहस्राणि दद्यात् । अश्वसहस्रमुत्तमेऽहनि ' इति (१७।८।३६) । मानवं च ' अन्वहं विहृतानि सहस्राणि ददाति, चतुष्टोमेऽश्वसहस्रम् ' इति । मानवे सूत्रान्तरे च चतुष्टोमोऽग्निष्टोमः पाठक्रमेण दशम उक्तः । के.

पौण्डरीके गवायुतस्य अश्वसहस्रस्य च दक्षिणायाः प्रत्यहं विभज्य वेद्योर्मध्येन उत्तरस्यां दिशि नयनम् ॥

प्रत्यहं सर्वसंस्कारः, प्रकृतिवत्, सर्वासां सर्वशेषत्वात् । १०।६।१८।६९ ॥

भाष्यम्— पौण्डरीकः एवोदाहरणम् । तत्रैतत् समधिगतं सकृदेव परिक्रय इति ; अस्ति तु प्रकृतौ ' माध्यंदिने सवने दक्षिणा नीयन्ते ' इति । तत्र संशयः किं सर्वासां कार्त्स्न्येन प्रत्यहं नयनम्, उत सकृन्नयनम्, अथवा प्रविभज्य नयनमिति । किं प्राप्तम् ? प्रत्यहं सर्वासां संस्कारः स्यात् । कुतः ? प्रकृतिवत् । प्रकृतौ हि सकला दक्षिणास्तस्मिन् काले संस्कृताः । इहापि तद्वदेव सकलाः संस्कर्तव्या इति । कथम् ? अह्नां प्राधान्यात् । तद्गुणभावाच्च दक्षिणानाम् । सर्वा एताः सर्वेषामह्नां शेषभूताः । शेषभूतस्य चार्थस्य यः संस्कारः, स तेनतेनाह्ना प्रयुज्यते इति । तस्मात् प्रत्यहं सर्वसंस्कारः ।

एकार्थत्वान्नेति चेत् । ७० ॥

भाष्यम्— न चैतदस्ति, प्रत्यहं सर्वसंस्कार इति । किं तर्हि ? सकृदेव संस्कारः स्यात् । कुतः ? एकार्थत्वाद्दक्षिणानाम् । एकं कार्यमानमनम् । तासां च नयनादिसंस्कारसंस्कृतानां प्रत्यर्पणं कार्यम् । एकस्मिन्नपि चाहनि तत्संस्कारसंस्कृतासु दीयमानासु कृतश्चोदनार्थ इति भूयः संस्कारेण प्रयोजनं नास्ति । तस्मात् सकृत् संस्क्रियेरन् इति ।

स्यादुत्पत्तौ कालभेदात् । ७१ ॥

भाष्यम्— न चैतदस्ति, सकृत्संस्कार इति । किं तर्हि ? प्रत्यहम् । कुतः ? उत्पत्तौ कालभेदात् । उत्पत्तौ दक्षिणानां विशिष्टकालसंबन्धः श्रूयते ' तस्मात्त्रिष्टुभो लोके माध्यंदिने सवने दक्षिणा नीयन्ते ' इति । सर्वाश्चैताः सर्वेषामह्नां शेषभूताः । तेषां चाह्नां माध्यंदिनानि सवनानि भिद्यन्ते । तत्र च अगम्यमानविशेषत्वाद्यस्य माध्यंदिने सवने न संस्क्रियेरन्, तस्यैव संस्कारलोपः स्यात्, प्रयोगभेदात् । न चान्यत्र संस्क्रियमाणा अन्यत्र संस्कृता भवन्ति । तस्माद्भेदेन संस्क्रियेरन्निति ।

विभज्य तु संस्कारो वचनाद् द्वादशाहवत् । ७२ ॥

भाष्यम्— न चैतदस्ति, समस्तानां प्रत्यहं संस्कार इति । किं तर्हि ? विभज्य संस्क्रियेरन् । कुतः ? वचनात् । द्वादशाहे प्रत्यहं नयनादिसंस्कारो वचनात् क्रियते । ' अन्वहं द्वादशशतं ददाति ' इति । पौण्डरीकश्च द्वादशाहप्रकृतिः, न ज्योतिष्टोमप्रकृतिः । तस्मात् परिक्रयैकत्वेऽपि सति वचनात् भेदेन संस्कार इति ।

शा-- प्रकृतौ माध्यंदिने सवने दक्षिणानयनं श्रुतम् । पौण्डरीके च अयुतं गवां अश्वसहस्रं च माध्यंदिने सवने प्रत्यहं नेतव्यम्, उत एकस्मिन्नहनि, अथवा विभज्य प्रत्यहं गवां सहस्रं नेतव्यं अश्वसहस्रं तु एकादशे अहनि नेयमिति संशयः । विभज्य नयनमिति सिद्धान्तः ।

सोम-- पूर्ववत् प्रत्यहं कृत्स्ननयनं न बाधनीयमित्युत्थानात् **संगतिः** । **सूत्रार्थस्तु**— प्रत्यहं सर्वासां नयनं स्यात्, सर्वेष्वहःसु कृत्स्नदक्षिणायाः शेषत्वात्, मूलप्रकृतौ ज्योतिष्टोमे माध्यंदिने कृत्स्नदक्षिणायाः नयनस्य दृष्टत्वात् इति ।

वि-- ' सकृत् किं प्रत्यहं वाऽस्य नयनं तत्र चोत्तमे । सर्वस्य वा विभक्तस्य, सकृत् संस्कारसिद्धितः ॥ प्रतिमाध्यंदिनं चोदकप्राप्तेः प्रत्यहं तदा । सर्वं नेयं तदेकत्वाद्, विभज्य द्वादशाहवत् ॥ ' पौण्डरीके अस्य

दक्षिणाद्रव्यस्य किं सकृत् नयनं प्रत्यहं वा नयनं इत्येकः संशयः। तत्र च उत्तमे द्वितीये पक्षे प्रत्यहं सर्वस्य नयनं विभक्तस्य वा नयनं इति द्वितीयः संशयः। संस्कारसिद्धितः सकृत् नयनं इत्येकः पूर्वपक्षः । चोदकप्राप्तेः प्रत्यहं नयनम्, तदाऽपि प्रतिमाध्यंदिनं तदेकत्वात् सर्वं नेयं इति द्वितीयः पक्षः। द्वादशाहवत् प्रत्यहं विभज्य नयनं इति सिद्धान्तः।

[भाट्टे इदमधिकरणं सप्तदशे एवान्तर्भावितं इति 'पौण्डरीके गवायुतस्य अश्वसहस्रस्य च सकृत् दानम्' इत्यत्र द्रष्टव्यम्।]

मण्डन— 'विभज्य नयनं तस्याः।' १९.

शंकर— 'विभज्य प्रत्यहं नेया।' १९.

पौण्डरीके गवायुतस्य अश्वसहस्रस्य च सकृत् दानम् ॥

अहीने दक्षिणाशास्त्रं गुणत्वात्प्रत्यहं कर्म, भेदः स्यात्। १०।६।१७।६२ ॥

भाष्यम्— अस्ति पौण्डरीक एकादशरात्रः 'पौण्डरीकेणैकादशरात्रेण स्वाराज्यकामो यजेत' इति। तत्र श्रूयते 'अयुतं पौण्डरीके दद्यादश्वसहस्रमेकादशम्' इति। तत्र संदिह्यते किं प्रत्यहमयुतमश्वसहस्रं च दातव्यम्, उतैकमेवायुतं अश्वसहस्रं च सकृदिति। किं प्राप्तम् ? अहीने दक्षिणाशास्त्रं प्रत्यहं भिद्येत। कुतः ? गुणत्वाद्दक्षिणायाः प्रधानत्वाच्च अह्नाम्। समुदायशब्देन समुदायीन्यहानि उपलक्ष्य दक्षिणा गुणो विधीयमानः प्रतिप्रधानं भिद्येत। यथा गणाय स्नानं उपलेपनं वा विधीयमानं गणिनां भवति। एवमत्रापि द्रष्टव्यम्। प्रतिकर्मावसायी च चोदक एवमनुग्रहीष्यते । दक्षिणाभूयस्त्वाच्च फलभूयस्त्वं भविष्यति। अतोऽवगम्यते भेद इति।

सर्वस्य वैककर्म्यात्। ६३ ॥

भाष्यम्— न चैतदस्ति, प्रत्यहं दक्षिणाभेद इति। एकमेवायुतं सहस्रं च दीयते। कुतः ? ऐककर्म्यात्। एकं हि दक्षिणानां कार्यं ऋत्विगानमनम्। आनतिश्च साङ्गक्रतुनिर्वृत्तये कृतेति, अन्तरा न तया प्रयोजनमस्तीति न भूयः क्रियते। यत्तु अङ्गभूयस्त्वेन फलभूयस्त्वमिति, तत् अङ्गत्वे प्रज्ञाते भवति, नान्यथा । समुदायाङ्गं च दक्षिणा, नावयवाङ्गमित्युक्तम्। अथ यदुक्तं प्रतिकर्मावसायी चोदकः प्रतिकर्म प्रापयतीति, प्रत्यक्षवचनात् समुदायाङ्गीकरणेन च दक्षिणानां विधानमिति चोदको बाधित इति न दोषः।

पृषदाज्यवद् वाऽह्नां गुणशास्त्रं स्यात्। ६४ ॥

भाष्यम्— न चैतत् सकृदेव दातव्यमिति । किं तर्हि ? भेदेन। कुतः ? प्रत्यहं दक्षिणानां प्राप्तानामयं विशेष उच्यमानः प्रत्यहमेव भवितुमर्हतीति । पृषदाज्यवत् यथा 'पृषदाज्येनानुयाजान् यजति' इति पृषत्ता गुणो विधीयमानः प्रत्यनुयाजं भिद्यते, एवमत्रापि द्रष्टव्यमिति।

ज्योतिष्टोम्यस्तु दक्षिणाः, सर्वासामेककर्मत्वात्, प्रकृतिवत्, तस्मात् तासां विकारः स्यात्। ६५ ॥

भाष्यम्— न चैतदस्ति, भेद इति। किं तर्हि ? तन्त्रेण सकृदेव। कथम् ? ज्यौतिष्टोम्यो हि दक्षिणाः साङ्गं कर्मराशिमङ्गीकृत्य दीयन्ते। तथाभूतानां तासां च समुदायानत्यर्थानां प्राप्तानामयं विशेष उच्यते। सहस्रमयुतमिति विशेष उच्यमानो या इह दक्षिणा दीयन्ते तासामयं विकार इति गमयति, एकत्वमानतेर्न वारयति। तस्मात् सकृद्दातव्यमिति। यत्तु अनुयाजवदिति, युक्तम्, यदनुयाजेषु द्रव्यस्य भेद इति। यागे हि द्रव्यं गुणभूतं चोद्यते। तद्यागानां भेदादन्यस्य क्रियमाणं नान्यस्योपकरोतीति भिद्यते । इह तु एका आनतिरित्युक्तम्। तस्माद्विषमो दृष्टान्त इति।

द्वादशाहे तु वचनात् प्रत्यहं दक्षिणाभेदस्तत्प्रकृतित्वात्, परेषु तासां संख्याविकारः स्यात्। ६६ ॥

भाष्यम्— न चैतदस्ति, सकृद्दातव्यमिति। प्रत्यहमयं विशेषो भिद्यते । कुतः ? द्वादशाहे हि प्रत्यक्षं वचनम्, 'अन्वहं द्वादशशतं ददाति' इति। पौण्डरीकश्च द्वादशाहप्रकृतिः । तस्मात् पौण्डरीके प्रत्यहं चोदकप्राप्त्या प्रसक्तानां दक्षिणानामयं विशेष उच्यमानस्तथैव कर्मावयवसंबद्धानां विकार इति गम्यते । ततो भेदेन दक्षिणानां विशेष इति।

परिक्रयाविभागाद्वा समस्तस्य विकारः स्यात्। ६७ ॥

भाष्यम्— न चैतदस्ति, दक्षिणाभेद इति । किं तर्हि ? सकृदेव दक्षिणा दीयेतेति। कुतः ? परिक्रयाविभागात् समस्ता दक्षिणा विक्रियेरन्। कृत्स्नं हि क्रतुमङ्गीकृत्य दक्षिणा विधीयन्ते। कथम् ? तावतः पुरुषार्थत्वात्। यत् फलवत्, तत् पुरुषस्य चिकीर्षितम्। तच्च कुर्वाणस्य सहायानुपाददानस्यायं विशेष उच्यते परिक्रयः। न चावयवः फलवान्, समुदायात् फलनिष्पत्तेः। समुदायं चाङ्गीकृत्य परिक्रयः क्रियमाण आसमुदायनिर्वृत्तेः परिक्रयः कृत इत्यन्तरा न भूयः क्रियते। अपि च, पौण्डरीकशब्दसंयोगेन परिक्रयविशेष उच्यमानस्तच्छब्दवाच्यस्यैव भवतीति गम्यते। समुदायश्च पौण्डरीकशब्दवाच्यो नावयवः। स हि समुदायशब्देन लक्ष्यते। तत्र लक्षणैव दोषः। असंभवे हि लक्षणा आश्रीयते । न चेहासंभवः। अतः समुदायमङ्गीकृत्य सकृदेव ऋत्विजो क्रियेरन्निति। तस्मात् सकृत्परिक्रय इति । सकृद्दाने च प्रयोगवचनानुग्रहः। प्रयोगप्राशुभावाच्च महाविषयता शास्त्रस्येति। तस्मादप्येतदेव न्याय्यमिति।

भेदस्तु, गुणसंयोगात्। ६८ ॥

भाष्यम्— यदुक्तं द्वादशाहप्रकृतित्वात्पौण्डरीकस्य, तत्र च द्वादशाहे दक्षिणाभेदात् तथाभूताया एवेह विशेष उच्यते इति, तत् परिहर्तव्यम्। अत्रोच्यते । तत्राप्येकत्वात् क्रतोरेक एव परिक्रयः। भेदस्तु वचनात् सुत्यासंबन्धप्रयोजनो दक्षिणासंस्कारप्रयोजनश्च, न तस्मिन् भिद्यमाने परिक्रयैकत्वं भिद्यते इति।

शा— तत्र (पूर्वः पक्षः) '**दक्षिणा ह्यहरङ्गत्वात् प्रत्यहं भेदमर्हति। (उत्तरस्तु-) एकप्रयोगपातात्तु तन्त्रेणैका प्रतीयते ॥'**

सोम— सत्रात् भिन्ने अहीने अर्थात् अन्यकर्तृके सिद्धे तत्र दक्षिणायाः प्रतिप्रधानं भेदेनानुष्ठानबाधचिन्तनात् संगतिः । **सूत्रार्थस्तु**— अहीने पौण्डरीकादौ प्रत्यहं प्रधानभेदात् दक्षिणाया अपि भेदः स्यात्, तस्याः गुणत्वादिति । अहीने इति सामान्योक्त्या पौण्डरीको-दाहरणप्रदर्शनार्थमित्याहुः।

वि— 'अयुतादि प्रत्यहं स्यात् सकृद्वा, ऽङ्गत्वनुसारतः। आद्यो भवेत्, प्रयोगोऽङ्गी तदैक्येन सकृद् भवेत् ॥' अतः सकृदेव दानम्।

भाट्ट— (भाष्यस्थे १७-१८ अधिकरणे एकीकृत्य व्याख्या द्रष्टव्या)। पौण्डरीको नामाहीनः एकादशरात्रः। तत्र 'अयुतं दक्षिणा अश्वसहस्रमेकादशम्' इति श्रुतम्। तत्र किं प्रत्यहमश्वसहस्रं गवां चायुतं देयम्, उतैकमेव विभज्य देयं इति चिन्तायाम्, सत्यपि ज्योतिष्टोमे दक्षिणायाः प्रयोगाङ्गत्वे अहीनात्मके द्वादशाहे तथैव प्राप्तावपि च तत्र 'अन्वहं द्वादशशतं ददाति' इत्यनेन तत्तदहरङ्गत्वेन द्वादशशतविधानान्नात्र दक्षिणायाः कृत्स्नप्रयोगाङ्गत्वम्, अतश्च तत्तत्प्रधानाङ्गभूतैव इयं दक्षिणा अङ्गेषु प्रसङ्गादुपकरोतीति न ततोऽन्या दीयते। अतश्च पौण्डरीकेऽपि प्रतिसुत्यमतिदेशेन भेदेनैव दक्षिणाप्राप्तौ अश्वसहस्रमयुतं च विधीयमानं भेदेनैव द्वादशशतबाधेन प्राप्नोति । वस्तुतस्तु ज्योतिष्टोमेऽपि प्रयोगाङ्गकर्त्रानत्यर्थतया साङ्गप्रधानार्थत्वेन प्राप्ताया अपि दक्षिणायाः 'दक्षिणा सोमस्य' इति वचनेन प्रधानमात्रार्थत्वावसायात् द्वादशाहेऽपि प्रतिकर्मावसायिभिश्चोदकैर्भेदेनैव गृह्यमाणविशेषणतया सवनीयादिवत्प्रधानमात्रार्थे दक्षिणाप्राप्तेः 'अन्वहं द्वादशशतं ददाति' इत्ययं विधिर्न प्रधानार्थत्वबोधकः, किन्तु द्वादशशतातिरिक्ताश्वादिपरिसंख्यार्थ एव। अन्वहमिति तु अतिदेशप्राप्तप्रधानार्थत्वानुवादः। अतश्च पूर्ववदेव प्रकृतितोऽपि प्रतिसुत्यं भेदेनैव दक्षिणाप्राप्तेः तत्राश्वसहस्रादि विधीयमानं भेदेनैव प्राप्नोति । इति प्राप्ते, ज्योतिष्टोमे प्रधानमात्रार्थाया अपि दक्षिणायाः प्रधानप्रयोगीयकर्त्रानतिद्वारैव प्रधानार्थत्वम्, न तु साक्षात्। अत एव नाङ्गेषु पृथक् तस्याः करणम्। एवं सत्यपि प्रधानमात्रार्थविधेः प्रयोजनं अङ्गविकारेष्वनतिदेशः। अतश्च द्वादशाहेऽपि प्रतिकर्मावसायिभिः चोदकैस्तत्तदहर्मात्राङ्गत्वेन प्राप्यमाणमपि द्वादशशतं तत्तदहःप्रयोगीयकर्त्रानतिद्वारैव प्राप्यते । अतश्चाङ्गेष्विव प्रधानान्तरेष्वपि न पृथक्करणं प्राप्नोति । अतश्च विनिगमनाविरहादेकमेव द्वादशशतमादावन्ते वा दीयमानं सर्वप्रधानाङ्गं संपद्यते। अतश्च 'अन्वहं द्वादश-

शतम्’ इत्यनेन प्राप्ताया दक्षिणायाः पुनस्तदङ्गत्वेन विधौ वैयर्थ्यापत्तेः, सकृत्क्रियमाणत्वेन प्रसक्तायाः ‘अन्वहम्’ इत्यनेन आवृत्तिविधिः। इतरथा अश्वादिपरिसंख्यार्थत्वे अन्वहं इत्यस्य आनर्थक्यापत्तेः। सा चावृत्तिः न द्वादशशतस्य, तत्तत्सुत्यामात्रोपकारकतया एकस्मिन्नप्यहनि दीयमानस्य तस्य प्रयोगैक्येन सुत्यान्तरोपकारकत्वावश्यम्भावात्। अपितु तत्तत्प्रयोगीयकर्त्रानतिरूपव्यापारबाधाय द्वादशशतरूपसाधनस्यैव तत्पृष्ठभावेन प्राप्तस्य बाधमङ्गीकृत्य सुत्यासमसंख्यद्वादशशतसमुदायस्यैव दक्षिणात्वकल्पनया। साऽपि च दक्षिणा सर्वेषामेवाह्नां तत्तत्प्रयोगीयकर्त्रानतिद्वारा अङ्गं सत् तन्त्रेण सर्वेषामुपकारिका। प्रत्यहं तु तदवयवरूपं द्वादशशतं विभज्य वचनाद्दीयते इति विभागोऽपि तदङ्गं प्रकृतौ। तदिह पौण्डरीकेऽपि तत्स्थाने विहितमयुतमश्वसहस्रमपि तत्तदह्नां तत्तत्प्रयोगीयकर्त्रानतिद्वारा तन्त्रेणैवाङ्गम्। अतिदेशप्राप्तावयवविभागवशाच्च अवयवशो विभज्य प्रत्यहं देयम्। अत एव ‘संपूर्णमयुतमश्वसहस्रं च प्रत्यहं माध्यंदिनसवने नेतव्यम्, अथवा एकस्मिन् कस्मिंश्चिदहनि’ इति पूर्वपक्षद्वयं मूलोक्तं (१८।६९ सूत्रभाष्ये) उपेक्षितम्, अतिदेशप्राप्तविभागबाधे प्रमाणाभावात्। तदर्थमधिकरणान्तररचना तु वृथैव। (१७। ६२–६८, १८।६९–७२ इति भाष्ये)। स च विभागः न (तन्त्ररत्ने) पार्थसारथिरीत्या ‘प्रत्यहं गवां सहस्रं अश्वसहस्रं त्वेकादशेऽहनि’ इत्येवंरूपः। **मानवसूत्रे** ‘अन्वहं विहृतानि सहस्राणि ददाति चतुष्टोमेऽश्वसहस्रम्’ इति अश्वसहस्रस्य दशमेऽहनि विधानात्। एवं हि पौण्डरीके अहःक्लृप्तिः तेनोक्ता, ‘एकादशरात्रेण पौण्डरीकेण यजेत पारमेष्ठ्यकामोऽभ्यासङ्ग्यः षडहः त्रयश्छन्दोमाश्चतुष्टोमोऽग्निष्टोमो विश्वजिदतिरात्रः’ इति। अतो दशमेऽहनि अश्वसहस्रं दत्त्वा अवशिष्टेषु गवां सहस्राणीति विभागः।

मण्डन— ‘दक्षिणा सकृदश्रुतेः।’

शंकर— ‘एका। पौण्डरीकस्य दक्षिणा।’ १८.

* **पौण्डरीकबर्हिषि** ‘पुण्डरीकैः स्तृणीत रक्तैः’ इत्यूहः कर्तव्यो मौद्गे चरौ। ९।३।२।३. **मीको.** पृ. १२२६ ‘ऊहः रक्तपदस्य०’ इत्यत्र द्रष्टव्यम्।

* ‘**पौरुषेयं** कथं वस्तु विदध्यात् शाश्वतो विधिः।’ **वा.** १।३।८।२४ पृ. २७२. * **पौरुषेयं** वाक्यं यतो लिङ्गभूतम्, अत एव प्रत्ययितस्य नियमेन प्रमाणान्तरपूर्वकार्थाभिधायिनो वचनं सत्यम्। तथा श्रोतुः इन्द्रियविषयं अप्रत्ययितवचनमपि सत्यम्। यत्पुनः अप्रत्ययितवचनं श्रोतुश्च न प्रमाणान्तरपूर्वकम्, न तत् सत्यम्। **ऋजु.** पृ. २१. * **पौरुषेयः** ऊहग्रन्थश्छन्दोगानाम्। ९।२।१ वर्णकम् २. * **पौरुषेयेण** वचसा न सर्वत्र साक्षादर्थ एव प्रतीयते, पुरुषेच्छापरतन्त्रत्वात्। असत्यपि अर्थे पुरुषा वाक्यानि प्रयुञ्जाना दृश्यन्ते। तेन अर्थं प्रति नियमाभावात् तेभ्यः न अर्थसिद्धिः। वक्तुरभिप्रायं तु स्वकारणं सूचयेयुः। स चाभिप्रायः प्रमाणपूर्वकश्चेत्, ततः तस्य प्रमाणस्य प्रमाऽविनाभावात् तन्मुखेन वाक्यार्थ निश्चयानुमानमेव, तेन अनुमानस्यायं बाधः। अनुमानावसेयं प्रमाणान्तरदर्शनमत्र बाध्यते, न पुनः बाह्यं वस्तु हस्तियूथशतरूपं इति तत्र वचनस्य अव्यापारात्। यत्र विषये यत् प्रमाणं प्रवृत्तम्, तत्र तस्य बाधो भवति, न वचनस्य बाह्येऽप्यर्थे प्रवृत्तिः, तत्र तस्य प्रवृत्तिनियमाभावात्। **ऋजु.** पृ. २१. * **पौरुषेयाद्वचनात्** ‘एवमयं पुरुषो वेद’ इति भवति प्रत्ययः, न तु ‘एवमयमर्थः’ इति। (वैदिकात्तु वचनात् एवमयमर्थ इति भवति प्रत्ययः)। विप्लवते हि खल्वपि कश्चित् पुरुषकृतात् वचनात् प्रत्ययः। न तु वेदवचनस्य मिथ्यात्वे किञ्चन प्रमाणमस्ति। **भा.** १।१।२।२ पृ. १७. * **पौरुषेये** वाक्ये वाक्यभेदापत्तिरदोषः। **ऋजु.** पृ. ७०, * पौरुषेये हि वाक्ये प्रमाणान्तरापेक्षमेव शाब्दम्। पृ. ३४. * **पौरुषेयेषु** वाक्येषु परिग्रहापरिग्रहौ विवक्षाविवक्षयोः फलत्वेन प्रज्ञातौ। **वा.** ३।१।७।१३ पृ. ७००.

* **पौरुषेयत्वमापद्येत** (वेदे यथाश्रुतादोषदप्यन्यथात्वे कल्पिते, अत्यन्तातीन्द्रियत्वात्। **वा.** १।२। १।७ पृ. ११२ तलपङ्क्तौ. * पौरुषेयत्वं न तावत् स्वतन्त्रपुरुषप्रणीतत्वम्, भारते अव्याप्तेः। नापि शब्दाजन्यवाक्यार्थगोचरयथार्थज्ञानजन्यजातीयत्वम्, भारतादौ असंभवात्। किन्तु तदुच्चारणेच्छाजन्यवाक्यत्वं तदर्थधीजन्यवाक्यत्वं सजातीयोच्चारणानपेक्षोच्चरितजातीयत्वं वा। स्मृतिपुराणादिषु अव्याप्तिवारणाय सजातीयेति। **मणि.** पृ. ७–८. * पौरुषेयत्वं पुरुषोत्प्रेक्षाप्रभवत्वम्। **सु.** पृ. ५३२. * पौरुषेयत्वं वाक्यस्य नाम प्रमाणान्तरापेक्षस्वार्थप्रतीतार्थप्रत्यायनपरतया प्रयोगः, न वर्णादिकार्यता। **ऋजु.** पृ. ३४.

* **पौरुषेयवचसां** प्रमाणान्तरप्रतीतार्थप्रत्यायनपरत्वेन प्रमाणान्तरवशात् वाक्यभेदादयो दोषा एव न भवन्ति। **ऋजु.** पृ. ३२.

* **पौरुषेयवाक्यानां** द्विविधः स्वभावः। तत्रैको वक्तरि उच्यमानवाक्यार्थज्ञानवत्त्वावधारणसामर्थ्यात्मकः। यथा आप्तवाक्येषु (पूर्वपूर्व–)वक्तृज्ञानद्वारा अर्थनिश्चयः। अनाप्तवाक्ये तु मूलभूतवक्तृज्ञाने सम्यक्ज्ञानत्वं दुर्घटं भवति तत्र अप्रामाण्यमेव इत्यपरः स्वभावः। **वैद्यनाथः.** १।१।२।२ पृ १६–१७, * **पौरुषेयवाक्येषु** अर्थनिश्चयप्रतिष्ठा मूलावधारणद्वारैव। १।१।२।२ पृ. १६.

* **पौरोडाशिकमिति** समस्तमेव दर्शपूर्णमासकाण्डमभिधीयते। **वा.** ३।३।७।१४ पृ. ८५५. * पौरोडाशिकमिति समाख्याते काण्डे सांनाय्यक्रमे ‘शुन्धध्वं दैव्याय कर्मणे’ इति शुन्धनार्थो मन्त्रः समाम्नातः। स क्रमस्य बलीयस्त्वात् सांनाय्यपात्राणां शुन्धने विनियोक्तव्यः, न तु समाख्यानेन पुरोडाशपात्राणां शुन्धने। **भा.** ३।३।७।१४ पृ. ८५५. * पौरोडाशिकमिति समाख्याते दर्शपूर्णमासकाण्डे पठितो मन्त्रः साधारणे प्रकरणे वर्तमानः क्रमेण च अनुन्मीलितलिङ्गेन अविनियुज्यमानः पुरोडाशस्यैव वा प्राथम्यात् प्राप्नुवन् श्रुत्या सांनाय्यार्थशाखाऽङ्गत्वेन विधीयते ‘इषे त्वेति शाखां छिनत्ति’ इति। (तेन श्रुतिः समाख्याया बलवती)। **वा.** ३।३।७।१४ पृ. ८३६. * **पौरोडाशिकानां** प्रोक्षणादीनां सौमिकपदार्थपूर्वभावित्वं ज्योतिष्टोमे सुत्यायाम्। ५।१।१३।२५–२६.

पौरोडाशिकाज्यभागन्यायः । आज्यभागन्यायः। आज्यभागादयः अन्यतोऽलब्धोपकाराः पशुपुरोडाशे कर्तव्याः॥

जैमिनेः परतन्त्रापत्तेः स्वतन्त्रप्रतिषेधः स्यात्। १२।१।२।७॥

भाष्यम्— तस्मिन्नेव पशुपुरोडाशे चिन्ता। किमाज्यभागौ कर्तव्यौ, उत नेति। आह। तत एतत् परीक्ष्यम्, किं प्रसङ्गेन चोदको बाध्यते, उत प्रयोगवचन इति। यदि चोदको बाध्यते, ततो न कर्तव्यौ। अथ प्रयोगवचनः, ततः कर्तव्याविति। किं पुनरत्र युक्तम्? चोदको बाध्यत इति। किं कारणम्? आनुमानिकश्चोदकः, प्रत्यक्षः प्रयोगवचनः, प्रत्यक्षं चानुमानाद्बलीयः। दुर्बलस्य च बाधो न्याय्यो न च बलीयसः। एवं चेन्न कर्तव्यौ। चोदकेन हि तौ प्राप्येयाताम्, स चेह बाधितत्वान्नास्तीति। एवं प्राप्ते, **उच्यते**। जैमिनेराचार्यस्य मतं कर्तव्यौ आज्यभागाविति। कुतः? यतः परतन्त्रापत्तेः स्वतन्त्रप्रतिषेधः स्यात्। यस्य स्वस्य तन्त्रस्य कार्ये परतन्त्रमापद्यते, तस्य प्रतिषेधः स्यात्। यथा पौरोडाशिकानां पाशुकम्। यस्य तु न किञ्चित्परकीयं कार्यमापद्यते, तत्प्रतिषेधो न युक्तः। यथा देवदत्ते यज्ञदत्तयानमारूढे देवदत्तयानं निवर्तते, न वस्त्रालङ्कारः। न चेह आज्यभागयोः कार्ये किञ्चित् पाशुकमङ्गमापद्यते। तस्य प्रतिषेधो न युक्तः। तस्मात्तयोरनिवृत्तिः। यत्तु प्रत्यक्षः प्रयोगवचन इति। नैवात्र प्रयोगवचनस्य प्रवृत्तिः। स हि अङ्गान्युपगृह्णीयात्। पाशुकैरेव चाङ्गैः पुरोडाशोऽङ्गवान्। प्रत्यक्षोऽपि ह्ययं नाज्यभागौ गृह्णाति। प्रकरणसंनिहितमङ्गं प्रयोगवचनेन गृह्यते। न च पशावाज्यभागौ विद्येते, प्रतिषिद्धत्वात्। ‘तौ न सौम्येऽध्वरे न पशौ’ इति। अपि चोक्तमेतत्, प्रयोगवचनः उत्पन्नानामङ्गानां ग्राहकः। चोदकस्तूत्पादको ग्राहकश्च। तस्मात् स बलवान्।

टुप्— जैमिनेः परतन्त्रापत्तेः स्वतन्त्रप्रतिषेधः स्यात्। (भाष्यकारीयमुदाहरणं प्रदर्शनार्थमिति दर्शयन्नाह–) अस्यैव (पशुपुरोडाशस्य यत् पशौ अविद्यमानम्) आज्यभागनिर्वापप्रोक्षणादि (तत्) कर्तव्यं न

वेति संशयः । ततः (तत्सिद्ध्यर्थम्) इदमाह (भाष्यम्) किं प्रयोगवचनेन चोदको बाध्यते, उत प्रयोगवचनश्चोदकेनेति (नेमे कर्तरि तृतीये, किन्तु सह-प्रयोगे, किं प्रयोगवचनेन सहित एव पुरोडाशयागः, न तु स लुप्यते चोदकस्तु लुप्यते, अथवा विपर्यय इति)। चोदकबाधे (अवघातादेः) अकरणम् । प्रयोगवचन-बाधे (तु) करणम् । तत्र आनुमानिकत्वात् चोदको बाध्यते, न तु प्रयोगवचनः, तस्य प्रत्यक्षत्वात् । इति पूर्वः पक्षः । सिद्धान्तस्तु (पाशुकेन प्रयोगवचनेन पौरो-डाशिकस्य) प्रयोगवचनस्य एकदेशो बाध्यते (न समस्तस्य बाधः) । कतरोऽसौ (एकदेशः) ? उच्यते । (उपसंग्रहः प्रयोगवचनः । तत्र) उपशब्दः समीप-वचनः, सम्-शब्दः साकल्यवचनः, ग्रहशब्दो गृह्णाति-वचनः (अनुष्ठानवचनः) । एवं त्र्यंशः प्रयोगवचनः । तत्रायं (प्रयोगवचनः) ग्रहणात्मकस्वरूपः । इतरे तु (द्विवचनमिदम्) अस्य समीपकरणसाकल्ये (मुद्रिते रत्ने च पाठः, समीपकरणसाकल्यकरणे इति लिखित-टुप्-पाठः) विशेषणे । ताभ्यां सः (प्रयोगवचनः) विशिष्टः सर्वत्रोपलभ्यते । (तत्र बाध्यमंशं दर्शयति-) विशेषणं च अन्यथाऽनुपपत्त्या गृह्यते । इतरथा 'अहं (प्रयोगवचनः) साकल्यसामीप्यविशिष्टो न भवामि' इति (इत्येवमर्थात्) सामीप्यं साकल्यं च करोति (न श्रुत्या) । इह च पाशुकेन प्रयोगवचनेन केषां चित् (प्रयाजादीनाम्) अङ्गानां सामीप्यं कृतम् । (अतः) तेषामन्यथाऽनुपपत्तिः क्षीणा । येषां तु आज्य-भागनिर्वापप्रोक्षणावहननादीनां न कृतं (पशुना सामी-प्यम्,) तेषामन्यथाऽनुपपत्त्या सामीप्यं करोत्येव । तस्मात् (प्रयाजादिविषयः) सामीप्यकरणैकदेशो बाध्यते प्रसङ्गेन तस्य (प्रयोगवचनस्य) ।

अथ यदुक्तम्, आनुमानिकत्वात् चोदकस्य (दुर्बलस्य) बाधः इति, तन्न । (नहि चोदको दुर्बलः । कुतः ?) यदि चोदकः उत्पत्तिप्राप्ती न करोति, (ततः) कस्य सामीप्यकरणम्, कस्य वा साकल्येनोपसंग्रहः । तस्मात् प्रत्यक्षोऽपि प्रयोगवचनः चोदकात् दुर्बलः, उत्तर-कालत्वात् (तस्मात् प्रयोगवचनस्यैव बाधः) अपिच सति चोदके प्रसङ्गः (आत्मानं लभते । तथाहि,) यदि चोदकः आघारादीनि पत्नीसंयाजान्तानि (अङ्गानि) पशुपुरोडाशस्य कल्पयति संबन्धित्वेन (आघारादिजन्या-नुपकारानित्यर्थः) तत उत्तरकालं प्रयोगवचनः समीपे करोति । तच्च समीपकरणं पाशुकेन (प्रयोगवचनेन) कृतम्, इति (कृत्वा न स्वयं करोति इति-) प्रसङ्गस्य आत्मलाभः (भवेत् नान्यथा । कथमित्यत आह-) यदि च तस्य (पुरोडाशस्य) अङ्गानामुत्पत्तिप्राप्ती न स्तः, तथा सति अनुत्पन्नानां (अङ्गत्वाभावात् पाशुकेन चोदकेन पुरोडाशाङ्गत्वासिद्धेः) प्रयोगवचनस्य समीपकरणशक्ति-रेव नास्ति । समीपकरणाभावात् (च) अन्येन कृतं सामीप्यमिति नैवोपपद्यते अनाकाङ्क्षितत्वात् ।

शा— **'तत्र प्रयोगवचनः प्रत्यक्षत्वान्न बाध्यते । चोदकस्त्वनुमेयत्वाद् दुर्बलो बाधमर्हति ॥'** (इति पूर्वपक्षन्यायः ।) इति प्राप्ते, ब्रूमः । **'चोदकेना-ङ्गकार्याणां पुरोडाशान्वये सति । प्रयोगवचनः पश्चात् तद्विशिष्टं विधास्यति ॥'** तेन प्रयोगवचनैक-देशो यः प्रयाजादिविषयः, स बाध्यते, अङ्गान्तरेषु तु सोऽपि न बाध्यते ।

सोम— पूर्वोक्तप्रसङ्गोपजीवनात् **संगतिः** । प्राभा-करास्तु आज्यभागादाविव प्रयाजादिष्वपि पौरोडाशिक-प्रयोगवचनस्य व्यापारमङ्गीकृत्य तदंशेऽपि प्रयोजकत्वान्न बाधः, प्रयोजकैकस्वभावत्वात् विधेः परकीयतन्त्रमध्ये विधानमात्रेण तस्य तत्स्वभावानपायात् स्वयंप्रयोजकोऽपि विधिः तन्त्रमध्ये विधानात् परप्रयुक्तिमुपजीवति इति न पृथगनुष्ठानम् । न तु एतावता विधेः प्रयोजकत्वाभावः, तथा सति प्रसङ्गिनः पुरोडाशादिविधेः अप्रयोजकस्य वाजिनादिविधेश्च विशेषो न स्यात् इत्याहुः । **सूत्रा-र्थस्तु-** जैमिनेराचार्यस्य मते कर्तव्यमाज्यभागादि यतः यस्य स्वतन्त्रस्य स्थाने परतन्त्रमापद्यते, तस्यैव प्रतिषेधः । आज्यभागादेस्तु स्थाने न किञ्चित् पाशुकमापतति इति ।

वि— 'आज्यभागौ पुरोडाशे न स्तः स्तो वा, ऽस्य चोदकः । कुतस्ततो न तौ, मैवं प्रयोगांशस्य लोपनात् ॥'

भाट्ट— यानि त्वङ्गानि आज्यभागावघातादीनि पशौ न विद्यन्ते, तानि किं पुरोडाशे कर्तव्यानि न वेति चिन्तायाम्, पुरोडाशभावनायाः इतिकर्तव्यतापेक्षायां संनिहितपाशुकचोदकप्रापिताङ्गजन्योपकाराणामेव उपस्थित-त्वेन स्वापूर्वजननानुकूलयोग्यताजनकत्वमात्रकल्पनया इति-कर्तव्यताकाङ्क्षाशान्तेः न पुरोडाशविधिना स्वतन्त्राति-देशकल्पनं गौरवात् । अतश्च यथैव गृहमेधीये क्लृप्तो-पकाराज्यभागाभ्यामेव निराकाङ्क्षत्वान्नातिदेशकल्पनम्, तथा प्रकृतेऽपि क्लृप्तैरेव उपकारात् निराकाङ्क्षत्वात् अतिदेशकल्पनानुपपत्तेः, नाज्यभागादीनामङ्गत्वे प्रमाण-मस्ति । अत एव प्रयोज्यवर्गाभावात् पुरोडाशप्रयोग-विधेरपि प्रधानमात्रे एव व्यापारः, न तु अङ्गांशे, तज्जन्योपकारांशे वा, इत्यपि लाघवम् । न च एवमपि एकादशकपालसंपादकसंनिपत्योपकारकाङ्गापेक्षयैव अति-देशकल्पनम्, तथात्वे गृहमेधीयेऽपि तदापत्तेः । वस्तुतस्तु अनोवासोऽधिकरणन्यायेन (७।३।११।२९) लोकसिद्धैकादशकपालस्यैव ग्रहणात् न प्रयोगमध्ये तत्क-रणावश्यकता । गृहमेधीयचरोस्तु वाचनिकानामेव कति-पयानां संनिपत्योपकारकाणां पाठात् प्रयोगमध्ये करणं इति विशेषः । अतश्च नाज्यभागादीनां पुरोडाशार्थं करणम् । इति प्राप्ते, पाशुकाङ्गोपकाराणां पुरोडाशापूर्व-जननानुकूलयोग्यतां प्रति तत्तद्विजातीयापूर्वत्वेनैव वस्तुतो जनकत्वेऽपि तत्कार्यकारणभावबोधकपदकल्पनायां न तावत् पुरोडाशयागप्रधानीभूतपश्वपूर्वसंबन्ध्यङ्गजन्योप-कारैः योग्यतां भावयेत् इत्येवंविधा कल्पना, तथात्वे अपूर्वाणामपि उपयाजादिजन्यापूर्वाणां एतद्योग्यताजनक-त्वापत्तेः । न चेष्टापत्तिः । ज्यौतिष्टोमिकाङ्गजन्या-पूर्वाणामपि सवनीयोपकारजनकत्वापत्त्या तत्रापि दैक्षाति-देशानापत्तेः । पश्वपूर्वसंबन्ध्यङ्गजन्योपकारकत्वस्य पुरो-डाशजन्यापूर्वे बाधिततया यूपादिजन्योपकारे च अति-प्रसक्तत्वेन तादृशपदस्य कल्पयितुमशक्यत्वाच्च । अतः अवश्यं स्वप्रधानीभूतपशुयागसादृश्योपस्थितसांनाय्यसं-बन्ध्यङ्गजन्याबाधितोपकारैः निरुक्तयोग्यतां भावयेत् इत्येव कल्पना वाच्या, तद् वरं स्वसादृश्योपस्थिताग्नी-षोमीयपुरोडाशयागसंबन्ध्यङ्गजन्योपकारैः निरुक्तयोग्यतां भावयेत् इत्येव कल्पना । अतश्च युक्त एव पुरोडाशे ऐष्टिकधर्मातिदेशः । तेन च सर्वोपकारेषु प्राप्तेषु तत्पृष्ठ-भावेन पदार्थातिदेशवेलायां य एवोपकारो नान्यतो लभ्यते तदंशे पदार्थातिदेशस्य तत्प्रयोगविधेश्च आवश्यकत्वात् युक्तमेव आज्यभागादीनां करणम् । ये तूपकारा अन्यतो लब्धाः, तद्विषये अतिदेशप्रयोजनाभावात् नातिदेशः । पदार्थानामुपकारांशे त्वस्त्येव सः । यद्यपि च नोपकारस्य पृथगतिदेशो गौरवात्, अतिदेशलक्षणस्य अव्याप्तेश्च, तथापि एकेनैवातिदेशेन प्राकृतोपकारद्वारा पदार्थानां विकृत्यङ्गत्वं बोधयता उपकारस्यापि विकृतिसंबन्धावगमात् सिध्यति तस्यापि अतिदेशविषयत्वम् । एवं च प्रसङ्ग-स्थले अतिदेशेन प्राकृतोपकारद्वारा अन्यत उपकारालाभे एव पदार्थविधानात् तल्लाभे उपकारसंबन्धसिद्धावपि पदार्थविधायकाभावात् नातिदेशः । पदार्थानां अनुष्ठेय-त्वाभावाच्च न प्रयोगविधिरपि । अत एव सर्वत्र प्रकृतौ विकृतौ वा अङ्गविधिषु एवं वाक्यार्थः- 'अन्यत उपकारा-लाभे अनेनाङ्गेन योग्यतां संपादयेत्' इति । अत एव प्रकृतेरपि दैवात् विततविकृतिप्रयोगमध्येऽनुष्ठाने प्रसङ्गेन उपकारलाभात् न प्रयाजाद्यनुष्ठाम् । पशुपुरोडाशेऽपि च दैक्षे नित्यतया यथाशक्ति एकादशप्रयाजाद्यननुष्ठानेनापि क्रियमाणे पुरोडाशार्थमेव पञ्चप्रयाजाद्यनुष्ठानम्, तदा च पशोरपि प्रसङ्गित्वम्, अन्यत उपकारलाभस्या-विशिष्टत्वात् । अत एव तन्त्रमध्यपातादिकमपि उपकार-लाभोपलक्षणमेव । अतो यत्र अन्यत उपकारलाभः, तज्जनकपदार्थांशे न वा अतिदेशः, न वा प्रयोगविधिः, इतरांशे तु उभयं इति सिद्धम् । न चैवं अप्रयोज्येऽपि प्रयोगविध्यभावात् प्रसङ्गे ततो विशेषानापत्तिः, अन्यत उपकारालाभे प्रसङ्गस्थले प्रयोगविधिसत्त्वेन ततो भेदात् । वस्तुतस्तु चतुर्थोक्तप्रयोज्यत्वाभावे एव अप्रयोज्यत्वम्, तद्भिन्नमेव उक्तविधप्रसङ्गत्वं इति नाभेदशङ्का । अप्रयो-ज्यत्वव्याप्यमेव तु प्रसङ्गत्वं इति ध्येयम् । यत्तु चोदक-प्रयोगविध्योः उभयोः सत्त्वेऽपि प्रयोजनाभावात् अननु-ष्ठानमिति **प्राभाकरमतम्**, तत् विधिना विहितस्य गुणविशेषविशिष्टस्य प्रयाजादेः अननुष्ठाने विहितगुणा-भावेन प्रयोजनलाभानुपपत्तेः उपेक्षितम् । अस्मन्मते तु

गुणविधानाभावादेव न वैगुण्यमिति विशेषः । यत्तु अस्मिन्नधिकरणे **मूले** प्रयोगविधिमङ्गीकृत्य चोदकलोपेन पूर्वपक्षकरणम्, चोदकाङ्गीकारेण प्रयोगविधिमात्रलोपेन च सिद्धान्तकरणम्, **तत्** निर्युक्तिकत्वात् प्रयोजनाभावाच्च उपेक्षितम् ।

मण्डन— 'तत्राज्यभागाद्यधिकं च किंचन ।' तत्र पशुपुरोडाशे ।

शंकर— 'पुरोडाशे त्वसन्न तु ।' ३. प्रकृतौ असत् न प्रयुज्यते, सत् तु प्रयुज्यते एव ।

* यदा तु निमित्तनिश्चयः चतुर्धाकरणकाले तदा देवताऽऽवाहनं **पौरोडाशिकाज्यभागन्यायेन** (१२।१।२।७) कर्तव्यमित्युक्तं तन्त्ररत्ने । **सोम.** १०।१।१ वर्णकं ३.

* **पौरोडाशिककर्मार्थे** हविष्कृदाह्वाने वाग्विसर्गः कर्तव्यः अग्नीषोमीये पशौ । ११।३।८. **मीको.** पृ. १२२ 'अग्नीषोमीये पशौ वाग्विसर्गः०' इत्यत्र द्रष्टव्यम् ।

* **पौरोडाशिकशब्दः** मन्त्रब्राह्मणयोः अपठितत्वात् अवैदिकः न अङ्गाङ्गिभावः । स च शब्दस्य अवैदिकत्वेऽपि अनादिसंप्रदायत्वात् विद्यमानस्मृतिमूलत्वाच्च प्रमाणम् । पौरोडाशिकशब्दोऽस्य वाचक इति नैतदतीन्द्रियम् । **वा.** ३।३।७।१४ पृ. ८५७.

* **पौरोडाशिकसमाख्यात**ब्राह्मणाम्नातानां प्रयाजादीनां समाख्यया पुरोडाशमात्रार्थत्वे प्राप्ते प्रकरणात् सांनाय्योपांशुयाजार्थत्वमपि सिद्धम् । प्रकरणं समाख्याया बलवत् । **वा.** ३।३।७।१४ पृ. ८३७–८३८.

* **पौरोडाशिकहविष्कृदाह्वान**काले पाशुकवाग्यमस्य विसर्गः । ११।३।८।१८.

* **पौर्णमासेष्टिगताग्नीषोमीयहविष** एव उत्कर्षो ब्राह्मणस्य । आधानीयेष्टिपूर्वत्वसोमपूर्वत्वयोस्तु विकल्प एव ब्राह्मणस्यापि । **रत्न.** ५।४।५।१५–१६.

* **पौर्णमासहविःशब्देन** अग्नीषोमीयपुरोडाशस्यैव ग्रहणं तस्यैव ब्राह्मणस्य सोमादुत्कर्षः । उपांशुयाजाज्यमपि अग्नीषोमीयं ब्राह्मणेन सोमात् प्राङ्न कर्तव्यम् । परन्तु प्राजापत्यं वैष्णवं वा कर्तव्यमेवेति न तस्योत्कर्षः । **भा.** ५।४।६।१९–२१.

* **पौर्णमासी** आग्नेयोपांशुयाजाग्नीषोमीयाणां त्रयाणां यागानां समुदायः । अमावास्या आग्नेयः, ऐन्द्रं दधि, ऐन्द्रं पयः इति त्रयाणां यागानां समुदायः । वि. २।२।३.

* **पौर्णमासी न दर्शविकारः**, न वा दर्शः पौर्णमासीविकारः । ५।१।१६. * **पौर्णमासी सोमादूर्ध्वं** द्विपुरोडाशा प्राक् सोमादेकपुरोडाशा । **भा.** १०।८।१८।६२.

* **पौर्णमासी** सोमात् प्राक् अग्नीषोमीयपुरोडाशरहिता केवलाग्नेयपुरोडाशयुक्ता भवति । तत्र च उपांशुयाजोऽपि वैष्णवः प्राजापत्यो वा कर्तव्यः । १०।८।१८.

♅ पौर्णमासीमित्यत्र पौर्णमासीसमुदायविधिः ॥

('अग्नीषोमीयेण यजेत पौर्णमासीम्' 'अमावास्यामभिचरन्' इति प्राकरणिकं वाक्यद्वयम्) प्रथमवाक्ये तु प्रकृत एव अग्नीषोमीयो यागः अवेष्टिवत् पृथक्कृत्य फलाय विधीयते, द्वितीयविधिप्रकारे अतीव-लाघवात् । तथा चैन्द्रवायवाग्रतावत् नित्यकाम्योऽयम् । **इति प्राप्ते,** समुदायवाचिपौर्णमासीपदवैयर्थ्यापत्तेः उक्तरीत्या चतुर्थ एव विधिप्रकारो युक्तः । **संकर्ष.** १।२।१७.

* 'पौर्णमासीं यजते' 'अमावास्यां यजते' इत्येतौ शब्दौ प्रकृतानां कर्मणामनुवादितारौ । नापूर्वयोर्विधातारौ । २।२।३।३–८. * **पौर्णमास्याः** माघ्याः पुरस्ताच्चतुरहे गवामयनस्य दीक्षा । ६।५।९।३०–३७.

* **पौर्णमास्यां** अग्नौ प्रहरणार्थं शाखा नोत्पादयितव्या । **भा.** ४।२।४।१०–१३. * पौर्णमास्यामग्निसहितस्य (सोमस्य) चोदितत्वात् केवलस्य (सोमस्य) प्रकाशनं महेन्द्राधिकरणे निराकृतम् । **वा.** ३।१।१३।२३.

♅ पौर्णमास्यामनियमोऽविशेषात् । ६।५।९। ३० ॥

'पुरस्तात् पौर्णमास्याश्चतुरहे दीक्षेरन्' इति गवामयने सत्रे श्रुता या पौर्णमासी सा कस्य मासस्य इत्यत्र अनियमः । पौर्णमास्यां कस्यां चित् ग्रहीतव्यायामनियमः स्यात् । अविशेषात् विशेषस्य अनुक्तत्वात् इति एकः पूर्वपक्षः ।

आनन्तर्यात्तु चैत्री स्यात् । ३१ ॥

प्रथमपूर्वपक्षनिराकरणाय तुशब्दः । न अनियमः किन्तु चैत्री पौर्णमासी स्यात् चित्रानक्षत्रयुक्ता चैत्रमासगता । कुतः ? आनन्तर्यात् । उक्तवाक्यादनन्तरं 'ऋतुमुखं वैषा पौर्णमासी संवत्सरस्य, या चैत्री पौर्णमासी' इति श्रूयते । संदिग्धेषु वाक्यशेषात् इति न्यायेन सा पौर्णमासी चैत्रीति निश्चीयते इति द्वितीयः पूर्वपक्षः ।

माघी वैकाष्टकाश्रुतेः । ३२ ॥

पूर्वपक्षद्वयं प्राप्तं वाशब्देन निरस्यन् सिद्धान्तमाह । सा पौर्णमासी माघी माघमासस्य स्यात् । कुतः ? एकाष्टकाश्रुतेः । सोमक्रये हि एकाष्टकाश्रुतिर्भवति । 'तेषामेकाष्टकायां क्रयः संपद्यते' इति । माघ्याः पौर्णमास्याः पुरस्तात् चतुरहे दीक्षितस्य एकाष्टकायां माघकृष्णाष्टम्यां क्रयः शक्यते कर्तुम् । तस्मात् माघी पौर्णमासी इति सिद्धान्तः ।

अन्या अपीति चेत् । ३३ ॥

पूर्वपक्षी शङ्कते । अन्या अपि अष्टम्यः सर्वाः एकाष्टका एव । द्वादश एकाष्टकाः । तथा च एकाष्टकायां कृष्णाष्टम्यां सोमक्रयसंपादनार्थं पौर्णमासीशब्देन या काचित् पौर्णमासी ग्राह्या अनियमेन । न चैत्री एव, न वा माघी एव । इति चेत् ।

न, भाक्तत्वादेषा हि लोके । ३४ ॥

सर्वा एव कृष्णाष्टम्यः अष्टकाः इति पूर्वपक्षोक्तं निरस्यति । न सर्वाः कृष्णाष्टम्यः अष्टका वस्तुतो भवन्ति । तासु अष्टकाशब्दस्य भाक्तत्वात् । एषा हि एषा एव माघी कृष्णाष्टमी लोके मुख्या । मुख्यगौणयोश्च मुख्ये संप्रत्ययः । तस्मात् माघकृष्णाष्टमी एव अष्टका स्यात् । मीमांसादर्शने तु भक्तित्वादिति पाठः स्वीकृतः । 'य' लिखितपुस्तके तु भाक्तत्वात् इत्येव पाठः ।

दीक्षाऽपराधे चानुग्रहात् । ३५ ॥

गवामयनस्य दीक्षा एकाष्टकायां यदि क्रियेत तदा तस्याः संमानः स्यात् । परन्तु 'चतुरहे पुरस्तात् पौर्णमास्याः' इति वचनेन दीक्षा अन्यदा एव उक्ता । तेन दीक्षायाः अपराधः अन्यथाभावः अष्टकया असंबन्धः उक्तः । एतादृशे दीक्षापराधे सति अष्टकायाः अनुग्रहोऽप्युक्तः । 'तेषामेकाष्टकायां क्रयः संपद्यते, तेन एकाष्टकां न छंबट् कुर्वन्ति' इति वचनेन एकाष्टकायां सोमक्रयः कर्तव्यो भवति, तेन च दीक्षाया एकाष्टकायाश्च संमान एव भवति, छंबट् न कुर्वन्ति व्यर्थतां न कुर्वन्ति इत्युक्तम् । अस्मात् अनुग्रहवचनात् एकाष्टकायाः प्राक्तनी पौर्णमासी 'चतुरहे पुरस्तात् पौर्णमास्याः' इति पौर्णमासीशब्देन ग्राह्या इति सिध्यति । सा च माघी पौर्णमासी एव नान्या इति ।

उत्थाने चानुप्ररोहात् । ३६ ॥

'चतुरहे पुरस्तात् पौर्णमास्या दीक्षेरन्, तेषामेकाष्टकायां क्रयः संपद्यते' इत्युक्ता पौर्णमासी माघी एव न चैत्री इत्यत्र हेत्वन्तरमाह सिद्धान्ती । एकाष्टकायां नाम माघकृष्णाष्टम्यां सोमक्रयं कृत्वा समारब्धं गवामयनं नाम सत्रं समाप्य यत् उत्थानम्, तत् माघान्ते स्यात् । ततो नातिदूरं वसन्तस्यारम्भः, 'मीनमेषौ वसन्तः' इति पद्धतेः स्वीकारात् । चैत्रपौर्णमास्याः समनन्तरगामिन्यां कृष्णाष्टम्यां सोमक्रये तु चैत्रान्ते उत्थानं स्यात्, स च वसन्तसमाप्तिकालः । उत्थानविषयकस्तु अर्थवाद इत्थं 'तानुत्तिष्ठत ओषधयो वनस्पतयोऽनूत्तिष्ठन्ति' इति । अत्र सत्रिणामुत्थाने सति तदनु ओषधिवनस्पतीनामुत्थानमुक्तम् । ओषधिवनस्पतीनामुत्थानं नाम प्ररोहः । स च प्ररोहः वसन्तादौ भवति न वसन्तान्ते । एतस्मात् ओषध्यादिप्ररोहार्थवादात् ज्ञायते माघान्ते एव गवामयनसमाप्तिरिति । अर्थात् गवामयनारम्भः माघे एव स्यात् । तेन 'पुरस्तात् चतुरहे पौर्णमास्याः' इति पौर्णमासीशब्देन माघी एव पौर्णमासी ग्राह्या न चैत्री इति निश्चीयते । तदिदमुक्तं सूत्रेण । उत्थाने, गवामयनात् सत्रिणां उत्थाने सति, अनु तस्मादनन्तरम्, प्ररोहात् ओषधीनां वनस्पतीनां च उत्थानात् उत्थानप्रतिपादनात् पौर्णमासी माघी एवेति ।

अस्यां च सर्वलिङ्गानि । ३७ ॥

सिद्धान्ते हेत्वन्तरपरं सूत्रम् । चकारः समुच्चये । अस्यां माघ्यां पौर्णमास्यां सर्वाणि लिङ्गानि युज्यन्ते न चैत्र्याम् । तथाहि, 'आर्तं वा एते संवत्सरस्याभिदीक्षन्ते, य एकाष्टकायां दीक्षन्ते' इति । आर्ता

यस्मिन् काले भवन्ति सत्रिणः स आर्तः कालः। शीतेन च आर्ता भवन्ति। शीतं च माघे, न चैत्रे। तथा 'व्यस्तं वा एते संवत्सरस्याभिदीक्षन्ते, य एकाष्टकायां दीक्षन्ते' इति। अयनपरिवृत्तिः व्यस्तशब्देन उच्यते। अयनपरिवृत्तिश्च माघफाल्गुनयोः, न चैत्रे। तथा 'अपो नाभिनन्दन्तोऽवभृथमभ्यवयन्ति' इति। माघान्ते शैत्ये सति अवभृथगमने अपामभिनन्दनं न स्यात्। चैत्रे तु अभिनन्दन्तः अवभृथमभ्यवेयुः। एतेभ्यो लिङ्गेभ्यो ज्ञायते माघ्याः पौर्णमास्याः पुरस्ताच्चतुरहे गवामयनस्य दीक्षा, न चैत्र्याः पौर्णमास्याः पुरस्तात् इति। **के.**

* पौर्णमास्याममावास्यायां वा ऐन्द्राग्नादयो विकृतयः कर्तव्याः, 'य इष्टया पशुना सोमेन वा यक्ष्यमाणः स पौर्णमास्याममावास्यायां वा यजेत' इति वचनात्। **भा.** ५।४।७।२२–२४. * पौर्णमास्यां आग्नेयादिषु देशकालकर्तॄणामेकत्वादङ्गानां तन्त्रेणानुष्ठानम्। ११।१।१०. * पौर्णमास्यामेकपुरोडाशायामपि उपांशुयाजः। १०।८।१८।६२–७१. **मीको.** पृ. ११९५ 'उपांशुयाजः एकपुरोडाशायाम्' इत्यत्र द्रष्टव्यम्। * पौर्णमास्यामेव उपांशुयाजः। तत्र च प्रजापतिः विष्णुः अग्नीषोमौ च विकल्पेन देवता। १०।८।१७।५१–६१. * पौर्णमास्यां चतुर्दश आहुतयो हूयन्ते, त्रयोदश अमावास्यायाम्। (पञ्च प्रयाजाः द्वौ आज्यभागौ आग्नेयाग्नीषोमीयौ पुरोडाशौ उपांशुयाजः स्विष्टकृत् त्रयोऽनूयाजा इति चतुर्दश। अमावास्यायामुपांशुयाजाभावात् आग्नेयः ऐन्द्रं सांनाय्यं इति त्रयोदश)। **भा.** ४।१।४।१०. * पौर्णमास्यां चतुर्होत्रा हविरभिमर्शनम्। 'पृथिवी होता' इत्यादिको मन्त्रश्चतुर्होता। **वि.** ३।७।४. * 'पौर्णमास्यां पौर्णमास्या यजेत' इति कालस्य नियमविधिः, नानुवादः। **भा.** ४।२।९।२३–२४. * 'पौर्णमास्यां पौर्णमास्या यजेत' इति कालविधानेन अनेकेषां प्रधानानां साङ्गानां साहित्यावगमात् तन्निर्वाहाय पदार्थानुसमयः। **सोम.** ५।२।१. * पौर्णमास्यां प्रणयनकाले ब्रह्मवरणम्, अमावास्यायां पूर्वेद्युः। **भा.** १२।१।१८।३९. * 'पौर्णमास्यां यजेत' इत्यादिना दर्शपूर्णमासकर्मणा सह कालस्य संबन्धो विधीयते, न कर्मान्तरम्। **वि.** २।३।१३, * पौर्णमास्यां वत्सापाकरणार्थायाः शाखाया अभावात् उपवेषाय शाखाच्छेदो न कर्तव्यः। अङ्गारेषु कपालोपधानार्थं कस्य चित् काष्ठस्योपादानं कार्यम्। ४।२।३. * पौर्णमास्यां सूक्तवाकस्य प्रयोगे पूर्णमासीदेवतानां निष्कर्षे अमावास्यादेवतानामनन्वयः। इतरत्र चेतरासाम्। (तथा च इतरत्र इतरदेवतानां संकीर्तनमर्थलुप्तम्)। **भा.** ११।३।१६।५३. * पौर्णमास्यां सोमात् प्राक् एकपुरोडाशायां सत्यामपि उपांशुयाजः स्यादेव। १०।८।१८. * पौर्णमास्यां हविरभिवासनोत्तरं वेदिकरणम्। **बाल.** पृ. १९.

* **पौर्णमास्यतिपाते** प्रायश्चित्तं कृत्वा यत्र केवलं दर्शोऽनुष्ठीयते, तत्र दर्शाङ्गतया वैमृधो न कार्यः। **सोम.** ४।३।१४.

* **पौर्णमास्यधिकरणम्।** पौर्णमासीन्यायः। २।२।३।३–८. * पौर्णमास्यधिकरणं विना इज्याधिकरणस्य (४।४।११) पूर्वपक्ष एव स्यात् इति इज्याधिकरणस्य पौर्णमास्यधिकरणप्रयोजनत्वेन आरम्भः। **सु.** पृ. ७३२. * वार्त्रघ्न्यधिकरणस्य **पौर्णमास्यधिकरणेनापौनरुक्त्यम्,** विद्वद्वाक्ये कर्मान्तरत्वावेदकप्रमाणाभावात् तत्र मन्त्रविनियोजकत्वानुपपत्तावपि आग्नेयादिषु तदुपपत्तेः नानयोः (वार्त्रघ्नी पौर्णमास्यामनूच्येते, वृधन्वती अमावास्यायां) व्यवस्थाऽर्थत्वं इत्यधिकाशङ्कोत्थानात्। **कौ.** ३।१।१३।२३ पृ. २११. * पौर्णमास्यधिकरणेन अभ्यासापवादः करिष्यते समुदायानुवादत्वात्। **पौर्णमास्यधिकरणस्य** च उपांशुयाज– (२।२।४) आघाराग्निहोत्र– (२।२।५), पशुसोमाधिकरणानि (२।२।६) अपवादः। **वा.** २।१।१।१ पृ. ३७१. * **पौर्णमास्यधिकरणे** अनेकगुणोपादानलक्षणस्य पूर्वकर्मसंयोगहेतोर्व्युत्पादनं कृतम्। **सु.** पृ. ८२७. * पौर्णमास्यधिकरणे (२।२।३) अनेकगुणविधाने वाक्यभेदापत्तेः समुदायानुवादकत्वसिद्धिराश्रीयते। **वाक्यार्थ.** पृ. २०. * पौर्णमास्यधिकरणे एव प्राप्ते कर्मणि अनेकगुणविधानासंभवेन गुणनिमित्तकभेदो व्युत्पादितः। **सोम.** २।२।९. * पौर्णमास्यधिकरणे 'गुणस्तु श्रुतिसंयोगात्' 'चोदना वा गुणानां युगपच्छास्त्रात्' इति सूत्राभ्यां प्रमाणान्तरप्राप्तकर्मणि अनेकगुणविधानं प्रसङ्गान्निराकृतम्।

कु. २।२।९।२३. * आग्नेयवाक्ये आग्नेयद्रव्यं पौर्णमास्यमावास्याकालमित्युक्तं कौस्तुभे **पौर्णमास्यधिकरणे।** **भाट्ट.** ८।१।६. * आमिक्षावाक्ये तावत् प्राप्तकर्मानुवादेन द्रव्यदेवतारूपानेकगुणविधानात् वाक्यभेदापत्तेः पौर्णमास्यधिकरणे प्रसङ्गादुक्तेन वाक्यभेदापादकेन गुणेनैव कर्मविधित्वमविवादम्। **कौ.** २।२।९।२२ पृ. २५६. * दर्शपूर्णमासनाम्नः प्रसिद्धार्थकत्वं उपपादितं पौर्णमास्यधिकरणे। **भाट्ट.** ४।४।११. * न केवलं अबाधपक्षपातितयैव वाक्येन तयोः (लिङ्गक्रमयोः) अबाधः, अपितु नियमविधिलाघवानुरोधेनापि इत्युक्तं पौर्णमास्यधिकरणे। **कौ.** ३।१।१३।२३ पृ. २१२, * 'य इष्टया' इत्यादौ यत्र प्रयोगोऽपि प्राप्तस्तत्र कर्मानुवादेन कालांशे विनियोगविधिरेव इत्युक्तं पौर्णमास्यधिकरणे। २।३।१३।२६ पृ. ९३. * यत्रानेकार्थविधिव्यापारं विना विशेषणवैशिष्ट्यस्यासिद्धिः, तत्र विशेषणविशेष्यसंबन्धसिद्ध्यर्थं विशिष्टविधानार्थं च विधायकप्रत्ययस्य व्यापारभेदात् विध्यावृत्त्या वाक्यभेदः, यथा पौर्णमास्यधिकरणे विद्वद्वाक्यविहितकर्मणि आग्नेयादिवाक्यैर्गुणविधिपक्षे। **कु.** २।२।१२।२७. * यत्रापूर्वभावनाविधिः तत्र विधिफलस्य विशेष्ये एवैकस्मिन् सत्त्वात् आर्थिकेन च विध्यन्तरेण विशेषणानां विधानात् नावृत्तिः इति स्पष्टं पौर्णमास्यधिकरणे। **कौ.** २।२।५।१६ पृ. १९९, * यत्र तु कारकत्वसंबन्धेन वृत्तिः यथा आग्नेयः इत्यादौ तत्र प्राथमिकक्रियाऽन्वयं विना कारकत्वायोगात् वृत्तेश्च पाष्ठिकसंबन्धेनापि निर्वाहोपपत्तेः नादावेव अष्टाकपालसंबन्धः। अपितु भावनासंबन्धद्वारक एवासौ। विवरिष्यते चैतत् पौर्णमास्यधिकरणे वाक्यभेदोपपादनार्थम्। २।१।२।५ पृ. ३८, * वार्त्रघ्नीवृधन्वत्योः कालकृतव्यवस्थापक्षः पौर्णमास्यधिकरणे एव निराकृतः। ३।१।१३।२३ पृ. २११, * वार्त्रघ्नीवृधन्वतीमन्त्राणां व्यवस्था च कर्मकृता (न तु कालकृता) इत्युक्तमेव पौर्णमास्यधिकरणे। ३।१।१३।२३ पृ. २१२. * (दर्शपूर्णमास–) समुदाययोश्च फलसाधनत्वाभ्युपगमे पौर्णमास्यधिकरणे तन्निरासादरोऽपि विरुध्यते। **सु.** पृ. ६११.

* अभ्यासनिमित्तभेदापवादभूता समुदायानुवादचिन्ता (विद्वद्वाक्ये) **पौर्णमास्यधिकरणकृता।** **सु.** पृ. ८०७.

* **पौर्णमास्यधिकरणगुणसूत्रोक्तन्यायः।** (२।२।३।६)। 'वाक्यान्तरेण चोदिते कर्मणि गुणानां कर्मार्थत्वात् परस्परार्थत्वाभावेन परस्परवैशिष्ट्याभावे सति एकगुणविशिष्टगुणान्तरविध्यसंभवात् तस्यतस्य गुणस्य कर्तव्यत्वमुपदिश्यते' इति। **सोम.** ६।२।२.

* दर्शे पूर्णमासे च त्रिकस्यत्रिकस्य एकप्रयोगतासिद्धिः एकादशोक्ता **पौर्णमास्यधिकरणवार्तिकोपपादिता** उपपन्ना। **बाल.** पृ. १३.

* **पौर्णमास्यमावास्याधिकरणम्।** पौर्णमासीन्यायः। २।२।३।३–८.

* **पौर्णमास्यमावास्याशब्दौ** कर्मवाचिनौ, न तु हविर्वाचिनौ। **वि.** ३।७।४.

* **पौर्णमास्यमावास्याशब्दन्यायेन** (पौर्णमासीन्यायेन २।२।३) आघाराग्निहोत्रशब्दयोः प्रत्येकरूपवाचित्वावधारणात् प्रत्येकरूपस्यैव कर्मत्वं वाच्यम्। तच्च विरुद्धम्। **सु.** पृ. ७६२.

* **पौर्णमास्यादिपर्वणो**ऽप्यनादरः सोमाधानपक्षे सोमकालबाधे इति केचित्। तत्त्वं तु ऋतुनक्षत्रयोरेवानादरो नञ्द्वयबलात् ('नर्तुं पृच्छेन्न नक्षत्रम्')। पर्वपञ्चाहत्वान्नादरस्तु कर्तव्य एव। **भाट्ट.** ५।४।५.

* **पौर्णमास्यादिसमुदायप्रयुक्तं** नाभिमर्शनम्, किन्तु अपूर्वप्रयुक्तं दर्शपूर्णमासयोः। **भा.** ९।१।५।११–१९.

* **पौर्णमासीकालः** वैकल्पिकी विष्ण्वादिः देवता च उपांशुयाजे। १०।८।१७।५१–६१.

* **पौर्णमासीगताग्नीषोमीयस्य** हविषः ब्राह्मणस्य सोमादूर्ध्वमुत्कर्षः। पौर्णमासेष्टेरेवोत्कर्ष इत्येकदेशिमतम्। **भा.** ५।४।४।१०–१४.

卐 **पौर्णमासीन्यायः।** विद्वद्वाक्यद्वयं समुदायद्वयानुवादः॥

प्रकरणं तु पौर्णमास्यां रूपावचनात्। २।२।३।३॥

भाष्यम्— एवं हि समामनन्ति ‘ यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति ’ ‘ तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यजन् इति, ताभ्यामेतमग्नीषोमीयमेकादशकपालं पौर्णमासे प्रायच्छत् , ऐन्द्रं दध्यमावास्यायाम्, ऐन्द्रं पयोऽमावास्यायाम् ’ इति । तथा ‘ आघारमाघारयति ’ ‘ आज्यभागौ यजति ’ ‘ स्विष्टकृते समवद्यति ’ ‘ पत्नीसंयाजान् यजति ’ ‘ समिष्टयजुर्जुहोति ’ । तथा ‘ य एवं विद्वान् पौर्णमासीं यजते ’ ‘ य एवं विद्वानमावास्यां यजते ’ इति । तत्र संदेहः सर्वाण्येतानि समप्रधानानि उत आग्नेयादीनि पयोऽन्तानि प्रधानानि, आघारादीनि आरादुपकारकाण्यङ्गानि । तथा य एवं विद्वानित्येवं संयुक्तौ प्रकृतानां कर्मणामनुवदितारौ अथवा ‘ य एवं विद्वान् पौर्णमासीं यजते, य एवं विद्वानमावास्यां यजते ’ इत्यपूर्वयोः कर्मणोर्विधातारौ, तत्रेतरे गुणविधयः इति । किं प्राप्तम् ? शब्दान्तरत्वादभ्यासाच्च समप्रधानानि । **इति प्राप्ते, ब्रूमः ।** प्रकरणं तु पौर्णमास्याम् , प्रकृतानामाग्नेयादीनां अनुवदितारौ पौर्णमास्यमावास्यासंयुक्तौ । कुतः ? रूपावचनात् । य एवं विद्वान् पौर्णमासीसंज्ञकं यागं यजते इति न सर्वे यागा उच्यन्ते । यः पौर्णमासीसंज्ञकः स विधीयते । न चैतदेवमवगच्छामः कीदृशमेवंसंज्ञकस्य यागस्य रूपमिति । तेन न किञ्चित् प्रतिपद्येमहि । अतो ब्रूमो यद्यपूर्वस्य विधातारौ अनर्थकाविति । अथ तु प्रकृतानामनुवदितारौ, ततः संनिहिताः पौर्णमास्यमावास्यासंयुक्ता यागा इति गम्यते रूपम् । तत्रार्थवत्ता वचनस्य । कथं पुनरेकवचनान्तो बहूनां वाचको भविष्यतीति यद्युच्यते, समुदायशब्दतया अवकल्पिष्यते । रूपवन्तो हि पूर्वप्रकृता यागाः । तेषां च प्रचयशिष्टः समुदायोऽप्यस्ति । तदपेक्षोऽयमरूपशब्दः । तस्मादेकवचनान्तता न दोषः । भवति हि बहूनामेकवचनान्तः शब्दः समुदायापेक्षो यथा यूथं वनं कुलं परिषदिति । यदा आग्नेयादीनां समुदायवचनावेतौ, तदा दर्शपूर्णमासशब्देनैते एवाभिधीयन्ते । तत एषां फलसंबन्धः, फलवत्संनिधेस्तु आघारादीनि आरादुपकारकाणीति ।

वा— समस्तान् दर्शपूर्णमासप्रकरणयागविधीनुदाहृत्य किं सर्वेषां प्रधानत्वम् , उत केषांचिदेव इति भाष्यकारेण विचारः प्रस्तुतः । तत्राभिधीयते ‘ **अङ्गप्रधानचिन्तेयं चतुर्थाध्यायगोचरः । केन नाम प्रसङ्गेन प्रस्तुता भेदलक्षणे ॥** ’ अभ्यासलक्षणभेदानन्तरमिदानीं संख्यानिमित्तं भेदमविचार्यैव कथमयं लक्षणानौपयिकोऽर्थः चिन्त्यते ? **केचिदाहुः** , अयमपि लक्षणार्थ एव ‘ अनन्तरं प्रधानाप्रधानानि परीक्षिष्यन्ते ’ इति (भाष्य-) वचनात् (भा. २।१।१।१ पृ. ३७१) । तत्तु अयुक्तम् । तत्रैव पर्यनुयुज्य वचनस्य अन्यथैव व्याख्यानात् । अपूर्वभेदप्रतीत्यर्थो हि स तृतीयसिद्धोऽर्थः अत्रोपन्यस्तः इत्युक्तम् । अयं तु कर्मणामङ्गाङ्गिभावो न कथञ्चित् संबध्यते । महता प्रयत्नेन अयं चतुर्थे साधयिष्यते ‘ दर्शपूर्णमासयोरिज्याः प्रधानानि ’ इत्यत्राधिकरणे । स्फुटत्वाच्च नान्यथा तत् नेतुं शक्यते । तस्मादिह अविचारणीयमेतत् । ‘ य एवं विद्वान् ’ इत्येवं संयुक्तौ प्रकृतानुवादौ, अथवा अपूर्वकर्मविधी ‘ तत्रेतरे गुणविधयः ’ इत्यपि सर्वं (भाष्योक्तम्) यथोपन्यस्तेनापि अधिकरणार्थेन न संगच्छते । अथ तु एतदेव विचार्यते, ततः पूर्वं नोपन्यसितव्यम् । अपिच ‘ **भेदे च दृष्टसामर्थ्यौ समप्राधान्यसिद्धये । कथं शब्दान्तराभ्यासौ हेतुत्वेनोपवर्णितौ ॥** ’ ‘ शब्दान्तरादभ्यासाच्च भेदस्तावदुच्यते, समप्रधानत्वमपि एताभ्यामेव प्रतिपाद्यते ’ इत्यपूर्वा युक्तिः । न वा अधिकरणद्वयशरीरस्य विविक्ताः पक्षहेतवो दृश्यन्ते, येन तन्त्रेण विचारद्वयमिदं प्रस्तुतं इत्यध्यवस्येम ।

तस्मादेवं समर्थयितव्यम् । इह अभ्यासलक्षणभेदातिप्रसङ्गापवादार्थं अधिकरणे आरभ्यमाणे यथोदाहृतानां मध्ये द्वे एवोदाहरणे ‘ य एवं विद्वान् पौर्णमासीं यजते ’ ‘ य एवं विद्वानमावास्यां यजते ’ इति । तत्र संदेहः किमेतौ यजतिशब्दौ अपूर्वयोः कर्मणोर्विधायकौ, उत पौर्णमास्यमावास्याशब्दाभ्यां स्वाभिधेयकालविशेषयुक्तकर्मप्रतिपादकाभ्यां विशेष्यमाणौ प्रकृतानेव कांश्चित् यागान् अनुवदतः इति । तत्र इतरेषामाग्नेयादीनां गुणात् , प्रयाजादीनामभ्यासात् , आघारादीनां शब्दान्तरत्वात् सिद्धे भेदे अधिकरणपक्षद्वयप्रयोजनभूतसमप्रधान-

भावाङ्गाङ्गिभावविषयत्वेन उपन्यासो नाधिकरणशरीरविषयत्वेन । नहि समप्रधानत्वमङ्गाङ्गिभावश्च अधिकरणपक्षौ इत्युक्तम् । तदिह पौर्णमास्यमावास्यासंयुक्तयोर्विधातृत्वम्, तदभिधेयकर्मभेदः, समस्ताघारादीनां समप्राधान्यम्, इत्येतत् त्रयं उत्तरोत्तरफलत्वेन अविनाभावसंबन्धात् एकः पक्षः । तथा तयोरनुवादत्वम्, तद्वाच्यकर्माभेदः, आग्नेयादीन् प्रति आघारादीनामङ्गत्वम्, इति तेनैव प्रकारेण अपरः त्रिकः । त्रितयस्यत्रितयस्य च स्वांशाविनाभावात् एकसिद्ध्यैव इतरद्वयसिद्धिर्भवति इति पक्षद्वयेऽपि यदेव साधितम्, तेनैव इष्टसिद्धिं मत्वा फलभूतस्तृतीयः तृतीयोंऽश उपन्यस्तः । तत्र चार्थगृहीतावपि भेदाभेदौ विस्पष्टीकरणार्थं पुनरन्ते दर्शितौ । किमर्थं पुनरादौ व्यवहितयोः समप्रधानाङ्गाङ्गिभावद्वारेण भेदाभेदयोरुपन्यासः कृतः ? एषा हि आचार्यस्य शैली इति केचित् (फलद्वारा उपन्यासो भाष्यकृत्प्रक्रिया इति) । तथाहि पूर्वाधिकरणयोरपि अपूर्वभेदमेव उपन्यस्तवान् । (स्वमतेन लिङ्गदर्शनानुसारेण एवं कृतमिति परिहरति–) अथवा यत् लिङ्गदर्शनं वक्ष्यति ‘ विकृतौ प्रयाजादयो दृश्यन्ते ’ इति (चतुर्थसूत्रे), तत् साक्षात् भेदनिराकरणाय असमर्थं समप्रधानभावं निराकरिष्यति । तन्निराकरणे च सति अविनाभावात् विधिभेदावपि निराकृतावेव भवतः , इति तदुपजीवनाय इत्थमुपन्यासः । केवलभेदोपन्यासे तु तदसंबद्धमेव स्यात् ।

तत्र द्वेधा पूर्वपक्षो भविष्यति । एकः समप्राधान्यद्वारेण आग्नेयादीनां कर्मविधित्वे सत्येव पौर्णमास्यमावास्यासंयुक्तयोः तद्व्यतिरिक्तकर्मविधानात्, अपरः पुनः तयोरेव कर्मविधित्वं इतरेषां तु गुणविधानार्थत्वं इत्येवम् । प्रथमं तावत् व्यतिरेकपक्षं परिगृह्णाति ‘ शब्दान्तरत्वात् अभ्यासाच्च समप्रधानानि ’ इति । यद्यपि चैतौ हेतू साक्षात् समप्रधानत्वेन न संगच्छेते, तथापि तत्प्रतिज्ञानेन योऽर्थात् भेदः प्रतिज्ञातः, तेन संबन्धादेकवाक्यत्वम् । एतदुक्तं भवति– ‘ अयागेभ्यः शब्दान्तरत्वात् , यागेभ्यश्च अभ्यासात् भेदः, ततश्च समप्रधानानि ’ इति । न च समस्तानुवादस्य किञ्चित् प्रयोजनमस्ति । न च गुणफलनिमित्तानां किञ्चित् श्रूयते, यत्र विधिव्यापारतः कर्मस्वरूपविधानमुपेक्षेत । न च एषा संज्ञा केषु चित् प्रकृतेषु प्रसिद्धा । वर्तमानापदेशेऽपि च सति प्रयोगवचनार्थवादपञ्चमलकारादीनामन्यतमेन ‘ समिधो यजति ’ इत्यादिवत् विधिः । सत्यपि च यच्छब्दोपबन्धे ‘ यदाग्नेयोऽष्टाकपालः ’ इत्यादिवत् विधिशक्त्यनवलोपः । न च शाखाऽन्तरीयवत् विधिविकल्पः, शाखाऽन्तराणां पुरुषान्तरं प्रति प्रतिपादनेन अर्थवत्त्वात् । न तु इह कर्मान्तरकल्पनादन्यत् प्रयोजनमस्ति । न च कस्य चिदन्यस्य विधेः स्तुतिः संभवति, एकवाक्यत्वाभावात् । किं पुनरनयोः कर्मणोर्द्रव्यदेवतम् ? तदुच्यते । ‘ **ध्रौवं साधारणं द्रव्यं, देवता मान्त्रवर्णिकी । रूपवन्तावतो यागौ विधीयेते पृथक्तया ॥** ’ ‘ सर्वस्मै वा एतद् यज्ञाय गृह्यते ’ इति सर्वार्थत्वात् यथैव उपांशुयाजस्य ध्रौवाज्यद्रव्यकत्वम्, एवमनयोरपि यागयोः । तथा आज्यभागयोः क्रमे चतस्रोऽनुवाक्याः पठ्यन्ते द्वे आग्नेय्यौ, द्वे सौम्यौ । ते बलीयसा वाक्येन अवच्छिद्य अनयोः कर्मणोर्विधीयेते ‘ वार्त्रघ्नी पौर्णमास्यामनूच्येते, वृधन्वती अमावास्यायाम् ’ इति । नहि पौर्णमास्यमावास्याशब्दाभ्यां एतत्कर्मव्यतिरिक्तं अन्यदिहोच्यते । ननु कालवचनावेतौ इह प्रयुज्येते । (परिहरति -) किं (हि) कालस्य मन्त्रसंबन्धेन । दृष्टश्च सप्तमीनिर्दिष्टानां कर्मणां प्रधानभावः । तद्यथा ‘ येन कर्मणेर्त्सेत्, तत्र जयान् जुहुयात् ’ इति । तेन अनुवाक्याद्वयस्य तुल्यार्थतया विकल्प्यमानस्य अनुरूपा याज्याऽपि कल्पयितव्या । (आग्नेय्यनुवाक्यापक्षे याज्याऽपि आग्नेयी, सौमीपक्षे सौमी कल्प्या इति एकः परिहारः) । अथवा युगपद्विधानात् समुच्चये सति द्विदेवत्यकर्माध्यवसायात् द्वेद्वे याज्ये अपि कल्पयितव्ये । (इतरेतरयोर्विहितद्वन्द्वापवादत्वेन एकशेषस्यापि इतरेतरयोगवाचित्वात् अनुवाक्याद्वयस्य समुच्चयप्रतीतेस्तद्वशेन अग्नीषोमयोर्देवतात्वकल्पनात् द्वयोरर्थवत्त्वम् , याज्या च तदानुरूप्येणैव आग्नेयी सौमी चान्या कल्प्या इति द्वितीयः प्रकारः । कल्पनालाघवेऽपि एकैव द्विदेवत्या याज्या इति तृतीयं प्रकारमाह–) यद्वा एकैव अग्नीषोमदेवत्या । (एकस्मिन् कर्मणि अनुवाक्याद्वयानर्थक्यात्,

याज्याऽनुवाक्यात्वेऽपि च इतरेतरयोगोपपत्तौ अनुशब्दस्य च याज्यायामपि प्रैषपश्चाद्भावेन अविरोधात्, समुच्चितयोश्च अङ्गत्वेन अग्नीषोमदेवत्यकर्माध्यवसानात्, मनोतान्यायेन एकदेशद्वारा तत्प्रकाशनेन उभयोः संवादोपपत्तेः, अश्रुतकल्पनापरिहाराच्च श्रुतयोरेव मध्ये अनुवाक्या एका, याज्या एका। इति चतुर्थं प्रकारमाह–) अथवा वार्त्रघ्न्योरेव एका याज्या कर्तव्या, तथा वृधन्वत्योः। अतश्च श्रुतिविहितमन्त्रकर्मसंबन्धान्यथाऽनुपपत्त्या अग्नीषोमौ देवता उभयत्राध्यवसीयते। आज्यभागयोस्तु पुराकल्पसरूपेण वाक्येन देवता तावत् प्राप्तैव, 'यस्यै कस्यै चिद् देवतायै हविर्निर्वपन् आज्यस्यैव नौ पुरस्ताद् यजन्' इति। याज्याप्राप्तिश्चाबाधितैव अनुवाक्याऽऽगमश्च दाशतयीभ्यः कर्तव्यः इति न किञ्चित् विरुद्धम्। तस्मादस्ति कर्मान्तरत्वेऽपि रूपमिति भेदः। अतश्च समप्रधानानि। (आशङ्कते–) भेद इति गृह्णीमः, समप्रधानत्वं तु न मृष्यामहे। कुतः? '**निवेशः केषु चित् त्वेव पृथक्त्वेनाभिधानयोः। फलं च तद्विशिष्टेभ्य इति साम्यं न युज्यते ॥**' (श्लोकं व्याचष्टे–) दर्शपूर्णमासाभिधाने हि विशिष्टयागवाचिनी, तेन तन्मात्रस्यैव फलत्वात् इतरेषां तत्संनिधानात् अङ्गत्वेन भवितव्यम्। (आशङ्कां निराकरोति पूर्वपक्षी–) अत्राभिधीयते। '**प्रसिद्धेनाप्रसिद्धस्य नित्यमिष्टं विशेषणम्। तस्माद् यज्यनुरोधेन नामार्थोऽत्र निरूप्यते ॥**' सर्वत्र नामयुक्तकर्मविधाने सामानाधिकरण्यात् कदाचित् यज्यर्थविशेषो नाम्ना निरूप्यते, कदाचित् नामार्थो यजिना। यो यत्र पूर्वतरप्रसिद्धार्थो भवति, स इतरं स्वविषये स्थापयति, यथा 'ज्योतिष्टोमेन' इत्यत्र ज्योतिर्भिः त्रिवृदादिभिः स्तोमैर्योगात् प्रसिद्धार्थेन नाम्ना दीक्षणीयाऽऽदिभ्यो यजिः निवर्त्य सोमयागे स्थाप्यते। तथा 'राजसूयेन' इत्यत्र नाम यागायागविषयत्वेन उपप्लवमानं प्रकृतयागप्रसिद्धेन यजिना स्वविषयं नीयते। तदिह प्रातिपदिकद्वयसमासद्विवचनार्थानां दर्शपूर्णमासपदोपात्तानां न क्वचित्प्रसिद्धिरस्ति, यथा यजेः तद्विषयत्वं विज्ञायेत। यजिः पुनर्यागमात्रे प्रसक्तः सन् अधिकारेण प्रकृतेषु स्थापितः शक्नोति अप्रसिद्धं दर्शपूर्णमासशब्दं स्वविषये नियन्तुम्। ततश्च 'दर्शपूर्णमासाभ्याम्' इति अविवक्षितावयवसमासार्थद्वित्वं वर्णलेलीभावमात्ररूपेण (वर्णपङ्क्तिमात्ररूपत्वेन इति रूढिता उक्ता) केवलकरणसंवादिप्रकृताशेषयागनामत्वं राजसूयशब्दवत् प्रतिपद्यते। 'सुपां सुपो भवन्ति' इति बहुवचनस्य स्थाने द्विवचनं समस्तसमुदायगतैकवचनस्य वा। कथं पुनः 'दर्शपूर्णमासाभ्याम्' इत्यप्रसिद्धम्? (उत्तरम्–) यदा तावत् '**वाच्यकालयुजो यागाः प्रकृताः सन्ति के चन। द्विसंख्योत्पत्तियुक्ताश्च प्रसिद्धिर्येषु विद्यते ॥**' तन्नाम अशेषस्वार्थपरित्यागेन अत्यन्तपरानुरोधिवृत्तिं भजते, यत्र कश्चिदपि अंशः अप्रसिद्धः। इह तु दर्शन कालेन पौर्णमासेन च संयुक्ता आग्नेयादियागा विद्यन्ते। द्वित्वयुक्ताश्च आज्यभागादयः, तेषामयुक्तः परित्याग इति। (स्वार्थासमातस्य वाक्यस्य वाक्यान्तरानन्वयवत् पदस्यापि स्वार्थासमातस्य पदान्तरानन्वयात् नैकैकांशप्रसिद्धिमात्रेण यजिविशेषकता युक्ता इति परिहरति–) तदुच्यते। '**प्रकृतिप्रत्ययौ पूर्णौ विशेष्टुं यजतिं क्षमौ। आग्नेयाद्याज्यभागादावेकत्रैकार्थशून्यता ॥**' यद्यपि आग्नेयादिषु स्वाभिधेयकालयोगात् प्रातिपदिकं वर्तेत, तथापि तेषां बहुत्वात् द्वित्वानुपपत्तेः असमर्थं पदम्, यत्रापि द्वित्वमस्ति आघारयोराज्यभागयोर्वा, तत्रापि प्रातिपदिकस्य अत्यन्तमशक्तिः। न च अर्थप्रकरणशब्दान्तरैः विस्पष्टं सामानाधिकरण्यमस्ति, येन केनचित् वर्णसामान्यात् आख्याविकारन्यायेन (आख्याविकारन्यायशब्दे द्रष्टव्यम्) गौणत्वेन वा तद्विषयत्वमध्यवसीयेत।

कस्मात् पुनः इमावेव अपूर्वौ पूर्ण– (पौर्ण–) मास्यमावास्यासंज्ञकौ द्वौ यागौ फलाय न विधीयेते। तथाहि, '**सिद्धान्तेऽपि तु यादृग्भ्यां शब्दाभ्यामनुकीर्तितौ। तावेव समुदायौ द्वौ विधास्येते फलं प्रति ॥**' यदि कश्चित् 'दर्शपूर्णमासशब्दयोः पौर्णमास्यमावास्याशब्दयोश्च वैलक्षण्यात् न पूर्वकर्मप्रत्यभिज्ञानं फलवाक्ये अस्ति' इति ब्रूयात्, स वक्तव्यः 'तुल्यत्वे दोषोऽयम्' इति। तत्रापि हि पौर्णमास्यमावास्यासंज्ञकावेव समुदायौ फलवन्तौ इष्टौ, न च तयोः प्रयोगवाक्ये अस्ति

शब्दत्वात् प्रत्यभिज्ञानम्। अथ तत्र विनाऽपि संज्ञाऽनुसारेण कालयोगात् वृत्तिरिष्यते, स ममापि अस्त्येव कालयोगः 'पौर्णमास्यां पौर्णमास्या यजेत' 'अमावास्यायाममावास्यया यजेत' इति। नैतदेवम्। एवमपि हि '**षण्णामग्न्यादियागानामनयोश्च** (दर्शपूर्णमासयागयोः) **द्वयोरयम्। समानः कालसंयोग इति नेष्टावधारणा ॥**' नहि अष्टानां कालसंयोगे सति अवधारणे हेतुरस्ति, येन अनयोरेव फलसंबन्धः स्यात्। स्यादेतत् एतेषां मध्ये ययोः कयोश्चित् फलसंबन्ध इति, तदयुक्तम्। '**विशेषहेत्वभावे हि ग्रहणं निष्प्रमाणकम्। पक्षे वाऽङ्गप्रधानत्वं विरोधान्न विकल्पते ॥**' विना विशेषहेतुना यागत्वकालसंबन्धसाम्ये सति यावेव गृहीतौ तत्रैव इतरेषां प्राधान्यप्रामाण्यभाजां सतां अङ्गत्वापादनाद्विरुद्धता स्यात्। अथ विकल्पेन सर्वेषां पाक्षिकोऽनुग्रहः कल्प्येत, तत्रापि तस्यैव कदा चित् प्रधानत्वम्, कदा चिदङ्गत्वमिति विप्रतिषिद्धम्। उभयात्मनां चाङ्गतया प्रवृत्तेः, प्रधानत्वेन च निवृत्तेः आग्नेयादीनां विकृतिगमने यावज्जीवं संशयप्रसङ्गः। सर्वसंख्याश्च केन चित् अवान्तरसामान्यावच्छेदेन संख्येयेषु वर्तन्ते। न वा अपूर्वयोः आग्नेयादीनां वा समस्तानामेकदेशे वा किञ्चिदवान्तरसामान्यं दृश्यते, येन द्वित्वमवधार्येत। य एव हि गृहीतस्तस्यैव यागान्तरापेक्षया उद्भूतेन बहुत्वेन केवलात्मापेक्षेण चैकत्वेन द्वित्वं बाध्यते। ततश्च द्विवचनस्याप्रसिद्धिः। सिद्धान्ते तु शब्दद्वयेन समुदायद्वयापादनात् असमुदायीकृतयागवैलक्षण्यात् अवान्तरधर्मयोगात् संभवति द्वित्वयोगः। तद्दर्शन च कालयोगात् कथञ्चित् दर्शपूर्णमासप्रातिपदिकयोरपि वृत्तिसिद्धिः, इत्युपपद्यते यागविशेषणत्वम्, न तु पूर्वपक्षे समुदायत्वापादनाभावात् संख्यावृत्तिः इति प्रकृतयागमात्रे एव फलसंबन्धः। (शङ्कते–) अथ कस्मात् अष्टावेव यागाः पौर्णमास्यमावास्याकालगतद्वित्वापेक्षया लब्धविशेषणाः सन्तो न विधीयन्ते, यथा सिद्धान्ते समुदायगतद्वित्वापेक्षया षट् विधास्यन्ते। (परिहरति–) न ईदृशेन अस्फुटेन प्रकृतयागमात्रावलम्बि आख्यातं शक्यं निवर्तयितुम्। न च अत्यन्तव्यतिरेकात् कालगता संख्या यागसामानाधिकरण्यनिर्देशार्हा भवति। समुदायसमुदायिनोस्तु अव्यतिरेकात् अविरुद्धः संख्यासंबन्धः सिद्धान्ते। (पूर्वपक्षप्रयोजनमुपपादितमुपसंहरति–) तस्मात् पूर्वपक्षे यजिवशेनैव नामपदवृत्तेः अविशेषेण सर्वे यागाः समप्रधानाः। [वस्तुतः पूर्वपक्षोपसंहार एवायम्]।

(सूत्रं द्वेधा योजयन् तत्सिद्धान्तमाह–) **तथा प्राप्ते, अभिधीयते**। प्रकरणं पौर्णमास्यमावास्यासंयुक्तयोः आलम्बनं स्यात्। प्रक्रियते इति प्रकरणम्। अथवा प्रकरणं तयोः सहकारि भवेत्। ततश्च तन्मात्रप्रतिपाद्यः अर्थः ग्रहीतव्यः। (पौर्णमासीशब्देन उदाहरणीभूतविद्वद्वाक्ययोः उपलक्षणम्। प्रकरणशब्दस्य कर्मव्युत्पत्तौ आलम्बनपदाध्याहारः, भावव्युत्पत्तौ च सहकारिपदाध्याहारः)। कुतः? '**विधायको नियुङ्क्ते हि सर्वोऽसाधारणे यजौ। न च तत्र प्रवृत्तिः स्यादज्ञातद्रव्यदेवते ॥**' नहि अनेन यजिना पौर्णमास्यमावास्यापदाभ्यां वा यागमात्रे बुद्धिः क्रियते। न च प्रकृतकर्मग्रहणं त्वत्पक्षेऽस्ति। तत्र अज्ञातरूपे सति अपूर्वे कर्मणि न कथञ्चित् प्रवर्तेत, ततश्च वाक्यमेव अनर्थकं भवेत्। प्रकृतग्रहणे तु तेषां द्रव्यदेवतायोगात् एतत्कालवर्तित्वाच्च रूपज्ञानादर्थवत्त्वम्। ननु उक्तं मत्पक्षेऽपि अस्ति द्रव्यदेवतमिति, सत्यम् '**यथाकथञ्चिल्लभ्येत द्रव्यं साधारणं स्थितम्। तथापि देवता नास्तीत्यरूपत्वान्न मुच्यते ॥**' नहि मान्त्रवर्णिकी देवता संभवति, मन्त्राणां क्रमविशेषेण आज्यभागार्थत्वात्। न च अस्य वाक्येन बाधः, विरोधाभावात्। सर्वत्र हि अविरोधेन वाक्ये निविशमाने विरोधपक्षस्त्यक्तव्यः। इह च ('वार्त्रघ्नी पौर्णमास्याम्, वृधन्वती अमावास्यायाम्' इति वाक्ययोः) पौर्णमास्यमावास्याशब्दौ यदि कर्मवचनावेव स्याताम्, ततो न विरोधः परिह्रियेत। कालवचनत्वे तु अनयोरविरोधः। साधारण्याच्च अविरोधपक्ष एव समर्थनीयः।

किञ्च। '**प्रथमं काल एवाभ्यां शब्दाभ्यां प्रतिपाद्यते। पश्चात् तत् कर्म तद्योगादतः कालोऽत्र गृह्यते ॥**' यदि हि सर्वलोकप्रसिद्धः कालः अत्र न समवेयात्, ततः तदतिक्रमेण कर्मणी गृह्ये-

यातामू । अपिच उपपन्नतरा कालवचनत्वे सप्तमी । तस्य सर्वत्रैव कालस्य अधिकरणत्वात् न कर्मणः । अधिकरणत्वानुपपत्तेः यथाकथञ्चित् कल्पनीयं स्यात् । यत्तु किं कालस्य मन्त्रसंबन्धेन इति, यदि तादर्थ्यलक्षण एवैकः संबन्धो भवेत्, स चात्र असाभिरुच्येत, तत एवं युज्यते वक्तुम् । इह तु आज्यभागौ प्रति तादर्थ्ये व्यवस्थिते, संकरे च प्राप्ते कालभेदेन प्रयुज्यमानयोर्मन्त्रयोः व्यवस्थामात्रं क्रियते 'वार्त्रघ्नी पौर्णमासीस्थयोराज्यभागयोः, वृधन्वती अमावास्यास्थयोः' इति । किञ्च, '**प्रज्ञातदेवतत्वाच्च दृष्टार्थाऽल्पविधानता । मत्पक्षे, भवतस्त्वत्र प्रसक्ता बहुकल्पना ॥**' सर्वत्रैव आकाङ्क्षापूर्वकः संबन्धो भवति । आज्यभागौ च प्रज्ञाताग्नीषोमदेवत्यौ तदभिधानसमर्थमन्त्राकाङ्क्षित्वादयत्नेन मन्त्रान् गृह्णीतः । त्वत्पक्षे तु अपूर्वयोः कर्मणोः अज्ञातदेवतत्वात् न मन्त्रापेक्षा । ततश्च मन्त्रतद्विशेषद्वित्वादिकल्पनात् अनपेक्षितानेकार्थविधिप्रसङ्गः । पुनश्च मान्त्रवर्णिकानेकदेवताकल्पना । नहि एकस्य कर्मणः अनेकया देवतया, अनेकया अनुवाक्यया (च) कार्यमस्ति । पुनश्च अश्रुतयाज्याकल्पनाश्रयणम्, आज्यभागयोश्च अश्रुतपुरोऽनुवाक्याकल्पनम् । यच्च 'एका याज्या एका चानुवाक्या भविष्यति' इति, न तत्, अनुवाक्यासमाख्याबाधात् । अपिच त्वत्पक्षे लिङ्गस्य अविनियोजकत्वात् वाक्ये च करणत्वेन आश्रयणात् 'वैष्णवीमनूच्य' इत्यादिवत् अदृष्टार्थप्रसक्तेः न प्रकाशकता, प्रकाश्येन अनपेक्षितत्वात् । मान्त्रवर्णिकदेवताकल्पनातश्च वरमारादुपकारकत्वम् । आज्यभागयोः पुनर्द्वित्वात् प्रज्ञातद्विदेवतत्वाच्च प्रकाश्याकाङ्क्षिताः प्रकाशका मन्त्राः लिङ्गक्रमविनियुक्ताः सन्तः एकान्तेन दृष्टार्थतां प्रतिपद्यन्ते । तत्र च मन्त्रतद्विशेषद्वित्वादिषु प्राप्तेषु कालद्वारेण व्यवस्थामात्रविधानात् लाघवं वाक्यस्य, न चानर्थक्यम् (सुधापाठः पृ. ७२८) । नहि संनिधानात् व्यवस्था सिद्धा । (मान्त्रवर्णिकदेवताप्राप्त्यभावमुपसंहरति–) तस्मान्न देवताविधिः असंबन्धात् । (सूत्रार्थमुपसंहरति–) अतश्च अरूपत्वात् अकर्मान्तरता । (आनर्थक्यापत्त्या अनुवादत्वानुपपत्तिमाशङ्कते–) किं पुनः समस्तानुवादस्य प्रयोजनम् ? (आनर्थक्यमुपपादयति–) पश्य '**पदतद्भागवाक्यार्थविधिशून्या हि चोदना । धर्मं प्रत्युपयोगित्वं न कथञ्चित् प्रपद्यते ॥**' ('दध्ना जुहोति' इति करणत्वेन दधिविधानात् पदार्थचोदना । 'दण्डी प्रैषानन्वाह' इति दण्डप्रातिपदिकार्थविधानात् तद्भागार्थचोदना । 'सोमेन यजेत' इति विशिष्टविधानात् वाक्यार्थचोदना इति । विद्वद्वाक्ययोरपि प्रयोगवचनाङ्गत्वात् धर्मप्रमोपयोगो भविष्यति इति परिहरति–) उच्यते '**यथैवोत्पत्तिवाक्यानां प्रयोगवचनाङ्गता । तथैव तदुपादानाद् द्वित्वसिद्ध्याऽनयोरपि ॥**' (तदुपादानात् द्वित्वस्योपादानात्) । वाक्यद्वयेन हि समुदायद्वये कल्पिते 'दर्शपूर्णमासाभ्याम्' इति द्विवचनं सिध्यति इत्यर्थवत्त्वम् । नहि विधिरेवैकः प्रयोजनवान् इति कश्चित् नियमहेतुरस्ति, अविधेरपि विधिशेषत्वेन अर्थवत्त्वात् । न चात्र विप्रकीर्णानामाग्नेयादीनां एतद्वाक्यद्वयमन्तरेण द्वित्वसंख्यायोगित्वं संभवति । एतदेव चाभिप्रेत्य अस्य पक्षस्य प्रयोजनमेव गुणप्रधानत्वं आदित उपन्यस्तम् (भाष्ये) । इतरथा हि 'अविशेषादनर्थकं हि स्यात्' (२।२।२।२) इत्यस्योत्तरमपरिकल्प्य अनुवादपक्षो दुरुपन्यास एव स्यात् । (अनुवादानर्थक्यपरिहारमुपसंहरति–) तस्मात् अस्ति प्रयोजनं समस्तवाक्यानुवादेऽपि इत्यदोषः ।

कथं पुनः अत्यन्तभिन्नानां कर्मणां समुदायीकरणं शक्यम् ? शक्यमिति ब्रूमः । '**एककालाभिसंयोगाद् भिन्नानामपि कर्मणाम् । समुदायार्पणं शक्यमेकदेशस्थवृक्षवत् ॥**' यथैव हि एकदेशस्थितान् वृक्षानालोच्य 'वनम्' इति समुदायबुद्धिर्भवति, एवं एककालयुक्तकर्मसमुदायनामधेयबुद्धिः । तद्गतैकत्वावधारणाच्च 'पौर्णमासीम्' इत्येकवचननिर्देशः । समुदायिवचनावेव चैतौ तल्लक्षितसमुदायगतसंख्याद्वारेण एकवचनान्तत्वं बिभ्राते, न समुदाययोरेव नामधेये भवतः । तथाहि, '**सामानाधिकरण्येन यागनामत्वनिश्चयः । समुदाये च यागत्वं नाग्नेयादिष्ववस्थितम् ॥**' (नञं पूर्वेण संबध्य 'किन्तु' इत्यध्याहारेण उत्तरावयवो योज्यः) । 'पौर्णमासीं यजते' इति यजि-

सामानाधिकरण्यात् यागनामधेयमेतत् इति गम्यते । न च आग्नेयादीनां समुदाये यागत्वं समवेतम् । किं तर्हि ? प्रत्येकमाग्नेयादिषु । तस्मात् यथैव एतेषु प्रत्येकं यजिः, एवं नामधेयमपि । न च समुदायोत्पत्तिः एकेन कालेन युक्ता, आग्नेयादीनामुत्पत्तिकाले परस्परानपेक्षत्वेन समुदायत्वानुपजननात् । ततः कालवशेनापि प्रत्येकं नामधेयं इति शक्यं वक्तुम् । यदि च समुदायिनैरपेक्ष्येण समुदाययोः एते नामनी स्याताम्, ततः प्रयोगवाक्येनापि समुदायौ फले विधीयेयाताम्, ततः अवयवानां असाधनत्वात् समुदायादेकमपूर्वम् । अतश्च प्रत्येकापूर्वाणामभावात् कर्मभेदवैयर्थ्यप्रसङ्गः, सर्वधर्माणां च एकापूर्वनिबन्धनत्वात् संकीर्णवृत्तित्वं स्यात् । न च प्रत्येकमितिकर्तव्यतया आग्नेयादयः संबध्येरन् । ततश्च तद्गततन्त्रावृत्तिप्रयोगादिविचारासंबद्धत्वं भवेत् । न च प्रत्येकविकारे सौर्यादौ समस्तेतिकर्तव्यताऽतिदेशः स्यात् सहस्रादिशब्दवच्च अवयववृत्त्यभावात् एकपुरोडाशा पौर्णमासी, सांनाय्यरहिता अमावास्या इत्येवमादिव्यवहारोच्छेदप्रसङ्गः । 'संघातस्य अचोदितत्वात्' (९।१।६।२५), 'संघातस्य गुणत्वात्' (७।४।३।१७) इत्येवमादिषु स्पष्टं एवंप्रकाराणां समुदायिवचनत्वमभ्युपगतम् । इतरथा हि स एव शब्दाभिहितत्वात् चोद्येत, फलसंबन्धाच्च प्रधानं भवेत् । तस्मादुपसर्जनीभूतसमुदायाः समुदायिन एवाभिधीयन्ते । तेषां तु बहुत्वात् बहुवचनप्रसङ्गेन लक्षणया एकवचनयोगः इत्यभिप्रेत्य समुदायशब्दतया अवकल्पिष्यते इत्याह (भाष्यम्) । तथा च भवति हि बहूनामेकवचनान्तः (शब्दः) समुदायापेक्षः इति । अपेक्षामात्रमेव समुदायस्य ब्रवीति, नाभिधेयत्वम् । यूथवनशब्दौ अपि यदा समुदायोपसर्जनसमुदायिवचनौ, तदा साकल्येन दृष्टान्तौ, यदा तु समुदायमेव ब्रूतः, तदा तन्निमित्तैकवचनलाभमात्रेण दृष्टान्तत्वम् । एतेन दर्शपूर्णमासशब्दौ एतत्पर्यायौ व्याख्यातौ । तस्मादस्ति समुदायद्वित्वापेक्षानिमित्तैकत्वद्वयप्रत्ययसिद्धिः समुदायानुवादप्रयोजनम् । [इदमेकं इदमेकं इति एकत्वद्वयस्य यः प्रत्ययः समुदायद्वित्वापेक्षानिमित्तभूतः, तस्य सिद्धिः अनुवादप्रयोजनमित्यर्थः] यथा वक्ष्यति 'पृथक्त्वेनाभिधानयोर्निवेशः' (पृथक्त्वे त्वभिधानयोः इति भा– सूत्रपाठः । ४।४।११।३४) इत्यत्र । (एवं सिद्धान्तसूत्रावयवं पठित्वा न्यायमभिधत्ते–) तद्द्वित्वानुसारिणौ हि दर्शपूर्णमासशब्दौ तद्विषयौ भवतः (इति) । (पौर्णमास्यमावास्याशब्दोक्तसमुदायद्वित्वानुसारित्वात् दर्शपूर्णमासशब्दयोः समुदायविषयत्वं इति न्यायः) । अस्ति च पौर्णमासीपूर्णमासशब्दयोर्बहु सारूप्यम् । तत्साहचर्याच्च दर्शशब्दस्य अमावास्याविषयत्वम् । विपर्ययहेतुत्वेन वा लघीयस्येव प्रतिपत्तिः यथा काण इति चक्षुष्मान् [काणः चक्षुष्मान् इति इत्यन्वयः । यथाश्रुतोऽप्यन्वयः संभवत्येव, उद्देश्यविधेयभावस्तु विपरीतः] । तथा च वक्ष्यति (४।४।११।३४ सूत्रे भाष्यकारः) शक्यते च चन्द्रमसः अदर्शनात् (अमावास्या) दर्शः इति वक्तुम् (लक्षयितुम्) । तथा अन्वारम्भणीयावाक्यशेषे अमावास्यादर्शशब्दौ समानाधिकरणौ दर्शयिष्यति । ('दर्शो वा एतयोः पूर्वः' इत्युपक्रम्य 'अमावास्या वै सरस्वती' इत्युपसंहारात् दर्शामावास्ययोः सामानाधिकरण्यावगतिः । (भाष्यं व्याचष्टे–) तेन समुदायद्वयोपलक्षितानां फलवत्त्वात् इतरेषामङ्गत्वम् । ननु च एवं सति अनेनैव गतत्वात् चतुर्थे अधिकरणं नारब्धव्यम्, नैष दोषः । स्थिते हि एतस्मिन् प्रकृतयजतिमात्रग्रहणात्तत्र पूर्वः पक्षः, सिद्धान्तस्तु एतदधिकरणप्रसादात् भविष्यति । इतरथा तस्य पूर्वपक्ष एव स्यात् इति प्रयोजनत्वेनाभिधानम् । इदमपरं समुदायानुवादप्रयोजनम् 'पौर्णमास्यां पौर्णमास्या यजेत' 'अमावास्यायाममावास्यया यजेत' इति कालसंयोगः । तत्र एतत् स्यात् । एतदपि वाक्यमनर्थकम्, उत्पत्तिवाक्यादेव कालसंयोगसिद्धेरिति । उच्यते । '**अन्यथैव ह्ययं कालः करणांशेन युज्यते । अन्यथोत्पत्तिवाक्यस्थो निरपेक्षैः परस्परम् ॥**' उत्पत्तिवाक्ये हि अन्योन्यनिरपेक्षाणामाग्नेयादीनां निरङ्गानां च कालसंयोगः, तद्रूपत्वेन उपादानात् । अयं पुनः तृतीयासंयोगात् करणभूतानाम् । तेषां च करणत्वं प्रयोगवाक्यादितरेतरयुक्तानामङ्गसहितानां चावगतम्, इति तादृशानां तदनुपादेयम्, कालं प्रति उपादीयमानत्वात् । समस्तरूपविवक्षावशेन साङ्ग-

त्रिकः परस्परसहितश्चैकपौर्णमास्या युक्तः एकया चामावास्ययेति । यस्मिन् क्षणे एको यागः आरम्य क्रियमाणः समाप्तिमनुभवति, तस्मिन्नेव इतरौ, इत्यवधारणात् त्रिकस्यत्रिकस्य तन्त्रेण प्रयोगः सिद्धो भवति । औत्पत्तिककालानुरोधे तु भेदेन अङ्गवियुक्तानां च प्रयोगः स्यात्, इत्यस्ति विशेषः । **ननु च** एवं सति समुदायद्वयस्य इतरेतरयुक्तस्य करणत्वात् नाङ्गसाहित्यवत् न परस्परतद्विवक्षाऽपि (परस्परतद्विवक्षा न इति न इति द्वौ नञौ प्रकृतमर्थं द्रढयतः) इति यथैव अङ्गानां तत्कालविज्ञानम्, एवं पौर्णमास्या अमावास्या आक्षिप्ता, अमावास्यया च पौर्णमासी इत्युभयोरुभयत्र प्रसङ्गः, न वा उत्पत्तिवाक्यशिष्टकालविरोधः, तत्राप्यनुष्ठानात् । नहि यः पौर्णमास्यां अमावास्यां करोति, तेन अमावास्याशममावास्या न कृता भवति, तथा पौर्णमासी । न च उत्पत्तिवाक्येन कालान्तरं निषिद्धम्, स्वकालप्रतिपादनमात्रोपक्षयात् । अत्रोच्यते । '**कालो यस्य न विज्ञातः स्वरूपं च न नश्यति । तस्य कालः परोपाधिरुच्यमानो न दुष्यति ॥**' अमावास्या हि उत्पत्तिकालनिराकाङ्क्षा पौर्णमासीसाहित्यलभ्यं पौर्णमासीकालं न प्रतीच्छति, एवं पौर्णमासी अमावास्याकालम्, इति एतयोः समुदाययोः कालान्तरकरणे सति औत्पत्तिकरूपविसंवादात् अदर्शत्वमपूर्णमासत्वं च स्यात् । अङ्गानां तु अनिर्ज्ञातकालत्वेन साकाङ्क्षत्वात् उत्पत्तिविसंवादाभावाच्च अविरुद्धः साहित्यापेक्षलभ्यः कालः । **आह**– '**अङ्गानां मुख्यकालत्वाद् वाक्यादस्माद्विनाऽप्ययम् । कालोऽस्त्येवेति नैतस्य वचसोऽत्र निमित्तता ॥**' उच्यते । '**मुख्यकालत्वमङ्गानां न स्थितं मान्त्रवर्णिकम् । इदमेव हि तद्वाक्यम्, यद्बलेनैतदुच्यते ॥**' ननु दूरस्थानि उपकर्तुं न शक्नुवन्ति । (अपर आह–) संनिकृष्टस्यैरूपकर्तव्यं इत्येतद्वा कुतः ? सर्वत्र वचनानुसारेण उपकारानुपकारांशौ विज्ञायेते । तत्र संनिकर्षवचनाभावे विप्रकृष्टं नोपकरोति इति न किञ्चित् प्रमाणम् । **ननु च** अन्येनैव वाक्येन एष तन्त्रप्रयोगः सिध्यति 'य इष्ट्या पशुना सोमेन' इत्यादीनां तत्रापि करणविभक्तिनिर्देशात् इष्टेः स्वसमुदायिस्वाङ्गसहितायाः कालं प्रति उपादानात् ईदृशी विवक्षा लभ्यते । **सत्यं लभ्यते**, न तु इष्टः प्रयोगः सिध्यति । तथाहि, '**इष्टिशब्दः समस्तं वा प्रत्येकं वाऽवलम्बते । न तावत् त्रिकमित्येकमन्यादृक् चेष्टितं भवेत् ॥**' न तावत् त्रिकस्य इष्टिशब्देन ग्रहणमित्यवधार्यते । तत्र प्रत्येकं यागत्वेन इष्टिशब्दप्रवृत्तेः एकैकस्याममावास्यायां पौर्णमास्यां वा प्रयोगः, इति न सम्यक्प्रयोगसिद्धिः । अथ समस्तानामाग्नेयादीनां कथञ्चित् रूढेः 'प्रवृत्तत्वादिष्टेः सोमे प्रवृत्तिः' इतिवत् ग्रहणम्, एवमपि प्रयोगवचनैकत्वात् समुदायद्वयस्यापि पौर्णमास्याममावास्यायां वा अनुष्ठानं स्यात्, तत्र स एव उत्पत्तिशिष्टकालविरोधः । तदनुरोधेन व्यवस्थितविकल्पाश्रयणमिति चेत्, एवमपि यथोत्पत्त्यनुरोधात्प्रत्येकानुष्ठानप्रसङ्गः । तथा अङ्गानां भेदेन पौर्णमास्यमावास्ये प्रति उपादानाभावात् यत्रक्वचन एकत्र प्रदेशे अनुष्ठानं स्यात् । तस्मात् न (य इष्ट्या इति–) एतद्वाक्यं ताभ्यां (पौर्णमास्यमावास्यावाक्याभ्यां) तुल्यार्थमिति प्रकृतौ अकिञ्चित्करत्वात् विकृतीरेव सद्यस्कालतायै गच्छति । **ननु** अनेन तन्त्रप्रयोगः सिध्येत् 'समे दर्शपूर्णमासाभ्यां यजेत' इति देशस्यानुपादेयत्वात्साहित्यविवक्षोपपत्तेः । तत्रोच्यते । '**समस्य केवला चैव तन्त्रता प्रतिपाद्यते । तेन सर्वैरसावेको ग्राह्यो, न बहवः समाः ॥**' भेदेनापि हि प्रयुज्यमानानामनन्यदेशगमनमात्रेण देशतन्त्रत्वसिद्धिः । अथ इतरेतरयोगवशात् यदैव एकः समेन यागो युज्यते, तदैव इतरोऽपि इति तन्त्रत्वमुच्यते । तथा सति षण्णामपि युगपदुपादानात् तथैव प्रयोगप्रसक्तेः स एव विरोधः । यदि पुनः उत्पत्तिवाक्यानुरोधेन प्रवर्तते, ततः प्रत्येकं कालसंयुक्तानां समं प्रति साहित्यं संपादनीयं इति षट्स्वेव पौर्णमास्यमावास्यासु प्रयोगः समाप्येत । अङ्गानि च तावतः कालात् अनुत्कृष्यमाणानि प्रयोक्तव्यानि इति यत्रक्वचन अन्तराले क्रियेरन् । अथवा प्रतिप्रधानावृत्तेर्न्याय्यत्वादेकैकं प्रधानं साङ्गमपवृज्येत । अथ तु यावता उत्पत्तिकालो विरुध्यते, तावन्मात्रं परिहाय यौगपद्येन

समसंबन्धः कर्तव्यः इत्यवधार्येत, तत एकस्यामेव पौर्णमास्याममावास्यायां वा त्रिकयोः प्रयुज्यमानयोः यस्यकस्यचित् समीपे अङ्गानि प्रयुज्येरन् । अथवा तदर्धमासान्तराले यत्रक्वचन अहनि । सर्वो हि असौ प्रधानकालः, प्रधानकालाद्बहिर्भावश्च संभावयितव्यो नात्यन्तसामीप्यम्, अशक्यत्वात् । तस्मात् नैतेनापि अभिप्रेतप्रयोगसिद्धिः । अनेनैव फलवाक्यमपि प्रत्युक्तम्, फलस्यापि देशवदेव अनुपादेयत्वात् । सर्वान् इतरेतरयुक्तान् साङ्गान् प्रति तन्त्रत्वे सिद्धे न प्रयोगतन्त्रत्वसिद्धिः, विप्रकृष्टकालैरेव हि एकं फलं साध्यते । अथोच्येत, फलं भवत् भावयेदेतैः इत्थं इति साङ्गानि प्रधानानि युगपत्फलभवनकालेऽनुष्ठातव्यानि श्रूयन्ते, ततश्च न विप्रकृष्टानीति । तत्रापि समुदायद्वयस्य युगपत्प्रयोगापत्तिर्दोषः । उत्पत्तिवाक्यानुरोधेन वा पूर्ववदेव प्रत्येकं प्रयोगादियोजना । न च फलभवनकालः अस्मत्प्रत्यक्षः । सोऽपि हि प्रधानेतिकर्तव्यताकालेनैव परिच्छिद्यते । ततश्च उत्पत्तिकालालोचनेन यावन्तं प्रयोगकालं अङ्गप्रधानानि व्याप्नुवन्ति तावानेव फलभवनकालः, तादृगेव तद्विषयं यौगपद्यम्, इति सर्वथा षट्सु पौर्णमास्यमावास्यासु द्वयोर्वा साङ्गानां चापवर्गः । एकसमुदायसमीपे वा अङ्गप्रयोगः अर्धमासान्तराले वा यत्रक्वचित् इति प्रसङ्गात् नैतद्वाक्यलभ्यः त्रिकस्यत्रिकस्य साङ्गस्य स्वकाले प्रयोगः वाक्यान्तरात् सिध्यतीति । तस्मादर्थवान् 'पौर्णमास्यां पौर्णमास्या यजेत' इति कालविधिः । ननु एवं सति उत्पत्तौ कालयोगः अनर्थकः । कथमनर्थकः ? पश्य, '**यद्युत्पत्तौ न विद्येत यागानां कालसंगतिः । समुदायानुवादत्वं निर्निमित्तं न लभ्यते ॥**' पौर्णमास्यमावास्याशब्दौ स्वाभिधेयकालयुक्तयागानुवादौ इष्येते । तदभावे तु नैव ज्ञायेत का पौर्णमासी का अमावास्येति । तदज्ञानात् अलब्धार्थदर्शपूर्णमासपदाविशेषितप्रकृतयागमात्रग्रहणात् सर्वाणि समप्रधानानि इत्येतदेव स्यात् । तस्मात् अवश्यं भवितव्यं प्रथमं कालसंयोगेन । अत एव वा उपांशुयाजस्य अनुत्पत्तिवाक्यमपि सत् पौर्णमासीसंयुक्तमुदाहृतम् ।

विशेषदर्शनाच्च पूर्वेषां समेषु ह्यप्रवृत्तिः स्यात् । ४ ॥

भाष्यम्— यदि च सर्वाणि समप्रधानान्यभविष्यन् न विकृतौ प्रयाजा दृश्यन्ताम् । दृश्यन्ते तु 'प्रयाजेप्रयाजे कृष्णलं जुहोति' इति । असति आग्नेयगुणत्वे प्रयाजस्य तन्नोपपद्यते । अतो न सर्वाणि समप्रधानानि ।

वा— यदि चैते कर्मान्तरे स्याताम्, तत आघारादीनि समप्रधानानि स्युः । ततश्च 'कर्मणस्त्वप्रवृत्तित्वात् फलनियमकर्तृसमुदायस्यानन्वयस्तद्बन्धनत्वात्' इत्यनेन न्यायेन आग्नेयादिवत् प्रयाजादीनां करणांशोपनिपातात् विहितकरणया विकृतिभावनया कथंभावाकाङ्क्षिण्या तत्पूरणासमर्थानामग्रहणात् प्राप्तप्रयाजानुवादेन कृष्णलविधानं नोपपद्येत । तस्मादाग्नेयगुणत्वं प्रयाजादेः कथं स्यादिति समुदायानुवादौ ।

गुणस्तु श्रुतिसंयोगात् । ५ ॥

भाष्यम्— नैतदस्ति पौर्णमास्यमावास्यासंयुक्तौ समुदायशब्दाविति । किन्तु अपूर्वयोः कर्मणोर्विधातारौ । तथा न लक्षणशब्दो भविष्यति । नन रूपं नास्ति । वाक्यान्तरेण रूपमवगमिष्यामः । पौर्णमास्यामाग्नेयोऽष्टाकपालो भवतीति । यदेतत् पौर्णमासीनाम कर्म, तस्य एतद् रूपमग्निर्देवता, पुरोडाशो द्रव्यमिति । अत आग्नेयादिभिर्गुणो विधीयते इति ।

वा— पौर्णमासीमित्येकत्वं प्रातिपदिकार्थगतमेव भविष्यति, न तल्लक्षितसमुदायगतम् । प्रत्यक्षश्रुतश्च यजिर्द्रव्यदेवतासंबन्धात् क्लेशेनानुमातव्यो न भविष्यति । सोऽपि वा अनेकस्तदपूर्वमप्यनेकम्, समुदायानुवादत्वाच्च विधित्वं गुणवत्तरम् । प्रयाजादिदर्शनमपि 'यत्र नित्यानुवादवचनानि स्युः' इत्येवं विशिष्टविधानेन वा प्रकृतिस्थप्रयाजगुणविधिना वा सुपरिहरं मन्यमानः एतावेव कर्मविधी, शेषा गुणविधयः इत्यरूपतापरिहारमाह– अष्टाकपालादिवाक्येषु पौर्णमास्यमावास्याशब्दयोः कर्मवचनत्वात् वाक्यसिद्धमेव रूपवत्त्वमिति ।

चोदना वा गुणानां युगपच्छास्त्राच्चोदिते हि तदर्थत्वात् तस्यतस्योपदिश्येत । ६ ॥

भाष्यम्— कर्मचोदना वा आग्नेयादयः स्युः । कुतः ? गुणानां युगपच्छासनात् । एकेनैव वाक्येनात्रानेको गुणो विधातुमिष्यते भवता । न च शब्दान्तरेण चोदिते कर्मणि अनेको गुणः परस्परसंबन्धे चासति शक्यते विधातुम् । कथम् ? यदि तावत् ‘ पौर्णमास्यामष्टाकपालो भवति ’ इति संबन्धो विवक्षितः, न तदा अयमर्थः अष्टाकपालः सत्तया अभिसंबध्यते इति । कस्तर्हि ? अष्टाकपालः पौर्णमास्या अभिसंबध्यते इति । तत्र तदा भवतिर्वर्तते । तदानीं ‘ आग्नेयः ’ इत्ययं अस्यान्तिकादपि उपनिपतितः भवतिसंबन्धाभावात् नानेन संबन्धुमर्हति ‘ अष्टाकपाल आग्नेयो भवति ’ इति । अथ ‘ आग्नेयः पौर्णमास्यां भवति ’ इति विवक्ष्यते, तदा आग्नेयपुरोडाशयोः असंबन्ध एव स्यात् । अथ पौर्णमास्यामष्टाकपालस्य आग्नेयता विधीयते, वक्तव्यं केन तस्यामष्टाकपालो विहितः इति । अथ तस्यामाग्नेयस्याष्टाकपालता, तथाप्येष दोषः । अथ पौर्णमासीत्युभाभ्यां संबध्यते, परस्परेण द्रव्यदेवतयोरसंबन्ध एव स्यात् । अथ द्रव्यदेवते परस्परेण विशिष्टे सत्यौ पौर्णमास्या संबध्येयातामित्युच्यते आग्नेयोऽष्टाकपालो यः स पौर्णमास्यां भवतीति । तस्य अप्रसिद्धत्वात् एतदप्ययुक्तम् । अथ केन चिदग्नये संकल्पितः पौर्णमास्यां विधीयते, तथापि देवताया अविधानात् रूपाभावः एव । अथाग्निर्देवता भविष्यतीति कश्चित् ब्रूयात् स वक्तव्यो मिथश्चानर्थसंबन्ध इति, नहि आग्नेयशब्दोऽनुवादो विधिश्च भवतीति । कल्पयिष्यामो देवतामिति चेन्न । असति विधाने देवताया अभावात् । संबन्धिशब्दोऽयं देवतेति । स एवाग्निरष्टाकपालस्य देवता, नान्यस्य । तस्मादवश्यमाग्नेयाष्टाकपालसंबन्धो विधातव्यः, स एष यागो भवतीति । तेन पौर्णमासीयागस्यापरो यागः संबन्धी विधीयते, न द्रव्यं देवता वा । न च यागस्य यागान्तरं रूपं भवति । अतो रूपावचनात् पौर्णमास्यमावास्यासंयुक्तौ नापूर्वयोः कर्मणोर्विधातारौ । यत्तूक्तं पौर्णमास्यमावास्याशब्दौ लक्षणया प्रकृतान् यागाननुवदितुं शक्नुतो नाञ्जस्येनेति । नैष दोषः । यदा आञ्जस्येन शब्दार्थो नावकल्पते, तदा लक्षणयाऽपि कल्प्यमानः साधुर्भवति । यथा अग्नौ तिष्ठति अवटे तिष्ठति, अग्निसमीपे अवटसमीपे तिष्ठतीति भवति संव्यवहारः । लक्षणाऽपि हि लौकिक्येवेति ।

वा— नैते अष्टाकपालादयो गुणविधयः । कुतः ? **‘ प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः । अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः ॥ ’** कर्मोत्पत्तिवाक्ये हि प्रत्ययो भावनामप्राप्तत्वात् विधातुमुपक्रमते । सा च (भावना) यावत् धात्वर्थकारकैर्न परिपूर्यते, तावत् अनुष्ठातुमयोग्या इति न विधित्वपर्यवसानम् । तत्र भावना आत्मांशभूतावगतकारकसामान्यान्यथानुपपत्त्या आक्षिप्तविशेषोपलिप्सायां स्ववाक्योच्चारितकारकविभक्त्यन्तपदप्रतीतैर्विशेषैः भावनामात्राकाङ्क्षिभिः वाक्यादेव विशेष्यते । प्रतिपदं च यावत्किञ्चित् द्रव्याश्रितं जातिलिङ्गसंख्यादि, तत् सर्वं एकपदोपादानलक्षणश्रुतिप्रतिलब्धविशेषणविशेष्यभावं अप्रतिपन्नपरस्परशेषशेषित्वं विभक्तिश्रुत्यैव कारकात्मना भावनार्थत्वं प्रतिपद्यते । एवं यावन्ति पदानि संनिकर्षविप्रकर्षस्थानि, तानि सर्वाणि अनुषङ्गाधिकरणोक्तेन मार्गेण अनादृत्य संनिकर्षविप्रकर्षौ युगपत् संनिपतन्ति । ततः सर्वविशेषणविशिष्टां अनुष्ठानयोग्यां भावनामासाद्य विधिः समाप्यते । स च एकेनैव प्रयत्नेन तां विशिष्टां विदधाति इति नानेकशक्तिकल्पनाऽऽपत्तिदोषः । तथाहि, **‘ श्रौतव्यापारनानात्वे शब्दानामतिगौरवम् । एकोक्त्यवसितानां तु नार्थाक्षेपो विरुध्यते ॥ ’** विशिष्टायां भावनायामाधाय श्रौतं विधित्वं यदि अन्यत्रापि श्रुत्यैव पुनर्व्याप्रियेत, ततः पुनरुच्चारणदोषं अवैदिकत्वापत्त्या लभेत । अयं पुनः सकृत् विधाय निवृत्तव्यापारः स्वार्थान्यथाऽनुपपत्त्या सर्वविशेषणेषु प्रत्येकनिष्ठानि विध्यन्तराणि आविर्भावयन् समाम्नायावगतैकरूपापरित्यागेनैव असकृदुच्चारणफले वर्तते । **‘ विशेषणविधिश्चायं पश्चाद्यद्यपि गम्यते । तथापि त्वाकृतिन्यायात् ततः प्रागेव जायते ॥ ’** विशिष्टनिमित्तत्वात् अर्थापत्तिः पश्चात् भवन्ती यद्यपि विशेषणविधीन् उत्तरकालमवगमयति, तथापि तु आकृत्यधिकरणन्यायेन विशेषणानि अनु-

पादाय विशिष्टव्यापारासंभवात् नूनं पूर्वतरं विशेषणविधयो निष्पन्नाः, यतः तदधीनसिद्धिः विशिष्टप्रत्ययो दृश्यते इति । तेन बहव एवैते विधयः इति प्रत्यक्षार्थापत्तिलब्धाः युगपत् क्रमेण वा व्याप्रियन्ते इति अनेकविध्यन्तरप्रसवसमर्थैकविशिष्टविधिप्रसादेन अनेकगुणविधानं अपूर्वभावनाविधिपक्षे सुलभम्, नेतरत्र । कथम् ? **‘ प्रधानं नीयमानं हि तत्राङ्गान्यपकर्षति । अङ्गमाकृष्यमाणं तु नाङ्गान्तरमसंगतेः ॥ ’** यदा हि भावना अन्यतः प्राप्ता भवति, तदा तस्याः पिष्टपेषणवत् प्रतिहतशक्तिर्विधायकः तामविदधानो न तत्संगतार्थानेकविधिव्यापारप्रसवहेतुत्वं प्रतिपद्यते । विशिष्टविधाने हि अर्थापत्त्या विध्यन्तराणि कल्प्यन्ते, न चात्र तत् संभवति, इति अनुपयुक्तश्रौतव्यापारावस्थ एव प्रत्ययः ‘ आनर्थक्यात् तदङ्गेषु ’ इत्यनेन न्यायेन भावनातः अवतीर्य तत्संबद्धानि कारकाणि उपसर्पति । तत्र यावन्ति एकपदोपात्तैककारकविशेषणानि जातिलिङ्गद्रव्यसंख्याऽऽदीनि, तानि विशिष्टभावनाविधिन्यायेनैव तत्कारकाक्षेपात् सर्वाणि विधीयन्ते इति प्राप्तायामपि भावनायां अनेकार्थविध्युपपत्तिः । यदा तु अनेकपदोपात्तानेककारकोपनिपातो भवति, तदा कारकाणां परस्परसंबन्धाभावात् तत्तत्पदेष्वपि असंबध्यमानेषु यदि एकत्र विधिर्गच्छति, तदा नेतरत्र गतो भवति, एवमितरगमनेऽपि अन्यगमनानुपपत्तिः, असंबन्धात् । एवं च न भावनावत् एकेन विहितेन इतरत् अर्थादाक्षेप्तुं शक्यते । तत्र अर्थलभ्यविध्यन्तरप्रसूतौ असत्यां एकात्मकः श्रौतो विधिः एकत्रोपक्षीयमाणो यद्यपि अन्यत्रापि अस्तीति कल्प्यते, तत् नासकृदुच्चारणादृते सिध्यति इति पौरुषेयः अनेकोच्चारणप्रसङ्गः । तद्दर्शयति (सूत्रकारः) **चोदिते हि** प्राप्ते कर्मणि **तदर्थत्वात्** गुणार्थत्वात् **तस्यतस्य** गुणस्य विधेये पुनःपुनः **उपदिश्येत** उच्चार्येत, प्रत्ययः इत्यर्थः । ‘ परस्परसंबन्धे चासति ’ इति भाष्यं अर्थापत्तिमूलोच्छेदप्रदर्शनार्थम् । लोकेऽपि च यत् प्रधानं राजप्रभृति क्वचिन्नीयते, तत् आत्मना अविनाभूतानि अमात्यादीनि अङ्गान्यपि अशेषाणि आक्षिपति । यदा तु कश्चित् भृत्यानां क्वचित् गच्छति, तदा तदसंबन्धीनि भृत्यान्तराणि पदमपि न चलन्ति, तत्रावश्यं प्रयत्नान्तरमास्थेयम् । न च तत् एकव्यापारसाध्यमिति अशक्यं सकृत् श्रुतौ उपादातुमिति । एतमेवार्थं प्रपञ्चयति (भाष्यकारः) । यदि हि पौर्णमास्युद्देशेन अष्टाकपालो विधीयते, तदा तत्स्वरूपोत्पत्तिरपि तावदनुक्ता सती क्लेशेन लब्धा किमुत पदार्थान्तरविधानम् । तदाह (भाष्यम्) भवतिसंबन्धाभावात् नानेन संबध्यते । अथाग्नेयः पौर्णमास्यामित्यत्रापि स्वरूपोत्पत्तिक्लेशः पूर्वोक्त एव द्रष्टव्यः इति तमप्रदर्श्यैव अष्टाकपालसंबन्धाभावः प्रदर्शितः ।

एवं पौर्णमासीविशिष्टान्यतरानुवादेऽपि अनूद्यमानस्योत्पत्तिः, पौर्णमासीसंबन्धः, विधीयमानस्याप्युत्पत्तिः, इतरेतरसंबन्धश्च, इति अतिगौरवम् । पौर्णमासीपदतन्त्रत्वेऽपि उभयोरुत्पत्तिः कर्तव्या, परस्परं संबन्धश्च इति दोषौ । न च अरुणैकहायनीवत् परस्परनियमसिद्धिः, विशिष्टविधानदोषात् । अतः अष्टाकपालाननुरक्तया पौर्णमास्या आग्नेयः संबध्यते, तदननुरक्तया वा (आग्नेयाननुरक्तया पौर्णमास्या वा इत्यर्थः) अष्टाकपालः इत्यसंबन्धः । एतत्परिहारार्थं परस्परसंबन्धं द्रव्यदेवतयोः प्रथममेव कुर्वन् उभयस्वरूपोत्पत्तिः, अन्यतरस्य च अन्यतरत्र विधानम्, इति युगपद्विधीयमानपरस्परसंबन्धक्लेशमनुभूय पुनः पौर्णमासीसंबन्धक्लेशः । तत्परिहारार्थं अन्यतः सिद्धं देवतासंबन्धमनूद्य केवलकर्मसंबन्धं दर्शयति– ‘ अथ केन चिदग्नये संकल्पितः ’ इति । तत्र संकल्पितशब्दवशेन केचिदाहुः ‘ केनचिदनुष्ठात्रा संकल्पितः ’ इति । न तु एतत् युक्तमिव ‘अन्येन अर्धकर्मणि तदीयस्य हविषो हरणम् ’ इति । तस्मात् हि णिजन्तः संकल्पितशब्दः केन चित् वाक्येन (‘ आग्नेयमष्टाकपालं निर्वपेत् रुक्कामः ’ इत्यनेन) रुक्कामादियुक्तेन विहितः इत्यर्थः । तत्राह अष्टाकपालसंबन्धसिद्ध्यर्थं आग्नेयशब्दे अनूद्यमाने पौर्णमासीगतस्य का देवता इति न ज्ञायते । युगपदुपलक्षणविधिकल्पने वाक्यभेद इति । अनेनैव मार्गेण आकृत्यधिकरणमुखप्रदर्शितैः वचनव्यक्तिप्रकारैः वाक्यभेदानन्त्यं प्रपञ्चयितव्यम् । तेन अवश्यविधातव्योऽत्र द्रव्यदेवतासंबन्धः । न च स पूर्वप्राप्ते कर्मणि संभवति, इति ‘ गुणश्चापूर्वसंयोगे ’ इति कर्मान्तरत्वम् । कर्मान्तरत्वे

च सति तदवस्थं रूपावचनं इत्यनुवादता । अतश्च बलात् एकवचनलक्षणादि आश्रयणीयम् । किञ्च **'न वाऽन्यक्रियायोगे वाक्यमेतत् समाप्यते । न च स्वार्थासमाप्तत्वाद्वाक्यान्तरमपेक्षते ॥'** अष्टाकपालो भवति इति नायं पुरुषव्यापारः । न च पुरोडाशव्यापारमात्रं विधातुं शक्यम्, अभावनाविशेषात्मकत्वात् । तत्र अवश्यकल्पनीये पुरुषव्यापारविशेषे यागकल्पना आपतति । तत्र यद्यपि प्रत्यक्षे लभ्यमाने न युक्तं आनुमानिककल्पनम्, तथापि अत्र अपरिपूर्णे वाक्ये वाक्यान्तरानपेक्षिणि पौर्णमास्यमावास्यावाक्यस्थो यजिः असंनिहित एवेति नानुमानं प्रतिबध्नाति । अनुमिते च सति 'य एवं विद्वान्' इति अनुवादसरूपत्वात् अनुवाद एव विज्ञायते । क्रियासामानाधिकरण्याच्च 'यदाग्नेयोऽष्टाकपालः' इत्यादेर्यच्छब्दात् विलक्षणः कर्तृसमानाधिकरणोऽयम् 'य एवं विद्वान्' इत्युपबध्यमानो विधिसामर्थ्यं निरुन्ध्यात् । तथा चोक्तं **'क्रियापदैकयोगित्वे यच्छब्दो न रुन्ध्याद् विधिम् । कर्तृयुक्तः स एवान्यप्रापितार्थानुवादकृत् ॥'**

व्यपदेशश्च तद्वत् । ७ ॥

भाष्यम्— 'उग्राणि ह वा एतानि हवींषि अमावास्यायां संश्रियन्ते, आग्नेयं प्रथममैन्द्रे उत्तरे' इति समुच्चयं दर्शयति । आग्नेयादीनां गुणत्वे विकल्पः स्यात् । तत्र आग्नेयं प्रथमम्, ऐन्द्रे उत्तरे द्वे इति व्यपदेशो नावकल्पेत । विकल्पे संभारपौर्वापर्यानुपपत्तिरिति ।

वा— **'एकेष्टिर्यद्यमावास्या सांनाय्यौषधयोस्ततः । विकल्पे सति संभारपौर्वापर्यं कुतो भवेत् ॥'** कर्मभेदे हि भिन्नविषयत्वात् सांनाय्यपुरोडाशसमुच्चये सति संश्रियन्ते इति समस्तसंभरणं प्रथमोत्तराभिधानं चावकल्पते नान्यथा, प्रथमपक्षे च चतुर्थमपि अपरमस्तीत्युत्तराणीति स्यात् नोत्तरे इति ।

लिङ्गदर्शनाच्च । ८ ॥

भाष्यम्— लिङ्गं च दृश्यते, 'चतुर्दश पौर्णमास्यामाहुतयो हूयन्ते, त्रयोदशामावास्यायाम्' इति ।

वा— कर्मान्तरपक्षे अभ्यधिकत्वात् गुणविधिपक्षे न्यूनत्वात् त्रयोदशचतुर्दशत्वानुवादविरोधः । कुतः ? **'पौर्णमास्यां यदा तिस्रो द्वे दर्शविषये यदा । प्रधानाहुतयः सन्ति तदा संख्योपपद्यते ॥'** तस्मात् समुदायानुवादौ इति सिद्धम् । आह च— **'अरूपत्वाद्विधेयस्य प्रकृते शब्दशक्तितः । तत्रैव रूपलाभाच्च समुदायानुवादता ॥'**

शा— इति प्राप्ते, अभिधीयते । **'कर्मान्तरविधायित्वे स्यात् सर्वेषां प्रधानता । समुदायानुवादौ तु रूपाभावादिमौ मतौ ॥ द्रव्यं कथञ्चिल्लभ्येत देवता तु न लभ्यते । लभ्यते मन्त्रवर्णाच्चेन्नाज्यभागाङ्गता यतः ॥ लिङ्गक्रमाभ्यां मन्त्राणामाज्यभागाङ्गता स्थिता । वचनं तु व्यवस्थाऽर्थमन्यार्थत्वादबाधतः ॥'** इदानीं पूर्वपक्षवादी प्रकारान्तरेण प्रत्यवतिष्ठते **'भवेदेवमरूपत्वे समुदायानुवादता । यदाग्नेयादिवाक्येस्तु तयो रूपं विधीयते ॥ अत्रोच्यते गुणोऽनेकः प्राप्तकर्मानुवादतः । नैकेन विधिना शक्यो विधातुमसकृच्छ्रुतेः ॥'** ततः समुदायानुवादौ ।

के— अपवादः **संगतिः** ।

सोम— **सूत्रार्थस्तु**–पौर्णमास्यां पौर्णमास्युपलक्षितविद्वद्वाक्यद्वये प्रकरणं प्रकृतमेव कर्मजातं स्यात्, कर्मान्तरविधौ रूपप्रापकवचनाभावात् इति ।

वि— 'एवं विद्वान् पौर्णमासीममावास्यामितीरितम् । कर्मान्यद्गुत पूर्वोक्तसमुदायानुवादकम् ॥, कर्मान्तरं स्यादभ्यासाद् ध्रौवं द्रव्यं हि देवता । वार्त्रघ्नीत्यादितो लभ्याऽनुवादस्तु न युज्यते ॥, वार्त्रघ्नीत्याज्यभागाङ्गव्यवस्थोक्तेर्न देवता । पौर्णेत्यनूद्यते पौर्णमासीयुक्तं त्रिकं तथा ॥ अमेत्यपि समूहस्य द्वित्वसिद्धिः प्रयोजनम् । सहस्थितिः पौर्णमास्यामित्युक्तिभ्यां त्रिकेत्रिके ॥ विद्वद्वाक्यविधौ विध्यावृत्तिराग्नेयकादिना । विहितस्य फलित्वेन प्राधान्यमितरे गुणाः ॥' (एतदर्थस्तु, 'य एवं विद्वान् पौर्णमासीम्' 'य एवं विद्वानमावास्याम्' इति वाक्यद्वयमीरितम् । वार्त्रघ्नीत्यादितः 'वार्त्रघ्नी पौर्णमास्यामनूच्येते, वृधन्वती अमावास्यायाम्' इति मन्त्राभ्यां देवता लभ्या । अनुवादस्तु न युज्यते विधेयान्तरस्य

कस्य चिददर्शनात् । पौर्णेत्यनूद्यते 'पौर्णमास्यां पौर्णमास्या यजेत' इत्यनेन त्रिकमनूद्यते । अमेत्यपि 'अमावास्यायाममावास्यया यजेत' इत्यनेनापि अमावास्यायुक्तं त्रिकमनूद्यते । अनुवादस्य प्रयोजनं तु समूहस्य द्वित्वसिद्धिः । 'पौर्णमास्यां पौर्णमास्या, अमावास्यायाममावास्यया' इत्युक्तिभ्यां तु त्रिकेत्रिके सहस्थितिः सहानुष्ठानं सिध्यति । विद्वद्वाक्ययोः विधौ स्वीकृते तु आग्नेयादिना 'आग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति' इत्यादिना वाक्येनैव विहितत्वात् विधेः आवृत्तिर्दोषः । तस्मात् विद्वद्वाक्ये न विधिः । विहितस्य आग्नेयादियागषट्कस्य फलित्वेन फलवत्त्वेन प्राधान्यं इतरेषां प्रयाजादीनां गुणत्वं च ज्ञेयम् । इति । के.)

भाट्ट— तत्रत्य एव 'य एवं विद्वान् पौर्णमासीं यजते यावदुक्थ्येनोपाप्नोति तावदुपाप्नोति, य एवं विद्वानमावास्यां यजते यावदतिरात्रेण' (तैसं. १।६।९) इत्यादिवाक्येऽपि अभ्यासात् कर्मभेदः । न चायं लट्, लेट्त्वेऽपि वा यच्छब्देन विधिप्रतिबन्धात् विधिपुनःश्रुत्यभावः । 'समिधो यजति' (तैसं. २।६।१) इतिवल्लेट्त्वावगतेः । यच्छब्दस्य 'यो दीक्षितः' इतिवत् वेदनक्रियामात्रविधिप्रतिबन्धकत्वात् । अत एव पौर्णमास्यमावास्यापदमपि नामधेयम् । 'पौर्णमास्यां पौर्णमास्या' इति वाक्यद्वयेन एतद्वाक्यविहितकर्मणोरेव कालविधानात् । न च रूपाभावः 'वार्त्रघ्नी पूर्णमासेऽनूच्येते, वृधन्वती अमावास्यायाम्' (तैसं. २।५।२) इति वचनेन आज्यभागक्रमाम्नातानामपि मन्त्राणां क्रमं बाधित्वा एतद्वाक्यविहितकर्माङ्गत्वेन विधानात् । मान्त्रवर्णिकाग्नीषोमदेवतायाः 'सर्वस्मै वा एतद्यज्ञाय गृह्यते यद् ध्रुवायामाज्यम्' (तैब्रा. ३।३।५) इति वचनेन च द्रव्यस्य प्राप्तत्वात् । अथवा, आग्नेयादिवाक्यैरेव पौर्णमास्यमावास्यादिपदोपस्थापितैतद्वाक्यविहितकर्मानुवादेन द्रव्यदेवताविधानात् रूपलाभोपपत्तिः । न चानेकविधानात् वाक्यभेदः । तद्धितेन देवताविशिष्टद्रव्यवाचिना परस्परान्वयस्य व्युत्पन्नत्वेन विशिष्टविध्युपपत्तेः । प्रकारान्तरेण रूपलाभस्तु कौस्तुभे एव द्रष्टव्यः । सर्वथा विद्वद्वाक्ये कर्मान्तरविधिः । एवं च 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति फलवाक्येन प्रयाजादिसाधारण्येन

सर्वेषामाग्नेयादीनां एतद्वाक्यविहितकर्मणोश्च प्रथमपक्षे फलसंबन्धः । द्वितीये तु तत्साधारण्येन तयोरेव दर्शपूर्णमासप्रातिपदिकस्य कालयोगिषु प्रसिद्धत्वेऽपि द्विवचनस्याप्रसिद्धत्वात्, आज्यभागादिषु तस्य प्रसिद्धत्वेऽपि प्रातिपदिकस्याप्रसिद्धत्वात् । अतः राजसूयन्यायेन नाम्नः संकोचकत्वानुपपत्तेः प्रकरणात् सर्वेषामेव यागानां फलसंबन्धः । पाशाधिकरणन्यायेन द्विवचनस्याप्रसिद्धत्वेऽपि प्रातिपदिकमात्रप्रसिद्ध्या कालयोगिनामेव वा अनयोरेव वा द्वित्वस्यापि कथञ्चिदुपपत्तेः फलसंबन्धः । न तु षण्णामेवाग्नेयादीनाम् । **इति प्राप्ते**, लिङ्गक्रमाभ्यामाज्यभागाङ्गत्वेन वार्त्रघ्नीवृधन्वतीमन्त्राणां प्राप्तानां अपेक्षितव्यवस्थाविधायकत्वेन वार्त्रघ्नीवाक्यस्योपपत्तौ नानपेक्षितगौरवापादकविद्वद्वाक्यविहितकर्माङ्गताबोधकत्वम् । अत एव कालद्वारेण कर्मद्वारेण वा व्यवस्थापरमेव तदिति वक्ष्यते । अतश्च न तावदनेन देवताप्राप्तिः, नाप्याग्नेयादिवाक्येन, प्राप्तकर्मानुवादेन अनेकगुणविधाने वाक्यभेदात् । विधिफलस्य हि अज्ञातज्ञापनस्य एकविषयत्वमेव सर्वत्र क्लृप्तम् । तस्यानेकविषयत्वे बाधप्रसङ्गः । न च विशिष्टविधानादवाक्यभेदः, विशिष्टस्याव्युत्पन्नत्वात् । उक्तं ह्येतत् कारकतासंबन्धेन यत्र तद्धितादिवृत्तिः, न तत्र परस्परान्वयः, अपि तु यत्र अश्वाभिधानीमित्यादौ तदतिरिक्तसंबन्धेन वृत्तिस्तत्रैव स इति । अतश्च प्रकृते देवतात्वस्य संप्रदानकारकत्वात् परस्परसंबन्धानुपपत्तेः उभयविशिष्टकर्मान्तरविधानमेवावश्यकम् । अतश्च रूपाभावस्तदवस्थ एव । अस्तु वा कथञ्चित् रूपलाभः । तथापि न विद्वद्वाक्ये कर्मविधिः, यच्छब्देन विधिशक्तिप्रतिबन्धेन विधिपुनःश्रवणस्यैवाभावात् । न च तस्य वेदनक्रियामात्रविधिप्रतिबन्धकत्वम्, यच्छब्दादेः तच्छब्दानधिकप्रतिबन्धकत्वस्यैव व्युत्पत्तिसिद्धत्वात् । **किञ्च**, अन्यपरत्वादपि नाभ्यासस्वरूपसिद्धिः । तथा **हि**, तत्र विद्वद्वाक्यस्थलडन्तयजिना प्रकृतत्वात् आग्नेयादयस्त्रय एव तत्तत्कालयोगिनः तत्तन्नामधेयवशादनूद्यन्ते । तत्प्रयोजनं च तन्त्रेण यजिना अनेकोपादानात् समुदायसिद्धिः । तस्यापि प्रयोजनं फलवाक्ये षण्णामेव फलसंबन्धसिद्धिः, प्रातिपदिकस्य षट्सु कालयोगेन

प्रसिद्धत्वात्, द्विवचनस्य च स्वशक्याश्रयसमुदायघटकसमुदायिवृत्तित्वसंबन्धेन बहुत्वलक्षणार्थत्वात् । लक्षणातात्पर्यग्राहकमेव च शक्यसंबन्धघटकसमुदायसिद्धिद्वारा विद्वद्वाक्यद्वयम् । अन्यथा हि विद्वद्वाक्याभावे आग्नेयद्वयस्यैव एकवाक्योपादानावगतद्वित्वयोगिनः कालद्वययुक्तस्य च फलसंबन्धापत्तिः । यथा च 'यदाग्नेयोऽष्टाकपालः' इत्यत्र आग्नेयद्वयसिद्धिः तथा कौस्तुभे एव प्रपञ्चितम् । अतः षण्णां फलसंबन्धसिद्धिरेव उक्तविधया विद्वद्वाक्यप्रयोजनं इत्यन्यपरत्वादपि न 'वैश्वदेवेन यजेत' इतिवत् अभ्यासस्वरूपसिद्धिः । न चैवं 'पौर्णमास्यां पौर्णमास्या' इति वाक्यद्वयवैयर्थ्यापत्तिः, तस्य समुदितयागत्रिकप्रयोगविधित्वेन सार्थक्यस्य एकादशे वक्ष्यमाणत्वात् । अन्यथा हि उत्पत्तिवाक्येषु प्रत्येकं कालयोगात् प्रत्येकमेव पूर्वोत्तराङ्गसहितैकप्रधानप्रयोगा भवेयुः । एवं चोत्पत्तिवाक्ये कालश्रवणमपि विद्वद्वाक्याधिकारवाक्यस्थयजिपदसंकोचार्थमेवेति समुदायसिद्धयर्थं समुदायिनामनुवादकावेतौ, न कर्मान्तरविधी इति सिद्धम् ।

मण्डन— 'वाक्यं न कर्म विदधाति य एवमादि ।'

शंकर— 'विद्वद्वाक्येऽनुवादः स्यात् ।'

* **पौर्णमासीन्यायं** अमावास्यायामपि दर्शयति । 'पूर्वां पौर्णमासीमुपवसेदिति पैङ्ग्यम्, उत्तरामिति कौषीतकम्' । 'या पूर्वा पौर्णमासी सा अनुमतिः, या उत्तरा सा राका' इति **पौर्णमासीन्यायः**, तस्य अमावास्यायां अतिदेशः 'या पूर्वाऽमावास्या सा सिनीवाली, योत्तरा सा कुहूः' इति । **ऐब्रासा.** ३२।९।२-३.

* **पौर्णमासीमात्राङ्गता** वैमृधस्य । ४।३।१३। **३२-३५.**

* **पौर्णमासीमात्रकालिकत्वमुपांशुयाजस्य** । १०। ८।१७।५१-६१.

‡ **पौर्णमासीवदुपांशुयाजः स्यात् । २।२।४।९ ॥**

'जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशावुपांशुयाजमन्तरा यजति' इति । तथा 'विष्णुरुपांशु यष्टव्योऽजामित्वाय, प्रजापतिरुपांशु यष्टव्योऽजामित्वाय, अग्नीषोमावुपांशु यष्टव्यावजामित्वाय' इति । तत्र संदेहः किं विष्ण्वादिगुणकानां प्रकृतानां यागानां समुदायानुवादकम्, उत अपूर्वस्य यागस्य इति । इदानीमधिकरणत्रयेण पौर्णमास्यधिकरणोक्तसमुदायानुवादे कर्तव्ये सर्वात्मना पौर्णमास्यधिकरणसिद्धान्तोपजीवनात् उपांशुयाजपूर्वपक्षस्य अनन्तरमारम्भः । अत्रायं पूर्वपक्षिणोऽभिसंधिः । यथा पौर्णमास्यधिकरणे रूपवतामाग्नेयादीनां संनिधिसमाम्नातस्य विद्वद्वाक्ययुगलस्य रूपाभावात् आग्नेयादिसमुदायानुवादकत्वम्, तथेहापि 'उपांशुयाजमन्तरा यजति' इत्यस्य विष्ण्वादिवाक्यविहितप्रकृतकर्मसमुदायानुवादकत्वम् । तथाहि विष्ण्वादिवाक्यानां तव्यप्रत्ययवशात् विधित्वं तावदसंदिग्धम्, देवता च विष्ण्वादिपदैः प्रतीतैव । द्रव्यमपि ध्रौवाज्यम् । उपांशुयाजवाक्ये वर्तमानसरूपात् विधित्वमेव तावत् संदिग्धम् । यथाकथञ्चित् ध्रौवाज्यप्राप्तावपि न देवता समस्ति । न चोपांशुयाजक्रमसमाम्नातमन्त्रसंबन्धात् देवतालाभः, विष्ण्वादिदेवताप्रकाशका मन्त्रा यागेष्वेव लिङ्गबलेन संबध्यन्ते, नान्तरावाक्ये । **न च** कर्मानुशिष्टतव्यप्रत्ययेन विष्ण्वादिदेवतानामेव कर्तव्यतावगमात् न यागविधानमिति **वाच्यम्** । यजतीत्यादौ उपसर्जनस्यापि यागस्य प्राधान्यावगतदेवताविशिष्टस्य अगत्या प्राधान्यविधानात् । न चात्र गत्यन्तरमस्ति, अन्तरालविध्यभावात् रूपाभावाच्च कर्माविधायकत्वस्य उक्तत्वात् । तदुक्तम्—

'यागान् विष्ण्वादिसंयुक्तैर्विहितान् रूपवत्तया । अरूपमन्तरायुक्तमगत्यैवावलम्बते ॥' इति (वा. पृ. ४८९) । **न च** अन्तरालवाक्यस्य अनुपादेयत्वात् तस्यैव कर्मण उपादानात् अनुपादेयत्वेन अन्तरालवाक्ये एव कर्मणो विधेयत्वमिति **वाच्यम्** । बुद्धिविच्छेदे हि सति अनुपादेयं प्रति उपादानं प्रकरणान्तरन्यायेन कर्मभेदकं भवति । न चात्र बुद्धिविच्छेदोऽस्ति, विष्ण्वादिवाक्योत्पादितस्यैव संनिधानात् । ननु जामितोपक्रमं अजामित्वावसानमेकं वाक्यमवगम्यते, जामित्वाजामित्वयोरेकविषयत्वात् । तच्चैवं संभवति, यदि अन्तरालवाक्यस्य विधायकत्वं विष्ण्वादिवाक्यानां च अर्थवादत्वम् । विष्ण्वादिवाक्यानां विधायकत्वे विधिभेदेन वाक्यभेदात् अवगतैकवाक्यत्वं विहन्यते । एक-

वाक्यसंभवे हि वाक्यभेदो दोष एवेति । अत्र च अन्तरालवाक्यस्य अविधायकत्वस्योक्तत्वात् विष्ण्वादियुक्तानां विधायकत्वम्, तथा सति भिन्नविधिप्रयोजनत्वेन वाक्यभेदस्यैव प्रमाणबलादायातत्वान्न दोषावहत्वम् । यच्च जामित्वाजामित्वयोः एकविषयत्वम्, तद्भिन्नवाक्येऽपि जामित्वे तस्य तु अनुषङ्गकल्पनया अवरुद्धत्वम् । तेन यथा 'तनूः' ('तनूर्वर्षिष्ठा गह्वरेष्ठोग्रं वचो अपावधीं त्वेषं वचो अपावधीं स्वाहा' इति मन्त्रः ।) इत्यस्य तन्त्रोच्चारितस्यैव 'रजाशया, हराशया' इत्येतत्संबन्धः, तथा जामित्वस्यापि विष्ण्वादियुक्तवाक्यत्रयेऽपि तन्त्रेण संबन्धः । न च वाक्यसंबन्धिजामितोपक्रमात् तस्यान्तरालवाक्यव्यवहितस्य कथं विष्ण्वादिवाक्यैः संबन्धः, अन्तरालवाक्यस्यापि तदनुवादकत्वेन तद्व्यवधायकत्वाभावात् । ननु भवतु विष्ण्वादिवाक्यानां कर्मविधायकत्वम्, अन्तरालवाक्यस्य तु कथं सर्वानुवादकत्वम्, अन्तरालस्यैव अप्राप्तत्वेन विधानात् । **मैवम्**, जामितासंकीर्तेः विष्ण्वादिवाक्येऽपि अजामित्वानुवादेन अन्तरालकालस्यापि प्राप्तत्वात् । भवति च अनुवादतोऽपि स्थाननियमः । यथा 'न गिरागिरेति ब्रूयात्' इति गिरापदनिषेधानुवादबलात् इरापदस्थाननिवेशित्वम् । इति न किञ्चिदेतत् । अनुवादप्रयोजनं च 'उपांशुयाजमन्तरा यजति' इत्यनेन विष्ण्वादियुक्तकर्मणां सर्वेषामुपांशुयाजनामत्वं भवति । तथाच सति 'उपांशु पौर्णमास्यां यजन्' इति संज्ञैकदेशेन अनूदितानां पौर्णमासीकालसंबन्धः । ततश्च फलवाक्ये सर्वेषामेवोपादानमिति । अतः पौर्णमासीवत् 'उपांशुयाजमन्तरा यजति' इत्येतदपि वाक्यं समुदायानुवादकमेवेति ।

चोदना वाऽप्रकृतत्वात् । १० ॥

एवं प्राप्ते, ब्रूमः । भवेदेवं यदि विष्ण्वादिवाक्यैर्यागविधानं भवेत् । न चैतदस्ति । तथाहि यथा 'वैश्वानरं द्वादशकपालं निर्वपेत्' इत्युपक्रम्य 'यद् द्वादशकपालो भवति' इत्यादिना द्वादशकपालस्यैव स्तुतिदर्शनात् उपक्रमोपसंहारयोरेकविषयत्वे सति तदन्तर्गतानामष्टत्वादीनां न पृथग्विधिविषयत्वम्, तथात्रापि 'जामि वा एतद्यज्ञस्य क्रियते' इत्युपक्रमे पुरोडाशयोर्जामितादोषोपक्रमात् अन्ते च तदपनयनरूपाजामित्वोपसंहारादेकवाक्यत्वम् । तच्च तदैव संभवति, यदि एकस्यैव विधित्वं इतरेषामर्थवादत्वम् । उपक्रमस्थजामित्वदोषश्च अन्तरालसंबन्धिकर्मविधानमेवापेक्षते । तस्यैव जामित्वदोषापनयनहेतुत्वात् । तथाभूतं च 'उपांशुयाजमन्तरा यजति' इति वाक्यम् । ततस्तदेव विधायकम्, विष्ण्वादियुक्तानां चार्थवादत्वमेव निर्णीयते । यत्तूक्तम्, यथा 'तनूः' इति पदस्य तन्त्रोच्चारितस्यैव रजाशयाहराशयावाक्यसंबन्धः, तथा जामित्वस्यापि तन्त्रोच्चारितस्य विष्ण्वादिवाक्यत्रयसंबन्धात् प्रत्येकमेवोपक्रमोपसंहारयोरेकविषयत्वमिति । तदयुक्तम्, तत्र हि एकवाक्यबलेन विष्ण्वादियुक्तानां अन्तरालयुक्तविधिशेषत्वासंभवात् वाक्यभेदे सति अवश्यं कल्पनीयत्वात् पदान्तरसंबन्धस्य अध्याहारात् तन्त्रोच्चारितपदान्तरकल्पनाया एव लघुत्वात् तथा आश्रितमिति जानीमः । इदं तु प्रथमावगतैकवाक्यबलेन विष्ण्वादियुक्तानामन्तरालयुक्तविधिविशेषत्वेनैव वाक्यान्तरत्वासंभवात् नोपक्रमस्य तन्त्रत्वकल्पनायां प्रमाणमस्ति । एवं च सति अर्थवादसंबन्धाद्विधित्वमसंदिग्धम् । **न च** रूपाभावात् न कर्मविधित्वमिति **वाच्यम्** । तथाहि, द्रव्यं तावत् साधारणं ध्रौवमेवाज्यमिति । देवताऽपि च मान्त्रवर्णिकी । उपांशुयाजक्रमे हि वैष्णवप्राजापत्याग्नीषोमीययाज्यानुवाक्यायुगलानि आम्नायन्ते । तैश्च तुल्यार्थतया विकल्प्यमानैर्वैकल्पिक्य एव देवताः प्राप्यन्ते । नहि अन्यथा क्रमावगता मन्त्रा अङ्गभावं प्रतिपद्यन्ते, समवेतार्थप्रकाशनेनैव मन्त्रस्याङ्गत्वात् । **न च** एकवाक्यानुरोधेन अर्थवादस्यैव देवतासमर्पकत्वमिति **वाच्यम्** । अर्थवादानां लाक्षणिकस्तुतिपरत्वेन मुख्यार्थस्तुतिपरत्वाभावात् । उभयत्र तात्पर्ये वाक्यभेदप्रसङ्गात् । न च गत्यन्तरं नास्तीति नार्थवादत्वेन संबन्धः । किञ्च 'विष्णुरुपांशु यष्टव्यः' इत्याद्यभिधानात् उपसर्जनीभूतो यागः प्रतीयते, विष्ण्वादयश्च प्रधानतया । यागाभ्युपगमे च विष्णुदेवताको यागः कर्तव्य इति निष्कृष्य रूपभङ्गेन यागे विष्ण्वादयः अप्रधानभूता इत्यर्थात् कल्पनीयम् । न च 'उपांशुयाजमन्तरा यजति' इति यागस्य प्राधान्येन प्रत्यक्षविधौ सति कल्पनामर्हति । 'विष्णुं यजति' इत्यादिषु अगत्या

उपसर्जनार्थविधिपरत्वमपि स्वीकृतम् । अत्र तु अन्तरालवाक्यस्यैव विधित्वेन गतिसंभवाद्वैषम्यम् । अतः अन्तरालवाक्यस्यैव ... विष्ण्वादिवाक्यानां तु अर्थवादत्वम् । तदुक्तम्– '**विष्ण्वादियागसंबन्धे कृते यागोऽर्थतो भवेत् । उपसर्जनभूतश्च श्रौते चैतन्न युज्यते ॥**' इति (वा. पृ. ४९१) । अतः सर्वथा विष्ण्वादिवाक्यानां विधित्वासंभवात् अन्तरावाक्यस्यैव कर्मविधायकत्वम्, न तु अर्थवादत्वमिति सिद्धम् ।

प्रयोजनम्– पूर्वपक्षे वैष्णवादिकर्मत्रयानुष्ठानम्, सिद्धान्ते तु एकस्यैवेति । **सूत्रं** तु अन्तरावाक्ये कर्म चोदना विष्ण्वादिवाक्यानामविधायकत्वेन कर्मणामप्रकृतत्वादिति । तदुक्तम्– '**प्रकृतानामसद्भावाद् गम्यते नानुवादता । यागो विष्ण्वादिसंयुक्तैर्न हि वाक्यैर्विधीयते ॥**' इति (वा. पृ. ४९०) । अत्र **के चित्** 'तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यजन्' इत्येतदेवोपांशुयाजस्य उत्पत्तिवाक्यमिति वदन्ति । अयं च तेषामभिसंधिः— अत्र तावत् द्रव्यदेवताकालोपांशुत्वविशिष्टो यागः प्रतीयते । विधेश्चात्र विध्यन्तरशेषत्वाभावेन अनुवादत्वासंभवात् परेणापि पौर्णमासीकालविधानार्थमवश्यं कल्पनीयः । स चात्र रूपसमानयागलाभसौकर्यात् द्रव्यादिविशिष्टयागविषय एव कल्पनीयः । अन्तरालवाक्ये तु कर्मोत्पत्तौ द्रव्यदेवतादि क्लेशेन कल्पनीयम् । किञ्च पौर्णमासीकालसंबद्धाग्नेयाग्नीषोमीयपुरोडाशद्वयान्तरालक्रियमाणे उपांशुयाजे आग्नेयादौ च पौर्णमासीकालस्य प्राप्तत्वात् 'तावब्रूताम्' इति वाक्यमनर्थकमेव भवेत् । अनेन तु विशिष्टकर्मविधौ अन्तरालस्य अप्राप्तत्वात् तद्विधानेनैव अन्तरालवाक्यमर्थवदिति । तेन 'तावब्रूताम्' इत्येतदेव उपांशुयाजोत्पत्तिवाक्यम् । अन्तरावाक्यं तु अन्तरालविधायकमेवेति । एवं च सति सर्वेषामेव उत्पत्तौ कालसंबन्धत्वाविशेषात् एकरूपतया समुदायानुवादवाक्येन 'य एवं विद्वान्' इत्यादिना ग्रहणमुपपन्नं भविष्यतीति ।

तदयुक्तम्, अर्थवादसरूपं तावदिदं वाक्यम् । सर्वत्र च अनुवादपूर्वं प्रतीतिहेतुगवेषणमेव प्रथमं प्रमातॄणां भवति । तदलाभे रूपभङ्गेन कल्पितविधिना अनूद्यमानतया प्रतीयमानो विधीयते इति स्थितम् । तत्र पूर्वप्रतीतिहेतुगवेषणे 'उपांशुयाजमन्तरा यजति' इति संनिहिते प्रत्यक्षयागविधिदर्शनात् न तावत् यागविधिः कल्पयितुं शक्यते । तेन विशिष्टयागविधानासंभवात् एक एव गुणो विधातव्यः, प्राप्ते कर्मणि अनेकगुणविधाने वाक्यभेदात् । तत्र आज्यस्यापि ध्रुवावाक्यप्राप्तत्वान्न विधानम् । देवता चात्र प्रतीयते एव । अग्नीषोमसंबन्धे तद्धितचतुर्थ्योः अश्रवणादग्नीषोमौ इति प्रथमाद्विवचनेन प्रातिपदिकार्थमात्रविधानात् सत्यपि वा देवताप्रत्यये मन्त्रवर्णप्राप्तानुवादत्वेनैव उपपत्तौ न विधित्वम् । उपांशुत्वमपि अन्तरावाक्यप्राप्तं न विधेयम् । न च उपांशुयाजपदस्य नामत्वात् नोपांशुत्वमन्यतो लब्धमिति वाच्यम् । यतः समभिव्याहारमात्रेण अन्तरालवाक्ये नामत्वं स्फुरति । वस्तुतस्तु तत्प्रख्यशास्त्रान्तराभावात् अर्थवादस्य चाविधायकत्वात् याजशब्देन नानुवादः, उपांशुत्वं च विधीयते एवेति । तदुक्तम्– '**न च तत्प्रख्यरूपेण नामैतदुपपद्यते । विहितं न ह्युपांशुत्वं शास्त्रेणान्येन केन चित् ॥**' इति (वा. पृ. ४९४) । अतः पौर्णमासीकालः एव अप्राप्तत्वात् अत्र विधीयते इति युक्तम् । ननु तस्यापि पुरोडाशद्वयान्तरालविधानेन अर्थप्राप्तत्वात् तद्विधानमपि व्यर्थम् । मैवम्, यदि पौर्णमासीकालविधिर्न स्यात् 'उपांशुयाजमन्तरा यजति' इत्यत्र पुरोडाशद्वयान्तरालाभावात् उपांशुयाजो न भवेत् । यदा तु अन्तरालाक्षेपलभ्येऽपि पौर्णमासीकाले केवलं पौर्णमासीकालविधानम्, तेनैतत् ज्ञायते– अन्तरालापेक्ष एव पौर्णमासीकालः, उपांशुयाजाङ्गान्तरालशब्दस्य च आग्नेयोत्तरकालोपलक्षणत्वमिति । तस्य च कालस्य एकपुरोडाशायामपि पौर्णमास्यां सद्भावाद्युक्तमुपांशुयाजानुष्ठानम् । एतदेव दशमे वक्ष्यति– 'अनपायो हि कालस्य लक्षणं हि पुरोडाशौ' इति । अतो वा नायं कालविधिरिति । एवं वदता न्यायान्तरविरोधोऽपि नाकलितः । एवं हि वक्ष्यति जैमिनिः– 'तद्वच्च देवतायां स्यात्' इति । अनेन सूत्रेण उपांशुयाजे यथा द्रव्ये अनियमः, तथा देवतायामपि अनियमः पूर्वपक्षे प्रतिपाद्यते । तदेतदुभयमपि नोपपद्यते ।

अन्तरालवाक्ये हि कर्मोत्पत्तौ द्रव्यदेवतयोरनियमः संभाव्यते । तत्र द्रव्यदेवतयोरश्रवणात् 'तावब्रूताम्' इत्यत्र उपांशुयाजोत्पत्तौ स्ववाक्ये एव द्रव्यदेवतयोर्लाभात् अनियमाशङ्का कुतः ? तथा 'विष्णुर्वा स्याद्धौत्राम्नानसामर्थ्यात्' इति । तथा 'ध्रौवाद्वा सर्वसंयोगात्' इति च । सिद्धान्तेऽपि मान्त्रवर्णिकदेवतालाभो वाक्यान्तरावगतध्रौवाज्यलाभे सति संभवति, न तूत्पत्तिगतद्रव्यदेवतालाभे सति, इति यत्किञ्चिदेतदिति यथावार्तिकं अन्तरालवाक्यमेव उत्पादकमिति साधीय इति । **तौता.**

पौर्णमासीवदुपांशुयाजः स्यात् । २।२।४।९ ॥

'जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशौ, उपांशुयाजमन्तरा यजति' 'विष्णुरुपांशु यष्टव्योऽजामित्वाय' 'प्रजापतिरुपांशु यष्टव्योऽजामित्वाय' 'अग्नीषोमावुपांशु यष्टव्यावजामित्वाय' इति श्रूयते । तत्र किं उपांशुयाजशब्दः विष्ण्वादिगुणकानां प्रकृतानां यागानां समुदायस्य वाचकः, किंवा अपूर्वस्य यागस्य इति विचारे पूर्वपक्षमाह । उपांशुयाजः इति शब्दः समुदायवाचकः स्यात् पौर्णमासीवत् विद्वद्वाक्यगतपौर्णमास्यमावास्याशब्दवत् ।

चोदना वाऽप्रकृतत्वात् । १० ॥

पूर्वपक्षं वाशब्देन परिहरन् सिद्धान्तमाह । उपांशुयाज इति शब्दः चोदना कर्मान्तरवाचकः स्यात् । यागानां अप्रकृतत्वात् । 'विष्णुरुपांशु यष्टव्यः' इत्यादयस्तु न विधयः, किन्तु अर्थवादाः । तस्मात् यागान्तरमुपांशुयाजः ।

गुणोपबन्धात् । ११ ॥

'उपांशुयाजमन्तरा यजति' इत्युपांशुयाजशब्देन उपांशुत्वगुणस्यैव उपबन्धात् विधानात् विशिष्टविधानाच्च न वाक्यभेदः । किंवा 'उपांशु पौर्णमास्यां यजन्' इति कालसंबन्धपरे वाक्ये उपांशुत्वगुणस्य उपबन्धात् विधानात् तन्निमित्तं उपांशुयाजनामधेयम् । उत्पत्तिवाक्यस्थेन उपांशुयाजशब्देन उपांशुत्वस्य गुणस्य उपबन्धात् उपांशुयाजशब्दार्थज्ञानं भवति । इति अन्तरालवाक्ये एव कर्मचोदना ।

प्राये वचनाच्च । १२ ॥

प्राये बहुप्रधानकर्मसमभिव्याहारे 'शिरो वा एतद्यज्ञस्य यदाग्नेयो हृदयमुपांशुयाजः पादावग्नीषोमीयः' इत्यर्थवादे उपांशुयाजस्य वचनात् पठनात् उपांशुयाजस्य प्राधान्यावगमात् अन्तरालवाक्ये उपांशुयाजविधिरेव । तस्मात् नोपांशुयाजवाक्यं पौर्णमासीवाक्यवत् समुदायानुवादः इति सिद्धान्तः ।

'प्रधानेति भाष्येण (प्रधानप्राये वचनं प्रधानकर्मतामुपोद्बलयति) उपांशुयाजस्य प्रधानप्राये वचनात् प्राधान्यावगतेः विष्ण्वादिवाक्यैश्च विधौ उपांशुयाजभेदे सति अग्नीषोमीयस्यैव उपांशुयाजस्य कालविधिप्रसङ्गात् विद्वद्वाक्यानूदितत्वात् फलवाक्यग्रहणे प्राधान्यात् वैष्णवप्राजापत्ययोरुपांशुयाजयोः गुणत्वापत्तेः उपांशुयाजमात्रप्राधान्यावगतिबाधप्रसङ्गात् नोपांशुयाजवाक्यं पौर्णमासीवाक्यवत् समुदायानुवादः इत्येवं सूत्रं व्याख्यातम् ।' इति सुधा. पृ. ७५९ । **के.**

* **पौर्णमासीशब्दः** त्रिषु आग्नेयादिषु यः समुदायः, तत्र (तद्वाचकः इत्यर्थः) । **भा.** ४।४।११।३४.

* **पौर्णमासीस्थयो**राज्यभागयोः वार्त्रघ्नी, वृधन्वती अमावास्यास्थयोः इति व्यवस्था । **वा.** २।२।३।३ पृ. ४७८.

* सर्वत्र हि तुल्यरूपाणां तुल्यधर्माणां विभागे **पौर्वापर्यं** भवति । तद्यथा देवदत्तमनुगच्छतीति । यदि देवदत्तोऽपि गच्छति एवमनुगमनमवकल्पते । तथा अनुयजनमपि । **वा.** २।३।१०।२१, न चावश्यं तुल्यजातीययोरेव पौर्वापर्यं भवति अतुल्यजातीययोरपि पौर्वापर्यं भवति । तथा पाकमनुभुङ्क्ते इति अविरोधोपपत्तेः । यत्तु देवदत्तो यज्ञदत्तमनुगच्छतीति एतत्तुल्यकर्मत्वं गम्यते इति युक्तम्, तत्र कर्तृमात्रोपादाने सति क्रियाऽन्तरानुपादानात् । २२, * **पौर्वापर्येण** विरोधे पूर्वं परेण बाध्यते । प्राप्तबाधोऽत्र । ३।३।७।१४ पृ. ८६०. * **पौर्वापर्ये** अपच्छेदयोः परनिमित्तकं प्रायश्चित्तं कार्यम् । अपच्छेदन्यायः । ६।५।१९।५४. * 'पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्' इत्यपच्छेदाधिकरणन्यायेन उपक्रमगतस्य परेण बाधः, इति चेन्न, परस्य

लब्धात्मकत्वे एव तन्न्यायप्रवृत्तेः । कु. ३।३।१।२. * 'पौर्वापर्ये०' इति न्यायेन काम्यं नित्यस्य बाधकम् । (जातेष्टौ द्वादशकपालस्य अष्टाकपालादिर्बाधकः । पूर्वपक्षे) । सु. पृ. ४८८, * 'पौर्वापर्ये०' इति न्यायेन पश्चाद्भाविविध्यनुरोधेन अर्थवादव्याख्यया उभयोः संप्रतिपन्नार्थत्वात् आनर्थक्यपरिहारः । इति शङ्का । पृ. १५००. * 'पौर्वापर्ये०' इति न्यायेन प्रथमोत्पन्नाया अपि कर्ता-भोक्तेत्यादिधियः उत्तरेण ब्रह्मात्मज्ञानेन बाध्यत्वम् । **उपदेशसाहस्री पद्य** प्र. २ श्लो. ३ रामतीर्थ. * 'पौर्वापर्ये०' इति न्यायेन श्रुतेरेव प्रामाण्यं शास्त्रोपक्रमे उक्तम् । **कल्पतरुः** . ४।१।२।३ ब्रसू. * ननु '**पौर्वापर्ये०**' इत्यनेन (न्यायेन) उत्पन्नमपि अर्थवादात् मुख्यवेदज्ञानं बाधित्वा विध्युद्देशज्ञानमेव गृह्येत । वा. ३।३।१।२ पृ. ८०६, * साक्षात् (आधाने) प्राप्ताङ्गधर्मः (उच्चैस्त्वं) शीघ्रतरमवगम्यते । प्रयोगवचनग्रहणोत्तरकालं तु पश्चात्तन एव प्रधानधर्मः (उपांशुत्वं) 'पौर्वापर्ये०' इत्येवं बाधते । ३।३।२।९ पृ. ८११. * 'पौर्वापर्ये०' इति **न्यायस्य** अन्योन्यानपेक्षबुद्धिजन्यविषयत्वात् सापेक्षे लिङ्गादौ अप्राप्तिः । सु. पृ. १२२०.

पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत् । ६।५। १९।५४ ॥

यस्मिन् ज्योतिष्टोमप्रयोगे बहिष्पवमानार्थं पिपीलिकापङ्क्तिवत् अन्वारभ्य गच्छतां ऋत्विजां मध्ये उद्गातुः प्रतिहर्तुश्च अपच्छेदे केन चित् क्रमेण जाते योऽपच्छेदः पूर्वं जातः तन्निमित्तकं प्रायश्चित्तं कर्तव्यम्, नोत्तरनिमित्तकं इति पूर्वपक्षे सिद्धान्तमाह । अपच्छेदयोः पौर्वापर्ये सति पूर्वदौर्बल्यं पूर्वस्य उत्तरापेक्षया दुर्बलत्वं ज्ञेयम् । उत्तरस्य अपच्छेदस्य प्रबलत्वम् । तेन उत्तरापच्छेदनिमित्तकं यत् प्रायश्चित्तं तत् कर्तव्यम् । प्रकृतिवत् प्रकृतिगतं पूर्वं भवति विकृतिगतं च उत्तरम् । तत्र प्रकृतिगतं अबाधित्वा विकृतिगतं प्रवर्तितुं नेष्टे । यथा दर्शः प्रकृतिः पशुर्विकृतिः । दर्शात् पशौ पञ्च प्रयाजाः प्राप्नुवन्ति । पशौ तु एकादश प्रयाजा विहिताः । तत्र वैकृतं एकादशत्वं प्राकृतं पञ्चत्वं बाधित्वैव प्रवर्तते, नान्यथा । तद्वत् अपच्छेदेऽपि उत्तरापच्छेदनिमित्तकमेव प्रायश्चित्तं कर्तव्यं भवति न पूर्वापच्छेदनिमित्तकम् । यत्र पौर्वापर्येण द्वयं प्राप्तं तत्र द्वयोरनुष्ठाने विरोधे सति अयं पौर्वापर्यन्यायः प्रवर्तते । यत्र तु उभयोरनुष्ठाने न विरोधप्रसङ्गः तत्र नायं न्यायः । यथा उत्तराधिकरणे । **के.**

* 'पौर्वापर्ये पूर्वनिविष्टस्यैव बाधनम् ।' **वा.** ३।६।३।१० पृ. १०३३.

* नित्यनैमित्तिकयोः, नित्यकाम्ययोः, प्राकृतवैकृतयोश्च **पौर्वापर्यनैमित्तिकन्यायेन** पूर्वबाधः । **टुप्.** ६।५।१९।५४.

* **पौर्वापर्यन्यायः** । पौर्वापर्यबलीयस्त्वन्यायः । ६।५।१९।५४. **मीको.** पृ. ४९५ 'अपच्छेदन्यायः' इत्यत्र द्रष्टव्यम् । * ज्येष्ठप्रमाणस्यापि **पौर्वापर्यन्यायेन** बाधाशङ्का । **कल्पतरुः** . १।१।१ ब्रसू. पृ. ९.

* आद्ये प्रयोगे केवलोद्गात्रपच्छेदे, द्वितीयप्रयोगे च केवलप्रतिहर्त्रपच्छेदे **पौर्वापर्यन्यायप्रवृत्तिः** । **वाल.** पृ. ११७.

* **पौर्वापर्यप्रत्यासत्तिक्रमात्** यथासंख्यक्रमः बलीयान् । काम्ये याज्याकाण्डे पौर्वापर्यप्रत्यासत्तिक्रमेण ऐन्द्राग्नमन्त्रयुगलयोः इष्टिद्वयेऽपि अनियमेन प्राप्नुवतोः यथासंख्यक्रमेण अत्यन्तदेशसाम्येन प्रत्यासन्नत्वात् विनियोगो भवति । **वा.** ३।३।७।१४ पृ. ८४०.

* '**पौर्वापर्यबलीयस्त्वं** तत्र नाम प्रतीयते । अन्योन्यनिरपेक्षाणां यत्र जन्म धियां भवेत् ॥' ये हि भिन्नवाक्यगताः परस्परनिरपेक्षाः विरोधिनोऽर्थाः श्रूयन्ते, तेषां पूर्वस्य उत्तरानुपमर्देनैव लब्धात्मकत्वात् उत्तरस्य पूर्वोपमर्देन विना आत्मलाभानुपपत्तेः पौर्वापर्यबलीयस्त्वन्यायो भवति । यत्र तु एकवाक्यतया परस्परापेक्षाणां श्रवणम्, न तत्र एतद्भवति । तत्र हि आकाङ्क्षावशेन एकवाक्यता भवति । पूर्वप्रतीते च उत्तरमात्मानुगुणं अधिकं वा आकाङ्क्षति । अतश्च यत् अनधिकं अननुगुणं वा, तदनपेक्षितत्वात् नैव तस्मिन् वाक्येऽस्ति । न चाविद्यमानेन पूर्वबाधः शक्यते इति पूर्वबलीयस्त्वं भवति । **वा.** ३।३।१।२ पृ. ८०६.

* श्रुत्यादिकल्पनाद्वाराऽपि लिङ्गादीनां प्रामाण्यविरोधेऽपि स्मृतिवत् भ्रान्त्यादिचतुष्टयान्यतरमूलत्वायोगेन श्रुत्यादिकल्पनस्य दुर्वारस्य उक्तकल्पनापेक्षत्वेन श्रुत्यादिभ्यः पश्चात् प्रवृत्तेः कल्प्यश्रुत्याद्यपेक्षत्वेऽपि च विरोधिश्रुत्याद्यनपेक्षश्रुतत्वात् **पौर्वापर्यबलीयस्त्वन्यायेन एव** (६।५।१९) वैपरीत्यं युक्तमित्येव । **सु.** पृ. १२१८.

* **पौष्कलं** नाम साम 'पवस्व मधुमत्तमः' (६९२–९३) इति ककुप्–सतोबृहतीरूपऋग्द्वयात्मके सूक्ते गेयं तृतीये सवने आर्भवपवमाने । (इति पूर्वपक्षे उक्तम्) । पौष्कलं च तृचे न गेयं किंतु एकस्यामेव ऋचि 'ककुभि' इत्येकवचनेन विशेषविधानात् (इति सिद्धान्ते उक्तम्) । चि. ९।२।६ वर्णकं ३.

* **पौष्णं** पेषणं केवलपूषदैवत्ये, न तु सोमापौष्णादौ द्विदैवत्ये । (सोमापौष्णः, ऐन्द्रापौष्णः राजसूये ।) ! ३।३।१५.

पौष्णं पेषणं चरावेव ॥

तत् सर्वार्थमविशेषात् । ३।३।१४।३५॥

भाष्यम्— पौष्णं पेषणं प्रकृतौ श्रूयमाणं विकृतौ इत्युक्तम् (पूर्वाधिकरणे) । तत्र संदेहः किं चरौ, पशौ, पुरोडाशे च, उत चरावेवेति । किं तावत् प्राप्तम् ? तत् सर्वत्र स्यात् चरौ पशौ पुरोडाशे च । कुतः ? अविशेषात् । न कश्चित् विशेषः आश्रीयते । तस्मात् सर्वत्रेति ।

वा— तत् सर्वार्थमविशेषात् ॥ (सूत्रमात्रं पठितम्, न व्याख्यातम्) ।

चरौ वाऽर्थोक्तं पुरोडाशेऽर्थविप्रतिषेधात् पशौ न स्यात् । ३६ ॥

भाष्यम्— चरौ पौष्णं पेषणं विनियुज्येत । पुरोडाशे तावत् पेषणमर्थादेव प्राप्नोति । नैवान्यथा पुरोडाशो भवति । तदर्थं तावन्न वचनम् । पशौ च न स्यात् । हृदयादिषु पिष्यमाणेषु तेषामाकारविनाशः स्यात् । तत्र को दोषः ? 'हृदयस्याग्रेऽवद्यति' इति न हृदयादवदायिष्यते । तथा अन्यदपि अवदानं न यथाश्रुतादवदास्यते । ननु शक्यते पिष्टेभ्योऽपि हृदयादिभ्योऽवदातुम् । नेति ब्रूमः । आकारा हृदयादयो न मांसानि । उक्तमेतत् आकृतिः शब्दार्थ इति । यद्यपि पुनस्तदाकृतिकः क्रियते, तथापि अस्योत्पादनप्रदेशं प्रति मुह्येयुः । तस्मात् चरौ पौष्णं पेषणं भविष्यतीत्येवमर्थं वचनम् ।

वा — चरौ वाऽर्थोक्तम्० ॥ यदि कश्चिद्वदेत् लौकिकपिष्टोपादानेनापि पुरोडाशसिद्धेर्नैकान्तेन अर्थाक्षेप इति, तं प्रति उच्यते । **अर्थो** नाम प्राकृत उपकारः । तस्य प्रकृतौ पेषणं साधनमासीत् अतस्तेन पूर्वतरप्राप्तेन उक्तं पुरोडाशे पेषणम् । पशौ च प्रधानवैगुण्यं स्यात् । तद्धि हृदयाद्याकृतिकेन ततश्च अवत्तेन साधयितव्यम् । न च पिष्टे तदाकृतिकादवदीयेत । पुनस्तदाकारकरणेऽपि मृद्भयादिवत् गौणादवदीयमाने वैगुण्यमेव । 'उत्पादनदेशादवद्यति' इति च श्रूयते । न च हृदयादेः पिष्टस्य ज्ञायेत कतरेण प्रदेशेनेदं पशोरुत्कृत्तमिति । तस्मात् चरावप्रतिषिद्धं अनर्थप्राप्तं च पेषणमिति तत्रैव विधीयते । ननु 'अदन्तको हि' इति हेत्वविशेषात् पशुपुरोडाशयोरपि प्राप्तेः द्व्यवदानानि तच्छेषाश्च पिष्ट्वा दास्यन्ते । न च प्राप्तिविप्रतिषेधौ भविष्यतः । **उच्यते** । द्व्यवदानस्य प्रदानप्रक्रमत्वात् नान्तरा पेषणेन व्यवधानं युक्तम् । हेतुवन्निगदस्य च स्तुतिमात्रार्थत्वं वक्ष्यते । तेन स्वक्रमस्थस्यैव पेषणस्य विधिः । उपनीतमात्रमेव च पेषणं पुरोडाशे अनुवादबुद्ध्या गृह्यते, चरौ च निवर्तमानं प्रतिप्रसवत्वेन, पशौ पुनरत्यन्ताप्राप्तविधित्वेन । न चैतानि एकस्यैव वाक्यस्यैतावन्ति रूपाणि विज्ञायन्ते । तत्रावश्यमैकरूप्ये अभ्युपगन्तव्ये लाघवादर्थवत्त्वाच्च प्रतिप्रसवत्वमेवावधारणीयम् । एवं सिद्धं केवलचरुविषयत्वम् ।

चरावपीति चेत् । ३७ ॥

भाष्यम्— इति चेत्पश्यति भवान्, अर्थविप्रतिषेधान्न पश्वर्थमिति । ननु चरावपि अर्थविप्रतिषेधः । विशदसिद्धे ओदने चरुशब्दमुपचरन्ति । पिष्यमाणो हि पिष्टकं यवागूर्वा स्यात् खलिर्वा ।

वा— चरावपीति चेत् ॥ (सूत्रपाठमात्रं कृतम्) ।

न, पक्तिनामत्वात् । ३८ ॥

भाष्यम्— अत्रोच्यते । सत्यं विशदसिद्धे ओदने चरुशब्दः प्रयुज्यते । विशदसिद्धश्चरुर्दीयते इति, न त्वस्य

विशदसिद्धिर्निमित्तम्। यदि विशदसिद्धिर्निमित्तं स्यात्, न पिष्टसिद्धे प्रयुज्येत। तत्रापि हि प्रयुज्यते, 'पिष्टकचरुः साध्यते' इति। अतोऽन्यदेतयोः सामान्यं तन्निमित्तम्। तदेतदुच्यते न पक्तिनामत्वादिति। न चरौ विप्रतिषेधः। कथम्? पक्तिनामत्वात्। पक्तिनामैतत् चरुरिति। अनवस्रावितान्तरूष्मपाकेन अभिनिर्वर्त्यस्य भवति चरुशब्दो वाचकः। तेन पिष्टे ओदने विशदौदने च प्रयोक्तारो भवन्ति चरुरिति। पक्षोक्तमेव प्रयोजनम्। पूर्वपक्षे पशावपि पेषणम्। सिद्धान्ते चरावेव।

वा— न, पक्तिनामत्वात् ॥ न चरावर्थविप्रतिषेधः। कथम्? '**गतिः सर्वपदार्थानां लौकिकव्यवहारतः। तत्र पाकविशेषश्च चरुत्वेनावधार्यते ॥**' ओदनपिष्टकचरुप्रयुक्तस्य चरुशब्दस्य अनेकार्थत्वमन्याय्यमिति उभयसामान्यवचनत्वं विज्ञायते। तयोश्च सामान्यमनवस्रावितान्तरूष्मपक्वत्वम्। तस्मादविप्रतिषेधः। पक्षोक्तं प्रयोजनमिति। मन्दं फलमुक्तम्। एतावान् समाधिः अविशेषेऽपि न पुरोडाशार्थत्वं प्रयोजनम्। किं तर्हि? पश्वर्थत्वमिति।

शा—— सर्वत्र स्यात् इति प्राप्ते, उच्यते। '**पुरोडाशेऽन्यतः सिद्धम्, पशावाकृतिनाशनम्। पेषणं तेन न तयोर्विधातव्यं चरौ पुनः। अविघातकमप्राप्तमिति तत्र विधीयते ॥**'

सोम— प्रासङ्गिकी संगतिः।

वि— 'चरौ पशौ पुरोडाशे चरावेवोत पेषणम्।, विशेषादर्शनादेतत् सर्वेष्वपि विधीयते ॥, प्राप्तत्वान्न पुरोडाशे हृदाद्याकारनाशनात्। न पशौ पारिशेष्येण चरावेव हि पेषणम् ॥' १९.

भाट्ट— तत् पेषणं पूषदेवत्ये चरौ पशौ पुरोडाशे च स्यात्, उत चरावेवेति चिन्तायाम्, अविशेषाददन्तकत्वहेतुवशाच्च सर्वत्र। इति प्राप्ते, पुरोडाशे तावत् पाकात् पूर्वं पेषणस्य प्राप्तत्वादेव विधानं व्यर्थम्, तदुत्तरं तु पुरोडाशपदवाच्याकृतिविनाशापत्तिः। एवं पशुहृदयादावपि। तेषामपि आकारविशेषविशिष्टमांसवाचित्वात्। न च उभयत्र अवदानोत्तरकालं पेषणविधिः, अत्यन्ताप्राप्तपेषणविधौ गौरवापत्तेः। चरौ अतिदेशेन प्रसक्तस्य प्रयोजनाभावेन निवर्तमानस्य प्रतिप्रसवमात्रकरणे तु लाघवम्। प्रकृतौ हि प्रदेयपुरोडाशसिद्धेः अन्यथोपपादयितुमशक्यत्वात् अर्थप्राप्तमपि पेषणं अध्वर्युकर्तृकत्वादिप्रयोजनसिद्ध्यर्थं सधर्मकं विहितम्। तत् चरौ प्रदेयसिद्धेः तद्व्यतिरेकेण जायमानतया चरुत्वावच्छिन्नं प्रति पेषणस्य अकारणत्वात् निवर्तमानं प्रतिप्रसूयते। अत एव प्रसक्तप्रातिकस्य कारणान्तरेण निवृत्तिप्रसक्तौ विधिः प्रतिप्रसवः। तत्र चोत्पत्तिविनियोगाङ्गसंबन्धादौ यथासंभवं विधेर्व्यापाराभावात् लाघवम्। अत एव पेषणस्य प्रदेयसिद्धिरूपप्राकृतप्रयोजनलोपेन अत्र अदृष्टप्रयोजनान्तरकल्पनेऽपि न प्रतिप्रसवत्वविघातः। धर्माणां तु पेषणस्य कर्मान्तरत्वाभावेन 'प्रधानं नीयमानं हि तत्राङ्गान्यपकर्षति' इति न्यायेन प्राकृतपेषणाङ्गतया प्राप्तानां अत्रैवादृष्टरूपकार्यान्तरप्रयुक्तत्वकल्पनं न दोषाय। इष्यते च अयमर्थः अग्निसंस्कारकमन्थनादेः पशुप्रकरणाम्नातस्य वचनात् चातुर्मास्याङ्गत्वेन विनियोगे तद्धर्माणां कार्यान्तरप्रयुक्तत्वकल्पनादौ। वस्तुतस्तु अत्र पेषणस्य न कार्यान्तरकल्पनाऽपि, प्रदेयसिद्ध्यर्थत्वादेव। यद्यपि हि चरुत्वावच्छिन्नं प्रति पेषणस्याकारणत्वम्, तथापि पिष्टकचरावपि चरुशब्दप्रयोगात् पेषणविधिबलेन च 'पौष्णं चरुम्' इत्यत्र सामान्यवाचिनोऽपि चरुशब्दस्य पिष्टकचरुविशेषपरत्वनिश्चयात्, तस्य च प्रदेयस्य पेषणमन्तरेण असिद्धेर्न पेषणस्य कार्यान्तरकल्पनाऽपि। अत एव चरुत्वं नाम अनवस्रावितान्तरूष्मपक्वतण्डुलप्रकृतिकत्वम्। अत्र भक्तव्यावृत्त्यै अनवस्रावितेति। मण्डकव्यावृत्त्यै अन्तरिति। सूपशाकादिव्यावृत्त्यै तण्डुलेति। अत एव पिष्टकचरावपि तत्संभवान्न पेषणस्य विघातकत्वमिति तत्रैव पेषणम्।

मण्डन— 'चरावेव पिषिः पौष्णे।' १९.

शंकर— 'चरावेव तु सोत्कृष्या।' सा प्रपिष्टता। १९.

पौष्णं पेषणं पूषमात्रदेवत्ये चरौ ॥

एकस्मिन्नेकसंयोगात्। ३।३।१५।३९॥

भाष्यम्—— पौष्णं पेषणं विकृतौ भवति चरौ एवे-

त्युक्तम्। अथेदानीं संदिह्यते। किं एकदेवत्ये पौष्णे एतत् भवति, उत द्विदेवत्येऽपीति। किं द्विदेवत्ये उदाहरणम्? राजसूये उत्तरे त्रिसंयुक्ते 'सौमापौष्ण एकादशकपालः, ऐन्द्रापौष्णश्चरुः (पौष्णश्चरुः) श्यावो (मो?) दक्षिणा' इति। तत्र ऐन्द्रापौष्ण उदाहरणम्। किं प्राप्तम्? एकदेवत्यस्यैव पेषणमिति, केवलसंयोगात् यथा चतुर्धाकरणे।

वा—— एकस्मिन्नेकसंयोगात् ॥ इदानीं किमन्यसहिते पूषणि देवतायां ऐन्द्रापौष्णे चरौ पेषणं भवति, उत एकस्मिन्नेव इति संदेहे चतुर्धाकरणेन्द्रपीतन्यायात् सिद्धान्तेनैव तावत् उपक्रमते। पूषा इत्येकसंयोगश्रवणात् तथाभूते एवार्थे स्यादिति।

धर्मविप्रतिषेधाच्च। ४० ॥

भाष्यम्— द्विदेवत्ये विप्रतिषिध्येत धर्मः। पूष्णः पेषणं नेतरस्य। तत्र यदि पूष्णो भागः पिष्येत, अपिष्ट इतरस्य स्यात्। तत्र विषमः पाको भवेत्। पाकनिमित्तश्च चरुशब्दः, स विप्रतिषिध्येत। अथाविरोधं मन्यमाना अपरस्यापि भागं पिंष्युः, भागसंमोहः स्यात्। तत्र को दोषः? अन्यस्य भागोऽन्यस्मै अवदीयेत। तथा अयथाश्रुतं क्रियेत। तस्मादपि एकदेवत्ये पेषणमिति।

वा— इतश्चैकदेवत्ये। कुतः? '**पिंष्यादर्धं समस्तं वा द्विदेवत्ये चरौ भवान्। पूर्वस्मिन् पाकवैषम्यं परस्मिन् भागसंकरः ॥**' अर्धपेषणे हि पिष्टोऽशः शीघ्रतरं सिध्यति, इतरश्चिरेण। तत्र पिष्टपाकानन्तरमुद्वासने सति इतरस्य आमत्वं भवेत्। तत्पाकप्रतीक्षणेऽपि वा पिष्टस्य विलयनात् अचरुत्वं स्यात्। पाकवैशद्येन हि पिष्टकचरुरपि चरुर्भवति। न चैतदस्मिन् पक्षे भवति। अथ तण्डुलान् पूर्वं प्रक्षिप्य पश्चात् पिष्टं निक्षिपेत्, ततो यौगपद्यं गम्यमानं बाध्येत (पिष्टतण्डुलभागयोर्द्वयोरपि एकयागसाधनत्वेन एकहविष्ट्वात् कृत्स्नस्य च हविषः 'हवींषि श्रपयति' इति युगपच्छ्रपणविधानात् श्रपणार्थनिक्षेपस्यापि यौगपद्यमिह अतिदेशात् गम्यमानं बाध्येत ——सु. पृ. १३२९)। पूषानुरोधेन तु ऐन्द्रेऽपि भागे पिष्यमाणे भागसंकरात् अन्यदीये भागे अन्यस्मै दीयमाने वैगुण्यं प्राप्नोति। **ननु** चैतत् सर्वं द्विदेवत्येषु भवतोऽपि समानम्। तथाहि, '**चरौ पशौ पुरोडाशे दीयमाने द्विदैवते। पूर्वं हविष एकत्वाज्जायते भागसंकरः ॥**' स चाङ्गीकृतः, मिश्रस्य हविषो मिश्रदेवतोद्देशेन युगपद्दाने विरोधाभावात्। उच्यते। '**यागापूर्वप्रयुक्तेषु धर्मेष्वेवं भवेदिदम्। भवतः पेषणं त्वेतद्देवताधर्मसंमतम् ॥**' अस्मत्पक्षे पुनः पूषदेवत्ययागापूर्वप्रयुक्तं पेषणम्। न च तत् द्विदेवत्ये तथावस्थितं इत्यप्रवृत्तिरेव। हविरन्तरेष्वपि च द्विदेवत्येषु एवंप्रकारत्वमेवेति देवता गुणभूता। न च गुणानुरोधेन प्रधानमावर्तनीयमिति सकृद्दानाभ्युपगमात् सर्वस्मिन् सह क्रियमाणे संकरदोषानाश्रयणम्। भवता पुनरस्मदभ्युपगमेन द्विदेवत्ये पेषणं वक्तुमशक्नुवता अवश्यं देवतानिमित्तत्वमभ्युपगन्तव्यम्। ततश्च देवतयोः प्राधान्यादेकैका स्वभागमसंकीर्णं प्रार्थयते इति तथैव दानमनुष्ठेयम्। आदितश्चैक एव भागः पेषणार्ह इत्यवधारितम्। ततश्च पक्तिदोषः स्यात्। अथ तण्डुलात्मकोऽपि भागः पाकसाम्यार्थं पिष्यते। तत्र ब्रूमः। यावदनुत्पन्नभागविवेकं हविः, तावत् कियान् कस्य भागः इत्यनवधारणात् संकरदोषो न जायते। कल्पिते तु विवेके वचनादृते पुनरेकीकरणानुपपत्तेरसंकीर्णदानं प्राप्नोति। तत्रान्यस्य भागात् अन्यस्मै अवदीयमाने वैगुण्यं भवति। पात्रभेदेन पक्ष्यतीति चेन्न। चरुमिति यागं प्रति उपादीयमानत्वेन विवक्षितैकसंख्यस्य पात्रकृतभेदाश्रयणे शास्त्रबाधप्रसङ्गात्। अतो न कथञ्चिदपि प्रतिषिद्धधर्मकं द्विदेवत्ये पेषणं भवतीति न कर्तव्यम्।

अपिवा, सद्वितीये स्याद् देवतानिमित्तत्वात्। ४१ ॥

भाष्यम्—— देवतानिमित्तमेतत् पेषणं श्रूयते। पूषा प्रपिष्टभागः कर्तव्य इति। स च द्विदेवत्येऽपि भागे पिष्यमाणे प्रपिष्टभागः कृतो भवति। न यथा चतुर्धाकरणे। तत्र हि तद्धितो निरपेक्षस्य भवति, न सद्वितीयस्य। इन्द्रपीत इति समासोऽपि निरपेक्षस्य, न सद्वितीयस्य। इह तु प्रपिष्टशब्दस्य भागशब्देन सह अन्यपदार्थो बहुव्रीहिः समासः। एषोऽपि समर्थयोरेव,

न तु अत्र द्विदेवत्ये कश्चिदेवंजातीयको दोषः। तस्मादेकदेवत्ये द्विदेवत्येऽपि वा चरौ अस्य भागः पेष्टव्य एव।

वा — सद्वितीयेऽपि वा पूषणि स्यादेव पेषणम्। कुतः? 'हविषो यदि पौष्णस्य तद्यागाङ्गस्य वा भवेत्। अनुक्तत्वाद् द्विदैवत्ये न भवेत् पेषणं ततः॥' पूषसद्भावनिमित्तमेतत् पेषणं न च तत् विशेषितवस्तुनिमित्तम्। व्यासङ्गित्वाच्च [व्यासज्यवृत्तित्वाच्च] देवतात्वस्य द्विदेवत्ये पूषविशिष्टता न स्यात्, न तु पूषा तद्भागो वा नास्तीति। यथा मनोतायां वक्ष्यति (भाष्यं पृ. १९३९) 'तत्राग्निः अदेवता, न तु असमवेतः' इति। तेन असत्यपि अत्र पूष्णो देवतात्वे समवायमात्रेण उपलक्षणत्वात् द्वयोर्देशेनापि च त्यज्यमानस्य 'समं स्यादश्रुतत्वात्' इत्यनेन न्यायेन अर्धं पूष्णो भाग इति गम्यते। तस्य पेषणे क्रियमाणे यदि तावत् कांस्यभोजिन्यायेन अमुख्येऽपि इत्येवं इतरभागपेषणमपि क्रियते, तथापि न किञ्चित् दुष्यति। अथापि किमेतेन अश्रुतेन कृतेन इत्येवं अर्धमात्रपेषणमेव अध्यवसीयते, तथापि केन चित् कौशलेन पाकसंपादनात्, युगपन्निक्षेपपात्रैकत्वयोर्वा गुणत्वात् वरं बाधः। इति निरूप्य (पाके दोषाभावमुपपाद्येत्यर्थः) कार्यमेव पेषणमिति। अथ यदुक्तं चतुर्धाकरणेन्द्रपीतवदिति, तत्राभिधीयते। 'समासतद्धितोत्पत्तिर्नासमर्थपदाश्रया। असमर्थत्वमेकस्य द्विदेवत्येषु चेष्यते॥' तेन आग्नेयेन्द्रपीतशब्दाभ्यां समर्थाग्नीन्द्राग्निभ्यां द्विदेवत्याग्रहणं युक्तम्। इह पुनः पूषपदस्य असमासभाक्त्वात् प्रपिष्टभागशब्दयोश्च सापेक्षेऽपि पूषणि सामर्थ्याविघातात् न किञ्चित् दुष्यतीत्युपलक्षणता।

लिङ्गदर्शनाच्च। ४२॥

भाष्यम्— लिङ्गमप्येवं भवति, 'तस्मात् पूषा प्रपिष्टभागोऽदन्तको हि' इति, देवतानिमित्तं पेषणमिति स्तुतिर्दर्शयति। तथा 'सौमापौष्णं चरुं निर्वपेन्नेमपिष्टं पशुकामः' इति नेमपिष्टतां दर्शयति। तथा 'अर्धं पिष्टमर्धमपिष्टं भवति द्विदेवत्यत्वाय' इति देवतानिमित्तमेव पेषणं दर्शयति।

वा— 'अदन्तको हि' इति हेतुर्देवताधर्मत्वं दर्शयति। न च सद्वितीयस्य पूष्णो दन्ता जायन्ते इति हेतुसाम्यात् युक्तं पेषणम्। तथा च सौमापौष्णे नेमपिष्टतानुवादः अन्यत्र च द्विदेवत्ये 'अर्धं पिष्टमर्धमपिष्टं द्विदेवतत्वाय' इति देवताधर्मत्वदर्शनमवकल्पिष्यते।

वचनात् सर्वपेषणम्, तं प्रति शास्त्रवत्त्वादर्थाभावाद्धि चरावपेषणं भवति। ४३॥

भाष्यम्— इदं पदोत्तरं सूत्रम्, नेमपिष्टं भवतीति कस्मादेतन्न वचनमिति। उच्यते। यदि वचनमेतद्भवेत्, सौमापौष्णमात्रमनूद्य सर्वत्र पेषणं विदध्यात् चरौ पशौ पुरोडाशे च। तत्र सौमापौष्णस्य चरुसंबन्धे नेमपिष्टसंबन्धे च उभयस्मिन् विधीयमाने वाक्यं भिद्येत। तस्मात् योयः सौमापौष्णः तत्रतत्र नेमपिष्टता। तं प्रति सौमापौष्णमात्रं प्रति शास्त्रवत्त्वं अर्धपेषणस्य। पुरोडाशे अर्थात् सर्वपेषणे प्राप्ते अर्थाभावाच्च पशौ चरौ वा अपेषणे प्राप्ते वचनमिदं भवेत्। तत्र चरुशब्दो न विवक्षितस्वार्थः स्यात्। प्रदर्शनार्थः कल्प्येत। पेषणानुवादपक्षे पुनर्नैष विरोधो भवति। तस्मात् भवत्येव लिङ्गम्। ननु अङ्गनाशभयात् पशोरपेषणम्। नेति ब्रूमः। अर्धपेषणे नाङ्गनाशः, अपिष्टादवदास्यते। पेषणं चादृष्टार्थम्।

वा— विधित्वात् नेमपिष्टत्वमलिङ्गं विपर्ययसाधनं च इत्यत आह (भाष्यम्) 'यदि एतत् वचनं भवेत्' ततः अनेकार्थविध्यसंभवात् नेमपिष्टत्वं विधीयमानं चरुं वा उद्दिश्य विधीयेत सौमापौष्णं वा। तत्र य एव उद्दिष्टः तस्यैव इतरेण विशेष्टुमशक्यत्वात् सार्वत्रिकत्वप्रतीतेः सर्वपेषणं प्राप्नोति। ततश्च अन्यतरपदानर्थक्यप्रसङ्गः। तत् यदि तावत् 'यश्चरुः, स नेमपिष्टः' इति विधीयते, ततः सर्वचरुविषयावधारणे सति सौमापौष्णशब्दः एकदेशानुवादः अनर्थकः स्यात्। अथ सौमापौष्णमात्रमुद्दिश्यते, ततोऽपि सर्वपेषणमेव, तद्देवत्यहविर्मात्रप्रतीत्या पशुपुरोडाशयोरपि ग्रहणात्। ततश्च पूर्ववत् चरुशब्दानर्थक्यप्रसङ्गः। तं प्रति हि सौमापौष्णमविशेषितं प्रति पेषणस्य शास्त्रवत्त्वं विशेषणार्थाभावात्।

एतस्मिन् पक्षे चरौ अपेषणं भवति। ननु अर्थप्राप्तत्वात् पुरोडाशस्य अवक्तव्यं पशोश्च अर्थविप्रतिषेधात् इत्युक्तम् ['चरौ वा, अर्थोक्तं पुरोडाशे, अर्थविप्रतिषेधात् पशौ न स्यात्' (पेषणं) इति ३।३।१४।३६ सूत्रे] इति चेत्, न, अत्र तयोरुभयोरपि अप्रसङ्गात्। सर्वपेषणे हि प्राप्ते पुरोडाशस्य अर्धपेषणं विधीयते, तावतापि च कथञ्चित् पुरोडाशो निष्पद्येत। हृदयादीनामपि उत्सादादेशैकदेशवर्जं पिष्यमाणानां नार्थविप्रतिषेधो भवति। न चात्यन्ताकृतिर्नश्येत्। न चोत्सादादेशमोहः स्यात्। इतरोत्सादादेशस्य स्पष्टत्वेन च पिष्टोऽपि सन् पूषभाग उपलक्ष्यते, न सर्वपेषणवन्मुह्येत। अथवा अस्मिन् पक्षे वाचनिकत्वाददृष्टार्थे पेषणे सति अपिष्टादेवावदीयेत। न हि तदैतत् देवतानिमित्तं पेषणं स्यात्। तस्मात् सार्वत्रिकत्वप्रसङ्गान्न परिशेषसिद्धं चरोः पेषणमिति तच्छ्रुतिरनर्थिका प्राप्नोत्येवेति चरुदेवतासंबन्धविधिपरे वाक्ये नेमपिष्टत्वमनूद्यते इत्यवश्यमभ्युपगन्तव्यम्। अतश्च लिङ्गत्वसिद्धिः।

एकस्मिन् वाऽर्थधर्मत्वादैन्द्राग्नवदुभयोर्न स्यादचोदितत्वात्। ४४॥

भाष्यम्— एकदेवत्ये वा पौष्णं पेषणं भवितुमर्हति, नैन्द्रापौष्णे। कुतः? नैष देवताधर्मो विधीयते, पूष्णो भागः पिष्टः उपयोक्तव्य इति। कस्य तर्हि? अर्थस्य धर्मः। कः पुनरर्थः? यागः। कथमवगम्यते न देवताधर्म इति? उच्यते। न हि तस्या भागोऽस्ति। ननु यद् देवतायै दीयते, तत् तस्या भागो भवति। उच्यते। एतद्धि देवतामुद्दिश्य त्यज्यते। न च त्यागमात्रेण देवतास्वत्वं भवति। परिग्रहणेन हि स्वस्वामिसंबन्ध आपद्यते। न च परिगृहीतं देवतयेति किञ्चन प्रमाणमस्ति। यच्च यं भजते, स तस्य भागः। न च हविर्देवता भजते। तस्मान्नास्ति पूष्णो भागः। अथापि कथञ्चिद्भवेत् भागः, तथापि न देवताया धर्मः पेषणं भवितुमर्हति। निष्प्रयोजनो हि तथा स्यात्, अयागधर्मत्वात्। कथं तर्हि प्रकरणान्तरे समाम्नातो यागधर्मो भविष्यतीति। उच्यते। वाक्यसंयोगात्।

ननु च देवतयैष संयोगः श्रूयते, न यागेनेति। उच्यते। भागाभावादनर्थकत्वाच्च न देवतासंयोग इत्युक्तम्। तथापि तु यथा यागसंबन्धो भवति, तथा वक्तव्यम्। तदुच्यते। अयमत्र पूष्णो भागो यः पूषणमुद्दिश्य त्यज्यते। यस्य द्रव्यस्य त्यागे पूषा देवता। न चैन्द्रापौष्णे भवति पूषा देवता, न स चरुः पूष्णः स्वत्वेन संबध्यते। तस्मादैन्द्रापौष्णे न कश्चिदस्ति पूष्णश्चरुणा संबन्धः। केवले तु पूषणि देवताभूते तस्मै संकल्पितो भागो भवति। कथम्? यमुद्दिश्य संकल्पो भवति, स तस्य भाग इति प्रसिद्धिरेषा। तेन यद्यपि पूषा स्वेनोच्चारणेन इन्द्रापूष्णोरुपकारकमुच्चारणं कुर्वन्नुपकारको भवेत्, तथापि न तस्य द्विदेवत्यो भाग इत्युच्यते, असंकल्पनात्। केवले पूषणि देवतायां चरोः पेषणं क्रियते, नैन्द्रापौष्णेषु द्विदेवत्येष्विति।

वा— एकस्मिन्नेव पूषणि देवतायामेतत् पेषणं भवेन्न सद्वितीये। 'न ह्येष देवताधर्मो न तद्भागस्य गम्यते। पूषदेवत्ययागार्थं धर्मस्त्वेष प्रतीयते॥' न तावद्देवताया भागोऽस्ति यस्यैष धर्मः कल्प्येत। नहि तदुद्देशत्यागमात्रेण भागो भवति। किं तर्हि? परिग्रहेण। कर्मसाधनो हि भागशब्दः। भज्यत इति भागः सेव्यते इत्यर्थः। तेन यं यो भजते, स तस्य भागः। न च हविरंशं देवता भजते। भोक्तृत्वस्य नवमे निषेधात्। अथापि भजेत् तथापि तस्याः प्रयोजकत्वं तत्रैव निवारयिष्यते। तेन देवतावत् भागधर्मत्वानुपपत्तेर्यागद्वारा अपूर्वधर्म एवायं नवमाद्यन्यायेन देवताधिकरणन्यायेन च विज्ञायते। भाष्यकारेण तु देवताधर्मत्वनिराकरणपरेण यागधर्मत्वमभिहितमिति द्रष्टव्यम्। 'कथं तर्हि प्रकरणान्तरे समाम्नातो यागधर्मो भविष्यति' इति वाक्यसंयोगस्य देवताविषयत्वात् प्रकरणेन च विना अपूर्वसाधनत्वलक्षणानुपपत्तेर्न कथञ्चिद्यागेनापूर्वेण वा संबन्धः इति मन्यमानस्य प्रश्नः। तत्र 'वाक्यसंयोगात्' इत्युक्ते परेण स्वामिप्राये विवृते भागशब्देनैव मुख्यार्थासंभवात् यागोपादानमिति दर्शयति। परस्वीकरणात्मकस्य भागरूपस्य अविद्यमानत्वात् यस्तदुद्देशेन त्यज्यमानत्वनामांऽशो विद्यते, तेन यागो लक्ष्यते। स चैकदेवत्ये पूषविशिष्टो भवतीति तद्भागव्यपदेशो घटते। द्विदेवत्ये पुनर्व्यासङ्गी मिश्रः

संकल्पोऽन्यतरेण व्यपदेष्टुमशक्य इति । यथैव ऐन्द्राग्नस्य पुरोडाशस्य ग्रहस्य च आग्नेयेन्द्रपीतशब्दाभ्यामग्रहणम्, तथैन्द्रापौष्णादेः पूषभागत्वेन । यद्यपि च एवंविधशब्दोच्चारणादिह समासोपालम्भो नास्ति, तथाप्यर्थं एव भागशब्दग्राह्यो न विद्यते इत्यप्रवृत्तिः । यद्यपि च द्वयोरर्थयोर्देवतात्वं प्रतिपद्यमानयोः समुदायप्रसिद्ध्यर्थत्वेन अवयवौ उपयुज्येते, तथापि संकल्पस्य अन्यतरेणाव्यपदेशादनुपलक्षणत्वं सिद्धम् ।

हेतुमात्रमदन्तत्वम् । ४५ ॥

भाष्यम्— यदुक्तम्, अदन्तको हीति देवताधर्मं दर्शयतीति । अर्थवाद एष इतरस्मिन्नपि पक्षे उपपद्यते ।

वा— यत्तु 'अदन्तको हि' इति हेतुनिदर्शनात् देवताधर्मत्वमिति । तत्रोच्यते । हेतुवन्निगदार्थवादत्वादस्य यागधर्मप्रशंसार्थत्वमपि अविरुद्धमित्यकारणता ।

वचनं परम् । ४६ ॥

भाष्यम्— अथापरं यत्कारणमुक्तम्, नेमपिष्टमिति द्विदेवत्ये पेषणं दर्शयति, 'अर्धं पिष्टं भवत्यर्धमपिष्टं द्विदेवत्यत्वाय' इति देवताधर्मं दर्शयतीति । अत्रोच्यते । एवं सति वचनमिदमप्राप्ते भवतीति । ननु अनेकार्थविधानमेकं वाक्यं प्राप्नोति । उच्यते । सति पक्षान्तरे अनेकार्थविधिः पक्षान्तराश्रयणेन परिह्रियते । असति पुनः पक्षान्तरे उच्चारणानर्थक्यप्रसङ्गपरिजिहीर्षया अनेकार्थं वाक्यमभ्युपगन्तव्यं भवति । तस्मान्न द्विदेवत्ये पेषणमिति सिद्धम् ।

वा— नेमपिष्टादिषु प्राप्त्यभावाद्वचनं भविष्यति । विशिष्टविधानाच्च वाक्यभेदाभावः । अरुणैकहायनीवच्च परस्परनियमादसर्वविषयत्वम् । अविशिष्टविधिं चापेक्ष्य विशिष्टविधिर्दुर्बलो भवति न तु अत्रासावस्ति । तस्मादलिङ्गमित्येकदेवताविषयत्वमिति ।

शा— '**यज्ञप्रकरणाभावाद् वाक्ये चाश्रवणादिदम् । पेषणं देवताधर्मो नापूर्वस्यान्यधर्मवत् ॥ तत् स्वरूपप्रयुक्तं सद् द्विदेवत्येऽपि विद्यते ॥**' इति प्राप्ते, अभिधीयते । '**देवता निष्फला नैव पेषणस्य प्रयोजिका । उपादानं च यज्ञस्य भागशब्देन विद्यते ॥ मुख्यार्थासंभवाद् यागलिलक्षयिषयाऽत्र हि । श्रूयते भागशब्दोऽयं नानुपादानमस्त्यतः ॥**'

वि— 'द्विदेवकेऽपि किं पिंष्यादुत पूषैकदेवके ।, द्विदेवकेऽपि तत् पूष्णः सत्त्वात् पेषणभागिनः ॥, देवता विफलत्वेन पेषणं न प्रयोजयेत् । यागस्य तत्त्वे भागोक्तेर्न यागान्तरगामि तत् ॥' २०. तत्त्वे पेषणप्रयोजकत्वे ।

भाट्ट— यत्र अन्यसहितः पूषा देवता यथा राजसूये 'ऐन्द्रापौष्णश्चरुः' इति तत्रापि पेषणम्, उत यत्र केवल एव देवता तत्रैव इति चिन्तायाम्, 'अदन्तको हि सः' इत्यर्थवादानुसारात् पेषणस्य पूषस्वरूपप्रयुक्तत्वावगतेः, तत्स्वरूपस्य च अन्यसहितेऽपि सत्त्वात् युक्तमेव पेषणम् । अत एव 'सोमापौष्णं चरुं निर्वपेन्नेमपिष्टं पशुकामः' इति नेमपदवाच्यार्धपिष्टत्वानुवादोऽपि संगच्छते । यदि तु नवमाद्यन्यायेन पूषस्वरूपे आनर्थक्यात् अपूर्वसाधनत्वलक्षणाया आवश्यकत्वमाशङ्क्येत, तदाऽस्तु पूर्वोक्तविधया पूषप्रपिष्टसंबन्धज्ञानजन्ययागानुमितेरेव तात्पर्यग्राहिकायाः सत्त्वात् साऽपि पूषपदे । परन्तु अर्थवादाद्यनुरोधात् पूषाधिष्ठानकदेवताप्रयोज्यापूर्वीयत्वलक्षणाया एवाङ्गीकारात् द्विदेवत्येऽपि पेषणमर्धस्य । यथा चैवं सति पाकसंपत्तिस्तथा यतितव्यं अन्तरायकरणेन वा क्रमिकनिक्षेपेण वा पात्रभेदेन वा । इति प्राप्ते, आनर्थक्यपरिहाराय अपूर्वसाधनत्वलक्षणाया आवश्यकत्वात्, अधिष्ठानद्वारकत्वकल्पनस्य च पूष्णो देवतात्वोपस्थितिमन्तरेणानुपपत्तेः, तदुपस्थितौ च तद्द्वारकत्वमात्रकल्पनयैव आनर्थक्यपरिहारात्, द्विदेवत्ये च चतुर्धाकरणाद्यधिकरणन्यायेन केवलस्य पूष्णो देवतात्वाभावात्, यत्र केवल एव पूषा तत्रैव पेषणम् । न च अपूर्वसाधनीभूतदेवतात्वस्यैव प्रकारतया पूषपदेन लक्षणेऽपि तस्य पूषोपरि भाने स्वरूपसंबन्धस्यैव संसर्गविधया विवक्षणेन पर्याप्तेरविवक्षणात्, तस्य च द्विदेवत्येऽपि एकस्मिन् पूष्णि सत्त्वेन तस्याप्युद्देश्यत्वोपपत्तेः कथं न पेषणमिति वाच्यम् । व्यासज्यवृत्तिधर्मप्रकारतायां एकमात्रवृत्तिसंबन्धस्य संसर्गत्वानुपपत्तेः । अन्यथा एको द्वित्वसमवायवान् इतिवत् 'एको द्वित्ववान्' 'एको द्वौ' इत्यादिशाब्दबोधापत्तेः । अतो व्यासज्यवृत्तिदेवतात्वस्य पर्याप्तिसंबन्धे-

नैव प्रकारत्वात्, तस्य च पूष्णि केवले बाधात्, पूषमात्रवृत्तिदेवतात्वस्यैव प्रकारत्वेन तत्रैव पेषणादि । अदन्तकत्वं तु अर्थवादमात्रत्वान्न विरुध्यते । नेमपिष्टत्वस्यापि च तत्रैव विधेयत्वाङ्गीकारात् विशिष्टभावनाविधानेन अवाक्यभेदात् अगमकत्वम् ।

मण्डन— 'नैन्द्रापौष्णेऽस्ति पेषणम् ।' २०.

शंकर— 'नैन्द्रापौष्णे तु सा मता ।' सा प्रपिष्टता । २०.

* पौष्णं पेषणं प्रकृतौ श्रूयमाणमपि विकृतौ । ३।३।१३।३४.

पौष्णं पेषणं विकृतौ प्रतीयेताचोदनात्प्रकृतौ । ३।३।१३।३४ ॥

दर्शपूर्णमासयोः समामनन्ति 'तस्मात्पूषा प्रपिष्टभागोऽदन्तको हि सः' इति । तत्र संदेहः किं पौष्णं पेषणं प्रकृतौ उत विकृतौ इति । अयं च विचारः पूर्वोक्तसंतर्दनन्यायेनैव गतार्थः । यतो न हि दर्शपूर्णमासयोः पूषा नाम देवता समस्ति । न च लक्षणया दर्शपूर्णमासदेवताऽनेन प्रतिपाद्यते, 'अदन्तको हि' इति हेतुवन्निगदसमवायात् । न ह्यग्न्यादीनामदन्तकत्वं वेदे पुराणे वा क्वचित्प्रतीतम् । पूष्णस्त्वदन्तकत्वं वेदे पुराणे च प्रतीयते । अस्ति च विकृतौ तस्य तस्य हविषः पूषा देवता । अतोऽर्थवत्त्वात्तत्रैव वाक्यबलेन पेषणमुत्कृष्यते । तदयं पूर्वन्यायसिद्धोऽप्यर्थं उत्तरविचारद्वयार्थं संकीर्त्यत इति मन्तव्यम् । **सूत्रं तु** पूर्वसंबन्धिपेषणं विकृतावुत्कृष्येत । प्रकृतौ तस्याचोदना अविधानमित्यर्थः । **तौता.**

पौष्णं पेषणं विकृतौ प्रतीयेताचोदनात् प्रकृतौ । ३।३।१३।३४ ॥

दर्शपूर्णमासप्रकरणे 'तस्मात् पूषा प्रपिष्टभागोऽदन्तको हि सः' इति पौष्णं पूषदेवताकं पेषणमभिहितम् । तत् पूषदेवताकविकृतौ प्रतीयेत । विकृतौ उत्कष्टव्यम् । प्रकृतौ पूष्णः अचोदनात् चोदनाभावात् । **के.**

* **पौष्णः** श्यामः ऐकादशिनेषु चतुर्थः पशुः अश्वमेधे ज्योतिष्टोमे च । वि. ८।१।७, * '**पौष्णं** श्याममालभेतान्नकामः' इत्यस्य पशोः पुरोडाशे 'पूषा प्रपिष्टभागोऽदन्तको हि' इति पौष्णं पेषणं कर्तव्यम् । ३।३।१९.

पौष्णपेषणाधिकरणम् । दर्शपूर्णमासप्रकरणे श्रुतस्य पौष्णपेषणस्य पौष्णे यागे उत्कर्षः ॥

पौष्णं पेषणं विकृतौ प्रतीयेताचोदनात् प्रकृतौ । ३।३।१३।३४ ॥

भाष्यम्— दर्शपूर्णमासयोः समामनन्ति 'तस्मात्पूषा प्रपिष्टभागोऽदन्तको हि सः' इति । तत्र संदेहः किं पौष्णं पेषणं प्रकृतौ, उत विकृताविति । किं प्राप्तम्? प्रकृताविति । कुतः? प्रकरणात् । ननु प्रकृतौ पूषणं न कस्यचिद्धविषो देवतां समामनन्तीति । उच्यते । प्राकृतीं कां चिद्देवतां पूषशब्दो वक्ष्यति । एवं प्राप्ते, ब्रूमः । यत्र पौष्णं हविरस्ति, तत्र तस्य पेषणं विधातुं शक्यम् । न च प्रकृतौ पूषाऽस्ति । तस्मादुत्कष्टव्यं पेषणमिति । यदुक्तं कां चिद्देवतां पूषशब्दो वक्ष्यतीति । ब्रूयात् यदि अन्यत्रापि मुख्यः पूषा न स्यात् । नन्वन्यत्र क्रियमाणे प्रकरणमुपरुध्येत । उपरुध्यताम् । वाक्यं हि अस्योपरोधकम् । अथवा नैवात्र संदेहः । एवमेव प्राप्तमुच्यते । पौष्णं पेषणं विकृतौ न प्रकृताविति । नास्ति पूष्णः प्रकृतौ चोदनेति । किमर्थं प्राप्तमुच्यते । उत्तरत्र कथा वर्तिष्यते ।

वा— संतर्दनादिन्यायेनैव वाक्यप्रकरणविरोधे सति विकृत्यर्थत्वं सिद्धमुत्तरविवक्षाऽर्थं प्रारभ्यते ।

सोम— प्रकरणानुसारेण दर्शपूर्णमासयोर्निवेशः इति पूर्वपक्षस्य मन्दत्वात् नेदमधिकरणान्तरम्, किन्तु किं सर्वत्र निवेशः, उत चरावेव इति करिष्यमाणविचारस्य वाक्यप्रकरणविरोधाविरोधचिन्ताप्रस्तावे साक्षात्संगतत्वाभावात् तस्य प्रासङ्गिकत्वसिद्ध्यर्थं पेषणस्य वाक्येनोत्कर्षः इति प्राप्तिमात्रमनेन सूत्रेण क्रियते ।

वि— 'प्रपिष्टभागः पूषेति प्रकृतौ विकृतावुत ।, इष्टिप्रकरणादेव प्रकृताविति युज्यते ॥, संतर्दनादिवद् वाक्याद् विकृतौ पूषसंभवात् । सिद्धस्य पुनरप्युक्तिरधिकस्य विवक्षया ॥' १८.

भाट्ट— दर्शपूर्णमासप्रकरणे 'पूषा प्रपिष्टभागोऽदन्तको हि सः' इति श्रुतम् । तत्र किं दर्शपूर्णमासयोरेव अङ्गत्वेन कर्मान्तरविधिः, उत पूषदेवत्ययागे पेषण-

मात्रविधिः इति चिन्तायाम्, न तावत् भागशब्दलक्षितयागोद्देशेन पेषणविधिः, एकप्रसरताभङ्गापत्तेः, पूषपदेन विशेषणे वाक्यभेदाच्च, क्तप्रत्ययार्थद्रव्योपसर्जनस्य पेषणस्य यागान्वयानुपपत्तेश्च। अत एव न पूषपदमेव शक्यार्थस्य लक्षितपूषदेवत्ययागस्य वोद्देश्यतापरम्, पूष्णः अव्यभिचरितक्रतुसंबन्धाभावेन क्रतूपस्थितौ प्रमाणाभावाच्च। अतो गुणात् द्रव्यदेवताविशिष्टकर्मान्तरविधिरेवायम्। इति प्राप्ते, प्रपिष्टभागपदेन तावत् भागो भजनीयं सेव्यमस्येति व्युत्पत्त्या सेवनासंभवेऽपि संबन्धमात्रं देवस्वादिव्यवहारप्रमाणकं प्रपिष्टपूष्णोः प्रतीयते। तच्च यागं विना अनुपपन्नमिति यागमनुमापयति इत्येतावत् उभयोरविवादम्। तत्र च विशेषणमात्रविधिसंभवे विशिष्टविध्यादिकल्पनस्य अन्याय्यत्वात् प्रमाणाभावेन न अपूर्वयागान्तरानुमितिः इत्यपि प्रथमतोऽवगतमेव। अतश्चानुमीयमाने यागे अनुमापकपूषसंबन्धेन प्रसिद्धपूषदेवत्ययागत्वोपस्थितिरपि सुलभैव। अतश्च यागविशेषानुमितेरेव तात्पर्यग्राहकत्वात् पूषपदं विजातीयापूर्वसाधनीभूतपूषदेवतापरम्। तदुद्देशेनैव च स्वजन्ययागप्रदेयचरुप्रकृतित्वसंबन्धेन प्रपिष्टद्रव्यकत्वं प्रपिष्टभागसमासार्थो विधीयते। संभवति च द्रव्योद्देशेन देवताविधिवत् देवतोद्देशेनापि निरुक्तसंबन्धेन द्रव्यविधिर्विशेषणमात्रविधिफलकः। यद्यपि च प्रकृतिद्रव्यस्यापि अतिदेशेन संभवत्प्राप्तिकता, तथापि ततः पूर्वं विधानाङ्गीकारान्न एकप्रसरताभङ्गाद्यापत्तिः। पेषणमात्रविधिश्च फलमिति गुणादिप्रमाणाभावान्न कर्मान्तरता। एतेन पूषपदेन तद्देवत्यकर्मलक्षणया तदुद्देशेन प्रपिष्टभागपदलक्षितपेषणविधिरिति प्रकारोऽपि निषादस्थपत्यधिकरणन्यायेन लक्षणापेक्षया कर्मान्तरविधेरेव न्याय्यत्वात् 'वषट्कर्तुः प्रथमभक्षः' इत्यादौ अतिप्रसङ्गापत्तेश्च उपेक्षितः। तत्र अस्मदुक्तप्रकारस्तु भक्षस्य प्रत्यक्षविधिनैव प्राप्तत्वेन ततः पूर्वप्रवृत्त्यङ्गीकारानुपपत्तेरसंभवी। तदेतत्सर्वं सिद्धमेवोत्तरविवक्षया स्मार्यते इति प्राञ्चः।

मण्डन – 'विकृतौ पौष्णपेषणम्।' १८.

शंकर – 'पूष्ण्युत्कृष्या प्रपिष्टता।' १८.

* **पौष्ण – सावित्र** – सारस्वत– द्यावापृथिवीयाद्यनुमन्त्रणानि (दर्शपूर्णमासप्रकरणात् तत्तद्देवत्ये कर्मणि) उत्कृष्यन्ते। **भा.** ९।३।५।१५.

* '**प्रास्मै**' इत्यस्य अग्निगुप्रैषस्थस्य न विकारो यदा अग्नीषोमीयः सवनीयाश्च समानविधानाः। ९।३।८।२३. * '**प्रोद्गातॄणाम्**' इत्यत्र विभक्तिस्वारस्याय प्रातिपदिकस्यान्यथानयनम्। न च षष्ठीबहुवचनस्य प्रथमैकवचनवत् अन्यत्राविधानेन तस्यान्यथानयनमसंभवीति बहुवचनानुसारेण प्रातिपदिकस्य प्रस्तोत्रादिच्छन्दोगेषु लक्षणा आश्रिता इति वाच्यम्। 'सक्तून् जुहोति' इत्यत्रेव अन्यत्र नयनस्य संभावितत्वात्। **अद्वैत.** २।२९ (३०)। ३७. * '**प्रैतु** होतुश्चमसः प्र ब्रह्मणः प्रोद्गातॄणां प्र यजमानस्य' अयं मन्त्रः गुणभूतद्रव्यविधिः। **बाल.** पृ. ६४. * '**प्र णो** देवी सरस्वती' इत्यादिना हौत्रकाण्डे चित्रायागीयचतुर्थपञ्चमहविषोः सारस्वतयोर्मध्ये स्त्रीदेवत्यस्य याज्यानुवाक्ये प्रथमतः पठिते, ततः पुंदेवत्यस्य 'पीपिवांसं सरस्वतः' इत्यादिना। **वि.** ५।१।७. * '**प्र वो** वाजा अभिद्यवः' इति ऋक् दर्शपूर्णमासयोः सामिधेनीषु प्रथमा। क्वचिद् विकृतौ तु अन्याऽपि प्रथमा। यदा या प्रथमा सैव त्रिर्वक्तव्या। (उपसदिष्टौ 'उपसद्याय मीहळुषे॰ (ऋसं. ७।१५।१) इति तिस्र एकैकां त्रिरनवानं ताः सामिधेन्यः' (आश्वश्रौ. ४।८) अत्र 'उपसद्याय' इत्येषा प्रथमा। महापितृयज्ञे तु 'उशन्तस्त्वा' इत्येकैव सामिधेनी।)। **वि.** ९।१।१०.

* प्र–शब्दः प्रकर्षे सिद्धः। **भा.** १।१।८।३१.

* प्रउगं नाम शस्त्रं होत्रा शंसनीयम्। अग्निष्टोमे प्रातःसवने बहिष्पवमानोत्तरं ऋतुयाजोत्तरं आज्यशस्त्रं भक्षान्तमनुष्ठाय ततः परं प्रउगं शस्यते। **के.** * 'प्रउगं शंसति' इति शस्त्रं प्रधानकर्म, न गुणकर्म। स्तुतशस्त्राधिकरणम्। २।१।५।१३–२९.

* '**प्रउगचितं** चिन्वीत पशुकामः' इति श्रुतम्। चयनविशेषोऽयम्। अत्र प्रउगं नाम शकटस्य वंशद्वयम्। यत् एकतः चक्रद्वयच्छिद्रगतकाष्ठमयलोहमयान्यतरदण्डमध्ये बध्यते, अपरतश्च युगमध्ये बध्यते।

एतादृशप्रयुगाकारं चयनं प्रउगचितम्। तच्च द्विविधं एकतः प्रउगचितं उभयतः प्रउगचितं चेति। **के.**

* **प्रकरणमपि** विनियोगे प्रमाणम्। ३।३।४।११. * प्रकरणं अभिधीयमाना आकाङ्क्षा, आकाङ्क्षावती वा भावना। **वा.** ३।३।७।१४ पृ. ८५२. * प्रकरणं अवान्तरं संदंशोद्भूतिकमेव। तच्च प्रकृतेर्नास्त्येव। प्रकृत्यङ्गस्य तु भवति यथा प्रयाजानामभिक्रमे। **बाल.** पृ. ११. * प्रकरणं उभयाकाङ्क्षा (फलाकाङ्क्षाविशिष्टकथम्भावाकाङ्क्षा। वैशिष्ट्यं च स्वाश्रयभावनासंनिहितभावनाऽऽश्रितत्वसंबन्धेन, न तु एकपुरुषावगतत्वादिना। उक्तसंबन्धेन यदीयफलाकाङ्क्षाविशिष्टा अनिर्णीततदनङ्गत्वगता या कथम्भावाकाङ्क्षा, सा तद्विनियोजकं प्रकरणं इति तु निष्कर्षः) यथा प्रयाजादिषु। तदिदं प्रकरणं क्रियाया एव विनियोजकं न द्रव्यगुणयोः। तयोस्तु क्रियायोगात् विनियोजकम्। **मीन्या.** पृ. १६९, १७२. * प्रकरणं कथम्भावात्मकं क्रतुधर्ममपेक्षमाणं पुरुषधर्मे विधीयमाने अत्यन्तं बाधितं भवति। **वा.** २।४।१।१. * प्रकरणं कर्तव्यस्य इतिकर्तव्यताऽऽकाङ्क्षस्य वचनम्। प्रारम्भो हि स तस्याः वचनक्रियायाः। स एष विध्यादिः विध्यन्तापेक्षः। **भा.** ३।३।७।१४ पृ. ८५१, * प्रकरणं क्रमाद् बलीयः। तेन विदेवनादयो न अभिषेचनीयाङ्गम्। अभिषेचनीयस्य तु मध्ये स्थानं विदेवनादीनाम्। ४।४।२।४. * प्रकरणं क्रमाद्यपेक्षया प्रबलम्। 'अक्षैर्दीव्यति' 'राजन्यं जिनाति' 'शौनःशेपमाख्यापयति' एतेषां राजसूयाङ्गत्वम्। न तु अभिषेचनीयाङ्गत्वम्। **वि.** ३।३।१०.

प्रकरणं तु पौर्णमास्यां रूपावचनात्। २।२।३।३ ॥

एवं समामनन्ति 'यदाग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाच्युतो भवति' 'तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यजन्निति' 'ताभ्यामेतमग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छत्' 'ऐन्द्रं दध्यमावास्यायाम्, ऐन्द्रं पयोऽमावास्यायाम्' इति। तथा 'आघारमाघारयति' 'आज्यभागौ यजति' 'स्विष्टकृते समवद्यति' 'पत्नीः संयाजयति' 'समिष्टयजूंषि जुहोति' 'य एवं विद्वान् पौर्णमासीं यजते' 'य एवं विद्वानमावास्यां यजते' इति। तत्र संदेहः किं सर्वाण्येतानि समप्रधानानि, उताग्नेयादीनि पयोऽन्तानि प्रधानानि, आघारादीनि उपकारकाङ्गानि। तथा 'य एवं विद्वान्' इत्येवं संयुक्तौ प्रकृतानां कर्मणामनुवदितारौ, अथवा पूर्वयोः कर्मणोर्विधातारौ, तत्रेतरे गुणविधय इति। पूर्वाधिकरणेन अभ्यासतो भेदमभिधाय इदानीं तदपवादः क्रियते। अत्र 'य एवं विद्वान् पौर्णमासीं यजते, य एवं विद्वान् अमावास्यां यजते' इति वाक्यद्वयमेव विचारविषयत्वेनोदाहरणम्। यत्तु भाष्यकारेण दर्शपूर्णमासप्रकरणपठितानि बहूनि अङ्गप्रधानवाक्यानि उदाहृत्य किं समप्राधान्यं अङ्गाङ्गिभावो वेति संशयप्रदर्शनं कृतम्, न तद्विचार्यत्वेन, किं तर्हि ? प्रस्तुताधिकरणपूर्वपक्षसिद्धान्तप्रयोजनत्वेनेति मन्तव्यम्, शेषशेषिविचारस्य करिष्यमाणत्वात्। अत्रायं पूर्वपक्षिणोऽभिसंधिः विद्वद्वाक्यद्वयप्रतिपादितयोः कर्मणोः आघारादिभ्यस्तावत् अयागरूपेभ्यः शब्दान्तरादेव भेदः, यागरूपेभ्यः आग्नेयादिभ्यः अभ्यासादेव भेदः। अतः पृथगेवैतत् कर्मद्वयम्। ननु वर्तमानापदेशसरूपत्वात् कर्तृयोगियच्छब्दोपबन्धेनैव विधिरूपतिरस्कारात् नानयोर्विधित्वम्, विध्यभ्यासश्च भेदक इत्युक्तम्, तत् कथमनयोर्विध्यभावात् कर्मभेदप्रतिपादकत्वम् ? न चैवं सति वाक्यद्वयमेतदनर्थकम्, 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यधिकारवाक्यापेक्षितसमुदायद्वयकरणेन अर्थवत्त्वात्। उच्यते। वर्तमानापदेशसरूपत्वेऽपि प्रयोगवचनोपसंग्रहेण पञ्चमलकारनिर्णयादेव अस्य विधित्वम्। तथाहि, प्रयोगवचनसंनिधिसमाम्नानेन तदेकवाक्यतापन्नमिदं वाक्यद्वयम्। तदेकवाक्यत्वं च तदपेक्षितार्थप्रतिपादने भवति। तच्चास्य मन्त्रार्थवादरूपत्वाभावात् कर्मविधित्वेनैव निर्णीयते। न च कर्तृयोगियच्छब्दैवंशब्दाभ्यां विधितिरस्कारः, क्रियाविशेषितकर्तृयोगी हि यच्छब्दो विशेषणीभूतक्रियाविधानपरिपन्थी भवति यथा 'यो दीक्षितो यदग्नीषोमीयं पशुमालभते' इति। अत्र हि दीक्षारूपक्रियाविशेषितकर्तृयोगी यच्छब्दो दीक्षाविधानपरिपन्थी भवति,

न तु पशुद्रव्यकाग्नीषोमदेवतायागविधानपरिपन्थी । एवमिहापि यो विद्वानिति वेदनक्रियाविशेषितकर्तृयोगी यच्छब्दो वेदनक्रियाविधानमेव प्रतिबध्नाति, न यागक्रियाविधानमिति । तथा एवंशब्दोपि एवं विद्वानिति वेदनक्रियापरामर्शक एव, न यागक्रियापरार्शकः इत्यव्याहतमेव विधित्वमिति । न च अधिकारापेक्षितसमुदायकरणेन अनुवादस्यार्थवत्त्वं राजसूयवत् फलवाक्येनैव समुदायकरणसंभवात् । न चैवं सति 'राजसूयेन' इतिवत् 'दर्शपूर्णमासेन' इत्येकवचनप्रयोगप्रसङ्गः । 'सुपां सुपो भवन्ति' इत्येकवचनस्थानप्रयुक्तस्य एकवचनसमानार्थत्वात् । अतः समिदादिवत् विध्यभ्यासादेव पौर्णमास्यमावास्यानामावच्छिन्नमेवैतत् कर्मद्वयं विधीयते । न च प्रवृत्तिनिमित्ताभावात् न नामधेयम् । अग्निहोत्रादीनामिव विधास्यमानदेवसंबन्धनिरीक्षणेन 'पौर्णमास्यां पौर्णमास्या यजेत' 'अमावास्यायाममावास्यया यजेत' इति वाक्यद्वयविधास्यमानकालसंबन्धप्रवृत्तिनिमित्तनिरीक्षणेन कर्मद्वये नामधेयत्वोपपत्तेः । न च असिद्धे नाम्नि कथं तदुल्लेखेन कालविधिः, अन्योन्याश्रयादिति वाच्यम् । यतः 'अग्निहोत्रं जुहोति' इतिवत् सामानाधिकरण्येनैव नामत्वे सिद्धे तदुल्लेखेन भाविकालविधिना प्रवृत्तिनिमित्तमात्रं निर्णीयते इति नानुपपन्नम् ।

ननु द्रव्यदेवते हि कर्मणो रूपम् । न चात्र देवताऽस्ति । न च अव्यक्तचोदनात्वसामान्येन सौमिकद्रव्यदेवतालाभेन रूपवत्त्वम्, यतो निरपेक्षो हि विधिः सापेक्षेणोपजीव्यते । अत्र च सोमविधेः दीक्षणीयाद्यङ्गद्वारेण दर्शपूर्णमासविध्युपजीवित्वेन कर्मापेक्षत्वम् । तद्यदि दर्शपूर्णमासविधेरपि तदुपजीवनम्, तदा इतरेतराश्रयापत्तिः । तत् कथं कर्मविधित्वमिति । **मैवम्**, 'सर्वस्मै वा एतद्यज्ञाय गृह्यते, यद्ध्रुवायामाज्यम्' इति प्रकरणश्रुताज्यद्रव्यस्य ध्रुवावाक्यात् द्रव्यं तावदस्ति । न च एकेनैव वाक्येन आज्यस्य ध्रुवासंबन्धविधाने यागसंबन्धविधाने च वाक्यभेदः, 'यद् ध्रुवायामाज्यम्' इत्यस्य ध्रुवासंबन्धमनूद्य यागसंबन्धमात्रविधानात् । तत् यदि आज्यध्रुवासंबन्धबोधकं वाक्यान्तरं श्रुतमस्ति, तदा तत्प्राप्तानुवादेन अनुवाद एव । अथ नास्ति, तदा एतदर्थवादान्यथाऽनुपपत्तिकल्पितवाक्यलभ्यस्यैवानुवाद इति नानुपपन्नम् । देवताप्राप्तिरपि मान्त्रवर्णिकी । 'वार्त्रघ्नी पूर्णमासेऽनूच्येते, वृधवन्ती अमावास्यायाम्' इत्येतद्वाक्यान्वयेन वार्त्रघ्नीशब्दाभिधेयमृग्द्वयं वृधन्वतीशब्दाभिधेयं च ऋग्द्वयं आज्यभागक्रमपठितमपि वाक्यबलेन क्रमं बाधित्वा एतत्कर्मसंबन्धित्वेन विधीयते । तयोश्च एकाग्नेयी, अपरा सौमी । तत्र च एकैकस्मिन् कर्मणि युगपद्विनियुक्तमन्त्रद्वयेन युगपद्देवताद्वयसमर्पणात् देवतयोः एकैकस्मिन् कर्मणि समुच्चय एव । तथा सति मन्त्रयोरपि समुच्चय एव । एतदनुरूपयाज्याप्राप्तिश्च दाशतयीपाठात् भवतीति नानुपपन्नम् । तेन आज्यभागे एव कालव्यवस्थाऽर्थं वाक्यद्वयं यथासिद्धान्तमेव भविष्यति । पौर्णमास्यां यावाज्यभागौ, तौ वृत्रहपदवन्मन्त्रकौ, अमावास्यायां यावाज्यभागौ, तौ वृधन्वत्पदमन्त्रकाविति । मैवम्, पूर्वपक्षे कालविधायकवाक्यद्वयं विद्वद्वाक्यविधेयकर्मद्वयस्य एककालविधानात् । आज्यभागयोः पौर्णमास्यमावास्याकालप्राप्तौ न तद्व्यवस्थार्थत्वमिति मन्त्रविधायकत्वमेवेति । तदुक्तम्-- '**ध्रौवं साधारणं द्रव्यं देवता मान्त्रवर्णिकी । रूपवन्तावतो यागौ विधीयेते पृथक्तया ॥**' इति (वा. पृ. ४७५) । आज्यभागयोस्तु 'यस्यैकस्यैचिद्देवतायै हविर्निर्वपन् आज्यस्यैव नौ पुरस्ताद्यजन्' इति पुराकल्पसरूपेण वाक्येन अग्नीषोमयोर्लाभात् अत्रापि तयोर्देवतात्वम् । अत्र यद्यपि साक्षादग्नीषोमयोः श्रवणं नास्ति, तथापि 'तावब्रूतामग्नीषोमावाज्यस्यैव नौ' इत्यत्र नौशब्देन तदुपादानव्यवस्थितत्वादत्रापि नौशब्देन तयोरेवोपादानमिति । याज्यानुमन्त्रणक्रमप्राप्तान् अबाधित्वैव अनुवाक्यायुगलमात्रस्य वाक्येन अन्यत्र विनियुक्तत्वात् । अनुवाक्याप्राप्तिश्च दाशतयोपांशुकाण्डादेव इत्येकः **पूर्वः पक्षः** ।

अथवा आग्नेयादिवाक्यैरेव विद्वद्वाक्योत्पन्नकर्मद्वयसंबन्धेन गुणविधानात् रूपलाभो भविष्यति । न च प्राप्ते कर्मणि अनेकविधानदोषः । 'पुरोडाशं संयुनक्ति' 'पुरोडाशं पर्यग्नि करोति' इत्यादिसंस्कारवाक्यपर्यालोचनेन पुरोडाशादिद्रव्यप्राप्तौ अग्न्यादिदेवतामात्रविधानात् । **यद्वा** भिन्नपदोपात्तानेकार्थविधाने हि विध्यावृत्तिलक्षणो

वाक्यभेदो भवति । यथा 'वाससा क्रीणाति' इत्यनेन उत्पन्ने क्रये अरुणादिवाक्येन अनेकगुणविधाने । अत्र तु एकेनैव आग्नेयादिपदेन अनावृत्तेन अग्निदेवताविशिष्टपुरोडाशादिरूपद्रव्योपस्थानात् प्रत्ययेन च एकदेवताविधानात् नावृत्तिलक्षणो वाक्यभेदः । यत्र तु पृथक्पदेन द्रव्यदेवतोपादानम्, यथा 'तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यजन्' इत्यस्य पुराकल्परूपत्वेन अविधायकत्वात् (?) ।

तदेवं द्विधा पूर्वपक्षः संपद्यते । एकत्र आग्नेयादिवाक्यविहितानि षट् कर्माणि विद्वद्वाक्ययुगलविहितं च कर्मद्वयं इत्यष्टौ कर्माणि । अपरत्र च आग्नेयादिवाक्ये गुणविधानात् विद्वद्वाक्ययुगलविहितकर्मद्वयमेव । तदेवं पूर्वपक्षद्वयेऽपि दर्शपूर्णमासोपपदस्य कस्मिंश्चित् कर्मणि प्रसिद्धत्वात् यजेस्तु यागमात्रविषयत्वेन प्रसिद्धत्वात् यजिसामानाधिकरण्येन यजिमात्रनामत्वम् । तदुक्तम्—
'**प्रसिद्धेनाप्रसिद्धस्य नित्यमिष्टं विशेषणम् । तस्माद्यज्यनुरोधेन नामार्थोऽत्र निरूप्यते ॥**' इति (वा. पृ. ४७६) । तथा सति प्रकृतयागानामेव फले विधानात् राजसूयवत् सर्वेषामेव प्रयाजानूयाजानामपि समप्रधानत्वमेवेति । नन्वेवं सति प्रधानस्य अनतिदेशात् कथं विकृतौ प्रयाजातिदेशः ? वचनादित्युच्यते 'प्रयाजे प्रयाजे कृष्णलं जुहोति' इत्यादि । अत्र प्रयाजानुवादेन कृष्णलहोमविधानादेव इति नानुपपन्नम् । **अथ** कस्मादेतावेव विद्वद्वाक्ययुगलविहितौ पौर्णमास्यमावास्यासंज्ञकौ......जफले तयोरविधानम् ? एवं तर्हि समुदायनामत्वेऽपि तयोरप्रत्यभिज्ञानात् सिद्धान्तेऽपि कथं फले विधानम् ? अथ सिद्धान्ते न संज्ञाद्वारेण समुदायद्वयोपस्थापनम्, किं तर्हि ? कालद्वारेण । एवं तर्हि एतत्कर्मद्वयेऽपि अविशिष्टम्, 'पौर्णमास्यां पौर्णमास्या यजेत, अमावास्यायाममावास्यया यजेत' इति वाक्यद्वयेन कालविधानस्योक्तत्वात् । तेन अनयोरेव फलवाक्येन विनियोगात् कुतः समप्राधान्यमिति । **नैतत्** । कालसंयोगस्य आग्नेयादीनामपि षण्णामविशिष्टत्वेन कस्य यागद्वयस्य ग्रहणमिति निर्णेतुमशक्यत्वात् । तदुक्तम्—
'**षण्णामग्न्यादियागानामनयोश्च द्वयोरयम् । समानः कालसंयोग इति नेष्टावधारणा ॥**' इति (वा. पृ. ४७७) । **न च** वाच्यं द्विकर्मपक्षे तावदयं परिहारो न संभवत्येव । अष्टकर्मपक्षेऽपि एवं सति कालद्वारेण अष्टानामेव कर्मणां फले विनियोगो न भविष्यतीति प्रयाजादिभिः सह समप्राधान्यमिति । **यतः** पूर्वप्रसिद्धं हि स्वयं फलवाक्यमुपादत्ते । न तु फलसंबन्धपरं वाक्यम् । उपपदस्यापि वृत्त्यन्तरेण अर्थान्तरपदत्वमापादयितुमुत्सहते । तदिहापि कालवचनौ दर्शपूर्णमासशब्दौ लक्षितलक्षणया कालयोगिनौ यागान् उपस्थापयितुमर्हतः । तेन उपपदस्याप्रसिद्धत्वात् प्रसिद्धार्थयजिसामानाधिकरण्येन यज्यर्थत्वमेव निर्णीयते । सिद्धान्ते तु समुदायानुवादस्यैव फलवाक्यस्योपपदप्रसिद्धप्रयोजनत्वात् युक्तं समुदायस्यैव फलविधानम् । न चेह तथा समस्तीति पूर्वपक्षद्वयेऽपि समप्राधान्यमेवेति ।

एवं प्राप्ते, अभिधीयते । भवेदेवं विध्यभ्यासतः कर्मभेदः, यदि विद्वद्वाक्ययुगलस्य कर्तृयुक्तयच्छब्दस्य एवंशब्दयोगेन अनुवादकत्वं न भवेत् । यत्तु वेदनकर्तृयोगी यच्छब्दो न यागकर्तृयोगीत्युक्तम् । (तन्न) अव्यभिचारेणैव वेदनकर्तृत्वस्य प्राप्तत्वेन यच्छब्दाविशेषणीयत्वात् । 'यो दीक्षितः' इत्यत्र तु दीक्षितादीक्षितयोरपि यागकृत्त्वाविशेषात् 'यो दीक्षितः' इत्यविशेषणम् । न चेह वेदनरहितस्य अचेतनस्य यागकर्तृत्वमस्तीति यो वेदनकर्ता स यजेतेति विशेषणवैयर्थ्यात् यागकर्तृविशेषणमेव यच्छब्दः । तत्सहचरितश्च एवंशब्दोऽपि तथा, तदनुवादकत्वादविधायकत्वमेवेति । तदुक्तम् --'**क्रियापदैकयोगित्वे यच्छब्दो न रुजेद्विधिम् । कर्तृयुक्तः स एवान्यप्रापितार्थानुवादकृत् ॥**' इति (वा. पृ. ४८८) ।

किञ्च रूपाभावादपि न यागाविधायकत्वम् । तत्र भवतु तावत् यथाकथञ्चित् द्रव्यलाभः, देवतालाभस्तु न कथञ्चिदपि संभवति । न च मान्त्रवर्णिकदेवताप्राप्तिः, याज्यानुवाक्यामन्त्रयोः आज्यभागक्रमपठितत्वेन तदर्थत्वाभावात् । न च वाक्येन क्रमं बाधित्वा कर्मद्वयसंबन्धो मन्त्रस्य क्रियते, 'वार्त्रघ्नी पूर्णमासेऽनूच्येते वृधन्वती अमावास्यायाम्' इति मुख्यकालवचनयोः कर्मपरत्वा-

भावात् । तदुक्तम् – ' **प्रथमं काल एवाभ्यां शब्दाभ्यां प्रतिपाद्यते । पश्चात्तु कर्म तद्योगादतः कालोऽत्र गृह्यते ॥** ' इति (वा. पृ. ४७८) । नापि कालद्वारेण लक्षणया कर्मपरत्वम्, आज्यभागयोरेव पौर्णमास्यमावास्याकालयोगेन मन्त्रव्यवस्थापकतया मुख्यार्थोपपत्तौ क्रमबाधेन लाक्षणिकत्वस्वीकारासंभवात् । **न** चाज्यभागयोः पौर्णमास्यमावास्याकालस्य प्राप्तत्वात् न मन्त्रव्यवस्थापकत्वं वचनस्येति **वाच्यम्** । यतः सिद्धान्ते तावत् प्रयोगद्वयेन साङ्गस्यैव पौर्णमास्यमावास्याकालो लब्ध एव । तथा पूर्वपक्षेऽपि सर्वेषां समप्राधान्येन सहचरितानां मध्ये अष्टानां कालसंबन्धस्य श्रुतत्वात् इतरेषामपि कालसंबन्धे कल्प्यमाने प्रयोगविधितः तत्कालस्यैव बुद्धौ विपरिवृत्तेः तत्कालसंबन्धमेव कल्पयति । तत्र पौर्णमास्यमावास्याकालयोः विनिगमनाप्रमाणाभावात् इच्छावशादनुष्ठाने सति भवति व्यवस्थाऽर्थे वचनम् । यदा पौर्णमास्याज्यभागौ तदा वार्त्रघ्नी अनूच्येते, यदा अमावास्याज्यभागौ तदा वृधन्वती अनूच्येते । अतो मान्त्रवर्णिकदेवताया अभावेन अरूपत्वान्न कर्मविधित्वम् । किञ्च नामावच्छिन्नं हि कर्मद्वयमेतत् विधातव्यम् । न च प्रवृत्तिनिमित्ताभावेन पौर्णमास्यमावास्यापदयोर्नामधेयत्वमस्ति । **नापि** कालविधिपरे वाक्ये विधास्यमानभाविकालसंबन्धनिरीक्षणेन नामधेयत्वमिति **वाच्यम्** । उत्पत्तौ हि नामप्रवृत्तिनिमित्तत्वं कालस्य । न च कालविधिपरे वाक्यद्वये विद्वद्वाक्यद्वयोत्पन्नं कर्म प्रतीयते । तेन यथाभूतस्य नामसंबन्धो न तथाभूतस्य कालसंबन्धः, यथाभूतस्य कालसंबन्धो न तथाभूतस्य नामसंबन्ध इति । अग्निहोत्रादौ तु यथाभूतस्य उत्पत्तिः तथाभूतस्यैव ' यदग्नये च प्रजापतये च सायं जुहोति ' इत्युत्पत्तिवाक्यगतहोमस्वरूपावगमात् वैषम्यादिति नानुपपन्नम् ।

नन्वेवं तर्हि आग्नेयादिवाक्यैरेव देवतामात्रविधानात् रूपभावो भवति । **मैवम्**, प्राप्ते कर्मणि द्रव्यदेवतारूपानेकगुणविधाने वाक्यभेदप्रसङ्गात् । **न च** संस्कारवाक्यपर्यालोचनेन द्रव्यप्राप्तौ देवतामात्रविधानान्न वाक्यभेद इति **वाच्यम्** । द्रव्यविधानमन्तरेण संस्कारत्वासंभवात् । अन्यथा ' द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसंबन्धः ' इति न्यायेन प्रधानकर्मत्वापत्तेः । किञ्च भवतु तावत् द्रव्यप्राप्तिः, तथापि आग्नेयपदोपात्ताग्निविधाने अष्टाकपालपदोपात्ताष्टत्वविधाने च वाक्यभेदः । **तेन** यदुक्तं तद्विधानैकपदोपात्तदेवताविशिष्टद्रव्यविधानान्न वाक्यभेद इति, तदपि **निरस्तम्** । अष्टाकपालपदोपात्ताष्टत्वसंख्याविधानस्य आवश्यकत्वेन वाक्यभेदस्य तदवस्थत्वात् । तथा च सूत्रम् – चोदना वा गुणानां युगपच्छास्त्राच्चोदिते हि तदर्थत्वात्तस्य तस्योपदिश्येत ॥ इति ।

ननु सिद्धान्ते च एकेन वाक्येन द्रव्यदेवतासंबन्धकल्पयागानां विधाने वाक्यभेदः समान एव । न सकलविशेषणविशिष्टैकभावनाविधाने भावार्थतः अभावात् । न चैवं सति विशेषणानामविधानम्, विशिष्टविध्यन्यथाऽनुपपत्तिकल्पितविधिभिरेव विशेषणविधानात् । तदुक्तम्— ' **श्रौतव्यापारनानात्वे शब्दानामतिगौरवम् । एकोक्त्यवसितानां तु नार्थाक्षेपो विरुध्यते ॥ प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः । अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः ॥** ' इति (वा. पृ. ४८५) ।

ननु यथा विशिष्टविधिर्विशेषणविधिसापेक्षः तथा विशेषणविधिरपि विशेष्यलाभाय विशिष्टविधिसापेक्ष एव इत्यन्योन्याश्रयात् विशिष्टविधिरपि न संभवति । **उच्यते** । स्यादेवं यदि विशिष्टविधिः विशेषणविध्यवगमापेक्षप्रवृत्तिर्भवेत् । किं तर्हि ? आकाङ्क्षितसंनिहितयोग्यविशेषमात्रावगमापेक्षप्रवृत्तिः । तानि च विशेषणानि विशिष्टविधिवाक्ये एव पदप्रतिपादितानि, किन्तु विधिप्रतिपादिता विशिष्टविषयिणी कर्तव्यता न विशेषणानां कर्तव्यतामनासाद्य पर्यवस्यतीति विशेषणकर्तव्यतापेक्षायां पूर्वसिद्धा एव विशेषणविधयः श्रुतार्थापत्त्या कल्प्यन्ते । तेन विशिष्टविधौ विशेषणविधयः पूर्वसंबन्धमात्रेणैव उपयुज्यन्ते । यथा जीवतो गृहाभावे बहिर्भावः । यथा वा शब्दार्थव्युत्पत्तौ व्यक्तौ व्यवहारदर्शनात् प्रथमं व्यक्त्यर्थत्वमवगम्यते । तत्र आकृत्यर्थत्वं प्रागनवगतमपि सत्तामात्रोपयोगि पश्चात् तु आनन्त्यव्यभिचाराभ्यां व्यक्तेरवाच्यत्वात् आकृतेर्वाच्यत्वं निश्चीयते, न चेतरेतराश्रयत्वम्, तथेहापि । तदुक्तम् — ' **विशेषण-**

विचारोऽयं पश्चाद्यद्यपि गम्यते (विशेषणविधिश्चायमिति मुद्रितपुस्तकपाठः) । **तथापि त्वाकृतिन्यायात् ततः प्रागेव जायते ॥** ' इति (वा. पृ. ४८५) । ततश्च आग्नेयादिवाक्यैर्विशिष्टापूर्वभावनाविधौ न वाक्यभेदः । तेन तद्वाक्यविहितकर्मसमुदायानुवादत्वमेव विद्वद्वाक्ययुगलस्येति । तदुक्तम् ' **अपूर्वत्वाद्विधानस्य प्रकृते शब्दशक्तितः** (अरूपत्वादिति मुद्रितपुस्तकपाठः) । **तत्रैव रूपलाभाच्च समुदायानुवादता ॥** ' इति (वा. पृ. ४८९) । इदं तु इह वक्तव्यम् । किं पुनः समुदायानुवादस्य प्रयोजनम् ? तदुच्यते । फलवाक्ये हि ' दर्शपूर्णमासाभ्याम् ' इति वचनात् द्वयोः करणत्वमुपजातम् । न च तत् कर्मस्वरूपापेक्षम्, तेषां बहुत्वात् । नापि राजसूयवत् फलापेक्षम्, तथा सति ' राजसूयेन ' इतिवत् एकवचनत्वप्रसङ्गात् । न चोत्पत्तिवाक्यगतकालद्वयापेक्षम्, तथापि अन्तरङ्गत्वेनैव एकवचनत्वप्रसङ्गादेव । यत्तु ' सुपां सुपो भवन्ति ' इति बहुवचनस्थाने एकवचनमेकस्मिन् वाक्ये द्विवचनमित्युक्तम्, अगत्या हि अर्थसाधुत्वासंभवात् प्रयोगसाधुत्वमात्रार्थं तथा आश्रितम् । इह तु विद्वद्वाक्ययुगलापादितसमुदायद्वित्वश्रवणेनैव अर्थसाधुत्वसंभवे सति न प्रयोगसाधुत्वमात्राश्रयणम् । तथाहि, त्रयाणामाग्नेयाग्नीषोमीयोपांशुयाजानां एकपौर्णमासीकालसंबन्धात्, तथा त्रयाणामाग्नेयः ऐन्द्रं दधि ऐन्द्रं पयः इत्येषामेकामावास्याकालसंबन्धात्, त्रयाणांत्रयाणामेकैककालसंबन्धानां विद्वद्वाक्ययुगलेन फलवाक्यापेक्षितद्वित्वसिद्ध्यर्थं समुदायानुवादः प्रयोजनवानेवेति । तदुक्तम्— ' **यथैवोत्पत्तिवाक्यानां प्रयोगवचनाङ्गता । तथैव तदुपादानात् द्वित्वसिद्ध्याऽनयोरपि ॥** ' इति (वा. पृ. ४७९) । **ननु** पौर्णमास्यमावास्यानामावच्छिन्नसमुदायस्य कथं दर्शपूर्णमासशब्दाभ्यामुपादानम् ? अत्र पूर्णमासशब्देन तद्विकारः पौर्णमासीशब्दो लक्ष्यते, एवं तर्हि दर्शशब्देन विरुद्धलक्षणयैव अदर्शनात् चन्द्रमसः अमावास्या प्रतिपाद्यते इत्युच्यते । तदा किमपराद्धं ' सुपां सुपो भवन्ति ' इत्यनुशासनबलेन एकवचनस्थाने द्विवचनं बहुवचनस्य वेति । **मैवम्** । समुदायानुवादवाक्यद्वयस्य अनन्यप्रयोजनसाध्येन विधिना फलवाक्यगतद्विवचनान्तदर्शपूर्णमासपदप्रवृत्तिसिद्ध्यर्थमेव अध्यापितत्वात् क्लेशेनापि तदुपादानं न दोषाय । पूर्वपक्षे तु नैवंविधं किञ्चिदस्ति निमित्तमिति वैषम्यम् । एवं च षण्णामेव फलसंबन्धेन विहितत्वात् इतरेषामाघारादीनां फलवत्संनिधिन्यायेन तदङ्गत्वमेव भवतीति सिद्धान्तस्य प्रयोजनम् ।

सूत्रं तु—प्रक्रियते इति प्रकरणम्, तेन आग्नेयादिकर्म अभिधीयते । पौर्णमास्यामित्यनेन पौर्णमासीपदयुक्तविद्वद्वाक्ययुगलमुपलक्षयति । तेनायमर्थः — अस्मिन् वाक्यद्वये प्रकृतमेव कर्म प्रतिपाद्यम्, न तत्पूर्वकर्मद्वयम् । रूपावचनात् द्रव्यदेवतासंबन्धप्रतिपादकशब्दाभावादित्यर्थः । **तौता.**

☛ प्रकरणं तु पौर्णमास्यां रूपावचनात् । २।२।३।३ ॥

'यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति ' ' तावब्रूतामग्नीषोमौ आज्यस्यैव नौ उपांशु पौर्णमास्यां यजन् ' ' उपांशुयाजमन्तरा यजति ' ' ताभ्यामेतमग्नीषोमीयमेकादशकपालं पौर्णमासे प्रायच्छत् ' ' ऐन्द्रं दध्यमावास्याम्' 'ऐन्द्रं पयोऽमावास्यायाम्' इति कालसंयुक्तानि वाक्यानि श्रूयन्ते । तथा ' आघारमाघारयति ' ' आज्यभागौ यजति ' ' स्विष्टकृतं यजति ' ' पत्नीसंयाजान् यजति ' ' समिष्टयजुर्जुहोति ' इति अकालसंयुक्तानि वाक्यानि । तत्संनिधौ च ' य एवं विद्वान् पौर्णमासीं यजते ' ' य एवं विद्वानमावास्यां यजते ' इति श्रूयते । किं सर्वाण्येतानि समप्रधानानि, उत आग्नेयादीनि पयोऽन्तानि प्रधानानि, आघारादीनि समिष्टयजुरन्तानि आरादुपकारकाणि अङ्गानि इति विचारः । तथा ' य एवं विद्वान् ' इति विद्वद्वाक्यद्वयं प्रकृतानां कर्मणामनुवादकम्, उत अपूर्वयोः कर्मणोर्विधायकम्, इतरे च गुणविधयः इति विचारः । तत्र सिद्धान्तमाह । 'पौर्णमास्याम्' इति अमावास्याया अपि उपलक्षणम् । पौर्णमासीशब्दघटिते अमावास्याशब्दघटिते च विद्वद्वाक्ये प्रकरणं प्रकरणस्थमेव आग्नेयादिकर्मजातं अनूद्यते, न तु अपूर्वं कर्मान्तरं विधीयते । रूपावचनात् रूपस्य यागस्वरूपस्य द्रव्यदेवतस्य अवचनात् अनिरूपणात् अविज्ञानात् । अनुवादपक्षे तु संनिहिता आग्नेयादयो यागाः पौर्णमास्यमावास्यासंयुक्ताः इति

गम्यते रूपम्। तस्मात् समुदायशब्दतया आग्नेयादियागसमुदायौ पौर्णमास्यमावास्याशब्दौ बोधयतः। एतावेव समुदायौ दर्शपूर्णमासशब्दाभ्यां अभिधीयेते, फलसंबन्धश्च बोध्यते स्वर्गकामपदेन। ततश्च फलवत्संनिधौ अफलानि आघारादीनि आरादुपकारकाण्यङ्गानि इति सिद्धान्तः।

विशेषदर्शनाच्च पूर्वेषां समेषु ह्यप्रवृत्तिः स्यात्। ४ ॥

आग्नेयादीनां आघारादीनां च समप्राधान्याभावे सिद्धान्ते साधकान्तरमाह। चशब्दः साधकसमुच्चायकः। हि यस्मात् आग्नेयादीनां प्रयाजादीनां च प्रधानतया समेषु सत्सु पूर्वेषां प्रकृतानां प्रयाजादीनां सौर्यादिविकृतौ अप्रवृत्तिः स्यात् प्रवृत्तिर्न स्यात् प्रधानत्वात्। तच्चानिष्टं विकृतौ 'प्रयाजेप्रयाजे कृष्णलं जुहोति' इति कृष्णलहोमादौ विशेषस्य दर्शनात्। तस्मात् न सर्वेषां समप्राधान्यम्।

गुणस्तु श्रुतिसंयोगात्। ५ ॥

'य एवं विद्वान् पौर्णमासीम्' 'य एवं विद्वान् अमावास्याम्' इति विद्वद्वाक्यद्वयं पूर्वोक्ताग्नेयादीनामनुवादकं इति सिद्धान्ते पूर्वपक्षी शङ्कते। तुशब्दः प्रत्यवस्थाने। आग्नेयादिवाक्ये विद्वद्वाक्यविहितकर्मानुवादेन अग्न्यादिदेवतारूपः पुरोडाशादिद्रव्यरूपश्च गुणः विशिष्टविधिना विधीयते। श्रतिसंयोगात् विद्वद्वाक्यविहितकर्मानुवादक्षमस्य पौर्णमास्यादिरूपस्य शब्दस्य संयोगात् विद्यमानत्वात्। ततश्च विद्वद्वाक्यं विधायकमेव नानुवादकम्।

चोदना वा, गुणानां युगपच्छासनाच्चोदिते हि तदर्थत्वात् तस्यतस्योपदिश्येत। ६ ॥

'यदाग्नेयोऽष्टाकपालः' इत्यादिवाक्ये द्रव्यदेवतारूपगुणविधिः विद्वद्वाक्यविहितकर्मानुवादेन इति यदुक्तं पूर्वपक्षिणा तन्निरस्यति वाशब्दः। चोदनाः कर्मचोदनाः आग्नेयादयः स्युः न गुणचोदनाः। कुतः? गुणानां युगपत् शासनात् प्राप्ते पौर्णमास्यादिकर्मणि एकेनैव वाक्येन अत्र अनेको गुणो विधातुमिष्यते भवता। न च शब्दान्तरेण चोदिते कर्मणि अनेको गुणः परस्परसंबन्धे असति शक्यते विधातुम्। हि यस्मात् चोदिते प्राप्ते कर्मणि तदर्थत्वात् गुणार्थत्वात् तस्यतस्य गुणस्य विधेये पुनःपुनः उपदिश्येत उच्चार्येत प्रत्ययः। तच्चानिष्टम्। तस्मात् आग्नेयादिवाक्ये न गुणविधिः। किन्तु कर्मचोदना एव इत्याह सिद्धान्ती।

व्यपदेशश्च तद्वत्। ७ ॥

'उग्राणि ह वा एतानि हवींषि अमावास्यायां संभ्रियन्ते आग्नेयं प्रथमम्, ऐन्द्रे (दधिपयसी) उत्तरे' इति त्रयाणां उग्रत्वापरपर्यायप्राधान्यव्यपदेशोऽपि तद्वत् गुणविधिपक्षे वाक्यभेदवत् न युज्येत आग्नेयवाक्ये भवत्पक्षे गुणविधित्वेन आग्नेयस्य प्राधान्याभावात्। तस्मात् विद्वद्वाक्यं आग्नेयादीनामनुवादकमेव।

लिङ्गदर्शनाच्च। ८ ॥

'चतुर्दश पौर्णमास्यामाहुतयो हूयन्ते त्रयोदशामावास्यायाम्' इति आहवनीयगतवषट्काराहुतिपरिगणनस्य लिङ्गस्य दर्शनादपि आग्नेयादिवाक्यानि कर्मविधायकानि, विद्वद्वाक्यं तु तेषां समुदायत्वेनानुवादः। विद्वद्वाक्ये कर्मान्तरत्वपक्षे अभ्यधिकत्वात् आग्नेयादिवाक्ये गुणविधिपक्षे न्यूनत्वात् त्रयोदशचतुर्दशत्वानुवादविरोधः! सिद्धान्ते तु पञ्च प्रयाजाः द्वावाज्यभागौ स्विष्टकृत् त्रयोऽनूयाजाः पौर्णमास्यां प्रधानाहुतित्रयम्, अमावास्यायां सांनाय्यस्य सहानुष्ठानात् प्रधानाहुतिद्वयम्। इति चतुर्दशत्वत्रयोदशत्वानुवाद उपपन्नः। तस्मात् विद्वद्वाक्यमनुवादकमिति सिद्धम्। **के.**

* प्रकरणं द्विविधं महाप्रकरणं अवान्तरप्रकरणं चेति। तत्र फलभावनायाः प्रकरणं महाप्रकरणम्। तच्च प्रयाजादीनां ग्राहकम्। तच्च प्रकृतावेव। तत्र च उभयाकाङ्क्षारूपं प्रकरणं संभवति, आकाङ्क्षाऽनुपरमात्। विकृतौ तु न प्रकरणं संभवति। तत्र तु अन्यतराकाङ्क्षारूपस्थानादेव अपूर्वाङ्गग्रहणम्। यत्तु विकृतौ प्राकृताङ्गानुवादेन विधीयते, यथा 'औदुम्बरो यूपो भवति' इति यूपानुवादेन औदुम्बरत्वम्, तत् प्रकरणात् गृह्यते। यत्तु विकृतावपि प्राकृतधर्मानुवादेन विधीयमानयोर्धर्मयोरन्तराले अपूर्वमङ्गं केवलं पठ्यते, तदपि प्रकरणेन विनियुज्यते यथा आमनहोमाः। ते हि प्राकृताङ्गानुवादेन विधीयमानयोरन्तराले विधीयन्ते। अवान्तरप्रकरणं तु फलभावनायाः

अन्तराले यत् अङ्गभावनायाः प्रकरणं तत्। तच्च अभिक्रमणादीनां प्रयाजादिषु विनियोजकम्। तच्च संदंशेन ज्ञायते। तदिदं अवान्तरप्रकरणं महाप्रकरणात् बलीयः। तदिदं स्थानादिप्रमाणात् बलवत्। (संक्षिप्य गृहीतम्)। **मीन्या.** पृ. १७५–१९८. * प्रकरणं धर्माङ्गताबोधकं प्रमाणम्। **मणि.** पृ. १३. * प्रकरणं न धर्माणां विशेषकम्, किं तर्हि? विनियोजकम्। 'इदमत्र भवति' इत्येतत् प्रकरणस्य सामर्थ्यम्, न 'अस्य यत् तस्येदम्' इति। **भा.** ११।२।४।२२.

* **प्रकरणं निरूप्यते।** अथ किं प्रकरणम्? न तावत् संनिधिपठितत्वम्, सर्वस्यैव यत्किञ्चित्संनिधिपठितत्वेन सर्वाङ्गत्वापत्तेः। न च तत्संनिधिपठितत्वं तद्विनियोजकप्रकरणं इति विशिष्य निर्वचनात् नोक्तदोषः, अङ्गानां प्रधानसंनिधिपठितत्वेन प्रधानाङ्गित्वापत्तेः, दर्शपूर्णमासयोः गोदोहनसंनिधिपठितत्वेन तदङ्गत्वापत्तेश्च। अथ अश्रुतभाव्यकतत्संनिधिपठितत्वं तद्विनियोजकप्रकरणम्, प्रधानानां श्रुतभाव्यकत्वात् नोक्तदोषः, **इति चेत्, न,** समिद्यागस्य अश्रुतभाव्यकतनूनपाद्यागसंनिधिपठितत्वेन तनूनपाद्यागाङ्गित्वापत्तेः। अथ श्रुतभाव्यकत्वे सति अश्रुतभाव्यकतत्संनिधिपठितत्वं तद्विनियोजकप्रकरणम्, समिद्यागस्य अश्रुतभाव्यकतनूनपाद्यागसंनिधिपठितत्वेऽपि श्रुतफलकत्वाभावात् नोक्तदोषः। गोदोहनस्य दर्शपूर्णमासाङ्गत्ववारणाय अश्रुतभाव्यकेति। **इति चेत्,** विश्वजितो विकृतित्वेन प्रकरणित्वाभावात् तत्र अव्याप्त्यभावेऽपि पिण्डपितृयज्ञस्य श्रुतफलकत्वाभावेन स्वाङ्गप्रकरणित्वानापत्तेः, प्रयाजादीनां श्रुतभाव्यकप्रोक्षणाङ्गत्वापत्तेश्च। अतः अशक्यनिर्वचनं प्रकरणम्। **इति चेत्, न,** संनिधिपठितत्वे सति इतिकर्तव्यताऽऽकाङ्क्षायाः एव प्रकरणपदार्थत्वात्। तत्संनिधिपठितत्वविशिष्टकथम्भावाकाङ्क्षा तद्विनियोजकप्रकरणं इति तु निष्कर्षः। अस्ति चेदं प्रयाजादिविनियोजकदर्शपूर्णमासादिकरणकभावनाकथम्भावाकाङ्क्षाऽऽत्मकप्रकरणे, दर्शपूर्णमासादीनां प्रयाजादिसंनिधिपठितत्वात्। दर्शपूर्णमासादिषु दीक्षणीयाऽऽदिप्रकरणित्ववारणाय, विकृतेः प्राकृताङ्गप्रकरणित्ववारणाय च विशिष्टान्तम्। प्रयाजादीनां पुरोडाशादिरूपद्रव्याङ्गत्ववारणाय कथम्भावाकाङ्क्षेति। तदुक्तम् 'असंयुक्तं प्रकरणादितिकर्तव्यताऽर्थित्वात्' (३।३।४।११) इति। प्रमाणान्तरासंयुक्तं इतिकर्तव्यतार्थित्वरूपात् प्रकरणात् अङ्गं इति सूत्रार्थः। अत्र श्रुत्यादिप्रमाणान्तरविनियुक्तस्य प्रोक्षणादेः प्रयोजनाकाङ्क्षारूपसहकारिकारणविरहात् न प्रधानीयकथम्भावाकाङ्क्षारूपप्रकरणात् अङ्गत्वम्। प्रयाजादेरेव प्रयोजनाकाङ्क्षारूपसहकारिकारणवशात् अङ्गत्वं इति प्रकरणविनियोज्यविषयविशेषसूचनाय प्रमाणान्तरासंयुक्तत्वोक्तिः, न तु तस्य लक्षणे निवेशः प्रयोजनाभावात्। प्रधानीयप्रयोजनाकाङ्क्षारूपसहकार्यभावादेव अङ्गानां प्रधानसंनिधिपठितत्वविशिष्टकथम्भावाकाङ्क्षावत्त्वेऽपि न प्रधानानां अङ्गाङ्गत्वम्। **न च** समिद्यागादेः प्रयोजनाकाङ्क्षारूपसहकारिसत्त्वात् तनूनपाद्यागाङ्गत्वापत्तिः इति **वाच्यम्।** तनूनपादादेः इतिकर्तव्यताऽऽकाङ्क्षाकाले समिदादेः प्रयोजनाकाङ्क्षाऽभावात्। तनूनपादादेः फलवत्त्वावगमोत्तरं हि इतिकर्तव्यताऽऽकाङ्क्षा तदवगमश्च प्रधानभावनायाः इतिकर्तव्यताऽऽकाङ्क्षया प्रधानभावनान्वये सति भवेत्, प्रधानभावनेतिकर्तव्यताऽऽकाङ्क्षायां च स्वप्रयोजनाकाङ्क्षारूपसहकारिवशात् तनूनपातः इव समिधोऽपि अन्वयानैराकाङ्क्ष्यम्, इति न तनूनपाद्यागाङ्गत्वापत्तिः। अत एव ज्योतिष्टोमाश्रितानाम् 'पशुकाम उक्थ्यं गृह्णीयात्' इत्यादिकाम्यसंस्थानां दीक्षणीयाऽऽदिसंनिहितत्वविशिष्टकथम्भावाकाङ्क्षावत्त्वेऽपि न प्रकरणात् दीक्षणीयाऽऽदीनां संस्थाङ्गत्वम्। अन्यप्रयुक्ताश्रयसापेक्षगुणफलसंबन्धविधेः पूर्वं दीक्षणीयाऽऽद्यङ्गानां आश्रयीभूतज्योतिष्टोमभावनान्वयावश्यकत्वेन प्रयोजनाकाङ्क्षाऽभावात्। अतो गुणभावनायाः इतिकर्तव्यताऽऽकाङ्क्षायां आश्रयतः अतिदेशादेव धर्मप्राप्तिः इति नाश्रयसामानविध्यं इत्युक्तं तृतीये (भाट्ट. ३।६।१६)। प्रयोजनाकाङ्क्षाविरहादेव च न फलार्थगुणस्य आश्रयाङ्गत्वम्। पिण्डपितृयज्ञस्य तु श्रुत्याद्यविनियुक्ताङ्गसत्त्वेऽपि न विनिगमनाविरहात् तदङ्गत्वप्रसक्तिः, कालश्रवणस्यैव प्राधान्ये विनिगमकत्वात्। कालादिश्रवणाद्यविशेषे तु पिण्डपितृयज्ञवत् श्रुत्याद्यविनियुक्तस्यापि फलार्थत्वापत्तेः न परस्पराङ्गत्वापत्तिः।

विकृतिसंनिधिपठितोपहोमानां तु स्वसंनिधिपठितत्वविशिष्टविकृतिभावनाकथम्भावाकाङ्क्षारूपप्रकरणसत्त्वेऽपि न ततः अङ्गत्वम्, उपहोमेभ्यः क्लृप्तोपकारकत्वेन पूर्वान्वितैः प्राकृताङ्गैः कथम्भावाकाङ्क्षायाः शान्तत्वेन उपहोमविनियोगबोधाव्यवहितपूर्वं निरुक्तप्रकरणाभावात्। अपितु संनिधिरूपस्थानवशात् विकृत्याकाङ्क्षामुत्थाप्य तत एवाङ्गत्वम्। न च एवमुत्थाप्याकाङ्क्षायां प्रकरणलक्षणातिव्याप्तिः, तस्या अपि स्थानकल्प्यप्रकरणत्वेन लक्ष्यत्वात्। उपहोमेषु प्राकरणिकाङ्गत्वव्यवहारापत्तिस्तु लिङ्गविनियोज्यमन्त्रेषु श्रौताङ्गत्वापत्तिवत् क्लृप्तनिरुक्तकथम्भावाकाङ्क्षाया एव तद्व्यवहारनियामकत्वेन निराकार्या इति बोध्यम्।

नव्यास्तु अवगतफलसंबन्धसंनिहितवाक्यप्रमितपदार्थवृत्ति यत् पूर्वप्रमाणानवगताङ्गताकविषये इतिकर्तव्यतात्वप्रकारकापेक्षणम्, तत् प्रकरणम्। अस्ति च दर्शपूर्णमासादौ प्रयाजादिविषये तत्। समिद्यागस्य प्रकरणात् तनूनपाद्यागाङ्गत्ववारणाय अवगतफलसंबन्धेति पदार्थविशेषणम्। प्रयाजादीनां प्रकरणादसंनिहितज्योतिष्टोमाद्यङ्गत्ववारणाय संनिहितवाक्यप्रमितेति तद्विशेषणम्। अङ्गस्य पूर्वप्रमाणानवगताङ्गताकेतिविशेषणाच्च न प्रोक्षणादीनां श्रुतिलिङ्गवाक्यैः अवगतव्रीह्याद्यङ्गभावानां प्रकरणात् दर्शाद्यङ्गत्वापत्तिः। ‘वामदेव्यं गायति’ इत्यादौ प्रमाणान्तरेण अनवगताङ्गताकसामविषये अवगतफलसंबन्धस्य स्तोत्रस्य स्वसाधनीभूतऋगक्षराभिव्यक्त्यर्थं अपेक्षासत्त्वात् प्रकरणेन अङ्गत्वप्रसक्तौ तद्व्यावृत्त्यर्थं इतिकर्तव्यतात्वेन इति विशेषणम्। तस्य ऋगक्षराभिव्यक्त्यर्थं सामापेक्षायामपि सिद्धसामापेक्षायां इतिकर्तव्यतात्वप्रकारकत्वाभावात् इत्याहुः। अत्र समिद्यागादौ तनूनपाद्यागाङ्गत्वस्य, प्रोक्षणादीनां प्रकरणात् दर्शपूर्णमासाङ्गत्वस्य च उक्तरीत्या वारणसंभवात् अवगतफलसंबन्धेति, पूर्वप्रमाणानवगताङ्गताकेति च विशेषणं सूत्रस्थासंयुक्तत्वरूपविशेषणवत् विनियोगप्रयोजकप्रकरणशरीरे प्रकरणविनियोज्यविषयविशेषबोधनार्थमेव। अस्तु वा तनूनपादादौ समिद्यागप्रकरणित्वव्यवहाराभावात् व्यवहारप्रयोजकप्रकरणशरीरे अवगतसंबन्धेति विशेषणम्। दर्शपूर्णमासादौ प्रोक्षणादिप्रकरणित्वव्यवहारस्य तु सर्वानुभवसिद्धत्वात् तद्वारकविशेषणोपादानं तु अनुचितमेव। अस्तु वा गोदोहनादौ प्रयाजादिप्रकरणित्वव्यवहाराभावात् पूर्वप्रमाणानवगताङ्गताकेति स्वपूर्वप्रवृत्तप्रमाणानवगताङ्गताकेत्यर्थकम्, न तु प्रकरणपूर्वोद्दिष्टश्रुतिलिङ्गवाक्यानवगताङ्गताकेत्यर्थकम्, दर्शपूर्णमासादौ प्रोक्षणादिप्रकरणित्वव्यवहारानापत्तेः। गोदोहनभावनाकथम्भावाकाङ्क्षातः पूर्वप्रवृत्तदर्शपूर्णमासभावनाकथम्भावाकाङ्क्षारूपप्रकरणेन प्रयाजादीनां अङ्गताऽवगमात्तु न गोदोहनादिषु तत्प्रकरणित्वव्यवहारः। अत इदं व्यवहारप्रयोजकप्रकरणलक्षणम्। विनियोजकप्रकरणलक्षणं तु अस्मदुक्तमेव। तनूनपादादिषु समिदादिविनियोजकप्रकरणसत्त्वेऽपि समिदादीनामुक्तरीत्या तदङ्गत्वस्य वारयितुं शक्यत्वात् इति तत्त्वम्।

के चित्तु “ उभयाकाङ्क्षा प्रकरणम्’। (**मीन्या.** पृ. १६९) सा च फलाकाङ्क्षाविशिष्टकथम्भावाकाङ्क्षा। वैशिष्ट्यं च स्वाश्रयभावनासंनिहितभावनाश्रितत्वसंबन्धेन, न तु एकपुरुषावगतत्वादिना। तेन न विश्वजिदादेः प्रकरणेन दर्शाङ्गत्वम्। उक्तसंबन्धेन (प्रकरणोक्तसंबन्धेन) यदीयफलाकाङ्क्षाविशिष्टा निर्णीत–(अनिर्णीत–) तदनङ्गत्वकगता (त्वगता) या कथम्भावाकाङ्क्षा, सा तद्विनियोजक–(कं) प्रकरणं इति (तु) निष्कर्षः। उक्तं हि ‘ असंयुक्तं प्रकरणादितिकर्तव्यतार्थित्वात्’ इति। अत्र पञ्चम्याः (पञ्चम्यन्तयोः) सामानाधिकरण्यात् कथम्भावाकाङ्क्षैव प्रकरणमित्यवसीयते। असंयुक्तपदं च फलाकाङ्क्षोपस्थापकम्, न तु संनिपातिनिवारणम् (न तु संनिपातिनिवारणाद्यर्थं)” इत्याहुः [**भाट्टालङ्कारः**]। तदतीव मन्दम्। तथाहि, विनियोगफलोपधायकप्रकरणस्य वा इदं लक्षणं तत्स्वरूपयोग्यस्य वा ? **नाद्यः**, स्वाश्रयभावनासंनिहितभावनाऽऽश्रितत्वसंबन्धेन प्रयाजादिभावनीयफलाकाङ्क्षाविशिष्टायां श्रुतभाव्यकत्वेन निर्णीतप्रयाजाद्यनङ्गत्वकप्रोक्षणादिभावनागतकथम्भावाकाङ्क्षायां प्रयाजविनियोगरूपफलानुपधायकायां अतिव्याप्तेः, प्रधानकथम्भावाकाङ्क्षारूपप्रकरणेन फलवत्त्वे अवगते तनूनपाद्यागीयकथम्भावाकाङ्क्षोदयात् निर्णीतानङ्गत्वकतनूनपाद्यागगतायां तस्यां उक्तसंबन्धेन

समिद्यागीयफलाकाङ्क्षाविशिष्टत्वेन अतिव्याप्तेश्च। **न च** प्रधानकथम्भावेन तनूनपाद्यागीयफलवत्त्वावगमसमकालमेव समिद्यागस्यापि फलवत्त्वावगमेन फलाकाङ्क्षोपरमात् तदुत्तरकालीनतनूनपाद्यागीयकथम्भावाकाङ्क्षायां न तद्वैशिष्ट्यं इति **वाच्यम्**। आलोकपरामर्शजन्यानुमितौ सामानाधिकरण्यसंबन्धेन अतीतधूमपरामर्शवैशिष्ट्यस्येव उक्तसंबन्धेन अतीतसमिद्यागीयफलाकाङ्क्षावैशिष्ट्यस्य तनूनपाद्यागीयकथम्भावाकाङ्क्षायां सत्त्वे बाधकाभावात्। यदि तु धूमपरामर्शजन्यताऽवच्छेदककोटौ उक्तदोषवारणाय स्वाव्यवहितोत्तरत्वसंबन्धस्यापि निवेशवत् अत्र समानकालीनतत्संबन्धस्यापि निवेशः इत्युच्यते **ततः** निर्णीततदनङ्गत्वेति व्यर्थम्, अङ्गकथम्भावाकाङ्क्षायां उक्तसंबन्धेन अतीतप्रधानफलाकाङ्क्षावैशिष्ट्यविरहेण अतिव्याप्त्यभावात्, तस्य तद्वारकत्वेन त्वदभिप्रेतत्वात्। **न द्वितीयः** अङ्गकथम्भावाकाङ्क्षायाः प्रधानविनियोगस्वरूपयोग्यप्रकरणत्वेऽपि प्रधानफलाकाङ्क्षारूपसहकारिविरहात् तनूनपाद्यागकथम्भावाकाङ्क्षायाः समिद्यागविनियोजकप्रकरणत्वेऽपि समिद्यागफलाकाङ्क्षारूपसहकारिविरहादेव अङ्गत्वप्रसङ्गवारणोपपत्तौ फलाकाङ्क्षावैशिष्ट्यनिवेशस्य, निर्णीततदनङ्गत्वनिवेशस्य च व्यर्थत्वात्। तदुभयनिवेशेऽपि प्रयाजादीनां प्रोक्षणाद्यङ्गत्ववारणाय फलाकाङ्क्षायाः सहकारित्वकल्पनायाः आवश्यकत्वात् इति दिक्।

एतस्य च प्रकरणस्य आकाङ्क्षारूपत्वेन स्वतः अप्रमाणत्वात् वाक्यकल्पनाद्वारैव प्रामाण्यम्। तथाहि, प्रधानगतेतिकर्तव्यताऽऽकाङ्क्षया प्रयाजादिगतप्रयोजनाकाङ्क्षासहकृतया प्रयाजवाक्यस्य, प्रधानवाक्यस्य च स्वस्वावान्तरवाक्यार्थसमाप्तस्यापि महावाक्यैकदेशत्वरूपपदत्वाक्रान्तस्य संनिधिरूपं वाक्यं कल्प्यते। उक्तपारिभाषिकपदानामपि स्वार्थोपस्थितिद्वारा तन्निष्ठाश्रुतपदान्तरकल्पनाऽनुकूलयोग्यतारूपलिङ्गानुमानद्वारा इतिकर्तव्यतात्ववाचीत्थमित्यादिगौणश्रुतिकल्पकत्वं इति परंपरया प्रकरणस्य अङ्गत्वे प्रामाण्यम्। वाक्यैकवाक्यताकल्पनप्रकारश्च ‘समिधो यजति, इत्थं दर्शपूर्णमासाभ्यां यजेत’ इति। अत एव दर्शपूर्णमासप्रकरणाम्नातेन ‘संस्थाप्य पौर्णमासीं वैमृधमनुनिर्वपेत्’ इत्यनेन विहितवैमृधस्य प्रकरणात् दर्शपूर्णमासोभयाङ्गत्वप्रसक्तौ वाक्यात् पौर्णमास्यङ्गत्वं इत्युक्तं बलाबलाधिकरणे। इति प्रकरणनिरूपणम्। **मुरारि.** पृ. ११८१–११८५.

* प्रकरणं प्रक्रमः। तस्य लोकवेदयोः अर्थज्ञानोपायत्वं प्रसिद्धम्। **सु.** पृ. १११. * प्रकरणं प्रमाणान्तरम्। **वा.** ३।३।७।१४ पृ. ८५२. * प्रकरणं बाधित्वा वाक्येन (अग्न्याधेयप्रकरणे समाम्नातानि पवमानहवींषि) अग्नेः (गुणभूतानि) भवन्ति। **भा.** ३।१।१२।२२. * प्रकरणं बाधित्वा वाक्येन द्वादशोपसत्ता अहीनस्यैव, न ज्योतिष्टोमस्य। ३।३।८।१५–१६. * प्रकरणम्। महाप्रकरणं प्रधानस्य असंदंशोद्भूतिकं प्रकृतेः, विकृतेस्तु संदंशोद्भूतिकम्। **बाल.** पृ. ११. * प्रकरणं मुख्यस्यैव नाङ्गानाम्। **वि.** ३।७।२. * प्रकरणं यत्र प्राकृताङ्गानुवादेन विधिः संदंशो वा तत्रैव विकृतौ विनियोजकम्, अन्यत्र तु संनिधिरेव। **बाल.** पृ. ११. * प्रकरणं युगपत् सर्वाङ्गग्राहि। **भाट्ट.** १०।७।९ पृ. ८३. * प्रकरणं वाक्येन अविरुद्धं अर्थवद् भवति। **भा.** ३।४।१।९, * प्रकरणं वाक्येन बाध्यते। पशुरग्नीषोमीयो वाक्येन, शकृल्लोहिते पशोः प्रकरणेन भवेताम्। ४।१।१२।२७. * प्रकरणं वाक्यलिङ्गश्रुतीः कल्पयित्वा विनियोजकम्। वाक्यं तु लिङ्गश्रुती द्वे एव कल्पयित्वा विनियोजकं इति शीघ्रोपस्थापकत्वात् वाक्यं प्रकरणाद् बलीयः। **वि.** ३।३।९. * प्रकरणं विनियोजकम्। प्रकरणाधिकरणम्। ३।३।४. * प्रकरणं श्रुतस्य द्रव्यस्य बाधने नहि समर्थम्। **भा.** १।४।१०।१८ पृ. ३४७। यदा द्रव्यस्य अग्न्यादिसंबन्धो विधीयते, न तदा प्रकरणापेक्षेत्यर्थः। **वा.** * प्रकरणं संनिहितस्य फलवतः अनवगताङ्गताकपदार्थविषये इतिकर्तव्यतात्वेन अपेक्षणम्। (पदकृत्यं तु प्रकरणाधिकरणबिन्दौ भाट्टे एव द्रष्टव्यम्)। **भाट्ट.** ३।३।४. * प्रकरणं समाख्यानात् बलवत्। पौरोडाशिकसमाख्यातब्राह्मणाम्नातानां प्रयाजादीनां समाख्याप्राप्तमपि केवलौषधयागाङ्गत्वं दूरीकृत्य प्रकरणेन सांनाय्योपांशुयाजार्थत्वमपि सिध्यति। **मीन्या.** * प्रकरणं साकाङ्क्षफलवत्संनिधिः। **सु.** पृ. १४७७. * प्रकरणं सामान्यम्, निमित्तसंयोगो

विशेषः (विशेषश्च सामान्यात् बलीयान्) । भा. ३।६।३।१०. * प्रकरणं स्थानाद् बलीयः । विदेवनादयो धर्मा अभिषेचनीयसंनिधौ पठिता अपि नाभिषेचनीयस्याङ्गं किन्तु प्रकरणात् राजसूयाङ्गम् । मीन्या. * कर्तव्यस्य इतिकर्तव्यताकाङ्क्षस्य वचनं प्रकरणमाचक्षते । कणिका. पृ. ३१६. * ननु प्रकरणं वाक्यस्य श्रुतेर्वा न बाधकम् । सत्यमबाधकम् । फलाभावात्तु भवदीयः पक्षो मुच्यते । तस्मिन् आनर्थक्येनाविवक्षिते प्रकरणवता प्रयोगवचनेन अपरिपन्थि प्रोक्षणादि विधायिष्यते । (आनर्थक्यप्रतिहतानां विपरीतं बलाबलम्) । भा. ९।१।५।१३. * नहि उत्पत्तिवाक्ये अस्ति कर्मणां प्रकरणम्, फलसंबन्धोत्तरकालत्वेन कथम्भावात्मकस्य प्रकरणस्य प्रयोगवाक्याधीनप्रसूतत्वात् । वा. २।२।५।१५ पृ. ४९९. * प्रत्यक्षश्रुतिविहिता अग्न्यादयः तेषां यागानाम् (वैश्वदेवपर्वगतानाम्), विश्वेदेवा वाक्येन, प्रकरणात् तेनैव नान्येनेति गम्यते । (प्रकरणात् इदं कल्पनीयं तेनैव आग्नेयादिना यागेन वैश्वदेवेन यजेत नान्येनेति । वा.) । न चायं विषमशिष्टो विकल्पो भवितुमर्हति । नहि प्रकरणं श्रुतस्य द्रव्यस्य बाधने समर्थम् । भा. १।४।१०।१४. * यत्तु अमावास्यादेवतावाचीनि पदानि न पौर्णमास्यां प्रयुज्यन्ते, न तत्र सूक्तवाकशब्दो बाध्यते, प्रकरणं तत्र लिङ्गेन बाधितम् । ३।२।६।१९ पृ. ७६९. * यस्य च पर्यवसितेऽपि वचने तत्संबद्धमेव अर्थान्तरं प्रक्रमते, न तत्र अननुवृत्तं प्रकरणम् । आगच्छति हि तत्संबद्धाभिधाने हृदयम् । यत्र तु पर्यवसिते वचने तदसंबद्धमेवार्थान्तरं प्रक्रमन्ते न तत्र बुद्धौ पूर्वः पदार्थः संनिधीयते । ३।१।११।२१ पृ. ७३४. * यथा वाक्यद्वयानुसंधानसंपन्नं प्रकरणं पृथक् प्रमाणम् । तथा प्रकरणद्वयानुसंधानसंपन्नः क्रमः कुतो न मानं स्यात् ? न चास्य प्रकरणे अन्तर्भावः, द्वयोर्वाक्ययोरिव प्रकरणयोः एकवाक्यत्वाभावात् । वि. ३।३।९. * यद्यपि प्रकरणं स्थानात् बलवत्, तथापि उपांशुयाजानुमन्त्रणन्यायेन लिङ्गानुगृहीतः क्रम एव बलीयान् विज्ञायते । वा. ३।६।७।२५. * विनाऽपि विशेषणेन विशेषग्रहणप्रमाणं प्रकरणं इति सिद्धान्तवादी मन्यते । ३।२।८।२१ पृ. ७७४. * प्रकरणेन आनन्तर्यं (क्रमं संनिधिं स्थानम्) बाधित्वा सिद्धान्तः । क्रमेण पूर्वपक्षः आनन्तर्याधिकरणे । (३।१।१४।२४–२५) । के. * प्रकरणेन क्रत्वर्थत्वं प्रायेण तृतीयाध्यायस्य चतुर्थपादे प्रतिपाद्यते । सोम. ३।४।१. * प्रकरणेन धर्माः संबध्यन्ते इत्थं कुर्यादिति । भा. ७।१।१।२ पृ. १५२७. * प्रकरणेन पूर्वपक्षः वाक्येन सिद्धान्तः संतर्दनाधिकरणे । ३।३।११।२४–३१. * प्रकरणेन प्रकरणं बाध्यते, यथा 'अभिक्रामं जुहोति' इत्यवान्तरप्रकरणेन महाप्रकरणम् । महाप्रकरणेनापि महाप्रकरणं बाध्यते, यथा ज्योतिष्टोमप्रकरणेन नित्यानित्यसंयोगविरोधसहकृतेन संस्थाप्रकरणम् । बाल. पृ. १३५. * प्रकरणेन प्रमाणेन संनिपत्योपकारका आरादुपकारकाश्च धर्मा अपूर्वार्था इति स्थितम् । टुप्. ९।१।१।१ पृ. १६४०. * प्रकरणेन प्रयाजादीनां दर्शपूर्णमासाङ्गत्वम् । 'समिधो यजति' इत्यादेः अस्त्युपकाराकाङ्क्षा, 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यस्यास्ति उपकारकाकाङ्क्षा इति । मीन्या. * प्रकरणेन वषट्कारः प्राप्नोति नारिष्ठहोमेषु, तन्मन्त्रपदैरेकवाक्यत्वात् स्वाहाकारः (प्राप्नोति), वाक्यं च प्रकरणात् बलीयः । भा. ८।४।५।१७. * प्रकरणेन वाक्यस्य बाधः । श्येने 'निवीता ऋत्विजः प्रचरन्ति' इति विहितं निवीतं वाक्यात् अङ्गप्रधानार्थं प्रसक्तं श्येनप्रकरणात् प्रधानमात्रार्थं भवति । बाल. पृ. १४६. * प्रकरणेन विनियोगः । 'अविच्छिन्ने कथम्भावे यत् प्रधानस्य पठ्यते । अनिर्ज्ञातफलं कर्म, तस्य प्रकरणाङ्गता ॥' (प्रकरणेन अङ्गता) । वा. ३।३।४।११. * प्रकरणेन, 'व्रीहीनवहन्ति' इत्यत्र व्रीहिमात्रावघातप्रापिका श्रुतिः बाध्यते 'आनर्थक्यप्रतिहतानां' (विपरीतं बलाबलम्) इति रीत्या । बाल. पृ. १४५. * प्रकरणेन श्रुतिभङ्गः । 'आग्नेय्या आग्नीध्रम्' इति वाक्ये सामान्यसंबन्धबोधकप्रकरणेन प्रकृताप्रकृतसाधारण्यप्रवृत्तश्रुतिस्वारस्यभङ्गः (आग्नेय्यधिकरणे प्रतिपादितः) । कु. ३।२।९।२२. * प्रकरणेन संनिधिबाधात् सर्वशेषा देवनादयः (राजसूयशेषाः, न तु अभिषेचनीयशेषाः) । वि. ३।३।१०. * प्रकरणेन स्थानं बाधित्वा द्वयोर्दोहयोः (सायं प्रातश्चेति) ते धर्माः (शाखाच्छेदनवत्सापाकरणादयो दोहधर्माः)

अभ्युपेयाः । ३।६।८. * न प्रकरणेन शक्यते पर्वशब्दस्य कालवाचितां बाधितुम् । दुर्बलं हि लिङ्गात् प्रकरणम् । भा. ९।२।१८।५३. * प्राकृतकार्यापन्नाङ्गसंदंशपतितमसंयुक्तं क्रियारूपं च, तत् विकृतौ प्रकरणेनैव ग्राह्यम् । कौ. ३।३।७।१४ पृ. ३६४. * यदपि असंयुक्तं न प्राकृतकार्यापन्नप्राकृताङ्गसंबन्ध्यङ्गसंदष्टम्, अपितु प्रधानोत्तरं उक्तविधाङ्गात् (प्राकृतकार्यापन्नाङ्गात्) पूर्वं समाम्नातम्, तदपि प्रकरणेनैव गृह्यते संनिहितप्रतियोगितेतिकर्तव्यताकाङ्क्षायाः अनिवृत्तत्वात् । ३।३।७।१४ पृ. ३६४. * यत्तु 'रथंतरं भवति' इत्येवंचोदितानामपि प्रकरणेन ग्रहणम्, तत् अतिदेशप्राप्तावान्तरप्राप्तक्रियासंबन्धविज्ञानात् । वा. १।४।२।३ पृ. ३३१. * यत्र हि प्राकृतैरङ्गैः पूर्यमाणायां विकृतौ तन्मध्येऽपि अपूर्वाणि कानि चित् प्रक्षिप्यन्ते, तत्र विकृतौ प्रकरणेन ग्रहणं भवति । ३।६।७।२५. * व्रीह्यादि प्रोक्षणादिभिः संबध्यमानं न तावत् प्रकरणेन विशेष्यते । अथ च आनर्थक्यभयात् विप्रकृष्टफलकल्पनाप्रमाणाभावाच्च क्रतुसाधनत्वेन प्रयोजनवत्त्वाच्च प्रकृतं गृह्यते । ३।४।५।१५ पृ. ९४६. * प्रकरणात् अङ्गता स्यात् वाक्यसंयोगाद्वा प्रत्यक्षोपकारदर्शनाद्वा । भा. १०।६।१०।३०. * प्रकरणात् द्रव्यस्याग्रहणम् । मीन्या. * प्रकरणात् लिङ्गं बलीयः । के.

◼ प्रकरणात् वाक्यं बलीय इति न्यायः ।

मीमांसकमते विनियोगविधेः सहकारिभूतेषु षट्सु प्रमाणेषु चतुर्थप्रमाणं 'उभयाकाङ्क्षा प्रकरणम्' इति । अत एव 'इन्द्राग्नी इदं हविरजुषेतामवीवृधेतां महो ज्यायोऽक्राताम्' इत्यत्र इन्द्राग्नीपदस्य लिङ्गात् दर्शाङ्गत्वे सिद्धे 'इदं हविः' इत्यादेरपि तदेकवाक्यत्वात् दर्शाङ्गत्वम्, न तत्प्रकरणात् दर्शपूर्णमासाङ्गत्वम्, प्रकरणात् वाक्यस्य बलीयस्त्वादिति प्रोक्तमिति । साहस्री. ८५६.

* प्रकरणात् वाक्यस्यापि अधिकृतापेक्षित्वे दुर्बलतरत्वम् । वा. ३।३।१०।२१. * प्रकरणात् सामान्यसंबन्धः सिध्यति, न तु श्रुतिमकल्पयित्वा । ३।२।८।२२ पृ. ७७९. * अपूर्वसाधनता न वाक्यसामर्थ्येन प्रतीयते इति प्रकरणात् लभ्यते । ३।७।१।१. * 'नानृतं वदेत्' इत्यत्र 'वदेत्' इति वदनमनुतिष्ठेत् इति श्रुत्या गम्यते । तस्य पुरुषसंबन्धः श्रुत्यैव, कर्मसंबन्धः प्रकरणात् । श्रुतिश्च प्रकरणात् बलीयसी । भा. ३।४।४।१२ पृ. ९०७. * न च यागापूर्वसाधनत्वं प्रकरणादृते लक्षयितुं शक्यते इति नवमे (९।१।१) वक्ष्यामः । वा. ३।६।२।९ पृ. १०३०. * 'वेद्यां हवींष्यासादयति' इति हविर्मात्रं वाक्यात् गम्यते । प्रधानहवींषि प्रकरणात् । वाक्यं च प्रकरणात् बलीयः । भा. ३।७।१।२. * 'व्रीहीन् प्रोक्षति' इति द्वितीयाश्रुत्या व्रीह्यर्थतां प्रोक्षणस्य प्रतिपादयति, अपूर्वसंबन्धः प्रकरणात् स्यात् । श्रुतिश्च प्रकरणात् बलीयसी । टुप्. ९।१।५।११ पृ. १६५७. * संयुक्तं वा (ग्रह–) धर्मैः एवंजातीयकं (अंशु–अदाभ्यौ ग्रहौ) स्यात् अप्रकरणस्थमपि । कुतः ? यतः प्रकरणात् वाक्यं बलीयः । भा. ३।६।११।३२. * प्रकरणस्य अधिकारलक्षणस्य सिद्धान्तेऽपि विनियोजकत्वं नाभ्युपगम्यते । सु. पृ. ११९३. * प्रकरणस्य अविशेषकत्वे सत्यपि ग्राहकत्वेनैव विशेषरूपेण विनियोजकत्वात् विशेषस्थापनहेतुत्वं इत्युक्तं (जञ्जभ्यमानाधिकरणे ३।४।५ भाष्यकृद्भिः) । वा. ३।७।१।१ पृ. १०७४. * प्रकरणस्य इतिकर्तव्यताकाङ्क्षालक्षणत्वम् । सु. पृ. १०५३. * प्रकरणस्य कथम्भावस्य (इतिकर्तव्यतारूपात्) इत्थम्भावादन्येन नास्ति संबन्धः । वा. ३।४।५।१५ पृ. ९४६. * प्रकरणस्य क्रमेण बाधः । 'दब्धिर्नामाऽसि' इति मन्त्रं आग्नेयादिष्वपि विनियुञ्जानं प्रकरणं उपांशुयाजमात्रे विनियुञ्जानेन यथासंख्याऽऽम्नानक्रमेण बाध्यते । बाल. पृ. १४६. * प्रकरणस्य क्रमाद्यपेक्षया प्राबल्यम् । वि. ३।३।१०. * प्रकरणस्य युगपत् सर्वाङ्गग्राहिता । सु. पृ. ७१४. * प्रकरणस्य लिङ्गापेक्षया अर्थविप्रकर्षः—यावच्च प्रकरणेन एकवाक्यत्वं कल्प्यते, तावत् लिङ्गेन श्रुतिः । तथा यावत् इतरत्र प्रकृताग्न्यादिप्रकाशनसामर्थ्यम्, तावदिह विनियोगः इति बाधः । पूषानुमन्त्रणादिषु । वा. ३।३।७।१४ पृ. ८३६. * प्रकरणस्य वस्तुनि अक्रियात्मके व्यापाराभावः । २।२।६।१९ पृ. ५१९. * प्रकरणस्य वाक्यं बाधकमिष्टमेव । २।३।११।२४ पृ. ६१३. * प्रकरणस्य वाक्येन न बाधः सामिधेनीसासदश्यपाञ्चदश्यविषये । भा. ३।६।२।९.

* प्रकरणस्य श्रुतिलिङ्गवाक्यैः सह विरोधाविरोधौ संप्रधार्येते (३।३।८ इत्यतः ३।६।६ इत्यन्तम्) । **वा.** ३।३।८।१५ पृ. ८६२. * **प्रकरणयोर्विरोधे** (शेष्यनेकत्वे) अभिक्रमणादेः महाप्रकरणात् दर्शपूर्णमासाङ्गत्वप्रसक्तौ प्रयाजाङ्गत्वं अवान्तरप्रकरणात् । शेषानेकत्वे तु यत्रानेकसमुदाये महाप्रकरणात् एकधर्मप्राप्तिः अवान्तरप्रकरणाच्च तद्विरुद्धधर्माणां तादृशस्थलमूह्यम् । **कौ.** ३।३।७।१४ पृ. ३६३. * प्रकरणयोर्विरोधे अवान्तरप्रकरणं महाप्रकरणात् बलीयः । 'अभिक्रामं जुहोति' इत्युदाहरणम् । महाप्रकरणेन हि अस्य दर्शपूर्णमासार्थता । अवान्तरप्रकरणेन तु प्रयाजार्थता । तच्च बलीयः । तत्र हि प्रत्यासत्तेः अननुभूते महाप्रकरणसंस्पर्शे पूर्वतरं वाक्यस्थानीयः संबन्धोऽवकल्पते । **वा.** ३।३।७।१४ पृ. ८४०, * **प्रकरणानां** उत्पत्तिदेशानतिरेकः । ३।६।७।१८ पृ. १०४३. * **प्रकरणे** अर्थवति संजाते न निराकाङ्क्षाणां आकाङ्क्षा शक्या उपपादयितुम् । **भा.** ३।३।७।१४ पृ. ८५३. * 'प्रकरणे च संभवन्नपकर्षो न कल्प्यते विध्यानर्थक्यं हि तं प्रति' इति औदुम्बराधिकरणस्थे सूत्रे भाष्यकृता 'यो विदग्धः स नैर्ऋतः' इति दर्शपूर्णमासप्रकरणाधीतं वाक्यमुदाहृत्य विधिपक्षे तु यत्र नैर्ऋतः तत्र विदग्धता नीयेत, तथा सति प्रकरणं बाध्येत इति क्रियाविधिर्निरस्तः इति क्रियाविधिसरूपोऽयमर्थवादः 'यो विदग्धः स नैर्ऋतः' इत्यादिः । **बाल.** पृ. ५५. * प्रकरणे हि स्वार्थपरिपूर्णानामङ्गाङ्गिवाक्यानां उपकार्योपकारकत्वाकाङ्क्षामात्रं दृश्यते । वाक्ये तु प्रत्यक्षः संबन्धः । **वा.** ३।३।७।१४ पृ. ८३३.

卐 **प्रकरणाधिकरणम्** । प्रकरणं विनियोजकम् ॥

असंयुक्तं प्रकरणादितिकर्तव्यताऽर्थित्वात् । ३।३।४।११॥

भाष्यम्— उक्तानि विनियोगकारणानि श्रुतिर्लिङ्गं वाक्यमिति । श्रुतिः 'ऐन्द्या गार्हपत्यम्' इति द्वितीया विभक्तिः । लिङ्गं मन्त्रेषु वचनसामर्थ्यम् 'बर्हिर्देवसदनं दामि' इति । वाक्यम् 'अरुणया क्रीणाति' इति । अथ किमेतावन्त्येव विनियोगकारणानि ? नेत्युच्यते । किमपरं कारणमिति प्रश्नेनैवोपक्रमः । भवति च प्रश्नेनैवोपक्रमः । यथा का नामेयं नदी, को नामायं पर्वतः, किमिदं फलमिति । तदुच्यते । असंयुक्तं प्रकरणादितिकर्तव्यताऽर्थित्वात् । यदसंयुक्तं श्रुत्या लिङ्गेन वाक्येन वा, तत् प्रकरणात्, इतिकर्तव्यताऽर्थित्वात् । यदितिकर्तव्यताऽऽकाङ्क्षिणः संनिधौ पूरणसमर्थमुपनिपतति यत् वचनं तत् तेन प्रकृतेन सहैकवाक्यतां याति । तस्मात् प्रकृते विनियुज्यते । किमिहोदाहरणं किं च प्रयोजनमिति । दर्शपूर्णमासौ प्रकृत्य श्रूयते — 'समिधो यजति' 'तनूनपातं यजति' 'इडो यजति' 'बर्हिर्यजति' 'स्वाहाकारं यजति' । तानि तत्रैव प्रकरणसामर्थ्यात् विनियुज्यन्ते, नाग्निहोत्रे ज्योतिष्टोमे वा ।

वा— एवं तावत् श्रुतिलिङ्गवाक्यानि प्रधानशेषसंकीर्णविविक्तविषयाणि प्रत्युदाहरणम् (उदाहरणे उदाहरणे) व्याख्यातानि । तत्र विधिविनियोगाभिधानात्मिकायाः श्रुतेः (विधात्री विनियोक्त्री अभिधात्री इति त्रिरूपायाः श्रुतेः), विनियोगसामर्थ्यात्मकस्य च लिङ्गस्य, केवलपदप्रयोगाभावात् पदान्तरसंनिधेः अवश्यं भावित्वात् वाक्यं अन्तर्गतप्रायमेव इति न साक्षात् ग्रहणेन सूत्रितम् । अथवा 'वेदो वा प्रायदर्शनात्' इति उपक्रमोपसंहारवशेनैव वेदधर्मत्वावधारणात् इदमेव वाक्यविनियोगसूत्रं इति न पूर्वान्तर्गतिमात्रेण वाक्यस्य विनियोजकत्वं व्याख्येयम् । यत्तु भाष्यकारेण 'अरुणया' इत्युदाहृतम्, शक्यं तत्रापि ऐन्द्रीवत् तृतीयाश्रुतिरेव विनियोजिकेति वक्तुम् । अथ क्रियामात्रसंबन्धे श्रुत्या कृते विशेषसंबन्धो वाक्येन इत्यभिप्रायः । स ऐन्द्र्यामपि तुल्यः । तत्रापि हि ऐन्द्र्या इति उपस्थातव्यमात्रापेक्षणात् 'गार्हपत्यम्' इति च साधनमात्रापेक्षित्वात् विशेषसंबन्धो वाक्येनैव । तस्मात् उभयत्रापि तदन्तर्गतिः शक्या दर्शयितुम्, इति उभयोः श्रुतिवाक्ययोः उभयमुदाहरणम् । इदानीं बलाबलचिन्ता प्रत्यासन्ना, इति उत्तराण्यपि त्रीणि प्रमाणानि स्वरूपेण विनियोगसामर्थ्येन च दर्शयति । तत्र प्रकरणं विनियोगाज्ञानसंशयविपर्ययाणामन्यतमेन उपन्यस्यति स्म । यावच्च अन्यन्न कथ्यते, तावदज्ञानं भवति । अथवा सदपि प्रसङ्गाभावान्नाख्यातं स्यादिति संदेहः । अथवा नैव अक्षरश्रवणतत्सामर्थ्यानुसरणकाङ्क्षित—योग्यार्थ—पदान्तरसंनिधानेभ्यः अन्यः शब्दप्रकारोऽस्ति । तस्मान्न प्रकरणादीनि प्रमाणान्तराणि । इति प्राप्ते, अभिधीयते । '**अविच्छिन्ने कथम्भावे यत् प्रधानस्य पठ्यते । अनिर्ज्ञातफलं कर्म, तस्य प्रकरणाङ्गता ॥**' दर्शपूर्णमासाभ्यां स्वर्गं साधयेत् । कथम् ? इत्येतस्यामाकाङ्क्षायां अविच्छिन्नायां अश्रुतप्रयोजनानि कर्माणि पठ्यन्ते 'समिधो यजति' 'तनूनपातं यजति' इत्येवमादीनि । ततश्च दर्शपूर्णमासयोः कुतश्चित् अनुग्रहसिद्ध्या भवितव्यम् । प्रयाजादीनां च केन चित् साध्येन (भवितव्यम्) । न च दर्शपूर्णमासयोः सिद्धमुपकारं स्वपदस्ववाक्यस्वप्रकरणप्रकरणान्तरेषु प्रत्यक्षादिपञ्चकेन (प्रत्यक्षानुमानोपमानशब्दानुपलब्धिभिः) प्रत्यक्षादिपञ्चकावगतेन वा (वैदिक—)शब्देन उपलभामहे । तथा प्रयाजादीनां अवश्यं चोभयेनापि कुतश्चित् भवितव्यम् । यदि तु केन चित्प्रकारेण नावगमिष्यामः, ततो नास्तीत्यवगमिष्यामः । अस्ति च प्रमाणं प्रकरणम् । नहि अत्यन्तसंनिकर्ष एवैकं संबन्धकारणम् । यथायथा हि संनिकृष्टं न लभ्यते, तथा तथा विप्रकृष्टे वेदशक्तिः संचरति । तदिह उपकारककल्पनाप्रमाणं संनिकृष्टमलब्ध्वा विप्रकृष्टमपि अनुज्ञातं इत्युभयाकाङ्क्षावशेनेव विज्ञायते 'यं दर्शपूर्णमासौ उपकारमाकाङ्क्षतः, स नूनमेभिः प्रयाजादिभिः क्रियते । यच्च प्रयाजादयः प्रयोजनमपेक्षन्ते, तत् दर्शपूर्णमासोपकारः' इति । नहि उभयोरपि अन्यत् संनिकृष्टतरमस्ति । यच्चान्यत् कल्प्यते, तस्यान्येन सह संबध्य निराकाङ्क्षीभूतस्य नेह संबन्धाकाङ्क्षा विद्यते । तेन न प्रयाजादीनां विश्वजिदादिवत् फलकल्पनम् । नापि दर्शपूर्णमासफलानुषङ्गः । उभयाकाङ्क्षालक्षणसंबन्धाभावे हि अन्यतराकाङ्क्षालक्षणः संबन्धो गृह्यते, न संभवे । तस्मात् नष्टाश्वदग्धरथवदेव परस्परनियमः सिद्धः । असंयुक्तग्रहणं किमर्थम् ? श्रुतिलिङ्गवाक्यैः संयुक्तानां द्वित्वबहुत्वयुक्तप्रतिपद्विधानपूषादिशब्दतच्छेषाणां प्रकरणविनियोगनिवृत्त्यर्थम् । प्रकरणविरोधिना वा असंयुक्तमिति द्रष्टव्यम् । अविरोधिसंयुक्तानां 'व्रीहीन् प्रोक्षति' 'बर्हिर्देवसदनं दामि' 'अरुणया क्रीणाति' इत्येवमादीनां प्रकरणस्थव्रीहिबर्हिःक्रयैः संबध्यमानानां प्रकरणसमावेशोपपत्तेः । तत्तु सामर्थ्यसिद्धत्वात् सूत्रकारेण नोक्तम् ।

शा— (ननु 'स्वर्गकामो यजेत' इति वाक्यस्य 'स्वर्गकामस्य यागविषयकं कार्यम्' इत्यर्थः । यागस्य च कार्ये विषयत्वं कार्यविशेषणीभूतकृतिविषयत्वमेव । ततश्च यागविषयैव कृतिः शब्दार्थः, न तु यागकरणिका स्वर्गकृतिः । अतः उक्तरीत्या आकाङ्क्षोपपादनमयुक्तम्, इति प्राभाकरानुसारेण आशङ्क्य निरस्यति—) ननु 'यजेत' इति यागविषयैव कृतिः शब्देनोच्यते । (उत्तरं—) किमिदं विषयत्वम् ? साध्यत्वमिति चेत्, न । स्वर्गो ह्यत्र साध्यतया संबध्यते, न यागः । नहि एवं संभवति स्वर्गं कुर्यात् यागमिति । (स्वर्गमिति स्वरीत्योक्तम् । प्राभाकररीत्या तु स्वर्गपदमपूर्वपरम्) । अथ यागविषयया कृत्या स्वर्गं कुर्यादिति, स्यादेवं यदि प्रत्ययेन कृतिद्वयमुपात्तं स्यात् । कुर्यात् इत्येतावत्तु प्रत्ययार्थः । 'कृत्या साधयेत्' इति कृत्यन्तरारोपेण व्याख्यातॄणामर्थकथनमात्रम् । कुर्यात् इत्यस्मिंश्च स्वर्गस्य साध्यत्वात् । न यागस्य साध्यत्वम् । अथ विशेषणत्वं विषयत्वम्, सत्यं विशेषणमेव यागः, केन संबन्धेनेति निरूपयामः । न तावत् नीलोत्पलादिवत् ताद्रूप्येण, यागभावनयोर्भेदात् । अतः कारकत्वेन सोमादिवत् यागस्य क्रियाविशेषणत्वम् । तत्र च साध्यत्वाभावात् साधनतयैव संबन्धः । तेन यागकरणिका स्वर्गकृतिरेव शब्दार्थः, न तु यागानुष्ठानम् । एवं च नाम्ना सामानाधिकरण्यं संभवति, नान्यथा । अतः किंरूपेयं कृतिः इति अस्त्यपेक्षा । तत्र तदाकाङ्क्षाऽनुवृत्तौ 'समिधो जयति' इति वचनात् एवं ज्ञायते 'अयमसौ व्यापारः, येन यागात् स्वर्गो भवति' इति । संभवति च समिदादिक्रियाणां यागविषयत्वमदृष्टद्वारम्, अवघातादीनां तु दृष्टद्वारम् । अननुष्ठितश्च यागः असत्त्वान्न फलं साधयितुं क्षमः, इत्यर्थात् यागानुष्ठानं गम्यते, न शब्दात् । तेनायं वाक्यार्थः 'यागेन स्वर्गं कुर्यात्' । कथं केन प्रकारेण (व्यापारेण) यागात् स्वर्गो भवतीति, तत्राह 'समिधो यजति, व्रीहीनवहन्ति' इत्यादि । तदयमर्थो भवति, समिदादिभिः अदृष्टद्वारम्, अवघातादिभिश्च द्रव्यदेवतासंस्कारद्वारम्, द्रव्यदेवतेन च

स्वरूपसंपादनेन यागे व्याप्रियेत। एवंभूतोऽसौ व्यापारः, येन यागात् स्वर्गो भवति, यागः फलारम्भस्याभिमुखो भवति। कार्यारम्भाभिमुख्यमेवोपकारः, इति समिदादेः क्रतूपकारः फलम्। (प्राभाकरः–) ननु एवं समिदादिभिः अदृष्टं कुर्यात् इत्यत्रापि क्रियाविशेषापरिज्ञानात् आकाङ्क्षा स्यात्। (उत्तरं–) कस्य चैतदनिष्टम्। अत एव अवान्तर-प्रकरणमिष्यते। ननु एवं (प्रयाजादिषु देवताराहित्यात्) सौमिकधर्मातिदेशः स्यात्। (तत्राह–) भवन्मते वा पितृयज्ञस्य साधिकारस्य किमिति सौमिकधर्मातिदेशो न भवति? वाचनिककालबाधप्रसङ्गात् इति चेत्, इहापि समानम्। अपि च सती अप्याकाङ्क्षा (निवर्तते इत्युत्तरेणान्वयोऽस्य), वाचनिकेन जौहवाद्यादिद्रव्येण तत्संस्कारैश्च, मान्त्रवर्णिक्या च देवतया, वेदिबर्हिरग्नी-ध्मादिभिः तत्संस्कारैश्च अङ्गप्रधानसाधारणैः, 'अभि-क्रामं जुहोति' 'समानत्र (समाने प्रदेशे) होतव्याः' इत्यादिभिश्च वाचनिकैरङ्गैः निर्वर्तते। इति न सौमिक-धर्मातिदेशादि आशङ्कनीयम्। सर्वे हि अन्वन्वा-धानादयः संनिपातिनः अङ्गप्रधानसाधारणाः, तेन उपांशु-याजवत् प्रयाजादयोऽपि कृत्स्नविधानाः। न च कृत्स्न-विधानेषु अतिदेशोऽस्ति। संनिपत्योपकारकसामग्री तु कृत्स्नविधानता अष्टमे वक्ष्यते ('प्रवृत्तत्वादिष्टेः०' ८।१।३।३)। अत एव हि पितृयज्ञस्य अपूर्वत्वम्। अन्यथा साधिकारत्वात् दुर्वारः सोमधर्मातिदेशः स्यात्। तस्मा-दस्ति इतिकर्तव्यताऽऽकाङ्क्षा। तदनुवृत्तिश्च प्रकरणम्। 'अतः प्रधानवाक्यस्य प्रकाराकाङ्क्षतावशात्। फलाकाङ्क्षं प्रयाजादि तदङ्गत्वं प्रपद्यते॥'

सोम—**सूत्रार्थस्तु**-श्रुत्याद्यसंयुक्तमपि प्रकरणात् विनियोज्यम्, प्रधानस्य इतिकर्तव्यताऽऽकाङ्क्षित्वात् प्रकरणसद्भावादिति।

वि– 'न क्रत्वङ्गं प्रयाजादि क्रत्वङ्गं वा, न चाङ्गता। प्रक्रियाया अमानत्वान्नैराकाङ्क्ष्येण वाक्ययोः॥, प्रयाजादेः फलेऽपेक्षा कथम्भावेऽपि च क्रतोः। तेन प्रकरणाम्नानं तस्मादङ्गाङ्गिता तयोः॥'

भाट्ट— एवं वाक्ये निरूपिते प्रकरणमिदानीं निरूप्यते। **ननु** किमिदं प्रकरणं नाम? न तावत् संनिधिमात्रम्, गोदोहनादेरपि दर्शाङ्गत्वापत्तेः। अथ साकाङ्क्षत्वमात्रम्, विकृतेरपि प्राकृताङ्गविषये तदापत्तेः। नापि साकाङ्क्षत्वे सति संनिधिपठितत्वम्, उपहोमादावपि तदापत्तेः। अथ उभयाकाङ्क्षत्वविशिष्टं तत्, सिद्धरूपाणां मन्त्रादीनामपि तदापत्तेः। प्रयाजादीनामनाकाङ्क्षितत्वेन तदनापत्तेश्च। अथ दर्शपूर्णमासयोः प्रकारान्तरेण प्रयाजा-नाकाङ्क्षत्वेऽपि इतिकर्तव्यतात्वेन तदाकाङ्क्षोपपत्तेर्युक्तं प्रकरणमिति चेत्, किमिदं इतिकर्तव्यतात्वं नाम? न तावत्फले अपूर्वे वा सहकारित्वम्, प्राधान्यापत्तेः, प्रयाजा-दिवदाग्नेयस्यापि विकृतावतिदेशापत्तेश्च। नापि करण-जनकत्वम्, प्रयाजादिषु बाधात्। इति **चेन्न**। **संनि-**हितस्य फलवतोऽनवगताङ्गताकपदार्थविषये इतिकर्तव्यता-त्वेनापेक्षणस्यैव प्रकरणपदार्थत्वात्। अत्रासंनिहितज्योति-ष्टोमाङ्गत्वस्य प्रयाजादौ वारणाय आद्यं विशेषणम्। अनु-याजाद्यङ्गत्ववारणाय फलवतः इति द्वितीयम्। प्रोक्षणादेः श्रुत्यादित्रयविनियुक्तस्य प्रकरणविषयत्ववारणाय तृतीयम्। सिद्धरूपस्य लिङ्गाविनियुक्तमन्त्रादेः प्रकरणाविषयत्व-सिद्ध्यर्थं इतिकर्तव्यतात्वेनेति चतुर्थम्। सर्वत्र ह्यशक्तस्य करणत्वायोगात् शक्तिः करणनिष्ठा समस्तीति निर्विवादम्। सा च कारणताऽवच्छेदिका कारणतारूपा वा इत्यन्य-देतत्। तस्याश्च जन्यवृत्तित्वेन जन्यत्वमेवेत्युत्सर्गः। सामग्र्यलाभे परं अनादितेत्यविवादः। तदत्र तत्सामग्र्य-पेक्षैव इतिकर्तव्यतापेक्षा। तया च संनिहितप्रयाजादे-रङ्गत्वबोधः, प्रयाजादेस्तत्सामग्रीत्वात्। सिद्धरूपस्य च द्रव्यादेर्व्यापारावेशं विना तत्सामग्रीत्वासंभवात् तया अग्रहणम्। अत्र च प्रधानगतेतिकर्तव्यताकाङ्क्षायाः प्रयाजादिगत-प्रयोजनाकाङ्क्षासहकृतायाः तत्तद्वाक्यस्य स्वस्वावान्तरवाक्यार्थे समाप्तस्यापि महावाक्यैकदेशत्वरूप-पारिभाषिकपदसंनिध्याख्यवाक्यकल्पनया निरुक्तपदानां च स्वार्थोपस्थितिद्वारा तन्निष्ठाश्रुतपदान्तरकल्पनाऽनुकूल-योग्यतारूपलिङ्गकल्पनया च 'समिधो यजति इत्थं दर्श-पूर्णमासाभ्यां स्वर्गकामो यजेत' इति अश्रुतेतिकर्तव्यता-त्ववाचिपदरूपश्रुतिकल्पनया च इतिकर्तव्यतात्वरूपकृति-कारकत्वे प्रामाण्यम्। संभवति हि प्रयाजादीनामपि

उक्तशक्तिजनकत्वेन भावनायामन्वयः। तस्मात् सिद्धं प्रकरणं नाम चतुर्थं प्रमाणम्।

यत्तु अत्र **पार्थसारथिना** अननुगृहीतस्यापि कर्मादेः संयोगविभागारम्भकत्वदर्शनात् नेदं प्रकरणम्, अपि तु व्यापारसामान्यस्य आख्यातार्थत्वमङ्गीकृत्य तद्विशेषापेक्षै-वेतिकर्तव्यतापेक्षा, तयैव च प्रयाजादीनां तत्त्वेनान्वयः इति, तदेव च प्रकरणमित्युक्तम्। **तन्न**। तथात्वे निरुक्त-प्रकरणस्य तदघटिताङ्गत्वबोधकत्वानुपपत्तेः, प्रयाजादे-र्भावनात्वे तस्यैव फलसंबन्धापत्तेश्च। अस्मन्मते तु यत्नस्यैव भावनात्वात्तस्य च यागजनकत्वेनैव कृतार्थत्वान्न तदापत्तिरिति वैषम्यम्। किंच एवं प्रधानस्य स्वतो निराकाङ्क्षस्य अन्यतराकाङ्क्षयैव प्रकृतौ प्रयाजाद्यङ्गत्वा-पत्तिः, विकृतौ च भावनाया विशेषापेक्षायामक्लृप्तोप-कारैरपि संनिहितैरुपहोमैरेव निराकाङ्क्षत्वोपपत्तेर्नातिदेश-कल्पनाऽऽपत्तिः इत्यादि कौस्तुभे विस्तरः।

मण्डन— 'प्रमा प्रकरणं भवेत्।' (प्रमा प्रमा-णम्।)

शंकर— 'प्रक्रिया विनियोक्त्र्यपि।' (प्रक्रिया प्रकरणमपि विनियोक्त्री इत्यन्वयः।)।

* व्यापारानाविष्टस्य द्रव्यस्य तद्विशेषत्वायोगात् न तत्त्वेन ग्रहणं इति विशेषोऽपि **प्रकरणाधिकरणे** निरूप-यिष्यते। **कौ.** २।१।२।५ पृ. ४३–४४. * श्रुत्यादि-संयुक्तानामपि प्रकरणविनियोज्यत्वं प्रकरणाधिकरणे एवोक्तं तत एवावगन्तव्यम्। **सोम.** ९।१।१.

* भावनायाः स्वजन्यकरणेन फले जन्यमाने अनु-ग्राहकापेक्षायां **प्रकरणाधिकरणन्यायेन** प्रयाजादि इति-कर्तव्यतात्वेन अन्वीयते। **कौ.** २।१।२।५ पृ. ४३.

* **प्रकरणाधीतेन** अनारभ्याधीतं बाध्यते, अप्राप्त-बाधः। **वा.** ३।३।७।१४ पृ. ८६०.

* **प्रकरणाधीतसामिधेनीपाञ्चदश्य**– अनारभ्या-धीतसाप्तदश्यबलन्यायः। **वा.** ३।६।२।९.

* **गोदोहनेन** पशुकामस्य इति षष्ठी संबन्धमात्र-वाचिनी, हीषादिन्यायेन सर्वकामवाक्यप्राप्तपशुप्रयोजक-प्रणयनजनकत्वसंबन्धेनैव **प्रकरणानुरोधेन** पश्वुद्देशेन गोदोहनं विधीयते। इति प्राप्ते, दुर्बलप्रकरणानुरोधेन परम्परासंबन्धाङ्गीकारे प्रमाणाभावात् साक्षादेवोद्देश्यत्वं पशूनाम्। **भाट्ट.** ४।१।२ वर्णकं ३.

* **प्रकरणान्तरं** अनुपादेयसंनिधिसचिवः असंनिधिः इति के चित्। तन्न 'वारुण्या निष्कासेन तुषैश्चावभृथं यन्ति' इत्यत्र अव्याप्तेः। किन्तु 'विधेः उपपदार्थ-संक्रमासंभवेन सहकृतः असंनिधिः' इति। नात्र असंनिधिरिव स्वरूपतः अनुपादेयसंनिधिः प्रवेश्यः किन्तु तत्कार्यं विधेः उपपदार्थसंक्रमासंभवः। स च यथा अनुपादेयसंनिधिना भवति, एवं उपादेयद्रव्यसंनिधि-नापि भवति। **बाल.** पृ. ८८, * प्रकरणान्तरं कर्मभेदकं वैदिकोपदेशरूपं शब्दप्रमाणम्। पृ. ८. * प्रकरणान्तरं धर्मभेदे प्रमाणम्। **मणि.** पृ. १३. * प्रकरणान्तरं नित्याग्निहोत्रात् मासाग्निहोत्रस्य भेदे हेतुः। **वि.** ३।३। ११. * **प्रकरणान्तरस्य** भेदकत्वे फलादि अनुपादेय-मपि सहकारि, न तन्निरपेक्षं प्रकरणान्तरं भेदकम्। **सु.** पृ. ९५६. * **प्रकरणान्तरे** प्रयोजनान्यत्वं इत्यधिकरणे कर्मभेदप्रतिपादनम्। **आभरणं.** ३।३।१४।२५ ब्र. सू.

प्रकरणान्तरे प्रयोजनान्यत्वम्। २।३।११। २४॥

कुण्डपायिनामयने 'मासमग्निहोत्रं जुहोति' इति श्रूयते। अत्र नित्येऽग्निहोत्रे मासरूपः कालो विधीयते इति पूर्वपक्षे सिद्धान्तमाह। नित्याग्निहोत्रप्रकरणात् अन्यत् कुण्डपायिनामयनस्य प्रकरणं प्रकरणान्तरम्। तत्र प्रकरणान्तरे पठ्यमाने मासाग्निहोत्रवाक्ये प्रयो-जनान्यत्वम्। प्रयुज्यते अनुष्ठीयते इति प्रयोजनं कर्म। प्रयोजनस्य अन्यत्वं प्रयोजनान्यत्वम्। अप्रकृताभि-धानात् मासाग्निहोत्रस्य नित्याग्निहोत्रात् कर्मान्तरत्वमिति सिद्धान्तः। मासाग्निहोत्रवाक्ये तु मासविशिष्टं अग्नि-होत्रसंज्ञकं कर्मान्तरमेव विधीयते। अथवा पूर्वकर्मा-संनिधानापरपर्याये प्रकरणान्तरे सति मासाग्निहोत्रादिविधेः अप्रकृतविषयतया प्रयोजनान्यत्वं कर्मभेदः सिध्यति इत्यर्थः। **के.**

प्रकरणान्तरे प्रयोजनान्यत्वम्। २।३।११। २४॥

कौण्डपायिनामयने श्रूयते 'मासमग्निहोत्रं जुहोति।

मासं दर्शपूर्णमासाभ्यां यजेत' इत्येवमादि। तत्र संदिह्यते अग्निहोत्रे नियतयोश्च दर्शपूर्णमासयोः मासो विधीयते कालः, अथ नियतात् अग्निहोत्रात् नियताभ्यां च दर्शपूर्णमासाभ्यां कर्मान्तरं इति। पञ्चसु भेदप्रमाणेषु पर्यवसितेषु इदानीमवसरप्राप्तः प्रकरणान्तरनिबन्धनः कर्मभेदः प्रतिपाद्यते। अत्रायमभिप्रायः पूर्वपक्षिणः— अग्निहोत्रदर्शपूर्णमासनाम्नोः प्रसिद्धत्वात् समभिव्याहृतस्य जुहोतेर्यजतेश्च तदर्थत्वे सेचनवत् प्रकरणान्तरे श्रुतत्वेन अर्थान्तरविषयत्वम्। लोकप्रसिद्धार्थानां अङ्गदादिशब्दानामपि वेदे अर्थान्तरप्रसङ्गात्। तेन यत्र लोकप्रसिद्धार्थस्य प्रत्यभिज्ञायमानस्य वेदे नार्थान्तरत्वम्, तत्र वेदे एव प्रकरणान्तरमात्रेण अर्थान्तरमिति। कुत एतत्? तदुक्तम् '**अग्निहोत्रादिशब्देन पूर्वं कर्मावबोधितम्। न विप्रकर्षमात्रेण भेदरूपं प्रपद्यते॥**' इति (वा. पृ. ६१३)। अतः पूर्वस्मिन्नेव कर्मणि जुहोतियजतिभ्यामनूदिते वाक्येन प्रकरणं बाधित्वा मासाख्यो गुणो विधीयते। **न च** यावज्जीवश्रुतिविरोधात् मासरूपः कालो विधातुं न शक्यते इति **वाच्यम्**। काम्यप्रयोगविषयत्वेन अविरोधात्। अथवा यावज्जीवाधिकारेऽपि समर्थासमर्थविषयतयाऽपि व्यवस्थितविकल्पेनैव उपपत्तेः।

अत्रैके सिद्धान्तमेवमुपवर्णयन्ति 'उपसद्भिश्चरित्वा मासमग्निहोत्रं जुह्वति' इति वाक्यमिदम्। अत्र उपसदुत्तरकालत्वं कर्तृबहुत्वं मासश्चेत्यनेके गुणाः श्रूयन्ते। न चैते गुणा नैयमिकाग्निहोत्रे सन्ति। न च प्राप्ते कर्मणि अनेकगुणविधानं संभवतीति अनेकगुणविशिष्टकर्मान्तरविधानमेवैतत्। **न चैवं** सति गुणादेव भेदः, न प्रकरणान्तरादिति **वाच्यम्**। यतः अप्रकृतत्वं हि प्रकरणान्तरत्वम्। अप्रकृतत्वं च बुद्धिविच्छेदलक्षणम्। यदत्र नाम्नो बुद्धिसंनिधापकत्वम्, तत् प्रतिपक्षभूतानेकश्रुतेर्निरस्तम्। निरस्ते च तस्मिन् प्रतिपक्षभूतं प्रकरणान्तरमेव भेदकमिति। **न च** 'मासं दर्शपूर्णमासाभ्याम्' इत्यत्र अनेकगुणाभावात् नायं सिद्धान्तस्तस्यापीति **वाच्यम्**। यतो नात्र पूर्वपक्षसिद्धान्तयोर्मासरूपकालान्वयो होमस्य दर्शपूर्णमासयोर्वा। पूर्वत्र सायंप्रातःकालावरुद्धत्वात् उत्तरत्र पौर्णमास्यमावास्याकालावरुद्धत्वाच्च कालान्तरापेक्षाभावात्। किं तर्हि? उपसदन्वयः। तेन 'मासं दर्शपूर्णमासाभ्याम्' इत्यत्रापि अनुषङ्गेण उपसदन्वयित्वादेवमन्वयः मासमुपसद्भिश्चरित्वाऽग्निहोत्रं जुह्वति, मासमुपसद्भिश्चरित्वा दर्शपूर्णमासाभ्यां यजेत इति। तेनोदाहरणद्वयेऽपि प्रकरणान्तरमेव भेदकमिति। न च वाच्यं एवं सति गुणादपि भेदसिद्धेः किं प्रकरणान्तरेणेति। यतो नानधिगतगन्तृ प्रमाणम्, किन्तु अनपेक्षम्। अस्ति चानेकगुणश्रुत्यभावेऽपि 'फलं चाकर्मसंनिधौ' इत्यत्र अप्रकृतत्वमात्रेण कर्मभेददर्शनम्। अतः प्रमाणान्तरं सिद्धमिति।

तदेतद्बालजल्पितम्, एवं सति गुणस्यैव भेदकत्वापत्तेः। तथाहि 'आग्नेयोऽष्टाकपालो भवति' इत्यादिषु प्राप्ते कर्मणि अनेकगुणविधानस्यैव कर्मभेदकत्वं दृष्टम्, न तु बुद्धिविच्छेदकत्वम्। तदत्र प्रतीयमानादृष्टसामर्थ्यपरित्यागेन दृष्टसामर्थ्यकल्पनया बुद्धिविच्छेदमात्रोपक्षीणमनेकगुणविधानं व्यवस्थाप्यमानं अनात्मवतामेव मनसि परं शोभते। किञ्च यत्र प्रकरणसंनिहितेऽपि कर्मणि अनेकगुणविधानस्य भेदकत्वम्, तत्र जघन्यनामधेयमात्रोपनीते कर्मणि गुणस्य बुद्धिविछेदमात्रहेतुत्वं न कर्मभेदकत्वमिति हास्यास्पदमेव। किंच कथं 'मासं दर्शपूर्णमासाभ्यां यजेत' इत्यत्र अनुषङ्गेणोपसत्संबन्धः, आकाङ्क्षाया अभावात्। न चोत्पत्तिशिष्टपौर्णमास्यमावास्याकालनिराकाङ्क्षे कर्मणि मासाख्यकालासंबन्धात् मासपदाकाङ्क्षया संबन्धः, यतस्तिथ्यन्तरनियमः तिथ्यन्तराकाङ्क्षानिवर्तको भवति। ननु मासादितद्विजातीयकालाकाङ्क्षानिवर्तकत्वेन 'मासं दर्शपूर्णमासाभ्यां यजेत' इत्यन्वयोपपत्तेः अनुषङ्गाभावेन अनेकगुणविधानाभावात् नोदाहरणत्वं दर्शपूर्णमासवाक्यस्येति। न च प्रवेशासंभवोऽपि, क्रियाद्वययोगात्, क्त्वाश्रुत्या उपसद्विनियोगात्, जुहोतिना च मासविधानादिति। किञ्च भाष्यकारश्रुतमपि एकगुणफलमनादृत्य 'मासमग्निहोत्रं जुह्वति' इत्येतावन्मात्रमुदाहृतत्वात्, तदपि नाकलितं भाष्यं निद्रालुनेति यत्किञ्चिदेतदिति यथावार्तिकमेव सिद्धान्तोऽभिधीयते।

सर्वत्र द्विविधः खलु कर्मणः संबन्धी गुणो भवति उपादेयोऽनुपादेयश्च। तत्र उपादेयस्य पूर्वावगतयथा-

सिद्धयच्छब्दोपबद्धोद्देश्यकर्मतन्त्रतया विधियोग्यत्वात् दूरस्थकर्मानुवादेनापि यत्र कर्म तत्रायं कर्तव्यः इत्येषा वचनव्यक्तिः। अनुपादेयस्य स्वतन्त्रस्य यथासिद्धस्य इतरसंबन्धार्थं यच्छब्देनोपादानात् उद्देश्यत्वम्। तेनैषा वचनव्यक्तिः यत्रैषः, तत्र कर्म कर्तव्यमिति। तदुक्तम्— 'निमित्तफलसंस्कार्यकालदेशप्रभेदतः। गुणकर्मविधानार्थोऽनुपादेयतया स्मृतः॥' स चायमनुपादेयं प्रति कर्मविधिः देशकालौ प्रति प्रयोज्यत्वेन तयोः प्रयोगावच्छेदकत्वात् प्रयोगावच्छेदकत्वेनैव, यथा संस्कार्ये व्रीह्यादौ अवघातादि विनियुज्यते, यथा वा स्वर्गे दर्शपूर्णमासादि, तयोश्चिकीर्षितत्वेन कर्मण एव तत्र विनियुक्तत्वात्। निमित्तस्य तु विधिमात्रान्वयिनो नियोज्यविशेषणतामात्रम्, न तु कर्मणस्तत्र विनियोगः, कारकत्वेन अनाश्रयणात्, किन्तु तस्मिन् सति कर्तव्यमित्येतावन्मात्रम्। तेन यत्रैष तत्र कर्मेति सप्तम्यपि नाधिकरणपरा, किन्तु उपादेयानुष्ठानस्यानुपादेयतन्त्रतापरैव, फलनिमित्तयोर्व्यभिचारात्। तदेतयोः प्रयोगविनियोगयोः कर्मोत्पत्त्यपेक्षायां यदि तथाभूतस्यैव उत्पत्तिः प्रयोगविनियोगसापेक्षा, तदैकवाक्यता महाप्रकरणे संनिहिता समस्ति, तदा तदेवोत्पन्नं कर्म प्रयुज्यते विनियुज्यते चेत्यकर्मान्तरत्वम्। यथा 'समे दर्शपूर्णमासाभ्यां यजेत, पौर्णमास्यां पौर्णमास्या यजेत' इत्येवमादौ। यदा तु यथाभूतोत्पत्तिः संनिहिता नास्ति, तदा तस्यैवोत्पत्तिपरत्वात् कर्मान्तरत्वम्। न चेह कुण्डपायिनामयने तादृशहोमयागोत्पत्तिः संनिहिता समस्ति, इति कर्मान्तरत्वमेवेति। तदुक्तम्— '**उपादेयो गुणो यत्र भवेत्प्रकरणान्तरे। तत्राकर्मान्तरं युक्तमुद्देश्ये त्वन्यकर्मता॥**' इति (वा. पृ. ६१५)। न च वाच्यं अत्राप्यग्निहोत्रादिनाम्नैव उत्पत्त्युपस्थितेर्न कर्मान्तरत्वमिति। यतो जुह्वतीत्यत्र असत्वभूतः पूर्वापरीभावापन्नो धात्वर्थः प्रतीयते। नामपदात्तु लिङ्गसंख्यायोग्यः सिद्धरूपः। अतो नानेन उत्पत्तिप्रत्यभिज्ञानम्। तदुक्तम्— '**धात्वर्थोऽपि यथाख्यातेऽसत्त्वभूतः प्रतीयते। सत्त्वाभिधायिना नाम्ना तादृङ्नैवोपनीयते॥**' इति (वा. पृ. ६१६)। न च नामसमभिव्याहृतस्य आख्यातस्य गुणभूतनामपारतन्त्र्यभावः, अनुपादेयकालानुरोधेन प्रकृतानुपस्थापकत्वादिति। किञ्च, नहि एकप्रसरयोर्नामाख्यातयोः एकेनोत्पत्त्युपस्थापनं अपरेण प्रयोगविनियोगयोरन्यतरविधानमिति प्रयोजनभेदः संभवति, किन्त्वेकार्थत्वमेव। तत्रापि हि आख्यातस्य वाक्यार्थीभूतभावनाऽभिधानेन प्राधान्यात् नाम्नस्तत्परतन्त्रत्वमेव। तदत्र विध्याख्यातसमभिव्याहृतस्य नाम्नो यथाविध्येव अर्थस्तावदवश्यं वर्णनीयः। विधेश्च प्रयोगपरत्वान्नाम्नोऽपि प्रयोगार्थत्वम्। न च तस्यैव सकृदुच्चरितस्य उत्पत्त्यर्थत्वमपीति उत्पत्तिविधिकल्पनया कर्मान्तरम्। 'पौर्णमास्यां पौर्णमास्या यजेत' इत्यादौ पुनरुत्पत्तेः प्रकरणप्रत्यभिज्ञानात् नामपदस्य प्रयोगैक्यपरत्वेन उभयपरत्वाभावान्नायं दोष इति।

यत्र तु प्रकरणान्तरेऽपि 'अतिरात्रश्चतुर्विंशः, प्रायणीयमहः, चत्वारोऽभिप्लवाः, षडहाः' इत्याद्यभिधाय 'ऋद्धिकामाः सत्रमासीरन्' इति श्रूयते, तत्र अतिरात्रादिशब्दानां पूर्वकर्मोपस्थापकत्वम्। अत्र सर्वत्र सर्वस्य विनियोजकाख्यातैकवाक्यतापन्नस्य पूर्वोपस्थितकर्मणो विनियोजकत्वमित्युपस्थापकविनियोजकशब्दभेदात् कर्मान्तरत्वम्। यदि तु तत्रापि अनुबन्धभूतयजतिधात्वर्थः श्रूयेत, तदा असत्त्वभूतत्वात् तस्यातिरात्रादिनामभिः प्रत्यभिज्ञानाभावात्तत्रापि स्यादेव कर्मान्तरत्वम्। तत्र आसीरन् उपेयुः इत्यत्र अनुतिष्ठेयुरित्यवगम्यमानकर्मान्तरम्, तथापि तु भावनोपस्थापकत्वाभावात् प्रकरणान्तरन्यायेन भावना भिन्नैव। सा च नामोपस्थापितपूर्वकर्मणैव विशेषिता फलसंबन्धिनीति निर्णीयते। तदुक्तम्— '**भिद्यते भावनामात्रं धात्वर्थो नायजिश्रुतेः। नाम्ना हि तदुपादानमासनोपायिचोदिते॥**' इति (वा. पृ. ६१७)। 'सर्वेभ्यो दर्शपूर्णमासौ' 'सर्वेभ्यो ज्योतिष्टोमः' इत्यत्र अनारभ्याधीतत्वेऽपि अनुपादेयं प्रति उपादानेऽपि न कर्मान्तरत्वम्। एवं हि श्रूयते—'एकस्मै वा अन्या इष्टयः कामायाह्रियन्ते, सर्वेभ्यो दर्शपूर्णमासौ, एकस्मै वा अन्ये यज्ञक्रतवः कामायाह्रियन्ते सर्वेभ्यो ज्योतिष्टोमः' इति। अत्र च अन्यशब्दार्थस्यैव पूर्वावगतप्रतियोग्यन्तरनिरूपणीयत्वात् भाविविनियोगसंदर्शनेन दर्शपूर्णमासज्योतिष्टोमापेक्ष एवायमन्यपदार्थ इति निश्चीयते। न च विनियोगवाक्यगतदर्शपूर्णमासापेक्ष एवायमन्य-

शब्दः, समानरूपस्यैवान्यशब्दार्थप्रतियोगित्वात् । न हि अन्यो ब्राह्मण इत्युक्ते प्रतियोगी शूद्रः प्रकाशते । किं तर्हि ? ब्राह्मण एव । तद्वदत्रापि अन्या इष्टयः अन्ये यज्ञक्रतव इति पूर्वावगतोपादानात्, पूर्वावगतप्रतियोगिनिरूपणीय एवायमन्यपदार्थः । तेन अन्यशब्दबलेनैव दर्शपूर्णमासज्योतिष्टोमोत्पत्तेरुपस्थितत्वात् 'सर्वेभ्यो दर्शपूर्णमासौ' 'सर्वेभ्यो ज्योतिष्टोमः' इत्येतयोः तत्तत्क्रतुफलविनियोगपरत्वेऽपि उत्पत्त्यन्तराक्षेपपरत्वाभावात् न कर्मान्तरत्वमिति । 'य इष्ट्या पशुना सोमेनाग्रयणेन वा यजेत, सोऽमावास्यायां पौर्णमास्यां वा' इत्यत्रापि यच्छब्दोपबद्धयजिनैव पूर्वोत्पत्त्युपस्थापनादेव अकर्मान्तरत्वम् । 'दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत' इत्यत्र तु स्वयमेव वार्तिककारपादैः ज्योतिष्टोमप्रकरणे श्रूयते इत्यभिधानात् प्रकरणान्तरेण भेदो नादाङ्कनीयः (?) । एवंकृते नाख्यातकालीनपूर्वकर्मावगतिः कृताऽपि नामधेयं बाधितुमुत्सहते । तस्मादनुपादेयं प्रति उपादानबुद्धिविच्छेदाभ्यां विशिष्टकर्मोत्पत्तेर्भेदसिद्धिः । अग्निहोत्रादिनामधेयं तु नाम्ना तद्धर्मातिदेशार्थं भाविगुणयोगनिरीक्षणेन गौणमेवाध्ययनविधिना स्वीकृतमिति न किञ्चिदनुपपन्नमिति ।

प्रयोजनम्— पूर्वपक्षे प्रकृतिभूतस्यैव अग्निहोत्रस्य प्रकृतयोश्च दर्शपूर्णमासयोः मासमनुष्ठानम् । सिद्धान्ते तु शब्दप्रयोगे मासविशिष्टाग्निहोत्रादिकर्मान्तरानुष्ठानमिति । **सूत्रं तु—** प्रकरणान्तरे प्रकरणान्तरनिमित्तकं प्रयोजनान्यत्वं कर्मान्यत्वमित्यर्थः । **तौता.**

* ननु अविपरिवर्तमानक्रत्वन्तरोद्देशेन न कालो विधातुं शक्यते '**प्रकरणान्तरे प्रयोजनान्यत्वम्**' इति न्यायात् सत्यम्, इह तु 'एष वाव प्रथमो यज्ञो यज्ञानाम्' इति यज्ञशब्देन विपरिवर्तमाना यज्ञाः अग्निष्टोमोत्तरकाले विधीयन्त इत्यदोषः । **रत्न.** ५।३।१४। ३९–४२. * यदि गृहमेधीये दार्शपौर्णमासिको विध्यन्तो न स्यात् तथा सति 'प्रकरणान्तरे॰' इत्यनेन न्यायेन कर्मान्तरं स्यात् । **टुप्.** १०।७।९।२७.

* प्रकरणान्तरे श्रूयमाणं वाक्यं यस्य प्रकरणे, तस्य वाचकं भवितुमर्हति । **भा.** २।३।११।२४ पृ. ६१४.

* **प्रकरणान्तराधिकरणम्** । २।३।११।२४. 'प्रकरणान्तरन्यायः' इत्यत्र द्रष्टव्यम् । * **प्रकरणान्तराधिकरणे** 'भावना त्वनुपस्थानाद् भिद्यमाना न वार्यते ।' ('भिद्यमानाऽवधार्यते' इति मूले पाठः । २।३।११।२४ पृ. ६१६) इति वार्तिकोक्तरीत्या भावनाभेदव्युत्पादनमिति पक्षः । **सोम.** ७।३।१. * प्रकरणान्तराधिकरणे वाक्यभेददोषादेव अग्निहोत्रपदस्य **गौणत्ववर्णनम्** । **वाक्यार्थ.** पृ. २०. * यजेत इति प्रत्ययाभिहितसर्वभावनोद्देशेन विविदिषावाक्यवत् वाशब्दार्थविशिष्टकालविधेः **प्रकरणान्तराधिकरणे** व्युत्पादितत्वेन ('य इष्ट्या पशुना सोमेन वा यजेत सोऽमावास्यायाम्') इति इष्ट्यादिपदानामनुवादमात्रता । **कौ.** ३।३।१।२ पृ. ३१५–३१६. * वरुणप्रघासेषु अवभृथः सौमिकादवभृथात् कर्मान्तरम्, तुषांशे अर्थकर्म, निष्कासांशे च प्रतिपत्तिः, इत्युक्तं कौस्तुभे प्रकरणान्तराधिकरणे । **भाट्ट.** ११।२।१४.

* अष्टरात्रे प्रथमाहे विश्वजिति **प्रकरणान्तराधिकरणोक्तन्यायेन** कर्मान्तरे नामातिदेशेन एकाहकाण्डपठितविश्वजितो धर्मः सर्वस्वं दक्षिणा । **भाट्ट.** ६।७।८.

* **प्रकरणान्तराधिकरणपर्यालोचनया** (२।३।११।२४) अनुपादेयानि पञ्चैव इति प्रतिभाति । यजमानस्य आत्मीयमेकत्वं ब्राह्मण्यादिजातिरपि च अनुपादेयमेव । **बाल.** पृ. ९७.

* **प्रकरणान्तरनिष्कर्षनिरूपणम्** । प्रकरणान्तराधिकरणे (२।३।११।२४) पञ्चविधं अनुपादेयमुक्तं देशः, कालः, फलम्, निमित्तम्, संस्कार्यं चेति । 'अनुपादेयसंनिधिसचिवश्च असंनिधिः प्रकरणान्तरम्' इति प्रकरणान्तरलक्षणमुक्तं सर्वग्रन्थेषु । तच्च 'वारुण्या निष्कासेन तुषैश्चावभृथं यन्ति' इत्यत्राख्यातम् । तत्र हि प्रकरणान्तरेणैव भेद उक्तो **वार्तिके** प्रकरणान्तराधिकरणे एव । **शास्त्रदीपिकायामपि** सप्तमे 'तथाऽवभृथः सोमात्' इत्यधिकरणे (७।३।४।१३–१६) उक्तं 'यन्ति' इत्यनेन प्रकरणान्तरन्यायेन कर्मान्तरं विधीयते इति । अत्र **भट्टसोमेश्वरः** समादधे– 'अस्त्येवोक्तलक्षणं तत्र वारुणीनिष्कासस्य तुषाणां च भूतोपयोगित्वेन

संस्कार्यतया अनुपादेयत्वात्' इति । तदुक्तं तेन 'तृतीयया तुषनिष्कासस्य (तुषशब्दो नास्ति सु.) साधनत्वोक्तावपि निष्कासस्य वारुण्यामिक्षाशेषत्वात् (वारुण्यामिक्षायागोपयुक्तद्रव्यशेषत्वात् इति सु.) तुषाणां च आग्नेयादियागशेषत्वात् (आग्नेययागाङ्गद्रव्यशेषत्वात् इति सु.) 'यत् किञ्चित् सोमलिप्तं स्यात्' (स्याच्छब्दो नास्ति सु.) तेनावभृथं यन्ति' इतिवत् 'प्रयाजशेषेण हवींष्यभिघारयति' इतिवच्च 'प्रतिपाद्यत्वरूपसंस्कार्यत्वाविरोधः' इति (सु. पृ. ९५४) । तन्मन्दम् । अधिकरणविरोधात् । एकादशे हि (११।२।१५।६३–६५) अस्मिन्नेव वाक्ये सवनीयवत् प्रचारविप्रकर्षं पूर्वपक्षं विधाऽन्तरेण निरस्य, प्रतिपत्तिः इति पूर्वपक्षान्तरं तुषनिष्कासाख्यसंस्कार्यद्वयोद्देशात् वाक्यभेदापत्तेर्निरस्य अर्थकर्मत्वमेवोक्तम् । अत एव प्रकरणान्तरलक्षणं वाच्यम् । नात्र असंनिधिरिव स्वरूपतः अनुपादेयसंनिधिः प्रवेदयः, किन्तु तत्कार्यं विधेः उपपदार्थसंक्रमासंभवः । स च यथा अनुपादेयसंनिधिना भवति, एवं उपादेयद्वयसंनिधिनाऽपि भवति । तस्मात् 'विधेः उपपदार्थसंक्रमासंभवेन सहकृतः असंनिधिः प्रकरणान्तरम्' इति प्रकरणान्तरलक्षणमभिप्रेतम् । अत एव 'विश्वजिता यजेत' इत्यादौ यत्र उपपदार्थो विधेयो नास्त्येव नामधेयमात्रश्रवणात्, तत्रापि उपपदार्थसंक्रमासंभवसहकृतात् असंनिधेरेव भेदः इत्यवधेयम् । अत एव उद्भिदादौ, नाम्नैव नैवमादीनां भेदः, इति संनिधावेव नाम्ना भेद उक्तः । एवम् 'अथैष ज्योतिः' इत्यादावपि । अग्रमतृतीये च (अधि. २) जनकसप्तरात्रप्रकरणाम्नाते 'चत्वारि त्रिवृन्ति अहानि अग्निष्टोममुखानि' इति वाक्ये चतुःसंख्या–त्रिवृत्त्व–रूपानेकोपादेयगुणश्रवणे तुषनिष्कासवाक्यवत् प्रकरणान्तरन्यायेनैव भेदोऽभ्युपगतः । अत एव च प्रकरणान्तराधिकरणे 'मासमग्निहोत्रं जुहोति' इत्यादौ 'अनुपादेयगुणे वा' इति वाक्ये 'उपसद्भिश्चरित्वा' इति गुणान्तरोपादानात् स्वरूपतः सन्नपि वाक्यभेदः सिद्धान्तसिद्धयनुपयोगित्वात् उपादेयगुणद्वययुक्तवाक्याभिप्रायेण एव सिद्धान्तहेतुतया उक्तो भाष्ये । आचार्यैश्च (पार्थसारथिभिः) मासादिवाक्येष्वेव तस्य सिद्धान्तसिद्धयनुपयोगो दूषितः, न सार्वत्रिकः इति ध्येयम् । **बाल.** पृ. ८८–८९.

☒ प्रकरणान्तरन्यायः । कुण्डपायिनामयने मासाग्निहोत्रादीनां कर्मान्तरत्वम् ॥

प्रकरणान्तरे प्रयोजनान्यत्वम् । २।३।११।२४॥

भाष्यम्— कुण्डपायिनामयने श्रूयते 'मासमग्निहोत्रं जुहोति' 'मासं दर्शपूर्णमासाभ्यां यजते' इत्येवमादि । तत्र संदिह्यते किं नियतेऽग्निहोत्रे नियतयोश्च दर्शपूर्णमासयोर्मासो विधीयते कालः, अथ किं नियताग्निहोत्रात् नियताभ्यां च दर्शपूर्णमासाभ्यां कर्मान्तरविधानमिति । किं तावत् प्राप्तम् ? नियतेषु कालविधिरिति । कुतः ? कालविधिसरूप एष शब्दो मासमिति । कथं कालविधिसरूपता ? यत् अग्निहोत्रं जुहोतीति विदितम्, मासमित्यविदितम् । एवं चाग्निहोत्रशब्दो दर्शपूर्णमासशब्दश्च नार्थान्तरवृत्तौ भविष्यतः । तस्मात् कालविधिः । ननु कुण्डपायिनामयनप्रकरणं बाध्येतैवम् । कामं बाध्यताम् । वाक्यं हि बलवत्तरम् । **एवं प्राप्ते, ब्रूमः** । प्रकरणान्तरे श्रूयमाणं वाक्यं यस्य प्रकरणे तस्य वाचकं भवितुमर्हति । ननु प्रत्यक्षोऽग्निहोत्रस्य दर्शपूर्णमासयोश्च गुणविधिः । नेत्युच्यते । कथम् ? उपसद्भिश्चरित्वा इति हि उक्त्वा इदमभिधीयते । न चोपसदोऽग्निहोत्रस्य दर्शपूर्णमासयोश्च सन्ति । तस्मादशक्यस्तत्र मासविधिः । अथोच्येत उपसदोऽपि विधीयन्ते इति । तथा गुणविधानार्थे अस्मिन् वाक्ये अनेकगुणविधानात् वाक्यं भिद्येत । अस्मिन् पक्षे पुनः अतन्त्रमग्निहोत्रशब्दः, न कर्म विशेक्ष्यति । तेन वाक्यभेदो न भविष्यति । तस्मात् कर्मान्तरमिति सिद्धम् ।

वा— गतं गुणलक्षणभेदप्रसक्तानुप्रसक्तं कीदृशो गुणः पूर्वत्रासंभवन् भिनत्ति कीदृशो वा तत्रैव संभवतीति । इदानीं पर्यवसितेषु पञ्चसु भेदकारणेषु प्रकरणान्तरलक्षणो भेदः प्रस्तूयते । तत्र तावत् '**अग्निहोत्रादिशब्देन पूर्वं कर्मावबोधितम् । न विप्रकर्षमात्रेण भेदरूपं प्रपद्यते ॥**' यथैव वलभ्यां पाटलिपुत्रे वा अग्निहोत्रादिशब्द उच्चार्यमाणो नार्थान्तरं प्रतिपादयति, एवं प्रकरणान्तरेऽपि । न हि प्रकरणान्तरं तस्यार्थाभिधानशक्तिमभि-

व्यनक्ति । तद्विशेषिताश्च यजतिजुहोत्यादयोऽपि नार्थान्तरे वर्तन्ते । नार्थान्तरेण विना किञ्चिदनर्थकं भवति । न च मासविधानं तेषु न संभवति । यावज्जीवादिविधिभिः सह तुल्यबलत्वेन विकल्पोपपत्तेः । यो वै तेषां काम्यप्रयोगः, तस्य अनवगतकालविशेषत्वात् मासपरिमाणविधानमित्यदोषः । प्रकरणस्य च वाक्यं बाधकमिष्टमेव । अथवा दीक्षितत्वनिमित्तेन प्रतिषिद्धानामपि मासपरिमितः प्रतिप्रसवः । स तु प्रयोगमध्ये एव क्रियते । अथवा तान्येवाग्निहोत्रादीनि अत्र पर्युपस्थाप्य सोमयागसहितानि सत्रप्रयोगवचनेन फले विधीयन्ते । नहि केवलभोजी देवदत्तः अन्यैः सह पङ्क्त्यां भुञ्जानः अन्यत्वं प्रतिपद्यते । न च फलान्तरसंबन्धः कर्मान्तरत्वेन विना न घटते इत्युक्तं अवेष्ट्यधिकरणे (२।३।२) । न चावश्यमङ्गैरेव क्रत्वन्तरं गन्तव्यम् । प्रधानमपि हि अपरिपूर्णे करणांशे स्वशब्देन विधीयमानं न विरुध्यते । तस्मादेवमपि तान्येवाग्निहोत्रादीनि । इति प्राप्ते, उच्यते । **' उपसद्भ्यः परं ह्येतदग्निहोत्रं विधीयते । न च नैयमिकस्यैताः सन्तीत्येतेन भिन्नता ॥ '** यदि हि मासः शुद्धो विधीयेत, ततः पूर्वकर्मानुवादे बुद्धिर्भवेदपि, न त्वेतदस्ति । उपसदुत्तरकालत्वेन श्रवणात् विद्यमानाभिरुपसद्भिः शक्यः कालो लक्षयितुम् । न च नैयमिके ताः स्वार्थाः परार्था वा विद्यन्ते । यदि तु ताः तदुत्तरकालत्वं मासश्च विधीयेरन्, एवं सति अनेकार्थविधानात् वाक्यभेदः स्यात् । एतस्मादेव हेतोः दीक्षितदानहोमपाकप्रतिषेधेन प्रतिषिद्धस्य प्रतिप्रसवरूपेण वा सत्रैकदेशत्वेन वा अयं विधिः प्रत्युक्तः । तत्रापि हि उपसदुत्तरकालत्वं मासश्च इत्यनेकार्थत्वमेव । कर्मान्तरविधाने तु अनेकार्थत्वमदोषः । तस्मात् कर्मान्तरमिति भाष्यकारः ।

इदं त्विह वक्तव्यम् । यदि वाक्यभेदप्रसङ्गात् कर्मान्तरत्वम्, एवं तर्हि स एव भेदहेतुः प्राप्नोति, न प्रकरणान्तरम् । अथवा गुणादेव अनेकात्मकत्वेन पूर्वत्रासंभवात् भेद इति प्रकरणान्तरानवकाशः । तथाहि, **' यद्यपि प्रकृते तस्मिन्नग्निहोत्रे भवेदिदम् । तथाऽप्यसंभवात्तस्मिन् ब्रूयात् कर्मान्तरे गुणः ॥ '** किञ्च **' अग्निहोत्रस्य चैतेन भेदः क्लेशेन संभवेत् । उत्तरेषां तु नैव स्यादुपसत्संगतेर्विना ॥ '** ' मासं दर्शपूर्णमासाभ्यां यजते ' इत्यादिषु हि केवलमाससंबन्धविधानान्न वाक्यभेदः प्राप्नोतीति अकर्मान्तरत्वप्रसङ्गः । तत्रैतत् स्यात् । इहापि ' उपसद्भिश्चरित्वा ' इत्यनुषङ्गाद्ग्निहोत्रतुल्यत्वमिति । तदयुक्तम् । कुतः ? **' विना यत्रानुषङ्गेण भवेच्छ्रुतिरनर्थिका । तत्रैव ह्यकृतार्थानामनुषङ्गो न चेह सः ॥ '** तत्रानुषङ्गो युक्तः, यत्र तेन विना न किञ्चिदुक्तं भवति । यथा अत्रैव ' मासं वैश्वदेवेन ' इत्यादिषु यावत् ' यजते ' इति नानुषज्यते, तावत् न किञ्चिदुक्तं इत्यवश्यमनुषक्तव्यम् । इह पुनः दर्शपूर्णमासादिवाक्यानि तावत् स्वपदैरेव निराकाङ्क्षीभूतानि । ' उपसद्भिश्चरित्वा ' इत्ययमपि पूर्वत्रैव चरितार्थत्वान्न किञ्चिदपेक्षते । तत्र न कश्चिदपि हेतुरस्ति, येनानुषज्येत । यस्तु वाक्यभेदप्रसक्त्यर्थमेव अनुषङ्गमिच्छेत्, कुर्यादपि सः (अनुषङ्गम्) । तत्र तु पुनः पुनः चरित्वा इत्यस्य विधानात् यावदनुषङ्गं उपसदामनुष्ठानं प्राप्नोति । अनिष्टं चैतत्, वेदाभ्यनुज्ञानाभावात् । अथ अग्निहोत्रस्यैव पुरस्तात् कृताभिः सर्वानुषङ्गार्थसंपादनं इत्युच्येत, तथा सति शब्दोच्चारणमपि एवमेव अवस्थितं अग्निहोत्रादीनां पाठक्रमानुरोधेन उपकरिष्यति इति नार्थः अनुषङ्गेण । तस्मात नैतत् व्याख्यानमुपपद्यते । इति एवं वर्णनीयम् **' उपादेयो गुणो यत्र भवेत् प्रकरणान्तरे । तत्राकर्मान्तरं युक्तमुद्देश्ये त्वन्यकर्मता ॥ '** इह तावत् नैव प्रकरणान्तरसद्भावात् भेदः अवगम्यते । किं तर्हि ? पूर्वप्रकरणविच्छेदात् । अपरिवर्तमाने हि पूर्वकर्मणि केनापि प्रकारेण उत्तरस्य भेदः प्रतीयते । न तु प्रकरणान्तरं सदपि किञ्चिदुपकरोति । तथा च ' फलं चाकर्मसंनिधौ ' इत्यत्र वक्ष्यामः । सर्वत्र च विच्छिन्नप्रकरणस्य कर्मणः संबन्धि द्विप्रकारं श्रूयते उपादेयमनुपादेयं च । तत्र यदुपादेयं यथा आहवनीयप्रतिपदादि, तत् प्रदेशान्तरस्थोद्देशेनापि शक्यं विधातुम् । यत्तु अनुपादेयं देशकालनिमित्तफलसंस्कार्यात्मकम्, तस्य प्रदेशान्तरावस्थितस्य कर्म प्रति विध्यशक्तेरेषा वचनव्यक्तिर्भवति ' तत्रैव कर्म कर्तव्यम् '

इति । परोद्देशेन च कर्म विधीयमानं यदि अन्येन तद्रूपमेव वाक्येनोपस्थाप्यते, ततः तदेव इति अकर्मान्तरबुद्धिर्भवति । अथ तु ईषदपि तिरोधानात् नोपतिष्ठेत, ततः परं विधीयमानत्वेनैव विहितादन्यत्वबुद्धिः स्थिता न शक्या अपनेतुमिति कर्मान्तरत्वं भवति । एवं हि स विधायकः तत्रोपदिशति ' अविधेयं पदार्थं प्रति मया एतत् कर्म विधीयते, तच्च स्वरूपेण अनुत्पन्नं न शक्यं तत्र विधातुं इति बलादुत्पाद्यते । तत् यदि कश्चित् एवंविधं शक्नोति उत्पादयितुम्, तत् उत्पादयतु, यावदहमपि अत्र विधिं करोमि, अथ नोत्पादयति, ततो मयैव उत्पादिते मा कश्चित् पश्चादागत्य ममापराधं मंस्त ' इति । तेन एवं आच्छोषिते [आघोषिते इत्यर्थः । अयमेव वा पाठः स्यात्] यदि कश्चित् तथाविधमुपनयति, ततः असावपि तदेव देशादौ विधत्ते । अथ नोपनयति, ततः स एवोत्पादयत्यपि इति निरूप्यते । तदिह मासस्तावत् दूरस्थहोमानुवादेन न शक्यते विधातुम् । नहि कश्चित् होमाद्यनुरोधेन अद्यैव मासं संपादयितुं समर्थः । तेन अत्यन्तं स्वतन्त्रमनुपादेयं मासमेव प्रति होमादिषु विधीयमानेषु दूरस्थैः उत्पत्तिविधिभिः उत्पादनशक्तौ अलुप्यमानायां इदानीमेव उत्पत्तिः क्रियते । न चोत्पन्नस्य पुनरुत्पत्तिः संभवति, इति अपूर्वविधानं विज्ञायते ।

ननु च अग्निहोत्रादिपदेन उत्पत्तिसहचारिणा तत्कर्मोत्पत्तौ अपनीयमानायां माससंबन्धमात्रव्यापृतोऽयं विधिः उत्पादकत्वात् विहन्येत । **' संनिधानोपनीतं चेत् कर्म नोत्पद्यते पुनः । नामधेयोपनीतं तत् तत्र नोत्पद्यतेतराम् ॥ '** यत्र वाक्यान्तरगतमपि संनिधानमात्रादेव प्रत्यभिज्ञायमानं न भिद्यते, तत्र स्ववाक्यगतेन नाम्ना उपनीयमानं न प्रत्यभिज्ञास्यते, इति कुत एतत् ? उच्यते । **' यथाऽभिलषितं यत्र दुर्बलेनापि हेतुना । कर्मोपस्थाप्यते तत्र तदेवेत्यवसीयते ॥ '** संनिधानेन हि यादृगेव देशादिवाक्येषु कर्म अवगम्यते, तादृगेव उपतिष्ठते इति न भिद्यते । नामधेयं पुनः आदितस्तावत् आख्यातपरतन्त्रत्वात् नैव भेदाभेदयोः व्याप्रियते (नाम्नः पूर्वकर्मोपस्थापकत्वस्य पूर्वकर्मवाचित्वनिमित्तकत्वात् आख्यातस्य च पूर्वकर्मविषयत्वं विना तत्परतन्त्रस्य नाम्नः पूर्वकर्मवाचित्वानवधारणात् पूर्वकर्मोपस्थापकत्वानुपपत्तेः नोत्पत्तिप्रतिबन्धकत्वमित्याशयः) । तस्मिंश्च आख्यातप्रवृत्तिप्रतीक्षिणि अवस्थिते ' मासं जुहोति ' ' मासं यजते ' इति जुहोतियजतिपदमात्रसंगतौ आलोच्यमानायां अन्यस्य जुहोत्यादेः स्ववाक्यस्वप्रकरणेषु अविपरिवर्तमानत्वात् अप्रत्यभिज्ञानम् ।

किञ्च **' नाम्ना धात्वर्थमात्रं च संनिधाप्येत शङ्कितः । भावना त्वनुपस्थानाद् भिद्यमानाऽवधार्यते ॥ '** सामानाधिकरण्येन हि सर्वनामधेयानि धात्वर्थानां नामधेयत्वेन अवस्थितानि, न भावनायाः । तेन भावानाऽन्यत्वानन्यत्वपरीक्षावेलायां सत्यपि धात्वैक्यत्वे भावना तावत् अनन्यप्रमाणत्वात् आख्यातप्रत्ययान्तरेण अनुपनीयमाना न कथञ्चित् प्रत्यभिज्ञायते इत्युपपन्नं प्रयोजनान्यत्वम् । अथवा **' धात्वर्थोऽपि यथाऽऽख्यातेऽसत्त्वभूतः प्रतीयते** (सुप्प्रत्ययलिङ्गसंख्याऽन्वयायोग्यः) **। सत्त्वाभिधायिना नाम्ना तादृङ् नैवोपनीयते ॥ '** असत्त्वभूतो हि धात्वर्थोऽत्र जुहोतिना विधेरुपनीयते । न च तादृशस्यैव द्रव्यभूतलिङ्गसंख्यायोग्यार्थाभिधायिभिः अग्निहोत्रादिपदैः अभिधीयमानत्वं इति अप्रत्यभिज्ञानात् सोऽपि भिद्यते । यत्र तु प्रकरणान्तरेऽपि तथाभूतः (असत्त्वभूतः) नोपादास्यते, भावना वा तावदनुरक्तात्मना (असत्त्वभूतधात्वर्थानुरक्तात्मना) न विवक्ष्यते, तत्र तदेव कर्म एकेन वचनेन पर्युपस्थाप्य अपरेण फले विधीयते इत्यवगमात् काममकर्मान्तरं भवतु । तद्यथा ' अतिरात्रश्चतुर्विंशः प्रायणीयमहः ' ' चत्वारोऽभिप्लवाः षडहाः पृष्ठ्यः षडहः ' इत्यादिषु, यथा च वरुणप्रघासेषु ' अवभृथं यन्ति ' इति । यदा तु प्रकरणान्तरगतफलादिसंबद्धं विधित्वं उत्पत्तिमपि संस्पृश्य यावत् बलीयस्या उत्पत्तिविधिविप्रकृष्टत्या विप्रकर्षात् अनिवार्यमाणं भिनत्ति इति निश्चीयते, तदा एवमादिष्वपि भेद एवेत्यवगम्यते । परमार्थेन तु **' भिद्यते भावनामात्रं धात्वर्थो नायजिश्रुतेः । नाम्ना हि तदुपादानमासनोपायिचोदिते ॥ '** नामविलक्षणधातुश्रवणे हि तदर्थभेदो भवति ।

सत्रे तु यज्यश्रवणान्नाममात्रोपनीतप्रकृतयागप्रत्यभिज्ञानात् तद्भावनामात्रभेदः । तस्मात् साधूक्तम् 'प्रकरणान्तरे प्रयोजनान्यत्वम्' इति (सूत्रकारेण)। भाष्यकारः 'उपसद्भिश्चरित्वा' इति तल्लक्षितकालमेव अनुपादेयरूपं भेदहेतुत्वेन दर्शयति इति द्रष्टव्यम्। 'अथोच्येत उपसदोऽपि विधीयन्ते' इत्यादि (भाष्यं) च अभ्यासाधिकरणवत् ('न च यत् समित्संबन्धेन क्रियते' इति अभ्यासाधिकरणभाष्यम् (पृ. ४७२) समिदादिपदस्य देवताऽनभिधायित्वात् गुणहेतुकभेदाभावेऽपि अभ्युपेत्यवादत्वेन यथा समर्थितं तद्वत् इत्यर्थः) अभ्युपेत्यवादेन समर्थयितव्यम्।

शा— गुणभेदप्रसङ्गे समाप्ते प्रकरणान्तरेण भेदोऽभिधीयते। कुण्डपायिनामयने 'उपसद्भिश्चरित्वा मासमग्निहोत्रं जुह्वति, मासं दर्शपूर्णमासाभ्यां यजन्ते (मासं वैश्वदेवेन, मासं वरुणप्रघासैः, मासं शुनासीरीयेण, मासं त्रिवृता, मासं पञ्चदशेन) इत्यादि श्रुतम्। तत्र संदेहः किं नैयमिकाग्निहोत्रादौ मासो विधीयते, किंवा कर्मान्तरमिति। तदर्थं किं अनुपादेयगुणसंबन्धानुगृहीतः असंनिधिः भेदकारणं भवति, उत नेति। '**तत्राग्निहोत्रशब्देन तत् कर्मोपस्थितं यतः। तस्मात् तत्रैव मासोऽयमप्राप्तत्वाद्विधीयते ॥' उच्यते 'कर्मासंनिहितं नैव बुद्धौ विपरिवर्तते। शब्दात्तु तदुपस्थानमुपादेये गुणे भवेत् ॥ यत्र वाक्येऽनुपादेयो देशकालादिको गुणः। श्रुतो न तत्र दूरस्थकर्मोपस्थानसंभवः ॥**' तेन शब्दस्वरसतः प्राप्तोपस्थानानवगमात् संनिधानाभावाच्च क्रियैव विधातव्येति कर्मभेदः। एवं 'सरस्वत्या दक्षिणेन तीरेण आग्नेयोऽष्टाकपालः' 'सत्रायावगूर्य विश्वजिता यजेत' इति देशनिमित्तयोरपि द्रष्टव्यम्।

कौ— अत्र च मासादेरनुपादेयस्य गुणस्य पूर्वपक्षे, सिद्धान्ते विधेयत्वे निश्चितेऽपि कृतिसाध्यत्वरूपोपादेयत्वेन अनिश्चयात् तादृग्गुणप्रयोज्यभेदनिरूपणेन पादाध्यायसंगतिः। दूरस्थस्यापि चयनस्य अग्निष्टोमपदलक्ष्यज्योतिष्टोमाङ्गत्वे अभिहिते सुतरां अग्निहोत्रपदवाच्यपूर्वकर्माङ्गत्वं मासादेर्गुणस्य संभवति इति पूर्वपक्षोत्थानात् अनन्तरा।

सोम—प्रयोजनं— पूर्वपक्षे प्रसिद्धाग्निहोत्रे यावज्जीवादिकालैः मासस्य विकल्पः, कुण्डपायिनामयने अग्निहोत्राननुष्ठानं च। सिद्धान्ते तु तदुभयाभावः इत्यादि। **सूत्रे** प्रयोजनशब्दः धात्वर्थपरः।

वि— 'मासं जुहोत्यग्निहोत्रं गुणोऽन्यत् कर्म वा गुणः।, अनूद्य प्राप्तकर्मात्र मासोऽप्राप्तो विधीयते ॥, उपसद्भिश्चरित्वेति नित्ये तासामसंभवात्। अनेकस्याविधेश्चान्यत् कर्म प्रकरणान्तरात् ॥' तस्मात् प्रकरणान्तरमेवात्र भेदहेतुः।

भाट्ट— कुण्डपायिनामयने 'उपसद्भिश्चरित्वा मासमग्निहोत्रं जुह्वति, मासं दर्शपूर्णमासाभ्याम्' इत्यादि श्रुतम्। तत्र जुहोतिना अग्निहोत्रादिपदैश्च दूरस्थस्यापि कर्मण उपस्थितत्वात् तदनुवादेन 'यदाहवनीये जुहोति' इतिवत् मासादिरूपगुणविधिः, उपादेयवदनुपादेयस्यापि दूरस्थकर्मानुवादेन विधाने बाधकाभावात्। कर्तृबहुत्वकालादिरूपानेकगुणविशिष्टप्रयोगविधानाच्च न वाक्यभेदः। अतो न कर्मान्तरविधिः। इति प्राप्ते, सर्वत्र प्रवर्तकस्य विधेः कृतिविषयत्वापरपर्यायमुपादेयत्वम्, प्रमाणत्वाच्च अज्ञातज्ञाप्यत्वाख्यं विधेयत्वं च प्रमेयम्। तदुभयमप्येकवृत्ति समानाभिधानश्रुत्यादिना च धात्वर्थभावनावृत्तीत्युत्सर्गः। योग्योपपदसत्त्वे तु विशिष्टविधिगौरवभिया तन्मात्रवृत्ति। यथा 'यदाहवनीये जुहोति' इत्यत्र आहवनीयस्य उपादेयत्वविधेयत्वोभयाश्रयत्वात् योग्यत्वम्। अत एव तत्र धात्वर्थानुवादापेक्षायां दूरस्थानामपि सर्वहोमानां कथञ्चिदनुवादः। प्रकृते तु मासस्यानुपादेयत्वादुपादेयत्वं धात्वर्थे एव वाच्यम्। अतस्तत्सामानाधिकरण्येन विधेयत्वमपि तत्रैवेति विहितस्य विधानायोगाद्भेदः। एवं सत्यपि यदि 'यत् सायं जुहोति' इत्यादिवत् प्रत्यभिज्ञापकं संनिध्यादि प्रमाणं भवेत्, ततः अगत्या कालादौ विधेयत्वम्, कर्मणि च प्राप्तेऽपि उपादेयत्वमिति वैयधिकरण्यमप्याश्रीयेत, न त्वेतदस्ति। न च संनिध्यभावेऽपि नाम्नः एव पूर्वकर्मोपस्थापकता। 'अग्निहोत्रं जुहोति' इत्यनेन जुहोतिना हि यादृशी विजातीयहोमत्वप्रकारिका होमोपस्थितिः, तादृश्येव संनिधिनोपनीता युक्तम् 'यत् सायं जुहोति' इत्येतद्वाक्यस्थजुहोतेरपि स्वविषयविषयत्वं आपादयन्ती भवति तद्गतविधेयार्थकत्वप्रतिबन्धिका। अग्निहोत्रादिनाम तु अग्निदेवताकहोमत्वप्रकारकहोमविशेष्यकबोधं जनयत् जुहोतेर्न पूर्वकर्मोपस्थापकत्वमापादयितुं क्षमम्। नह्यग्निदेवताकं पूर्वं कर्मैवेत्यत्र प्रमाणमस्ति। विजातीयहोमत्वस्य नाम्ना अनुपस्थितेः, अन्यथा पर्यायत्वेन सहप्रयोगानापत्तेः, अतिप्रसङ्गनिराकरणस्य प्राचीनप्रयोगाभावेनैव उद्भिदधिकरणे स्थापितत्वेन योगरूढ्यनङ्गीकाराच्च। अन्यथा मत्वर्थलक्षणादिभिया अतिप्रसङ्गभङ्गार्थमपि रूढ्यङ्गीकारे सोमादावपि तदापत्तेः। अतो न नाम्ना तदुपस्थितिः। अत एव यत्र नामैव अनुपादेयगुणयोगेन श्रुतम्, न तु धातुः यथा 'सर्वेभ्यो दर्शपूर्णमासौ' इत्यादौ, तत्र नामार्थस्यैव उपादेयत्वसामानाधिकरण्येन विधेयत्वप्रसक्तौ नामजन्योपस्थित्या तत्प्रतिबन्धान्न कर्मान्तरम्। अस्तु वा तद्वाक्यस्य प्राकरणिकत्वादकर्मान्तरत्वम्। अतो नाम्ना प्रकृते जुहोतेर्विधेयार्थत्वप्रतिबन्धायोगात् अनुपादेयगुणयुक्तानुपस्थितिरूपप्रकरणान्तरात् सिद्धं कर्मान्तरत्वम्।

अत्र चानुपादेयगुणयागस्य स्ववृत्त्युपादेयत्वापनयद्वारा पारिशेष्यात् धात्वर्थवृत्त्युपादेयत्वापादनं व्यापारः। अनुपस्थितेः उपादेयत्वसामानाधिकरण्येन विधेयत्वाप्रतिबन्धः सः। अत एव न प्राचीनरीत्या अनुपादेयगुणयोगः एव प्रयोजकः, अपि तु उपादेयगुणसामान्याभाव एव इति ध्येयम्। अतः सिद्धं कालविशिष्टकर्मान्तरविधानमेवेदम्।

एवम् 'सरस्वत्या दक्षिणेन तीरेण आग्नेयोऽष्टाकपालः' इति, देशरूपानुपादेयस्य आग्नेयपदस्य साधारणत्वेन पूर्वकर्मोपस्थापकत्वाभावात्। निमित्तस्य तु 'सत्रायागूर्य विश्वजिता यजेत' इति आगूरणं संकल्पः, तदुत्तरं सत्रमकुर्वतोऽयं 'विश्वजिता यजेत' इत्यस्मात् कर्मान्तरम्। न चानेन विनियुक्तस्य प्रयुक्तस्य वा तेनोत्पत्तिः, विनियोगादिसामानाधिकरण्येन अवगताया उत्पत्तेः संनिधिं विना बाधे प्रमाणाभावात्।

मण्डन— 'सत्रेऽग्निहोत्रमन्यत् स्यात्।'

शंकर— 'प्रक्रियान्तरतो भेदः।'

* ननु अनुपादेयान्वयेऽपि विष्ण्वादिवाक्यविहितयागविपरिवृत्तेः **प्रकरणान्तरन्यायो** नास्ति इत्याशङ्का। **सु.** पृ. ७५३, * ननु शाखाद्वयाध्यायिनः प्रतियोगिकर्मग्रहणसंभवात् शाखाऽन्तरे प्रकरणान्तरन्यायो भविष्यति इत्याशङ्का। पृ. ९८५, * पञ्चविंशादिषु च एकशाखां गतेषु ब्राह्मणान्तरेषु एकशाखाध्यायिनोऽपि प्रकरणान्तरन्यायो भविष्यति इति आशङ्का। पृ. ९८५. * 'वारुण्या निष्कासेन तुषैश्चावभृथं यन्ति' इत्यत्रापि प्रकरणान्तरात् भेदोक्तिः संनिधिविरहमात्रेणैव न तु वस्तुतः प्रकरणान्तरन्यायोऽस्ति (अत्र) उपादेयगुणाभावाभावात् अवभृथपदेन आख्यातसमानाधिकरणेन सौमिकावभृथस्यैवोपस्थितत्वाच्च। भेदस्तु गुणादेव। **कौ.** २।३।११।२४ पृ. ८४. * **प्रकरणान्तरन्यायेन** 'अस्थीनि याजयेयुः' इत्यत्र कर्मान्तरत्वं निश्चितम्। **सोम.** १०।२।२०. * प्रकरणान्तरन्यायेन दर्शपूर्णमासधर्मकस्यैव कर्मान्तरस्य फलवत्सोमयागोद्देशेन विधेयपूर्वकालविशेषणतया विधानम्। पूर्वपक्षे। **भाट्ट.** ४।३।१३, * प्रकरणान्तरन्यायेन प्रसिद्धसौत्रामणिबृहस्पतिसवापेक्षया कर्मान्तरमेव तत्तद्धर्मकं अग्नि–वाजपेयपूर्वकालकत्वविशिष्टं विधीयते 'अग्निं चित्वा सौत्रामण्या यजेत' 'वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत' इति। ४।३।१०. * प्रकरणान्तरन्यायेन 'मासं दर्शपूर्णमासाभ्याम्' इत्यत्र कर्मान्तरम्। (नित्याभ्यां दर्शपूर्णमासाभ्यां कुण्डपायिनामयनगतौ दर्शपूर्णमासौ कर्मान्तरम्)। **कौ.** २।३।११।२४ पृ. ८८, * 'अथैष ज्योतिः' इत्यादौ अथशब्दस्य प्रयोगविशेषप्रत्यभिज्ञोच्छेदकत्वेऽपि कर्मप्रत्यभिज्ञोच्छेदकत्वाभावात् न **प्रकरणान्तरन्यायेन** कर्मान्तरत्वम्। (पूर्वपक्षे स्थित्वा इदम्)। २।२।८।२१ (२२ के.) पृ. २४९, * 'अथैष ज्योतिः' इत्यादौ परिशेषात् अथ शब्दानुशासनं इतिवत् अधिकारार्थत्वावगमात् युक्तमेव प्रकरणान्तरन्यायेन कर्मान्तरत्वं इत्याशङ्का। २।२।८।२१ पृ. २४८. * 'एतया पुनराधेयसंमितया इष्ट्या इष्ट्वा अग्निहोत्रं जुहोति' इति विधौ प्रकरणान्तरन्यायेन कर्मान्तरत्वापत्त्या कालविशिष्टकर्मान्तरविधाने गौरवापत्तेः होमपरिसंख्यापत्तिः न इष्टापत्तिः। **भाट्ट.** १०।८।७. * कथमिति पृष्टे 'जामि वा एतद् यज्ञस्य क्रियते' इत्यादिना 'अनूद्यते' इत्यन्तेन विष्ण्वादिवाक्यानां

विधायकत्वायोगात् न तत्प्राप्तोपांशुत्वानुवादः संभवति इत्युक्ते अनुपादेयान्तरालकालान्वयात् प्रकरणान्तरन्यायेनापि कर्मविधित्वाभिधानम्। सु. पृ. ७५३. * केचित्तु प्रकरणान्तरन्यायेन (आग्नेयद्वयस्य) भेदं समर्थयन्ते । तथाहि यदि अनिविशमानत्वेन अनुपादेयस्थलेऽपि गुणस्यैव भेदकता, ततः ‘ मासमग्निहोत्रं ’ इत्यत्रापि तस्यैव भेदकत्वोपपत्तेः कृतं प्रकरणान्तरेण । अतः अनुपादेयत्वावच्छिन्नं प्रति तावत् प्रकरणान्तरस्यैव भेदकता इति स्वीकर्तव्यम् । न च एवमपि असंनिध्यभावात् कथं तस्य भेदकता ? भेदबोधकतादशायां तत्प्रतियोगिककर्मोपस्थित्यभावरूपस्य असंनिधेः मासाग्निहोत्रवत् इहापि तुल्यत्वात् इत्याहुः । तन्न । कौ. २।२।३।३ पृ. १६६, * गवामयनप्रकरणे ‘ प्रायणीयमहर्भवति ’ इत्यत्र विनिगमनाविरहादेव कर्मान्तरत्वम् । भाष्यकारीयप्रकरणान्तरन्यायेन भेदोक्तिस्तु अप्राप्तोपादेयगुणाभावविशिष्टासंनिधिमात्रेण व्याख्येया । २।३।११।२४ पृ. ८३, * दोहाधिकारे ‘ वत्समालभेत ’ अत्र सिद्धान्ते दार्शपौर्णमासिकेषालम्भात् अयमालम्भः संस्कार्यरूपानुपादेयगुणयोगात् प्रकरणान्तरन्यायेन कर्मान्तरमिति सिध्यति । २।३।६।१७. * न च प्रकरणान्तरन्यायेन कर्मान्तरत्वशङ्का (‘ य एतेनानिष्ट्वाऽथान्येन यजते ’ इत्यत्र) । ‘ एष वाव ’ इत्यनेनार्थवादेन उद्भिदादीनां यज्ञान्तराणां संनिहितत्वात् । भाट्ट. ५।३।१४. * न च सिद्धान्तेऽपि प्रकरणान्तरन्यायेन प्रसिद्धषडहापेक्षया कर्मान्तरत्वात् न षडहावृत्तिः, किन्तु कर्मान्तरेष्विव तेषु षडहविध्यन्तमात्रस्यैवावृत्तिः इति वाच्यम् । एवंजातीयकेषु कर्मभेदाभावात् । सोम. ८।३।३. * ‘ ननु अथैष ज्योतिः ’ इत्यादौ अथशब्दानुरोधेन वक्ष्यमाणपरामर्शित्वस्यापि उपपत्तेः असंनिधिसत्त्वेन तत्सहकृतफलरूपानुपादेयगुणस्य प्रकरणान्तरन्यायेन भेदकत्वोपपत्तिः । कौ. २।२।८।२१ पृ. २४८, * प्रकृते (दाक्षायणयज्ञवाक्ये) पूर्वबुद्धिविच्छेदकाभावात् प्रकरणस्य चोपस्थापकस्य सत्त्वात् न प्रकरणान्तरन्यायेन भेदः । २।३।४।८ पृ. ३९. * फलस्य अनुपादेयत्वेन कर्म उद्दिश्य उपादातुमशक्यत्वात् फलार्थस्य विधायकस्य फलोद्देशेन कर्मोपादायकत्वात् प्रकरणान्तरन्यायेन कर्मस्वरूपविषयत्वात् । सु. पृ. ८२०. * यत्र वेदान्तरे एव विनियोगः वेदान्तरे च आख्यातसामानाधिकरण्यं विना वसन्ते ज्योतिष्टोमः इत्येवंरूपेण कालदेशाद्यन्वयः, तत्रापि प्रयोगविधित्वात् तन्निबन्धन एव स्वर इति बोध्यम् । आख्यातसामानाधिकरण्ये सति प्रकरणान्तरन्यायेन कर्मांतरत्वापत्तेः । कौ. ३।३।३।१० पृ. ३२६. * ‘यन्ति’ इत्यनेन तु (वरुणप्रघासेषु ‘ वारुण्या निष्कासेन तुषैश्चावभृथं यन्ति ’) प्रकरणान्तरन्यायेन कर्मान्तरं विधीयते । शा. ७।३।४. * सवनीयस्य संनिधौ ‘ आश्विनं ग्रहं गृहीत्वा उपनिष्क्रम्य यूपं परिव्ययति ’ इति श्रुतेन वचनेन पशुत्रयसाधारणयूपपरिव्याणापेक्षया यूपपरिव्याणान्तरं सवनीयाङ्गतया प्रकरणान्तरन्यायेन अभ्यासाद्वा यूपदार्ढ्यप्रयोजकं विधीयते । भाट्ट. ४।४।९. * सूर्यप्रजापत्योः उत्पत्तिशिष्टत्वाभावेन बलीयस्त्वानुपपत्तेः, सायं च प्रातश्च जुहोति इत्यस्य अनुपादेयकालसंबन्धात् प्रकरणान्तरन्यायेन पूर्वपक्षे कर्मविधित्वावगमः । सु. पृ. ४३१. * सोमे दीक्षायां रात्रौ जागरणम् । दार्शिकजागरणस्य दृष्टार्थत्वेन प्रसङ्गानुपपत्तेः तस्याप्यदृष्टार्थत्वेऽपि प्रकरणान्तरन्यायेन विजातीययोः जागरणयोः एकादृष्टजनकत्वे प्रमाणाभावः । भाट्ट. १२।१।८. * ‘हृदयस्याग्रेऽवद्यति’ इत्यादौ प्रकरणान्तरन्यायेन स्वतन्त्रमेवावदानं हृदयाद्युद्देशेन विधीयते (इदं पूर्वपक्षे) । कौ. २।२।६।१७ पृ. २०८. * ‘ एतया (उदवसानीयया) पुनराधेयसंमितया इष्टया इष्ट्वा अग्निहोत्रं जुहोति ’ इति वचनं तु **प्रकरणान्तरन्यायात्** सोमाङ्गतया उदवसानीयेष्टयङ्गतयैव वा कर्मान्तरविधायकमिति । इदं पूर्वपक्षे । भाट्ट. ६।५।१३. * न च प्रकरणान्तरन्यायात् यज्ञान्तराणामिह कालविधिर्न संभवतीति शङ्क्यम् । (‘ एष वाव प्रथमो यज्ञो यज्ञानाम् ’ इत्यत्र) ‘ यज्ञानाम् ’ इति शब्देन यज्ञान्तराणामपि विपरिवर्तमानत्वेन अविपरिवर्तमानत्वलक्षण–प्रकरणान्तरस्याभावादिति । सोम. ५।३।१४, * ‘ पृष्ठैरुपतिष्ठते ’ । ननु प्रसिद्धपृष्ठशब्दाभिधेयस्तुतिविधानमेवास्तु, किमिति लक्षणया सदृशकर्मविधिः इत्याशङ्क्य प्रकरणान्तरन्यायात्

कर्मान्तरविधिरेव इत्याह ... । (इदं पूर्वपक्षे) । ७।३।१४. * बृहस्पतिसवः वाजपेयप्रकरणे श्रुतस्तत्र प्रकरणान्तरन्यायात् कर्मान्तरमेव विधीयते । कल्पतरुः . १।१।१ ब्रसू . पृ. ६८. * **प्रकरणान्तरन्यायस्य स्वरूपम्** । सत्यपि उपधेयसांकर्ये (अभ्यासाधिकरणन्यायस्वरूपात् प्रकरणान्तराधिकरण–) न्यायस्वरूपस्य असांकर्यम् । अभ्यासे हि उपादेयतामतन्त्रीकृत्य पारिशेष्येण धात्वर्थे विधेयत्वापादनमेव व्यापारः । प्रकरणान्तरस्थले तु न पारिशेष्येण विधेयत्वापादानं व्यापारः, विशिष्टविधिविधया कालादेरपि विधेयत्वाङ्गीकारेण तदसंभवात् । अपितु सत्यपि विधेयान्तरे स्वापादितोपादेयतासामानाधिकरण्यलाभार्थे धात्वर्थेऽपि विधेयताऽऽपादनम् । कौ. २।३।११।२४ पृ. ७९.

* ज्योतिष्टोमे उदयनीयः न कर्मान्तरम्, संनिधिसत्त्वेन **प्रकरणान्तरन्यायाभावात्** । इदं पूर्वपक्षे । भाट्ट. ११।२।१५. * **प्रकरणान्तरन्यायाभावेऽपि** अनुपादेयान्वयस्य अकर्मविधित्वापादकत्वं दर्शयितुमाह ... । सु. पृ. ७५४.

* यावज्जीवशब्दस्य निमित्तपरत्वात् अवच्छेदकत्वलक्षणानुपादेयगुणत्वोपपत्तेः अनुपादेयगुणान्वयस्य भेदकत्वाभेदकत्वस्य विचारात् कर्मविपरिवृत्तेः **प्रकरणान्तरन्यायायोगेऽपि** अनुपादेयान्वयनिमित्तभेदचिन्ताऽनन्तरं बुद्धिस्थत्वोपपत्तेः प्रकरणान्तरचिन्तयाऽपि संगतिः संभवति । सु. पृ. ९६५.

* संज्ञां विना प्रकृतबुद्धिविच्छेदाभावे **प्रकरणान्तरन्यायाविषयत्वात्** भेदकत्वं न संभवति । सु. पृ. ८२०.

* पर्युदसनीयत्वेन उपस्थितत्वात् अग्निहोत्रस्य **प्रकरणान्तरन्यायासंभवेन** कर्मान्तरत्वानुपपत्तेः तस्यैव अवभृथोत्तरं करणप्रसक्तौ अवध्यन्तरमात्रविधाने लाघवम् । भाट्ट. १०।८।७.

* अनुपादेयान्वयस्य विधेयस्यैव **प्रकरणान्तरन्यायोपयोगित्वेन**, प्रकृते (वायव्यं श्वेतम्, ईषामालभेत इत्यादौ) तदभावेनाभेदकत्वम् । (इदं पूर्वपक्षे) । कौ. २।३।५।१२ पृ. ४५.

प्रकरणान्तरप्रत्युदाहरणन्यायः । अनुपादेयानां देशादीनां कर्मसंनिधौ विद्यमानानां कर्मभेदकत्वं नास्ति । अवेष्टेरन्नाद्यफलकत्वम् ॥

संनिधौ त्वविभागात् फलार्थेन पुनःश्रुतिः । २।३।१३।२६ ॥

भाष्यम्–– अस्ति अवेष्टिः ‘ आग्नेयोऽष्टाकपालः पुरोडाशो भवति ’ इत्येवमादिः । तां प्रकृत्य उच्यते ‘ एतयाऽन्नाद्यकामं याजयेत् ’ इति । तत्र संदेहः, किं कर्मान्तरमवेष्टेः, उत अवेष्टिरेवेति । किं प्राप्तम् ? कर्मान्तरमिति उक्तेन न्यायेन । एवं प्राप्ते, ब्रूमः । संनिधौ फलार्थेन पुनःश्रुतिः अवेष्टेरेव, न कर्मान्तरमिति । कुतः ? अविभागात् । एतया इत्येष शब्दो न शक्नोति अवेष्टया विभक्तं यागमन्यं वक्तुम् । संनिहितस्य प्रतिनिर्देशक एष शब्दः । तस्मात् अवेष्टिरेव अन्नाद्यकामस्य विधीयते इति । किं प्रयोजनम् ? यदि अवेष्टिः आग्नेयादीनि हवींषि, अथ कर्मान्तरं अन्यहविष्को याग इति ।

वा–– सर्वेषामेव असंनिध्यंशप्रत्युदाहरणार्थमिदमारभ्यते । फलग्रहणं प्रदर्शनमात्रम् । सर्वाणि तु देशादीन्यपि उदाहर्तव्यानि । ‘ समे दर्शपूर्णमासाभ्यां यजेत ’ ‘ पौर्णमास्यां पौर्णमास्या यजेत ’ ‘ यावज्जीवं दर्शपूर्णमासाभ्यां यजेत ’ ‘ दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत ’ ‘ शेषात् स्विष्टकृतं यजति ’ इति । सर्वत्र पूर्वाधिकरणेन देशादीनि प्रति विधीयमानत्वात् कर्मान्तरत्वं प्राप्तम् । **आह च**, ‘ **विहितस्य विधिर्नास्तीत्यनुवादः प्रसज्यते । अनूद्यमानमुद्देश्यं न चात्रोद्देशसंभवः ॥** ’ अनूद्यमानानि तु एकान्तेन उद्देष्टव्यानि कर्माणि । न च उद्देश्यानां उद्देश्यैः संबन्धः अवकल्पते । देशाद्युद्देशेन तु विधीयमानानां कर्मणां स्वरूपानुवादकल्पनं युगपद्विध्यनुवाददोषात् अयुक्तम् । तस्मात् कर्मान्तराणि । इति **प्राप्ते, अभिधीयते** । **‘भिन्ने हि विधिसामर्थ्ये उत्पत्तिविनियोगयोः । तत्र सत्यां गतावेकमसत्यां तद् द्वयं भवेत् ॥** ’ अगत्या हि तेनैवोत्पत्तिः तेनैव च विनियोगः क्रियते । सत्यां तु गतौ विनियोजकस्य उत्पत्तिविध्यर्थापत्त्यनुत्पादात् अन्येनैव उत्पादितानां च विपरिवर्तमानानां विनियोग-

सामर्थ्यमात्रमेव ज्ञायते । **'न चाप्युद्दिश्यमानत्वमनुवादत्वकारणम् । नोपादानं विधेयत्वे प्राप्त्यप्राप्तिवशे हि ते ॥'** यद्यपि देशादीनि अनुपादेयस्वभावत्वात् उद्दिश्यन्ते, तथापि अप्राप्तत्वात् तेषामेव ज्ञायते विधेयत्वम् । उपादीयमानस्य च कर्मणः तादृशस्यैव अन्येन पर्युपस्थापनात् अनुवादत्वम् । असंनिधाने तु अपर्युपस्थापनात् विधिः नोपादानमात्रात् इत्यविरोधः । तस्मादभेदः । विपरिवृत्तिरेव चेह अविभागशब्देनोक्ता । विशेषेण तु अवेष्टौ एतच्छब्दप्रत्ययात् इति ।

प्रयोजने तु चोदयन्ति । कर्मान्तरेऽपि किल एतच्छब्दकृतात् सादृश्यप्रत्ययात् आग्नेयादीन्येव हवींषि इति कथं अन्यहविष्को याग इति । तत्तु अचोद्यम् । ज्योतिशादिवत् एतच्छब्दस्य प्रस्तूयमानमुख्यार्थोपपत्तौ सत्यां सादृश्यलक्षणाऽनुपपत्तेः । तस्मात् सुष्ठूक्तं कर्मान्तरे अन्यहविष्को याग इति (भाष्ये)।

एवमुक्तानि सापवादानि षट् भेदकारणानि । वृत्त्यन्तरे तु चत्वार्येव भेदकारणानि शब्दान्तर–संज्ञा–गुण–फलानि उदाहृतानि । पुनःश्रुतिसंख्ययोः शब्दान्तरे एव अन्तर्भावात् प्रकरणान्तरस्य च फलाद्यनुग्रहमात्रार्थत्वात् । तत्त अयुक्तमिव दृश्यते । न हि पञ्चकृत्वोऽभ्यस्तो यजतिः शब्दान्तरत्वं प्रतिपद्यते । नापि एकशेषेण तन्त्रोच्चारिताः सप्तदश प्राजापत्यशब्दाः संभवन्ति, शब्दैकत्वप्रत्यभिज्ञानात् । तथा चोक्तम् 'आदित्यवद्यौगपद्यम्' इति 'संख्याऽभावात्' इति च । वक्ष्यति च एवंजातीयकानामेकत्वम् ' अपि वाऽव्यतिरेकाद्रूपशब्दाविभागाद्वा ' इति । तस्मात् ऐकशब्द्ये सत्येव कारणान्तरात् भेदमपश्यतः शब्दान्तरकल्पनं तत्रभवतो भाष्यान्तरकृतः । प्रकरणान्तरत्वाच्च विना फलादीनां भेदकत्वं उक्तमपि न दृष्टं ' संनिधौ त्वविभागात् ' ' तत्संनिधेर्गुणार्थेन पुनःश्रुतिः ' इत्यादौ । तेन प्रत्यभिज्ञाननिमित्तत्वात् फलाद्यनुगृहीतं प्रकरणान्तरमेव भेदकारणं भवदपि उपेक्षितम् । फलं च प्रकरणान्तरान्तर्भूतत्वेन न निरीक्षितम् । यदपि ' एकं वा संयोगरूपचोदनाख्याऽविशेषात् ' इति एकत्वहेतुविपर्ययचतुष्टयं (एकत्वहेतु च तत् विपरीतचतुष्टयं च इति विग्रहः) अस्य ज्ञापकं इत्युक्तम्, तदपि प्रस्तुतेऽधिकरणे अन्येषामसंभवात् इति नालोचितम् ।

तस्मात् यथोक्ताः षडेव भेदहेतवः । तत्रापि तु सिद्धान्ते संज्ञा–शब्दान्तरयोः गुणसंख्ययोश्च भेदो वक्तव्यः सन् नोक्तः इत्यभिधीयते । **'स्वरूपानभिधानत्वात् संज्ञा शब्दान्तरात् पृथक् । व्यासज्यसमवायाच्च संख्या भिन्ना गुणान्तरात् ॥'** संज्ञा हि द्रव्यरूपापन्नामपि क्रियामभिदधाना विच्छेदमात्रात् भिनत्ति । संख्याऽपि युगपत् अनेकोत्पद्यमानसमवेता पूर्वासंभवद्गुणान्तरात् भिद्यते इति ।

शा— **' अत्रापि तावद्देशादेरुद्देशात् कर्म तत् प्रति । उपादेयं, तथा च स्याद् विधेयं, तेन भिद्यते ॥ '** अत्र ब्रूमः **' संनिधावविभक्तत्वं कर्मणः प्रत्यभिज्ञया । गम्यते तेन तस्यैव फलाद्यर्था पुनःश्रुतिः ॥ सत्यं कर्म विधातव्यं तथापि तु न भिद्यते । उत्पत्तिविधिभेदे हि भेदो नास्ति च सोऽत्र नः ॥ '**

देशकालनिमित्तफलसंस्कार्याणां संनिधौ पूर्वाधिकरणप्रत्युदाहरणार्थं इदमधिकरणं इति प्रत्युदाहरणत्वमवान्तरसंगतिः ।

सोम––**प्रयोजनम्**–पौर्णमास्यादिवाक्येषु कर्मान्तरविधौ कर्माधिक्यं पूर्वपक्षे, सिद्धान्ते तु तदभावः । एतया इति वाक्यस्य कर्मान्तरविधायकत्वे तस्मिन् कर्मणि 'अव्यक्तासु तु सोमस्य ' इति सौमिकधर्मप्राप्तेः अन्नाद्यकामेन सोमहविष्को यागः कर्तव्यः पूर्वपक्षे, सिद्धान्ते आग्नेयादिहविष्का अवेष्टिरेव इति वार्तिके व्यक्तम् । सूत्रे विभागात् विपरिवृत्तेः इत्यर्थः ।

वि–– ' यजेत् समे पौर्णमास्यां यावज्जीवं तथैतया । अन्नाद्यकाम इत्यादौ कर्मभेदोऽथवा गुणः ॥, विध्युपादानयोरैक्याद् देशादेरनुपत्तितः । आवश्यके कर्मविधौ तद्भेदः पुनरुक्तितः ॥ , देशादियोगस्याप्राप्तेर्विधिर्न ह्येकता तयोः । पुंशब्दयोर्व्यापृतित्वात् पुनरुक्त्या त्वनूद्यते ॥ '

भाट्ट–– पञ्चानामपि अनुपादेयानां संनिधौ प्रत्युदाहरणानि । दर्शपूर्णमासप्रकरणे ' पौर्णमास्यां पौर्णमास्या यजेत ' ' समे दर्शपूर्णमासाभ्यां यजेत ' ' यावज्जीवं

दर्शपूर्णमासाभ्यां यजेत ' ' दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत ' इति चतुर्णाम् । स्विष्टकृतं प्रकृत्य ' शेषात् स्विष्टकृतं यजति ' इति शेषरूपसंस्कार्यस्य । अत्र सर्वत्र संनिधानात् स्वविषयवृत्तिविधेयत्वप्रतिबन्धात् प्राप्तस्यैव कर्मणः कालदेशविशिष्टप्रयोगमात्रं विधिलाघवाय अनुमन्यते, न तु कर्मोत्पत्तिमपि विधत्ते । यत्र तु प्रयोगोऽपि प्राप्तः ' य इष्टया ' इत्यादौ, तत्र प्राप्तप्रयोगानुवादेन कालादिमात्रविधिः संभवति । देशकालयोः उपादेयत्वाऽसंभवेऽपि यागाङ्गत्वेन विनियोगविधिः । निमित्तस्थले तु मिथो निमित्तनैमित्तिकयोः अङ्गाङ्गित्वासंभवात् प्राप्तस्यापि कर्मणः निमित्तसंबन्धानुमितपापक्षयार्थत्वेन विनियोगविधिः इति वक्ष्यते । फलसंस्कार्ययोस्तु तदुद्देशेन प्राप्तकर्मविनियोगविधिः स्पष्ट एव । अतो न संनिधिसत्त्वेऽपि अनुपादेयगुणयोगेऽपि कर्मान्तरम् ।

मण्डन–– ' सैवान्नकामस्यावेष्टिः । '

शंकर–– ' संनिधौ कर्मभेदो न । '

* **प्रकरणान्तरलक्षणं** अनुपादेय–संनिधिसचिवः असंनिधिः इति के चित् । तन्न ' वारुण्या निष्कासेन तुषैश्चावभृथं यन्ति ' इत्यत्र अव्याप्तेः । किन्तु विधेः उपपदार्थसंक्रमासंभवेन सहकृतः असंनिधिः इति । नात्र असंनिधिरिव स्वरूपतः अनुपादेयसंनिधिः प्रवेश्यः, किन्तु तत्कार्ये विधेः उपपदार्थसंक्रमासंभवः । स च यथा अनुपादेयसंनिधिना भवति, एवमुपादेयद्वयसंनिधिनाऽपि भवति । बाल. पृ. ८८.

* **प्रकरणाप्रकरणाम्नानविवेकः** वेदेनैव कृतः । वा. ३।४।८।२०.

प्रकरणाविभागे च विप्रतिषिद्धं ह्युभयम् । ४।४।३।५॥

राजसूये उपसदः प्रकृत्य ' पुरस्तादुपसदां सौम्येन प्रचरन्ति, अन्तरा त्वाष्ट्रेण, उपरिष्टात् वैष्णवेन ' इति पठ्यते । तत्र ' पुरस्तादुपसदां सौम्यं चरुं निर्वपति, अन्तरा त्वाष्ट्रम्, उपरिष्टाद् वैष्णवम् ' इति सत्याषाढसूत्रात् त्रयोऽप्येते चरवः इति स्पष्टम् (१३।७।७) । प्रयोगचन्द्रिकायां तु ' पुरस्तादुपसदां सौम्यं चरुं निर्वपति, अन्तरा त्वाष्ट्रमष्टाकपालम्, उपरिष्टाद् वैष्णवं त्रिकपालम् ' इति आपस्तम्बश्रौतमुदाहृतम् (१८।२०।१९) । बौधायनश्रौते तु (१२।१७) ' मध्यमे (उपसदहनि) उपसदावन्तरेण त्वाष्ट्रमष्टाकपालम् ' इति विशेषः । अथ तानीमानि हवींषि किं उपसदामङ्गत्वेन विधीयन्ते, कालमात्रं वा विधीयते इति विचारे पूर्वपक्षमाह । पूर्वाधिकरणे प्रकरणविभागेन सिद्धान्त उक्तः । तद्वैलक्षण्यार्थश्चकारः । प्रकरणस्य उपसदां सौम्यचर्वादीनां च प्रकरणस्य न विभागः । प्रकरणस्य अविभागे सति सौम्यादयः उपसदङ्गं स्यात् उपसत्संयोगस्य श्रुतत्वात् । हि यस्मात् उभयं उपसदङ्गत्वं कालविधिश्चेत्युभयं विप्रतिषिद्धं विरुद्धमेव । तस्मादुपसदङ्गत्वम् ।

अपिवा कालमात्रं स्याददर्शनाद् विशेषस्य । ६॥

अपिवा इति शब्देन पूर्वपक्षनिरासं द्योतयित्वा सिद्धान्तमाह । न इमानि हवींषि उपसदङ्गत्वेन विहितानि, किन्तु तदनुष्ठानस्य उपसदां पुरस्तात् अन्तरा उपरिष्टादिति कालमात्रमुक्तं स्यात् । इमानि संस्रुपां हविःषु अष्टमादिदशमान्तानि त्रीणि हवींषि उपसत्सु तदातदा कर्तव्यानि इति तत्रोच्यते । इतरस्मात् कालाभिधानात् एषां हविषां विशेषस्य भेदकस्य धर्मस्य अदर्शनात् दर्शनस्य अभावात् । इतरत् कालाभिधानं तु ' आग्निमारुतादूर्ध्वं अनुयाजैश्चरन्ति ' इत्यादि । तस्मात् कर्मान्तरे कालसंयोग उक्तः इति सिद्धान्तः । **के.**

* **प्रकरणाम्नानस्य** एतदेव प्रयोजनं कथं नाम तदङ्गत्वं विज्ञायेत इति । यदि अप्रकरणाधीतस्यापि कर्माङ्गतैव स्यात्, ततः प्रकरणाम्नानमनर्थकं भवेत् । वा. ३।४।८।२०.

* **प्रकरणक्रमाधिकरणम्** । प्रकरणक्रमयोर्विरोधे प्रकरणं बलवत् । ३।३।७।१४. ' बलाबलाधिकरणम् ' इति बिन्दौ द्रष्टव्यम् ।

* **प्रकरणगम्यां** पवमानहविषां आधानार्थतां बाधित्वा ' यदाहवनीये जुह्वति ' इति वाक्येन अग्न्यर्थता विज्ञायते । वा. ३।१।१२।२२ पृ. ७३७.

* **प्रकरणपूरितानामपि** क्रमेण पुनस्तद्धर्मप्राप्तिर्भवति । वा. ३।३।७।१४ पृ. ८३३.

* **प्रकरणबाधः** । यत्र स्ववाक्ये एव विधीयमानस्यैव किमंशपूरणं पदान्तरेणोपनीयते, यथा 'युवं हि स्थः स्वर्पती' इति प्रतिपद् विधीयमानैव वाक्येन द्वियजमानेन क्रतुना संबध्यते, तत्र प्रकरणबाधो युक्तः । यथा च द्वादशोपसत्त्वस्य विधीयमानस्यैव किमंशपूरणं अहीनशब्दः करोति । **वा.** १०।५।९।३७.

* **प्रकरणलभ्येऽर्थे** शब्दव्यापाराभावः । **सोम.** ६।४।६ पृ. ४८४.

* **प्रकरणवशेन** तदुपकारिमात्रे धर्मा विधीयन्ते न साक्षादङ्गेष्वेव केवलेषु इति 'आरादपीति चेन्न, तद्वाक्ये हि तदर्थत्वात्' इत्यत्र वक्ष्यति । **वा.** ३।१।१०।१८ पृ.७२९.

* **प्रकरणविनियोगाधिकरणम्** । ३।३।४।११. **मीको.** पृ. २६६४ 'प्रकरणाधिकरणम्' इत्यत्र द्रष्टव्यम् ।

* **'प्रकरणविशेषादसंयुक्तं प्रधानस्य'** (३।७।१।१-५) इत्यधिकरणे प्रकरणवशेन बर्हिर्धर्माणां अङ्गप्रधानार्थत्वं व्यवस्थापयिष्यते । **कु.** ३।१।१०।२०.

प्रकरणविशेषादसंयुक्तं प्रधानस्य । ३।७।१।१ ॥

दर्शपूर्णमासयोः बर्हिः छेदनसंभरणादयो बर्हिर्धर्माश्च, वेदिः हविरासादनादयो वेदिधर्माश्च आम्नाताः । ते सर्वे प्रधानस्यैव नाङ्गानां प्रयाजादीनाम् । तद्धि धर्मजातं अङ्गार्थत्वेन प्रधानार्थत्वेन वा विशिष्य असंयुक्तं न संयुक्तम् । प्रकरणविशेषात् प्रधानानामेव हि प्रकरणम्, नाङ्गानामिति । इति पूर्वः पक्षः ।

सर्वेषां वा, शेषत्वस्यातत्प्रयुक्तत्वात् । २ ॥

पूर्वपक्षस्य निरासार्थो वाशब्दः । न प्रधानमात्रस्य ते धर्माः, किन्तु सर्वेषां अङ्गानां प्रधानानां च स्युः । बर्हिरादिनां यत् शेषत्वम्, तस्य अतत्प्रयुक्तत्वात् । तच्छब्देन पूर्वसूत्रोक्तप्रकरणविशेषस्य परामर्शः । शेषत्वस्य प्रकरणविशेषप्रयुक्तत्वाभावात् । 'वेद्यां हवींष्यासादयति' इत्यादिवाक्यप्रयुक्तं हि शेषत्वम् । तस्मात् अङ्गेषु प्रधानेषु च ते धर्माः कर्तव्याः इति सिद्धान्तः ।

आरादपीति चेत् । ३ ॥

पिण्डपितृयज्ञीयं बर्हिरपि आरात् आराच्छिष्टधर्मवत् स्यात् दर्शपूर्णमासगतबर्हिर्धर्मयुक्तं स्यात् इति । इति चेत् पूर्वपक्षी ब्रूयात् ।

न, तद्वाक्यं हि, तदर्थत्वात् । ४ ॥

न पिण्डपितृयज्ञस्य बर्हिः दर्शपूर्णमासबर्हिर्धर्मैः धर्मवत् । हि यस्मात्, धर्मजातस्य यद् वाक्यम्, तत् प्रधानवाक्यैकवाक्यभूतं वाक्यम् । तथा च प्रकरणसहकृतं धर्मवाक्यं विधायकम् । पिण्डपितृयज्ञश्च न दर्शप्रकरणगतः । तस्मात् पिण्डपितृयज्ञे न दर्शधर्मप्राप्तिः । तदर्थत्वात् इति ल्यब्लोपे पञ्चमी । तदर्थत्वं प्रधानार्थत्वमालोच्य धर्मजातस्य शेषत्वात् । बर्हिर्वेदितद्धर्माणां तु यत् वाक्यम्, तत् दर्शपूर्णमासाभ्यां सह एकम् । तेन वाक्येन सह एकवाक्यतां गतमित्यर्थः । तेन यत् तदेकवाक्यान्तर्गतं बर्हिः, तस्यैव दर्शबर्हिषः तद्धर्मप्राप्तिः, न तु भिन्नवाक्यगतस्य पिण्डपितृयज्ञगतस्य बर्हिषः ।

लिङ्गदर्शनाच्च । ५ ॥

'स वै ध्रुवामेवाग्रेऽभिघारयति, ततो हि प्रथमावाज्यभागौ यक्ष्यन् भवति' इति अभिघारणस्य आज्यभागार्थत्वं दर्शयति । तदेतत् लिङ्गदर्शनं धर्माणां अङ्गप्रधानार्थतां बोधयति । चकारः 'सर्वेषां शेषः' इति सिद्धान्तप्रतिज्ञानुकर्षणार्थः । तस्मात् अङ्गप्रधानोभयार्थाः धर्माः । **के.**

प्रकरणविशेषादसंयुक्तं प्रधानस्य । ३।७।१।१ ॥

स्तो दर्शपूर्णमासौ । तत्र सन्ति बर्हिर्धर्मा वेदिधर्माश्च । तत्र संदेहः किं बर्हिरादयो बर्हिर्धर्माश्च प्रधानस्य उताङ्गप्रधानानामिति । वाक्यप्रकरणविरोधाविरोधद्वारेण समानासमानविधानत्वमेव धर्माणां निरूप्यते । न तु वाक्येन प्रकरणविरोधाविरोधावेव, तयोः पूर्वमेव निरूपितत्वात् । अत्रायं पूर्वपक्षिणोऽभिसंधिः । यद्यपि 'बर्हिषि हवींष्यासादयति, बर्हिर्लुनाति, वेदिं खनति' इति वाक्ये विशेषेण च बर्हिषो हविरासादनसंबन्धः तद्धर्माणां च वेदिबर्हिःसंबन्धः प्रतीयते, तथापि हविरासादनमात्रसंबन्धेन बर्हिर्लवनविधेरानर्थक्यात् लौकिकबर्हिषश्च प्रसङ्गात् अवश्यं अपूर्वसाधनताकारितः संबन्धो वक्तव्यः । न चापूर्वसाधनता प्रकरणमन्तरेण लभ्यते । प्रकरणं च नाङ्गानाम्, किन्तु प्रधानस्यैवेति प्रधानमात्रसंबन्ध एव बर्हिषस्तद्धर्माणाम् । तेन यद्यपि प्रकरणं न विशेषकं कर्तृग्राहकमेव, तथाप्यधिकारविध्याकाङ्क्षा खलु प्रकरणम् । ग्राहकत्वं च तस्यैतदेव यदाकाङ्क्षावतोरधिकारविधेरेव ग्राहकत्वम् । स च प्रधानोपकारार्थमेव संनिधिश्रुतान् धर्माननुगृह्णातीति भवत्यर्थाद्विशेषणफलमिति । अतो भवति ग्राहकलक्षणवशादेव वाक्यस्य प्रधानगोचरमेव विनियोजकत्वमिति । तदुक्तम् 'प्रकरणविशेषात्' इति । न च वेद्यादीनां देशरूपत्वात्, देशस्य च प्रयोगाङ्गत्वेनाङ्गप्रधानार्थत्वात्, वेद्यादीनामङ्गप्रधानार्थत्वमेवेति वक्तव्यम् । यतः 'समे दर्शपूर्णमासाभ्यां यजेत' 'प्राचीनप्रवणे वैश्वदेवेन यजेत' इति यागप्रधाने (?) वैश्वदेवस्यैव करणत्वेन देशसंबन्धविधानात् तद्विशेष एव न्याय्यः । वेद्यादीनां तु प्रकरणनियतेन वाक्येन प्रधानमात्रार्थत्वावगमात् प्रधानार्थत्वमेवेति नानुपपन्नम् । नापि द्वादशोपसत्त्ववदविरोधिसंयोगोऽस्ति सर्वेषामेवेति वेद्यादीनां प्रकरणे समावेशात् । तेनोपसद्द्वादशत्ववद्वाक्येन विरोध्यसंयुक्तं बर्हिरादि प्रकरणेन प्रधानमात्रस्यैवेति । **एवं प्राप्ते, अभिधीयते ।**

सर्वेषां वा शेषत्वस्यातत्प्रयुक्तत्वात् । २ ॥

अयमभिप्रायः, भवेदेवं यद्यत्र प्रकरणं विनियोजकं भवेत् । किं तर्हि ? वाक्यमेव । असंयुक्तं हि प्रकरणेन विनियुज्येतेत्युक्तम् । इह चाङ्गप्रधानसाधारणहविरासादनसंयोगेनैव वेदिबर्हिषी श्रूयेते । तद्धर्माश्च वेदिबर्हिर्मात्रसंबन्धेन । अतः कथं प्रकरणवशेन प्रधानमात्रशेषत्वं वेदिबर्हिषोस्तद्धर्माणां च । **ननु एवं** सति प्रकरणस्य वाक्यार्थाव्यवस्थापकत्वे वाक्यमन्यत्रापि प्रसज्येत । तत्रानर्थक्यभिया मा नाम लौकिकं विदधातु, पिण्डपितृयज्ञीये तु दूरस्थे हविरासादने वेदिबर्हिर्विधित्वम् । **नैतदेवम्** । स्यादेवं यदि स्वतन्त्रमत्र वाक्यं विनियोजकं भवेत् । किन्तु दर्शपूर्णमासाधिकारविधिसंनिधिसमाम्नानवशेन तदेकवाक्यतापन्नम् । तेन दर्शपूर्णमासान्तर्गतस्यैव वेदिबर्हिर्विधेः साङ्गसंबन्धः । उच्यते । स्यादेतदेवं यदि वेदिबर्हिषोस्तद्धर्माणां च साक्षात्तद्गतवेदिबर्हिषोः स्वतन्त्रं लवनादिधर्मविधिः । न च पिण्डपितृयज्ञहविर्दर्शपूर्णमासवाक्यान्तर्गतम्, येन तत्रापि धर्मविधिर्भवेत् । तथा च सूत्रम् 'न तद्वाक्यं हि तदर्थत्वात्' (३।७।१।४) इति । दर्शपूर्णमासप्रकरणगृहीतत्वेन तदेकवाक्यत्वं वक्तव्यम् । प्रकरणं च प्रधानस्यैवेति प्रधानसंबन्धः प्राप्नोति, कथमङ्गसंबन्धः ? उच्यते । स्यादेवं यदि बर्हिषस्तद्धर्माणां च साक्षात्प्रधानसंबन्धो भवेत् । किन्तु प्रधानीयहविरासादनद्वारेण वेदिबर्हिषोस्तद्धर्माणां च प्रधानीयवेदिबर्हिर्द्वारेण प्रधानसंबन्धो वक्तव्यः । प्रधानीयत्वं च द्वेधा भवति, प्रधानार्थत्वेन प्रधानोपकारकत्वेन वा । तत्र यदि प्रधानार्थहविरासादनादिसंबन्धः पुरस्क्रियते, तदा वाक्यस्यातिसंकोचो भवेत् । प्रधानोपकारकतामात्राभ्युपगमे तु न वाक्यविरोधो नापि प्रकरणविरोधः । संबन्धत्वं च उपकारकत्वमेव धर्मसंबन्धे प्रयोजकम्, न तु तादर्थ्यम् । तदुक्तम् 'अनुपकारिणि हि स्थितं नोपकरोति, न च तदर्थम्' ('नातदर्थे' इति वार्तिकपाठः) (वा. पृ. १०७६) इति । तेनायं वाक्यार्थः, यद्दर्शपूर्णमासोपकारकं हविः तद्वेद्यां बर्हिषि समासादयति, या दर्शपूर्णमासोपकारिका वेदिस्तां खनति, यद्दर्शपूर्णमासोपकारकं बर्हिस्तल्लुनातीति । दर्शपूर्णमासोपकारकत्वं च यथा प्रधानहविषामेवमङ्गहविषामप्यविशिष्टम् । प्रधानापूर्वगृहीतानामपि धर्माणामङ्गप्रधानार्थत्वं युक्तमेवेति सिद्धम् ।

प्रयोजनम्— पक्षोक्तम् । **सूत्रं तु** सर्वेषामेवाङ्गप्रधानहविरासादनादीनां वेदिबर्हिरादीनां (च) शेषभूताः, शेषत्वस्य प्रकरणाप्रयुक्तत्वादिति । **तौता.**

* यत्र पुनः संकीर्तनं नास्ति, तत्र सर्वं प्रधानार्थमेव अध्यवसातव्यम् । तस्य तु किं केवलस्य अथ साङ्गस्य इत्यत्र विवेकं **'प्रकरणविशेषाद्०'** इत्यारभ्य वक्ष्यति । **वा.** ३।१।१४।२४ पृ. ७४२.

प्रकरणविशेषात्तु विकृतौ विरोधि स्यात् । ३।६।२।९॥

अनारभ्य किञ्चित् सामिधेनीनां परिमाणमाम्नातम् 'सप्तदश सामिधेनीरनुब्रूयात्' इति । तत्र संदेहः किमे-

तत् प्रकृतौ निविशते उत विकृताविति । इदानीमनारभ्य श्रुतानां प्रकृतिगामित्वमपोद्यते । अत्रायं पूर्वपक्षः । यद्यपि पाञ्चदश्यं प्रकरणे श्रूयते तथाप्यनारभ्य श्रुतस्यापि साप्तदश्यस्य पूर्वाधिकरणोक्तन्यायेन प्रकृत्यर्थत्वात् सामिधेन्यनुवचनादेककार्यत्वेन साप्तदश्यपाञ्चदश्ययोर्विकल्प एवेति । **ननु** अनारभ्यवादेन साप्तदश्यस्य सामिधेन्यनुवचनद्वारेण तत्संबन्धिक्रतुमात्रसंबन्धोऽवगम्यते । प्रकरणेन च क्रतुविशेषसंबन्धः । तेन विशेषेण सामान्यस्य बाधात् कुतो विकल्पः ? **स्यादेवं** यदि वाक्यमेव क्रतुविशेषसंबन्धं प्रतिपादयेत् । न त्वेतदस्ति, द्वयोरेव वाक्ययोस्तुल्यरूपत्वात् । किन्तु प्रकरणेन विशेषसंबन्धो वक्तव्यः । तच्च वाक्याद्दुर्बलम् । तेन यावत्प्रकरणेन विशेषसंबन्धः क्रियते, तावद्वाक्यद्वयेन तुल्यबलेन साप्तदश्यपाञ्चदश्ययोः प्रकृतौ विकल्प एवावधार्यत इति । तदुक्तम् '**तत्र नाम विशेषेण सामान्यस्य निराक्रिया । प्रत्यक्षो यत्र संबन्धो विशेषेण प्रतीयते ॥**' इति (वा. पृ. १०३०) । तस्मात् साप्तदश्यमपि प्रकृत्यर्थमेवेति । **एवं प्राप्ते, अभिधीयते ।** भवेदेवं यद्यारभ्यश्रुतानारभ्यश्रुतवाक्ययोः तुल्यरूपत्वं भवेत् । तथाहि, पाञ्चदश्यं प्रकरणेन लब्धापूर्वसंबन्धं वाक्येन विधीयमानमपूर्वीयानपूर्वीययोः संबन्धासंभवात् अपूर्वसामान्यलक्षणया अपूर्वीयसामिधेनीसंबन्धेनैव विधीयते । साप्तदश्यं त्वनारभ्यश्रुतं प्रथममलब्धापूर्वसंबन्धेनैव वाक्येन विधीयते । अतश्च खादिरतादिवत् आनर्थक्यपरिहाराय सामिधेन्यव्यभिचारोपस्थितेनापूर्वेण संबध्यते । न सामिधेनीस्वरूपसंबन्धाविशेषेऽपि प्रकरणश्रुतं वाक्यम् । तत्तु अपूर्वीयसामिधेनीसंबद्धमेव पाञ्चदश्यं विदधाति । अनारभ्य श्रुतं तु सामिधेनीस्वरूपसंबद्धमेव साप्तदश्यं विदधाति । पश्चात्तु तदुपपत्त्यर्थं क्रत्वपूर्वसंबन्ध इति । अतः प्रथमं पाञ्चदश्यावरुद्धे क्रतौ साप्तदश्यस्यानवकाशात् कुतो विकल्पः ? तदुक्तम् '**तुल्यो यद्यपि संबन्धः सामिधेनीः प्रतीष्यते । तथापि क्रतुसंबन्धवैषम्यान्न विकल्प्यते ॥**' ('विकल्पते' इति वार्तिकपाठः ') इति (वा. पृ. १०३०) । **ननु** प्रकृतावनवकाशस्य साप्तदश्यस्य का तर्हि गतिः ? विकृताविति चेत्, न, तत्रापि प्रकृतिवदतिदेशप्राप्तस्य सामिधेन्यनुवचनस्य पाञ्चदश्यावरुद्धत्वेन साप्तदश्यप्रवेशासंभवात् । तेन 'आनर्थक्यप्रतिहतानां विपरीतं बलाबलम्' इति न्यायेन प्रकृतावेव विकल्पेनास्य निवेशोऽभ्युपेतव्य इति । **उच्यते** । स्यादेवं यदि मित्रविन्दाध्वरकल्पासु विकृतिषु साप्तदश्यस्यावकाशो न भवेत् । तासु खलु प्रकरणश्रुतमेव सामिधेनीसाप्तदश्यमस्ति । अतः तेनातिदिष्टस्य पाञ्चदश्यस्य बाधितत्वात् भवति साप्तदश्यस्यावकाश इति । **न च** प्रकरणश्रुतेनैव साप्तदश्यविधानादस्य वैफल्यमिति **वाच्यम्** । उत्पत्तिविनियोगाभ्यां भेदेनार्थवत्त्वात् । अनारभ्य श्रुतेन हि वाक्येन साप्तदश्यं सामिधेनीसंबन्धेनोत्पादितम् । प्रकरणश्रुतवाक्येन च क्रतुविशेषसंबन्धेन विनियुज्यत इति किमनुपपन्नम् ? ।

प्रयोजनम्— पक्षोक्तम् । **सूत्रं तु** प्रकरणविशेषात्पाञ्चदश्यस्य क्रतुविशेषसंबन्धाविशेषात् तद्विरोधिसाप्तदश्यं विकृतौ मित्रविन्दाध्वरकल्पासु भवेदिति । **तौता.**

प्रकरणविशेषात्तु विकृतौ विरोधि स्यात् । ३।६।२।९ ॥

सिद्धान्तसूत्रम् । 'सप्तदश सामिधेनीरनुब्रूयात्' इति अनारभ्य आम्नातम् । तत् किं प्रकृतौ, उत विकृतौ इति संदेहे पूर्वेण पर्णमयीन्यायेन प्रकृतौ साप्तदश्यस्य निवेशः, परन्तु प्रकृतौ पठितेन पाञ्चदश्येन विकल्पः इति उत्सूत्रे पूर्वपक्षे सिद्धान्तः । प्रकरणे दर्शपूर्णमासप्रकरणे यो विशेषः 'पञ्चदश सामिधेनीरन्वाह' इति तस्मात् साप्तदश्यस्य प्रकृतौ निवेशासंभवात् पाञ्चदश्येन विरोधि यत् साप्तदश्यम्, तत् विकृतौ स्यात् । तुशब्दः पूर्वापवादत्वसूचकः । 'विकृतौ एवंजातीयको विधिः स्यात्' इति भाष्यात्तु 'विकृतौ विधिः स्यात्' इति सूत्रे पाठः सिध्यति । तत्र चैवमर्थः, प्रकरणविशेषात् कारणात् साप्तदश्यस्य प्रकृतौ निवेशासंभवेन साप्तदश्यस्य अनारभ्यविधिः विकृतौ एव स्यात् इति । ननु तर्हि 'विकृतौ विधिः स्यात्' इति निश्चितः पाठः कुतो न स्वीक्रियते ? उच्यते । भाष्येऽपि 'एवंजातीयकं विरोधि स्यात्' इत्यपि पाठः टिप्पण्यां प्रदर्शितः, स च ग्रन्थान्तरसंमतः । अतो न निश्चयः । **के.**

* 'प्रकरणविशेषात्तु' इति न्यायस्य स्वरूपम् 'सामिधेनीमात्रसंयोगेन श्रुतस्य साप्तदश्यस्य अक्लृप्तक्रतुसंयोगत्वात् पाञ्चदश्येन प्रकरणक्लृप्तक्रतुसंयोगेन बाधो युक्तः' इति । **सु.** पृ. ४१४, * अनारभ्याधीतत्वात् चित्रत्वस्त्रीत्वयोरेव '**प्रकरणविशेषात्तु०**' इति तार्तीयिकन्यायेन बाधः स्यात् इत्याशङ्का । पृ. ४१४. * क्रीतराजकभोज्यान्नत्ववचनं यदपि अथर्ववेदेऽस्ति (तस्माद्दीक्षितस्य विज्ञातस्य क्रीतराजकस्य भोज्यं भवति–सु. पृ. १४८) तथापि तस्य आहवनीयसंबद्धयज्ञकर्मोपकाराभावात् तदधिकृतत्रयीप्रतिपादिताग्नीषोमीयसंस्थावधिभोजनप्रतिषेधविरोधात् 'प्रकरणविशेषात्तु०' इत्यनेन न्यायेन अधिकृतानधिकृतबलाबलविशेषाभिप्रायेण स्मृतिपक्षनिक्षेपात् भाष्यकारेण उदाह्रियते । **वा.** १।३।२।३ पृ. १८१. * प्रकरणविशेषात् यूपमच्छेष्यतः (यूपं अच्छ एष्यतः यूपं आप्तुं गमिष्यतः) स्थाण्वाहुतिर्विधीयते इति गम्यते । **भा.** १०।१।६।११. * '**प्रकरणविशेषाद्वा तद्युक्तस्य संस्कारो द्रव्यवत् ।**' (३।४।५।१५) इति अग्न्याधेयस्य इष्ट्यर्थाग्निसंस्कारत्वात् श्रुतिवाक्यप्रकरणैः अविरुद्धैः इष्ट्यर्थाग्न्यर्थत्वमवधार्यते । (इदं पूर्वपक्षे) । **वा.** ३।६।४।११, * 'प्रकरण० द्रव्यवत्' इति हि ज्योतिष्टोमप्रकरणगतब्राह्मणशब्दलक्षित-तदपूर्वसाधन-यजमानसंस्कारत्वात् साधुभाषणनियमापूर्वस्य फलप्रतिग्रहणयोग्यत्वाधानार्थं तदाश्रितमेव विज्ञायते । १।३।८।२७ पृ. २८४, * यदि तावत् (ऋत्विजोऽग्नयश्च) पुरुषार्था अपि इत्यभिप्रायः, स वरणभरणयोः प्रकरणाम्नानेन क्रत्वर्थत्वादयुक्तः । उक्तं हि '**प्रकरण० द्रव्यवत्**' इत्यादिषु । ३।७।१९।३९ पृ. ११०२. * वसने विधीयमानं क्षौमं प्रकरणात् आधानसंबन्धिनः पुरुषस्य वसने भविष्यति । यथा जञ्जभ्यमानमन्त्रवचनं 'प्रकरण० द्रव्यवत्' इति न्यायेन प्रकरणे एव व्यवतिष्ठते । **रत्न.** ६।१।५।२२ वर्णकं २. * सिद्धान्तवादी नैव मया (अनृतवदननिषेधस्य) केवलपुरुषार्थत्वमङ्गीकृतम्, किं तर्हि ? 'प्रकरण० द्रव्यवत्' इत्यनेन क्रतुयुक्तपुरुषधर्मः अभिक्रमणवत् विज्ञायते, न सार्वत्रिकः (इति) । **वा.** ३।४।४।१२ पृ. ९०९.

* **प्रकरणविहितं** सामिधेनीसाप्तदश्यं पशुमित्रविन्दाऽध्वरकल्पाऽऽदौ एव अतिदेशप्राप्तपाञ्चदश्यबाधेन निविशते । **वा.** ३।६।२।९ पृ. १०३१.

प्रकरणशब्दसामान्याच्चोदनानामनङ्गत्वम् । ४।४।१।१ ॥

अनुमत्यादय इष्टयः, महूलादयः पशवः, पवित्रादयः सोमाः, वल्मीकवपायां होमः इत्यादयो दर्विहोमाः इति यागरूपा धर्माः पठिताः । 'पष्ठौहीं दीव्यति, राजन्यं जिनाति, शौनःशेपमाख्यापयति, अभिषिच्यते' इति अयागरूपाश्च धर्माः पठिताः । तेषां सर्वेषां संनिधौ 'राजसूयेन स्वाराज्यकामो यजेत' इति श्रूयते । स एष राजसूयः यागरूपाणामयागरूपाणां च धर्माणां समुदायरूपः इति ज्ञायते । तत्र राजसूयशब्दः यागायागसमुदायस्य सर्वस्य वाचकः, उत केषां चिदेव वाचकः केषां चिच्च नेति विचारे पूर्वपक्षयति । प्रकरणे राजसूयप्रकरणे शब्दानां यागबोधकानां अयागबोधकानां च सामान्यात् समानत्वात् चोदनानां चोद्यन्ते इति चोदनाः, तासां सर्वासां चोदनानां चोदितानां यागायागरूपधर्माणां अनङ्गत्वं न अङ्गत्वम्, किन्तु प्रधानत्वमेव । तस्मात् राजसूये इष्ट्यादीनां देवनादीनां च सर्वेषां प्रधानत्वमिति ।

अपिवाऽङ्गमनिज्याः स्युस्ततो विशिष्टत्वात् । २ ॥

राजसूये अनिज्याः इज्याभिन्नाः यागभिन्नाः विदेवनादयः क्रियाः, राजसूयस्य अङ्गं स्युः, न प्रधानम् । यागा एव तु सर्वे प्रधानभूताः । विदेवनादीनां ततः यागात् विशिष्टत्वात् भिन्नत्वात् अयागरूपत्वात् । इति सिद्धान्तसूत्रमिदम् । **के.**

* 'प्रकरणशब्द०' ४।४।१।१ । तथा 'राजसूयेन' इत्यत्र नाम यागायागविषयत्वेन उपप्लवमानं प्रकृतयागप्रसिद्धेन यजिना स्वविषयं नीयते । **वा.** २।२।३।३ पृ. ४७६ । यजिना नामार्थविशेषणे 'प्रकरणशब्द०' इति न्यायमुदाहरति– तथेति । 'राजसूयेन स्वाराज्यकामो यजेत' इति फलविधिपरे वाक्ये यजेः प्रकृतेष्टिपशुसोमयागमात्रानुवादित्वावधारणात् प्रसिद्धार्थेन यजिना नाम विशेष्यते इत्यर्थः । **सु.** पृ. ७२४.

* **प्रकरणसंबन्धकल्पना** फलकल्पनायाः ज्यायसी । **वा.** ३।३।९।१८.

* **प्रकरणसमाख्ययोर्विरोधे** पौरोडाशिकसमाख्यातब्राह्मणाम्नातानां प्रयाजादीनां प्रकरणात् सांनाय्योपांशुयाजार्थत्वं इत्युदाहरणम् । (वा. पृ. ८३७) । शेष्यनेकत्वे इदम् । शेषानेकत्वे तु ' तस्मान्मैत्रावरुणः प्रेष्यति चानु चाह ' इत्येतदेव ज्योतिष्टोमं प्रति उदाहरणम् । तस्य हि समाख्यया होतृकर्तृकं प्रैषानुवचनं प्राप्नोति, प्रकरणात्तु मैत्रावरुणकर्तृकं निर्णीयते । प्रैषानुवचनस्वरूपापेक्षं तु पूर्वत्रोदाहरणमिति भेदः । (वा. पृ. ८३९) । **वा.** ३।३।७।१४.

* **प्रकरणसामान्यं** प्रकरणविशेषेण बाध्यते । **भा.** १०।१।६।११.

* **प्रकरणस्थानयोर्विरोधे** उदाहरणम् । ३।३।७।१४. ' बलाबलाधिकरणम् ' इति बिन्दौ द्रष्टव्यम् ।

प्रकल्प्यापवादमुत्सर्गोऽभिनिविशते इति न्यायः । **संग्रहः** . * ' प्रकल्प्य चापवादविधिमुत्सर्गोऽभिनिविशते ' इति **न्यायेन** सामान्यशास्त्रस्य विशेषशास्त्रविषयातिरिक्तविषयत्वम् । **सना. ध. प्र.** प्र. प्र पृ. २९७.

* **प्रकारो** नाम सामान्यस्य भेदको विशेषः । **मीन्या.**

* **प्रकारविशेष्ययोरेव** शाब्दत्वात्संसर्गस्य उभयसमभिव्याहारगम्यत्वात् संसर्गः संसर्गमर्यादया लभ्यः । इति नैयायिकाः । **मणि.** पृ. १७३.

* यदि परमार्थत एव बद्धः कश्चिदात्मा **प्रकाशाश्रयन्यायेन** (प्रकाशः तदाश्रयश्च सविता अभिन्नौ एव, तथापि अंशांशिभावेन भिन्नावपि भवतः । तद्वत् ।) परस्य आत्मनः एकदेशभूतः अभ्युपगम्येत ततः पारमार्थिकस्य बन्धस्य तिरस्कर्तुमशक्यत्वं स्यात् । **शां. भा.** ३।२।६।२९ ब्रसू .

* **प्रकाशितस्य** प्रकाशान्तरेण न प्रयोजनमस्ति । **टुप्** . ९।४।१।१ पृ. १७६६.

* ' **प्रकृतात्** कर्मणो यस्मात् तत्समानेषु कर्मसु । धर्मप्रदेशो येन स्यात् सोऽतिदेश इति स्थितिः ॥ ' **भा.** ७।१।१।१२.

* **प्रकृतगामित्वं** शब्दस्य न्याय्यम् । **भा.** १२।१।१।४.

* **प्रकृतप्रत्ययः** कल्प्यात् बलवान् । **टुप्.** ६।५।१।२.

* **प्रकृतिः** अग्नीषोमदेवताकस्य कर्मणः अग्नीषोमीयः पुरोडाशः । **भा.** ५।४।८।२५.

[इत आरभ्य ' प्रकृत्या ' इति पददर्शनात् प्राक् ' प्रकृतिः ' इति पदं प्रतिलघुसिद्धान्तं अधिकृतं वेदितव्यम् ।] * अग्नीषोमीयस्य पशोः दर्शपूर्णमासौ । **भा.** ८।१।५।१२ । तत्रापि सांनाय्यम् । ८।२।२।१०–१४ । तत्रापि पय एव, न दधि । ८।२।३।१५–१८, * अध्वरकल्पास्थस्य आग्नावैष्णवादेः अग्नीषोमीयः पुरोडाशः । ८।३।१।१–२, * अध्वरकल्पास्थस्य बार्हस्पत्यचरोः आग्नेयः पुरोडाशः । ५।१।१०।१७–१८, * अध्वरकल्पास्थस्य सारस्वताज्यस्य उपांशुयाजः । ५।१।१०।१७–१८, * अभिजिदादिसोमानां ज्योतिष्टोमः (अग्निष्टोमः सोमः) । ८।१।९।१६, * अहर्गणानां द्विरात्रादीनां द्वादशाहः । ८।१।१०।१७, * अहीनानां अहीनात्मको द्वादशाहः । ८।२।५।२५–२९, * आग्नेयस्य पयसः सांनाय्यगतं पयः । ८।१।१७।३२–३४, * आमिक्षायाः पय एव, न दधि नोभयम् । ८।२।४।१९–२४, * आमिक्षाणां वैश्वदेव्यामिक्षा । ७।३।१०।२६–२७, * इषोः श्येनः । ७।१।२।१३–१६, * इष्टीनां दर्शपूर्णमासौ । ८।१।४।११, * उत्तरसाहस्राणां प्रथमः साहस्रः, उत्तरसाद्यस्क्राणां च प्रथमः साद्यस्क्रः । ८।१।१२।१९, * उद्भिदादीनां अग्निष्टोमः । ८।१।९।१६, * एकदेवताकस्य औषधद्रव्यकयागस्य आग्नेयः पुरोडाशः । ८।१।१६।२७–३१, * ऐकादशिनानां पशूनां सवनीयः पशुः । ८।१।७।१४, * ऐन्द्रस्य एकादशकपालस्य आग्नेयः पुरोडाशः न तु सांनाय्यम्, हविःसामान्यस्य देवतासामान्यात् अन्तरङ्गत्वात् । ८।१।१७।३२–३४, * ऐन्द्राग्नादीष्टीनां दर्शपूर्णमासौ । ८।१।४।११, * कुण्डपायिनामयनस्य सत्रात्मको द्वादशाहः । ८।२।६।३०–३२, * कृष्णलचरोः आग्नेयः पुरोडाशः । ८।१।१८।३५–३९, * गवामयनस्य सत्रा-

त्मको द्वादशाहः । ८।२।५।२४–२८, * गवामयनगतज्योतिरादेः एकाहकाण्डपठितो ज्योतिरादिः । ७।४।३।१३–२०, * गवामयनगतपृष्ठ्यषडहस्य द्वादशाहगतः पृष्ठ्यः षडहः । १०।६।३।४–५, * चित्रायागीयमधूदकयोः उपांशुयाजः । ८।१।१९।४०–४३, * जनकसप्तरात्रस्य द्वादशाहिकः सप्ताहः । ८।३।२।३–५, * न उपशयस्य यूपः । ७।३।१३।३३–३४, * न गवामयनगतप्रायणीयस्य द्वादशाहगतः प्रायणीयः । ७।३।२।५, * न चयनेष्टकापाकसाधनस्य निर्मन्थ्यस्य अग्नीषोमीयपशुगतनिर्मन्थ्यः । ७।३।७।१८, * न राजसूयस्थपूर्वत्रिसंयुक्तगतवैष्णवस्य आतिथ्यागतवैष्णवः । ७।३।६।१७, * पञ्चदशरात्रस्य सत्रात्मको द्वादशाहः । ८।२।६।३०–३२, * पशूनां अग्नीषोमीयः । ८।१।६।१३, * प्राजापत्यपशूनां ऐकादशिनाः पशवः । ८।१।८।१५, * मासाग्निहोत्रस्य नित्याग्निहोत्रम् । ७।३।१।१–४. * मूलभूता अग्निहोत्रहोमः, दर्शपूर्णमासौ, अग्निष्टोमः सोमश्च । **वि.** ८।१।३ वर्णकं २. * यत्र समग्राङ्गोपदेशः, यथा दर्शपूर्णमासादिः । विकृतिः यतः अङ्गानि गृह्णाति सा । **मीन्या.** * वरुणप्रघासगतस्य अवभृथस्य सौमिकोऽवभृथः । **भा.** ७।३।४।१२–१५, * वरुणप्रघासगतानां पञ्चसंचराणां वैश्वदेवपर्वगतपञ्चसंचराणि । ७।१।३।७–२१, * वाजिनस्य सांनाय्यम्, न तु सोमः । ८।२।१।१–९, * विश्वजित्सर्वपृष्ठानां षडहगतपृष्ठानि । ७।३।३।७–१२, * वैश्वदेव्यामिक्षायाः सांनाय्यगतं पयः । ८।२।४।१९–२४, * शतोक्थ्यादिसंस्थागणानां द्वादशाहः । ८।३।४।८–९, * संवत्सरसत्राणां गवामयनम् । ८।१।११।१८, * सवनीयस्य पशोः अग्नीषोमीयः पशुः । ८।१।६।१३, * साकमेधगतस्य एककपालस्य वरुणप्रघासगत एककपालः । ७।१।५।२३, * साकमेधगतयोः ऐन्द्राग्नैककपालयोः वरुणप्रघासगतौ ऐन्द्राग्नैककपालौ । ७।१।४।२२, * सुराग्रहाणां दार्शपौर्णमासिकः पुरोडाशः । ८।२।१।१–९, * सौर्यचरोः आग्नेयः पुरोडाशः । ८।१।१६।२७–३१ । आग्नेयद्वयं विकल्पेन । ८।१।१५।२६, * **प्रकृतिः** स्वरसामैककपालामिक्षाणां कर्मान्तरगतानां गवामयनगतस्वरसामैककपालामिक्षाः । ७।३।१०।२७.

* **प्रकृत्या** विकृतेः प्रधानप्रसङ्गो यथा दर्शश्राद्धेन नित्यश्राद्धस्य । **बाल.** पृ. १४९. * प्रकृत्या हि विकृतिस्तुल्यशब्दा भवति (यजेत जुहुयात् आसीरन् उपेयुः इति) । **भा.** ८।२।५।२५. * **प्रकृतेः** अवान्तरप्रकरणं नास्त्येव, प्रकृत्यङ्गस्य तु भवति यथा प्रयाजानां अभिक्रमणे । **बाल.** पृ. ११. * प्रकृतेः दर्शश्च पूर्णमासश्च कालः । **भा.** १२।२।६।२०. * प्रकृतेर्धर्माणां सादृश्यविशेषेण विकृतौ अतिदेशः । ८।१।२।२.

प्रकृतेः पूर्वोक्तत्वादपूर्वमन्ते स्यात् नह्यचोदितस्य शेषाम्नानम् । ५।२।९।१७ ॥

नक्षत्रेष्टिषु ' सोऽत्र जुहोति अग्नये स्वाहा कृत्तिकाभ्यः स्वाहा ' इत्येवमादयः उपहोमाः समाम्नाताः । प्रकृतितश्च नारिष्ठहोमाः ' दश ते तनुवो यज्ञ यज्ञियाः ' इत्यादयः प्राप्ताः । तत्र किं नारिष्ठहोमाः पूर्वम्, उत उपहोमाः पूर्वे कर्तव्या इति विचारे प्रथमतः सिद्धान्तमाह । विकृतौ चोदकेन प्रकृतेः सकाशात् नारिष्ठहोमानां पूर्वोक्तत्वात् उपहोमेभ्यः पूर्वं प्राप्तत्वात् अपूर्वं विकृतौ विशेषविहितं उपहोमाख्यं कर्म अन्ते नारिष्ठहोमानामन्ते स्यात् । प्रकृतेरुत्पत्तिकाले अचोदितस्य अविहितस्य अनुत्पन्नस्य कर्मणः शेषाम्नानं धर्मत्वेन आम्नानं न संभवति । अतः उत्पत्त्यनन्तरं उत्पन्नस्य कर्मणः संनिधिपाठबलात् अङ्गत्वेन ग्रहणं स्यात् । तस्मात् तत् प्राकृतेभ्यो नारिष्ठहोमेभ्यः पश्चात् स्यात् । ततश्च पूर्वं नारिष्ठहोमाः पश्चात् उपहोमाः स्युः इति सिद्धान्तः ।

मुख्यानन्तर्यमात्रेयस्तेन तुल्यश्रुतित्वादशब्दत्वात् प्राकृतानां व्यवायः स्यात् । १८ ॥

पूर्वपक्षमाह । मुख्यानन्तर्यं वैकृतप्रधानस्य उपहोमानां च आनन्तर्यं आत्रेय आचार्यो मन्यते । तेन वैकृतप्रधानेन उपहोमानां तुल्यश्रुतित्वात् । प्रधानानन्तरमेव हि उपहोमानां पाठः प्रत्यक्षः । प्राकृतानां नारिष्ठहोमानां अशब्दत्वात् विकृतौ साक्षात् शब्देन अविहितत्वात् तेषां प्रागनुष्ठाने वैकृतप्रधानस्य वैकृतोपहोमानां च व्यवायः व्यवधानं स्यात् । तच्चायुक्तम् । तस्मात्

उपहोमाः पूर्वं पश्चात् नारिष्ठहोमाः इति युक्तं इति पूर्वपक्षः । याज्ञिकाश्च एतमेव पक्षं स्वीकुर्वन्ति ।

अन्ते तु बादरायणस्तेषां प्रधानशब्दत्वात् । १९ ॥

बादरायणस्तु आचार्यः अन्ते नारिष्ठहोमान्ते उपहोमान् आह । तेषां नारिष्ठहोमानां प्रधानशब्दत्वात् प्रधानविषयकशाब्दविषयत्वात् । तथा च प्रधानोत्तरं नारिष्ठहोमाः तत उपहोमाः इति सिद्धान्तः ।

तथा चान्यार्थदर्शनम् । २० ॥

नक्षत्रेष्टिषु प्रकृतिप्राप्ता नारिष्ठहोमाः पूर्वं कर्तव्याः ततः तत्तन्नक्षत्रेष्टिपठिता उपहोमाः इति सिद्धान्तं अन्यार्थः वाक्यशेषोऽपि दर्शयति ‘ अध्वरस्य पूर्वमथाग्नेः उपाधि ह्येतत् कर्म यदाग्निकम् ’ इति । अग्निचयने षड् दीक्षाऽऽहुतयः अध्वरस्य सोमस्य कर्मभूताः पूर्वं कर्तव्याः, अथ अग्नेः संबन्धिन्यः ‘ आकूतिमग्निं प्रयुजं स्वाहा ’ इत्यादयः कर्तव्याः । यत् आग्निकं अग्निसंबन्धि कर्म तत् उपाधि औपाधिकं अग्निचयने निमित्ते सति क्रियते इति वाक्यशेषार्थः । अत्र पूर्वं समाम्नातस्य पूर्वमनुष्ठानमित्युक्तम् । तथा च नक्षत्रेष्टिषु चोदकप्राप्तत्वात् पूर्वपठितमिव नारिष्ठहोमात्मकं कर्म पूर्वं कर्तव्यमिति ज्ञायते । **के.**

* प्रकृतेः प्रधानस्य महाप्रकरणम्, असंदंशोद्भूतिकम् (यथा दर्शपूर्णमासादेः), विकृतेस्तु संदंशोद्भूतिकम् । बाल. पृ. ११. * प्रकृतेः प्रसङ्गसिद्धिर्वैकृताङ्गेन प्रकृतिविकृत्योः समानतन्त्रत्वे । कृत्वाचिन्ता । १२।२।१३।३३. * प्रकृतेः फलस्य स्वर्गादेः नियमस्य यावज्जीविकत्वादेः, कर्तुः स्वर्गकामादेः, समुदायस्य आग्नेयादिषट्कस्य विकृतौ नातिदेशः । ८।१।१३।२०–२२. * न केवलायाः (सुप्तिङादिप्रत्ययरहितायाः) प्रकृतेः प्रयोगः, अपभ्रंशत्वप्रसङ्गात् । वा. २।१।१।१ पृ. ३७९. *** प्रकृतौ** (निर्वापे) अग्निहोत्रहवणी वचनाद्भवति । **टुप्.** १०।२।२७।६३. * प्रकृतौ अङ्गानि संक्षेपेण विस्तरेण चोच्यन्ते । ‘पञ्च प्रयाजान् यजति’ इति संक्षेपेण । ‘समिधो यजति’ इत्येवमादिना विस्तरेण । इहापि ‘ यस्य खादिरः स्रुवो भवति’ इत्येवमादि विस्तरः, ‘ यस्यैवंरूपाः स्रुचः ’ इति संक्षेपः । **भा.** ३।६।१।६, * प्रकृतौ अनारभ्याधीतानि पात्राणि निविशेरन् । ३।६।१।२. * प्रकृतौ अनारभ्याधीतस्यापि सामिधेनीसाप्तदश्यस्य न निवेशः । ३।६।२।९. * प्रकृतौ अनुयाजोत्तरकालौ (पिष्टलेपफलीकरणहोमौ) दाक्षिणाग्निकौ दृष्टौ, तथापि अनुयाजोत्कर्षे नोत्कृष्येते । **टुप्.** ५।१।१५।२८. * प्रकृतौ अभिमर्शनद्वयं ‘ चतुर्होत्रा पौर्णमासीमभिमृशेत् पञ्चहोत्राऽमावास्यायाम् ’ इति । **भा.** ८।१।१५।२६. * प्रकृतौ अविद्यमानमङ्गं विकृतौ नातिदेशमर्हति । **वि.** १०।१।४. * प्रकृतौ उपदिष्टपदार्थविषयो भावाभावविकल्पो यथा अग्निहोत्रे दध्यधिश्रयणतदभावयोः विकल्पः ‘ न दधि अधिश्रयेत् , अधिश्रयेत् इत्येके ’ इति बह्वृच(कौषीतकि)ब्राह्मणात् । **बाल.** पृ. १६२, * प्रकृतौ उपदिष्टपदार्थविषये भावविकल्पो यथा मासाग्निहोत्रप्रकृतौ नित्याग्निहोत्रे पयआदिदशद्रव्याणां विकल्पः । पृ. १६२, * प्रकृतौ उपदिष्टपदार्थविषयः समुच्चयः (सोम–)क्रये गवारुण्यादीनाम् , क्रयाणां च ज्योतिष्टोमे । दर्शपूर्णमासयोः अदोषनिर्घातार्थप्रायश्चित्तानाम् । याज्यानुवाक्ययोः च । पृ. १७६. * प्रकृतौ ऊहाभावः । **वा.** ३।२।११।२८. * प्रकृतावेव बहुवचनान्तपाशमन्त्रस्य निवेशः । पाशाधिकरणम् । ९।३।५।१५–२०. * ‘प्रकृतावेव विकारलयः ’ इति न्यायानुगृहीतश्रुत्या भूतेषु विद्रुत्कलाविलयः । **न्यायनि.** ४।२।७ **ब्रसू.** * प्रकृतौ औपदेशिकेन भावेन औपदेशिकस्य भावस्य बाधः यथा व्रीहियवयोः । **बाल.** पृ. १३३, * प्रकृतौ औपदेशिकयोः भावाभावयोः बाध्यबाधकत्वं यथा अग्निहोत्रे ‘ न दधि अधिश्रयेत् , अधिश्रयेदित्येके ’ इति । पृ. १३३. * प्रकृतौ औषधधर्माणां प्रथममनुष्ठेयत्वात् अध्वरकल्पायां बार्हस्पत्यचरुधर्मा एव प्रथममनुष्ठेयाः । किञ्च आग्नेयस्य प्रथमभाविनो विकृतिः बार्हस्पत्यचरुः , उपांशुयाजस्य पश्चाद्भाविनो विकृतिः सारस्वतमाज्यम् । अतः अन्तरङ्गत्वात् चरुधर्मा एव पूर्वभाविनः । **वि.** ५।१।१०. * प्रकृतौ चेदस्ति, चोदकेनैव विकृतिं प्राप्नोति । **भा.** ३।६।१।२.

प्रकृतौ तु स्वशब्दत्वाद् यथाक्रमं प्रतीयेत । ५।१।८।१५ ॥

दर्शपूर्णमासयोः औषधधर्माः निर्वापावघातादयः पूर्वमाम्नाताः, तत आज्यस्य उत्पवनादयः । यागक्रमे पूर्वं आज्यस्य यागः, ततोऽग्नीषोमीयस्य । एवं सति किं पूर्वं आज्यस्य धर्माः कर्तव्याः , उत यथापाठं इति विचारे मुख्यक्रमानुसारेण उपांशुयाजाज्यस्य धर्माः पूर्वं कर्तव्या इति प्राप्तं पूर्वपक्षं तुशब्देन निराकृत्य सिद्धान्तमाह । प्रकृतौ पूर्णमासयागे अङ्गानामनुष्ठानं यथाक्रमम् , यथा पाठक्रमः तथा प्रतीयेत, तथा अनुष्ठातव्यः, पूर्वमग्नीषोमीयपुरोडाशस्य पश्चात् उपांशुयाजाज्यस्येति । स्वशब्दत्वात् स्वः स्वीयः अङ्गक्रमविषयकः शब्दः यस्य तादृशत्वात् । अङ्गक्रमपाठस्य प्रत्यक्षसिद्धत्वात् इत्यर्थः । तथा च पाठक्रमेण प्रबलेन मुख्यक्रमस्य बाधः इति भावः । **के.**

* प्रकृतौ धर्मा यद्द्वारा कृताः , तद्द्वारैव विकृतौ नान्यद्वारा । **भा.** ३।८।१६।२१. * प्रकृतौ निराकाङ्क्षीभूता धर्माः विकृतीर्गमिष्यन्ति । **वा.** ३।३।७।१४ पृ. ८३३. * प्रकृतौ पदार्थस्य स्मरणे सर्वत्र उपायचतुष्टयं प्रसक्तम् — ब्राह्मण–पद–मन्त्र–सूत्रोपद्रष्टारः । **टुप्.** १०।३।२।१५. * प्रकृतौ प्रत्यक्षो विध्यन्तः विकृतौ तु आनुमानिकः । नामधेयं पुनर्विकृतावपि प्रत्यक्षम् । प्रत्यक्षं चानुमानाद् बलीयः । **भा.** ७।४।३।१५. * प्रकृतौ यत्र पाठादिप्रमाणकः क्रमः तत्र तत्पदार्थानन्तरं तत्पदार्थः कार्य इति विशिष्यैव वाक्यकल्पनम्, मुख्यक्रमे तु लाघवात् धर्मिग्राहकप्रमाणबलाच्च आद्यप्रधानधर्मानन्तरं उत्तरप्रधानधर्मा अनुष्ठेयाः इत्येव कल्पनम् , न तु विशिष्य न वा आग्नेयत्वादिप्रवेशः । अतः आतिदेशिकपाठविरोधे एव मुख्यक्रमादेर्दौर्बल्यम् । **भाट्ट.** ५।१।१०. * ‘ प्रकृतौ यथोत्पत्तिवचनमर्थानां तथोत्तरस्यां ततौ तत्प्रकृतित्वादर्थे चाकार्यत्वात् ’ (९।३।१।१) इत्यधिकरणे ‘ अग्नये जुष्टं निर्वपामि ’ ‘ व्रीहीणां मेध सुमनस्यमानः ’ इति व्रीह्यग्निशब्दौ द्रव्यदेवताऽन्तरयुक्तायां विकृतौ ऊह्यौ अनूह्यौ वा इति निर्णयार्थं (संदिह्य पूर्वपक्षयित्वा इत्युत्तरत्रान्वयः ।) किं अर्थप्रकाशनवत् शब्दस्वरूपमपि विवक्षितं न वा इति **संदिह्य** शब्दस्वरूपानादरे समाम्नानानर्थक्यापत्तौ औत्पत्तिकसमाम्नायावगतशब्दस्वरूपमनतिक्रम्य अर्थानां वचनं अभिधानं प्रकृतान्वयि इतिकृत्वा उत्तरस्यामपि ततौ विकृतिविस्तारे तथाभूतं अविकृतमेव शब्दस्वरूपं प्रयोक्तव्यम्, प्रकृतिदृष्टस्यैव शब्दस्वरूपस्य प्रकृतिवच्छन्देन विनियुक्तत्वात् इति ‘ प्रकृतौ यथोत्पत्तिवचनमर्थानां तथोत्तरस्यां ततौ तत्प्रकृतित्वात् ’ इति सूत्रावयवेन **पूर्वपक्षयित्वा** कर्मसमवेतार्थप्रकाशनोद्देशेन विहितानां मन्त्राणां प्रधानवशवर्तित्वेन प्रकृतौ इतिकृत्वा च अर्थप्रकाशननिरपेक्षस्वरूपादरायोगात् , वैकृते च सूर्यनीवाराद्यर्थे अग्निव्रीह्यादिशब्दानां प्रकाशनाख्यकार्याभावात् तत्समर्थशब्दोपादानेन विकृतौ मन्त्रोच्चारणं युक्तं इति ‘अर्थे च अकार्यत्वात् ’ इत्युत्तरावयवेन सिद्धान्तयिष्यते । **सु.** पृ. २८०.

प्रकृतौ यथोत्पत्तिवचनमर्थानां तथोत्तरस्यां ततौ तत्प्रकृतित्वादर्थे चाकार्यत्वात् । ९।३।१।१॥

‘ ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः ’ इत्याम्नातम् , प्रकृतौ च ‘ अग्नये जुष्टं निर्वपामि ’ इति निर्वापमन्त्रः । स ऐन्द्राग्ने चोदकेन प्राप्तः । स किं ऐन्द्राग्ने अविकारेण प्रयोक्तव्यः , उत ‘ इन्द्राग्निभ्यां जुष्टं निर्वपामि ’ इत्यूहेन प्रयोक्तव्य इति विचारः । तथा ‘ इन्द्राय मरुत्वते नैवारमेकादशकपालं निर्वपेत् ’ इत्याम्नातम् । प्रकृतौ च ‘ स्योनं ते... व्रीहीणां मेध सुमनस्यमानः ’ इति मन्त्रः पठ्यते । स किं मरुत्वतीये अविकारेण प्रयोक्तव्यः, उत ‘नीवाराणां मेध सुमनस्यमानः ’ इति ऊहेन प्रयोक्तव्यः इति विचारः । तत्र ‘ तत्प्रकृतित्वात् ’ इत्यन्तेन सूत्रांशेन पूर्वपक्षमाह । यथा प्रकृतौ अर्थानां अग्निव्रीह्यादीनां उत्पत्तिवचनं उत्पत्तौ वचनं शब्दपाठः तथा उत्तरस्यां ततौ विस्तारे विकृतौ स्यात् । यथा प्रकृतौ पठितं तथैव विकृतावपि पठनीयं विकारमकृत्वा । तत्प्रकृतित्वात् तत्प्रकृतिकत्वात् दर्शपूर्णमासप्रकृतिकत्वात् ऐन्द्राग्नादीनाम् । प्रकृतिवत् विकृतौ कर्तव्यम् । तस्मान्नोहः इति पूर्वः पक्षः । अथ तुशब्दस्थानीयेन चशब्देन पूर्वपक्षं व्यावर्तयति । अर्थे ऐन्द्राग्नादिरूपे अग्निपदघटितस्य

निर्वापमन्त्रस्य अकार्यत्वात् अविद्यमानं कार्यं यस्य सः अकार्यः। तस्य भावः अकार्यत्वम्। अग्निपदस्य ऐन्द्राग्ने फलं नास्ति। अदृष्टकल्पना प्रसज्येत। एवं व्रीहिपदेऽपि द्रष्टव्यम्। तस्मात् अग्निपदे व्रीहिपदे चोहः कर्तव्यः इति सिद्धान्तः।

लिङ्गदर्शनाच्च। २॥

सिद्धान्ते हेत्वन्तरमाह। अस्मिन्नर्थे लिङ्गस्य दर्शनं भवति। 'न माता वर्धते न पिता, न भ्राता, न सखा' इति अध्रिगुप्रैषविषयं निषेधवचनं पशुगणविषयकम्। प्रत्यक्षं च मातरं पितरं भ्रातरं वा वर्धमानं पश्यामः। तस्मात् नार्थवृद्धिप्रतिषेधोऽयम्। किन्तु शब्दवृद्धिप्रतिषेधोऽयम्। मातरौ मातरः पितरौ पितरः भ्रातरौ भ्रातरः इति शब्दवृद्धिं प्रतिषेधति। तथा च ऊहनिषेधोऽत्र कृतः। अतोऽवगम्यते अन्ये शब्दा ऊह्यन्ते इति। तस्मात् निर्वापमन्त्रे, 'व्रीहीणां मेध' इत्यादौ च ऊहो भवतीति सिद्धान्तः। किंवा 'विश्वेषां देवानां उस्राणां वपानां मेदसोऽनुब्रूहि' इति ऊहितानां पदानामुच्चारणं ऊहे लिङ्गम्।

[इत उत्तरं तृतीयं सूत्रं अन्तरागर्भिणीत्वात् अन्यत्र गृहीतम्, नात्र।]

अविकारमेकेऽनार्षत्वात्। ४॥

पूर्वपक्षमाह। एके आचार्याः अविकारं विकारस्य ऊहस्य अभावं मन्यन्ते। अनार्षत्वात् ऊहितस्य पदस्य आर्षत्वाभावात् वैदिकत्वाभावात्।

लिङ्गदर्शनाच्च। ५॥

प्राकृतमन्त्रे ऊहो न कर्तव्यो विकृतौ इत्यत्र लिङ्गं दृश्यते। आग्नेये वैकृते पशौ 'अग्नये छागस्य वपाया मेदसोऽनुब्रूहि' इति पठ्यते। ऊहपक्षे नैतत् विधातव्यं भवति। विधानं तु विद्यते, तेन अनूहः सिद्धो भवति। किञ्च, अग्नीषोमीये पशौ श्रूयते 'यद्येकं यूपमुपस्पृशेत् एष ते वायो इति ब्रूयात्, यदि द्वौ एतौ ते वायू इति, यदि बहून् एते ते वायव इति'। यदि ऊहो भवेत् एतदपि न विधातव्यम्, प्राप्तत्वात्। विधानं तु विद्यते, तस्मात् नोहः इति पूर्वपक्षः।

विकारो वा तदुक्तो हेतुः। ६॥

विकृतौ ऊहो न कर्तव्यः इति पूर्वपक्षं वाशब्दो व्यावर्तयति। विकारः ऊहः स्यादेव। तत् तत्र अस्मिन् अर्थे ऊहः कर्तव्य इत्यत्र हेतुः उक्तः 'अर्थे चाकार्यत्वात्' (९।३।१।१) इति। चोदको मन्त्रार्थमनुरुध्यते न मन्त्राक्षराणि। अर्थपराणि हि तानि, न स्वरूपप्रधानानि। तस्मात् ऊहः कर्तव्यः इति सिद्धान्तः।

लिङ्गं मन्त्रचिकीर्षायाम्। ७॥

ऊहो नास्तीत्यत्र पूर्वपक्षिणा यत् लिङ्गमुक्तम् 'अग्नये छागस्य वपाया मेदसोऽनुब्रूहि' इति विधानमिति, तत् मन्त्रचिकीर्षाऽर्थं तस्य पदसमुदायस्य मन्त्रत्वचिकीर्षया। अन्यथा ऊहितस्य मन्त्रत्वं न स्यात्। ततश्च न तेन अनूहसिद्धिः।

नियमो वोभयभागित्वात्। ८॥

ऊहाभावे पूर्वपक्षिणा यदपरं लिङ्गमुक्तम् 'एष ते वायो एतौ ते वायू एते ते वायवः' इति, स नियमः क्रियते। अन्यथा यूपस्पर्शस्य उभयभागित्वं स्यात् अनियमेन सर्वैर्मन्त्रैः संबन्धः स्यात्। तस्मात् 'यदि एकं यूपम्, यदि द्वौ, यदि बहून्' इति तत्रतत्र मन्त्रविशेषस्य नियमः क्रियते। ततश्च तदपि ऊहाभावे न लिङ्गम्। तस्मात् निर्वापमन्त्रादौ विकृतौ ऊहः कर्तव्य इति सिद्धान्तः। **के.**

* '**प्रकृतौ वा द्विरुक्तत्वात्**' ('अद्विरुक्तत्वात्' इत्यपि पाठः ३।६।१।२) इत्यधिकरणे द्विरुक्तत्वदोषापत्तिः कालवैषम्यं चेति सिद्धान्तहेतुद्वयमुक्तम्। तत् अन्योन्यव्यभिचारात् 'सप्तदशो वै प्रजापतिर्यज्ञेयज्ञेऽन्वायत्तः' इति तदधिकरणान्ते एव वार्तिककृदुक्ते प्रत्युदाहरणे प्राकृतद्वारप्रतीक्षणानपेक्षत्वात् प्राप्तिकालवैषम्याभावेऽप्युपदेशातिदेशाभ्यां प्राप्तौ द्विरुक्तताप्रसङ्गः अस्त्येव। तथा फलचमसे सोमसामानविध्ये उच्यमाने विकृतित्वस्य उभयवाद्यसिद्धत्वेन द्विरुक्तत्वोद्भावनायोगात्, नित्यविधेः प्रथमं प्रवृत्तेः, नैमित्तिकविधेस्तु पश्चात् प्रवृत्तेः प्राप्तिकालवैषम्यमस्त्येव। तेन 'नैमित्तिकमतुल्यत्वादसमानविधानं स्यात्' इति सोमधर्मसामानविध्याधिकरणे (३।६।१३।३६) 'अपिच नैमित्तिकः

फलचमसः न सोमधर्मान् ग्रहीष्यति तत्र धर्माः साधारणाः सन्तो द्विरुक्ता इत्युच्येरन्' इति ग्रन्थेन सामानविध्ये द्विरुक्तताप्रसङ्गाभिधानं भाष्यकारीयं उपेक्ष्यमेवेति।

ननु 'सप्तदशो वै प्रजापतिः' इत्यत्र द्विरुक्तत्वप्रसङ्गे सति सामानविध्यायोगात् कथं प्रत्युदाहरणत्वं वार्तिककृता उक्तम्। उच्यते। तदर्थशास्त्रादाविव अत्रानर्थक्यपरिहारः 'प्रकृतौ वा द्विरुक्तत्वात्' इत्यधिकरणपूर्वपक्षप्रयोजनेन कार्यः। पर्णतादावपि एवमेव तदुद्धारः सुवचः। अतश्च प्राप्तिकालवैषम्यमेव अत्र मुख्यो हेतुः सिद्धान्तसिद्धेः। द्विरुक्तताप्रसङ्गस्तु अभ्युच्चयहेतुरेव। अन्यथा हि संशय एव स्यात्। किमतिदेशाभ्युपगमेन द्विरुक्ताख्यमानर्थक्यं परिहर्तव्यम्, किंवा अतिदेशेन प्राप्स्यमानस्यापि पर्णताऽऽदेः पूर्वपक्षप्रयोजनरूपप्रायश्चित्तविशेषप्राप्त्यर्थत्वाभ्युपगमेन आनर्थक्यं इति संदेह एव दुष्परिहरः स्यात्। अभ्युपगतो हि तत्र शतशः अतिदेशादिमन्थरप्रमाणान्तरप्राप्स्यमानस्यापि अर्थस्य पुनर्विधिः प्रयोजनविशेषेण अग्नेरुक्थ्यादौ 'तमुक्थ्येन' इत्यादिना। गवामयने च आद्ययोरह्नोः ऐन्द्रवायवाग्रताविधिना भागधर्मत्वात् प्राप्स्यमानायाः ऐन्द्रवायवाग्रतायाः। तथा तदर्थशास्त्रतायामपि लिङ्गात् प्राप्स्यमानस्य मन्त्रस्य। तथा ज्योतिष्टोमादौ सार्वकाम्यप्राप्तस्य स्वर्गार्थत्वस्य। एवं आम्नातेनार्थवादेन विधित आक्षेप्स्यमानस्यापि प्राशस्त्यस्य। एवमत्रापि। तस्मात् प्राप्तिकालवैषम्यमेव संशयापनयाय उपास्यम् 'प्रकृतौ वा द्विरुक्तत्वात्' इत्यत्र इति निष्कर्षः।

अथ एतदधिकरणप्रयोजनं न सुज्ञेयं इत्यतोऽभिधीयते। यद्यपि 'कोऽर्थः सामानविध्ये चेद् गुणकामप्रवर्तनम्' इति अन्यत्रोक्तम्, तथापि तत् चयनादिक्रियायामेव युज्यते तदाश्रितगुणकामसंभवात्। पर्णताऽऽदिजातेस्तु अक्रियात्वेन तदाश्रितगुणकामो न संभवति। अतः प्रयोजनान्तरं वाच्यम्। तत्र 'पूर्वपक्षे पर्णत्वादीनामुपदिष्टत्वाविशेषेण तल्लोपे प्रकृतौ विकृतौ च प्रायश्चित्तसाम्यम्, सिद्धान्ते तु उपदिष्टातिदिष्टयोर्लोपे प्रायश्चित्तविशेषः' इति **भवदेवः**। तन्न। नहि उपदिष्टातिदिष्टयोर्भ्रेषे प्रायश्चित्तविशेषः क्वापि आम्नातो दृश्यते। अतः प्रयोजनं वाच्यम्। **तदुच्यते**। वाक्यपादाद्ये (३।३।१) 'उच्चैर्ऋचा क्रियते' इत्यादिस्वरस्य 'यदि ऋक्तो यज्ञ आर्तिमियात् भूः स्वाहेति गार्हपत्ये जुहुयात्' इत्यादिनैमित्तिकप्रायश्चित्तस्य च वेदधर्मत्वमुक्तम्। ततो द्वितीयाधिकरणे उत्पत्तिवेदनिबन्धनमिदमुभयं इति पूर्वपक्षिते सिद्धान्तितं विनियोगविधिनिबन्धनमुभयं ऋग्वेदादिना यत् वियुज्यते तत्रोच्चैस्त्वादि, तस्यैव चार्तौ प्रायश्चित्तमिति। ततश्च याजुर्वैदिकात् ज्योतिष्टोमात् तद्विकृतौ, सामवैदिके श्येने वा दीक्षणीयादीष्टयः स्वाङ्गविशिष्टा अतिदिष्टाः, तास्वपि या जुहूः, तत्रापि पर्णता अत्रत्यपूर्वपक्षे याजुर्वैदिकविधिविनियुक्ता, इति तद्भ्रेषे याजुर्वैदिकाङ्गभ्रेषप्रायश्चित्तं कार्यम्, सिद्धान्ते तु तस्याः प्रकृतौ याजुर्वैदिकविधिविनियुक्तेऽपि श्येने सामवैदिकातिदेशविनियुक्तत्वात्सामवैदिकाङ्गभ्रेषप्रायश्चित्तम्। न च ऊहादीनां अनाम्नानादमन्त्रत्वमिव (२।१।९।३४) अतिदेशस्यावेदत्वम्। ऊहप्रवरनाम्नां अमन्त्रत्वं इत्यत्रैव हीदमुक्तम्। अवदानादिविधौ द्रवादिपदवत्, विश्वजिदादौ फलपदवत्, सौर्यादौ अतिदेशवत्, ऊहादेरपि श्रुतार्थापत्तिकल्प्यस्य 'अर्थाद्वा कल्पनैकदेशत्वात्' (१।४।१४।२५) इति वेदैकदेशत्वोक्तेः वेदत्वाभ्युपगमेऽपि मन्त्रो ब्राह्मणं इत्युक्तं द्वैराश्यं प्रत्यक्षवेदस्यैव, न कल्प्यस्य इति प्रसङ्गात् वक्तुं एतदधिकरणम् (२।१।९।३४) इति। बाल. पृ. १०४–१०६.

* 'प्रकृतौ वा०' तव द्विरुक्तत्वात्, अद्विरुक्तत्वाद्वा मम इति सूत्रम्। वा. ३।६।१।२, * किमाहवनीयादयः प्रकृत्यर्थाः, आहोस्वित् सर्वार्थाः इति संशये 'तत् प्रकृत्यर्थं यथाऽन्येऽनारभ्यवादाः' '**प्रकृतौ वा०**' इति पूर्वपक्षे। ३।७।१९।३९ पृ. ११०४, * 'ततश्चाहवनीयेन सहैवास्यातिदेशतः। प्रकृतौ वा द्विरुक्तत्वादित्ययं निश्चयो भवेत्॥' ३।७।१९।३९, * प्रतिषेधः प्राप्तिमात्रापेक्षित्वात् उपदेशमतिदेशं वा अनादृत्य उभयत्रापि (प्रकृतौ विकृतौ च) प्रवर्तते। शक्यं तु इह वक्तुम् 'प्रकृतौ वा०' इति। ३।३।१३।३३ पृ. ८७८–८७९, * स च (प्रवर्ग्यः) 'प्रकृतौ वा०' इत्येवं ज्योतिष्टोमं गच्छति। ३।३।१२।३२.

❀ प्रकृतौ वा द्विरुक्तत्वात् इति न्यायः अनारभ्याधीतानाम्। साहस्री. ८६४.

* 'प्रकृतौ वा०' इति न्यायेन सर्वप्राणिद्रव्यकयागप्रकृतिभूताग्नीषोमीयपरं चित्रापदम्। पूर्वपक्षः। कौ. १।४।३।३ पृ. १७४. * अनारभ्याधीतत्वेऽपि अग्न्यमिचरितक्रत्वन्वयाभिः उपसद्भिः वाक्यकृतेनान्वयेन क्रत्वन्वयं प्राप्तस्य 'प्रकृतौ वा०' इति न्यायेन ज्योतिष्टोमे गमनम्। सु. पृ. १३१०. * 'पुरस्तादुपसदां प्रवर्ग्यं प्रवृणक्ति' इति वाक्यादेव 'प्रकृतौ वा०' इति न्यायेन प्रवर्ग्यस्य प्रकृतिगामितासिद्धिः। सोम. ३।३।१२. * प्रवर्ग्यस्य निषेधपक्षेऽपि 'प्रकृतौ वा०' इत्यनेन न्यायेन विकृतिविषयत्वायोगात् प्रकृतिमात्रविषयत्वावगतिः (इति आक्षेपग्रन्थः)। सु. पृ. १३१७. * प्राणियागमाकाङ्क्षन्ती चित्रत्वस्त्रीत्वे 'प्रकृतौ वा०' इत्यनेन न्यायेन सर्वप्राणियागपरमप्रकृतिमग्नीषोमीयं गच्छतः। पूर्वपक्षे। वा. १।४।२।३ पृ. ३२८. * 'विश्वजिति सर्वपृष्ठे ग्रहीतव्याः (अतिग्राह्याः) अप्यग्निष्टोमे' इत्यत्र वर्तमानोऽग्निष्टोमशब्दः 'प्रकृतौ वा०' इति न्यायेन प्रकृत्यग्निष्टोमपरः। संकर्ष. ३।३।२. * वैदिकस्य गुणविधेर्विषयापेक्षायां वैदिकत्वसामान्येन बुद्धिस्थत्वात् वैदिकयोरेव आलम्भनिर्वापयोर्विषयत्वावगतेः 'प्रकृतौ वा०' इत्यनेन न्यायेन प्राकृतालम्भनिर्वापविषयतैव अवधार्यते। सु. पृ. ९२५. * अग्निष्टोमशब्दस्य 'प्रकृतौ वा०' इति न्यायात् ज्योतिष्टोमे एव प्रचुरप्रयोगाद्वा तदुपस्थापकत्वोपपत्तिः। कौ. २।३।१०।२२ पृ. ६८. * अनारभ्याधीतत्वात् प्रवर्ग्यस्य प्रकृतौ विहितस्य सतः अतिदेशेन विकृतावपि उपसदां प्राप्तिसिद्धेः अद्विरुक्तत्वलाभाय 'प्रकृतौ वा०' इति न्यायात् ज्योतिष्टोमे एवोपसदा सह विधानं युक्तम्। कल्पतरुः. ३।३।१४।२५ ब्रसू. पृ. ७८७. * यस्य सामान्यतः क्रतुशेषत्वमवगतम्, तस्य किं क्रतुशेषत्वं इत्यपेक्षायाम् 'प्रकृतौ वा०' इति न्यायात् प्रकृत्यर्थत्वं स्यात्, आधानस्य तु अग्निमात्रशेषतया क्रतुशेषत्वमेव नास्ति इति नास्य प्रकृतिगामित्वम्। सोम. ३।६।५. * अथवा सर्वयागानुवादेन गुणविधानात् नात्र ('चित्रया यजेत पशुकामः' इत्यादौ) 'प्रकृतौ वा०' इति न्यायप्राप्तिः। अतिदेशात् पूर्वमुपदेशप्रवृत्तौ अतिदेशस्यैव अकल्पनेन द्विरुक्तत्वाभावात्। कौ. १।४।३।३ पृ. १७५. * प्रकृतौ विकृतौ उभयभिन्ने च कर्मणि समानविधानो निषेधो यथा 'शूद्रानीतैः क्रयक्रीतैः कर्म कुर्वन् पतत्यधः।' इति कुशनिषेधः। बाल. पृ. ३५, * प्रकृतौ वैकल्पिकयोः बृहद्रथंतरयोः अदृष्टार्थयोः अन्यतरस्य क्वचित् विकृतौ नियमः, अयं नियमविधिः अदृष्टार्थः। पृ. २४, * प्रकृतौ वैरूप्यलक्षणवाक्यभेदः वाजपेयगुणविधिपक्षे यज्ञौ कर्मकरत्वरूपम्, उद्देश्यत्वोपादेयत्वरूपम्, गुणप्रधानत्वरूपम्, विधेयत्वानुवाद्यत्वरूपं चेति। पृ. १८१. * प्रकृतौ (दर्शपूर्णमासयोः) स्वाहाकारस्य अर्थवत्त्वं नारिष्ठहोमेषु पार्वणहोमयोश्च 'पूर्णमासाय सुराधसे स्वाहा' इति। भा. ८।४।५।१५. * प्रकृत्योः प्रधानप्रसङ्गो यथा— काम्येनाग्निहोत्रेण नित्याग्निहोत्रस्य प्रसङ्गः। बाल. पृ. १४९.

* प्रकृत्यर्थं नैमित्तिकं सामिधेनीसाप्तदश्यादि। ३।६।३।१०. * प्रकृत्यर्थः अनारभ्यविधिः। ३।६।१।१—८. * प्रकृत्यर्थस्य प्रत्ययार्थे अन्वयः व्युत्पत्तिसिद्धः। रहस्य. पृ. ६०—६१.

❀ प्रकृत्यर्थत्वात् पौर्णमास्या भ्रियेरन्। ११। ३।१४।४५॥

यज्ञपात्राणि यावज्जीवं धारयितव्यानीत्युक्तम्। तानि किं पौर्णमास्या आरम्भे धारयितव्यानि, उत अग्न्याधेयमारभ्य इति विचारे पूर्वपक्षमाह। पौर्णमास्याः आरम्य यज्ञपात्राणि भ्रियेरन् धार्याणि। प्रकृत्यर्थत्वात् अनारभ्योक्तत्वेन दर्शपूर्णमासार्थानि एतानि। पौर्णमास्यामेषामुत्पत्तिः। तस्मात् पौर्णमासीमारभ्य धारयितव्यानि।

अग्न्याधेयाद्वाऽविप्रतिषेधात् तानि धारयेन्मरणस्यानिमित्तत्वात्। ४६॥

न पौर्णमासीमारभ्य धारणं किन्तु अग्न्याधेयादारभ्य तानि धारयेत्। एवं सति मरणस्य अनिमित्तत्वात् अनियतत्वात् प्राक् पौर्णमास्याः मरणेऽपि अविप्रतिषेधात् शरीरसंस्कारलोपाभावेन विप्रतिषेधाभावात्। यद्यपि पात्राणि पौर्णमास्यामुत्पद्यन्ते तथापि चोदकेन अग्न्याधेये पवमानेष्टिषु प्राप्तानि भवन्ति। तस्मात् अग्न्याधेयमारभ्यैव यज्ञपात्रधारणं इति सिद्धान्तः। के.

* प्रकृतिगतः आरादुपकारकक्रियानिषेधो यथा 'न प्रथमयज्ञे प्रवृञ्ज्यात्'। बाल. पृ. ३५. * प्रकृतिगतानां कार्यकृद्धर्माणामेव विकृतौ अतिदेशः। वि. ३।८।१७. * प्रकृतिगतानां गुणकामानां विकृतौ नातिदेशः। ८।१।१४।२३—२५.

* प्रकृतिगतप्रतिपत्तिनिषेधो यथा 'अग्निहोत्रहवण्याश्च लेहः' इति कलौ निषेधः। बाल. पृ. ३६.

* प्रकृतिगतप्रतिपत्तिव्यतिरिक्तदृष्टार्थसंनिपातिक्रियानिषेधो यथा अग्निहोत्रहोमे हुते 'अग्निमुपतिष्ठते' इति विधाय 'तस्मान्नोपतिष्ठेत' इति शतपथे दृष्टार्थाग्निसंस्कारकसंनिपात्युपस्थाननिषेधः। बाल. पृ. ३६.

* प्रकृतिगतसंनिपत्योपकारकादृष्टार्थ–क्रियानिषेधो यथा 'मधुपर्के च सोमे च अप्सु प्राणाहुतीषु च। नोच्छिष्टो भवति द्विजः' इति। अत्र आचमननिषेधः। बाल. पृ. ३६.

* प्रकृतिगतसामिधेन्यादिसमुदायस्य एकदेशे एव विकृतौ विहिते अधिकानां लोपः कर्तव्यः। स च अन्त्यानामेवाधिकानाम्, न प्रथमादीनाम्। अयमेव कपालन्यायः, अन्त्यलोपाधिकरणं च। १०।५।१।१—६.

* प्रकृतिगतहविर्बाधः सौर्यचरौ चरुशब्दवाच्यौदनेन। १०।१।१०।३६—४६.

* प्रकृतितोऽपि अनूयाजोत्तरत्वस्य अप्राप्तेः पुरोडाशायङ्गेडाभक्षणोत्तरमेव पिष्टलेपफलीकरणहोमौ। भाट्ट. ५।१।१५.

* प्रकृतिदृष्टपौर्वापर्यस्यैव नियामकान्तराभावे नियामकत्वाङ्गीकारात् साद्यस्के सवनीयस्य प्रथममुपाकरणम्, तदुत्तरं दैक्षस्य, तदुत्तरमनूबन्ध्यस्य। भाट्ट. ५।१।६.

* 'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः' इत्यनुशासनं संबन्धसामान्याभिप्रायकम्। कौ. १।४।६।६ पृ. २१९, * 'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः' इत्यनुशासनेन प्रत्ययानां नियमेन प्रकृत्यर्थान्वितस्वार्थबोधकत्वावगतेः ('सोमेन यजेत' इत्यादौ) शुद्धभावनाविधानानुपपत्तिः। वस्तुतो धात्वर्थावच्छिन्नभावनाभिधानेऽपि धात्वर्थावच्छेदस्य प्रमाणान्तरप्राप्तत्वात् विशेष्यमात्रांशे विधिफलोपपत्तेः। (इदं पूर्वपक्षे)। २।२।१।१ पृ. १३८. * 'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः' इत्याचार्योपदेशात् कर्ता शब्दार्थः कर्म चेत्यवगम्यते। कर्तरि शप्, कर्मणि यक् इति प्रत्ययार्थं कर्तारं कर्म च समामनन्त्याचार्याः। तस्माच्छब्दार्थः कर्ता कर्म चेति। उच्यते। नाचार्यवचनात् सूत्रकारवचनात् वा शब्दार्थो भवति। प्रत्ययादसौ गम्यते। अनुष्ठेया च क्रिया प्रतीता सती कारकाणि प्रत्याययति इत्यवगतमेतत्। भा. ३।४।४।१३ पृ. ९२२—९२३। यद्यपि कर्ता शब्दार्थः इत्येवमाचार्या वदेयुः, तथापि स्वविषयादन्यत्र वदन्तो नादर्तव्या भवेयुः। ते तु नैव तथा वदन्ति (अन्यस्तदभिप्रायो वर्णनीयः इत्यर्थः)। वा. पृ. ९२२. * 'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः' इति स्मृत्यनुसारात् धातोरपि भावार्थोपपत्तिः। सु. पृ. ५८४. * 'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः'। प्रकृतिः स्वार्थं प्रत्ययार्थविशेषणत्वेनोपनयति इति प्रत्ययेन सह तदर्थमाहेत्यर्थः। स चोक्तसिद्ध्यर्थं विशिष्टे एवार्थे प्रत्ययो यत् प्रयुज्यते, तत् पूर्वतरविज्ञातप्रकृत्यर्थविशेषणात्। वाक्यार्थ. पृ. १२. * 'दध्ना जुहोति'। दधिहोमसंसर्गस्य अत्र 'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः' इति विशेषानुशासनबलेन पदार्थविषया भानेऽपि संसर्गमर्यादया तस्य तत्तात्पर्यकत्वाभावात् न पर्यवसन्नत्वम्। कौ. १।४।१९।२९ पृ. २९५, * नहि अत्र ('सोमेन यजेत' इत्यादौ) संसर्गः अन्यसंसर्गवत् संसर्गविधया भासते 'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः' इति साहित्यरूपसंसर्गांशे अनुशासनवैयर्थ्यापत्तेः। अपि तु पदार्थविधयैव शक्त्या निरूढलक्षणया वा। (इदं पूर्वपक्षे)। २।१।२।१ पृ. ६. * यत्तु 'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः' इति, तत् कर्मनिमित्तेषु नामपदेषु पाचको लावक इत्येवमादिषु। आख्याते तु न कर्ता, न क्रिया प्रधानतः, किं तर्हि ? भावप्रधानमाख्यातम्। भा. ११।१।४।२४. * 'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः तयोस्तु प्रत्ययः प्राधान्येन' इति शाब्दिकाः। वि.

३।४।८. * 'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः तयोः प्रत्ययस्तु प्राधान्येन' इति स्मृत्यैव प्रकृत्यर्थनिरूपितप्रत्ययार्थप्राधान्यस्य सुबर्थसाधारण्येन सिद्धिः । रहस्य. पृ. ३८. * 'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः तयोस्तु प्रत्ययः प्राधान्येन' इति स्मृत्या प्रत्ययार्थस्य प्राधान्यावगतेः (विशेष्यत्वाव० इति पाठः) कथं प्रकृत्यर्थस्य व्यापारस्य विशेष्यता इति न च वाच्यम् । 'भावप्रधानमाख्यातम्' इति निरुक्तस्मृत्या भावशब्दवाच्यव्यापारस्य प्राधान्यावगतेः, तस्य च 'धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयते' इति वैयाकरणस्मृत्या धातुवाच्यत्वावगतेः । विशेषस्मृत्यनुरोधेन सामान्यरूपायाः प्रत्ययार्थप्राधान्यस्मृतेः सुबादिविषयत्वेन व्याख्यानात् । वस्तुतस्तु नेयं प्रत्ययार्थप्राधान्यस्मृतिः प्रत्ययार्थत्वावच्छेदेन प्राधान्यनियामिका, लिङ्गसंख्यादेः प्रत्ययार्थत्वेऽपि प्राधान्यानङ्गीकारात् । नापि प्रधानस्य सतः प्रत्ययार्थत्वनियमपरा, 'सत्त्वप्रधानानि नामानि' इति स्मृत्या लिङ्गसंख्यादीन् प्रति प्रधानस्यापि प्रातिपदिकार्थस्य प्रत्ययार्थत्वाभावात् । किन्तु यत्रैव प्रमाणान्तरेण सुबर्थस्य करणत्वादेः प्रातिपदिकार्थं प्रति प्राधान्यं प्रसिद्धम्, तदनुवादमात्रमियं स्मृतिः इति नानया व्यापारस्य धात्वर्थत्वेऽपि विशेष्यताप्रतिबन्धः । कौ. २।१।२।५ पृ. १५, * प्रातिपदिकार्थः प्रधानभूते कारकरूपे प्रत्ययार्थे अन्वेति, 'प्रकृतिप्रत्ययौ प्रत्यार्थं सह ब्रूतः तयोस्तु प्रत्ययः प्राधान्येन' इति स्मृत्या प्रत्ययार्थस्य प्रकृत्यर्थं प्रति प्राधान्यावगमात् । सामान्यस्मृतिरपीयं प्रमाणान्तरानुसारात् कारकादिविषयैव न तु संख्यादिविषयाऽपि, अन्यथा प्रातिपदिकार्थस्य सत्त्वसमाख्याऽनुपपत्तेः । २।१।२।५ पृ. ३०.

* 'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः, तयोः प्रत्ययार्थः प्राधान्येन' इति आचार्याणां प्रत्ययार्थप्राधान्योपदेशः । सु. पृ. १४१७, * 'प्रकृतिप्रत्ययौ प्रत्यथार्थं सह ब्रूतः, तयोः प्रत्ययार्थः प्राधान्येन' इति प्रत्ययार्थप्राधान्यस्मृतिः । पृ. १०१४, * 'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः तयोः प्रत्ययार्थः प्राधान्येन' इति प्रत्ययार्थप्राधान्यस्मृतेश्च कर्तृसंख्यादेः प्रत्ययार्थस्य प्राधान्याभावात् प्रत्ययार्थः प्रधानमेव इति नियमायोगेऽपि प्रत्ययार्थ एव प्रधानं इति नियमोपपत्तिः । पृ. ५६६, * 'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः, तयोः प्रत्ययार्थः प्राधान्येन' इति सामान्यस्मृतेः 'भावप्रधानमाख्यातम्' इति विशेषस्मृत्या बाधात् भावनायाः एव प्राधान्यात् प्रत्ययार्थता युक्ता । (इति चेत् उच्यते) धात्वर्थातिरिक्तायाः भावनायाः स्वरूपेणैव सिद्धायाः प्राधान्यप्रत्ययार्थत्वयोः दूरोत्सारितत्वात् 'धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयते' इति भावशब्दस्य स्वतन्त्रधात्वर्थवाचित्वस्मृतेः विशेषस्मृतिबलेन प्रकृतिप्रत्ययार्थप्राधान्यविपर्ययमभ्युपगम्य कर्तृविशिष्टयागाद्यभिधानं युक्तम्, न तु भावप्राधान्यपरेयं स्मृतिः इति । पृ ५४७, * 'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः, तयोः प्रत्ययार्थः प्राधान्येन' इति स्मरणं आख्यातेऽपि अपवादाभावोक्त्यर्थम् । पृ. १३७१.

* आख्यातवाच्यैव भावना, न धातुवाच्या, प्राधान्येन प्रतीयमानस्य व्यापारस्य धात्वर्थतायाः 'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः, तयोः प्रत्ययार्थस्य प्राधान्यम्' इति न्यायविरुद्धत्वात् । इति मीमांसकाः । भूषणसार. धात्वर्थनिर्णये अष्टमकारिकावतरणम् ।

* 'प्रकृतिप्रत्ययौ ब्रूतः प्राधान्येन सहेति यत् । भेदेनैवाभिधाने हि प्राधान्यं तत् तयोच्यते ॥ स्याच्चेत्स उभयोर्वाच्यः प्रत्ययार्थः कथं भवेत् । व्यपदिश्येत नैकेन यद्यर्थ उभयोरसौ ॥ सर्वदा तूच्यते यस्मात् प्रकृत्यर्थोपसर्जनः । तेनासावुभयोरर्थः प्रयोजनतयोदितः ॥ याऽन्याऽवयवशक्तिभ्यां शक्तिः का चित् पदाश्रया । विद्यते यत एकस्माद्विशिष्टार्थगतिर्भवेत् ॥' इति । शब्दे प्रकृतिप्रत्यययोरपि अन्विताभिधानस्य निरस्तत्वात्कृतानुबन्धमेव स्वार्थं प्रत्ययो वदति इत्याशङ्का । सु. पृ. ७०७–७०८.

'* प्रकृतिप्रत्ययौ सहार्थं ब्रूतः, तयोः प्रत्ययः प्राधान्येन' इत्युक्तत्वेन प्रधानार्थवाचकप्रत्ययस्यैव प्राधान्यम् । अद्वैत. २।२९ (३०) । ४१–४२.

* 'प्रकृतिप्रत्ययौ सहार्थं ब्रूतः तयोः प्रत्ययार्थस्य प्राधान्यम्' इति प्रत्ययार्थप्राधान्यबोधकस्मृतेः 'भावप्रधानमाख्यातं' इति विशेषस्मृत्या बाधः । किंच तस्याः प्रमाणान्तरसिद्धप्राधान्यानुवादकत्वं इति वैयाकरणाः । मणि. पृ. १०५.

* 'प्रकृतिप्रत्ययौ सह ब्रूतः' इत्यनुशासनमपि कारकत्वरूपान्वयस्य पदार्थविधया भाननियमपरम्, न तु संबन्धसामान्यस्य । कौ. १।४।६।८ पृ. २२३. * प्रकृतिप्रत्यययोः अन्वयव्यतिरेकाभ्यां प्रत्येकं अर्थप्रत्यायनशक्त्यवगमः । सु. पृ. ६८४. * प्रकृतिप्रत्यययोः केवलयोः प्रयोगासंभवः । वा. २।२।१।१ पृ. ४६३. * प्रकृतिप्रत्यययोः पौर्वापर्यनियमात् शुद्धप्रत्ययार्थानुपलब्धेः धात्वर्थस्य अनुरञ्जकता सर्वत्राविशिष्टा । सु. पृ. ७६९. * प्रकृतिप्रत्यययोः प्रत्ययार्थशेषत्वम् । वा. २।२।१।१ पृ. ४६३, * प्रकृतिप्रत्यययोः शक्तिभेदात् पूर्वाभिहितेऽपि (विशेषणे) प्रत्ययेन विशेष्याभिधानं अविरुद्धम् । ३।२।८।२१ पृ. ७७७, * प्रकृतिप्रत्यययोः स्वार्थाभिधाने स्मृतेराचाराच्च नित्यविवक्षितक्रमत्वेन पूर्वप्रयुक्तप्रकृत्यर्थव्यासेषु प्रतिपत्तृषु प्रत्ययांशः संनिपतन् कृतानुबन्धमेव स्वार्थं वदति, तस्मान्न कदाचित् प्रत्ययार्थः शुद्धो लभ्यते । २।२।१।१ पृ. ४६५, * प्रकृतिप्रत्यययोः स्वार्थवृत्तयोरेव नैरन्तर्यात् अन्तराले संबन्धोऽवगम्यमानो भवति । २।२।९।२३ पृ. ५३४, * प्रकृतिप्रत्यययोः स्वस्वार्थाभिधातृत्वं अभिधात्री श्रुतिः । ३।१।७।१३ पृ. ७००. * प्रकृतिप्रत्यययोर्हि प्रत्ययार्थस्य प्राधान्यं इत्युत्सर्गः । बृहती. पृ. १३.

* **प्रकृतिप्रत्ययान्वाख्यानस्मृतेः** 'पदावधारणोपायान् बहूनिच्छन्ति सूरयः । क्रमन्यूनातिरिक्तत्वस्वरवाक्यश्रुतिस्मृतीः ॥' इति पदभेदावधारणोपायत्वेन इष्टत्वात् । सु. पृ. ८३३.

प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्यमिति न्यायः ॥ यथा औपगवो वापक इत्यादौ हि प्रत्ययार्थस्य अपत्यकर्त्रादिरूपस्य प्राधान्यं यातीत्यादिक्रियान्वयात्, एवमन्यत्रापि बोध्यम् । साहस्री. ६०.

* प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्यात् प्रातिपदिकं गौणमित्यापद्यते । वा. ३।७।४।१०. * प्रकृतिप्रत्ययार्थयोर्भिन्नार्थयोरपि सतोः पूर्वं प्रत्ययोच्चारणं (प्रत्ययोच्चारणात् प्राक्) प्रकृतेः स्यात् न किञ्चित् प्रत्यायितं भवेत् । विशिष्टक्रमकौ तु तौ प्रत्याययतः । टुप्. १०।३।११।४२.

* **प्रकृतिप्रत्ययादयः** । 'शक्तयः सर्वभावानां नानुयोज्याः स्वभावतः । तेन नाना वदन्त्यर्थान् प्रकृतिप्रत्ययादयः ॥' वा. २।१।१।१ पृ. ३७८.

* **प्रकृतिप्रत्ययोभयावृत्तिलक्षणः** वाक्यभेदः । बाल. पृ. १८१.

* **प्रकृतिप्रधानेन** अङ्गस्य प्रसङ्गो यथा काम्येन अमावास्याश्राद्धेन यात्राद्यङ्गभूतश्राद्धस्य । बाल. पृ. १५०, * **प्रकृतिप्रधानस्य** स्वाङ्गविकृत्या सह प्रधानाङ्गतन्त्रं यथा 'यस्योभयं हविरार्तिमार्च्छेत् ऐन्द्रं पञ्चशरावमोदनं निर्वपेत्' अत्र सांनाय्ययागाङ्गभूतया आग्नेययागविकृतिभूतया इष्टया सह सांनाय्ययागस्य तन्त्रम् । पृ. १४८.

* **प्रकृतिप्राप्तखादिरत्वादेर्वैकृतौदुम्बरत्वेन** बाधः । १०।७।१८।६१–६३.

* **प्रकृतिप्राप्तद्रव्यदेवतादीनां** विकृतावुपदिष्टद्रव्यदेवतादिभिर्बाधः । १०।७।१७।५८–६०.

* **प्रकृतिप्राप्तयवादीनां** सोमारौद्रादौ विहितैः शुक्लादिव्रीहिभिः बाधः । १०।७।१९।६४–७१.

* **प्रकृतिमात्रोहः** यथा 'सूर्याय जुष्टम्' इति । नात्र लिङ्गं वचनं चोह्यते । बाल. पृ. १२६.

* **प्रकृतिरूपं** वैदिकं कर्म अग्निहोत्रदर्शपूर्णमासादि । बाल. पृ. ८५.

* **प्रकृतिलिङ्गेन** च विध्यन्तविशेष उक्तः 'यस्य लिङ्गमर्थसंयोगात्' (८।१।२) इति । के. * **प्रकृतिलिङ्गयोरेव** ऊहो यथा 'अग्नये जुष्टम्' इति प्रकृतौ । 'अदित्यै जुष्टम्' इति विकृतौ । बाल. पृ. १२७.

* **'प्रकृतिलिङ्गासंयोगात्'** (१०।४।१।१–२) इत्यधिकरणे नक्षत्रेष्टौ उपदिष्टानामुपहोमानां अतिदिष्टानां नारिष्ठहोमानां च समुच्चयः उक्तः । बाल. पृ. १७७.

प्रकृतिलिङ्गासंयोगात् कर्म संस्कारं विकृतावधिकं स्यात् । १०।४।१।१॥

नक्षत्रेष्टिषु 'अग्नये स्वाहा कृत्तिकाभ्यः स्वाहा' इत्यादय उपहोमा विहिताः । नारिष्ठहोमाश्च प्रकृतेश्चोदकप्राप्ताः । तत्र विकृतौ कृत्तिकादीष्टौ संस्कारं संस्क्रियते अदृष्टविशेषविशिष्टं क्रियते अनेन तत् नारिष्ठहोमात्मकं कर्म अधिकं स्यात् । उपहोमाः नारिष्ठहोमैः समुचीयन्ते

इत्यर्थः। कुतः ? प्रकृतिलिङ्गासंयोगात् प्रकृतेः लिङ्गेन कार्येण संयोगाभावात्। तथा च प्राकृतकार्योपस्थापक-शब्दसंयोगाभावादुपहोमादिलक्षणं कर्म संस्कारं अदृष्टार्थं प्राकृतादधिकं स्यात्, न तु बाधः इति सिद्धान्तः।

अथ **द्वितीये वर्णके** इदं सूत्रं पूर्वपक्षसूत्रत्वेन व्याख्येयम्। सूत्राक्षरार्थस्तु स एव, केवलं उदाहरणानुसारिणः शब्दा भिन्नाः। तद्यथा, भाष्यम्— इदमाम्नायते 'सोमारौद्रं चरुं निर्वपेत् कृष्णानां व्रीहीणां अभिचरन्' इति। तत्रेदं श्रूयते 'शरमयं बर्हिर्भवति' इति। तत्र संशयः किं कुशमयं निवर्तते नेति। किं प्राप्तम् ? उभयस्य प्रमाणावगतत्वात् चोदकेन कुशानाम् 'शरमयं बर्हिः' इति विशेषवाक्येन च शराणां समुच्चयः। इति पूर्वः पक्षः।

अथ **तृतीयं वर्णकम्**। वाजपेये 'रथघोषेण माहेन्द्रस्य स्तोत्रमुपाकरोति' इति श्रुतम्। प्रकृतौ तु 'उपावर्तध्वमिति दर्भाभ्यां स्तोत्रमुपाकरोति' इति श्रुतम्। अत्र उभयमुभयस्य निवर्तकं घोषो मन्त्रस्य निवर्तकः रथो दर्भयोः इति पूर्वः पक्षः। सूत्राक्षरार्थः स एव।

चोदनालिङ्गसंयोगे तद्विकारः प्रतीयेत प्रकृतिसंनिधानात्। २॥

ननु सौमारौद्रचर्वादौ 'शरमयं बर्हिर्भवति' इति शराः कुशान् निवर्तयन्ति एवं नक्षत्रेष्टिषु उपहोमाः नारिष्ठहोमान् निवर्तयिष्यन्ति, इति चेत्, तत्र दृष्टान्तवैषम्यमाह। शरेषु चोदनालिङ्गसंयोगे चोदनायां प्राकृतविधौ अव्यभिचरितं यत् लिङ्गं वेदिस्तरणसाधनबर्हिःशब्दः तत्संयोगे 'शरमयं बर्हिः' इत्यत्र सति प्रकृतिसंनिधानात्प्रकृतिविधिघटकशब्दसंनिधानात् तद्विकारः प्रकृतिगतकुशविकारः शरः प्रतीयेत। उपहोमेषु तु नास्ति चोदनालिङ्गं इति न उपहोमैः प्राकृतनारिष्ठहोमबाधः। इति सिद्धान्तः।

अथ **द्वितीयं वर्णकम्**। इदं सिद्धान्तसूत्रम्। अक्षरार्थः प्रथमवर्णकवदेव। विशेषस्तु अस्ति हि तत्र प्रकृतिलिङ्गेन बर्हिःशब्देन संयोगः। तस्मात् प्राकृतस्य कुशमयस्य निवृत्तिरिति।

अथ **तृतीयं वर्णकम्**। वाजपेये 'रथघोषेण माहेन्द्रस्य स्तोत्रमुपाकरोति' इति श्रुतम्। प्रकृतौ च 'उपावर्तध्वमिति दर्भाभ्यां स्तोत्रमुपाकरोति' इति श्रुतम्। तत्र उभयं उभयस्य न निवर्तकं किन्तु रथसंबन्धी घोषः मन्त्रस्य दर्भयोश्च निवर्तकः। न घोषशून्यो रथो वा रथभिन्नस्य घोषो वा। इति सिद्धान्तः। एवं द्वितीये तृतीये च वर्णके इदं सूत्रं सिद्धान्तसूत्रमेव, न प्रथमवर्णके इव शङ्कानिरासद्वारा सिद्धान्तोपोद्वलकम्। **के.**

* **प्रकृतिलिङ्गवचनानां** ऊहः यथा 'आपो देवीः शुद्धाः स्थ' इति प्रोक्षणीषु प्रकृतौ, घृते प्रोक्षणे तु 'घृत देव शुद्धमसि' इति। **बाल.** पृ. १२७.

* **प्रकृतिलिङ्गसंयोगः** प्रत्यक्षदर्शनेन भवति। यथा 'नैवारश्चरुः' इति। अभावे विधानेन वा भवति। यथा 'यर्हि पृष्ठ्यः षडहः संतिष्ठते, मधु आशयेत् घृतं वा' इति। विकारेण वा यथा 'नैर्ऋतः चरुः नखावपूतानाम्' इति। स्वशब्देन वा भवति, यथा 'परिधौ पशुं नियुञ्जीत' इति। प्रतिषेधेन वा भवति, यथा 'न गिरागिरेति ब्रूयात्, ऐरं कृत्वोद्गेयम्' इति। अन्येन वा येन अवगम्यते प्राकृतं कार्यं अभिनिर्वर्तयन्तीति। **भा.** १०।४।१।१ पृ. १९०७.

* **प्रकृतिवचनयोरेव** ऊहो यथा 'अग्नये जुष्टम्' इति प्रकृतौ 'विश्वेभ्यो देवेभ्यो जुष्टम्' इति वैश्वदेवे चरौ। **बाल.** पृ. १२७.

⧖ **प्रकृतिवदनुकरणं भवति इति न्यायः।** प्रकृतिरत्र परमात्मेति गृह्यते। अनुकरणं च सदृशीकरणम्। यथा परमात्मसदृशा एव तदवतारा इति बोध्यमित्यन्यत्र विस्तरः। **साहस्री.** ९९६.

⧖ **प्रकृतिवत् कर्तव्यमिति न्यायः।** 'यथान्यायम्' इति सूत्रपदम्। अत्र सुबोधिनी– 'यथान्यायं प्रकृतिवत् कर्तव्यं इति न्यायसिद्धम्' इति। **वृ.** ५।४।७।२३.

* प्रकृतिवत्। प्रतिपदाख्याने तु गौरवं परिहरद्भिः वृत्तिकारैः सर्वसामान्यः शब्दः परिगृहीतः 'प्रकृतिवत्' इति। **भा.** ८।१।२।२ पृ. १५८५.

⧖ **प्रकृतिवद्विकृतिः कर्तव्या इति न्यायः।** अयं महाभाष्यपस्पशायां कैयटेनोक्तः। तथाहि 'ऊहः खल्वपि' इति भाष्यप्रतीकमादाय 'इह' यस्मिन् यागे

इतिकर्तव्यतोपदिष्टा यागान्तरेणोपजीव्यते सा प्रकृतिः, येनोपजीव्यते सा विकृतिः। 'प्रकृतिवद्विकृतिः कर्तव्या' इति मीमांसकैर्व्यवस्थापिते न्याये प्रकृतिप्रत्ययादीनामूहं वैयाकरणः सम्यग्विजानाति। **साहस्री.** ५९४.

* उक्थ्यादयः अग्निष्टोमस्य विकृतयः, विशेषस्यैव तत्र प्रत्यक्षोपदेशेन संपादितत्वात्। अवशिष्टं तु सर्वमनुष्ठेयं 'प्रकृतिवत् विकृतिः कर्तव्या' इति न्यायेनैव संपाद्यते। **ऐब्रासा.** १।१ पृ. ५.

* **प्रकृतिविकारयोः** सादृश्यदर्शनम्। **सु.** पृ. ५७.

* जगतः ब्रह्मोपादानत्वमेव न कुलधर्मतयोक्तम्, किन्तु **प्रकृतिविकाराभेदन्यायेन** अद्वैतसिद्धये। **कल्पतरुः.** पृ. ८७.

* **प्रकृतिविकाराव्यतिरेकन्यायेनैव** प्रतिज्ञासिद्धिरवगम्यते। तथाहि 'येनाश्रुतं श्रुतं भवति' इति प्रतिज्ञाय मृदादिदृष्टान्तैः कार्यकारणाभेदप्रतिपादनपरैः प्रतिज्ञैषा समर्थ्यते। मृदादेः प्रकृतेः सकाशात् घटादेः विकारस्य व्यतिरेकः तात्त्विको भेदः न भवति इति सोऽयं न्यायः रीतिः अन्यत्रापि। **शांभा.** २।३।६ ब्रसू.

⧖ **प्रकृतिविकारन्यायः।** प्रकृतेः मृदादेः सकाशात् घटादिर्विकारः यथा तत्त्वतो भिन्नो न भवति एवमन्यत्रापि। प्रकृतिविकाराव्यतिरेकन्यायेन समानार्थकः अयं न्यायो द्रष्टव्यः। **के.**

* **प्रकृतिविकारभावो** भेदं विना न युज्यते। **सु.** पृ. ४०९. * नहि 'दध्यत्र' इत्यत्र **प्रकृतिविकारभावः**। शब्दान्तरमिकारात् यकारः। न च सादृश्यमात्रं दृष्ट्वा प्रकृतिर्विकृतिर्वोच्यते, नहि दधिपिटकं दृष्ट्वा कुन्दपिटकं च प्रकृतिविकारभावोऽवगम्यते। **भा.** १।१।६।१६.

* **प्रकृतिविकारभावाभावेन** (पुरोडाशकपालेन इति शब्दे) तादर्थ्यसमासायोगः। (पूर्वपक्षे)। **भाट्ट.** ४।१।११.

* प्रकृतिविकृत्योः प्रधानतन्त्रं श्रौते मृग्यम्। स्मार्ते तु अमावास्याव्यतीपातश्राद्धादीनां एकदिनकर्तव्यतापत्तौ इति हेमाद्रिणा उक्तम्। **बाल.** पृ. १४८.

⧖ **प्रकृतिविकृत्योः समानतन्त्रत्वे विकृतितन्त्रेण प्रकृतेः प्रसङ्गसिद्धिः। (कृत्वाचिन्ता)॥**

अपूर्वं च प्रकृतौ समानतन्त्रा चेदनित्यत्वादनर्थकं हि स्यात्। १२।२।१३।३३॥

भाष्यम्— यदा प्रकृतिर्विकृत्या समानतन्त्रा, तदा किं प्राकृतं तन्त्रं कर्तव्यम्, उत वैकृतम् ? ननु नैव प्रकृतिर्विकृत्या समानतन्त्राऽस्ति। समानतन्त्रा चेदित्येवं कृत्वाचिन्तेयम्। किं प्राप्तम् ? यदि पूर्वं प्रकृतिः प्रयुज्यते तत् प्राकृतम्, अथ विकृतिस्ततो वैकृतम्। किं पुनरत्र युक्तम् ? प्रकृतिरिति। नित्या प्रकृतिः, आगन्तुर्विकृतिरिति। कामे वा निमित्ते वोत्पन्ने आगच्छति। पूर्वावसायिनश्च बलीयांसो जघन्यावसायिभ्यः। तस्मात्प्रकृतिः पूर्वं प्रयुज्यते। तस्य तन्त्रं कर्तव्यम्, प्राप्तकालत्वात्। तस्मात् प्राकृतं तन्त्रं कर्तव्यमित्येवं प्राप्तम्। एवं प्राप्ते, ब्रूमः। अपूर्वं च वैकृतं तन्त्रं प्रकृतौ प्रसज्यते, समानतन्त्रा चेत्, अनित्यत्वाद्विकृतेः। अनित्या विकृतिः कामे वोत्पन्ने निमित्ते वा असावागच्छति। नैमित्तिकी चिकीर्षा नित्यां चिकीर्षां बाधते। सत्यां हि नित्यायां सा भवति। अतस्तामबाधमाना नैवोत्पद्यते। यदि न बाध्येत, अनर्थकं स्याद्वैकृतं विधानम्। यस्य चिकीर्षा प्रत्युपस्थिता तस्य पूर्वं प्रयोगः। तस्माद्विकृतेः पूर्वं क्रिया। यस्य च पूर्वं क्रिया, तत्तन्त्रं पूर्वं यथा कर्तव्यम्, तत्पूर्वपक्षे उक्तम्। तस्माद्वैकृतं तन्त्रं प्रकृतौ प्रसज्यते इति।

शा— प्रकृतिः यावज्जीवं पर्वणिपर्वणि प्रयुज्यते, विकृतयोऽपि कामेन निमित्तेन वा पर्वण्येवापतन्ति। तत्र प्रकृतिविकृत्योः तन्त्रेण प्रयोगं कृत्वा चिन्त्यते। कामेन निमित्तेन वा पतन्ती विकृतिरेव औत्सर्गिकीं नित्यचिकीर्षां बाधित्वा निविशते इति वैकृतमेव तन्त्रं प्रकृतौ प्रसज्यते इति (सिद्धान्तः)।

सोम— यासां विकृतीनां पर्वकालत्वं ता अत्र विषयः। यथा पशोः प्रवृत्ततन्त्रत्वात् तन्त्रित्वं एवमिहापि इत्युत्थितेः **संगतिः। सूत्रार्थस्तु**— विकृतिः प्रकृत्या समानतन्त्रा चेत् अपूर्वं वैकृतं प्रसज्येत, विकृतेः तद्बाधं विना निवेशासंभवात्, अन्यथा वैकृतविशेषाम्नानमनर्थकं स्यात् इति।

वि— ' प्रकृतिर्विकृतिर्वा स्यात् तन्त्रिणी, प्रकृतिर्यतः । नित्याऽसावुपदिष्टाङ्गा, मैवं कामवलित्वतः ॥ '

भाट्ट— यास्तावत् काम्या नित्या वा विकृतयस्तासां ' य इष्ट्या ' इत्यनेन पर्वकालविधानात् पर्वणि सद्यस्कालास्ताः कृत्वा प्रकृतेरन्वाधानमिति नैव तत्र तन्त्रप्रसङ्गविचारः । यत्रापि पवित्रनाशादिनिमित्तकेष्ट्यादौ नियमेनैव प्रकृतिप्रयोगमध्ये निमित्तपातः तत्र तस्या एव प्रसङ्गित्वमित्यप्यविवादम् । तत्र प्रायशो नैव सातदश्यादि, यद्यपि वा भवेत्तथापि तस्य निरवकाशत्वात् तदंशे प्रकृतेरेव प्रसङ्गित्वं प्रयाजाद्यंशे तु विकृतेरिति ध्येयम् । यत्र तु प्रयोगमध्ये गृहदाहेष्ट्यादि, तत्र प्रकृतेरेव तन्त्रित्वम्, सातदश्यादेः प्रयोगबहिर्भूतनिमित्तपाठस्थले सावकाशत्वात् । यत्र तु प्रकृत्युपक्रमवेलायामेव यस्या इष्टेर्नियतो निमित्तपातः, तदापि वस्तुतो विकृतिं सद्यस्कालां कृत्वैव प्रकृत्यारम्भः, इति न कश्चित् प्रसङ्गशङ्कावकाशः । प्रकृतिविकृत्योः तादृशस्थले कृत्वाचिन्तया तु प्रयोगैक्यं विचार्यते, विरुद्धपदार्थांशे कस्य तन्त्रित्वं कस्य प्रसङ्गित्वमिति । तत्र विकृतेः प्रकृत्युपजीवकत्वात्तस्या एव प्रसङ्गित्वम्, प्रकृतेस्तु तन्त्रित्वम्, तस्याङ्गग्राहकत्वाभावे अतिदेशस्यैवानापत्तेः । इति प्राप्ते, तस्याः पाञ्चदश्या ग्राहकत्वेऽपि इतराङ्गग्राहकत्वे बाधकाभावात् विकृत्यङ्गभूतस्य च सातदश्यस्य च निरवकाशत्वात्तस्या एव तद्विषये तन्त्रित्वं प्रकृतेश्च प्रसङ्गित्वम् । प्रयाजादिविषये तु तस्या एव तन्त्रित्वं विकृतेश्च प्रसङ्गित्वमङ्गग्राहकत्वानुरोधादिति ध्येयम् ।

मण्डन— ' काम्ये तन्त्रं तु वैकृतम् । '

शंकर— ' विकृतेः प्रकृतिं प्रति । ' तन्त्रित्वम् ।

* **प्रकृतिविकृतिषु** परस्य धर्माः परस्य न भवन्ति । **भा.** ६।३।१।५.

* **प्रकृतिविकृत्यनात्मककर्मोपदिष्टपदार्थविषयः** समुच्चयः आधाने पवमानेष्टीनाम् । **बाल.** पृ. १७७.

* **प्रकृतिविकृत्यनुभयात्मकं** वैदिकं कर्म यथा दर्विहोमा नारिष्ठादयः गृहमेधीयादि च । **बाल.** पृ. ८५.

* **प्रकृतिविकृत्युभयात्मकं** वैदिकं कर्म यथा अग्नीषोमीयसवनीयपश्वादि । **बाल.** पृ. ८५.

* **प्रकृतिविकृतिरूपसर्वकर्मार्था** अग्नयः । अग्न्यर्थं च आधानं इति सर्वार्थमाधानम् । ३।६।५।१४–१५.

* **प्रक्रमः** रीतिः, व्याख्यानप्रकारः इति यावत् । **सु.** पृ. ६०.

卐 प्रक्रमात्तु नियम्येताऽऽरम्भस्य क्रियानिमित्तत्वात् । ६।२।३।१४ ॥

' कारीर्या वृष्टिकामो यजेत ' ' प्रजाकामो यजेत ' इत्यादि काम्यं कर्म श्रुतम् । तत्र कारीर्या आरब्धायां यदि वृष्टिर्लब्धा तदा किं आरब्धं कर्म तत्रैव त्यक्तव्यम्, नियोगतः परिसमापनीयं वा इति विचारः । तत्र आरब्धं कर्म नियोगतः परिसमापनीयं इति सिद्धान्तः । तदाह प्रक्रमात् आरम्भात् अनन्तरं समापनं नियम्येत । आरम्भोत्तरं नियमतः समाप्तिः कर्तव्या । क्रियायाः समापनक्रियायाः निमित्तत्वं आरम्भस्य । समाप्तेर्निमित्तमारम्भः । तस्मात् समाप्तेः प्राक् लब्धेऽपि फले निवृत्तेऽपि वा कामे प्रारब्धं कर्म समापनीयमेवेति सिद्धान्तः ।

फलार्थित्वाद्वाऽनियमो यथाऽनुपक्रान्ते । १५ ॥

अथ पूर्वपक्षमाह । वाशब्दः सिद्धान्तपक्षं व्यावर्तयति । अनियमः स्यात् फलाभावादपि कश्चित् आरब्धं समाप्नुयात् कश्चित्तु अर्थतः एव त्यजेत्, न समाप्नुयात् । न नियमस्तत्र । कुतः ? फलार्थित्वात् । फलार्थी कर्म आरभते । लब्धे तु फले किमायासप्रदेन कर्मणा । तस्मान्न समाप्तिनियमः । यथा अनुपक्रान्ते । येन अद्यापि कर्म नैव उपक्रान्तम्, न तस्य समाप्तिनियमः अनुपक्रान्तत्वादेव । तथा उपक्रान्तेऽपि कर्मणः फलार्थत्वात् फलस्य लब्धत्वात् न समाप्तिनियमः स्यात् । तस्मात् समाप्तेरनियमः इति पूर्वः पक्षः ।

नियमो वा तन्निमित्तत्वात् कर्तुस्तत् कारणं स्यात् । १६ ॥

सिद्धान्ती आह । वाशब्दः अनियमनिरासार्थः । न समाप्तेरनियमः । किन्तु आरभ्य समापनीयमेवेति नियमः स्यात्, तन्निमित्तत्वात् । आरम्भस्येति पूर्वतरसूत्रादनुवर्तते । आरम्भस्य तन्निमित्तत्वात् समाप्तिनिमित्तत्वात् । समाप्त्यर्थमेवारम्भः, न मध्ये त्यागार्थः । तत् आरभ्य असमापनं कर्तुः कारणं शिष्टविगर्हणकारणं स्यात् । अथवा कर्तुः आरभ्य समापने तत् कारणं सत्यसंकल्पता कारणं स्यात् । यो हि आरभ्य न समापयति तं शिष्टा विगर्हन्ते ' प्राक्रमिकोऽयं असंव्यवहार्यः ' इति । ननु शिष्टाः पुनः किमर्थं विगर्हन्ते ? तत्राह भाष्यकारः– ' उच्यते, विगर्हन्ते तावत्, किं नो विदितेन कारणेनेति ' इति । तस्मात् आरभ्य समापनीयमेव इति सिद्धान्तः ।

तत् कारणं स्यात् आरभ्य असमापनं प्रत्यवायस्य कारणं स्यात् इति **सुबोधिनी** ।

शिष्टविगर्हणं कारणं स्यात् निन्दाबोधकस्मृत्युपलब्धौ मूलं स्यात् इति **कुतूहलम्** । **के.**

* 'प्रक्रमात्तु नियम्येत०' इत्यत्र प्रक्रान्तं कर्म अवश्यं समापनीयं इत्येतदुपपादनार्थं भाष्यकृता उपक्रमादारभ्य समाप्तिपर्यन्तस्य व्यापारसमूहस्य आख्यातेन विधित्सितत्वात् ......यागादि समापयेत् इति शास्त्रार्थः इत्यादि सूचितम् । **सु.** पृ. ७४९. * द्वादशवार्षिकसत्रवाक्यानां अयनादिषु तत्तत्फलेच्छया प्रवृत्तस्य मध्ये वीतफलेच्छस्य क्रममुक्तिफलेच्छया ब्रह्मोपासनायां प्रवृत्तस्य तन्मध्ये एव लब्धोपास्यसाक्षात्कारस्य **' प्रक्रमात्तु नियम्येत० ' इति न्यायेन** (६।२।३।१३) अवश्यसमापनीयत्वेन प्राप्तानि द्वादशवार्षिकसत्रादीनि । **परिमलः**. ४।१।१२।१६ ब्रसू.

* शिष्टविगर्हणान्यायानुपपत्त्या प्रयोगसमाप्तिं प्रति कामनादिवत् प्रयोगप्रक्रमस्यापि अनुष्ठापकत्वं षष्ठे ' प्रक्रमात्तु० ' इति सूत्रे वक्ष्यते । **कौ.** २।१।२।५ पृ. ११.

* **प्रक्रान्तमवश्यं** समापनीयम् । **वा.** ६।३।४।१६ पृ. १४१६.

* **प्रक्रान्तासमाप्तिदोषपरिहारार्थं** (अपकर्षेण) प्रातर्होमः कर्तव्यः, सायंहोमे कृते यदा नाम यजमानस्य कदाचित् आपत् (मरणम्) भवति तदा । (इदं सायं प्रातरग्न्यस्तोऽयमेक एव प्रयोगः इति पक्षे) । **वा.** २।२।५।१६ पृ. ५०८.

* **प्रक्रान्तनियमत्यागे** शिष्टाचारविरोधः । **शा.** ११।३।६.

卐 प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरमिति न्यायः । (पङ्कप्रक्षालनन्यायोऽपि अयमेव) । पङ्कलेपने प्रक्षालनमपेक्ष्य पङ्कस्पर्शनमेव न कर्तव्यमिति लोकप्रसिद्धिवदन्यत्राप्यनिष्टसाधनस्य कारणान्तरेण निवारणमपेक्ष्य अनिष्टसाधनमेव न कर्तव्यमिति यत्र विवक्षा, तत्रास्य प्रवृत्तिरिति । **साहस्री.** ३४२.

* कथं हि शास्त्रं स्वयमेव ब्रह्मणो रूपद्वयं दर्शयित्वा स्वयमेव पुनः प्रतिषेधति **' प्रक्षालना० वरम् '** इति (शङ्का) । **शां. भा.** ३।२।६।२२ ब्रसू. * तादृशाभावे असदभिन्नत्वनैशिष्ट्यं निवेश्य तत्सार्थक्यस्य ' प्रक्षालनाद्धि० ' **इति न्यायेन** अयुक्तत्वात् । **विठ्ठल.** पृ. ८७, * न च 'प्रक्षालनाद्धि० वरम्' इति न्यायेन पूर्वं तदुपगम एव वृथा इति वाच्यम्, तस्य शिष्यबुद्धिवैशद्यार्थकत्वात् । **पृ.** ८७. * यदि पुण्यस्यापि अश्लेषविनाशौ, हन्त नित्यमपि अग्निहोत्रादि न कर्तव्यं योगमारुरुक्षुणा, तस्यापि इतरपुण्यवत् विद्यया विनाशात् ' प्रक्षालनाद्धि० वरम् ' **इति न्यायात्** । **भामती.** ४।१।१२।१६ ब्रसू.

* **प्रक्षेपः** अङ्गम्, यागः प्रधानम् । ' यस्तत्र यागः, तस्य प्राधान्यम् । यस्तु प्रक्षेपः, सः अङ्गमेव ' । **वा.** ३।४।१४।४१ पृ. ९८२. * प्रक्षेपः यागस्थले त्यागाङ्गद्रव्यसंस्कारकः । **भाट्ट.** ४।१।७, * **प्रक्षेपस्य** (आज्यप्रक्षेपस्य) स्विष्टकृद्यागः प्रयोजको भवत्येव । ४।१।१३.

* **प्रक्षेपांशस्यापि** प्राधान्यकोटौ निवेश इत्येतत्तु न मृष्यामहे, प्रक्षेपस्यापि प्राधान्ये सति तस्य विकृतिष्वतिदेशानापत्तेः ' कर्मणस्त्वप्रवृत्तित्वात् ' इत्याष्टमिकाधिकरणे वक्ष्यमाणत्वात् । **कु.** ३।४।१८।४७ पृ. ३८७.

* विशेष्यतया प्रतीतस्य त्यागांशस्य **प्रक्षेपाद्यङ्गत्वे** प्रमाणाभावः । **भाट्ट.** ४।१।७.

* **प्रक्षेपमात्रस्य** विधिः चतुरवत्तसंस्कारार्थम् ' चतुरवत्तं जुहोति ' इति । **के.**

* **प्रगाथः** । प्रकर्षं हि प्रशब्दो द्योतयति । प्रकर्षेण गानं यत्र स प्रगाथः । कश्च प्रकर्षः ? यत् किंचित् पुनर्गायति । **भा.** ९।२।५।२७ वर्णकं १, स हि (प्रगाथशब्दः) प्रकर्षे गानस्य भवति । प्रकर्षश्चेह पुनः पादे उपादीयमाने भवति । वर्णकं २. * प्रगाथः, प्रकर्षेण गानं यत्र । प्रकर्षश्च आम्नातात् ऋक्पाठात् आधिक्यम्, तच्च पादाभ्यासपुरःसरं ऋगन्तरसंपादनेन भवति । द्वयोः

तिसृणां वा ऋचां प्रग्रथनात् प्रगाथः । वि. ९।२।६ वर्णकं १. (प्रगाथभेदस्तु ऋग्वेदीयसर्वानुक्रमण्यामुक्तः खण्डः ११ । ' बृहती– सतोबृहत्यौ बार्हतः । ककुप् चेत् पूर्वा, काकुभः । महाबृहती– महासतोबृहत्यौ महाबार्हतः । बृहतीविपरीते विपरीतोत्तरः । अनुष्टुब्, गायत्र्यौ चानुष्टुभः । ' इति पञ्च प्रगाथजातयः । के.)
* प्रगाथेन । स्वयोन्युत्तरयोर्बृहतीपङ्क्त्योरेव प्रग्रथनेन संपादितककुभोरेव बृहद्रथंतरयोर्गानं ज्योतिष्टोमे । ९।२।६।२५–२८ वर्णकं १. * प्रगाथस्य ऐन्द्रस्य प्रकरणात् ज्योतिष्टोमाङ्गत्वे अवगतेऽपि द्वारविशेषापेक्षायां पृष्ठाख्यस्तोत्रद्वारत्वं क्रमादवगम्यते । सु. पृ. ६४२.

* प्रगाथप्रग्रथनपद्धतिः । ' रथंतरं पृष्ठं भवति ' इति चोदनया रथंतरयोनित्वेन ' अभि त्वा शूर ' इति ऋचः उपस्थितिः । ' एकं साम तृचे क्रियते स्तोत्रीयम् ' इति च स्तोत्रसाधनभूतस्य साम्नः तृचाधारत्वश्रुतेः ऋगन्तरापेक्षायाम् ' यद्योन्यां गायति तदुत्तरयोर्गायति ' इति योन्युत्तरऋगपेक्षया त्रित्वपूरणविधानात् उत्तराग्रन्थे च तदुत्तरत्वेन ' न त्वावान् ' इति ऋचः पाठादुपस्थितिः (एवं सति ऋग्द्वयं संपन्नम्,) त्रित्वपूरणं तु तयोः ' पूर्वा बृहती, ककुभावुत्तरे ' इति वचनात् (प्रथमायाः पादत्रयेण एकां बृहतीं कृत्वा) प्रथमायाश्चतुर्थपादेन द्वितीयायाश्च अर्धर्चेन एकां ककुभं कृत्वा, द्वितीयायां द्वितीयादिपादत्रयेण अपरां ककुभं कृत्वा भविष्यति । ' अभि त्वा०, न त्वावान्० ' इति ऋग्द्वयं प्रगाथो नाम उक्तरीत्या प्रग्रथनात् । सु. पृ. ६४१–६४२.

* प्रगीतं मन्त्रवाक्यं साम इति तत्रभवन्तश्छान्दसाः स्मरन्ति । गीतयः एव सामानि इति मीमांसासिद्धान्तः । भा. ९।२।१।१–२. * प्रगीतया ' अयं सहस्रमानवः ' इति ऋचा द्वादशाहगते दशमेऽहनि पत्नीसंयाजोत्तरं मानसस्तोत्रात् प्राक् आहवनीयोपस्थानम्, न अप्रगीतया । ९।२।८।२९–३० वर्णकं २. * प्रगीताया एव ऋचः वैकृतापूर्वस्तोत्रसाधनत्वम् । ९।२।८।२९–३० वर्णकं १. ' साम्नैव स्तोतव्यम् ' इति बिन्दौ अधिकरणं द्रष्टव्यम् ।

* प्रग्रथनेन अनुष्टुभो गायत्रीद्वयस्य च संपादिते आनुष्टुभे तृचे श्यावाश्वान्धीगवसाम्नोर्गानम् । ९।२।६।२५–२८ वर्णकं ३, * प्रग्रथनेन द्वयोर्द्वयोर्ऋचोः गवामयने ब्रह्मसामगानं कार्यम् । ९।२।६।२५–२८ वर्णकं ४, * प्रग्रथनेन बृहतीविष्टारपङ्क्त्योः (बृहती=सतोबृहत्योः) संपादिते बार्हते तृचे रैरवयौधाजयसाम्नोर्गानं ज्योतिष्टोमे । ९।२।६।२५–२८ वर्णकं २.

* प्रचयः एकश्रुतिः तानः इति पर्यायाः । उदात्त–अनुदात्त–स्वरितेभ्यो भिन्नः चतुर्थोऽयं स्वरः । एकः स्वरोऽयम् । वि. ९।२।८ वर्णकं ३. * प्रचये सति दार्ढ्यं आहार्यधियां भवति, तदर्थश्चायं प्रयासो न कृतधियाम् । (प्रचयो बाहुल्यम् । ऋजु.) । बृहती. पृ. २४१.

* ' प्रचरण्या वैसर्जनानि जुहोति ' ज्योतिष्टोमे अग्नीषोमीयपशौ तन्त्रे प्रक्रान्ते सति । वि. ११३१३. (सत्याषाढः– प्रचरण्यां चतुर्गृहीतं गृहीत्वा...शालामुखीये वैसर्जनौ जुहोति त्वं सोम तनूकृद्भ्यः इति पूर्वामाहुतिं जुहोति, जुषाणो अप्तुराज्यस्य वेतु स्वाहेति द्वितीयाम् । ७।८।१७. शेषमाज्यस्य करोति । १८.) ।

* प्रचरणीहोमः । जुहूसदृशपात्रविशेषः प्रचरणी, तत्साधनकः ' शृणोत्वग्निः समिधा हवम् ' इत्यादिमन्त्रकरणको होमः । सोम. ५।१।१३. * प्रचरणीहोमः प्रातरनुवाकसमापकऋक्पाठकाले । के. (वा. ५।१।१३। २५).

* प्रचरणीहोमादयः अग्नीत्प्रैषात्प्राकृतनाः पदार्थाः सौमिकाः पश्चात् कर्तव्याः, ततः पूर्वमेव तु सवनीयनिर्वापोत्तरं प्रोक्षणादयः अलंकरणात् पूर्वभाविनः पौरोडाशिकाः । ज्योतिष्टोमे सुत्यायाम् । सोम. ५।१।१३.

* प्रचरणीहोमादिकं सौमिकं सवनीयपुरोडाशालंकरणोत्तरं कर्तव्यम् । वि. ५।१।१३.

* प्रजा विद्या सोमश्च त्रैवर्णिकानां नित्याः, न ब्राह्मणानामेव । भा. ६।२।११।२१.

* प्रजोत्पादनं लोकसिद्ध्यर्थमपि नित्यम्, ' अनुत्पाद्य सुतान् न लोकं गच्छति ' इति स्मृतेः । वि. ६।२।११.

* ' ऐन्द्रमेकादशकपालं निर्वपेत् प्रजाकामः ' । भा. १०।७।१७।५८, * ' दाक्षायणयज्ञेन यजेत प्रजाकामः ' । २।३।४।५, * ' यः प्रजाकामः पशुकामो वा स्यात् स एतं प्राजापत्यं तूपरमालभेत ' । (तूपरः शृङ्गरहितः छागः) । १।२।१।१० पृ. १२४, * प्रजाकामाः गवामयनमुपेयुः । ७।४।३।१३, * ' अतिरात्रेण प्रजाकामं याजयेत् ' । ३।६।१६।४३, * ' एकविंशेनातिरात्रेण प्रजाकामं याजयेत् ' । १०।४।१०।२०, * ' द्वादशाहेन प्रजाकामं याजयेत् ' । १०।५।२।१. * प्रजाकामस्य नवसप्तदशातिरात्रः कातीये । बाल. पृ. ३४.

* ' प्रजापतिरात्मनो वपामुदक्खिदत् ' इत्यस्यार्थोऽयम्— नित्यः कश्चिदर्थः स्यात् प्रजापतिर्वायुराकाश आदित्यो वा । स आत्मनो वपामुदक्खिदत् इति वृष्टिं वायुं रश्मिं वा । तामग्नौ प्रागृह्णात् वैद्युते आर्चीसे लौकिके वा । ततः अज इति अन्नं बीजं वीरुद् वा (आर्चीसि शरीरान्तर्वर्तिनि । वा., ऋचीसशब्दस्य शरीरवाचित्वात् तदन्तर्वर्ती अग्निः आर्चीसः अभिधीयते । सु. पृ. ५९) । भा. १।२।१।१०, * प्रजापतिः । उपांशुधर्माणौ हि विष्णुप्रजापती । २।२।४।१० पृ. ४९५. * प्रजापतिरेव योगी सृष्ट्यादौ पुण्यकर्मोद्भवाभ्युपगमेन, पशूनामभावात् स्वमाहात्म्येन आत्मन एव पशुरूपमभिनिर्माय वपोत्खननादि कृतवान् । वा. १।२।१।१० पृ. १२६. * प्रजापतिः विष्णुः अग्नीषोमौ वा उपांशुयाजे देवता । ' विष्णुरुपांशु यष्टव्योऽजामित्वाय, प्रजापतिरुपांशु०, अग्नीषोमावुपांशु यष्टव्यावजामित्वाय ' इति । भा. १०।८।१७।५१–६१.

ॐ प्रजापतिः सप्तदशो दृष्टार्थ एव ॥

' एष वै सप्तदशः प्रजापतिर्यज्ञमन्वायत्तः ' इति श्रुताः ' आश्रावय ' इत्यादिशब्दा अदृष्टार्था एव पूर्वपूर्वपदार्थैरेवोत्तरपदार्थस्मरणेन दृष्टप्रयोजनान्तराभावात् । ऋत्विजां वरणस्य दृष्टार्थत्वेन परकर्तृकपदार्थोत्तरकालिकस्यापि स्वस्वपदार्थस्य तत्तत्कालेऽपि स्मृतिसंभवात् । ' आश्रावय इति चतुरक्षरम् ' इत्यादिश्रुतौ ' चतुर्भिश्च चतुर्भिश्च ' इत्यादिस्मृतौ च अक्षरपरिगणनस्य ' चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ' इत्यादिश्रुतिषु मन्त्रोद्धारस्यैव उद्भ्रियमाणानामदृष्टार्थत्वे एव सामञ्जस्याच्च । इति प्राप्ते, प्रकृतिप्रत्ययार्थविभागेन ' पच, पक्ष्यामि ' इत्यादाविव प्रैषप्रतिवचनार्थत्वावगतेः अनुभूयमानायाः परित्यागायोगात् मन्त्रोद्धारस्य नियमादृष्टार्थतया स्तुत्यर्थतया चाविरोधात् दृष्टार्थ एव सप्तदशः । सूत्रभाष्ययोः ' यज, येयजामहे ' इत्यनयोरेवोदाहरणं तु लिङ्गदर्शनानुगुण्याय प्रैषप्रतिवचनार्थप्रतिपत्तृत्वेन तत्र अध्वर्युहोत्रोरेव कीर्तनात् । संकर्ष. २।३।१.

* प्रजापतेरुपांशुत्वं धर्मः । ' तस्मात् यत् किञ्चित् प्राजापत्यं यज्ञे क्रियते, उपांश्वेव तत् क्रियते ' इति । भा. १०।८।१७।५१. * प्रजापतेस्तावत् ' प्रजापतिरुषसमभ्यैत् स्वां दुहितरम् ' इत्यगम्यागमनरूपात् अधर्माचरणात् धर्मव्यतिक्रमः । वा. १।३।३।७ पृ. २०३ । (नैवं) प्रजापतिस्तावत् प्रजापालनाधिकारात् आदित्य एवोच्यते । स च अरुणोदयवेलायां उषसं उद्यन् अभ्यैत्, सा तदागमनादेव उपजायते इति तद्दुहितृत्वेन व्यपदिश्यते, तस्यां च अरुणकिरणाख्यबीजनिक्षेपात् स्त्रीपुरुषयोगवदुपचारः । पृ. २०८. * प्रजापतेः तूष्णीम्भावधर्मत्वविधानम् ' प्रजापतिं मनसा यजेत ' इति । सु. पृ. ७५५, * प्रजापतेः प्राधान्यप्रसिद्धिः ' एत इति वै प्रजापतिर्देवानसृजत ' इति श्रुतेः । पृ. ७५५. * प्रजापतेर्मुखात् अग्निश्च ब्राह्मणश्च इत्युभौ उत्पन्नौ, ततो ब्राह्मणस्य अग्निरेक एव देवता इति आग्नेयः एव ब्राह्मणः । यदा तु स सोमेन यजते तदा स ब्राह्मणः अग्नीषोमीयः स्यात् । अतः सोमानुष्ठानोत्तरं अग्नीषोमीयः पुरोडाशः कर्तव्यः । वि. ५।४।४.

* प्रजापतेर्हृदयं नाम साम । तत् अनृचि उत्पन्नम् । ' प्रजापतेर्हृदयमनृचं गायति ' । भा. ७।२।१।१४.

* प्रजापतिव्रतम् । ' नेक्षेतोद्यन्तमादित्यम् ' अत्र नञ्–ईक्षतिभ्यां ईक्षणाभावसंकल्परूपक्रियैव लक्षणया विधीयते । उद्यदादित्येक्षणाभावसंकल्पभावना एव उदये निमित्ते विधीयते । भाट्ट. ४।१।३, * प्रजापतिव्रतम् ।

'नेक्षेतोद्यन्तमादित्यम्' इत्यादिः पर्युदासः आर्थवादिकफलप्रयुक्तः । ४।१।३. * प्रजापतिव्रतानि उद्यदादित्यानीक्षणसंकल्पादीनि पुरुषार्थानि । ४।१।३. 'प्रजापतिव्रताधिकरणम्' इति बिन्दौ द्रष्टव्यम् । * प्रजापतिव्रतानां फलेन संबन्धः 'एतावता हैनसा वियुक्तो भवति' इति । भा. ३।४।८।२४.

प्रजापतिव्रताधिकरणम् । प्रजापतिव्रतानि उद्यदादित्यानीक्षणसंकल्पादीनि पुरुषार्थानि ॥

तदुत्सर्गे कर्माणि पुरुषार्थाय, शास्त्रस्यानतिशङ्क्यत्वान्न च द्रव्यं चिकीर्ष्यते तेनार्थेनाभिसंबन्धात् क्रियायां पुरुषश्रुतिः । ४।१।३।३ ॥

भाष्यम्— इह प्रजापतिव्रतान्युदाहरणम् । 'नोद्यन्तमादित्यमीक्षेत, नास्तं यन्तम्' इत्यादीनि । तत्र संदेहः किं क्रत्वर्थानि प्रजापतिव्रतानि, उत पुरुषार्थानीति । किं प्राप्तम् ? क्रत्वर्थानीति । कुतः ? एवं हि फलं न कल्पयितव्यं भविष्यतीति । ननु श्रूयते एवैतेषां फलम् 'एतावता हैनसाऽयुक्तो भवति' इति । उच्यते । नैतत् फलपरं वचनम्, वर्तमानापदेश एवैष शब्द इति । तेन यत्र आदित्य ईक्षितव्यः प्राप्तः तत्रायं प्रतिषेधः । उद्यतः अस्तं यतश्च नियमो वा स्यात् कश्चित् कर्माङ्गभूतः । **एवं प्राप्ते, ब्रूमः ।** तदुत्सर्गे प्रीत्युत्सर्गेऽपि, कर्माणि पुरुषार्थाय भवेयुरेवंजातीयकानि । कर्तुरेतानि उपदिश्यन्ते न कर्मणः । अर्थप्राप्तेन कर्त्रा संबन्धो यः स विधित्सितः । न कर्मसंबन्धः अविद्यमान एव । शास्त्रं च अनतिशङ्क्यं पितृमातृवचनादपि प्रमाणतरम् । स्वयं हि तेन प्रत्येति । इन्द्रियस्थानीयं हि तत् । न च एवमादिभिर्द्रव्यस्य कश्चित् दृष्ट उपकारः साध्यते । तस्मात् तेन पुरुषार्थेन अभिसंयोगात् क्रियायामेवंजातीयकायां पुरुषः श्रूयते । अपिच पुरुषप्रयत्नः पदार्थविधिमात्रं लक्षयितुमुच्चार्येत । स्वयमविवक्षितः स्यात् । अथ यदुक्तम्, यत्र आदित्यस्येक्षणं प्राप्तम्, तत्र उद्यतोऽस्तं यतश्च प्रतिषेध इति । सत्यं प्रतिषेधो न्याय्यः । तथा श्रुतिरनुगृह्येत, इतरथा नियमो लक्ष्येतेति । किन्तु इह नियमः शब्देन श्रूयते, तस्य व्रतमिति, तेन नियम एषः 'नोद्यन्नादित्य ईक्षितव्यः' इति । अपिच, 'एतावता हैनसाऽयुक्तो भवति' इति पुरुषसंबद्धो दोषः कीर्त्यते, न कर्मसंबद्धः । तस्मात् पुरुषार्थानि प्रजापतिव्रतानीति । गोलक्षणान्यपि एवमेव कर्तरीकर्ण्यः कर्तव्या इत्येवमादीनि ।

टुप्— तदुत्सर्गे ... पुरुषश्रुतिः ॥ (यदि प्रीत्यविभक्तत्वात् द्रव्यार्जनस्य पुरुषार्थत्वेऽपि फलकल्पनाऽभावात् पुरुषार्थता प्रीत्युत्सर्गे, तर्हि प्रजापतिव्रतानां अप्रकरणस्थानामपि फलकल्पनाभयात् क्रत्वर्थत्वमस्तु इत्येवं प्रस्तूयते । तत्र प्रतिषेधत्वादेव तावत् क्रत्वर्थत्वं युक्तं इत्येतत् प्रतिपादयन् प्रतिषेधत्वं समर्थयते–) 'नोद्यन्तमादित्यमीक्षेत' इति । नञ्–उद्यदादित्य–ईक्षतिधातवः कर्तव्यतावचनेन (प्रत्ययेन इत्यर्थः) संबध्यन्ते । (यथा उद्यतः आदित्यस्य प्राप्यकर्मतया संबन्धः, यथा च ईक्षतिधातोः करणतया संबन्धः ईक्षणेन आदित्यं प्राप्नुयात् इति, एवं नञोऽपि तेनैव संबन्धः 'न प्राप्नुयात् उद्यन्तमादित्यं ईक्षणेन' इति) एवम् (प्रत्ययसंबन्धे सति) श्रुतिवृत्तानि पदानि भवन्ति, न लक्षणावृत्तानि । यदा तु नञ्-धातुपदयोः (नञुपपदयोः इति वा. पाठः) संबन्धः, तदा स्वार्थं हित्वा वस्त्वन्तरं लक्षयन्ति । (उपपदानियमाभिप्रायेण बहुवचनम् । उदाहरणबहुत्वापेक्षं वा बहुवचनम्) । तस्मात् (लक्षणादोषात्) प्रतिषेधः । स च प्राप्तिपूर्वकः । प्राप्तिश्च दर्शपूर्णमासादिषु विद्यते । सा प्रतिषिध्यते । एवं च फलं न कल्पयितव्यम् । यद्यपि नैष प्रतिषेधः (किन्तु अनीक्षणं नाम अन्तःकरणसंकल्परूपं नियम्यते), तथापि फलकल्पनाभयात् क्रत्वर्थः (एवायम्) नियमः । (ननु) 'एतावता हैनसा अयुक्तो (मुक्तो इति क्वचित् पाठः) भवति' इति (अनेन एनोनिबर्हणस्य फलस्य श्रवणात् न फलं कल्पनीयम्, अत आह–) फलार्थवादोऽयम् (न फलविधिः) । **एवं प्राप्ते, ब्रूमः ।** नायं प्रतिषेधः । 'तस्य व्रतम्' इति हि प्रकृत्य 'नोद्यन्तमादित्यमीक्षेत' इति (वचनम्) । 'व्रतम्' इति च सामान्येन कर्म उच्यते । तत् विशेषमाकाङ्क्षमाणं अनेन विशेष्यते 'तत् इदं कर्म' ('नोद्यन्तमादित्यमीक्षेत' इत्यादि) इति । प्रतिषेधे हि पूर्वं (सामान्यवचनं)

साकाङ्क्षमेवावतिष्ठेत । तेन च अश्रुतः कर्मविशेषो गृह्येत । एवं च वाक्यभेदात् द्विः अदृष्टं कल्प्येत (पूर्वत्र कल्पयित्वा पुनरत्र कल्प्येत) । एवं प्रतिषेधे बहु असमञ्जसम् । अतः (अस्मात्) विरोधात् न (नञ्) कर्तव्यतावचनेन संबध्यते । तस्मात् प्रच्युतः अनन्तरेण ईक्षतिना संबध्यते । अतः (अनीक्षणरूपः) नियमोऽयम् (कर्तृधर्मश्चोद्यते) । अर्थप्राप्तेन विपरिवर्तमानेन अस्ति कर्त्रा संबन्धः । श्रुत्याद्यभावात् नास्ति क्रतुना (संबन्धः) । (सूत्रे–) 'शास्त्रस्य अनतिशङ्क्यत्वात्' इति क्रत्वर्थेऽपि तुल्यत्वात् (नायं हेतुः पुरुषार्थैकान्तिकः इति–) कस्य चित् आशङ्का स्यात् इति तन्निवृत्त्यर्थम् (सूत्रे उक्तम्) 'न च द्रव्यं चिकीर्ष्यते' इति । (तत् व्याचष्टे –) न च क्रत्वर्थं द्रव्यं संस्क्रियते विक्रियते वा (प्रदर्शनमेतत् प्राप्तिनिवृत्त्योरपि), येन सामर्थ्यात् तत्संबन्धेन प्रणाड्या क्रत्वर्थता स्यात् । अतः पुरुषार्थान्येतानि ।

(किं पुनरेतानि काम्यानि, अथ नित्यानि इति विचार्यते । तत्र कश्चित् तावदाह–) फलार्थिना कार्याणि इत्येवमर्थ उपदेश एषाम् (विश्वजिदादिवत् । तन्निराकरोति–) न (न फलार्थिना कार्याणि इत्येवमर्थ उपदेशः । किं तर्हि इत्याह–) नित्यत्वेन संध्योपासनादिवदिति । ननु ईक्षणाभावः अनीक्षणम् (तस्य) अभावत्वात् कर्तव्यता न घटते । सत्यम् (नाभावस्य विधिः । भाव एव तु अत्र लक्षणया विधीयते संकल्परूपः इति प्रतिपादयन् लक्षणानिमित्तं संबन्धं दर्शयति– सर्वत्र–) प्रवृत्तौ वा निवृत्तौ वा (कर्तव्यायाम्) मानसं व्यापारमङ्गीकृत्य प्रवर्तते निवर्तते वा । (अत्रापि अनीक्षणं कुर्वाणः) आदित्यस्य अनीक्षणं कर्तव्यमिति मनसा संकल्पयति । अतः अनीक्षणस्य (ईक्षणाभावस्य) मानसो व्यापारः (संकल्पाख्यः) अविनाभूतः । तस्य अविनाभावात् (ईक्षणाभावः शब्दाभिहितः) शक्नोति (तम्) लक्षयितुम् । यथा आकृतिर्व्यक्तिम् । स्पर्शादीनामभावसंबद्धानामपि तदभावाविनाभावाभावात् न तेषां कर्तव्यता (लक्षणार्हा) ।

('अपिच पुरुषप्रयत्नः कृतिः' इत्यादिभाष्यं व्याचष्टे–) क्रत्वर्थत्वे (सति) विधायकः कर्मोत्पत्तिमात्रनिष्ठ एव भवेत् (उत्पत्तिग्रहणं विनियोगस्याप्युपलक्षणम्) । एवं च (सति) यदेवास्य तादर्थ्यप्रतिपादकत्वम् (प्रयोगप्रतिपादकत्वमित्यर्थः) तदेव हीयेत, प्रयोगवचनेन कृतत्वात् । तस्मात् स पक्षो ग्रहीतव्यः, यत्र विधायकः अर्थवान् ।

अविशेषात्तु शास्त्रस्य यथाश्रुति फलानि स्युः ।४॥

भाष्यम्— उच्यते । यद्येवम्, इमान्यपि पुरुषार्थानि स्युः, 'समिधो यजति, तनूनपातं यजति' 'नानृतं वदेत्' इत्येवमादीनि । अत्रापि पुरुषप्रयत्नसंकीर्तनम्, अत्रापि न द्रव्यं चिकीर्ष्यते इति ।

अपिवा कारणाग्रहणे तदर्थमर्थस्यानभिसंबन्धात् । ५ ॥

भाष्यम्— अपिवेति पक्षव्यावृत्तिः । नैतदस्ति, समिदादीन्यपि पुरुषार्थानि प्राप्नुवन्तीति । कारणाग्रहणे पुरुषार्थानि प्रजापतिव्रतानि भवेयुः । न तत्र श्रुत्यादिकं किञ्चित् कारणं गृह्यते, येन कर्मणामङ्गभूतानीति गम्यते । तस्मात्तानि पुरुषार्थानि । अर्थस्य कर्मणो नाभिसंबन्धः प्रजापतिव्रतैः । इह तु समिदादीनां प्रकरणं नाम कारणं गृह्यते । येन कर्मार्थानीति विज्ञायते । तस्माद्विषम उपन्यासः । पुरुषप्रयत्नश्चैवं सति अनुवादः ।

तथा च लोकभूतेषु । ६ ॥

भाष्यम्— लोकेऽपि निष्पन्नकार्यादिषु प्रयोजनवस्तु यदसंयुक्तं फलेन श्रूयते, तत् तदङ्गं विज्ञायते इति मन्यमाना उपवासं जपं वोपदिश्यैव कृतिनो मन्यन्ते, न क्रतवे, इदमस्य प्रयोजनवतोऽङ्गमिति । तथा च अपरेऽपि मन्यमाना न दुरुक्तं मन्यन्ते । तस्मात् समिदादीनि कर्माङ्गाणि, न प्रजापतिव्रतानीति सिद्धम् ।

शा— 'प्रतिषेधे श्रुतिः शब्दः, पर्युदासे तु लक्षणा । प्रतिषेधश्च सन् प्राप्तिं मार्गमाणः क्रतुं व्रजेत् ॥' इति प्राप्ते, ब्रूमः । 'उपक्रमे श्रुतं कर्मवाचि व्रतपदं यतः । तदन्वयबलात् कर्मविशेषोऽतोऽत्र चोद्यते ॥ तत्र लक्षणयाऽप्यत्र पर्युदासः, स च क्रतोः । बहिः श्रुतः फलाकाङ्क्षी पुरुषार्थत्वमृ-

च्छति ॥ श्रुत्यादि क्रतुसंबन्धे प्रमाणं नात्र विद्यते । पुरुषापेक्षितार्थत्वं विधिना चाववोधितम् ॥ साक्षादपेक्षितं तस्य फलमेव न तु क्रतुः । अतः फलार्थता, तच्च वाक्यशेषादघक्षयः ॥ '

सोम-- द्रव्यार्जनवत् प्रत्यक्षेण प्रीत्यनवगमात् क्रत्वर्थत्वमेव इति प्रत्यवस्थानात् **संगतिः** । फलकल्पनाभयात् क्रत्वर्थत्वस्य विश्वजित्- रात्रिसत्र- हिरण्यभरणादावपि वक्तुं शक्यत्वात् तेषामपि एतदधिकरणविषयत्वमित्याहुः । **सूत्रार्थस्तु**- तस्याः प्रीतेरुत्सर्गेऽपि द्रव्यार्जनादिवत् प्रीत्यनुपलम्भेऽपि प्रजापतिव्रतादीनि पुरुषार्थानि शास्त्रस्य अनतिशङ्क्यत्वात् शास्त्रेण पुरुषार्थत्वे बोध्यमाने प्रीत्यभावप्रयुक्ताशङ्कायाः अनवकाशात् इति यावत् । शास्त्रस्य क्रत्वर्थत्वेऽपि उपपत्तिमाशङ्क्य आह- न चेति । न च एभिः कर्मभिः क्रतुसंबन्धि द्रव्यं चिकीर्ष्यते क्रत्वर्थद्रव्यसंबन्धो नैषामिति यावत्, येन तद्द्वारा क्रत्वर्थता स्यात् । अतः तेनार्थेन पुरुषार्थेन संबन्धात् ईक्षणादिक्रियायां पुरुषस्य कर्तृत्वेन शेषित्वेन वा श्रुतिरिति ।

वि-- ' नेक्षेतोद्यन्तमादित्यं क्रत्वर्थं तत्र वा, ऽग्रिमः । फलस्याकल्पनीयत्वात् क्रतौ प्राप्तं निषिध्यते ॥, व्रतोक्त्या पर्युदासत्वे संकल्पोऽनीक्षणेऽत्र सः । न क्रत्वङ्गममानत्वात् पुमर्थः पापहानये ॥ '

भाट्ट— ' तस्य व्रतम् ' इत्युपक्रम्य स्नातकपुरस्कारेण 'नेक्षेतोद्यन्तमादित्यं नास्तं यन्तं कदाचन । नोपरक्तं न वारिस्थं न मध्यं नभसो गतम् ॥ ' इत्यादि प्रजापतिव्रतं श्रुतम् । तत्रापि भाष्यकारादिभिः प्रतिषेधत्वे पर्युदासत्वे च उभयथाऽपि फलकल्पनाभिया क्रत्वर्थत्वमाशङ्क्य अनारभ्याधीतत्वात् श्रुत्याद्यभावेन क्रत्वर्थत्वानुपपत्तेः पर्युदासत्वमङ्गीकृत्य पुरुषार्थत्वं सिद्धान्तितम् । तदपि कलञ्जभक्षणप्रतिषेधहिरण्यधारणन्यायेन क्रत्वर्थत्वशङ्काऽनुपपत्तेरुपेक्षितम् ।

विचारस्तु एवमेवात्र कर्तव्यः किमयं प्रतिषेधः पर्युदासो वेति । सिद्धान्ते आर्थवादिकफलप्रयुक्तत्वात् प्रतिषेधपक्षे च तदभावादध्यायसंगतिः । तत्र नञः प्रधानान्वयस्य अभ्यर्हितत्वात् भावनाऽन्वयव्युत्पत्तेर्धात्वर्थाद्यन्वयस्य लक्षणादिभिया अनुपपत्तेः पर्युदासत्वायोगात् रागप्राप्तोद्यदादित्येक्षणभावनायाः प्रतिषेध एवायं पुरुषार्थः कलञ्जभक्षणादिप्रतिषेधवत् । अतश्च निषेधेन ईक्षणस्य अनिष्टसाधनत्वाक्षेपेऽपि फलान्तराकाङ्क्षाऽभावात् 'नैतावता हैनसा युक्तो भवति' इत्यार्थवादिकपापक्षयफलकल्पनाऽनुपपत्तेः नार्थवादिकफलप्रयुक्तत्वम् । अर्थवादस्तु ईक्षणजन्यप्रत्यवायाभावबोधनद्वारा ईक्षणनिन्दा । इति प्राप्ते, ' तस्य व्रतम् ' इति व्रतशब्देन उपक्रमस्थेन अनुष्ठेयक्रियाप्रतिपादनात् तदनुरोधेन उपसंहारस्थो निषेधोऽपि अनुष्ठेयामेव क्रियां विधत्ते । अत एव नञीक्षतिभ्यां ईक्षणाभावसंकल्परूपक्रियैव लक्षणया विधीयते । मानससंकल्पस्य प्रवृत्तिनिवृत्त्यविनाभूतत्वात् ईक्षतिरेव वा लक्षकः, नञ्पदं तात्पर्यग्राहकम् । न चैवमुद्यदादित्यस्य पदार्थैकदेशे ईक्षणे अन्वयापत्तिः, कारकाणां प्रथमतो भावनाऽन्वयस्यैव स्वीकारेण एकदेशान्वयाप्रसक्तेः । यन्मते हि सोमादीनां प्रथमत एव धात्वर्थे अन्वयः, तन्मते एवेदं दूषणम्, न त्वस्मन्मते । अतः अनीप्सितकर्मत्वेन सक्तुवत् लक्षितकरणत्वेनैव वा भावनाऽन्वयः । पार्ष्ठिकान्वये तु समस्तपदघटितवाक्यस्यैव कल्पनात् न कोऽपि दोषः । अतश्च उद्यदादित्येक्षणाभावसंकल्पभावनैव उदये निमित्ते विधीयते । णमुलादिवत् शतृप्रत्ययेन निमित्तत्वाभिधानात् । तत्फलं च आर्थवादिकमघक्षयः । अतः सिद्धं भावनाऽतिरिक्ते नञः संबन्धात् पर्युदासः, स च फलप्रयुक्त इति । ननु एवमपि नञः भेदवद्वाचित्वस्य ' तदन्यतद्विरुद्धतदभावेषु नञ् ' इति प्रसिद्धेः उद्यत्पदेनैव संबन्धाङ्गीकारात् उद्यद्भिन्नादित्येक्षणस्यैव अघक्षयफलकत्वेन विधानोपपत्तेर्न संकल्पलक्षणा । न च सुबन्तसंबन्धे नञ्समासापत्तिः, नानुयाजेष्वितिवदुपपत्तेः । न च नञः आदित्यपदेन वा संबन्धः उद्यत्पदेन वेत्यत्र विनिगमकाभावः, विशेषसाकाङ्क्षत्वस्यैव विनिगमकस्य सत्त्वादिति **चेत्**, तथात्वेऽपि उद्यन्तमिति सुबन्तपदस्य निपातान्वयव्युत्पत्त्यभावेन उद्यद्भिन्नेऽपि पदद्वयलक्षणाया आवश्यकत्वात्, तथात्वे स्वभावेनैव तादृशादित्येक्षणस्य सर्वदा जायमानत्वेन अघक्षयोपपत्तेर्विधिवैफल्याच्च, स्वरसतः प्रतीयमान-

निषेधस्य संकल्पलक्षणयाऽपि अपरित्यागेन भवदुक्तपर्युदासानुपपत्तेश्च । अस्मिन् उदाहरणे तथाऽङ्गीकारेऽपि ' न वारिस्थम् ' इत्यत्र ' एकादश्यां न भुञ्जीत ' इत्यादौ च संकल्पलक्षणाया आवश्यकत्वाच्च ।

प्रयोजनम्— स्पष्टमेव । सूत्राण्यपि अस्मिन्नेव विचारे सुधीभिर्योज्यानि ।

मण्डन— ' अनीक्षणव्रतं पुंसः । ' ५.

शंकर-- ' पर्युदासोऽनीक्षणादौ । ' ६.

* " एतावता हैनसा अयुक्तो भवति ' इति पुरुषसंबद्धो दोषः कीर्त्यते " इति **प्रजापतिव्रताधिकरणभाष्ये** (४।१।३) दोषोक्त्या प्रजापतिव्रतानां अकरणनिमित्तदोषपरिहारार्थत्वं एतावता कर्मणा कृतेन सता पापेन अयुक्तो भवति इति वाक्यशेषार्थाभ्युपगमनेन वक्ष्यते । **सु. पृ. १४८२.**

* सति तु निषेधे तत्परिपालनाय प्रवृत्तस्य निवृत्तेरपि संकल्पाविनाभावस्य **प्रजापतिव्रतनये** उक्तत्वात् विशेषनियमरहितभोजनद्वयवर्जनसंकल्परूपनित्यव्रतं एकादश्याम्। (प्रजापतिव्रताधिकरणम्) । **पुरुषार्थचिन्तामणिः .**

* **प्रजापतिशब्दः** देवताविशेषे रूढः । **सु. पृ. ७८५ .**

* **प्रजापतिसप्तदशत्वस्य** अग्न्यादिदेवतायोगेऽपि न भङ्गः । **संकर्ष. २।३।२. मीको.** पृ. २१४२ 'देवतापदयोगेऽपि० ' इत्यत्र द्रष्टव्यम् ।

* **प्रज्ञाः** । ' विकल्पिता हि जिज्ञासोः प्रज्ञा विकसनक्षमाः । ' **वा. १।३।९।३० पृ. २९४.**

' प्रणमन्त्यनपायमुत्थितं प्रतिपच्चन्द्रमिव प्रजा नृपम् ' इति न्यायः (भारविः २।११) । **साहस्री.** ९६५.

* **प्रणयनं** अग्नेः चातुर्मास्यगतं दार्शपौर्णमासगतप्रणयनवत् न सौमिकप्रणयनवत् इति भाष्यमतम् । न दार्शिकं न सौमिकम्, किन्तु अपूर्वमेवेदं इति वार्तिकमतम् । के. ७।३।८।१९-२७. * प्रणयनं (अपां) क्रत्वर्थं आत्मनिर्वर्तकं साधनं अपेक्षमाणं गोदोहनं पुरुषार्थं गृह्णाति । गोदोहनमपि पुरुषार्थं सत् आश्रयमपेक्षमाणं प्रणयनं प्रसक्तं गृह्णाति । **वा. ८।१।३।५.**

* **प्रणयनस्य** (अपाम्) अवान्तरप्रकरणात् गोदोहनाश्रयत्वम् । **सु. पृ. ८५५.** * प्रणयनस्य (अपाम्) पात्रम् ' गोदोहनेन पशुकामस्य प्रणयेत्, कांस्येन ब्रह्मवर्चसकामस्य, मार्तिकेन प्रतिष्ठाकामस्य ' इति नैमित्तिकम् । वारणं तु नित्यम् । (गोदोहनं यस्मिन् पात्रे अग्निहोत्री गौर्दुह्यते, तत् पात्रम् । वारणं वरणावृक्षजन्यं पात्रम् ।) **भा. ४।३।२।४.**

प्रणयनाधिकरणम् । चातुर्मास्येषु अग्निप्रणयने सौमिकाग्निप्रणयनधर्मातिदेशो नास्ति ॥

सौमिकं तु प्रणयनमवाच्यं हीतरत् । ७।३।८। २० ॥

भाष्यम्-- चातुर्मास्येषु श्रूयते ' द्वयोः प्रणयन्ति, तस्मात् द्वाभ्यामेति ' इति । अस्ति तु सोमे प्रणयनं धर्मवत् । तथा दर्शपूर्णमासयोः अधर्मकम् । तत्र संदेहः किं सौमिकमेतत् प्रणयनम्, उत दार्शपौर्णमासिकमिति । तत्र सूत्रेणैवोपक्रमः । सौमिकं तु प्रणयनमवाच्यं हीतरत् । सौमिकमेतत् प्रणयनम् । किं कारणम् ? अवाच्यं हि इतरत् दार्शपौर्णमासिकम्, चोदकेन प्राप्तत्वात् । कथं पुनरयं प्रणयतिशब्दः प्रणयनमात्रवचनः सन् सौमिकं प्रणयनविशेषं शक्नोति वक्तुम् ? लक्षणयेति ब्रूमः । तीर्थशब्दवत् । तद्यथा तीर्थशब्दः तीर्थमात्रवचनः सन् तीर्थविशेषं धर्मसाधनं कदाचित् ब्रूते ' तीर्थयात्रां गतः ' इति ।

उत्तरवेदिप्रतिषेधश्च तद्वत् । २१ ॥

भाष्यम्-- ' न वैश्वदेवे उत्तरवेदिमुपवपन्ति न शुनासीरीये ' इति । प्राप्तिपूर्वो हि प्रतिषेधो भवति । सौमिके च प्रणयने उत्तरवेदिः, न दार्शपौर्णमासिके ।

प्राकृतं वाऽनामत्वात् । २१ ॥

भाष्यम्-- प्राकृतं वा एतत् प्रणयनं दार्शपौर्णमासिकम् । कुतः ? अनामत्वात् । प्रणयनशब्दः सौमिकस्य प्रणयनस्य न नामधेयम् । नैतत् तस्य वाचकमित्यर्थः । यदि अयं तस्य वाचकः स्यात्, ततस्तदिह ब्रूयात् । इदं तु पदार्थनामधेयम्, पदार्थस्य प्राङ्नयनस्य वाचकम् । यस्य वाचकम्, तदिह शक्नोति अग्नेः प्राचीनं नयनं वक्तुम् । तच्चेहास्त्येव । तस्मात् तस्य वाचकः ! एवं

संनिहितप्रत्ययो न बाधितो भवति । अथ यदुक्तम्, तीर्थशब्दवत् भविष्यतीति । अत्र ब्रूमः । तीर्थशब्दोऽपि तीर्थमात्रमेव ब्रूते । ' तीर्थयात्रां गतः ' इति तु उक्त्वा कानिचित् तीर्थानि अनुक्रान्तानि । ततोऽसौ तद्विशिष्टार्थो विज्ञायते । यत्र तु केवलः प्रयुज्यते तत्र तीर्थमात्रमेव ब्रूते, यथा ' तीर्थे स्नाति, तीर्थमेव हि समानानां भवति ' इति । अपिच संभवति श्रुत्यर्थे लक्षणाऽर्थः अग्राह्यः । संभवति चात्र श्रुत्यर्थः । तस्मात् न लक्षणाऽर्थो ग्राह्य इति ।

परिसंख्याऽर्थं श्रवणं गुणार्थमर्थवादो वा ।२३॥

भाष्यम्—तत्राह, यदुक्तम् ' अवाच्यं हीतरत् ' इति, तस्य कः परिहारः ? **उच्यते** । परिसंख्याऽर्थं वा स्यात् ' द्वयोः प्रणयन्ति, न चतुर्षु ' इति । गुणार्थम्, अर्थवादार्थं वा ' तस्मात् द्वाभ्यामेति ' इति । तत्र परिसंख्यायां तावत् त्रयो दोषाः । गुणोऽपि न कश्चित् विधीयते । परिशेषात् अर्थवादार्थम् । ननु अर्थवादोऽपि निष्प्रयोजनः प्रणयनस्य प्राप्तत्वात् । अर्थवादस्य प्रयोजनमुत्तरस्मिन्नधिकरणे वक्ष्यामः ' मध्यमयोर्वा गत्यर्थवादात् ' (२५) इति । (अत्रत्या टुप्टीका **मीको.** पृ. १६८८ ' चातुर्मास्येषु अग्निप्रणयनम् ' इति बिन्दौ संगृहीता उभयाधिकरणसाधारण्यात्, इति तत्रैव द्रष्टव्या ।)

सोम— निर्मन्थ्यादीनामनतिदेशकत्वेऽपि प्रणयतिशब्दस्य अतिदेशकत्वं भविष्यति इत्युत्थानात् **संगतिः** । **सूत्रार्थस्तु**— सौमिकं सौमिकसदृशं प्रणयनम्, इतरत् प्राकृतं चोदकप्राप्तं तु अवक्तव्यमिति ।

वि— ' सौमिकं प्राकृतं वा स्याद् द्वयोः प्रणयनं श्रुतम् ।, आद्योऽप्राप्तत्वतो, मैवमनाम्नत्वेन वादगीः ॥ ' वादगीः अर्थवादार्थं वाक्यम् ।

भाट्ट— चातुर्मास्येषु वैश्वदेव– वरुणप्रघास–साकमेध– शुनासीरीयाख्यानि चत्वारि पर्वाणि । तत्र ' द्वयोः प्रणयन्ति, द्वाभ्यामेति ' इति श्रुतम् । तत्र भाष्यकारः सप्तभिः सूत्रैः अधिकरणद्वयं एवं व्याचख्यौ (तत्र चतुर्भिः सूत्रैः आद्यमधिकरणं त्रिभिस्तु द्वितीयम्) तत्र आद्ये तावत् सौमिकं सधर्मकं प्रणयनमिदम्, उत प्राकृतं अधर्मकं गार्हपत्यादाहवनीयं प्रति । इति चिन्तायाम्, प्राकृतस्य चोदकेनैव प्राप्तत्वेन विधिवैयर्थ्यापत्तेः वचनार्थवत्त्वाय प्रणयतिरयं सौमिकप्रणयनपरः तद्विधानार्थः । अत एव तत्र **उत्तरवेदेः** सत्त्वेन तत्प्राप्तौ ' न वैश्वदेवे उत्तरवेदिमुपवपति, न शुनासीरीये ' इति तत्पर्युदासोऽपि संगच्छते । तेन तयोरुत्तरवेदिव्यतिरिक्ताः **सौमिकप्रणयनधर्माः** कार्याः । यत्तु ' उपात्र वपन्ति ' इति उत्तरवेदेः उत्पत्तिवाक्यम्, यच्च ' उत्तरवेद्यामग्निं निदधाति ' इति तस्याः विनियोगवाक्यम्, तत् मध्यमयोः पर्वणोः प्राकृतप्रणयनकाले एव उत्तरवेदिमात्रविधायकम् । **इति प्राप्ते**, न प्रणयतिः सौमिकप्रणयनस्यैव विशिष्य उपस्थापकः । संनिहितत्वात्तु प्राकृतमेवोपस्थापयति । अतः तस्यैवातिदेशप्राप्तेः पूर्वप्रवृत्त्या विधिः अनुवाद एव वा । तत्प्रयोजनं च **यद्यपि** नेतरयोः परिसंख्या त्रैदोष्याद्यापत्तेः, प्रणयनाभावे इतरपर्वणोः अग्न्यभावेन यागानुपपत्तेश्च । नापि अर्थवादोपपत्तिः विध्यभावे अर्थवादत्वस्यैवानुपपत्तेः । **तथापि** उत्तरवेदिरूपगुणार्थं पुनःश्रुतिः । एतदभावे हि चतुर्ष्वपि प्राकृतप्रणयनप्राप्तौ देशापेक्षायां उत्तरवेदिविधानं चतुर्षु अपि प्राप्नुयात् । एतत्सत्त्वे तु पर्वद्वयवृत्तिप्रणयनस्यैव विशिष्योपदेशेन उपस्थितत्वात् तत्रैव उत्तरवेदिः तदीयाग्निनिधानमेव च द्वारं इति सिध्यति । अतः इतरपर्वणोः उत्तरवेदिपरिसंख्यैव अनुवादप्रयोजनमिति ।

मण्डन— ' द्वयोः प्रणीतिर्नहि सौमिकी स्यात् । '

शंकर— 'द्वयोः प्रणयनान्तरम् । ' (अपूर्वमित्यर्थः वार्तिकरीत्येदम्) ।

* **प्रणयनाधिकरणे** ' उपात्र वपन्ति ' इति वरुणप्रघासावान्तरप्रकरणाधीतमपि ' न वैश्वदेवे उत्तरवेदिमुपवपन्ति, न शुनासीरीये ' इति पर्युदासैकवाक्यताबलादेव अवान्तरप्रकरणं बाधित्वा चातुर्मास्यानामेव ' अत्र ' इति वादः इत्युक्तम् । **बाल.** पृ. १२, * विकृतेस्तु अवान्तरप्रकरणं संदंशोद्भूतिकं सप्तमे **प्रणयनाधिकरणे** वरुणप्रघासानामुक्तम् । पृ. ११.

* **प्रणयनलोपेनापि** (अग्नेः) सायमग्निहोत्रस्य कालानुग्रह एव न्याय्यः सांतपनीयोत्कर्षे सायमग्निहोत्रहोमोत्कर्षप्रसङ्गे । **भाट्ट.** ५।१।१७.

* **प्रणवविधानं** सामिधेनीषु अन्त्ये ऋगक्षरे एव टेः स्थाने । **संकर्ष.** ४।१।१२. ' सामिधेनीषु प्रणवविधानं अन्त्ये ' इत्यत्र द्रष्टव्यम् । * प्रणवविधानं सामिधेनीषु ऋगक्षरस्थाने एव । **संकर्ष.** ४।१।११. ' सामिधेनीषु प्रणवविधानं ऋगक्षरस्थाने एव ' इत्यत्र द्रष्टव्यम् ।

* **प्रणवशब्दवाच्यस्य** ओङ्कारस्यैव सामिधेनीषु विधानम्, न तु ' प्रणव ' इति शब्दस्य । **संकर्ष.** ४।१।१३. ' सामिधेनीषु प्रणवशब्दार्थस्य ' इत्यत्र द्रष्टव्यम् ।

* **प्रणाड्याऽपि** च येन क्रियते, तत् कारणं भवति यथा ' गोमयैः पचति, तुषपक्का भवन्ति ' इति । **भा.** ७।१।१।७.

* **प्रणीताः** नाम हविःश्रपणार्थमुत्पन्नाः उत्पवनादिधर्मसंस्कृता आपः । **वि.** ९।२।१४. * ' प्रणीताः प्रणेष्यन् वाचं यच्छति तां सहविष्कृता विसृजति ' इति अस्मिन् देशे ये पदार्थास्तेषां धर्मो वाग्यमः, न प्रधानापूर्वस्य । ९।१।७।२३–२४. * प्रणीताः संयवनप्रयुक्ताः दर्शपूर्णमासयोः । ४।२।५।१४–१५. * ' अन्तर्वेदि **प्रणीता** निनयति ' । **भा.** ४।२।५।१४, * ' **प्रणीताभिर्हवींषि** संयौति ' (मिश्रयति) । ४।२।५।१४. * **प्रणीतानां** अपां अन्तर्वेदि निनयनं प्रतिपत्तिः । निनयनं प्रणीतानां न प्रयोजकम् । हविःसंयवनोत्तरं अवशिष्टानामपां नाशे निनयनं लुप्येत, न तदर्थं पुनरपां प्रणयनं कर्तव्यम् । **के.** (वि. ४।२।५). * प्रणीतानां अपां वाक्येन पिण्डसंयवनसाधनत्वावगमेऽपि आनुषङ्गिकपाकसाधनत्वस्यापि सत्त्वात् **सौर्यादिचरौ** अभ्युदितेष्टौ च प्रणीताधर्मोपपत्तिः । **भाट्ट.** ९।२।१३. * प्रणीतानामपां संयवनं प्रयोजकम् । निनयनं तु प्रतिपत्तिः । दर्शपूर्णमासयोः । ४।२।५। १४–१५. * प्रणीतानामभावः पुरोडाशाभावे यथा पयस्यायाम् । **भा.** ४।२।५।१५.

♒ प्रणीतादि तथेति चेत् । ९।१।७।२३ ॥

दर्शपूर्णमासयोः ' प्रणीताः प्रणेष्यन् वाचं यच्छति, तां सहविष्कृता विसृजति ' इति श्रुतम् । प्रणीताप्रणयनात् प्राक् वाक् यन्तव्या ' हविष्कृदेहि ' इति प्रैषोच्चारपर्यन्तमिति तदर्थः । अयं वाग्यमः तादृशदेशधर्मः स्यात् । तदेतदाह प्रणीतादि प्रणीता आरभ्य हविष्कृत्पर्यन्तं यत् वाग्यमनमुक्तम्, तत् तथा उपांशुत्ववत् देशसंबद्धं स्यात् इति पूर्वः पक्षः । इति चेत् ।

अन्तरागर्भिण्यधिकरणस्थं पूर्वपक्षसूत्रमिदम् ।

न, यज्ञस्याश्रुतित्वात् । २४ ॥

' प्रणीताः प्रणेष्यन् वाचं यच्छति तां सहविष्कृता विसृजते ' इत्युक्तं वाग्यमनं न देशप्रयुक्तं यज्ञप्रयुक्तम्, परमापूर्वप्रयुक्तमित्यर्थः । यज्ञस्य अश्रुतित्वात् नात्र संबन्धी यज्ञशब्दः श्रूयते । किन्तु तद्देशगतपदार्थप्रयुक्तमेव वाग्यमनमिति सिद्धान्तः । **के.**

* **प्रणीताकार्यं** श्रपणापूर्वम् । **सु.** पृ. ८५९.

* **प्रणीताधर्माः** इज्यार्थे दधनि पयसि च पाके उपकुर्वन्ति । **भा.** ३।१।७।१४ पृ. ७१६. * प्रणीताधर्माः उत्पवनादयः, सांनाय्यार्थमुत्पन्नयोः दधिपयसोः अभ्युदयेष्ट्यां चन्द्रोदयं निमित्तीकृत्य श्रपणहेतुत्वात् कर्तव्याः । **के.** (९।२।१४।४३–४४). * **प्रणीताधर्माणामनुष्ठानं** अभ्युदितेष्टौ दधिपयसोः । ९।२।१४। ४३–४४. **मीको.** पृ. ५७९ 'अभ्युदितेष्टौ दधिपयसोः' इत्यत्र द्रष्टव्यम् ।

♒ प्रणीताधर्मन्यायः । प्रणीतावाङ्नियमन्यायः । दर्शपूर्णमासयोः प्रणीतावाग्यमः तद्देशपदार्थावान्तरापूर्वप्रयुक्तः ॥

प्रणीतादि तथेति चेत् । ९।१।७।२३ ॥

भाष्यम्— ननु इदानीमेवोक्तम् ' यज्ञं तन्विष्यन्तौ अध्वर्युयजमानौ वाचं यच्छतः ' इति । (यथा ' प्रणीताः प्रणेष्यन् वाचं यच्छति तां सहविष्कृता विसृजति ' इति । अस्मिन् देशे ये पदार्थाः तेषां धर्मो वाग्यमः, न प्रधानापूर्वस्य—इति २४ सूत्रे भाष्यम्) ।

टुप्— अथवा नासिद्धो दृष्टान्तो भवति इति दृष्टान्तसिद्धये अधिकरणं प्रक्रियते । ' प्रणीतादि तथेति

चेत्' इति। यथा 'यज्ञेन संयोगात्' इति उपांशुत्वं परमापूर्वप्रयुक्तं एवमिहापि न पदार्थप्रयुक्तो वाङ्नियम इति। 'ननु इदानीमेवोक्तम्' 'स्थितादुत्तरम्' इति चैतस्मात् ग्रन्थात् अनुमीयते अधिकरणान्तरम्।

न यज्ञस्याश्रुतित्वात्। २४॥

भाष्यम्— उच्यते। तद्देशप्रयुक्ततायामपि एतदवकल्पते। कथम्? यज्ञं विस्तारयितुं वाचं यच्छतः। तौ वाचंयमौ सन्तौ अविक्षिप्यमाणचेतस्कौ पदार्थेषु क्रियमाणेषु अप्रमाद्यन्तौ तथा करिष्येते, यथा न कश्चित् पदार्थः पदार्थावयवो वा हीयते। अध्वर्युः वाग्यमेन अनन्यचेतस्को न पदार्थान् प्रमादयिष्यति। यजमानश्च एवं वाग्यमेन अनन्यचेतस्कः प्रमादयिष्यन्तं तं बोधयिष्यति। अङ्गैरपि अनन्तरीयमाणैः यज्ञो विस्तार्यते, न केवलं स्वैरवयवैः अङ्गैश्च विस्तारयितुं वाग्यमः शक्नोति। अस्मिन् काले क्रियमाणो न स्वेनात्मना। यज्ञसंयोगश्चात्र विस्तारसंबद्धः। तस्मात् अङ्गप्रयुक्ततायामपि उपपद्यते 'यदध्वर्युयजमानौ वाचं यच्छतः तत् प्रजापतिभूयंगतौ यज्ञं तन्वाते' इति दृष्टेन कारणेन, नादृष्टेन इति वर्तमानकालापदेशादवगम्यते, यथा वयं वाग्यमेन तायमानं यज्ञं विद्मः तथेति।

टुप्— 'न यज्ञस्य' इति उत्तरपक्षे सूत्रं वर्णनीयम्।

शा— वाग्यमनं तु यज्ञसंयोगाभावात् अवान्तरापूर्वप्रयुक्तम्। तदिदमुक्तं 'प्रणीतादि तथेति चेत्।' 'न यज्ञस्याश्रुतित्वात्।' इति। अथवा अनेन सूत्रद्वयेन अधिकरणान्तरं प्रस्तुताधिकरणसिद्धान्तस्य दृष्टान्तसिद्ध्यर्थम्। तदीयपूर्वपक्षन्यायेन च पूर्वपक्षं वक्तुं अन्तरागर्भिणीन्यायेन विचार्यते।

वि— 'प्रणीतावाग्यमे पक्षौ योजनीयौ पुरेव तौ। पुरा हविष्कृदाह्वानाद् ये तत्रापूर्वकारिता॥'

भाट्ट— इदमधिकरणं सूत्रकारेण पूर्वाधिकरणे अन्तरागर्भिणीत्वेन कृतमपि व्याख्यासौकर्यार्थं पृथगभिधीयते। दर्शपूर्णमासयोः 'यज्ञं तन्विष्यन्तौ अध्वर्युयजमानौ वाचं यच्छतः। यदध्वर्युयजमानौ वाचं यच्छतः, तत् प्रजापतिभूयंगतौ यज्ञं तन्वाते। तस्मात् प्रणीताः प्रणेष्यन् वाचं यच्छति, तां सह हविष्कृता विसृजति' इति श्रुतम्। तत्रायं वाग्यमः प्रणीताप्रणयनाङ्गमेव, विधिवाक्यस्थलृट्प्रत्ययेन तन्मात्रार्थत्वावगमात्। अतो हविष्कृदाह्वानकालावधिकवाग्यमस्य तन्मात्रार्थत्वावगमात् न भागधर्मत्वम्, न वा तावत्पदार्थधर्मत्वम्। यदि तु 'प्रणीताः प्रणेष्यन्' इति वाक्यस्य वाग्यमोत्पत्तिपरत्वे उत्पत्तिशिष्टकर्त्रैकत्वानुरोधेन तत्र यजमानप्राप्त्यभावात् पूर्ववाक्यस्य अर्थवादत्वानुपपत्तेः यजमानमात्रविधानस्य वा सुतरामनुपपत्तेः अवश्यम् 'यज्ञं तन्विष्यन्तौ' इति वाक्यस्यैव वाग्यमविधायकत्वमुच्येत, ततः अस्तु तत्रत्यलृट्श्रुत्या यज्ञविस्तारार्थत्वमेव। तदा हि उत्तरवाक्याभ्यां वाग्यमानुवादेन प्रणीताप्रणयनहविष्कृदाह्वानयोः पूर्वोत्तरावधित्वेन विधी। अत एव तत्रत्यमेकवचनमपि अनुवाद्यगतत्वात् 'ग्रहं संमार्ष्टि' इतिवदविवक्षितम्। अतश्च विधेयसामर्थ्यानुसारात् उद्देश्यभूतो यज्ञविस्तारापरनामधेयो यज्ञभागोऽपि तदवधिक एव।

यत्तु मूले पूर्वपक्षे यज्ञशब्दस्य विस्तारविशेषणत्वमनङ्गीकृत्य भागधर्मत्वमुक्तम्, तत् यज्ञशब्दस्य विस्तारं विना अन्यत्रान्वयस्य दुरुपपादकत्वात् भागवाचकपदाश्रवणाच्चोपेक्षितम्। अतः अध्वर्युयजमानकर्तृकवाग्यम एव यज्ञविस्तारपदवाच्यभागधर्मत्वेन विधीयते, न तु पदार्थधर्मत्वेन तद्वाचकपदाभावात्। अतश्च पूर्वाधिकरणपूर्वपक्षवदेव यज्ञापूर्वप्रयुक्तो भागधर्मश्च वाग्यमः। इति प्राप्ते,

यजमानाध्वर्युकर्तृविशिष्टवाग्यमस्य यज्ञभागार्थत्वे षष्ठविधिप्रकारापत्तेः (धात्वर्थोद्देशेन विशिष्टान्यविधिः) संनिपत्योपकारकत्वलाभाय द्वितीयविधिप्रकारलिप्सया (अन्योद्देशेन धात्वर्थविधिः) च अध्वर्युयजमानसंस्कारकत्वेनैव वाग्यमविधिः। यथा च नैवं सति उद्देश्यानेकता, तथोक्तं ग्रहैकत्वाधिकरणे कौस्तुभे। तस्य च दृष्टार्थत्वात् मनःप्रणिधानमेव संस्कारः। संस्कृतयोश्च तयोः उपयोगापेक्षायां तत्तत्प्रमाणककरिष्यमाणकर्मार्थत्वमेव क्लृप्तम्, न तु भागार्थत्वम्। न च तयोर्भागोपयोगित्वस्यापि तद्द्वारा कथञ्चित् सत्त्वात् 'यज्ञं तन्विष्यन्तौ' इति विशेषणसामर्थ्यात् यज्ञविस्तारोपयोग्यध्वर्युयजमानसंस्कार-

कत्वमेव वाग्यमस्य कल्प्यतां इति वाच्यम्। 'यज्ञं तन्विष्यन्तौ' इत्यस्य उद्देश्यविशेषणत्वेन अविवक्षितत्वात्। अतश्च हविरुभयत्ववत् 'यज्ञं तन्विष्यन्तौ' इत्यनुवादो वाग्यमस्तुत्यर्थः। अतो दृष्टार्थत्वलाभाय पूर्वोत्तरावधिकतावत्पदार्थधर्मत्वमेव। न च लृट्श्रुत्या प्रणीताप्रणयनमात्रार्थत्वमेव कल्प्यतां इति वाच्यम्। हविष्कृदाह्वानावधेः अदृष्टार्थताऽऽपत्तिभयेन तस्यापि कालोपलक्षणत्वात्। अतः सिद्धं वाग्यमस्यापि तावत्पदार्थधर्मत्वम्।

शंकर— 'वाग्यमो दर्शगस्तद्वत्।' १३. तद्वत् पदार्थगः।

* वारवन्तीये निरस्तमपि **प्रणीताधर्मन्यायं** (९।१।७।२३–२४) इतरेतराख्यदोषान्तराभिधित्सया पुनरुपन्यासपूर्वं निरस्यति— प्रासङ्गिकेति (वा. २।२। १३।२९ पृ. ५६९)। सु. पृ. ८८१.

* **प्रणीतानिनयनं** प्रतिपत्तिकर्म दर्शपूर्णमासयोः। ४।२।५।१४–१५. **मीको.** पृ. २३४६ 'निनयनन्यायः' इत्यत्र द्रष्टव्यम्।

* **प्रणीतानिनयनाधिकरणम्।** निनयनन्यायः। ४।२।५।१४–१५.

* **प्रणीताप्रणयनकाले** पौर्णमास्यां ब्रह्मवरणम्। अमावास्यायां पूर्वेद्युः। **भा.** १२।१।१८।३९.

* प्रणीताप्रणयनकाले विहितस्य वाङ्नियमस्य हविष्कृदाह्वाने त्यागः। वाङ्नियमे च प्रणीतोत्तरेषां आह्वानात् प्राचीनानां अङ्गानां अपूर्वं प्रयोजकम्। **के.** ९।१।७। २३–२४.

* **प्रणीतावाङ्नियमस्य** प्रयोजकं हविष्कृदाह्वानात् प्राचीनावान्तरापूर्वं दर्शपूर्णमासयोः। **के.** ९।१।७। २३–२४.

* **प्रणीतावाङ्नियमन्यायः।** प्रणीताधर्मन्यायः। ९।१।७।२३–२४.

* **प्रणीतावाग्यमस्य** हविष्कृदाह्वानात् प्राचीनपदार्थप्रयुक्तत्वम्। प्रणीताधर्मन्यायः। ९।१।७।२३–२४.

* **प्रतारकाः** अन्यथा जानन्तोऽपि अन्यथा वाक्यानि प्रयुञ्जते। तथा प्रमादिनो दुष्टसामग्रीकाश्च अन्यवाक्यविवक्षायां अन्यदेव वाक्यमुच्चारयन्ति। तेषां वाक्यात् वक्तृबुद्धिरपि निश्चेतुं न शक्यते, दूरेणार्थः। **ऋजु.** पृ. २५.

* **प्रतिकर्षः** अग्नीषोमीययूपमात्रस्य दीक्षासु, न तु ततोऽर्वाचीनानामपि अग्नीषोमप्रणयनादीनाम्। ५।१। १४।२७. * प्रतिकर्षः 'आश्विनाग्रान् गृह्णीयादामयाविनः, शुक्राग्रान् गृह्णीयादभिचरतः, मन्थ्यग्रान् गृह्णीयादभिचर्यमाणस्य' इति श्रुतानां आश्विनशुक्रमन्थिनां ग्रहाणां सर्वादितः कर्तव्यः। १०।५।११।६७–६९, सर्वादितः नाम अन्तर्यामादूर्ध्वं ऐन्द्रवायवात् प्राक्। २०।७०–७२, ग्रहणवत् सादनस्यापि प्रतिकर्षः। २१। ७३–७४, प्रदानस्य तु न प्रतिकर्षः। २२।७५–७६. * प्रतिकर्षः ऐन्द्रवायवग्रहस्य धाराग्रहाणामादित एव, न तु उपांश्वादेरपि प्राक्। ऐन्द्रवायवः धाराग्रहाणां प्रथमः कार्यः इति। १०।५।१७।६२–६४। 'ऐन्द्रवायवाग्रान् ग्रहान् गृह्णीयाद् यः कामयेत यथापूर्वं प्रजाः कल्पेरन्' इति कामसंयोगेऽपि धाराग्रहाणामादितः एव ऐन्द्रवायवस्य प्रतिकर्षः पूर्ववत्। १०।५।१८।६५–६६. * प्रतिकर्षः शुक्रादिग्रहस्य ऐन्द्रवायवादिग्रहापेक्षया पूर्वं काम्याग्रताविधौ। १०।५।२०।७०–७२.

* **प्रतिकारकं** क्रियाभेदः। **भा.** ६।१।४।१७.

* '**प्रतिगरोऽध्वर्यूणाम्**' इति लिङ्गात् प्रतिगरकर्म अध्वर्योः इति ज्ञायते। **भा.** ३।७।२०।४२, (प्रतिगरो नाम अध्वर्युणा 'ओथामो दैव' इति पठ्यमानो मन्त्रः। तत्र होतुः शस्त्रपठनस्य काले होत्रा उच्चारितप्लुतोकारसमकालं ओकारं प्लुतं पठित्वा अर्धर्चान्तविरामकाले प्रणवं विनैव 'ओथामो दैव' इत्यादिः पठ्यमानो मन्त्रः। प्रतिगराश्च शाखाभेदेन क्रतुभेदेन वा नानाविधा भवन्ति। **के.** — होता यथा शंसिष्यन् भवति तथा प्रत्याह। अध्वर्युः पात्रं नीचैरवष्टभ्य सव्यमावृत्य प्राङ्मुखः उपविश्य इडाजपं कृत्वा अपसव्यमावृत्य होतुरग्रे प्रत्यङ्मुखः प्रह्वः तिष्ठन् प्रतिगृणाति। आह्वावे शों३ सामो दैव। तूष्णीं शंसे प्रणवान्ते उपांशु ओथामो दैवों ३। प्रणवे ओ ३ थामो दैव। अवसाने ओथामो दैव। शस्त्रमध्याह्वाने ओं ३ शों ३ सामो दैव। शस्त्रान्ते

ओं ३ । इति प्रतिगीर्य । अयं प्रतिगर इत्युच्यते– इति **श्रौतपदार्थनिर्वचनम् ।**

* ' **प्रतिगृह्णीयात्** ' इति विधायकपदमपि असंजातविरोध्युपक्रमानुसारेण ' प्रतिग्राहयेत् ' इत्येवं अन्तर्भावितणिजर्थपरतया व्याख्येयम् । तथा च अश्वदातुर्वारुणेष्टिः , न प्रतिग्रहीतुः । वि. ३।४।१५ .

* **प्रतिग्रहः** । दानप्रतिग्रहविषयको विचारः ' अनारभ्य श्रूयते अश्वप्रतिग्रहेष्टिः ' इत्यत्र वार्तिकग्रन्थे द्रष्टव्यः । **के.** (३।४।१०।२८–२९). * प्रतिग्रहः याजनमध्यापनं च ब्राह्मणस्यैव वृत्त्युपायाः स्मृत्युक्ताः । **भा.** १२।४।१५।४३. * **प्रतिग्रहस्य** क्रत्वनङ्गत्वेऽपि क्रतूपकारित्वात् प्रतिग्रहेतिकर्तव्यतायाः क्रत्वङ्गत्वोपपत्तिः । **सु.** पृ. १४९०. * प्रतिग्रहस्य ' प्रतिग्रहसमर्थोऽपि प्रसङ्गं तत्र वारयेत् ' इति पापजनकत्वश्रुतिः । **भाट्ट.** ४।१।२ पृ. ८५. * दानविधानेनैव प्राक् परस्वत्वापादनात् अपर्यवस्यता **प्रतिग्रहस्य** आक्षिप्तत्वात् दानमात्रं यज्ञे विहितं न प्रतिग्रहः इति अयुक्तम् । **वा.** ३।४।१०।२८ पृ. ९५९. * सर्वद्रव्य**प्रतिग्रहाणां** दातृदोषेण दुष्टत्वम् । **वा.** ३।४।१०।२८ पृ. ९५९. * **प्रतिग्रहे** वैदिकेऽपि अप्रतिग्राह्यात् प्रतिगृह्णतः पापमस्ति । **भा.** ३।४।१०।२८ पृ. ९५९.

* **प्रतिग्रहेष्ट्यां** (अश्वस्य) प्रतिपुरोडाशं कपालचतुष्कभेदः । ११।४।११।४२–४४.

* **प्रतिग्रहप्रतिषेधः** अश्वानाम् । ' नोभयतोदतः प्रतिगृह्णाति ' इति श्रुतिः । **भा.** १०।३।११।४७.

* **प्रतिग्रहीतुः** स्वीकरणमेको व्यापारः, अपरो दातुः तत्समर्थाचरणं समर्पणादिरूपं इति दाने द्वौ व्यापारौ । **वा.** ३।४।१०।२८ पृ. ९६०.

* **प्रतिज्ञा** क्रत्वर्थपुरुषार्थजिज्ञासायाः । ४।१।१।१. * प्रतिज्ञा धर्मजिज्ञासायाः । १।१।१।१. * प्रतिज्ञा धर्मविशिष्टधर्मिनिर्देशः । **रत्नाकर.** पृ. ३६१. * ' प्रतिज्ञा यत्र बाध्येत पूर्वोक्तैर्यस्य बाधकैः । तत्पराजयतः कार्यो निर्णयो बाधवर्जनात् ॥ ' इत्यत्रोक्तः विरुद्धाद् व्यमि– (विरुद्धाव्यमि–)चारिणः विरोधे अन्यतः परिच्छेदः । **सु.** पृ. १५३ । (वार्तिके ' परस्परविरुद्धे हि विरुद्धाव्यमिचारिवत् । प्रमाणे यत्र दृश्येते तत्रान्येनैव निर्णयः ॥ ' (१।३।२।३ पृ. १८३) इत्युक्ते इयं सुधा— के.). * प्रतिज्ञा साध्यविशिष्टपक्षप्रतिपादकवाक्यं यथा 'पर्वतो वह्निमान्' इति । **मणि.** पृ. ३९ .

* **प्रतिज्ञाऽधिकरणम् ।** द्रव्यकर्मणां साम्यवैषम्यप्रतिज्ञा । प्रयुक्तिविचारप्रतिज्ञाऽधिकरणम् । ४।१।८।२१. * प्रतिज्ञाऽधिकरणम् । विशेषातिदेशप्रतिज्ञाऽधिकरणम् । ८।१।१।१. * प्रतिज्ञाऽधिकरणम् । शेषत्वविवेचनप्रतिज्ञाऽधिकरणम् । ३।१।१।१.

* **प्रतिज्ञापूर्वकत्वं** सर्वविचाराणाम् । **बृहती.** पृ. १५.

* **प्रतिज्ञाविरोधः ।** ' विस्पष्टश्चाक्षपादोक्तो विरोधो हेतुसाध्ययोः ' । ('प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः' इत्यक्षपादेनोक्तम् । ५।२।४) । **श्लोवा.** निरालम्बने १५४.

* ' **प्रतितिष्ठन्ति** ह वा य एता रात्रीरुपयन्ति ' अत्र ' प्रतितिष्ठासन्ति रात्रीरुपेयुः ' इति अन्यथात्वे कल्पिते ये इत्यस्य रात्रिसमभिव्याहृतस्य ' ये प्रतितिष्ठासन्ति ' इति व्यवहितकल्पना । **बाल.** पृ. ४. * ' प्रतितिष्ठन्ति० उपयन्ति ' अयं फलविधिः , नार्थवादः । **भा.** ४।३।८।१७–१९ . * ' प्रतितिष्ठन्ति० उपयन्ति ' अयं व्यवहितकल्पनया विधिः । **बाल.** पृ. २६.

* ' **प्रतिदक्षिणं वा कर्तृसंयोगात्** ' (११।४।१।२) इत्यनेन **न्यायेन** (अवेष्टेः) तन्त्रभेदः प्राप्नोति । **टुप्.** ११।४।३।९. अत्र भाष्यं तु– न वा तन्त्रभावः । कुतः ? उक्तो न्यायः ' प्रतिदक्षिणं वा कर्तृसंबन्धः स्यात् ' इति–इति । सूत्रे पाठभेदोऽत्र । परंतु ११।४।३।९ सूत्रभाष्ये ' कर्तृसंबन्धः स्यात् ' इति पाठः । **के.**

* **प्रतिदानं** दत्तस्य प्रतिनिर्यातनं दानजन्योपकारप्रत्युपकारः इति यावत् । ' तिलेभ्यः प्रतियच्छति माषान् ' । **रहस्य.** पृ. १२४.

* **प्रतिनिधिः** अदृष्टार्थस्य नास्ति । **मीन्या.** * प्रतिनिधिः अधिकगुणवान् लभ्यते मुख्यस्तु विगुणो लभ्यते, तदा विगुणोऽपि मुख्य एवोपादेयः, मुख्य-

सिद्धये गुणलोपस्य सोढुं शक्यत्वात् । स्थूलादपि कदरात् कृशोऽपि खदिरः, सरलादपि कदरात् वक्रोऽपि खदिरः ग्राह्यः । **के.** (६।३।१९.) * प्रतिनिधिः अपेक्षाऽऽक्षिप्तः । **वा.** ६।३।४।१६. * प्रतिनिधिः ऋत्विजामस्ति । **वि.** ६।३।८.

* ' **प्रतिनिधिश्च तद्धर्मा स्यात्** ' इति **न्यायेन** (एतादृशः सूत्रपाठो नैवास्ति, ' प्रतिनिधिश्च तद्वत् ' ३।६।१४।३७ इति सूत्रगततद्वत् इति शब्दस्य स्थाने ' तद्धर्मा स्यात् ' इति अर्थतः पाठं कल्पयित्वा नन्दपण्डितेन ईदृशो निवेशः कृतः स्यात् । तेन तथैव वा सूत्रमुपलब्धं स्यात् ।) क्षेत्रजादीनां सकलौरसधर्मप्राप्तावपि सापिण्ड्यस्य नातिदेशः ' सगोत्रेषु कृता ये स्युर्दत्तक्रीतादयः सुताः । विधिना गोत्रतां यान्ति न सापिण्ड्यं विधीयते ॥ ' इति तस्य निषेधात् । **दत्तकमीमांसा** पृ. ९४.

प्रतिनिधिश्च तद्वत् । ३।६।१४।३७॥

अस्ति प्रतिनिधिः श्रुते द्रव्येऽपचरिते यथा व्रीह्यपचारे नीवाराः । तत्र संदेहः किं नीवाराः समानविधानाः उत नेति । पूर्वापवादेनेदमारभ्यते ।

अत्रायं पूर्वपक्षः । नित्यश्रुता ह्यवघातादयो नित्यश्रुतैर्व्रीहिभिरेव संबन्धमर्हन्ति न नीवारैः , तेषामश्रुतत्वात् । किन्तु व्रीह्यपचारेऽवश्यं कर्तव्यं नित्यम् , काम्यं च प्रारब्धमवश्यं समापनीयम् । तत्र द्रव्यापेक्षायां अपचरितद्रव्यसदृशा नीवारा एवोपादीयन्ते । तेनासमानविधानानामेव व्रीहिकार्यापत्त्या फलचमसवदतिदेशादेव धर्मसंबन्धो भवतीति । **एवं प्राप्ते, अभिधीयते ।**

न तद्वत् प्रयोजनैकत्वात् । ३८ ॥

अयमभिप्रायः । भवेदेवं यदि फलचमसवत् स्वेनैव महिम्ना नीवाराः कर्मसाधनं भवेयुः । किन्तु व्रीहिशास्त्रस्यावयवपर्यन्तत्वात् , व्रीह्यवयवानां च कतिपयानां नीवारेषु विद्यमानत्वात् तदुपादित्सया पुरुषः प्रवर्तमानो नान्तरीयकतया नीवारत्वमुपादत्ते । तदतिरेकेण व्रीह्यवयवोपादानासंभवात् । ते च व्रीह्यवयवाः ' व्रीहिभिर्यजेत ' इति प्रत्यक्षशास्त्रचोदिता एवेति युक्तमवघातादिधर्माणां नीवारेष्वपि समानविधानत्वमिति ।

प्रयोजनम्— पूर्वपक्षे व्रीहीणामपचारे व्रीहिस्थाने नीवारपदोहः कर्तव्यः । सिद्धान्ते तु व्रीहिपदस्यैव प्रयोगात् न तदूहः । ननु ' व्रीहिभिर्यजेत ' इति शास्त्रेण व्रीहित्वजातिः साधनत्वेन प्रतिपादिता, व्रीह्यवयवाश्च । व्रीहित्वमन्त्रश्च लिङ्गात् व्रीहित्वजातिप्रकाशने एव विनियुक्तः । तेन यथा यवेषु लिङ्गाभावादप्रयोगः, तथा नीवारेष्वपीति कथं सिद्धान्ते व्रीहिपदप्रयोगादनूहः प्रयोजनमिति । **उच्यते ।** स्यादेवं यदि स्वरूपेणामूर्ता जातिर्यागसाधनं भवेत् । किं तर्हि ? आश्रयव्यक्तयवयवोपलक्षणत्वेन । तेषामेव पुरोडाशप्रकृतित्वेनापेक्षितविधानात् । तेन यथा ' व्रीहिभिर्यजेत ' इति विधौ साधनबलात् व्रीहिबुद्धिर्व्रीहित्वोपलक्षितान् पुरोडाशप्रकृतिभूतान् अवयवानेव विषयीकरोति, एवमत्र योऽयं व्रीहिशब्दो विध्युद्देशानुरोधी प्रवर्तमानः तथाभूतानेव अवयवान् विषयीकरोति । ते च नीवारेष्वप्यविशिष्टा एव । तेन यद्यपि नीवारेषु व्रीहित्वासमवायः, तथापि व्रीहित्वोपलक्षितानामेव अवयवानां नीवारेष्वपि प्रत्यभिज्ञानादितरेषां प्रतिनिध्यसंभवात् अस्त्येव व्रीहित्वोपलक्षितत्वमपि इति सूक्तं सिद्धान्तेऽनूहः प्रयोजनमिति ।

सूत्रं तु यद्वदुपदेशेन व्रीहयो धर्मवन्तः, तद्वन्नीवारा अपि । व्रीहिशास्त्रेणैव यागसिद्धिप्रयोजनत्वावगमादिति । **तौता.**

प्रतिनिधिश्च तद्वत् । ३।६।१४।३७॥

दर्शपूर्णमासादौ श्रुतस्य व्रीह्यादिद्रव्यस्य कथञ्चिन्नाशे तत्प्रतिनिधित्वेन नीवारा गृह्यन्ते । ते नीवारा अपि किं व्रीहिभिः समानविधाना न वेति संशये पूर्वपक्षमतिदिशति । असमानविधानं इति अतुल्यत्वात् इति च पदद्वयमनुवर्तते । तत्र असमानविधानपदं पुंलिङ्गत्वेन विपरिणम्यते । तद्वत् नैमित्तिकफलचमसवत् नीवाररूपप्रतिनिधिरपि व्रीहिभिः समानविधानो न स्यात्, अतुल्यत्वात् । का अतुल्यता ? व्रीहीणां निर्वापादयो धर्मा विहिताः, नीवाराणां तु न विहिता इति । अर्थापत्त्या तु नीवाराणां स्युः ।

न तद्वत् प्रयोजनैकत्वात् । ३८ ॥

पूर्वपक्षं निषिध्य सिद्धान्तयति । न असमानविधानः प्रतिनिधिः, किन्तु तद्वत् श्रुतद्रव्यवत् प्रतिनिधिरपि समानविधानः स्यात् । अथवा पूर्वपक्षिणा यदुक्तं तद्वत् इति तदेव निषिध्यते ' न तद्वत् ' इति । प्रतिनिधिः तद्वत् फल्चमसवत् असमानविधानो न भवति । किन्तु समानविधान एवेति तु आर्थिकम् । कुतः समानविधानत्वम् ? प्रयोजनैकत्वात् । ' पुरोडाशनिष्पत्तिरूपस्य प्रयोजनस्य व्रीहीणां नीवाराणां च एकमेव ' इति सुबोधिन्यां व्याख्यातम् । प्रयुज्यते विधीयते अनेनेति प्रयोजनं करणे ल्युट् । निर्वापावघातादयो धर्माः व्रीहिशब्देन द्रव्यमनूद्य विहिताः इति प्रयोजनशब्देन व्रीहिशब्दो बोध्यते । तस्य नीवारेष्वपि एकत्वात् समानत्वात् इत्यर्थः । नीवारेष्वपि हि व्रीहिपदवाच्यस्य व्रीहित्वस्य आश्रयभूताः केचिदवयवाः नीवारेष्वपि वर्तन्ते एव । इति नीवारोऽपि व्रीहिपदबोध्य एवेति उभयोः समानविधानत्वम् । व्रीहिषु यदा निर्वापादयो विधीयन्ते, तदा नीवारेष्वपि ते अर्थात् विधीयन्ते एवेत्यर्थः ।

अशास्त्रलक्षणत्वाच्च । ३९ ॥

सिद्धान्ते हेत्वन्तरमाह । श्रुतैः व्रीहिभिः प्रतिनिधिभूतानां नीवाराणां प्रकृतिविकारभावो नास्ति अशास्त्रलक्षणत्वात् शास्त्रलक्षितत्वाभावात् शास्त्रबोधितत्वाभावात् । अथवा नीवारत्वस्य अशास्त्रलक्षणत्वात् इति । तस्मात् मुख्यप्रतिनिध्योः समानविधित्वम् । चकारो हेतुसमुच्चयार्थः । **के.**

* प्रतिनिधिर्न भवति देवतायाः अग्नेः शब्दस्य (मन्त्रस्य) क्रियायाः (प्रयाजादेः) चापचारे । ६।३।५।१८–१९. * प्रतिनिधिर्न भवति माषादिः प्रतिषिद्धः पदार्थः । ६।३।६।२०.

卐 प्रतिनिधिर्न भवति स्वामिनः ॥

तथा स्वामिनः फलसमवायात्फलस्य कर्मयोगित्वात् । ६।३।७।२१॥

भाष्यम्— अग्निहोत्रादीनि कर्माण्युदाहरणम् । तेषु स्वामिन्यपचरति संदेहः किमन्यः प्रतिनिधातव्यो नेति । किं प्राप्तम् ? प्रतिनिधातव्य इति । कुतः ? आगमो वा चोदनार्थाविशेषादिति । **एवं प्राप्ते, ब्रूमः** । तथा स्वामिनः स्यात् । कोऽर्थः ? न प्रतिनिधिः । कुतः ? फलसमवायात् । योऽर्थी स्वत्यागेन ऋत्विजः परिक्रीणीते, यश्च स्वं प्रदेयं त्यजति स स्वामी । यदि स प्रतिनिधीयते, स्वामिना यत् कर्तव्यं तत् सर्वं कुर्यात् । तत् सर्वं कुर्वन् स्वाम्येव स्यान्न प्रतिनिधिः । स एव हि फलेन संबध्यते । य उत्सर्गं करोति, स फलवान् भवति । तदुक्तं शास्त्रफलं प्रयोक्तरीति । तस्मान्न स्वामिनः प्रतिनिधिरिति ।

टुप्— तथा स्वामिनः० योगित्वात् ॥ यदा प्रतिनिधीयमानः (प्रतिनिधिरुपादीयमानः इति तन्त्ररत्ने पाठः) दक्षिणादानं हविष्प्रदानं च करोति, तदा स एव फलसंबन्धात् स्वामी स्यात् । यदा द्रव्यपरित्यागं कृत्वा अन्यत्र (लौकिके कार्ये) व्यापृतो भवति, तत्र यानि क्रत्वर्थानि (आज्यावेक्षणादीनि) तेषु अध्वर्युरेव प्रतिनिधित्वेन करोति (इति नान्यः प्रतिनिधातव्यः) । पुरुषसंस्काराणां च (ऋत्विग्वरणादीनां) क्रत्वर्थत्वात् (विनाऽपि यजमानेन) न वैगुण्यम् (अध्वर्युणा तदनुष्ठानसंभवात्) । यानि च ब्रह्मचर्यादीनि फलप्रतिग्रहणयोग्यतायाः कारणानि, तानि बहिरवस्थितेन (यजमानेन) क्रियमाणानि क्रतोरुपकारकाण्येव । तस्मादेकत्र (आज्यावेक्षणादौ अध्वर्य्वादेः) विद्यमानत्वात्, इतरत्र (ब्रह्मचर्यादौ) असंभवात् अनुपपन्नः (यजमानस्य) प्रतिनिधिः । मृते तु (यजमाने) नैव प्रतिनिध्याशङ्काऽस्ति (प्रतिनिधातुरसंभवात्) । पत्नीति चेन्न, तस्याः पतिहीनाया अग्न्यभावेन अधिकाराभावात् ।

(पत्न्यां मृतायां किमस्ति प्रतिनिधिः, उत नेति ? नायमस्याधिकरणस्य विषयः । तत्रापि हि यदा तावत् ' भार्यायै पूर्वमारिण्यै दत्त्वाऽग्नीनन्त्यकर्मणि ' इत्ययं पक्षः समाश्रीयते, तदा अग्न्यभावादेव अनधिकारः सिद्धः । यदा तु नाग्नयः पत्न्यै दत्ताः, तदाऽपि आचारप्रामाण्यात् नापत्नीकस्य दर्शपूर्णमासाद्यनुष्ठानम् । अग्निहोत्रमात्रं तु वचनादनुष्ठीयते । ' तदाहुः अपत्नीकोऽपि अग्निहोत्रमाहरेत् ' इति वचनात् । तस्मात् नास्ति पत्न्याः प्रतिनिधिरिति । **तन्त्ररत्नम्**) ।

सोम–– आतिदेशिकी **संगतिः** । **सूत्रार्थस्तु**– फलस्य कर्मयोगित्वात् कर्मप्रयोक्तृगामित्वात् प्रतिनिहितस्यैव फलसमवायापत्तेः । स्वामिनः तथा न प्रतिनिधिः इति ।

वि–– ' स्वामिनोऽस्ति प्रतिनिधिर्न वा, द्रव्यवदस्ति सः ।, न मृते प्रेरकाभावाज्जीवनेऽप्यफलित्वतः ॥ '

भाट्ट— मृते तावद्यजमाने पत्न्यां वा नान्यतरेणान्यतरस्य प्रतिनिधिः । यजमाने मृते पत्न्या अग्न्यभावादेवानधिकारात् पत्न्यां मृतायां यजमानस्यापि । ' जायायै पूर्वमारिण्यै दत्त्वाऽग्नीनन्त्यकर्मणि ' इति पक्षे तावदग्न्यभावादेव, विवाहात् पूर्वमनधिकारात् । तत्रापि विधुराधानपक्षे अनौत्तरवेदिककर्मणां पत्नीव्यतिरेकेणैव वाचनिकत्वेन पत्नीप्रतिनिध्यप्रसक्तेः । यदा तु नाग्नीनां पत्न्यै दानम्, तदाऽपि ' तदाहुरपत्नीकोऽप्यग्निहोत्रमाहरेत् ' इति वचनात् पत्नीव्यतिरेकेणैव अग्निहोत्रमात्रानुष्ठानमिति न प्रतिनिधिप्रसक्तिः । यदा तु कस्य चित् कर्मणो मध्येऽन्यतरस्य मृतिः, तदा दाहात् पूर्वमेव तत्समापने वक्ष्यमाणरीत्या प्रोषितादिवदेवानुष्ठानमिति न प्रतिनिधिप्रसक्तिः । रोगादिना अशक्तौ कार्यान्तरव्यापृते वा अन्यतराधिकारिककर्मसु यद्यपि स्वामिनः कालादिवत् प्रयोगविध्यविषयत्वात् तत्तदेकत्वादिवदेव न प्रतिनिधिप्रसक्तिः, तथापि ' संध्यामिष्टिं चरुं होममसगोत्रेण कारयेत् । ' इत्यादिवचनबलात् शिष्टाचाराच्च अनुमतिद्वारा कर्त्रन्तरेणाप्यनुष्ठानम्, स्वत्वत्यागमात्रं तु सति संभवे स्वयं कार्यम् । नो चेत्तदपि तेनैव ' अग्नये इदं न मदीययजमानस्य ' इत्येवं कार्यम् । उभयाधिकारिकेषु दर्शादिषु त्यागघटितं कर्म अन्यतरेणैव कार्यम्, द्वयोरपि संसृष्टस्वत्ववत्त्वात् । अत एव त्यागोऽपि तादृशस्थले ' मम यजमानस्य च न ' इत्यादिरूपः । उभयोरशक्तौ अध्वर्युणैव, असति बाधे सामान्यसमाख्यया तत्प्राप्तेः । एवं यजमानप्रवासेऽपि । पत्न्यास्तु प्रवासेऽग्निविच्छेद एव । एवमाज्यावेक्षणादियजमानपदार्थानामध्वर्युणैव करणम् । पत्नीपदार्थानां च सामान्यसमाख्याऽनुरोधेन यजमानस्याप्राप्तेः । एवं फलिसंस्कारेष्वपि आनीयमाने फलाभावात् न प्रतिनिध्याशङ्का । अतस्तेषामशक्त्यादौ लोप एव । न तु दम्पतिभ्यां परस्परमपि करणम्, तत्तद्वाक्ये यजमानत्वादेरुद्देश्यताऽवच्छेदककोटिप्रविष्टत्वात् । अध्वर्य्वादीनामशक्त्यादौ तु अध्वर्य्वाद्यन्तरमेवोपादेयमिति न तत्र प्रतिनिधिः ।

मण्डन— ' न स्वामिनः प्रतिनिधिः । '

शंकर–– ' स्वामिनो न प्रतिनिधिः । '

* प्रतिनिधिः प्रधानपर्याप्तमुख्यलाभे सति न ग्राह्यः । शेषकार्यलोपस्तु तत्र सोढव्यः । अल्पव्रीहिलाभे इडाऽऽदिलोपः कार्यः, परन्तु प्रधानयागपर्याप्ता व्रीहय आवश्यका एव । **के.** (६।३।२०). * प्रतिनिधिर्भवति सत्रे मृतस्य कस्य चित् स्वामिनः । ६।३।८।२२, परन्तु तस्य कर्मकरत्वमेव, न फलस्वामित्वम् । ९।२३–२५, तथापि तस्य अनुष्ठाने स्वामिधर्मत्वं भवत्येव । १०।२६. * प्रतिनिधिर्मुख्येन समानविधानः । न तु तयोः प्रकृतिविकारभावः । **भा.** ३।६।१४।३७–३९. * प्रतिनिधिर्मुख्याभावे यः तत्सदृश उपादीयते सः । **रहस्य.** पृ. १२४. * प्रतिनिधिर्मुख्यकार्यसमर्थो लभ्यते, श्रुतं द्रव्यं च न मुख्यकार्यसमर्थम्, तदा प्रतिनिधिरेव ग्राह्यो न मुख्यम् । ६।३।१९।३९. * प्रतिनिधिर्मुख्यकार्यसमर्थः संस्कारसमर्थश्च लभ्यते, श्रुतद्रव्यं च न संस्कारसमर्थं परन्तु मुख्यकार्यसमर्थं लभ्यते, तदा मुख्यमेव ग्राह्यम्, न प्रतिनिधिः । **भा.** ६।३।१८।३८. * प्रतिनिधिः संस्कृतोऽपि । प्रधानसंबन्धात् प्राक् मुख्यलाभे, मुख्यं संस्कृत्य ग्राह्यम्, संस्कृतोऽपि प्रतिनिधिस्त्याज्यः । कदरयूपसंस्कारोत्तरं पशुनियोजनात् प्राक् खदिरलाभे खदिरः संस्कृत्य ग्राह्यः । **के.** (वि. ६।३।१७.) * प्रतिनिधिः साक्षात् श्रुतोऽपि मुख्येन समानविधानः यथा पूतीकाः सोमेन । श्रवणं तु नियमार्थम् । ३।६।१५।४०. * प्रतिनिधिः सोमस्य पूतीकाः श्रौतः । ६।३।१३।२१. * प्रतिनिधिः सोमालाभे आदाराः फाल्गुनानि च । ' यस्य क्रीतमपहरेयुः आदारांश्च फाल्गुनानि चाभिषुणुयात् ' (' आदाराः क्षीरयुक्तवल्लीविशेषाः । फाल्गुनानि लोकव्यवहारे फल्गु स्वल्पमेव प्रयोजनं येषां आर्द्रदूर्वाङ्कुरादीनां तृणानां तानि फाल्गुनानि ' इति सायणभाष्यम् ।) फल्गुनीनक्षत्रयुक्तपूर्णिमामासे येषां पर्णादिभिर्वृद्धिः तादृशा वल्लीविशेषाः

फाल्गुनानि, फाल्गुनशब्दस्य क्लिष्टार्थकरणस्यायुक्तत्वात् । आदारास्तु पूतीका एव स्युः अवान्तरो वा भेदः स्यात्तयोः । के. * अभावे हि श्रुतस्यानुकल्पः प्रतिनिधिः । भा. ६।३।१६।३५, * मुख्यं द्रव्यं संस्कारासमर्थमपि प्रधानकार्यसमर्थं लब्धं चेत् सर्वसमर्थोऽपि प्रतिनिधिर्न ग्राह्यः, किन्तु मुख्यमेव ग्राह्यम् । ६।३।२०। ४०–४१. * श्रुतद्रव्यापचारे तत्सदृश एव प्रतिनिधिः । (व्रीहीणामपचारे नीवाराः प्रतिनिधेयाः) । ६।३। ११।२७. * मुख्यापचारे प्रतिनिधौ गृहीते पुनर्मुख्यलाभे प्रतिनिधिं त्यक्त्वा मुख्यमेव ग्राह्यम् । ६।३। १६।३५.

प्रतिनिधिना प्रधानकार्ये निष्पादिते ततो मुख्यद्रव्यलाभेऽपि प्रतिनिधिनैव समापनम् ॥

प्रवृत्तेऽपीति चेत् । ६।३।१७।३६ ॥

भाष्यम्— अथ अग्निहोत्रादिषु कर्मसु श्रुतद्रव्यापचारे प्रतिनिधौ उपात्ते कृतेषु केषुचित् संस्कारेषु यदि तदेव श्रुतमुपलभ्येत, किं श्रुतमुपादीयेत, उत तेनैव प्रतिनिहितेन समापयितव्यमिति । किं प्राप्तम् ? श्रुतमुपादीयेत प्रवृत्तेऽपि । तदुक्तम् 'आगमो हि तदभावात्' (६।३।१६।३५) इति । तस्मान्न प्रतिनिधातव्यमिति ।

टुप्— प्रवृत्तेऽपीति चेत् ॥ (रत्न—यदा पुनः प्रतिनिधिमुपादाय केचन संस्काराः कृताः, तदा यद्यपि मुख्यं लब्धम्, तथापि शास्त्रीयस्योपादानस्य कृतत्वात् निवृत्तव्यापारं शास्त्रं न मुख्योपादानं प्रयुङ्क्ते, इति केवलेनापि प्रतिनिधिनैव निर्वर्तयितव्यम्, न पुनर्मुख्यमुपादातव्यम् । इति पूर्वपक्षः । सिद्धान्तमाह—) केषुचित् संस्कारेषु कृतेषु अनभिनिर्वृत्ते प्रयोजने (सति) श्रुतमेव (मुख्यम्) उपादातव्यम् । (ननु एवं संस्काराणां कृतानामानर्थक्यं स्यात्, अत आह) न संस्काराणामनुरोधः (कर्तव्यः), द्रव्यगुणत्वात् (द्रव्यस्य मुख्यत्वात्, गुणत्वात् च संस्कारागामित्यर्थः) तस्मात् (द्रव्यगुणत्वात्) ये अभिनिर्वृत्ताः संस्काराः तेषामावृत्तिः स्यात् (प्रधानवशेन गुणावृत्तेर्न्याय्यत्वात् । 'प्रवृत्तेऽपीति चेत्' इति सूत्रम् 'नानर्थकत्वात्' इत्युत्तरसूत्रेण एकवाक्यतया पूर्वपक्षसूत्रवत् आभाति, न तु तथा मन्तव्यमित्याह—) एवम् (उक्तेन न्यायेन मुख्योपादानस्य न्याय्यत्वात्) इदम् (सूत्रम्) सिद्धान्तसूत्रं भवति (वाक्यभेदेन व्याख्यातमिति वेदितव्यम् । अयं च सूत्रार्थः— पूर्वसूत्रे 'मुख्याधिगमे मुख्यम्' इत्युक्तं तदपेक्ष्याह— इति चेत् न्यायः, ततः प्रवृत्तेऽपि प्रतिनिधौ मुख्यमेवोपादातव्यमिति । पूर्वपक्षस्तु उत्सूत्रितः स्यादित्याह—) पूर्वपक्षस्तूत्प्रेक्ष्यः ।

नानर्थकत्वात् । ३७ ॥

भाष्यम्— नैतदेवम् । येन हि खदिराभावे कदरे पशुर्नियुक्तो भवति, अथ खदिरमुपलभते । प्रवृत्तेऽर्थे किं खदिरेण कुर्यात् ? अर्थार्थं हि खदिरोपादानम्, न खदिरोपादानार्थमेव । तस्मान्न श्रुतमुपादीयेत ।

टुप्— नानर्थकत्वात् ॥ (रत्न—कृतेऽपि तर्हि कदरे नियोजनादौ प्रधाने खदिरे पुनर्लब्धे साद्गुण्याय नियोजनमावर्तयितव्यं इति शङ्कमानस्योत्तरं नानर्थकत्वादिति । तस्यार्थमाह—) इदमपि सिद्धान्तसूत्रमुत्प्रेक्ष्यपूर्वपक्षकम् (न पूर्वसूत्रस्योत्तरम् । अधिकरणान्तरसिद्धान्तसूत्रमिदमित्यर्थः । एवं यथाभाष्यं सूत्रं व्याख्याय सूत्रानुगुण्यात् ऐकाधिकरण्यमेव समर्थयते—) अथवा 'प्रवृत्तेऽपीति चेत् ।' कृते (अपि) प्रयोजने श्रुतम् (एव) आगमयितव्यमिति (पूर्वपक्षसूत्रमिदम्) । एतस्योत्तरम् 'नानर्थकत्वात्' इति ।

सोम— इह तु न मुख्यं स्यात् इति प्रत्यवस्थानात् **संगतिः । सूत्रार्थस्तु**— चेत् इति पूर्वसिद्धान्तपरामर्शः । मुख्याधिगमे मुख्यं इति चेत् न्यायः, ततः प्रवृत्तेऽपि प्रतिनिधौ मुख्यमेवोपादेयम् । इति चेत् इति असंदिग्धे संदिग्धवचनम् ।

वि— 'अमुख्ये संस्कृते मुख्यलाभे किं ग्राह्यमेतयोः । अमुख्यस्तक्षणाद्यूपः खादिरस्तक्षणात् पुनः ॥'

['नानर्थकत्वात्' इति सूत्रस्याधिकरणान्तरत्वमालम्ब्य शास्त्रदीपिकादिषु उच्यते—]

शा—कृते प्रतिनिधिना नियोजने यदा मुख्यमेव लब्धं तदा कृतमपि नियोजनं साद्गुण्याय पुनः खदिरे कर्तव्यं इति मन्यमानस्योत्तरम् । कृते नियोजने लब्धोऽपि खदिरः अनर्थक एव । नियोजनार्थं हि तदुपा-

दानम्, तच्च कृतं न गुणानुरोधादावर्तयितव्यम् । अतो नादर्तव्यः खदिरः । **अथवा** सूत्रद्वयमिदं एकाधिकरणम् । प्रवृत्तेऽपि प्रधाने मुख्योपादानं स्यात् इति चेन्नानर्थकत्वात् इति ।

सोम— पूर्वप्रत्युदाहरणमात्रमिदम् । **सूत्रार्थस्तु** प्रतिनिधिना कृते प्रयोजने न मुख्यं स्यात् आनर्थक्यात् इति ।

वि— 'पशौ नियुक्ते खदिरलाभे कार्यं पुनर्न वा । साद्गुण्याय पुनः कार्यं, मुख्यावृत्तिर्गुणान्नहि ॥' नियोजनं पुनर्न कार्यम् । ६।३।१८।३७.

अत्र कुतूहलम् । "यत्तु भाष्ये 'प्रवृत्तेऽपीति चेत्' इत्येकमधिकरणम् 'नानर्थकत्वात्' इत्यधिकरणान्तरं इति लक्ष्यते, तदेतदतिक्लिष्टत्वात् उपेक्ष्य वार्तिके तन्त्ररत्ने च ऐकाधिकरण्येन स्थितम्" इति ।

[भाट्टदीपिकायां इदमधिकरणं पूर्वाधिकरणे एवान्तर्भावितम् ।]

मण्डन— 'प्रवृत्ते न पुनर्मुख्यम् ।'

शंकर— 'संस्कारेषु कृतेष्वेवम् ।' (मुख्यं ग्राह्यम्) १७ । 'प्रयोजनकृतौ न तु ।' १८. (प्रतिनिधिना प्रयोजने कृते न मुख्यं ग्राह्यम्) ।

* अग्निहोत्रादिनित्यकर्माणि श्रुतद्रव्यापचारे प्रतिनिधिना समापनीयानि । ६।३।४।१३–१७. * **प्रतिनिधिभिः** काम्यानां प्रक्रमो नास्ति । यदि तु प्रक्रान्ते कस्मिंश्चित् गुणकामकल्पे द्रव्यनाशे सति प्रतिनिधीयते, ततस्तस्य अवश्यसमापनीयत्वात् विकारेण प्रतिनिधिना वा तुल्यं समापनम् । वा. ३।६।१५।४०. * **प्रतिनिधेः** प्रतिनिधिर्नास्ति, प्रतिनिध्यपचारे तु श्रुतद्रव्यसदृशमेवान्यत् ग्राह्यम् । ६।३।१४।३२.

प्रतिनिधेः श्रुतस्यापचारे मुख्यद्रव्यसदृशस्यैव प्रतिनिधित्वम्, न तु प्रतिनिधिसदृशस्य ॥

स्याच्छ्रुतिलक्षणे नियतत्वात् । ६।३।१५।३३ ॥

भाष्यम्— अथ श्रुतिलक्षणे कथम् । यथा, 'यदि सोमं न विन्देत् पूतीकानभिषुणुयात्' इति पूतीकेषु विनष्टेषु पूतीकसदृशमुपादेयम्, उत सोमसदृशमिति । किं प्राप्तम् ? स्यात् श्रुतिलक्षणे प्रतिनिधौ, प्रतिनिधिसदृशस्योपादानं कर्तव्यम् । सोमाभावे पूतीकव्यक्तयो विहिताः । स चायं श्रुतः सोमाभावे । तस्मात् पूतीकव्यक्तय उपादेया इति ।

न, तदीप्सा हि । ३४॥

भाष्यम्— नैतदेवम् । नहि पूतीकव्यक्तीनामीप्सा । पूतीकेषु यत् सोमसादृश्यम्, तत् नियम्यते । तथाहि पूतीकविधानं दृष्टार्थम् । असदृशविधाने अदृष्टं कल्प्येत । अतो यस्मिन् तत् अपूतीकसदृशेऽपि द्रव्ये भवति तत् ग्रहीतव्यम्, न पूतीकसादृश्यमाद्रियेतेति ।

सोम— पूतीकापचारे तद्गततत्वसोमावयवोभयसिद्ध्यर्थमुभयसदृशमुपादेयम्, न केवलपूतीकसदृशम् । यत्र चोभयसदृशं न लभ्यते, तत्र सोमावयवानां प्राधान्यात् सोममात्रसदृशमुपादेयम्, न पूतीकसदृशम् । **सूत्रार्थस्तु**— श्रुतिलक्षणे प्रतिनिधौ अपचरिते तत्सदृशः प्रतिनिधिः स्यादिति ।

वि— 'पूतीकस्यापचारे स्यात् तेन सोमेन वा समम् ।, आद्यः श्रुतांशसादृश्यात्, पूतीकाविधितोऽन्तिमः ॥'

[**भाट्टे** प्रपूर्वाधिकरणे एव पूर्वमिदं चेत्यधिकरणद्वयं समावेशितम् ।]

मण्डन— 'श्रुते प्रतिनिधौ चैवम् ।' श्रुते अपचरिते एवं मुख्यसदृशमेव ग्राह्यम् ।

शंकर— 'पूतीकसदृगग्राह्यम् ।'

प्रतिनिधेः श्रुतस्यापि मुख्येन समानविधित्वम् ॥

नियमार्था गुणश्रुतिः । ४० ॥

भाष्यम्— अथ यः श्रुतः प्रतिनिधिः, तत्र किं सामानविध्यमुत नेति । यथा, 'यदि सोमं न विन्देत पूतीकानभिषुणुयात्' इति । असामानविध्यमिति ब्रूमः । अश्रुताद्धि एतद्विपरीतम् । **एवं प्राप्ते, उच्यते ।** नियमार्था गुणश्रुतिः । अत्राप्यर्थलक्षण एव प्रतिनिधिः । सोमे अविद्यमाने सोमसदृशं द्रव्यं प्राप्तम् । तत्र सुसदृशे द्रव्ये प्राप्ते ईषत्सदृशं नियम्यते । अन्यस्मिन् प्रतिनिधातव्ये अन्यत् प्रतिनिधीयते श्रुतस्य स्थाने । न यागद्रव्यत्वेन ।

वा— यदि अशास्त्रलक्षणत्वान्नीवाराणां कार्यापत्तिर्नास्ति, पूतीकानां तर्हि शास्त्रलक्षणत्वादनित्यत्वाच्च फलचमसवत्कार्यापत्तिप्रसङ्गः। इति प्राप्ते, अभिधीयते। **' यागसाधनतां कुर्यात्पूतीकानां यदि श्रुतिः। ततः स्यात् कार्यवर्तित्वं न त्वेवं सा प्रवर्तते ॥ '** सोमनाशे हि प्रतिनिध्यपेक्षायां सत्यां पूतीका विधीयन्ते न यागसाधनापेक्षायाम्। अतोऽयं प्रतिनिधिनियम एव भवति, यत् सकलसोमधर्मासंभवे विकलान् सोमधर्माानुत्पादयेत् तत् पूतीकगतानिति। वक्ष्यति हि ' नियमार्थः क्वचिद्विधिः ' ' तन्नित्यं तच्चिकीर्षा हि ' इति च। अतश्च नैवात्र पूतीकत्वं कर्माङ्गम्। किं तर्हि ? सोमधर्मोपलक्षणार्थम्। तेन श्रुतिलक्षणस्यापि पूर्वेणाविशिष्टत्वमिति। तेनेहापि तदेव चिन्तायाः प्रयोजनम्। अतश्च तदाश्रयस्य तद्बुद्ध्यनपायात् गुणकामैः प्रवर्तितव्यम्। **अन्ये त्वाहुः।** सकलव्यक्त्याश्रयिणो हि गुणकामा वैकल्यादिह न प्रवर्तन्ते। नित्यस्य हि कर्मणोऽवश्यं प्रक्रमात् प्रक्रान्तस्य च सर्वस्यावश्यसमापनीयत्वात् किञ्चित् धर्मवैकल्येऽपि अवैगुण्याभ्यनुज्ञा युज्यते। यथा तु काम्यानां प्रतिनिधिभिः प्रक्रमो नास्ति, तथा गुणकामैर्न प्रवर्तितव्यम्। यदि तु प्रक्रान्ते कस्मिंश्चिद्गुणकामकल्पे द्रव्यनाशे सति प्रतिनिधीयते ततस्तस्यावश्यसमापनीयत्वात् विकारेण प्रतिनिधिना वा तुल्यं समापनमित्यूहानूहावेव प्रयोजनम्।

सोम— प्रयोजनम्– ' सोमं ते क्रीणामि ' इत्यादेः पूर्ववत् ऊहानूहौ।

वि— ' पूतीकाभिषवोऽतुल्यस्तुल्यो वा, सोमतुल्यता। नास्ति नैमित्तिकत्वेन, तुल्यः प्रतिनिधित्वतः ॥' अभिषवक्रयादिभिः सोमपूतीकयोस्तुल्यता।

भाट्ट— यत्र तु पूतीकादौ तत्त्वेन अभावे विधिः, तत्र सकलाङ्गयुक्तसोमजन्ययागप्रयोगासंभवे पश्चादेव तत्प्रवृत्तेः न समानविधानत्वम्। नह्यत्र पूतीकगतावयवानां प्रतिनिधिनियमः। तेषां मन्दसदृशत्वेन पक्षेऽपि अप्राप्तेः, पूतीकपदे अवयवलक्षणाप्रसङ्गाच्च। न च नियमविधिलाघवानुरोधेन तदङ्गीकारः, तस्य फलमुखत्वेन निषादस्थपत्यधिकरणन्यायेन अकिञ्चित्करत्वात्। इति प्राप्ते, पूतीकपदार्थस्य हि पूतीकत्वस्य नात्र करणत्वं श्रुतम्, द्वितीयान्तत्वात्। अतश्च नियमविधिलाघवानुरोधेन तथा न पूतीकत्वस्य साक्षाद्यागसाधनत्वं लक्ष्यते, अपि तु अवयवनिष्ठसाधनतानान्तरीयकप्रयोजकत्वमेव इति न पूतीकपदे अवयवलक्षणा, सदृशनियामकन्यायप्रवृत्तेः पूर्वमेव च अस्य विधेः प्रवृत्तेः नियमविधित्वोपपत्तिः। अतश्चात्रापि कतिपयावयवसाधनत्वस्य सोमशास्त्रादेव सिद्धेः समानविधानत्वम्।

मण्डन— ' पूतीकखण्डोऽप्युपदिष्टधर्मा। '

शंकर— ' पूतीकेष्वप्येवमेव। ' १६. समानविधित्वम्।

प्रतिनिधावपि मुख्यधर्माणामनुष्ठानम्।

मुख्यप्रतिनिध्योः समानविधित्वम् ॥

प्रतिनिधिश्च तद्वत्। ३।६।१४।३७॥

भाष्यम्— अस्ति प्रतिनिधिः श्रुते द्रव्येऽपचरति। यथा व्रीहिष्वपचरत्सु नीवाराः। तत्र संदेहः किं नीवाराः समानविधानाः, उत नेति। किं प्राप्तम् ? प्रतिनिधिश्च तद्वत्। यथा नैमित्तिकं नित्येनासमानविधानमेवं प्रतिनिधिः। अतुल्यत्वात्। का अतुल्यता ? व्रीहीणां विहिता, न नीवाराणाम्, इयमतुल्यता। व्रीहीणां विहिता नीवाराणामर्थापत्त्या भवन्ति।

वा— प्रतिनिधावपि अयमेव न्यायः प्राप्नोति।

न तद्वत् प्रयोजनैकत्वात्। ३८ ॥

भाष्यम्— नैतदस्ति, असमानविधानः प्रतिनिधिरिति। तद्वत् स्यात्, यद्वत् श्रुतः। न प्रकृतिविकारभावः। कुतः ? व्रीहित्वं हि व्रीहिधर्माणां व्रीहिव्यक्तौ निमित्तम्। न च व्रीहित्वस्य स्थाने नीवारत्वं भवतीति श्रूयते। तस्मान्न प्रकृतिविकारभावः। कथं तर्हि नीवारेषु धर्मा भवन्तीति ? उच्यते। या व्रीहित्वेन परिच्छिन्ना व्रीहिव्यक्तयः, नीवारेषु ताः सन्ति। तासामर्थेन ते धर्माः क्रियन्ते। तासां च व्यक्तीनामन्यासां च व्रीहिगतानां तुल्य एष विधिः। का तुल्यता ? उभयेऽपि व्रीहित्वलक्षिता इति। तस्मात् समानविधाना इति।

वा— यदि नीवाराः स्वेनैव महिम्ना कर्मसाधनं भवेयुः, ततः कार्यापत्त्या धर्मैः संबध्येरन्। न तु तेषां साधनत्वे किञ्चित् प्रमाणमस्ति। ये हि तावद् व्रीहिधर्माः

कतिपया दृश्यन्ते तदुपादित्सया पुरुषः प्रवर्तमानो नान्तरीयकत्वात् नीवारत्वमुपादत्ते, न कर्माङ्गतया। व्रीहिधर्माः पुनर्व्रीहिशब्देन प्रत्यक्षेणैव चोदिता इति समानविधानाः। नहि नीवारेभ्यो व्रीहिबुद्धिः व्यावर्तते इति वक्ष्यति ' सामान्यं तच्चिकीर्षा हि ' इति। तेनाऽऽह तद्वदेवासौ प्रवर्तते इति।

अशास्त्रलक्षणत्वाच्च। ३९ ॥

भाष्यम्— इतश्च न प्रतिनिधेः श्रुतेन सह प्रकृतिविकारभावः। कुतः ? अर्थलक्षणत्वात्। अर्थाद्धि प्रतिनिधिः क्रियते। न चार्थेनैतदवगन्तुं शक्यते व्रीहित्वस्य स्थाने नीवारत्वं भवतीति। तस्मान्न प्रतिनिधेः श्रुतेन सह प्रकृतिविकारभावो भवतीति।

वा— अशास्त्रचोदितश्च प्रतिनिधिरर्थात् क्रियते। तस्मादपि निष्प्रमाणकमस्य कार्यापन्नत्वमिति **केचित्।** न तु प्रतिनिधिरशास्त्रलक्षणः, प्रधानसमाप्तिचोदितत्वात्। यदि वा अशास्त्रलक्षणः स्यान्नैव क्रियेत। न च तदकरणात् कश्चिद्दोषः स्यात्। **अत एवं वर्णयितव्यं सूत्रम्।** अशास्त्रलक्षणत्वान्नीवारत्वस्य कार्यापत्तिर्नास्ति। ये तु व्रीहिधर्माः प्रधानचोदनया सकलधर्मासंभवाच्च व्रीहिचोदनया विकला आश्रिताः, ते अर्थान्तरत्वाभावान्न कार्यापन्नाः।

सोम— प्रयोजनम्– नात्र गुणकामप्रवृत्त्यप्रवृत्तिरूपं संभवति, यथा काम्यस्य कर्मणः प्रतिनिधिनोपक्रमो नास्ति, तथा गुणकामानामपि प्रतिनिधिना उपक्रमासंभवात्। तस्मात् मुख्याश्रयेण प्रवर्तमानानां गुणकामानां प्रतिनिधौ प्रवृत्त्यसंभवात् ' व्रीहीणां मेध ' इत्यादेः ऊहानूहावेव प्रयोजनमिति वार्तिके व्यक्तम् (उत्तराधिकरणवार्तिके व्यक्तम्, न तु अत्राधिकरणे)।

वि— ' नीवारादिप्रतिनिधेरतुल्यो वा विधिः समः।, पुरेवातुल्यता, साम्यमाकाराद् व्रीहिता यतः ॥ '

भाट्ट— व्रीह्याद्यभावे नीवारादिसदृशप्रतिनिधेः अपि संस्कारविधितः पूर्वं साधनत्वानवगमात् असमानविधानत्वम्, सकलाङ्गयुक्तव्रीहिजन्ययागप्रयोगासंभवे कर्मशास्त्रेण तदाक्षेपात्। **इति प्राप्ते,** सत्यं उत्तरकालं तदाक्षेपः, तथापि व्रीहिशास्त्रार्थालोचनवेलायामेव व्रीहित्वजातेर्यागसाधनत्वे अवगते तदन्यथाऽनुपपत्त्या तदवच्छिन्नव्यक्तेः तदारम्भकीभूतावयवानां च साधनत्वमाक्षिप्यते। अतश्च जातिव्यक्त्यवयवसाधनतानां पूर्वमेवावगतानां सर्वासामसंभवे कतिपयग्रहणस्य उत्तरकालप्रतीतिकत्वेऽपि स्वरूपेण पूर्वावगतेः समानविधानत्वोपपत्तिः। नहि नीवारत्वेन रूपेण तेषामुपादानम्, येन तद्रूपेण साधनत्वबोधस्य औत्तरकालिकत्वात् असमानविधानत्वापत्तिः, अपितु व्रीह्यारम्भकावयवसमानजातीय——कतिपयावयवारब्धत्वेन। अतश्च तेषां व्रीह्यवयवनिष्ठसाधनतासंपत्त्यर्थं अवर्जनीयतया उपादानेऽपि अवयवसाधनतायाः संस्कारविधिभ्यः पूर्वमेव प्रमितत्वात् समानविधानत्वोपपत्तिः। संस्कारविधिषु हि प्रकृतापूर्वसाधनीभूतप्रदेयप्रकृतित्वत्वावच्छिन्नप्रकृतित्वस्यैव उद्देश्यताऽवच्छेदकत्वात् अवयवनिष्ठसाधनताया अवयविनिष्ठसाधनताभेदेऽपि न विरोधः। एवं च यत्र न अवयवघटितसादृश्येन प्रतिनिधिः, तत्र न समानविधानत्वम्, न वा कार्यापत्त्याऽपि धर्मप्राप्तिः। यथा अवघातप्रतिनिधितया नखनिर्लुञ्छनादेः करणे नखेषु प्रोक्षणादेः, यूपावटास्तरणबर्हिर्वत् लौकिकेतिकर्तव्यतोपादानेन अपि चरितार्थत्वात्। फलचमसे तु ' तमस्मै भक्षं प्रयच्छेत् ' इत्यादिशब्दगतलिङ्गादेव अतिदेशकल्पनमिति विशेषः।

प्रयोजनम्— ' व्रीहीणां मेध ' इति मन्त्रस्य पूर्वपक्षे लोपः। सिद्धान्ते अनूहः। मन्त्रान्तर्गतव्रीह्यादिपदानां व्रीहित्वसाधनताऽऽक्षिप्तसाधनताकानामित्यर्थेनावयवेष्वपि प्रयोगोपपत्तेः।

मण्डन— ' धर्मोपदेशः प्रतिनिध्युपात्ते। '

शंकर— ' साम्यं प्रतिनिधौ विधेः। ' १५.

* प्रतिनिधौ कदरे संस्कृते पशुनियोजने कृते ततः खदिरलाभेऽपि पुनः खदिरे नियोजनं न कार्यम्। वि. १६।३।१८.

प्रतिनिधौ चाविकारात्। ९।३।९।२४॥

व्रीहीणामपचारे नीवारेषु प्रतिनिधित्वेन उपादीयमानेषु ' व्रीहीणां मेध सुमनस्यमानः ' इति मन्त्रः ऊहेन प्रवर्तते अनूहेन वेति विचारे सिद्धान्तमाह। प्रतिनिधौ नीवारादिरूपे प्रयुक्ते सति ऊहो न इत्यनुवर्तते। प्रतिनिधौ ऊहो न कर्तव्यः। अविकारात् अविकारेणैव

मन्त्रः प्रवर्त्यताम् । चशब्दः दृष्टान्तार्थः पत्नीवत् अध्रिगौ इव इति ।

अनाम्नानादशब्दत्वमभावाच्चेतरस्य स्यात् । २५ ॥

सिद्धान्तं व्यावर्तयति पूर्वपक्षी । अशब्दत्वं ऊहितशब्दशून्यत्वं अनाम्नानात् वा स्यात् इतरस्य अभावाद्वा स्यात् । यदि मन्त्रे व्रीहिशब्दस्य आम्नानं न स्यात्, यदि वा इतरस्य प्रतिनिधिभूतस्य नीवारद्रव्यस्य अभावः स्यात् तदा अशब्दत्वं स्यात् । अत्र तु व्रीहिशब्दः आम्नातः । प्रयोगे च व्रीहयो न सन्ति, नीवाराश्च गृहीताः । तस्मात् नीवाराणां अभिधानसिद्धये व्रीहिशब्दस्थाने नीवारशब्दः ऊहितव्यो भवति 'नीवाराणां मेध सुमनस्यमानः' इति । तस्मात् ऊहः कर्तव्यः । इति पूर्वः पक्षः ।

तादर्थ्याद्वा तदाख्यं स्यात् संस्कारैरविशिष्टत्वात् । २६ ॥

वाशब्दः पूर्वपक्षं व्यावर्तयति । व्रीहिस्थाने प्रतिनिधित्वेन नीवारद्रव्ये गृहीते 'व्रीहीणां मेध' इत्यत्र 'नीवाराणां मेध' इति ऊहो नैव कर्तव्यः । कथम् ? नीवाराणां तादर्थ्यात् व्रीह्यर्थत्वात् नीवारद्रव्यं तदाख्यं व्रीह्याख्यमेव स्यात् । संस्कारैरविशिष्टत्वाच्च । व्रीहीणां विशेषेषु संस्काराः क्रियन्ते । ते च व्रीहिविशेषाः संस्कार्याः नीवारेष्वपि सन्ति । एवं च नीवाराः संस्कारैः अविशिष्टाः अभिन्नाः । अतोऽपि नीवारद्रव्यं तदाख्यम् । तस्मात् प्रतिनिधिभूता नीवाराः व्रीहिशब्देनैव वक्तव्या भवन्ति । तस्मान्नोहः कर्तव्यः इति सिद्धान्तः ।

उक्तं च तत्त्वमस्य । २७ ॥

व्रीहिगतो विशेषः नीवारेष्वस्ति इत्यस्य तत्त्वम् 'सामान्यं तच्चिकीर्षा हि' इत्यत्र (६।३।११।२७) उक्तम् । व्रीहिभिः नीवाराः अत्यन्तं सदृशाः । सादृश्येन चानुमीयन्ते व्रीहिविशेषाः नीवारेषु सन्तीति । तस्मात् नीवारेषु प्रतिनिधित्वेन गृहीतेषु 'नीवाराणां मेध' इति नोहः । इति सिद्धान्तः । **के.**

* प्रतिनिधौ श्रुतेऽपि पूतीकादौ क्रयाभिषवादयो मुख्यधर्माः कर्तव्याः । ३।६।१५. * प्रतिनिधौ संस्कारयोग्ये लब्धेऽपि संस्कारायोग्यस्य मुख्यस्यापि लाभे मुख्यस्यैव उपादानम् । ६।३।१८।३८. **मीको.** पृ. २१८५ 'द्रव्यसंस्कारविरोधाधिकरणम्' इत्यत्र द्रष्टव्यम् । * प्रतिनिधौ संस्कारसमर्थे लब्धुं शक्येऽपि संस्कारासमर्थोऽपि प्रधानसमर्थश्चेत् मुख्य एवोपादेयः । ६।३।१९. * प्रतिनिधौ स्थानिधर्माणामूहः । ९।२।१२।३९. 'स्थानिधर्माणामूहः प्रतिनिधौ' इत्यत्र द्रष्टव्यम् । * मुख्यद्रव्यापचारे **प्रतिनिधौ** गृहीते द्रव्यभेदो भवति तथापि न यागभेदः । ६।३।३।११–१२.

* **प्रतिनिध्यधिकरणम् ।** प्रतिनिधावपि मुख्यधर्माणामनुष्ठानम् । ३।६।१४।३७–३९.

* **प्रतिनिध्यधिकरणसिद्धान्तहेतुपरशब्देन** 'प्रयोजनैकत्वात्' इत्यनेन द्विरुक्तिशङ्कापलापकं विधानैक्यमेव विवक्षितम् । **रसायनम्.** पृ. १५६.

▓ प्रतिनिध्यपचारे मुख्यसदृशस्यैव प्रतिनिधित्वम् ॥

न प्रतिनिधौ समत्वात् । ६।३।१४।३२ ॥

भाष्यम्— इदं विचार्यते । श्रुते द्रव्ये उपात्ते अपचरिते प्रतिनिधिमुपादाय प्रयोगः प्राप्तः । यदा सोऽपि विनष्टः प्रतिनिहितः, तदा किं प्रतिनिधिसदृशमुपादेयमुतोपात्तस्य विनष्टस्येति । किं प्राप्तम् ? प्रतिनिहिते विनष्टे तत्सदृशमुपादेयं पूर्वेण न्यायेन इति । **एवं प्राप्ते, ब्रूमः ।** प्रतिनिधौ न स्यात् प्रतिनिधिरिति । कुतः ? समत्वात् । यथैवासौ पूर्वः प्रतिनिहितः श्रुतचिकीर्षया, न प्रतिनिधिचिकीर्षया । एवमयमपि श्रुतचिकीर्षया, न प्रतिनिधिचिकीर्षया । तस्मान्न प्रतिनिधिसदृशमुपादेयम् । उपात्तनष्टस्यैव सदृशोऽन्वेषितव्य इति ।

सोम— पूतीकानां प्रतिनिधित्वेऽपि तदपचारे पूतीकसदृशोपादानमेव न तु सोमसदृशोपादानमिति पूर्वाधिकरणप्रयोजनाक्षेपात् **संगतिः । सूत्रार्थस्तु**— प्रतिनिधौ अपचरिते न तत्सदृशः प्रतिनिधिः, प्रतिनिध्यपचारेऽपि श्रुतावयवलिप्सया द्रव्यान्तरोपादानस्य तुल्यत्वादिति ।

वि— 'प्रतिनिध्यपचारे तु तेन मुख्येन वा समम् ।, प्रक्रान्तत्वादग्रिमो, ऽन्त्यः श्रुतांशसमलाभतः ॥'

[भाट्टे तु ३१–३४ सूत्रैरेकमधिकरणं कृतम् । इति नेदं पृथक् ।]

मण्डन— 'मुख्यदृक् सदृशग्रहः ।' यः सदृशस्य ग्रहः, स मुख्येन दृक् सदृक् सदृशः, न तु प्रतिनिधिना सदृशः ।

शंकर— 'नासौ प्रतिनिधेर्मतः ।' प्रतिनिधेः प्रतिनिधिः प्रतिनिधिना सदृशः न मतः ।

* **प्रतिनिधिकाण्डन्यायः ।** ६।३।४।१३. 'प्रतिनिधिन्यायः' इत्यत्र द्रष्टव्यम् । * **प्रतिनिधिकाण्डन्याये** स्थिते समुच्चयस्यैव (वर्त्माहवनीययोः) युक्तत्वात् कथमिदमधिकरणमारभ्यते ? उच्यते । **टुप्.** १०।८।८।१६ पृ. २०६९.

* **प्रतिनिधित्वं** न भवति वैकल्पिकस्य द्रव्यस्य । (यथा खदिरापचारे पालाशादिर्न प्रतिनिधिः व्रीह्यपचारे वा यवा न प्रतिनिधिः) । ६।३।१२।२८–३०. * प्रतिनिधित्वं श्रुतद्रव्यापचारे तत्सदृशस्यैव । ६।३।११।२७. * हविषः कृत्स्ननाशे दोषे वा आज्यस्य प्रतिनिधित्वम् । **टुप्.** ६।४।१।१.

▓ प्रतिनिधित्वं प्रतिषिद्धस्य माषादेर्द्रव्यस्य नास्ति ॥

प्रतिषिद्धं चाविशेषेण हि तच्छ्रुतिः । ६।३।६।२० ॥

भाष्यम्— अथ यत् प्रतिषिद्धम्, 'अयज्ञिया वै वरकाः कोद्रवाः, अयज्ञिया वै माषाः' इति । किं तत् श्रुतद्रव्यापचारे प्रतिनिधातव्यमुत नेति । किं प्राप्तम् । प्रतिनिधेयमिति । आगमो वा चोदनार्थाविशेषादिति । **एवं प्राप्ते, ब्रूमः ।** प्रतिषिद्धं च न प्रतिनिधातव्यमिति । अविशेषेण ह्येतदुच्यते, न यज्ञार्हा माषा वरकाः कोद्रवाश्चेति । यज्ञसंबन्ध एषां प्रतिषिध्यते । नैते यज्ञाङ्गभावं नेतव्या इति । प्रतिनिधीयमानाश्च अङ्गभावं नीताः स्युः । तस्मान्न एते प्रतिनिधातव्या इति ।

टुप्— प्रतिषिद्धं० ॥ वरकादेः श्रुतद्रव्यचिकीर्षया उपादानम्, न तेषामङ्गत्वेन विधानम् । अङ्गत्वं च प्रतिषिध्यते । तस्मात् वरकादि उपादेयम् । **एवं प्राप्ते, ब्रूमः ।** अर्थात् यदत्र यज्ञसाधनं (नत्वम्) प्राप्तम्, तत् तत्र प्रतिषिध्यते (अस्मल्लिखिते तु 'अर्थात् ये यत्र यज्ञसाधनं प्राप्ताः, ते तत्र प्रतिषिध्यन्ते' इति बहुवचनान्तः पाठः) ।

सोम— इह तत्कार्यकरत्वस्य प्रत्यक्षत्वात् अस्तु प्रतिनिधानमिति प्रत्यवस्थानात् **संगतिः । सूत्रार्थस्तु**— प्रतिषिद्धं माषादिकमपि न प्रतिनिधेयम्, यस्मादविशेषेण यज्ञसंबन्धमात्रे निषेधश्रुतिः इति ।

वि— 'माषाद्याः प्रतिनिध्यर्हा न वा, ऽऽद्यस्तद्वारणात् ।, नार्हा अयज्ञियत्वोक्तेरर्थात् तद्विनिवारणात् ॥'

भाट्ट— अनारभ्यश्रुतेन 'अयज्ञिया वै माषा वरकाः कोद्रवाः' इत्यनेन माषादीनां यज्ञाङ्गत्वप्रतिषेधात् यत्र साक्षात् तेषां विधानम्, तत्रैव विकल्पार्थः प्रतिषेधः । अथवा यत्र धान्यत्वादिना सामान्यधर्मेण विधानम्, तत्र स्वेच्छाप्राप्तमाषाद्यङ्गप्रतिषेधो 'बर्हिषि रजतं न देयम्' इतिवत् । अतश्च कर्मशास्त्रानुरोधेन माषादीनां प्रतिनिधिस्थले साधनत्वेऽपि अङ्गत्वाभावात् तत्र न प्रतिषेधः । वक्ष्यमाणयुक्त्या द्रव्यशास्त्रानुरोधेन माषादिरूपसदृशप्रतिनिधिस्थले व्रीह्यवयवत्वादिनैव तेषां ग्रहणात् अवर्जनीयतया माषाद्युपादानादङ्गत्वाभावेन न प्रतिषेधः । अतस्तेऽपि प्रतिनिधेयाः । **इति प्राप्ते,** 'अयज्ञियाः' इत्यनर्हार्थप्रत्ययेन साधनत्वमात्रनिषेधात् विशेषविहितातिरिक्तस्थले सर्वत्रैव माषादिप्रतिषेधप्रतीतेः न प्रतिनिधेयाः । द्रव्यसामान्याभावे तु ग्राह्या एवेति ध्येयम् । अत्र च लक्षणया यज्ञोद्देशेन माषनिषेधविधानात् नैकप्रसरताभङ्गः ।

मण्डन— 'प्रतिषिद्धं न गृह्यते ।'

शंकर— 'प्रतिषिद्धस्य नापि सः ।' प्रतिषिद्धस्यापि सः प्रतिनिधिभावः न ।

* **प्रतिनिधिनिष्पादितेऽपि** कर्मणि दर्शपूर्णमासादिनामधेयं याज्ञिकैः प्रयुक्तमभेदापादकम् । **सु.** पृ. ३४४.

* **प्रतिनिधिनिष्पादितकर्म**विषयस्यापि 'अपिवाऽव्यतिरेकात्०' (६।३।३।१२) इति न्यायस्य विध्यन्तरविहितेष्वपि तुल्यत्वं केचिन्मन्वते । **सु.** पृ. ३४४.

ञ्च. प्रतिनिधिन्यायः । अग्निहोत्रादिनित्यकर्माणि श्रुतद्रव्यापचारे प्रतिनिधिना समापनीयानि ॥

श्रुतिप्रमाणत्वाच्छिष्टाभावेऽनागमोऽन्यस्याशिष्टत्वात् । ६।३।४।१३ ॥

भाष्यम्— अग्निहोत्रादीनि नित्यानि कर्माण्युदाहरणम् । तेषु श्रुतद्रव्यापचारे भवति संदेहः किं प्रतिनिधिमुपादाय प्रयोगः कर्तव्यः, उत तदन्तं कर्म उत्स्रष्टव्यमिति । किं प्राप्तम् ? शिष्टस्य अभावे अनागमः अन्यस्य । तदन्तमेवोत्स्रष्टव्यम् । कुतः ? अशिष्टत्वात् । यद् व्रीहियवगुणकं श्रुतं फलवत्, तन्नीवारगुणकं क्रियमाणमफलकं भवति । तस्मात् तदन्तमेवोत्स्रष्टव्यमिति ।

टुप्— व्रीह्यभावे तदन्तमेवोत्स्रष्टव्यम् । नियमफलसंपत्ती हि यथाश्रुतादृवतः । तस्मात् (फलाभावात्) श्रुताभावे (श्रुतद्रव्याभावे) तदन्तोत्सर्गः ।

क्वचिद्विधानाच्च । १४ ॥

भाष्यम्— क्वचिद्विधीयते । यथा ' यदि सोमं न विन्देत् पूतीकानभिषुणुयात् ' इति । यदि च प्रतिनिधिमुपादाय प्रयोगः कर्तव्यः स्यात्, न विधीयेत । विधीयते तु । तस्मात् यच्च (यत्र) न विधीयते, न तत्र प्रतिनिधिरिति ।

आगमो वा चोदनार्थाविशेषात् । १५ ॥

भाष्यम्— आगमो वा प्रतिनिधेयस्य द्रव्यस्य । कुतः ? चोदनार्थाविशेषात् । यजतिचोदनाचोदितो ह्यर्थो न विशिष्यते व्रीहिभिर्नीवारैर्वा क्रियमाणः । यागश्च अवश्यकर्तव्यो नित्येषु अनित्येषु च प्रारब्धेषु ।

टुप्— ' आगमो वा० ' ॥ 'आग्नेयोऽष्टाकपालः' इतीयं चोदना नीवारैरपि संपादयितुं शक्यते (द्रव्यान्तरेऽपि कर्माभेदस्य स्थितत्वात्) प्रारब्धमवश्यं समापनीयमिति नियमः (अवश्यम्भावः) अस्यामेव (शिष्टविगर्हणाकल्पितया श्रुत्या) चोद्यते । (एतदुपलक्षणम् । नैमित्तिकं कर्म अनारब्धमपि मुख्यद्रव्याभावे निश्चितेऽपि प्रतिनिधिमेव अङ्गीकृत्य प्रारब्धव्यमेव इति) । या च (प्रधानचोदना) नियमेन अर्थात् द्रव्यमाकाङ्क्षति, सा श्रुतैरेकवाक्यतां प्रतिपद्यमाना (द्रव्यान्तराणाम्) अर्थप्राप्तिं बाधते । श्रुताभावे (तु) या अर्थप्राप्तिः, सा केन निवार्यते ? तस्मात् (द्रव्यान्तराणाम्) आगमः कर्तव्यः ।

नियमार्थः क्वचिद् विधिः । १६ ॥

भाष्यम्— अथ यदुक्तं क्वचिद् विधानादिति । उच्यते । नियमार्थः क्वचिद् विधिः । सोमाभावे बहुषु सदृशेषु प्राप्तेषु नियमः क्रियते ' पूतीका एवाभिषोतव्याः ' इति । तस्मात् प्रतिनिधिमुपादाय प्रयोगः कर्तव्य इति ।

टुप्— एतदयुक्तम् । उत्पत्तिवाक्यशिष्टत्वात् सोमस्य नास्ति प्रतिनिधिः । कथम् (उत्पत्तिवाक्यशिष्टस्य न प्रतिनिधिर्भवति । उत्तरम्–) उत्पत्तिवाक्ये यद् रूपमवगतम् , तद् रूपमेव (' ज्योतिष्टोमेन स्वर्गकामः ' इत्यादिना कर्म) प्रयोगवाक्येन (स्वयम्–) अरूपेण फले विधीयते । (दर्शपूर्णमासयोस्तर्हि कथं प्रतिनिधिः ? अत आह–) नीवारैः क्रियमाणे, उत्पत्तिवाक्ये यद् रूपम् , तन्न भिद्यते । इह तु सोमेन विना भिद्यते । तस्मात् तद्रूपभेदः (करणस्वरूपस्य भेदः) । रूपभेदाच्च शब्दान्तरम् (मृग्यम् । इतश्च न प्रतिनिधिरित्याह–) यत्र हि अगुणा (उत्पत्ति-) चोदना भवति (उद्भिदादिषु), वाक्यान्तरेण वा (यत्र) गुणः (विहितः यथा दर्शपूर्णमासयोः), तत्र तदभावे (तस्यादिष्टस्य वाक्यान्तरशिष्टस्य वा गुणस्याभावे अपि) उत्पत्तिचोदनासंपत्त्यर्थं द्रव्यम् (द्रव्यान्तरम्) उपादीयते । यथा उत्पत्तेः (उत्पत्तिवाक्यावगतरूपापरित्यागेन) स्थितस्य तस्य यागस्य अपेक्षावगतः प्रतिनिधिः । सोमे तु यस्मिन्नेव क्षणे (विधि–) प्रत्ययेन परामर्शो यागस्य, द्रव्यस्यापि तस्मिन्नेव अतः (द्रव्यात्–) पूर्वमनुत्पन्नत्वात् अपेक्षा नास्ति (यागस्य द्रव्यापेक्षा नास्ति) । अपेक्षाऽऽक्षिप्तश्च प्रतिनिधिः । ' नियमार्थो विधिः ' इत्येतदपि अयुक्तम् । (इत्येतत् अस्मादपि कारणात् अयुक्तमिति रत्न.) नहि (सोमस्य) सुसदृशे (द्रव्यान्तरे) सति ईषत्सदृशः (पूतीकः) पक्षेऽपि प्राप्तः । तस्मात् अत्यन्ताप्राप्तो विधीयमानः (पूतीकः) न नियमार्थो भवतीति । (**समाधत्ते**–) अत्रोच्यते । प्रक्रान्तं (कर्म) अवश्यं समापनीयम् ।

तस्मात् सोमाभावे द्रव्यान्तरमुपादेयम् । (यत्तु अपेक्षाऽभावादित्युक्तं तत्राह–) ' यजेत ' इत्येतत् (पदम्) यत्किञ्चिद् द्रव्यमपेक्षमाणं ' सोमेन ' इति पदान्तरेण निराकाङ्क्षीक्रियते । यथा (आग्नेयोऽष्टाकपालः इति–) वाक्यं वाक्यान्तरेण व्रीहिभिः (–यजेत) इति (अनेनैकग्रन्थेन) । एवं चेत् पदान्तरवाक्यान्तरप्राप्तयोः (द्रव्ययोः) न (कश्चित्) विशेषोऽस्ति, अपेक्षायास्तुल्यत्वात् ।

[इतः परा टुप्टीका एतदधिकरणीया लिखिते नास्ति । आनन्दाश्रमीये तन्त्ररत्ने चास्त्येव इति सा संगृह्यते ।] अथ यदुक्तम् (अपेक्षानिराकरणार्थम् ,) सोमकलुषितस्य (एव) उत्पन्नत्वात् शुद्धस्य (यागस्य) प्रत्ययव्यापार एव (विध्यात्मकः) नास्ति, तत्र कुतः पदान्तरापेक्षा (इति । तत्र-) उच्यते । पदार्थपूर्वकत्वात् वाक्यार्थस्य अपेक्षया विना संबन्ध एव नास्ति । अन्यदिदानीमेतत् एकस्य पूर्वकालः परामर्शः , एकस्य (अपरस्येत्यर्थः) समकाल इति । (तथा) एकस्य पूर्वकालेन संबन्धः , एकस्य (तु) समकालेनेति न (तेन) कश्चिद्विशेषः । (सर्वत्र) अपेक्षा तावदस्ति । अपेक्षाऽऽक्षिप्तश्च प्रतिनिधिः । (तत्रैव युक्त्यन्तरमाह–) अपिच सोमो नैव (साक्षात्) यागसाधनम्, किन्तु तदुपलक्षितो रसः । स चाविशिष्टः पूतीकेष्वपि । तस्मान्नास्ति रूपभेदः । एवं च शब्दभेदः (अपि) नास्ति (इति न नामान्तरं मृग्यम्) । अतः (ज्योतिष्टोम–) नामधेयमविरुद्धम् । (कथं पुनः रसस्य साधनत्वमत आह–) एवं च दशमे वक्ष्यति (१०।७।१।२) ' पश्वाकृत्युपलक्षितं हृदयादि हविः ' इति (पश्वाकृतिकस्य द्रव्यस्य हृदयादीनि यानि, तानि हवींषि इति तु भाष्याक्षराणि पृ. २०२२ । अनुवादस्तु अर्थतः) । इहापि स तुल्यः (एव न्यायः अभिषवादिविधानात्) । अथोच्येत सोमाकृत्युपलक्षितो यो रसः, स यागसाधनम् , न पूतीकाकृतिको रसः (इति । परिहरति–) दर्शपूर्णमासयोरपि शक्यं वदितुम् ' व्रीह्याकृत्या उपलक्षितमवदानं यागसाधनम् , न तु नीवाराकृत्या ' इति नास्ति वैषम्यम् । अथ यदुक्तम् (सत्यपि प्रतिनिधौ पूतीकानामीषत्सदृशत्वात् प्राप्तिर्नास्ति इति–) अभावे विधिः (एवायम्) इति । तत्रोच्यते । यत्र कदाचिदपि प्राप्नोति स विधिः (कर्मणि– ' उपसर्गे घोः किः ') यथा ' अग्निहोत्रं जुहुयात् ' (जुहोति पाठान्तरम्) इति (होमः विधेयो भवति) । पूतीकाः (तु) कदाचित् प्राप्नुवन्ति । तस्माद् युक्तमुक्तम् ' नियमार्थः क्वचिद् विधिः ' इति । यदि (असमभावे) विधिः स्यात् , (ततः) इन्द्रवाय्वादिभिः (देवताभिः) न (यागस्य) संबन्धः स्यात् । कथम् ? (इति आनन्दाश्रमीये) सोमरसग्रहणे (हि) ताः (श्रुताः , तद्द्वारेण तत्साधनक–) यागसंबन्धिन्यः (भवन्ति) न (तु) साक्षात् (यागे श्रुताः) सोमद्रव्याश्रितः (ग्रहणाख्यः) संस्कारः, स तद्द्रव्याभावे (आश्रयभूतस्य द्रव्यस्याभावे) न भवति । न च पूतीकाः (भवन्मते) सोमः इत्यनेनांशेन गृह्यन्ते, यथा व्रीहयो नीवारांशेन । न च विकल्पेनोपदिश्यन्ते व्रीहियववत् , अभावविध्यभ्युपगमात् । न च कार्यापत्तिः (स्थानापत्तिरूपः अतिदेशः अपि तद्धर्मप्रापिका भवितुमर्हति) प्रत्यक्षविधानात् । तस्मान्नास्ति देवतासंबन्धः । सत्यपि अपूर्वप्रयुक्तत्वे द्वाराभावान्न धर्मसंबन्धः । उत्पत्तिवाक्यशिष्टेन (शिष्टत्वेनेत्यर्थः) प्रतिनिधिमनिच्छतः अभावे विधानं प्रतिनिधिनियमश्च न स्यात् । कर्मान्तरं तथा सति प्रसज्येत (कर्मान्तरे च सति) प्रक्रान्तं (कर्म) न समाप्येतेति (तच्चायुक्तम् । इतिः समाप्तौ) ।

तन्नित्यं तच्चिकीर्षा हि । १७ ॥

भाष्यम्— कथं पुनरिदमवगम्यते नियमार्थमेव तद्वचनमिति ? उच्यते । यतः प्राप्ताः पूतीकाः । कथं च ते प्राप्ताः ? तच्चिकीर्षा हि । तत्र सादृश्यं चिकीर्षा इत्येतद्वक्ष्यामः (६।३।११।२७) । तच्चिकीर्षया च प्राप्ताः पूतीकाः । तस्मात् तन्नित्यम् । वचनमेतत् नियमाय नित्यमिति गम्यते ।

सोम— **सूत्रार्थस्तु**— श्रुतिप्रमाणकत्वात् व्रीह्यादिद्रव्यकर्मणः श्रुतिप्रमाणावगतत्वात् शिष्टस्य व्रीह्यादेरभावे अन्यस्य अनागमस्य अशिष्टत्वात् इति ।

वि— ‘ द्रव्ये प्रतिनिधिर्नास्ति विद्यते वा, न विद्यते । मानाभावा, दस्ति कर्मचोदनाऽऽक्षेपिकी यतः ॥ ’

भाट्ट—– काम्ये आरम्भोत्तरम्, नित्ये ततः पूर्वमपि, श्रुतद्रव्याद्यलाभे द्रव्यान्तरं प्रतिनिधेयं न वा इति चिन्तायाम्, अशक्तौ अङ्गहानेन प्रयोगेऽपि अनङ्गग्रहणे प्रमाणाभावः । तथाहि, न तावत् द्रव्यादिशास्त्रम्, तस्य व्रीहित्वाद्यवच्छिन्नविधायकत्वेन नीवाराद्यविधायकत्वात् । नहि तेषु व्रीहित्वमस्ति । नापि कर्मशास्त्रं तदाक्षेपकम्, द्रव्यशास्त्रेण द्रव्यान्तरसाधारणाक्षेपप्रतिबन्धेन व्रीह्यादिविधानात् द्रव्यान्तराक्षेपानुपपत्तेः । नहि व्रीहिशास्त्रं शब्दतो नियमविधिः, अपि तु आक्षेपप्रतिबन्धद्वारा फलतः । अतश्च यथैव अग्नि-विद्ययोः स्वविधिप्रयुक्तयोरेव लाभात् आक्षेपप्रतिबन्धेन अशक्तस्य शूद्रादेर्वा न तदाक्षेपः, अपि तु अग्नि-विद्ययोः अधिकारिविशेषणत्वमङ्गीकृत्य तद्वत एवाधिकारः, एवं द्रव्याद्यंशेऽपि प्रधानविधिना अनाक्षेपात् व्रीह्यादिश्रुतद्रव्यवतः एव अधिकारित्वकल्पनेन न द्रव्यान्तरोपादानमिति प्रयोगोत्सर्ग एव युक्तः । इति **प्राप्ते**, द्रव्यशास्त्रेण द्रव्यान्तरसाधारण्येन आक्षेपप्रतिबन्धेऽपि व्रीह्यादीनां अग्नि-विद्ययोरिव स्वतन्त्रप्रयोगविधिविधेयत्वाभावात् प्रयाजादिवत् प्रधानविधेरेव व्रीह्यादिप्रयोगविधायकत्वात्, प्रयोगविधिविषयीभूतानां तेषामधिकारिविशेषणत्वानुपपत्तौ निमित्तबलात् अशक्तौ त्यागेनापि प्रधानकर्तव्यताऽवगतेः, तस्य च द्रव्यान्तरमन्तरेण अयोगात् युक्तं तदाक्षेपकत्वम् । अग्नि-विद्ययोस्तु स्वतन्त्रप्रयोगविधिसिद्धयोः एतत्प्रयोगविधिविषयत्वाभावेन यथाशक्त्युपबन्धविषयत्वाभावात् युक्तं अधिकारिविशेषणत्वमिति वैषम्यम् । **न च** एवमपि द्रव्यस्योत्पत्तिवाक्ये श्रुतस्य निमित्ताद्यन्वयात् पूर्वमेव यागाद्यन्वयात् पश्चादवगम्यमाननिमित्ते एव द्रव्यावच्छेदकल्पनात् द्रव्यावच्छिन्नजीवनादेरेव निमित्तत्वावगतेः कथं द्रव्यान्तरेण याग इति **वाच्यम्** । विशिष्टविधौ निमित्तान्वयात् पूर्वं भावनायामन्वितस्यापि द्रव्यस्य विशेषणविधौ यागाङ्गताबोधदशायां यागगतफलवत्त्वज्ञानार्थं काम-यावज्जीववाक्याभ्यां एकवाक्यत्वाङ्गीकारेण निमित्तपापक्षयाद्यन्वयोत्तरमेव द्रव्यस्य यागाङ्गताबोधेन प्रयाजादिवत् तत्रापि यथाशक्त्युपबन्धोपपत्तेः । अतस्तदा कर्मशास्त्रेण सदृशसाधारण्येन द्रव्यान्तराक्षेपात् युक्तः प्रतिनिधिः । तस्य च अङ्गत्वाभावेऽपि उपकारकत्वमात्रेण ग्रहणं बोध्यम् । एवं च कर्मचोदनया यत्किंचिद्द्रव्यप्राप्तौ युक्त्यन्तरेण सदृशस्य, वचनेन च पूतीकानां नियमः इति वक्ष्यते ।

मण्डन—– ‘ मुख्याभावे तमानयेत् । ’ प्रतिनिधिम् ।

शंकर—– ‘ द्रव्यादेः प्रतिनिध्ययः । ’ प्रतिनिधेः अयः आयः आगमः ग्रहणमित्यर्थः ।

* तत्कार्यापन्ने (जनपदपुरपरिपालनकण्टकोद्धरणरूपराजकार्यापन्ने) **प्रतिनिधिन्यायेन** ब्राह्मणादौ राजशब्द इति द्रष्टव्यम् । **वा.** २।३।२।३ पृ. ५८५.

* **प्रतिनिधिपेटिका** । भा. ६।३।४–२० इति सप्तदशाधिकरणानि । एषु हि प्रतिनिधिविषयको विचारः कृतः । **के.**

* ‘ **प्रतिनिधिप्रतिदाने** च यस्मात् ’ (पा० २। ३।११) अत्र कर्मप्रवचनीययोगे पञ्चमी । प्रद्युम्नः कृष्णात् प्रति, तिलेभ्यः प्रतियच्छति माषान् । **मणि.** पृ. १३२.

* **प्रतिनिधिप्रयोगेऽपि** व्रीह्यादिमन्त्रस्य न विकारः । ९।३।९।२४–२७.

* **प्रतिनिमित्तं** नैमित्तिकानुष्ठानं षष्ठे वक्ष्यते । **सु.** पृ. ७८६.

* **प्रतिनिमित्तं नैमित्तिकावृत्तिः इति न्यायः** । जीवननिमित्तकाग्निहोत्रादौ निमित्तस्य प्रतिक्षणं भेदात् प्रतिनिमित्तं नैमित्तिकावृत्त्या संततानुष्ठानप्रतीतेः तदनुरोधेन अशक्याङ्गत्यागः वक्ष्यते । **भाट्ट.** ६।२।७.

* ‘ यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणान् चतुष्कपालान् ’ इत्यत्र **न च** यावत्तावच्छब्दाभ्यां क्रियाद्वयस्य संबन्धमात्रावगतौ शेषित्वपक्षे आराद्उपकारकत्वेन तन्त्रत्वापत्तेः तावच्छब्दार्थप्राप्त्यभावेन विधेयत्वप्रसङ्गात्, निमित्तत्वपक्षे च **प्रतिनिमित्तं नैमित्तिकावृत्तिन्यायेन** तावच्छब्दार्थस्य प्राप्तत्वेन अविधेयत्वात् विधिलाघवानुरोधेन निमित्तत्वावगतिः सिद्धान्तेऽपि सुलभा इति **वाच्यम्** । पक्षद्वयेऽपि निमित्तानुरोधेन प्रधानानुरोधेन

वा आवृत्तिप्रसक्तौ कालैक्येन तन्त्रत्वप्राप्तेः तावच्छब्दस्य प्रतिप्रसवविधित्वावश्यम्भावात् । **भाट्ट.** ३।४।१४, * ‘ वसन्तेवसन्ते ज्योतिषा यजेत ’ इत्यत्र गुणभूतकालानुरोधेन प्रधानावृत्तेः अप्राप्ततया वीप्साऽर्थस्यापि विधेयत्वे वाक्यभेदापत्तौ ‘ प्रतिनिमित्तं० ’ इति **न्याय**प्राप्तवीप्साऽर्थानुवादबलात् तद्वाक्यस्थाया एव सप्तम्याः निमित्तपरत्वावसायः । ६।२।११.

* **प्रतिनिर्यातनं** प्रतिदानम् । तिलेभ्यः प्रतियच्छति माषान् । **के.**

* **प्रतिनिर्वापादिमन्त्रावृत्तिः** । ११।४।१४.

* **प्रतिनिहितस्य** अस्वामित्वम् (सत्रे) । ६।३।९.

* **प्रतिपत्** (द्) ‘ उपास्म ’ इत्यादि विकृतौ न प्रवर्तते । अतिदेशो न विकृतौ प्राकृतकाम्यगुणानाम् । **भा.** ८।१।१४।२३–२५ . * प्रतिपत् शस्त्रादौ प्रथमा ऋक् । के. * प्रतिपत् (बहिष्पवमानगता) संसव–गोसव –अपचित्यादौ उभयसाम्नि न उपवती, न अग्रियवती, किन्तु अन्यैव । **भा.** १०।५।१६।५९–६१. * **प्रतिपदोः** (‘ युवं हि स्थः, एते असृग्रम् ’ इत्येतयोः ज्योतिष्टोमात्) कुलायादौ उत्कर्षः, न तु ज्योतिष्टोमे एव निवेशः । ३।३।९।१७–१९. **मीको.** पृ. २२१९ ‘ द्वित्वबहुत्वाधिकरणम् ’ इत्यत्र द्रष्टव्यम् । * प्रतिपदोः पृष्ठगतयोः उपवत्यग्रवत्योः नैमित्तिकयोः प्राकृतयोः संसवादिविकृतौ नानुष्ठानम् । १०।५।१६।५९–६१. **मीको.** पृ. ११६४ ‘ उपवत्यग्रवत्योः नैमित्तिकयोः० ’ इत्यत्र द्रष्टव्यम् । * **प्रतिपदि** (तिथौ) अहनि अमावास्यातन्त्रम् । **भा.** १२।२।५।१५.

* **प्रतिपदधिकरणम्** । प्रतिपदोः कुलायादौ उत्कर्षः । द्वित्वबहुत्वाधिकरणम् । ३।३।९।१७–१९.

* **प्रतिपद्द्विधानस्य** द्वित्वबहुत्वयुक्तस्य श्रुत्या द्विबहुयजमानकक्रत्वन्तरसंयुक्तस्य ज्योतिष्टोमप्रकरणे विनियोगनिवृत्तिः । **सु.** पृ. ११९५–९६.

* **प्रतिपत्तिः** । (क्रमं बाधित्वा अपि प्रथमं लक्षणानि संगृह्यन्ते, अनन्तरं उदाहरणादीनि ।) अवशिष्टस्य यः कोऽप्युपयोगः । वि. ३।४।२१, * प्रतिपत्तिः इष्ट–(यज्) शिष्टस्य संस्कारः । ३।८।१९. * प्रतिपत्तिः कृतप्रयोजनकस्य द्रव्यस्य रिक्तीकरणदृष्टफलः संस्कारः अन्यत्रापनयात्मकः । **कु.** ३।२।५।१३ पृ. २८७. * प्रतिपत्तिः नाम कर्म भूतोपयोगद्रव्यसंस्कारार्थं दृष्टार्थं संनिपत्योपकारकं क्रत्वर्थं प्रवृत्तिरूपं वैदिकं कर्म । सा च प्रतिपत्तिः त्रिविधा– प्रधानोत्तरकाला, प्रधानपूर्वकाला, प्रधानसमकाला चेति । **बाल.** पृ. ८२. * प्रतिपत्तिः नाम संस्काररूपो दृष्टोऽर्थः । वि. ४।२।४. * प्रतिपत्तिर्नाम सत्कारः । ततश्च राजनिर्माल्यस्रगादीनां परेण शिरसा धारणरूपसत्कारे कृते राज्ञः स्वात्मनि अतिशयबुद्धेः मानसप्रत्यक्षसिद्धत्वात् इहापि (विषाणाप्रासनेऽपि) निष्पन्नस्यापि कार्यस्य (कण्डूयनस्य) तदीयद्रव्यप्रतिपत्त्या संभवत्यतिशयः । दृष्टश्च वाजपेयापूर्वस्य बृहस्पतिसवेन अतिशयः । **सोम.** ४।२।७. * प्रतिपत्तिः यागोपयुक्तद्रव्यसंस्कारः । वि. १०।२।९. * प्रतिपत्तेर्लक्षणमुक्तम् ‘ उत्पत्तौ येन संयुक्तं तदर्थं तत् श्रुतिहेतुत्वात् तस्यार्थान्तरगमने शेषत्वात् प्रतिपत्तिः स्यात् । ’ (४।२।१९) इति सूत्रेण । सूत्रार्थस्तु **मीको.** ११०४ पृष्ठे द्रष्टव्यः । **के.** * प्रतिपत्तिः अग्नीषोमीये पशौ ऐकादशिनादिषु च गुदैरुपयजनम् । **भा.** १२।४। ४।८. * प्रतिपत्तिः अतिरिक्तस्य, न तु अतिरेचयितव्यं इति शास्त्रमस्ति । अतिरेकश्चावश्यम्भावी । **टुप्.** ४।२। ५।१५. * प्रतिपत्तिः अवभृथे ऋजीषादिनयनम् । ४। २।८।२०–२२. **मीको.** पृ. ६९९ ‘अवभृथे ऋजीषादिनयनम्० ’ इत्यत्र द्रष्टव्यम् । * ‘ प्रतिपत्तिरिति चेन्न कर्मसंयोगात् ’ (११।२।१५।६५–६६) । न चैवं निष्कासस्य संस्कार्यत्वपक्षे (अर्थकर्मत्वपक्षोऽन्यः) ‘प्रतिपत्ति०’ इत्येकादशाधिकरणसूत्रविरोधः, तस्य तुषांशे प्रतिपत्तिनिराकरणार्थत्वेनापि उपपत्तेः । (वारुण्या निष्कासेन तुषैश्चावभृथं यन्ति–इत्यत्र) । **कौ.** २।३।११।२४ पृ. ८५. * प्रतिपत्तिः इयमेकदेशस्य, एकदेशस्य च होमः । ज्योतिष्टोमे ‘ पुरोडाशशकलमैन्द्रवायवस्य पात्रे निदधाति, धाना आश्विनपात्रे, पयस्यां मैत्रावरुणपात्रे ’ इति । ३।८।१८।३३. * प्रतिपत्तिः उपयजनं नार्थकर्म उपयुक्तशेषत्वात् । **के.** (भा. १२।४।४।८). * प्रतिपत्तिः चात्वाले कृष्णविषाणायाः प्रासनम् । ४।२।७।१९.

मीको. पृ. १४८३ ‘ कृष्णविषाणाप्रासनाधिकरणम् ’ इत्यत्र द्रष्टव्यम् । * प्रतिपत्तिः द्रव्यं न प्रयोजयति । **भा.** ११।४।९।३४. * प्रतिपत्तिः । न चान्यत्रानुपयुक्तस्य प्रतिपत्तिर्युक्ता । **वा.** २।३।७।१८ पृ. ६०४. * प्रतिपत्तिः न जाघनी पत्नीसंयाजेषु दर्शपूर्णमासयोर्वा, अग्नीषोमीये पशौ वा, पशुगणेषु वा, किन्तु अर्थकर्म । **के.** १२।४।६।१०–१६. * प्रतिपत्तिर्न ज्योतिष्टोमे मैत्रावरुणसंस्काराय दण्डदानं किन्तु अर्थकर्म । ४।२।६. * प्रतिपत्तिः । न ह्यकृते प्रयोजने कश्चित् प्रतिपादनमर्हति । **भा.** ३।५।११।३२. * प्रतिपत्तिः प्रणीतानिनयनं दर्शपूर्णमासयोः । ४।२।५।१४–१५. **मीको.** पृ. २३४६ ‘ निनयनन्यायः ’ इत्यत्र द्रष्टव्यम् । * प्रतिपत्तिः प्रयाजशेषेण हविरभिघारणमिति उपयुक्तसंस्कारोऽभिघारणम् । ४।१।१४।३३–३९. * प्रतिपत्तिः प्रस्तरस्य शाखायाश्च प्रहरणम् । **भा.** ६।४।१३।४४, * प्रतिपत्तिः प्रस्तरप्रहरणम् । ३।२।५।१५, * प्रतिपत्तिः यजमानशरीरे निक्षेपणं यज्ञपात्राणामग्नीनां च परिधानीये कर्मणि विधीयते ‘ आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्च ’ इति । ११।३।१३।३४, * प्रतिपत्तिः । यद्धि कृतप्रयोजनमाकीर्णकरमवतिष्ठते, तत् प्रतिपादयितव्यम् । ३।५।१।६. * प्रतिपत्तिर्लोहितं तन्निरसनं च अग्नीषोमीये पशौ । **के.** (भा. ४।१।१२।२७). * प्रतिपत्तिः वाजिनस्यानुनिष्पन्नस्य चातुर्मास्यवैश्वदेवपर्वणि । **भाट्ट.** ४।१।९. * प्रतिपत्तिः । वेदविहितप्रतिपत्त्यभावे लौकिकप्रतिपत्तिसिद्धिः । **वा.** ३।५।१०।२१ पृ. १००६. * प्रतिपत्तिः शकृल्लोहितनिरसनं स्विष्टकृद्यागः चात्वालप्रासनं च प्रतिपाद्यस्य शकृल्लोहितस्य शेषस्य कृष्णविषाणादेश्च अप्रयोजकाः । **बाल.** पृ. १०८. * प्रतिपत्तिः शाखाप्रहरणम्, न तु अर्थकर्म । दर्शपूर्णमासयोः । ‘ सह शाखया प्रस्तरं प्रहरति ’ इति । ४।२।४।१०–१३. ‘ शाखाप्रहरणाधिकरणम् ’ इत्यत्र द्रष्टव्यम् । * प्रतिपत्तिः शेषस्य इडाऽऽदिशेषभक्षाः । १०।२।९।३०–३४. * प्रतिपत्तिः समिष्टयजुः । शक्यं तु (‘ उपस्तृणन् अभिघारयन् आज्यस्य यजन् ’ इति) तैत्तिरीयवाक्यापेक्षया उत्पत्तौ अन्यसंयोगात्, समिष्टयजुषश्च जुहोतिचोदितत्वेनायज्ञत्वात्, प्रतिपत्तित्वमवधारयितुम् । **वा.** ३।५।१।६. * प्रतिपत्तिः सोमलिप्तद्रव्याणामवभृथगमनम् । ४।२।८।२०–२२. * प्रतिपत्तिः हानोपादानादिकार्यावगम्या । **बृहती.** पृ. २५९. * वचनान्तरेण शेषभावे अवगते अन्यत्र संयोगे भवति **प्रतिपत्तिः**, यथा स्विष्टकृत् । **टुप्.** ४।२।५।१४. * **कृतार्थप्रतिपत्तयः** शेषकार्याणि स्वयमेव न अकृतप्रयोजनमपि द्रव्यं प्रयुञ्जते । **वा.** ३।५।१।६. * **प्रतिपत्तेः** प्रथमकृतसामवायिकाङ्गमात्रानुगृहीतप्रधानानन्तरं उत्पन्ने प्रधानोत्पत्त्यपूर्वे क्रियमाणायाः प्रात्यात्मिकप्रधानोत्पत्त्यपूर्वसहकारित्वावगमः । **सु.** पृ. १५१२. * प्रतिपत्तेः प्रयोगमध्ये विधानाभावेन समयान्तरे प्रतिपत्तिविधानादेवं कल्प्यते ‘ विनाऽपि प्रतिपत्तिं कर्म स्वफलं साधयति, परन्तु अन्यथाप्रतिपत्तौ दुष्यति ’ इति । ततश्च कर्मणः स्वकार्यजनने प्रतिपत्त्यनपेक्षणात् न फलजनकत्वविरोधः । **सोम.** ११।३।१३. * न च **प्रतिपत्तेर्मन्त्रोऽङ्गं** न भवति । निष्प्रयोजनस्य तु अङ्गं नेष्यते । प्रतिपत्तिस्तु दृष्टार्थत्वेन सुतरां प्रयोजनवती नियमादृष्टसिद्ध्यर्थं च अपेक्षते वैदिकानि साधनानि । **वा.** ३।२।५।१५. * **प्रतिपत्तीनां** प्रतिपाद्यप्रयोजकत्वायोगरूपन्यायेन यथा प्रतिपाद्योत्पत्तिप्रयोजकत्वाभावः सिध्यति, एवं प्रतिपाद्यस्य शास्त्रतः कृत्स्नहोमे प्राप्ते तद्धारणाप्रयोजकत्वमपि सिध्यत्येव । तदुक्तम् ‘ सोमेऽवचनात् ’ इत्यधिकरणे (३।५।६) शास्त्रदीपिकायाम् । **बाल.** पृ. १०९. * **प्रतिपत्तौ** नियमापूर्वं फलमस्त्येव । ‘ इत्थमेव प्रतिपत्तिः नान्यथा ’ इति नियमः । **वि.** ४।२।७.

* **प्रतिपत्तिकर्मणी** पिष्टलेपफलीकरणहोमौ । **भा.** ८।४।५।२७.

* **प्रतिपत्तिनियमः** गुदस्य दृष्टार्थः अग्नीषोमीये पशौ । **भा.** १२।४।४।८.

* **प्रतिपत्तिविधिः** नियमविधिः द्रव्योद्देश्यक एव । **बाल.** पृ. २३.

* **प्रतिपत्तुः** संवेदनम् । यत्र स्वरूपं परिच्छिद्यते तत् संवेद्यमित्युच्यते, ततः स्वरूपपरिच्छेदः संवेदनमुच्यते । अतः स्वस्य प्रतिपत्तुः संवेदनं प्रत्यक्षमित्युच्यते । स्वरूपग्रहणं हि, प्रत्यक्षं विहाय अन्यदतो नास्ति इति स्वरूपग्रहणं प्रत्यक्षम् । स्वरूपग्रहणं च संवेदनम् । अतः सिद्धं संवेदनं प्रत्यक्षमिति । **ऋजु.** पृ. ६५.

प्रतिपदाधिकरणम् ॥ (२।१।१।१) ।

भाष्यम्–– (संबन्धग्रन्थः) प्रथमेऽध्याये प्रमाणलक्षणं वृत्तम् । तत्र विध्यर्थवादमन्त्रस्मृतयः तत्त्वतो निर्णीताः । गुणविधिर्नामधेयं परीक्षितम् । संदिग्धानामर्थानां वाक्यशेषादर्थाद्वाध्यवसानमुक्तम् । तत्र प्रस्मर्तव्यम् । अनन्तरं प्रधानाप्रधानानि परीक्षिष्यन्ते, भिन्नान्यभिन्नानि चेति । एष एवार्थो वर्णनीयो नान्यः । एष एव चाध्यायसंबन्धः ।

वा–– संबन्धं तावत् लक्षणद्वयस्य करोति । तत्र ‘ प्रथमेऽध्याये प्रमाणलक्षणं वृत्तम् ’ इत्युक्तम् (भाष्ये) । तत् कुतः ? नैव हि प्रथमेऽध्याये सूत्रकारेण किञ्चन लक्षणेन प्रमाणादेः स्वरूपमुपवर्णितम् । तन्नाम लक्षणमुच्यते, येन तद्व्यतिरिक्तेभ्यः तस्य स्वरूपं व्यावृत्ताकारं निरूप्यते । न चेह प्रमाणादीनां लक्षणमुक्तम् । अनुमानादीनि तावत् नैव सूत्रितानि । प्रत्यक्षमपि धर्मं प्रति अनिमित्तत्वेन उपन्यस्तम्, न लक्षणत्वेन इति व्याख्यातम् । न च शब्दोऽपि कश्चित् धर्मप्रमाणभूतो लक्षितः, अस्मिन्नेवाधिकरणे तस्य लक्ष्यमाणत्वात् । यदपि च **वृत्तिकारेण** सर्वेषां लक्षणं प्रदर्शितम्, न तत् अध्यायार्थत्वेन उपसंहर्तुं युक्तम्, सूत्राध्यायार्थानुपसंहारात् (सूत्रारूढः अध्यायार्थः इति शाकपार्थिवादित्वात् मध्यमपदलोपेन समासः । **सुधा.**) । कथं च समस्तलक्षणार्थव्यतिरिक्ते एवार्थे सूत्राणि क्षीयेरन् । अपिच वृत्तिकारेण योऽपि उक्तः (प्रमाण)षट्कः प्रत्यक्षपूर्वकः अपरीक्ष्यतया, सोऽपि नैव लक्षणगोचरः । लोकप्रसिद्धार्थानि हि तानि अपरीक्ष्यत्वेनोक्तानि, न प्रथमाध्यायविषयत्वेन उपसंहारमर्हन्ति । तस्मात् यत् प्रथमाध्याये वृत्तम्, तदालोच्य एतद्भाष्यं नेयम् । तत्र प्रमाणलक्षणं तावत् चोदनालक्षणाश्रयणस्य (श्रयणम् इति युक्तम्) । विध्यादितत्त्वनिर्णीतिः प्रमाणेनैव स्थिता । समस्तो हि प्रथमः पादः चोदनासूत्रपरिकरः । तत्र च धर्मस्य चोदनालक्षणत्वमुक्तम् । अतः अवधारितार्थलक्षणशब्दसाहचर्यात् प्रमाणशब्दः ‘ प्रतिपाद्यते ’ इत्येवं व्युत्पाद्य धर्मविषयः एव व्याख्येयः । सत्यपि प्रमेयमात्रवाचित्वे अस्मिन् शास्त्रे जिज्ञास्यत्वेन धर्मः प्रमेयः प्रक्रान्तः, इति स एव गृह्यते । (पूर्वं प्रमाणशब्दस्य कर्मव्युत्पत्तिरुक्ता–) अथवा करणमेव प्रमाणम्, तस्यैव लक्षणमुक्तम् । यद्यपि च सर्वप्रमाणानां तन्नोक्तम्, तथापि धर्मप्रमाणस्य चोदनात्वं लक्षणं इत्येतावतैव उक्तं मन्यते । न चावश्यं सर्वात्मनैव लक्षिते लक्षणत्वम्, विशेषरूपाणामानन्त्येन सर्वलक्षणाभावप्रसङ्गात् । अपिच औत्पत्तिकसूत्रेण विशेषोऽप्युक्त एव येन आगमविशेषो गम्यते । **अथवा** उपन्यस्तस्य चोदनात्मकस्य प्रमाणस्य लक्षणं प्रामाण्यकारणमित्युपसंहारः । तथा यद्यपि ‘ विधेरिदं रूपम्, इदमर्थवादस्य, इदं मन्त्रस्य ’ इत्येवं नोक्तम्, तथापि धर्मं प्रति उपयोगाभिधानात् तत्त्वं निर्णीतम् । अवसराभावात्तु तत्स्वरूपं न निर्दिष्टम् । श्रुतिमूलत्वं विज्ञानस्य स्मृतिप्रामाण्ये तत्त्वम्, नामधेयस्य चोदनान्तर्गतत्वात् प्रमाणत्वम्, संदिग्धार्थनिर्णये वाक्यशेषसामर्थ्ययोः प्रामाण्यं इत्येवं समस्तमध्यायं प्रमाणलक्षणमाचक्षते । ‘ तत्र प्रस्मर्तव्यम् ’ इति (भाष्यम्) अविस्मृतप्रामाण्यो हि भेदादिप्रतिपादनम् ‘ अविशेषादनर्थकं हि स्यात् ’ (२।२।२) इति क्रियमाणं सहते । अन्यथा हि ‘ अनर्थकं नाम ’ इत्येव प्रत्यवतिष्ठेत । **ननु** प्रधानाप्रधानचिन्ता तृतीयचतुर्थयोर्विषयः कथमत्रोपन्यस्यते ? (अत्र) **केचिदाहुः**– ‘ इह द्रव्यकर्मणोः, उत्तरत्र तु कर्मणामेव गुणप्रधानत्वविचारात् अपौनरुक्त्यम् ’ इति । **तदयुक्तम्** । ‘ द्रव्यगुणसंस्कारेषु ’ इत्यत्र सर्वाभिधानात् । तेन एवं वाच्यम्– ‘ **लक्षणार्थोऽत्र तत्त्वेन भेदः शब्देतरादिभिः । तमन्वपूर्वभेदोऽपि प्राधान्यं तत्प्रसिद्धये ॥** ’ (अतः प्राधान्यं विचार्यमाणं नासंगतमिति भावः) । कर्मभेदस्तावत् औत्सर्गिको लक्षणार्थः, तदपवादत्वेन अभेदः, तदनुनिष्पादिनौ तु अपूर्वभेदाभेदौ । तत्र प्रतिकर्मभेदं अपूर्वभेदप्रसक्तौ तृतीयसिद्धः प्रधानाप्रधानविचारः पुनरपवादत्वेन आरप्स्यते । सत्यपि अवहन्त्यादीनां शब्दान्तरादिभिर्भेदे कर्माकाङ्क्षितदृष्टप्रयोजनपर्यवसानात् न क्रियाजन्यापूर्वान्तरोत्पत्तिः । यत्तु

नियमापूर्वम्, तत् क्रियाकृतं न भवति इति न तया व्यपदिश्यते। तेन यत्रैव द्रव्यादीनि प्रति क्रियाणां प्रधानत्वम्, तत्रैव तद्भेदनिमित्तापूर्वभेदसिद्धिः। अस्य च विवेकार्थं यत् गुणप्रधानलक्षणं वक्ष्यते, तदपवादार्थम् 'धर्ममात्रे तु' 'स्तुतशस्त्रयोः' इति चाधिकरणद्वयं प्रस्तोष्यते। ततश्च आख्यातद्वैविध्ये विचारिते प्रसङ्गात् तृतीयं प्रकारं अभिधायकत्वं प्रतिपादयितुं मन्त्रप्रस्तावः। तल्लक्षणादीनि तु प्रसक्तानुप्रसक्तेन यावत्पादसमाप्ति। ततः शब्दान्तराभ्यासाभ्यां भेदमुक्त्वा पौर्णमास्यधिकरणेन अभ्यासापवादः करिष्यते, समुदायानुवादत्वात्। ततः तदपवादार्थं उपांशुयाजाघाराग्निहोत्रपशुसोमाधिकरणानि। ततः संख्यासंज्ञागुणैर्भेदः। तावच्च गुणगतो विचारो यावत्प्रकरणान्तराधिकरणम्। ततः तन्न्यायानुवृत्तिः आग्नेयान्तराधिकरणात्। तत्र च षट्कातिरिक्तभेदकारणव्युदासः, संज्ञाऽभ्यासगुणप्रक्रियाणां च आशङ्कानिवृत्तिः इत्येतावान् भेदलक्षणार्थः। एष एव चार्थः अवश्यं वक्तव्यः अङ्गाङ्गित्वाद्यवधारणार्थम्। न च अन्यस्य इदानीमवसरोऽस्ति इत्ययमेवाध्यायसंबन्धः। कुतः? **'शेषशेष्यादयः सर्वे कर्मभेदनिबन्धनाः। कार्ये ज्ञातेऽधिकारः स्यादुपदेशेऽतिदेशधीः॥'** प्राक् तावत् प्रमाणलक्षणात वेदार्थविचारात्मकत्वान्न कस्य चिद्भेदलक्षणादेः प्रस्तावः, इत्युत्तरकालमारम्भः। तत्रापि शेषशेषित्वं प्रयोजकाप्रयोजकत्वं क्रमश्च भिन्नानां भवतीति न भेदलक्षणात् प्रागारभ्यते। तथा अधिकारः कर्मस्वरूपेऽवधारिते तद्योग्यतया शक्यो निरूपयितुमिति पश्चापि लक्षणानि प्रतीक्षते। तथोत्तरः षट्कोऽतिदेशविषयत्वादुपदेशज्ञानाधीनसिद्धिः समस्तः समस्तं पूर्वषट्कमपेक्षते। ततश्च परिशेषसिद्धोऽयं भेदलक्षणस्य संबन्ध इत्यत्राऽऽरभ्यते।

(द्वितीयाध्यायतात्पर्यम्–)

भाष्यम्— तदिह षड्विधः कर्मभेदो वक्ष्यते, शब्दान्तरम्, अभ्यासः, संख्या, गुणः, प्रक्रिया, नामधेयमिति। वक्ष्यमाणमनुसंकीर्त्यते, प्रदर्शितमुच्यमानं सुखं ग्राहयिष्यते इति, श्रोतुश्च बुद्धिः समाधीयते। तदेतन्नानाकर्मलक्षणमित्यध्यायमाचक्षते, एतत् तात्पर्येण अतोऽन्यदुपोद्घातप्रसक्तानुप्रसक्तं चेति।

वा— 'षड्विधः कर्मभेदः' इति साधनभेदोपचारात्। वक्ष्यमाणसूत्रक्रमानुरोधान्नामधेयं संख्यानन्तरं पठितव्यं सत् अनादरादन्ते पठितम्। इतिकरणो हेत्वर्थः। षड्विधः कर्मभेदः एतैः कारणैरिति यावत्। अथवा करणे भेदशब्दं व्युत्पाद्य सामानाधिकरण्येनैव शब्दान्तरादीनि व्याख्येयानि। संज्ञाशब्दान्तरयोः संख्यागुणयोश्च अपौनरुक्त्यं स्वस्थाने वक्ष्यामः। सर्वदा चैषां भिन्नविषयत्वान्न श्रुत्यादिवद् बलाबलचिन्ता भविष्यतीति तद्भेदप्रतिपादनमात्रं तात्पर्येण। अन्यदुपोद्घातप्रसक्तानुप्रसक्त्यादिना। तत्र **'चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं प्रचक्षते। प्रसक्तानुप्रसक्तादि प्रस्तुतादुपजायते॥'** यथा इदमेवाधिकरणं प्रकृतानुनिष्पाद्यपूर्वभेदानुसारसिद्ध्यर्थं उपोद्घातत्वेन भविष्यति। (अनुसरति इति कर्तरि घञं व्युत्पाद्य प्रकृतौ यः अनुनिष्पाद्यपूर्वकः भेदानुसारी कर्मभेदः, तत्सिद्ध्यर्थमिति योज्यम्)। कतरस्मात् पदात् फलेन संबध्यमानात् अपूर्वभेदाभेदौ अनुगन्तव्यौ इति। (अनेन च 'नामार्थस्य फलभावनाकरणत्वं धात्वर्थस्य वा' इत्यधिकरणार्थः सूचितः)।

भाष्यम्— (प्रतिपदाधिकरणम्) तत्र प्रथमं तावदिदं चिन्त्यते। प्रथमेऽध्याये इदमुक्तम् 'चोदनालक्षणोऽर्थो धर्मः' इति। चोदना च क्रियाया अभिधायकं वाक्यम्। वाक्ये च पदानामर्थाः। तत्र किं पदेनपदेन धर्मः, उत सर्वैरेक एवेति। किं तावत् प्राप्तम्? प्रतिपदं धर्म इति। **एवं प्राप्ते, उच्यते।** यदा एकस्मादपूर्वम्, तदा अन्यत् तदर्थं भविष्यति, एवमल्पीयसी अदृष्टानुमानप्रसङ्गकल्पना भविष्यति। तस्मादेकमपूर्वम्।

वा— यदा निरवयवौ वाक्यवाक्यार्थौ स्याताम्, 'ततः किं प्रतिपदं धर्मः' इत्यादिः असंबद्ध एव विचारः स्यात्। अत आह–(भाष्यं) 'वाक्ये च पदानामर्थाः' इति। अत्रापि चोद्यते। **'चोदनालक्षणत्वेन वाक्यार्थोऽवस्थितो यदा। धर्मः प्रतिपदं वाच्यः कथमाशङ्क्यते तदा॥'** यदि हि धर्मस्वरूपमभिधीयेत, ततः 'किं पदेनपदेन' उच्यते इति विचारो युज्यते, लाक्षणिके त्वयुक्तः। तदुच्यते

'धर्मत्वं फलसंबन्धात् पदार्थस्यैव युज्यते। तत्किमेकस्य सर्वेषामिति युक्ता विचारणा॥' न चात्र यो धर्मः स किं पदेनपदेनोच्यते इत्येवं विचार्यते। किं तर्हि? यः पदेनपदेनोच्यते, स किं फलसंबन्धोत्तरकालं वाक्यार्थात्मना गम्यमानो धर्मो भवति, अथेतरपदार्थानुगृहीतः एकः पदार्थ इति। तथा च सर्वैरेकस्य धर्मत्वं प्रतिपादितं भवति। साक्षात् फलसाधनमात्रस्य धर्मत्वाभ्युपगमात्। न तु सर्वेषामेकः कश्चिदर्थोऽस्ति, यः सर्वैरेक इत्येवमाश्रीयेत। यच्च फलपदेन सह संबध्यते तस्यार्थं धर्ममपूर्वसाधनं च मन्यन्ते। तेन किं सर्वाणि पदानि फलेन संबध्यन्ते किंवा एकमिति विचारः। किं प्राप्तम्? प्रतिपदमिति। कुतः? **'ऐकरूप्येण संबन्धः प्रधानेन च सिध्यति। तस्मात् फलपदेनैव सर्वं संबध्यते पदम्॥'** यदि हि विशेषो गम्येत 'इदं फलसंबन्धयोग्यं इदं न' इति, ततः किञ्चिदेव संबध्येत। अनवगम्यमाने तु सर्वाणि पदानि फलेनैव संबध्यन्ते। यदि च एकं फलसंबन्धि इतराणि च तत्संबन्धीनि इति कल्प्यते ततो वाजपेयाधिकरणन्यायेन एकस्य फलं प्रति उपादानविधानगुणभावात् इतरस्तु प्रत्युद्देशानुवादप्राधान्यात् वैरूप्यनिमित्तवाक्यभेदप्रसङ्गः। सर्वेषां तु फलं प्रति उपादीयमानानां ऐकरूप्यात् तन्त्रसंबन्धोपपत्तिः। सर्वश्च सति संभवे गुणमतिलङ्घ्य प्रधानेनैव नित्यं संबध्यते। तस्मात् सर्वेषां फलसंबन्धात् धर्मत्वम्। तत्र तु किं सत्रिवत् प्रत्येकं कृत्स्नं फलं साधयन्ति, अथ दर्शपूर्णमासवत्संहत्य। तथा किं विकल्पेन समुच्चयेन वा इत्यादि यथेष्टं कल्पनीयम्। तत्र फलभूमगरीयस्त्वात् एकशब्दोपादानाभावात् सत्रिवत् प्रत्येकं साधनशक्त्यवगमात् सर्वेभ्यः पृथक् फलमिति पक्षः। अथवा अरुणाऽऽदिन्यायेन एकवाक्योपादानात् संहतानां फलम्। अथवा एकनिराकाङ्क्षत्वात् न तदानीमेव इतरसंबन्धोपपत्तिः, तस्मात् विकल्प इति। **अत्राभिधीयते 'फलेन यस्य संबन्धस्ततोऽपूर्वं प्रकल्प्यते। तदल्पत्वोपपत्तौ च न युक्ता बहुकल्पना॥'** यदि हि फलसंबन्धमात्रपर्यवसायि एव वाक्यं भवेत्, ततः कदाचिदपि सर्वाणि फलेन संबध्येरन्। इह तु तावन्मात्रेण असिद्धेः अपूर्वमन्यत् कल्पयितव्यम्। तच्च अनुपपत्तिप्रमाणकम्। तत्र एकापूर्वकल्पनया उपपन्ने नादृष्टान्तरकल्पनाप्रमाणमस्ति। यो हि अनेकानि अपूर्वाणि कल्पयति, कल्पयत्यसौ एकम्। तच्चेत् कल्पितम्, अर्थवत्त्वाद् वाक्यस्य क्षीणा अन्यथाऽनुपपत्तिः नापूर्वान्तरस्य प्रमाणं भवति। तस्मादेकमेव फलसंबन्धि, तस्माच्च अपूर्वं इतरत् फलवदुपकारि इत्यध्यवसीयते। न चात्र विरोधो भविष्यति, नामधेयत्वेन परिहारात्, अगत्या वा 'दशापवित्रेण ग्रहं संमार्ष्टि' इतिवत् मत्वर्थलक्षणाऽऽश्रयणात् अर्थाक्षिप्तसाध्यांशद्वारेण वा धात्वर्थः आत्मीयकरणग्रहणसिद्धेः।

एवं स्थिते कतरदेकं संबध्यतामिति सर्वथा अनेकादृष्टकल्पनापरिहारात् अनियमप्राप्तौ उच्यते **'प्रधानं फलसंबन्धि तत्संबन्ध्यङ्गमिष्यते। प्रधानाङ्गत्वमेकस्य न चैकत्रावकल्पते॥'** नहि एकस्मिन् वाक्ये तदेव कदाचित् फलसंबन्धात् प्रधानम्, कदाचित् फलवदुपकारात् अङ्गं युज्यते, नियतरूपत्वादङ्गाङ्गिभावस्य। तस्मात् नियोगेनैव आख्यातपदात् नामपदाद्वा अपूर्वप्रतीतिः।

शा— यावत्किञ्चित् अदृष्टार्थं विधानं क्रत्वर्थं पुरुषार्थं काम्यं नैमित्तिकं वा द्रव्योपपदं वा नामोपपदं वा गुणोपपदं वा, तत् सर्वमुदाहरणम्। (प्राभाकरमतमुपन्यस्य निरस्यति–) **केचित्तु** अधिकारचोदना एवोदाहरन्ति। तासु च सर्वासु विरुद्धत्रिकद्वयापत्त्या नामैवोपपदम्। अतो नामोपपदान्येवोदाहरणं इत्याहुः। **तदयुक्तम्।** तथाहि, यद्यपि तावदधिकारचोदना एवोदाहरणम्, तथापि तासु सर्वासु न नामैवोपपदम्। यदेव हि यौगिक–वाक्यभेद–तत्प्रख्य–तद्व्यपदेशयुक्तम्, तदेव नामधेयम्, इतरत्तु अधिकारावगतमपि गुणार्थमेव। यथा 'यः कामयेत वीरो म आजायेतेति स चतुर्होतारं जुहुयात्' इति चतुर्होतृशब्दो मन्त्रवचनः, न नामधेयम्। तथा 'यद्येनमार्त्विज्यात् वृतं सन्तं निर्हरेरन् आग्नीध्रे जुहुयात् दशहोतारं चतुर्गृहीतेनाज्येन' इति नैमित्तिकाधिकारगतं आज्यपदं न नामधेयम्। न च विरुद्धत्रिकद्वयापत्तिः, मत्वर्थलक्षणया विशिष्टविधिसंभवात्। वरं च मत्वर्थलक्षणा अप्रसिद्धार्थकल्पनातः, इतरथा हि 'सोमेन

यजेत ' इत्यपि सोमपदं नामधेयं स्यात् । उत्पत्तिवाक्येऽपि गुणपक्षे लक्षणा अस्ति इति अभ्यासाधिकरणे (२।२।२) स्वयमेव निबन्धनकारेण उक्तम् ' यागविधानेन ' इत्यादिना । युक्तं नैतत् । यद्यपि प्रथमं अपूर्वान्तरं अप्रतिपन्नं तथापि प्रत्ययेन तावत् तदेवाभिधीयते । तत्करणं च यागः इति दोषसाम्यात् नामत्वं स्यात्, न चैवं युक्तम् । किंच ' सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकामः ' ' वायव्यं श्वेतमालभेत ' इत्यधिकारचोदनेयम् । अत्र ' चरुं, श्वेतं ' इति द्रव्यगुणशब्दौ, सौर्यादिपदं भावार्थं नियोगविषयः इति निबन्धनकारः शब्दानुबन्धवादी मन्यते । तेन तदपि अत्रोदाहरणम् , भावार्थयुक्ताधिकारचोदनात्वाच्च । तथा ' हिरण्यं भार्यं ' इति अक्रत्वर्थत्वात् । विश्वजिदादिवत् अत्रोदाहरणम् । चरु–श्वेत– हिरण्य–सौर्यशब्दाः द्रव्यगुणदेवतावचनाः न नामधेयम् । अतो नामोपपदान्येव उदाहरणमित्ययुक्तमेतत् , भाष्यविरुद्धं च । भाष्यकारो हि भावार्थाधिकरणस्य प्रयोजनमभिदधानः सिद्धान्ते श्रुतद्रव्यापचारे प्रतिनिध्युपादानं प्रयोजनमाह । नामधेयत्वे हि कस्य प्रतिनिधिः स्यात् ? न चावश्यं अधिकारचोदना एवोदाहरणम्, ' सोमेन यजेत ' ' हिरण्यं ददाति ' इत्यादिष्वपि कुतोऽपूर्वमिति विचारसंभवात् । यद्यपि तेषु प्रधानापूर्वानुवादशङ्कया न प्रथमं अपूर्वान्तरं प्रतीयते , तथापि पश्चादपि तावत् प्रतीयमानं किंविषयं प्रत्येतुं न्याय्यं इति संभवति चिन्ता । ननु तत् पश्चात् कारकविशिष्टस्य कर्मणो ग्राहकगृहीतस्य अवान्तरव्यापारत्वेन कल्प्यमानं भावार्थविषयत्वेनैव निर्णीतमिति न विचारावसरः । स्यादेवम् , यदि कर्मैव ग्राहकेण गृह्यते इति प्रागस्मात् अधिकरणात् सिद्धं स्यात्, न तु तत् सिद्धम् ।

अत्रैव हि एतद्विचार्यते किं सर्वाणि पदानि क्रियाकारकसंबन्धानादरेण अपूर्वस्य विषयीभवन्ति, उत क्रियाकारकसंबन्धापरित्यागेन इतरपदविशेषितमेकमेव पदम् । यदाऽप्येकं तदाऽपि द्रव्यादिपदं भावार्थविशेषितम् , विपरीतं वेति । तत्र क्रियाकारकसंबन्धावगमात् प्रागपि, तत्रापि द्रव्यगुणयोः भावार्थकारकत्वेन श्रवणात् अन्योत्पादकस्वभावत्वाच्च भावार्थादेवापूर्वमिति । स्थिते चास्मिन् क्रियाकारकसंबन्धापरित्यागन्याये ग्राहकग्रहणमपि भावार्थस्यैव भवति, तस्य अन्योत्पादकस्वभावत्वात् कारकत्वाच्च द्रव्यगुणयोः । अतश्चापूर्वमपि तत एव स्यात् । असति तु अस्मिन् न्याये हिरण्यं ददातिश्च मिथः संबन्धानादरेण ग्राहकेण गृह्येयाताम् , दानोपसर्जनं वा हिरण्यम् । ततश्च अपूर्वमपि पश्चात् कल्प्यमानं उभयविषयं हिरण्यविषयं वा स्यात् । तस्मात् तत्रापि भावार्थविषयत्वमपूर्वस्य एतदधिकरणाधीनम्, इति युक्तमुदाहरणत्वम् । तस्मात् अदृष्टार्थं सर्वमत्रोदाहरणम् ।

वि— ' विधिवाक्ये पदैः सर्वैरपूर्वं प्रतिपाद्यते । प्रत्येकमथवैकेन, सर्वैस्तत्प्रतिपादनम् ॥, फलान्वयित्वात् सर्वेषां प्रधानान्वयलाभतः । लाघवादेकबोध्यत्वं तच्छेषस्तु पदान्तरम् ॥ ' तस्मादेकमेव पदमपूर्वप्रतिपादकम् ।

भाट्ट— एवं धर्माधर्मप्रमाणेषु निरूपितेषु अधुना तत्स्वरूपं निरूप्यते । **यद्यपि** च तदपि एतावत्प्रमाणप्रतिपाद्यत्वेन रूपेण बुद्धमेव **तथापि** एकत्वानेकत्वादिरूपेण अबुद्धत्वात् इह तेन रूपेण निरूप्यते । अत्र च शब्दान्तरादिषट्प्रमाणकभावनाभेद एवाध्यायार्थः । धात्वर्थभेदस्तु तत्सिद्ध्यर्थः क्वाचित्को निरूप्यते, अपूर्वभेदोऽपि फलत्वेन इति न तौ अध्यायार्थौ ।

फलीभूतापूर्वभेदोऽपि अपूर्वसाधनभेदाधीनः इति तत्साधनजिज्ञासायां स्वर्गादिसाधनस्यैवावान्तरव्यापाररूपापूर्वं प्रति साधनत्वात् स्वर्गादिफलं प्रति किं धात्वर्थस्य करणत्वम् , उत उपपदार्थस्य सोमादेरपीति चिन्तायाम् , प्राथमिकभावनान्वयस्य तावत् सिद्धान्तिनोऽपि संमतत्वात् औत्तरकालिकः फलान्वयोऽपि सर्वेषामेव । इति प्राप्ते, सर्वेषां करणत्वे अनेकादृष्टकल्पनाप्रसङ्गात् एकस्यैव फलनिरूपिता करणता, अन्येषां तु दृष्टविधयैव करणार्थत्वम् । तदत्र धात्वर्थस्यैव फलकरणत्वे सोमादीनां तज्जनकत्वेनैव दृष्टार्थता । सोमादीनां करणत्वे च धात्वर्थस्याश्रयविधयैव दृष्टार्थतेति नानेकादृष्टकल्पना ।

मण्डन— ' एकः पदार्थो जनयत्यपूर्वम् । '

शंकर— ' धर्मः प्रतिपदं न तु । '

प्रतिपदाधिकरणम् । (२।१।१) । प्रथमेऽध्याये प्रमाणलक्षणं वृत्तम् । तत्र विध्यर्थवादमन्त्रस्मृतय-

स्तत्त्वतो निर्णीताः । गुणविधिर्नामधेयं च परीक्षितम् । तत्र संदिग्धानामर्थानां वाक्यशेषादर्थाध्यवसानमुक्तम् । तत्र प्रस्मर्तव्यम् । अनन्तरं च प्रधानाप्रधानानि परीक्षिष्यन्ते भिन्नान्यभिन्नानि वेति । एष एवार्थो वर्णनीयो नान्यः । एष एवाध्यायसंबन्धः । तदिह षड्विधः कर्मभेदो वक्ष्यते शब्दान्तरम् , अभ्यासः , संख्या, गुणः , प्रक्रिया, नामधेयमिति वक्ष्यमाणमनुकीर्त्यते, प्रदर्शितमुच्यमानं सुखं ग्राहयिष्यते, श्रोतुश्च बुद्धिः समाधीयते । तदेतन्नानाकर्मलक्षणमित्यध्यायमाचक्षते । अतोऽन्यदुपोद्घातप्रसक्तानुप्रसक्तं च ।

प्रथमं तावदिदं चिन्त्यते, प्रथमेऽध्याये इदमुक्तम् ' चोदनालक्षणोऽर्थो धर्मः ' इति । चोदना च क्रियाया अभिधायकं वाक्यम् । वाक्ये च पदानामर्थः । तत्र किं पदेनपदेन धर्म उच्यते ? उत सर्वैरेकः इति । अत्र भाष्यकारेण 'प्रथमेऽध्याये प्रमाणलक्षणं वृत्तम्' इति सप्रपञ्चमभिधाय 'अनन्तरं प्रधानाप्रधानानि परीक्षिष्यन्ते, भिन्नान्यभिन्नानि वा' इत्यनेन प्रथमद्वितीययोरध्याययोर्हेतुहेतुमद्भावरूपः संबन्धो दर्शितः । तत्र यद्यपि कृत्स्नवेदार्थविचारस्यैव प्रमाणलक्षणाधीनत्वम् , तथापि कर्मभेदलक्षणापेक्षत्वादन्येषां कर्मभेदलक्षणस्य प्रमाणलक्षणमात्रापेक्षत्वादिदमेवानन्तरमारब्धव्यम् । तथा च भाष्यम् ' एष एवार्थो वर्णनीयो नान्यः ' इति । तदुक्तम् '**शेषशेष्यादयः सर्वे कर्मभेदनिबन्धनाः । कार्ये ज्ञातेऽधिकारः स्यादुपदेशेऽतिदेशधीः ॥** ' (वा. पृ. ३७१) इति । अत्र चापूर्वभेदानुबन्धी कर्मभेदोऽध्यायार्थः । धात्वर्थावच्छिन्ना च भावना कर्मेति लोकप्रसिद्धम् । तद्यदि धात्वर्थात् फलम् , तदा तदवच्छिन्नाया एव भावनाया अपूर्वानुबन्धात्तस्यैव प्रतिपादनमुचितम् । अथ नामार्थात् , तदा धात्वर्थस्यैवापूर्वानुबन्धित्वात् किं कर्मभेदप्रतिपादनेनेति । तदत्र नामार्थस्य फलसाधनत्वनिराकरणेन भावार्थस्यैव फलसाधनत्वं प्रतिपादयितुं उपोद्घातभूतं भावार्थाधिकरणमारब्धव्यम् , यद्युभयसाधनत्वनिरासेन एकस्यैव फलसाधनत्वम् । द्वयोः फलसाधनत्वे कस्मादेकस्मादिति संदेहाभावात् । तदर्थमुपोद्घातभूतं प्रतिपदाधिकरणमेव प्रथममारभ्यते । तत्र ' श्येनेनाभिचरन् यजेत ' ' चित्रया यजेत पशुकामः ' इति श्रुतौ संदेहः किं पदेनपदेन धर्म उच्यते, उत सर्वैरेकः इति । अयमर्थः , किं पदेनपदेनाभिहितस्यार्थस्य फलसंबन्धाविशेषेण धर्मत्वम् ? अथेतरानुगृहीतस्यैकस्यैवेति । तत्रायं पूर्वपक्षिणोऽभिसंधिः ' श्येनेनाभिचरन् यजेत ' इत्यत्र विध्यवरुद्धा भावना अभिचाररूपफलसाधनमपेक्षमाणा वाक्योपात्तं नामार्थं धात्वर्थं चाविशेषादुभयमेव साधनमनुमन्यते । ननु पदश्रुत्या संनिकृष्टस्य धात्वर्थस्यैव फलभावनायाः करणत्वेन प्रथममन्वयावगतेः तदवरुद्धायां च तस्यां विप्रकृष्टस्य नामार्थस्यान्वयासंभवात् कथमविशेषेणोभयोः समन्वय इति । मैवम् , स्यादेवं यदि धात्वर्थस्य करणत्वं श्रुतं भवेत् , किन्तु फलभावनाकाङ्क्षया कल्पनीयं तत् । तेन यद्यपि स्वरूपतः संनिकृष्टो धात्वर्थः, तथापि कल्पनीयकरणभावेन विप्रकृष्टोऽसौ । नामार्थो यद्यपि स्वरूपतो विप्रकृष्टः, तथापि तस्य करणत्वेन श्रुतत्वात् तेन रूपेण तस्य संनिकृष्टत्वमेव । तेन संनिकर्षविप्रकर्षाविशेषात् द्वयोरेव सापेक्षत्वात्फलसाधनत्वम् । न चैवं सति परस्परनिरपेक्षोभयसाधनत्वावगतेर्विभागलक्षणो वाक्यभेद इति वक्तव्यम् । अरुणैकहायनीविशिष्टक्रयभावनाविधानवत् नामार्थधात्वर्थविशिष्टैकफलभावनाविधानेन समुदाये वाक्यपरिसमाप्तेः वाक्यभेदाभावात् । यथा तत्र परस्परापेक्षावशात् द्रव्यस्य गुणाश्रयत्वेन, गुणस्य च द्रव्यावच्छेदकत्वेनान्वयः, तथेहापि नामार्थस्य धात्वर्थाश्रितस्य, धात्वर्थस्य च नामार्थसहितस्य साधनत्वात् परस्परापेक्षायामन्योन्यान्वय इति । न चैवं सत्यनेकादृष्टकल्पनादोषोऽपि, नामार्थधात्वर्थयोर्युगपदेकापूर्वसाधनत्वेन नानेकादृष्टकल्पनाप्रमाणाभावात् । भवतु वानेकादृष्टकल्पना, तथापि ' प्रमाणवन्त्यदृष्टानि कल्प्यन्ते सुबहून्यपि ' इति न्यायादनेकादृष्टकल्पनाऽपि न दोषायेति । अतः अविशेषात् द्वयोरेव नामार्थधात्वर्थयोः फलान्वय इति । तदुक्तम् '**ऐकरूप्येण संबन्धः प्रधानेन च सिध्यति । तस्मात् फलपदेनैव सर्वं संबध्यते पदम् ॥** ' (वा. पृ. ३७३) इति । **एवं प्राप्तेऽभिधीयते** । भवेदेवं यद्यत्र करणयोः समुच्चयः संभवेत् । समानकालभाविनोर्हि

समुच्चयो भवति । न चात्र करणीभावात्तयोर्नामार्थधात्वर्थयोः सहभावः समस्ति । निष्पन्नस्य हि धात्वर्थस्य करणत्वं वक्तव्यम् । नामार्थस्य करणत्वं धात्वर्थनिष्पादकत्वेनैव । तच्च धात्वर्थात् प्रागेव । नहि निष्पन्ने धात्वर्थे धात्वर्थनिष्पादकमस्ति । अथोच्यते । माऽस्य भवतु नामार्थस्य स्वरूपतः साहित्यम्, कार्यतस्तु भविष्यति । तथाहि, यस्मिन्नेव काले नामार्थेन धात्वर्थो जन्यते, तदैव तत्साहित्यमपूर्वान्तरं जनितम्, अतस्तद्द्वारेण साहित्यसद्भावात् युक्तः समुच्चयः । एतच्च शब्दावगतकरणत्वान्यथाऽनुपपत्त्या कल्प्यमानं न दोषमावहतीति । तदयुक्तम् । स्यादेवं यदि द्वयोरेव फलभावनाकरणत्वं श्रौतं भवेत्, किन्तु भावनाकाङ्क्षया तत् कल्पनीयम् । तत्र धात्वर्थस्य संनिकृष्टस्य करणत्वं फलभावनासंबन्धात् कल्पनीयम् । नामार्थस्य च कलृप्तकरणभावस्य विप्रकृष्टस्य फलभावनासंबन्धः कल्पनीयः । कल्प्यमानं तदेव कल्पयितुमुचितम्, यत्र नानेकादृष्टकल्पना भवति । उभयकरणत्वेन समुच्चयसिद्ध्यर्थमवश्यमेवापूर्वान्तरं कल्पनीयमित्युक्तमेव । न चैकस्य करणत्वेऽन्यतरस्य वाक्यान्वयो न संभवति, इतरानुग्राहकत्वेनैवेतरान्वयोपपत्तेः । तेन यदि संनिकर्षलोभेन धात्वर्थः करणम्, तदा नामार्थस्य करणत्वं धात्वर्थगतमेव । अथ श्रौतकरणत्वलोभेन विप्रकृष्टस्यापि नामार्थस्य करणत्वम्, तदा धात्वर्थस्य तद्व्यापारत्वेनैव समन्वयान्न करणत्वमपि कल्पनीयम् । तदुक्तं भाष्ये 'यदैकस्मादपूर्वं तदेतरत्तदर्थम्' इति । न चैवं धात्वर्थस्य फलभावनायाम्, नामार्थस्य च धात्वर्थे विधानाद्वाजपेयोक्तवैरूप्यप्रसङ्गः । अथ तत्परिहारार्थं मत्वर्थलक्षणा आश्रीयते, तदा लक्षणैव दोष इति वरमपूर्वद्वयकल्पनैवेति । उच्यते । स्यादेवमपूर्वसंबन्धानुसारेणैवेयं भवन्ती मत्वर्थलक्षणा यद्यपूर्वकल्पनातो ज्यायसी न भवेत् । तथाहि, उत्पत्तिपूर्वकः खलु विनियोगः । उत्पत्तिश्च न धात्वर्थस्वरूपज्ञानमात्रम्, विनियोगावस्थायामपि धात्वर्थस्वरूपज्ञानाविशेषात्, किन्तु भावनासाध्यतया धात्वर्थस्वरूपज्ञानम् । तत्र यद्यपि उत्पत्तिविधेरपुरुषार्थभूतत्वात् धात्वर्थस्य न स्वावरुद्धा भावना साध्यत्वेन पर्यवस्यति, तथापि अस्यासाधितस्य साधनत्वासंभवात् भाविविनियोगविधिसाध्य–फलभावनाकरणत्वाच्चानुगुणतया भावनासाध्यधात्वर्थस्वरूपप्रतिपत्तिपर एव भवति । तथाभूतेनैव धात्वर्थेन श्येनादिर्नामार्थो विनैव मत्वर्थलक्षणया करणत्वेन संबध्यते । तेनायमर्थो भवति 'श्येनेन यागं कुर्यादित्येवम्' इति । एवं सति विनियोगदशायां गृहीतश्येनादिकारकस्यैव यागादेः धात्वर्थस्य करणत्वात् करणस्य करणान्तरान्वयासंभवात् पूर्वप्रतीतसंबन्धानुरोधेन मत्वर्थलक्षणा न दोषमावहति । तस्मादपूर्वकल्पनालाघवेन एकस्मादेव श्येनवतो यागात् यागवतो वा श्येनादपूर्वमिति सिद्धम् । तदुक्तम् '**फलेन यस्य संबन्धः ततोऽपूर्वं प्रकल्प्यते । तद्रूपत्वोपपत्तौ तु न युक्ता बहुकल्पना ॥**' (वा. पृ. ३७३) इति । **तौता.**

* भावार्थाधिकरणप्रवृत्तेः एकस्मादपूर्वं इति निर्णयाधीनत्वात् तदुपोद्घातत्वेन **प्रतिपदाधिकरण**मारभ्यते । **कु.** २।१।१।१ पृ. १२१. * **प्रतिपदाधिकरणस्य** 'तानि द्वैधम्' २।१।३।६ अपवादः । **कौ.** २।१।१।१ पृ. २. * प्रतिपदाधिकरणस्य सिद्धान्तः (न्यायस्वरूपमेव इदम्) 'क्रियाकारकसंबन्धावगमानुसारेण एकस्मादेव अपूर्वम्, न तु सर्वेभ्यः' इति । **सोम.** २।१।१ पृ. ९७. * **प्रतिपदाधिकरणे** 'एकस्मादपूर्वम्' इति सिद्धम् । **कु.** २।१।१।१.

* **प्रतिपदाधिकरणोक्तस्य** अनेकादृष्टकल्पनाप्रसङ्गस्यानिवारणात् न सोमादेः फलसंबन्धः ('सोमेन यजेत' इत्यादौ) । **कौ.** २।१।३ पृ. ८.

* अन्यान्विते शक्तिः इत्यत्र **प्रतिपदाधिकरणगतं** भाष्यं प्रमाणयति... । **शास्त्रप्रकाशिका** (बृहदारण्यकभाष्यवार्तिकटीका) संबन्ध. ६११.

* **प्रतिपदाधिकरणन्यायस्य** स्वरूपम् 'अपूर्वस्यादृष्टत्वात् एककल्पनयैव उपपन्ने वाक्ये नानेककल्पनं उपपत्तिमत्' इति । **शा.** २।१।१ पृ. ९८.

* तत्र हि तत् नियामकम्, यत्र तत्प्रवृत्तेः पूर्वं विकल्पेन अनेकेषु प्राप्तिः, यथा **प्रतिपदाधिकरणसिद्धान्तरीत्या** यागसोमयोः । **कौ.** २।१।१७।४९ वर्णकं २ पृ. १३४.

* **प्रतिपशुयूपदर्शनात्** लिङ्गात् पशुगणेषु ऐकादशिनविध्यन्तः । ८।१।८।१५.

✠ **प्रतिपाद्यप्रयोजकत्वायोगरूपन्यायेन** प्रतिपत्तीनां प्रतिपाद्योत्पत्तिप्रयोजकत्वाभावः सिध्यति । **बाल.** पृ. १०९.

* **प्रतिपूरणं** ध्रुवायाः । न ह्येतत् प्रतिपूरणं पूर्वस्यावदानस्य संस्कारकम्, अदृष्टार्थत्वप्रसङ्गात् । अरेकस्तु उत्तरकार्यार्थः प्रत्यक्षः । **वा.** ३।५।१।१२.

* **प्रतिप्रधानमङ्गावृत्तिः** इति लोकसिद्धो **न्यायः** 'प्रतिप्रधानभावः' ११।१।१।४ इति पदेन दर्शितः । **वृ.** ११।१।१।४. * प्रतिप्रधानमङ्गावृत्तिर्न्याय्या । **सु.** पृ. ११९८. * 'यज्ञस्य संततिरसि... त्वा यज्ञस्य' इति गार्हपत्यात् संततामुलपराजीं स्तृणाति आ आहवनीयात्, तूष्णीं दक्षिणां तूष्णीमुत्तराम् । **सत्याषाढश्रौ.** १।४।२२ । त्रीण्येतानि प्रधानकर्माण्येव । ततस्तु '**प्रतिप्रधानमङ्गावृत्तिः**' इति मन्त्रावृत्तौ प्राप्तायाम् 'तूष्णीम्' इति पाठप्रदर्शनं आवृत्तिनिवारणार्थम् । **वैजयन्ती.** * शेषात् स्विष्टकृतेऽवद्यति । यदि शेषकार्याणां हविः प्रधानं स्यात्, तदा प्रतिप्रधानं इति न्यायप्राप्तिः, तदेव न शेषकार्यं प्रति अङ्गत्वात् हविषः इति चेन्न, हविषः प्रधानत्वेन संस्काररूपकारणस्य अविशेषात् सर्वेभ्यः अवदानं प्रतिप्रधानमङ्गावृत्तिः **इति न्यायात्** । **कस्तूरि.** ३।४।१९।४८–५१. * न च कश्चन विरोधः, यत् इन्द्रमुपतिष्ठेत अनेन मन्त्रेण ('कदा चन स्तरीरसि') गार्हपत्यमपि । ननु अयमेव विरोधः सकृदुपस्थानं चोदितम्, असकृदभिनिर्वर्त्यते इति । उपस्थेयभेदात् **प्रतिप्रधानमावर्तन्ते गुणाः** इति **न्याय** एवैषः, न विरोधः । (पूर्वपक्षे) । **भा.** ३।३।७।१४ पृ. ८४४. * इन्द्रगार्हपत्ययोः प्रधानत्वाविशेषात् उपस्थानस्य च गुणत्वात् '**प्रतिप्रधानं गुणः**' **इति न्यायेन** उपस्थानावृत्त्या श्रुतिलिङ्गयोः समुच्चयः इति द्वितीयः पूर्वपक्षः । **वि.** ३।३।७.

✠ **प्रतिप्रधानं गुण आवर्तनीय इति न्यायः । साहस्री.** ८६८.

* ग्रहमिति द्वितीयया ग्रहस्योद्देश्यतया प्रयोजनवत्तया च प्राधान्यं गम्यते । ग्रहं प्रति गुणः संमार्गः । '**प्रतिप्रधानं गुण आवर्तनीयः**' इति न्यायेन यावन्तो ग्रहाः सन्ति ते संमार्जनीयाः । **वि.** ३।१।७. * **प्रतिप्रधानं गुणो भिद्यते**, न च प्रधानं प्रतिगुणं भिद्यते । **भा.** ३।१।६।१२ पृ. ६९७. * चोदकप्राप्तेषु पञ्चसु प्रयाजेषु एकैकस्य एकादशत्वसंख्या युक्ता, प्रयाजानुद्दिश्य संख्यागुणे विहिते सति '**प्रतिप्रधानं गुणस्याभ्युपेयत्वात्**' । इति प्राप्ते । **वि.** ५।३।१. * **प्रतिप्रधानं गुणावृत्तिः** । 'प्रधानसंनिधौ च गुणः शिष्यमाणः प्रतिप्रधानं भिद्येत' । **भा.** १०।३।११।३९. * न च (वैश्वदेवस्य अन्नसंस्कारकत्वे) '**प्रतिप्रधानं गुणावृत्तिः**' इति **न्यायात्** प्रतिपाकं तदावृत्तिः स्यात् इति वाच्यम् । **आचारमयूखः** पृ. ५१. * संस्कार्यत्वात् ऋत्विजां प्राधान्ये सति **प्रतिप्रधानं गुणावृत्त्या** सर्वेषामपि ऋत्विजां हिरण्यमालित्वादिसंस्कारः अभ्युपेतव्यः । वाजपेये । **वि.** ३।८।५. * इन्द्रस्य, चयने तदङ्गभूतेन्द्रदेवत्ये अविहितमन्त्रके होमे च इति समुच्चयेनैव उभयाङ्गत्वम्, **प्रतिप्रधानं गुणावृत्ते**र्युक्तत्वेन विकल्पस्याप्रसक्तत्वात् । पूर्वपक्षे । **कौ.** ३।३।७।१४ पृ. ३५०. * ऋचां प्रधानत्वात् प्रतिप्रधानं गुणावृत्तेर्न्याय्यत्वात् साम प्रत्यृचं परिसमापनीयं इति सिद्धम् । **भाट्ट.** ९।२।३. * 'युवा सुवासाः' इति हौत्रो मन्त्रः ऐकादशिन्यां एकादशवारं प्रयोक्तव्यः 'प्रतिप्रधानं गुणावृत्तेः' इति प्राप्ते, क्रियमाणानुवादिमन्त्रस्य अदृष्टार्थत्वेन तन्त्रतैव । न्यायस्तु 'परिवीरसि' इति आध्वर्यवमन्त्रपरः तस्य करणत्वात् । **संकर्ष.** १।४।१५. * **प्रतिप्रधानं गुणावृत्तिन्यायः ।** 'शेषस्य हि परार्थत्वादविधानात् प्रतिप्रधानभावः स्यात्' । ११।१।१।४ **सूत्रम्.** * एकादशत्वादिसंख्या **प्रतिप्रधानं गुणावृत्तिन्यायेन** पृषदाज्यादिवत् एकैकस्मिन् प्रयाजादौ प्रत्येकमभिसंबध्येत इति एकैकः एकादशवारमावर्तनीयः । इति प्राप्ते । **भाट्ट.** ५।३।१, * दर्शपूर्णमासयोः अवघातमन्त्रः प्रतिप्रहारं आवर्तते नवेति

चिन्तायां सोमादिवत् प्रथमतो भावनाऽन्वितस्यापि मन्त्रस्य अवघाताङ्गत्वानपायात् प्रतिप्रधानं गुणावृत्तिन्यायेन तदावृत्तौ आवृत्तिः, इति पूर्वपक्षः । ११।४।१२. * न चैवमपि द्वितीयया मुष्टीनां प्राधान्यात् प्रतिप्रधानं गुणावृत्तिन्यायेन चतुर्षु मुष्टिषु चत्वारो निर्वापा विहिताः संपन्ना इति मुष्ट्यनुसमय एवेति वाच्यम् । **सोम.** ५।२।२. * 'ममाग्ने वर्च इति पूर्वमग्निं परिगृह्णाति' । न च पूर्वपदस्य अग्निपदसामानाधिकरण्येनाहवनीयपरत्वात् प्रतिप्रधानं गुणावृत्तिन्यायेन प्रतिधारणं मन्त्रावृत्तिः, बोधायनेन अस्य गार्हपत्यान्वाधाने विनियुक्ततया पूर्वपदस्य क्रियाविशेषणत्वमङ्गीकृत्य प्रथमान्वाधानविधिपरत्वात् । **भाट्ट.** १२।१।१०, * 'मैत्रावरुणः प्रेष्यति चान्वाह च' अत्र मैत्रावरुणः प्रैषानुवचनोद्देशेन विधीयमानः सर्वत्र (केवलप्रैषेषु केवलानुवचनेषु प्रैषसहितानुवचनेषु च) स्यात् न तु प्रैषानुवचनेष्वेव उद्देश्यविशेषणस्य साहित्यस्याविवक्षितत्वात् । चशब्दस्यापि प्रैषानुवचनरूपधर्मयोः ऐकाधिकरण्यरूपधर्मिसाहित्यपरत्वेन प्रैषत्वानुवचनत्वरूपधर्मयोः ऐकाधिकरण्यरूपसाहित्यबोधकत्वाभावात्, तस्य च प्रतिप्रधानं गुणावृत्तिन्यायेनैव अस्मन्मतेऽपि सिद्धेरनुवादकत्वाच्च । अतश्च सर्वत्रैव समाख्याप्राप्तकर्त्रन्तरबाधेन वाक्यात् मैत्रावरुणनिवेशः । इति पूर्वपक्षः । ३।७।२२, * विशेषेण सामान्यबाधे अवगते प्रतिप्रधानं गुणावृत्तिन्यायेन मन्त्रावृत्तिस्वीकारेऽपि न कश्चिद्दोषः । इति प्राप्ते । १०।३।४, * साम्नः ऋगक्षराभिव्यक्त्यर्थत्वेनैव प्राप्तत्वात् ऋचां प्राधान्यावगतेः प्रतिप्रधानं गुणावृत्तिन्यायेन प्रत्येकमेव गेयं साम । ९।२।३. * **प्रतिप्रधानं गुणावृत्तिन्यायात्** प्रतीष्टकमुपधानावृत्तिसिद्धिः । **कौ.** १।४।१७। २७ पृ. २८८. * हिरण्यशकलैः प्रोक्षणं प्रतीष्टकं कर्तव्यम्, प्रतिप्रधानं गुणावृत्तिन्यायात् । इति प्राप्ते । **सोम.** ९।१।७.

* प्रधानभूतानामपि ऋचां आर्थिकं सामसाधनत्वं अस्त्येवेति तद्गतस्य त्रित्वस्य युक्तमेव सामाङ्गत्वम् । वचनबलाच्च **प्रतिप्रधानावृत्ति** (प्रतिप्रधानं गुणावृत्तिमित्यर्थः । **सोम.**) बाधित्वा व्यासज्य गेयम् । इति प्राप्ते । **शा.** ९।२।३.

* एकस्मिन्नेव प्रयोगे (सत्रेषु) **प्रतिप्रधानावृत्तिन्यायेन** प्रत्येकं फलावश्यम्भावः । **सोम.** ६।२।१. * (सत्रे) ब्रह्मादीनां यजमानत्वेनैव प्रतिप्रधानावृत्तिन्यायेन दीक्षायाः तत्तत्संस्कारकत्वप्राप्तिः । **भाट्ट.** ५।१।१, * 'य एतेनानिष्ट्वाऽथान्येन यजते गर्तपत्यमेव तद्भवति' इत्यत्र वाक्यशेषस्य क्रतुविशेषोपस्थापकत्वेऽपि विधौ प्रतिप्रधानावृत्तिन्यायेन सर्वविषयत्वप्रतीतेः संदेहाभावः । ५।३।१५, * सोमस्य तत्तद्रसाङ्गत्वे प्रतिप्रधानावृत्तिन्यायेन तत्तदभ्यासापूर्वसाधनीभूतरसप्रकृतित्वेन विहितस्य दशमुष्टिपरिमितस्य सोमस्य चतुर्मुष्टिपरिमितव्रीहिभेदवत् भेदः प्राप्नुयात् । **कौ.** २।२।६।१८ पृ. २२२. * **प्रतिप्रधानावृत्तिन्यायात्** काम्यस्य यावदिच्छया आवृत्तौ कालस्यापि अङ्गत्वेन हेतुना वीप्सां विनाऽपि आवर्त्यमानतया स्थितत्वात् वीप्साऽऽनर्थक्यापत्तेः ... । **सु.** पृ. ९७९, * अग्निचयने पश्वेकादशिनीविधानादेव अविहिताऽपि यूपैकादशिनी **प्रतिप्रधानावृत्तिन्यायात्** भविष्यति इत्याशङ्का । पृ. ९९८. * ऋत्विगुद्देशेन हि एते गुणाः लोहितोष्णीषत्वादयः विधीयमानाः, प्रतिप्रधानावृत्तिन्यायात् सर्वेषां भवन्तो न शक्याः समाख्यया बाधितुम् । **वा.** ३।८।५।१२. * मुख–नाभि–गुल्फप्रदेशपावनार्थेषु 'चित्पतिस्त्वा पुनातु' इत्यादिमन्त्रेषु 'अच्छिद्रेण पवित्रेण' इत्यादिशेषोऽपि अनुषज्यते प्रतिप्रधानावृत्तिन्यायात् । **भाट्ट.** २।१।१७.

* 'अपिवा कर्मपृथक्त्वात् तेषां तन्त्रविधानात् साङ्गानामुपदेशः स्यात्' (११।२।३।१६) इति एकादशवक्ष्यमाण**प्रतिप्रधानावृत्तिन्यायाभावेऽपि** ... । **सु.** पृ. ७३४.

* 'ग्रहं संमार्ष्टि' । **प्रतिप्रधानगुणावृत्तिन्यायेन** प्रत्येकमुद्देश्येषु अर्थसिद्धस्य एकत्वस्य अनुवादकमेकवचनम् । **कस्तूरि.** ३।१।७।१४.

* **प्रतिप्रसवः** अकर्तव्यत्वेनोक्तस्य कर्तव्यत्वेनोक्तिः । **बाल.** पृ. ९९. * प्रतिप्रसवः प्रसक्तप्राप्तिकस्य कारणान्तरेण निवृत्तिप्रसक्तौ विधिः । **भाट्ट.** ३।३।१४. * प्रतिप्रसवः प्राथमिकप्राप्त्यनुसारी । **सोम.** ३।५।१७.

* **प्रतिप्रसवविधिना** अपूर्वविधिः बाध्यते, यथा 'पूषा प्रपिष्टभागः' इति पेषणस्य चरौ प्रतिप्रसवेन पशौ पुरोडाशे च अपूर्वविधिः । **बाल.** पृ. १४४, * प्रतिप्रसवविधिना नियमविधिर्बाध्यते यथा 'घृते श्रपयति' इति श्रपणप्रतिप्रसवस्य घृतनियमस्य चैकत्र वाक्ये कर्तुमशक्यत्वात् पूर्वेणोत्तरबाधे उत्पत्तिवाक्यप्राप्तघृतानुवाद इत्युक्तम् । १०।२।१ इत्यत्र । पृ. १४४.

प्रतिप्रसवविधिविषयन्यायः । विकृतावपि चोदकात् खादिरादेरेव प्राप्त्या प्रतिप्रसवन्यायेन सौमापौष्णपशौ अप्राप्तैव उदुम्बरजातिः । **रसायनम्** पृ. २१३.

* **प्रतिप्रस्थाता** अङ्गेष्वपि (पशौ) अध्वर्युविकारः । स हि अवदानं करोति, 'दक्षिणतो निधाय प्रतिप्रस्थाता अवद्यति' इति (चेत् उच्यते) यस्यां शाखायामेतन्नास्ति तत्रैषा (प्रतिप्रस्थातुः भक्षः अस्ति वा न वा इति) विचारणा । **भा.** १०।७।८।२३. * प्रतिप्रस्थाता अध्वर्योः पुरुषः । द्वितीयवर्गस्थोऽयम् । अर्धी चायं मुख्यदक्षिणाया अर्धं षड् गाः लभते । 'प्रतिप्रस्थाता अध्वर्युं दीक्षयित्वा अर्धिनो दीक्षयति, ब्राह्मणाच्छंसिनं ब्रह्मणः, प्रस्तोतारमुद्गातुः, मैत्रावरुणं होतुः' । 'प्रतिप्रस्थातारं नेष्टा दीक्षयति' । **वि.** ३।७।१७. * प्रतिप्रस्थाता अवद्यन्नपि नाध्वर्युकर्मणि वर्तते इति (पशौ) नास्य अङ्गेषु भक्षः स्यात् । **भा.** १०।७।८।२३, * प्रतिप्रस्थाता ऐन्द्रं ग्रहं आदत्ते सौत्रामण्याम् । 'उत्तरेऽग्नौ पयोग्रहान् जुह्वति, दक्षिणेऽग्नौ सुराग्रहान् ।' ३।५।३।१४. * 'प्रतिप्रस्थाता मन्थिनं जुहोति' । (मन्थी ग्रहविशेषो ज्योतिष्टोमे) । **वि.** ३।७।९. * प्रतिप्रस्थाता वपाश्रपणं करोति । सा च वपा सर्वैव हुता इति शेषाभावात् प्रतिप्रस्थातुः इडाभक्षो नास्ति । **के.** (१०।७।८). * **प्रतिप्रस्थात्रा** अध्वर्योः पृथक् चातुर्मास्यगतवरुणप्रघासेषु दक्षिणविहारे मन्त्रोच्चारणं कार्यम् । १२।१।९।१८. * प्रतिप्रस्थात्रा मन्त्राः अध्वर्योः पृथगुच्चारणीयाः वरुणप्रघासेषु दक्षिणविहारे । १२।१।९. 'वरुणप्रघासेषु दक्षिणविहारे०' इत्यत्र द्रष्टव्यम् । * **प्रतिप्रस्थातुः** अग्नीषोमीये पशौ इडाभक्षो नास्ति । हृदयाद्यवदानकर्तृत्वं प्रतिप्रस्थातुः इति पक्षे प्रतिप्रस्थातुः अस्ति भक्षः इति **शास्त्रदीपिका** । तत्पक्षेऽपि नास्ति इति **भाट्टदीपिका** । **के.** १०।७।८.

प्रतिप्रस्थातुश्च वपाश्रपणात् । १०।७।८।२२ ॥

वपायाः श्रपणमध्वर्योः कर्म प्रतिप्रस्थाता करोति । तस्मात् अग्नीषोमीये पशौ प्रतिप्रस्थातुः शेषभक्षः स्यात् । इति पूर्वः पक्षः । चशब्दः प्रपूर्वाधिकरणसूत्रगतमैत्रावरुणदृष्टान्तार्थः ।

अभक्षो वा कर्मभेदात् तस्याः सर्वप्रदानत्वात् । २३ ॥

वाशब्दः पूर्वपक्षव्यावर्तकः । प्रतिप्रस्थाता अभक्षः स्यात् । अविद्यमानो भक्षो यस्य सः अभक्षः । कर्मभेदात् । प्रतिप्रस्थाता वपां श्रपयति, वपाश्रपणं च नाध्वर्युकर्म । प्रतिप्रस्थातुरेव हि तत् कर्म विहितम् । तस्माद्भक्षाभावः । ननु वपाशेषमेव प्रतिप्रस्थाता भक्षयतु । नेत्याह । तस्याः वपायाः सर्वप्रदानत्वात् सर्वैव वपा अग्नौ प्रदीयते, नास्ति तस्याः शेषः । सर्वस्याः प्रदानं सर्वप्रदानम् । कर्मव्युत्पन्नं प्रदानशब्दं गृहीत्वा तेन सर्वाशब्दस्य समानाधिकरणबहुव्रीहिस्तु नैव संभवति । तस्मात् ह्रस्वो वा पुंवद्भावो वा सौत्रोऽत्र स्वीकार्यः । तस्मात् प्रतिप्रस्थाता अभक्षः इति सिद्धान्तः । **के.**

* प्रतिप्रस्थातुः पशौ भक्षो नास्ति । १०।७।८।२२–२३ . **मीको.** पृ. ११३ 'अग्नीषोमीये पशौ प्रतिप्रस्थातुः०' इत्यत्र द्रष्टव्यम् ।

* **प्रतिप्रस्थात्रादयः** अध्वर्युभिन्ना अध्वर्युपुरुषाः शमितारः, न पृथक् कश्चित् । ३।७।१३.

* **प्रतिप्रस्थातृमैत्रावरुणादयो** होत्रकाः । (प्रतिप्रस्थाता मैत्रावरुणः ब्राह्मणाच्छंसी पोता नेष्टा अच्छावाकः आग्नीध्रः इति) । **वि.** ३।७।१०.

* **प्रतिभा** न प्रमाणम् । 'श्वो मे भ्राता आगन्ता' इति प्रतिभाऽऽख्यं अनिश्चायकत्वान्न मानम् । तेन ऋषीणां प्रतिभया धर्माधर्मप्रमा इति परास्तम् । **मणि.** पृ. ६२. * प्रतिभा नाम नियतसाधनावच्छिन्नक्रिया-

प्रतिपत्त्यनुकूला प्रज्ञा। (एकदेशिमतमिदमिति कणिका)। चिचि. पृ. २४६. (व्यभिचारात् अर्थानिश्चयात्मकं अनैकान्तिकलिङ्गप्रसूतं संवेदनं प्रतिभा इति केचित्। वयं (एकदेशिनः) तु साध्यसाधनेतिकर्तव्यतावच्छिन्नायाः क्रियायाः प्रतिपत्तौ अनुकूलं तत्प्रतिपत्त्या कार्ये अनुष्ठानलक्षणे कर्तव्ये सहकारिणीं कर्तव्यमिति प्रज्ञां प्रतिभामभ्यगीष्महि। कणिका. पृ. २४६-२४७)।

‖ 'प्रतिभातश्च (पञ्चम्यास्तसिल्) पश्यन्ति सर्वं प्रज्ञावतां धियः' इति न्यायः। 'प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता'। सर्वतोमुखी बुद्धिः इति यावत् इति। स्पष्टार्थोऽयम्। साहस्री. ९४५.

* 'प्रतिमन्वन्तरं चैव स्मृतिरन्या विधीयते।' वा. १।३।३।७ पृ. २०२.

* प्रतियच्छति। तिलेभ्यः प्रतियच्छति माषान्। प्रतिदानं विनिमयः, प्रतिनिर्यातनम्। मणि. पृ. १३२.

* प्रतियत्नः सतो गुणान्तराधानम्। कर्पूरेण उदकस्य उपस्कुरुते। मणि. पृ. १२६.

* प्रतियोगिनि श्रुते अश्रुतप्रतियोगिकल्पनाऽनुपपत्तिः। सु. पृ. ११९१.

* प्रतिवचनकार्ये 'उपहूतः' इति मन्त्रः, 'उपह्वयस्व' इति प्रश्नकार्ये सोमभक्षे, ज्योतिष्टोमे। के. (भा. ३।५।१६।४२).

‖ प्रतिषिद्धं चाविशेषेण हि तच्छ्रुतिः। ६।३।६।२० ॥

वरकाः कोद्रवा माषाः इति प्रतिषिद्धं द्रव्यं न प्रतिनिधित्वेन ग्राह्यम्। हि यस्मात् अविशेषेण माषत्वादिना सामान्येनैव तच्छ्रुतिः निषेधश्रुतिः 'अयज्ञिया वै वरकाः कोद्रवाः' 'अयज्ञिया वै माषाः' इति। तस्मात् माषादि द्रव्यं न प्रतिनिधातव्यम्। चकारः देवताऽऽदिदृष्टान्तार्थः। यथा देवताऽऽदीनां न कश्चित् प्रतिनिधिः तथा माषादिकं न कस्यापि प्रतिनिधिरिति सिद्धान्तः। के.

* प्रतिषिद्धानुष्ठाने अनिष्टापातः। के. (भाट्ट. ६।२।५).

* प्रतिषिद्धद्रव्यस्य माषादेः प्रतिनिधित्वाभावः। ६।३।६.

* प्रतिषेधः। उपादानगतो हि प्रतिषेधः क्रत्वर्थः, नाधिकारगतः। ऋजु. पृ. ३१.

* प्रतिषेधो द्विविधः प्रत्यक्षः कल्प्यश्च। प्रत्यक्षोऽपि अनेकधा वक्ष्यते। कल्प्योऽपि सप्तधा स्मृतिकल्प्यः, आचारकल्प्यः, निषेधकल्प्यः, अर्थवादकल्प्यः, मन्त्रकल्प्यः, प्रायश्चित्तकल्प्यः, दण्डकल्प्यश्चेति। तत्र स्मृतिकल्प्यो यथा 'सगोत्रां न परिणयेत्' इत्यादिः। आचारकल्प्यो यथा हरिवासरपरिभाषिते काले पारणानिषेधः। निषेधकल्प्यो यथा विशिष्टनिषेधात् विशेषणनिषेधः। अर्थवादकल्प्यो द्विविधः स्वतन्त्रार्थवादकल्प्यः, विध्यन्तरशेषार्थवादकल्प्यश्च। आद्योऽपि द्विविधः दोषार्थवादकल्प्यः, सिद्धवत्कीर्तनार्थवादकल्प्यश्च। आद्यो यथा स्मार्तः 'मिथ्याऽभिशंसने दोषो द्विःसमो भूतवादिनः। मिथ्याऽभिशस्तदोषं च समादत्ते मृषा वदन् ॥' इति। द्वितीयो यथा अग्निहोत्रप्रकरणे 'तस्माद्वत्सं जातं दशरात्रीर्न दुहन्ति' इति। जातं वत्सं अनुलक्ष्यीकृत्य तदनन्तरं दशरात्रं गौर्न दोह्या इति सिद्धवत्कीर्तनान्यथाऽनुपपत्त्या निषेधः कल्प्यते, 'यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति' इति विधिवत् इति। विध्यन्तरशेषार्थवादकल्प्यो यथा 'तस्मादारण्यमेवाश्नीयात्' इति विधिशेषेण 'न वा एते माषान् हविर्गृह्णन्ति' इत्यनेन माषनिषेधः कल्प्यते, 'उपरि हि देवेभ्यो धारयति' इति विधिवत्। मन्त्रकल्प्योऽपि निषेधो विधिवत् द्विधा, मन्त्रगतस्यैव नञुक्तवर्तमानापदेशस्य निषेधत्वकल्पनात्, निषेधयुक्तवाक्यान्तरकल्पनाच्च। आद्योदाहरणं मृग्यम्। द्वितीयो यथा 'मोघमन्नं विन्दते अप्रचेताः' इति। प्रायश्चित्तकल्प्यो यथा 'तदाहुर्यं आहिताग्निर्यदि सूतकान्नं प्राश्नीयात्, का तत्र प्रायश्चित्तिरिति, सोऽग्नये तन्तुमतेऽष्टाकपालं पुरोडाशं निर्वपेत्' इति। दण्डकल्प्यो यथा कर्मप्रदीपे 'यजनीयेऽह्नि सोमश्चेद्वारुण्यां दिशि दृश्यते। तत्र व्याहृतिभिर्हुत्वा दण्डं दद्याद् द्विजातये ॥' इति। नेयं दक्षिणा, ऋत्विगभावात्। अत्र च पूर्वदिने अन्वाधाने दण्डविधिरेव कल्प्यः,. तेन तु निषेधः कल्प्यते इति।

निषेधः स्मृत्यादिकल्प्योऽपि यथासंभवं जातिव्यक्तिगुणक्रियाविषयत्वेन चतुर्विधः। तत्राद्यो यथा श्राद्धे चणकादिनिषेधः। मरीचिः 'कुलत्थाश्चणकाः श्राद्धे न देयाश्चैव कोद्रवाः।' इति। व्यक्तिनिषेधो यथा श्राद्ध एव रोग्यादिनिषेधः। याज्ञवल्क्यः 'रोगी हीनातिरिक्ताङ्गः काणः पौनर्भवस्तथा।' इति। रोग्यादिशब्दस्य यौगिकत्वात् (व्यक्तिवाचकत्वम्)। गुणनिषेधो यथा मरीचिः 'कटुकानि च सर्वाणि विरसानि तथैव च।' इति। क्रियानिषेधो यथा वृद्धमनुः 'ऋतुकाले नियुक्तो वा नैव गच्छेत् स्त्रियं क्वचित्।' इति।

निषेधः स्मार्तादिः पुनर्द्विविधः क्रत्वर्थः पुरुषार्थश्च। तत्राद्यो यथा उक्त एव चतुर्विधः। पुरुषार्थोऽपि जातिद्रव्यगुणक्रियानिषेधभेदेन चतुर्विधः। तत्र पुरुषार्थो जातिनिषेधो यथा मसूरादिनिषेधः। यथा हि भोजनाश्रितं प्राङ्मुखत्वं विधीयते न भोजनम्, एवमत्रापि भक्षणाश्रितं मसूराद्येव निषिध्यते न भक्षणम्। पुरुषार्थो द्रव्यनिषेधो यथा 'उच्छिष्टं न भक्षयेत्' इति। उच्छिष्टशब्दस्य यौगिकत्वेन द्रव्यवाचित्वात्। पुरुषार्थो गुणनिषेधो यथा 'शुक्तं न भक्षयेत्' इति। कालपरिवासजाम्लरसस्य शुक्तशब्दार्थत्वात्। पुरुषार्थः क्रियानिषेधो यथा स्मार्तः, मनुः 'सुरा वै मलमन्नानां पाप्मा च मलमुच्यते। तस्माद् ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत् ॥' इति।

निषेधः स्मार्तादिः पुनर्द्विविधः। अदृष्टार्थो दृष्टार्थश्च। पूर्वोदाहृतः सर्वोऽपि अदृष्टार्थ एव। दृष्टार्थो यथा विवाहे 'अरोगिणीं' इत्यादिः। तदुक्तं विज्ञानेश्वरेण 'रोगिण्यादिषु तु दृष्टविरोध एव' इति।

निषेधः स्मार्तादिः क्रत्वर्थोऽपि द्विविधः। पुरुषार्थमात्रविषयकः क्रत्वर्थमात्रविषयकश्च। आद्यो यथा श्राद्धव्रतादौ मैथुनादिनिषेधः। द्वितीयो यथा श्राद्धे विहितस्यापि मांसस्य निषेधः। 'अक्षता (कन्या) गोपशुश्चैव श्राद्धे मांसं तथा मधु। देवराच्च सुतोत्पत्तिः कलौ पञ्च विवर्जयेत् ॥' इति निगमः। तथा 'शामित्रं चैव विप्राणां' इति। पुरुषार्थस्तु स्मार्तादिनिषेधः एकविध एव पुरुषार्थमात्रविषयक इति।

पुरुषार्थमात्रविषयकः पुरुषार्थनिषेधो द्विविधः रागप्राप्तविषयकः विधिप्राप्तविषयकश्च। आद्यो यथा उदाहृतो मानवः सुरानिषेधः। द्वितीयो यथा षष्ठे 'तस्या यावदुक्तम्०' इत्यधिकरणे (६।१।६।२४) स्त्रिया अध्ययननिषेधः इति।

प्रत्यक्षो निषेधः श्रौतः, सोऽपि चतुर्विधः जातिनिषेधः, व्यक्तिनिषेधः, गुणनिषेधः, क्रियानिषेधश्चेति। तत्र जातिनिषेधो यथा 'तस्माद् बर्हिषि रजतं न देयम्' इति। व्यक्तिनिषेधः श्रौतो यथा 'नासोमयाजी संनयेत्' इति। असोमयाजिपदस्य यौगिकत्वात्। कर्तृनिषेध एव चायम्, न क्रियानिषेधः, तथात्वे विहितक्रियानिषेधात् तेनैव विकल्पसिद्धौ दशमे 'तद्व समेऽवनयेत्' इति प्रतिप्रसवबलेन विकल्पोक्तिरयुक्ता स्यात्। गुणनिषेधः श्रौतो यथा षष्ठे सप्तमपादे (अधि० १०) आधाने 'एका देया ......द्वादश देयाः' इत्यादि विधाय 'अपरिमितं देयम्' इति। तत्र पूर्वपक्षितं अयं पूर्वोक्तसर्वसंख्याप्रतिषेध इति। स्थितोदाहरणं तु मृग्यम्। क्रियानिषेधः श्रौतो यथा 'नातिरात्रे षोडशिनं गृह्णाति' इति।

श्रौतो निषेधः पुनर्द्विविधः क्रत्वर्थः पुरुषार्थश्च। तत्र पूर्वोदाहृतश्चतुर्विधोऽपि क्रत्वर्थः। पुरुषार्थोऽपि जातिद्रव्यगुणक्रियानिषेधभेदेन चतुर्विधः। तत्र पुरुषार्थो जातिनिषेधो यथा अनारभ्याम्नातः 'न कलञ्जं भक्षयेन्न लशुनं न गृञ्जनम्' इति। अत्रापि जातिमात्रनिषेधो मसूरनिषेधोक्तयुक्त्या। द्रव्यनिषेधः प्रत्यक्षो यथा 'न मलवद्वाससा सह संवदेत्' इति, मलवद्वासःशब्दस्य यौगिकत्वात्। गुणनिषेधः पुरुषार्थः प्रत्यक्षो यथा 'रजस्वलाव्रतेषु न खर्वेण पात्रेण पिबेत्' इति परिमाणनिषेधः। पुरुषार्थ श्रौतः क्रियानिषेधो यथा 'न हिंस्यात् सर्वा भूतानि' इति नञ्टीकायां वार्तिककृतोक्तः। प्रत्यक्षश्च निषेधः सर्वोऽपि अदृष्टार्थ एव, दृष्टार्थस्तु नास्त्येव।

श्रौतो निषेधः क्रत्वर्थः त्रिविधः पुरुषार्थमात्रविषयकः क्रत्वर्थमात्रविषयकः उभयविषयकश्च। आद्योऽपि द्विविधः रागप्राप्तविषयो विधिप्राप्तविषयश्च। तत्राद्यो यथा 'स्थ्युपायमांसभक्षादिपुरुषार्थमपि श्रितः। प्रति-

षेधः क्रतोरङ्गमिष्टः प्रकरणाश्रयात् ।।' इति व्याकरणाधिकरणे उक्तः (वार्तिकं पृ. २८४) । विधिप्राप्तपुरुषार्थमात्रविषयः क्रत्वर्थो निषेधो यथा 'दीक्षितो न ददाति न जुहोति' इति । क्रत्वर्थमात्रविषयकः यथोदाहृत एव 'नातिरात्रे षोडशिनं गृह्णाति' इति । क्रत्वर्थपुरुषार्थोभयविषयः क्रत्वर्थः श्रौतो निषेधो यथा दर्शपूर्णमासाङ्गं 'नानृतं वदेत्' इति । प्रतिषेधोऽपि 'व्रीहिभिर्यक्ष्ये' इति संकल्प्य यवैरीजानस्य यत्तत् व्रीहिसंकल्परूपमनृतं क्रत्वर्थं प्रसज्येत तद्विषयोऽपि भवति, भवति च पुरुषार्थरागप्राप्तानृतवदनविषयेऽपि इत्युक्तं तृतीये 'अकर्म क्रतुसंयुक्तं संयोगान्नित्यानुवादः स्यात् ।' (३।४।४।१२) इत्यत्र । पुरुषार्थस्तु श्रौतनिषेध एकविध एव पुरुषार्थमात्रविषय इति । क्रत्वर्थमात्रविषयकस्तु पुरुषार्थो निषेधो नास्त्येव, उदाहरणासंभवात् । स हि अनारभ्याधीतोऽपि न पुरुषार्थः फलकल्पनाप्रसङ्गात् । क्रत्वर्थस्तु युक्तः क्रतव्यभिचारिक्रत्वर्थनिषेध्यद्वारा क्रतोरुपस्थितेः ।

पुरुषार्थमात्रविषयकः पुरुषार्थः श्रौतनिषेधोऽपि द्विविधः रागप्राप्तविषयो विधिप्राप्तविषयश्च । आद्यो यथा 'न हिंस्यात् सर्वा भूतानि' इति । तथा 'न कलञ्जं भक्षयेत्' 'तस्माद्यूपो नोपस्पृश्यः' इत्येतौ रागप्राप्तकलञ्जभक्षणयूपोपस्पर्शननिषेधौ पुरुषार्थौ । द्वितीयो यथा असोमयाजिनः सांनाय्यनिषेधः । सोऽपि कर्तृनिषेधेन फलितः ।

प्रतिषेधः पुनरपि षोढा सामान्यप्रतिषेधः, विशेषप्रतिषेधः, प्रतिप्रसवरूपः प्रतिषेधः, अभ्यनुज्ञारूपः प्रतिषेधः, उपसंहाररूपः प्रतिषेधः, व्यवस्थारूपः प्रतिषेधश्चेति । तत्राद्यो यथा 'न हिंस्यात् सर्वा भूतानि' इति । द्वितीयो यथा 'ब्राह्मणं न हन्यात्' इति । तृतीयो यथा 'न हिंस्यात्' इत्यस्य 'गां न हन्यात्' इत्यस्य वा 'गौरनुबन्ध्यः' इति बाधे प्रसक्ते पुनः कलौ प्रतिप्रसवः 'अक्षता गोपशुश्च' इति । अभ्यनुज्ञारूपः प्रतिषेधो यथा 'एष पन्था एतत्कर्म' इति ऐतरेये द्वितीयारण्यके 'तस्मात् काल एव दद्यात् काले न दद्यात्' इति । अत्र काले दारिद्र्याद्यवस्थारूपे न दद्यात् इति न दाने दोषः प्रतिपाद्यते, नहि भोजनमात्रपर्याप्तवतोऽपि अतिथ्यागमने तस्मै तद्दत्वा स्वयमनशनं कुर्वतोऽपि दोषो युज्यते, तथात्वे 'सक्तुप्रस्थस्य वो विप्रा न यज्ञः सदृशो मतः ।' इत्याद्युपाख्यानविरोधात् । तस्मात् 'काले न दद्यात्' इति अभ्यनुज्ञैव इति तत्रादद्त ईषद्दोष इति । उपसंहाररूपः प्रतिषेधो यथा 'मृतानुगमनं नास्ति ब्राह्मण्या ब्रह्मशासनात् ।' इति सामान्यनिषेधः, 'पृथक् चितिं समारुह्य न विप्रा गन्तुमर्हति ।' इत्यनेन विशेषे उपसंह्रियते । क्रत्वर्थोदाहरणं तु हेमाद्रौ पैठीनसिः 'वृन्ताकनालिकापौतीककुसुम्भाश्मन्तकाश्चेति शाकानामभक्ष्याः' इति । तदिदं वृन्ताकसामान्यनिषेधकम् । 'कण्डूरं श्वेतवृन्ताकं कूष्माण्डं च विवर्जयेत्' इति देवलवचनेन विशेषे उपसंह्रियते ।

व्यवस्थितः प्रतिषेधोऽपि सप्तधा, देशतः, कालतः, कर्तृतः, कर्मतः, निमित्ततः, संस्कार्यतः, फलतश्चेति । तत्र देशतो व्यवस्थितो निषेधो यथा 'कृष्णपक्षादिकं मासं नाङ्गीकुर्वन्ति के चन । येऽपीच्छन्ति न तेषामपीष्टो विन्ध्यस्य दक्षिणे ।।' इति त्रिकाण्डमण्डने । कालतो व्यवस्थितो निषेधो यथा 'सायंप्रातर्द्विजातीनामशनं श्रुतिचोदितम् । नान्तरा भोजनं कुर्यात्' इति । कर्तृतो व्यवस्थितो निषेधो यथा 'नासोमयाजी संनयेत्' इति । कर्मतो व्यवस्थितो निषेधो यथा कातीयसूत्रे 'प्रजाकामस्य नवसप्तदशाख्योऽतिरात्रो नाम प्रथमः, ज्यैष्ठ्यस्य ज्यैष्ठिनेयस्य विषुवान्नाम द्वितीयः । भ्रातृव्यवतो गौर्नाम तृतीयः, स्वर्गकामस्य आमयाविनो वा आयुर्नाम चतुर्थः, ऋद्धिकामस्य ज्योतिष्टोमातिरात्रो नाम पञ्चमः, पशुकामस्य विश्वजिदतिरात्रो नाम षष्ठः, ब्रह्मवर्चसकामस्य त्रिवृदतिरात्रो नाम सप्तमः, वीर्यकामस्य पञ्चदशातिरात्रो नाम अष्टमः, अन्नाद्यकामस्य सप्तदशातिरात्रो नाम नवमः, प्रतिष्ठाकामस्य एकविंशातिरात्रो नाम दशमः, अप्तोर्यामातिरात्रो नाम एकादशः, ...अभिजिदतिरात्रो नाम भ्रातृव्यवतो द्वादशः, सर्वस्तोमातिरात्रो नाम बुभूषतः त्रयोदशः, इति त्रयोदशातिरात्रान् वक्ष्यमाणान् 'त्रयोदशातिरात्राः' इत्युपक्रम्य 'तेषां चत्वारोऽषोडशिकाः प्रथमाः' इति सूत्रेण चतुर्ष्वेव व्यवस्थितः षोडशिनिषेधः कृत इति । निमित्ततो

व्यवस्थितो निषेधो यथा 'स्मार्तकर्मपरित्यागो राहोरन्यत्र सूतके ।' इति, राहोः सूतकादन्यत्र अन्यसूतके स्मार्तकर्मपरित्यागः इत्यपि अर्थाश्रयणात् । ननु अस्यार्थान्तरं पूर्वमुक्तं (बाल. पृ. १६ पं. ३-४), सत्यम्, तथापि अर्थद्वयबोधकस्मृत्यन्तरगतवाक्यद्वयबलेन तात्पर्यग्रहात् अस्योभयार्थत्वाविरोधात् हेमाद्रिणा तथा व्याख्यातम् । संस्कार्यतो व्यवस्थितो निषेधो यथा आश्वलायनसूत्रे होम्यद्धर्मेषु 'परिस्तीर्य' इति सर्वत्र परिस्तरणं विधाय 'कृताकृतमाज्यहोमेषु परिस्तरणम्' इति अकृतशब्देन निषेधः अन्यत्र व्यवस्थया उक्तः । फलतो व्यवस्थितो निषेधो यथा 'यो ब्राह्मणायावगुरेत् तं शतेन यातयात्, यो निहनेत् सहस्रेण, यो लोहितं कुर्यात् यावतः प्रस्कन्द्य पांसून् संगृह्णीयात् तावतः संवत्सरान् सुवर्गं लोकं न प्रजानीयात् तस्मान्न ब्राह्मणायावगुरेत्, न हन्यात्, न लोहितं कुर्यात्' इति । निषेध्यफलान्येव हि निषेधफलानि, तेषु चात्र निषेधा व्यवस्थिताः ।

सामान्यनिषेधः षड्विधोऽपि चायं श्रौतस्मार्तादिभेदेन प्रत्यक्षकल्प्यभेदभिन्नः । तत्रतत्रास्माभिः यथासंभवं श्रौतस्मार्तोदाहरणानि उक्तानि । तथा क्रत्वर्थपुरुषार्थभेदयोरपि सामान्यादिषड्विधनिषेधेषु संभवात् यथासंभवं क्रत्वर्थपुरुषार्थोदाहरणान्यपि क्वचित् कानि चिदुक्तानि । इतराणि अपि मृग्याणि ।

क्रत्वर्थक्रियायाः प्रतिषेधः इति प्रतिषेधभेदः श्रौतः स्मार्तो वा यः पूर्वमुक्तः सोऽपि क्रत्वर्थक्रियायां षोडशविधत्वात् षोडशविधः । तथाहि प्रकृतौ विकृतौ अप्रकृतिविकृत्यात्मके च कर्मणि समानविधानो निषेधो यथा 'शूद्रानीतैः क्रयक्रीतैः कर्म कुर्वन् पतत्यधः ।' इति सर्वत्र उपदिष्टकुशेषु निषेधः । तथा आरादुपकारकक्रियानिषेधः संनिपत्योपकारकक्रियानिषेधश्च । तत्राद्योऽपि त्रिविधः प्रकृतिगतः, विकृतिगतः, अपूर्वकर्मगतश्च । तत्राद्यो यथा 'न प्रथमयज्ञे प्रवृञ्ज्यात्' इति । विकृतिगतोऽपि द्विविधः अतिदिष्टविषयः उपदिष्टविषयश्च । आद्यो यथा 'न तौ पशौ करोति' इति आज्यभागनिषेधः । वैकृतोपदिष्टारादुपकारकविषयो निषेधो यथा कातीयसूत्रे अग्नीषोमीये पशौ 'स्वाहा देवेभ्यः' 'देवेभ्यः स्वाहा' इतिमन्त्राभ्यां परिपशव्ये आहुती आरादुपकारिके संज्ञपनपूर्वापरकालयोर्विधाय 'न चैते जुहोति' इति निषिद्धे । अपूर्वकर्मणि उपदिष्टारादुपकारकक्रियानिषेधो यथा अग्न्याधेये वारवन्तीयादिसामगानं निषिध्यते 'न ब्रह्मा सामानि गायति' इति । अत्र ब्रह्मणः सामगानस्याप्राप्तेः अनुवादमात्रत्वात् सामगानानिषेधात् नित्यं सामगानं इत्याशङ्क्य अनुवादमात्रस्य आनर्थक्यात् सामगाननिषेध एवायम्, ब्रह्मशब्दस्तु ब्राह्मणपरोऽनुवादः इत्युक्तं दशमे (१०।८। ६।९-११) ।

संनिपत्योपकारकक्रियानिषेधोऽपि त्रिविधः । प्रकृतिगतः, विकृतिगतः, अप्रकृतिविकृत्यात्मककर्मगतश्च ।

प्रकृतिगतसंनिपातिक्रियानिषेधोऽपि द्विविधः अदृष्टार्थविषयः, दृष्टार्थविषयश्च ।

दृष्टार्थविषयोऽपि द्विविधः प्रतिपत्तिभिन्नद्रव्यसंस्कारविषयः, प्रतिपत्तिविषयश्च ।

अपूर्वकर्मगतोऽपि एवमेव त्रिविधः, विकृतिगतोऽपि एवमेव त्रिविधः । स तु त्रिविधोऽपि विकृतिगतो निषेधः पुनर्द्विविधः उपदिष्टविषयः अतिदिष्टविषयश्च ।

तदेवं द्वादश निषेधभेदाः सिद्धाः । तेषां तु द्वादशानां उदाहरणानि द्वादश उच्यन्ते । तत्र (१) प्रकृतिगतसंनिपात्यदृष्टार्थक्रियानिषेधो यथा 'मधुपर्के च सोमे च अप्सु प्राणाहुतीषु च । नोच्छिष्टो भवति द्विजः' इति सोमे पुंशुद्ध्यर्थत्वेन अदृष्टार्थस्य संनिपातिन आचमनस्य निषेधः । (२) प्रकृतिगतप्रतिपत्तिव्यतिरिक्तदृष्टार्थसंनिपातिक्रियानिषेधो यथा अग्निहोत्रहोमे हुते 'अग्निमुपतिष्ठते' इति विधाय 'तस्मान्नोपतिष्ठेत' इति शतपथे दृष्टार्थाग्निसंस्कारकसंनिपात्युपस्थाननिषेधः । (३) प्रकृतिगतप्रतिपत्तिनिषेधो यथा 'अग्निहोत्रहवण्याश्च लेहः' इति कलौ निषेधः । (४) अप्रकृतिविकृत्यात्मककर्मगतसंनिपात्यदृष्टार्थक्रियानिषेधो यथा कातीये 'ऋतुनक्षत्रसंभारसामवपनचातुष्प्राश्यजागरणेध्मपूर्वार्धान्वारम्भणसार्पराज्ञीर्न वा कुर्यात्' इति वपननिषेध आधाने । (५) अप्रकृतिविकृत्यात्मककर्मगतप्रतिपत्तिव्यतिरिक्तदृष्टार्थसंनिपातिक्रियानिषेधो यथा अन-

न्तरोक्तकातीयसूत्रगत एव रात्रौ पदार्थरक्षणार्थत्वेन दृष्टार्थस्य संनिपातिनो जागरणस्य निषेधः । (६) अप्रकृतिविकृत्यात्मककर्मगतप्रतिपत्तिनिषेधो यथा 'आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्च ' इत्याधानकर्तृसंस्कारः तच्छरीरप्रतिपत्तिरूपो विहितः, तस्य आत्महनने निषेधो **भविष्योत्तरे** 'स्वेच्छया मरणं विप्रात्' इत्यादिना आत्मघात्यादीनुक्त्वा 'न तेषां स्नानसंस्कारौ' इति संस्कारशब्देन दाहो निषिद्धः । (७) विकृतिगतोपदिष्टादृष्टार्थसंनिपातिक्रियानिषेधो यथा अतिरात्रे षोडशिग्रहनिषेधः । (८) विकृतिगतदृष्टार्थप्रतिपत्तिव्यतिरिक्तसंनिपातिक्रियानिषेधो यथा **शतपथीयः** पूर्वोक्तः अग्नीषोमीयपशौ विहितस्याग्निमन्थनस्य निषेधः 'नाग्निं मन्थेत्' इति । (९) विकृतिगतोपदिष्टप्रतिपत्तिनिषेधो यथा भागावदानानि 'क्लोमं ब्रह्मणे, प्लीहं यजमानाय, पुरीततमध्वर्यवे' इत्यादीनि, 'तानि अनारभ्यविहितानि अग्नीषोमीयमायातानि' इति **कर्कोक्तेः**, पुनस्तेनोक्तम् 'शाखान्तरे अग्नीषोमीयप्रतिषेधात् विकारपशूनुपगच्छन्ति' इति, तेन निरूढे उपदेशादेव प्राप्तानि, तेषां निरूढे एव निषेधः, **शतपथे** 'क्लोमप्लीहाध्यूध्नीपुरीततं चेच्छन्' इति अत एव तत्र विकल्पः इति । (१०) विकृतिगतातिदिष्टादृष्टार्थसंनिपातिक्रियानिषेधो यथा **वाजसनेयिमते** पूर्णमासविकृतित्वेन संमतेषु दर्विहोमरूपेष्वपि त्रैयम्बकहोमेषु **शतपथे** श्रूयते 'ते वा अक्ताः स्युः' 'तस्मादनक्ता एव स्युः' इति च, सोऽयं प्राकृतस्याञ्जनस्य निषेधः । अत एव तन्मूलकं **कात्यायनसूत्रं** 'अक्तान् वा' इति । (११) अतिदिष्टदृष्टार्थसंनिपातिनिषेधो यथा 'पूयति वा एतदृचोऽक्षरं यदेनदूहति, तस्मादृचं नोहेत्' इत्यूहनिषेधात् प्राकृतयाज्यानुवाक्यावृन्निषेधः । (१२) विकृतिगतातिदिष्टप्रतिपत्तिनिषेधो यथा **शतपथे** पित्र्यायाम् 'तामुपहूयैवावजिघ्रन्ति, न प्राश्नन्ति' इति मन्थस्य इडोपाह्वानानन्तरं अवघ्राणं विधाय प्राशनं निषिद्धम् ।

प्रतिषेधः पुनः प्रत्येकं पञ्चविधः लिङ्लोट्कृत्यकृत्यार्थपञ्चमलकारभेदात् । प्रतिषेधः पुनर्द्विविधः श्रौतः स्मार्तश्च । श्रौतः प्रतिषेधे लिङ् यथा 'न चतुस्त्रिंशदिति ब्रूयात्' इति । श्रौतः प्रतिषेधे लोट् मृग्यः । श्रौतः प्रतिषेधे कृत्यो यथा 'तस्माद् बर्हिषि रजतं न देयम्' इति । श्रौतः प्रतिषेधे पञ्चमलकारो यथा 'न संतृणत्ति' 'दीक्षितो न जुहोति' इत्यादि । श्रौतः प्रतिषेधे तवैप्रत्ययो यथा 'तस्माद् ब्राह्मणेन न म्लेच्छितवै' इति । केन् 'नावगाहे' नावगाहितव्यं इति **काशिकायाम्** । एवं केन्यत्वनौ मृग्यौ । **बाल.** पृ. २९–४०.

* प्रतिषेधः 'न ब्राह्मणायावगुरेत्' इत्यादिः नरकपरिहारार्थः । **वा.** ३।४।६।१७, * प्रतिषेधः । नहि यदर्थे कर्मणि यौ नियमप्रतिषेधौ तावेव केवलौ तदर्थौ भवतः । तथाहि, '**स्त्र्युपायमांसभक्षादिपुरुषार्थमपि श्रितः । प्रतिषेधः क्रतोरङ्गमिष्टः प्रकरणाश्रयात् ॥ क्रत्वर्थात् खादिराच्चेष्टा वीर्यसिद्धिर्विधानतः । भोजनात् चाप्यतिथ्यर्थादपूर्वं दातृसंश्रितम् ॥**' अतश्च परार्थोच्चारणाश्रितावपि नियमप्रतिषेधौ स्वप्रयोजनाकाङ्क्षावेलायां संनिहितपुरुषप्रधानौ विज्ञायेते । १।३।८।२७ पृ. १८४. * प्रतिषेधो नित्यानुवादः असति प्रसङ्गे 'नान्तरिक्षे न दिवि' इत्यादिः । **भा.** १।२।१।१८. * प्रतिषेधः पापान्निवर्तयति । 'नानृतं वदेत्' इत्यादिः । **वा.** ३।४।४।१३ पृ. ९११. * 'प्रतिषेधः प्रदेशेऽनारभ्यविधाने च प्राप्तप्रतिषिद्धत्वात् विकल्पः स्यात्' (१०।८।१।१) इति सूत्रेण पूर्वपक्षयित्वा 'अर्थप्राप्तवदिति चेत्' (२) इत्यनेन अर्थप्राप्तसुरापानादिनिषेधे विकल्पानापत्तिवच्छास्त्रप्राप्तनिषेधेऽपि अनापत्तिमाशङ्क्य 'न तुल्यहेतुत्वात्' (३) इत्यनेन वैषम्यं वक्ष्यति । **सु.** पृ. १३९३.

प्रतिषेधः प्रदेशेऽनारभ्यविधाने च प्राप्तप्रतिषिद्धत्वाद् विकल्पः स्यात् । १०।८।१।१॥

प्रदेशः उपदेशः । चोदकेन उपदिष्टे वरणे, 'न होतारं वृणीते नार्षेयम्' इति महापितृयज्ञे प्रतिषेधः श्रूयते । तथा अनारभ्यविधानेन प्राप्ते येयजामहमन्त्रे 'नानुयाजेषु येयजामहं करोति' इति प्रतिषेधः श्रूयते । सोऽयं प्रदेशे चोदकेनोपदेशे अनारभ्यविधाने च श्रूयमाणः प्रतिषेधः विकल्पः स्यात् विकल्पितः स्यात् प्राप्तप्रतिषिद्धत्वात् । प्रमाणेन प्राप्तत्वात् प्रमाणेनैव च प्रति-

षिद्धत्वात् । तस्मात् साकमेधेषु महापितृयज्ञे होत्रार्षेयवरणस्य अनुयाजेषु येयजामहस्य च विकल्पः स्यात् इति पूर्वः पक्षः ।

अर्थप्राप्तवदिति चेत् । २ ॥

सिद्धान्ती शङ्कते । अर्थप्राप्तवत् स्यात् । यथा लोके अर्थप्राप्ते यत्र प्रतिषेधो भवति, 'न विषं भक्षयितव्यम्' इत्यादौ तस्यार्थस्य अक्रियैव भवति, न विकल्पः । तेन मन्यामहे विधिप्रतिषेधयोः प्रतिषेधो बलीयान् इति । तस्मादक्रियैव अनुयाजेषु येयजामहस्य महापितृयज्ञे च होत्रार्षेयवरणस्य । इति चेत् सिद्धान्ती ब्रूयात् ।

न तुल्यहेतुत्वादुभयं शब्दलक्षणम् । ३ ॥

पूर्वपक्षी उत्तरयति । सिद्धान्तिना यदुक्तम्, तन्न । प्राप्तिप्रतिषेधयोस्तुल्यहेतुत्वात् तुल्यप्रमाणकत्वात् । तुल्यहेतुत्वमेव विवृणोति, उभयं प्राप्तिश्च प्रतिषेधश्च शब्दलक्षणम् । 'येयजामहं करोति' 'नानुयाजेषु' इति शब्द एव उभयोर्लक्षणं प्रमाणम् । तस्मात् महापितृयज्ञे होत्रार्षेयवरणस्य अनुयाजेषु च येयजामहस्य विकल्प एवेति ।

अपितु वाक्यशेषः स्यादन्याय्यत्वाद् विकल्पस्य विधीनामेकदेशः स्यात् । ४ ॥

सिद्धान्तयति । अपितु इति पक्षव्यावृत्तिः । न विकल्पः । नानुयाजेषु इति न–शब्दः वाक्यशेषः वाक्यस्य वाक्यैकदेशस्य अनुयाजशब्दस्य शेषः स्यात्, न तु करोतिशब्दस्य शेषः । नानुयाजेषु अनुयाजभिन्नेषु इत्यर्थः । तथा च अत्रत्यो नञ् न प्रतिषेधार्थकः किन्तु पर्युदासार्थकः अन्योन्याभाववाची । विकल्पस्य अन्याय्यत्वात् । नञः करोतिना अन्वये स्वीकृते विधिनिषेधाभ्यां विकल्पः स्वीकार्यः स्यात् । स चाष्टदोषदुष्टत्वात् अन्याय्यः । एवम् 'न होतारं वृणीते' इत्यत्रापि होतृभिन्नं ऋत्विजं वृणीते इत्यर्थः । तस्मात् विकल्पप्रसङ्गो मा भूत् इति तत्रत्यनञ्सहितमनुयाजादिपदं विधीनां करोति, वृणीते इत्यादीनां एकदेशः स्यात् । एवं च अत्रत्यो नञ् न निषेधार्थकः किन्तु पर्युदासार्थकः इति प्रतिषेधाभावात् न विकल्पप्रसङ्गः । इति पर्युदासाधिकरणसिद्धान्तः । **के.**

* 'प्रतिषेधः प्रदेशे अनारभ्यविधाने च प्राप्तप्रतिषिद्धत्वाद् विकल्पः स्यात्' । यस्य शास्त्रादृते प्राप्तिर्नास्ति, तस्य प्राप्तिमनभ्यनुज्ञाय प्रतिषेधासंभवात् अवश्यं प्रतिषेधेनैव तद्विषयोऽपि विधिरङ्गीकर्तव्यः । स चेदङ्गीकृतः शास्त्रत्वाविशेषात् तुल्यबलत्वम् । अतः सर्वथा अतिरात्रे विकल्पेन भवितव्यम् । तस्मात् द्विरुक्तत्वात् उपदेशातिदेशयोश्च प्राप्तिकालवैषम्यात् प्रकृत्यर्थतैव वरमिति (इति सूत्रार्थः) । **वा.** ३।३।१२।३३ पृ. ८७९, * ननु अत्यन्तदुर्बलोऽपि विधिः तदधीनात्मलाभेन प्रतिषेधेन तुल्यबलो भवति इति '**प्रतिषेधः प्रदेशेऽनारभ्यविधाने च**' इत्यत्र वक्ष्यते । सत्यम्, यस्य शास्त्रमन्तरेण अप्राप्तिरस्ति, तत्रैतदेवम् । यत् पुनः अर्थप्राप्तं निषिध्यते, तत्र विध्यनभ्यनुज्ञयैव लब्धात्मानः प्रतिषेधा बलीयांसो भवन्ति इति तत्रैव वक्ष्यते 'अर्थप्राप्तवदिति चेत्' इति । १।२।१।२ पृ. १०७, * प्रतिषेधः प्राप्तिपूर्वकः । ४।१।३।३ पृ. ११९८. * प्रतिषेधः बाधे प्रमाणम् । **मणि.** पृ. १३. * प्रतिषेधः षोडशिग्रहणस्यातिरात्रे । १०।८।३।६. * प्रसक्तस्य च **प्रतिषेधो** न्याय्यः (न अप्रसक्तस्य) । **भा.** ६।७।१२।२७. * यस्य च प्रतिषेधः तस्य निमित्ते प्रायश्चित्तं ब्रह्महण इव (यस्य पुरुषस्य प्रतिषेधोऽङ्गं तस्य प्रतिषेधातिक्रमणरूपे निमित्ते सति प्रतीकारापेक्षया प्रायश्चित्तविधानं ब्रह्महन्तुरिव युज्यते) । **टुप्.** ९।३।४।९ पृ. १७४८. * विधिप्रतिषेधयोः प्रतिषेधो बलीयान् । प्राप्ते हि विधौ प्रतिषेधो भवति । येन च नाम प्राप्ते यदुच्यते, तत्तस्य बाधकं भवति । **भा.** १०।८।१।२. * **विधिप्रतिषेधौ** अर्थभावनामेव साक्षात् विषयीकुरुतः, तद्द्वारा तु तद्विशेषणानि कारकाणि । **बाल.** पृ. ७४. * **प्रतिषेधेन** प्रकृतिलिङ्गसंयोगो यथा 'न गिरागिरेति ब्रूयात्, ऐरं कृत्वोद्गेयम्' इति । **भा.** १०।४।१।१ पृ. १९०८ । गिरापदस्य प्रतिषिध्यमानस्य यत् कार्यं लक्ष्यते, तत्र इरापदं विधीयते । **टुप्.**

प्रतिषेधाच्चोर्ध्वमवभृथादेष्टेः । ६।५।१२।४२॥

ज्योतिष्टोमे अवभृथात् ऊर्ध्वं आ उदवसानीयायाः इष्टेः अतिपन्नानामपि अग्निहोत्रहोमानां प्रतिहोमो न

विद्यते इति चकारेण पदत्रयस्यानुवृत्तिः । प्रतिषेधात् ' एतया पुनराधेयसंमितयेष्ट्वा अग्निहोत्रं होतव्यम् ' इति प्रागुदवसानीयायाः होमस्य प्रतिषेधात् । इति सिद्धान्तः । **के.**

* **प्रतिषेधस्य** अनिष्टबोधकत्वम् । इष्टविपरीतं चानिष्टम्, यद्यदा यस्येष्टम्, तद्विपरीतं तदा तस्यानिष्टं भवति । **शा.** ३।४।८ पृ. २६५. * प्रतिषेधस्य अर्थवादशून्यस्य श्रुतार्थापत्त्या अर्थवादकल्पकत्वम् । **सु.** पृ. ४१, * प्रतिषेधस्य निन्दया अविनाभावात् अन्यतरदर्शनेन अन्यतरदनुमाय वाक्यं पूरयितव्यम् । पृ. ४१. * प्रतिषेधस्य नियमानुष्ठानात् पुरुषस्य अदृष्टसिद्धिः । **भा.** १०।६।१२।३३. * प्रतिषेधस्य । पशौ आज्यभागप्रतिषेधस्यार्थवादः सोमे आज्यभागप्रतिषेधः । **के.** १०।८।२।५. * प्रतिषेधस्य पुरुषार्थत्वं नाम पुरुषनिष्ठप्रत्यवायजनकक्रियाविषयत्वम् । क्रतुसंबन्धिपुरुषगतायोग्यतासंपादकक्रियाविषयत्वं च क्रतुयुक्तपुरुषधर्मत्वम् । क्रतुगतवैगुण्यापादकक्रियाविषयत्वं शुद्धक्रतुधर्मत्वम् । **भाट्ट.** ३।४।८ पृ. ३१६. * विधिप्रतिषेधयोर्यतरो गुणवान् सोऽनुष्ठीयते । **भा.** १०।८।१।३.

प्रतिषेधेष्वकर्मत्वात् क्रिया स्यात् प्रतिषिद्धानां विभक्तत्वादकर्मणाम् । ६।२।५।२०॥

प्रतिषेधेषु सिद्धान्तिनः प्रतिषेधत्वेन अभिमतेषु ' न कलञ्जं भक्षयेत्, न लशुनम् ' इत्यादिवाक्येषु अकर्मत्वात् भक्षणविरोधिसंकल्पविधिपरत्वात् क्रिया स्यात् फलकामनारहितपुरुषेण भक्षणमनुष्ठेयं स्यात् । अकर्मणां भक्षणविरुद्धसंकल्परूपकर्मप्रतिपादकानां पर्युदासरूपाणां प्रतिषिद्धानां च विभक्तत्वात् परस्परं भिन्नत्वात् । ' नञ्पदसमभिव्याहृतधातोः स्वविरुद्धार्थे लक्षणा यत्र वाक्ये स पर्युदासः प्रवर्तकं वाक्यम्, प्रतिषेधश्च निवर्तकं वाक्यमिति । ' इति **सुबोधिनी** ।

प्रतिषेधेषु नञ्समभिव्याहृतवाक्येषु प्रतिषिद्धानां वर्जनीयानां कलञ्जभक्षणादीनां फलकामनारहितानां क्रिया स्यात् । अकर्मत्वात् कर्मणि प्रत्ययार्थभावनायां नञः व्यवहितत्वेन अन्वयासंभवात् । तथा च भक्षणाभावसंकल्प एव विधीयते । अकर्मणां तु भक्षणाद्यभावानां विभक्तत्वात् भिन्नपदोपात्तत्वात् । अथवा अकर्मणां भक्षणाद्यभावानां विधिसंबन्धस्य विभक्तत्वात् व्याहतत्वात् इति व्याख्येयम् । तथा च नञ्समभिव्याहृतधातुलक्षितो भक्षणाद्यभावसंकल्पः स्वर्गार्थिना अनुष्ठेयः इति पूर्वः पक्षः । अस्मिन् पूर्वपक्षसूत्रे प्रतिषेधप्रतिषिद्धशब्दौ सिद्धान्तमतानुसारेण । इति **कुतूहलम्** ।

शास्त्राणां त्वर्थवत्त्वेन पुरुषार्थो विधीयते, तयोरसमवायित्वात्, तादर्थ्ये विध्यतिक्रमः । २१ ॥

' न कलञ्जं भक्षयेत् ' इत्यत्र कलञ्जभक्षणविरोधिसंकल्पो विधीयते । फलकामनारहितेन तु कलञ्जभक्षणं इच्छया कर्तव्यं इति सूत्रेण पूर्वपक्षे प्राप्ते तुशब्देन तं निरस्यन् सिद्धान्तमाह । प्रजापतिव्रतेषु तावत् ' तस्य व्रतम् ' ' नेक्षेतोद्यन्तमादित्यम् ' ' एतावता हैनसा विमुक्तो भवति ' इति त्रयाणां शास्त्राणां वाक्यानां अर्थवत्त्वेन साकल्यार्थं पुरुषार्थः पुरुषस्य अर्थः फलं यस्मात् इति व्युत्पत्त्या फलसाधनः ईक्षणविरोध्यनीक्षणसंकल्पो विधीयते, इति युक्तं तत्र पर्युदासाश्रयणम् । प्रकृते तु तयोः प्रजापतिव्रतवत् प्रथमतृतीयवाक्ययोः असमवायित्वात् अभावात् तादर्थ्ये तादर्थ्याय शास्त्रार्थलाभाय विध्यतिक्रमः विधेः विधीयमानार्थस्य अतिक्रमः निषेधः स्यात् । तथा च प्रसज्यप्रतिषेध एवात्र । नियोगतः कलञ्जादि न भक्षयितव्यम् । इति सिद्धान्तः । **के.**

* **प्रतिषेधार्थो** नशब्दः ' नातिरात्रे गृह्णाति षोडशिनम् ' इत्यत्र । **भा.** १०।८।३।६.

प्रतिषेधार्थवत्त्वाच्चोत्तरस्य परस्तात् प्रतिषेधः स्यात् । १०।७।१३।४० ॥

ज्योतिष्टोमे शंय्वन्ता प्रायणीया, इडान्ता आतिथ्या चोक्ता । तत्र द्वौ शंयुवाकौ पत्नीसंयाजेभ्यः प्रागुत्तरं च, एवं द्वे इडे प्रधानोत्तरा पत्नीसंयाजोत्तरा चेति । तत्राह उत्तराभ्यां शंय्विडाभ्यां शंय्विडान्तत्वमिति । प्रतिषेधार्थवत्त्वात्, तदैव हि पत्नीसंयाजानां अनुयाजानां च प्रतिषेधस्य अर्थवत्त्वं साफल्यं संभवति, न पूर्वशंय्विडान्तत्वे । शंय्वन्ता इडान्ता इत्यनेन तु उत्तरस्य शंय्विडस्य परस्तात्

यत् कर्तव्यम्, तस्य प्रतिषेधः स्यात् । तस्मात् उत्तराभ्यां शंय्विडाभ्यां शंय्विडान्तत्वमिति पूर्वः पक्षः । चकारः पूर्वाधिकरणपूर्वपक्षहेतुः दृष्टान्तितः पत्न्यनुयाजप्रतिषेधानर्थक्यवत् प्रतिषेधार्थवत्त्वात् इति ।

प्राप्तेर्वा पूर्वस्य वचनादतिक्रमः स्यात् । ४१ ॥

वाशब्दः पूर्वपक्षव्यावृत्तिमाह । पूर्वस्य शंय्विडस्य ग्रहणं नोत्तरस्य शंय्वन्ता इडान्ता इति वचनात् प्राप्तेः प्रथमोपस्थितत्वात्, प्रथमत्यागे कारणाभावात् । पत्नीसंयाजानुयाजप्रतिषेधस्तु नित्यानुवाद इत्युक्तम् । पूर्वस्य शंय्विडस्य अग्रहणे तु अतिक्रमः स्यात् प्राप्तस्य समाप्तिनियामकस्य अतिक्रमः कृतः स्यात् । तच्चायुक्तम् । तस्मात् पूर्वाभ्यां शंय्विडाभ्यां शंय्विडान्तत्वमिति सिद्धान्तः ।

प्रतिषेधस्य त्वरायुक्तत्वात् तस्य च नान्यदेशत्वम् । ४२ ॥

इतश्च पूर्वशंय्विडान्तत्वं स्यात् । प्रतिषेधस्य त्वरायुक्तत्वात् । त्वरायुक्तोऽयं प्रतिषेध उक्तः । ' ते प्रायणीयं निरवपन् । तच्छंय्वन्तमासीत् । अथासुरा यज्ञमायन् ततो यज्ञस्तत्वरे तमेवं कृत्वा त्वरितमाद्रियन्ते ' इति, 'आतिथ्यं निरवपन्, तदिडान्तमासीत्, अथासुरा यज्ञमायन्, ततो यज्ञस्तत्वरे इति, तदिडान्तमेव कृत्वा त्वरितमाद्रियन्ते ' इति । त्वरायुक्तत्वं च पूर्वशंय्विडान्तत्वे एव संभवति । तस्मात् तस्य पत्नीसंयाजादिप्रतिषेधस्य नान्यदेशत्वं नोत्तरदेशत्वम्, किन्तु प्राग्देशत्वमेव । ततश्च पूर्वशंय्विडान्तत्वमेवेति सिद्धान्तः । **के.**

* **प्रतिषेधाख्यशब्दभावनानिरूपणम्** । निवारणारूपाऽपि शब्दभावना निवर्तनारूपसामान्यतः निवारणारूपविशेषतश्च विधिवदेव प्रसाध्या । साऽपि च निवृत्तिहेतुः निवर्तयितुर्धर्मरूपा ' अहमेनं निवर्तयामि ' इति, निवर्तयितुः मानसप्रत्ययवेद्या प्रवर्तनावत् । साऽपि च न्यूनोत्तमसमविषयत्वेन त्रेधा लोकेषु धर्मः, वेदे च पुरुषाभावात् तदीयाशयविशेषरूपतत्त्रयासंभवात् लिङादेरेव निवर्तकत्वात् तद्धर्मभूता चतुर्थी अपि विधा अङ्गीकार्या । सैव च प्रतिषेधः निषेधः इति च गीयते । लोके तु तदुभयव्यवहारो विधिव्यवहारवत् भाक्त एव । तत्र तु एतावान् विशेषः, न निवर्तनायां विधिनिमन्त्रणेतिवत् प्रवर्तनायां शक्तिग्राहकमनुशासनमस्ति । तथापि अनादौ संसारे नञुपहितलिङादिश्रवणानुविधायिनीं प्रयोज्यवृद्धनिवृत्तिं दृष्ट्वा आवापोद्वापाभ्यां नञुपहितलिङादेः निवृत्तावेव शक्तिग्रहे प्रसक्ते ' गुरुणा निवर्तकेन निवर्तितोऽहं निवर्ते ' इत्यादि गुरौ निवर्तकत्वव्यवहारान्यथाऽनुपपत्त्या प्रवर्तनायामिव प्रवर्तकत्वान्यथाऽनुपपत्त्या तद्व्यापारभूतायां निवर्तनायां शक्तिग्रहो भवति व्युत्पित्सोः । तदुक्तं तद्भूताधिकरणवार्तिके ' **विधायकैरसंयुक्तो नहि नञ् प्रतिषेधकः** । ' (२०८) । **विधिना युज्यते यत्र न हन्यान्न पिबेदिति** । ' (३१४) '**तत्राभावार्थता नैव स्वयं पुंसो रुणद्धि हि** । ' (३१५) इति । अत्र नञो निवर्तनायां शक्तिरुक्ता । नञ्टीकायां (**वा.** १।३।३।७ पृ. २१२ पं. ८–१०) तु ' प्रतिषेधविधिपरो हि विधायकः ' इत्यादौ 'प्रत्ययावृत्तिलक्षणो वाक्यभेदप्रसङ्गः ' इत्यन्ते ग्रन्थे विधायकपदेन लिङ एव प्रतिषेधार्थता इत्यपि पक्ष उक्तः । तथा च निषेध्यलिङ्विवक्षायां तस्यैवावृत्तिरुक्ता न नञः । ' येषां तु ' इति ग्रन्थे तु पूर्वमतमपि उक्तम् । तत्र नञादेरभावविषयायाः लिङादेश्च प्रवर्तनाविषयायाः शक्तेः त्यागस्याविशेषेऽपि तथा नञादेः निवर्तनावाचित्वपक्षे तत्समभिव्याहृतलिङादेः रागादिप्राप्तप्रवर्तनानुवादकत्वस्य लिङादेश्च निवर्तनावाचित्वपक्षे नञादेः तत्फलीभूतार्थप्रवृत्त्यभावानुवादकत्वस्याविशेषेऽपि ' अमानोनाः प्रतिषेधे ' इत्यव्ययचतुष्टये शक्तिचतुष्टयं कल्प्यं इत्याद्यपक्षे लाघवम् । लिङ्लोट्पञ्चमलकाराणां तव्यादीनां च अनेकेषां कृत्यानां चतुष्टयाधिकशक्तिकल्पनापत्त्या गौरवात् न प्रत्ययशक्तिकल्पनापक्षो युक्त इति नञि शक्तेः वार्तिककृता द्विरभिधानेन तत्रादरं सूचयता ध्वनितमिति । **बाल.** पृ. ७८–७९.

* **प्रतिषेधविधिः** नञर्थपर्यवसायी । **बृहती.** पृ. २८.

* **प्रतिष्ठा** गायत्री । पादेषु अक्षराणि ८।७।६। उदा० 'आपः पृणीत भेषजम्' (ऋसं. १०।९।७)। **के.**

* **प्रतिष्ठाकामं** त्रयस्त्रिंशेनातिरात्रेण याजयेत् । **भा.** १०।४।१०।२०, * **प्रतिष्ठाकामस्य** एकविंशतिमनुब्रूयात् सामिधेनीः दर्शपूर्णमासयोः । द्वाविंशतिं

वा अनुब्रूयात् । १०।५।८।२७. * प्रतिष्ठाकामस्य एकविंशतिरात्रः कातीये उक्तः ! बाल. पृ. ३४. * प्रतिष्ठाकामस्य मार्तिकेन प्रणयेत् । भा. ४।३।२।४.

* **प्रतिसमाधेयाङ्ग**वैकल्यस्याधिकारः अग्निहोत्रादिषु कर्मसु । ६।१।९।४१. **मीको.** पृ. २८२ ' अधिकारः अग्निहोत्रादौ० ' इत्यत्र द्रष्टव्यम् ।

* **प्रतिहर्ता** उद्गातुः पुरुषः । तृतीयवर्गस्थोऽयम् । अयं तृतीयी– तृतीयांशभाक् । चतस्रो गा लभते । **के.** ३।७।१७. * प्रतिहर्ता गाता, न उद्गाता । ' गातारौ हि प्रस्तोतृप्रतिहर्तारौ, नोद्गातारौ ' । वा. ३।५।८।२६ पृ. १००२. * ' प्रतिहर्ता प्रतिहरति ' प्रतिहारं नाम सामावयवं पठति । वि. ३।७।९, * यदि **प्रतिहर्ता** अपच्छिद्येत, सर्वस्वं दद्यात् । ६।५।१७, * ' प्रतिहर्तारं नेष्टा दीक्षयति ' । ३।७।१७. * प्रतिहर्तुः अपच्छेदस्य परत्वे पूर्वप्रयोगे सर्वस्वं दत्त्वा पुनःप्रयोगेऽपि तद्देयम् । भाट्ट. ६।५।१० पृ. ३०६.

* प्रतिहर्तृजघन्यत्वे पुनःप्रयोगबाधः अपच्छेदे । बाल. पृ. ११५–११६.

* **प्रतिहारः** नाम पाञ्चभक्तिकस्य साम्नश्चतुर्थोऽवयवः सातभक्तिकस्य साम्नस्तु पञ्चमोऽवयवः । **के.** (३।५।८).

प्रतिहोमश्चेत् सायमग्निहोत्रप्रभृतीनि हूयेरन् । ६।५।१३।४३ ॥

यत्र अननुष्ठितानामग्निहोत्रहोमानां परिगणनपूर्वकं प्रतिहोमा अनुष्ठीयन्ते, तत्र कः क्रमः इति विचारे आह, प्रतिहोमः चेत् क्रियेत, तदा अग्निष्टोमे सायमग्निहोत्रप्रभृतीनि हूयेरन् सायंकालीनहोममारभ्य परिगणनं कृत्वा प्रतिहोमः कर्तव्यः, न तु प्रातर्होममारभ्य इति सिद्धान्तः । मध्याह्नादौ हि प्रायः अवभृथो भवति । तेन प्रातर्होमानधिकार एव । सायंहोमाधिकारस्तु प्राप्नोति । अतः सायंहोममारभ्य स्यादनुष्ठानम् । कृत्वाचिन्तेयम्, अग्निष्टोमादन्यत्र उपयुक्ता भविष्यतीति । **के.**

* **प्रतिहोमाः** अतिक्रान्तहोमाः । प्रवासादिना नित्याग्निहोत्रहोमाभावे सति प्रतिसमागमनोत्तरं यावन्तो होमाः अतिक्रान्ताः ते सर्वे युगपत् क्रियन्ते । **के.** (६।५।१२). * प्रतिहोमा नानुष्ठेयाः अवभृथोत्कर्षेऽपि दीक्षाया अनुवृत्तत्वात् होमादिनिषेधानुवर्जनात् । वि. ६।५।१२. * प्रतिहोमा नानुष्ठेयाः उदवसानीयोत्कर्षेऽपि । ६।५।१२।४२. **मीको.** पृ. १११६ ' उदवसानीयोत्कर्षेऽपि प्रतिहोमानां ' इत्यत्र द्रष्टव्यम् । * प्रतिहोमा नानुष्ठेया ज्योतिष्टोमोत्कर्षे । ६।५।११।४०–४१. **मीको.** पृ. १८४४ ' ज्योतिष्टोमोत्कर्षे प्रतिहोमाः० ' इत्यत्र द्रष्टव्यम् । * प्रतिहोमाः षोडशिसंस्थायां प्रातरग्निहोत्रमारभ्य कर्तव्याः । ६।५।१४. ' षोडशिसंस्थायां प्रातरग्निहोत्रमारभ्य० ' इत्यत्र द्रष्टव्यम् । * **प्रतिहोमानां** क्रमः होमक्रमेणैव । वि. ६।५।१४.

* **प्रतिहोमानुष्ठानं** प्रातरग्निहोत्रमारभ्य षोडशिसंस्थे प्रातरग्निहोत्रप्रभृतीनि अतिपन्नानि इति प्रातरग्निहोत्रादेव समारभ्याणि । भा. ६।५।१४।४४.

प्रतिहोमपक्षे सायमग्निहोत्रमारभ्यानुष्ठानम् ॥

प्रतिहोमश्चेत् सायमग्निहोत्रप्रभृतीनि हूयेरन् । ६।५।१३।४३ ॥

भाष्यम्— एतेष्वेवोदाहरणेषु भवति संशयः किं प्रतिहोमे सायमग्निहोत्रप्रभृतीनि आरभ्येरन्, उत प्रातरग्निहोत्रप्रभृतीनीति । ननु नास्त्येव प्रतिहोम इति स्थितम् । उच्यते । अस्तीति कृत्वा चिन्तयामः । कृत्वाचिन्तेयम् । अन्येषु सदृशन्यायेषूदाहरणेषु अस्याः प्रयोजनमस्तीति चिन्त्यते । किं प्राप्तम् ? अनियमः । अर्थकृतत्वात् । एवं प्राप्ते, ब्रूमः । यदि प्रतिहोमः क्रियते, सायमग्निहोत्रादारभ्यातिपन्नानि, तेनैवानुपूर्व्येण प्रतिहोतव्यानीति ।

सोम— प्रासङ्गिकी **संगतिः** । यद्यपि ' प्रातस्तु षोडशिनि ' इति सूत्रान्तरकरणात् भाष्ये पृथगेव षोडशिविचारः कृतः, तथापि न्यायस्यैकत्वात् उदाहरणभेदात् फलभेदमात्रे एव सूत्रभाष्ययोस्तात्पर्यम् ।

वि— ' कृत्वाचिन्ता क्रमो नो चेत् प्रतिहोमेऽतिपातिनः । क्रमोऽस्त्वग्निष्टोमकादौ सायं षोडशिनीतरः ॥ ' षोडशिनि इतरः क्रमः प्रातरारभ्य ।

भाट्ट— यदा अवभृथोत्कर्षे प्रतिहोमः, तदा कृत्वाचिन्तया विचार्यते । अग्निष्टोमसंस्थाकज्योतिष्टोमे अवभृथस्य सायंकालात् पूर्वमेव कर्तव्यत्वेन तदुत्तरं रात्रौ

करणे एकस्यैव सायंहोमस्य दीक्षाविमोकोत्तरं गौणकाले करणं आप्रातराहुतेः सायंहोमस्य गौणः कालः वाचनिकः, प्रातर्होमस्य सायंकालावधिवत् । गौणकालस्याप्यतिक्रमे स्वकालक्रियमाणप्रातर्होमेन सह समस्यहोमविधया तन्त्रेण करणम् । अवभृथोत्कर्षेण अनेकहोमकालातिपत्तौ च सर्वान् सायंहोमान् प्रातर्होमांश्च पक्षहोमविधिना समस्यहोमविधिना च स्वकालक्रियमाणहोमेन सह तन्त्रेण कुर्यात् । **न च** अतिपत्तिक्रमेण होमानां क्रमेणैव करणं **शङ्क्यम्**, एकदेशकालकर्तृत्वेन समस्यहोमपक्षहोमविधिवैयर्थ्यप्रसङ्गेन चानेकदर्शपूर्णमासातिपत्तिनिमित्तकपथिकृद्वदेव पृथक्करणानुपपत्तेः । अत एव सर्वान् सायंहोमान् सायंकाले प्रातर्होमांश्च प्रातःकाले कुर्यादित्यपास्तम् । स्वकालक्रियमाणहोमात् पूर्वमेव अतिपन्नहोमानां कर्तव्यत्वात् । एवं च षोडशिस्तोत्रवति क्रतौ तस्य समयाध्युषितकालीनत्वेन अवभृथस्य रात्रावेव क्रियमाणत्वात् तस्य द्वितीयदिने उत्कर्षे प्रातर्होमस्यैव पूर्वोक्तविधया अनुष्ठानम्, अनेकहोमकालातिपत्तावपि तथैव । **न च** दर्शपूर्णमासयोः पौर्णमासोपक्रमयोरेव मिलितयोः फलसाधनत्ववत् सायमुपक्रमयोरेव सायंप्रातर्होमाभ्यासयोः एकफलसाधनत्वस्य कल्पसूत्रेष्वभिधानात् षोडशिना सायंहोमे अनधिकारे कथं प्रातर्होमेऽप्यधिकार इति **वाच्यम्** । ' प्रातस्तु षोडशिनि ' इति जैमिनिसूत्रकृद्वचनादेव सायमुपक्रमकत्वस्य नैयत्याभावप्रतीतेः । अत एव कृत्वाचिन्तोद्घाटनेऽपि यदि उदवसानीयायाः रात्रौ करणम्, तदा प्रातर्होमानुष्ठानं जैमिनिमते नानुपपन्नम् ।

मण्डन— ' होमाश्चेत् सायमादितः । ' १४.

शंकर— ' प्रकृतौ सायमादितः । ' १५.

* **प्रतीची** दिक् सायंकालीनार्घ्यादौ प्राप्ता । वि. ३।४।६.

* **प्रत्यक्षं** अनुमानात् बलवद्भवेत् । भा. ३।५।८।२३. * प्रत्यक्षमेव हि प्रत्यभिज्ञायते नान्यत् । ऋजु. पृ. २४७. * प्रत्यक्षं च अनुमानात् बलीयः । भा. ३।८।१०।२१, * प्रत्यक्षं चानुमानाद् बलीयः । आनुमानिकोऽस्य (कामस्य) स्वर्गकामेन एकवाक्यभावः प्रत्यक्षस्तु कामवचनेन । ४।३।९।२२, * प्रत्यक्षं न अव्यपदेश्यम् । १।१।५।५ पृ. ३४, * प्रत्यक्षं परोक्षाद् बलीयः । ३।६।३।१०. * प्रत्यक्षं प्रमाणं लौकिकमेव । बाल. पृ. ८. * प्रत्यक्षं वर्तमानकालाऽऽकलितसंनिहितदेशावस्थितार्थमात्रविषयकम् । **ऋजु.** पृ. ७३. * प्रत्यक्षं वर्तमानमात्रविषयत्वात् धर्मस्य चातथात्वात् न धर्मे प्रमाणम् । नाप्यनुमानम् । वि. १।१।४. * प्रत्यक्षं विद्यमानविषयम् । **ऋजु.** पृ. ६५. * प्रत्यक्षं व्यभिचरति, शुक्तिका हि रजतवत् प्रकाशते यतः । तन्मूलत्वाच्चानुमानादीन्यपि । **भा.** १।१।५।५ पृ. २६. * प्रत्यक्षं षड्विधं चाक्षुष– श्रौत– त्वाच– घ्राणज– रासन– मानसभेदात् । **बाल.** पृ. ८. * प्रत्यक्षं संभावितभ्रममिति प्रत्यक्षमेव दुर्बलं (अनुमानात्) मन्यामहे । **बृहती.** पृ. २०४. * प्रत्यक्षम् । ' सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षम्' सूत्रांशः १।१।४।४। सतीन्द्रियार्थसंबन्धे या पुरुषस्य बुद्धिर्जायते, तत् प्रत्यक्षम् । **भा.**, तत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म सत्प्रत्यक्षम् । यद्विषयं ज्ञानम्, तेनैव संप्रयोगे इन्द्रियाणां पुरुषस्य बुद्धिजन्म सत् प्रत्यक्षम् । इन्द्रियमनोऽर्थसंनिकर्षो हि सम्यग्ज्ञानस्य हेतुः । प्रयत्नेनान्विच्छन्तो न चेद्दोषमवगच्छेमहि प्रमाणाभावात्, अदुष्टमिति मन्येमहि । इति वृत्तिकारमतम् । १।१।५।५ पृ. २६–२८, * नहि **प्रत्यक्षमनुपपन्नं** नामास्ति । १।३।२।३ पृ. १८५, * **प्रत्यक्षोऽपि** (' वायव्यं श्वेतमालभेत ' इति) श्वेतशब्दः छागमेव परिच्छिन्द्यात्, नान्यं पशुमिति । १०।२।३०।६९. * **प्रत्यक्षेण** अनुमानं बाध्यते (अप्राप्तबाधः) मृगतृष्णादिप्रत्ययाश्च । **वा.** ३।३।७।१४ पृ. ८५९. * प्रत्यक्षेण अनुमानस्य उत्पत्तिप्रतिबन्धलक्षणो बाधो भवति । **सु.** पृ. १३७. * प्रत्यक्षेण कार्यापत्तिः यथा 'नैवारश्चरुः' । अत्र विकारतद्धितेन नीवाराणां चरुप्रकृतित्वोक्तेः प्रत्यक्षसहकृतविधिना प्रदेयप्रकृतित्वलक्षणव्रीहिकार्यापत्तिः । **बाल.** पृ. १३०. * प्रत्यक्षेण कार्यापत्तिर्यथा ' नैवारश्चरुर्भवति ' इति । व्रीहीणां कार्ये नीवारा वर्तन्ते । व्रीहयः पुरोडाशं निर्वर्तयन्ति, पुरोडाशो यागम् । एवं नीवाराश्चरुम्, चरुर्यागं इत्युभयेषामपि हविर्निर्वर्तकत्वं प्रत्यक्षम् । **टुप्.** १०।४।११ पृ. १९०८. * प्रत्यक्षेण प्रत्यक्षाभासो बाध्यते ।

अयं नित्यः प्राप्तबाधः । बाल. पृ. १३१. * **प्रत्यक्षैः** श्रुत्यादिभिः अतिदेशप्राप्ताः श्रुत्यादयः बाध्यन्ते । वा. ३।३।७।१४ पृ. ८४१. * **प्रत्यक्षस्य** धर्मप्रमापकत्वाभावः । १।१।४. * **प्रत्यक्षे** इन्द्रियस्य करणत्वं तत्संबन्धस्य च व्यापारत्वम् । मणि. पृ. १९.

प्रत्यक्षे किमनुमानमिति न्यायः । प्रत्यक्षानुमानयोश्चाविलम्बितप्रतीतिरूपत्वात् प्रत्यक्षं बलीय इति । साहस्री. १६२.

* प्रत्यक्षे लभ्यमाने न युक्तमानुमानिककल्पनम् । वा. २।२।३।६ पृ. ४८८. * **प्रत्यक्षया** विरुद्धया स्मृत्या अनुमिता स्मृतिर्बाध्यते । अत एवाह 'आचारात्तु स्मृतिं ज्ञात्वा स्मृतेश्च श्रुतिकल्पनम् । तेन द्व्यन्तरितं तेषां प्रामाण्यं विप्रकृष्यते ॥' वि. वार्तिकमतेन १।३।५ वर्णकं २.

* **प्रत्यक्षानुमानाभ्यां** यत् कर्तव्यं निर्णीयते, तत् आरब्धं सत् समापनीयमेवेति न नियमः । असमापने दृष्टानिष्टप्रसङ्गे तु तत् समापनीयमेव इति तु प्रत्यक्षानुमानाभ्यामेव सिध्यति । के. (६।२।४). * **प्रत्यक्षानुमानयोरविषयो** धर्मः । वि. १।१।२. * प्रत्यक्षानुमानयोश्च प्रत्यक्षं बलीयः । बृहती. पृ. २१२. * प्रत्यक्षानुमानयोश्च शीघ्रप्रवृत्ततया प्रत्यक्षं बलीय इति सकलवादिनां सिद्धम् । अनुमाने तु संबन्धव्याप्तिग्रहणस्मरणपक्षधर्मताऽध्यवसानलक्षणा सामग्री बहुतरविलम्बसंपादनीया । प्रत्यक्षे तु नार्थान्तरपरिग्रहसव्यपेक्षा का चिदस्ति । ऋजु. पृ. २१२. * प्रत्यक्षानुमानयोः शीघ्रमन्थरगामित्वकृतो बलाबलभावः । सोम. ७।४।२.

* **प्रत्यक्षानुमानातिरिक्तं** प्रमाणं शाक्यानां नेष्टम् । रत्नाकरः . अनुमानं श्लो. १५५.

* **प्रत्यक्षावगतिर्नाम** अदुष्टो हेतुः । बृहती. पृ. १३०.

* **प्रत्यक्षादि** धर्मे न प्रमाणम् । भा. १।१।४।४. * **प्रत्यक्षादीनि** वस्त्ववबोधार्थानि पञ्च प्रमाणानि । वा. २।१।२।५ पृ. ३९०. * **प्रत्यक्षादीनामन्यतमं** अयं अस्यापूर्वस्य शेषः अयमस्येत्यत्र न प्रमाणम्, किन्तु श्रुतिरेव प्रमाणम् । भा. ७।१।१।१ पृ. १५२४.

* **प्रत्यक्षादावपि** द्वयी एव गतिः प्रमाणस्वरूपं प्रमाणाभासं च । न तत्र यत् प्रमाणं तत्कदाचिदपि प्रमाणाभासो भवति । योऽपि तदाभासः सोऽपि नैव प्रमाणं भवति । नित्यं च प्रमाणाभासबाधः, न प्रमाणस्य । वा. ३।३।७।१४ पृ. ८२९.

* **प्रत्यक्षाद्यविषये** शब्द एव प्रमाणम् । 'न च अतिक्रान्तप्रत्यक्षविषये अर्थे शब्दमन्तरेण परिच्छेदोऽवकल्पते' । भा. ३।३।७।१४ पृ. ८४४–४५.

* **प्रत्यक्षादिपञ्चकेन** (प्रत्यक्षानुमानोपमानशब्दार्थापत्तिरूपेण) प्रत्यक्षादिपञ्चकावगतेन वा शब्देन दर्शपूर्णमासयोः सिद्धमुपकारं स्वपदस्ववाक्यस्वप्रकरणप्रकरणान्तरेषु नोपलभामहे । वा. ३।३।४।११ पृ. ८१८.

* प्रकरणादङ्गता स्यात् वाक्यसंयोगाद्वा प्रत्यक्षोपकारदर्शनाद्वा । भा. १०।६।१०।३०.

प्रत्यक्षोपदेशाच्चमसानामव्यक्तः शेषे । ३।५।११।३३ ॥

ज्योतिष्टोमे श्रूयते 'प्रैतु होतुश्चमसः प्र ब्रह्मणः प्रोद्गातॄणाम्' इति । तत्रैष संशयः किं चमसेषु होमाभिषवकर्तारो वषट्कर्तारश्च भक्षयेयुः उत न इति । एवं समाख्यादिरूपेषु निमित्तेषु सत्सु नैमित्तिको भक्षो भवतीति निरूप्य इदानीमेतेषां निमित्तानां यत्र समवायो भवति, तत्र नैमित्तिको भक्षः किं विकल्पेन स्यात् अथवा समुच्चयेन इति प्रसङ्गान्निरूप्यते । अत्रायं पूर्वपक्षिणोऽभिसंधिः, नैमित्तिके भक्षणे विकल्प इति । कुतः? एकार्थत्वाद्भक्षणानाम् । अवशिष्टस्य हव्यस्य प्रतिपत्तिरूपः संस्कारः । स च सर्वेषामविशिष्ट इत्यतो विकल्पेन भक्षः स्यादिति । एवं प्राप्ते, उच्यते । न तावद्विकल्पः संभवति, तस्याष्टदोषदुष्टत्वेनान्याय्यत्वात् । समुच्चयस्तर्हि भक्षाणां भविष्यतीति चेत्, सोऽपि न संभवति, एकार्थत्वात् । एकेन निमित्तेन भक्षणरूपे कृते सति इतरस्य निरवकाशत्वात् । अतः पारिशेष्याद्बाधोऽभ्युपेतव्यः ।

तत्र किं समाख्यानिमित्तो भक्षः इतरयोः वषट्कारहोमाभिषवनिमित्तयोः भक्षयोः बाधकः स्यात् इतरौ वा बाधकौ इति संशये, समाख्यानिमित्त इतरयोर्बाधकः स्यात् । कुतः? 'प्रैतु होतुश्चमसः' इति विशेषविषय-

त्वात्, इतरयोश्च सामान्यविषयत्वात् । सामान्याच्च विशेषो बलवानिति स एव तयोर्बाधक इति । ननु इतरयोः प्रत्यक्षोपदिष्टत्वेन बलीयस्त्वात् अस्य च समाख्यया कल्प्यमानत्वेन दौर्बल्यात्तावेव बाधकौ स्यातामिति । उच्यते । प्रत्यक्षोपदिष्टत्वेन बलीयस्त्वमनयोः, तथापि 'आनर्थक्यप्रतिहतानां विपरीतं बलाबलम्' इति न्यायेन समाख्यानिमित्तस्यैव भक्षणस्य बलीयस्त्वात् स एवेतरयोर्बाधकः स्यात् । किञ्च अवश्यं चमसान् विहायान्यत्र निरवकाशत्वादितरयोश्च ग्रहेषु सावकाशत्वात् स एव बलीयानिति । तस्मात् समस्तेषु चमसिनो भक्षयेयुरिति । एवं प्राप्ते, अभिधीयते ।

स्याद्वा कारणभावादनिर्देशश्चमसिनां कर्तुस्तद्वचनत्वात् । ३४ ॥

चमसेषु वषट्कर्तारो होमाभिषवकर्तारश्च भक्षयेयुः, भक्षणनिमित्तसद्भावात् । तथाहि 'वषट्काराच्च भक्षयेत् ।' ३।५।१०।३१ इत्यत्र वषट्कारस्य, 'होमाभिषवाभ्यां च ।' ३।५।११।३२ इत्यत्र होमाभिषवयोश्च समुदितयोर्भक्षणनिमित्तत्वमुक्तम् । तच्च निमित्तद्वयं चमसेष्वपि अस्ति । अतो निमित्तसद्भावात् चमसेष्वपि वषट्कर्तॄणां च नैमित्तिको भक्षः स्यादिति । किञ्च निवर्तकशास्त्रादर्शनात् सर्वत्र निवृत्तिर्भवति । न हि किञ्चित् चमसेषु वषट्कारहोमाभिषवनिमित्तस्य भक्षस्य निवर्तकशास्त्रमस्ति । 'प्रैतु होतुश्चमसः' इत्येतदेव निवर्तकं भविष्यतीति चेत्, न, समाख्यानिमित्तभक्षणमात्रप्राप्तौ एवास्य व्यापारो नान्यनिवृत्तौ तात्पर्यमस्ति, त्रिदोषदुष्टपरिसंख्याप्रसङ्गात् । ननु 'प्रैतु होतुश्चमसः' इति विशेषविषयत्वेन प्रवृत्तत्वादितरयोश्च सामान्यविषयत्वात् समाख्यानिमित्तको भक्षो बलवानित्युक्तम् । मैवम्, 'वषट्कर्तुः प्रथमभक्षः' इत्यस्यापि विशेषविषयत्वात् । तथाहि, न तावद्वषट्कर्तृसामान्यं किञ्चिदस्ति, वषट्कर्तृशब्दस्य कृदन्तत्वेन यौगिकत्वात् यौगिकानां च संनिहितविशेषवाचित्वात् । अतो वषट्कर्तृविशेषनिमित्तत्वेन प्राथम्यविशिष्टं नैमित्तिकं भक्षणं विधीयते । तदपि विशेषवचनमेवेति समाख्यानिमित्तो भक्षो विशेषविहितत्वात् इतरयोर्बाधक इत्यस्ति । किञ्च असति संभवे सर्वत्र बाधोऽङ्गीक्रियते । तेन चात्रैकस्मिन् नैमित्तिके भक्षे कृते इतरयोरसंभवोऽस्ति । सोमस्य सावयवत्वेन शेषसद्भावात् । विशेषतस्तिक्तकटुकत्वात् 'अल्पं भक्षयेत्' इति वचनाच्च । अतः प्रतिपत्त्यपेक्षायां सत्यां यावन्तो नैमित्तिका भक्षास्तेषां प्रतिपत्तिः कर्तव्येति । तस्माद्भक्षणशब्दा इति सिद्धम् ।

प्रयोजनम्— पूर्वपक्षे चमसेषु चमसिभिरेव भक्षयितव्यम् । सिद्धान्ते तु वषट्कारहोमाभिषवकर्तृभिरपीति । **सूत्रं तु** स्याद्वा चमसेष्वपि होमाभिषवादिनिमित्तोऽपि भक्षः कारणस्य वचनस्य भावात् । अनिर्देशात्, न हि चमसिनामेव चमसेषु निर्देशः अन्येषां निषेधः, चमसिभक्षणकर्तव्यतामात्रविधायकत्वात्, समाख्यावचनिकस्येति । तौता.

प्रत्यक्षोपदेशाच्चमसानामव्यक्तः शेषे । ३।५।१२।३३ ॥

सोमचमसभक्षे समाख्या वषट्कारः होमाभिषवसमाहारश्चेति निमित्तानि । तत्र निमित्तसंनिपाते विकल्पो वा कस्य चिद्बाधो वा समुच्चयो वा इति संदेहे न समुच्चयः इति पूर्वपक्षप्रतिपादकमिदं सूत्रम् । चमसानां चमसिनः प्रति 'प्रैतु होतुश्चमसः' इत्येवमादिभिः विशेषवचनैः प्रत्यक्षतः विशेषतः उपदेशात् चमसिनामेव विशेषविहित एव भक्षः स्यात्, न चमसिनां सामान्येनोपदिष्टो भक्षः स्यात् । अव्यक्तः सामान्येनोपदिष्टस्तु भक्षः शेषे चमसिव्यतिरिक्ते एव स्यात् । तथा च न निमित्तसमुच्चयः । एवं च ग्रहेषु वषट्कारेण होमाभिषवाभ्यां च प्राप्नुवतोर्भक्षयोः तुल्यत्वात् विकल्पः स्यात् । समाख्यायास्तु प्रकृते निरवकाशत्वेन प्रबलत्वात् तया इतरनिमित्तबाधः इति पूर्वः पक्षः ।

स्याद्वा कारणभावादनिर्देशश्चमसानां कर्तुस्तद्वचनत्वात् । ३४ ॥

पूर्वपक्षस्य निषेधार्थः सूत्रे वाशब्दः । न विकल्पो न वा बाधः, किन्तु समुच्चय एव । वषट्कर्तुः होमाभिषवकर्तुश्च स्यादेव चमसेषु भक्षः । कारणभावात्, वषट्कारादेः कारणस्य भक्षनिमित्तस्य भावात् विद्यमानत्वात् । वषट्कारादेरपि प्रत्यक्षोपदेशेनैव प्राप्तिः ।

समाख्याऽपि निरवकाशत्वात् प्रबलैव तस्मात् समुच्चयः । 'प्रोद्गातॄणां' इत्यादेस्तु तद्वचनत्वात् उद्गात्रादेः भक्षवाचकत्वात् तेन वचनेन चमसानां कर्तुः होत्रध्वर्य्वादेः अनिर्देशः न निर्देशः, न निष्कर्षः, न बाधः, एकस्य वाक्यस्य विधिनिषेधोभयपरत्वाभावात् ।

चमसे चान्यदर्शनात् । ३५ ॥

सिद्धान्ते हेत्वन्तरोपन्यासार्थं सूत्रमिदम् । 'चमसांश्चमसाध्वर्यवे प्रयच्छति, तान् स वषट्कर्त्रे हरति' इति वचने, चमसे अन्येषां चमसिनां दर्शनात् । एकस्य हि वषट्कर्तुः एक एव चमस उपहर्तव्यः । अत्र अनेके चमसा उपहर्तव्या उक्ताः । तस्मात् चमसेषु अनेके भक्षयितारः इति ज्ञायते । तेन भक्षनिमित्तानां समुच्चय एव । अन्यदर्शनात् इत्यत्र अन्येषां दर्शनात् इति समासः । चकारो हेत्वन्तरार्थः । **के.**

* **प्रत्यक्षोपदेशस्य** शीघ्रबुद्धिजनकतया कल्प्यातिदेशात् प्रबलत्वम् । **वि.** २।३।८.

* **प्रत्यक्षज्ञानपरिच्छेदः** । न तावत् 'इन्द्रियजन्यं ज्ञानं प्रत्यक्षम्' इति लक्षणम् । ज्ञानमात्रस्य मनोजन्यत्वात् । अतः 'इन्द्रियार्थसंबन्धजन्यं ज्ञानं प्रत्यक्षम्' इति सूत्रकारः । न चेश्वरप्रत्यक्षे अव्याप्तिः ईश्वरज्ञानस्य अनुमितिविलक्षणत्ववत् प्रत्यक्षविलक्षणत्वात् इति **जीर्णाः** ।

यद्वा ज्ञानाकरणकं ज्ञानं प्रत्यक्षम् । अनुमित्युपमितिशाब्दबोधार्थापत्तिस्मृतीनां ज्ञानकरणकत्वात् । न च सविकल्पकप्रत्यक्षे विशिष्टवैशिष्ट्यप्रत्यक्षे चाव्याप्तिः, तयोर्निर्विकल्पादिज्ञानकरणकत्वात् इति **वाच्यम्** । व्यापारवदसाधारणकारणस्य करणतया तज्जन्यत्वे सति तज्जन्यजनकस्य व्यापारतया च निर्विकल्पकादेः कारणत्वेऽपि अकरणत्वात् ।

जन्यज्ञानजन्यमात्रवृत्तिजातिशून्यज्ञानत्वं वा । सर्वत्र प्रत्यक्षे इन्द्रियस्य करणत्वात् तत्संबन्धस्य व्यापारत्वाच्च तादृशानामनुमितित्वादीनां प्रत्यक्षे अभावात् लक्षणसंगतिः । सविकल्पकत्वादिकं तु न जातिः । तच्च प्रत्यक्षं निर्विकल्पकं सविकल्पकं चेति द्वेधा । तत्र प्रत्यक्षमात्रे महत्त्वं हेतुः । तच्च द्रव्यप्रत्यक्षे समवायेन, गुणक्रियाजातिप्रत्यक्षे समवायघटितसामानाधिकरण्येन, गुणक्रियागतजातिप्रत्यक्षे तु एकार्थसमवेतसमवायेन । चाक्षुषे च उद्भूतरूपम्, उद्भूतानभिभूतरूपालोकसंयोगश्च हेतुः । 'कालादिचाक्षुषे महत्त्वोद्भूतरूपादीनां न हेतुता' इति **के चित्** । स्पार्शने च उद्भूतस्पर्शः, न तु रूपमपि । तेन वायुरपि त्वाचप्रत्यक्षः । एवं च बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षत्वं न उद्भूतरूपकार्यताऽवच्छेदकम्, किन्तु चाक्षुषत्वादिजातिरेव इति लाघवम् । 'मानसेऽपि महत्त्वं हेतुः' इति **के चित्** । **नेत्यन्ये** । **के चित्तु** क्रिया न प्रत्यक्षा, किन्तु विभागोत्तरसंयोगाभ्यामनुमेया । अतस्तत्प्रत्यक्षे महत्त्वस्य न हेतुता इत्याहुः । **मणि.** पृ. १९–२१.

* **प्रत्यक्षतो** दृष्टसंबन्धमनुमानं यथा– धूमाकृतिदर्शनात् अग्न्याकृतिविज्ञानं इति । **भा.** १।१।५।५ पृ. ३६ । यत्र विशेषयोरेव प्रत्यक्षेण संबन्धो गृह्यते, तत् विशेषविषयं प्रत्यक्षतो दृष्टसंबन्धं इत्युच्यते । **वैद्यनाथी.**

* **प्रत्यक्षपूर्वकत्वाच्च** अनुमानोपमानार्थापत्तीनां अकारणत्वम् (धर्मे) । **भा.** १।१।४।४.

* **प्रत्यक्षब्राह्मणवत्त्वमिष्टकानां** इष्टकावाचिश्रुतशब्दविनियुक्तमन्त्रोपधेयत्वं इत्युक्तमेव भूमाधिकरणे (१।४।१७) । **भाट्ट.** ५।३।७.

* **प्रत्यक्षलक्षणम्** । साक्षात् प्रतीतिः प्रत्यक्षम् । साक्षात्प्रतीतिः स्वरूपप्रतीतिः । स्वस्यैव रूपं स्वरूपं असाधारणरूपमित्यर्थः । यस्य वस्तुनो यदसाधारणं स्वरूपम्, तेनैव रूपेण या व्यवहारयति, सा साक्षात्प्रतीतिः । जात्यादिविशिष्टस्य सविकल्पकज्ञानस्य साधारणाकारविषयत्वात् प्रत्यक्षत्वं न स्यादिति चेत् न, असाधारणाकारेणापि विषयीकारात् । असाधारणाकारस्यान्वयोऽत्र लक्षणम्, न साधारणाकारव्यावृत्तिरपि । अनुमाने तु साधारणभूतव्यापकाकारेणैव संबन्धप्रतीतेर्न साक्षात्त्वम् । यद्वा अव्यवहितप्रतीतिः साक्षात्प्रतीतिः । विशिष्टज्ञानस्य विशेषणज्ञानव्यवहितत्वात् प्रत्यभिज्ञानस्य पूर्वज्ञानव्यवहितत्वात् तयोः प्रत्यक्षत्वं न स्यादिति चेन्न, अव्यवहितत्वं नाम स्वविषयानन्तर्गतज्ञानान्तराव्यवहितत्वं अभिप्रेतम्, तेन समञ्जसं लक्षणम् । एवं वा– साक्षात्त्वं स्वकालाकलितवस्तुसत्त्वावबोधकत्वम्, यत्कालीनं ज्ञानं तत्कालसंबन्धिवस्तु-

विषयमित्यर्थः । प्रत्यभिज्ञायां तु स्वकालसंबन्धिवस्तुविषयत्वमप्यस्तीति न दोषः । वर्तमानाग्न्यनुमानस्य प्रत्यक्षत्वं स्यादिति चेत्, न तस्यापि स्वकालाकलितत्वम्, किन्तु व्याप्तिकालाकलितत्वमेव । अनुमानस्य तु व्याप्तिकालाकलिते शक्तिः कृता, इतरथा भूतानुमाने भविष्यदनुमाने वा शक्त्यन्तरकल्पना स्यादिति न दोषः । अतः सिद्धं साक्षात्प्रतीतिः प्रत्यक्षमिति । **प्रवि.** पृ. २६.

* **प्रत्यक्षवचनेन** एकस्मिन् काले साङ्गानां सर्वेषां प्रयोगविधिना प्रधानसाहित्यवत् अङ्गेष्वपि साहित्यावगमात् एकैकाङ्गेन सर्वप्रधानानां युगपदुपकर्तव्यमित्यर्थावगमः, इति पदार्थानुसमयन्यायः । उदाहरणं प्राजापत्यपशूनामेकमुपाकरणाख्यमङ्गं सर्वपशूनां कृत्वा नियोजनं कार्यं इति पदार्थानुसमयः । **भाट्ट.** ५।२।१. * **प्रत्यक्षवचनात्** चोदको दुर्बलः । **के.** * **प्रत्यक्षवचने** सति अन्यथाऽनुपपत्तिपक्षे सति अर्थापत्तिलभ्यश्रुत्यपरिग्रहः । **वा.** २।३।३।४ पृ. ५८९.

* **प्रत्यक्षविधिः** (पुनः) अष्टविधः । १ धात्वर्थमात्रविधिः, २ सगुणधात्वर्थविधिः, ३ किञ्चिदुद्देश्यकधात्वर्थविधिः, ४ किञ्चिदुद्देश्यकविशिष्टधात्वर्थविधिः, ५ धात्वर्थोद्देश्यकः अन्यविधिः, ६ धात्वर्थे अन्ययोः संबन्धविधिः, ७ धात्वर्थानुरक्तप्रत्ययेन अन्ययोः संबन्धविधिः, ८ धात्वर्थं मुक्त्वा अन्ययोरेव संबन्धविधिश्चेति । **बाल.** पृ. २२. * प्रत्यक्षविधिः भूयस्त्वात् बलवान् । प्रत्यक्षेण पुरोडाशतन्त्रमध्ये विधानेन बहून्यपि देवसुवां हवींषि पुरोडाशधर्मैः प्रसङ्गसिद्धानि । **वि.** १२।३।२.

* **'प्रत्यक्षविधिसद्भावात् लभ्यते नानुमानिकम्'** ('कः' इति आनन्दाश्रमीये पाठः । **वा.** २।३।३।४ पृ. ५८९) इति न्यायविरोधात् 'सोमेन यजेत' इति प्रत्यक्षयागविधौ सति ऐन्द्रवायवादिवाक्येषु द्रव्यदेवतासंबन्धानुमितस्य यागस्य विधानं न संभवति । **तौता.** २।२।६।१७ पृ. ३५८.

* **प्रत्यक्षविरुद्धं** अनुमानं नोदेति स्वकार्यं वा (न) साधयति । **भा.** १।१।६।२०, * प्रत्यक्षविरुद्धमप्रमाणम् । १।२।१।२ पृ. १०९.

* **प्रत्यक्षश्रवणं** विशेषवचनेन परिसंख्यातुं न शक्यम् । **भा.** १०।५।१३।५४ वर्णकं २.

* **प्रत्यक्षश्रुतं** ज्योतिष्टोमे कर्तुरेकत्वं न सामर्थ्येन बाध्येत । **भा.** ३।३।९।१९, * **प्रत्यक्षश्रुताः** (धर्माः) न शक्या बाधितुम् । ३।३।९।१९, * **प्रत्यक्षश्रुतेन** तुल्यकारणेन आनुमानिकं बाध्यते । १०।७।११।३७, * प्रत्यक्षश्रुतेन यस्य हि चोदकप्राप्तस्य कार्यमभिनिर्वर्त्यते तत् तेन निवर्त्यताम् । १०।२।२८।६७ (६८), * **प्रत्यक्षश्रुतात्** आनुमानिकं दुर्बलम् । ६।१।७।३७.

* **प्रत्यक्षसंयोगः** (वाक्यबोधितः) प्रकरणात् बलवान् । **भा.** ४।३।१३।३५.

☒ प्रत्यक्षसूत्रम् ॥

सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात् । १।१।४।४ ॥

भाष्यम्— इदं परीक्ष्यते । प्रत्यक्षं तावत् (धर्मे) अनिमित्तम् । किं कारणम् ? एवं लक्षणकं हि तत् 'सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म, तत् प्रत्यक्षम्' (इति) । सति इन्द्रियार्थसंबन्धे या पुरुषस्य बुद्धिर्जायते, तत् प्रत्यक्षम् । भविष्यंश्च एषोऽर्थो न ज्ञानकालेऽस्तीति । सतश्च एतदुपलम्भनम्, नासतः । अतः प्रत्यक्षमनिमित्तम् । बुद्धिर्वा जन्म वा संनिकर्षो वेति नैषां कस्यचिदवधारणार्थमेतत् सूत्रम् । सति इन्द्रियार्थसंप्रयोगे नासति, इत्येतावदवधार्यते । अनेकस्मिन् अवधार्यमाणे भिद्येत वाक्यम् । प्रत्यक्षपूर्वकत्वाच्च अनुमानोपमानार्थापत्तीनामपि अकारणत्वमिति । (अस्य सूत्रस्य वृत्तिकारमतेनार्थस्तु वृत्तिग्रन्थे भविष्यति) ।

श्लोकवार्तिकम्—(भवदासेन एतत् सूत्रं द्विधा कृत्वा 'सत्संप्रयोगे' इत्येवमादि 'तत्प्रत्यक्षं' इत्येवमन्तं प्रत्यक्षलक्षणपरम् । 'अनिमित्तम्' इत्यादि च तस्य धर्मं प्रति अनिमित्तत्वपरं व्याख्यातम् । तदुपन्यस्य दूषयति–)

'वर्ण्यते सूत्रभेदेन येन प्रत्यक्षलक्षणम् । तेन सूत्रस्य संबन्धो वाच्यः पूर्वप्रतिज्ञया ॥ १ ॥ लक्षणस्याभिधानं तु केनांशेनोपयुज्यते । किमर्थं चानुमानादेर्लक्षणं नात्र कथ्यते ॥ २ ॥ न

तावदप्रमाणत्वं तेषां नाप्यक्षबुद्धिषु । शक्यतेऽन्तर्गतिर्वक्तुं न च लक्षणतुल्यता ॥ ३ ॥ न चापि सिद्धिरेषां स्यादर्थात् प्रत्यक्षलक्षणात् । न हि तत्पूर्वकं सर्वं प्रमाणमिति निश्चितम् ॥ ४ ॥ प्रत्यक्षलक्षणोक्तिश्च नानुमानादिलक्षणात् । विना न सिध्यतीत्येवमर्थाक्षेपो न युज्यते ॥ ५ ॥ तदेतत्पूर्वकत्वे धीर्न च तल्लक्षणाद् भवेत् । तदुक्तेर्वाऽनुमानादि किं न स्यात् तदपूर्वकम् ॥ ६ ॥ न च लक्षणभेदस्य स्वरूपे यत्तयोरपि । प्रत्यक्षलक्षणादेषां कथञ्चिदवधारणा ॥ ७ ॥ प्रसिद्धत्वादवाच्यत्वं प्रत्यक्षेऽपि प्रसज्यते । तेनान्यपरिसंख्यार्थं सूत्रं मूढेन वोच्यते ॥ ८ ॥ न त्वेकं लक्ष्ययेदेषु बुद्धिपूर्वं कथंचन । संभवत्येकवाक्यत्वे वाक्यभेदश्च नेष्यते ॥ ९ ॥ न चाप्येतेन सूत्रेण प्रत्यक्षं लक्ष्यते स्फुटम् । तदाभासेऽपि तुल्यत्वात् स्वप्नज्ञानैकवर्जनात् ॥ १० ॥ तद्धीन्द्रियार्थसंबन्धव्यापारेण विना भवेत् । केनचित् संप्रयोगे तु भ्रान्त्यादि स्यान्नियोगतः ॥ ११ ॥ ग्राह्येणान्येन वेत्येतत् कृतं नैव विशेषणम् । संप्रयोगस्य येन स्याद् विशेषो वक्ष्यमाणवत् (वृत्तिकारमते) ॥ १२ ॥ असामर्थ्यं च मत्वाऽस्य वृत्तिकारेण लक्षणे । 'तत्संप्रयोग' इत्येवं पाठान्तरमुदाहृतम् ॥ १३ ॥ तेनान्येनापि संयोगे चक्षुरादेर्यदुत्थितम् । विषयान्तरविज्ञानं तत् प्रत्यक्षं प्रसज्यते ॥ १४ ॥ सत्संप्रयोगनिर्देशो व्यर्थश्चेदेतदेव हि । प्रतिपाद्यं परस्यापि लक्षणासिद्धिरेव च ॥ १५ ॥ स्वप्नादीनां निवृत्तिर्वा फलं तस्य भविष्यति । तस्माद् विध्यनुवादित्वं नानुक्ते लक्षणे भवेत् ॥ १६ ॥ तेन नैषा वचोव्यक्तिर्यत् सतीन्द्रियसंगमे । विज्ञानं ज्ञायते (जायते) तस्य प्रत्यक्षत्वं प्रतीयताम् ॥ १७ ॥ प्रत्यक्षं यज्जने सिद्धम्, तस्यैवं धर्मकत्वतः । विद्यमानोपलम्भत्वम्, तेन धर्मेऽनिमित्तता ॥ १८ ॥

(सर्वस्य वार्तिकस्य विस्तृतत्वात् एतावतैव विरम्यते)।

वृहती— अथ कस्मादनुमानादेरनिमित्तत्वम् ? अनुमानादीनां हि निमित्तग्रहणपूर्वकं स्वार्थे प्रामाण्यम् । निमित्तं चात्र प्रत्यक्षग्राह्यमेव वर्णादि । तस्मात्तदपि अप्रमाणम् ।

शा— प्रत्यक्षं तावत् इन्द्रियार्थसंप्रयोगजन्यत्वेन विद्यमानोपलम्भनत्वाद् भविष्यति धर्मे न निमित्तम् ।

वि— 'प्रत्यक्षादिभिरप्येष गम्यते विधिनैव वा ।, अक्षादीनां प्रमाणत्वान्मेयधर्मावभासिता ॥ , वर्तमानैकविषयमक्षं धर्मस्तु भाव्यसौ । अक्षमूलोऽनुमानादिस्तेन विध्येकमेयता ॥ ' तस्माद् विधिनैव धर्मो गम्यते ।

भाट्ट— (तृतीयचतुर्थसूत्राभ्यामेकमेवाधिकरणमत्र) सांख्यमते वृत्तिविशेषरूपौ धर्माधर्मौ । तार्किकमते तु अदृष्टरूपौ । अतः तयोश्चाक्षुषाद्यविषयत्वेऽपि अस्मन्मते दध्यादिद्रव्यगुणक्रियारूपत्वेन अलौकिकत्वाभावेन संभवति प्रत्यक्षादिप्रमाणविषयत्वम् । इति प्राप्ते, न तावत् दध्यादीनां स्वरूपेण धर्मत्वम् । अपितु फलजनकताऽवच्छेदकशक्तिमत्त्वेन । तादृशं च रूपं प्रत्यक्षाद्ययोग्यमेव, प्रत्यक्षस्य इन्द्रियसंनिकृष्टवर्तमानार्थविषयकत्वनियमात् । अत एव नानुमानादीनामपि तत्र प्रवृत्तिः, तेषां प्रत्यक्षपूर्वकत्वात् । नापि योगिनां प्रत्यक्षे तौ विषयौ, तेषामनङ्गीकारात् । एतेन ईश्वरप्रत्यक्षमपि व्याख्यातम् । इन्द्रियार्थसंनिकर्षाजन्यत्वेन भगवत्प्रमितेरलौकिकत्वाद्वा । तस्मात् चोदनैव धर्माधर्मयोः प्रमाणं नान्यत् ।

मण्डन— 'अन्याप्रामाण्यसिद्धौ हि चोदनैवेति सिध्यति । तेन प्रत्यक्षसूत्रे हि धर्मेऽन्यत् प्रतिषिध्यते ॥ '

शंकर— 'प्रत्यक्षलक्षणोक्तिश्च ।'

* प्रत्यक्षसूत्रं 'सत्संप्रयोगे०' इति 'यो धर्मस्तत्र चोदनैव प्रमाणम्' इति नियमफलं उपपादयितुम् । तत्र श्रुत्या प्रत्यक्षमात्रस्य अप्रामाण्यमुक्तम्, अर्थादितरेषाम् । तदुक्तं भाष्ये 'प्रत्यक्षपूर्वकत्वाच्चानुमानोपमानार्थापत्तीनामपि अकारणत्वम्' इति । अत एव च बुद्धादिपुरुषवचननिराक्रियाऽपि सिद्धा इति च । अत्र सर्वज्ञनिरासः प्रत्यक्षनिरासायैवेति । बाल. पृ. ५. * नहि शाक्यादिग्रन्थानां वेदमूलत्वं क्वचिन्निराकृतम्, प्रत्यक्षसूत्रे प्रत्यक्षमूलकत्वाङ्गीकारेण धर्मे प्रामाण्यस्य निराकरणात् । पूर्वपक्षः । कौ. १।३।२।४ पृ. २७. * यदि अंशविशेषा गोत्वादयः अर्थे न विद्यन्ते, ततो गवादिशब्दस्यैव स्वानुरूपबुद्धिजनकत्वेन अर्थे अध्यासः स्यात्, तेषां तु विद्यमानानामेव गवादिशब्दैः निष्कर्षमात्रं क्रियते इति अनन्तधर्मके धर्मिणि एकधर्मावधारणे शब्दः अभ्युपायमात्रं स्वानात्माध्यारोपकारणं इति प्रत्यक्षसूत्रे अभिहितम् । सु. पृ. ४०९.

* **प्रत्यगाशीर्मन्त्रेषु** क्रियमाणानुवादिषु 'आयुर्दा अग्नेऽस्यायुर्मे देहि' इत्यादिषु श्रुतं फलं याजमानम् । **वि.** ३।८।१४.

* **प्रत्यधिष्ठानं** नानैवेन्द्रियम् । **भाट्ट.** ९।३।११.

* **प्रत्यभिघारणं** अवदानधर्मः । पुरोडाशादौ यतः अवत्तं तत्राज्यप्रक्षेपः प्रत्यभिघारणं नाम । **के.** * प्रत्यभिघारणं पाशुकेषु सर्वेषु अङ्गेषु । **संकर्ष.** २।२।१७. **मीको.** पृ. १५९ 'अङ्गेषु पाशुकेषु ०' इत्यत्र द्रष्टव्यम् ।

* **प्रत्यभिज्ञा** । अन्यत्वावगमपूर्वकं हि यत्र अभेदज्ञानं तत्र प्रत्यभिज्ञा भवति । अन्यत्वानवगमे तु भेदाग्रहणनिबन्धन एव एकावसायभ्रमः । ऋजु. पृ. १९२. * प्रत्यभिज्ञैव हि अभिन्नार्थदर्शनं इत्युच्यते, न पुनरन्यत् । वृहती. पृ. २३९. * प्रत्यभिज्ञा । गृहीते हि वस्तुनि संस्कारोद्बोधे सति प्रत्यभिज्ञा । ऋजु. पृ. २३८. * प्रत्यभिज्ञा तु 'तदेवेदम्' इति प्रसिद्धा लोके । बृहती. पृ. २४७, * प्रत्यभिज्ञा नाप्रत्यक्षेऽर्थे प्राप्नोति । पृ. २४७. * प्रत्यभिज्ञा । न चानुमेयेऽर्थे प्रत्यभिज्ञाऽस्ति, स्वरूपाग्रहणात् । यस्य हि स्वरूपं स्वलक्षणं गृह्यते तत्र भवति प्रत्यभिज्ञा । न च नित्यानुमेयानां स्वरूपग्रहणमस्ति । ऋजु. पृ. २४६, * **प्रत्यभिज्ञया** च विना कालान्तरावस्थित्यनिश्चयः । पृ. २४१.

* **प्रत्यभिज्ञाबलेन** अभिव्यञ्जकवैधर्म्यानुमानं बाध्यते । ऋजु. पृ. २०४.

* **प्रत्यभिज्ञानादेव** हि कालान्तरावस्थायिता सिध्यति । बृहती. पृ. २३९.

* **प्रत्ययः** । अनुपयुक्तश्रौतव्यापारावस्थ एव प्रत्ययः 'आनर्थक्यात्तदङ्गेषु' इत्यनेन न्यायेन भावनातोऽवतीर्य तत्संबद्धानि कारकाणि उपसर्पति । तत्र यावन्ति एकपदोपात्तैककारकविशेषणानि जातिलिङ्गद्रव्यसंख्यादीनि, तानि विशिष्टभावनाविधिन्यायेनैव तत्कारकाक्षेपात् सर्वाणि विधीयन्ते इति प्राप्तायामपि भावनायां अनेकार्थविध्युपपत्तिः । यदा तु अनेकपदोपात्तानेककारकोपनिपातो भवति, तदा कारकाणां परस्परसंबन्धाभावात् तत्तत्पदेष्वपि असंबध्यमानेषु यदि एकत्र विधिर्गच्छति, तदा नेतरत्र गतो भवति । एवमितरगमनेऽपि अन्यगमनानुपपत्तिरसंबन्धात् । एवं च न भावनावत् एकेन विहितेन इतरदर्थादाक्षेप्तुं शक्यते । तत्र अर्थलभ्यविध्यन्तरप्रसूतौ असत्यां एकात्मकः श्रौतो विधिः एकत्रोपक्षीयमाणो यद्यपि अन्यत्राप्यस्तीति कल्प्यते, तत् नासकृदुच्चारणादृते सिध्यति, इति पौरुषेयः अनेकोच्चारणप्रसङ्गः । **वा.** २।२।३।६ पृ. ४८६. * प्रत्ययः अर्थालम्बनः । न (बौद्धवत्) निरालम्बनः प्रत्ययः । **भा.** १।१।५।५ पृ. ३५. * प्रत्यय एव (लिङ्) विध्यभिधायित्वात् विध्युद्देशः । **वा.** १।२।१।७ पृ. १२०. * प्रत्ययः क्रियां विधत्ते । **टुप्.** १०।३।१७।६३ पृ. १८९८. * 'प्रत्ययश्च यथा मन्त्रं विधत्ते धातुगोचरे । स्वपदार्थे श्रुते शीघ्रं, न नामार्थे तथा श्रुते ॥ ' **वा.** ३।१।७।१४ पृ. ७१०. * प्रत्ययः । न च एकः प्रत्ययः सकृदुच्चरितः शक्नोति गुणत्वप्रधानत्वे युगपदभिधातुम् । ... सकृदुच्चरितस्यापि प्रत्ययस्य अविरुद्धानेकभावनाकर्तृसंख्योपग्रहविशेषाद्यर्थवाचित्वाभ्युपगमेन, अनेकार्थोक्त्यशक्तेः विरोधनिबन्धनत्वावसायात् कर्तुश्च गुणत्वप्रधानत्वयोर्भिन्नविषयत्वेनाविरोधान्न प्रत्ययस्योभयरूपोक्त्यशक्त्याख्यो विप्रतिषेधः । ह्रस्वत्वदीर्घत्ववत् गुणप्रधानत्वयोः आपेक्षिकत्वेन शुक्लत्वकृष्णत्ववत् स्वभावतो विरोधाभावात् आश्रयैक्यमात्रेण विरोधायोगः । सु. पृ. १३८३, * प्रत्ययो निर्विषयो नास्ति । पृ. १०. * प्रत्ययः पूर्वं विशेषणे व्याप्रियते अन्यथाऽनुपपत्त्या, न हि अगृहीतविशेषणा विशिष्टे बुद्धिः इति । **टुप्.** ४।१।५।१५, * प्रत्ययः प्रातिपदिकार्थमवश्यमुच्चारणीयः । न केवलं प्रातिपदिकं स्वार्थे वर्तते । ६।४।६।२२. * प्रत्ययो विधिरेव, धात्वर्थोऽनुवादः ('दध्ना जुहोति' इत्यादौ) । **वा.** २।२।५।१६ पृ. ५०५, * प्रत्ययः 'शक्तयः सर्वभावानां नानुयोज्याः स्वभावतः । तेन नाना वदन्त्यर्थान् प्रकृतिप्रत्ययादयः ॥ ' २।१।१।१ पृ. ३७८, * 'प्रत्ययः संनिकृष्टार्थविधिं

तावत् करिष्यति। न चान्यपर उत्पत्तिम्'। यागं हि फले विदधत् प्रत्ययः न विप्रकृष्यते। न च अनुत्पत्तिपरः सन् उत्पत्तिमपि कल्पयिष्यति। २।२।१२।२७ पृ. ५६१. * प्रत्ययः (ज्ञानं) समीचीनः 'कः पुनरसौ ? नामजात्यादियोगेन उत्पद्यते यः'। बृहती. पृ. ३८। नामयोगेन यथा 'देवदत्तः' इति। जातियोगेन यथा 'गौः अयम्' इति। गुणयोगेन यथा 'शुक्लोऽयम्' इति। क्रियायोगेन यथा 'पचति' इति। द्रव्ययोगेन यथा 'दण्डी' इति। ऋजु. * प्रत्ययः (लिङादिः) स्वार्थे भावनायां पुरुषं प्रवर्तयति।... तस्मान्नैव कदाचित् यागे प्रत्यय उपनिपतति सत्येवानन्तर्ये (प्रत्ययार्थो भावना न यागं भाव्यतया स्वीकरोति सत्यप्यानन्तर्ये इत्यर्थः)। टुप्. ६।१।१।३ पृ. १३५२. * कारकं अभिदधत् प्रत्ययः शक्तिमात्ररूपेण अभिदध्यात्, न द्रव्यरूपेण, तस्याकारकत्वात्। वा. ३।४।४।१३ पृ. ९३३. * प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः। कौ. १।४।६।६ पृ. २३९ (इदं वाक्यं अनेकग्रन्थेषु बहुवारं समायाति, तच्च 'प्रकृतिप्रत्ययौ' इति प्रघट्टके द्रष्टव्यम्)। * प्रत्ययेन कारकत्वमेकत्वं च इत्युभयं निर्दिष्टम्। तत एकत्वस्य आसन्नतरे कारके प्रथमं संबन्धो भवति। 'पशुमालभेत' इत्यत्र। वि. ४।१।५. * प्रत्ययेन विशेष्याभिधानं अविरुद्धम्, पूर्वाभिहितेऽपि विशेषणे, प्रकृतिप्रत्यययोः शक्तिभेदात्। वा. ३।२।८।२१ पृ. ७७७. * प्रत्ययेन हि श्रुत्या धात्वर्थस्य सत्ता उच्यते। भा. १०।४।६।९. * प्रत्ययस्य अत्यन्तबाधापेक्षया प्रातिपदिकस्य अजहत्स्वार्थलक्षणैव युक्ता, अजहत्स्वार्थलक्षणायां मुख्यार्थस्य परित्यागाभावेन कांस्यभोजिन्यायेन तस्या एव न्याय्यत्वात् (यथा 'प्रोद्गातॄणाम्' इत्यत्र)। सोम. ३।५।७. * प्रत्ययस्य अन्विताभिधायित्वं तदितरेषां स्वरूपमात्राभिधायित्वम्। वस्तुतस्तु अन्विताभिधानं क्वापि नास्ति। बाल. पृ. ४३. * प्रत्ययस्य प्रकृतेश्च केवलयोः प्रयोगासंभवः। 'केवलप्रकृतिप्रत्ययप्रयोगासंभवात् अवश्यं तावत् धातुसंबन्धार्थं प्रत्ययः पुनरावर्तनीयः'। वा. २।२।१।१ पृ. ४६३, * प्रकृतिप्रत्यययोः स्वार्थवृत्तयोरेव नैरन्तर्यात् अन्तराले संबन्धोऽवगम्यमानो भवति। २।२।९।२३ पृ. ५३४. * 'प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वम्' इति नियमः। मणि. पृ. १६२. * प्रत्यये वैरूप्यलक्षणो वाक्यभेदः, 'ग्रहम्' इत्येकत्वस्य संमार्गं ग्रहं वा प्रति गुणत्वे, द्वितीयाविभक्त्या लक्ष्ये ग्रहापेक्षया प्राधान्यं इति। बाल. पृ. १८१.

* प्रत्ययार्थः प्रधानं न प्रातिपदिकार्थः। 'सत्त्वप्रधानानि नामानि' इति यास्कस्मृतेः (१।१) प्रातिपदिकार्थस्य प्राधान्यात् प्रधानान्वयस्य अभ्यर्हितत्वात् पदश्रुत्या (पशुं) पश्वन्वय एव संख्यायाः, न तु प्रत्ययश्रुत्या कारकान्वयः। न च प्रत्ययार्थप्राधान्यमपि शाब्दिकैः स्मर्यते इति वाच्यम्। तस्य आख्यातविषयत्वेनापि उपपत्तेः। संख्यादीनामपि प्राधान्यवारणाय तत्स्मृतेः संकोचावश्यम्भावात्। एवं च संख्यायाः प्रत्ययश्रुतिगम्यकारकान्वयस्यापि परित्याज्यत्वे सति वाक्यमादाय यज्ञाङ्गत्वं दूरापेतम्। न च एकत्वस्य पश्वन्वये पशोः कारकान्वयदशायामेकत्वविशिष्टस्यैव तस्यान्वयात् एकत्वस्यापि यज्ञाङ्गत्वं शङ्कनीयम्। विरम्यव्यापारायोगेन प्रत्ययेन प्रथममेकत्वस्य पशुसंबन्धं बोधयित्वा तदनन्तरमेकत्वविशिष्टस्य तस्य कारकान्वयबोधनायोगात् युगपदेव संख्याकारकाभ्यां पशोरन्वयेन संख्याविशिष्टवेषेण कारकान्वयाऽनुपपत्त्या केवलस्यैव पशोः कारकान्वयात्। अत्रोच्यते। यदि प्रातिपदिकार्थस्य प्राधान्यम्, तदा तस्य कारकेण वशीकरणाभावात् कारकस्य तद्गुणभावे सति कृदन्ताभिहितस्येव कारकस्य क्रियाऽन्वयो न भवेत्। अतो न प्रातिपदिकार्थः प्रधानम्, किन्तु प्रत्ययार्थ एव। तत्रापि वाक्यस्य क्रियाप्रधानत्वात् तदर्थत्वाच्च कारकस्य तस्यैव प्राधान्यम्, न संख्याऽऽदेः। यत्र तु 'गौः शुक्लः' इत्यादौ न क्रियाऽन्वयः तदभिप्रायं यास्कस्मरणम्! न चैवं प्रत्ययश्रुत्या संख्याऽवरुद्धे कारके दुर्बलया पदश्रुत्या पशोरन्वयो न स्यादिति वाच्यम्। 'एकसंख्येन कारकेण यष्टव्यम्' इत्युक्ते 'किंजातीयं तत्' इति विशेषापेक्षासत्त्वेन अनुगुणतया दुर्बलप्रमाणकस्यापि पशोः अन्वयाविरोधात्। प्रत्ययेन कारकसंख्ययोः पृथगभिधानमाश्रित्य एकपदोपात्तप्रातिपदिकार्थापेक्षया एकप्रत्ययोपात्तकारकस्य संनिहिततरत्वात्

प्रधानत्वाच्च कारकेणैव संख्यासंबन्धो न प्रातिपदिकार्थेन। वस्तुतस्तु संख्याकारकयोः न पृथगभिधानम्, किन्तु संख्याऽन्वितमेव कारकमभिधीयते। ततश्च अभिधानदशायामेव कारकान्वितत्वात् संख्यायाः, न पश्चात् प्रातिपदिकान्वयप्रसक्तिः इति द्रष्टव्यम्। सोम. ४।१।५ पृ. ३५३. * प्रत्ययार्थो भावना इति शास्त्रे व्यवहारः। वा. २।१।१।१ पृ. ३८०. * प्रत्ययार्थः व्यापाराश्रयः फलाश्रयश्च इति वैयाकरणाः। मणि. पृ. १०१, अनुकूलव्यापारः प्रत्ययार्थः इति मण्डनः। पृ. १०१, आख्यातस्य यत्नो वाच्यः इति नैयायिकाः। १०६, उत्पादनं आख्यातार्थः इति रत्नकोशकारः। १०७, आख्यातत्वेन यत्नत्वेन वा प्रत्ययवाच्यो यत्नो भावना इति सिद्धान्तः। पृ. ११०. * प्रत्ययार्थः शुद्धः न लभ्यते। प्रकृतिप्रत्यययोः स्वार्थाभिधाने स्मृतेराचाराच्च नित्यविवक्षितक्रमत्वेन पूर्वप्रयुक्तप्रकृत्यर्थव्यासेषु प्रतिपत्तृषु प्रत्ययांशः संनिपतन् कृतानुबन्धमेव स्वार्थं वदति। तस्मात् न कदाचित् प्रत्ययार्थः शुद्धो लभ्यते। वा. २।२।१।१ पृ. ४६५, * 'प्रत्ययार्थः समानोऽपि धातुभेदेन भिद्यते।' २।२।२।२ पृ. ४६८, * 'प्रत्ययार्थं सह ब्रूतः प्रकृतिप्रत्ययौ सदा। प्राधान्याद् भावना तेन प्रत्ययार्थोऽवधार्यते॥' २।१।१।१ पृ. ३८०. * प्रत्ययार्थेन हि इतिकर्तव्यता आकाङ्क्ष्यते कर्तव्यं कथमिति। भा. ९।१।१।१ पृ. १६३९. * 'प्रत्ययार्थेन हि इतिकर्तव्यता संबध्यते न यागेन। यागस्तु पूर्वापरीभूतः इतिकर्तव्यतां गृह्णाति, न निष्पन्नरूपः' इति न्यायस्तावत् वर्णित एव। ('प्रत्ययार्थेन हि इतिकर्तव्यता आकाङ्क्ष्यते कर्तव्यं कथमिति, न यजिः कीदृश इति' इति भाष्यं ९।२।१ पृ. १६३९ इत्यत्र)। टुप्. ११।१।२।१०. * 'प्रत्ययार्थस्य भावस्य वाच्यता प्रतिपादिता।' वा. १।३।९।२३ पृ. ३०६. * प्रत्ययार्थस्य भावनायाः प्रकृत्यर्थं प्रति ('प्रकृतिप्रत्ययौ०') 'तयोस्तु प्रत्ययस्य प्राधान्येन' इति स्मृत्या प्राधान्यस्य अनुशासितत्वात् 'व्रीहीनवहन्ति' इतिवत् प्राधान्ये अवगते यागस्य श्रुत्यैव तदङ्गत्वोपपत्तिः। कौ. २।१।२।५ पृ. १०.

* 'प्रत्ययार्थप्रधानत्वात् प्रतिधातु (भावना) न भिद्यते।' वा. २।२।१।१ पृ. ४६३.

* प्रत्ययार्थप्राधान्यनियमस्य भावप्रत्ययार्थातिरिक्तसमासाद्यतिरिक्तपरत्वम्। मणि. पृ. १६२.

* प्रत्ययार्थलक्षणं भावप्रत्ययार्थवादिभिरेव प्रणीतं नेतरैः। वा. ३।४।४।१२ पृ. ९०३.

* प्रत्ययार्थशेषत्वं प्रकृतिप्रत्यययोः। वा. २।२।१।१ पृ. ४६३.

* प्रत्ययावृत्तिः। अनेककारकपदोपात्तयोः कारकविभक्तिश्रुत्या क्रियाऽन्वयावगतेः क्रियाऽन्वयात् प्राक् विशेषणविशेष्यत्वाप्रतीतेः प्रत्येकं विधिव्यापारात् विधायकप्रत्ययावृत्तिः स्यात्। सु. पृ. ७८३–७८४.

* प्रत्ययावृत्तिलक्षणः वाक्यभेदः चतुर्धा, सुप्–तिङ्–कृत्–तद्धितभेदात्। बाल. पृ. १८१.

* प्रत्ययोच्चारणानन्तरमेव तिस्र आकाङ्क्षा उत्पद्यन्ते। टुप्. ६।१।१।३ पृ. १३५३.

* 'प्रत्ययलक्षणेन प्राप्नोति'। कुर्वः इत्यादौ लघूपधगुणउकारलोपयोः प्राप्तौ नित्यत्वादुकारलोपः। गुणस्तु लोपे कृते 'प्रत्यय० प्राप्नोति' इति न्यायेन अनित्यः। तत्त्वप्रकाशिका. पृ. १६४.

* 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति न्यायेन लुप्तेऽपि प्रत्यये यत्र कार्यं भवति, तत्र न संनिपातलक्षणन्यायावतारः। अद्वैत. ५०८ निर्णय०

* प्रत्ययश्रुतिबलेन पदश्रुतिबाधः। सु. पृ. ९२.

* प्रत्ययितः। प्रत्ययो विश्वासः अस्य संजातः इति 'तदस्य संजातं तारकादिभ्य इतच्' (पा० ५।२।३६) इति संजातार्थस्मृतेः इतच्प्रत्ययान्तेन प्रत्ययितशब्देन विश्वसनीयत्वमुक्तम्। सु. पृ. ९०१. * प्रत्ययितस्य (पुरुषस्य) हि वचनमव्यभिचारि प्रमाणान्तरपूर्वकमुपलभ्यमानविषयम्। बृहती. पृ. २२.

* 'प्रत्यर्थं चाभिसंयोगात् कर्मतो ह्यभिसंबन्धस्तस्मात् कर्मोपदेशः स्यात्।' (६।१।१।२) इत्यनेन अर्थ्यमानं स्वर्गादि प्रतीत्य लक्षणीकृत्य उद्दिश्य तदाभिमुख्येन तत्तन्त्रतया कर्मणः समीहितस्वर्गाद्यन्वयावगतेः

इति वदता फलस्य उद्देश्यत्वादपि तादर्थ्येन कर्मविधिः इति वक्ष्यते । **सु. पृ. ८.**

प्रत्यवयवं वाक्यपरिसमाप्तिरिति न्यायः । तद्यथा देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामिति, न चोच्यते प्रत्येकमिति, प्रत्येकं च भुजिः परिसमाप्यते । **साहस्री.** ५९६.

* प्रत्यवयवं वाक्यपरिसमाप्तिः इति न्यायेन ' सर्वाणि हवींषि ' इति सर्वशब्दः प्राप्तानुवादः हविर्नाशमात्रस्य निमित्तत्वम् । (वाक्यानां च समाप्तत्वात् ३।१।१४। २४) । **सोम.** ६।४।१.

* **प्रत्यवरोहः** अग्नेः अरण्योरेव आत्मसमारोपपक्षेऽपि । **संकर्ष.** ३।२।३६. **मीको.** पृ. ९०८ ' आत्मसमारोपणपक्षेऽपि० ' इत्यत्र द्रष्टव्यम् । * प्रत्यवरोहः अन्त्यादारभ्यानुष्ठानम् । **रत्न.** १०।५।२५।८५.

* **प्रत्यवायः** ' अबाधिते तु विज्ञाने योऽन्यो न क्रियते तथा । विहिताकरणात्तत्र प्रत्यवायः प्रसज्यते ॥ ' **वा.** ३।१।७।१४ पृ. ७०६. * प्रत्यवायः पुरुषस्य निषेधातिक्रमे । ६।२।५।२०–२१. * विहिताकरणाद्धि **प्रत्यवायः** स्मर्यते । नाकरणमात्रात् प्रत्यवायः, किं तर्हि ? विहिताकरणात् । **टुप्.** ६।३।१।२ पृ. १४०९.

प्रत्यहं सर्वसंस्कारः प्रकृतिवत् सर्वासां सर्वशेषत्वात् । १०।६।१८।६९॥

एकादशरात्रे पौण्डरीके अहीने प्रत्यहं अहनिअहनि सर्वसंस्कारः सर्वासां दक्षिणानां संस्कारः स्यात् । प्रकृतिवत् प्रकृतौ द्वादशाहे यथा प्रत्यहं दक्षिणासंस्कारः क्रियते तद्वत् । सर्वासां दक्षिणानां सर्वशेषत्वात् सर्वेषामह्नां शेषभूतत्वात् । तस्मात् प्रत्यहं नयनादिसंस्कारः कर्तव्यः इति पूर्वः पक्षः ।

एकार्थत्वान्नेति चेत् । ७० ॥

पौण्डरीके प्रत्यहं दक्षिणानां संस्कारो न कर्तव्यः, किन्तु सकृदेव स्यात् । एकार्थत्वात् । दक्षिणानामेकं कार्यं ऋत्विगानमनम् । तत् सकृत्संस्कारेऽपि सिध्यति । तस्मात् न प्रत्यहम् । इति चेत् । इयं द्वितीयस्य पूर्वपक्षस्य शङ्का ।

स्यादुत्पत्तौ कालभेदात् । ७१ ॥

स्यात् प्रत्यहं दक्षिणासंस्कारः पौण्डरीके उत्पत्तौ दक्षिणासंस्कारोत्पत्तिविधौ कालभेदात् कालविशेषसंबन्धस्य श्रूयमाणत्वात् । ' तस्मात् त्रिष्टुभो लोके माध्यंदिने सवने दक्षिणा नीयन्ते ' इति । सर्वाश्चैता दक्षिणाः सर्वेषामह्नां शेषभूताः, तेषां चाह्नां माध्यंदिनानि सवनानि भिन्नानि । तस्मात् प्रत्यहं संस्कारः । इति पुनः प्रथमः पूर्वपक्षः ।

विभज्य तु संस्कारो, वचनाद् द्वादशाहवत् । ७२ ॥

सिद्धान्तयति । पौण्डरीके प्रत्यहं दक्षिणा विभज्य विभक्तानां तद्दिने देयानां तद्दिने नयनादिः संस्कारः कर्तव्यः । वचनात् द्वादशाहवत्, यथा द्वादशाहे ' अन्वहं द्वादशशतं ददाति ' इति वचनात् प्रत्यहं नयनादिः संस्कारः क्रियते । तद्वत् द्वादशाहविकारे पौण्डरीकेऽपि परिक्रयैकत्वेऽपि वचनात् विभज्य भेदेन प्रत्यहं दक्षिणासंस्कारः इति । **के.**

* **प्रत्यादेशः** निराकृतिः, निराकरणम् । **के.**

* **प्रत्याम्नानं** बाधे प्रमाणम् । **मणि.** पृ. १३. * **प्रत्याम्नानेन** प्राकृतं बाध्यते आरभ्याधीतेन अनारभ्याधीतेन च । **बाल.** पृ. १३१.

* **प्रत्यायको** वेदः । **वि.** १।१।७.

* **प्रत्यायनार्थाः** मन्त्राः (अर्थप्रत्यायनार्थाः) । **वृ.** १।२।४।३१–५३.

प्रत्यासत्तिन्यायः । यत्र शीघ्रोपस्थितिविवक्षा, तत्राऽस्यावतार इति । प्रत्यासत्तिः । संबन्धः संनिकर्षः । तस्य न्यायः रीतिः । **साहस्री.** ९९८.

* **प्रत्युथेयः ।** वृद्धवयाः प्रत्युत्थेयः संमानयितव्यश्च इत्यादेरावृत्तिर्निमित्तावृत्तौ । **भा.** ६।२।१०।३०.

* **प्रथनश्लक्ष्णीकरणयोः** बाधः सौर्ये चरौ । १०। १।१७.

* **प्रथमं** अनुग्रहीतव्यं विरोधाभावात्, पश्चात्तनं तु विरोधात् लक्षणया कल्पनीयम् । **भा.** ३।४।११।३१ पृ. ९६६.

* **' प्रथमं वा नियम्येत कारणादतिक्रमः स्यात् । '** ११।१।८।४३ इत्यत्र मुख्यनियमहेतुः मुख्यातिक्रमकारणाभावो वक्ष्यते । **सु.** पृ. १५४१. * ' प्रथमं वा नियम्येत० ' **इत्यनेन न्यायेन** अवाप्ते फले नोत्तरकर्मानुष्ठानप्रयोजनमस्ति । **वा.** १।२।१।४. * ' प्रथमं वा नियम्येत० ' इत्येवं कर्मत्वप्रतिपादकमेकवचनम् ' ग्रहं संमार्ष्टि ' इत्यत्र । **वा.** ३।१।७।१४ पृ. ७२३. * ' प्रथमं वा नियम्येत० ' इह एक एव कल्पो बहूनामालम्भः । स त्रिभिश्चतुरादिभिस्तुल्यः । अतस्तत्र यो लघुमुत्सृज्य गुरुकल्पमातिष्ठेत, तस्य फलभूयस्त्वं न भवितुमर्हति । (' कपिञ्जलानालभेत ' इत्यत्र इदम्) । **भा.** ११।१। ८।४३. * आषाढद्वये तु (अधिके) प्रथमे एवाषाढे वरुणप्रघासाः, **' प्रथमं वा नियम्येत० ' इति न्यायात् ।** न च पुनर्द्वितीये ' उपचारोऽविशाते ' इति श्रुतेः । **शांश्रौ. भाष्यम्** ३।१४।१. * बहुत्वानियमे ' प्रथमं वा नियम्येत० ' इति त्रित्वे प्राप्ते दशपेये ज्योतिष्टोमविकारे दशत्वानुवादः । **वा.** ३।७।१२।२७, * समस्तो हि **प्रथमः** पादः चोदनासूत्रपरिकरः, तत्र च धर्मस्य चोदनालक्षणत्वमुक्तम् । २।१।१।१ पृ. ३७०.

* **प्रथमातिक्रमे** मानाभावात् प्रथमहविःशेषेणैव संस्कारसिद्धिः । (' शेषात् स्विष्टकृते समवद्यति ' इत्यत्र) । **वि.** ३।४।२०.

* **प्रथमाध्यायतृतीयपादे** स्मृतिमूलविचारः प्रकरणार्थः । **सु.** पृ. ३७०.

* **प्रथमाध्यायप्रतिपादितो** हि प्रमाणविवेकविधि–अर्थवाद–मन्त्र–स्मृति–गुणविधि–नामधेय– वाक्यशेषार्थकृतसंदिग्धविधिनिर्णयप्रविभागः प्रत्येकं भेदादिलक्षणेषु भेदेनोपयोक्ष्यते । **वा.** ३।१।१।१ पृ. ६४९.

* **प्रथमारम्भेण** हि पदार्थः क्रियमाणः उत्तरं पदार्थमभिनियच्छति । **भा.** १०।५।२।८.

प्रथमोत्तमयोः प्रणयनमुत्तरवेदिप्रतिषेधात् । ७।३।९।२४ ॥

चातुर्मास्येषु ' द्वयोः प्रणयन्ति ' इति श्रुतम् । तत्र कयोर्द्वयोः इति विचारे पूर्वपक्षमाह । इदं प्रणयनं प्रथमोत्तमयोः प्रथमचतुर्थयोः पर्वणोः स्यात् । कुतः ? उत्तरवेदिप्रतिषेधात् । ' न वैश्वदेवे उत्तरवेदिमुपवपन्ति, न शुनासीरीये ' इति उत्तरवेदेः प्रतिषेधः । अस्मिन् प्रणयने उत्तरवेद्यां अग्निनिधानं विहितम् । अतो यत्र प्रणयनम्, तत्र उत्तरवेदिप्राप्तिः । प्राप्तौ च सत्यां प्रतिषेधः । प्रथमचतुर्थपर्वणोश्चासौ । तस्मात् उत्तरवेदिप्रतिषेधात् तयोः पर्वणोः प्रणयनम् । ' इदं सौमिकं प्रणयनं इतिपक्षे प्रयोजनसूत्रम् ' इति वार्तिकम् ।

मध्यमयोर्वा गत्यर्थवादात् । २५ ॥

पूर्वपक्षं सूत्रेण प्राप्तं वाशब्देन निरस्य सिद्धान्तमाह । मध्यमयोः पर्वणोः वरुणप्रघाससाकमेधाख्ययोः अग्निप्रणयनं स्यात् । गत्यर्थवादात् । ' तस्मात् द्वाभ्यां यन्ति ' ' ऊरू वा एतौ यज्ञस्य यद्वरुणप्रघासाश्च साकमेधाश्च ' इति गतिप्रतिपादकेन अर्थवादेन मध्यमयोरेव प्रणयनस्य ज्ञापितत्वात् ।

औत्तरवेदिकोऽनारभ्यवादप्रतिषेधः । २६ ॥

पूर्वतरसूत्रे उत्तरवेदिप्रतिषेधात् इति योऽयं औत्तरवेदिकः प्रतिषेध उक्तः, सः ' उपात्र वपन्ति ' इति अनारभ्यवादस्य अनारभ्यविधेः प्रतिषेधः स्यात् । अत्र चातुर्मास्येषु उपवपन्ति अग्निं इति अनारभ्यवाक्यस्यार्थः । अनेन चतुर्ष्वपि पर्वसु प्राप्तं मध्यमयोर्नियम्यते । तस्मात् मध्यमयोः पर्वणोः अग्निप्रणयनमिति सिद्धान्तः । अत्र सौमिकं प्रणयनमिदमिति याज्ञिकानुसारि कुतूहलमतम् । **के.**

प्रथमोपस्थितन्यायः । प्राथमिकहविःशेषादेव शेषकर्म ॥

एकस्माच्चेद्याथाकाम्यविशेषात् । ३।४।१६। ४६ ॥

भाष्यम्— अथ कृत्वाचिन्ता । यदैकस्मात् कर्तव्यानि भवेयुः, किं तदा यतः कुतश्चिदुत प्रथमादिति । किं प्राप्तम् ? यतः कुतश्चिदिति । कुतः ? न कश्चिद्विशेष आश्रीयते इति । तस्मादनियम इति ।

वा— याथाकाम्यमित्यस्यैव बुद्धिसामानाधिकरण्येन स्त्रीविवक्षायां ' षिद्गौरादिभ्यश्च ' इति ङीषि कृते ' हलस्तद्धितस्य ' इति य्यङ्यकारे लुप्ते याथाकामी भवति ।

मुख्याद्वा पूर्वकालत्वात् । ४७ ॥

भाष्यम्— मुख्याद्वा कर्तव्यानि । कुतः ? पूर्वकालत्वात् । ततः कर्तव्येषु नास्ति निमित्तविघातः । असति निमित्तविघाते नैमित्तिकं कर्तव्यमिति । ततः कृतेषु द्वितीयादीनां निमित्तविघात इत्यक्रिया । तस्मान्मुख्यादेव क्रियेरन्निति ।

वा— शेषनिमित्तकं हि विहितावश्यकर्तव्यतानिमित्तं च शेषकार्यं प्रथमस्य तावत् पाठक्रमानुसारात् पूर्वमापतति । न च तदा कश्चिद्विरोध इति क्रियते । तस्मिंश्च कृते निवृत्तव्यापारा चोदना न निमित्तीभवतीति विरोधादकरणम् ।

सोम— मुख्येन प्रधानानुष्ठानसमये एव शेषकार्यार्थं शेषः स्थाप्यः इति बुद्धेः शेषस्थापननिमित्तभूतायाः सत्त्वेन तस्यां सत्यां शेषस्थापनावश्यम्भावात् तत एवाऽऽकाङ्क्षाशान्तेर्नेतरेभ्यः स्थापनम् । **भाष्यकारपक्षे** तु यद्यपि शेषकार्यवशेन शेषस्थापनाभावेन शेषस्थापनस्य नैमित्तिकत्वाभावात् निमित्तविघातो नास्तीति शेषकार्यसमये सर्वेषां युगपदुपस्थितेः अविशेषस्तथाऽपि प्रधानहविःशेषाणामेव शेषकार्ये विनियोगात् प्रधानपौर्वापर्यस्य शेषकार्यानुष्ठानसमयेऽवश्यानुसंधेयत्वात् प्रधानकर्मानुसारेण मुख्यशेषाच्छेषकार्यस्य प्रथममनुष्ठेयत्वे सति तेनैव नैराकाङ्क्ष्यान्नेतरेभ्यः कार्याणीति द्रष्टव्यम् । ‘ पुरोडाशकपालेन तुषानुपवपति ’ इति तुषोपवापः पूर्वपक्षे येन केनचित्कपालेन कर्तव्यः । सिद्धान्ते तु प्रथमोपधेयेनेति **कृत्वाचिन्ताप्रयोजनमाहुः ।**

वि— ‘ यदैकस्मात्तदा मुख्यनियतिर्नोत विद्यते । नाश्रुतेरस्ति मुख्यातिक्रमणे हेत्वभावतः ॥ ’

भाट्ट— परप्रयुक्तद्रव्योपजीविनोऽर्थकर्मणश्च तुषोपवापादेरर्थे अनेकपुरोडाशीयकपालानां मध्ये एकस्मिन् कपाले गृह्यमाणेऽनियमप्राप्तावाग्नेयस्य मुख्यत्वेन प्रथमोपस्थितत्वात् तदतिक्रमकारणाभावेन तदीयकपालस्यैव ग्रहणम् । ग्राह्यतावच्छेदकं च प्रथमोपस्थितत्वं न त्वाग्नेयत्वम् । अतो विकृतावन्यविकारस्य तत्त्वेन तदीयमेव कपालं ग्राह्यम् । यत्त्वत्र मूले संगतिलोमेन कृत्वाचिन्तया यदा शेषकार्यानुरोधेन यस्यकस्यचित्स्थापनं तदा कस्येत्यपेक्षायां मुख्यस्येति सिद्धान्तितम्, तदाग्नेयवेलायां शेषकार्याणानबुद्धिस्थत्वात् शेषस्थापनाक्षेपानुपपत्तेः शेषकार्यानुष्ठानवेलायां चान्त्यस्यैवोपस्थितत्वेन तस्यैव स्थापनापत्तेरुपेक्षितम् । तत्रत्यमुख्यपदं वा प्रथमोपस्थितपरम्, ततश्च यस्यैव यत्र प्रथमोपस्थितिराद्यस्यान्त्यस्य वा तस्यैव तत्र ग्रहणमिति न्यायशरीरार्थः ।

मण्डन — ‘ यद्येकतः सा हविषस्तु मुख्यात् । ’ (सा शेषक्रिया) ।

शंकर— ‘ एकस्माच्चेत् तदाद्यतः । ’ (तत् शेषकार्यम्) ।

* दर्विहोमेषु ‘ चतुर्गृहीतं जुहोति ’ इत्यादिनियमानुपलम्भात् अनियतसंख्याकगृहीते प्राप्ते, प्रथमगृहीतेनापि होमसंभवात् **प्रथमोपस्थितन्यायेनैव** संख्या नियम्येत । **संकर्ष.** २।४।६.

प्रथमग्रासे मक्षिकापात इति न्यायः । अयं कर्मप्रारम्भे एव विघ्नसंभवे अवतरतीति । **साहस्री.** ७५२.

* **प्रथमद्वितीयादि**शब्दाः क्रियाया आवृत्तौ मुख्याः, तत्संबन्धात् वस्तुषूपचर्यन्ते । यथा प्रथमं काण्डम्, प्रथमः पुत्रः । एवं ‘ प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमः ’ इत्यत्रापि प्रथमः ज्योतिष्टोमप्रयोग इत्यर्थः । वि. ३।३।१७.

* **प्रथमप्रवृत्तिक्रमः** उत्तरानुष्ठाने नियामकः । वृ. ५।१।५।८.

* **प्रथमभक्षः** वषट्कर्तुः एकपात्रे । ३।५।१३।३६–३९. * यावति विषये वषट्कारः तावत्येव **प्रथमभक्षः** । वा. ३।५।१०।३१ पृ. १००७.

* **प्रथमयज्ञेऽपि** अग्निचयनसंभवः । **सोम.** १०।३।५.

* पूर्वस्य द्वितीयादीनपेक्ष्य **प्रथमशब्दो** भवति । **भा.** ३।३।१२।३३.

* **प्रथमश्रुतात्** चरमश्रुतो दुर्बलः । ‘ चतुरो मुष्टीन् ’ ‘ सप्तदशशरावश्चरुः ’ अत्र संख्या प्रबला, मुष्टेर्बाधः । **वि.** १०।२।२८.

* **प्रथमश्रुतानुसारात् चरमश्रुतं नेयं इति न्यायोऽपि** द्वितीयाश्रुत्या बाध्यो दुर्बलत्वात् । **न्यायनि.** ४।१।५।६ ब्रसू.

* **प्रथमश्रुतत्वोपकाराभ्यां** ज्योतिष्टोमे द्वादशशतसंख्या गोद्रव्यस्यैव, नान्यस्य पशोर्वा माषतिलादेर्वा मिलितानां वा । **के.** (१०।३।११)

* **प्रथमसाद्यस्कसाहस्रधर्माः** द्वितीयादिसाद्यस्कसाहस्रेषु अतिदिश्यन्ते । (चत्वारः साद्यस्काः साहस्राश्च) । **वि.** ८।१।१२.

* **‘ प्रथमहविःशेषादेव शेषकार्याणां प्रथममनुष्ठाने सति तेनैव नैराकाङ्क्ष्यात् नेतरेभ्यः शेषकार्याणि ’ अनेन न्यायेन** (३।४।२०।५२–५३) पुरोडाशद्रव्यानुनिष्पादितुषोपवापः पूर्वपक्षे येन केन चित् कपालेन कार्यः, सिद्धान्ते तु प्रथमोपधेयकपालेन इति फलति । **कु.** ३।४।२०।५३.

* **प्रथमा** अभिहितकर्तृकर्मवाचिनी इति के चित् । प्रातिपदिकार्थे प्रथमा इत्यन्ये । **मणि.** पृ. ११२. * प्रथमा उत्तमा इति अनेकसंनिपाते भवति । **भा.** १२।३।१६।३८. * **प्रथमा** । ‘ प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा ’ (पा० २।३।४६) लिङ्गपरिमाणवचनानां लिङ्गत्वपरिमाणत्वसंख्यात्वप्रकारकशक्त्या लिङ्गादिषु प्रथमायाः शक्तिः । प्रातिपदिकार्थ इति क्वचित् प्रथमाया अर्थो नास्ति इति सूचनाय । पुमान् देवदत्तः, द्रोणो व्रीहिः, एको घटः इत्यादौ पुंस्त्वद्रोणत्वैकत्वानां प्रातिपदिकार्थानां देवदत्तादौ न समवायसंबन्धेन अन्वयः संभवति, नामार्थयोः भेदान्वयस्य अव्युत्पत्तेः । अतो लिङ्गादिकं प्रथमार्थः । तत्र च प्रातिपदिकार्थानां पुंस्त्वादीनां अभेदेन अन्वयः । विभक्त्यर्थश्च देवदत्तादौ प्रकारतया अन्वेति । एवं च पुंस्त्वाभिन्नलिङ्गवान् देवदत्तः, द्रोणाभिन्नपरिमाणवान् व्रीहिः, एकत्वाभिन्नसंख्यावान् घटः इत्यादिबोधोपपत्तिः इति **वैयाकरणाः ।**

अत्राहुः । नामार्थयोः अभेदान्वयव्युत्पत्तिरक्षणाय विभक्त्यर्थप्रातिपदिकार्थयोः अभेदान्वयव्युत्पत्तिकल्पनं न युक्तम् । किंच एवं सति नामार्थयोरभेदान्वयः क्वापि न स्यात्, प्रातिपदिकार्थत्वेन प्रातिपदिकार्थे प्रथमायाः शक्त्या ‘ नीलो घटः ’ इत्यादावपि नीलाभिन्नप्रातिपदिकार्थस्य समवायसंबन्धेन घटे अन्वयात् । न चेष्टापत्तिः, प्रातिपदिकार्थत्वस्य शक्यताऽवच्छेदकत्वे गौरवात् । किंच ‘ तण्डुलः पचति ’ इत्यादावपि प्रातिपदिकार्थरूपविभक्त्यर्थस्य कर्मत्वसंसर्गेण पाके अन्वयापत्त्या ततोऽपि बोधापत्तिः । नहि विभक्त्यर्थस्य अपि धात्वर्थान्वये निरूपितत्वादिवत् कर्मत्वस्य संसर्गतया भाने किञ्चिद्बाधकमस्ति । अतः प्रातिपदिकार्थेन विभक्त्यर्थस्य अभेदातिरिक्तसंबन्धेन अन्वयबोधो नास्ति इति व्युत्पत्त्यन्तरकल्पने गौरवम् । अतो नेदं शक्तिग्राहकम्, किन्तु प्रथमोच्चारणे अन्यार्थस्याभावात् नेयं कारकविभक्तिः इति सूत्राशयः । एवं च मात्रपदं संगच्छते । शक्तिग्राहकत्वे मात्रपदवैयर्थ्यप्रसङ्गः । एवं ‘ संबोधने च ’ (पा० २।३।४७) इत्यत्रापि संबोध्यत्वे प्रथमाया न शक्तिरुच्यते ‘ हे देवदत्त पच ’ इत्यत्रापि संबोध्यस्य विभक्त्यर्थस्य धात्वर्थे कर्तृत्वेन अन्वयापत्तेः । तेन आमन्त्रितादिसंज्ञाऽन्तरप्रयुक्तकार्यप्राप्त्यर्थं ‘ संबोधने च ’ इति सूत्रम् । संबोधने या प्रथमा सा आमन्त्रितं इति सूत्रार्थः । अतो न प्रथमायाः किञ्चिद्वाच्यम्, किन्तु आख्याताद्युक्तार्थानुवादः इति दिक् । **मणि.** पृ. १२४–१२५.

* नायमेकान्तो यत् **प्रथमाऽन्तं** गुणभूतम्, प्रधानमपि भवति क्रियायां यथा ‘ मलिनः स्नायात् ’ इति । **वा.** ६।१।१।१ पृ. १३४६. * स्वार्थे समानविभक्तीनि समर्थतराणि **प्रथमान्तानि** भवन्ति । **भा.** १०।३।११।४२. * **प्रथमान्तस्य** क्रियापदसाकाङ्क्षत्वे न प्रमाणाभावः । ‘ चैत्रः ’ इत्येतावन्मात्रस्य शाब्दबोधाजनकत्वेन तस्यापि साकाङ्क्षत्वात् । न च तथात्वेऽपि पण्डितादिपदसमभिव्याहारेणापि (चैत्रः पण्डितः) शाब्दबोधजननात् क्रियापदसाकाङ्क्षत्वे प्रमाणाभावः । ‘ अस्तिर्भवन्तीपरः प्रथमपुरुषे अप्रयुज्यमानोऽप्यस्ति ’ इति **कात्यायनस्मरणेन** तस्यापि क्रियापदसाकाङ्क्षत्वात् । भवन्तीपरः लडन्त इत्यर्थः । न चैवं तर्हि प्रथमपुरुषभिन्ने ‘ अहं पण्डितः, त्वं पण्डितः ’ इत्यादौ तत्साकाङ्क्षत्वे प्रमाणाभावः । तत्रापि प्रातिपदिकार्थप्रकारक-

शाब्दबुद्धित्वावच्छिन्नं प्रति विशेष्यतासंबन्धेन सुब्जन्योपस्थितिः कारणम्, लिङ्गसंख्याव्यतिरिक्तसुबर्थप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति क्रियापदजन्योपस्थितिः कारणम्, इति क्लृप्तकार्यकारणभावयोरेव प्रमाणत्वात् । अत एव प्रथमास्थलेऽपि न प्रातिपदिकोपस्थितस्यैव चैत्रस्य क्रियायामन्वयः, अपितु प्रथमोपस्थितस्यैव । 'प्रातिपदिकार्थमात्रे प्रथमा' इत्यनुशासनेन प्रातिपदिकार्थस्यैव प्रथमार्थत्वात् । प्रकृतिप्रत्ययार्थयोश्च अभेदसंबन्धेन अन्वयान्न क्लृप्तव्युत्पत्तिभङ्गः । प्रातिपदिकं वा तात्पर्यग्राहकं इति वक्ष्यते । यदा तु अभिहितकारकवाचिनी प्रथमा इति मतं तदा सुतराम् । रहस्य. पृ. ४१–४२.

* प्रथमाऽर्थस्तावत् लिङ्गसंख्याभिन्नः भावनायां प्रकारत्वेनान्वेति । न च तस्याः साधुत्वमात्रार्थमुच्चारणेन तदर्थे मानाभावः, संबोधने अभिमुखत्वस्यापि भासमानत्वेन तदसिद्धेः । तच्च प्रकृतशाब्दबोधाश्रयत्वप्रकारकवक्तृभिन्नविशेष्यक–वक्त्रिच्छाविषयीभूतशाब्दज्ञानवत्त्वम्, प्रकृतशाब्दबोधनिष्ठविषयतानिरूपितवक्तृभिन्ननिष्ठवक्त्रिच्छाविषयतावत्त्वं वा । युष्मत्पदशक्यताऽवच्छेदकं च तदेव । अस्ति चेदम् 'देवदत्त गामानय' इत्यादौ, 'देवदत्त चैत्रो गामानयति' इत्यादौ च, तस्य उक्तविधज्ञानवत्त्वात् । न च यत्र स्नुषां बोधयितुं कन्यासंबोध्यवाक्यप्रयोगः (कन्या संबोध्या यस्मिन् वाक्ये) तत्र स्नुषायामतिव्याप्तिः, तत्र स्नुषायाः संबोध्यत्वेऽपि तत्संबोधनस्य शब्दतात्पर्यविषयत्वाभावेन तस्यां संबोधनप्रथमाऽनापत्तेः । तात्पर्यविषयत्वसत्त्वे च भवत्येव सा । अत एव चेतने एव संबोधनं मुख्यम्, अचेतने तु ज्ञानवत्त्वारोपेण गौणो व्यवहारः । अत एव आद्योदाहरणे (देवदत्त गामानय) अभिमुखत्वं कर्तृत्वं च उभयं प्रथमाऽर्थः । तत्र आधेयत्वं प्रातिपदिकार्थसंसर्गः । तयोश्च विषयत्वनिरूपकत्वाभ्यां भावनायामन्वयः । अन्त्ये च (देवदत्त चैत्रो गामानयति) अभिमुखत्वस्यैव विषयत्वसंसर्गेण ।

'चैत्र ! मैत्रः कीदृशः' इत्यादावपि 'अस्तिर्भवन्तीपरः' इत्यादिना क्रियापदाध्याहारस्य आवश्यकत्वात् शाब्दबोधाविघातः । 'चैत्र ! मैत्रो ग्रामं गच्छतु' इत्यादौ तु लोडर्थप्रार्थनाविषयीभूतायां भावनायां निरुक्तसंबन्धेन संबोध्यत्वस्य स्वरूपसंबन्धेन स्वनिष्ठव्यापारप्रयोज्यत्वस्य अन्वयः । प्रतीत्यनुसारेण तत्तदर्थकलोडादेरेव तात्पर्यग्राहकत्वात् । अत्र च प्रथमाऽऽदेशविशेषाणामेव संबोधने शक्तिः पृथगनुशासनबलात् । हेशब्दादिकं तु तात्पर्यग्राहकम् । व्यापारप्रयोज्यत्वादौ तु लक्षणैव । 'चैत्र मैत्रो ग्रामं गच्छति' इत्यादौ प्रथमान्ते च **तार्किकमते**ऽपि भावनाविशेष्यत्वं नास्ति प्रथमार्थरूपान्यविशेषणत्वात्, तत्र आख्यातोपात्तसंख्याऽन्वयाभावाच्च । अतः तैः संबुद्धिभिन्नप्रथमाऽन्तपदजन्योपस्थितिरेव भावनाऽन्वयप्रयोजिका इति वाच्यम् । न च तदपि वक्तुं शक्यम् । 'चैत्र गामानय' इत्यादौ तदनापत्तेः । न च तत्र त्वंपदाध्याहारः, तथात्वे 'भो ब्राह्मणाः त्वं पच' इति प्रयोगापत्तिः । न च युष्मदर्थकर्तृसंबुद्धयोः एकसंख्याकत्वम्, व्युत्पत्त्यन्तरकल्पनाऽऽपत्तेः ।

एतेन अभिमुखत्वादेः सर्वत्र प्रातिपदिकार्थे प्रकारत्वमित्यपि अपास्तम् । 'चैत्र ! मैत्रः पचति' इत्यादौ चैत्रे भावनाऽऽद्यन्वयापत्तेः । वस्तुतस्तु अस्मन्मतेऽपि 'चैत्र मैत्रः पचति' इत्यादौ चैत्रस्य कर्तृत्वेन भावनाऽन्वयस्य निवारयितुमशक्यत्वात् सर्वत्र संबोधनमेव संबुद्धिप्रथमाया अर्थः, न तु कर्तृत्वमपि । 'चैत्र पच' इत्यादौ मध्यमपुरुषस्थले आख्यातेन संबोध्याया तद्व्यक्तेरेव कर्तृत्वेन लक्षणात् न संबोध्यातिरिक्तस्य कर्तृत्वप्रसङ्ग इति ध्येयम् । अतो द्वितीयादिसाधारण्येन प्रथमासुबर्थस्यापि प्रकारत्वमेव सर्वत्र युक्तम् ।

न च प्रथमायाः लिङ्गसंख्ययोरिव संबोधनरूपार्थवत्त्वेऽपि तदतिरिक्तार्थाभावात् 'चैत्रः पचति' इत्यादौ प्रातिपदिकार्थातिरिक्तस्य विशेष्यभूतार्थस्य अभावेन कथं द्वितीयादिसाधारण्येन सर्वत्र प्रथमार्थस्य प्रकारत्वं इति वाच्यम् । असंबुद्धिप्रथमाया अपि अनुशासनबलेन लिङ्गसंख्याव्यतिरिक्तार्थवाचित्वावगतेः । तथाहि । पाणिनिमतं तावत् 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा' (पा० २।३।४६) इति सूत्रात् प्रातिपदिकार्थे एव । इदं हि लिङ्गाद्यंशे शक्यत्वानुशासनवत् प्रातिपदिकार्थांशेऽपि शक्यत्वानुशासनमेव, न तु प्रातिपदिकार्थे

प्रातिपदिकेन विवक्षिते प्रथमायाः साधुत्वमित्येवंपरम्, वैयर्थ्यापत्तेः वैरूप्यापत्तेश्च । अतश्च प्रातिपदिकार्थश्चैत्रादिरेव प्रथमाऽर्थः ।

न च एवमपि तस्य प्रातिपदिकेनैव बोधसिद्धेः प्रथमायास्तदंशे साधुत्वार्थं अनुवादकतया न प्रथमाऽर्थस्य अन्यत्र प्रकारता इति **वाच्यम्** । प्रातिपदिकस्यैव प्रथमाऽर्थविशेषतात्पर्यग्राहकत्वाङ्गीकारेण प्रथमाऽर्थस्य अन्यत्र प्रकारत्वे बाधकाभावात् । इतरथा सुबर्थप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति धात्वादिपदजन्योपस्थितिः कारणं इत्येवंविधकार्यकारणभावे प्रथमाऽतिरिक्तत्वप्रवेशे गौरवात् । प्रकृत्यर्थस्य प्रत्ययार्थं प्रति प्रकारत्वे प्रथमान्तप्रातिपदिकातिरिक्तत्वप्रवेशे गौरवात् च । आख्याताद्यर्थभावनाऽऽदेः प्रथमाऽन्तार्थं प्रति प्रकारत्वे व्युत्पत्त्यन्तरकल्पनाऽऽपत्तेश्च । अतो लाघवात् सुबर्थत्वेन प्रथमार्थस्यापि चैत्रादेः आख्यातार्थभावनायामेव प्रकारता । अत एव एतादृशे विषये प्रकृत्यर्थस्य चैत्रादेर्न प्रथमाऽर्थचैत्रादौ अन्वयः । प्रकृतिप्रत्ययार्थयोः व्युत्पन्नस्य भेदान्वयस्य बाधात् अभेदान्वयस्य चाव्युत्पन्नत्वात् । अतः प्रातिपदिकं तत्र प्रथमाऽर्थविशेषतात्पर्यग्राहकमेव । प्रथमोपस्थापितस्तु स एव आख्यातार्थभावनाऽन्वयी ।

न चैवमाख्यातपदाभावे तस्य अनन्वयः, 'काष्ठैरोदनम्' इत्यादौ क्रियापदाध्याहारेणेव 'नीलो घटः' इत्यादावपि 'अस्ति' इत्यध्याहारानुशासनशिष्टतया सुतरामुपपत्तेः । नीलपदस्यापि वक्ष्यमाणरीत्या नीलगुणे नीलत्वजातौ वा शक्तस्य लक्षणया लक्षितलक्षणया वा नीलत्वावच्छिन्नगुणविशिष्टद्रव्यपरस्य तात्पर्यग्राहकत्वात् तदुत्तरप्रत्ययोक्तस्य तद्द्रव्यस्यापि न घटेन सह अभेदेन अन्वयः । अपि तु घटवदेव अस्तीत्याख्यातोपात्तभावनायामेव । एकव्युत्पत्त्यैव शाब्दबोधोपपत्तेः । इतरथा विशेषणवाचकनामार्थस्य अभेदसंबन्धेन नामार्थान्तरान्वयकल्पना, तदुत्तरद्वितीयाऽऽदिविभक्तेरपि साधुत्वार्थकत्वकल्पना, प्रकृत्यर्थस्य प्रत्ययार्थे अन्वयव्युत्पत्तेश्च विशेषणवाचकप्रकृतिभिन्नविषयत्वकल्पना इत्येवं गौरवापत्तेः ।

न च नीलघटयोः अभेदानुभवानुरोधेन गौरवाङ्गीकरणमपि न दोष इति **वाच्यम्** । प्रथमाद्यर्थस्य नीलगुणविशिष्टस्य घटस्य च कर्तृतासंसर्गेण शाब्दबोधे भावनाविशेष्यके जाते पश्चात् घटस्य परिच्छेदकीभूतगुणापेक्षायां गुणविशिष्टस्य च जात्यपेक्षायां मानसः अभेदानुभवः इति पार्ष्ठिकबोधमादाय अनुभवोपपत्तेः ।

न च शब्दात् अभासमानस्य अभेदस्य वेदोत्थज्ञानविषयत्वाभावात् 'अरुणयैकहायन्या' इत्यत्र आरुण्यस्य एकहायन्यां अन्वयाकरणेऽपि दोषाभावापत्तिः, वेदापेक्षितार्थविषयकस्य मानसस्यापि ज्ञानस्य वेदतात्पर्यविषयतया वेदार्थत्वात् । नहि वेदपदवृत्तिविषयत्वं वेदजन्यशाब्दबोधविषयत्वमेव वा वेदतात्पर्यविषयत्वप्रयोजकम् । तथात्वे 'इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते' इत्यत्र शाब्दबोधे मन्त्राश्वाभिधानीसंबन्धमात्रस्यैव विषयीकरणात् । तस्य च लिङ्गकल्प्यश्रुत्यैव सिद्धौ एतद्वाक्यवैयर्थ्यापत्तेः । तत्परिहारार्थं अनुमीयमानस्य लैङ्गिकश्रुत्यभावस्यापि वेदतात्पर्यविषयत्वानापत्तेः परिसंख्याफलकत्वानापत्तिः । अतो वेदापेक्षाशामकज्ञानविषयत्वमेव वेदतात्पर्यविषयत्वप्रयोजकम् । तच्च गुणविशिष्टद्रव्यस्य एकहायन्यादेश्च अभेदेऽपि अक्षतमेव । आवश्यकं चैतत् परेषामपि इष्टसामान्यसाधनत्वस्यैव लिङर्थत्वात् स्वर्गादिपदार्थस्य च कामनाविशेषणत्वेन इष्टे अभेदान्वयानुपपत्तेः इष्टसाधनीभूतयागानुकूलकृतिमान् स्वर्गकामः इति शाब्दबोधस्य आवश्यकत्वात् । तदुत्तरं इष्टे स्वर्गाभेदबोधो मानस एव शास्त्रतात्पर्यविषय इति । एतादृशतात्पर्यविषयीभूतः एव च इष्टे स्वर्गभेदनिश्चयप्रतिबध्यः, न तु शाब्दबोध इति त्वयाऽपि अङ्गीकार्यं इति न ममैव तच्चोद्यावकाशः ।

यदि तु त्वया एतादृशदोषभिया स्वर्गादिसाधनत्वमेव शक्त्या लक्षणया वा लिङर्थः, स्वर्गादिपदं च तात्पर्यग्राहकं इत्यभ्युपेयते, तदा मयाऽपि नीलपदोत्तरप्रथमार्थस्य गुणविशिष्टद्रव्यस्य स्वाभिन्नघटवृत्तिकर्तृत्वसंसर्गेण भावनाऽन्वयः घटपदं च संसर्गेऽपि तात्पर्यग्राहकं घटपदोत्तरप्रथमाऽर्थस्य स्ववृत्तिकर्तृत्वेन इति शक्यं वक्तुम् । ततश्च अभेदस्यापि शाब्दत्वोपपत्तेः न कश्चिद्दोषः । केचित्तु

विशिष्टविध्यादौ विशेषणविध्यादिवाचकपदसमूहकल्पनावत् अभेदबोधकवाक्यान्तरकल्पनैव इत्याहुः । सर्वथा प्रथमाऽर्थस्य भावनायां द्वितीयाऽऽदिसाधारण्येन भेदसंबन्धेन प्रकारता इति सिद्धम् ।

एतेन चैत्रादेर्नामार्थस्य प्रथमार्थस्यैव वा आख्यातोपात्तकर्त्रादौ अभेदान्वय इति वैयाकरणमतमपि अपास्तम् । व्युत्पत्त्यन्तरकल्पने प्रमाणाभावात् । यत्तु ' स्तोकं पचति ' इत्यादौ नामार्थस्य स्तोकस्य पाके अभेदान्वयार्थं अभेदसंबन्धेन निरर्थकसुप्समभिव्याहृतनामार्थप्रकारकशाब्दत्वावच्छिन्नं प्रति निरुक्तनामसमभिव्याहृतपदजन्योपस्थितिः कारणं इति कार्यकारणभावस्य आवश्यकत्वात् तेनैव चैत्रादेः योग्यतया कर्त्रादौ अभेदान्वयोपपत्तिरिति । तन्न । चैत्रपदोत्तरप्रथमायाः निरर्थकत्वस्य पाणिन्यादिविरुद्धत्वात् स्वलेखनविरुद्धत्वाच्च । स्तोकप्रातिपदिकार्थः स्तोकत्वम् , द्वितीयाऽर्थो लक्षणया आश्रयत्वम् , तस्य च साक्षात् परंपरया वा पाकादौ भावनायां वा अन्वयात् न निरर्थकसुप्त्वं इति तादृशव्युत्पत्तिकल्पनाया असिद्धेश्च । यस्यापि स्तोकत्वविशिष्टं प्रातिपदिकार्थः , तस्यापि मते अभेदो लक्षणया द्वितीयाऽर्थः । स च स्तोकप्रतियोगिकान्योन्याभावाभावरूपः स्तोकत्वमेव । तस्य च भेदसंबन्धेनैव पाकादौ अन्वयः । ' द्रव्यत्वावच्छिन्नवृत्तिद्रव्यत्ववान् पटः ' इतिवच्च स्तोकत्वावच्छिन्नवृत्तिस्तोकत्ववान् पाकादिः इति शाब्दबोधः इति क्व नामार्थस्य अभेदसंबन्धेन अन्वयः , क्व वा द्वितीयाया निरर्थकत्वम् ? न च लक्षणादोषभिया व्युत्पत्त्यन्तरकल्पनं द्वितीयाया निरर्थकत्वकल्पनं च न दोषः । तथात्वे ' चैत्रो जानाति ' इत्यादौ आश्रयत्वलक्षणायाः **शिरोमणि**संमतायाः अनापत्तेः । अत्रापि कृत्यविषयीभूतार्थकधात्वर्थस्य व्युत्पत्त्यन्तरेणैव नामार्थप्रकारत्वोपपत्तेः, लक्षणायाः फलमुखत्वाच्च, अन्यथा लक्षणोच्छेदापत्तेः । तस्मात् युक्तं प्रथमाऽर्थस्यापि कर्तृत्वकर्मत्वरूपसंसर्गेण आख्यातार्थभावनायामन्वयः , प्रातिपदिकं च तात्पर्यग्राहकम् , लिङ्गसंख्याऽन्वयश्च प्रथमार्थे एवेति । इति सर्वमनवद्यम् ।

संसर्गश्च आख्यातनिपातोपात्तकर्तृत्वकर्मत्वमेव, न तु कृदाद्युपात्तमपि । तेन ' पाठकश्चैत्रः पचति ' इत्यत्र चैत्ररूपप्रथमाऽर्थस्य पाकक्रियाकर्तृत्वसंसर्गेण अन्वयः आख्यातोपात्तभावनायामेव योग्यत्वात् , न तु लिङ्गानन्वयित्वेऽपि कृदुपात्तायां पाठकृतौ, तस्यामाख्यातोपात्तकर्तृत्वसंसर्गेण अयोग्यत्वात् । एतादृशसंसर्गविवक्षाऽनङ्गीकारे च ' चैत्रः पाठकेन पच्यते ओदनः ' इत्यस्यापि आपत्तेः । अतः चैत्रः पाठकर्ता च द्वावपि पाककृतावेव तन्निरूपितकर्तृत्वसंसर्गेण अन्वीयेते । तयोः परस्पराभेदभानं तु पूर्ववत् (पार्ष्ठिकम्) । चैत्रस्य पाठकृत्याश्रयत्वभानं तु सर्वमते मानसमेव । एवम् ' पक्व ओदनो भुज्यते ' इत्यत्रापि ओदनरूपप्रथमाऽर्थस्य भोजनकृतिनिरूपितकर्मत्वसंसर्गेण भोजनकृतावेव अन्वयः , न तु पाककृतिकर्मत्वेन पाककृतौ तदुपात्तायाम् , तथात्वे ' ओदनः पक्वं चैत्रो भुङ्क्ते ' इत्यस्याप्यापत्तेः । अतः तत्रापि पूर्ववदेवान्वयः । ' चैत्र इव मैत्रो गायति ' ' विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम् ' इत्यत्र आख्यातोपात्तकर्तृत्वकर्मत्वाभावेऽपि इवादिनिपातोपात्तकर्तृत्वकर्मत्वसंसर्गेण तदुपात्तभावनायां लिङ्गान्वयरहितायां चैत्रविषवृक्षयोः प्रथमोपात्तयोः अन्वयाच्च निपातोपात्तेति । तदेवं **पाणिनिमते** प्रथमाऽर्थनिष्कर्षः ।

कात्यायनस्तु, न प्रातिपदिकार्थे प्रथमा । तथात्वे प्रातिपदिकस्य तात्पर्यग्राहकत्वमात्रकल्पनया शाब्दबोधजनकत्वानापत्तेः । अपितु अभिहितकारकत्वमेव प्रथमाऽर्थः । तस्मिंश्च कर्तृत्वादिरूपे प्रथमार्थे प्रातिपदिकार्थश्चैत्रादिः भेदसंबन्धेनैव अन्वेति । संख्याऽदिकं च द्वितीयान्तपद इव इति न क्वापि व्युत्पत्त्यन्तरकल्पना । कर्तृत्वादिकं च सुबन्तरार्थवदेव क्रियापदार्थे इति न तत्रापि सा (अन्वेति) । न च कर्तृत्वादेः आख्यातावगतस्य भावनायामन्वितत्वात् पुनर्बोधवैयर्थ्यम् , चैत्रत्वावच्छिन्नवृत्तित्वेन तस्य आख्यातेन अनवगमात् सार्थक्योपपत्तेः ।

न च तथापि आख्यातजन्यस्य सामान्यधर्मप्रकारकबोधस्य वैयर्थ्यम् , तस्य प्रथमोत्पत्तिप्रयोजकत्वात् , इतरथा तृतीयाऽऽद्यापत्तेः । नहि कृत्याद्यभिधानमात्रं तत्प्रयोजकम् , भावाख्यातेऽपि ' चैत्रेण सुप्यते ' इत्यादौ

कृञा विवरणेन कृत्यभिधानात् प्रथमोपपत्तेः । अतः कर्तृत्वाद्यभिधानमेव प्रथमाप्रयोजकम् । तच्च शक्त्या लक्षणया वा इत्यन्यदेतत् । तस्मात् अभिहितकारकत्वं प्रथमाऽर्थः । न च ' प्रासादे आस्ते ' ' पक्वं भुङ्क्ते ' इत्यादौ कृत्प्रत्ययेन अधिकरणत्वकर्मत्वयोः उक्तत्वात् प्रथमाऽऽपत्तिः , तिङ्निपाताभिहितकर्तृत्वकर्मत्वयोरेव प्रथमाऽर्थत्वात् , प्रासादे इत्यत्र सदिधातूत्तरघञा अधिकरणत्वाभिधानेऽपि सप्तम्यविरोधात् । पक्वं इत्यत्र क्तप्रत्ययेन कर्मत्वाभिधानेऽपि द्वितीयाया अविरोधाच्च । तिङ्निपातोदाहरणानि तु पूर्वमेव प्रदर्शितानि ।

ननु एवं तिङ्निपाताभिहिते कारके प्रथमा, तदनभिहिते तु तृतीयादिः इत्यर्थापत्तेः तिङर्थान्वयिनि चैत्रादौ प्रथमोपपत्तावपि कर्त्रर्थककृदुपात्तभावनान्वये विवक्षिते तृतीयाऽऽपत्तेः ' चैत्रेण पाचको भुङ्क्ते ' इति प्रयोगापत्तिः । नहि कृदुपात्तभावनायां कारकाणामनन्वयः ' काष्ठैः स्थाल्यां ओदनस्य पाचकः अन्नं भुङ्क्ते ' इत्यादौ काष्ठादीनामन्वयदर्शनात् । अतश्च तद्वदेव कर्तृकारकस्यापि अन्वयोपपत्तेः । तत्र च तिङुपात्तक्रियान्वयविवक्षाऽभावेन प्रथमाऽनुपपत्तेः कृदुपात्तक्रियान्वयित्वेन विवक्षितस्य चैत्रस्य तिङाद्यनभिहितकर्तृत्वार्थिका तृतीया दुर्वारा । एवं ' ओदनं पक्वो भुज्यते चैत्रेण ' इत्यपि द्वितीयान्तप्रयोगापत्तिः, कर्मत्वस्य पाकनिरूपितस्य तिङा अनुक्तत्वात् । शाब्दबोधश्च तत्र चैत्रकर्तृकपाकानुकूलकृत्याश्रयो भुङ्क्ते इति । वारद्वयं कर्तृत्वबोधश्च 'घटत्ववान् घटः' इतिवन्नानुपपन्नः । एवं ' ओदनं पक्वो भुज्यते ' इत्यत्रापि शाब्दबोधो वारद्वयं कर्मत्वबोधश्च अनुसंधेयः । इति चेत् । अनभिहिते इत्यस्य स्वान्वयिभिः कृदादिभिः अनभिहिते इत्यर्थात् । अतश्च तत्र कृता कर्तृत्वकर्मत्वयोरुक्तत्वात् न तृतीयाद्यापत्तिः । प्रथमायास्तु तदन्वय– (कृदर्थक्रियान्वय–) विवक्षायां निमित्ताभाव एव (तिङ्निपातोपात्तकर्तृत्वकर्मत्वयोः प्रथमाभिहितयोः कृदर्थक्रियायां संसर्गासंभवात्) ।

न चैवमपि तदन्वय– (कृदर्थक्रियान्वय–) विवक्षायां षष्ठ्यापत्तिः । ' अनभिहिते ' (पा० २।३।१) इत्यधिकारस्य प्रथमाविधायकसूत्रेण (पा० २।३।४६) विच्छेदात् ' कर्तृकर्मणोः कृति ' (पा० २।३।६५) इति कर्तृषष्ठीविधायकसूत्रे अनुवृत्त्यभावात् इति वाच्यम् । मण्डूकप्लुतिन्यायेन तत्रापि तदनुवृत्तेः सर्वसंमतत्वात् । अन्यथा ' चैत्रः पक्त्वा भुङ्क्ते ' इति वक्तव्ये ' चैत्रस्य पाचको भुङ्क्ते ' इत्यपि प्रयोगापत्तेः । अतः ' चैत्रः पाचकः' इति प्रथमान्तयोरुभयोरपि भुङ्क्ते इति क्रियायामेवान्वयः । परस्परमभेदान्वयबोधस्तु पूर्ववत् । यत्रापि क्रियापदाश्रवणं तत्रापि ' अस्तिर्भवन्तीपरः ' (महाभाष्यं २।३।४६) इत्यनेन अध्याहर्तव्यम् ।

न चैवं प्रथमायाः तिङ्निपातान्यतरसामानाधिकरण्यनिमित्तत्वेन ' चैत्रः पच् ल् ' इति स्थितिदशायां तिङः अभावात्प्रथमानिमित्ताभावेन अप्रथमासमानाधिकरणपदत्वरूपस्य शतृशानचोर्निमित्तस्य सत्त्वात् ' लटः शतृशानचावप्रथमासमानाधिकरणे ' (पा० ३।२।१२४) इत्यनेन विशेषविधिना शतृशानचोरेव लटि प्राप्त्यापत्तेः तिङादेः लिङादिमात्रविषयत्वेनापि सामान्यविधिवशादुपपत्तेः लटि तिङः अभावापत्तिः इति वाच्यम् । एतादृशार्थस्य लटि शतृशानज्विधानमात्रेणैव सिद्धेः अप्रथमासमानाधिकरणे इतिपदवैयर्थ्यापत्तेः । तत्परिहारार्थं प्रथमायाः लटि अपि ज्ञापकबलेन सिद्धेः, तस्याश्च प्रयोजकीभूततिङादिसामानाधिकरण्यं विना अनुपपत्तेः लटि तिङ्सिद्ध्युपपत्तेः । अत एव ज्ञापकेन भावितिङादिकं निमित्तीकृत्य सर्वा एव विभक्तयो लटि भवन्ति इति ज्ञाप्यते । तत्र च प्रथमाभिन्नविभक्तिसामानाधिकरण्ये शतृशानचोः विधानेऽपि न तयोः पूर्वप्रमिततिङादिबाधकत्वम् । एवं च ' अप्रथमासमानाधिकरणे ' इत्यस्य पर्युदासत्वेऽपि लटि तिङाद्युपपत्तिः । प्रसज्यप्रतिषेधत्वपक्षे तु सुतराम् ।

महाभाष्यकारीयाः लटि तिङाद्यनुपपत्तिपरिहारास्तु दुरुपपादत्वात् इह न लिखिताः ।

सर्वथा तिङ्निपातोभयाभिहितकर्तृत्वकर्मत्वयोः प्रथमा इत्याह । तयोश्च द्वितीयाद्यर्थवदेव आख्यातोपात्तभावनान्वयः इति सिद्धम् ।

न च एवमपि प्रथमार्थस्य आख्यातार्थादौ एव अन्वयः, द्वितीयार्थादेस्तु कृदाद्यर्थेऽपि इति कथं कार्यकारणभावैक्यं इति वाच्यम् । सुबर्थप्रकारकशाब्दत्वाव-

च्छिन्नं प्रति लिङ्गानन्वयिपदजन्योपस्थितेः भावनाविशेष्यतासंबन्धेन कारणत्वेऽपि प्रमाणान्तरजन्याभिहितत्वाद्युपस्थितिरूपकारणान्तरवशेन विशेषलाभोपपत्तेः इति दिक् । रहस्य. पृ. ५७–६७.

* **प्रथमाऽऽदीनां** तिसृणामुपसदां स्वस्थानावृत्त्या अग्निचयने षडुपसदः । ५।३।२.

* **प्रथमोत्तमे ऋचौ** त्रिरभ्यस्यावशिष्टानामगमेन संख्यापूरणं सामिधेनीविवृद्धौ । १०।५।८।२७–३३.

* **प्रथमाप्रयोजकं** तु सर्वत्र कर्तृत्वोक्तिरेव । सा परं कर्तृत्वप्रकारिका कर्तृत्वविशेष्यिका वा इत्यन्यदेतत् । रहस्य. पृ. ३८.

* **प्रथमाप्रयोजकविचारः ।** किञ्च सत्यपि संख्याभावनोभयसाधारण्येन उक्तविधप्रथमाऽन्तपदजन्योपस्थितेः कारणत्वे भवन्मते प्रथमातृतीयादिप्रयोजकं किम् ? न तावत् कर्त्राद्यभिधाने तत्प्रयोजके, तस्य त्वया अनङ्गीकारात् । नापि संख्याऽभिधानानभिधाने, संख्यायाः सर्वत्र आख्याताभिधेयत्वेन सर्वत्र प्रथमाऽऽपत्तेः द्वितीयाऽऽदिविभक्त्यभावप्रसङ्गात् ।

अथ तिङुपात्तसंख्याऽन्वयित्वमेव प्रथमाप्रयोजकम् । तदन्वयश्च यगादिसमभिव्याहारसत्त्वे कृतिविषयत्वाख्यफलाश्रये कर्मणि, शबादिसमभिव्याहारे कृत्याश्रयाख्ये कर्तरि । यादृशसमभिव्याहारे आख्यातस्य कर्तृवाचित्वं **वैयाकरणमते, मीमांसकमते** वा कर्तृलक्षकत्वम् , तादृशसमभिव्याहारे तिङुपात्तसंख्यायाः कृत्याश्रयरूपकर्तृगामित्वम् । यादृशसमभिव्याहारे च तयोर्मते कर्मपरत्वं तादृशसमभिव्याहारे तिङुपात्तसंख्यायाः कृतिविषयत्वरूपकर्मगामित्वम् । अतः तादृशसंख्याऽभिधानमेव संख्याविशेषवाचिनामपदोत्तरप्रथमाप्रयोजकम् । तादृशसंख्यानभिधानं तु तदविशेष्यवाचिनामपदोत्तरकर्तृकर्माद्यभिधायकतृतीयाद्वितीयाऽऽदिविभक्तिप्रयोजकम् । अत एव भावाख्यातस्थले कर्तृकर्मगतसंख्याऽभिधानात् 'चैत्रेण सुप्यते' इति तृतीया । 'चैत्रेण पच्यते ओदनः' इत्यत्र कर्माख्याते कर्मवाचिपदे एव प्रथमा । 'चैत्रः पचति' इत्यत्र कर्त्राख्याते कर्तृवाचिपदे एव इति व्यवस्थालाभः इति चेत् । तथात्वे 'चैत्रेण पाचकस्य पुत्रः, ओदनं पक्वस्य विक्लृतिः' इत्यादिप्रयोगापत्तेः । कृत्प्रत्ययेन कर्तृकर्मगतसंख्यायाः अनुक्तत्वात् । 'चैत्रस्य पाचकस्य पुत्रः, ओदनस्य पक्वस्य विक्लृतिः' इतिप्रयोगानापत्तेः । 'चैत्रः पाचकः, ओदनः पक्वः' इति प्रयोगानापत्तिरपि । 'विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम्' इत्यादावपि प्रथमाऽनापत्तेश्च । **न च** तत्र कृत्प्रत्ययेन, सांप्रतं इति निपातेन च कर्त्राद्यभिधानादेव प्रथमासिद्धिः । संख्याकर्त्राद्यन्यतरानभिधाने च तृतीयाऽऽदिः इति सूत्रार्थः इति **वाच्यम् ।** तथात्वेऽपि 'चैत्र इव गच्छति मैत्रः' इत्यादौ चैत्रे प्रथमाऽनापत्तेः । गच्छतीति तिङा चैत्रगतसंख्यायाः चैत्रगतकर्तृत्वस्य च अनुक्तत्वात् । यत्तु 'कृत्यनभिधाने तृतीया, फलानभिधाने द्वितीया, अभिधाने तु सर्वत्र प्रथमा' इति मतम् , तदपि न । भावाख्याते भावनाऽभिधानेन प्रथमाऽऽपत्तेः । कर्माख्यातेऽपि 'क्रियते' इति विवरणानुरोधेन कृतिवाचित्वस्य आवश्यकत्वात् प्रथमाऽऽपत्तेश्च । अस्मन्मते तु सत्यपि तिङो भावनावाचित्वे वक्ष्यमाणरीत्या कर्त्रादेः अपि लक्षणया अभिधानात्कृत्प्रत्ययेन सांप्रतमिति निपातेन च शक्त्यैव कर्त्राद्यभिधानात् सर्वत्र प्रथमोपपत्तिः । सांप्रतं इति निपातेन 'योग्यः' इत्यर्थकेन कर्माभिधानात् । चैत्र इव इत्यादावपि इवशब्देन गमनकर्तृत्वरूपसादृश्याभिधानात् कर्त्रभिधानम् । 'चन्द्र इव मुखम्' इत्यादावपि अस्ति इति क्रियापदाध्याहारस्य आवश्यकत्वात् आह्लादकत्वावच्छिन्नसत्ताऽऽश्रयत्वरूपकर्त्रभिधानम् । अत एव क्त्वाप्रत्ययेनापि समानकर्तृकत्वाभिधानात् 'चैत्रः पक्त्वा भुङ्क्ते' इत्यादौ चैत्रपदेऽपि प्रथमोपपत्तिः । **न चैवं** 'चैत्रेण पक्त्वा भुज्यते' इत्यत्र चैत्रपदे तृतीयाऽनापत्तिः, क्त्वाप्रत्ययेन कर्तुरुपादानात् , इति **वाच्यम् ।** तत्र 'आत्मानमात्मना वेत्सि' 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' इत्यादिवत् करणत्वस्य तृतीयाऽर्थत्वात् । अत एव यद्वृत्तिकारकत्वं स्वान्वयिक्रियाप्रतिपादकेन पदेन वृत्त्या प्रतिपाद्यते, तत्त्वं प्रथमाप्रयोजकीभूताभिहितत्वं इत्युक्तं **भाट्टदीपिकायाम् ।** अस्ति चेदं 'चैत्रः पचति, ओदनः पच्यते' इत्यादौ, चैत्रादिवृत्तिकर्तृत्वकर्मत्वादेः निरुक्तक्रियापदेन अभिधानात् ।

'पाचकेन गम्यते' इत्यादौ च कृदुपात्तस्य पुरुषस्य गमनक्रिययैव अन्वयः, न तु पाकक्रियया, प्रथमं तस्या एव तस्मिन्नन्वयात् । अन्वयश्चात्र प्राथमिकशाब्दबोधविषयीभूत एव विवक्षितः । तेन 'औदुम्बरो यूपो भवति, स्वर्गकामो यजेत' इत्यादौ यूपस्वर्गादीनां प्रथमया कर्मत्वादिलक्षणायामपि प्राथमिकयूपकर्तृकभवनाऽऽश्रयत्वादिशाब्दबोधे कर्तृत्वस्य उक्तत्वात् प्रथमोपपत्तिः । न च तत्र प्रमाणाभावः, तथात्वे धर्मिज्ञानाभावेन वैयर्थ्यप्रतिसंधानाभावात् तात्पर्यज्ञानाभावेन लक्षणाऽनुपपत्तेः । अत एव यत्र अन्वयानुपपत्त्यैव लक्षणा, तत्र लक्षणाजन्यशाब्दबोधस्यैव प्राथमिकत्वात् तत्र च तत्कर्तृत्वानुक्तौ प्रथमाऽन्तपदस्य अयोग्यत्वमेव । यथा 'अग्निना चैत्रः पाके यतते' इत्यर्थे 'अग्निश्चैत्र (संबोधनमिदम्) पाके यतते' इति । अत्र हि प्रथमायाः करणत्वलक्षणया शाब्दबोधः । अत्र हि अन्वयानुपपत्त्यैव करणत्वलक्षणा । अतः तत्र लक्षणातः पूर्वं शाब्दबोधाभावात् अयमेव बोधः प्राथमिको वाच्यः । न च तदानीं भासमानं करणत्वं स्वान्वयिक्रियाप्रतिपादकेन यतते इति पदेन उक्तम् । यत्तु यतते इत्यनेन उक्तं कर्तृत्वम् , न तदग्निवृत्ति, इति प्रथमाप्रयोजकरूपाभावात् तत् वाक्यं तस्मिन्नर्थे असाधु । उक्तविधं तद्वृत्ति कर्तृत्वं न कर्माख्यातेन अभिहितं इति युक्तैव तत्र तृतीया ।

एवं 'चैत्रेण भुक्त्वा गम्यते' इत्यत्र चैत्रस्य भुजिक्रियायां अनन्वयात् गमनक्रियायामन्वयाङ्गीकारेण तृतीयोपपत्तिः । एवं च 'पक्त्वा ओदनो भुज्यते' इत्यादौ पचिधातोः कर्माकाङ्क्षायां द्वितीयान्तौदनपदाध्याहारेण वाक्यपूरणम् । नहि 'प्रधानक्रियायामुक्तस्य कारकस्य गुणभूतक्रियायामपि उक्तिः' इति नियमे प्रमाणमस्ति, येन अध्याहारं विनाऽपि वाक्यं पूर्येत । तथात्वे 'ओदनं भुक्त्वा शास्त्रं पठ्यते' 'श्रुत्वाऽप्यर्थं नानुमतस्तेन सोऽर्थः कुबुद्धिना' इत्यादौ द्वितीयाप्रयोगो नोपपद्येत । अतः सकर्मकधातूत्तरक्त्वाप्रत्ययस्थले द्वितीयाऽन्तौदनपदाध्याहारेऽपि कर्तृविशेषवाचिपदं विनाऽपि शाब्दबोधोपपत्तेः 'चैत्रेण भुक्त्वा गम्यते' इति प्रयोगापत्तिः इति विभाव्यते, तदा माऽस्तु क्त्वाप्रत्ययस्य समानकर्तृकत्वपूर्वकालत्वयोः शक्तिः । किंतु भावकृत्त्वात् भाव एव । तस्यैव उत्तरक्रियायां समानकर्तृकत्वपूर्वकालत्वसंसर्गेण अन्वय इति । एवं च 'चैत्रः पक्त्वा चैत्रो भुङ्क्ते' इति अपप्रयोग एव । 'प्रधानक्रियायामुक्तस्य कर्तृकारकस्यैव गुणभूतक्रियायामपि उक्तिः' इति नियमाङ्गीकारेण वा तस्य साधुत्वम् । प्रधानक्रियावाचिनः कर्त्राख्यातत्वे क्त्वाप्रत्ययस्यापि समानकर्तृकत्वादौ लक्षणा इति वा ध्येयम् । अत एव 'चैत्रेण पक्त्वा चैत्रो भुङ्क्ते' इत्यपि अपप्रयोगः । अत एव 'मयैव पक्त्वा मयैव भुज्यते' इत्यत्रापि कर्तर्येव तृतीया । 'पक्त्वौदनो भुज्यते' इत्यादौ कर्मकारकाध्याहार एव । 'ओदनं भुक्त्वा शास्त्रं पठ्यते' इत्यादयः प्रयोगाश्च सुखोपपादाः । एवं 'पचनी स्थाली, दानीयो ब्राह्मणः, कुठारः करणम्' इत्यादौ अधिकरणत्वादेः कृदुक्तत्वात् प्रथमोपपत्तिः । न चैवमपि यत्र तिङन्तोपरि 'पचतितरां पचतिकल्पं पचतःकल्पं पचन्तिकल्पम्' इत्यादौ अतिशयार्थकः ईषदसमाप्त्यर्थको वा प्रत्ययः कृतः, तस्य तद्धितत्वेन प्रातिपदिकसंज्ञया प्रातिपदिकार्थमात्रविवक्षायां प्रथमान्तत्वात् तत्र प्रथमाप्रयोजकरूपाभावः, तद्वृत्तिकर्तृत्वस्य तिङा अनुक्तत्वात् । ईषत्त्वाद्याश्रयस्य भेदसंबन्धेन पाकभावनायामेव अन्वयात् इति **वाच्यम् ।** तादृशस्थले धातोरेव ईषदसमाप्त्यादौ लक्षणाङ्गीकारात् । कल्पबादिप्रत्ययस्य लक्षणातात्पर्यग्राहकत्वमात्राङ्गीकारेण तदर्थान्वयस्यैव अनङ्गीकारे तत्रत्यप्रथमायाः साधुत्वमात्रार्थत्वात् । अत एव शाब्दबोधजनकप्रथमाया एवेदं प्रयोजकम् , न तु साधुत्वार्थायाः । तस्यास्तु प्रथमाऽतिक्रमे कारणाभाव एव (प्रयोजकः) । इदं च असंबुद्धिविषये, संबोधनप्रथमायाः स्वतन्त्रविधेयत्वात् । अत एव तद्वृत्तिकर्तृत्वानभिधानेऽपि 'चैत्र मैत्रः पचति' इति प्रयोगः ।

के चित्तु कृदादिभिः अनभिहितत्वमेव तृतीयाऽऽदिविभक्तिप्रयोजकम् । प्रथमायां तु कर्तृत्वाभिधानं कर्तृत्वाद्यविवक्षा च प्रयोजिका । अतश्च पचतिकल्पं इत्यादौ विभक्त्यर्थाविवक्षायां प्रातिपदिकार्थमात्रविवक्षायां प्रथमोत्पत्तावपि बाधकाभावः । अत एव अविवक्षा-

विरहविशिष्टानमिधानं तृतीयाऽऽदिप्रयोजकम्, तदभावः प्रथमाप्रयोजकः इत्येवानुगमः ।

न चैवमपि प्रकारतया करणत्वाद्यविवक्षायां भवन्मते करणत्वादिसंसर्गेण काष्ठादीनां भावनाऽन्वयापत्तेः 'चैत्रः काष्ठानि स्थाली ओदनः पचति' इति प्रयोगाऽऽपत्तिः । परमते तेषां धात्वर्थे अन्वयात्, तत्र च अभेदसंबन्धेनैव नामार्थान्वयात् न तथा प्रयोगापत्तिः । तेषामपि 'दधि पश्यति' इत्यादिवत् काष्ठकरणत्वलक्षणया प्रयोगापत्तिरनिवार्यैव । भवन्मते तु सर्वस्य आख्यातार्थे एवान्वयात् तत्र च नामार्थस्यापि चैत्रादेः भेदसंसर्गेण अन्वयाङ्गीकारात् काष्ठादीनामपि अन्वयोपपत्तिः इति **वाच्यम्** । एतादृशप्रयोगापत्तिभयादेव मयाऽपि स्वबोधककृदाद्यमिहितकारकवाचिनामभिन्ननामार्थस्य तद्गतलिङ्गसंख्यादेर्वा क्रियासंबन्धे सुबुपात्तलिङ्गसंख्याव्यतिरिक्तद्वितीयादिविभक्त्युपस्थितार्थद्वारकत्वं तन्त्रं इति नियमस्य कल्पनात् । स्वपदं स्वान्वयिक्रियापरम् । अत्र नामार्थस्यापि चैत्रादेः 'चैत्रः पचति' इत्यादौ साक्षादेव क्रियान्वयात् भिन्नेत्यन्तम् । 'पाचकमानय' इत्यादौ कृदाद्यभिहितकारकवाचिनोऽपि पाचकपदस्य आनयनानुकूलकृतौ अन्वये द्वितीयोपस्थापितकर्मत्वद्वारत्वस्य आवश्यकत्वात् स्वबोधकेत्युक्तम् । पाचकः पक्व इत्यादावपि लक्षणया भावनाबोधस्य वक्ष्यमाणत्वात् तत्र काष्ठादीनामन्वये करणत्वादिबोधकतृतीयादि आवश्यकम् । अत एव एतन्नियमानुरोधेनैव कौस्तुभादौ प्रातिपदिकार्थस्य सुबुपात्तलिङ्गसंख्ययोश्च साक्षात् भावनान्वयः नाङ्गीकृतः । अतः पचतिकल्पं इत्यादौ प्रातिपदिकार्थमात्रविवक्षायां प्रथमा इत्याहुः ।

तन्न । एवमपि ईषदसमाप्तेः कल्पप्प्रत्ययवाच्यायाः भावनया सह भेदसंबन्धविवक्षया षष्ठ्यापत्तेर्दुर्वारत्वात् । ईषदसमाप्तेरपि तादृशनामार्थतया निरुक्तक्रियासंबन्धे द्वितीयादिविभक्त्यर्थद्वारकत्वाभावात् व्यभिचारापत्तेश्च । अतः अन्यत्र व्याकरणस्य वृत्तिबोधकत्वेऽपि प्रकृते तात्पर्यग्राहकतामात्रपरंता इति युक्तमुत्पश्यामः ।

केचित्तु पचतिकल्पं इत्यादौ तिष्ठति इत्यध्याहारात् 'पाकभावनावृत्तिः ईषदसमाप्तिः तिष्ठति' इत्यर्थः । अस्मिंश्च पक्षे पचति इति तिङर्थोऽपि कल्पप्प्रत्ययार्थेन भेदसंबन्धेन अन्वेति एकपदोपात्तत्वात् । अतश्च कल्पप्प्रत्ययस्य वाचकत्वेऽपि तस्य तिष्ठति इत्यत्रैवान्वयात् प्रथमोपपत्तिः इत्याहुः । तन्न । बहुत्वविवक्षायां पचन्तिकल्पाः इत्यस्यापि आपत्तेः ।

एवं चास्मन्मते सर्वत्र प्रथमाप्रयोजकरूपलाभः सुलभः, न तु भवन्मते इति सिद्धम् । **रहस्य. पृ. ३०–३५**

* **प्रथा** पृथुता, कपालेष्ववस्थापितस्य पुरोडाशस्य हस्तसंघट्टनेन सर्वेषु कपालेषु प्रसारणम् । इदं चरौ बाधितम्, पुरोडाशे तत् कर्तव्यम् । **वि. १०।१।१७.**

* **प्रदानं** अनदनीयानां (अपि) कृष्णलानां क्रियते । **भा. १०।२।३।१६.** * प्रदानमावृत्त्या आग्नेयस्य पशुद्वयस्य । ११।१।११।६८–७१.

प्रदानं चापि सादनवत् । १०।५।२२।७५ ॥

ज्योतिष्टोमे फलविशेषार्थं आश्विनाग्रताशुक्राग्रतामन्थ्यग्रता उक्ताः । तत्र आश्विनादीनां ग्रहाणां ग्रहणं सादनं च ऐन्द्रवायवात् प्राक् इत्युक्तम्, अथ सादनवत् प्रदानं चापि ऐन्द्रवायवात् प्राक् कर्तव्यम् । आश्विनं हुत्वा तत ऐन्द्रवायवो होतव्य इति पूर्वः पक्षः ।

न वा प्रधानत्वाच्छेषत्वात् सादनं तथा । ७६ ॥

पूर्वपक्षं वाशब्दो व्यावर्तयति । प्रदानं न प्रतिकृष्टव्यम् । प्रदानस्य प्रधानत्वात् । नहि प्रदानं ग्रहणशेषः । सादनं तु ग्रहणशेषत्वात् तथा प्रतिकर्षार्हम् । तस्मात् प्रदानस्य न प्रतिकर्षः । इति सिद्धान्तः । **के.**

* प्रदानं फलप्रत्यासत्त्या मुख्यम् । अवदानं तु तदङ्गम् । **वि. ५।४।२,** * प्रदानं वचनात् कृष्णलानां अनदनीयानामपि क्रियते । १०।२।३. * '**प्रदानानि** जपो होमो मातृहोमादयस्तथा' धर्मा एव । **वा. १।३।३।७ पृ. २०५.** * प्रदानानि हि विवर्धन्ते (ज्योतिष्टोमात् उक्थ्यादिषु संस्थासु) । **भा. ३।३।११।२९.** * **प्रदानस्य** ग्रहणं शेषः । ग्रहणस्य च सादनं शेषः । **वि. १०।५।२२.** * प्रदानस्य नापकर्षः ग्रहणप्रतिकर्षेऽपि । १०।५।२२। ७५–७६. * **प्रदाने** संप्रतिपन्नदेवताकत्वात् तन्त्रत्वमेव । **भाट्ट. ५।२।२.** * **प्रदानेषु** अविहितस्वाहाकारेषु स्वाहाकारविधानम् । **वि. १०।८।१०.**

* **प्रदानान्तमवदानमेकः पदार्थः** । 'चतुरवत्तं जुहोति' इति अवत्तहोमो विधीयते । न चाकृत्वावदानं अवत्तहोमसंभवः इति अवदानं न विधातव्यम् । 'द्विर्हविषोऽवद्यति' इत्यर्थप्राप्तस्यावदानस्य विशेषमात्रविधानम् 'हविषो द्विः' इति । **शा. ५।२।४।६–९** । चतुरवत्तवाक्ये 'यच्चतुरवत्तम्' इत्यनूद्य तत्संस्कारतया होमविधिः इति पक्षं अवत्तविशिष्टहोमविधिपक्षं च दशमे वक्ष्यति । तत्र प्रथमपक्षेण प्रदानान्तत्वं प्रस्तुताधिकरणप्रतिपाद्यम् । **सोम.** * प्रदानान्तमवदानं एकः पदार्थः । न तु उपस्तरणं अवदानं अभिघारणं होमः इति प्रत्येकं पृथक् पदार्थः । अयं प्रदानान्तानुसमयः आग्नेयाग्नीषोमीयपुरोडाशादौ । **वि. ५।२।४.** * **प्रदानान्तेन** अवदानादिना (होमान्तेन) अनुसमयः दर्शपूर्णमासयोः आग्नेयादौ । ५।२।४।६. * प्रदानान्तेन दैवतावदानादिना अनुसमयः विभिन्नदैवत्ये पशुगणे । **भाट्ट. ५।२।६.**

* **प्रदानार्थं** ग्रहणम् । सादनेन ग्रहणं होमयोग्यं भवति । **भा. १०।५।२१।७३.** * **प्रदानार्थो** वषट्कारः । **के.**

* **प्रदानोपक्रमाः** प्रदानार्थमेव क्रियन्ते अवदानाभिघारणादयः । **भा. ५।४।२।२–४.**

प्रदानदर्शनं श्रपणे तद्धर्म भोजनार्थत्वात् संसर्गाच्च मधूदकवत् । ९।४।९।३२ ॥

अग्निष्टोमे 'आदित्यः प्रायणीयः पयसि चरुः' इति आम्नायते । अदितिर्देवता अस्येति आदित्यः । तत्र पयसि प्रदानार्थाः पयोधर्माः कर्तव्या न वेति विचारे पूर्वपक्षमाह । श्रपणे, चरोः पयसा सह श्रपणे सति प्रदानस्य यागस्य दर्शनं चरोरिव पयसोऽप्यस्ति । चरुपयसोः भोजनार्थत्वात् यागार्थत्वात्, संसर्गाच्च उभयोः । पयः तद्धर्म प्रदानस्य धर्माः यस्मिन् तत् तद्धर्म प्रदानधर्मकं स्यात् । मधूदकवत् चित्रायागे दधिमधुपयसां यथा संसर्गस्तद्वत् । तस्मात् पयसि प्रदानधर्माः कर्तव्याः ।

संस्कारप्रतिषेधश्च तद्वत् । ३३ ॥

पूर्वपक्षे युक्तिमाह । संस्काराणां केषांचित् प्रतिषेधः इतरेषां प्राप्तेर्लिङ्गम् । प्राप्तिपूर्वकत्वात् निषेधस्य । 'अयजुषा वत्सानपाकरोति, अपवित्रवति गां दोहयति' इति वत्सापाकरणे यजुर्मन्त्रस्य निषेधः दोहने च पवित्रस्य निषेधः वत्सापाकरणादीनां प्राप्तिमेव सूचयति । तस्मात् पयसि प्रदानधर्माः कर्तव्याः । तद्वत् भोजनार्थत्वसंसर्गौ पूर्वोक्तौ हेतू यथा प्रदेयधर्मसाधकौ तद्वत् प्रतिषेधोऽपि प्रदेयधर्मसाधकः इति ।

तत्प्रतिषेधे च तथाभूतस्य वर्जनात् । ३४ ॥

पूर्वपक्षे युक्त्यन्तरमाह । तत्प्रतिषेधे पयसः प्रतिषेधे च तथाभूतस्य पयसा संसृष्टस्यापि वर्जनात् यथा वा 'तैले पीते पानीयं न पेयम्' इति प्रतिषेधे पानीयमिश्रितमपि न पीयते । तत्सामान्यदर्शनेन चरोः प्रदेयत्वे तत्संसृष्टस्य पयसोऽपि प्रदेयत्वं स्यात् । इति पयसि प्रदेयधर्मा वत्सापाकरणादयः कर्तव्याः । पयसः अप्रदेयत्वे वा चरोरपि अप्रदेयत्वं स्यात् ।

अधर्म त्वप्रदानात् प्रणीताऽर्थे विधानादतुल्यत्वादसंसर्गः । ३५ ॥

सिद्धान्तमाह । तुशब्दः पूर्वपक्षं व्यावर्तयति । अधर्म तु अप्रदानात् इति पदच्छेदः । पयः अधर्म अविद्यमानाः धर्मा अस्य इति अधर्म । बहुव्रीहिः, अनिच् समासान्तः । प्रदानधर्मशून्यं स्यात् पयः । अप्रदानात् पयसः प्रायणीये स्वातन्त्र्येण प्रदानं नास्ति । प्रणीताऽर्थे विधानात् । अत्र पयः प्रणीताऽर्थे विहितम् । प्रणीतास्थाने पयः क्रियते अर्थात् चरुश्रपणार्थं पयः । आपः प्रणीता अपि पिष्टसंयवनार्था एव भवन्ति पौर्णमासादौ । यद्यपि प्रदेयेन चरुणा सह पयसः संसर्गोऽस्ति, तथापि चरुपयसोः अतुल्यत्वम् । प्रत्यक्षतः अधिकरणत्वेन पयः श्रूयते, प्रदेयत्वेन चरुः । तस्मान्नायं प्रदेयत्वेन संसर्गः । विद्यमानोऽपि संसर्गः प्रदेयत्वेन तुल्यत्वाभावात् असंसर्ग एव । तस्मात्पयसि प्रदेयधर्मा न कर्तव्याः ।

परो नित्यानुवादः स्यात् । ३६ ॥

पूर्वपक्षे 'संस्कारप्रतिषेधश्च' इति सूत्रेण यत् लिङ्गमुक्तम्, तत्रोत्तरमाह सिद्धान्ती । 'अयजुषा वत्सानपाकरोति' 'अपवित्रवति गां दोहयति' इति परः परेण सूत्रेण उक्तः संस्कारप्रतिषेधः नित्यानुवादः स्यात् ।

विहितप्रतिषेधो वा । ३७ ॥

तत्र अन्यदुत्तरमाह सिद्धान्ती । केषाञ्चित् ' यजुषा वत्सानपाकरोति ', ' पवित्रवति गां दोग्धि ' इति यत् विहितम्, तस्य प्रतिषेधोऽयं ' अयजुषा वत्सानपाकरोति ' ' अपवित्रवति गां दोग्धि ' इति । अत्र प्रतिषेधः अर्थवानेव भवति ।

वर्जने गुणभावित्वात् तदुक्तप्रतिषेधात् स्यात् कारणात् केवलाशनम् । ३८ ॥

पूर्वपक्षे यत् सामान्यतोदृष्टमुक्तम् ' तत्प्रतिषेधे च तथाभूतस्य वर्जनात् ' इति, तन्निरासार्थमाह सिद्धान्ती । लोके प्रायशः पयसो भोजनादौ गुणभावित्वात् गुणभूतत्वात् अप्रधानत्वात् ' पयो न सेवनीयम् ' इति वर्जने विहिते उक्तप्रतिषेधात् पूर्वपक्षिणा उक्तस्य पयःसंसिक्तस्य पयःसंसृष्टस्यापि प्रतिषेधो भवति इति तत् पयः सर्वथा वर्ज्यते । ननु लोके केवलमपि पय उपभुज्यते । सत्यम् । कारणात् केवलाशनम् । व्रतं औषधं वा यस्य विहितं भवति, तस्य तस्मात् कारणात् केवलस्य पयसः अशनं भवति । प्रायणीये तु अधिकरणत्वेन चरुश्रपणार्थमेव पयो विहितम्, इति चरोः प्रदेयत्वेऽपि पयसः तुल्यत्वाभावेन न प्रदेयत्वमिति ।

व्रतधर्माच्च लेपवत् । ३९ ॥

पूर्वपक्षे ' तत्प्रतिषेधे च ' (९।४।९।३४) इत्यादिना सूत्रेण यत् सामान्यतोदृष्टमुक्तं तत्परिहारं प्राचीनमतेनाह । व्रतधर्मात् यथा लेपोऽपि वर्ज्यते । ' ब्रह्मचारिणा मांसं न भक्षयितव्यम् ' इत्युक्ते दर्विगतमपि लेपं वर्जयन्ति । तद्वत् ' पयो न सेव्यम् ' इत्युक्ते पयःसिक्तं पयसा संसृष्टमपि वर्जयन्ति इति । प्रायणीये तु पयसः अप्रदेयत्वे चरोरपि अप्रदेयत्वस्वीकारे चोदनाभङ्ग एव स्यात् । तस्मात् चरोः प्रदेयत्वं स्वीकार्यमेव । पयसः अधिकरणत्वेन निर्देशात् न प्रदेयत्वम् ।

रसप्रतिषेधो वा पुरुषधर्मत्वात् । ४० ॥

पूर्वपक्षे ' तत्प्रतिषेधे च ' इति सूत्रेण यत् सामान्यतोदृष्टमुक्तम्, तस्य परिहारः प्राचीनमतेन ' व्रतधर्माच्च लेपवत् ' इति कृतः । तं दूषयति सिद्धान्ती । नैष परिहारः संभवति इति वाशब्दार्थः । ' ब्रह्मचारी मांसं वर्जयेत् ' इति मांसरसस्यापि प्रतिषेधः रसप्रतिषेधः । तावदपि मांसस्य न भक्षयितव्यं यावति मांसरसमात्रं विदितं भवति । तत्र चादृष्टं फलम् । पयःप्रतिषेधे तु न किञ्चिददृष्टम् । तेन भोज्यलग्नस्य अलग्नस्यापि वा पयोबिन्दोर्भक्षणे श्लेष्मकोपादि दृष्टमपि नास्ति । तेन विषमो दृष्टान्तो लेपवत् इति । सर्वथाऽपि तु पयसः अप्रदेयत्वेऽपि चरोरप्रदेयत्वप्रसङ्गो न संभवति, चरोः प्रदेयत्वे वा पयसः प्रदेयत्वं न संभवति इति प्रायणीये पयसि प्रदानधर्मा वत्सापाकरणादयो न कर्तव्याः इति सिद्धान्तः । **के.**

* **प्रदानधर्माः** ज्योतिष्टोमे प्रायणीयेष्टौ पयसि नानुष्ठेयाः । ९।४।९।३२–४०.

* **प्रदानधर्मानुष्ठानं** अभ्युदितेष्टौ दधिपयसोः । ९।४।१०।४१–४२.

* **प्रदानभेदः** कृष्णग्रीवयोः व्यवहितयोः । ११।१।११।६८–७१. * प्रदानभेदः भिन्नगुणकदेवताभेदे । **संकर्ष.** २।२।१५. **मीको.** पृ. २३१२ 'नानाप्रदानाधिकरणम् ' इत्यत्र द्रष्टव्यम् ।

* **प्रदीपस्य** वेदिकाऽर्थे निर्मितस्य अर्थसिद्धं मार्गदर्शकत्वमनिवार्यम् । एतादृशः प्रसङ्गपदार्थः । **वि.** १२।१।१. * **प्रदीपानां** कार्तिकशुक्लप्रतिपदि दानं सदाचारः । **सु.** पृ. १८७.

ऌ **प्रदीपे प्रदीपं प्रज्वाल्य तमोनाशाय यतमानः इति न्यायः ।** प्रदीपं प्रज्वाल्य प्रदीपे तमोनाशाय यतमानः इत्यर्थः । लघोरुपायात् साध्यसिद्धौ भवन्त्यां गुरौ उपाये प्रवर्तमानस्य इदं दोषोद्भावनम्—प्रदीपे प्रदीपं प्रज्वाल्य तमोनाशाय यतमानस्येव पुंस इति । अयं काव्यदीपिकायाम् । **साहस्री.** ६९१.

ऌ **प्रदीपन्यायः** । अयं न्यायः यत्र अन्योन्यविरुद्धानामपि संभूयैककार्यकारित्वम्, तत्र संचरति । यथा हि वर्तितैले अग्निविरोधिनी, वर्तितैलाग्नयः सर्वे परस्परं विरोधिनः संभूयैकं प्रकाशलक्षणं कार्यं कुर्वन्ति, तथा सत्त्वरजस्तमांसि परस्परं विरुद्धान्यपि संभूयैकं देहादिकं प्रवृत्त्यादिकं च कार्यं जनयन्तीति । **साहस्री.** १७३.

* **प्रदीपप्रभाप्रभृतीनां** कथञ्चित् प्रत्यक्षत्वादुपपद्येते (संकोचविकासौ) । न च प्रदीपप्रभायाः संकोचो भवति, शरावादिच्छादने शेषप्रभाविनाशात् । अनावृता हि ज्वाला आत्मसमीपे प्रभामण्डलमारब्धुं समर्था, नाच्छादिता । एतेनैव च विकासोऽपि प्रत्युक्तः । अन्ये एव हि अवयवाः तत्र प्रचीयमाना विस्तारं जनयन्ति न तावतामेव विकासः ! स्पर्शवतां च परस्परदेशप्रतिबन्धात् देशान्तरव्याप्त्या विकाशो घटते । **वा.** २।१।२।५ पृ. ४०३.

* **प्रदीपवत्** । यथा प्रासादे कृतः प्रदीपः संनिधानात् राजमार्गेऽप्युपकरोति, एवं पश्चादपि क्रियमाणानि अङ्गानि संनिधानात् पुरोडाशस्य उपकुर्वन्ति । **भा.** १२।१।१।३, * विभवाद्वा **प्रदीपवत्** । तद्यथा, प्रदीपः एकस्मिन् प्रदेशे भुञ्जानानां ब्राह्मणानामेकस्य संनिधौ प्रज्वलितः सर्वेषामुपकारं करोति । ११।१।१०।६१.

* ' **प्रदेशान्तरसिद्धेन** लक्षणेनानुगम्यते । देशान्तरस्थितः शब्दो लक्ष्यभूतोऽन्यशब्दवत् ॥ ' **वा.** १।३।८।२४ पृ. २६०.

* ' **प्रद्वेषाद्** वेदपूर्वत्वमनिच्छन्तः कथंचन । ' (शाक्यवैशेषिकादयः ' अस्माकमागमः नित्यः ' इति आहुः) । **वा.** १।३।६।१२ पृ. २३५.

* **प्रधानं** अन्यत्र, अङ्गमन्यत्र उत्पन्नम्, तत्र अङ्गस्य केन वेदेन व्यपदेशोऽस्तु इति चिन्ता । ततश्च प्रधानवेदेन व्यपदेशः इति निर्णयः । **वा.** ३।३।२।९ पृ. ८१४. * प्रधानमाधानं गुणः सामगानम् । **भा.** ३।३।२।९ पृ. ८१०, * प्रधानमावर्तयितुं गुणा न शक्नुवन्ति । १।४।१०।१६. * प्रधानं गुणाक्षेपकमिति नियमः । **मणि.** पृ. ११४.

* ' **प्रधानं नीयमानं हि तत्राङ्गान्यपकर्षति ।** (अङ्गमाकृष्यमाणं तु नाङ्गान्तरमसंगतेः ॥ ') । **वा.** २।२।३।६ पृ. ४८६ । अयमेव अङ्गाकर्षणन्यायः प्रधाननयनन्यायश्च ।) **इति न्यायेन** आवश्यकस्तोत्रत्वाद्यनुरोधेन च साङ्गस्यैव रथंतरस्य रथंतरपदेन लक्षणया विधानात् विश्वजिति पवमानापूर्वसाधनत्वबोधोपपत्तिः । **भाट्ट.** १०।६।५. * ' प्रधानं नीयमानम्० ' इति न्यायेन रथंतरादिधर्माणां आवश्यकस्तोभादीनां पवमानादिकार्यान्तरोपयोगिरथंतरादिसाधनत्वेनापि प्राप्तिरविरुद्धा । **भाट्ट.** ७।३।३, * अत्र (कृष्णलचरौ) मुख्यश्रपणाभावात् नान्ये (श्रपणात्) श्रपणधर्माः कार्याः, अपि तु अग्निसंयोगाङ्गभूत एव, ' **प्रधानं० कर्षति** ' इति **न्यायेन** । १०।२।१, * पौष्णं पेषणं चरौ पुराडाशे च स्यात् उत चरावेवेति चिन्तायां पेषणस्य कर्मान्तरत्वाभावेन धर्माणां 'प्रधानं नीयमानं०' इति न्यायेन प्राकृतपेषणाङ्गतया प्राप्तानां अत्रैव अदृष्टरूपकार्यान्तरप्रयुक्तत्वकल्पनं न दोषाय । ३।३।१४, * यैर्विना रथंतरमेव पठितुं न शक्यं यथा स्तोभादिभिः, तत्रेतराक्षेपकत्वे प्रमाणाभावात्, यदा तदाश्रयभूता ऋचोऽपि ऋगन्तरग्राहकप्रमाणाभावे आक्षिप्येरन्, तदा तदङ्गभूतस्तोभादीनां 'प्रधानं० कर्षति' इति न्यायेन अनुष्ठाने न काचन क्षतिः । ९।२।१६. * यत्र विकृतिविशेषे अपूर्वार्थे समिद्यागपुनःश्रवणम्, तत्रापि तनूनपातादिसंज्ञिकाया आवृत्तेः समिद्यागाङ्गत्वेन ' प्रधानं नीयमानं० ' इति न्यायेन प्राप्तेः पञ्चकृत्वोऽनुष्ठानं अभ्यासाधिकरणीयावृत्तिविधिपूर्वपक्षे प्रयोजनम् । **कौ.** २।२।२।२ पृ. १५२. * प्रधानं प्रति यत् फलवत् करोति, तदङ्गं नाम । **भा.** १२।३।५।१६, * प्रधानं प्रतिगुणं न भिद्यते प्रतिप्रधानं तु गुणो भिद्यते । ३।१।६।१२ पृ. ६९७, * प्रधानं फलवत् । ४।४।१२।३९. * ' प्रधानं फलसंबन्धि, तत्संबन्ध्यङ्गमिष्यते । ' (तत्संबन्धि प्रधानसंबन्धि) । **वा.** २।१।१।१ पृ. ३७४. * प्रधानं सगुणं स्यादिति अङ्गं गुणवत् क्रियते । तच्चेदङ्गे गुणवति क्रियमाणे प्रधानं विगुणमापद्यते, कोऽर्थोऽङ्गेन गुणवता कृतेन ? । **भा.** १२।२।९।२५, * प्रधानं हि फलाय वा क्रियते फलवदुपकाराय वा, नाङ्गाय । १२।३।४।१०, * न सर्वं **प्रधानम्**, प्रधानार्थमपि किञ्चिदस्तीति । १०।३।१।१२, * नहि प्रधानं प्रधानेन अङ्गमङ्गेन संबन्धं याति । १०।८।१७।५९ . * प्रतिप्रधानं शास्त्रभेदः । **वा.** ३।१।७।१४ पृ.७८५, * यः फले चोद्यते स इतिकर्तव्यतया संबध्यमान इतिकर्तव्यतां प्रति प्रधानम् । ७।१।१।२ पृ. १५२६. * यतः फलं तदेव प्रधानम् । **भा.** ४।४।१२।

४०, * सगुणं प्रधानं भवति। ६।४।६।२३ पृ. १४४२. * 'प्रधानान्यप्यतोऽङ्गानामङ्गानि स्युरनुग्रहात्। स्यादन्योन्योपकाराच्च तेषामन्योन्यशेषता ॥' वा. ३।१।२।२ पृ. ६५६, * प्रधानानि हि फलं प्रति विधीयन्ते नेतिकर्तव्यतायाम्, अतस्तेषां फले विवक्षितं साहित्यं नेतिकर्तव्यतायाम्। इतिकर्तव्यतां प्रति तानि उद्दिश्यमानानि भवन्ति। ३।२।६।१९ पृ. ७६६, * **प्रधानेन** अङ्गं बाध्यते। प्राप्तबाधोऽत्र। ३।३।७।१४ पृ. ८६०.

प्रधानेनाभिसंयोगादङ्गानां मुख्यकालत्वम्। ४।३।१७।४१ ॥

'अग्निं चित्वा सौत्रामण्या यजेत' 'वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत' इति श्रुतम्। अयं अङ्गप्रयोजनसंबन्ध इति प्रागुक्तम् (४।३।१२।२९–३१)। तत्र सौत्रामणी चितमात्रे तन्त्रमध्ये एव कर्तव्यः उत स्वकाले, एवं वाजपेयमध्ये एव बृहस्पतिसवः कर्तव्यः उत स्वकाले वसन्तादौ इति विचारे पूर्वपक्षयति। अङ्गानां प्रधानेन सह अभिसंयोगात् अङ्गप्रधानयोर्नित्यसंबन्धात् अङ्गानां मुख्यकालत्वम्। मुख्यस्य काल एव कालो येषां तानि मुख्यकालानि अङ्गानि। मुख्यस्य यः कालः स एव अङ्गानां इति। तस्मात् अग्निचयनादौ असमाप्ते एव सौत्रामण्यादि कर्तव्यम्।

अपवृत्ते तु चोदना तत्सामान्यात् स्वकाले स्यात्। ४२ ॥

तुशब्देन पूर्वपक्षं व्यावर्तयन् सिद्धान्तमाह। अपवृत्ते समाप्ते साग्निचित्ये क्रतौ वाजपेये वा चोदना। चित्वा इति चयनस्य पूर्वकालत्वबोधनेन चयनस्य साङ्गस्य समाप्त्युत्तरकालं सौत्रामण्याः, एवं इष्ट्वा इत्यनेनापि साङ्गवाजपेयसमाप्त्युत्तरकालमेव बृहस्पतिसवस्य चोदना विधिर्भवति। तस्मात् न चयनादिमध्ये सौत्रामण्यादेरनुष्ठानम्। किन्तु स्वकाले स्यात् अनुष्ठानम्। स्वकालश्च तत्सामान्यात् प्रकृतिसामान्यात्। सौत्रामण्याः इष्टिविकारत्वात् पर्वकालः स्वकालः। बृहस्पतिसवस्य च ज्योतिष्टोमविकारत्वात् वसन्तः स्वकालः। **के.**

* सर्वश्च सति संभवे गुणमतिलङ्घ्य **प्रधानेनैव** नित्यं संबध्यते। वा. २।१।१।१ पृ. ३७३. * 'ऐन्द्रया गार्हपत्यम्' इत्यत्र यथा न केवलया श्रुत्या विरोधः नैवं वाक्येनापि, तस्यापि गार्हपत्यसमीपे इत्येवमुपपत्तेः। अतश्चोभयविरोधसत्त्वेऽपि '**प्रधानेन व्यपदेशा भवन्ति**' इति **न्यायेन** श्रुतिलिङ्गविरोधोदाहरणत्वम्। **भाट्ट.** ३।३।७. * **प्रधानैरपृथक्** कालानामङ्गानां तन्त्रं न द्वादशाहे। **भा.** ११।४।६।२६–२९. **मीको.** पृ. २२०४ 'द्वादशाहे सुत्याकालीनानाम्०' इत्यत्र द्रष्टव्यम्। * 'प्रधानैरप्रयुक्तानि कुर्यान्नाङ्गानि कश्चन।' **वा.** ३।१।२।२ पृ. ६५६. * प्रधानैः सह अङ्गानामेकदेशकालकर्तृकत्वम्। ११।२।२।३, ८–१२.

प्रधानाच्चान्यसंयुक्तात् सर्वारम्भान्निवर्तेतानङ्गत्वात्। १०।१।३।५ ॥

राजसूये इष्टिपशुसोमदर्विहोमाः प्रधानभूताः। तत्र अनुमत्यादिषु इष्टिषु आरम्भणीया न कर्तव्या। अन्यसंयुक्तात् प्रधानात् सोमादियुक्तात् अनुमत्यादियागात् प्रधानभूतात् निवर्तेत आरम्भणीयेष्टिः। सर्वारम्भात् सर्वारम्भार्थेन तत्र ज्योतिष्टोमः समाम्नायते 'अग्निष्टोमं प्रथममाहरति' इति। तेनैव अनुमत्यादीनां आरम्भार्थे सिद्धे न पुनः आरम्भणीया भवितुमर्हति। सर्वारम्भस्य अनुमत्याद्यनङ्गत्वात्। तस्मात् अनुमत्याद्यर्थं अन्वारम्भणीया न कर्तव्या इति सिद्धान्तः। **के.**

* **प्रधानस्याङ्गस्य** च धर्मविरोधे प्रधानधर्मस्यैवानुग्रहः। १२।२।९।२५. * प्रधानस्याङ्गस्य च वचनेन भिन्नदेशकालकर्तृकत्वमपि। ११।३।१।१. * प्रधानस्य अङ्गानुरोधेन संकोचो न युक्तः। 'इन्द्राय त्वा वसुमते गृह्णामि' इत्यैन्द्रमन्त्रसाध्यस्यापि सोमग्रहणस्य मन्त्राभावे ध्यानादिनाऽपि स्मृतस्य अनुष्ठानोपपत्तेः न अङ्गभूतमन्त्रानुरोधेन प्रधानस्य सोमग्रहणस्य इन्द्रप्रदानमात्रसंकोचो युक्तः इति तृतीये 'लिङ्गविशेषनिर्देशात्०' (३।२।११।२८) इत्यत्र वक्ष्यते। **सु.** पृ. ५२७–५२८, * प्रधानस्य अनुमन्त्रणानाकाङ्क्षत्वेऽपि अनुमन्त्रणाकाङ्क्षया आकाङ्क्षामुत्पाद्य विनियोगो भविष्यति। पृ. ११९८. * प्रधानस्योपकार (याजमानाङ्गैः वपनादिभिः) एष एव, यदस्य फलग्रहणाय योग्यः कर्ता क्रियते। **वा.** ३।७।२।६. * प्रधानस्य उपकारिणो ये धर्मास्ते अतिदिश्यन्ते। प्रधानं हि चोदकोऽपेक्षते न धर्मान्। प्रधानस्य हि चोदकेन सामान्यं न धर्माणाम्। **भा.** ३।८।१६।३१. * प्रधानस्य चोद्दिश्यमानस्य विशेषणमविवक्षितम्। **टुप्.** ७।१।१।२ पृ. १५२६, * प्रधानस्य पदान्तरमपेक्षमाणस्यापि भवति समासः। यथा राजपुरुषो दर्शनीयः इति प्राधान्यात् पुरुषस्य दर्शनीयत्वमपेक्षमाणस्य राज्ञा सह समासो भवति, एवं प्रायणीयोदयनीययोः ऐकादशिनानपेक्षमाणयोरपि भवति समासः। १०।६।४।८. * 'प्रधानस्य प्रयोक्तृत्वमप्रधानप्रयोक्तृता। फलचिन्ता जघन्याङ्गचिन्तेत्येते चतुर्थगाः ॥' **वि.** प्रस्तावना १६. * प्रधानस्य वेदान्तरीयस्य यत्र वेदान्तरीयमङ्गं भवति, तत्र प्रधानधर्मेणैव अङ्गं कर्तव्यम् (इति तात्पर्यम्)। **वा.** ३।३।२।९. * प्रधानस्य साङ्गस्यानुष्ठानं ज्योतिष्टोमेऽवभृथे अप्सु। **भा.** ११।२।८।३०–३४. * प्रधानस्य साङ्गस्य एकप्रयोगत्वम्। **वा.** ३।७।१।४, * प्रधानस्य सिद्धस्य न गुणानुरोधेन आवृत्तिः। ३।६।३।१० पृ. १०३६, * भवति च **प्रधानस्य** सापेक्षस्यापि समासः (महाभाष्यं २।१।१ पृ. ५ काशी)। २।१।५।१७ पृ. ४२२, * यदङ्गं प्रधानेन नियमेनापेक्षितं तादृशाङ्गबलात् प्रधानस्य संकोचः। यत्तु अङ्गं प्रधानेन नियमेन अनपेक्षितं तादृशाङ्गबलात् प्रधानस्य न संकोचः। अत एव 'इन्द्राय त्वा' इत्यादिमन्त्रबलात् ऐन्द्रप्रदानविषयतया सोमस्य न संकोचः। किन्तु ऐन्द्रानैन्द्रसर्वप्रदानसाधारण्यमेव। अनैन्द्रप्रदानेषु मन्त्रं विनाऽपि उपायान्तरेण अनुष्ठेयार्थस्मृतिसंभवेन मन्त्रस्य ऐन्द्रप्रदानैर्नियमेनानपेक्षितत्वात्। अन्यथा तत्रापि ऐन्द्रप्रदानमात्रविषयतया संकोचः स्यात् इति बोध्यम्। **सोम.** १।४।१९. * शेषकार्याणि यदि न शक्यानि, नाङ्गानुरोधेन प्रधानस्य गुणो बाधितव्यः। **भा.** ६।३।२०।४१, * **प्रधानानाम**ङ्गानां चैकः काल इति वक्ष्यते 'अङ्गानि तु विधानत्वात्०' इति। ४।३।१७।४०. * प्रधानानामङ्गानां च समानकर्तृकत्वम्। **वा.** ३।८।७।१७. * प्रधानानामङ्गानां वा अनेकेषां एकेन प्रयोगविधिना उपसंहारात् साङ्गानां यत्र साहित्यावगमः तत्र पदार्थानुसमयः कर्तव्यः, न तु काण्डानुसमयः इति पदार्थानुसमयन्यायः। **के.** (५।२।१।१–३). * प्रधानानामपूर्वाणां भेद उक्तः शब्दान्तरादिभिर्हेतुभिः द्वितीयेऽध्याये। **के.** * प्रधानानामाग्नेयादीनामेकदेशकालकर्तृकत्वं दर्शपूर्णमासचातुर्मास्यादौ। ११।२।१।१–२,४–७. * प्रधानानां गुणानुरोधेन आवृत्तिरयुक्ता। **वा.** २।२।१।१ पृ. ४६३. * प्रधानानां तन्त्रेण स्वर्गः फलं दर्शपूर्णमासादौ। ११।१।१।१–४. * प्रधानानां धर्मान्वये साहित्याविवक्षा। **सु.** पृ. १०१६. * 'प्रधानानां प्रधानैश्च विनाभावो न दृश्यते। तत्र स्याच्छेषशेषित्वं तेषामपि परस्परम् ॥' **वा.** ३।१।२।२ पृ. ६५४. * प्रधानानां समवेतानामेकं फलम्। **भा.** ११।१।२।५. * **प्रधाने** अनर्थकं सत् तदङ्गे अवतरति। ३।१।९. **मीको.** पृ. ९३९ 'आनर्थक्यतदङ्गन्यायः' इत्यत्र द्रष्टव्यम्। * प्रधाने असंभवन् पदार्थः तद्गुणे कल्प्यते, उक्तमेतत् (३।१।९)। **भा.** ३।१।१२।२२ पृ. ७३७. * प्रधाने कार्यसंप्रत्ययः। **के.** * प्रधाने कृते शिष्टं सर्वशेषकार्यसाधारणम्। **भा.** ६।४।२।३.

प्रधाने गृहीते अप्रधानग्रहस्यान्याय्यत्वादिति न्यायः। यथा 'अयं समुद्रः' इत्यत्र तरङ्गफेनबुद्बुदादिप्रत्ययादर्शनमिति भावः। **साहस्री.** ५३७.

* प्रधाने मुख्यशब्दः। **भा.** ७।१।१।१ पृ. १५२४. * 'प्रधाने हि श्रुतं द्रव्यं नाङ्गद्रव्यस्य बाधकम्। प्रयाजेज्याज्यवत्।' **वा.** २।१।३।८ पृ. ४०७. * **प्रधानेष्व**नेकेषु संनिपातिनां पदार्थानुसमयः। ५।२।१।१–२ **मीको.** पृ. २४३७ 'पदार्थानुसमयन्यायः' इत्यत्र द्रष्टव्यम्। * प्रधानेषु समसंख्येषु सहानुष्ठीयमानेषु धर्मविरोधे प्रथमपठितस्यैव धर्मानुग्रहः। १२।२।८।२३–२४. **मीको.** पृ. ८२६ 'आग्नावैष्णवन्यायः' इत्यत्र द्रष्टव्यम्। * प्रधानेषु सहानुष्ठीयमानेषु धर्मविरोधे भूयोऽनुरोधेन धर्माणामनुष्ठानम्। 'भूयोऽनुग्रहन्यायः' इत्यत्र द्रष्टव्यम्। १२।२।७।२२.

* **प्रधानाङ्गोभयार्थता** अभिमर्शनस्य दर्शपूर्णमासयोः। ३।७।४।८,१०.

* **प्रधानाङ्गतन्त्रं** द्वेधा, प्रकृतिप्रधानस्य स्वाङ्गविकृत्या सह तन्त्रं विकृतिप्रधानस्य स्वाङ्गविकृत्या सह इति । बाल. पृ. १४८.

* ' **प्रधानाङ्गत्वमेकस्य** न चैकत्रावकल्पते । ' नहि एकस्मिन् वाक्ये तदेव कदाचित् फलसंबन्धात् प्रधानम्, कदाचित् फलवदुपकारात् अङ्गं युज्यते, नियतरूपत्वात् अङ्गाङ्गिभावस्य । वा. २।१।१।१ पृ. ३७४.

* **प्रधानाङ्गसाधारण्यं** बर्हिरादीनाम् । ३।७।१। १-५. * प्रधानाङ्गसाधारण्यं सौमिकवेद्यादीनाम् । ३।७।३।७,९.

* **प्रधानानुरोधेन** गुणावृत्तेः सर्वत्रेष्टत्वम् । वा. ३।३।७।१४ पृ. ८४३-८४४.

* **प्रधानापूर्वे** विगुणैः अङ्गहविर्भिर्न निष्पद्यते । वा. ३।७।१।४, * **प्रधानापूर्वाणां** फले यौगपद्यं प्रत्युक्तम् । (पूर्वपक्षे इदम्) । २।१।२।५ पृ. ३९३.

* **प्रधानापूर्वाश्रयत्वं** यजमानस्य । वा. ३।८।२।७.

* **प्रधानापूर्वप्रयुक्तानामेव** अङ्गेष्वपि क्रिया युक्ता । वा. ३।७।१।४.

प्रधानाप्रधानयोः प्रधाने कार्यसंप्रत्ययः इति न्यायः । यथा लोके बहुषु गच्छत्सु सैन्यरथेषु ' कोऽयम् ' इति प्रश्ने ' राजा ' इत्युत्तरं दृश्यते । अयं न्यायः ' नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् ' (पा० १।२।६९) इति ' हेतुमति च ' (पा० ३।१। २६) इति सूत्रयोः महाभाष्यकैयटयो स्पष्टः । **साहस्री.** ६७.

* अण् इत्यादिसंज्ञाः प्रणेतुं तद्रूपप्रतिपादनायानुबन्धा उच्चार्यन्ते, ततश्च परार्थमुपादीयमानतया तेषामप्राधान्यं इतरेषां तु स्वार्थमुपादीयमानत्वात् प्राधान्यम् । तेन तेषामेव संज्ञा न त्वनुबन्धानाम् । ' **प्रधाना०** ' इति **न्यायात् । शब्दकौस्तुभः** २ अन्ते.

* यत्र पुनःसंकीर्तनं नास्ति (संदंशो नास्ति) तत्र सर्वं **प्रधानार्थमेवा**ध्यवसातव्यम् । वा. ३।१।१४।२४ पृ. ७४२. * **प्रधानार्थो** योगः प्रधानार्थो विमोकः इति प्रधानान्ते विमोकः । (अङ्गप्रधानार्थौ योगविमोकौ इति सर्वान्ते विमोकः इति वार्तिककारमतम्) । भा. ११।३।९।१७-२०, * **प्रधानार्थाः** एव ज्योतिष्टोमे स्वामिसंस्काराः, न अङ्गप्रधानार्थाः । ३।७।२।६. * प्रधानार्था एव, नाङ्गप्रधानार्थाः ज्योतिष्टोमे दीक्षा दक्षिणाश्च । ३।७।५।११-१२. * **प्रधानार्थस्यैवार्थान्तरेणान्वयः इति सामान्यन्यायः । आभरणम्** ३।४।५।२५ ब्रसू. * **प्रधानार्थयो**रुभयोः नान्योन्यापेक्षा । के.

* ' **प्रधानादौ** विधीयन्ते ये शाखाछेदनादयः । विध्यादिविहितत्वात् ते नाप्नुयुर्दर्शशेषताम् ॥ ' वा. ३।१।२।२ पृ. ६५५.

* **प्रधानारम्भेणैव** अङ्गभूतस्य सिद्धिः । भा. १०।१।४।७.

* **प्रधानावृत्तिर्गुणानुरोधेन** न न्याय्या । भा. १०। ६।१९।७४.

* **प्रधानाश्रयिणां** गुणत्वम् । वा. ३।१।७।१४ पृ. ७१८.

* **प्रधानाश्रितस्य** अङ्गाश्रितेन बाधासंभवः । भाट्ट. ४।१।१७.

* **प्रधानोत्तरकाल** प्रतिपत्तिः यथा ' चात्वाले कृष्णविषाणां प्रास्यति ' इति । बाल. पृ. ८२. **प्रधानोत्तरकालायामपूर्वसिद्धौ** समकालस्यापि संस्कारस्य प्रधानसहायत्वोपपत्तिः । सु. पृ. १५३३.

* **प्रधानोपकारकत्वं** सर्वेषामङ्गानां समुचितानामेव काम्ये कर्मणि । ११।१।३।११-१९.

* ' **प्रधानौपयिकं** द्रव्यं संस्कारैरपि युज्यते । तेन हन्त्यादिभिः सर्वैः संस्कर्तव्याः प्रियङ्गवः ॥ ' वा. २।१। ३।८ पृ. ४०७.

* **प्रधानकथम्भावः** अभितोऽन्यसंबन्धमात्रमुक्त्वा यावदन्तं गच्छति, इति व्याख्यातं अनुषङ्गाधिकरणे । वा. ३।१।१४।२४ पृ. ७४१.

* **प्रधानकर्म** वैदिकं अग्निहोत्रादि पर्युदासाख्यं प्रवृत्तिनिवृत्त्युभयरूपं वैदिकं कर्म । बाल. पृ. ८१. * प्रधानकर्म साक्षादपूर्वाधायकम् । कु. २।१।४।९.

* प्रधानकर्म स्तोत्रं शस्त्रं च । वि. २।१।९. * **प्रधानकर्माणि** पुरुषार्थानि यजमानस्य भवन्ति । भा. ३।८। २।४.

प्रधानकर्मार्थत्वादङ्गानां तद्भेदात् कर्मभेदः प्रयोगे स्यात् । ११।१।१०।५४ ॥

अङ्गानां प्रधानकर्मार्थत्वात् प्रधानार्थत्वात्, तद्भेदात् दर्शपूर्णमासयोश्च तेषां प्रधानानां भेदात् अङ्गानां प्रयोगे अनुष्ठाने कर्मभेदः क्रियाभेदः स्यात् । प्रतिप्रधानं भेदेन अङ्गानुष्ठानं कर्तव्यम् । प्रतिप्रधानमङ्गभेद इति पूर्वः पक्षः ।

क्रमकोपश्च यौगपद्ये स्यात् । ५५ ॥

अङ्गानां यौगपद्ये सर्वप्रधानार्थं तन्त्रे स्वीकृते प्रधानानां क्रमस्य कोपः विरोधः स्यात् । साङ्गमाग्नेयं अकृत्वा अग्नीषोमीयः प्रक्रान्तः स्यात् । साङ्गमाग्नेयं समाप्य ततः यदि अग्नीषोमीयः साङ्गः क्रियेत तदा क्रमकोपो न स्यात् । चकारात् अङ्गारापोहनादीनि संस्पर्शादीनि च प्रतिप्रधानं यथा भिद्यन्ते तथा आघारादीनामपि इति चोधितम् ।

तुल्यानां तु यौगपद्यमेकशब्दोपदेशात् स्याद् विशेषाग्रहणात् । ५६ ॥

तुशब्दः पक्षान्तरमाह । न प्रतिप्रधानमङ्गभेदः । किन्तु कर्तृतः देशतः कालतश्च प्रधानैः तुल्यानां अङ्गानां यौगपद्यं सकृत्त्वं स्यात् । एकशब्दोपदेशात् ' दर्शपूर्णमासाभ्याम् ' इति एकेन शब्देन प्रधानानामङ्गानां चोपदेशात् विशेषाग्रहणात् विशेषस्य अनुक्तत्वात् अज्ञातत्वात् । आग्नेयस्य वा एतान्यङ्गानि अग्नीषोमीयस्य वेति विशेषो न ज्ञायते । तस्मात् प्रतिप्रधानं नाङ्गभेदः । इति सिद्धान्तः ।

ऐकार्थ्यादव्यवायः स्यात् । ५७ ॥

यदुक्तम् ' क्रमकोपो यौगपद्ये ' इति तत्राह । ऐकार्थ्यात् एकार्यकत्वात् एकफलकत्वात् प्रधानानां संभूयकार्यकारित्वम् । अनुष्ठानार्थं तु अव्यवायः आनुपूर्व्यं स्यात् । तस्मान्न तेषां प्रयोगे क्रमः । कुतः क्रमकोपः । अङ्गानामपि संभूयकार्यकारित्वात् उपकारेऽपि नास्ति क्रमकोपः ।

तथा चान्यार्थदर्शनं कामुकायनः । ५८ ॥

तथा च न प्रतिप्रधानमङ्गावृत्तिः इत्यत्र ' चतुर्दश पौर्णमास्यामाहुतयो हूयन्ते त्रयोदशामावास्यायाम् ' इति अन्यार्थदर्शनं भवति इति कामुकायन आचार्यो मन्यते स्म ।

तन्न्यायत्वादशक्तेरानुपूर्व्यं स्यात् संस्कारस्य तदर्थत्वात् । ५९ ॥

यत्तु चकारार्थतया उक्तं संनिपातिनामिव आरादुपकारिणामपि आवृत्तिरस्तु इति । तत्राह । तन्न्यायत्वात् संभूयकारिणां सह क्रिया इति न्यायात् अङ्गानां प्रतिप्रधानं नावृत्तिः । स न्यायो येषां तानि तन्न्यायानि अङ्गानि तादृशत्वात् । अशक्तेः अशक्यत्वात्तु अङ्गारापोहनादीनामानुपूर्व्यं भेदेन करणं स्यात् । नहि एकस्य पुरोडाशस्य अङ्गारापोहेन अन्यस्यापि पाकः कर्तुं शक्यते । संस्कारस्य अङ्गारापोहनादेः तदर्थत्वात् पाकार्थत्वात् च प्रतिपुरोडाशं तत्क्रिया युक्ता । तस्मात् संनिपातिनामावृत्तावपि नारादुपकारिणामावृत्तिः ।

असंसृष्टोऽपि तादर्थ्यात् । ६० ॥

संसृष्टं संनिपत्योपकारि । असंसृष्टः आरादुपकारकः आघारादिः । असंसृष्टोऽपि आरादुपकारकोऽपि आघारादिः प्रतिप्रधानमावर्तनीयः । तादर्थ्यात् प्रधानार्थत्वादङ्गानाम् ।

विभवाद् वा प्रदीपवत् । ६१ ॥

अत्रोच्यते । एतानि अङ्गानि कस्य चित् संनिधौ क्रियमाणान्यपि सर्वेषां प्रधानानामुपकर्तुं विभवन्ति समर्थानि । प्रदीपवत्, यथा प्रदीपः एकस्मिन् प्रदेशे भुञ्जानानां ब्राह्मणानां एकस्य संनिधौ प्रज्वलितोऽपि सर्वेषामुपकरोति तद्वत् । एवमङ्गानां वैभवात् प्रतिप्रधानं नावृत्तिः । हेत्वन्तरार्थो वाशब्दः ।

अर्थात्तु लोके, विधितः प्रतिप्रधानं स्यात् । ६२ ॥

पूर्वपक्षी आह । लोके एकत्र कृतस्यापि प्रदीपस्य अनेकेषां प्रकाशनं दृष्टं प्रयोजनम् । तस्मात् अर्थात् प्रयोजनात् प्रदीपदृष्टान्तो युक्तः । प्रकृते तु विधितः

विधानादेव उपकारानुपकारौ शास्येते इति प्रतिप्रधानमाघारादीनां भेदः स्यात् ।

सकृदिज्यां कामुकायनः परिमाणविरोधात् । ६३ ॥

'चतुर्दश पौर्णमास्याम्' 'त्रयोदश अमावास्यायाम्' इत्युक्तेन आहुतीनां परिमाणेन विरोधात् आघारादीनामङ्गानां सकृत् इज्यां कामुकायन आचार्यो मेने इति । पूर्वोक्तस्य अनुवादः उत्तरार्थः ।

विधेस्त्वितरार्थत्वात् सकृदिज्या श्रुतिव्यतिक्रमः स्यात् । ६४ ॥

तत्राह पूर्वपक्षी । विधीयते इति अङ्गं विधिशब्देन उच्यते । विधेः अङ्गस्य इतरार्थत्वात् यस्य संनिधौ पठितम्, तत्प्रधानार्थत्वात् सकृदिज्या श्रुतिव्यतिक्रमः स्यात्, सकृदिज्या श्रुतिविरुद्धा । असकृदिज्या इति पाठे तु असकृत् इज्या स्यात् । अन्यथा सकृदिज्यायां तु श्रुतिव्यतिक्रमः स्यात् इति योजनीयम् । 'चतुर्दश पौर्णमास्याम्, त्रयोदश अमावास्यायाम्' इत्यत्र तु आहुतिविधीनां संख्या उक्ता नाहुतीनाम् ।

विधिवत् प्रकरणाविभागे प्रयोगं बादरायणः । ६५ ॥

सिद्धान्ती आह । प्रधानानां प्रकरणस्य अविभागे अभेदे सति अङ्गानां तन्त्रेण प्रयोगं बादरायण आचार्यो मन्यते स्म । विधिवत् यथा विधौ सति प्रकरणस्य तुल्यत्वात् सर्वार्थानि अङ्गानि विज्ञायन्ते, न यस्य संनिधौ तदर्थानि । तस्मात् आघारादीनां तन्त्रेण प्रयोगः ।

क्वचिद् विधानान्नेति चेत् । ६६ ॥

पूर्वपक्षी पुनराह । 'सहावघ्नन्ति' 'सह पिंषन्ति' इति क्वचित् सहत्वस्य विधानात् नान्यत्र सहत्वम् । परिसंख्यार्थं विधानं इहैव सहत्वं नान्यत्रेति । तस्मात् न सकृत् । इति चेत् ।

न विधेश्चोदितत्वात् । ६७ ॥

सिद्धान्ती आह । विधीयते इति विधिः निर्वापः । विधेः निर्वापस्य चोदितत्वात् नात्र परिसंख्या । आग्नेयाग्नीषोमीययोः भेदेन निर्वाप उक्तः । तयोर्भेदेन अवहननपेषणे प्राप्नुतः, तत्रावश्यं सहत्वं विधेयम् । तस्मात् आरादुपकारकाणां आघारादीनां न प्रतिप्रधानमावृत्तिः किन्तु सकृदनुष्ठानमिति सिद्धान्तः ।

व्याख्यातं तुल्यानां यौगपद्यमगृह्यमाणविशेषाणाम् । ६८ ॥

येषां विशेषो न गृह्यते कश्चित् तेषां अगृह्यमाणविशेषाणां तुल्यानां यौगपद्यं सहानुष्ठानं व्याख्यातम् (११।१।१०।५६) । 'आग्नेयं कृष्णग्रीवमालभेत, सौम्यं बभ्रुं, आग्नेयं कृष्णग्रीवं पुरोधायां स्पर्धमानः' इत्यनयोः द्वयोः कृष्णग्रीवयोः तुल्यत्वात् एकफलत्वात् यौगपद्यं प्राप्तम्, तस्मात् सह प्रदानं स्यात् । इति पूर्वपक्षी ।

भेदस्तु कालभेदाच्चोदनाव्यवायात् स्याद् विशिष्टानां विधिः प्रधानकालत्वात् । ६९ ॥

सिद्धान्ती आह । द्वयोः कृष्णग्रीवयोः सौम्यस्य चोदनया व्यवायात् व्यवधानात् कालस्य भेदः स्वीकर्तव्यः । कालत्रयेण विशिष्टानां आग्नेयसौम्याग्नेयानां विधिरयम् । तस्मात् विशिष्टविधेः एकैकस्य क्रमिककालस्य प्रधानकालत्वात् अपि त्रयाणां पशूनां कालभेदः । कालभेदाच्च द्वयोराग्नेययोः प्रदानस्य भेदः स्यात् । तस्मात् भेदेन प्रदानमिति सिद्धान्तः ।

तथा चान्यार्थदर्शनम् । ७० ॥

तथा च कृष्णग्रीवयोः भेदेनानुष्ठाने 'अभितः सौम्यमाग्नेयौ भवतः' इति अन्यार्थदर्शनं भवति । तस्मात् प्रदानभेदः ।

विधिरिति चेन्न वर्तमानापदेशात् । ७१ ॥

'अभितः सौम्यं आग्नेयौ भवतः' इति विधिः स्यात् । विधिना च आग्नेययोः भेदः स्यात् । विध्यभावे तु सहत्वमेव भवितुमर्हति । इति चेन्नायं विधिः, 'भवतः' इति वर्तमानेन वर्तमानार्थेन लटा अपदेशात् व्यपदेशात् । तस्मात् पूर्वोक्तैर्हेतुभिः आग्नेययोः प्रदानस्य भेद एव स्यात् इति सिद्धान्तः । सर्वथाऽपि दर्शपूर्णमासयोः प्रतिप्रधानं नाङ्गभेदः । **के.**

* **प्रधानकर्मलक्षणम्** । 'यैर्द्रव्यं न चिकीर्ष्यते तानि प्रधानभूतानि, द्रव्यस्य गुणभूतत्वात् ।' (२।१।३।७) भावशब्दवाच्यैर्यैः कर्मभिः न द्रव्यमुपक्रियते,

तेषां कर्मणां प्रधानत्वात् तद्वाचीनि भावशब्दाख्यानि आख्यातानि प्रधानकर्मवाचीनि (इति भाष्यकृता व्याख्यातम्) । **सु. पृ. ६२३.**

* **प्रधानकर्मविधाने** सति अनेकार्थविधानं उपपद्यते । **वा. १।४।२।३ पृ. ३२९.**

* **प्रधानकालात्** सर्वे पदार्था न विप्रकृष्टव्या इति प्रयोगवचनेन प्रतिपादितम् । **वा. १।३।३।६ पृ. १९७.**

* **प्रधानकाले एव** अङ्गानामनुष्ठानम्, फलवाक्येन साध्यसाधनेतिकर्तव्यताविशिष्टभावनाविधायिना अङ्गप्रधानयोर्युगपत् प्रयोगविधानात् यावता विलम्बेन विना अनुष्ठानाशक्तिः ततोऽधिकस्य विलम्बस्य निवारणात् । **सु. पृ. ७३५.**

* **प्रधानकालत्वं** अङ्गानामज्ञातकालानां वक्ष्यते (११।३।१।१ इत्यत्र) । **वा. ३।६।७।२२ पृ. १०४७.**

* **प्रधानक्रमात्** अङ्गक्रमः । **भा. ५।१।७।१४.**

* **प्रधानक्रिया** हि विशेषणानि पिण्डीकरोति । **वा. १।४।२।३ पृ. ३३२.**

* **प्रधानगुणः** अङ्गगुणेन न बाध्यते, 'अङ्गगुणेन प्रधानगुणबाधस्य अन्याय्यत्वात्' । **वा. ४।१।१७।४८ पृ. १२२४.** * **प्रधानगुणः** अङ्गगुणात् बलीयान् । षोडशिग्रहस्य उक्थ्यपरभावरूपक्रमः प्रधानभूतग्रहगुणत्वात् अङ्गभूतस्तोत्रगुणभूतात् कालात् बलीयान् । अतस्तदनुरोधेन स्तोत्रकालं बाधित्वा उत्कष्टव्यः षोडशी । **रत्न. ५।१।१८।३५.**

* **प्रधानता** नास्ति संमार्जनादीनाम् । २।१।४.

* **प्रधानद्रव्यशेषे** सति शेषकार्याणि क्रियन्ते । **वा. ३।५।१।५.**

* **प्रधानद्वयक्रमात्** तन्निर्वापक्रमः । चित्रायागे 'सारस्वतौ भवतः सरस्वती च सरस्वांश्च' इति वाक्यविहितप्रधानद्वयक्रमात् तन्निर्वापक्रमः । **भाट्ट. ५।१।७.**

* **प्रधानधर्मेण** अङ्गधर्मो बाध्यते । प्रासबाधोऽत्र । **वा. ३।३।७।१४ पृ. ८६०.**

* **प्रधाननिर्वाहकत्वे** अङ्गनिर्वाहापर्यासस्यापि मुख्यस्योपादानम् । ६।३।२०.

* **प्रधानपीडायां** कांस्यभोजिन्यायो नावतरति इति द्वादशे वक्ष्यते । **कु. ६।३।१८।३८.**

* **प्रधानपुरुषेश्वरपरमाणुकारणादिप्रक्रियाः** सृष्टिप्रलयादिरूपेण प्रतीताः, ताः सर्वाः मन्त्रार्थवादज्ञानादेव दृश्यमानसूक्ष्मस्थूलद्रव्यप्रकृतिविकारभावदर्शनेन च द्रष्टव्याः । प्रयोजनं च स्वर्गयागाद्युत्पाद्योत्पादकविभागज्ञानम् । स्वर्गप्रलयोपवर्णनमपि दैवपुरुषकारप्रभावप्रविभागदर्शनार्थम् । सर्वत्र हि तद्बलेन प्रवर्तते, तदुपरमे च उपरमति इति विज्ञानमात्रक्षणभङ्गनैरात्म्यादिवादानां अपि उपनिषदर्थवादप्रभवत्वं विषयेषु आत्यन्तिकं रागं निवर्तयितुं इति उपपन्नं सर्वेषां प्रामाण्यम् । **वा. १।३।१।२ पृ. १६८.**

* **प्रधानपूर्वकाला** प्रतिपत्तिः यथा 'शकृत् प्रविध्यति, लोहितं निरस्यति' इति । (इदं ४।१।१२।२७ इत्यत्र प्रतिपादितम्) । **बाल. पृ. ८२.**

* **प्रधानप्रयोगवचनेनैव** शब्देन अङ्गानामपि प्रयोगः चोद्यते । **भा. ११।१।२।८.**

* **प्रधानप्रयोगवचनपरिगृहीतत्वात्** अन्यत्रापि उत्पन्नानामङ्गानां यत्रैव प्रधानं तत्रैव विधिः । **वा. ३।३।२१ पृ. ८१०.**

* **प्रधानप्रसङ्गलक्षणः** प्रासबाधो यथा काम्यार्थेन अग्निहोत्रादिप्रयोगेण नित्याग्निहोत्रप्रयोगस्य प्रसङ्गसिद्धिः । **बाल. पृ. १३२.**

* **प्रधानभूतस्य** च लिङ्गसंख्यमविवक्षितम् । कथम्? प्रत्ययः क्रियां विधत्ते । क्रिया विधीयमाना कारकैर्विना न भवति । कारकाणि च स्वविशेषणैर्विना न भवन्ति । तस्मात् क्रियाकारकाणि कारकविशेषणानि प्रत्ययेन परामृश्यन्ते । तत्र यः क्रियां प्रति उद्दिश्यते, स प्रधानभूतः क्रियां प्रति । न तु स क्रियाङ्गम्, क्रियैव तदर्था । तस्य प्रधानभूतस्य यत् लिङ्गसंख्यम्, तदनङ्गत्वात् क्रियायाः प्रत्ययेन न परामृश्यते । **टुप्. १०।३।१७।६३ पृ. १८९८.** * स्वार्थे चेदुच्चार्यते, **प्रधानभूता** (आकृतिः) । **भा. १।३।९।२३ पृ. ३१७.**

* **प्रधानभूतदेवताविधिः मन्त्रः** यथा 'स्वाहाग्निं स्वाहा सोमम्' इत्युत्तमप्रयाजमन्त्रः । **बाल. पृ. ६३.**

* प्रधानभूतद्रव्यविधिः मन्त्रः 'सोमस्याग्ने वीहि' इति । बाल. पृ. ६४.

* 'प्रधानभूतविशेष्यत्वे संभवति प्रकारविशेष्यत्वस्य अन्याय्यत्वात्' इति न्यायेन विशेष्यत्वकल्पनौचित्यम् । रहस्य. पृ. ४१.

* प्रधानभेदेऽपि एकस्मिन् कर्मणि अङ्गानां तन्त्रम् । ११।१।१०।५४-६७.

卐 प्रधानमल्लनिबर्हणन्यायः । मल्ला बाहुयुद्धविशारदास्तेषु प्रधानस्य निबर्हणं मारणं भूमौ प्रतिष्ठापनं तत्पृष्ठभागस्य तथा संयोजनमिति यावत् । यथा जयकामेन प्रधाने निगृहीते तदपेक्षया दुर्बलानामन्येषां पराजयः सुकर इति न्यायार्थः । साहस्री. २४४. * 'ईक्षतेर्नाशब्दम्' इत्यारभ्य प्रधानकारणवादः सूत्रैरेव पुनःपुनराशङ्क्य निराकृतः । अतः प्रधानमल्लनिबर्हणन्यायेन अतिदिशति 'एतेन सर्वे (अण्वादिकारणवादाः) व्याख्याताः' इति । शांभा. १।४।८।२८ ब्रसू.

* प्रधानमात्रार्थं उपांशुत्वं काम्येष्टिषु । ३।८।१९।३५-३६. * प्रधानमात्रार्थाः यजमानसंस्काराः । ३।७।२।६. * प्रधानमात्रार्थे दीक्षादक्षिणे ज्योतिष्टोमे । ३।७।५।११-१२.

* प्रधानमात्रसमर्थमुख्यद्रव्यलाभेऽपि तस्यैवोपादानम् । ६।३।२०।४०-४२.

* प्रधानरूपैककार्यार्थत्वमङ्गानाम् । भा. ११।१।२।५-१०.

* प्रपञ्चस्य सत्यत्वमेव युक्तमिति मीमांसकाः । सदसद्विलक्षणत्वमिति वेदान्तिनः । मणि. पृ. ४८-५१.

* 'प्रपा प्रवर्तयितव्या' इति स्मृतिः । भा. १।३।१।१ पृ. १६०, * प्रपाः तडागानि च परोपकाराय, न धर्मायेत्येवावगम्यते । तथा च दर्शनम् 'धन्वन्निव प्रपा असि' इति 'स्वल्पोदकं परिगृह्णन्ति' इति च । १।३।१।२ पृ. १६६.

卐 प्रपामेलन्यायः । यथा प्रपा पानीयशाला तस्यां नानादिग्भ्यो बहवो जीवा मिलन्ति, द्वितीये क्षणे भिन्नमार्गाः प्रयान्ति, एवं संसारिणो जीवा मिलन्ति वियुज्यन्तीति । साहस्री. ८९८.

* प्रपाठकाध्ययनवत् समूहावृत्तिः । यथा अध्येतारः प्रपाठकमावर्तयितुकामाः एकैकभागं असकृत् पठन्ति तद्वत् । वि. १०।५।२५.

* प्रपूर्वस्य वसेः स्वस्थानात् प्रस्थितस्य अन्यत्रवासे प्रयोगः । सु. पृ. ७७२.

* 'प्रप्र' इत्यत्र 'प्रप्री' पदमेव प्रयोक्तव्यम्, इरापदन्यायात् । इदं पूर्वाधिकरणस्य प्रयोजनम्, (न तु अष्टादशाधिकरणस्य) । टुप्. ९।१।१८।५८.

* न प्रबलं प्रबलमित्येव दुर्बलोपस्थापितं न गृह्णाति, किन्तु सति विरोधे । पराक्रमः पृ. २६. * प्रबला काम्या विकृतिः तन्त्रिणी, कामस्य शीघ्रप्रवर्तकत्वात् । प्रकृतिस्तु प्रसङ्गिनी (कृत्वाचिन्ता) । वि. १२।२।१३.

* 'प्रब्रूयाद् ब्राह्मणस्तेषां नेतराविति निश्चयः' इति स्मृतेः प्रवचनं ब्राह्मणस्यैव । सु. पृ. ११५.

* 'प्रभिन्नकमलोदरे मधूनि मधुकरः पिबति' इत्यत्र प्रसिद्धपदसाहचर्यात् अज्ञातार्थस्य मधुकरशब्दस्य अर्थोऽपि ज्ञातुं शक्यते । वि. १।१।५.

* 'प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्तते । स नाप्नोति फलं तस्य परत्रेति विचारितम् ॥' वा. १।३।२।८ पृ. १९१.

卐 प्रभूणां हि विभूत्यन्धा धावत्यविषये मतिः इति न्यायः । अयमहल्येन्द्रप्रस्तावे दृष्टान्तभूत इति । साहस्री. ७३३.

卐 प्रभुत्वादार्त्विज्यं सर्ववर्णानां स्यात् । १२।४।१५।४२ ॥

आर्त्विज्यं यज्ञे ऋत्विक्त्वं सर्ववर्णानां सर्वेषां ब्राह्मणराजन्यवैश्यानां स्यात् । प्रभुत्वात् कर्तुं समर्थत्वात् सर्वे अध्ययनवन्तो विद्वांसश्च । इति पूर्वः पक्षः ।

स्मृतेर्वा स्याद् ब्राह्मणानाम् । ४३ ॥

'याजनाध्यापनप्रतिग्रहाः ब्राह्मणस्यैव वृत्त्युपायाः' इति स्मृतेः प्रामाण्यात् ब्राह्मणानामेव आर्त्विज्यं स्यात्, न राजन्यवैश्यानाम् । इति सिद्धान्तः ।

फलचमसविधानाच्चेतरेषाम् । ४४ ॥

'स यदि राजन्यं वा वैश्यं वा याजयेत्, स यदि सोमं बिभक्षयिषेत् न्यग्रोधस्तिमिनीराहृत्य ताः संपिष्य दधनि उन्मृज्य तमस्मै भक्षं प्रयच्छेन्न सोमम्' इति वचनेन इतरेषां राजन्यवैश्यानां फलचमसस्य विधानात् सोमपानानधिकारो विज्ञायते । असोमपाभ्यां च आर्त्विज्यं न शक्यते कर्तुम् । तस्मात् राजन्यवैश्यानां नार्त्विज्याधिकारः ।

सांनाय्येऽप्येवं प्रतिषेधोऽसोमपीथहेतुत्वात् । ४५ ॥

राजन्यवैश्ययोः एवं सोमवत् सांनाय्येऽपि प्रतिषेध उक्तः । तत्र च असोमपीथहेतुत्वमुक्तम् । 'न राजन्यो न वैश्यो वा सांनाय्यं पिबेत् असोमपीथो ह्येषः' इति । तेन राजन्यवैश्यानां सोमपानाभावेन आर्त्विज्यं नास्तीति निश्चीयते ।

चतुर्धाकरणे च निर्देशात् । ४६ ॥

दर्शपूर्णमासयोः पुरोडाशस्य चतुर्धाकरणमन्त्रे 'ब्राह्मणानामिदं हविः सौम्यानां सोमपीथिनां नेहाब्राह्मणस्यास्ति' इत्यत्र ब्राह्मणानामेव शेषभक्षणे निर्देशात् अब्राह्मणस्य च निषेधात् आर्त्विज्यं ब्राह्मणानामेव ।

अन्वाहार्ये च दर्शनात् । ४७ ॥

दर्शपूर्णमासयोः अन्वाहार्ये अन्वाहार्यचरुरूपदक्षिणावाक्यशेषे 'त एते वै देवा अहुतादो यद् ब्राह्मणाः यदन्वाहार्यमाहरन्ति, तानेव तेन प्रीणाति' इति ब्राह्मणानामेव दर्शनात् तेषामेव आर्त्विज्याधिकारः न राजन्यवैश्ययोः इति सिद्धान्तः ।

द्वादशलक्षण्या अन्तिममिदं सूत्रम् । इतः परं संकर्षकाण्डं चतुरध्यायी । के.

* प्रमगन्दो नाम राजा । भा. १।२।४।३१-९ पृ. १४९.

卐 प्रमदान्यायः । यथा एकस्यां प्रमदायां भर्तुः सुखं जायते, तामविन्दतश्चैत्रस्य दुःखं जायते, तस्यामेव संपत्न्या द्वेष इति प्रमदयैकयैव सर्वे भावा भवन्तीति विषये अस्य प्रवृत्तिरिति । साहस्री. ९२८.

* प्रमा अज्ञातविषयकं बाधकज्ञानरहितं ज्ञानम् । न चैवं गृहीतविषयकधारावाहिकज्ञानस्य अप्रामाण्यप्रसङ्गः । कालस्य षडिन्द्रियवेद्यत्वेन पूर्वक्षणविशिष्टघटस्य विषयीकरणेन तादृशस्य उत्तरज्ञानाविषयतया अनधिगतार्थविषयकत्वात् । मणि. पृ. १३, * प्रमा कारणदोषबाधकज्ञानरहितं अगृहीतग्राहि ज्ञानम् । पृ. १६५, * प्रमायां गुणः कारणं इति नैयायिकाः । पृ. १४.

* प्रमात्वं नानुमेयम्, तस्य स्वतो ग्राह्यत्वात्, ज्ञानानुमाने समानसंवित्संवेद्यत्वात्, ज्ञानत्ववत् । मणि. पृ. १६, * प्रमात्वं यथार्थानुभवत्वम् । याथार्थ्यं च तद्वद्विशेष्यकत्वे सति तत्प्रकारकज्ञानत्वम् । भ्रमवारणाय विशेष्यकान्तम् । रजतविशेष्यकद्रव्यत्वप्रकारकज्ञाने रजतत्वप्रमात्ववारकं तत्प्रकारकेति । नच रङ्गरजतयोः रजतरङ्गप्रतीतेः प्रमात्वापत्तिः, ज्ञानैक्येन तद्वद्विशेष्यकत्वतत्प्रकारकत्वयोः सत्त्वात् इति वाच्यम् । तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वस्य विवक्षणात् । तत्रापि येन संबन्धेन तद्वत्त्वम्, तेन तत्प्रकारकत्वं बोध्यम्, अतो न 'समवायेन लोहितः स्फटिकः' इति ज्ञाने अतिप्रसङ्गः । न च एवं पाकरक्ते इदानीं श्यामरूपवान् इति प्रतीतेः प्रमात्वप्रसङ्गः, यदवच्छिन्नेत्यस्य विवक्षितत्वात् । रूपप्रकारतायाः वर्तमानकालावच्छिन्नरूपवद्विशेष्यकत्वानवच्छेदकत्वात् । अन्ये तु 'अयं विनाशी' इत्यादौ मतुपो वर्तमानार्थत्वासंभवेन संबन्धार्थकत्ववत् अत्रापि संबन्धार्थकत्वात् अव्याहतमेव प्रमात्वमित्याहुः । निर्विकल्पस्य तु भ्रमप्रमोभयबहिर्भूतत्वमेव आकरे व्यक्तम् । अस्तु वा तस्यापि प्रमात्वम्, विशेष्याद्यवृत्त्यप्रकारकत्वस्यैव प्रमात्वात् । अत्र ज्ञानत्वघटितमेव प्रमात्वं सुवचम्, तथापि तस्य स्मृतिसाधारण्येन तत्कारणस्य प्रमाणान्तरताऽऽपत्त्या अनुभवत्वघटितमेव अनुमन्यन्ते सांप्रदायिकाः । अनुभवत्वस्य जातित्वेन ज्ञानत्वाघटितत्वात् न गौरवमिति अन्ये । वस्तुतस्तु ज्ञानत्वघटितमेव तत् लाघवात् । न च स्मृतिकारणस्य प्रमाणान्तरताऽऽपत्तिः, इष्टत्वात्, निर्युक्तिकप्रवादस्य हेयत्वात् । अत एव मन्त्राणां स्मारकत्वेऽपि प्रामाण्यम् । पृ. ११-१२.

* **प्रमाणम्** । अनधिगतार्थगन्तृत्वमेव प्रमाणलक्षणमादर्तव्यम् । तार्किकास्तु प्रमाकरणं प्रमाणम् । प्रमात्वं च यथार्थानुभवत्वम् । याथार्थ्यं च तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वम् । अनुभवत्वं च जातिविशेषः इत्याहुः । कु. १।१।५।५. * प्रमाणं अर्थः (प्रयोजनम्), क्रमे, व्युत्क्रमे तस्य अनुपपद्यमानत्वात् । **भाट्ट.** ५।१।२. * प्रमाणं अर्थसंस्पर्शि हीष्यते । तस्य बाधकज्ञानोत्पत्तौ सत्यां पुनः प्रतिपक्षविज्ञानं तन्निमित्तमेवोत्पद्यते । **बृहती.** पृ. १९. * प्रमाणं 'क्षुते आचामेत्' इत्यादिः स्मृतिः । **वि.** १।३।४. * प्रमाणं तावत् मीमांसकानां विभक्तविभागेनानेकविधम् । तथाहि, प्रत्यक्षं अनुमानं शब्दः उपमानं अर्थापत्तिः अभावः इति षट् । तत्र प्रत्यक्षं षड्विधं चाक्षुषादिभेदात् । अनुमानं द्विविधं सामान्यतोदृष्टं विशेषतोदृष्टं च । द्विविधमपि पुनर्द्विविधं स्वार्थं परार्थं च । केवलान्वयि–केवलव्यतिरेकिभेदौ तु नेष्टौ, 'लिङ्गिज्ञानं च तद्वत् स्यात् त्रिरूपाल्लिङ्गतो न तत्' । श्लो. वा. अनुमान १६७) इत्यनुमाने त्रैरूप्यवर्जितस्य लिङ्गस्यासंभवोक्तेः । परार्थानुमानवाक्यस्य च तार्किकाणामिव न पञ्चावयवाः, किन्तु त्रय एव । तदुक्तं 'तत्तु पञ्चतयं केचित् द्वयमन्ये वयं त्रयम् । उदाहरणपर्यन्तं यद्वोदाहरणादिकम् ॥' इति । प्रत्यक्षानुमानोपमानाभावाख्यानि चत्वारि लौकिकान्येव । अर्थापत्तिर्द्विधा दृष्टार्थापत्तिः श्रुतार्थापत्तिश्च । उत्तराऽपि द्विविधा लौकिकी वैदिकी च । शब्दोऽपि द्विविधो लौकिको वैदिकश्च । वैदिकोऽपि द्विविधः उपदेशातिदेशभेदात् । उपदेशोऽपि द्विविधः विधिर्निषेधश्च । पुनरुपदेशोऽनेकविधः । शब्दान्तरम्, अभ्यासः, संख्या, संज्ञा, गुणः, प्रकरणान्तरं चेति द्वैतीयकानि कर्मभेदकानि षट् । श्रुतिः, लिङ्गम्, वाक्यम्, प्रकरणम्, क्रमः, समाख्या चेति तार्तीयकानि विनियोजकानि षट् । श्रुतिः, अर्थः, पाठक्रमः, स्थानक्रमः, मुख्यक्रमः, प्रवृत्तिक्रमश्च इति पाञ्चमिकानि क्रमप्रमाणानि षट् । प्रत्यक्षविधिः, अभावविधिः, विकारः, स्वशब्दः, निषेधानुवादश्च इति नावमिकानि कार्यापत्तिप्रमाणानि पञ्च इति । अतिदेशस्तु सप्तविधो वक्ष्यते । बाल. पृ. ८. * प्रमाणं धर्मे वेदः । **भा.** १।१।२।२. * प्रमाणं न प्रत्यक्षं धर्मे । १।१।४. * प्रमाणं प्रमाणान्तरं न अपेक्षते अर्थपरिच्छेदे । स्वरूपपरिच्छेदे तु प्रमाणमपि प्रमाणान्तरमपेक्षते एव । ऋजु. पृ. ६६, * प्रमाणम् । यच्च स्वातन्त्र्येण विषयं नोपस्थापयति न तत् प्रमाणान्तरम् । पृ. १६०. * प्रमाणम् । येनयेन हि प्रमीयते तत्तत् प्रमाणम् । **भा.** १।१।५।५ पृ. ५९. * प्रमाणम् । लौकिकं च प्रमाणं परीक्षकैरपि अनुसरणीयम् । **ऋजु.** पृ. ७३. * प्रमाणं शिष्टाचारः । **वि.** १।३।४ वर्णकं २. * प्रमाणम् । शीघ्रप्रवृत्ति प्रमाणं प्रतिष्ठितं तद्विलम्बितस्य बाधकं भवति । यत्र तु शीघ्रमपि प्रमाणं प्रत्यक्षादिकं उपजातमपि दूरत्वादिदोषेण सांशयिकं स्वयमेव अप्रतिष्ठितं भवति, तत्र मन्थरेणापि निःसंशयेन विपरीतार्थपरिच्छित्तिर्भवत्येव । **रत्नाकरः** पृ. ३६४–३६५. * प्रमाणं सदाचारः । **बिन्दु.** १।३।४. * प्रमाणं हि नाम करणकारकम् । ऋजु. पृ. ९४. * 'लौकिकं वैदिकं वाऽपि **प्रमाणं** दोषवर्जितम् । सर्वमाश्रीयते स्वार्थे न चास्मिन् दोषसंभवः ॥' **वा.** ३।२।९।२५ पृ. ७८४.

* **प्रमाणानि** धर्माधर्मयोः अष्टौ विधि–अर्थवाद–मन्त्र–स्मृति–आचार–नामधेय–वाक्यशेष–सामर्थ्यरूपाणि । **भाट्ट.** १।४।२०. * प्रमाणानि । न हि प्रत्यक्षमेव एकं प्रमाणम्, तद्वदेव हि अनुमानादीन्यपि प्रमाणानि । सर्वप्रत्यस्तमये च षष्ठेन अभावः परिच्छिद्यते । **वा.** २।१।१६।४८ पृ. ४५२. * प्रमाणानि प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्ध्याख्यानि षट् लौकिकानि । धर्मप्रमाणानि विधि– अर्थवाद– मन्त्र– नामधेय– स्मृति– शिष्टाचाररूपाणि षट् । धर्मभेदकानि शब्दान्तर–अभ्यास–संख्या–संज्ञा–गुण–प्रकरणान्तराणि षट् । धर्माङ्गताबोधकानि श्रुति–लिङ्ग–वाक्य– प्रकरण– स्थान– समाख्यारूपाणि षट् । क्रमबोधकानि–श्रुति–अर्थ–पाठ– स्थान– मुख्य– प्रवृत्तिरूपाणि षट् । अतिदेशप्रमाणानि वचन–नाम–लिङ्गानि त्रीणि । ऊहप्रमाणं स्थानापत्तिः एकम् । बाधप्रमाणानि प्रत्याम्नान– प्रतिषेध– अर्थलोपरूपाणि त्रीणि । एवं एकत्रिंशत् अलौकिकानि प्रमाणानि ।

एषां आलोकसंयोगादिवत् सहकारितामात्रम्, विधिरेवात्र मामित्यपि केचित् । **मणि.** पृ. १३. * प्रमाणानि विनियोगविधेः सहकारीणि षट् श्रुति–लिङ्ग–वाक्य–प्रकरण–स्थान–समाख्यारूपाणि । **मीन्या.** * प्रमाणानि । वस्त्ववबोधनार्थानि प्रत्यक्षादीनि पञ्च प्रमाणानि । **वा.** २।१।२।५ पृ. ३९०. * प्रमाणानि षडेव प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्ध्याख्यानि, 'राम षड् युक्तयो लोके याभिः सर्वोऽनुदृश्यते' इति रामायणात् । **मणि.** पृ. ६२. * प्रमाणानि सर्वाण्येव उपयुज्यमानमनुपयुज्यमानं वाऽर्थं आत्मगोचरतापन्नं गमयन्ति, तेनैव चैषां हानोपादानापेक्षाबुद्धयः फलत्वेन वर्ण्यन्ते । **वा.** १।२।१।१ पृ. १०६, * **प्रमाणेन** बलीयसा निराकाङ्क्षीकृते जघन्यप्रमाणस्य अनुत्थानम् । ३।६।७।१९, * **प्रमाणैः** यथास्वं षड्भिरपि प्रमाणाभासः बाध्यते, प्राप्तबाधोऽत्र । ३।३।७।१४ पृ. ८६०. * **प्रमाणस्य** एव मुख्यत्वं प्रमाणप्रमेयभावोपाधौ । अनुष्ठानोपाधौ तु वेदार्थप्रमाणयोः प्रधानोपसर्जनभावः, प्रमाणमुपसर्जनं न मुख्यम् । **वि.** १।१।३. * प्रमाणस्य कार्यं अर्थनिश्चयार्थलक्षणम् । **ऋजु.** पृ. ९४. * प्रमाणस्य दुर्बलस्यापि यत्रात्यन्तमानर्थक्यं विषयाभावात् तत्र प्रबलस्यापि संकोचरूपं बाधमङ्गीकृत्य दुर्बलस्य प्राबल्यम्, यथा वषट्कारनिमित्तभेदादेः प्रबलेन श्रुत्यादिना प्रतिपाद्यावच्छेदेन प्राप्तस्य यजमानचमस इति समाख्यया विषयान्तरं प्रतिपद्यमानायाः यजमानकर्तृकभक्षान्तरस्य सोमसंस्कारार्थत्वेन विधानात् प्रतिपाद्यसोमैकदेशसंस्कारकत्वम् । **कौ.** ३।३।७।१४ पृ. ३६७, * प्रमाणस्य दुर्बलस्यापि विशेषविषयत्वे तेन प्रबलस्यापि सामान्यविषयस्य संकोच इष्टः, 'यस्मिन् देशे मृगः कृष्णः' इत्यादिस्मृत्या क्रतुस्मृतिश्रुतिसंकोचस्य प्रमेयबलाबलन्यायेन साधितत्वात् । १।३।३।७. * प्रमाणस्य धर्मविषयकस्य परीक्षा । १।१।३. * प्रमाणस्य प्रमेयावगतिरेव कार्यम्, न तु प्रयोजनवदर्थावगतिः । अन्यथा उपेक्ष्यवस्तुनः अनवगमप्रसङ्गात् । **सोम.** १।२।१ पृ. ५. * प्रमाणस्य बाधनाक्षमत्वम् (अबाध्यत्वमित्यर्थः) । **वा.** ३।३।७।१४ पृ. ८२९. * **प्रमाणयोः** उभयोरबाध्यत्वे सति कस्यचिदर्थस्यासिद्धेः एकस्य बाधनम् । **बृहती.** पृ. २०४. * प्रमाणयोः द्वयोस्तुल्यबलयोः विरोधे सति बलवत्तरेण निर्णयः कर्तव्यः । **वा.** ३।६।२।९ पृ. १०३०, * प्रमाणयोः सह प्रस्थितयोः येन विनियोगदेशं चिरेण प्राप्तिर्भवति स विक्षेपो दौर्बल्यकरो भवति । अवधारिते तु विनियोगे यद्यपि पश्चात् अनुमानसहस्रं भवति न तथापि कश्चिद् विप्रकर्षः । ३।३७।१४ पृ. ८३१, * **प्रमाणानां** क्लृप्तमूलानां प्राप्तबाधो भवति, न कल्प्यमूलानां इत्युक्तम् (३।३।७) । ३।७।२३।५१.

* **प्रमाणाधीना** प्रमेयसिद्धिः । **सु.** पृ. १७९.

* **प्रमाणानुत्पत्तिलक्षणो** बाधः श्रुतिलिङ्गादिविरोधे । **वा.** ६।५।१९।५४.

* **प्रमाणान्तरत्वं** असाधारणकारणानुप्रवेशनिबन्धनम् । ऋजु. पृ. ७४.

* **प्रमाणाभासः** यथास्वं षड्भिरपि प्रमाणैः बाध्यते, प्राप्तबाधोऽत्र । **वा.** ३।३।७।१४ पृ. ८६०.

* **प्रमाणाभासबाधो** नित्यं न प्रमाणस्यैव । **वा.** ३।३।७।१४ पृ. ८२९.

* **प्रमाणगतिः** तादृशी आश्रयणीया द्वेधा संभवे, या प्रमाणान्तरं न बाधेत । **वा.** ३।४।१।५.

* **प्रमाणचिन्तार्थं** प्रथमं लक्षणम्, उत्तरा एकादशलक्षणी तु प्रमेयचिन्तार्था । **सु.** पृ. ५३३.

* **प्रमाणतन्त्रा** प्रमेयव्यवस्थितिः । **कणिका.** पृ. ३०६.

* **प्रमाणतर्कन्यायेन** उभयोरप्यंशभेदेन परस्परापेक्षायामपि न परस्पराश्रयदोषः । (प्रमाणं च तर्कश्च उभाभ्यामुभावपि दृढौ भवतः) । **परिमल.** ३।४।१।१–५ ब्रसू.

* **प्रमाणत्वं** प्रमाकरणत्वम् । **सु.** पृ. २.

* **प्रमाणपञ्चकाङ्गीकारः** (अनुपलब्धिभिन्नानि पञ्च प्रमाणानि प्राभाकरमते) । **ऋजु.** पृ. १६०.

* **प्रमाणपरीक्ष्यत्वम्** । न परीक्षितव्यं निमित्तं (धर्मे), प्रत्यक्षादीनि हि प्रसिद्धानि प्रमाणानि, तदन्तर्गतं च शास्त्रम्, अतस्तदपि न परीक्षितव्यम् । अत्रोच्यते । व्यभिचारात् परीक्षितव्यम् । शुक्तिका हि रजतवत्

प्रकाशते यतः । तेन प्रत्यक्षं तावत् व्यमिचरति, तन्मूलत्वाच्च अनुमानादीन्यपि । तत्रापरीक्ष्य प्रवर्तमानोऽर्थात् विहन्येत अनर्थं चाप्नुयात् कदाचित् [इदं 'तस्य निमित्तपरीष्टिः' (१।१।३।३) इति सूत्राधिकरणं वृत्तिकारमतेन]। भा. १।१।५।५ पृ. २५-२६.

* **प्रमाणप्रतिपादनं** प्रथमाध्यायार्थः । वि. पृ. ५ प्रस्तावना,

* **प्रमाणप्रमेयबलाबलविचारः** । यदि प्रमाणबलाबलं बलीयः ततो बलवच्छ्रुतिप्रमेयत्वात् दुर्बलस्वभावैरपि क्रमादिभिः आचमनादीनां बाधः । प्रमेयबलाबलबलीयस्त्वे तु पदार्थधर्मेभ्यः क्रमादिभ्यः पदार्थत्वेन आचमनादयो बलीयांसः इति सत्यपि स्मृत्याख्यप्रमाणदुर्बलत्वे बलवदाश्रयानपि स्वरूपेण दुर्बलान् क्रमादीन् बाधिष्यन्ते । वा. १।३।३।५.

* **प्रमाणप्रमेयबलाबलविसंवादे** किं प्रमाणबलं ज्यायः उत प्रमेयबलं इति संशयः । 'शिष्टाकोपेऽविरुद्धमिति चेत्' (१।३।३।५) 'न शास्त्रपरिमाणत्वात्' (१।३।३।६) शिष्टैः श्रुतिविहितैः क्रमादिभिः पदार्थगुणैः स्मार्ताचमनादिपदार्थस्य अकोपे अबाधे सति तत्स्मरणं श्रुतिप्रमाणेन अविरुद्धं इति सिद्धान्ती मन्यते चेत् । तन्न । कुतः ? शास्त्रपरिमाणत्वात् क्रमादीनां श्रुतिसिद्धत्वात् । श्रुतेश्च प्रबलप्रमाणत्वात् प्रमेयबलापेक्षया च प्रमाणबलस्य ज्यायस्त्वात् । तस्मात् आचमनादिस्मरणमप्रमाणं इति पूर्वः पक्षः । **सिद्धान्तयति**— 'अपिवा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन् ।' (१।३।३।७) अपिवा इति पूर्वपक्षव्यावृत्तौ । स्मार्तप्रमेयाचमनादिबाधे कारणस्य प्रमाणबलस्य स्मार्तप्रमेयाचमनाद्यवगमात् पूर्वं अग्रहणे अनवगमे सति तस्य ज्यायस्त्वाभावात् कर्ममध्ये स्मर्तृभिः प्रयुक्तानि आचमनादीनि आदरणीयतया प्रतीयेरन् । तस्मात् सत्यपि विरोधे बलवद्विरोधाभावात् युक्तं आचमनादिस्मृतीनां प्रामाण्यम् । **अथवा** 'शिष्टाकोपे० परिमाणत्वात्' शाक्यादिग्रन्थेषु योंऽशः वेदवादैर्विरुध्यते तत्र अप्रामाण्यमस्तु । शिष्टाकोपे शिष्टं वेदोपदिष्टं न कोपयति न बाधते यः तस्मिन्नंशे तु अहिंसासत्यवचनशमदयावैराग्यध्यानाभ्यासादिधर्मबोधके प्रामाण्यमविरुद्धम् । इति चेत्, तन्न । कुतः ? शास्त्रपरिमाणत्वात् । परिमाणेति कर्मणि ल्युट् । धर्मप्रतिपादकशास्त्राणां परिमितत्वात् । याज्ञवल्क्यादिभिर्हि धर्मस्थानानि परिगणितानि । न च तदन्तर्गताः शाक्यादिग्रन्थाः इति सिद्धान्तः । **अथवा** वसन्तोत्सवादिसदाचाराः अप्रमाणं इति चेत् आह सिद्धान्ती— 'अपिवा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन्' । अपिवेति पूर्वपक्षव्यावृत्तौ । आचारप्रामाण्यविरोधकारणस्य दोषस्य अग्रहणे । निमित्तसप्तम्येषा । अग्रहणात् हेतोः शिष्टैः प्रयुक्तानि वसन्तोत्सवाद्याचरणानि प्रमाणतया प्रतीयेरन् । अतः शिष्टाचारस्य प्रामाण्यं इति सिद्धान्तः । कु. १।३।४।७ पृ. ५८-६१.

* **प्रमाणबलाबलात्** प्रमेयबलाबलं बलीयः । सु. २।१।१३।४२ पृ. ६८०. * **प्रमाणबलाबलस्य** पूर्वमुपस्थितत्वेऽपि प्रमेयविरोधसापेक्षत्वात् तदालोचनदशायां प्रमेयबलाबलस्यैव पुरःस्फूर्तिकत्वेन निर्णायकत्वम् । अयं न्यायः उत्पत्तिविनियोगयोः परस्परविरोधे इष्यते । कौ. ३।३।२।९ पृ. ३२०.

* **प्रमाणबलाबलापेक्षया प्रमेयबलाबलस्य ज्यायस्त्वन्यायेन** (१।३।३) (शिष्टाकोपाधिकरणन्यायोऽयम्) अष्टरात्ररूपे अहीने विश्वजिदग्निनानामह्नां भूयस्त्वात् अहतस्यैव प्राबल्यावगतेः तेनैव विश्वजिति एकस्मिन् प्रसङ्गसिद्धिः । इति प्राप्ते । भाट्ट. १२।३।१.

* **प्रमाणभेदो** हि विषयभेदात् न प्रमातृभेदात् । बृहती. पृ. १८५.

* **प्रमाणलक्षणम्** । अनुभूतिः प्रमाणम् । का चानुभूतिः ? स्वतन्त्रपरिच्छित्तिः । किमिदं स्वातन्त्र्यं नाम ? परिच्छेदे पूर्वबुद्ध्यनपेक्षत्वम्, स्मृतिस्तु परिच्छेदे पूर्वबुद्ध्यपेक्षैवेति न प्रमाणम् । अनुमानं तर्हि न प्रमाणम्, तस्य पूर्वबुद्ध्यपेक्षत्वात्, इति चेन्न, तस्य न परिच्छेदे पूर्वबुद्ध्यपेक्षत्वम्, किन्तु उत्पत्तावेव । कथमिदमवगम्यते स्मृतेः परिच्छेदे पूर्वबुद्ध्यपेक्षत्वं अनुमानस्य तु उत्पत्तौ इति । ज्ञानस्वभावादेव सुखमवगन्तुं शक्यते । [तदाह] स्मृतिर्हि 'तत्' इत्युपजायमाना प्राचीं प्रतीतिमनुरुध्यमाना न स्वातन्त्र्येणार्थं परिच्छिनत्तीति न प्रमाणं स्मृतिरिति, अनुमाने तु 'तत्' इति वेषाभावा-

दुत्पत्तौ पूर्वबुद्ध्यपेक्षेति निश्चीयते । स्मृतिप्रमोषस्तर्हि प्रमाणम्, 'तत्' इति वेषाभावात् । मैवम् । नावश्यं वेषत एव स्मृतित्वनिर्णयः अपितु कारणतोऽपि, स्मृतिप्रमोषेऽपि तु अग्रहणकारणसंभवात् स्मृतित्वमित्यख्यातिसमर्थने व्यक्तमुक्तम् । स्मृतेः पूर्वबुद्ध्यपेक्षा चेत्थं पूर्वबुद्धिविशिष्टार्थपरिच्छेदाद्वा, पूर्वबुद्ध्युपलक्षितार्थपरिच्छेदाद्वा । ननु स्मृतेरपि स्वस्मिन् मातरि च प्रमाणत्वमिष्टम् । सत्यम्, स्मृतेः स्वापेक्षयाऽऽत्मापेक्षया च स्वातन्त्र्यमस्त्येव, अर्थापेक्षया च स्मृतित्वमस्वातन्त्र्यं च । अतो नातिव्याप्तमव्याप्तं वा लक्षणम् । अतः सिद्धं निरपेक्षत्वं प्रमाणस्य । प्रवि. पृ. २४-२५.

* '**प्रमाणवन्त्यदृष्टानि** कल्प्यन्ते सुबहून्यपि' (वा. पृ. ३९९) इति न्यायात् अनेकादृष्टकल्पनाऽपि न दोषाय । **तौता.** २।१।१।१ पृ. २२२.

* **प्रमाणविचारः** । 'स्वरूपसंख्यार्थफलेषु वादिभिर्यतो विवादा बहुधा वितेनिरे । अतो वयं तत्प्रतिबोधसिद्धये प्रमाणपारायणमारभामहे ॥ १ ॥ **अनुभूतिः** प्रमाणं सा स्मृतेरन्या, **स्मृतिः** पुनः । पूर्वविज्ञानसंस्कारमात्रजं ज्ञानमुच्यते ॥ २ ॥ न प्रमाणं स्मृतिः पूर्वप्रतिपत्तेरपेक्षणात् । अन्योन्यनिरपेक्षास्तु **धारावाहिकबुद्धयः** ॥ ३ ॥ तत्र पञ्चविधं मानं प्रत्यक्षमनुमा तथा । शास्त्रं तथोपमानार्थापत्ती इति गुरोर्मतम् ॥ ४ ॥ साक्षात्प्रतीतिः **प्रत्यक्षं** मेयमातृप्रमासु सा । मेयेष्विन्द्रिययोगोत्था द्रव्यजातिगुणेषु सा ॥ ५ ॥ सविकल्पाऽविकल्पा च प्रत्यक्षा बुद्धिरिष्यते । आद्या विशिष्टविषया स्वरूपविषयेतरा ॥ ६ ॥ सर्वविज्ञानहेतूत्था मितौ मातरि च प्रमा । साक्षात्कर्तृत्वसामान्यात् प्रत्यक्षत्वेन संमता ॥ ७ ॥ मानत्वं संविदां बाह्यं हानादानादिकं फलम् । ज्ञानस्य तु फलं सैव व्यवहारोपयोगिनी ॥ ८ ॥ आपेक्षिकं च करणं मन इन्द्रियमेव वा । तदर्थसंनिकर्षो वा मनश्चेत् पूर्वकं फलम् ॥ ९ ॥ ज्ञातसंबन्धनियमस्यैकदेशस्य दर्शनात् ! एकदेशान्तरे **बुद्धिरनुमान**मबाधिते ॥ १० ॥ यः कश्चिद्येन यस्येह संबन्धो निरुपाधिकः । प्रत्यक्षादिप्रमासिद्धः स तस्य गमको मतः ॥ ११ ॥ प्रमेयमनुमानस्य दृष्टादृष्टस्वलक्षणम् । प्रत्यक्षवच्च कर्तव्या प्रमाणफलवर्णना ॥ १२ ॥ **शास्त्रं** शब्दविदा यदसंनिकृष्टार्थविज्ञानम् । सादृश्यदर्शनोत्थं ज्ञानं सादृश्यविषयमनुमानम् ॥ १३ ॥ सादृश्याद् दृश्यमानाद्यत् प्रतियोगिनि जायते । सादृश्यविषयं ज्ञान**मुपमानं** तदुच्यते ॥ १४ ॥ विना कल्पनयार्थेन दृष्टेनानुपपन्नताम् । नयता दृष्टमर्थं या **साऽर्थापत्तिस्तु** कल्पना ॥ १५ ॥ अभावेन गृहे भावो बहिष्कल्पनया विना । नयतानुपपन्नत्वं कल्प्यमाना बहिर्यथा ॥ १६ ॥ गम्यस्यानुपपन्नत्वमिह कल्पनया विना । मानान्तरविरोधेन संदेहापत्तिलक्षणम् ॥ १७ ॥ देशेन हि विनाभावो न कदाचन दृश्यते । विनाभावेन सिद्धोऽपि तेन संदेहमार्च्छति ॥ १८ ॥ तत्संदेहव्युदासाय कल्पना या प्रवर्तते । संदेहापादकादर्थादर्थापत्तिरसौ स्मृता ॥ १९ ॥ गमकस्यानुमाने तु विपक्षाऽसत्त्वलक्षणम् । गम्यतेऽनुपपन्नत्वं विना गम्येन वस्तुना ॥ २० ॥ तत्सामग्रीविभेदेन भिन्ने एते परस्परम् । अर्थापत्त्यनुमानाख्ये प्रमाणे इति निश्चितम् ॥ २१ ॥ **अभावाख्यं प्रमाणं** ये षष्ठमाहुर्मनीषिणः । तेषां प्राभाकरैरेवं प्रत्यादेशोऽयमुच्यते ॥ २२ ॥ प्रमाणं खलु कस्यापि प्रमेयस्यावबोधकम् । तस्याभावस्य किं तावत् प्रमेयमिति चिन्त्यताम् ॥ २३ ॥ ननु नास्तीति बुद्धौ तु बोध्यं यदुपकल्पितम् । अभावस्य प्रमाणस्य तत्प्रमेयं भविष्यति ॥ २४ ॥ भूतलेऽत्र घटो नास्तीत्येषा या जायते मतिः । सा न भूतलमात्रे स्यात् प्रसक्तेर्घटवत्यपि ॥ २५ ॥ केवले भूतले चेत्स्यात्कैवल्यं तत्र कीदृशम् । स्वरूपमात्रं नो तावद्धर्मान्तरमथोच्यते ॥ २६ ॥ प्रमेयान्तरमेवात्र तावताऽऽङ्गीकृतं भवेत् । तच्च नेन्द्रियविज्ञानं तद्व्यापारानपेक्षणात् ॥ २७ ॥ स्वरूपमात्रदृष्टे हि भावे दूरगतोऽपि सन् । कथञ्चिज्जातजिज्ञासो नास्तित्वं प्रतिपद्यते ॥ २८ ॥ तेन यत्रापि नास्तित्वं बुध्यते व्यापृतेन्द्रियः । भावांशमात्रं तत्रापि प्रत्यक्षस्य प्रमाणता ॥ २९ ॥ नास्तित्वं च प्रमाणानामनुत्पत्त्यैव गम्यते । नास्तित्वं प्रतिपत्तिर्हि तां विना नास्ति कुत्रचित् ॥ ३० ॥ योग्यप्रमाणानुत्पत्तेः कारणत्वपरिग्रहात् । अतिप्रसङ्गदोषोऽपि नावकाशमुपाश्नुते ॥ ३१ ॥ अनुत्पत्तिश्च न ज्ञाता सती कारणमक्षवत् । तेन लिङ्गत्वशङ्काऽपि दूरादेव निराकृता ॥ ३२ ॥ अनुत्पत्तिश्च

विज्ञानहेतुश्चेल्लिङ्गचद्भवेत् । अनवस्था प्रसज्येत नास्तित्वं नापि सिध्यति ॥ ३३ ॥ किंच पादविहारादिव्यवहारश्च भूतले । न भूतलपरिच्छेदमात्रेणैव प्रवर्तते ॥ ३४ ॥ प्रसङ्गस्तत्र दुर्वारः कण्टकाद्यन्वितेऽपि हि । अथ केवलभूभागपरिच्छेदात् प्रवर्तते ॥ ३५ ॥ विकल्प्यं तत्र कैवल्यं ग्राह्यस्य ग्रहणस्य वा । ग्राह्यस्य चेत्पुरैवोक्तो दोषस्तर्हि प्रसज्यते ॥ ३६ ॥ ग्रहस्य चेत्तदा सूक्ष्मजिज्ञासा निष्फला भवेत् । जाता हि केवला संविद्वस्तुनो भूतलादिनः ॥ ३७ ॥ एका संसृष्टविषया तन्मात्रविषया परा । तन्मात्रविषया या च द्विधा साऽपि प्रभज्यते ॥ ३८ ॥ प्रतियोगिन्यदृश्ये च दृश्ये च प्रतियोगिनि । तत्र तन्मात्रधीर्येयं दृश्ये च प्रतियोगिनि ॥ ३९ ॥ नास्तित्वं सैव भूभागे घटादिप्रतियोगिनः । ननु संसृष्टबुद्धया यः पुरस्तादवधारितः ॥ ४० ॥ कथं तन्मात्रधीस्तत्र जाता भावेन तस्य चेत् । शक्यते तदभावेऽपि वक्तुं यो यत्र सन्नभूत् ॥ ४१ ॥ तस्याभावः कथं तत्र ब्रूयाच्चेत्तत्र कारणम् । तन्मात्रधिय एवास्तु वरं तत्कारणं ततः ॥ ४२ ॥ तस्याः संप्रतिपन्नत्वाद्वादिनोरुभयोरपि । चक्षुर्यदपरामृष्टं न कारणमदर्शनम् ॥ ४३ ॥ स्वापावस्थागतस्यापि कारणत्वप्रसङ्गतः । विशेषापादिका तस्य न निषेधस्य दृश्यता ॥ ४४ ॥ भावरूपविशेषो हि नाभावस्योपपद्यते । अदर्शने निवृत्तेऽपि पुनर्भावस्य कस्यचित् ॥ ४५ ॥ प्राङ्नास्तित्वं व्यपदिशन्त्यदृष्टस्य पुरा क्वचित् । दृश्यस्यादर्शनं तेन ज्ञानं सदवबोधकम् ॥ ४६ ॥ दृश्यादर्शनतस्तस्य ज्ञानं चेदव्यवस्थितम् । यदि तन्मात्रसंवित्तिरूपं तु स्याददर्शनम् ॥ ४७ ॥ तदा तस्याः स्वसंवित्तेरनवस्था निवर्तते । तेनावश्याभ्युपेतव्यो विमर्शो दृश्यगोचरः ॥ ४८ ॥ अदर्शनमभावो हि तन्मात्रानुभवात्मकम् । तन्मात्रानुभवश्चायं यददर्शनरूपतः ॥ ४९ ॥ विमृश्यते भूतलादौ तदभावः प्रपद्यते । तन्मात्रानुभवश्चायं न मेयः फलभावतः ॥ ५० ॥ किंच स्वयंप्रकाशोऽसाविति न्यायविदो विदुः । नास्तीति शब्दस्तत्रैव स्वयंवेद्ये प्रवर्तते ॥ ५१ ॥ तेन नास्तीति विज्ञानन्यायेन न समागतम् । मेयाभावे ततो मानमभावाख्यं कथं भवेत् ॥ ५२ ॥ घटसत्ता न लभ्या हि नासत्ता चोदितक्रमात् । अभावव्यवहारोऽपि निःशङ्कगमनादिकः ॥ ५३ ॥ तन्मात्रानुभवेनैव यथोक्तेन प्रवर्तते । यदा यत्र च दृश्यत्वे सत्यप्यनुपलम्भनम् ॥ ५४ ॥ तदभावव्यवहृतिस्तदानीं संप्रवर्तते । सूक्ष्मसंभवजिज्ञासाऽऽप्यतः सार्थकतां गता ॥ ५५ ॥ तां विना नहि दृश्यत्वं सूक्ष्मसत्ताऽधिरोहति । व्यवहारप्रवृत्तिश्च दृश्या दृष्टिनिबन्धना ॥ ५६ ॥ तेन दृश्यत्वसिद्ध्यर्थं सार्थकं सूक्ष्मवीक्षणम् । नन्वेवं लक्षणग्रन्थस्यार्थस्तर्ह्यस्य कीदृशः ॥ ५७ ॥ मीमांसार्णवसंभूतं पीयतां समयामृतम् । प्रत्यक्षाद्यपरिच्छेद्यमभावाख्यं चतुर्विधा ॥ ५८ ॥ प्रमेयं साधयन् मानमभावाख्यं वदन्ति ये । तन्निराकरणार्थोऽयं यत्नो भाष्यकृता कृतः ॥ ५९ ॥ अभावोऽसंनिकृष्टस्य नास्तीत्यस्यावबोधकः । प्रमाणान्न भवतीति प्रमाणाभावतोच्यते ॥ ६० ॥ किं निराकरणस्येह फलमित्यथ चेन्मतम् । उच्यते, लक्षणग्रन्थः प्रत्यक्षादेः समर्थ्यते ॥ ६१ ॥ प्रमाणं कार्यगम्यं हि सर्वत्रेति विनिश्चितम् । निश्चयश्च प्रमाणस्य कार्यमित्यपि संमतम् ॥ ६२ ॥ निश्चयश्चेदमेवेति संवित्तिः सर्ववस्तुषु । स च वस्त्वन्तराभावसंवित्त्वानुगमे सति ॥ ६३ ॥ प्रमाणानुदयात्तत्र यद्यभावोऽवसीयते । तदा तेन सहैव स्यात् प्रत्यक्षादेः प्रमाणता ॥ ६४ ॥ लक्षणं क्रियमाणं हि तथाभूतस्य युज्यते । न कृतं च तथा तेन न कृतं साधु लक्षणम् ॥ ६५ ॥ इमां शङ्कां निराकर्तुं निराकरणमुच्यते । कथं पुनरियं शङ्का भवत्यत्र निराकृता ॥ ६६ ॥ अभावाख्यो नाम योऽस्ति यदयं प्रार्थ्यते पुनः । प्रमाणानामनुत्पादः साधु तल्लक्षणं कृतम् ॥ ६७ ॥ इति पूर्वप्रमाणानां लक्षणानि समादधत् । भाष्यकार इमं ग्रन्थं चक्रे नाभावलक्षणम् ॥ ६८ ॥ नन्वेवमपि पञ्चाह शब्दं हित्वा कथं पुनः । भाष्यकारः प्रमाणानि चित्राक्षेपं न संदधत् ॥ ६९ ॥ उच्यते, व्यवहारस्य हेतुभूतप्रसिद्धये । एवमाहोभयात्माऽपि व्यवहारः प्रतिष्ठितः ॥७०॥ तत्र भावव्यवहृतिः पञ्चस्वेवोपलभ्यते । अभावव्यवहारस्तु दृश्यादृष्टिविमर्शतः ॥ ७१ ॥ सा हि भूभागसद्भागमात्रावच्छेदबन्धना । यदा भावव्यवहृतिरिति प्रागेव दर्शितम् ॥ ७२ ॥ मीमांसाजलराशेरशेषनयरत्ननिकषनिजधाम्नः । इति शालिकनाथ इमाममृतस्य कलामुदाहरद्धीरः ॥ ७३ ॥ प्र. पञ्चिका. (अमृतकला) पृ. १२७–१३२.

* **प्रमाणव्यवहारेषु** सर्वेषु न प्रमाणमनुग्रहीतुं पुरुषाः प्रमेयेषु प्रवर्तन्ते । किं तर्हि ? आत्मानं अनुग्रहीतुम् । **वा.** ३।२।८।२१ पृ. ७७८.

* **प्रमाणशब्दस्य** ' वेदाः प्रमाणं ' इत्यादिप्रयोगेण लोके नियतलिङ्गत्वावधारणम् । **सु.** पृ. १५३.

* **प्रमाणसंख्या-स्वरूप-विषयादिषु** वादिनां विवादः । के चिदेकम् , द्वे, त्रीणि, चत्वारि, पञ्च, षट् च इति संख्याविवादः । स्वरूपविवादस्तु ' कल्पानापोढमभ्रान्तं प्रत्यक्षम् ' इत्यादि । विषयविवादः सामान्यमेव अनुमानस्य विषयः इत्येवंविधः । स्वयं चोक्तं ' ननु व्यभिचरति प्रत्यक्षं ' इति । तेन प्रमाणान्यपि व्यभिचरन्ति इति विप्रतिपत्तिरस्ति । **ऋजु.** पृ. ३७.

* **प्रमादः** अनवधानम् । **रहस्य.** पृ. ११६ . * प्रमादः अन्यासक्तिः । **सु.** पृ. १३५.

* **प्रमापकं** न प्रत्यक्षं धर्मस्य । १।१।४।४.

* **प्रमुष्टतत्ताकस्मरणं** स्वप्नज्ञानेषु अङ्गीक्रियते । **मणि.** पृ. २६.

* **प्रमेयः** धर्मः, असंदिग्धाविपर्यस्तत्वे सति बुध्यमानत्वात् । **वि.** १।१।४.

* **प्रमेयापहारलक्षणो** बाधः एकः प्रासबाधः । **बाल.** पृ. १३१.

* **प्रमेयचिन्तार्था** उत्तरा (२–१२) एकादशलक्षणी (प्रथमाध्यायस्तु प्रमाणचिन्तार्थः) । **सु.** पृ. ५३३.

* **प्रमेयबलाबलं** प्रमाणबलाबलात् बलीयः । **सु.** पृ. ६८०.

* **प्रमेयबलाबलन्यायः** । प्रमेयः पदार्थो बलवान् , गुणः अबलः । १।३।३. ' शिष्टाकोपाधिकरणम् ' इत्यत्र द्रष्टव्यम् । * दुर्बलस्यापि प्रमाणस्य विशेषविषयत्वे तेन प्रबलस्यापि सामान्यविषयस्य संकोच इष्टः । ' यस्मिन् देशे मृगः कृष्णः ' इति स्मृत्या श्रुतिसंकोचस्य **प्रमेयबलाबलन्यायेन** साधितत्वात् । **कौ.** १।३।३।७. * पदार्थानां प्रधानत्वात् अङ्गभूतदक्षिणानुरोधेन बाधस्य प्रमेयबलाबलन्यायेन अनुपपत्तेर्वा किञ्चित् ऋतवे शिष्ट्वा सर्वमन्यत् प्रदीयताम् । इति प्राप्ते । **भाट्ट.** ६।७।७.

* **प्रमेयसिद्धिः** प्रमाणाधीना । **सु.** पृ. १७९.

* **प्रयत्नः** इच्छाकारणकः । **सु.** पृ. ३१. * प्रयत्नश्च प्रत्ययवत् न विषयमन्तरेण शक्यो निरूपयितुम् । **कणिका.** पृ. ३२५ . * पुरुषप्रयत्नश्च विध्युपेता भावना उच्यते । **वा.** २।२।११।२६ पृ. ५४७.

* **प्रयाजः** अन्त्यः दृष्टादृष्टार्थः । मन्त्रपाठेन देवतास्मरणं दृष्टम्, त्यागद्वारा अवान्तरापूर्वजनकत्वाच्च अपूर्वं अदृष्टम् । **वि.** ४।१।७ . * प्रयाजः उत्तमः । अत्र ' स्वाहाग्निं स्वाहा सोमम् ' इत्यादियाज्यामन्त्रलिङ्गक्रमेण प्रत्यभिज्ञायमाना आज्यभागादिषु यक्ष्यमाणा एव देवताः संस्कार्याः (इदं १०।१।७ इत्यत्र प्रतिपादितम्) । इदं च कर्म दृष्टादृष्टोभयार्थं द्रव्यसंस्कारकं संनिपत्योपकारकं क्रत्वर्थम् । **बाल.** पृ. ८३. * प्रयाजः उत्तमो दर्शपूर्णमासयोः । तेन देवतायामदृष्टं क्रियते । ४।१।७।१८–२०. * प्रयाजः उत्तमः दर्शपूर्णमासयोः संस्कारकर्म, नाराढुपकारकम् । आज्यभागादिषु या देवता यष्टव्यास्ता एवात्र देवताः । १०।१।७।१४–१५. * प्रयाजः द्वितीयो नाराशंसः राजन्यानां वसिष्ठ–अत्रि–वाध्र्यश्व–शुनक–कण्व–कश्यप–संकृतीनां च । इतरेषां तु तनूनपात् द्वितीयः प्रयाजः इति गोत्रभेदेन अनुष्ठानप्रकारो भिद्यते । **वि.** ६।६।१. * प्रयाजः पञ्चमः आज्यभागदेवतासंस्कारकः । १०।१।७. **मीको.** पृ. २०५० ' दर्शपूर्णमासयोः प्रयाजः ' इत्यत्र द्रष्टव्यम् । * प्रयाजः पञ्चमश्चयनादौ वाचनिकप्रयाजविनियोगस्थलेऽपि नास्ति । **भाट्ट.** ४।१।७. * **प्रयाजाः** अग्नीषोमीये पशौ एकादशैव, न तु प्रतिप्रयाजं एकादशत्वसंख्या । ५।३।१।१–२. * प्रयाजाः अदृष्टेनोपकुर्वन्तो नोपहोमादिभिः सह विकल्प्यन्ते । न च बाध्यबाधकभावः । **टुप्.** १०।८।८।१६ पृ. २०६९. * प्रयाजाः अदृष्टार्थमेव आराढुपकारकं क्रत्वर्थं प्रवृत्तिरूपं वैदिकं कर्म । **बाल.** पृ. ८२. * प्रयाजाः आज्येन, अनुयाजाश्च पृषदाज्येनाग्नीषोमीयपशौ । तथा च द्रव्यद्वयधारणार्थं पात्रद्वयं कर्तव्यम् , एकस्मिन् पात्रे द्रव्यद्वयस्य धारणासंभवात् । **के.** (५।२।८).

* प्रयाजाः आरादुपकारका दर्शपूर्णमासयोः । ९।२।२०. **मीको.** पृ. २०५२ ' दर्शपूर्णमासयोः प्रयाजा आरादुपकारकाः ' इत्यत्र द्रष्टव्यम् । * प्रयाजा उपसत्सु नैव सन्ति ' अप्रयाजास्ता अननुयाजाः ' इति । **वि.** १०।७।१४. * प्रयाजाः औपभृताज्यसमानयनस्य तत्संस्कृताज्यस्य च प्रयोजकाः उत अनूयाजा एव तयोः प्रयोजकाः, तदर्थं चेदमुभयं न प्रयाजार्थं इति चिन्तायां प्रयाजद्वयं समानयनस्य तत्संस्कृताज्यस्य च प्रयोजकं इति सिद्धान्तः । **भाट्ट.** ४।१।१५. * प्रयाजाश्चातुर्मास्येषु नव अनुयाजाश्च । **भा.** ५।३।१।१–२. * प्रयाजाः दर्शादौ अग्नीषोमीयपशौ च आज्येनेज्यन्ते । **के.** (वि. ५।२।८). * प्रयाजाः दर्शपूर्णमासप्रयोज्याः । यदुद्देशप्रवृत्तकृतिव्याप्यत्वं यस्य, तत् तत्प्रयोज्यम् । **भाट्ट.** ४।१।१. * प्रयाजा न समिदादिदेवतासंस्कारविधिः, किन्तु यागाः केवला विधीयन्ते ' समिधो यजति ' इत्यादिना । **वि.** ९।२।२०, * प्रयाजाः नाम यागाः ' समिधो यजति ', ' तनूनपातं यजति ', ' इडो यजति ', ' बर्हिर्यजति ', ' स्वाहाकारं यजति ' इति दर्शादौ पञ्च आरादुपकारकाः । ९।२।२०. * प्रयाजाः पशोरपि चोदकेन प्राप्ताः पशुपुरोडाशस्यापि । पश्वर्था एव तु कृताः पशुपुरोडाशस्योपकुर्वन्तीति न पुनस्तदर्थं क्रियन्ते । **भा.** ११।१।१।१ पृ. २०९६, * प्रयाजाः पाशुकाः तिष्ठति पशौ वर्तन्ते, ' तिष्ठन्तं पशुं प्रयजन्ति ' इति वचनात् । १२।१।१।२, * प्रयाजाः समिदादयः मैत्रायणीयानां न समाम्नायन्ते । अथ च गुणाः श्रूयन्ते ' ऋतवो वै प्रयाजाः समानीय होतव्याः ' इति । तेन सर्वशाखाप्रत्ययमेकं कर्म । २।४।२।३१, * ' अपबर्हिषः प्रयाजान् यजति ' ज्योतिष्टोमे अवभृथे । १०।७।१५।४७. * **प्रयाजैः** एकादशभिः सोमेऽग्नीषोमीये पशौ विहितैः प्राकृताङ्गान्तराणां न बाधः । १०।३।१।१–१२. * प्रयाजैर्नवभिः चातुर्मास्येषु विहितैः प्राकृताङ्गान्तराणां न बाधः । **भा.** १०।३।१।१–१२, * प्रयाजैः पौरोडाशिकैः आसन्ने हविषि भवितव्यम् । १२।१।१।२. * **प्रयाजस्य** पञ्चमस्य मन्त्रः ' स्वाहाग्निं स्वाहा सोमं स्वाहाग्निं स्वाहा प्रजापतिं स्वाहाग्नीषोमौ ' इत्यादिः दर्शपूर्णमासेष्टौ । **वि.** १०।१।७, * **प्रयाजयोः** चतुर्थपञ्चमयोर्निष्पादकमानयनं औपभृताज्यस्य प्रयोजकं दर्शपूर्णमासयोः । ४।१।१५, * **प्रयाजानां** अग्नीषोमीयपशौ एकादशत्वार्थं स्वस्थानविवृद्धौ स्वीकृतायां प्रथमस्य द्विरावृत्तिः, एवं द्वितीयस्य तृतीयस्य चतुर्थस्य चावृत्तिः इत्यष्टौ, पञ्चमस्य त्रिरावृत्तिः इत्येकादश । (इदं सर्वमशुद्धम् । वस्तुतस्तु पञ्चप्रयाजमन्त्रा भिन्नाः पशुगतैकादशप्रयाजमन्त्राश्च भिन्नाः । एकादशसंख्यया च पञ्चत्वसंख्याया बाध एवेति **साठे इत्युपाहुः काशीनाथशास्त्री च केवलानन्दश्च** । प्रयाजैकादशत्वादिसंख्या स्वसंपत्त्यर्थं व्यक्त्यन्तराणि आक्षिपन्ती चतुर्थोत्तमप्रयाजजातीयान्येव आक्षिपति, तदङ्गभूतयोः प्राकृततदङ्गदेवताप्रकाशकयोरपूर्वयोः प्रैषयोः मध्ये षण्णामन्येषामप्राकृतदेवत्यमन्त्राणां पशौ आम्नानात् । तद्यदि आद्यानां त्रयाणामभ्यासः स्यात् ततो मन्त्राणां अपकर्षापत्तिः, समिद्यागत्वस्यानुपस्थितिः च । अतः संनिधानाविशेषात् चतुर्थोत्तमप्रयाजयोरेव चतुश्चतुर्वारमावृत्तिः इति । **भाट्ट.** ५।३।२. अयमेव च आशयः सोमनाथीतन्त्ररत्नादिष्वपि ।) । ५।३।१. * प्रयाजानामपकर्षे प्रयाजान्तकाण्डस्यैवापकर्षः । ५।१।१२।२३–२४. * **प्रयाजाना**मारादुपकारकता, समिदादिपदानां नामधेयत्वात् । **भा.** ९।२।२०।५८–५९. * प्रयाजानां क्रमः ' समिधो यजति ' इत्यादिविधिवाक्यपाठक्रमेण नियम्यते । **वि.** ५।१।४. * प्रयाजानां पशौ एकादशसंख्या चातुर्मास्येषु च नवसंख्या सर्वसंपाद्या न तु प्रत्येकम् । एवमनुयाजानाम् । चयने उपसदां च षट्संख्या । **भा.** ५।३।१।१–२ . * ' **प्रयाजेऽपीति चेत्** ' (९।२।२०।५८) इत्यत्राधिकरणे श्रुत्या विनियुक्तानां मन्त्राणां स्वार्थसमवायकल्पकत्वासंभवात् मान्त्रवर्णिक-देवताप्राप्त्यभावेन तत्प्रख्यन्यायाभावात् नामधेयत्वानुपपत्तेः ' विष्णुं यजति ' इतिवत् समिदादिशब्दानां द्वितीयान्तानां देवानां विधित्वं पूर्वपक्षयित्वा (नाचोदितत्वात् । ५९ इति–) यजेः पूजावाचित्वाभावेन देवतायाः पूज्यमानकर्मत्वायोगात् तद्दुद्देशांशस्य वा समासित्वेन अशब्दार्थत्वात् तत्कर्मणः अभिभूतत्वेन विवक्षाऽनुपपत्तेः, उद्देश्यत्वेऽपि च अनीप्सितत्वात् प्राधान्यलक्षणकर्मत्वानुपपत्तेः श्रुत्यविनियुक्तानामपि मन्त्राणां उपांशुयाजवत् यागाकाङ्क्षितदेवताकल्पकत्वोपपत्तेः देवताविधित्वस्य निराकरिष्यमाणत्वात् । **सु.** पृ. ७१९.

☒ प्रयाजेऽपीति चेत् । ९।२।२०।५८ ॥

दर्शपूर्णमासयोः प्रयाजा आम्नाताः ' समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिर्यजति, स्वाहाकारं यजति ' इति । अत्र किं देवता विधीयन्ते, उत यागा आरादुपकारका विधीयन्ते इति विचारे पूर्वपक्षमाह । प्रयाजे इति एकवचनं सामान्याभिप्रायम् । प्रयाजेष्वपि समिदादिशब्दैः देवता विधीयन्ते (उत्तरसूत्रे ' अचोदितत्वात् ' इत्यत्र वर्तमानस्य चुदधातोर्णिजन्तत्वमभिप्रेत्य चोद्यन्ते इति विपरिणम्य पूर्वपक्षप्रतिज्ञा समर्थनीया ।) । इति चेत् ।

नाचोदितत्वात् । ५९ ॥

पूर्वपक्षं निषेधति सिद्धान्ती । नात्र देवतात्वेन समिदादयश्चोद्यन्ते, चतुर्थ्या तद्धितेन वा अचोदितत्वात् । मान्त्रवर्णिक्यस्तु देवताः प्रयाजेषु । तस्मादारादुपकारकत्वेन समिदादिनामकयागविधय एवैते । समिदादिभिर्यागैर्भावयेत् इति वाक्यार्थोऽत्र । **के.**

* ' **प्रयाजे च तन्न्यायत्वात्** ' इत्यधिकरणे, किञ्चित् देवतोद्देशांशेन दृष्टार्थं द्रव्यप्रक्षेपांशेन अदृष्टार्थं यथा उत्तमः प्रयाजः । तत्र हि ' स्वाहाऽग्निं स्वाहा सोमम् ' इत्यादि याज्यामन्त्रलिङ्गात् क्रमेण प्रत्यभिज्ञायमाना आज्यभागादिदेवताः संस्कार्याः इति प्रतिपादितम् । **बाल.** पृ. ८३.

☒ प्रयाजे च तन्न्यायत्वात् । १०।१।७।१४॥

दर्शपूर्णमासयोः उत्तमे प्रयाजे संस्कारकर्मत्वं प्रत्येतव्यम् । चशब्देन पूर्वोक्तं संस्कारकर्मत्वमन्वादिश्यते । तन्न्यायत्वात् तस्याः स्थाण्वाहुतेः न्याय एव न्यायः यस्मिन् स उत्तमः प्रयाजः तन्न्यायः । तन्न्यायत्वात् प्रकृतयागीयदेवतानां संस्कारकर्म उत्तमः प्रयाजः । न्यायश्च ' शेषभूताः आज्यभागादिषु अग्न्यादयः । तदर्थो यागः सन् प्रयोजनवान् भवति, शेषभूतत्वात् तत्संस्कारः ' इति । ' दृष्टे संभवति अदृष्टकल्पना न युज्यते इति न्यायसाम्यम् ' इति कुतूहलम् । इदं सिद्धान्तसूत्रम् ।

लिङ्गदर्शनाच्च । १५ ॥

लिङ्गस्य दर्शनात् दर्शपूर्णमासयोः उत्तमः प्रयाजः प्रकृतयागीयदेवतानां संस्कारकर्म । किं लिङ्गम् ? संप्रतिपन्नदेवताकः चातुर्मास्येषु उत्तमप्रयाजस्य निगदो दृश्यते ' स्वाहाऽग्निं स्वाहा सोमं स्वाहा सवितारं स्वाहा सरस्वतीं स्वाहा पूषणम् ' इत्येवंलक्षणकः । स देवतासंस्कारपक्षेऽवकल्पते । तस्मात् उत्तमः प्रयाजः संस्कारकर्म इति सिद्धान्तः । **के.**

* ' प्रयाजेप्रयाजे कृष्णलं जुहोति ' सौर्ये चरौ । **वि.** ७।४।२. * **प्रयाजेषु** देवताविधिर्मान्त्रवर्णिकः, समिदादिशब्दास्तु कर्मनामधेयम् । **भा.** ९।२।२०।५९–६०. * प्रयाजेषु न सर्वहोमः, प्रयाजशेषकरणकाभिघारणविधिनैव धारणाक्षेपात् । **भाट्ट.** ४।१।१४ पृ. १०३.

☒ प्रयाजेषु पाशुकेषु आद्याश्चत्वारः प्राकृतानां चतुर्णां क्रमेण विकाराः । अन्त्यस्यान्त्यः पञ्चमादिषु षट्सु त्रयस्त्रयः चतुर्थपञ्चमयोर्विकाराः ॥

एकादशप्रयाजानामपि निरेकीकरणेन समपञ्चधा विभागेन अन्त्यस्यान्त्यास्त्रयो विकाराः, अन्येषां द्वौद्वौ । इति प्राप्ते, प्रथमादीनां चतुर्णां देवतासामान्यात् क्रमेण चत्वारो विकाराः । एवमन्त्यस्यान्त्यः । अन्त्योपान्त्यमध्ये ये तावदप्राकृताः षट् प्रयाजाः पठितास्तेषां देवतासामान्याभावात् ' समं स्यात् ' इति न्यायेन चतुर्थपञ्चमयोस्त्रयस्त्रयो विकाराः क्रमेण भवन्ति । **संकर्ष.** २।३।६.

* प्रयाजेषु बर्हिषश्चतुर्थतामाह । ' चतुर्थोत्तमयोः प्रतिसमानयति ' इत्युक्ते सति ' अतिहायेडो बर्हिः प्रति समानयति ' इति । **भा.** ५।१।४।७, * प्रयाजेषु मान्त्रवर्णिको देवताविधिः । ९।२।२०।६०.

* **प्रयाजाधिकरणम्** । ९।२।२०।५८–५९. **मीको.** पृ. २०५२ ' दर्शपूर्णमासयोः प्रयाजा आरादुपकारकाः ' इत्यत्र द्रष्टव्यम् ।

* **प्रयाजानुमन्त्रणक्रमाधिकरणम्** । पञ्चमे ' अनियमोऽन्यत्र ' इत्यधिकरणे (५।१।३) शाखाभेदेन आम्नातानां प्रयाजाद्यनुमन्त्रणानां ' एको ममैका च

तस्य ' इत्यादीनां ' वसन्तमृतूनां प्रीणामि ' इत्यादीनां च समुच्चयं सिद्धं कृत्वा किं कश्चिन्नियतः क्रमोऽस्ति उतानियत इति चिन्तितम् । तत्र शङ्क्यते । ननु यदि अनुमन्त्रणानामदृष्टार्थत्वम् , ततो मन्त्राधिकरणविरोधः । तथा ' क्रमश्च देशसामान्यात् ' (३।३।५।१२) इत्यत्र 'न चाविज्ञातलिङ्गानां प्रक्रिया विनियोजिका । असीत्यस्य च सामर्थ्यं संनिधानुपसंहृतम् ॥ ' इत्यनुमन्त्रणदृष्टार्थत्वोक्त्या विरोधः । तथा ' मन्त्रमुच्चारयन्नेव मन्त्रार्थत्वेन संस्मरेत् । शेषिणं तन्मना भूत्वा स्यादेतदनुमन्त्रणम् ॥ ' इत्येवंलक्षणानुमन्त्रणत्वव्याघातः । अथ दृष्टार्थत्वम् , ततः समुच्चयाभावे क्रमचिन्ता न युक्ता इति । अत्र **केचित्** । मन्त्राणां स्मृतिरूपं दृष्टमेव प्रयोजनं स्तोत्रशस्त्राणामिव । स्मृतिस्तु स्तोत्रशस्त्रवत् अदृष्टार्था । प्रयाजानुमन्त्रणेषु च यद्यपि श्रुतिवृत्त्या कर्मस्मृतिर्न भवति, तथापि अनुमन्त्रणसमाख्यया तात्पर्यग्रहात् सा अवश्याभ्युपेया । या तु ' क्रमश्च ' (३।३।५।१२) इत्यत्र स्मृतेरपि दृष्टार्थत्वोक्तिः ' प्रकृतयागप्रत्यवेक्षणेन दृष्टार्थत्वात् ' इति ग्रन्थे (वा. पृ. ८१९–८२०), सा अभ्युपेत्यवादमात्रमिति । तदयुक्तम् । तथा सति पूषादिस्मृतेरपि अदृष्टार्थायाः दर्शप्रकरणे ग्रहणसंभवे तदनुमन्त्रणानां उत्कर्षायोगात् । अतो यत्र मन्त्राणां लिङ्गात् कर्मसमवेतार्थप्रकाशकता तत्र स्मृतेरपि दृष्टार्थतैव । तद्विषयत्वादेव च प्रायिकं अनुमन्त्रणलक्षणं लिङ्गमूलत्वात् । अतो न तद्वशात् प्रयाजानुमन्त्रणमन्त्राणां लक्षणया स्मृत्यर्थता इत्यदृष्टार्थत्वमेव । 'प्रकृतयाग' इत्यादि वार्तिकं च स्मृत्यर्थानुमन्त्रणविषयमेव नाभ्युपेत्यवादः । तदग्रिममेव तु ' सत्यपि चादृष्टार्थत्वे ' इति वार्तिकं (वा. पृ. ८२०) नित्यानुवाद इति । यद्वा ' मन्त्रार्थत्वेन ' (अनुमन्त्रणलक्षणस्थं पदं) इति न मन्त्रप्रतिपाद्यतया इत्यर्थः, करणमन्त्रेषु अतिप्रसङ्गात् । किन्तु प्रयोजनवचनोऽयमर्थशब्दः । ततश्च क्वचित् अप्रतिपाद्यः, क्वचित् प्रतिपाद्यः शेषी मन्त्रप्रयोजनत्वेन यत्र स्मर्यते, तदनुमन्त्रणमित्यर्थः । एवं च मन्त्रमुच्चारयन् इति शतृप्रत्ययो वर्तमानार्थः समर्थितो भवति । मन्त्रजन्यानुस्मृतिः मन्त्रपाठोत्तरकाला इति तत्र मन्त्रमुच्चारयन् स्मरेत् इत्यनुपपन्नम् । तेन दृष्टार्थस्यापि आग्नेयाद्यनुमन्त्रणस्य अदृष्टार्थस्यापि च प्रयाजाद्यनुमन्त्रणस्य पाठकाले शेष्यनुसंधानात् उत्तरत्रानुमन्त्रणताऽपि युक्ता । अदृष्टार्थत्वाच्च समुच्चयोऽपि इति । **ऋजवस्तु** ' करणत्वाभावे सति ' इति विवक्षितत्वात् न करणेषु अतिप्रसङ्गः । उच्चारयन् इति च ' वर्तमानसामीप्ये वर्तमानवद्वा ' इति शता, मन्त्रार्थत्वेन इति मन्त्रप्रतिपाद्यत्वेन इत्येवार्थः । ततश्च प्रयाजानुमन्त्रणेष्वपि अनुमन्त्रणसमाख्ययैव लक्षणया दृष्टार्थत्वकल्पनेऽपि अभ्यादानमन्त्रवत् वचनं समुच्चयार्थं भविष्यति । क्त्वाचिन्ता वा इत्याहुः । **बाल.** पृ. ११२–११३.

* **प्रयाजानुमन्त्रणमन्त्राणाम्** ' वसन्तं ऋतूनां प्रीणामि स मा प्रीतः प्रीणातु ' इत्यादीनां नियतपाठक्रमाद्यभावात् नास्ति नियतः क्रमः ! **वि.** ५।१।३.

* **प्रयाजानुयाजाः** अङ्गकर्म न फलप्रयुक्तम्, तत्र फलश्रुतिरर्थवादः । ते च आग्नेयाद्यर्थाः क्रत्वर्थाः । **भा.** ४।३।१।१–४. * प्रयाजानुयाजाः क्रत्वर्थाः । क्रतुसंबन्धश्च प्रकरणेन । **वि.** ४।३।१. * प्रयाजानुयाजास्तावदेते (पाशुकाः पौरोडाशिकाश्च) दार्शपौर्णमासिकाः । तत्र प्रयाजानुयाजशब्दौ प्रज्ञातौ । ते च चोदकेनेह प्राप्ताः संनिहिता विद्यन्ते । प्रकृतगामित्वं च शब्दस्य न्याय्यम् । न चैकः शब्दोऽनेकार्थो युक्तः । तस्माद्दार्शपौर्णमासिकास्ते । तदुपकारोऽप्येषां दार्शपौर्णमासिक एव । स हि तेषां प्रज्ञातः । **भा.** १२।१।१।४ पृ. २२२०.

* **प्रयाजानुयाजार्थता** औपभृताज्यस्य । ४।१।१६।४२–४५.

* **' प्रयाजानूयाजेभ्यस्तत् '** इत्यत्र ग्रहैकत्वाधिकरणव्युत्पादितकौस्तुभोक्तरीत्या न वाक्यभेदः । **भाट्ट.** ४।१।१६. * ' प्रयाजानूयाजेभ्यस्तत् ' इत्यत्र प्रयाजाभ्यां (च) अनूयाजेभ्यः (च) इति विग्रहे न दोषः । (परिनिष्ठितविभक्त्या विग्रहः) । **भाट्ट.** ४।१।१५.

* **प्रयाजानूयाजादीनामे**कादशत्वादिसंख्या सर्वसंपाद्या पश्वादौ । ५।३।१. ' प्रयाजैकादशत्वन्यायः ' इत्यत्र द्रष्टव्यम् ।

* **प्रयाजान्ताङ्गकलापापकर्षः** ज्योतिष्टोमे अग्नीषोमीयपशौ । 'तिष्ठन्तं पशुं प्रयजन्ति' इति प्रयाजानामपकर्षः श्रुतः, स च न केवलं प्रयाजानामेव । **वि.** ५।१।१२.

* **प्रयाजाभावे** तदर्थमाज्यं न गृह्यते 'अप्रयाजास्ताः (उपसदः) अननुयाजास्ताः ' इति यत्र श्रूयते तत्र । **भा.** ९।४।१६।५४.

* **प्रयाजार्थमाज्यसमानयनं** औपभृताज्यस्य प्रयोजकम् । ४।१।१५. **मीको.** पृ. ८७८ ' आज्यसमानयनाधिकरणम् ' इत्यत्र द्रष्टव्यम् ।

* **प्रयाजाज्यपात्रात्** अनुयाजार्थपृषदाज्यपात्रं भिन्नं अग्नीषोमीये पशौ । **भा.** ५।२।८।१६ .

* **प्रयाजादीनि** अदृष्टेनोपकारसंबन्धेनोपकुर्वन्ति । व्रीहिरादीनि यागद्रव्यधारणेन । अपराणि अधिकरणसंस्कारद्वारेण । कर्तारस्तु क्रियानिर्वृत्त्या उपकुर्वन्ति । **भा.** ११।२।१०।४५. * प्रयाजादीन्यपि स्वकीयावान्तरापूर्वद्वारा मुख्यापूर्वसाधनान्येव । **वि.** ३।७।१. * प्रयाजादीनि दर्शपूर्णमासयोः श्रुतानि विध्यन्तेन सौर्यादिष्वपि अतिदिष्टानि । **भा.** ८।१।१३।२२. * **प्रयाजादिः** शेषः, परार्थत्वात्, भृत्यादिवत् । **वि.** ३।१।२. * **प्रयाजादयः** एकप्रयोगवचनगृहीतत्वेऽपि ' गुणानां च परार्थत्वात् ' (३।१।१२।२२) इत्येवं परस्पराङ्गत्वं न प्रतिपद्यन्ते । **वा.** ३।७।१।४. * प्रयाजादयो वैदिकस्यापूर्वस्य गुणाः । **भा.** ७।४।२।४. * **प्रयाजादिभिः** अङ्गैः पश्वर्थैः पशुपुरोडाशस्य प्रसङ्गसिद्धिः । १२।१।१।१–६. * **प्रयाजादीनां** दर्शपूर्णमासाङ्गत्वं प्रकरणात्, न प्रधानत्वम् । **वि.** ३।३।४।११. **मीको.**, पृ. २६६४ 'प्रकरणाधिकरणम् ' इत्यत्र द्रष्टव्यम् । * प्रयाजादीनां विश्वजिदादिवत् न फलकल्पनम् , नापि दर्शपूर्णमासफलानुषङ्गः । **वा.** ३।३।४।११ पृ. ८१८, * **प्रयाजादिषु** उपकार्यमपेक्षमाणेषु दर्शपूर्णमासयोः च उपकारमपेक्षमाणयोः अनिष्पन्नावस्थे एवोपकारे प्रकरणात् तादर्थ्यं प्रतीयते । ३।१।२।२ पृ. ६५८. * प्रयाजादिषु एकादशत्वादिगुणविधिः अग्नीषोमीयपश्वादौ । १०।३।१. **मीको.** पृ. १०७ ' अग्नीषोमीयपश्वादौ प्रयाजादिषु ' इत्यत्र द्रष्टव्यम् ।

* **प्रयाजाद्यङ्गानां** एकस्मिन् प्रयोगे सकृदनुष्ठानम् । ११।१।७।२९–३७. ' फलभूमाधिकरणम् ' इत्यत्र द्रष्टव्यम् । * प्रयाजाद्यङ्गानां देशकालकर्तारस्त एव, ये प्रधानानाम् । ११।२।२.

* **प्रयाजादीतिकर्तव्यता** अग्नीषोमीयपशौ प्राकृतसंख्याभावेऽपि आतिदेशिकी एव । १०।३।१.

* **प्रयाजादिधर्मा** अपूर्वप्रयुक्ताः । ७।१।१. **मीको.** पृ. २३६ ' अतिदेशन्यायः ' इत्यत्र द्रष्टव्यम् । * **प्रयाजादिधर्माणां** उपदेशेन प्रकृतिमात्रार्थता । ७।१।१।१–१२.

प्रयाजैकादशत्वन्यायः । अग्नीषोमीये पशौ प्रयाजानुयाजानामेकादशत्वसंख्या सर्वसंपाद्या ॥

विवृद्धिः कर्मभेदात् पृषदाज्यवत् तस्यतस्योपदिश्येत । ५।३।१।१ ॥

भाष्यम्— अग्नीषोमीये पशौ श्रूयते ' एकादश प्रयाजान् यजति, एकादशानुयाजान् यजति ' इति । चातुर्मास्येषु ' नव प्रयाजान् यजति, नवानुयाजान् यजति ' इति । अग्नौ श्रूयते ' षडुपसदः ' इति । तत्र संदेहः किं प्रतिप्रयाजं एकादशसंख्या प्रत्यनुयाजं च, तथा चातुर्मास्येषु नवसंख्या, तथा अग्नौ चोपसत्सु षट्संख्या, उत सर्वसंपाद्या संख्या इति । किं प्राप्तम् ? प्रतिप्रधानं संख्या भिद्यते इति । भिन्नानि हि तानि कर्माणि । तानि च प्रधानानि प्रति संख्या श्रूयते । प्रधानसंनिधौ च गुणः शिष्यमाणः प्रतिप्रधानं भिद्यते । यथा ' पृषदाज्येनानुयाजान् यजति ' इति प्रत्यनुयाजं पृषत्ता गुणो भिद्यते, एवमिहापीति ।

टुप्— ' एकादश प्रयाजान् यजति ' इति संख्या प्रयाजानामङ्गत्वेन विधीयते । तेषां चोद्दिश्यमानत्वात् साहित्यमविवक्षितम् । अत एकैकं एकादशसंख्यया संबध्यते ।

अपिवा सर्वसंख्या स्यात् तद्विकारः प्रतीयेत । २ ॥

भाष्यम्— सर्वसंपाद्या संख्या कल्प्येत । कुतः ? पृथक्त्वनिवेशिनी हि संख्या असति पृथक्त्वे अभ्यासेन कल्प्येत, यावति असंभवो भेदस्य तावति एव अभ्यस्येत ।

यावति संभवति तावति पृथक्त्वनिवेश एव न्याय्यः। तस्मात् सर्वसंपाद्यैव संख्या । यत्तु पृषदाज्यवदिति। न पृषत्ता एकस्य न संभवति, नासौ पृथक्त्वनिवेशिनी। न चैकस्य क्रियमाणा सर्वेषां तन्त्रेण उपकरोतीति । तस्मादवश्यं मैत्तव्या । तन्त्रेण तूपकरोति संख्या। इतरापेक्षा हि सा भवति । एवं सति सहत्वस्य प्रापकः प्रयोगवचनः अनुग्रहीष्यत इति ।

टुप्-- पृथङ्निवेशिनी संख्या । तत्र द्रव्याणां (एतावत् रत्ने नास्ति, लुप्तं स्यात्) पृथङ्निष्पन्नरूपाणां एक- (आनयनादि-) क्रियया संबध्यमानानां (तेनैवावच्छेदेन) युज्यते संख्या 'दश घटा आनीयन्ताम्' इति । इह तु प्रयाजानाम् (क्रियारूपाणां द्रव्यवत्) पृथङ्निष्पत्तेरभावात् या (इयमेकादशत्व-) संख्या (निष्पत्तिव्यतिरिक्तक्रियाऽवच्छेदनिबन्धना), सा न युज्यते । (कुतस्तदाह-) उत्पत्त्यपेक्षा हि कर्मणां संख्या । उत्पत्तौ (प्रयाजविधौ) च द्विधाऽपि (यदि एकैकस्मिन् अथ समस्तेषु इत्युभयथाऽपि) एकादशसंख्या न घटते । (तथाहि-) यदि (तावत्) एकस्मिन् स्यात्, ततस्तत्र साक्षादयुज्यमानत्वात् तल्लक्षितेन प्रयोगेण युज्येत । एवं चेत् यत्र (प्रयाजस्वरूपे) श्रुता (संख्या) तत्र न कृता, अश्रुते (प्रयोगे) कृता (स्यात्, तत्र विधित्रयप्रसङ्गः । किञ्च-) अश्रुतं च पञ्चपञ्चाशत् संख्याऽन्तरमुपजायेत (एकैकस्य एकादशसंख्यासंबन्धात्। अतो न तावत् प्रत्येकं संबन्धः) । समस्तैरपि (संख्या) न शक्या योजयितुम् । [उत्तरः टुप्ग्रन्थः लिखिते नास्ति अस्मदीये । तन्त्ररत्ने मुद्रिते चास्त्येव]। कथम् ? (अपरस्मिन् पक्षे-) प्रयाजैः (एकादश-) संख्यैकदेशः (पञ्चत्वम्) संबध्येत । अन्यस्य संख्यैकदेशस्य (प्रयाजस्वरूपेण-) असंबध्यमानस्य संपत्तये प्रयाजाः प्रयोगं लक्षयेयुः (लक्षयेरन् इति रत्ने पाठः) । तेन (लक्षितेन प्रयोगेण) असौ (संख्यैकदेशः पञ्चत्वम्) संबध्येत । (तत्र दोषमाह-) तत्र प्रयाजाः संख्या चोभयमपि बाध्येत । संख्या तावत् प्रयाजे श्रूयमाणा (प्रयाजेषु श्रुता सती इति रत्नम्) प्रयोगे कृता (बाधिता स्यात्) । प्रयाजा अपि संख्यैकदेशेन योजिताः, अन्यश्च संख्यैकदेशः प्रयाजलक्षितेन प्रयोगेण युक्तः (बाध्येत । ततः किमत आह-) तत्र प्रयाजोऽन्यार्थः श्रुतः (संख्याऽर्थः श्रुतः), अन्यार्थ उच्चारितः (स्यात् न च तद्युक्तम्) । किञ्च (अयमपरो दोषः-) सकृदुच्चरितः (प्रयाजः) संख्यया संबध्यते, प्रयोगं च लक्षयेत् (न च युगपत् श्रुतिलक्षणावृत्ती संभवतः । तेन) द्वयोरपि (अनयोः पक्षयोः) अश्रुतकल्पना (स्यात्) । तस्मात् (श्रुतिवृत्तयोः संख्याप्रयाजयोरन्वयायोगात्) अन्यः प्रकार आश्रीयते । यदि वा प्रयाजशब्दः प्रयोगं लक्षयेत्, अथवा संख्या लक्षणावृत्ता (पञ्चत्वलक्षणार्था) । तत्र प्राथम्यात् अविरोधाच्च मुख्यवृत्ता संख्या । यदि च (संख्या) लक्षणावृत्ता स्यात्, ततस्तया पञ्चत्वे लक्ष्यमाणे (प्रकृतित एव पञ्चत्वस्य प्राप्तत्वात्) अप्रवृत्तिविशेषकरं वाक्यं स्यात् । तस्मात् (पारिशेष्यात्) प्रयाजाः प्रयोगं लक्षयन्ति । ते च लक्षयन्तः इतरेतरसव्यपेक्षा लक्षयन्ति । (कुतः ?) संख्याया इदमेव स्वाभाव्यम् (स्वभावः स्वार्थिकः ष्यञ्) यदुत भिन्नेष्वितरेतरयुक्तेषु वर्तते । (यत्तु पूर्वपक्षे पृषदाज्यवत् इत्युक्तम्, तत्राह-) योऽन्यो गुणः (पृषदाज्यादिः) स इतरेतरनिरपेक्षैरेव संबध्यते । (किञ्च) एकैकेन च प्रधानेन परस्परनिरपेक्षेण वशीक्रियते । संख्यायां उभयमपि नास्ति । (न हि सा कर्मस्वरूपेण संबद्धुं समर्था, न च अन्यनिरपेक्षा एकत्र वर्तते) । अतोऽयं गुणोऽपि सन् इतरगुणविसदृशः (सर्वसंपाद्यः । तदिदमुक्तं सूत्रकारेण 'सर्वसंख्यत्वात्' इति सर्वलक्षितप्रयोगसंपाद्यत्वात् इत्यर्थः । यद्वा सर्वेषां समुदितानामेकसंख्याऽन्वयसंभवादित्यर्थः । व्याख्यानान्तरमाह-) प्राकृतसंख्योपमर्देन च अस्याः (संख्यायाः) निवेशः । प्रकृतौ च पञ्चत्वं समुदितानाम्, न त्वेकैकस्य । इहापि समुदितानामेव एकादशसंख्या । ननु पृथक् विहितानां अर्थलभ्यत्वात् प्रयाजाः अनूद्यन्ते । उच्यते । अर्थात् शब्दात् वा प्रकृतौ इयत्ता पञ्चसंख्यापरिच्छिन्ना । इहापि प्रयाजसंबन्धित्वेन (प्रकृतिलिङ्गेन) एकादशसंख्या (समुदितानामेव) परिच्छेदिका भवितुमर्हति इति । (सर्वसंख्यत्वात् इति प्रकृतौ समुदितानां संख्या-

संबन्धात् इहापि एकादशसंख्या तद्विकार एव युक्ता इति सूत्रार्थः) ।

(अधिकरणस्य लक्षणसंगतिं दर्शयति-) सर्वसंपान्ने अन्यादृशः क्रमः, अन्यादृश इतरत्र (प्रत्येकसंबन्धपक्षे) । (किञ्च) उत्तरस्य (अधिकरणस्य) च उपोद्घाताधिकरणमिदम् । स्थिते ह्येतस्मिन् (समुदायसंबन्धे) दण्डकलितवत् आवृत्तिः स्वस्थानविवृद्धिर्वेति चिन्ता अवतरति (प्रत्येकसंबन्धे तु स्वस्थानविवृद्धिरेवेति निश्चयात् न चिन्ता स्यात्) ।

शा-- '**तत्रोद्दिश्यप्रयाजादि संख्या तस्योपदिश्यते । उद्देश्यानां च साहित्यं शक्यते न विवक्षितुम् ॥**' तस्मात् प्रतिप्रयाजं प्रत्युपसदं च संख्या स्यादिति प्राप्ते, अभिधीयते । '**प्रयाजादिस्वरूपे हि नेयं संख्या विधीयते । अशक्यत्वात् प्रयोगे तु लक्षिते सोपदिश्यते ॥**'

सोम-- **सूत्रार्थस्तु**-- यथा पृषदाज्येनानूयाजानिति पृषदाज्यं प्रत्येकं तथा एकादशत्वादिसंख्यावृत्तिरपि तस्य तस्य प्रयाजादेः उपादिश्येत इति ।

वि-- 'एकादश प्रयाजाः किं प्रत्येकं स्यादुतान्यथा । संख्यावृद्धि, रिहाद्योऽस्तु प्रतिमुख्यं गुणो यतः॥', प्रत्येकं समुदाये वा स्वरूपेण न सिध्यति । संख्यावृद्धिः प्रयोगात्तु साऽऽवृत्त्या संभविष्यति ॥ ' पञ्च प्रयाजान् द्विरावर्त्य पुनरपि चरमप्रयाजे सकृदावर्तिते सति एकादशत्वसंख्या संपद्यते ।

भाट्ट-- विकृतौ 'एकादश प्रयाजान् यजति' 'षडुपसदः' इत्यादिः वैकृती अनेकव्यक्तिवृत्तिः अधिकसंख्या श्रुता । सा 'प्रतिप्रधानं गुणावृत्ति'न्यायेन पृषदाज्यादिवत् एकैकस्मिन् प्रयाजादौ प्रत्येकमसंबध्येत इति एकैकः एकादशवारं आवर्तनीयः । **इति प्राप्ते**, द्वित्वादिसंख्यायाः पृथक्त्वनिवेशित्वात् एकैकस्मिन् पञ्चस्वपि वा पृषदाज्यवदावृत्तिं विना एकादशत्वानुपपत्तेः उत्पन्नवाक्यगतत्वेन च कर्मभेदकत्वायोगात् आवश्यके जघन्ये प्रयाजपदे प्रयोगलक्षणया संख्याविधौ वरं सहितैरेव प्रयाजैस्तल्लक्षणात् सहितप्रयाजप्रयोगाणां सहितानामेवोद्देशात् सर्वसंपाद्या संख्या इति **प्राञ्चः । वस्तुतस्तु** प्रयोगो नाम न पदार्थान्तरम्, येन लक्षणा स्यात्, अपि तु प्रयाजानामेव व्यक्त्यन्तरम् । अतश्च यथैव प्रकृतौ 'पञ्च प्रयाजाः' इत्यादौ तत्तद्व्याप्यजात्यवच्छिन्ना एव व्यक्तयः प्रयाजत्वरूपव्यापकजात्यवच्छेदेन उच्यन्ते, तथा अत्रापि एकादशत्वादिसंख्यासंपत्त्यर्थं तावद्व्यक्तीनामुक्तौक लक्षणा । अतः तदभावेऽपि व्यापकधर्मावच्छिन्नोद्देशेन विहितैकादशत्वादिसंख्या अनेकव्याप्यासज्यवृत्तित्वस्वाभाव्यात् व्यक्त्यन्तराण्याक्षिपन्ती लाघवात् प्रकृतिक्लृप्तव्यक्त्यधिकव्यक्तीः षडेवाक्षिपति, नाधिकाः इति सर्वसंपाद्यत्वसिद्धिः । न चैवं प्रयोगलक्षणाभावे 'तिस्र आहुतीः' इत्यादाविव व्यक्तिभेदापत्तिः । तत्र विधेयताऽवच्छेदकविजातीयहोमत्वस्य एकस्य पूर्वमक्लृप्तत्वेन भेदप्रतियोगिताऽवच्छेदकतया त्रयाणामेव तेषां कल्पनयोपपत्तौ तत्तद्व्यक्तित्वस्य प्रतियोगिताऽवच्छेदकीभूतस्य विधेयताऽवच्छेदकत्वकल्पने गौरवात् । प्रकृते तु क्लृप्तप्रयाजत्वस्य उद्देश्यताऽवच्छेदकत्वात् संख्यायाश्च विधेयत्वात् न क्वाचित् कल्पना इति वैषम्यम् ।

मण्डन-- 'संख्या प्रयाजवृन्दस्य ।'

शंकर-- 'प्रयाजैकादशैः पशोः । ' संस्काराः इत्यनुवर्तते । पशोः संस्काराः ।

* विवृद्धस्तोमकेषु संख्यासंपत्तिः **प्रयाजैकादशत्वन्यायेन** अभ्यासेनापि उपपत्तेः न सामान्तरागममाक्षिपति । वस्तुतस्तु प्रयाजैकादशत्वन्यायेन ऋचामपि अभ्यास एव । आवापविधिस्तु यावद्वचनं अपूर्वविधिरेव, इति प्राप्ते । **भाट्ट**. १०।५।६, * षट्त्रिंशद्रात्रे 'षडहा भवन्ति, चत्वारो भवन्ति' अत्र सत्यप्येकवाक्यत्वे प्रयाजैकादशत्वन्यायेन निर्ज्ञातसंख्यत्वात् चतुःसंख्या आवृत्त्यापादिकैव । ८।३।२, * साद्यस्क्रे 'त्रिवत्सः साण्डः सोमक्रयणः' । न च एकत्वस्यापि प्रतिक्रियं निवेशापत्तेः न सर्वक्रयेषु एकद्रव्यतासिद्धिः (इति वाच्यम्) तथात्वे द्रव्यबहुत्वात् बहुवचनप्रसङ्गेन एकत्वस्य क्रयसमुदाये एव प्रयाजैकादशत्वन्यायेन विधेयत्वात् एकद्रव्यत्वसिद्धेः । १०।३।१६, * सौत्रामण्यां पशुषु विभिन्नद्रव्यदेवतासंबन्धद्वयात् उत्पन्नवाक्यशिष्टात् प्रयाजै-

कादशत्वन्यायेन पशुपुरोडाशयागस्य अभ्यासः संपद्यते। १०।१।९.

* 'तिस्र आहुतीर्जुहोति' इत्यस्य न **प्रयाजैकादशत्वन्यायविषयत्वम्**, एकादशत्वविधितः पूर्वं प्रकृतौ प्रयाजानां प्रत्येकैकत्वेन वा प्रचयविशिष्टपञ्चत्वेन वा निर्ज्ञातसंख्यत्वात्। प्रकृते तु न संख्यानुमानम्, प्रत्यक्षश्रुतत्वात्। **कौ.** २।२।७।२० पृ. २३४.

* **प्रयाजद्व्यार्थं** औपभृताज्यं जुह्वामर्धं समानेयं न तु अर्धन्यूनम्। **भाट्ट.** ४।१।१७.

* (वरुणप्रघासावभृथे) आमिक्षाहविःशेषस्य निष्कासस्य अस्मिन् कर्मणि हविष्ट्वायोगात् **प्रयाजन्यायेन** (प्रयाजशेषाभिघारणन्यायेन ४।१।१४) प्रतिपत्तिः स्यात्। निष्कासः संस्क्रियते। इति प्राप्ते। **वि.** ११।२।१५. * दीक्षाकाले यूपच्छेदे अपकृष्टे-प्रयाजन्यायेन (प्रयाजान्तापकर्षन्यायेन तदन्तापकर्षन्यायेन ५।१।१२) तदन्ताङ्गसमूहस्यापकर्षणात् प्रणयनमपि अपकृष्यतामिति प्राप्ते। **वि.** ५।१।१४. * सौमिकाग्निप्रणयनानन्तरं पश्वङ्गतया 'यूपं छिनत्ति' इत्युत्पन्नं यूपच्छेदनं 'दीक्षासु यूपं छिनत्ति' इत्यनेनापकृष्टं प्रयाजन्यायेन (तदन्तापकर्षन्यायेन ५।१।१२) प्राचोऽपि पदार्थान् अग्नीषोमप्रणयनादीनपकर्षति। इति प्राप्ते। **भाट्ट.** ५।१।१४.

* **प्रयाजमन्त्रेषु** 'समिधः समिधो अग्न आज्यस्य व्यन्तु' इत्यादिषु समिदादिशब्दैः देवता निर्दिष्टाः। **वि.** ९।२।२०.

* **प्रयाजवाक्ये** श्रूयमाणस्य अभिक्रमणस्य प्रयाजेष्वेव निवेशः, न तु सर्वस्मिन् दर्शपूर्णमासप्रकरणे। ३।१।१०।१९–२०.

* '**प्रयाजशेषेण** हवींष्यभिघारयति' इत्येतत् अङ्गप्रधानार्थम्। **वा.** ३।७।१।५, * 'प्रयाजशेषेण हवींष्यभिघारयति' इति सत्यपि शेषस्य तृतीयानिर्देशे कार्योपयोगित्वात् संस्कार्यत्वावधारणम्। १।३।८।२७ पृ. २८४. * 'प्रयाजशेषेण हवींष्यभिघारयति' प्रयाजशेषं हविःषु क्षारयति इति वचनार्थः संपद्यते। **कणिका.** पृ. ३८४. * प्रयाजशेषेण हविरभिघारणं प्रतिपत्तिश्च हविःसंस्कारश्चेति उपयुक्तोपयोक्ष्यमाणोभयसंस्कारः। **भा.** ४।१।१४।३३–३९.

* **प्रयाजशेषाभिघारणं** आग्नेयपुरोडाशस्य पूर्वं कर्तव्यं ततः सांनाय्यस्य, प्रवृत्तिक्रमान्मुख्यक्रमस्य बलीयस्त्वात्। **भा.** ५।४।२।२–४. * प्रयाजशेषाभिघारणं प्राजापत्यवपानां वैकल्पिकम्। **बाल.** पृ. १६३.

* **प्रयाजशेषाभिघारणाधिकरणविचारः**। चतुर्थे (४।१।१४।३३–३९) प्रयाजशेषाभिघारणाधिकरणे किञ्चिदुच्यते। 'चतुर्जुह्वां गृह्णाति प्रयाजेभ्यस्तत्' इति प्रयाजार्थं चतुर्गृहीतं 'चतुर्गृहीतं वा एतदभूत् तस्याघारमाघार्य त्रिरितः प्राचीनं प्रयाजान् यजति' इत्यनेन प्रयाजत्रये उपसंहृतम्, तेन 'जुह्वा जुहोति' इति होमे विहिते कृत्स्नमेव होतव्यम्। **ननु** प्रयाजशेषाभिघारणरूपप्रतिपत्त्यनुरोधेन अकृत्स्नहोमः स्यात्। **न**। प्रतिपत्तीनामप्रयोजकत्वात्। **न** च उत्पत्तिप्रयोजकत्वमेव तासां नास्ति, धारणप्रयोजकत्वं तु तासामस्तु इति **वाच्यम्**। अधिकरणचतुष्टयविरोधात्। तथाहि [१] 'सोमेऽवचनाद्भक्षो न विद्यते' (३।५।६।१९) इति पूर्वपक्षिते 'ग्रहैर्जुहोति' 'चमसैर्जुहोति' इति सर्वहोमप्राप्तावपि 'अल्पं जुहोति' इति वचनेन सिद्धान्तितम्, तत् विरुध्येत, अकृत्स्नहोमस्य न्यायप्राप्तत्वे अल्पवाक्यस्य विधित्वायोगात्। [२] तथा 'आज्याच्च सर्वसंयोगात्' (३।५।१।१) इत्यत्र 'चतुर्गृहीतं जुहोति' इति ध्रौवाज्यात् गृहीतेन चतुर्गृहीतेन उपांशुयाजे कृतेऽपि शेषकार्यानुरोधेन शेषः स्थाप्येत इति तदधिकरणविरोधः। [३–४] एवं 'साकंप्रस्थाय्ये (स्थायीये) स्विष्टकृदिडं च तद्वत्' (३।५।२।१३) 'सौत्रामण्यां च ग्रहेषु' (३।५।३।१४) इत्यनयोरपि अधिकरणयोः सिद्धान्तौ प्रत्युद्धृतौ स्याताम्। किञ्च न केवलं सिद्धान्तविरोध एव, किन्तु प्रतिपत्तीनां प्रतिपाद्यप्रयोजकत्वायोगरूपन्यायेन यथा प्रतिपाद्योत्पत्तिप्रयोजकत्वाभावः सिध्यति, एवं प्रतिपाद्यस्य शास्त्रतः कृत्स्नहोमे प्राप्ते तद्धारणाप्रयोजकत्वमपि सिध्यत्येव। तदुक्तम् 'सोमेऽवचनात्' (३।५।६।१९) इत्यधिकरणे शास्त्रदीपिकायाम् 'अथ शेषकार्यवशात् शेष्येत, ततस्तेषामपि प्रयोजकत्वात्

शेषनाशदोषापहारादावपि हविरन्तरागमः स्यात्' इति। (शेष्येत इत्यत्र शिष्येत इति निर्णयसागरपाठः। ...पहारादावपि स्विष्टकृदादावपि हवि॰ इति पाठश्च)। तस्मात् 'अल्पं जुहोति' इत्यादिवचनाभावात् जौहवस्य प्रयाजत्रयेण कृत्स्नहोमात् प्रयाजशेष एव नास्ति इति प्रयाजशेषाभिघारणाधिकरणमनुपपन्नम्। **अत्र ब्रूमः**। कृत्वाचिन्तैषा इति कैश्चिदपि ग्रन्थकारैरनुक्तमपि कल्पनीयम्। यद्वा कृत्स्नहोमे शास्त्रतः प्राप्ते, यदि प्रमादात् सशेषं जुहोति, तत इयं शेषस्य प्रतिपत्तिर्विधीयते इति नित्यवदाम्नानभङ्गेन कल्पनीयम्। प्रतिपत्तिविधिनैव च कृत्स्नहोमाभावकृतवैगुण्यप्रतिसमाधित्साऽपि निवर्तते। इति। **बाल.** पृ. १०८–१०९.

प्रयाजशेषाभिघारणन्यायः। दर्शपूर्णमासयोः प्रयाजशेषेण हविरभिघारणार्थं शेषधारणतत्पात्रे पृथक् न कर्तव्ये। प्राजापत्यानां वपानां प्रयाजशेषेण अभिघारणं नास्ति॥

अभिघारणे विप्रकर्षादनुयाजवत् पात्रभेदः स्यात्। ४।१।१४।३३॥

भाष्यम्— अस्ति वाजपेयः 'वाजपेयेन स्वाराज्यकामो यजेत' इति। तत्र श्रूयते 'सप्तदश प्राजापत्यान् पशूनालभते, सप्तदशो वै प्रजापतिः, प्रजापतेराप्त्यै' इति। प्राजापत्यानां क्रतुपशूनां च समुच्चयो वक्ष्यते, 'प्राजापत्येषु चाम्नानात्' इति। अस्ति तु प्रकृतौ 'प्रयाजशेषेण हवींष्यभिघारयति' इति। तत्र संदेहः किं प्राजापत्यानां वपा अभिघारयितुं प्रयाजशेषस्य धारणार्थं पात्रं अपरं उत्पादयितव्यम्, ततस्तेन प्राजापत्यानां वपा अभिघारयितव्याः, उत न शेषो धारयितव्यः नैव ततः प्राजापत्यानां वपा अभिघारणीया इति। किं प्राप्तम्? अभिघारणे प्रयाजशेषधारणार्थं पात्रमुत्पाद्यते। प्रातःसवने च प्रयाजशेषः, विप्रकृष्टे काले माध्यंदिने सवने ब्रह्मसामकाले प्राजापत्यानामालम्भः श्रूयते 'तान् पर्यग्निकृतानुत्सृजन्ति। ब्रह्मसाम्न्यालभते' इति। व्यापृता च जुहूर्भवति। तस्मात् पात्रान्तरमुत्पादनीयमिति। यथा अनुयाजेषु पृषदाज्यधारणार्थं पात्रमुत्पाद्यते 'पृषदाज्येनानुयाजान् यजति' इति वचनात्। एवमत्रापीति।

न वाऽपात्रत्वादपात्रत्वं त्वेकदेशत्वात्। ३४॥

भाष्यम्— न वा प्राजापत्यानां वपा अभिघार्याः। कुतः? शेषाभावात्। कथं शेषाभाव इति चेत्। अपात्रत्वात्। कथमपात्रता? एकदेशत्वात्। प्रयाजार्थस्य हि गृहीतस्य आज्यस्य स एकदेशः शेषः। किमतो यद्येवम्? एकदेशव्यापारः श्रूयमाणो नावयविनमुपादेयत्वेन चोदयति। आह। उत्पत्तिं न चोदयेत्, धारणमुत्पन्नस्यार्थाद्भविष्यतीति। उच्यते। एकदेशत्वादभिघारणं द्रव्यमेव न प्रयुङ्क्ते इत्युच्यते। कृतार्थस्य द्रव्यस्यायमेकदेशः प्रतिपाद्यते, नाभिघारणमर्थकर्म। ननु हविषां द्वितीयानिर्देशात् प्राधान्यं स्यात्। नेत्युच्यते। अदृष्टो हि हविषामुपकारः कल्प्येत। आज्यप्राधान्ये पुनर्जुह्वा रिक्तत्वं दृष्टं प्रयोजनम्। आज्यभागार्थेन आज्येनासंसर्गो जुह्वा रिक्तया प्रयोजनम्, नाभिघृतेन हविषा। तस्मात् प्राजापत्यानामभिघारिताभिर्वपाभिः प्रयोजनमेव नास्ति, किमर्थं शेषो धार्यते इति।

टुप्— प्रकृतावपि संभवति विचारे विकृतिरुदाहृता, तद्विषयाणि लिङ्गदर्शनानि उपात्तानि सूत्रकारेण। (सिद्धान्तमाह–) प्रयाजशेषेण इत्युच्चार्यमाणमेव अन्यत्र शेषत्वेनोपयुक्तं दर्शयति। तस्मात् ईदृशम् (अन्यत्र शेषत्वेनोपयुक्तम्) न (ततः) अन्येन प्रयुज्यते यथोत्तरार्धः स्विष्टकृता। उपादीयमानत्वात् हविषां संख्या विवक्षिता [आनन्दाश्रमीयादितरेषु त्रिषु आदर्शेषु पाठोऽयम्। तदुत्तरं तन्त्ररत्ने 'यदि उपादीयमानत्वं हविषां स्यात्, ततः संख्या विवक्षिता स्यात्, न तु तदस्ति इति अवीतोक्तिरियं व्याख्येया' इति। अवीतोक्तिं विनैव तु 'अनुपादीयमानत्वात् हविषां संख्या अविवक्षिता' इति आनन्दाश्रमीयः पाठो युज्यते। अवीतोक्तिर्व्यतिरेकोक्तिः]। जुह्वा च रिक्तया प्रयोजनमस्ति। यत् (आज्यभागद्रव्यं) तया (जुह्वा) होष्यते, तत् कथमसंसृष्टं (प्रयाजशेषेण) स्यात्। तस्मात् प्रतिपत्तिरपेक्षिता। हविःसंस्कारस्य तु अनपेक्षितत्वात् (तादर्थ्ये अभिघारणस्य) अदृष्टं कल्प्यम्। ततो हवींषि अप्रयोजकानि। (कथं तर्हि 'हवींषि' इति द्वितीया? अत आह–)

अधिकरणत्वमेव तु अत्र विवक्षितम्, न तु व्याप्यमानत्वम्। (तस्मात् अप्रयोजकानि हवींषि इति सिद्धम्)।

हेतुत्वाच्च सहप्रयोगस्य । ३५ ॥

भाष्यम्— हेतुत्वाच्चाभिघारणस्य, 'सहालभते' इति स्तुतिर्भवति । 'तीर्थे वै प्रातःसवनम्, यत् प्रातःसवने पशव आलभ्यन्ते, तीर्थ एवैतानालभते, सयोनित्वायाथो वपानामभिघृतत्वाय' इत्यर्थान्तरेण वपाऽभिघारणमनुगृह्णन् नेहास्तीति दर्शयति ।

अभावदर्शनाच्च । ३६ ॥

भाष्यम्— अभावं खल्वपि अभिघारणस्य दर्शयति 'सव्या वा एतर्हि वपा यर्हि अनभिघृता, ब्रह्म वै ब्रह्मसाम, यद् ब्रह्मसाम्न्यालभते, तेनासव्याः, तेनाभिघृताः' इति । सव्यशब्दो रूक्षे भाष्यते । 'सव्या वपा' इत्यनभिघृततां दर्शयति ।

सति सव्यवचनम् । ३७ ॥

भाष्यम्— आह, नैतद्दर्शनम्, सत्येव ह्यभिघारणे भवत्येतत् सव्यवचनम् । अस्ति हि वपाया अन्यदभिघारणम् । 'उपस्तृणात्याज्यम्, हिरण्यशकलम्, वपा, हिरण्यशकलम्, ततोऽभिघारयति' इति । तस्मिन् सति कथं सव्या भवेयुः । श्रूयते च । तस्मान्नैतच्छक्यमवगन्तुम्, 'रूक्षास्ता वपा दृश्यन्ते' इति । तेन नूनमभिघारणं प्रयाजशेषेणास्तीति । सति अस्मिन्नभिघारणे प्रत्यक्षमरूक्षास्ताः । अतो रूक्षावचनं व्यामोह इति ।

न तस्येति चेत् । ३८ ॥

भाष्यम्— एवं चेद् दृश्यते, सत्यभिघारणे सव्या इति वचनमलिङ्गमिति । नालिङ्गम्, तस्यैतद्वचनं यत् स्नेहनं करोति । कतमत्तत् ? यत् प्रथमम् । प्रथमं हि स्नेहनं करोति, न द्वितीयम् । स्निग्धस्य तद्भवति । न च स्निग्धस्य स्नेहनं क्रियते । यथा भवति लोके वादः, यदस्माभिः कान्तारान्निर्गतैर्देवदत्तस्य गृहे स्निग्धमन्नं भुक्तम्, तेन वयमरूक्षाः कृता इति, सत्स्वपि अन्येषु स्निग्धेष्वेव भोजनेषु । एवं तस्यारूक्षाकरणस्याभिघारणस्य अभावाद् रूक्षा इति वचनमुपपद्यते, अस्मिंस्तु सति नोपपद्यते । तस्मादपि प्रयाजशेषेणाभिघारणं प्राजापत्यानां नास्तीति ।

स्यात् तस्य मुख्यत्वात् । ३९ ॥

भाष्यम्— इदं पदोत्तरं सूत्रम् । यदि प्रथमस्याभावात् सव्या इति वचनं भवत्यनुपपन्नम्, तर्ह्यन्यस्य प्रथमस्य विद्यमानत्वात् । कतमत्तत् ? यच्छ्रप्यमाणाया अपरमुद्वासितायाः । अत्रोच्यते । स्यात् तस्य मुख्यत्वात् । यत् प्रयाजशेषेण अभिघारणं तस्यैवाभावादेतदुपपद्यते, सत्यपि श्रप्यमाणाया अभिघारणे उद्वासितायाश्च । यत्तावत् श्रप्यमाणायाः, तदग्नेरर्चींषि दहन्ति, यदुद्वासितायाः, तदग्न्यवयवा ऊष्मावयवाश्च नाशयन्ति । सैषा रूक्षैव । इदं तु प्रयाजशेषेण शीतायाः क्रियते । तत् स्नेहयति । तेन स्निग्धायाः प्रदानकालमभिघारणं यत्, तत् न स्नेहयति । तदिदं स्नेहनस्याभिघारणस्य अभावात् सव्यतावचनमुपपद्यते इत्युक्तम् । तस्मान्न प्रयाजशेषो धार्यते इति ।

शा— **'तत्रोपयोक्ष्यमाणानां द्वितीयायोगिनां तथा । हविषामेव संस्कारो, न शेषस्य विपर्ययात् ॥ सत्यमेवं तथापीह शेषस्य प्रतिपादनम् । न्याय्यं, दृष्टार्थतालाभादन्यथाऽदृष्टकल्पनात् ॥ हविराधारनियमात् तत्संस्कारोऽपि गम्यते । तस्मादुभयसंस्कारः स्विष्टकृत्सूक्तवाकवत् ॥'**

सोम— यथा पूर्वत्र उत्तरार्धशब्दबलात् प्रकृतग्रहणम्, तथेह द्वितीयाविभक्तिबलात् हविःसंस्कारकत्वं इति प्रत्यवस्थानात् **संगतिः** । **सूत्रार्थस्तु**— यथा पशौ अनूयाजार्थपृषदाज्यधारणार्थं पात्रभेदः, तथा प्राजापत्यवपाऽभिघारणे निमित्ते तदर्थं पात्रभेदः स्यादिति । यद्यपि इदं सूत्रं अग्नीषोमीयहृदयाद्यभिघारणपरतयाऽपि व्याख्यातुं शक्यते, तथापि 'हेतुत्वाच्च सहप्रयोगस्य' इत्याद्यग्रिमसूत्राणां प्राजापत्यविषयत्वात् भाष्ये तद्विषयतयैव इदमपि व्याख्यातम् ।

वि— 'अभिघार्यं प्रयाजानां शेषेण हविरत्र किम् । शेषधारणतत्पात्रे कार्ये नो वाऽभिघारणम् ॥ नान्यथा तेन ते कार्ये, न कार्ये प्रतिपत्तितः । प्राजापत्यवपायाश्च न कोऽप्यर्थोऽभिघारणात् ॥'

भाट्ट— दर्शपूर्णमासयोः 'प्रयाजशेषेण हवींष्यभिघारयति' इति श्रुतम् । तत्र प्रयाजशेषाभिघारणस्य

तृतीयाद्वितीयाभ्यां उपयुक्तसंस्कारापेक्षया चोपयोक्ष्यमाणसंस्कारस्याभ्यर्हितत्वात् हविःसंस्कारकत्वमेव, न तु प्रयाजशेषप्रतिपत्त्यर्थत्वम्, लक्षणाद्वयप्रसङ्गात् । न च हविःसंस्कारकत्वे अदृष्टकल्पनाऽऽपत्तेः अपेक्षितदृष्टरूपप्रतिपत्त्यर्थत्वलाभाय लक्षणाद्वयाङ्गीकरणमपि न दोषायेति **मिश्रमतं** युक्तम्, निषादस्थपत्यधिकरणन्यायेन अदृष्टकल्पनादेः फल्गुत्वात् । किञ्च, द्वितीयायाः सप्तम्यर्थलक्षकत्वे हविषामभिघारणं प्रति उपादेयत्वापत्तेः तद्गतबहुत्वस्य विवक्षाऽऽपत्तौ त्रिष्वेव करणापत्तिः । तथा च ग्रहैकत्वाधिकरणे तदविवक्षाऽभिधानं वार्तिककारीयं नोपपद्येत । यत्तु अभिघारणं प्रति आधारत्वेनान्वितानामपि हविषामाधारतानियमं प्रति उद्देश्यत्वात् तद्विशेषणाविवक्षेति, तन्न, श्रुताभिघारणं प्रति उपादेयमात्रत्वेन विवक्षितत्वे आर्थिकाधारतानियमं प्रत्यपि त्रयाणामेवोद्देश्यताऽऽपत्तेः । किञ्च, यदर्थो नियमाश्रयः, तदर्थ एव नियम इति सर्वत्र क्लृप्तेः आधारतानियमोऽपि अभिघारणनियमवत् तद्द्वारा प्रयाजेष्वेवोपयुज्येत । इतरथा पशुस्थजाघनीतुषोपवापादिवाक्येष्वपि करणतानियमस्य जाघनीप्रतिपत्त्यर्थत्वकपालसंस्कारकत्वापत्तेः एकत्वाविवक्षाऽऽपत्तिः ।

एतेन पदद्वयेऽपि लक्षणामङ्गीकृत्य आधारतानियमोद्देश्यतामात्रेणैव हविःसंख्याविवक्षामुक्तवतो **भट्टसोमेश्वरस्यापि** मतं प्रत्युक्तम् । यत्तु कैश्चित्तृतीयाया एव द्वितीयाऽर्थे लक्षणामङ्गीकृत्य अभिघारणस्य उभयार्थत्वं विजातीयानेकोद्देश्यकत्वाच्च न वाक्यभेद इत्युक्तम्, **तदपि न**, निषादस्थपत्यधिकरणविरोधस्य तादवस्थ्यात्, श्रुतोद्देश्यसत्त्वे लाक्षणिकस्य तस्यान्याय्यत्वाच्च, न्याय्यत्वेऽपि वा श्रुतहवीरूपोद्देश्यसंस्कारस्यैव धारणप्रयोजकत्वापत्तेश्च । किञ्च, वैजात्यं न तावन्निमित्तफलादिवत्, उभयोरपि ईप्सितत्वाख्योद्देश्यत्वस्य समानत्वात् । अथ वैजात्याभावेऽपि साकाङ्क्षत्वादेव नानेकोद्देश्यता, तथात्वे गोदोहनादेरपि पशुप्रणयनाद्युभयोद्देश्यताऽऽपत्तेः । अतोऽभिघारणस्य केवलहविःसंस्कारार्थत्वात् निनयनकालीनपुरोडाशकपालन्यायेन शेषोत्पादनाप्रयोजकत्वेऽपि धारणप्रयोजकत्वोपपत्तिः । अतश्च दैक्षे हृदयाद्यभिघारणार्थं वाजपेये च प्राजापत्यवपाऽभिघारणार्थं च धारणीय एव पात्रान्तरे प्रयाजशेषः । प्रकृतौ हि प्रयाजोत्तरं वपायागमात्रं कृत्वा कालान्तरे हृदयादियागः । वाजपेये च प्राजापत्यान् क्रतुपशूंश्च सहोपक्रम्य दशप्रयाजोत्तरं पर्यग्निकरणान्ते कृते प्राजापत्यानां वैकल्पिको ब्रह्मसामकाले उत्कर्षः । अतश्च पर्यग्निकरणोत्तरभाव्युत्तमप्रयाजशेषेण क्रतुपशुवपाऽभिघारणवत् कालान्तरभाविप्राजापत्यवपाऽभिघारणार्थमपि धार्यः शेषः । **इति प्राप्ते**, सत्यं प्रयाजशेषाभिघारणं हविःसंस्कारार्थमेव वाक्येन, तथापि तु प्रयाजशेषस्य प्रतिपत्त्यपेक्षत्वात् तदनुरोधेन स्विष्टकृद्वदेव वाक्यान्तरकल्पनया अभिघारणस्यैव तत्प्रतिपत्त्यर्थत्वमङ्गीक्रियते । न च प्रयाजेषु सर्वहोमस्यैवापत्तेर्न प्रतिपत्त्यपेक्षा, आर्थिकप्रतिपत्त्यन्तरविध्यभावेऽपि प्रयाजशेषकरणकाभिघारणविधिनैव द्वितीयतुषोपवापवत् धारणाक्षेपापत्त्या सर्वहोमानापत्तेः । न च स्विष्टकृद्वत् इहांशभेदाभावादभिघारणस्य श्रौतेन हविरर्थत्वेन अपेक्षामात्रप्रमाणकप्रतिपत्त्यर्थत्वबाधः, श्रौतविधेर्धारणाद्याक्षेपशक्तिकल्पनागौरवपरिहारार्थमेव फल्गुप्रतिपत्तिविधिकल्पनाऽनुमतेः । अत एव ज्ञानाद्याक्षेपशक्तिकल्पनागौरवपरिहारार्थमधिकारिसंकोचवत् संनिहितहविःसंकोचोऽपि न दोषाय । अत एव यत्र न प्रतिपत्तिः यथा द्वितीयतुषोपवापकपालादौ, तत्र न तत्कल्पना । जाघन्यां तु वक्ष्यते । न च आर्थिकप्रतिपत्तिविधेरपि धारणाक्षेपशक्तिकल्पनाऽऽवश्यकत्वे श्रौतविधेरेव तत्कल्पकत्वौचित्यमिति **वाच्यम्**, पूर्वाधिकरणवदेव आनुमानिकतत्कल्पनस्य अदोषत्वात्, अनुमानस्य फल्गुत्वाच्च । अतश्च प्रतिपत्तिबलेनैवाक्षिप्तस्य धारणस्योपजीवनात् विनिगमनाविरहेण संनिहितसर्वहविःषु अभिघारणोपपत्तावपि न कालान्तरीयहविरर्थे धारणमिति । अत एव प्राजापत्यवपानां क्रतुपशुभिः सह करणपक्षे 'सह पशूनालभते वपानामभिघृतत्वाय' इति लिङ्गं ब्रह्मसामकालीनत्वपक्षे तदभावं दर्शयति । स्पष्टं च 'सव्या वा एतर्हि वपा यर्ह्यनभिघृता' इति रूक्षत्वाख्यं सव्यत्वं तस्मिन् पक्षे दर्शयति । न च अभिघारणान्तरेण रूक्षत्वनिवृत्तिः, तस्य तावन्मात्रनिवर्तकत्वेन रूक्षताया अनिवर्तनात् ।

मण्डन-- ' प्रयाजार्थेऽभिघारणम् । ' १६.

शंकर-- ' हविःषु क्षारणं तथा । ' १७. तथा अप्रयोजकम् ।

* **प्रयाजशेषाभिघारणन्यायेन** भक्षस्य तद्गतकर्तृनियमस्य वा कर्तृसंस्कारकत्वात् हविर्विशेषणस्येव तद्विशेषणस्यापि अविवक्षा । इति पूर्वपक्षः। **भाट्ट.** ६।४।७, * ' गुदेनोपयजति ' इत्यत्र अस्मदुक्त**प्रयाजशेषाभिघारणन्यायेन** उपयुक्तस्य गुदस्य प्रतिपत्त्यपेक्षत्वात् उपयाजप्रक्षेपांशेन वाक्यान्तरकल्पनया प्रतिपत्तित्वोपपत्तिः। १२।४।४, * ' जाघन्या पत्नीसंयाजं यजति ' अस्य वचनस्य नियममात्रपरत्वेऽपि प्रयाजशेषाभिघारणन्यायेन नियमस्यैव जाघनीसंस्कारार्थत्वकल्पनं इत्यपि अनाशङ्क्यम् । १२।४।६, * नहि ' यद्धविःसंस्कारकं यत् भक्षणम्, तत् तद्धविर्यागसंबन्धिपदार्थकर्तृसंस्कारकम् ' इत्यत्र प्रमाणमस्ति । प्रयाजशेषाभिघारणन्यायेन हविःसंस्कारस्य सतः कर्तृसंस्कारकत्वमात्रकल्पनात् । इति चेन्न, यद्धविःसंस्कारकं यत् भक्षणम्, तत् तद्धविर्यागसंबन्धिपदार्थकर्त्रानतिरूपम्, तद्धविर्यागसंबन्धिकरिष्यमाणपदार्थविषये बलाधानरूपं वा संस्कारं जनयति इत्येव कल्पनात् । १०।७।८, * पार्थसारथिमते तु प्रयाजशेषाभिघारणन्यायेन आघारनियमस्य पशुसंस्कारार्थत्वापत्तेः पूर्वपक्षेऽपि सर्वेषामञ्जनप्रसङ्गात् प्रयोजनानुपपत्तिरिति भाष्यविरोधोऽपि । ४।४।१०, * प्रकृतौ इडाभक्षणादयः शेषभक्षाः द्वितीयया शेषप्रतिपत्त्यर्था अपि प्रयाजशेषाभिघारणन्यायेन कर्तृसंस्कारार्थाः अपि इत्युक्तं षष्ठे। १०।७।६, * यजमानकर्तृकाणां शेषभक्षाणामपि प्रयाजशेषाभिघारणन्यायेन कर्तृसंस्कारकत्वस्यापि सत्त्वात् प्राणधारणार्थत्वोपपत्तेः । सत्यपि द्वितीयया शेषप्रतिपत्त्यर्थत्वे अस्मदुक्तप्रयाजशेषाभिघारणन्यायेन आनुमानिकस्यैव प्राणधारणस्य प्रयोजकत्वावगतेः तस्य च पयोव्रतेन प्रसङ्गसिद्ध्युपपत्तिः । इति प्राप्ते । १२।१।१५, * ' यजमानपञ्चमा इडां भक्षयन्ति ' अत्र ऋत्विजां भक्षस्य ' प्रयाजशेषाभिवारणन्यायेन ' कर्तृसंस्कारकत्वस्यापि वक्ष्यमाणत्वेन आनत्यर्थत्वात् प्राप्तिसंभवेन न विधानम् । ६।४।३. * ' वेदमधीत्य स्नायात् ' इति क्त्वाप्रत्ययस्य यद्यपि आनन्तर्यं वाच्यं भवति, तथापि प्रकृते शक्यार्थपरिग्रहे अध्ययनस्य दृष्टार्थता भज्येत इति तदविरोधाय प्रयाजशेषाभिघारणन्यायेन उत्तरकालतामात्रमेव लक्षणया ग्रहीतव्यम् । **वैद्यनाथ.** १।१।१।१ पृ. ७ . * श्रौतविधेरर्थकर्मत्वेऽपि अस्मदुक्तप्रयाजशेषाभिघारणन्यायेन आर्थिकदानप्रतिपत्तिविध्यन्तरकल्पनया प्रकृतेऽपि कार्यसंकोचोपपत्तिः । न चात्र मध्ये प्रतिपत्त्यपेक्षाऽभावेन कल्पकाभावात् तन्न्यायवैलक्षण्यम्, दानविधेर्दण्डान्तरप्रयोजकत्वशक्तिकल्पनाभिया कार्यसंकोचमङ्गीकृत्यापि मध्ये तदपेक्षोपपत्तेः । **भाट्ट.** ४।२।६, * ' सह शाखया प्रस्तरं प्रहरति ' अत्र शाब्दबोधे गुणत्वश्रवणेऽपि प्रयाजशेषाभिघारणन्यायेन आर्थिकप्रतिपत्त्यन्तरविधिकल्पनेन प्रस्तरवत् शाखाया अपि कृतार्थत्वाविशेषेण प्रतिपाद्यत्वम् । ६।४।१३, * सामिधेनीविवृद्धौ प्रयाजशेषाभिघारणन्यायेन लक्षणया ' पञ्चदश सामिधेनीरनुब्रूयात् ' इतिविहितपञ्चदशसंपत्त्यर्थत्वेन अभ्यासमात्रविधानम् । इति पूर्वपक्षे । १०।५।८.

* अत एव **प्रयाजशेषन्यायेन** ' योन्यां गायति ' इत्यादिसप्तम्याः प्राधान्यलक्षणा इत्यपास्तम्, निषादस्थपत्यधिकरणन्यायविरोधेन प्राचीनप्रयाजशेषन्यायस्य अपभ्रंशितत्वात् । इदं पूर्वपक्षे । **भाट्ट.** ९।२।२. * ऐकादशिनेषु पशुषु एकादशानां गुदानां विकल्प इति चेत्, मैवम् । प्रयाजशेषन्यायेन (प्रयाजशेषाभिघारणन्यायेन ४।१।१४) तृतीयाश्रुतेर्विपरिणामे सति शेषप्रतिपत्तिसंस्कारविधानात् । तस्मात् समुच्चयः । वि. १२।४।४. * प्रकृतौ शेषभक्षाः शेषप्रतिपत्त्यर्था इति वक्ष्यते । शेषप्रतिपत्त्यर्थत्वेऽपि प्रयाजशेषन्यायेन कर्तुः करिष्यमाणकर्मणि बलाधानार्था अपि इत्युक्तं षष्ठे (६।४।३)। **भाट्ट.** १०।२।३,९. * ' वारुण्या निष्कासेन तुषैश्चावभृथं यन्ति ' । इत्यत्र निष्कासपदस्य ससंबन्धिवचनत्वात् वारुण्या इत्यनेन विशेषणाच्च अर्थकर्मत्ववादिमतेऽपि परप्रयुक्तद्रव्योपजीवित्वस्य आवश्यकत्वेन लौकिकनिष्कासग्रहणानुपपत्तेः उपयुक्तस्य निष्कासस्यैव तेन ग्रहणात् प्रयाजशेषन्यायेन युक्तं संस्कार्यत्वम्। **कौ.** २।३।११।२४ पृ. ८४. * शेषभक्षाः हविःप्रतिपत्त्यर्थाः प्रयाजशेषन्यायेन कर्तुः करिष्यमाणकर्मणि बलाधानार्थाश्च, न तु

आनत्यर्थाः । **भाट्ट.** १०।२।९ , * सोमे ' पयसा मैत्रावरुणं श्रीणाति, सक्तुभिर्मन्थिनम् ' इत्यत्र प्रयाजशेषन्यायेन श्रयणस्य सोमसंस्कारत्वे अदृष्टार्थत्वप्रसङ्गात् पयःसंस्कारकत्वावगतेः तदन्यथानुपपत्त्या यागे तस्य विनियोगकल्पनेन प्रदेयत्वावगतिः इति न च वाच्यम् । ९।४।११, * यद्यपि आहिताग्निशरीरप्रतिपत्त्यर्थदाहे विधीयमाने पात्राणामग्नीनां च गुणत्वमेव तृतीयाश्रवणात्, दाहस्य शरीरप्रतिपत्त्यर्थतया दृष्टार्थत्वेन प्राचीनप्रयाजशेषन्यायस्याप्यभावाच्च, तथापि न पात्रान्तराक्षेपः । ११।३।१३, * ज्योतिष्टोमे प्रायणीयानिर्वापेण निष्कासस्य दृष्टप्रतिपत्तिरूपसंस्काराजनने प्राचीन**प्रयाजशेषन्यायाभावः** । ११।२।१५, * ' पयसा मैत्रावरुणं श्रीणाति ' इति श्रयणार्थपयसः प्रयाजशेषवदुपयुक्तत्वाभावेन अस्मदुक्तप्रयाजशेषन्यायाभावः । ९।४।११, * ' स्थाण्वाहुतिं जुहोति ' इत्यत्र होमेन तस्य (यूपस्थाणोः) प्रतिपत्त्यजननेन **प्रयाजशेषन्यायासंभवः** । १०।१।६. * न चातिदेशिकप्रतिपत्त्यन्तरनिराकाङ्क्षस्य 'वारुण्या निष्कासेन तुषैश्चावभृथं यन्ति ' इति वाक्यविहितनिष्कासस्य **प्रयाजशेषन्यायविषयत्वासंभवः**, अर्थकर्मत्वपक्षेऽपि निष्कासांशे आतिदेशिकप्रतिपत्तिबाधस्य आवश्यकत्वात् प्रयाजशेषस्यापि सर्वहोमसंभवेन अनपेक्षस्यैव प्रतिपत्तिविधानाच्च । **कौ.** २।३।११।२४ पृ. ८४.

प्रयाणे त्वार्थनिर्वृत्तेः । ११।४।१८।५४ ॥

दीक्षितस्य यज्ञसाधनसामग्रीप्राप्त्यर्थं प्रयाणे ' भद्रादभि श्रेयः प्रेहि० ' इति मन्त्रः । स किं विश्रामेविश्रामे पुनःपुनः प्रतिष्ठमानो मन्त्रं प्रयुञ्जीत, स्वगृहात् प्रस्थाने सकृदेव वा इति विचारे सिद्धान्तमाह । प्रयाणे तु आ अर्थनिर्वृत्तेः इति पदच्छेदः । प्रयाणस्य अर्थनिर्वृत्तिपर्यन्तं संबन्धः । अर्थमुद्दिश्य असौ प्रतिष्ठते । तस्मात् स्वगृहात् प्रथमे प्रयाणे एव सकृत् मन्त्रं जपेत् । **के.**

* **प्रयाणमन्त्रः** ' भद्रादभि श्रेयः प्रेहि० ' इति । वि. ११।४।१९.

* **प्रयासानुरूपेण** कर्मकरेषु भृतितारतम्यं दृष्टम् । वि. १०।३।१३.

* **प्रयासरूपेषु** नानाविधव्यापारेषु स्वयमशक्तः सन् कर्मकरान् ऋत्विजः परिक्रीणाति यजमानः । वि. ३।८।३.

* **प्रयुक्तिनिर्णयः** । आचार्यकरणविधिप्रयुक्तं अध्ययनमिति प्रतिपाद्यते, स्वविधेर्नियोज्याभावात् अध्यापनविधिप्रयुक्तेश्चोपपत्तेः । कः पुनराचार्यकरणविधिः ? ' उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः । सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते ॥ ' इति स्मृत्यनुमितविधिः । **ननु**, स्मृतेः प्रसिद्धान्वाख्यानरूपत्वात् यच्छब्दयोगाच्च न विध्यनुमानमिति चेत्, **न**, विधियोग्येन वाक्यांशेन विध्यनुमानात्, इतरस्य च विधिसिद्धानुवादात् । यच्छब्दयोगोऽनुवादभाग एव, न विधिभागः, अतो विधिस्वरसेन पदेन विध्यनुमानं इतरत्तु अनुवादकम् । नच लोकसिद्धार्थतया आचार्यकस्य तदुपायस्य न विधेयत्वम्, यूपाहवनीयादिवदुपपत्तेः । न च क्रियायोग एवाचार्यकमिति **वाच्यम्**; तूष्णीमुपनीय वेदाध्यापके तत्पदप्रयोगाभावात् । विशिष्टक्रियायोगो वाच्य इति चेत्, तर्हि बलात् अदृष्टमापतितम् । प्राङ्मुखत्वादिनियमस्य अलौकिकक्रियासंबन्धः अदृष्टोत्पादकत्वेनैव भवति । प्राङ्मुखभोजनादिविहितानेकनियमयुक्ताध्यापके आचार्यपदप्रयोगात् अलौकिकमाचार्यकमिति । उपाध्यायपदमप्येवं चेदेवम् । नो चेत्, नैवमिति न तत्राऽऽस्था । किञ्च ' आचार्याय वरो देयः ' इत्यतीतेऽपि क्रियायोगे वैदिकप्रयोगदर्शनात् तदानीमपि अनुवर्तमानस्यादृष्टस्यैव आचार्यपदवाच्यत्वं युक्तम्, इतरथा लक्षणाप्रसङ्गात् । न च ' आचार्याधीनो वेदमधीष्व ' इति प्रयोगदर्शनात् क्रियायोग एव मुख्य इति **वाच्यम्** । क्रियायोगादृतेऽपि तदानीं भावात्, मतान्तरेऽपि तुल्यत्वात् । **तर्हि** मुख्यार्थत्वाय अर्थान्तरकल्पनायां सर्वत्र लक्षणोच्छेदप्रसङ्ग इति **चेन्न**, अत्रापि पूर्वोक्तेन न्यायेनार्थस्य सिद्धत्वात् । अयं च वाच्यत्वे हेतुः, नादृष्टकल्पनायाम् । अतः अलौकिकत्वात् आचार्यकस्य तदुपायतया अध्यापनविधिर्युक्तः । **ननु** अत्रापि नियोज्यो न श्रूयते । आचार्यकफलश्रवणात् कल्प्यते इति चेत् तर्हि तत्राप्यर्थज्ञानदर्शनात् किमिति न कल्प्यते ? **नैवम्**, अध्यापनविधेरर्थलभ्याधिकारत्वात् । आचार्य-

कस्य लौकिकत्वेऽपि दक्षिणाऽऽदिसाधनत्वेन स्मृतिविहितत्वात् । काम्यमानत्वं द्रव्यार्जननियमवत्, अर्थज्ञानस्य तु ज्ञातेऽज्ञाते च काम्यमानत्वं न संभवतीति अर्थवादाधिकरणे वक्ष्यामः । अध्यापनस्य अध्ययनमात्रसाध्यत्वात् विशिष्टाध्ययनप्रयुक्तिर्न संभवति, इति चेन्न, उपनयनं तावत् क्त्वाप्रत्ययेन अध्यापनाङ्गमवगम्यते, अध्ययनं चोपनयनं प्रक्रम्य विहितम् । तेन उपनयनप्रयुक्तिनान्तरीयकतया विशिष्टाध्ययनप्रयुक्तिः । आरादुपकारकं तु नास्त्येव । **ननु** द्वितीयाश्रुतेः माणवकाङ्गत्वमवसीयते । द्वितीयाश्रुतेः प्राबल्यम् ' यूपं परिवीयोपाकरोति ' इत्यत्रोक्तम् । **नैवम्** , अध्यापनाङ्गभूतोपनयनस्य द्वारतया माणवकाङ्गत्वोपपत्तेः, अपूर्वाङ्गभूतस्यावघातस्य द्वारतया व्रीहिसंबन्धवत् । स्मृत्यन्तरं च व्यक्तम् 'उपनीय गुरुः शिष्यम्' इत्यादि । **किञ्च** अध्यापनविध्यभावेऽपि स्वविधिप्रयुक्तिर्न संभवति, क्रतुविधिप्रयुक्त्युपपत्तेः । तथा च सति स्वर्गकामस्य शूद्रस्याप्यधिकारः स्यात् । अनुपनीतनिषेधोऽपि प्रत्यासन्नत्रैवर्णिकानुपनीतविषय एव । शूद्रोल्लेखेन निषेधोऽपि रागप्रवृत्तविषयः , न वैधविषयः ' न हिंस्यात् ' इतिवत् । अस्मन्मते तु प्रयोज्यापेक्षया अङ्गकार्यार्थतया च अध्यापनविधेः प्रयुक्तिः शीघ्रतरा, क्रतुविधेस्तु प्रयोज्यफलविद्यापेक्षया अङ्गोपायापेक्षया च विलम्बिता । श्रौतो वा आचार्यकरणविधिः ' अष्टवर्षं ब्राह्मणमुपनयीत ' ' तमध्यापयेत् ' इति । अत्र आचार्यकरणप्रयोजने नयतेरात्मनेपदविधेराचार्यकरणार्थमुपनयनमवगम्यते, तच्च तदुत्पत्तिविधेर्निर्वहति इत्युत्पत्तिविध्यपेक्षायाम् ' तमध्यापयेत् ' इत्ययमाचार्यकरणविधिः । **न च** ' अध्यापयेत् ' इति परस्मैपदं नोपपद्यते, कर्त्रभिप्राये ' णिचश्च ' इत्यात्मनेपदापत्तेरिति **वाच्यम्** । ' बुधयुध ' इत्यादिना विशेषतः परस्मैपदविधेः । न च ' अचित्तवत्कर्तृकार्थोऽयमारम्भः' इति वृत्तिग्रन्थविरोधः, ' अणावकर्मकाच्चित्तवत्कर्तृकात् ' इत्यकर्मकेषु चित्तवत्कर्तृकाणां प्राप्तत्वादकर्मके एव चित्तवत्कर्तृकार्थतामाह, अस्य सकर्मकत्वादिङो न विरोधः । न चास्मिन् सूत्रे ' इण् गतौ ' इति धातुः पठितः ' माणवकमध्यापयति ' इत्युदाहरणात् 'निगरणचलनार्थेभ्यश्च' इति गत्यर्थस्य इणः प्राप्तत्वात् । अतो न परस्मैपदविरोधः ।

ननु ' उपनयीत ' इत्यात्मनेपदं नोपपद्यते, कर्त्रभिप्रायेण स्वरितञित्सूत्रेण प्राप्ते संमाननसूत्रवैयर्थ्यं स्यात् , तथा च वृत्तिकारः ' अकर्त्रभिप्रायार्थोऽयमारम्भः ' इति । नैवं क्रियाफलस्य कर्त्रभिप्रायत्वे स्वरितञित्सूत्रं प्रवर्तते । अत्र तु कारकावस्थायां क्रियाफलमुपनेयगतमेव, आचार्यकं तु प्रयोजनमिति तस्य कर्त्रभिप्रायत्वेऽपि स्वरितञित्सूत्रेण न प्राप्तिः , एवं च संमाननसूत्रं आचार्यकरणे सार्थकं स्यात् , इतरथा ' स्वरितञितः कर्त्रभिप्राये क्रियाफले ' इति सूत्रेणैव गतार्थत्वादाचार्यकरणे आत्मनेपदविधानं व्यर्थं स्यात् । क्रियाफलतत्प्रयोजनविभागे तु सूत्रद्वयमपि समञ्जसं भवति । **ननु** ' अग्नीनादधीत ' ' ओदनं पचते ' इत्यात्मनेपदं न स्यात् , क्रियाफलस्य विक्लेदनस्य कर्मगतत्वात् । **नैवम्** , कर्मगतत्वेऽपि क्रियाफलस्य प्रयोजनस्य कर्त्रभिप्रेतत्वात् । **ननु** अत्र उपनेयासत्तिरूपं क्रियाफलं कर्त्रभिप्रेतम् , तस्य कर्मणोऽध्ययनेऽस्ति उपयोगः , कर्तुरध्यापने । **मैवम्** , आसत्तिरूपस्य क्रियाफलत्वाभावात् , साङ्गोपनयने कृते यन्माणवकगतं तत् संस्काराख्यं फलं नासत्तिरूपम् , तस्य लौकिकोपनयनेनापि समानत्वात् । एवं च क्रियाफलं अकर्त्रभिप्रेतमेवेति स्वरितञित्सूत्रस्याविषयत्वात् संमाननसूत्रारम्भः सार्थक इति सिद्धं आत्मनेपदादपि उपनयनस्याध्यापनाङ्गत्वम् । प्र. वि. पृ. १–६.

※ **प्रयुक्तिविचारप्रतिज्ञा** । प्रयोज्यप्रयोजकभावविचारप्रतिज्ञा ॥

अर्थे समवैषम्यमतो द्रव्यकर्मणाम् । ४।१।८।२१ ॥

भाष्यम्-- अतिक्रान्तस्तृतीयविषयः । अतः प्रभृति द्रव्याणां कर्मणां चार्थे प्रयोजने समवैषम्यं वक्ष्यते । क्वचित्साम्यं क्वचिद्वैषम्यम् । आमिक्षावाजिनयोर्वैषम्यम् , कयपांसूनां वैषम्यम् , दण्डस्य मैत्रावरुणधारणे यजमानधारणे च साम्यम् । एवं तत्रतत्र द्रष्टव्यं साम्यं वैषम्यं चेति ।

वि-- ' शेषत्वमुपरिग्रन्थे चिन्तनीयमुतेतरत् ।, शेषो मानात् , न तस्यात्र प्रयुक्ताख्यफलेरणात् ॥ '

भाट्ट-- एवं तावत् क्रत्वर्थपुरुषार्थविचारद्वारेण प्रयोजकत्वं चिन्तितम् । इदानीं तु साक्षादेव तत् चिन्त्यते । तत्सिद्ध्यर्थस्तु क्वाचित्कोऽङ्गाङ्गिभावविचारः इति सुखग्रहणार्थं प्रतिज्ञामात्रमिदम् ।

मण्डन-- ' तृतीयविषयो गतः । '

शंकर-- ' साम्यं वैषम्यमर्थगम् । '

* **प्रयोक्तृत्वाप्रयोक्तृत्वयोः** प्रयोक्तृत्वं श्रौतम्, अनपेक्षावगमात् । **बृहती**. पृ. ३१–३२.

* **प्रयोगः** अनुमानाद् बलवान् । **भा.** २।३।२।३ पृ. ५८५. * प्रयोगः ऋग्यजुर्मन्त्राणां यज्ञकर्मणि तानस्वरेण । तानः एकश्रुतिः । ९।२।८।३०–३१ वर्णकं ३. * प्रयोगश्च अङ्गप्रधानसाधारणः । **भाट्ट.** ११।२।७, **सु.** पृ. ७८७. * प्रयोगश्चोद्यते ' दर्शपूर्णमासाभ्यां यजेत ' इति । फलस्य क्रियाऽर्थौ दर्शपूर्णमासौ श्रूयेते ' दर्शपूर्णमासाभ्यां स्वर्गं कुर्यात् ' इति । तत्र आकाङ्क्षा भवति 'कथम्' इति । सा समिदादिभिर्निवर्त्यते ' समिधो यजति ' इत्येवमिति । तदर्था एताः समिदादिचोदनाः, तेन आकाङ्क्षितत्वात् अफलत्वात् फलवत्संनिधानाच्च । सैषा दर्शपूर्णमासयोः फलं साधयतोः इतिकर्तव्यता । न च इतिकर्तव्यतामन्तरेण कर्मचोदना अर्थवती भवति । तस्मात् सेतिकर्तव्यताकस्य कर्मणः प्रयोगश्चोद्यते । तथा च सिद्धत्वात् प्रधानप्रयोगवचनेनैव शब्देन अङ्गानां प्रयोगश्चोद्यते इति । **भा.** ११।१।२।८. * प्रयोगो वारुणचतुष्कपालानां मेदेनैव, साहित्यस्याविवक्षितत्वात् । परन्तु वार्तिके तन्त्ररत्ने च ' वचनान्तरमेतेषां साहित्ये द्रष्टव्यम् ' इत्युक्तम् । **सोम.** ५।२।१. * प्रयोगः सकृद् अवहननमन्त्रस्य प्रहारसमुदायार्थः , दर्शपूर्णमासयोः । **भा.** ११।४।१२।४२ . * प्रयोगः सर्वाङ्गोपसंहारेण । ११।१।३।११–१९. * प्रयोगः सर्ववैकल्पिकानि आदित एव अन्यतोऽवधार्य आरभ्यते । **वा.** ३।५।१८।४६ . * प्रयोगः साधूनामेव पदानाम् । **वि.** १।३।९ . * सर्वेषामेव शब्दानामर्थज्ञाने लौकिकः **प्रयोगोऽभ्युपायः** । **भा.** ६।१।१।१ पृ. १३४७. * **प्रयोगात्** चोदको बलवान् । वि. ५।१।१० . * प्रयोगात् (शब्दप्रयोगात्) स्मृतिर्बलीयसी । प्रयोगाद्धि स्मृतिरनुमीयते । **भा.** २।३।२।३ , * **प्रयोगस्य** (शब्दप्रयोगस्य) असार्वलौकिकस्य सार्वलौकिकेन प्रयोगेण विरुध्यमानस्य अप्रामाण्यं स्यात् । २।३।२।३ , * **प्रयोगे** असदायत्ते किमिति अवाचकं प्रयोक्ष्यामहे विद्यमाने वाचके । ९।३।४।१४. * प्रयोगे एकस्मिन् प्रयाजाद्यङ्गस्य सकृदनुष्ठानम् । ११।१।७।२९–३७. * प्रयोगे एकस्मिन् फलद्वयसिद्धययोगः । **सु.** पृ. ८९७.

※ **प्रयोगे पुरुषश्रुतेर्यथाकामी प्रयोगे स्यात् । ६।२।२।३॥**

प्रयोगे प्रयोजके प्रवर्तके स्वर्गकामादिवाक्ये पुरुषश्रुतेः ' स्वर्गकामः ' इति एकवचनस्य अविवक्षितत्वेन संख्याविशेषशून्यपुरुषमात्रस्य श्रवणात् प्रयोगे अनुष्ठाने प्रयुज्यमाने कर्मणि वा एको द्वौ बहवो वा कर्तारः इति यथाकामी स्यात् । यायाकामी इति वा पाठः । यथा इच्छा तथा स्यादित्यर्थः । प्रयोगे अपुरुषश्रुतेः पुरुषस्य संख्याविशिष्टस्य अश्रवणात् । तथा च कर्त्रेकत्वनियमः इति पूर्वपक्षः । अत्र प्रयोगे अपुरुषश्रुतेः इति कुतूहले पाठः । वार्तिके तु पुरुषश्रुतेः अपुरुषश्रुतेः इति द्वेधा पाठः । यायाकामी इति कुतूहलपाठः ।

प्रत्यर्थं श्रुतिभाव इति चेत् । ४ ॥

पूर्वपक्षे सूत्रेण प्राप्ते सिद्धान्ती आह । प्रत्यर्थं अर्थमर्थं प्रति, प्रत्येकं गुणभावप्रधानभावरूपार्थद्वये श्रुतिभावः ' यजेत स्वर्गकामः ' इति श्रुत्यभिप्रायः । तत्र फलं प्रति पुरुषस्य प्रधानभावे तद्गतसंख्या अविवक्षिता भवतु तथापि यागानुरक्तां क्रियां विदधता आख्यातेन क्रियागुणभूतकर्तुराक्षेपात् विधेयगता संख्या विवक्षिता स्यात् । तस्मादेक एव कर्ता । इति चेत् सिद्धान्ती ब्रूयात् ।

तादर्थ्ये न गुणार्थताऽनुक्तेऽर्थान्तरत्वात् कर्तुः प्रधानभूतत्वात् । ५ ॥

अत्राह पूर्वपक्षी । तादर्थ्ये तदर्थत्वे फलार्थत्वे पुरुषस्य प्राधान्यात् न गुणार्थता, गुणभूतयागाङ्गत्वं न स्यात् प्रधानत्वगुणत्वयोरेकत्र विरोधात् । अनुक्ते न्याये उभयभावं न प्रतीमः । अर्थान्तरं यतः गुणभावात् प्रधानभावः । अत्र कर्तुः प्रधानभूतत्वात् न गुणभावः शक्यो

विशतुम् । तस्मात् कर्तृसंख्यायां याथाकाम्यं इति पूर्वपक्षः ।

अथवा । अनुक्ते शब्देन अनुक्तेऽपि विरोधे अर्थान्तरत्वात् प्रत्यक्षादिप्रमाणान्तरगम्यत्वात् । प्रधानस्य पुरुषस्य न गुणार्थता । कर्तुः प्रधानत्वात् तादर्थ्ये सति इत्यन्वयः । इति वृ. ।

अथवा । तादर्थ्ये, स्वर्गस्य पुरुषाभिलषणीयत्वे अवगते सति पुरुषस्य तद्वोक्तुः स्वर्गं यागं वा प्रति न गुणार्थता संभवति । अनुक्ते न्याये संख्याविवक्षा भवेत् । उक्तश्च ग्रहैकत्वन्यायः प्रधानगता संख्या न विवक्षिता इति । न च संख्यायाः विवक्षा चाविवक्षा च संभवतः अर्थान्तरत्वात् अर्थभेदात् अर्थान्तरत्वप्रयुक्तवाक्यभेददोषापातात् । कर्तुः प्रधानभूतत्वात् । प्रधानपदं भावप्रधानं प्राधान्यमित्यर्थः । भूतं इति भवतेश्चौरादिकात् प्राप्त्यर्थात् निष्ठा प्राप्तमित्यर्थः । प्रधानभूतत्वात् प्राधान्यं प्राप्तत्वात् । यागं प्रति कर्तुः पुरुषस्य एकस्यैव फलभोक्तृत्वलक्षणं प्राधान्यं प्राप्तत्वात् प्रकृते नास्ति पुरुषभेदः । तस्मादविवक्षिता संख्या । इति कु. ।

चोदनैकत्वात् । ६ ॥

वस्तुतः नास्त्येव गुणभावः इत्याह पूर्वपक्षी । 'यजेत स्वर्गकामः' इति एकैव विधायिका चोदना । सा यदि फलोत्पत्तिं यागोत्पत्तिं वा विधत्ते, तदा कर्ता न स्वार्थेन । यदा पुनः स्वार्थेन, तदा यागः फलं वा तादर्थ्येन । न चैतद्यौगपद्येन भवति । तस्मात् न यागे फले वा पुरुषस्य गुणभावः । अतः एको द्वौ बहवो वा यजेरन् इति पूर्वः पक्षः ।

अपिवा कामसंयोगे संबन्धात् प्रयोगायोपदिश्येत, प्रत्यर्थं हि विधिश्रुतिर्विषाणावत् । ७ ॥

अपिवा इति पूर्वपक्षव्यावृत्तिः । स्वर्गकामः इति कामेन काम्यमानेन फलेन संयोगे गम्यमाने, संबन्धात् यजेतेत्येकवचनेन एकस्यैव कर्तुः संबन्धात् यागस्य प्रयोगाय अनुष्ठानाय एक एव कर्ता उपदिश्येत न द्वौ बहवो वा । यत्र तु अनेके अर्था वक्तव्या भवन्ति तत्र प्रत्यर्थं अर्थेअर्थे विधिश्रुतिः पृथक् भवति । विषाणावत् । यथा 'कृष्णविषाणया कण्डूयति' इति विषाणाकरणककण्डूयने पृथक् विधिः, 'चात्वाले कृष्णविषाणां प्रास्यति' इति विषाणाकर्मकप्रासने पृथक् विधिः । प्रकृते तु विधिश्रुतिः पृथक् नास्ति, तस्मात् स्वर्गकाम इति वा यजेत इति वा एकवचनं विवक्षितमेव । अत एक एव कर्ता । हिशब्दः कृष्णविषाणादृष्टान्तस्य प्रसिद्धयर्थकः । कर्तृशब्देनात्र यजमान एव ग्राह्यः ।

अत्र भाष्यपदानि सूत्रार्थप्रतिपादकानि इमानि भवन्ति– अपिवेति पक्षव्यावृत्तिः । प्रयोगाय उपदिश्येत कर्ता, न स्वार्थेन । कामसंयोगे संबन्धात् कामस्य आत्मसंबन्धोऽवगम्यते संबन्धात् । फलकामः आत्मन एव फलं कामयते, न परस्य । यत्र तु उभौ अर्थौ वक्तव्यौ भवतः प्रत्यर्थं तत्र विधिः श्रूयते । यथा 'कृष्णविषाणया कण्डूयति, चात्वाले कृष्णविषाणां प्रास्यति' इति ।

अथ **सुबोधिनी**– आख्यातस्य इति शेषः । कामसंयोगे कामस्य कामशब्दस्य संयोगो यस्मिन् तत् कामसंयोगं 'यजेत स्वर्गकामः' इति वाक्यम् । तस्मिन् कामसंयोगे वाक्ये आख्यातस्य संबन्धात् घटकत्वेन संबन्धात् प्रयोगाय पुरुषप्रवृत्त्यर्थं उपदिश्यते श्रूयते । आख्यातसंख्या विवक्षितेति भावः । प्रत्यर्थं प्राधान्यार्थं विधेयत्वार्थं च विधिश्रुतिः विधितात्पर्यज्ञापिका यथा विषाणायां तथा अत्र नेति ।

अथ **कुतूहलम्**–– यत्र गुणप्रधानभावौ उभौ विधित्सितौ भवतः तत्र प्रत्यर्थं प्रत्येकं विधिश्रुतिः विधायिका श्रुतिरस्ति । विषाणवत् । त्रिलिङ्गो विषाणशब्दः । कामसंयोगे कामसंयुक्ते वाक्ये प्रयोगाय यागं प्रयोक्तुं पुरुषः कर्तृत्वेन एकत्वेन च उपदिश्येत, न तु फलं प्राप्नुयादिति फलव्याप्यत्वलक्षणप्रधानत्वेन । कुतः ? संबन्धात् अर्थादेव फलव्याप्तेरवगमसंभवात् । इति ।

अन्यस्यापीति चेत् । ८ ॥

पूर्वपक्षी आह–– अन्यस्यापि स्वर्गं कामयमानः कश्चिदयालुः अन्यो यजेत । इति चेत् पूर्वपक्षी ब्रूयात् ।

अन्यार्थे नाभिसंबन्धः । ९ ॥

सिद्धान्ती आह । अन्यस्य स्वर्गं कामयमानोऽपि स्वर्गकामपदवाच्यः स्यान्नाम तथापि अन्यार्थे अनुष्ठाने

सति तस्य अन्यस्य फलेन स्वर्गेण अभिसंबन्धो न स्यात् । कर्तृगामिनि क्रियाफले एव उभयपदाद्धातोः आत्मनेपदविधानात् अत्र यजेत इति आत्मनेपदप्रयोगात् ।

अन्यार्थेन अन्यस्य स्वर्गेच्छावता समं कर्तुं न अभिसंबन्धः, न अभेदः । आत्मनेपदश्रवणात् इति पूरणीयं इति **सुबोधिनी** । अन्यस्य इति पूर्वसूत्रादनुवर्तते । 'नार्थेनाभिसंबन्धः' इति सूत्रम् । अर्थेन फलेन अन्यस्य अभिसंबन्धः व्याप्यमानत्वं न भवति । यजेत इत्यात्मनेपदस्य कर्तृगामिनि फले विहितत्वात् । इति **कुतूहलम्** ।

फलकामो निमित्तमिति चेत् । १० ॥

आह पूर्वपक्षी । स्वर्गरूपं फलं अन्यस्य कामयमानोऽपि फलकामः आनुषङ्गिकफलकामः 'आशास्तेऽयं यजमानः आयुराशास्ते सुप्रजास्त्वमाशास्ते' इत्यादि सूक्तवाकोक्तं फलं स्वस्य कामयमानः 'यजेत' इत्यात्मनेपदस्य निमित्तं भवेत् । इति चेत् ब्रूयात् पूर्वपक्षी ।

फलकामः स्वर्गकामपदं निमित्तं यजेत इत्यात्मनेपदस्य निमित्तत्वद्योतकम् । इति चेत् । इति **सुबोधिनी** । फलकामः प्रयोक्तृगताङ्गफलकामना आत्मनेपदस्य निमित्तं इति चेत् । इति कुतूहलम् ।

न नित्यत्वात् । ११ ॥

पूर्वपक्षिणः शङ्कां सिद्धान्ती निरस्यति । न केवलं आनुषङ्गिकफलकामना संभवति । यस्यैव प्रधानकर्मफलं तस्यैव आनुषङ्गिकमपि फलं भवितुमर्हति । प्रधानयागफलस्यैव प्रयोक्तृगामित्वे आत्मनेपदस्य नित्यत्वात् । तस्मात् स्वस्यैव यागफलमिच्छन् यजेत न परस्य । स च यागकर्ता एक एव, न द्वौ बहवो वा ।

कर्म तथेति चेत् । १२ ॥

पूर्वपक्षी शङ्कते । बहिष्पवमाने श्रुतं 'युवं हि स्थः स्वर्पती इति द्वयोर्यजमानयोः प्रतिपदं कुर्यात्, एते असृग्रमिन्दवः इति बहुभ्यो यजमानेभ्यः प्रतिपदं कुर्यात्' इति, अत्र स्पष्टमेव यजमानद्वित्वं यजमानबहुत्वं चोक्तम् । एवं च द्वियजमानके बहुयजमानके च कर्मणि प्रतिपद्विधाने कर्म तथा द्विबहुयजमानकमेव स्यात्, तथा च यजमानसंख्याया याथाकाम्यम् । इति चेत् पूर्वपक्षी ब्रूयात् । **कुतूहले तु**, तथा सत्येव यजमानसंख्याया अविवक्षितत्वे सत्येव द्विबहुयजमानके ज्योतिष्टोमे प्रतिपद्विशेषयुक्तं बहिष्पवमानकर्म श्रूयमाणं संगच्छेत इति व्याख्यातम् ।

न समवायात् । १३ ॥

यदुक्तं पूर्वपक्षिणा तत् न । समवायात् तादृशस्य बहिष्पवमानस्य अहीने समवायात् । केषु चिदहीनेषु सत्रेषु कुलाययज्ञे च अनेकयजमानकत्वमस्त्येव । तत्रैतत् प्रतिपद्विशेषविधानम् । तत्र तत् समवैति । तस्मात् दर्शपूर्णमासज्योतिष्टोमादौ यजमानैकत्वं विवक्षितमेव । तस्मात् एको यजेत, न द्वौ बहवो वा । **के.**

* **प्रयोगाङ्गं** देशकालकर्तारः न विधिशेषाः । **भा.** ११।२।१।१–२, ४–७, * प्रयोगाङ्गं हि कालः पदार्थानामुपकारकः । १।३।३।७.

* **प्रयोगाङ्गत्वाख्यः** न्याय एव चिकीर्षाऽधिकरण- (३।७।३।७,९) मुख्यसिद्धान्तयुक्तिः । **सु.** ३।७।९ पृ. ९.

* **प्रयोगैयत्ताविचारार्थ** एकादशोऽध्यायः शेषेयत्ताप्रसङ्गेन । **टुप्.** ७।१।१।१.

प्रयोगोत्पत्त्यशास्त्रत्वाच्छब्देषु न व्यवस्था स्यात् । १।३।९।२४ ॥

गौर्गावी गोणी गोपोतलिकेत्येवमादयः शब्दा उदाहरणम् । यथा गोशब्दः सास्नादिमतः प्रमाणं तथा गाव्यादयोऽपि, उत नेति संदेहः । किमत्र एकः शब्दः अविच्छिन्नपारम्पर्यः अर्थाभिधाने, इतरे तु अपभ्रंशाः, उत सर्वे अनादय इति । अत्र **प्रभाकरेण** संगतिलोभात् 'न चोदाहरणमादरणीयम्' इति भाष्यकारीयमुदाहरणमनादृत्य 'अश्वमालभेत' इत्यादिचोदनागतः अश्वशब्दः उदाहृत्य विचारितः । लोके अश्वशब्दस्य तुरगे दरिद्रे च प्रयोगो दृश्यते । तत्र च न ज्ञायते कुत्रायं साधुः, कुत्र चासाधुरिति । न च व्याकरणस्मृतिर्विनिगमनाकारणम् । निर्मूलत्वेन तस्याः प्रमाणत्वासंभवात् । अतः 'अश्वमालभेत' इत्यनध्यवसितार्थाश्वपदवती चोदना न प्रमाणमिति पूर्वः पक्षः । सिद्धान्तस्तु व्याकरणस्मृतेः अनादिप्रयोगमूलत्वेन प्रमाणत्वात् तद्वशेन तालव्यशकारयुक्तोऽयमश्वशब्दः तुरगे एव साधुः । दन्त्यसकार-

युक्तश्च ' न विद्यते स्वमस्मिन् ' इति व्युत्पत्त्या दरिद्रे साधुः, न तालव्यशकारयुक्त इति ' अश्वमालभेत ' इति चोदना अध्यवसितार्थत्वात् प्रमाणमेवेति । **तदिदमयुक्तम्**, पूर्वपक्षे हि व्याकरणस्मृतेर्निर्मूलत्वेन अप्रामाण्ये सति प्रयोगवशादेव सर्वत्र साधुत्वं वक्तव्यम् । तच्चोभयत्रापि अविशिष्टमिति तुरगे दरिद्रे च अयमश्वशब्दः प्रयुज्यमानः साधुरेव । तथा च सति अनेकार्थाक्षादिशब्देष्विव अर्थप्रकरणाभ्यामध्यवसायसंभवात् नानध्यवसायात् अप्रामाण्यम् । इति यथावार्तिकमेवाधिकरणं प्रस्तूयते । पूर्वं स्मृत्याचारयोर्धर्मं प्रति सर्वप्रकारं प्रामाण्यं निरूप्य इदानीं प्रसङ्गेन व्याकरणस्मृतेः शब्दसाधुत्वं प्रति प्रामाण्यमस्ति नास्तीति ' साधुमिर्भाषित ' इति साधुशब्दस्य धर्मं प्रति उपयोगित्वेन निरूप्यते । अयमेवात्र पारमार्थिकः संदेहः । भाष्यकारेण तु किं सर्वे गोगाव्यादयः शब्दाः सास्नादिमत्पदार्थे साधवः उत गोशब्द एव साधुः गाव्यादयः अपभ्रंशाः इति फलभूतः संशयो दर्शित इति मन्तव्यम् ।

अत्रायं पूर्वपक्षिणोऽभिसंधिः— गोगाव्यादिशब्दानां साध्वसाधुविवेके व्याकरणस्मृतिः प्रमाणं भवेत्, यदि मन्वादिस्मृतिवत् मूलभूतं प्रमाणमनुमातुं शक्येत । तत्र न तावत् प्रत्यक्षं मूलं संभवति, तस्य वर्णस्वरूपातिरिक्तवाचकशक्तिरूपसाधुत्वविषयत्वासंभवात् । नापि व्याकरणस्मृतिसहकृतम्, निर्मूलत्वेन व्याकरणस्मृतेः सहकारित्वासंभवात् । नाप्यनुमानम्, तत्प्रतिबद्धलिङ्गाभावात् । नापि शब्दः, तस्य पौरुषेयत्वे अन्धपरम्परादोषात् । अपौरुषेयस्य च प्रवृत्तिनिवृत्तिविषयत्वेन सिद्धविषये प्रामाण्यायोगात् । उपमानं तु सादृश्यैकविषयत्वात् अनाशङ्कनीयमेव । नापि अर्थापत्तिः, तस्या अपि अर्थप्रतिपत्त्यन्यथाऽनुपपत्तिप्रभवत्वेन गाव्यादिष्वपि अविशेषात् । अतः पञ्चप्रमाणानुत्पत्त्या व्याकरणस्मृतिमूलं अभावप्रमाणविषयमेवेति सिद्धम् । किञ्च स्ववचनव्याघातादपि व्याकरणमप्रमाणं साधुत्वे । तथा हि 'जनिकर्तुः प्रकृतिः ' (पा० १।४।३०) इति सूत्रम् । अत्र जनिशब्देन जननमेव विवक्षितम् । तेनायमर्थः, जननस्य कर्ता जायमानः तस्य या प्रकृतिः उत्पादकः तस्य अपादानसंज्ञा भवति । न च जनिशब्देन इगन्तेन जननमभिधीयते, ' इक्श्तिपौ धातुनिर्देशे ' इति स्वयमेव प्रतिषिद्धत्वात् । तथा जनिकर्तुरिति समासोऽप्यनुपपन्नः, ' तृजकाभ्यां कर्तरि ' (पा० २।२।१५) इति तृजन्तस्य कर्तृशब्दस्य स्वयमेव षष्ठीसमासप्रतिषेधात् । तथा अकप्रत्ययान्तस्यापि अनेनैव षष्ठीसमासनिषेधात् ' तत्प्रयोजको हेतुश्च ' (पा० १।४।५५) इत्यत्र सूत्रे तस्य प्रयोजक इति तच्छब्देन सह अकप्रत्ययान्तस्य प्रयोजकशब्दस्य षष्ठीसमासोऽपि अनुपपन्नः ।

एवमर्थविषयानवधारणादपि न प्रमाणम् । तथाहि, ' भूवादयो धातवः ' इत्यत्र किं धातुशब्दप्रवृत्तिनिमित्तम् ? न तावत् गणपाठः, ' भू सत्तायाम् ' इत्यत्र ' सत्ता ' शब्दस्यापि धातुत्वप्रसङ्गात् । नापि क्रियावचनत्वम्, ' भू ' इत्येतस्यापि अधातुत्वापत्तेः । अत एव न मिलितयोरपि धातुशब्दप्रवृत्तिनिमित्तत्वम्, ' भू सत्तायाम् ' इत्यत्रेव क्रियावचनत्वाभावात् । तस्मादर्थानिश्चयादपि अप्रामाण्यम् । एवं कारकानुशासनमपि असंबद्धमेव । तथाहि, ' स्वतन्त्रः कर्ता ' इति कर्तृलक्षणम् । अत्र च स्वातन्त्र्यमेव न ज्ञायते । यदि इच्छाप्रयत्नाधारत्वं स्वातन्त्र्यम्, तर्हि ' काष्ठानि पचन्ति ' ' स्थाली पचति ' इत्यत्र अकर्तृत्वप्रसङ्गः । अथ धातूपात्तव्यापारत्वं कर्तृत्वम्, तर्हि पचतीत्यत्र पचिधातुना स्थालीसंमार्जनोपक्रमस्य सिक्थपरीक्षणपर्यन्तस्य व्यापारनिचयस्य उपात्तत्वात् सर्वकारकाणामपि कर्तृत्वप्रसङ्गः ।

एवं कर्मादयोऽपि अधिकरणपर्यन्ताः सर्वे एव दुर्निश्चया इत्युक्तमपि वार्तिके विस्तरभयात् नोच्यते । अतो व्याकरणस्य साधुशब्दप्रयोगोत्पत्तौ अशास्त्रत्वात् तदनुगतेष्वेव शब्देषु साधुत्वं नावतिष्ठते इति न साधुत्वं प्रति व्याकरणस्मृतेः प्रामाण्यम् । इति । एवं प्राप्ते, **अभिधीयते—**

शब्दे प्रयत्ननिष्पत्तेरपराधस्य भागित्वम् । २५ ॥

अयमभिप्रायः । भवेदेवं यदि शब्दसाधुत्वे व्याकरणस्मृतिः प्रमाणं न भवेत् । न च निर्मूलत्वादप्रामाण्यम्; प्रत्यक्षस्यैव मूलत्वात् । तथाहि, साधुत्वं नाम क्वचिदर्थविशेषे स्वाभाविकप्रतिपादनशक्तियोगिनः शब्दस्य

विलक्षणं रूपम् । तच्च प्रकृतिप्रत्ययादिद्वारेण व्याकरणस्मृत्या यस्य प्रतिपाद्यते, तस्यैव व्याकरणस्मृतिसहकृतेन श्रोत्रप्रत्यक्षेणासाधुशब्दव्यावृत्तं साधुत्वरूपं स्फुटतरमद्यतनैस्तावत् प्रतीयते एव, ब्राह्मणत्वमिव मातापितृसंबन्धस्मरणसहकृतेन चाक्षुषप्रत्यक्षेण, रत्नतत्त्वमिव रत्नपरीक्षाशास्त्रज्ञानाहितसंस्कारसहकृतेन चाक्षुषप्रत्यक्षेणेव । तेन पाणिनेरपि पूर्वतरव्याकरणस्मरणाहितसंस्कारसहितश्रोत्रप्रत्यक्षेणैव साधुत्वोपलम्भात् निर्मूलत्वं व्याकरणस्मृतेरिति । नापि अन्धपरम्परा, स्मृतिप्रत्यक्षयोः पौर्वापर्यानादित्वात् । तदुक्तम्— **' यथा च पद्मरागादीन् काचस्फटिकमिश्रितान् । परीक्षका विजानन्ति साधुत्वमपरे तथा ॥ '** इति (वा. १।३।८।२७ पृ. २८२) ।

अतः स्मृत्यन्तराहित–संस्कारसहकृत–प्रत्यक्षमूलत्वात् व्याकरणस्मृतेः प्रामाण्यमेवेति । नापि 'जनिकर्तुः प्रकृतिः' इत्यादिषु स्ववचनव्याघातादप्रामाण्यम् । दृष्टा हि सर्वत्रैव सूत्रकाराणां सूत्रेषु गौणलाक्षणिका एव प्रयोगाः । यथा हि जैमिनेरेव नित्ये वाच्ये औत्पत्तिकशब्दप्रयोगः, तथा जनिशब्दोऽपि धात्वर्थे, जन्मनि लाक्षणिकत्वान्न दोषमावहति । तथा ' तृजकाभ्यां कर्तरि ' इति निषिद्धषष्ठीसमासाश्रयणमपि निषेधस्य वैकल्पिकत्वप्रदर्शनार्थमेव । यच्च ' भूवादयो धातवः ' (पा० १।३।१) इत्यत्र धातुशब्दार्थापरिज्ञानादप्रामाण्यमुक्तम्, तदयुक्तम्, तिङादिप्रत्ययप्रकृतित्वमेव हि धातुत्वम् । एतदेव ' प्रत्ययः, परश्च ' (पा० ३।१।१,२) इति सूत्राभ्यां पाणिनिना स्वयमेव दर्शितम् । यदपि ' स्वतन्त्रः कर्ता ' इति कर्तृलक्षणं स्वातन्त्र्यानिरूपणात् अयुक्तमित्युक्तम्, तदयुक्तम्, क्रियासिद्ध्यनुकूलेतरकारकप्रयोक्तृत्वं हि स्वातन्त्र्यम् । तच्च क्वचिदप्रयुक्तस्य, क्वचिदन्यप्रयुक्तस्य । तदुक्तं भर्तृहरिणा **'प्रवृत्तौ वा निवृत्तौ वा कारकाणां य ईश्वरः । अप्रयुक्तः प्रयुक्तो वा स कर्ता नाम कारकम् ॥'** इति । यस्तु ' काष्ठानि पचन्ति ' इत्यादिषु अचेतनेषु कर्तृनिर्देशः, स वैवक्षिक एवेति मन्तव्यम् । एवं कर्मादिष्वपि ईप्सिततमत्वाद्यूहनीयम् । अतः श्रोत्रप्रत्यक्षमूलत्वेन शब्दसाधुत्वेन व्याकरणस्मृतिः प्रमाणमेवेति गवादिशब्दा एव साधव इति । गाव्यादिशब्दानां पुनः उच्चारणासामर्थ्यतो मूलशब्दापभ्रंशानां विवक्षितेषु मूलशब्दानुसारेण अर्थप्रतिपादकत्वम्, अविवक्षितेषु तु वाचकभ्रान्त्यैवेति ।

प्रयोजनम्— क्रतौ वरणभरणसंकल्पादिवाक्येषु अपभ्रंशेनापि व्यवहर्तव्यम्, यदि पूर्वः पक्षः । सिद्धान्ते तु ' साधुभिर्भाषित ' इति साधुशब्देनैवेति ।

सूत्रं तु— शब्दे अभिव्यज्यमाने तदभिव्यक्तेः प्रयत्नाधीननिष्पत्तिकत्वात् अपराधभागित्वं अपभ्रष्टत्वं अभिव्यञ्जकदोषादेवेति भावः । **तौता.**

प्रयोगोत्पत्त्यशास्त्रत्वाच्छब्देषु न व्यवस्था स्यात् । १।३।८।२४ ॥

गौर्गावी गोणी गोपोतलिका इत्येवमादिषु शब्देषु अयमेव शब्दः साधुः अनेनैव व्यवहर्तव्यम्, नायं साधुः न तेन व्यवहर्तव्यं इति व्यवस्था न स्यात् । व्याकरणस्मृत्या व्यवस्था स्यादिति चेत्, न, प्रयोगोत्पत्त्यशास्त्रत्वात् । प्रयोगस्य उत्पत्तिर्नियमः तस्य अशास्त्रत्वात् शास्त्रमूलकत्वाभावात् । अथवा प्रयोगस्य उत्पत्तिः व्यवस्था यया सा प्रयोगोत्पत्तिः व्याकरणस्मृतिः । प्रयोगोत्पत्तेः अशास्त्रत्वात् मूलभूतश्रुतिरहितत्वात् अप्रामाण्यात् । अथवा साधुभिर्भाषित असाधुभिर्न इति प्रयोगोत्पत्तेः उच्चारणनियमस्य अशास्त्रीयत्वात् । तस्मात् यः कोऽपि शब्दः कर्मादौ प्रयोक्तव्यः इति पूर्वः पक्षः ।

शब्दे प्रयत्ननिष्पत्तेरपराधस्य भागित्वम् । २५॥

सिद्धान्ती आह । सत्यं साधुत्वासाधुत्वनिर्णयो न सुकरः । कथम् ? शब्दोच्चारणे हि महान् प्रयत्नो भवति । वायुर्नाभेः उत्थितः, उरसि विस्तीर्णः, कण्ठे विवर्तितः, मूर्धानमाहत्य परावृत्तः वक्त्रे विचरन् विविधान् शब्दान् अभिव्यनक्ति । एवं शब्दे उच्चारयितव्ये सति उच्चारयितुः प्रयत्नेन शब्दस्य निष्पत्तेः अभिव्यक्तेः अपराधस्य भागित्वम् । अपराधः अवश्यं भवितुमर्हति । तेन गोणी इत्यादयः शब्दा भवन्ति । तथा च अपराधस्य संभवात् नैकान्ततः सर्वेषामनादित्वम् ।

अथवा शब्दे अप्रयत्ननिष्पत्तेः इति छेदः । यो हि अस्खलितप्रयत्नः शब्दमभिव्यनक्ति तस्य परंपरागत-

शब्दोच्चारणमात्रात् सर्वे समानप्रकारा भवेयुः । यदा तु अप्रयत्ननिष्पत्तिरपि शब्दे संभाव्यते, तदा तत्र अपराधजन्यरूपान्तरापत्तिप्रसङ्गात् न सर्वशब्दानां समानप्रकारत्वम् ।

अथवा शब्दे शब्दविषयस्य प्रयत्नस्य या निष्पत्तिः तस्यां अपराधः सुनिपुणानामपि अविकलकरणानां दृश्यते किमुत अनिपुणकरणानाम्। 'अतश्चानपराधेन व्यज्यमानेषु साधुता। सापराधेष्वसाधुत्वं व्यवस्थैवं च तत्कृता ॥' (वा. पृ. २७५) । ' अपराधस्य भागित्वादुभयं सावकाशकम् । साधोरनियता प्राप्तिरसाधोश्च प्रयोज्यता ॥ ' तथा सति साधुतानियमकारिणो व्याकरणादेः नियामकत्वं उपपद्यते । तस्मात् साधव एव प्रयोक्तव्याः नासाधवः इति सिद्धान्तः ।

शब्दे गाव्यादिशब्दे प्रयुज्यमाने अपराधस्य अयथोच्चारणस्य भागित्वम् । भागो भजनं प्रवृत्तिः । जनकतासंबन्धेन तद्वान् भागी, तस्य भावः भागित्वं प्रवर्तकत्वं इति यावत् । प्रयत्ननिष्पत्तेः प्रयत्नविशेषत एव शब्दस्वरूपस्य यथावत् अभिव्यक्तेः । इति **कुतूहलम्** ।

अन्यायश्चानेकशब्दत्वम् । २६ ॥

ननु सर्वेषामेव वाचकत्वं कुतो न स्वीक्रियते इति चेत् , तत्राह । अनेकशब्दत्वं अनेकः शब्दः वाचको यस्य एकस्यार्थस्य सः अनेकशब्दः , तस्य भावः अनेकशब्दत्वम् । सः अन्यायः । नीयते इति न्यायः । कर्मणि घञ् । घञबन्ताः पुंसि इति नित्यपुंलिङ्गता । नञ्तत्पुरुषे परवल्लिङ्गं इति पुंस्त्वम् । एकस्यार्थस्य अनेकशब्दवाच्यत्वं न युक्तं योग्यार्थापत्त्यनुदयात् अन्यानर्थक्यात् विकल्पापत्तेः अर्थभेदापत्तेः वाच्यत्वावच्छिन्नवाचकाश्रितैकशक्तिमात्रेण उपपत्तेश्च ।

अस्यैव सूत्रस्य रूपपरिवर्तनेन 'अन्यायश्चानेकार्थत्वम्' इति परिभाषा प्रवर्तितेति ज्ञेयम् ।

तत्र तत्त्वमभियोगविशेषात् स्यात् । २७ ॥

ननु गवादिशब्दा एव साधवो वाचकाः गाव्यादिशब्दास्तु अशक्तिजाः इत्यत्र किं विनिगमकम् ? अत आह सिद्धान्ती । तत्र गोगाव्यादिशब्देषु तत्त्वं साधुत्वस्य ज्ञानं अभियोगविशेषात् स्यात् । ' लक्षणश्रवणाभ्यासादभियोगः प्रवर्तते । तेन लक्ष्यान्तरज्ञानं तद्विशेषोऽभिधीयते ॥ ' (वा. पृ. २७८) । लक्षणस्य व्याकरणस्य श्रवणं अभ्यासश्च ताभ्यां अभियोगविशेषो भवति । यत् लक्ष्यं उदाहरणीकृत्य लक्षणं श्रुतमभ्यस्तं च तद्व्यतिरिक्तानामपि तुल्यन्यायानां लक्ष्याणां ज्ञानं भवति । एवं च लक्षणश्रवणाभ्यासातिशयः अभियोगविशेषः । तेन शब्दतत्त्वज्ञानं भवति । तथा च शब्दसाधुत्वे व्याकरणं विनिगमकम् ।

तदशक्तिश्चानुरूपत्वात् । २८ ॥

ननु गाव्यादिशब्दस्य शक्त्या विना कथं अर्थप्रतिपादकता लोकसिद्धा संभवति । तत्राह । तदशक्तिः तेषां गाव्यादिशब्दानां गवाद्यर्थे अशक्तिः नास्ति शक्तिः । अर्थप्रतिपादकता तु गोशब्दानुरूपत्वात् गोशब्दसदृशत्वात् । अयं भावः— गोशब्दमुच्चारयितुकामेन केन चित् इन्द्रियापाटवेन गावीत्युच्चारितम् । अपरेण ज्ञातं सास्नादिमानर्थः अस्य विवक्षित इति । ततः शिक्षित्वा अपरेऽपि सास्नादिमति विवक्षिते गावीत्युच्चारयन्ति । एवं गाव्यादीनां अर्थप्रतिपादकता साधुशब्दस्मरणद्वारा ।

एकदेशत्वाच्च विभक्तिव्यत्यये प्रत्ययः स्यात् । २९ ॥

' कुत आगतोऽसि ' इति पृष्टे ' अश्मकेभ्य आगच्छामि ' इति वक्तव्ये केन चित् ' अश्मकैरागच्छामि ' इत्युक्तम्, तत्र अश्मकप्रातिपदिकस्य एकदेशत्वात् अश्मकेभ्यः इति शब्दस्मरणात् पृष्टस्योत्तरं प्रष्टा प्रतिपद्यते । एवं अश्मकेभ्य इत्यत्र अश्मकैः इति विभक्तिव्यत्ययेऽपि यथा इष्टस्यार्थस्य प्रत्ययो भवति तथा गाव्यादिशब्दात् वाचकसाधुशब्दस्मरणद्वारा अर्थस्य प्रतिपत्तिः । न तु गाव्यादिशब्दः वाचकः साधुः । तस्मात् व्याकरणात् शब्दसाधुत्वासाधुत्वज्ञानम् । साधुरेव प्रयोक्तव्यो नासाधुः इति सिद्धम् । **के.**

* **प्रयोगकाले** पदार्थस्योपस्थानं मन्त्रस्य वचनार्थः । मन्त्रेणोपस्थितः पदार्थः कर्तव्य इति विज्ञायते । **भा.** १२।३।१०।२५.

प्रयोगचोदनाभावादर्थैकत्वमविभागात् । १।३।१०।३०॥

अथ गौरित्येवमादयः शब्दाः किमाकृतेः प्रमाणम् , उत व्यक्तेः इति संदेहे उच्यते । इदं तावत् परीक्ष्यतां किं ये एव लौकिकाः शब्दास्ते एव वैदिकाः , उत अन्ये इति । यदा ते एव, तदा किं ते एव एषामर्थाः , उत अन्ये इति संशयः । अत्र **प्रभाकरेण** य एव लौकिकाः ते एव वैदिकाः उत अन्ये इत्यस्यापि विचारस्य आकृत्यधिकरणोपोद्घाततामभ्युपगत्यापि साक्षात् संगतिलोभात् अप्रामाण्येन पूर्वपक्षमुक्त्वा पृथक् संगतिर्दर्शिता । सा चेयमतिदानरसिकतया जामातृसहायस्यापि यौतुकदानमिव भाति । यतो न हि उपोद्घातस्यापि पृथक् संगत्यपेक्षा भवति । प्रकृतविचारसिद्ध्यर्थतया तत्संगत्यैव तस्य संगतत्वादिति यथावार्तिकमेव अधिकरणं प्रस्तूयते ।

पूर्वाधिकरणे हि गवादिशब्दानां वाचकत्वे निरूपिते तत्प्रसङ्गेन वाच्यनिरूपणमारभ्यते किमेषामाकृतिर्वाच्या, उत व्यक्तिः इति । अस्य च विचारस्य निष्प्रयोजनत्वमाशङ्क्य तत्प्रयोजनवत्त्वाय इदमुपोद्घातेन विचार्यते किं ये एव लौकिकाः शब्दाः ते एव वैदिकाः, ते एवैषामर्थाः, उत अन्ये इति । तत्रायं पूर्वपक्षिणोऽभिसंधिः– ' अथ शब्दानुशासनम् ' इत्युक्त्वा ' केषां शब्दानाम् , लौकिकानां वैदिकानां च ' इत्यभियुक्तानामेव शब्दविदां (महाभाष्यकाराणां) व्यपदेशभेददर्शनात् भेदस्तावदवगम्यते । तथा रूपभेदादपि भेदः । तथाहि, वेदे ' अष्टाकपालः ' इति पठन्ति । लोके च 'अष्टकपालः' इति । तथा वेदे 'अग्निष्टोमः' इति, लोके च ' अग्निस्तोमः ' इति । एवं वेदे ' गृभ्णामि ' इति, लोके ' गृह्णामि ' इति । तथा अर्थभेदोऽपि दृश्यते । वेदे श्रूयते– ' उत्ताना वै देवगवा वहन्ति ' इति, तथा 'सुवर्णपर्णो वनस्पतिः' एवं 'घृतं मधु' इति । न च गवादिशब्दानामेवम्भूतोऽर्थो लोके समस्ति । तेन यत्रापि गवादिशब्देषु रूपभेदो नावगम्यते, तत्राप्यर्थभेदादेव शब्दभेदः सादृश्यनिबन्धनश्च एकत्वाध्यवसाय इति । यत्रापि रूपभेदः तत्रापि तद्भेदादेव अर्थभेदोऽपि । अर्थप्रतिपत्तिस्तु वेदे लौकिकशब्दसादृश्यादेवेति । अतो लोके वेदे च शब्दार्थयोर्भिन्नत्वात् लौकिकगवादिशब्दानामाकृतिव्यक्तिवाचित्वनिरूपणं वेदप्रामाण्यानुपयोगित्वेनायुक्तमेवेति । **एवं प्राप्ते, अभिधीयते** । भवेदेवं यदि लौकिकवैदिकशब्दयोर्भेदो भवेत् । तौ तु प्रत्यभिज्ञानात् लोकवेदयोरपि एकावेव । ये एव गवादिशब्दा लोके प्रतीयन्ते, ते एव वेदेऽपि प्रत्यभिज्ञायन्ते । न च अष्टाकपालाग्निष्टोमगृभ्णामीत्यादिशब्दाः किञ्चिद्विकारात् न प्रत्यभिज्ञायन्ते इति वाच्यम् । यतश्छिन्नलाङ्गूलभग्नविषाणगोव्यक्तिवत् प्रत्यभिज्ञायमानत्वात् । अन्यथा लौकिकाविकृताष्टकपालादिशब्दानां वैदिकाष्टाकपालादिशब्देष्विव अविकृतार्थावगमाभावप्रसङ्गात् । भवतु वा केषाञ्चित् अन्यत्वम् , न चैवम् , अविकृतप्रत्यभिज्ञायमानानां गवादिशब्दानामपि अन्यत्वे किञ्चित् कारणमस्ति ।

व्यपदेशभेदस्तु ब्राह्मणपरिव्राजकवत् भिन्नरूपवैदिकवाक्यान्तर्गतिनिबन्धन एव । यत्तु ' उत्ताना वै देवगवा वहन्ति ' इति तदपि अर्थवादमात्रम् , लोकसिद्धस्य गोपदार्थस्योत्तानवहनरूपक्रियाविशेषप्रतिपादनस्य प्रशंसाऽर्थत्वात् । एवं उदाहरणान्तरमपि स्तुत्यर्थमेव इति । तदुक्तं भाष्ये ' य एव लौकिकाः शब्दास्त एव वैदिकास्त एव चैषामर्थाः ' इति ।

प्रयोजनम्– पूर्वपक्षसिद्धान्तयोराकृत्यधिकरणानारम्भारम्भाविति । सूत्रं तु लोकवेदयोः शब्दरूपस्य अर्थरूपस्य चैकत्वं प्रत्यभिज्ञारूपप्रत्ययाविभागात् । एवं च सति दर्शपूर्णमासादिप्रयोगचोदनानां भावः स्यादिति । **तौता.**

प्रयोगचोदनाभावादर्थैकत्वमविभागात् । १।३।९।३० ॥

गौः इत्येवमादयो य एव लौकिकाः शब्दाः ये च तेषामर्थाः किं त एव वैदिकाः उतान्ये इति विचारे सिद्धान्तमाह । अर्थैकत्वं अर्थस्य अभिधानस्य अभिधेयस्य च एकत्वम् । य एव लोके शब्दा अर्थाश्च त एव वेदे नान्ये । प्रयोगचोदनाभावात् लोकवेदयोः पदपदार्थानामन्यत्वे वैदिकपदानां अगृहीतसंगतिकतया वेदवाक्यार्थबोधाय वाक्योच्चारणासंभवः । प्रयुज्यते इति प्रयोगो वाक्यम् । तस्य चोदना उच्चारणं तस्याः भावात् विद्यमानत्वात् । तथा च प्रयोगचोदनासिद्ध्यर्थं पद-

पदार्थैकत्वं अवश्यं स्वीकार्यं लोकवेदयोः । ननु प्रयोजनमिदम् । हेतुरुच्यताम् । उच्यते, अविभागात् पदपदार्थयोः विभागेन भेदेन अनुपलब्धत्वात् अर्थैकत्वं सिध्यति । पदपदार्थयोर्भेदे तु सर्ववैदिकपदानां अनवगतसंबन्धत्वेन अर्थज्ञानाभावात् क्रियाकारकसंसर्गात्मकप्रयोगचोदनानां अभावात् अभावप्रसङ्गात् । एवं च भावात् अभावात् इत्युभयथा पदच्छेदः । तस्मात् लोके वेदे च पदानां तदर्थानां चैक्यं इति सिद्धान्तः ।

अथ आकृतिः शब्दार्थो व्यक्तिर्वा इति विचारे पूर्वपक्षमाह । व्यक्तिः शब्दार्थो नाकृतिः । प्रयोगचोदनाऽभावात् आकृतेः पदार्थत्वे 'व्रीहीनवहन्ति' 'पशुमालभते' इत्यादीनां प्रयोगचोदनानां अभावात् अभावप्रसङ्गात् । नहि अवहननं आलभनं आकृतेः संभवति । तस्मात् व्यक्तिः शब्दार्थः ।

अद्रव्यशब्दत्वात् । ३१ ॥

शब्दस्य शक्तिः व्यक्तौ एव स्वीकार्या न जातौ । जातिशक्तिपक्षे अद्रव्यशब्दत्वात् द्रव्यशब्दत्वाभावप्रसङ्गात् शब्दस्य द्रव्यवाचकत्वाभावप्रसङ्गात् । 'एका देया, षड् देयाः, द्वादश देयाः' इति आधानदक्षिणाविधायकादिवाक्ये षडादिशब्दानां गोपदेन अन्वयो न स्यात्, गोत्वजातेरेकत्वात् ।

अन्यदर्शनाच्च । ३२ ॥

'यदि पशुरुपाकृतः पलायेत अन्यं तद्वर्णं तद्वयसमालभेत' इति वचने प्रथमं स्वीकृतस्य पशोः स्थाने अन्यस्य दर्शनात् । यदि पशुशब्दः आकृतिवचनः स्यात् तदा अन्यस्य आलम्भो नोपपद्येत । अन्यस्यापि पशोः सैवाकृतिः । तस्मात् व्यक्तिवचनः शब्दः इत्येव स्वीकर्तव्यं इति पूर्वः पक्षः ।

आकृतिस्तु क्रियार्थत्वात् । ३३ ॥

शब्दानां व्यक्तिः शक्योऽर्थः इति पूर्वपक्षे प्राप्ते, सिद्धान्तसूत्रम् । तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः । आकृतिः आकृतिव्यङ्ग्या जातिः शब्दानां शक्योऽर्थः न व्यक्तिः । जातेरेव क्रियार्थत्वात् । 'श्येनचितं चिन्वीत' इत्यादिवाक्यानां श्येनसदृशाग्न्याख्य–स्थण्डिलविशेष–निष्पादकचयनादिक्रियाप्रतिपादकत्वसंभवात् व्यक्तेर्वाच्यत्वे तदसंभवात् ।

न क्रिया स्यादिति चेदर्थान्तरे विधानं, न द्रव्यमिति चेत् । ३४ ॥

शब्दस्य शक्तिराकृतौ इति पक्षे अवहननादिः क्रिया न स्यात् । व्यक्तावेव ह्यवहननालभनादिक्रियायाः संभवः न जातौ, इति चेत् । आकृतिशक्तिपक्षे 'यदि पशुरुपाकृतः पलायेत अन्यं तद्वर्णं तद्वयसमालभेत' इति अर्थान्तरे व्यक्त्यन्तरे विधानं न स्यात् तत्रापि आकृतेरेकत्वात्, इति चेत् । 'षड् देयाः द्वादश देयाः' इत्यादौ षट्त्वादेरन्वयः गवादौ न स्यात् आकृतेरेकत्वात् न द्रव्यं उपदिश्यमानं युक्तं स्यात्, इति चेत् । तस्मात् व्यक्तावेव शक्तिः स्वीकार्या, इति चेत् पूर्वपक्षी ब्रूयात् । त्रिंशैकत्रिंशद्द्वात्रिंशसूत्रेषु पूर्वपक्षहेतवो ये उक्ताः तेषामेव अत्रानुवादः । अत्र च वाक्यत्रयं 'न क्रिया स्यादिति चेत्' इत्येकम्, 'अर्थान्तरे विधानं न स्यादिति चेत्' इति द्वितीयम्, 'न स्यात् द्रव्यमिति चेत्' इति तृतीयम् ।

वस्तुतस्तु अस्मिन् सूत्रे ये पूर्वपक्षहेतवस्त्रय उक्ताः ते पूर्वं सूत्रैरेवोक्ताः इति पुनरनुवादो व्यर्थः इति सूत्रमेवेदं व्यर्थं भवति ।

अत्र **सुधा**-- आकृत्यभिधानपक्षपरामर्शात् आकृतिवाचितायां आलम्भनादिक्रिया न स्यात्, 'अन्यं तद्वर्णं तद्वयसमालभेत' इति चार्थान्तरे आलम्भविधानं न स्यात्, 'षड् देयाः' इति च द्रव्याश्रयस्य संख्यालक्षणस्य वाचकः षडिति शब्दो न स्यादिति पूर्वपक्षसूत्रार्थानुभाषणार्थं सूत्रं इति ।

तदर्थत्वात् प्रयोगस्याविभागः । ३५ ॥

शब्दस्य व्यक्तौ एव शक्तिः नाकृतौ इति पूर्वपक्षे ये हेतवः त्रिंशं सूत्रमारभ्य चतुस्त्रिंशान्तसूत्रेषु उक्ताः तत्र उत्तरमनेन सूत्रेणोच्यते सिद्धान्तिना । प्रयोगस्य अवहननादिप्रयोगस्य तदर्थत्वात् व्यक्त्यर्थत्वात् व्यक्तिद्वारा आकृतौ सिद्धत्वात् न कश्चित् विरोधः । अविभागः, यस्मात् जातेः व्यक्तेः सकाशात् अत्यन्तं विभागो नास्ति तस्मात् न विरोधः । जातिवाचित्वेऽपि लक्षणया व्यक्ति-

बोधकत्वात् अवहननादेरुपपत्तिः । शब्दशक्तिस्तु आकृतावेवेति सिद्धान्तः ।

अत्र **वार्तिकम्**-- तदर्थत्वात् अपूर्वार्थत्वात्, आलम्भनप्रोक्षणाद्यङ्गानां अपूर्वसाधने प्रयोगेण भवितव्यम् । द्रव्यं च अपूर्वसाधनं यागेन स्वसिद्ध्यर्थं आक्षिप्तत्वात्, नाकृतिः असमर्थत्वात् । तदभिधानं तु द्रव्यनियमार्थं प्रतिपत्तव्यं न स्वार्थं जातेरनपेक्षितत्वात् अदृष्टार्थत्वप्रसङ्गात्, साधनत्वाप्रतीतेश्च । यदपि जातेः प्रातिपदिकाभिहितायाः करणत्वं प्रतीयते तदपि द्रव्यनियामकत्वेनैव न साक्षात् अयोग्यत्वात् । तेन आकृत्यभिधानस्य (तदर्थत्वात्--) द्रव्यनियमार्थत्वात् द्रव्ये च आलम्भनप्रोक्षणसंख्याकारकसामानाधिकरण्यादिसंभवाददुष्टता । तदाह— प्रयोगस्य अविभागः (सूत्रं) इति । आकृतिपक्षेऽपि आलम्भनादिप्रयोगस्य द्रव्यात् अविभक्ततैवेति । यद्वा आकृतिव्यक्त्योः अत्यन्तभेदाभावात् कदाचित् व्यक्तिरूपेण द्रव्यं अभिधीयते, कदाचित् सामान्यरूपेण, यथा विवक्षितं तथा, शब्दस्य उभयरूपवस्त्वर्थत्वात् (तदर्थत्वात्) । व्यक्त्यनभिधानेऽपि न प्रयोगस्य विभागः नानारूपतेति । जातेर्वा व्यक्तितः अत्यन्तभेदाभावात् व्यक्तौ कृता धर्मा जातौ कृता एव भवन्ति इति न प्रयोगस्य विभागेन प्रयोजनमिति । यद्वा आकृतिव्यक्त्योरुभयोः (तदर्थत्वात्–) यागार्थत्वात् धर्माणां च यत्र क्व च यागसाधने कृतानां प्रयोजनवत्त्वात् द्रव्यादविभक्ततेति ।

तस्मात् आकृतिपक्षेऽपि आलम्भादिसंभवात् आकृतिरेव शब्दार्थं इति सिद्धम् । के.

* **प्रयोगपरिच्छेदस्य** कर्मसिद्धिं विना असिद्धिः । सु. पृ. ८५६.

* **प्रयोगवचनः** उपसंग्रहः । उपशब्दः समीपवचनः, संशब्दः साकल्यवचनः, ग्रहशब्दो गृह्णातिवचनः । एवं त्र्यंशः प्रयोगवचनः । तत्रायं ग्रहणात्मकस्वरूपः । (अंशत्रयमध्ये यः अनुष्ठापनाख्यग्रहणांशः स प्रयोगवचनस्य स्वरूपं इति भावः) । इतरे त्वस्य समीपकरणसाकल्ये विशेषणे । ताभ्यां विशिष्टः सर्वत्रोपलभ्यते । **टुप्**. १२।१।२।७. * प्रयोगवचनः चोदकात् दुर्बलः जघन्यकालत्वात् इति उक्तं गुणमुख्यव्यतिक्रमाधिकरणे (३।३।२) स्वयम् । वक्ष्यते च भाष्येण (५।१।१०।१८) इत्यत्र । **वा**. ३।७।२३।५१. * प्रयोगवचनश्चोदकापेक्षया दुर्बल इति द्वादशे (१२।१।२।७) वक्ष्यते । **सोम**. ५।१।१०. * प्रयोगवचनस्तान् पदार्थान् प्रापयति येषां क्रत्वर्थत्वम् । **भा**. ५।३।१०।२७, * प्रयोगवचनः प्राप्तानामुपसंग्राहकः । चोदकस्तु धर्माणामुत्पादकः प्रापकश्च । तेन प्रयोगवचनः उत्तरकालः अर्थविप्रकर्षात् दुर्बलः । ९।४।१।५, * प्रयोगवचनः सर्वाङ्गोपसंहारी । ६।१।४।१७, ६।५।१८।५२. * प्रयोगवचनः सर्वाङ्गग्राही । १०।३।४।२६. * प्रयोगवचनः सहकर्तव्यावगतेषु पदार्थेषु सर्वात्मना त्वरमाणस्य यावानेवात्यन्ताशक्त्या कालविप्रकर्षो भवति तावन्मात्रमेव अनुमन्यते । शक्तस्तु क्षणमात्रमपि यदि विक्षेपं कुर्यात् तदस्य प्रयोगवचनविधिः न सहेत । **वा**. १।३।३।६, * **प्रयोगवचनेन** सर्वे पदार्थाः प्रधानकालान्न विप्रकृष्टव्याः इति प्रतिपादितम् । १।३।३।६. * प्रयोगवचनेन हि एकेन शब्देन अङ्गप्रधानानि उच्यन्ते । **भा**. १०।३।१।६, * **प्रयोगवचनात्** उत्पन्नोपसंहारकात् चोदकः उत्पादकः प्रापकश्च बलवान् । तेनाध्वरकल्पायां बार्हस्पत्यधर्माः पूर्वम्, सरस्वत्याज्यधर्माः पश्चात् । ५।१।१०।१७–१८. * **प्रयोगवचनस्य** व्यापारः उपसंग्रहः । चोदकव्यापारोत्तरं उपसंग्रहः । **टुप्**. १२।१।१।३.

* **प्रयोगवचनाश्रयं** चोदकाश्रयेण बाध्यते, यथा श्येने प्राकृताङ्गेषु उद्गातुः कर्तृत्वं चोदकप्राप्तेन नानर्त्विक्कर्तृत्वेन । **बाल**. पृ. १४१.

* **प्रयोगवचनाश्रितं** चोदकाश्रयेण बाध्यते, अप्राप्तबाधः अयम् । **वा**. ३।३।७।१४ पृ. ८६०.

* **प्रयोगवचनाश्रितत्वात्** मुख्यप्रवृत्तिक्रमयोर्दौर्बल्यं चोदकाश्रितत्वात् तु श्रुत्यर्थपाठकाण्डानां बलीयस्त्वम् । **टुप्**. ५।१।१०।१८.

* **प्रयोगवाक्येन** अवधृतस्वरूपाणि कर्माणि गृह्यन्ते । **वा**.२।२।१।१ पृ. ४६६.

* **प्रयोगविधिः** एककर्तृकानेकपदार्थानुष्ठापकः । **सोम**. ५।१।१ पृ. ४०६. * प्रयोगविधिः कृतिसाध्यत्व-

बोधको विधिः। **भाट्ट.** ११।२।१ पृ. १५१. * प्रयोगविधिः क्रमविषयेऽपि दुर्बलः। स्वयंकल्पनाशक्तस्यापि प्रयोगविधेः कल्पनामूलोच्छेदात् न क्रमान्तरकल्पकत्वम्। **सोम.** ५।१।१०, * प्रयोगविधिश्चोदकाद्दुर्बलः, पदार्थप्राप्त्यधीनत्वात् प्रयोगविधेः तत्प्राप्तेश्चोदकाधीनत्वात्। इति अध्वरकल्पायां बार्हस्पत्यचरुनिर्वापः पूर्वं ततः सरस्वत्याज्यनिर्वापः। ५।१।१०. * प्रयोगविधिः चोदकोपजीवितया दुर्बलः। ५।१।१०।१७–१८. * प्रयोगविधिः नित्याधिकारेऽपि सर्वाङ्गविशिष्टमेव प्रधानं अनुष्ठापयति। **सु.** पृ. ५३२. * प्रयोगविधिः साङ्गानुष्ठानबोधको विधिः। स च नित्यकल्पो भिन्नः उत्पत्तिविनियोगविध्युपजीवकश्च। न च किमर्थं तत्कल्पनं इति वाच्यम्। समानदेशकालकर्तृताया अन्येन अलाभात्। तल्लाभाय तस्यावश्यकत्वात्। अङ्गप्रधानविध्येकवाक्यताबोध एव प्रयोगविधिरित्यन्ये। **मणि.** पृ. ९९. * **प्रयोगविधिना** यथा श्रुतिलिङ्गादिभिर्विनियुक्ताः पदार्था विधीयन्ते तथा श्रुत्यर्थादिभिर्विनियुक्तत्वात् क्रमोऽपि प्रयोगविधिना विधीयते। **सोम.** ५।१।१ पृ. ४०६. * **प्रयोगविधेः** निमित्तपरतन्त्रत्वात् तदनुरोधेन निमित्तश्रुतिबाधायोगः। **सु.** पृ. ५३२. * **प्रयोगविधौ** प्रयाजादेर्गुणत्वात् न प्रत्येकमेकक्रियान्वयः। **बाल.** पृ. १६५.

* **प्रयोगविध्याश्रितस्य** दौर्बल्यं तत्रतत्र निरूपितम्। **भाट्ट.** ११।२।७.

* **प्रयोगविधिप्रयोज्यत्वेन** यस्यैव शक्तौ अनुष्ठानप्रसक्तिः, तस्यैव अशक्तौ निमित्तश्रुत्यनुरोधेन त्यागः। **भाट्ट.** ६।२।७.

प्रयोगशास्त्रमिति चेत्। १।३।७।११ ॥

इह कल्पसूत्राणि उदाहरणम्। माशकं हास्तिकं कौण्डिन्यकमित्येवंलक्षणकानि किं प्रमाणं अप्रमाणमिति संदिग्धानि। अत्र प्रभाकरेण संगतिलोभात् इत्थमधिकरणमुपवर्णितम्। कल्पसूत्राणामपि वेदवत् स्वाध्यायानध्यायरूपादराविशेषात् अर्थाविशेषाच्च, माशकादिसमाख्यानां च काठकादिवत् प्रवचनतोऽपि उपपत्तेर्वेदत्वम्। सति च वेदत्वे परस्परव्याघातोऽत्र दृश्यते। तथाहि, 'सर्वासु तिथिषु दर्शपूर्णमासौ' इति कल्पसूत्रम्, पौर्णमास्यमावास्ययोरेवेति वेदाः। न चात्र व्रीहियववत् विकल्पः संभवति। असंकीर्णार्थयोर्हि परस्परविरोधे विकल्पो भवति। अत्र सर्वासु तिथिषु दर्शपूर्णमासाविति पौर्णमास्यमावास्ययोरपि प्राप्तत्वात् विकल्पासंभवेन विरुद्धार्थयोः परस्परव्याघातात् अप्रामाण्यमेवेति पूर्वः पक्षः। सिद्धान्तस्तु स्यादेवम्। काठकादिवत् समाख्यामात्रमत्र भवेत्। किन्तु अविच्छिन्नदृढतरमशकादिकर्तृस्मृतेः तत्कर्तृकत्वमेव। वेदतुल्यादरस्तु नान्तरीयको वेदमिश्राम्नानात्। अतः कल्पसूत्राणां पौरुषेयत्वात् वेदविरोधेन अनादरणीयत्वमेवेति। तदेतदसंबद्धम्। न हि संकीर्णार्थयोः परस्परविरोधेन अप्रामाण्यं भवति। तथा सति 'एका देया' इत्यादिष्वपि अप्रामाण्यप्रसङ्गात्। अथ तत्र फलभूयस्त्वकल्पनया अविरोधः, तथा अत्रापि फलभूयस्त्वार्थमेव पौर्णमास्यमावास्ययोः श्रवणं भविष्यतीति यथावार्तिकमेव अधिकरणं प्रस्तूयते।

पूर्वं मन्वादिस्मृतिमुदाहृत्य तुल्यन्यायतया कल्पसूत्राणां पुराणानां च श्रुतिमूलतया प्रामाण्ये निरूपिते इदानीं कल्पसूत्रमुदाहृत्य तेषामेव स्वातन्त्र्येण वेदवत् प्रामाण्यमाशङ्क्य तन्निराकरणेन स्मृत्यधिकरणन्यायः एव व्यवस्थाप्यते। न च वाच्यम् 'धर्मस्य शब्दमूलत्वादशब्दमनपेक्ष्यं स्यात्' इत्यनुपलभ्यमानमूलशब्दानामेव अष्टकादिस्मृतीनां तन्न्यायविषयत्वात्, कथं प्रत्यक्षोपलभ्यमानमूलानां कल्पसूत्राणामपि तन्न्यायविषयत्वम्। यतो न स्मृतीनामपि सर्वासामनुपलभ्यमानमूलत्वम्, उपनयनादिस्मृतीनां मूलभूतप्रत्यक्षवेदोपलम्भात्। नापि कल्पसूत्राणां सर्वेषामेव प्रत्यक्षवेदमूलत्वम्। नानाशाखागताङ्गोपसंग्राहिणां तेषां मूलभूतकृत्स्नवेदोपलम्भाभावात्। स्वल्पभूयस्त्वे परं विशेषः। न चैतावता तन्न्यायविषयत्वं भवति। यत्तु प्रथमं कल्पसूत्रमात्रमेव उदाहरणमित्युक्तम्, तत् भाष्यानुसारेणेति नादरणीयम्। अत्रायं पूर्वपक्षिणोऽभिसंधिः— स्मृतीनां पुराणानां कल्पसूत्राणां च महाजनादरपरिगृहीतातीन्द्रियार्थविषयत्वात् अग्निहोत्रादिचोदनावत् वेदत्वमेव। तथा आचार्यवचनं प्रमाणमिति वेदादेवावगम्यते। तच्चैषां नित्यत्वे सति उपपद्यते।

अन्यथा नित्यानित्यसंयोगविरोधात् माशकादिसमाख्यायाश्च काठकादिसमाख्यावत् प्रवचनादेवोपपत्तेः। कर्तृव्यपदेशश्च मन्त्रकृद्व्यपदेशवदुपपत्स्यते। यथाहि 'शिशुर्वाऽऽङ्गिरसो मन्त्रकृतां मन्त्रकृदासीत्' इति (तां. ब्रा. १३।३।२४) मन्त्रप्रवक्तरि मन्त्रकृद्व्यपदेशो वेदे, तथा प्रवक्तरि माशकादौ लोके कर्तृव्यपदेश इति। एवं च सति बुद्धाद्यागमानामपि वेदवदेव तुल्यन्यायतया प्रयोगशास्त्रत्वाविशेषात् धर्मे प्रामाण्यं पूर्वपक्षिणोऽभिमतमिति। एवं प्राप्ते, अभिधीयते।

नासन्नियमात्। १२ ॥

अयमभिप्रायः। भवेदेवं यद्यत्र महाजनादरपरिगृहीतातीन्द्रियार्थविषयत्वं वेदत्वमन्तरेण उपपद्येत। तत्तु उभयथाऽपि उपपद्यते, वेदत्वेन वेदमूलत्वेन च। तत्र अविच्छिन्नदृढतरकर्तृस्मृतेः पौरुषेयत्वेन वेदत्वासंभवात् स्मृत्यधिकरणसिद्धान्तन्यायेन वेदमूलत्वेनैव व्यवस्थाप्यते। यत्तु नित्यत्वेऽपि मन्त्रकृद्व्यपदेशवत् कर्तृव्यपदेश इत्युक्तम्, तदसंगतम्, व्यपदेशमात्रं हि मन्त्रकृद्व्यपदेशवत् यथाकथञ्चित् समाधानमधिकुरुते। दृढतरकर्तृस्मृतिस्तु नानित्यतामन्तरेण कथञ्चित् समाधातुं शक्यते। न च सा वेदे समस्ति। तथा सति वेदस्यापि अनित्यत्वप्रसङ्गात्। एवं च सति समाख्याऽपि पौरुषेयत्वनिबन्धना, न तु काठकादिवत् प्रवचननिबन्धना।

यत्तु 'आचार्यवचः प्रमाणम्' इति वेद एव कल्पसूत्रादीनां नित्यत्वं प्रतिपादयति, इतरथा नित्यानित्यसंयोगविरोधादित्युक्तम्, तदसत्। नह्ययं वेदो मशकादीनां कल्पसूत्ररूपप्रवचनविषयः, किं तर्हि? आचार्यवचनविषय एवायम्। आचार्यश्च मन्वादिभिरुक्त एव। 'उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः। सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते ॥' इति (मनु. २।१४०)। तस्य च वचनं शिष्यविषयं प्रमाणमेवेति। तदुक्तम् '**व्याचक्षाणस्य वेदार्थान् वेदांश्च वदतः स्वयम्। शिष्यान् प्रत्याप्तभावात्स्यादाचार्योक्तिप्रमाणता ॥**' इति (वा. १।३।६।१४ पृ. २४२)। नापि नित्यानित्यसंयोगविरोधः। आचार्यशब्दस्य प्रवृत्तिनिमित्तोपाधिसामान्याश्रयणेन पाचकादिशब्दवत् नित्यार्थत्वात्। अथवा आचिनोति श्रोतृबुद्धिमिति व्युत्पत्त्या आचार्यो वेद एवेति नानुपपन्नम्। अत एव दृढतरकर्तृस्मृतेः बुद्धाद्यागमानामपि न स्वातन्त्र्येण प्रमाणता। इयांस्तु विशेषः— कल्पसूत्रादीनां वेदमूलत्वेन प्रामाण्यम्, तेषां तु असन्मूलत्वेन अप्रामाण्यमेवेति।

प्रयोजनम्— पूर्वपक्षे अधीतकल्पसूत्रप्रस्मरणेऽपि वेदप्रस्मरणप्रायश्चित्तम्, सिद्धान्ते तु अवेदत्वान्नेति।

सूत्रं तु— न वेदत्वं कल्पसूत्रादीनां प्राक् असतामेव मशकादिभिः नियमात् निबन्धनादिति। **तौता.**

प्रयोगशास्त्रमिति चेत्। १।३।६।११ ॥

माशकं हास्तिकं कौण्डिन्यकं इत्येवंजातीयकं कल्पसूत्रं प्रमाणं न वेति विचारे पूर्वपक्षमाह। प्रयोगशास्त्रं प्रयोगस्य अनुष्ठेयपदार्थपौर्वापर्यस्य शास्त्रं शासकं कल्पसूत्रं प्रमाणं स्वातन्त्र्येण इति चेत्।

नासंनियमात्। १२ ॥

पूर्वपक्षं निषेधति सिद्धान्ती। न कल्पसूत्रं स्वातन्त्र्येण प्रमाणम्, असंनियमात्। नैतत् सम्यङ्निबन्धनं स्वराभावात् इति **भाष्यम्**। प्रागसद्भिः जन्यैः बोधायनादिपुरुषैः नियमात् नियमनात् प्रणीतत्वात् इति **कुतूहलम्**।

अवाक्यशेषाच्च। १३ ॥

सिद्धान्ते युक्त्यन्तरमाह। यथा वेदे वाक्यशेषाः अर्थवादाः सन्ति तथा कल्पसूत्रेषु न सन्ति इति अवाक्यशेषात् वाक्यशेषशून्यत्वात् न वेदवत् स्वातन्त्र्येण प्रमाणं कल्पसूत्रम्। वर्तनानकालप्रत्ययनिर्देशाच्च इति चकारार्थः।

सर्वत्र च प्रयुक्तत्वात् संनिधानशास्त्राच्च। १४ ॥

कल्पसूत्राणि सत्यवाचां वचनानि इति स्वातन्त्र्येण प्रमाणानि इति पूर्वपक्षोक्तं दूषयति सिद्धान्ती। 'पूर्वपक्षे सर्वासु तिथिषु अमावास्या' इति कल्पसूत्रवचने सर्वत्र सर्वासु पूर्वपक्षतिथिषु अमावास्याशब्दस्य प्रयुक्तत्वात् अमावास्यायागकर्तव्यता उक्ता। अमावास्यायागसंनिधाने शास्त्रं श्रुतिवचनं तु 'अमावास्यायां अमावास्यया यजेत' इति। एवं सर्वत्र प्रयुक्तत्वात् संनिधानशास्त्राच्च न सत्यवचनता कल्पसूत्रकारस्य सिध्यति। तस्मान्न स्वातन्त्र्येण प्रामाण्यं कल्पसूत्राणां इति सिद्धान्तः।

अत्र कुतूहलम्– चकारः ह्यर्थः हेतौ यतो वेदमूलकतयैव कल्पसूत्राणि प्रमाणं न स्वतन्त्रतया, तस्मात् प्रत्यक्षश्रुतिविरोधे अप्रमाणं इति । द्वितीयश्चकारस्तु ‘ अविशेषादुभौ वा ’ इत्यादिविषयान्तरसमुच्चयार्थः– इति । के.

* **प्रयोजकं** अपूर्वं अग्निहोत्रादिगतानामङ्गानाम्, तेन ऊहसिद्धिः । ९।१।१।१. * प्रयोजकं अपूर्वं आरादुपकारकाणामिव संनिपत्योपकारकाणामपि अङ्गानाम् । भा. ९।१।१।१, * प्रयोजकं अपूर्वं उलूखलमुसलयोः प्रोक्षणस्य । ९।१।२।२–३, * प्रयोजकं अपूर्वं चतुर्होतृपञ्चहोतृमन्त्राभ्यां अभिमर्शनस्य न तु दर्शपूर्णमाससमुदायः । ९।१।५।११–१९, * प्रयोजकं अपूर्वं ‘त्रीन् परिधीन्०’ इति मन्त्रस्य, न तु परिधित्रित्वं दर्शपूर्णमासयोः । ९।१।५।११–१९, * प्रयोजकं अपूर्वं देवताप्रकाशकस्य मन्त्रस्य । ९।१।३।४–५. * प्रयोजकं अपूर्वं प्रोक्षणादीनां संनिपत्योपकारकाणां वाक्यविनियुक्तानाम् । ९।१।२।२–३, श्रुतिविनियुक्तानाम् । ९।१।५।११–१९. * प्रयोजकं अपूर्वं फलप्रकाशकमन्त्रस्य । भा. ९।१।३।४, * प्रयोजकं अपूर्वं व्रीहिप्रोक्षणस्य न तु व्रीहिस्वरूपं दर्शपूर्णमासयोः । ९।१।२।११–१९, * प्रयोजकं अपूर्वं ‘ शूर्पेण जुहोति ’ इति उक्तस्य होमस्य, न तु शूर्परूपान्नहेतुप्रयुक्तः होमः वरुणप्रघासेषु । ९।१।५।११–१९. * प्रयोजकं आज्यसंस्कारकं समानयनं आज्यस्य दर्शपूर्णमासयोः । **भाट्ट.** ४।१।१५. * प्रयोजकं आतिथ्योपसदग्नीषोमीयत्रितयं एकस्य बर्हिषः ज्योतिष्टोमे । ४।२।१४।२९–३०. * प्रयोजकं एकहायन्यास्तन्नयनस्य वा न भवति अक्षाभ्यञ्जनं पदपांसवः पदहोमो वा ज्योतिष्टोमे सोमक्रये । ४।१।१०।२५. * प्रयोजकं चतुर्थपञ्चमप्रयाजनिष्पादकमानयनं औपभृताज्यस्य दर्शपूर्णमासयोः । वि. ४।१।१५, * प्रयोजकं न फलं चक्षुरञ्जनस्य, फलश्रुतिस्तु तत्र अर्थवादः । ४।३।१. * प्रयोजकं न निरसनं लोहितादेः पश्वालम्भस्य वा अग्नीषोमीये पशौ । ४।१।१२।२७. * प्रयोजकं न परमापूर्वं अग्निष्टोमे अग्नीषोमीयात् प्राचीनस्य उपांशुत्वस्य, किन्तु तत्तत्पदार्थजन्यापूर्वमेव । ९।१।६।२०–२२, २५. * प्रयोजकं न प्रहरणं शाखायाः किन्तु प्रतिपत्तिः दर्शपूर्णमासयोः, तच्च पूर्णमासयागे नास्ति । ४।२।४।१०–१३. * प्रयोजकं न फलं आश्वत्थ्या उपभृतः, खादिरस्य स्रुवस्य, पर्णमय्या जुह्वाः च । तत्र फलश्रुतिरर्थवादः । **भा.** ४।३।१।१–४, * प्रयोजकं न फलं कर्मणां आघाराज्यभागप्रयाजानुयाजानाम् । तानि च कर्माणि क्रत्वर्थानि । तत्र फलश्रुतिः अर्थवादः । दर्शपूर्णमासयोः । ४।३।१।१–४, * प्रयोजकं न भवति नित्यं नैमित्तिकानाम् । ज्योतिष्टोमे बार्हद्गिरं ब्राह्मणस्य ब्रह्मसाम, पार्थुरश्मं राजन्यस्य, रायोवाजीयं वैश्यस्य इति नैमित्तिकमेव न नित्यम् । ४।३।२।४. * प्रयोजकं न भवति फलं द्रव्यसंस्कारकर्मणाम् । तत्र फलश्रुतिरर्थवादः । ४।३।१।१–४. * प्रयोजकं न भविष्यतैव संयोगेन यत् निर्दिश्य अन्यत्रोपदिश्यते । **वा.** ४।१।११।२६. * प्रयोजकं न वाजिनं दध्यानयनस्य चातुर्मास्यवैश्वदेवपर्वणि । ४।१।९।२२–२४. * प्रयोजकं पश्वादिफलं गोदोहनादेः, न तु क्रतुः । **भाट्ट.** ४।३।२. * प्रयोजकं पुत्रगतपूतत्वादिफलं वैश्वानरेष्टेः । ४।३।१६।३८–३९. * प्रयोजकं प्रतिष्ठाफलमेव रात्रिसत्राणां न तु स्वर्गः । ४।३।८।१७–१९. * प्रयोजकं प्रधानं स्विष्टकृत्प्रक्षेपस्य दर्शपूर्णमासयोः । **भाट्ट.** ४।१।१३. * प्रयोजकं प्रयाजद्वयं आज्यसमानयनादेः दर्शपूर्णमासयोः । ४।१।१५।४०–४१. * प्रयोजकं प्रैषानुवचनं मैत्रावरुणाय दण्डदानस्य । **भाट्ट.** ४।२।६ . * प्रयोजकं फलं क्रतुश्चोभयं अग्निहोत्रे दध्यादेः । ४।३।३।५–७. * प्रयोजकं फलं ‘ नेक्षेतोद्यन्तमादित्यम् ’ इति पर्युदासस्य प्रजापतिव्रतेषु । ४।१।३।३–६. * प्रयोजकं यस्मिन् कृते यन्निष्पद्यते प्रयोजनवत् तत् तस्य प्रयोजकमिति गम्यते (यथा तप्ते पयसि दध्यानयने कृते आमिक्षा निष्पद्यते इति आमिक्षा दध्यानयनस्य प्रयोजिका इति) । **भा.** ४।१।९।२२ । यत् प्रयोजनवत् तत् प्रयोजकम् । **टुप्.** * प्रयोजकं वत्सापाकरणमेव शाखाछेदनाहरणपरिवासनानाम्, न तु कपालोपधानं दर्शपूर्णमासयोः । **भा.** ४।२।३।८–९. * प्रयोजकं व्रीह्यवघातस्य प्रधानं दर्शपूर्णमासयोः । **वि.** ४।२।११. * प्रयोजकं श्रपणं पुरोडाशकपालस्य, न तु तुषोपवापः । ४।१।११।२६. * प्रयोजकं संयवनं प्रणीतानाम्, निनयनं तु प्रतिपत्तिः । दर्शपूर्णमासयोः । ४।२।५।१४–१५. * प्रयोजकं सर्वं फलं ज्योतिष्टोमस्य दर्शपूर्णमासयोश्च । **भा.** ४।३।१०।२५–२६. * प्रयोजकं हविष्कृदाह्वानात् प्राचीनावान्तरापूर्वं प्रणीतावाङ्नियमस्य दर्शपूर्णमासयोः । ९।१।७।२३–२४. * यद्धि फलवत् तत् **प्रयोजकम्** । यज्ञकर्म च प्रयोजकं न देवता । **भा.** ९।१।४।९. * यस्य च अङ्गद्वारेण प्रयोजकत्वं तदेव प्रयोजकं इति आमिक्षाधिकरणे वक्ष्यामः । **ऋजु.** पृ. ९. * येषु धर्मेषु विधीयमानेषु यदपूर्वमुत्पद्यते तत् तेषां प्रयोजकं भवति, न यावत् किञ्चित् । **वा.** ३।१।४।१० पृ. ६७०. * यदर्थं हि क्रियन्ते धर्माः तत् प्रयोजकम् । यस्मिन् सति क्रियन्ते तत् निमित्तम् । **भा.** ९।१।१।१ वर्णकं २, यद्धि येन कर्तव्यं भवति, तत् तस्य प्रयोजकम् । ९।१।२।२. * यन्निष्ठकृतिव्याप्यतानिरूपितोद्देश्यताशालि यत् तत् तस्य प्रयोजकम्, यथा– आमिक्षादर्शादि दध्यानयना- (नप्रयाजा) देः । **भाट्ट.** ४।१।१. * **प्रयोजके** न शकृल्लोहिते पशोः अग्नीषोमीये पशौ । ४।१।१२।२७. * **प्रयोजकानि** अन्विताभिधाने आकाङ्क्षायोग्यतासंनिधानानि, न तु शब्दोपात्तत्वमपि । **सोम.** ५।१।१ वर्णकं ३. * **प्रयोजकः** आग्नेययागः पुरोडाशस्य, न स्विष्टकृत् । ४।१।१३।२८–३२. * प्रयोजकः क्रतुः ब्राह्मणादिरूपाधिकारिसंस्कारत्वेन विहितस्य पयोव्रतादेः ज्योतिष्टोमे । ४।३।४।८–९. * प्रयोजको द्रव्यार्जनस्य पुरुषार्थं एव न क्रतुः । **भा.** ४।१।२।२ वर्णकं ३. * प्रयोजको न अवघातकालीनस्तुषोपवापः कपालोपादानासादनयोः । **भाट्ट.** ४।१।११. * प्रयोजको न तुषोपवापः पुरोडाशकपालस्य दर्शपूर्णमासयोः । ४।१।११।२६. * प्रयोजको न निनयनकालीनस्तुषोपवापः कपालोपादानस्य । **भाट्ट.** ४।१।११. * प्रयोजको न पुरोडाशस्य स्विष्टकृत् दर्शपूर्णमासयोः । ४।१।१३।२८–३२. * प्रयोजको न विधिः फलांशस्य । **भा.** ४।१।२।२ वर्णकं २. * प्रयोजको न शकृत्संप्रवेधः पश्वालम्भस्य किन्तु प्रतिपत्तिः । अग्नीषोमीये पशौ । ४।१।१२।२७. * प्रयोजको न शाखाछेदस्य उपवेषः । पौर्णमास्यां तु उपवेषार्थं किञ्चित् काष्ठं ग्राह्यम् । ४।२।३।८–९. * प्रयोजको न स्वरुच्छेदनादेः अग्नीषोमीये पशौ । ४।२।१।१–६. * प्रयोजको न स्विष्टकृद्यागः अवयविनो हविषस्तदुत्तरार्धस्य वा, आज्यप्रक्षेपस्य तु प्रयोजकः । दर्शपूर्णमासयोः । **भाट्ट.** ४।१।१३, * प्रयोजकः निनयनकालीनस्तुषोपवापः कपालधारणस्य । ४।१।११. * प्रयोजकः पुनः द्विविधः, स्वार्थ एव प्रयोजकः परार्थ एव प्रयोजकश्चेति । आद्यो यथा– शेषी स्वर्गादिः शेषं यागादिकं स्वार्थं प्रयुङ्क्ते न परार्थम् । द्वितीयो यथा– निमित्तं जीवनभेदनादि अशेषिभूतं दर्शादिकं भेदनहोमादिकं च न स्वार्थं प्रयुङ्क्ते । **बाल.** पृ. १०७. * प्रयोजकः पुरुषार्थ एव वेदवत्सजानुतायाः, वेदैः आहार्यपुरीषतायाः, अनतिदृश्यस्तरणस्य, गोदोहनस्य च । **भा.** ४।१।२।२ वर्णकं २. * प्रयोजकः प्रजापतिव्रतानां पुरुषार्थः । ४।१।३।३–६. * प्रयोजको रागः स्वर्गादिफलस्य न विधिः । **वि.** ४।१।२ वर्णकं २ . * प्रयोजकः स्वर्गो विश्वजिदादेः । ४।३।५।१०–१२. * प्रयोजकः स्विष्टकृद्यागोऽपि स्विष्टकृत्प्रक्षेपस्य दर्शपूर्णमासयोः । **भाट्ट.** ४।१।१३. * प्रयोजकः हृदयादियागः पशोः, न तु शकृत्संप्रव्याधः लोहितनिरसनं वा । ४।१।१२।२७. * **प्रयोजकौ** प्रयाजानुयाजौ औपभृताज्यस्य दर्शपूर्णमासयोः । **भा.** ४।१।१६।४२–४५. * **प्रयोजकाः** न प्रयाजाः औपभृताज्यसमानयनस्य तत्संस्कृताज्यस्य च, किन्तु अन्त्यप्रयाजद्वयमेव । **भाट्ट.** ४।१।१५. * **प्रयोजकस्य** च प्रयोज्यव्यापारेऽपि कर्तृत्वं न विहन्यते । **वा.** ३।८।१२।२४. * प्रयोजकस्य प्रयोज्यं प्रति (उत्पादकस्य उत्पाद्यं प्रति) यो व्यापारः, स भावनेत्युच्यते । **टुप्.** ११।१।२।१०. * **प्रयोजिका** आमिक्षा दध्यानयनस्य चातुर्मास्यवैश्वदेवपर्वणि ।४।१।९।२२–२४ . * प्रयोजिका शाखा छेदनादेः दर्शपूर्णमासादौ । ४।२।३।८–९.

* **प्रयोजकाप्रयोजकत्वं** चतुर्थाध्यायार्थः । **वा.** २।१।१।१ पृ. ३७२. * प्रयोजकाप्रयोजकत्वं शेषशेषित्वादृते नास्ति । **टुप्.** ७।१।१।१. * प्रयोजकाप्रयोजकत्वं हि ‘ अर्थे समवैषम्यम् ’ ४।१।८।२१ इत्यतः

प्रभृति साक्षात् चिन्तितं आसोमलिप्तविचारात् (४।२। ८।२०–२२) । रत्न. ५।१।१।१ . * प्रयोजका-प्रयोजकत्वादृते क्रमो नास्ति । वा. ७।१।१।१.

* प्रयोजकाप्रयोजकनिरूपणं चतुर्थाध्यायार्थः । चतुर्थे प्रयोजकाप्रयोजकौ निरूपितौ । तत्र प्रयोजकः सप्तधा, अप्रयोजकोऽपि सप्तधा । तथाहि, [१] कश्चित् उत्पत्तेरपि प्रयोजकः , उपादानस्यापि पालनस्यापि । यथा– आग्नेययागामिक्षायागादिर्यथाक्रमं अष्टाकपालामिक्षादेः । [२] कश्चित्तु त्रितयस्यापि अप्रयोजकः , यथा– तुषोपवापः कपालस्य नोत्पत्तेः प्रयोजकः , नोपादानस्य, न पालनस्य । स तु पुरोडाशार्थमेवोत्पन्नं उपात्तं पालितं च कपालं साधनत्वेन गृह्णाति । [३] कश्चित्तु उत्पत्तेरप्रयोजकः , उपादानपालनयोस्तु प्रयोजकः, यथा– अक्षाभ्यञ्जनं न पांसूनामुत्पत्तेः प्रयोजकम् , स्वत एव तूत्पत्त्या सिद्धानां तेषां पदग्रहणरूपोपादानस्य प्रयोजकं पालनस्य च । एवं प्रातर्दोहयागोऽपि अशितपीतोत्पन्नस्यैव ऊधःस्थितदुग्धस्य दोहनरूपमुपादानं पालनं च प्रयुङ्क्ते । वाजिनयागोऽपि वाजिनोत्पत्तेः अप्रयोजकः तस्या आमिक्षार्थदध्यानयनाधीनत्वात् , वाजिनोपादानपालनयोस्तु प्रयोजक एव । [४] कश्चित्तु उत्पत्तेरेव प्रयोजको नोपादानपालनयोः, यथा– आमिक्षा वाजिनोत्पत्तेः प्रयोजिका, नोपादानपालनयोः । एवं स्वर्गादिफलं यागोत्पत्तेरेव प्रयोजकम् , न यागोपादानपालनयोः , उत्पत्तिव्यतिरिक्तयागोपादानासंभवात् , क्षणिकस्य च पालनासंभवात् । [५] कश्चित्तु उत्पत्त्युपादानयोर्न प्रयोजकः पालनमात्रस्य तु प्रयोजकः, यथा– स्विष्टकृद्यागादिः शेषस्य । [६] कश्चित्तु उपादानस्यैव प्रयोजकः , नोत्पत्तिपालनयोः ; यथा– ग्रावणि सप्तमपदनिधाने अक्षाभ्यञ्जनं असंस्कृतपांसूपादानस्यैव प्रयोजकम् , न पांसूत्पत्तिपालनयोः । एवं चरौ तुषोपवापो हस्तोपादानस्यैव प्रयोजकः , न तदुत्पत्तेः पालनस्य वा । एवं आग्नेयादियागो देवतायाः उद्देशात्मकोपादानस्यैव प्रयोजकः , न देवतोत्पत्तेः तत्पालनस्य वा । [७] कश्चित्तु उत्पत्तिपालनयोरेव प्रयोजकः, न तूपादानस्य, यथा– स्वर्गादिफलं अपूर्वस्योत्पत्तेः प्रयोजकं पालनस्यापि धर्मनाशककर्मनाशजलस्पर्शादौ हि कृते स्वर्गानुत्पत्तेः, न तु उत्पत्तिव्यतिरिक्तं किञ्चिदस्ति अपूर्वस्योपादानम् , यत् स्वर्गादिना फलेन प्रयुज्येत । [८] कश्चित्तु उत्पत्त्युपादानयोरेव प्रयोजकः , न पालनस्य, यथा– अग्नीषोमीयस्य विकारे निरूढपशौ असति दीक्षिते मैत्रावरुणाय दण्डदानं दण्डोत्पत्त्युपादानयोः प्रयोजकम् , न तत्पालनस्य पूर्वमविद्यमानत्वात् तस्येति ।

एवं प्रयोजकः आद्यभेदस्य तृतीयादिभेदानां च गणनया सप्तविधः । अप्रयोजकोऽपि द्वितीयस्य तृतीयादिभेदानां च गणनया सप्तविध इति सिद्धम् ।

पुनरपि प्रयोजको द्विविधः । कश्चित् स्वार्थं प्रयुङ्क्ते, यथा– शेषी स्वर्गादिः शेषं यागादिकं स्वार्थं प्रयुङ्क्ते, न परार्थम् । कश्चित्तु परार्थं किञ्चित् प्रयुङ्क्ते, न स्वार्थम् , यथा– निमित्तं जीवनभेदनादि अशेषिभूतम् , दर्शादिकं भेदनहोमादिकं च न स्वार्थं प्रयुङ्क्ते, किन्तु पापक्षयकृतूपकारादिशेष्यर्थं प्रयुङ्क्ते । तदुक्तमाचार्यैः– ‘ तथा होमाः प्रयुज्यन्ते भेदनस्कन्दनादिभिः । निमित्तैर्न च तेष्वेषां होमानां शेषता मता ॥ ’ इति । अप्रयोजकोऽपि पुनर्द्विविधः । कश्चित् स्वाङ्गस्यापि अप्रयोजकः, यथा– तुषोपवापः कपालस्य स्वाङ्गभूतस्यापि अप्रयोजकः । कश्चित्तु पराङ्गस्य स्वोपकारिणोऽपि अप्रयोजकः, यथा– दध्यानयनस्य वाजिनयागः, यथा वा अक्षाभ्यञ्जनं एकहायनीनयनसाध्यमपि न तस्य प्रयोजकम् । यथा वा प्रतिपत्तिः शकृल्लोहितनिरसनस्विष्टकृद्यागचात्वालप्रासनादिः प्रतिपाद्यस्य शकृल्लोहितस्य, शेषस्य, कृष्णविषाणादेश्च अप्रयोजिका । तथा प्रसङ्गी अपि पशुपुरोडाशयागादिः पश्वङ्गस्य प्रयाजादेः स्वोपकारिणोऽपि अप्रयोजकः । बाल. पृ. १०६–१०८.

* प्रयोजकत्वं अन्वयव्यतिरेकवत्त्वे सति नियतपूर्ववृत्तित्वम् । मणि. पृ. ४५. * प्रयोजकत्वं द्वेधा भवति, यदि वा खण्डशः समर्प्यते अथवा ब्रूहि इत्यभिधीयते इति । वा. ३।८।८।१८. * प्रयोजकत्वं यस्य सिद्ध्यर्थं किञ्चित् क्रियते तत्त्वम् । वि. ९।१।१ वर्णकं ३.

* प्रयोजकनिरूपितं प्रयोज्यत्वं चतुर्थेऽध्याये निरूप्यते । भाट्ट. ४।१।१.

* ‘ प्रयोजकवशौ चेष्टौ मुख्यप्रावृत्तिकक्रमौ । ’ वा. ३।१।१।१ पृ. ६५१.

‘ प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते ’ इति न्यायः । अयं न्यायो भट्टाचार्यैर्विवृतः । तथाहि, ‘ प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते । जगच्चासृजतस्तस्य किं नाम न कृतं भवेत् ॥ ’ इति । (श्लोकवार्तिके संबन्धाक्षेपपरिहारप्रकरणे ‘ जगच्चासृजतस्तस्य किं नामेष्टं न सिध्यति ॥ ५४ ॥ प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते ’॥ ५५ ॥ इति पाठः । के.)। साहस्री. ३५९ .

* ‘ प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते ’ इति न्यायेन प्रयोजनं विना परे (परमात्मनि जगत्सृष्टिस्थित्यादिषु) प्रवृत्तिर्न संभवति (इति शङ्का) । सनत्सुजातीये, नीलकण्ठः १।१९. * प्रयोजनं असमरणं अपि भवति सकृद्वचनेन ज्ञातस्य पुनर्वचने । भा. ५।१। १।१, * प्रयोजनं कृत्वाचिन्तायां न वक्तव्यम् । ३।२। १२।३२. * प्रयोजनं (अर्थः) क्रमे प्रमाणम्, व्युत्क्रमे तस्य अनुपपद्यमानत्वात् । भाट्ट. ५।१।२ . * प्रयोजनं दक्षिणानां सर्वेषामृत्विजां आनमनम् । भा. १०।३। १९।७१ , * प्रयोजनं प्रति द्रव्याणि शेषभूतानि । ६।३।१९।३९, * प्रयोजनं लक्षणकर्मणि न वक्तव्यम् । ४।२।१२।२७ . * ‘ यमर्थमधिकृत्य प्रवर्तन्ते तत् प्रयोजनम् ’ इति नैयायिकोक्तं लक्षणम् (न्या. द. १।१। २४) । सु. पृ. ४४९, कणिका. पृ. ३३९. * ‘ सर्वेण विधिवेलायां प्रयोजनमपेक्ष्यते ’ । ‘ ऐन्द्रवायवं गृह्णाति ’ इत्येतद्वाक्यप्रवृत्तिकाले किं प्रयोजनमित्यपेक्षा भवति । वा. २।२।६।१९ पृ. ५१९, * प्रयोजनेन पक्षोक्तेनैव भवितव्यं इति न नियमः। ३।४।१४।३७ . * प्रयोजनस्य प्रयोजनं नोच्यते । यत् प्रयोक्तव्यं तस्य प्रयोजनम् । भा. १०।७।११।३७.

प्रयोजनाधिकरणम् । सत्रे प्रत्येकं कृत्स्नेन फलेनार्थिनामधिकारः ॥

पुरुषार्थैकसिद्धित्वात् तस्यतस्याधिकारः स्यात् । ६।२।१।१॥

भाष्यम्— ‘ द्वादशाहेन प्रजाकामं याजयेत् ’ ‘ ऋद्धिकामा उपेयुः ’ । तथा तत्रतत्र एवंकामाः ‘ सत्रमुपेयुः ’ । ‘ सप्तदशावराश्चतुर्विंशतिपरमाः सत्रमासीरन् ’ इति । तेषु संदेहः किं तस्यतस्य कृत्स्नेन फलेन अर्थिनः सत्रे अधिकारः, उत पर्षदः अर्थिन्या अधिकार इति । आह, ननु अर्थिनो बहुसंख्याविशिष्टा निर्दिश्यन्ते, कथमेषां एकैकशोऽधिकारो भविष्यतीति । उच्यते ‘ ऋद्धिकामाः ’ इत्येवमादि विधीयमानं ऋद्धिलक्षितेषु समस्तेषु व्यस्तेषु च प्राप्तं न शक्यं बहुवचनेन विशेषे अवस्थापयितुम् । तेन तंतं अधिकुर्यात् पर्षदं वेति भवति संदेहः । किं तावत् प्राप्तम् ? एकैको न समर्थो बहुकर्तृकं सत्रं रचयितुम् । पर्षदं तु कर्त्रीं अर्थिनीं अवगच्छामः । न चाकर्तुः फलं भवति । न चैकः कर्तोच्यते । तस्मात् समस्तानां फलं एकैकस्य फलावयवः, मध्यमं स्यात् कृत्स्नं फलमिति । **एवं प्राप्ते, ब्रूमः ।** तस्यतस्यार्थिनः कृत्स्नं फलं सत्रात् निर्वर्तते । कुतः ? पुरुषार्थस्य एकैकस्य सिद्धिर्यतो भवति । सह क्रियमाणे सर्वः एकैकं पुरुषार्थं साधयति तन्त्रेण । कर्तॄणां फलं च भवति, एकैकश्चात्र कर्ता । आह, ननु एतदुक्तम् , एकैको न शक्नोति बहुकर्तृकं कर्तुमिति । उच्यते । शक्नोति एकैकस्य स्वातन्त्र्यविवक्षायाम् । यदा एककः स्वातन्त्र्येण प्रवर्तते तदा अन्यान् संख्यानिर्वृत्त्यर्थं सामादिभिः प्रयोक्ष्यते । एवं एकः पुरुषार्थं साधयति इतर इतरश्च । तेन सर्वे कर्तारः सव्यपेक्षा भविष्यन्ति । सर्वे चेत् कर्तारः, पृथक्पृथगेव फलेन संभन्त्स्यन्ते ।

टुप्— ननु इतरेतरयुक्ता इतरत्रापि अनुतिष्ठन्ति इतरत्रापि । तस्मात् प्रयोगे नास्ति विशेषः । प्रयोगगता या अधिकारचिन्ता सा युक्ता (कर्तुम्) । कृत्स्नेन फलेन व्याप्यते फलावयवेन वा इति काकदन्तपरीक्षा, प्रयोगाविशेषात् । उच्यते । किं कृत्स्नफलार्थिनो यागोपदेशः, उत (फल–) अवयवार्थिनोऽपि इत्येवमुपदेशः अधिकार एव चिन्त्यते । (कर्मोपदेशो योऽयं ऋद्धिकामाधिकारः स एव चिन्त्यते इति तन्त्ररत्ने व्याख्यातम् । अधिकारे इति सप्तम्यन्तं छित्वा अधिकाराध्याये चिन्त्यते इति न अध्यायासंगतिः इत्यपि व्याख्यातुं शक्यमिति वयं प्रतीमः । के.) सत्यपि (वाचिककायिक–) अनुष्ठाना-

विशेषे (मानसी स्मृतिः किं कृत्स्नफलविषयाधिकारिविशेषणम्, उत तदवयवविषया इति युक्ता चिन्ता । एतेन लक्षणसंगतिर्दर्शिता) । अथवा क्रियाफलं कर्तृगामि भवति एकस्मिन् पक्षे इतरत्र अकर्तृगामि । (पूर्वपक्षवाद्यभिप्रायोऽयमुक्तः । स हि पर्षत्कर्तृकं मन्यमानः स्वपक्षेस्वपक्षे कर्तृगामि फलम्, सिद्धान्तपक्षे तु प्रत्येकं भोक्तृत्वात् तेषामकर्तृत्वात् अकर्तृगामि फलमिति मन्यते । एकग्रन्थेनाह–) एवं चेत् (यथा पूर्वपक्षी मन्यते तथा चेत्) समुदायस्य कर्तृत्वात् न ते (समुदायिनः) कर्तारः । ईदृश्यां प्रतीतौ, (समुदायकर्तृत्वप्रतीतौ, अनुष्ठाने–) अस्ति विशेषः । (तथाहि,) समुदायकर्तृत्वे कर्ममध्ये एकस्मिन् प्रमृते नान्य आनेतुं लभ्यते । सिद्धान्ते तु एकैकस्य कर्तृत्वात् (एकस्मिन् मृते सप्तदश–) संख्यापूरणार्थमानीयते । ननु इतरत्रापि (पूर्वपक्षेऽपि) अविशिष्टं संख्यापूरणम् । (उच्यते,) द्रव्यभेदात् तत्र (पूर्वपक्षे) संख्या, न कर्तृभेदात् । एवं चेत् ' सप्तदश प्राजापत्यान् ' इत्यत्र यथा पूर्वपक्षे एकस्मिन् पशौ विनष्टे (समुदायात्मकं साधनं विनष्टम्, इति) कृत्स्नः पशुगण आवर्तते, एवमिहापि एकस्मिन् विनष्टे (यः संख्यापूरणार्थमानीतः, तेन सह) सप्तदश भूत्वा पुनरादौ आरभ्य यागमनुतिष्ठन्ति, ईदृशस्य (सप्तदशसंख्यस्य) साधनत्वावगमात् ।

(एवं संदेहं प्रसाध्य पूर्वपक्षं गृह्णाति–) किं तावत् प्राप्तम् ? (एक–) फलावयवेनैव (प्रत्येकं) संबन्धः । (न कृत्स्नेन फलेन) । कुतः ? कृत्स्नं फलं प्राप्नुयात् यदि एकैकः, (ततः) पृथक् पृथक् प्रयोगः स्यात् । ततो बहुवचनं नोपपद्यते (तस्मात् फलावयवकामस्य सत्रेऽधिकारः) । अपि च यत् कर्म (ज्योतिष्टोमादि) बहुषु फलेषु चोद्यते, तत् (अपि तावत्) एकत्र प्रयोगे एकमेव फलं साधयति इत्युक्तं (योगसिद्ध्यधिकरणे ४।३।११) किमुत यदेकफलमेव चोदितं (सत्रादि । एवं तावत् आख्यातावगतसहप्रयोगबलेन फलेऽपि साहित्यं इत्युक्तम् । इदानीं कामशब्दादपि बहुवचनान्तात् अयमर्थो गम्यते इत्याह–) किञ्च ' ऋद्धिकामाः ' इत्येकशेषोऽयम् । तत्र यदि इतरेतरयुक्ताः फलं कामयन्ते, ततः (इतरेतरयोगं प्रतिपादयन्) एकशेषः उपपद्यते । द्वन्द्वापवादो हि अयं (एकशेषः । तस्मात् अनेन इतरेतरयोगस्य प्रतीतेः सहजातानामेव फलम्) । ननु उद्दिश्यमानत्वात् (ऋद्धिकामानामेकशेषादवगतेः) इतरेतरयोगाविवक्षा (स्यात्) । उच्यते । सत्यम्, (यद्यपि) अस्मिन् पदे अविवक्षितः (इतरेतरयोगः), तथापि (आख्यातोपात्तानां) यादृशानां साधनभावः (कर्तृभावः) अवगतः, तादृशानामेव फलसंबन्धो युक्तः (कर्तृगामित्वात् फलस्य) । इतरेतरयुक्ताश्च साधनत्वेन (आख्यातेन) अवगताः । तत इतरेतरयुक्ता एव फलेन संभन्त्स्यन्ते । (कामशब्दावगतस्तु इतरेतरयोगः अभ्युच्चयमात्रत्वेन उक्तः ।)

एवं प्राप्ते, ब्रूमः । ' यस्मिन् प्रीतिः पुरुषस्य ' (४।१।२।२) इत्यनेन न्यायेन (फलस्याविधेयत्वात्) एकैकस्य कृत्स्नं फलं प्रार्थयमानस्य सत्रमुपायो विधीयते, न सत्रं प्रति ते विधीयन्ते (तेषां तु सत्रं प्रति उद्दिश्यमानत्वात् अविवक्षितं साहित्यम् । अतः प्रत्येकं अधिक्रियन्ते । तस्मात् प्रत्येकं कृत्स्नं फलम् । तत्रैव हेत्वन्तरमाह–) कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवति (कर्तृत्वं च प्रत्येकमेव) यदि च एकैकः कर्ता (स्यात्) ततो बहुत्वात् कर्तॄणां बहुवचनमुपपद्यते । इतरथा (प्रत्येकं कर्तृत्वाभावे) परिषदः कर्तृत्वात् तस्याः (च) एकत्वात् कर्तृभेदाभावः, कर्तृभेदाभावात् (च आख्यातोपात्तं कर्तृत्व–) बहुत्वं अनुपपन्नं (स्यात्) । अथ कर्तृत्वे (कर्तृरूपे) श्रुतं (बहुत्वं) द्रव्येषु कल्प्यते, ततः अयमेव दोषः यत् अन्यत्र श्रुतं अन्यत्र कल्प्यते (इति) । ' सामादिभिः प्रयोक्ष्यते ' इत्यस्य (भाष्यस्य अयं–) अर्थः, फलं प्रार्थयतः सत्रमुपायो विधीयते, तच्च (सत्रं) बहुकर्तृकं फलसाधने समर्थम् (आख्यातोपात्तस्य बहुत्वस्य विवक्षितत्वात्) । तत्र (एकः स्वतन्त्रः प्रवर्तमानः अन्यमपि स्वतन्त्रं प्रवर्तमानं सहायापेक्षिणं एवं ब्रवीति–) मया सह भवता यष्टव्यम्, नान्येन इति अस्मिन् (सहायनियम–) विषये सामादयः अवतरन्ति (उपायाः) पथिकवत् (यथा दुर्गं पन्थानमभिप्रतिष्ठमानाः सर्वे स्वतन्त्रा एव सन्तः मिथःसहाया भवन्ति, तद्वत्) । यदि एकस्य (स्वतन्त्रं) कर्तृत्वम्, इतरे (तु) संख्यापूरणार्थाः (ऋत्विक्स्थानीयाः) स्युः, ततः (तेषां स्वतन्त्र–) कर्तृत्वाभावात् बहुवचनाभावः इति स (एव पूर्वपक्षोक्तः) दोषः (तस्मात् यथोक्त एव भाष्यार्थ इति) ।

यदुक्तं (प्रत्येकं कर्तृत्वे) प्रयोगभेदात् बहुवचनाभाव इति, (तत्र) उच्यते । स एव (प्रयोगः) एकैकस्य (तत्र) तुल्यः (न व्यस्तः), तत्र न गम्यते विशेषः, इतरस्य प्रयोगः नेतरस्येति । (कथं न गम्यते ? तत्राह–) देवतोद्देशेन द्रव्यस्य यः संकल्पः, स एकैकस्याविशिष्टः । एवं च (सति एकस्मिन्नेव प्रयोगे सर्वेषामेव कर्तृत्वोपपत्तेः) प्रयोगभेदो न लभ्यते (प्रसज्यते) ।

अपि चोत्पत्तिसंयोगाद्यथा स्यात् सत्त्वदर्शनं तथा भावोऽविभागे स्यात् । २ ॥

भाष्यं— अपि च नैतद्विरुद्धं ' यदेकं कर्म बहुभिः क्रियते ' इति । यदि उच्येत, विरुद्धम्, एकेन कर्मणि कृते द्वितीयः किं कुर्यादिति । अत्रोच्यते । पर्यायेण क्रियायामेवं दोषः । तन्त्रेण तु क्रियायां भवति कश्चित् संभवः । यथा स्यात् सत्त्वदर्शनं तथा भावोऽविभागे स्यात् । यथा एकैकस्य सत्त्वस्य हस्तिनोऽश्वस्य वा दर्शनं एकैकेन कृत्स्नं अभिनिर्वर्त्यते, एवमेव सत्रे तन्त्रभावो भवेत् । सर्वेषां मध्यकं द्रव्यम् । मध्यकस्य आहवनीयस्योपरि अध्वर्युः उपविध्यति । तत्र सर्वे कर्तारस्तन्त्रेण भवन्ति । न चात्र उत्पन्नसंयोगः । उत्पत्त्यैव तु संख्यया कर्म संयुज्यते । यदि हि उत्पन्नं संयुज्येत, ततः ' अनेकसंबन्धार्थे ' इति वचनं गम्येत । उत्पत्तिसंयोगे तु एतन्नास्ति । तस्मात् एकैकस्य कृत्स्नेन फलेन अभिसंबन्ध इति ।

रत्न— इदं पदोत्तरं सूत्रम् । ' ननु एकस्मिन् प्रयोगे न बहूनां कर्तृत्वं संभवति, एकेन कृते कर्मणि अपरस्य कर्तृत्वायोगात् ' इति पदानि । तत्र चोत्तरं ' अपि चोत्पत्तिसंयोगात् ' इति ।

टुप्— (उत्पत्तिसंयोगात् इति सूत्रपदव्याख्यानार्थमिदं भाष्यम्—) नात्रोत्पन्नसंयोगः, (किन्तु) उत्पत्त्यैव तु संख्यया कर्म संयुज्यते (इति । तत् व्याचष्टे––) ' ऋद्धिकामाः ' इत्यत्र उत्पत्तिवाक्ये एव (फलवाक्ये एव) (स्वतन्त्र–) कर्तृगामिनी संख्या श्रूयते । यदि (हि) गुणवाक्ये श्रूयेत, न (तु उत्पद्यमाने) यागे, ततः एकैकस्य क्रियाफलेन संयोगो न स्यात् । तस्मिन् (उत्पन्नसंयोग–) पक्षे न फलेन व्याप्यमानाः स्युः इति (एवमर्थं बहुवचनं) उच्चार्यते, किं तर्हि ? यागो बहुसंख्याविशिष्टः कार्यः इत्येवमर्थं (उच्चार्यते । उत्पत्तिवाक्यस्य तु बहुवचनस्यैव स्वतन्त्रकर्तृत्वाभिधायिनः बलवद्विरोधाभावात् कर्तॄणामेव बहुत्वात् प्रत्येकमेव फलम्) ।

शा— **' समुदायस्य कर्तृत्वात् तस्य कृत्स्नफलान्वयः । फलावयवयोगः स्यात् प्रत्येकं समुदायिनाम् ॥ '** इति प्राप्ते, अभिधीयते **' समुदायस्य कर्तृत्वं यद्यपि स्यात्तथापि तु । प्रत्येकमधिकारित्वात् तथैव फलमाप्नुयुः ॥ कर्तृत्वमपि चैतेषां प्रत्येकमवगम्यते । कर्तृगामि बहुत्वं हि द्रव्यगाम्यन्यथा भवेत् ॥ '**

सोम— पूर्वस्मिन् पादे स्वर्गकामनिषादस्थपत्यादिभिरधिकारिनरोपस्थापकशब्दैरधिकारो निरूपितः, इह तु आख्यातेनाधिकारो निरूप्यते । आख्यातं च अनवगतसंख्यामात्रप्रतिपादकं तद्द्वारा नरप्रतीतिर्विलम्बिता इति **पादान्तरत्वमानन्तर्यं चेत्याहुः । सूत्रार्थस्तु**– तस्यतस्य पृथगधिकारः स्यात्, पुरुषार्थस्य फलस्यैकसिद्धत्वात् प्रत्येकसिद्धत्वादिति ।

वि— ' सत्रे फलांशः प्रत्येकं सर्वं वा, ऽऽद्यः समूहके । कर्तृत्वा, दन्त्य एकैकस्यापि तत्त्वाद् बहुत्वतः ॥ '

भाट्ट— ' ऋद्धिकामाः सत्रमासीरन् ' इत्यादौ अनेककर्तृकसत्रप्रयोगात् एकं फलं सर्वैः कर्तृभिः अवयवशो भुज्यते उत कृत्स्नं इति विचारे यद्यपि सर्वेषां प्रत्येकं कर्तृत्वं यदि वा दम्पत्योरिव व्यासक्तम्, उभयथाऽपि एकसत्रप्रयोगात् अनेकफलनिष्पत्तौ दर्शादावपि एकस्मादेव प्रयोगात् युगपत् क्रमेण वा अनन्तस्वर्गोत्पत्त्यापत्तेः एकप्रयोगात् एकफलोत्पत्तिनियमस्य अवश्यं वाच्यत्वात् एकमेव फलं सर्वैः अवयवशो भुज्यते । इति प्राप्ते, न तावत् एकस्य फलावयविनो मुख्यावयवाः संभवन्ति सुखादि-

रूपस्य तस्य अवयवासंभवात् । सत्रजन्यताऽवच्छेदकबुद्धित्वादेः तावत्पुरुषनिष्ठबुद्धिषु व्यासज्यवृत्तित्वमात्रं परं वाच्यम् , न च तत्र प्रमाणमस्ति, श्रुतऋद्धिकामादिशब्दानां फलमात्रप्रतिपादनपरत्वात् , ऋद्धिकामकर्तृनिष्ठफलभोगप्रतिपादके कल्प्याधिकारविधावपि ऋद्धिकामनाया व्यासज्यवृत्तित्वस्य बाधितत्वेन व्यासज्यवृत्तिकामनात्वरूपातिरिक्तधर्माङ्गीकारे प्रमाणाभावाच्च प्रत्येकमेव ऋद्धिकामत्वावसायात् प्रत्येकमेव फलावगतिः । नहि तत्र बहुवचनान्तऋद्धिकामपदेन बहुत्वावच्छिन्नानां ऋद्धिकामत्वं प्रतिपाद्यते, येन व्यासज्यवृत्तित्वावगतिर्भवेत् । अपि तु ऋद्धिकामत्वावच्छिन्नानां बहुत्वम्, पशून् इत्यादिवत् । न च कर्तृत्वस्य व्यासक्तत्वात् फलवत्त्वस्य अपूर्ववत्त्वस्य च व्यासक्तत्वम्, फलादौ कर्तृत्वसामानाधिकरण्यस्य प्रत्येकवृत्तित्वेऽपि उपपन्नत्वेन एतादृशनियमे प्रमाणाभावात् । अतश्च दंपत्योः व्यासज्यवृत्तिकर्तृत्वेऽपि अपूर्वं फलं च भिन्नमेव जन्यताऽवच्छेदकधर्मपर्याप्त्यधिकरणं वाच्यम् । प्रकृते तु बहुवचनश्रवणेन कर्तृत्वभेदस्यैव अवगतेः न फलवत्त्वादेः व्यासज्यवृत्तित्वकल्पनावसरः । न च एकप्रयोगात् अनेकफलानुत्पत्तिः , समवायसंबन्धेनैव फलत्वावच्छिन्नं प्रति फलत्वेन प्रतिबन्धकत्वकल्पनात् आत्मान्तरे बाधकाभावात् । न च एवमपि प्रत्येकवृत्तित्वापेक्षया फलवत्त्वादेर्व्यासज्यवृत्तित्वकल्पने गौरवादेरभावात् नियामकाभावः, जन्यताऽवच्छेदकऋद्धित्वादेः व्यासज्यवृत्तित्वकल्पने तत्पर्याप्त्यधिकरणताऽवच्छेदकस्य सत्रे यावत्कर्तृनिष्ठतज्जन्यफलकूटत्वादेः कल्पनीयत्वेन गौरवापत्तेः । तद्वरं सत्रजन्यफलत्वादेरेव तत्त्वकल्पनायां लाघवात् प्रत्येकमेव फलम् । प्रयोजनं संकल्पे तादृशानुसंधानम् ।

मण्डन— ' एकैकशः सत्रफलं समग्रम् । '

शंकर— ' सत्रे प्रत्येकमेव च । ' फलम् ।

* ' प्रयोजना- (एकप्रयोजना इति सु—पाठः) भिसंबन्धात् पृथक् सतां ततः स्यादैककर्म्यमेकशब्दाभिसंयोगात् ' (११।१।१।१) इति न्यायेन दर्शपूर्णमासौ संहत्य फलं साधयतः । सु. पृ. ५४४.

प्रयोजनाभिसंबन्धात् पृथक्सतां ततः स्यादैककर्म्यमेकशब्दाभिसंयोगात् । ११।१।१।१॥

दर्शपूर्णमासयोः आग्नेयादीनां षण्णां पृथक् सतां स्वरूपतः भिन्नानां सतां एकशब्दाभिसंयोगात् ' दर्शपूर्णमास ' इति एकेन शब्देन अभिसंयोगात् क्रोडीकारात् प्रयोजनाभिसंबन्धात् एकेन स्वर्गरूपेण प्रयोजनेन फलेन अभिसंबन्धात् ततः तस्मादेतस्मात् कारणात् ऐककर्म्यं स्यात् । कर्मशब्देनात्र फलमुच्यते क्रियते इति कर्मव्युत्पत्त्या । एकं कर्म फलं येषां षण्णां यागानां ते एककर्माणः । तेषां भावः ऐककर्म्यं एकफलकत्वमिति । ततश्च षण्णामपि यागानां दर्शपूर्णमासेत्येकशब्दवाच्यत्वं तेन च एकेन शब्देन एकेन फलेन संबन्धः इति ज्ञायते । तस्मात् तन्त्रेण फलम्, न भेदेन इति सिद्धान्तः ।

शेषवद्वा प्रयोजनं प्रतिकर्म विभज्येत । २ ॥

पूर्वपक्षी आह । यथा ' गणाय स्नानम्, गणायानुलेपनम् ' इत्युक्ते स्नानादिः शेषः न समुदायेन संबध्यते किन्तु समुदायिभिः । एवं शेषवत् स्वर्गरूपं प्रयोजनमपि षट्सु यागेषु प्रतिकर्म प्रतियागं विभज्येत विभागेन अन्वितं स्यात् । तस्मात् न दर्शपूर्णमाससमुदायस्य तन्त्रेण फलम् । इति पूर्वः पक्षः ।

अविधानात्तु नैवं स्यात् । ३ ॥

पूर्वपक्षं निरस्यति । नैवं स्यात् समुदायिनां प्रत्येकं फलं न स्यात् । तथा अविधानात् प्रत्येकं फलस्य विधानाभावात् । किन्तु समुदायादेव फलम् । फलमुद्दिश्य समुदायस्यैव साध्यत्वेन विधानात् ।

शेषस्य हि परार्थत्वाद् विधानात् प्रतिप्रधानभावः स्यात् । ४ ॥

शेषवत् इति पूर्वपक्षोक्तं दृष्टान्तं वैषम्येण परिहरति । शेषस्य स्नानानुलेपनादेः परार्थत्वात् विधानात् परार्थेन पुरुषसंस्कारकत्वेन विधानात् प्रतिप्रधानभावः स्यात् । प्रतिपुरुषं प्रधानभावः प्रधानत्वं स्यात् । दार्शपौर्णमासिकषड्यागेषु तु नैतादृशं किञ्चिदिति समुदायस्यैव फलम् । के.

* **प्रयोजननिष्पत्तिपर्यन्तमभ्यासः** दृष्टार्थानामवघातादीनाम् । ११।१।५।२७.

* **प्रयोजनलक्षणं** अक्षपादोक्तं ' यदधिकृत्य कृतिः प्रवर्तते तत् प्रयोजनम् ' (१।१।२४) इति । ऋजु. पृ. ९८.

* ये यत्र क्रियमाणाः **प्रयोजनवन्तः** ते तत्र कर्तव्याः । अनुपकारकास्तु न कर्तव्याः । **भा.** ३।१।४।७.

* **प्रयोज्यं** गोदोहनं पशोः स्वतन्त्रकामनायामेव । **भाट्ट.** ४।१।२ वर्णकं ३ , * प्रयोज्यं दध्यानयनं आमिक्षायाः चातुर्मास्येषु वैश्वदेवपर्वणि । ४।१।९।२२–२४. * प्रयोज्यं द्रव्यार्जनं पुरुषार्थस्य न तु क्रतोः । **भा.** ४।१।२।२ वर्णकं ३ . * प्रयोज्यं न एकहायनीनयनं अक्षाभ्यञ्जनस्य पदपांसूनां पदहोमस्य वा ज्योतिष्टोमे सोमक्रये । **भाट्ट.** ४।१।१० . * प्रयोज्यं न दध्यानयनं वाजिनस्य चातुर्मास्येषु वैश्वदेवपर्वणि । ४।१।९।२२–२४. * प्रयोज्यं न पुरोडाशकपालं तुषोपवापस्य । ४।१।११।२६. * प्रयोज्यं न लोहितं निरसनस्य शकृच्च संप्रवेधनस्य पशौ । ४।१।१२. * प्रयोज्यं प्रजापतिव्रतजातं पुरुषार्थस्य । ४।१।३।३–६. * प्रयोज्यं वेदवत्सजानुत्वम् , वेदेरनतिदृश्यस्तरणम् , वेदेः आहार्यपुरीषत्वं च पुरुषार्थस्य । **भा.** ४।१।२।२ वर्णकं २. * यदुद्देशप्रवृत्तकृतिव्याप्यत्वं यस्य तत् तत्प्रयोज्यं यथा दध्यानयनं आमिक्षाप्रयोज्यम्, प्रयाजादि वा दर्शपूर्णमासप्रयोज्यम् । **भाट्ट.** ४।१।१ . * रागप्रयोज्यं स्वर्गादिफलं न विधिप्रयोज्यम् । **वि.** ४।१।२ वर्णकं २ .

* **प्रयोज्यः** न पश्वालम्भः लोहितनिरसनस्य शकृत्संप्रवेधनस्य वा । ४।१।१२।२७. * प्रयोज्यः न पुरोडाशः स्विष्टकृतः । ४।१।१३।२८–३२. * फलप्रयोज्यः ' नेक्षेतोद्यन्तमादित्यम् ' इति पर्युदासः प्रजापतिव्रतेषु । **भाट्ट.** ४।१।३.

* ' **प्रयोज्यकर्तृकैकान्तव्यापारप्रतिपादकाः** । ण्यन्ता एव प्रयुज्यन्ते तत्प्रयोजककर्मसु ॥ ' **वा.** २।१।१।१ पृ. ३७८ । **सुधा**— प्रयोज्यकर्तृकाणां भवनादीनां व्यापाराणां प्रतिपादकाः ये भूवादयो धातवः तेषां प्रयोज्यानां घटादीनां ये प्रयोजकाः कुलालादयः, तेषां व्यापारेषु ण्यन्ता एव प्रयुज्यन्ते (भावयति, विक्लेदयति इति) । भवनादीनां अन्योत्पादानुकूलत्वाभावेन अन्यापारत्वमाशङ्क्य एकान्तेत्युक्तम् । अन्योत्पादानुकूलत्वाभावेऽपि अनिष्पन्नरूपत्वात् एकान्तेन व्यापारता अस्तीत्याशयः । पृ. ५५८.

* **प्रयोज्यत्वं** परोद्देशप्रवृत्तकृतिव्याप्यत्वम् । कृतिव्याप्यत्वं च अनुष्ठाप्यत्वरूपं कालादिव्यावृत्तं वाजपेयाधिकरणे कौस्तुभे एवोपपादितम् । अतश्च कालादेः कृतिकारकत्वघटिताङ्गत्वसत्त्वेऽपि प्रयोज्यत्वाभावः । अङ्गत्वाच्च प्रयोज्यत्वस्य भेदः । तेन यदुद्देशप्रवृत्तकृतिव्याप्यत्वं यस्य, तत् तत्प्रयोज्यं यथा दध्यानयनप्रयाजादि आमिक्षादर्शपूर्णमासादेः । उद्देश्यता चात्र अनुपादेयपञ्चकसाधारणी ग्राह्या । तेन कालनिमित्तादेः प्रयोजकत्वविघातः । यद्यपि विधिरेव सर्वत्र अनुष्ठापकः, प्रवर्तनारूपत्वात् । प्रवर्तनारूपो हि विधिः इष्टसाधनत्वमिव कृतिसाध्यत्वापरपर्यायं प्रयोज्यत्वमपि विषयस्य आक्षिपति, इति भवति प्रयोजकः , तथापि स यदुद्देशेन प्रयोजयति तस्यापि प्रयोजकत्वव्यवहारः शास्त्रे । **भाट्ट.** ४।१।१.

* **प्रयोज्यप्रयोजकभावनिरूपणप्रतिज्ञा** । ४।१।८।२१ . **मीको.** पृ. २७९० ' प्रयुक्तिविचारप्रतिज्ञा ' इत्यत्र द्रष्टव्यम् ।

* ' **प्ररूढकक्षे** यष्टव्यं ' इति बह्वृचब्राह्मणं भवति । **आपश्रौ.** ८।५ . (इदं च वाक्यं ऐतरेयके कौषीतके च नास्ति तेन बह्वृचब्राह्मणान्तराणि सन्तीति ज्ञायते) ।

* **प्ररोचना** (अर्थवादात्) अन्येन कृता न कर्माङ्गम् । **वा.** १।२।१।७ पृ. ११५. * यदा न स्तुतिपदानि विधिशब्देनैव तदा **प्ररोचना**, यदा स्तुतिवचनं तदा स्तवनेन । **भा.** १।२।१।७, प्ररोचनया तु प्रवर्तते, द्वेषान्निवर्तते । १।२।१।१०. (इदं सविस्तरं अर्थवादाधिकरणे भाष्ये वार्तिके च द्रष्टव्यम्) ।

* **प्ररोचनाविधेः** प्रवृत्तिप्रतिबन्धकालस्यादिभङ्गरूपा इतिकर्तव्यता, न स्तुतिः । स्वार्थे तु तया स्तुतिः आकाङ्क्ष्यते, विध्यवगतश्रेयःसाधनत्वादेव तु प्रवृत्तिहेतेरिच्छाजननेन तद्विरोध्यालस्यादिनिराकरणसिद्धेः अनर्थिका स्तुतिः । **सु.** पृ. ५०.

* **प्ररोचनाशब्देन** इच्छाविरोधिद्वेषनाशवाचिना तद्धेतुभूतगुणातिशयवत्त्वलक्षणं प्राशस्त्यं लक्षणया व्युत्पत्त्या वा उक्तम् । **सु. पृ. ३५.**

* **प्रलपितमन्त्रः** 'अक्षी ते इन्द्र पिङ्गले कुलेरिव' इति । **बाल. पृ. ५९.**

* **प्रलयः** । न च प्रलयः (उच्छेदः श्रुतीनां) न संभाव्यते । दृश्यते हि प्रमादालस्यादिभिः पुरुषक्षयाच्च अल्पविषयत्वम् । 'न चैवं सति यत् किञ्चित् प्रमाणं आपत्स्यते, शिष्टत्रैवर्णिकदृढस्मरणान्यथानुपपत्तिलभ्यत्वात् श्रुत्यनुमानस्य । **वा. १।३।१।२ पृ. १६४.** * **प्रलयः** । ननु प्रलये किं मानमिति चेत्, न । कालकपालान्यवृत्तिः प्रागभावः कार्यद्रव्यानाधारकार्याधिकरणवृत्तिः, अभावत्वात्, आत्मवृत्त्यन्योन्याभाववत् इत्यनुमानेन, घटः कार्यद्रव्यानधिकरणकार्याधिकरणवृत्तिध्वंसप्रतियोगी, भावकार्यत्वात्, शब्दवत् इत्यनुमानेन च खण्डप्रलयस्य सिद्धिः । पटः अदृष्टासमानकालीनध्वंसप्रतियोगी, भावकार्यत्वात्, मुक्त्यव्यवहितप्राक्कालीनज्ञानवत् । बुद्धिः प्रागभावासमानकालीनध्वंसप्रतियोगिनी, भावकार्यत्वात्, मुक्त्यव्यवहितप्राक्कालीनादृष्टवत् । सुखं गन्धानाधारसमयवृत्तिध्वंसप्रतियोगि, जन्यगुणत्वात्, संस्काराजनकानुभववत् व्यतिरेकेण आकाशवत् । एककालीनाः सर्वे परमाणवः समग्रोपादेयप्रबन्धशून्याः, आरम्भकत्वात्, नष्टपवनारम्भकपरमाणुवत् । दुःखसंततिः अत्यन्तमुच्छिद्यते, संततित्वात्, प्रदीपसंततिवत् इत्याचार्योपदर्शितानुमानेन च महाप्रलयस्य च सिद्धेः । एवं च 'नन्दान्तं क्षत्रियकुलं' इत्यादिपौराणव्यवहारोपपत्तिः इत्याहुः ।

अत्र **जैमिनीयाः** । उक्तानुमानेन 'धाता यथापूर्वमकल्पयत्' इत्यादिमन्त्रलिङ्गेन अवान्तरप्रलयसिद्धावपि महाप्रलये नास्ति प्रमाणम्, उक्तानुमानानां उपाधिग्रस्तत्वात् । तथाहि, अमूर्तमात्रवृत्त्यभावत्वस्य उपाधित्वात् । उक्तः पक्षः कार्यद्रव्याधाराधारः मूर्तमात्रवृत्त्यभावत्वात्, तन्तुनिष्ठपटप्रागभाववत् इति सत्प्रतिपक्षाच्च । एवं द्वितीयतृतीययोः अमूर्तमात्रवृत्तिभावत्वमुपाधिः । एवं महाप्रलयानुमाने उक्ताः परमाणवः समग्रोपादेयप्रबन्धवन्तः, प्रागभाववत्त्वात्, कपालवत् इति सत्प्रतिपक्षः ।

आचार्यानुमानं तु 'धाता यथापूर्वमकल्पयत्' इति श्रुतिविरोधात्, 'अचन्द्रार्कग्रहा भूमिः कदा चित्तु भविष्यति । अपौरवा तु पृथिवी कदापि न भविष्यति ॥' इति हरिवंशरूपव्यासस्मृतिविरुद्धत्वात् 'यावत्तैलं तावद् व्याख्यानम्' इतिदृष्टान्तप्रसिद्धतैलाभावादिरूपोपाधिविस्मरणाच्च अनाचार्यानुमानमेव । अन्यथा नरशिरःकपालं शुचि, प्राण्यङ्गत्वात् शङ्खवत् इत्यनुमानस्यापि प्रामाण्यापत्तेः । एवमन्येष्वप्यनुमानेषु दूषणानि ऊह्यानि इति दिक् । **मणि. पृ. ४६–४८.**

* **प्रलापः** अर्थवादः 'न चैतद् विद्मो ब्राह्मणाः स्मो वयमब्राह्मणा वा' इति । **बाल. पृ. ५०.**

* **प्रलीनशाखावादः** । मृतसाक्षिकव्यवहारवच्च प्रलीनशाखामूलत्वकल्पनायां यस्मै यद्रोचते स तत् प्रमाणीकुर्यात् । **वा. १।३।१।१ पृ. १६१,** यदि तु प्रलीनशाखामूलता कल्प्येत (स्मृतीनां) ततः सर्वासां बुद्धादिस्मृतीनां अपि तद्द्वारं प्रामाण्यं प्रसज्येत । यस्यैव च यदभिप्रेतं स एव तत् प्रलीनशाखामस्तके निक्षिप्य प्रमाणीकुर्यात् । (इदं पूर्वपक्षे) । **१।३।१।२ पृ. १६३.**

* **प्रवचनं** प्रकर्षेण वचनं अनन्यसाधारणम् । **भा. १।१।८।३०.** * प्रवचनं ब्राह्मणस्यैव 'प्रब्रूयाद् ब्राह्मणस्तेषां नेतराविति निश्चयः' इति स्मृतेः । **सु. पृ. १९५.**

* **प्रवणवत्** । यथा 'प्राचीनप्रवणे वैश्वदेवेन यजेत' इति देशः कर्माङ्गम्, तथा आहीनैकाहिकादीनां अङ्गं देशः । (इदं पूर्वपक्षे) । **भा. १।३।७।२२.**

* **प्रवरः** यत्र यजमानस्यार्षेयं व्रियते सः । **वा. २।१।९।३४.**

ॐ प्रवरः होतुरेव पूर्वः, अध्वर्योरुत्तरः ॥

होतृप्रवराध्वर्युप्रवरयोः क्रमेण मन्त्रपाठः ब्राह्मणपाठस्तु शाखाभेदेन क्वचिद्विपरीतोऽपि दृश्यते । तथापि अध्वर्युप्रवर एव पूर्वः स्यात्, मन्त्रलिङ्गोपोद्बलितब्राह्मणपाठस्य मन्त्रपाठात् बलवत्त्वात् । 'ब्रह्मण्वदा च वक्षद्' इति मन्त्रे वहेर्लिटि सिपि रूपेणावाहनं कुर्यादित्यावाहनस्यासिद्धत्वेन मानात् । आवाहनोत्तरमस्य मन्त्रस्य बाधितार्थतापत्तेः । इति प्राप्ते, मानुषेण होत्रा देवहोतारं प्रति 'आह' इति प्रैषमात्रे कृतेऽपि तदात्वे एव देवास्तेनाहूताः इत्यत्र मानाभावेन अग्निकृतदेवतावाहनस्याधुनाऽप्यसिद्धत्वाभिप्रायेण मन्त्रलिङ्गोपपत्तेः मन्त्रपाठानुसारेण होतृप्रवर एव पूर्वः । **संकर्ष. ४।२।६.**

* **प्रवराः** । त्र्यार्षेयस्यैव कर्माधिकारो नान्यस्य । **भा. ६।१।११।४३** । त्रित्वसंपादनसमर्थोऽधिक्रियते । चतुरार्षेयस्य त्रित्वसंपादने अस्ति सामर्थ्यम् । मनुवत्पक्षे तु यस्याप्येको यस्यापि पञ्च तस्यापि सकृदेवोच्चारणं मनुवदिति । **वा.** * चतुरार्षेयेण पञ्चार्षेयेणापि च कर्मणि त्रय एव प्रवरा उच्चार्याः । **भा. ६।१।११।४३.** * **प्रवरेषु** अध्वर्युवशात् होतुरपि आनुपूर्वीनियमः । **संकर्ष. ३।४।४. मीको. पृ. १००५** 'आर्षेयवरणे अध्वर्युवशात् होतुरपि' इत्यत्र द्रष्टव्यम् ।

* **प्रवरनामधेययोर्न** मन्त्रत्वम् । तत्र प्रवरं एवं पठन्ति 'आङ्गिरस बार्हस्पत्य भारद्वाज' इति । नामधेयं च 'असौ देवदत्तः अमुष्य पुत्रः अमुष्य पौत्रः अमुष्य नप्ता, अमुष्याः पुत्रः अमुष्याः पौत्रः अमुष्या नप्ता' इति । **भा. २।१।९।३४.**

* **प्रवरप्रवरणे** पञ्चप्रवरा अपि त्रीनेव प्रवरानुच्चारयेयुः, न न्यूनं नाप्यधिकम् । **वि. ६।१।११.**

* **प्रवरवत्** । यथा याज्यायामपनीयमानायां प्रवरो नापनीयते । **भा. ३।५।१८।४४.**

* **प्रवरवरणे** द्विगोत्राणाम् 'एकतो द्वौ अन्यत एकः' इति त्रयः । **संकर्ष. ३।४।८. मीको. पृ. २२१९** 'द्विगोत्राणां प्रवरवरणे०' इत्यत्र द्रष्टव्यम् ।

* **प्रवर्ग्यः** अग्निष्टोमस्य प्रथमे प्रयोगे निषिद्धः, न तु ज्योतिष्टोमस्य प्रयोगमात्रे । **३।३।१२।३२–३३.** * प्रवर्ग्यः अतिरात्रे प्रथमाहारे नित्यमेव न कर्तव्यः । विकृत्यन्तरेषु नित्यमेव कर्तव्यः । अग्निष्टोमे प्रथमाहारे विकल्पः । **वा. ३।३।१२।३३ पृ. ८८०.** * प्रवर्ग्यः कौषीतकिब्राह्मणे ज्योतिष्टोमप्रकरणे अधीतः । **सु. पृ. १३२१,** * प्रवर्ग्यः प्रथमप्रयोगादुत्कृष्टः सर्वत्रान्यत्र भवति । **पृ. ३९२.** * प्रवर्ग्यः यस्मिन् कर्मणि प्रवृञ्जनं वर्तते सः । प्रवृञ्जनं च तप्ते घृते पयःप्रक्षेपः । **वा. ३।३।१२।३२ टिप्पणी.** * **प्रवर्ग्यं** प्रकृत्य 'न प्रथमयज्ञे प्रवृञ्ज्यात्' इति निषेधः । स चानूचानव्यतिरिक्तकर्तृके अग्निष्टोमप्रथमप्रयोगे एव । **वि. ३।३।१७** । अग्निष्टोमप्रथमप्रयोगे अनूचानस्य प्रवर्ग्यस्य नित्यं प्रयोगः, अन्येषां नित्यमप्रयोगः । अतिरात्रप्रथमाहारे तु सर्वेषामेवाप्रयोगः, प्रतिप्रसवाभावात् । **शा. ३।३।१२** । अननूचानस्याश्रोत्रियस्य कर्मण्यनधिकारात् प्रशस्तानूचानपरः अनूचानशब्दः इति वार्तिके । **सोम.** * **प्रवर्ग्यस्य** अग्निष्टोमे प्रथमाहारे विकल्पः । तत्रापि 'कामं योऽनूचानः श्रोत्रियः स्यात् तस्य प्रवृञ्ज्यात्' इति वचनं तदा प्रतिप्रसववचनस्य विकल्पकारिणः कर्तृविशेषगामित्वात्तद्विषय एव विकल्पः । अन्येषां नित्यमेवाभावः । **वा. ३।३।१२।३३,** * प्रवर्ग्यस्य अतिरात्रप्रथमाहारे नित्यं प्रतिषेधः, अग्निष्टोमे तु विहितप्रतिषिद्धत्वात् विकल्प इति केचित् । **३।३।१२।३३ पृ. ८७८.** * प्रवर्ग्यस्यापि उपसद्वत् पूर्वाह्णापराह्णभेदेन कर्तव्यस्यापि 'पुरस्तादुपसदां प्रवर्ग्येण चरन्ति' इति एकप्रयोगत्वावगतिः । **सु. पृ. ७८७.** * प्रवर्ग्यस्य कौषीतकिब्राह्मणे ज्योतिष्टोमप्रकरण एव स्वक्रमस्थस्य उत्पत्तिः (कौब्रा. ८।३) । **वा. ३।३।१२।३२,** * प्रवर्ग्यस्य प्रतिषेधः अतिरात्रसंस्थस्य ज्योतिष्टोमस्यैव प्रथमाहारे, अग्निष्टोमे तु विधिः इत्यपरे । सोऽयं सामान्येन उभयोः संस्थयोः प्रतिषेधः, अग्निष्टोमे तु विशेषविधिः स बलीयान् इति । एतदपि न युक्तम् । **३।३।१२।३३.** * प्रवर्ग्यस्य साङ्गस्य उच्चैष्ट्वम्, 'उच्चैः प्रवर्ग्येण' इति करणविभक्तिनिर्देशात् । **टुप्. ९।१।६।२५.** * प्रवर्ग्ये 'न प्रथमयज्ञे प्रवृञ्ज्यात्' इति प्रथमयज्ञग्रहणेन ज्योतिष्टोमस्य प्रथमप्रयोगमात्रं गृह्यते, न सर्वसंस्थः सर्वप्रयोगावस्थश्च गृह्यते । **वा. ३।३।१२।३२–३३.** * प्रवर्ग्ये रौहिणौ नाम पुरोडाशौ यवमयौ तूष्णीं कार्यौ, पुरोडाशशब्दस्य जातिवाचकत्वात् । **सोम. १।४।८ टिप्पणी.**

* **प्रवर्ग्याङ्गमहावीरभेदने** 'तं भिन्नमभिमृशेद्यदते चिदभिश्रिषः' इति सामवेदविहितस्य उच्चैष्ट्वं ज्योतिष्टोमे । **वा. ३।३।२।९ पृ. ८१३.**

• प्रवर्ग्याधिकरणम् । ३।३।१२।३२-३३. 'प्रवर्ग्यन्यायः' इत्यत्र द्रष्टव्यम्।

• प्रवर्ग्याधिकरणदूषणोद्धारः । प्रवर्ग्याधिकरणे (३।३।१२।३२-३३) **वार्तिककृता मिश्रैश्च** सिद्धान्त उक्तः 'न प्रथमयज्ञे प्रवृञ्ज्यात्' इति प्रथमप्रयोगाङ्गभूतोऽयं निषेधः । तस्य च प्रतिप्रसवोऽयम् 'अग्निष्टोमे प्रवृणक्ति' इति । तच्चैतत् न द्वितीयादिप्रयोगविषयम्, तत्र 'यत् प्रवर्ग्यं प्रवृञ्जन्ति' इति प्रवर्ग्योत्पत्तिविधिनैव अनुष्ठानसिद्धेः । अतः प्रथमप्रयोगे निषिद्धस्य प्रतिप्रसवार्थमिदम्, अतस्तत्र विहितप्रतिषिद्धत्वात् विकल्पः । अतिरात्रप्रथमाहारे तु नित्यमकरणमेव वैकल्पिकातिरात्रप्रथमाहारविधानेन तत्र निषेधातिदेशात् अग्निष्टोमसंस्थत्वाभावेन च प्रतिप्रसवानतिदेशादिति । तत्र **न्यायसुधाकृता** दूषणद्वयमुक्तम् । दशमे 'प्रतिषेधः प्रदेशेऽनारभ्यविधाने च प्राप्तप्रतिषिद्धत्वाद्विकल्पः स्यात्' (१०।८।१।१) इत्यत्रोक्तेन 'दुर्बलोऽपि विधिः तदधीनात्मलाभेन प्रतिषेधेन तुल्यबलो भवति' इति न्यायेन 'न प्रथमयज्ञे प्रवृञ्ज्यात्' इत्यस्य प्रतिषेधत्वे वैधप्रवर्ग्ये प्रतिषेधबलादेव विकल्पसिद्धः अग्निष्टोमवाक्यानर्थक्यं इत्येको दोषः । 'न प्रथमयज्ञे' इत्यस्य प्रतिषेधत्वे तु अतिदिष्टतद्बलादेव अग्निष्टोमप्रथमप्रयोगे इव अतिरात्रप्रथमाहारेऽपि विकल्प एवापद्येत, न नित्यमकरणं सिध्येत् इति द्वितीयो दोषः । स्वयं तु (सुधाकृता) समाहितम्, 'न प्रथमयज्ञे' इति न प्रतिषेधः, किन्तु पर्युदासः 'यत् प्रवर्ग्यं प्रवृञ्जन्ति' इति प्रवर्ग्योत्पत्तिवाक्यशेषः, पर्युदस्तप्रतिप्रसवश्च अग्निष्टोमवाक्यम् ।

ननु अकर्तव्येन उक्तस्य कर्तव्यत्वेनोक्तेः प्रतिप्रसवत्वात् पर्युदासस्य च अकर्तव्यत्वोक्त्यर्थत्वाभावस्य 'विधीनामेकदेशः स्यात्' इति सूत्रेण (१०।८।१।४ सूत्रैकदेशः) अविकल्पाय दशमे सिद्धान्तयिष्यमाणत्वात् पर्युदस्तप्रतिप्रसवो न युक्तः । अत एव अग्निष्टोमप्रथमप्रयोगे विकल्पोऽपि अयुक्तः, कर्तव्यत्वाकर्तव्यत्वयोरुदासीनेन पर्युदासेन सामान्यविधेः द्वितीयादिप्रयोगमात्रविषयत्वेनोपसंहारात् । प्रथमप्रयोगे तु विध्यभावादेव अननुष्ठाने प्राप्ते अग्निष्टोमविधितः तत्राप्यनुष्ठानमात्रं सिध्येत् । इति चेत्, सत्यम्, अन्यत्र पर्युदासो नैव अकर्तव्यत्वोक्त्यर्थः, तथापि इह अवश्यं तदर्थताऽभ्युपेया । अन्यथा प्रथमप्रयोगे नित्यानुष्ठानमात्रस्य पर्युदासाग्निष्टोमवाक्यद्वयसाध्यस्य अनारभ्यवादेनैव सिद्धेः तदुभयानर्थक्यं स्यात् । 'नानूयाजेषु' इतिवत् नित्याननुष्ठानेन पर्युदाससार्थक्ये तु पुनर्विधिर्व्यर्थः स्यात् । अतोऽत्र पर्युदासस्य अकर्तव्यत्वोक्त्यर्थत्वात् पुनर्विधिना विकल्पः, तस्य च प्रतिप्रसवत्वं युक्तमिति । याऽपि निषेधत्वे अतिरात्रे विकल्पापत्तिरुक्ता, साऽपि न, प्रकृतौ सामान्यवाक्यशेषभूतस्य पर्युदासस्य अतिरात्रे अतिदेशात् प्राप्तेः नित्यमकरणात् विकल्पार्थस्यैव प्रतिप्रसवस्य अनतिदेशादिति । **तदेतदपि सोमेश्वरमतमयुक्तम्** । यत्तावदिह पर्युदासोऽपि अकर्तव्यत्वोक्त्यर्थ इति क्वापि अन्यत्र अदृष्टमश्रुतं च कल्पितम्, तन्न, एवं हि तवापि अतिरात्रप्रथमाहारेऽपि विकल्पः अपरिहार्यः ।

यत्तु अत्रोक्तं विकल्पार्थस्य प्रतिप्रसवस्य अनतिदेशात् नित्याकरणमिति, तदपि न । नहि विकल्पः प्रतिप्रसवस्य वाक्यार्थ एव, किन्तु पर्युदासस्य अकर्तव्यत्वतात्पर्यनिर्णयद्वारा प्रयोजनम्, ततश्च तात्पर्यग्राहकस्य अनतिदेशेऽपि तेनाकर्तव्यत्वे गृहीततात्पर्यकतया निर्णीतार्थस्यैव पर्युदासस्य अतिदेशात्, एकस्य च तस्य प्रकृतौ अकर्तव्यत्वे तात्पर्यम्, विकृतौ तु न इति परस्परविरुद्धानेकार्थत्वायोगात्, विकृतावपि अकर्तव्यत्वोक्त्यर्थत्वात् अतिरात्रेऽपि विकल्पप्रसङ्गः तवापि दुष्परिहरः । निर्णीतं चैतन्नवमे एकधाऽधिकरणे (९।३।११।३०-३२) यदुत 'प्रकृतौ अन्यार्थत्वेन निर्णीतस्य शास्त्रस्य विकृतौ अतिदेशो अन्यार्थपरता न न्याय्या' इति (शा. आर्थिकोऽनुवादः) । तेन पर्युदासस्य अकर्तव्यत्वोक्त्यर्थत्वे अतिरात्रप्रथमाहारेऽपि विकल्पापत्तिरपरिहार्या, इतरपर्युदासवत् अकर्तव्यत्वोक्त्यर्थत्वाभावे तु अग्निष्टोमप्रथमप्रयोगे नित्यानुष्ठानापत्तेः विकल्पासिद्धिः, इति उभयतःपाशा रज्जुः, अग्निष्टोमवाक्यानर्थक्यापत्तिश्च स्यादिति ।

ननु एवं भट्टसोमेश्वरमतदूषणेऽपि वार्तिककृन्मते तदुक्तं दूषणद्वयं कथमुद्धर्तव्यं इति चेत् । अत्र ब्रूमः । 'न प्रथमयज्ञे' इति प्रतिषेध एव, तस्य च वैधक्रियाविषयत्वात् विकल्पः सिद्ध एव, न त्वसौ अग्निष्टोमवाक्यलभ्यः ।

एवमपि तु अग्निष्टोमवाक्यानर्थक्यम्, तादृशश्च विकल्पः अतिरात्रे प्रसज्येत इति भट्टसोमेश्वरोक्तं दूषणद्वयं एवं परिहर्तव्यम्, अग्निष्टोमवाक्यार्थं (वाक्यं) परिसंख्यार्थम्, अग्निष्टोमातिरात्रप्रथमाहारयोः प्रसक्तो विकल्पः अग्निष्टोमे एव, न अतिरात्रप्रथमाहारे इति । प्रतिप्रसवोऽपि च तदा अग्निष्टोमवाक्यं भवत्येव, अकर्तव्यत्वेन बुद्धस्य कर्तव्यत्वबोधात् । न च प्रतिप्रसवत्वं परिसंख्यात्वं च विरुद्धम् । यद्वा परिसंख्यैव प्रतिप्रसवशब्देन पूर्वोक्तसादृश्यात् गौण्या उच्यते ।

ननु विकल्पपरिसंख्या अतिरात्रे अननुष्ठानमात्रेणापि निर्वहति अनुष्ठानमात्रेणापि च, इति अननुष्ठानमेव न सिध्येत् इति चेत्, मैवम् । नहि अत्र विकल्पपरिसंख्या शाब्दी, किन्तु 'अग्निष्टोमे एव प्रवृणक्ति, नातिरात्रे' इति प्रवर्ग्यानुष्ठानपरिसंख्याद्वारा आर्थी, इति अतिरात्रे नित्याननुष्ठानसिद्धिः । एवं विकल्पपरिसंख्यारीतिः क्वापि अदृष्टा इतिं यदि ब्रूयात्, प्रतिब्रूयादेनं (सोमेश्वरं) अकर्तव्यत्वोक्त्यर्थपर्युदासरीतिर्वा क्व दृष्टा इति । अथ असौ अत्रैव कल्प्यते, ततः पूर्वाऽपि अत्रैव कल्प्यते, इति तुल्यौ पर्युदासानुयोगपरिहारौ ।

ननु अग्निष्टोमे एव प्रवृणक्ति नान्यत्र इति परिसंख्यायां अतिरात्रद्वितीयादिप्रयोगेष्वपि विकृत्यन्तरे च सर्वत्रैव प्रवर्ग्यो न स्यात्, तत्र वैकल्पिकप्रवर्ग्यमात्रपरिसंख्यायां सत्यां अतिरात्रप्रथमाहारस्थस्यैव प्रवर्ग्यस्य पाक्षिकत्वात् परिसंख्या स्यात्, नतु वैकल्पिकप्रवर्ग्यमात्रपरिसंख्यायामेव प्रमाणमस्ति इति चेत् । उच्यते । लाघवात् तद्विषयता लभ्यते । अग्निष्टोमे एव प्रवृणक्ति नान्यत्र इति हि परिसंख्यया या अन्यत्र प्रवर्ग्यनिवृत्तिर्बोध्यमाना यत्र अतिरात्रप्रथमाहारे विकल्पातिदेशात् पक्षे प्रवर्ग्यनिवृत्तिः प्रसक्ता तत्रैव पक्षान्तरेऽपि सा चेत् बोध्यते लाघवं भवति । यत्र तु अतिरात्रे द्वितीयादिप्रयोगे विकृत्यन्तरे च प्रवर्ग्यनिवृत्तिः पक्षेऽपि न प्रसक्ता, तत्र चेत् परिसंख्यया सा बोध्यते, तत्र अत्यन्तं गौरवं स्यात् । यथा नियमविधिः अवघातादेः अप्राप्तिपक्षमेव पूरयति, प्राप्तिपक्षे तु उदास्ते, एवमियमपि परिसंख्या यत्र प्रवर्ग्यनिवृत्तेः अप्राप्तिपक्षः तमेव पूरयति, तत्प्राप्तिपक्षे तु उदास्ते । यथा च व्रीहिनियमः यत्र आग्नेयादौ व्रीहयः पक्षेऽप्राप्ताः तत्रैव तदप्राप्तिपक्षं पूरयन् प्रवर्तते, नोपांशुयाजादौ, तत्रानुत्पत्तिविशिष्टस्य सामान्यविहितस्यापि ध्रौवस्य प्राप्तेः पक्षेऽपि व्रीहीणामप्राप्तेः । लाघवाच्चाविशेषप्रवृत्तस्यापि वाक्यस्य विशेषपरता दशमे (१०।३।२।१३-१७) उक्ता, यथा– वायव्ये पशौ 'हिरण्यगर्भः समवर्तताग्रे इत्याघारमाघारयति' इति श्रुतं उत्तरे जौहवाघारे एव, तत्रैव 'इन्द्र ऊर्ध्वोऽध्वरः' इति प्राकृतमन्त्रजन्यनियमादृष्टक्लृप्तेर्लाघवात् । पूर्वाघारे तु तत्कल्पनाऽऽपत्तेर्गौरवादिति ।

ननु एवमपि एषा प्राप्तपरिसंख्या, सा च त्रैदोष्यपरिहारासंभवात् न क्वचिदपि अङ्गीकृता, इति चेन्न । अस्या अपि वस्तुतः अप्राप्तपरिसंख्यात्वात् । यथा हि 'इमामगृभ्णन् रशनामृतस्य' इत्युदाहरणे यदि इयं न स्यात्, ततो लिङ्गात् विनियोजकवाक्यकल्पनया गर्दभरशनाऽऽदानेऽपि मन्त्रः प्राप्नुयात्, अस्यां तु सत्यां लिङ्गकल्प्यवाक्यकल्पनैव प्रतिषिध्यते, एवमत्रापि यदि 'अग्निष्टोमे प्रवृणक्ति' इति परिसंख्या न स्यात्, ततः अतिरात्रप्रथमाहारे 'यत् प्रवर्ग्यं प्रवृञ्जन्ति, न प्रथमयज्ञे प्रवृञ्ज्यात्' इत्यनयोः अतिदेशकल्पनात् विकल्पः प्राप्नुयात्, अस्यां तु सत्यां अतिदेशप्रतिबन्धात् नातिरात्रप्रथमाहारे विकल्पो भवति । इति सर्वं निरवद्यम् ।

'परीपाकाच्छास्त्रे यदुदितमहो वार्तिककृता, तदज्ञात्वा सोमेश्वर इह बहु स्मान्यथयति । तदुद्दूष्याहं स्वां प्रकृतिमनयं वार्तिकमतं, तदज्ञात्वा दूष्यं न, विबुधजनैर्द्वेषविमुखैः ॥' इति प्रवर्ग्याधिकरणदूषणोद्धारः । बाल. पृ. ९८-१०१.

ज्योतिष्टोमस्य प्रथमे प्रयोगे प्रवर्ग्यस्य निषेधः, द्वितीयादिप्रयोगे तु न निषेधः इति **भाष्यसिद्धान्तः** । अनूचानश्रोत्रियस्य अग्निष्टोमप्रथमप्रयोगे प्रवर्ग्यस्य विकल्पः, इतरयजमानस्य अग्निष्टोमप्रथमप्रयोगे नित्यमेवाभावः । अतिरात्रप्रथमाहारे प्रथमप्रयोगे नित्यं अकरणम् । विकृत्यन्तरेषु तु प्रथमप्रयोग एव नास्ति इति तेषु न निषेधः । 'न प्रथमयज्ञे' इति च न पर्युदासः किन्तु प्रतिषेध एव । इति **वार्तिककृत्सिद्धान्तः** । अग्निष्टोम-

प्रथमप्रयोगे अनूचानस्य नित्यं प्रयोगः, अन्येषां नित्यमप्रयोगः। अतिरात्रप्रथमाहारे तु सर्वेषामेव अप्रयोगः इति **शास्त्रदीपिकाकृत्सिद्धान्तः**। अग्निष्टोमसंस्थाक-(प्रथम–) प्रयोगे अनूचानस्य नित्यं करणं तथा श्रोत्रियस्यापि। श्रोत्रियः प्रकर्षेण वेदतदर्थज्ञः। कामपदेन प्रकर्षाभिधानात्। तदन्येषां अग्निष्टोमप्रथमाहारेऽपि नित्यं अकरणम्। अतिरात्रप्रथमाहारे प्रतिप्रसवाभावात् नित्यमेवाप्रयोगः। विकृतौ तु प्रथमप्रयोगेऽपि नित्यं करणम्। यत्तु वार्तिके अनूचानादेर्विकल्पः अन्येषां तु नित्यमकरणं इत्युक्तम्, तत् प्रौढिवादमात्रम्। यदि तु तदेव समर्थनीयं इत्याग्रहस्तदा कामपदेन विकल्पाभिधानात् अग्निष्टोमवाक्यस्य च तेनोपसंहारात् अनूचानादेर्विकल्पः इत्येवं समर्थनीयम्। इति **भाट्टदीपिकाकृन्मतम्**। 'अधिकारिभेदेन विधिनिषेधयोर्व्यवस्था अस्तु। अनूचानव्यतिरिक्तकर्तृके अग्निष्टोमप्रथमप्रयोगे एवायं निषेधः' इति **शास्त्रदीपिकाकृद्वत् विस्तरकृन्मतम्**।

प्रवर्ग्यन्यायः। प्रवर्ग्यनिषेधाधिकरणम्। ज्योतिष्टोमे श्रुतस्य प्रवर्ग्यस्य अनूचानव्यतिरिक्तकर्तृके अग्निष्टोमप्रथमप्रयोगे एव निषेधः॥

संख्यायुक्तं क्रतोः प्रकरणात् स्यात्। ३।३।१२। ३२॥

भाष्यम्–– ज्योतिष्टोमे प्रवर्ग्यं प्रकृत्य समाम्नायते 'न प्रथमयज्ञे प्रवृञ्ज्यात्' द्वितीये तृतीये वा प्रवृञ्ज्यात् इति। तत्र संदेहः किं ज्योतिष्टोमे सर्वेष्वेव प्रयोगेषु न प्रवर्जितव्यम्, उत प्रथमे प्रयोगे प्रतिषेधः इति। किं तावत्प्राप्तम्? ज्योतिष्टोमे प्रतिषेधः। कुतः? यज्ञसंयोगात्। प्रथमशब्देन यज्ञोऽभिधीयते ज्योतिष्टोमः। तस्य हि प्रथमसंयोगः एवं समाम्नायते 'एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमो, य एतेनानिष्ट्वाऽथान्येन यजेत' इति। यज्ञानां प्रथमः इति कृत्वा प्रथमशब्देन ज्योतिष्टोमोऽभिधीयते। एवं च प्रकरणमनुगृह्यते। यदि क्रतोरेष वादः। तस्मात् संख्यायुक्तः प्रतिषेधो ज्योतिष्टोमस्य प्रवर्ग्यं प्रतिषेधेदिति।

वा–– ('ज्योतिष्टोमे प्रवर्ग्यं' इति भाष्यं बह्वीषु शाखासु प्रवर्ग्यस्य अनारभ्याधीतत्वेन ज्योतिष्टोमप्रकरणपाठाभावात् अयुक्तं आशङ्क्य, अनारभ्याधीतत्वेऽपि अव्यभिचरितक्रत्वन्वयाभिः उपसद्भिः वाक्यकृतेनान्वयेन क्रत्वन्वयं प्राप्तस्य 'प्रकृतौ वा' इति न्यायेन ज्योतिष्टोमगमनाशयतया तावत् परमतेन उपपादयति–) प्रवर्ग्ये अनारभ्य कश्चित्क्रतुविशेषमाम्नायते 'यत्प्रवर्ग्यं प्रवृञ्जन्ति' इति। स च वाक्यसंयोगेन क्रतुसंबन्धं प्रतिपद्यते 'पुरस्तादुपसदां प्रवर्ग्येण चरन्ति' इति। स च 'प्रकृतौ वा द्विरुक्तत्वात्' इत्येवं ज्योतिष्टोमं गच्छति। तत्र हि उपसदः प्रत्यक्षविहिताः सन्ति। विकृतौ तु यावदनुमानेन ता गमिष्यन्ति, तावत् प्रवर्ग्योऽपि यास्यत्येव इति नार्थे उपदेशेन। तेन आह– ज्योतिष्टोमे प्रवर्ग्यं प्रकृत्य श्रूयते इति। यद्वा कौषीतकिब्राह्मणे ज्योतिष्टोमप्रकरणे एव (८।३) स्वक्रमस्थस्य प्रवर्ग्यस्योत्पत्तिः तदा तद्विषयः श्रवणोपन्यासो यथाश्रुतः एव भवति। तं प्रवर्ग्यं प्रकृत्य श्रूयते 'न प्रथमे यज्ञे प्रवृञ्ज्यात्' इति। तत्र संदेहः किं प्रथमयज्ञग्रहणेन सर्वसंस्थः सर्वप्रयोगावस्थश्च ज्योतिष्टोमो गृह्यते, उत प्रथमप्रयोगमात्रमिति। तत्र किं प्राप्तम्? यज्ञशब्दसामानाधिकरण्यात् 'एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमः' इति च प्रयोगात्प्रथमशब्दस्य ज्योतिष्टोमपर्यायत्वं विज्ञायते। 'य एतेनानिष्ट्वा' इति च सर्वयज्ञेभ्यः प्रथमं प्रयुज्यमानत्वेन विधानात् एतस्यैव ग्रहणम्। तथा च प्रकरणमनुगृह्यते। ननु च तदीयप्रथमप्रयोगेऽपि प्रकरणानपकर्षात् अस्त्येवानुग्रहः। कथमनुग्रहः, यदा दीक्षितहोमदानपाकादिप्रतिषेधवत् अयं सर्वप्रयोगविषयः प्राप्नुवन् वाक्येन एकप्रयोगनिबन्धनः क्रियते। नहि तदा प्रकरणेन किञ्चन व्याप्रियते, ज्योतिष्टोमिकप्रयोगाश्रयणस्यापि वाक्यकृतत्वात्। यदीह अन्यः कश्चित् प्रथमप्रयोगार्हः स्यात्, नैवैष प्रतिषेधो ज्योतिष्टोमे एवावतिष्ठेत। तदभावात्तु यदि परिशेषात् इदं वाक्यं संयुक्तप्राथम्यानुरोधेन ज्योतिष्टोमगामि भवेत्, ततः प्रकरणस्य किमित्यवधारणात् बाधः प्रसज्येतैव। तस्मात् प्रकरणानुग्रहार्थमपि प्रथमशब्दोपात्तादिसंख्यायुक्तमिदं ज्योतिष्टोमे स्यादिति।

नैमित्तिकं वा कर्तृसंयोगाल्लिङ्गस्य तन्निमित्तत्वात्। ३३॥

भाष्यम्–– न चैतदस्ति यज्ञस्य एष वादः इति। चतुर्ष्वपि वेदेषु न 'प्रथमः' इत्येवंसंज्ञकः कश्चिद्यज्ञोऽस्ति। भवति तु प्रथमो यज्ञस्य प्रयोगः, कर्तृसंयोगात्। पूर्वस्य द्वितीयादीनपेक्ष्य प्रथमशब्दो भवति। स प्रयोगस्योपपद्यते न क्रतोः। प्रयोगः श्रवणात् गम्यते। क्रतुः प्रयोगसंबद्धत्वात्। श्रुतिश्च बलीयसी न लक्षणा। तस्मात् प्रथमे प्रयोगे न प्रवर्जितव्यमिति। अथ यदुक्तम्, ज्योतिष्टोमेन सामानाधिकरण्यात् तद्वचन इति, लक्षणया सामानाधिकरण्यमिति तत् परिहृतम्। यत्तु प्रथमयज्ञे इति यज्ञशब्देन सामानाधिकरण्यम्, तदपि यज्ञशब्दस्य यागवचनत्वात् अस्मत्पक्षस्य अबाधकम्।

वा–– **'यदि प्रथमशब्दोऽयं नाम स्याज्ज्योतिषः स्वतः। तत एवं भवेदेष प्रयोगस्य तु वाचकः॥'** प्रथमशब्देन हि यत् कर्तुः अप्रवृत्तपूर्वस्य आद्यं प्रवर्तनम्, तदभिधीयते, न कर्म किञ्चित्। तद्योगात्तु कर्मणि प्रतीतिः स्यात्। साऽपि च तत्प्रयोगगतस्यैव। नहि द्वितीयादीन् प्रयुञ्जानः कश्चित् प्रथमं यजते इत्युच्यते। न चैवं अयजमानस्य प्रथमयज्ञो नाम भवति। ततश्च पूर्वाभिहितप्राथम्यगुणलक्षणया तद्वति गृह्यमाणे अर्थविप्रकर्षः आपद्यते। तत्र च स आश्रीयते, यत्र तेन विना एकवाक्यत्वं नावकल्पते। यथा 'एष वाव प्रथमो यज्ञानाम्' इत्यत्र। न त्विह प्राथम्यस्य प्रतिषेधनिमित्तता न संभवति, येन पूर्वप्रतीतं सत् तदुल्लङ्घ्य तत्प्रयोगस्थोऽपि तावत् क्रतुर्गृह्येत। प्रयोगान्तरस्थस्तु दूरविप्रकृष्ट एव। नन्वेवं सति यस्य कस्यचित् प्रथमप्रयोगो निमित्तं प्राप्नोति। प्राप्नुयात्, यदि विधिरेष स्यात्। अयं तु प्रतिषेधत्वात् प्राप्तिमपेक्षमाणो लौकिकव्यापारेभ्यो वैदिकेभ्यश्च अध्ययनाधानाग्निहोत्रदर्शपूर्णमासादिभ्यः प्रवर्ग्यप्राप्त्यभावात् निवर्तमानः सामर्थ्येन सोमं गच्छति। तत्रापि अनारभ्यवादन्यायेन ज्योतिष्टोमम्, प्रथमशब्दाच्च तस्य आद्यं प्रयोगम्। एवं च सजातीयत्वेन प्रत्यासत्तेश्च तस्यैव द्वितीयादिप्रयोगापेक्षणं युक्ततरं भविष्यति, इतरथा तु दूरस्थयज्ञान्तरापेक्षायां सत्यां विप्रकृष्टतरत्वं भवेत्। तस्मात् प्रकरणं बाधित्वा वाक्येन प्रथमप्रयोगविषयता सिद्धा। तत्र तु केषाञ्चित् तैत्तिरीयादीनाम् 'अग्निष्टोमे प्रवृणक्ति' इति पुनर्विधानमस्ति (तैआ. ५।६।३)। तद्यदि तावत् द्वितीयादिप्रयोगविषयं कल्प्यते, ततः प्रतिषेधाभावात् पूर्ववचनेनैव सिद्धेः विधानानर्थक्यम्। तस्मात् आद्यप्रयोगविषयमेवैतत्। ततश्च प्रतिषेधो बाध्यमानः क्रत्वन्तरप्रथमप्रयोगं सावकाशत्वात् गच्छतीति **केचित्**। (परमतेन समादधाति–) तत्तु न युक्तम्। अग्निष्टोमस्यापि संस्थारूपस्य अन्यत्र विद्यमानत्वात्। न च प्राथम्यं सावकाशम्, 'य एतेनानिष्ट्वा' इति केवलज्योतिष्टोमविषयत्वात्। प्रथमं हि यजनं प्रथमं यज्ञः, न चैतत् अन्यस्य क्रतोरस्ति। तस्मात् ज्योतिष्टोमस्यैव अतिरात्रसंस्थस्य प्रथमाहारे (आहारः प्रयोगः) प्रतिषेधः अग्निष्टोमे विधिरित्य**परे**। विहितश्च अतिरात्रस्यापि पाक्षिकः प्रथमाहारः 'तस्मात् प्रथमं यजमानोऽतिरात्रेण यजेत' इति। सोऽयं सामान्येन उभयोः संस्थयोः प्रतिषेधः अग्निष्टोमे तु विशेषविधिः, स बलीयान्। एतदपि न युक्तम्। अग्निष्टोमस्यापि बहुप्रयोगान्तरक्रत्वन्तरगामित्वेन सुतरां सामान्यरूपत्वात्। अतः अतिरात्रप्रथमाहारे नित्यं प्रतिषेधः अग्निष्टोमे तु विहितप्रतिषिद्धत्वात् विकल्पः इति **केचित्**। **अत्र पुनश्चोदयन्ति**। यद्येष प्रतिषेधः, तत एवं स्यात्। पर्युदासास्तु एवंविधा इति दशमे वक्ष्यते 'अपि तु वाक्यशेषः स्यात्' इति (१०।८।१।४), न चासौ अग्निष्टोमवाक्यशेषो भवति। यदि हि, 'अप्रथमयज्ञे अग्निष्टोमे प्रवृणक्ति' इति कल्प्येत ततः तस्मादेव सामान्यशास्त्रात् प्राप्तत्वात् अग्निष्टोमयुक्तविध्यानर्थक्यं आपद्यते (द्येत)। तेन सामान्यविधेरेव एष शेषः, 'यत् प्रवर्ग्यं कुर्वन्ति, तत् अप्रथमयज्ञे' इति। ततश्च अतिरात्रविषयत्वमेव फलतो भवति। न च एक एव शेषः उभयोर्वाक्ययोः संभवति, एकसंबन्धेनैव कृतार्थत्वात्। तस्मात् अग्निष्टोमविधेः निरपवादत्वात् नित्यमेव तत्र भवितव्यमिति। (विकल्पायोगचोद्यं निराकर्तुमाह–) उच्यते। स्यादेतदेवम्, यदि अयं पर्युदासो भवेत्, न तु अयं पर्युदासः, वाक्यशेषत्वानुपपत्तेः। तत्र अग्निष्टोमवाक्ये तावत् भवतैव प्रति-

पादितम् (दृष्टान्तत्वेन अग्निष्टोमवाक्यशेषत्वस्य अनुपपन्नत्वं त्वयैवोक्तम्) । अतिरात्रवाक्येऽपि यदि तदीयकथम्भावपूरणवेलायां एतदुच्येत, ततः शेषो भवेत् । न तु तथोक्तम्, संस्थानां असमानविधानत्वात्, अवान्तरप्रकरणे च प्रतिषेधाश्रवणात् । न हि अनेकज्यौतिष्टोमिकवाक्यान्तरव्यवहितातिरात्रप्रकृतिवच्छब्दस्य एष शेषः अवकल्पते । तस्मात् 'न तौ पशौ' इतिवत् प्रतिषेधः एवायं विज्ञायते । ननु प्रतिषेधोऽपि सन् प्रकृतिविषय एव प्राप्नोति । प्राप्नुयात्, यदि विकृतावपि नोपपद्येत । स तु (प्रतिषेधः) प्राप्तिमात्रापेक्षित्वात् उपदेशमतिदेशं वा अनादृत्य उभयत्रापि प्रवर्तते । (प्रकृतिमात्रविषयत्वमनुजानाति–) शक्यं तु इह (अपि) वक्तुं 'प्रकृतौ वा द्विरुक्तत्वात्' इति । ननु च तुल्यार्थत्वे एतदेवं युक्तम् । अस्ति चेह अर्थभेदः, प्रकृतौ वैकल्पिकत्वात् अतिरात्रे च चोदकप्राप्तस्य नित्यप्रतिषेधात् । न एतत् (द्विरुक्तत्वापत्तिः) अस्ति । वक्ष्यति हि एतत् 'प्रतिषेधः प्रदेशे, अनारभ्यविधाने च प्राप्तप्रतिषिद्धत्वाद् विकल्पः स्यात्' (१०।८।१।१) इति । (सूत्रार्थमुपपादयति–) यस्य शास्त्रादृते प्राप्तिः नास्ति, तस्य प्राप्तिं अनभ्यनुज्ञाय प्रतिषेधासंभवात् अवश्यं प्रतिषेधेनैव तद्विषयोऽपि विधिः अङ्गीकर्तव्यः । स चेत् अङ्गीकृतः, शास्त्रत्वाविशेषात् तुल्यबलत्वं (विधिप्रतिषेधयोः) । अतः सर्वथा अतिरात्रे विकल्पेन भवितव्यम् । तस्मात् द्विरुक्तत्वात् उपदेशातिदेशयोश्च प्राप्तिकालवैषम्यात् प्रकृत्यर्थतैव वरं इति । ननु एवं सति 'अग्निष्टोमे प्रवृणक्ति' इत्यनेनैव प्रकृतिविधेः सिद्धत्वात् अनारभ्यवादः अनर्थकः प्राप्नोति । नैष दोषः । तेन उत्पत्तिः, अनेन विनियोगः इत्येवं व्यापारभेदात् । अथवा अनारभ्यवादः अग्निष्टोमव्यतिरिक्तविषयो भविष्यति । ननु अग्निष्टोमवाक्येन उपसंह्रियते । न शक्यमेतत् उपसंहर्तुम् । तन्नाम विशेषवचनेन उपसंह्रियते, यत् क्रतुसंयोगाय असमर्थं कथञ्चित् परोक्षवृत्त्या संयुज्यते, यथा साप्तदश्यम् । अयं तु साक्षाद्यज्ञसंबन्धसामर्थ्यात् नोपसंहारमर्हति । अतश्च विकृत्यर्थो भविष्यति तथा सति च 'न प्रथमयज्ञे' इत्यनारभ्यवादशेषः उपपद्यते इति अतिरात्रप्रथमाहारे नित्यमप्रयोगः अग्निष्टोमे च केवलविधिसंस्पर्शात् नित्यं प्रयोगः । नहि तद्वाक्यशेषोऽपि अयं भवतीत्युक्तम् । (एकदेशी अनारभ्यवादस्य विकृत्यर्थत्वं निरस्यति–) एतावत्तु इह अवधारयितुं शक्यम्, नायमनारभ्यवादः प्रकृतेरन्यत्र गच्छति । यदि गच्छेत्, ततः इष्टिपशुबन्धानपि गच्छेत् । न च गन्तुमर्हति, 'पुरस्तादुपसदाम्' इति स्थाननियमस्य तत्रानुपपत्तेः । अतो यत्र उपसदः, तत्र गच्छति । ततश्च प्राप्तिकालवैषम्यात् प्रकृतौ तावत् ताः (उपसदः) सन्ति, इति अन्तरेणापि वचनं गच्छेत्, किमुत यदा विस्पष्टमेव वचनम् । स्फुटसामान्यसंबन्धस्यापि च एवमादेः उपसंहारः इति व्याख्यातं चतुर्थाधिकरणे (३।१।१५ इति तु टिप्पण्यामुक्तम्) तस्मात् उत्पत्तिविनियोगाभ्यामेव अपुनरुक्तत्वम् । एवं सति येषां प्रकरणे एव प्रवर्ग्यपाठः, तैः सह संगतार्थता भविष्यति । (एकदेश्युक्तं दूषयति–) यदि तर्हि द्वयोरपि एकवाक्यत्वेन 'अग्निष्टोमे प्रवृणक्ति' इत्ययमर्थो निष्पन्नः, ततः 'न प्रथमयज्ञे' इत्येतस्य अप्रथमयज्ञे अग्निष्टोमे इत्येवं प्रवर्तमानस्य न कश्चित् विरोधः इति पर्युदासात् नित्यमेव अकरणेन भवितव्यम् ।

अग्निष्टोमवाक्यं विकल्पसिद्ध्यै वर्णयितुमाह– (अतः एवं वर्णनीयम् । अनारभ्यवादस्य प्रकृत्यर्थतायां सिद्धायां 'अग्निष्टोमे प्रवृणक्ति' इत्येतस्य अनन्यप्रयोजनत्वात् प्रतिषिद्धप्रतिप्रसवार्थता गम्यते । ननु नैवायं प्रतिषेधः इत्युक्तम् । अग्निष्टोमयुक्तवाक्यार्थवत्त्वाय प्रतिषेधः इति ब्रूमः । नहि अनेन सह पर्युदासः अवकल्पते इति दर्शितम् । न च अनारभ्यवादः अनग्निष्टोमार्थः, यतः तद्विषयः पर्युदासः अवकल्पते । तेन द्वयोरपि (पर्युदास– अग्निष्टोमवाक्ययोः) अग्निष्टोमविषयत्वम् । अतश्च यद्यपि अयं पर्युदासः, तथापि उभयोः सामर्थ्यात् विकल्पेनैव भवितव्यम् । कुतः ? '**नित्यं हि क्रियमाणेऽस्मिन् पर्युदासो वृथा भवेत् । नित्यमक्रियमाणे वा पुनर्विधिरनर्थकः ॥**' ततश्च यस्माद्विकल्पात् बिभ्यद्भिः पर्युदास आश्रीयते, स तस्मिन् सत्यपि आगतः, इति वरं शब्दस्वरसलभ्यः प्रतिषेधः एव आश्रितः । तेन **प्रथमाहारे अग्निष्टोमे विकल्पः** । तत्रापि यदा केषां

चित् ईदृशं वचनं 'कामं तु योऽनूचानः श्रोत्रियः स्यात्, तस्य प्रवृञ्ज्यात्' इति, तदा प्रतिप्रसववचनस्य विकल्पकारिणः कर्तृविशेषगामित्वात् तद्विषयः एव विकल्पः, अन्येषां नित्यमेवाभावः । कथं पुनः अश्रोत्रियस्य कर्मणि प्रवृत्तिः, येन तत् विशेषणत्वेन श्रूयते ? सत्यं प्राप्तस्य पुनर्वचनं तावन्मात्रफलं अनर्थकं इति सामर्थ्यात् प्रकर्षगतिर्विज्ञास्यते । यथा 'अभिरूपाय कन्या देया' इत्यत्र अभिरूपतराय इति गम्यते । अनूचानग्रहणं तु ब्राह्मणस्य अनुवचनसंबन्धात् क्षत्रियवैश्यनिवृत्त्यर्थं भविष्यति ।

तदेतत् अतिरात्रेऽपि एवमेव प्राप्नोति । तत्र 'न प्रथमयज्ञे' इति प्रतिषेधात् अनग्निष्टोमत्वेन च प्रतिप्रसवाभावात् नित्यमेव न कर्तव्यः । विकृत्यन्तरेषु प्रथमप्रयोगानुपपत्तेः नित्यमेव करणम् । ननु तत्रापि 'न प्रथमयज्ञे' इत्यतिदेशात् अग्निष्टोमस्वरूपस्य च प्रतिप्रसवनिमित्तस्य अभावात् प्रथमप्रयोगेषु अभाव एव प्राप्नोति । नैतदेवम् । प्रथमशब्दस्य अविशेषितस्य सर्वाद्ये प्रवर्तमानस्य अन्यत्र अप्रवृत्तेः । तस्मात् केवलज्योतिष्टोमप्रथमप्रयोगविषय एव नैष प्रतिषेध इति सिद्धम् ।

शा— '**वाक्यात् प्रकरणाबाधं (प्रतिषेधः) क्रतोरङ्गं, तदुच्यते । वाक्यादेष प्रयोगाङ्गं प्रयोगः प्रथमो यतः (मतः) ॥**' अग्निष्टोमप्रथमप्रयोगे अनूचानस्य नित्यं प्रयोगः, अन्येषां नित्यं अप्रयोगः । अतिरात्रप्रथमाहारे तु सर्वेषामेव अप्रयोगः ।

सोम— भवतु पूर्वत्र प्रकरणवाक्ययोर्विसंवादात् वाक्येन प्रकरणबाधः । इह तु विसंवादाभावात् न प्रकरणं बाध्यं इति प्रत्यवस्थानात् **संगतिः । सूत्रार्थस्तु**– संख्यायुक्तं लक्षणया प्राथम्ययुक्तं न प्रथमयज्ञे इत्येतत् निषेधनं प्रकरणात् क्रतोः स्यात् इति ।

वि— 'न प्रवृञ्ज्यादाद्ययज्ञे क्रतौ सोऽनुष्ठितात्तु । प्रतिषेधः, क्रतौ युक्त उक्ता ह्यस्याद्ययज्ञता ॥, प्रवृणक्त्युपसद्भ्यः प्रागिति वाक्यात् क्रतौ विधेः । आद्यप्रयोगे प्राथम्यान्निषेधः कश्चिदेव सः ॥' कश्चित् अनूचानव्यतिरिक्तकर्तृके अग्निष्टोमप्रथमप्रयोगे । १७.

भाट्ट— अनारभ्याधीतः प्रवर्ग्यः 'यत्प्रवर्ग्यं प्रवृणक्ति' इति श्रुतः । तस्य च 'पुरस्तादुपसदां प्रवर्ग्यं प्रवृणक्ति' इति ज्योतिष्टोमाङ्गत्वेन विनियोगः, अव्यभिचरितक्रतुसंबन्धसहकृतद्विरुक्तत्वन्यायेन तदुपस्थितेः । न च उपसदङ्गत्वमेव किं न स्यादिति वाच्यम् । उपसत्पदस्य पुरस्तात्कालप्रतियोगित्वेन स्वार्थोपस्थापकस्य उद्देश्यसमर्पकत्वाभावात् । उपस्थितत्वात् तद्वाचकपदान्तरकल्पनया उद्देश्यत्वाङ्गीकारे तु उपसदां फलवत्त्वज्ञानार्थं ज्योतिष्टोमोपस्थितेरावश्यकत्वात् लाघवेन तदर्थत्वोपपत्तेः । **कौषीतकिब्राह्मणे** प्रकरणे एव प्रवर्ग्याम्नानाच्च ।

तत्र च 'न प्रथमयज्ञे प्रवृञ्ज्यात्' इति श्रुतम् । प्रथमयज्ञपदेन सर्वसंस्थः सर्वावस्थश्च ज्योतिष्टोमोऽभिधीयते, उत तदीयप्रथमप्रयोगमात्रमिति चिन्तायाम्, प्रथमयज्ञशब्दो ज्योतिष्टोमनामैव 'एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमः' इति सामानाधिकरण्यात्, तस्य प्रथमं प्रयुज्यमानत्वेन प्रवृत्तिनिमित्तसत्त्वाच्च । **यद्यपि** च अन्यसंस्थानां अन्यपदेनाभिधानात् तासु ज्योतिष्टोमोत्तरकालत्वविधानान्न सर्वसंस्थाकज्योतिष्टोमस्य प्रथमं प्रयुज्यमानत्वम्, **तथापि** ज्योतिष्टोमत्वसामानाधिकरण्येन तावत् तदस्तीति प्रवृत्तिनिमित्ताविघातः । अतो वाक्यात् प्रकरणाच्च ज्योतिष्टोमत्वावच्छेदेनैव अयं प्रतिषेधः पर्युदासो वा ज्योतिष्टोमभिन्ने प्रवृणक्तीति, अन्यथा विकल्पापत्तेः । यत्तु 'अग्निष्टोमे प्रवृणक्ति' इति वचनं तत् पर्युदासप्रतिप्रसवार्थम् । तदपि च 'कामं तु योऽनूचानः श्रोत्रियः स्यात् तस्य प्रवृञ्ज्यात्' इत्यनेन उपसंह्रियते । तेन अनूचानस्य श्रोत्रियस्य अग्निष्टोमसंस्थाकज्योतिष्टोमे नित्यं करणम्, अन्यज्योतिष्टोमे नित्यमकरणम्, विकृतिषु च नित्यं करणम् । इति **प्राप्ते**, प्रत्येकशक्त्यैव अर्थबोधोपपत्तौ अतिरिक्तशक्तिकल्पनायां प्रमाणाभावात्, प्रथमशब्दस्य च अप्रवृत्तप्रवर्तनविषयवाचित्वात् आद्यप्रयोगपरत्वावगतेः, यज्ञशब्दस्य च लक्षणया प्रयोगपरत्वम्, प्रकरणात् ज्योतिष्टोमरूपयज्ञपरत्वमेव वा अङ्गीकृत्य प्रथमयज्ञपदेन ज्योतिष्टोमप्रथमप्रयोगोऽभिधीयते । स च अग्निष्टोमसंस्थाकज्योतिष्टोमस्य, पाञ्चमिकन्यायात् । 'प्रथमं यजमानोऽतिरात्रेण यजेत' इति वचनादतिरात्रसंस्थाकस्य च । अतः

उभयत्रापि अनेन वचनेन प्रवर्ग्यस्य प्रतिषेधः पर्युदासो वा। न तु विकृत्यन्तरे, तत्र उपदेशातिदेशाभ्यां तदप्राप्तेः। **न च** ज्योतिष्टोमे द्वितीयादिप्रयोगापेक्षया प्राथम्यस्य विवक्षितत्वात् विकृतावपि तद्द्वितीयादिप्रयोगापेक्षया प्रयोगवृत्तिप्राथम्यस्य सत्त्वात् कथं न तत्प्राप्तिरिति **वाच्यम्।** प्राथम्यस्य निरूपकापेक्षायां द्वितीयादिप्रयोगस्य निरूपकत्वाकल्पनात्। 'एष वाव प्रथमो यज्ञो यज्ञानाम्' इति वचनेन ज्योतिष्टोमविकृतिमात्रस्यैव तदवधारणात्। अत एव प्रथमप्रयोगविषयोऽपि ज्योतिष्टोम एव बोध्यः। तथा च प्रथमयज्ञशब्दो वाक्यशेषात् वैदिकप्रयोगाच्च निरूढलक्षणया सोमान्तरनिरूपितप्राथम्यवत् प्रयोगविषय-ज्योतिष्टोममेवाभिधत्ते। अन्यथा स्वस्वद्वितीयादिप्रयोग-निरूपितप्राथम्यवत्प्रयोगविषययज्ञमात्राभिधाने 'आहिताग्नय इष्टप्रथमयज्ञा गृहपतिसप्तदशाः सत्रमासीरन्' इत्यादौ सत्रे यज्ञमात्रोत्तरकालापत्तेः। अत एव उक्त-द्विविधज्योतिष्टोमप्रथमप्रयोगे एव प्रवर्ग्यप्रतिषेधः।

वस्तुतस्तु नायं प्रतिषेधः, तथात्वे 'न तौ पशौ करोति' इतिवत् अतिरात्रप्रथमाहारेऽपि विकल्पापत्तेः। **न च** क्रियायाः स्वरूपेण उद्देश्यसंबन्धित्वेन वा निषेधे एव विकल्पो यथोक्तस्थले, यत्र तु कारकनिषेधः यथा 'रात्रौ श्राद्धं न कुर्वीत' इत्यादौ, तत्र निषेधस्य कारक-मात्रविषयत्वेन क्रियाविषयत्वाभावात् क्रियाविषयविधि-विकल्पापादकत्वानुपपत्तिः। प्रकृते च प्रथमयज्ञ-शब्दस्य नोद्देश्यपरत्वम्, अपि तु 'मन्द्रं प्रातःसवने' इतिवत् अधिकरणकारकपरत्वम्, अतश्च न विकल्पा-पत्तिरिति केषां चिदुक्तं युक्तमिति **वाच्यम्।** कारक-स्यापि प्रयोगाधिकरणत्वस्य विधितः प्राप्तौ न्यायतौल्येन प्रथमप्रयोगाधिकरणत्वस्यैव विकल्पापत्तेरावश्यकत्वात्। अत एव आक्षेपेण यत्किञ्चित्कालप्राप्तौ रात्र्युपादानस्य ऐच्छिकत्वेन रागप्राप्त्या वैधत्वाभावात् न तन्निषेधस्य विकल्पापादकत्वम्। प्रकृते तु प्रथमप्रयोगाधिकरणत्वं न ऐच्छिकम्, प्रतिप्रधानं गुणान्वयस्य वैधत्वात्। अत-स्तन्निषेधोऽपि विकल्पापादक एव। वस्तुतस्तु प्रथम-प्रयोगस्य उद्देश्यत्वमेव शास्त्रदीपिकायामुक्तमिति न किञ्चि-देतत्। अतो 'नानूयाजेषु' इतिवत् पर्युदासः एवायं अनारभ्यवाक्यशेषः उक्तविधप्रथमप्रयोगभिन्ने प्रवृञ्ज्या-दिति। ततश्च प्रापकप्रमाणाभावात् प्रथमप्रयोगे अकरण-प्रसक्तौ 'अग्निष्टोमे प्रवृणक्ति' इति वचनं वस्तुतः अत्य-न्ताप्राप्तप्रापकमपि प्रतिप्रसवफलकं सत् अग्निष्टोमसंस्थाकत्वे निमित्ते प्रथमप्रयोगेऽपि नित्यं प्रवर्ग्यविधानार्थम्, न तु विकल्पेन, विकल्पे प्रमाणाभावात्। अस्य नान्यविषयता सामान्यविधितः एव सर्वत्र प्राप्तत्वादिति प्रथमप्रयोग-विषयतैव। अनेन च काममित्यनूचानवाक्यस्योपसंहारः। तेन अग्निष्टोमसंस्थाकप्रयोगे अनूचानस्य नित्यं करणम्। तथा श्रोत्रियस्यापि। अनूचानो वेदाध्यापकः। तेन क्षत्रियवैश्ययोर्निवृत्तिः। श्रोत्रियः प्रकर्षेण वेदतदर्थज्ञः। कामपदेन प्रकर्षाभिधानात्। तस्य इत्येकपदेन उभयोः कर्त्रोर्विधानाच्च न विधेयानेकत्वम्। तदन्येषामग्निष्टोम-प्रथमाहारेऽपि नित्यमकरणम्। यत्तु **वार्तिके**— अनू-चानादेर्विकल्पोऽन्येषां तु नित्यमकरणमित्युक्तम्, तत् प्रौढिमात्रम्। अत एव **पार्थसारथिना** अनूचानादेः नित्यमेव प्रयोग इत्युक्तम्। यदि तु तदेव समर्थनीयमित्या-ग्रहः तदा 'काम'पदेन विकल्पाभिधानात्, अग्निष्टोम-वाक्यस्य च तेनोपसंहारात्, अनूचानादेर्विकल्प इत्येवं समर्थनीयम्। सर्वथा अतिरात्रप्रथमाहारे प्रतिप्रसवाभावा-न्नित्यमेवाप्रयोगः। विकृतौ तु प्रथमप्रयोगेऽपि नित्यं करणमिति स्थितम्।

मण्डन— 'नाद्यप्रयोगे प्रावर्ग्यम्।' १७.

शंकर— 'नाद्ये प्रयोगे प्रवृञ्ज्यात्।' १७.

* **प्रवर्ग्यन्यायेनैवा**श्वदानगतप्रयोजनवत्त्वजिज्ञासायां अवश्योपस्थितक्रतोरेव शेषित्वकल्पनौचित्यात् नाश्वदानस्य हेतुत्वं शेषितया, अपितु निमित्ततयैव। **भाट्ट.** ३।४।१४, * कर्तुः प्रयोजनवत्त्वसिद्ध्यर्थं अवश्यं प्रकरणालोचने क्रियमाणे क्रतोरुपस्थितत्वेन तत्साद्गुण्यवैगुण्यपरिहारयोरेव **प्रवर्ग्यन्यायेन** कल्पयितुं युक्तत्वात् पदान्तरकल्पनया न प्राधान्यम्। ३।४।८ पृ. ३२०, * जञ्जम्यमानपुरुषस्य शानजुपात्तस्यापि सर्वप्रधानभूतायां भावनायां चैत्रादिवत् विशेषणत्वेनोपादानात् प्रवर्ग्यन्यायेन प्राधान्यकल्पनानुप-पत्तिः। ३।४।९, * 'पुरस्तादुपसदां सौम्येन प्रचरन्ति' इत्यत्र उत्पत्तिवाक्यत्वेऽपि प्रवर्ग्यन्यायेन ३।३।१२

उपसन्निष्ठफलवत्त्वज्ञानस्य स्वाराज्यवाक्याधीनत्वात् तदर्थ-त्वमेव युक्तं सौम्यस्य। ४।४।३.

* **प्रवर्ग्यसाम्नां** 'उच्चैः प्रवर्ग्येण' इति करण-विभक्त्या साम्नस्य उच्चैस्त्वविधानात् प्रवर्ग्यप्रयोगबहिर्भावे-ऽपि प्रवर्ग्याङ्गत्वाविरोधात् उच्चैस्त्वम्। **सु.** पृ. ११८४.

* **प्रवर्तकं** ज्ञानं विचार्यते। ननु किमत्र विचार्यते इष्टसाधनत्व–कृतिसाध्यत्व–बलवदनिष्टाननुबन्धित्वज्ञानानां प्रवृत्तिहेतुत्वस्य क्लृप्तत्वात् इति चेत्। अत्र गुरवः। स्वविशेषणवत्ताप्रतिसंधानजन्यकार्यताज्ञानस्यैव चिकीर्षा-द्वारा प्रवृत्तिहेतुत्वम्, न इष्टसाधनत्व–बलवदनिष्टाननु-बन्धित्वज्ञानयोरपि, अन्यथा हेतुहेतुमद्भावत्रयकल्पना-गौरवात्। तथाहि। कार्यताज्ञानं द्विविधम् 'मयेदं कर्तुं शक्यते' इत्येवंरूपमेकम्। 'ममेदं अवश्यं कार्यम्' इत्येवंरूपं द्वितीयम्। तत्र आद्यं पदार्थनिष्ठयोग्यतागम्यं इति न प्रवृत्तिं प्रति हेतुः। द्वितीयं तु स्वेष्टसाधनत्वबल-वदनिष्टाननुबन्धित्वज्ञानजन्यं इति चिकीर्षाद्वारा प्रवृत्तिं प्रति हेतुः। इदमेव स्वविशेषणवत्ताप्रतिसंधानजन्यत्वम्। स्वं नियोज्यः, तद्विशेषणं काम्ये फलकामना, नित्ये शुचि-तत्कालजीवित्वादि। इति स्वेष्टसाधनत्वबलवदनिष्टा-ननुबन्धित्वज्ञानजन्यकार्यताज्ञानस्य चिकीर्षाद्वारा प्रवर्तकत्वं सिद्धं भवति। अत एव इष्टसाधनत्वेन अज्ञाते मध्वन्न-भोजने, अनिष्टसाधनत्वेन ज्ञाते विषभोजने, बलवद-निष्टानुबन्धित्वेन ज्ञाते मधुविषसंपृक्तान्नभोजने न प्रवृत्त्यापत्तिः।

न च तत्र 'मध्वन्नभोजनजन्यं सुखं भवतु' इती-च्छया तदापत्तिः। विषासंपृक्तमध्वन्नभोजनसुखत्वेनैव इच्छागोचरीभावात्। नापि जीवकर्तृकत्वलिङ्गककार्यता-ज्ञानेन विषभक्षणे प्रवृत्त्यापत्तिः, न वा काम्ये शौचादि-लिङ्गककार्यताज्ञानात् प्रवृत्त्यापत्तिः। एतेन मावियौव-राज्ये, तृप्तस्य भोजने, च प्रवृत्त्यापत्तिर्निरस्ता।

केचित्तु इदानींतनमत्कृतिसाध्यताज्ञानं हेतुः। तच्च इदानींतनमदिष्टसाधनत्वज्ञानाधीनं इति तदभावान्न प्रवृत्तिः इत्याहुः। तन्न, तदनुकूलकृत्यभावेऽपि 'यदि मया क्रियते तदेदं भविष्यति' इत्येतादृशकृतिसाध्यत्वज्ञानस्य तदानीमपि सत्त्वात्।

एवं च इष्टसाधनत्वबलवदनिष्टाननुबन्धित्वशुचितत्काल-जीवित्वज्ञानजन्यानां कार्यताज्ञानानां कार्यताज्ञानत्वेन अनु-गतानां प्रवृत्तौ हेतुत्वं इति लाघवम्। इष्टसाधनत्वज्ञाना-दीनां प्रवृत्तिं प्रति हेतुत्वे तु हेतुहेतुमद्भावत्रयकल्पना-गौरवम्।

न च इष्टसाधनत्वादिज्ञानानां कार्यताज्ञानहेतुत्वकल्पने 'तद्धेतोरेवास्तु' इति न्यायात् प्रवृत्तिं प्रति तेषामेव कारणत्वं युक्तम्। शाब्दबोधे तात्पर्यज्ञानस्येव प्रवृत्तौ कार्यताज्ञानस्य लाघवेन हेतुत्वात्, तद्धेतु-(तात्पर्यज्ञान हेतु–) प्रकरणादीनां शाब्दबोधहेतुत्वाभाववत् कार्यता-ज्ञानजनकेष्टसाधनत्वज्ञानादीनां अपि तद्धेतुत्वकल्पना-ऽयोगात्। तस्मात् कार्यताज्ञानमेव प्रवर्तकम्, कार्यत्वमेव विध्यर्थः। **मणि.** पृ. ८३–८४.

* **प्रवर्तनं** औदासीन्यात् प्रच्युतिः। **सोम.** १०।१।२. * **प्रवर्तना** इष्टसाधनत्वमेव इति शास्त्रदीपिका-कारस्य मतम्। **सोम.** १।२।१ पृ. ७. * प्रवर्तना च परनिष्ठप्रवृत्तिहेतुः प्रवर्तकधर्मः। प्रवर्तकधर्मत्वं च 'अह-मेनं प्रवर्तयामि' 'देवदत्तस्त्वां प्रवर्तयति नाहम्' इत्यादि-प्रतीतिसाक्षिकम्। भोजनस्य स्वनिष्ठप्रवृत्तिहेतुत्वेन प्रवर्त-नात्ववारणाय प्रवृत्तिहेतुः इति। प्रवृत्तिहेतुलिङादिवारणाय धर्मत्वं समवेतं बोध्यम्। स च धर्मः लोके इच्छादिरूपः। वेदे तु तदसंभवात् लिङादिनिष्ठः अलौकिकः कल्प्यते। **मणि.** पृ. १०, * प्रवर्तना प्रवर्तयितुः परप्रवृत्त्य-नुकूलव्यापारविशेषः। **मणि.** पृ. ९०, **सोम.** २।१।४ पृ. १०९. * प्रवर्तना प्रवृत्तिहेतुभूतः प्रवर्तयितुः धर्मः कश्चित्। स्वातन्त्र्ये 'देवदत्त एव मां प्रवर्तयति, न यज्ञदत्तः' इति व्यवस्थानुपपत्तेः। स च लिङ्धर्मः। प्रवर्तनाज्ञापनमात्रेण प्रवर्तकत्वे देवदत्तस्त्वां प्रवर्तयति इति प्रवर्तनात् यज्ञदत्तस्यापि प्रवर्तकत्वप्रसङ्गः। सर्वत्र लोके पुरुषस्य आचार्यादेः प्रवर्तयितुर्धर्मः 'अहमेनं प्रवर्त-यामि' इति प्रवर्तयितुः मानसप्रत्यक्षवेद्यः प्रैषादिरूपः (व्यापारः) नापह्नोतुं शक्यते। वेदे तु पुरुषाभावेन लिङादेरेव प्रवर्तकत्वात् तद्धर्मो भविष्यति। **सु.** पृ. ३०. * प्रवर्तना लिङर्थः। **मीन्या.**

* **प्रवर्तनोपायाः** सामादयोऽपि । परिक्रयस्तु यज्ञे प्रत्यक्षमाम्नातः । **भा.** १०।२।८।२५.

* **प्रवर्तनात्वं** (लिङः शक्यतावच्छेदकं) परनिष्ठप्रवृत्तिजनकज्ञानविषयप्रवर्तकधर्मत्वम् । **मणि.** पृ. ११७, इष्टसाधनत्वमेव प्रवर्तना इति मण्डनः । पदार्थान्तरं प्रवर्तना इति भाट्टाः । अर्थभावनाभिधानानुकूला शक्तिरेव प्रवर्तना इति पितृचरणाः । ११८. * प्रवर्तनात्वं प्रवृत्त्यनुकूलव्यापारत्वम् । अनुकूलत्वं च जनकत्वम् । तच्च लोके पुरुषाशयवृत्ति । वेदे च तदभावात् इच्छाभिन्नस्य कस्य चित् प्रवर्तनात्वं बोध्यम् । अर्थभावनाभिधानानुकूलायाः लिङादिनिष्ठशक्तेरेव अभिधाख्यायाः प्रवर्तनात्वेन रूपेण लिङ्वाच्यत्वं परिकल्प्य तज्ज्ञानस्य प्रवृत्तिं प्रति कारणत्वमात्रं कल्प्यते इति पार्थसारथिः । **रहस्य.** पृ. ११.

* **प्रवर्तनारूपो** हि विधिः । **भाट्ट.** ४।१।१.

* ‘ **प्रवर्तेऽहमिति** ज्ञानं येन शब्देन जन्यते । स चोदनोच्यते यद्वा प्रवर्तनफला मतिः ॥ ’ इत्युक्तम् । **सु.** पृ. ५७–५८, **रत्नाकरः.** चोदनासूत्रम् श्लो. १३.

* **प्रवादः** । निर्युक्तिकप्रवादः हेयः । **मणि.** पृ. १२.

* **प्रवासगतस्य** यजमानस्य अग्निहोत्रेषु अग्न्युपस्थानार्थं आशीर्मन्त्रः ‘ इहैव सन् तत्र सन्तं त्वाग्ने ’ इति । **वा.** ३।८।६।१६.

* **प्रवाहनित्यत्वं** सजातीयप्रागभावसमव्याप्तसजातीयध्वंसकत्वरूपम् । **मणि.** पृ. १७५. * **प्रवाहनित्यत्वस्य** नैमित्तिकत्वाविरोधः । **सु.** पृ. १२०१.

* **प्रवाहसमुद्रन्यायेन** सर्वाणि वेदान्तवाक्यानि ऋजुकुटिलमार्गेण परमशिवप्रतिपादकान्येव । (गङ्गादिप्रवाहाः सर्वे अन्ततः समुद्रमेव प्राप्नुवन्ति तद्वत्, इति न्यायाक्षरार्थः) । **श्रीकर.** १।१।१२ ब्रसू.

* **प्रवीणः** । बहुषु वीणावादस्य गुणेषु सत्सु निपुणे एव प्रवीणशब्दो वर्तमानो रूढ इत्युच्यते । **भा.** ६।७।१०।२२.

* **प्रवृञ्जनं** तप्तवृते पयःप्रक्षेपः । **वा.** ३।३।१२।३२ टिप्पणी.

प्रवृत्तेऽपीति चेत् । ६।३।१७।३६ ॥

श्रुतद्रव्यापचारे प्रतिनिधौ उपात्ते, प्रवृत्तेऽपि कर्मणि कृतेषु केषु चित् संस्कारेषु यदि तदेव मुख्यं उपलभ्येत मुख्यमेव ग्राह्यम् ।

अत्र **टुप्टीका**— ‘ केषु चित् संस्कारेषु कृतेषु अनभिनिर्वृत्ते (मुख्ये) प्रयोजने श्रुतमेव उपादातव्यम् । न संस्काराणामनुरोधः, द्रव्यगुणत्वात् । तस्मात् ये अभिनिर्वृत्ताः संस्काराः तेषां (मुख्ये) आवृत्तिः स्यात् । एवमिदं सिद्धान्तसूत्रं भवति । पूर्वपक्षस्तु उत्प्रेक्ष्यः । अथवा प्रवृत्तेऽपीति चेत् कृते (मुख्ये) प्रयोजने श्रुतमागमयितव्यमिति (पूर्वः पक्षः) ’ इति ।

खदिरालाभे कदरेण प्रयोगः प्रारब्धः । पशुनियोजनात् प्राचीनाः संस्काराः कृताः । तावति काले खदिरो लब्धः । तथा सति खदिरे आदित आरभ्य सर्वे संस्काराः पुनः कर्तव्याः । पशुनियोजनं च खदिरे कृत्वा शिष्टः प्रयोगः समापनीय इति सिद्धान्तः । अत्र ‘ प्रवृत्तेऽपीति चेत् ’ इति प्रवृत्तशब्दः पशुनियोजनातिरिक्तसंस्कारग्राहकः ।

अथवापक्षे तु प्रवृत्तशब्दः पशुनियोजनान्तान् सर्वानेव संस्कारान् गृह्णाति । पशुनियोजनान्तेषु संस्कारेषु कृतेषु पश्चाल्लब्धः खदिरः । तदापि सर्वः प्रयोगः खदिरेण पुनः कर्तव्यः इति पूर्वः पक्षः । तत्र प्रथमपक्षे सूत्रार्थस्तु ‘ इति चेत् ’ इति पूर्वसिद्धान्तपरामर्शः । मुख्याधिगमे मुख्यं इति चेन्न्यायः ततः प्रवृत्तेऽपि प्रतिनिधौ मुख्यमेवोपादेयं इति । अथवापक्षे तु न क्लेशः ।

नानर्थकत्वात् । ३७ ।

मुख्यस्य द्रव्यस्य खदिरस्य अलाभे कदरे प्रतिनिधौ पशुनियोजनं कृतम्, अथ खदिरो लब्धः, परंतु प्रवृत्ते जाते नियोजने सति खदिरो मुख्योऽपि न ग्राह्यः । अनर्थकत्वात् निष्फलत्वात् । इति सिद्धान्तः । **के.**

* ‘ **प्रवृत्तत्वादिष्टेः सोमे प्रवृत्तिः स्यात्** ’ इत्यष्टमाधिकरणे (८।१।३।३) पूर्वपक्षवक्ष्यमाणस्य क्लृप्तोपकारत्वात् दार्शपौर्णमासिकानां धर्माणां ग्रहणस्य कृत्स्नविधानात् तत्पूर्वत्वमिति सिद्धान्ते निराकरिष्यमाणत्वेन अभावात् । **सु.** पृ. ११७८.

प्रवृत्तत्वादिष्टेः सोमे प्रवृत्तिः स्यात् । ८।१।३।३॥

सोमे इष्टेः प्रवृत्तिः स्यात् प्रवृत्तत्वात् । दीक्षणीयायां प्रायणीयायां आतिथ्यायां पशौ उदयनीयायां च दार्शपौर्णमासिको विध्यन्तः प्रवृत्तः । तन्मध्यवर्तिनि सोमेऽपि स एव विध्यन्तः स्यात् । दीक्षणीयादिषु प्रवृत्तत्वात् इति पूर्वः पक्षः ।

लिङ्गदर्शनाच्च । ४ ॥

सोमे दार्शपौर्णमासिको विध्यन्तः इति पूर्वपक्षे लिङ्गमाह । ‘ तस्यैकशतं प्रयाजानुयाजाः ’ इति ऐष्टिकाः प्रयाजादयो धर्माः सोमे दृश्यन्ते । तदेतल्लिङ्गं सोमे ऐष्टिकस्य विध्यन्तस्य । श्रुतौ तस्येति सोमस्येत्यर्थः । चकारो हेतुसमुच्चयार्थः ।

कृत्स्नविधानाद्वाऽपूर्वत्वम् । ५ ॥

सोमे ऐष्टिको विध्यन्तः इति पूर्वपक्षं सूत्राभ्यां प्राप्तं वाशब्देन निरस्यन् सिद्धान्तमाह । सोमे इत्यनुवर्तते । सोमे अपूर्वत्वं स्यात् । स न कुतश्चित् धर्मान् गृह्णाति । कृत्स्नविधानात् । सोमे कर्तव्यानां सर्वेषामेव धर्माणां सोमप्रकरणे विधानं भवति । तस्मात् विहितधर्मकोऽयम् । अविहितधर्मकेषु तु अतिदेशः । तस्मात् सोमः स्वतन्त्रा प्रकृतिः ।

स्रुगभिघारणाभावस्य च नित्यानुवादात् । ६ ॥

सोमे ऐष्टिको विध्यन्तो नास्ति, स्वतन्त्रत्वात् तस्य इति सिद्धान्तिना उक्ते इयं शङ्का— ननु ‘ घृतं वै देवा वज्रं कृत्वा सोममघ्नन्, स्रुचौ बाहू । तस्मात् स्रुचि सोमहविर्नासाद्यते । न सोममाज्येनाभिघारयति ’ इति निषेधोऽनुपपन्नः, प्राप्तिपूर्वकत्वान्निषेधस्य । तस्मात् निषेधात् लिङ्गात् ऐष्टिकस्य सोमे प्राप्तिरिति । तत्राह सिद्धान्ती । स्रुक् च अभिघारणं च तयोः अभावस्य नित्यानुवादः स्यात् । नित्यसिद्धस्यैव अभावस्यायमनुवादः, न तु प्राप्तस्य निषेधः । तस्मात् सोमे नैष्टिको विध्यन्तः ।

विधिरिति चेत् । ७ ॥

पूर्वपक्षी ब्रूते । स्रुचि सोमग्रहणस्य, आज्याभिघारणस्य च योऽयं निषेधः स न सिद्धानुवादः किन्तु विधिरेव निषेधरूपः । ततश्च सोमे ऐष्टिकविध्यन्तस्य प्राप्तिः । इति चेत् ।

न वाक्यशेषत्वात् । ८ ॥

सिद्धान्ती ब्रूते । सोमे योऽयं स्रुचि सोमासादनस्य आज्याभिघारणस्य च निषेधः स न विधिः किन्तु नित्यसिद्धानुवाद एव । कस्मात् ? वाक्यशेषत्वात् । ‘ अवधिषुर्वा एतत् सोमं यदभिषुण्वन्ति । यदस्य स्रुचौ बाहू कुर्वन्ति, यच्चाज्यमन्तिकमकार्षुः, यदाह, अंशुरंशुस्ते देव सोमाप्यायतामिति । यदेवास्याघ्नन् तं क्षुरमकुर्वन् तदाप्याययन्ति ’ इत्यत्र योऽयं ‘ अंशुरंशुस्ते ’ इति विधिः, तस्य वाक्यशेषोऽयं ‘ घृतं वै देवा वज्रं कृत्वा सोममघ्नन् स्रुचौ बाहू । तस्मात् स्रुचि सोमहविर्नासाद्यते, न सोममाज्येनाभिघारयति ’ इति । अस्य विधेर्वाक्यशेषत्वात् नायं निषेधरूपो विधिः संभवति । तस्मात् सिद्धानुवाद एव निषेधः । ततश्च ऐष्टिकविध्यन्तस्य सोमे न प्राप्तिः ।

शङ्कते चानुपोषणात् । ९ ॥

सोमः अपूर्व एव न तत्र ऐष्टिको विध्यन्तः इति सिद्धान्ते हेत्वन्तरमाह । अनुपोषणशङ्का हेत्वन्तरम् । उपोषणं नाम बर्हिषो दाहः । उष दाहे इति धातुः । यदि सोमे ऐष्टिको विध्यन्तः स्यात् उपोषणस्य प्राप्तत्वात् अनुपोषणशङ्का न स्यात् । अनुपोषणात् च शङ्कते ‘ यदनुपोष्य प्रयायात् ग्रीवबद्धमेनं अमुष्मिँल्लोके नेनीयेरन् ’ (तैसं. ३।३।८।३) इति । तस्मात् सोमे नैष्टिको विध्यन्तः ।

दर्शनमैष्टिकानां स्यात् । १० ॥

सोमे ऐष्टिको विध्यन्तः इत्यत्र ‘ तस्यैकशतं प्रयाजानुयाजाः ’ इति लिङ्गमुक्तं ‘ लिङ्गदर्शनाच्च ’ (८।१।३।४) इति सूत्रे तत्रोत्तरमाह सिद्धान्ती । उक्तं दर्शनं लिङ्गदर्शनं सोमगतानां ऐष्टिकानां स्यात् । सोमे या दीक्षणीयादय इष्टयः, तासु सर्वासु मिलित्वा ये प्रयाजानुयाजाः तेषां सा संख्या । अङ्गाङ्गमपि च ‘ तस्य ’ इति शक्यते वक्तुं यथा ‘ वाजपेयस्य यूपः ’ इति । तथा च न तल्लिङ्गं सोमे ऐष्टिकस्य विध्यन्तस्य साधकम् । **के.**

* अथ समस्तानामाग्नेयादीनां कथं चित् रूढेः ‘ **प्रवृत्तत्वादिष्टेः सोमे प्रवृत्तिः स्यात्** ’ इतिवत्

ग्रहणम् । (इष्टिशब्देन) ...... । वा. २।२।३।३ पृ. ४८२.

प्रवृत्तवरणात् प्रतितन्त्रं वरणं होतुः क्रियेत। १२।१।१८।३६ ॥

दर्शपूर्णमासयोः होतुर्वरणं 'अग्निर्देवो दैव्यो होता देवान् यक्षत्' इत्याम्नातम् । तत् सोमाङ्गभूतेषु ऐष्टिकेषु कर्मसु प्राप्यते । सौमिकं होतुर्वरणं 'अग्निर्होता स मे होता होतस्त्वं मे होताऽसि इति होतारं वृणीते' इत्याम्नातम् । तत्र सौमिकेन वरणेन आनतो होता इति दार्शिकं वरणं न कर्तव्यं इति प्राप्ते सिद्धान्तमाह । प्रतितन्त्रं प्रतीष्टिकर्म होतुः वरणं क्रियेत । कुतः ? प्रवृत्तवरणात् वरणात् प्रवृत्ते कर्मणि दार्शिकं वरणं क्रियते, अतः तत्र आनत्यर्थम् । किं तर्हि ? कर्ममात्रम् । तदकरणे गुणवैगुण्यं स्यात् । तस्मात् प्रतिकर्म होतुर्वरणं भेदेन कर्तव्यं इति सिद्धान्तः ।

ब्रह्माऽपीति चेत् । ३७ ॥

पूर्वपक्षी अतिप्रसङ्गेन शङ्कते । यदि प्रवृत्ते कर्मणि होतुर्वरणं क्रियमाणं प्रतिकर्म कर्तव्यं तर्हि ब्रह्मा अपि प्रवृत्ते कर्मणि व्रियते प्रणीताप्रणयनकाले, तस्मात् तदपि धर्ममात्रत्वात् प्रतिकर्म कर्तव्यम् । इति चेत् ।

न प्राङ्नियमात् तदर्थं हि । ३८ ॥

होतृवरणवत् ब्रह्मवरणमपि प्रतिकर्म कर्तव्यं इति चेत् तत्राह सिद्धान्ती । न ब्रह्मवरणं प्रतिकर्म कर्तव्यम् । न तद्धर्ममात्रम् । प्राक् नियमात् प्राक् वरणात् न किञ्चित् ब्रह्मत्वमस्ति । वरणादुत्तरकालं ब्रह्मणः कर्म । हि यस्मात् ब्रह्मवरणं तदर्थं कर्मार्थमेव न धर्मार्थम् । तस्मात् ब्रह्मवरणं न प्रतिकर्म कर्तव्यम् । नास्ति तेनातिप्रसङ्गः ।

निर्दिष्टस्येति । ३९ ॥

पुनः पूर्वपक्षी शङ्कते । निर्दिष्टस्य करणात् ब्रह्माऽपि प्रवृत्तवरण इति चेत् । अमावास्यायां औपवसथ्येऽहनि वेदिकर्म निर्दिष्टम् । 'पूर्वेद्युरमावास्यायां वेदिं करोति' इति । तत्र वेदिपरिग्रहप्रसवः ब्रह्मणा क्रियते । तेन ब्रह्माऽपि प्रवृत्तवरणः । प्रवृत्तवरणात् प्रतिकर्म ब्रह्मणो वरणं क्रियेत इति चेत् ।

नाश्रुतत्वात् । ४० ॥

अमावास्यायां पूर्वेद्युर्वेदिकर्मणो निर्दिष्टस्य करणात् ब्रह्मणोऽपि प्रवृत्तवरणत्वात् तद्वरणमपि प्रतिकर्म कर्तव्यमापद्येतेति चेत् । न । पूर्वेद्युरमावास्यायां वेदिकरणं श्रुतम्, न परिग्रहणम्, अश्रुतत्वात् यथाकालमेव प्रवृत्ते ब्रह्मणि परिग्रहः करिष्यते । अतो न प्रतिकर्म ब्रह्मवरणं कर्तव्यम् । विषमो दृष्टान्तः ।

होतुस्तथेति चेत् । ४१ ॥

पूर्वपक्षी शङ्कते । यदि प्रवृत्ते कर्मणि ब्रह्मणो वरणम्, न च वरणात् प्राक् किञ्चित् ब्रह्मणः कर्मास्ति, तस्माच्च प्रवृत्तवरणो ब्रह्मेति । तर्हि होतुः अपि तथा प्राग्वरणान्न किञ्चित् कर्मास्ति । ततः तस्यापि वरणं न धर्ममात्रम् । इति चेत् ।

न कर्मसंयोगात् । ४२ ॥

न होतुर्वरणं न धर्ममात्रं किन्तु धर्ममात्रमेव । दृष्टार्थं कर्मसंयोगात् । अस्ति होतुः प्राग् वरणात् सामिधेनीकर्मणा संयोगः 'अवृतः सामिधेनीरन्वाह' इति । तत् दीक्षणीयादिषु ऐष्टिकेषु कर्मसु कर्तव्यम् । इति सिद्धान्तः । के.

* प्रवृत्तिः क्रमबोधकं प्रमाणम् । मणि. पृ. १३, * प्रवृत्तिः द्वेधा स्वेच्छाधीना पराधीना च । तत्र आद्यायां इष्टसाधनत्वादिधीः कारणम् । अन्त्यायां राजगुर्वादेः आज्ञाप्रेरणादिधीः । पृ. ८९. * प्रवृत्तिः प्रथमा द्वितीयादिपदार्थक्रमनियामिका, यथा वाजपेये प्राजापत्यपशुसंस्कारेषु । वि. ५।१।५. * प्रवृत्तिः विधिसिद्धा । सु. पृ. ६. * ये हि सह चोदितास्तेषां प्रवृत्तिः नियन्त्री । वा. ५।१।३।३.

प्रवृत्त्या कृतकालानाम् । ५।१।१३।२५ ॥

ज्योतिष्टोमे सुत्यादिने प्रथमं प्रातरनुवाकः, ततः प्रचरण्याख्यया स्रुचा 'शृणोत्वग्निः०' इति मन्त्रेण होमः, ततः सवनीयपुरोडाशनिर्वापः इति पठितम् । अध्वर्युर्होत्रे प्रातरनुवाकप्रैषं दत्त्वा प्रतिप्रस्थातारमेवं प्रेष्यति 'प्रतिप्रस्थातः सवनीयान्निर्वपस्व' इति । तेन प्रचरणीहोमादिभ्यः ऊर्ध्वं प्राप्तोऽपि सवनीयपुरोडाशनिर्वापः प्रातरनुवाककाले प्रैषवशादपकृष्टः । एवं 'बहिष्पवमाने स्तुते आह अग्नीदग्नीन् विहर, बर्हिः स्तृणीहि, पुरोडाशानलङ्कुरु' इति प्रैषवशाच्च पुरोडाशालङ्कारादेरुत्कर्षः । एवं स्थिते प्रचरणीहोमादिभिः बहिष्पवमानान्तैः सौमिकपदार्थैः प्रोक्षणादिपदार्थानां ऐष्टिकानां एककालत्वेन अनुष्ठाने प्राप्ते प्रातरनुवाककाले सवनीयनिर्वापोत्तरं प्रथमं किं प्रचरणीहोमादयः सौमिकाः पदार्थाः कर्तव्या उत पौरोडाशिकाः प्रागलङ्करणात् ये पदार्थास्ते कर्तव्याः इति विचारे नियमशास्त्राभावात् अनियम इति पूर्वपक्षे उत्सूत्रे प्राप्ते सिद्धान्तमाह । कृतकालानां प्रकृतौ विहितकालानां ज्ञातकालानां पदार्थानां प्रवृत्त्या प्रवृत्तेन प्रथमोपस्थितेन निर्वपणेन नियमः स्यात् । प्रवृत्त्या इति कर्मणि क्तिन् । प्रकृत्या इति पाठं स्वीकृत्य दर्शपूर्णमासप्रयोगेण कृतकालानां ज्ञातकालानां नियमः इति वृत्तौ व्याख्यातम् । मयूखमालिकायां तु कृतकालानां ज्ञातकालानां प्रकृत्या नियमः इति व्याख्यातम् । तथा च आदौ पौरोडाशिकाः पश्चात् सौमिकाः इति क्रमः इति सिद्धान्तः । अत्र प्रावृत्तिकः क्रमः ।

शब्दविप्रतिषेधाच्च । २६ ॥

सिद्धान्ते हेत्वन्तरपरं सूत्रम् । चकारः समुच्चये । पूर्वपक्षे स्वीकृते शब्दविप्रतिषेधात् शब्देन विरोधस्य प्रसङ्गात् । अलङ्कुरु इत्युक्ते प्रोक्षणादीन् प्रतिपद्येत । अस्मत्पक्षे तु अलङ्कुरु इत्युक्ते अलङ्करणमेव प्रतिपत्स्यते । तस्मादत्र प्रावृत्तिकः क्रमः । के.

* प्रवृत्त्या क्रमो नियम्यते । वाजपेये प्राजापत्यपशुषु उपाकरणक्रमेण नियोजनादिक्रमनियमः । ५।१।५। ८–१२. * प्रवृत्त्या क्रमः प्रातरनुवाके सवनीयनिर्वापादिप्रागलङ्करणानां पौरोडाशिकानां धर्माणाम् । ५।१। १३।२५–२६.

प्रवृत्त्या तुल्यकालानां गुणानां तदुपक्रमात् । ५।१।५।८॥

वाजपेये 'सप्तदश प्राजापत्यान् पशूनालभते' इति श्रूयते । तेषु पशुषु चोदकप्राप्ताः प्रोक्षणादयो धर्माः । तत्र प्रथमः पदार्थः यतः कुतश्चित् पशोरारब्धव्यः । द्वितीयादिषु पदार्थेषु भवति संशयः किं तत एव द्वितीयादिरपि पदार्थ आरब्धव्यः उत द्वितीयादिषु अनियम इति । अनियमः नियमकारणाभावात् इति पूर्वपक्षे प्राप्ते सिद्धान्तयति । तुल्यकालानां एककालीनानां गुणानां उपाकरणादीनां प्रवृत्त्या प्रथमाङ्गप्रवृत्त्यनुसारेण क्रमः स्यात् तदुपक्रमात् प्रथमाङ्गस्य तथैव उपक्रमात् । तथा च प्रथमाङ्गक्रमानुसारेण द्वितीयाद्यङ्गक्रमः तत्र स्वीकार्यः, सोऽयं प्रवृत्त्या क्रमः ।

सर्वमिति चेत् । ९ ॥

पूर्वपक्षी आह । प्रतिपशु सर्वं अङ्गजातं काण्डानुसमयेन स्यात् इति । इति चेत् ।

नाकृतत्वात् । १० ॥

पूर्वपक्षिणा उक्तं निरस्यति सिद्धान्ती । इति चेन्न । अकृतत्वात् उक्तस्य साहित्यस्य अकृतत्वप्रसङ्गात् । तस्मात् प्रवृत्तिक्रमेण पदार्थानुसमय एव ।

क्रत्वन्तरवदिति चेत् । ११ ॥

वाजपेये प्राजापत्यपशुषु उपाकरणादिसर्वगुणकाण्डं प्रतिपशु पृथक् कर्तव्यं क्रत्वन्तरवत्, यथा सौर्ये ऐन्द्राग्ने च प्राजापत्येभ्यः क्रत्वन्तरे सर्वं गुणकाण्डं प्रत्येकं पृथक् क्रियते तद्वत् । इति चेत् पूर्वपक्षी ब्रूयात् ।

नासमवायात् । १२ ॥

तन्न । कुतः ? असमवायात् सौर्यादिकाम्येष्टीनां तत्तत्फलार्थतया विहितानां साहित्यस्य असंभवात् गुणकाण्डं पृथक् भवति । प्राजापत्येषु तु एकस्मिन्नेव क्रतूपकारे साहित्यावगमात् न गुणकाण्डं पृथक् कर्तुं शक्यते । तस्मात् अत्र उपाकरणादीनां पदार्थानुसमयेन प्रथमप्रवृत्त्यनुसारेण द्वितीयाद्यङ्गस्य अनुष्ठानक्रमः स्वीकार्यः इति सिद्धान्तः । के.

* प्रवृत्त्या प्राजापत्येषु पशुषु उपाकरणादीनां प्रवृत्तौ अनिरूपित एव क्रमो निरूप्यते । प्रकृतावपि च संभवति तया क्रमनियमः । यथा सांनाय्ययोर्दध्नः पूर्वं धर्माः ततः पयस इति । रत्न. ५।१।१।१ . * प्रवृत्त्या प्रोक्षणादीनां सौमिकपूर्वभाविता ज्योतिष्टोमे सुत्यायाम् । ५।१।१३। २५–२६. * प्रवृत्तेः तत्प्रकारकनिश्चयहेतुकत्वम् । मणि. पृ. २८. * प्रवृत्तीनां अभिधायकाख्यातवशेन ऐदमर्थ्यं निरूप्यते । वा. ३।४।४।१२ पृ. ९०१. * प्रवृत्तौ (क्रमे) अङ्गनिरूपितप्रत्यासत्त्यनुग्रहो बीजम् ।

भाट्ट. ५।१।७ . * **प्रवृत्तौ** समीहितसाधनतावगम एव कारणम् । **सोम.** १।२।१ पृ. ६. * **प्रवृत्तौ** हेतुः । अन्यथाख्यातिरूपरजतत्वविशिष्टज्ञानस्यैव ग्रहे प्रवृत्त्यादिहेतुता । न च एवं चैत्रो रजतज्ञानवान्, कार्यताज्ञानवत्त्वात् इति ज्ञानात् मैत्रस्य प्रवृत्त्यापत्त्या भ्रान्तभ्रान्तिज्ञसंकरापत्तिः इति वाच्यम् । भ्रान्तिज्ञस्य बाधादेव प्रवृत्त्यभावोपपत्तेः । परकीयरजतत्वप्रकारकज्ञानज्ञानवतः क्षणविलम्बेन रजतत्वप्रकारकज्ञानादेव प्रवृत्त्यङ्गीकारात्, ज्ञानाविषयकज्ञानत्वेन प्रवृत्त्यङ्गीकाराद्वा । यद्वा रजतविषयकप्रवृत्तित्वावच्छिन्नं प्रति रजतत्वप्रकारतानिरूपितरजतनिष्ठमुख्यविशेष्यताशालिज्ञानत्वेन हेतुत्वात् न काऽप्यनुपपत्तिः । **मणि.** पृ. २७ .

* **प्रवृत्तिक्रमः** अतिदेशविषयेऽपि । **टुप्** . ५।१।१।१ । न उपदेशविषय एव । प्रवृत्त्या हि प्राजापत्येषु पशुषु उपाकरणादीनां प्रकृतौ अनिरूपित एव क्रमो निरूप्यते । प्रकृतावपि च संभवत्येव तथा क्रमनियमः यथा सांनाय्ययोर्दध्नः पूर्वे धर्माः ततः पयस इति । **रत्न.** * प्रवृत्तिक्रमः प्रयोगवचनाश्रयत्वात् दुर्बलः । श्रुत्यर्थपाठकाण्डास्तु चोदकाश्रितत्वात् बलीयांसः । **टुप्**. ५।१।१०।१८. * प्रवृत्तिक्रमः । यतः पूर्वपदार्थ आरब्धस्तत एवोत्तर आरम्भणीयः, प्राजापत्यसप्तदशपशुषु प्रोक्षणादिधर्मेषु वाजपेये । **भा.** ५।१।५।८, * **प्रवृत्तिक्रमेण** किं पूर्वं दध्नः अवदानाभिघारणासादनानि उत मुख्यक्रमेण पूर्वमाग्नेयस्येति संदेहे, अवदानादीनां प्रदानचोदनागृहीतत्वात् पूर्वमाग्नेयस्येति सिद्धान्तः । प्रावृत्तिकक्रमात् मुख्यक्रमो बलीयान् । मुख्यं प्रधानम् । ५।४।२।२–४. (दर्शपूर्णमासयोः स्विष्टकृदवदानम्, प्रयाजशेषाभिघारणम्, बर्हिषि हविरासादनं चोदाहरणानि– **वार्तिकम्** । न तु प्रधानचतुरवत्तावयवावदानाभिघारणविषयम् **–तन्त्ररत्न.**) * **प्रवृत्तिक्रमात्** मुख्यः क्रमः प्रबलः । अत एव सांनाय्यावदानादितः प्राक् आग्नेयावदानादिकं क्रियते । अन्यथा हि सांनाय्यकरणे पूर्वदिने प्रवृत्तत्वात् आग्नेयनिर्वापस्य च उत्तरे दिने प्रवृत्तत्वात् वैपरीत्यं प्राप्तम् । **वि.** ५।४।२. * प्रवृत्तिक्रमात् मुख्यक्रमो बलवान् । ५।४।२।२–४. **मीको.** पृ. २०२० ‘ दर्शे आग्नेयपुरोडाशस्य० ’ इत्यत्र द्रष्टव्यम् । * **प्रवृत्तिक्रमे** अङ्गनिरूपितप्रत्यासत्त्यनुग्रहो बीजम् । **भाट्ट.** ५।१।७.

* **प्रवृत्तिक्रमनियमाधिकरणम्** । ५।१।५।८–१२. ‘ प्रावृत्तिकक्रमन्यायः ’ इत्यत्र द्रष्टव्यम् ।

* **प्रवृत्तिक्रमविचारस्य** पदार्थानुसमयो बीजम् । **भाट्ट.** ५।२।१.

* **प्रवृत्तिनिवृत्त्योः** कार्यावगमपूर्वकत्वम् । **ऋजु.** पृ. १६.

* **प्रवृत्तिनिवृत्त्युभयरूपं** वैदिकं कर्म । इदमेव पर्युदास इत्युच्यते । इदं द्विविधं क्रत्वर्थं पुरुषार्थं चेति । **बाल.** पृ. ८६.

* **प्रवृत्तिरूपं** वैदिकं कर्म क्रत्वर्थपुरुषार्थानुभयरूपम्, यथा तन्त्ररत्ने लिप्सासूत्रे अध्ययनं आधानं च । **बाल.** पृ. ८१, * प्रवृत्तिरूपं वैदिकं कर्म । तत्र द्रव्यप्रक्षेपांशेन अदृष्टार्थं देवतोद्देशेन च दृष्टार्थम्, यथा उत्तमः प्रयाजः । पृ. ८३, * प्रवृत्तिरूपं वैदिकं कर्म द्विविधं क्रत्वर्थं पुरुषार्थं चेति । पृ. ८१.

* **प्रवृत्तिविशेषकरो** यो न भवति सोऽनर्थकः । **भा.** १।४।१।२.

प्रशंसा । १।४।१२।२३–४ ॥

‘ अपशवो वा अन्ये गोअश्वेभ्यः पशवो गोअश्वाः ’ ‘ अयज्ञो वा एष योऽसामा ’ ‘ असत्रं वा एतद् यदच्छन्दोमं ’ इति श्रूयते । अर्थवादा एते । गोअश्वान् स्तोतुं इतरेषां अजादीनां अपशुत्वमुक्तम् । एवं सामसहितस्य अग्निष्टोमादेः प्रशंसार्थं दर्शपूर्णमासादीनां सामरहितानां अयज्ञत्वमुक्तम् । एवं छन्दोमसहितानां द्वादशाहादीनां प्रशंसार्थं छन्दोमशून्यानां असत्रत्वमुक्तम् । तेनात्र अपशवः अयज्ञः असत्रं एते शब्दाः गौण्या प्रवृत्ताः । निमित्तं तु अत्र प्रशंसा ।

‘ पशुशीर्षाण्युपदधाति ’ इत्युपक्रम्य ‘ पुरस्तात् प्रतीचीनमश्वस्योपदधाति, पश्चात् प्राचीनमृषभस्य ’ इति गवाश्वविधिप्रक्रमेण तयोः प्राशस्त्यापेक्षाऽस्ति इति ‘ अपशवो वै ’ इत्याद्युक्तम् । **के.**

* प्रशंसा गौण्याः शब्दवृत्तेः अन्यतमो हेतुः । ‘ अपशवो वा अन्ये गोअश्वेभ्यः पशवो गोअश्वाः ’

अत्रान्येभ्यः पशुभ्यः गोअश्वानां प्रशस्ततां निमित्तीकृत्य ‘ अन्ये अपशवः ’ इत्युक्तम् । **शा.** १।४।१६ . * प्रशंसा द्वेधा [१] वस्तुनि विद्यमानगुणोत्कर्षः, [२] स्तावकेन शब्देन संपादितगुणोत्कर्षश्चेति । प्रथमोदाहरणं ‘ अपशवो वा अन्ये गोअश्वेभ्यः पशवो गोअश्वाः ’ इति । ‘ आग्नेयो वै ब्राह्मणो देवतया ’ इति द्वितीयोदाहरणम् । **वि.** १।४।१६, * ‘ प्रशंसा वा संस्कारः प्रस्तरस्य संनिधानात् समिन्धनार्थं इध्मः ’ । **संकर्ष.** २।४।३ सिद्धान्तसूत्रम् । **कु.** ३।२।५।१३.

प्रशंसाऽधिकरणम् ॥

प्रशंसा । १।४।१२।२३–४ ॥

भाष्यम्-- ‘ अपशवो वा अन्ये गोअश्वेभ्यः पशवो गोअश्वाः ’ ‘ अयज्ञो वा एष योऽसामा ’ ‘ असत्रं वा एतद् यदच्छन्दोमम् ’ इति श्रूयते । तत्र विध्यर्थवादसंदेहे अर्थवत्त्वात् विधयः । इति **प्राप्ते, अभिधीयते** । यदि विधयो भवेयुः गोअश्वा एव पशवः स्युः, सामवानेव यज्ञः, छन्दोमवदेव सत्रम् । अन्येषां पशूनां यज्ञानां सत्राणां च उत्पत्तिरनर्थिका स्यात् । विध्यन्तरं च नावकल्पेत । अतः स्तुत्यर्थं संवादः । गोऽश्वान् प्रशंसितुं अन्येषां पशूनां निन्दा ; सामवतः प्रशंसितुं असाम्नां निन्दा । छन्दोमवन्ति प्रशंसितुं अच्छन्दोमकानि निन्द्यन्ते । यथा यदवृतं अभोजनं तत् । यन्मलिनं अवासस्तत् इति ।

वा— ननु सर्वत्र प्रशंसानिमित्तत्वं गुणवादस्य उक्तम् । सत्यम्, फलमन्यत्र गुणवादस्य प्रशंसा, अत्र तु गुणसारूप्यादिवत् प्रवृत्तिनिमित्तम् । कथमिति चेत्, **‘ गवाश्वादिगतां पूर्वमुपादाय प्रशस्तताम् । तदभावोऽन्यपश्वादौ नञ्समासेन कथ्यते ॥ ’** न तावत् महिषादीनां पशुत्वस्वरूपाभावः शक्यते वक्तुम्, प्रत्यक्षविरोधात् । कार्यप्रतिषेधः कल्प्येत । तदपि तत्रतत्र वचनविहितत्वात् न शक्यमेव । न च विकल्पः, वैषम्यात् । कल्प्यो हि अत्र विधिः, इतरत्र क्लृप्तः । स्तुत्या वा अर्थवत्त्वात् नागत्या तदाश्रयणम् । तुल्यश्च मुख्यार्थत्यागः । ‘ पशवो गोअश्वाः ’ इति च पुनरुपादानमनर्थकम् । न च पशुत्वैकार्थसमवायिनः क्रियागुणाः शक्याः प्रविवेक्तुम् । अथ गवाश्वसमवायिनो विशेषाः प्रतिषिध्येरन्, एवमपि मन्दं फलम् । अन्यशब्देनैव च तावानर्थः सिद्धः इत्यनर्थकम् । अवश्यं च उत्तरपदेन प्रतिषेध्ये अर्थे प्रथममुपात्तेन तत्र अनुवर्तितव्यम्, विशेषरहितप्रतिषेधासंभवात् । न च प्रशस्तत्वात् अन्यत् उपादीयमानं उपयुज्यते । शक्नुवन्ति च गवाश्वादिसंबन्धात् तद्गतं प्राशस्त्यं गमयितुम् । यद्यपि अप्रशस्तत्वमपि शक्नुवन्ति, तथापि प्रक्रमापेक्षया तदिह अनाकाङ्क्षितमिति प्राशस्त्यमेव निषिध्यते । तत्प्रतिषेधमात्रमपि च नैव औपयिकम्, इति तद्द्वारेण अन्येषां प्रशस्ततरत्वं कथ्यते । एतदुक्तं भवति, गवाश्वादीनपेक्ष्य नैव अन्यस्य प्राशस्त्यं विद्यते इति । एवं अन्यगतप्रशंसानिमित्तः प्रतिषेधः । सा चेह प्रथमतरमाश्रिता इति अनन्यप्रयोजनतया पश्चादवगम्यते । अन्यत्र पुनः उत्तरकालमेव एषा भवन्ती निमित्तत्वेन उच्यते ।

शा— ‘ अपशवो वा अन्ये गोअश्वेभ्यः, पशवो गोअश्वाः ’ इत्यत्र नामधेयत्वमनाशङ्क्यमिति गुणविधित्वेनैव पूर्वः पक्षः । (‘ अपशवो वा अन्ये गोअश्वेभ्यः ’ इत्यन्यशब्देन घटादयो नोच्यन्ते, किन्तु उपात्तगवाश्वसदृशत्वात् अजादय एवोच्यन्ते । तैत्तिरीयशाखायां ‘ अपशवो वा अन्ये गोअश्वेभ्यः पशवः ’ इत्यन्यशब्दसामानाधिकरण्येन पशुशब्दश्रवणाच्च । ततश्च अन्यशब्दसमानाधिकृतस्य अपशुशब्दस्य अजादिनामत्वमेव वाच्यम्, तच्च विरोधादनाशङ्कनीयमित्यर्थः) पशुकार्ये गवाश्वव्यतिरिक्तानां प्रतिषेधः क्रियते अजादीनामिति । सिद्धान्तस्तु, तत्रतत्र अजादीनां विहितत्वात् अशक्यः पशुकार्ये प्रतिषेधः । तस्मादर्थवादः । प्रशंसानिमित्तस्तु परशब्दस्य पशुव्यतिरिक्तघटादिवचनस्य अपशुशब्दस्य परत्र अजादिषु पशुषु प्रयोगः । ननु सर्व एव प्रशंसानिमित्तोऽर्थवादः, किमत्र विशेषेणोपन्यस्यते ? सत्यम्, फलमन्यत्र गुणवादस्य प्रशंसा । तत्सिद्ध्यादिना गुणेन परशब्दः प्रवृत्तः प्रशंसापरो भवति । इह तु शब्दप्रवृत्तिनिमित्तमपि गुणः प्रशंसैव । १।४।१६ .

सोम-- नामधेयप्रस्तावे तत्प्रतिपक्षतया प्रसक्तगुणविध्यर्थवादविचाररूपत्वात् **संगतिः** । अग्निचयने पशु-

शीर्षोपधाने ' पुरस्तात् प्रतीचीनमश्वस्योपदधाति, पश्चात् प्राचीनमृषभस्य ' इति विधेः अर्थवादोऽयं ' अपशवो वै० ' इत्यादिः ।

वि— ' पशवोऽन्ये गवाश्वेभ्योऽपशवो वा इति श्रुतम् । अजादिष्वपशुत्वं यद् गुणो वादोऽथवा, ऽस्तु तत् ॥ स्तुत्यभावाद्गुणस्तेषु पशुकार्यनिषेधनम् । अशक्यत्वान्निषेधस्य घटाद्यर्थाभिधायिना ॥, पशवोऽपशुशब्देन प्राशस्त्याभावसाम्यतः । लक्ष्यास्तत्र निमित्तं तु प्रशंसैव गवाश्वयोः ॥ '

भाट्ट— ' अपशवो वा अन्ये० ' इत्यत्र अजादीनां तत्रतत्र विहितत्वात् पशुकार्ये प्रतिषेधस्य पर्युदासस्य वा अनुपपत्तेः अर्थवादत्वम् । अपशुशब्दो घटादौ मुख्यः गवाश्वगतप्राशस्त्याभावरूपगुणयोगात् अजादौ गौणः सन् लक्षणया गवाश्वगतस्तुत्यर्थः । प्राचां मते तु नञ्समासान्तर्गतपशुपदेन गवाश्वगतप्राशस्त्यं लक्षयित्वा नञा तदभावरूपो गुण उपस्थाप्यते इति विशेषः । सर्वथा प्रशंसा गौणीनिमित्तघटिका इति सिद्धम् ।

मण्डन— ' प्रशंसाऽश्वे पशूक्तिः स्यात् । ' १६ .

शंकर— ' प्रशंसातः कचिच्चेयम् । ' १६. इयं गौणी ।

* अर्थवादानां अवयवार्थपरत्वाभावे **प्रशंसाधिकरणविरोधः** । तत्र अपशुशब्दस्य अप्राशस्त्यगुणयोगात् गौण्या वृत्त्या अजादिपशुषु वृत्तेर्व्यवस्थापनात् । कु. १।२।१।१८.

* **प्रशंसार्थवादः** ' वायुर्वै क्षेपिष्ठा देवता ' इति । बाल. पृ. ५०.

§ प्रशसाऽस्यभिधानम् । ९।४।४।२३॥

अध्रिगुप्रैषे ' प्रशसा बाहू ' इति पठितम् । तत्र प्रशसा इति प्रातिपदिकेन अस्यभिधानं असेः अभिधानं स्यात् । असौ हि शासशब्दः प्रसिद्धः ' दश प्रयाजानिष्ट्वाऽऽह शासमाहरेति ', ' असिं वै शासमाचक्षते ' इति । तस्मात् प्रशसा असिना बाहू छिन्धि इत्यर्थः । इति पूर्वः पक्षः ।

बाहुप्रशंसा वा । २४ ॥

अध्रिगुप्रैषे ' प्रशसा बाहू ' इति पठ्यते । तत्र प्रशसा इत्यस्य असिना इत्यर्थः इति पूर्वः पक्षः । तं वाशब्देन व्यावर्त्य सिद्धान्तमाह । प्रशसा इति शब्देन बाहुप्रशंसा बाह्वोः प्रशंसा बोच्यते । प्रशसा बाहू कृणुतात् प्रशस्तौ बाहू छेत्तव्यौ इत्यर्थः । पशुविशसनार्थं स्वधितिः (छुरिका) विहिता नासिः । असिश्च पूर्वपक्षिणा उच्यते इति वैचित्र्यम् । तस्मात् प्रशसा प्रशस्तौ इत्यर्थः । **के.**

* **प्रशसाशब्देन** अध्रिगुप्रैषगतेन बाह्वोः प्रशंसा । ९।४।४. **मीको.** पृ. ३४५ ' अध्रिगुप्रैषगतेन प्रशसाशब्देन० ' इत्यत्र द्रष्टव्यम् ।

* **प्रशस्तं च प्रतिपाद्यम्** । **भा.** ६।७।१२।२६.

* **प्रश्नः** अर्थवादः ' वेदकर्णवतीं सूर्मिम् ' इति । **बाल.** पृ. ५०. * **प्रश्नेनैवोपक्रमो** भवति (क्वचित्), यथा — का नामेयं नदी, को नामायं पर्वतः, किमिदं फलं इति । **भा.** ३।३।४।११, * पूर्वं हि **प्रश्नेन** भवितव्यं ततः प्रतिवचनेन । ३।५।१६।४२.

* **प्रश्नमन्त्रः** ' पृच्छामि त्वा परमन्तं पृथिव्याः ' इति । **बाल.** पृ. ५९.

* **प्र(प)ष्ठौही** वर्षत्रयवयस्का । **वि.** ४।४।१, * ' प्र(प)ष्ठौहीमश्विभ्याम् ' (तैसं. १।८।१९) इति राजसूये पशुः । ४।४।१.

* **प्रसक्तस्य च प्रतिषेधो न्याय्यः** (नाप्रसक्तस्य) । **भा.** ६।७।१२।२७.

§ प्रसक्तानुप्रसक्तन्यायः । अयमन्योद्देशेन अन्यदीयस्यापि सहानुष्ठाने अन्योद्देशेन प्रवृत्तौ अन्यस्यापि सिद्धौ यावत् तत्र प्रवर्तते । यथा अलं प्रसक्तानुप्रसक्तेन इत्युक्तिः प्रायो ग्रन्थेषु दृश्यते । **साहस्री.** ५६४.

* **प्रसङ्गः** अग्निचयने देवसुवां हविःषु अनुनिर्वाप्येषु अग्नीषोमीयपशुपुरोडाशतन्त्रस्य । १२।३।२।३–८. **मीको.** पृ. ३८३ ' अनुनिर्वाप्याधिकरणम् ' इत्यत्र द्रष्टव्यम् । * प्रसङ्गः । अधुना प्रसङ्गलक्षणं द्वादशे व्याख्यायते । प्रसङ्गशब्दार्थः अन्यैरुक्तः (साधारणं भवेत्तन्त्रं परार्थे त्वप्रयोजकः) ' एवमेव प्रसङ्गः स्याद्विद्यमाने स्वके

विधौ ' इति । अन्यत्र कृतस्य अन्यत्रापि प्रसक्तिः प्रसङ्गः । यथा प्रदीपस्य प्रासादे कृतस्य राजमार्गेऽप्यालोककरणम् । **भा.** १२।१।१।१. * प्रसङ्गः अनुबन्ध्यायां अनुनिर्वाप्येषु देविकाहविःषु पशुपुरोडाशतन्त्रस्य । १२।३।२. **मीको.** पृ. ३८३ ' अनुनिर्वाप्याधिकरणम् ' इत्यत्र द्रष्टव्यम् । * प्रसङ्गः अन्योद्देशेन अन्यदीयस्यापि सहानुष्ठानम् । पश्वर्थं प्रयाजेषु कृतेषु पशुपुरोडाशार्थं पृथक् प्रयाजा न क्रियन्ते, प्रसङ्गसिद्धत्वात् पशूद्देशेन क्रियमाणानां पशुपुरोडाशीयप्रयाजानां अनुष्ठानं भवत्येवेति । **वि.** १२।१।१ प्रस्तावश्च. * प्रसङ्गः अमावास्यातन्त्रस्य निशीष्टौ । १२।२।५. **मीको.** पृ. २३८५ ' निशीष्टिन्यायः ' इत्यत्र द्रष्टव्यम् । * प्रसङ्गस्तत्र, यत्र अन्यार्थेनाङ्गेन अन्यस्योपकारः । यत्र सकृत् कृतं सर्वेषामुपकरोति तत्र तु तन्त्रम् । **रत्न.** १२।२।७।२४. * प्रसङ्गः त्रिविधः अनुष्ठानप्रसङ्गः, पदार्थप्रसङ्गः, शास्त्रप्रसङ्गश्चेति । तत्र पदार्थस्य तत्त्वे सति परार्थमनुष्ठानेन परस्योपकारः अनुष्ठानप्रसङ्गः । यथा पशुपुरोडाशादौ पश्वर्थप्रयाजादेः । पदार्थस्य भेदे सत्यपि परार्थमुपात्तेन परस्योपकारः पदार्थप्रसङ्गः । यथा सौमिक्या वेदेः इष्टिपशुवेद्यपेक्षया भेदेऽपि तया सोमान्तर्गतेष्टिपशुषु उपकारः । एकेन शास्त्रेण शास्त्रान्तरस्य उपकारः शास्त्रप्रसङ्गः । यथा ' याजनादिभिर्ब्राह्मणो धनमर्जयेत् ' इति द्रव्यार्जनशास्त्रेण ज्योतिष्टोमादिशास्त्रस्य ऋत्विगपेक्षस्य अविशेषेण त्रैवर्णिकमार्त्विज्यमाक्षेप्य वृत्तस्य उपकारः । तस्मात् ' अन्यार्थेन गृह्यमाणविशेषेण अन्यस्य तत्प्रयुक्तिशक्तस्योपकारः प्रसङ्गः ' इत्यादिकमन्यदेव प्रसङ्गसामान्यलक्षणं बोध्यम् । **सोम.** १२।१।१ पृ. ८४६. * प्रसङ्गः त्रिविधः प्रधानप्रसङ्गः , अङ्गप्रसङ्गः , प्रधानाङ्गप्रसङ्गश्च इति । तत्र प्रधानप्रसङ्गः त्रिविधः प्रकृत्योः विकृत्योः प्रकृतिविकृत्योश्चेति । तत्र [१] प्रकृत्योः प्रसङ्गो यथा— काम्येन अग्निहोत्रादिप्रयोगेण नित्यतत्प्रयोगस्य प्रसङ्गः । [२] विकृतिप्रधानयोः प्रसङ्गो यथा— या विकृतयो निमित्ते कामे च विहितास्तत्र युगपत् निमित्तफलकामोत्पत्तौ अग्निहोत्रवदेव काम्यप्रयोगेण नित्यप्रयोगस्य प्रसङ्गसिद्धिः । स्मार्तोदाहरणं तु दर्शश्राद्धविकृतिभूतयोः महालयापरपक्षश्राद्ध–नित्यश्राद्धयोर्मध्ये पूर्वेण उत्तरस्य प्रसङ्गसिद्धिः । प्रकृतिविकृतिप्रसङ्गस्तु द्विविधः प्रकृत्या विकृतेर्विकृत्या वा प्रकृतेः । तत्रोभयत्र श्रौतमुदाहरणं मृग्यम् । स्मार्तं तु [३] आद्योदाहरणं यथा— दर्शश्राद्धेन नित्यश्राद्धस्य प्रसङ्गसिद्धिरिति । [४] द्वितीयोदाहरणं तु यथा— तीर्थश्राद्धेन दर्शश्राद्धस्य प्रसङ्गसिद्धिरिति । अङ्गप्रसङ्गस्तु षोढा, तद्यथा [५] औपदेशिकेन अङ्गेन औपदेशिकस्य प्रसङ्गः , यथा— वैश्यनिमित्तकेन सासदश्येन नित्याङ्गस्य पाञ्चदश्यस्य । [६–७] तथा काम्येन नित्यस्य नैमित्तिकस्य च, यथा— प्रतिष्ठार्थस्य एकविंशत्यनुवचनस्य अङ्गेन एकविंशतित्वेन नित्यस्य पाञ्चदश्यस्य, वैश्यनिमित्तकस्य च सासदश्यस्य प्रसङ्गसिद्धिः । [८] तथा औपदेशिकेनाङ्गेन आतिदेशिकस्य प्रसङ्गो यथा— दर्शार्थेन प्रयाजादिना निशीष्ट्यर्थस्य प्रयाजादेः प्रसङ्गसिद्धिः । [९] तथा आतिदेशिकेन आतिदेशिकस्य प्रसङ्गो यथा— पश्वर्थेन प्रयाजादिना पशुपुरोडाशार्थस्य प्रयाजादेः प्रसङ्गसिद्धिः । [१०] तथा आतिदेशिकेन औपदेशिकस्य प्रसङ्गो यथा— श्येने अतिदिष्टैः कर्तृभिः प्रयोगविधितः चोदकबलीयस्त्वेन प्रापितैः श्येनस्य औद्गात्रसमाख्यया प्रापितस्य उद्गातुः कार्यसिद्धेः प्रसङ्गः । प्रधानाङ्गप्रसङ्गश्चतुर्धा । प्रकृतिप्रधानेन अङ्गस्य प्रसङ्गसिद्धिः, अङ्गेन च प्रकृतिप्रधानस्येति द्वौ भेदौ । विकृतिप्रधानेन अङ्गस्य प्रसङ्गसिद्धिः, अङ्गेन च विकृतिप्रधानस्य इति द्वौ भेदाविति । एषु चतुर्ष्वपि भेदेषु श्रौतोदाहरणानि मृग्याणि । स्मार्तानि तूच्यन्ते । [११] तत्राद्ये भेदे उदाहरणं यथा— काम्येन अमावास्याश्राद्धेन यात्राद्यङ्गभूतश्राद्धस्य प्रसङ्गसिद्धिः । [१२] द्वितीयभेदे उदाहरणं यथा—— यात्राद्यङ्गभूतश्राद्धेन नित्यामावास्यस्य प्रसङ्गसिद्धिः । [१३] तृतीयभेदोदाहरणं यथा— काम्यभरण्यादिश्राद्धेन यात्राद्यङ्गभूतश्राद्धस्य प्रसङ्गसिद्धिः । [१४] चतुर्थभेदोदाहरणं यथा— यात्राद्यङ्गभूतश्राद्धेन नित्यश्राद्धस्य प्रसङ्गसिद्धिरिति ।

तदेवं चतुर्दशविधः प्रसङ्गो निरूपितः । **बाल.** पृ. १४९–१५०. * प्रसङ्गः द्वादशाध्यायार्थः । **टुप्.**

७।१।१।१. * प्रसङ्गो न ज्योतिष्टोमे दीक्षाकालीनेन जागरणेन दार्शिकजागरणस्य । १२।१।८।१७.

प्रसङ्गो न ज्योतिष्टोमे सवनीयपुरोडाशादिषु सौमिकपात्रैर्ग्रहचमसैः दार्शिकपात्राणां जुह्वादीनाम् ॥

पात्रेषु च प्रसङ्गः स्याद्धोमार्थत्वात् । १२।१।४।१० ॥

भाष्यम्-- सोमे एव यानि दर्शपूर्णमासप्रकृतीनि ग्रहचमसे प्रयुक्ते वर्तन्ते, यथा सावनः पशुः, सावनाः पुरोडाशाः, सौम्यश्चरुरिति । तेषु विचार्यते किं तेषां ग्रहैश्चमसैर्वा होमः कर्तव्यः, अथवा दार्शिकैः स्रुवादिभिः पात्रैरिति । तत्रोच्यते । पात्रेषु च प्रसङ्गः स्यात् । कुतः ? होमार्थत्वात् । होमार्थानि तानि पात्राणि । स च होमो ग्रहचमसेनापि निर्वर्त्यते । सोमतन्त्रमध्यपतितानि कर्माणि । तेषु ग्रहैश्चमसैर्वा होमः कर्तव्यः ।

न्याय्यानि वा, प्रयुक्तत्वादप्रयुक्ते प्रसङ्गः स्यात् । ११ ॥

भाष्यम्-- न्याय्यानि वा दार्शपूर्णमासिकानि स्युः । तैर्होमः क्रियते । कुतः ? प्रयुक्तत्वात् । प्रयुक्तानि तानि विद्यन्ते । यद्गृहीत्वाऽऽज्यानि सोममासादयेयुः अपघ्नन्ति यजमानम् । अथ यद्गृहीत्वा आज्यान्यासादयन्ति, न यजमानमपहन्ति इति प्रथमं तावत् तेषां प्रयोगः । प्रोक्षणं संमार्जनं च, तत आज्यग्रहणम् । तान्येव आज्यप्रयुक्तानि विद्यन्ते । अप्रयुक्ते प्रसङ्गः स्यात् । यन्मध्यपातिनोऽङ्गं न प्रयुक्तम्, तत्कार्ये तन्त्रिणोऽङ्गं प्रसज्यते । स्वस्याभावे हि परकीयमुपजीव्यते । असंनिहिते हि स्वस्मिन् याने देवदत्तो यज्ञदत्तयानमारोहति । संनिहिते तु स्वयानेनैव हि याति । तत्र हि तस्य यादृशं स्वातन्त्र्येण गमनसुखम्, न तादृशं परयाने । पुरोडाशानामपि दार्शिकैः पात्रैः यादृशं साद्गुण्यं तादृशं ग्रहचमसैर्न । न तत्र प्राकृत्यो वृक्षजातयः प्रोक्षणादयश्च संस्कारा लभ्यन्ते । ग्रहचमसे तेषामभावः । येऽपि सौमिकाः, तैः पुरोडाशानामसंबन्धः । यदि पुनर्दार्शिकान्यप्रयुक्तानि भवेयुः, किं ग्रहचमसं प्रसज्येत ? नेति ब्रूमः । दार्शिकान्येव प्रसज्येरन् । यत्र तन्त्रिणोऽङ्गं क्रियमाणं इतरस्यापि कृतं भवति, तत्र प्रसङ्गः, यथा पाशुकेषु प्रयाजेषु क्रियमाणेषु पौरोडाशिकाः । इह तु ग्रहचमसे प्रयुक्ते, नेतराणि प्रयुक्तानि भवन्ति । न हि सोमे हूयमाने पुरोडाशा हुताः । तस्मान्नास्त्यत्र प्रसङ्गः । किं तर्हीदमुच्यते अप्रयुक्ते प्रसङ्गः स्यादिति । यदि प्रयोग एषां नोपपद्येत, प्रतिषिध्येत वा, ततः प्रसङ्गः स्यादित्यर्थः । अपि च न्याय्यानि दार्शपूर्णमासिकानि, न ग्रहचमसम् । किं तेषां न्याय्यत्वम् ? दर्शपूर्णमासयोस्तानि शब्देनोक्तानि । ततश्चोदकेन पुरोडाशे अतिदिश्यन्ते इत्यस्ति शब्दसंस्पर्शः । ग्रहचमसेन तु हविर्यज्ञे न कचिद्धोमः श्रुतः । अर्थात् क्रियेत । असति शब्दोक्ते अर्थक्रिया भवति । दर्शयति चैतानि पात्राणि, 'युनज्मि ते पृथिवीं ज्योतिषा सहेति ध्रुवामभिमृशति, युनज्मि वायुमन्तरिक्षेण ते सहेत्युपभृतम्, युनज्मि वाचं सह दिवा सूर्येणेति जुहूम्' इति । तस्मादेतैर्होमः कर्तव्यः ।

शा— सोमाङ्गेषु ऐष्टिकेषु कर्मसु किं सोमार्थान्येव पात्राणि प्रसज्येरन्, उत जुह्वादीनि पात्राणि पृथक् प्रयोक्तव्यानि इति संदेहे सौमिकैरेव होमार्थैः ऐष्टिकानामपि होमादिकार्यसिद्धेः प्रसङ्गं मन्यते । जुह्वादिकार्याणि होमादीनि अन्यैः क्रियमाणानि विगुणीभवेयुः । न चात्र अन्यैरेत्र होमादयः कृताः, येन पृषदाज्यानूयाजवत् न पुनः क्रियेरन् । तेन कर्तव्याः सन्तो होमादयः साद्गुण्यसंभवे किमिति विगुणाः क्रियन्ते । तस्मान्न पात्रप्रसङ्गः ।

सोम-- यदि प्रचारार्थतयाऽपि वेद्या प्राकृतहविरासादनसिद्धिः, तदा किमु वक्तव्यं होमार्थतया समानार्थैः पात्रैः प्रकृतहोमसिद्धिः इत्युत्थितेः संगतिः ।

वि— 'सौम्यचर्वादिहोमः किं सौमिकैरैष्टिकैरुत (पात्रैः) ।, कार्यसिद्धेः सौमिकैः स्या, द्वैगुण्यादिहैष्टिकैः ॥'

भाट्ट— सौमिकानां ग्रहचमसादिपात्राणां खरासादनोत्तरं यान्यैष्टिकविकाराणि सवनीयपश्वादीनि, तेषु तैरेवोपात्तैः कार्यसिद्धेः न प्राकृतजुह्वादिपात्राक्षेपकत्वम् । इति प्राप्ते, न तावत् तैः सोमप्रक्षेपेण हविरन्तरप्रक्षेपसिद्धिः, तस्य पृथगनुष्ठानावश्यकत्वात् । हविरन्तरप्रक्षेपादौ च न ग्रहादीनां कारणता प्रकृते प्रामाणिकी, उपदेशातिदेशयोरभावात् प्रयाजाद्यदृष्टानां हि पुरोडाशोपकारकत्वे

अतिदेशेन सिद्धे युक्तं यत् सिद्धानामेव तेषामुपजीवनम्, प्रकृते तु सौमिकानामेतत्प्रक्षेपाद्यङ्गत्वे प्रमाणाभावात् महावेदिवच्च ग्रहचमसेषु आकारविशेषविशिष्टकाष्ठविशेषत्वादिरूपजुहूत्वादिरूपसत्त्वे प्रमाणाभावात्, आतिदेशिकपात्राणां चाधानवेलायामेवोपात्तत्वेन लाघवन्यायस्याप्यभावात् नात्र प्रसङ्गसिद्धिः । अत एव सुत्यादिने 'युनज्मि ते पृथिवीं ज्योतिषा सहेति स्रुचमभिमृशति' इत्यादिना ऐष्टिकपात्राणामभिमर्शनं विहितम् । अत एव 'ग्रहैर्जुहोति' इत्यादिना अङ्गप्रधानसाधारणप्रक्षेपानुवादेनैव 'हिरण्मय्यः स्रुचो भवन्ति' इतिवत् ग्रहादिविधानादुपदेशेनैव हविरन्तरप्रक्षेपे ग्रहादिप्राप्तेरैष्टिकपात्रबाधः इत्यपि अपास्तम्, तथात्वे ध्रुवादिदर्शनवैयर्थ्यात्, ग्रहादीनां सोममात्रार्थत्वे गमकान्तराणामपि सत्त्वाच्च ।

मण्डन— 'ग्रहादिभिर्नैष्टिकहोम इष्यते ।'

शंकर— 'पात्राणि प्रसजन्ति न ।' सौमिकानि दैक्षादौ ।

प्रसङ्गो न सोमाङ्गेष्टिगतशेषभक्षाणां सौमिकदक्षिणया ॥

शेषभक्षास्तथेति चेत् । १२।१।१७।३४ ॥

भाष्यम्— अथ शेषभक्षा अपि तथा निवर्तेरन्, यथा अन्वाहार्यः, इति चेत् । परिक्रयार्थाशङ्कयोच्यते ।

न, कर्मसंयोगात् । ३५ ॥

भाष्यम्— नैते निवर्तेरन् । नह्येते परिक्रयार्थाः । अन्वाहार्येण कर्मार्थिमानतानां निर्वृत्तेः भूयिष्ठे कर्मण्येते विधीयन्ते । न चालमानमनाय । तस्मान्नैते परिक्रयार्थाः, किंतु संस्कारार्थाः । अतस्तदर्थं कर्तव्याः ।

शा-- पूर्वं यजमानभक्षस्य वृत्त्यर्थत्वात् व्रतेन निवृत्तिराशङ्किता । संप्रति ऋत्विग्भक्षाणां परिक्रयार्थतया प्रधानदक्षिणया निवृत्तिराशङ्क्यते । निराकरणं च तद्वदेव शेषप्रतिपत्त्यर्था भक्षाः नानत्यर्था इति । दशमे एव च (शेषभक्षाश्च तद्वत् १०।२।९।३०) आनत्यर्थत्वं भक्षाणां निराकृतम् । तस्येदं प्रयोजनं प्रसङ्गात्मकत्वेन इहोक्तम् ।

सोम-- यदि प्रधानदक्षिणया आनतिः कृता इत्यन्वाहार्यनिवृत्तिः, तदा भक्षणानामपि निवृत्तिः स्यात् इत्युत्थितेः **संगतिः** । **सूत्रे** तथा अन्वाहार्यवत् इत्यर्थः ।

वि-- 'ऋत्विग्भक्षा, निवर्तेरन् यद्यन्वाहार्यव, न्न तत् ।, याजमानवदेतेषां कार्यत्वात् प्रतिपत्तये ॥'

भाट्ट-- ऋत्विक्कर्तृकाणां शेषभक्षाणां द्वितीयया शेषप्रतिपत्त्यर्थत्वेऽपि प्रयाजशेषाभिघारणन्यायेनानत्यर्थत्वस्यापि करिष्यमाणकर्मणि बलाधानार्थत्ववत् संभवात्, तस्यैव चानुमानिकतया प्रयोजकत्वावगतेः युक्त एव द्वादशशतदक्षिणया प्रसङ्गः । **इति प्राप्ते**, अन्वाहार्यदक्षिणानियमविधिबलेन शेषभक्षस्यानत्यर्थत्वाकल्पनात् केवलं द्वितीयया शेषप्रतिपत्त्यर्थत्वम् । प्रयाजशेषन्यायेन च ऋत्विक्प्राणधारणापरपर्यायबलाधानार्थत्वमित्युक्तं दशमादौ । अतो नात्रापि प्रसङ्गसिद्धिः ।

मण्डन— 'न चानतिद्वारभृतिप्रदानादङ्गेष्टिभक्षा विनिवर्तनीयाः ।'

शंकर— 'ऋत्विग्भक्षास्त्वैष्टिकाः स्युः ।' १८.

* प्रसङ्गो निशियज्ञे अमावास्यातन्त्रस्य, परंतु इध्माबर्हिः पृथक् कार्यं अग्न्यन्वाधानं च यदि देवतार्थम् । १२।२।५।१४-१८. * प्रसङ्गः परार्थमनुष्ठितस्यापि परोपकारकत्वम् । **रत्न.** १२।१।१।१ . * प्रसङ्गः पशुपुरोडाशतन्त्रस्यैवानुनिर्वाप्येषु (अग्निचयनादौ) देवसुवां हविरादिषु । १२।३।२. **मीको.** पृ. ३८३ 'अनुनिर्वाप्याधिकरणम्' इत्यत्र द्रष्टव्यम् । * प्रसङ्गः विशेषग्रहणे सकृदनुष्ठानम् । विशेषग्रहणं च सप्तधा– फलकामनातः निमित्ततः रूपतः संख्यातः कालतः मन्त्रतः कर्तृतश्चेति । **बाल.** पृ. १४९ . * प्रसङ्गः सवनीयपुरोडाशेषु पाशुकतन्त्रस्यैव, न विकल्पः । १२।२।१२। ३०-३२. 'सवनीयादिन्यायः' इत्यत्र द्रष्टव्यम् । * प्रसङ्गः सौमिकवेद्या दार्शिकवेदेः । १२।१।३।८-९. * 'एत्रमेव प्रसङ्गः स्यात् विद्यमाने स्वके विधौ' । तन्त्रवदेव प्रसङ्गः । अयं तु विशेषः विद्यमाने स्वके विधौ इति । यद्यप्यस्य अन्यो विधिर्विद्यते, परविधिना तु कृतार्थत्वान्न क्रियते । यथा प्रयाजाः पशोरपि चोदकेन प्राप्ताः पशुपुरोडाशस्यापि । पश्वर्था एव तु कृताः पशु-

पुरोडाशस्योपकुर्वन्तीति न पुनस्तदर्थं क्रियन्ते । **भा.** ११।१।१।१, * न च तुल्यकालत्वे प्रसङ्गो भवति । यथा वैकृत्यः इष्टयः दर्शपूर्णमासाभ्यां तुल्यकाला अपि न दार्शपौर्णमासिकं तन्त्रं उपजीवन्ति । १२।२।५।१५. *** प्रसङ्गस्य** विषयः । अस्ति प्रसङ्गः । तस्य विषयो निरूप्यते । अन्यस्य तन्त्रे प्रतते यदन्यत् तुल्यधर्मकमापतति कर्म, तस्य पूर्वकर्मणो येतिकर्तव्यता, सा प्रसज्यते । यथा पशौ प्रतते पशुपुरोडाश आपतति । तस्य पाशुकीतिकर्तव्यता प्रसज्यते । कथम् ? तदुच्यते । भावयेत् । किम् ? पशूपकारम् । केन ? पुरोडाशयागेन । कथं इत्यनेन यागगतो व्यापारः । स चोपमितलक्षितप्रापणेन अग्नीषोमीयस्य यो यागगतो व्यापारः, तं सादृश्येनाकाङ्क्षति । स इह पाशुकेन प्रयोगवचनेन कृतत्वात् न भूयः पौरोडाशिकः समीपे करोति । तस्मात् पौरोडाशिकः प्रयोगवचनो लुप्यते । एष प्रसङ्गः । **टुप्.** १२।१।१।३.

* **प्रसङ्गत्वं** विशेषग्रहणात् अन्यार्थस्यापि अन्योपकारकत्वम् । **बिन्दुः.** १२।१।१।१.

* **प्रसङ्गलक्षणः** प्रासबाधः सप्तविधः – प्रधानप्रसङ्गः एकः, अङ्गप्रसङ्गः षोढा । बाल. पृ. १३२. * **प्रसङ्गलक्षणे** (द्वादशाध्याये) अन्यार्थैरेव अङ्गैः उपक्रियमाणाः पशुपुरोडाशादयः न स्वाङ्गान्युपसंगृह्णन्ति । न च तद्धान्या किञ्चिद्वैगुण्यं भवति । **वा.** ३।६।३।१०.

* **प्रसङ्गसंगतिः** । यत्प्रसक्त्या यो विचारः, तत्समाप्तौ स एव बुद्धिस्थो भवति । **सु.** पृ. ४७०.

* **प्रसङ्गसिद्धं** ज्योतिष्टोमे ऐष्टिकेषु कर्मसु दार्शिकं आरण्यभोजनं चोदकप्राप्तं सौमिकेन पयोव्रतादिना । १२।१।१४।३०. * प्रसङ्गसिद्धं दार्शिकं व्रतं प्रायणीयादिषु सौमिकपयोव्रतादिना । १२।१।११. **मीको.** पृ. १८१८ ' ज्योतिष्टोमे प्रायणीयादिषु ' इत्यत्र द्रष्टव्यम् । * प्रसङ्गसिद्धं न होतुर्वरणं ज्योतिष्टोमे ऐष्टिकेषु कर्मसु । तत् प्रतिकर्म भेदेन कर्तव्यम् । **भा.** १२।१।१८।३५–४१, * प्रसङ्गसिद्धं प्रातःसवनीयानां पुरोडाशानां तन्त्रं पाशुकेन तन्त्रेण, माध्यंदिनसवनीय–तृतीयसवनीय–पुरोडाशतन्त्रं तु पाशुकेन वा प्रातःसवनीयपुरोडाशतन्त्रेण वा प्रसङ्गसिद्धम् । १२।२।१२।३०–३२, * प्रसङ्गसिद्धं ब्रह्मवरणं ज्योतिष्टोमे ऐष्टिकेषु कर्मसु दार्शिकं चोदकप्राप्तं सौमिकेन । १२।१।१८।३६–३९. * प्रसङ्गसिद्धं हविष्कृदाह्वानं पश्वर्थेन आह्वानेन सवनीयपुरोडाशेषु । १२।२।३।११. *** प्रसङ्गसिद्धः** न दार्शिकः ऐडादिः शेषभक्षः ज्योतिष्टोमे ऐष्टिकेषु कर्मसु चोदकप्राप्तः, संस्कारार्थत्वात् । १२।१।१५।३१–३२. * प्रसङ्गसिद्धः परिक्रयः अन्वाहार्यः दार्शिकः ज्योतिष्टोमे ऐष्टिकेषु कर्मसु चोदकप्राप्तः सौमिकेन परिक्रयेण । १२।१।१६।३३. *** प्रसङ्गसिद्धा** न आरम्भणीया विकृतिषु दर्शपूर्णमासारम्भणीयया । १२।२।६।१९–२१. * प्रसङ्गसिद्धा हविष्कृत् सवनीयपश्वर्थया, तृतीयसवने सवनीयपुरोडाशेषु, सौम्ये चरौ आश्विने द्विकपाले च, भेदेन नाह्वातव्या । १२।२।४।१२–१३.

*** प्रसङ्गसिद्धिः** अग्नीषोमीयपशुपुरोडाशतन्त्रेण देवसुवां हविषां तन्त्रस्य । १२।३।२।३–८. * प्रसङ्गसिद्धिः अनुबन्ध्यातन्त्रेण अनुनिर्वाप्याणां देविकाहविषां तन्त्रस्य । **भा.** १२।३।२।३–८. * प्रसङ्गसिद्धिः उपसदग्नीषोमीयबर्हिःप्रोक्षणस्य आतिथ्याबर्हिःप्रोक्षणेन । १२।१।१९. **मीको.** पृ. ८८७ ' आतिथ्याबर्हिःप्रोक्षणादिना० ' इत्यत्र द्रष्टव्यम् । * प्रसङ्गसिद्धिः दार्शिकारण्यभोजनस्य सौमिकप्रायणीयादीष्टिषु पयोव्रतादिना । १२।१।१४।३०. * प्रसङ्गसिद्धिः दार्शिकवेदेः सोमाङ्गेष्टिपश्वादिषु सौमिकवेद्या । १२।१।३. 'सौमिकवेदिन्यायः' इत्यत्र द्रष्टव्यम् । * प्रसङ्गसिद्धिः दीक्षणीयादिषु अन्वाहार्यदक्षिणायाः सौमिकदक्षिणया । १२।१।१६. ' सौमिकदक्षिणान्यायः ' इति बिन्दौ द्रष्टव्यम् । * प्रसङ्गसिद्धिर्नास्ति आतिथ्याबर्हिस्तरणमन्त्रेणाग्नीषोमीयार्थस्तरणमन्त्रस्य ज्योतिष्टोमे । १२।१।२०।४४. * प्रसङ्गसिद्धिर्नास्ति ज्योतिष्टोमे दीक्षाकालीनजागरणेन प्रायणीयादिषु दार्शिकजागरणस्य । १२।१।८।१७. * प्रसङ्गसिद्धिर्नास्ति दर्शपूर्णमासार्थान्वारम्भणीयया विकृतिषु अन्वारम्भणीयायाः । १२।२।६।१९–२१. * प्रसङ्गसिद्धिर्नास्ति दार्शिकहोतृवरणस्य सौमिकेष्टिपश्वादिषु सौमिकेन होतृवरणेन । १२।१।१८।३५–४२. * प्रसङ्गसिद्धिर्नास्ति

पशुपुरोडाशे आज्यभागयोः । १२।१।२।७. * प्रसङ्गसिद्धिर्नास्ति सोमाङ्गेष्टिषु शेषभक्षाणां सौमिकदक्षिणया । १२।१।१७।३३–३४. * प्रसङ्गसिद्धिर्नास्ति सौमिकेन दीक्षाकालीनजागरणेन दार्शिकजागरणस्य । १२।१।८. **मीको.** पृ. १७५३ ' जागरणन्यायः ' इत्यत्र द्रष्टव्यम् । * प्रसङ्गसिद्धिर्नास्ति सौमिकपात्रैर्दार्शिकपात्राणां सवनीयपुरोडाशादिषु ज्योतिष्टोमे । १२।१।४।१०–११. * प्रसङ्गसिद्धिर्न इध्मस्य बर्हिषः अग्न्यन्वाधानस्य च निशियज्ञे अमावास्यातन्त्रगतस्य । **भा.** १२।२।५।१८.

प्रसङ्गसिद्धिर्न ऐष्टिकशेषभक्षाणां सौमिकव्रतभक्षेण ॥

शेषभक्षास्तथेति चेत् । १२।१।१५।३१॥

भाष्यम्— दर्शपूर्णमासयोः शेषभक्ष ऐडादिः, सोमे चैष्टिकेषु कर्मसु चोदकप्राप्तः । सोऽपि सौमिकेन व्रतेनाऽऽरण्यवन्निवर्तते इति चेत् ।

नान्यार्थत्वात् । ३२॥

भाष्यम्— न । कस्मात् ? न स वृत्त्यर्थः । नहि अलं वृत्तये । संस्कारार्थोऽसौ, उपयुक्तशेषत्वात् भक्षाणाम्, द्वितीयानिर्देशाच्च ' यजमानपञ्चमा इडां भक्षयन्ति ' इति । तस्मात् कर्तव्यम् ।

शा— तदिदं षष्ठे एव साधितम् (६।८।८)। तस्य तु इदं प्रयोजनकथनं प्रसङ्गात्मकत्वात् इहोक्तम् (इति **संगतिः**) ।

सोम—**सूत्रे** आरण्याशनवत् अकर्तव्यत्वं तथाशब्दार्थः ।

वि— ' यजमानगता भक्षा, न सन्त्यारण्यवद् यदि ।, न वृत्त्यर्था इमे किन्तु कर्तव्याः प्रतिपत्तये ॥ '

भाट्ट— एवं तर्हि यजमानकर्तृकाणां शेषभक्षाणामपि प्रयाजशेषाभिघारणन्यायेन कर्तृसंस्कारकत्वस्यापि सत्त्वात् प्राणधारणार्थत्वोपपत्तेः, सत्यपि द्वितीयया शेषप्रतिपत्त्यर्थत्वे अस्मदुक्तप्रयाजशेषाभिघारणन्यायेन आनुमानिकस्यैव प्राणधारणस्य प्रयोजकत्वावगतेः, तस्य च पयोव्रतेन प्रसङ्गसिद्ध्युपपत्तिः । **इति प्राप्ते**, आरण्याशननियमविधानात् तेनैव प्राणधारणकर्तव्यत्वप्रतीतेः यजमानभक्षस्य केवलशेषप्रतिपत्त्यर्थत्वावसायात् तस्य च प्रसङ्गसिद्ध्यभावेन भक्षयितव्य एव यजमानेन प्रायणीयादिष्वपि शेषः ।

मण्डन— ' स्याच्छेषभक्षः पुनरत्र दर्शवत् । '

शंकर— ' यष्टृभक्षाः पृथक् तु स्युः । ' १६.

* प्रसङ्गसिद्धिः निशियज्ञे वेद्युद्धननस्य व्रतस्य च अमावास्यातन्त्रगतस्य । **भा.** १२।२।५।१४–१८. * प्रसङ्गसिद्धिः पश्वर्थानुष्ठितप्रयाजादिभिः पशुपुरोडाशस्य । १२।१।१।१–६. * प्रसङ्गसिद्धिः पशुपुरोडाशानुयाजानां पाशुकैरनुयाजैः । **बिन्दुः.** ५।१।१५. * प्रसङ्गसिद्धिः प्रकृतेर्वैकृताङ्गेन प्रकृतिविकृत्योः समानतन्त्रत्वे । (कृत्वाचिन्ता) । १२।२।१३।३३. **मीको.** पृ. २६९५ ' प्रकृतिविकृत्योः समानतन्त्रत्वे० ' इत्यत्र द्रष्टव्यम् । * प्रसङ्गसिद्धिः प्राकृतस्य आरण्यभोजनस्य सौमिकपयोव्रतादिना प्रायणीयादिषु । १२।१।१४. **मीको.** पृ. ९७२ ' आरण्यभोजनन्यायः ' इत्यत्र द्रष्टव्यम् । * प्रसङ्गसिद्धिः सोमाङ्गदीक्षणीयादीष्टिषु अन्वाहार्यदक्षिणायाः सौमिकदक्षिणया । १२।१।१६।३३.

प्रसङ्गसिद्धिः सौमिकेन पत्नीसंनहनेन सौमिकेष्टिपशुषु पत्नीसंनहनस्य ॥

संनहनं च, वृत्तत्वात् । १२।१।१३।२९॥

भाष्यम्— पत्न्याः संनहनं च दर्शपूर्णमासयोः समाम्नातं 'योक्त्रेण पत्नीं संनह्यति' इति । तत् सोमाङ्गभूतेष्वैष्टिकेषु कर्मसु चोदकेन प्राप्तमपि न कर्तव्यम् । कुतः ? वृत्तत्वात् । दीक्षाकाले सोमार्थं पत्न्याः संनहनं वृत्तम् , ' योक्त्रेण पत्नीं संनह्यति, मेखलया दीक्षितम्, मिथुनत्वाय ' इति यदाम्नातम् । संनहनं च वाससो धारणार्थं सर्वार्थम् । सौमिकेनैव आकर्मापवर्गात् प्रसङ्गेन सिध्यतीति ।

सोम— पूर्वोक्तान्वाधानवैलक्षण्यात् **संगतिः** । **सूत्रार्थस्तु** संनहनं च न कर्तव्यं सोमे तस्य प्रवृत्तत्वात् इति ।

वि— ' पत्नीसंनहनं, कार्यं चोदकादिति चे, न तत् । बन्धवासोधारणयोर्योक्त्रबन्धनसिद्धितः ॥ '

भाट्ट— दर्शपूर्णमासयोः ' योक्त्रेण पत्नीं संनह्यति ' इति विहितं संनहनं प्रायणीयादिषु दीक्षाकालकृतेन योक्त्र-

करणकपत्नीसंनहनेन प्रसङ्गसिद्धेर्न कार्यम्, दीक्षणीयायां तु कर्तव्यमेव । **बोधायनेन** तु तत्रापि नेत्युक्तम् । नहि तददृष्टार्थम्, येन जागरणन्यायेन पुनः क्रियेत, वासोधारणार्थत्वरूपदृष्टप्रयोजनसंभवे अदृष्टकल्पनस्यान्याय्यत्वात् । **न च** अत्र अन्वाधानवत् आद्यवासोधारणार्थत्वाप्रतीतेः सकृद्धृतस्यापि पुनःश्लथीभावसंभवेन सवनीये यूपदार्ढ्यातिशयार्थं परिव्याणान्तरवत् पुनः संनहनोपपत्तिरिति **वाच्यम्** । उपदिष्टपरिव्याणस्य विकृतौ प्रयोजनान्तरकल्पनायामपि प्राकृतस्य संनहनस्यासंनद्धसंनहनार्थत्वेन क्लृप्तप्रयोजनस्य विकृतौ कार्यान्तरकल्पनानुपपत्तेः । **यदि** तु संनहनं प्रकृतावेव न वासोधारणार्थम्, अपि तु करिष्यमाणकर्मणि बलाधानार्थमित्युच्येत, **तथापि** सोमार्थसंनहनेनैव बलाधानसिद्धेः, श्लथीभावे च तस्यैव प्रकृतिवत् कर्षणोपपत्तेः प्रसङ्गसिद्ध्यविरोधः ।

मण्डन— 'पत्न्याश्च संनाह इहेष्यते न वै ।'

शंकर— 'पत्नीसंनहनं नैव ।' सोमे इष्टिषु । १४.

* प्रसङ्गसिद्धिः सौमिकवेद्या दार्शिकवेदेः सोमाङ्गेष्टिपशुषु । १२।१।३।८–९. * प्रसङ्गसिद्धिः सौमिकव्रतैः ज्योतिष्टोमीयप्रायणीयादिषु दार्शिकव्रतानाम् । १२।१।११।२०–२३. * **प्रसङ्गसिद्धेः** उदाहरणानि **मीको.** पृ. १२९१ 'एकादशाध्यायार्थः' इति बिन्दौ द्रष्टव्यानि ।

* यदीयतन्त्रमध्ये अर्थान्तरं स तन्त्री, अर्थान्तरं **प्रसङ्गि** । वि. १२।२।१२. * यस्य पूर्वमुपक्रमः यस्य वा पश्चात् समाप्तिः स तन्त्री, इतरस्तु **प्रसङ्गी** । **शा.** १२।२।१२.

* **प्रसङ्गित्वम्** । भूयसां तन्त्रित्वम्, अल्पानां प्रसङ्गित्वम् । प्रसङ्गः उपकारलाभनिमित्तः । (यस्य प्रसङ्गेन सिद्धिः स प्रसङ्गी, येन च तन्त्रं स तन्त्री) । **भाट्ट.** १२।२।७–८.

* **प्रसज्यप्रतिषेधः** । 'प्रतिषेधः स विज्ञेयः क्रियया सह यत्र नञ्' । ('न कलञ्जं भक्षयेत्' इत्यादौ नञर्थः प्रसज्यप्रतिषेधः) । **मीन्या.**

* **प्रसज्यप्रतिषेधार्थकत्वे** नञो विधायकेनान्वयः, पर्युदासार्थकत्वे तु धातुनाऽन्वयः । 'न कलञ्जं भक्षयेत्' अत्र नञः लिङा अन्वयः, प्रसज्यप्रतिषेधार्थकत्वात् । 'नेक्षेतोद्यन्तमादित्यम्' अत्र नञः 'ईक्ष'धातुनैवान्वयः । **वि.** ६।२।५.

* **प्रसज्यप्रतिषेधस्थले** नञो न समासः 'न तौ पशौ करोति' । वि. १०।८।२.

* **प्रसञ्जकचिन्ता** । यत्प्रसक्त्या या चिन्ता क्रियते तत्समाप्तौ प्रसञ्जकचिन्ता बुद्धिस्था भवति । **सु.** पृ. ८०७.

* **'प्रसरं न लभन्ते हि यावत् केचन मर्कटाः । नाभिद्रवन्ति ते तावत् पिशाचा वा स्वगोचरे ॥'** इति **न्यायः** (वा. १।३।२।३ पृ. १७१) । आरोपितार्थत्वमेव गौणत्वं लोकवेदानुगुणं इति चेत्, सत्यम् । तथापि वेदे आरोपितार्थत्वस्वीकारे अप्रामाण्यापत्तेः अयं पक्षः आचार्यैः (पार्थसारथिभिः) दूषितः । यद्यपि रुद्ररोदनादिवत् असदर्थेनापि स्तुतिसंभवात् नाप्रामाण्यप्रसक्तिः, तथापि 'प्रसरं० गोचरे' इति न्यायेन वेदे प्रामाण्यविरोधिनः आरोपितार्थत्वस्यावकाशो न देयः इत्याशयेन तन्निराकरणं कृतमिति ध्येयम् । **सोम.** १।४।१३ पृ. ८५. * वार्तिकादिषु यदारोपप्रच्छादनं (आरोपितत्वरूपगौणत्वस्य निषेधः) तत् वेदप्रामाण्यसंरक्षणव्यसनितया । **'प्रसरं न लभन्ते हि०'** इति **न्याय**मवलम्ब्य वेदप्रामाण्यप्रतिषेधकारणस्य कियतोऽपि अवकाशस्यालाभाय आरोपपक्षः प्रौढ्या प्रच्छादितः । **परिमल.** ३।३।४।९ ब्रसू.

* **प्रसर्पकाः** प्रसर्पन्ति यज्ञमण्डपेषु तत्रतत्र । यज्ञे अर्थसंशये निर्णायकाः । यज्ञार्थशालोपविष्टाः विद्वांसः शिष्टा ब्राह्मणा त्रिप्रभृतयः । **ज्योत्स्ना.** १०।१।१०.

* **प्रसादो** देवतास्तित्वसाधकः 'तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति' इति चेत्, न, अर्थवादानां स्वार्थे तात्पर्याभावात् । **वि.** ९।१।४.

* **प्रसिद्धमुद्दिश्याप्रसिद्धो** बोध्यते इति न्यायः । **उपदेशसाहस्री** . पद्य . १८।१७७ रामतीर्थ . * **प्रसिद्धेन** अप्रसिद्धं निर्णीयते । **मीन्या.** * 'प्रसिद्धे-

नाप्रसिद्धस्य नित्यमिष्टं विशेषणम्' इत्यनेन न्यायेन विश्वजिदादिपदवत् यागनामधेयत्वमेव अमीषां (दाक्षायणयज्ञ–साकंप्रस्थायीय – संक्रमयज्ञशब्दानाम्) । **तौता.** २।३।४।५ पूर्वपक्षे.

* **प्रसिद्धस्य** संनिधौ यदभिधीयते किञ्चिदिदं कर्तव्यमिति तत्र आकृतिवचनं गम्यते, यथा-अमी पिष्टपिण्डाः सिंहाः क्रियन्तां इति, अर्जुनबदरा मेखलाः क्रियन्तां इति, सिंहाकृतिवचनं मेखलाकृतिवचनं च गम्यते । **भा.** ९।४।५।२५.

प्रसिद्धानुवादेनाप्रसिद्धं निरूपणीयमिति न्यायः । अयं न्यायो दृग्दृश्यविवेकापरपर्यायवाक्यसुधाख्यग्रन्थटीकायां व्यवहृतः "वाक्यार्थज्ञानस्य चान्वयव्यतिरेकाभ्यां पदार्थपरिशोधनपूर्वकत्वात्, पदार्थपरिशोधनस्य 'प्रसिद्धानुवादेनाप्रसिद्धं निरूपणीयम्' इति न्यायेन प्रतिशरीरं अहमहमिति प्रसिद्धजीववाचकत्वं पदार्थपरिशोधनपूर्वकत्वात्" इति । **साहस्री.** ६३९.

* **प्रसिद्धिः** नाम प्रज्ञानम् । **भा.** ३।२।१।१ पृ. ७४८, * प्रसिद्धिर्वाक्येन बाध्यते । २।३।७।१८.

* **प्रसिद्धिहानाप्रसिद्धकल्पनं** व्यवहारोच्छेदकारणम् । वा. १।४।१२।२३–१ पृ. ३५६.

* **प्रसूनबर्हिर्नियम** आग्रयणे जघन्यद्यावापृथिव्यानुरोधेन मुख्यस्याप्यैन्द्राग्नादेः विरोधाभावात् । **भा.** १२।२।१४।३४.

* **प्रसूनमयं** बर्हिः आग्रयणे द्यावापृथिव्यैककपालानुसारेण हविस्त्रितयेऽपि । प्रसूनं पुष्पितम्, लूनशेषात् मूलात् पुनरुत्पन्नं वा । **वि.** १२।२।१४.

* **प्रस्तरः** आहुतिः, सूक्तवाको याज्या इति पूर्वपक्षे । **भा.** ३।२।५।१२, * प्रस्तरः उत्तरो बर्हिषः (उपरि) सादयितव्यः । १।४।१२।२३–१. * प्रस्तरस्तावत् प्रासङ्गिकस्तेषां सवनीयपुरोडाशानाम् । यदर्थश्च प्रस्तरः परवर्थः तदर्थं प्रहरणम्, प्रहरणाङ्गं च सूक्तवाकः । **टुप्.** ११।३।१६।५४. * प्रस्तरः दर्भमुष्टिविशेषः (प्रथमलूनः कुशमुष्टिः) । वि. ३।२।५. * प्रस्तरः स्रुग्धारणार्थः । **भा.** ३।२।५।११, ६।४।१४।४४. * 'यजमानः प्रस्तरः' अत्र विधेयः **प्रस्तरः** यजमानशब्देन स्तूयते । यागसाधनत्वं चात्र यजमानगुणः । **वि.** १।४।१३. * **प्रस्तरस्य** शाखायाश्च प्रहरणं प्रतिपत्तिः । **भा.** ६।४।१४।४४, * शेषस्यापि वचनात् अनेकत्र गुणभावो भवति, यथा **प्रस्तरस्य** । १२।४।६।१६.

प्रस्तरे शाखा श्रयणवत् । ६।४।१४।४४॥

दर्शपूर्णमासयोः 'सह शाखया प्रस्तरं प्रहरति' इति श्रूयते । तत्र प्रस्तरे अग्नौ प्रह्रियमाणे शाखा अङ्गं स्यात् । प्रस्तरस्य अङ्गभूता शाखा । अदृष्टश्च शाखया प्रस्तरे उपकारः । प्रस्तरे प्रहृते तदङ्गभूता शाखाऽपि अग्नौ प्रहर्तव्या इति पूर्वः पक्षः । श्रयणवत् । यथा 'पयसा मैत्रावरुणं श्रीणाति' इति मैत्रावरुणग्रहे पयसः श्रयणं मिश्रणं श्रुतम् । तत्र द्वितीयातृतीयासंयोगात् अदृष्ट उपकारो गम्यते तद्वत् ।

कालविधिर्वोभयोर्विद्यमानत्वात् । ४५ ॥

पूर्वपक्षं सूत्रेण प्राप्तं वाशब्देन निरस्य सिद्धान्तमाह । 'सह शाखया प्रस्तरं प्रहरति' इति कालविधिः स्यात् । यस्मिन् काले प्रस्तरप्रहरणं तस्मिन् काले एव शाखाप्रहरणं इति कालार्थः संयोगः । नात्र प्रस्तरस्य विधिः, नापि शाखायाः, उभयोः शाखाप्रस्तरयोः विद्यमानत्वात् । वत्सापाकरणार्था शाखा पूर्वं विहिता । प्रस्तरोऽपि स्रुग्धारणार्थं प्राप्तः । तस्मात् कालार्थः संयोगः ।

अतत्संस्कारार्थत्वाच्च । ४६ ॥

पूर्वपक्षस्य निराकरणे हेत्वन्तरमाह सिद्धान्ती । तस्य प्रस्तरस्य संस्कारः तत्संस्कारः । तत्संस्कारः अर्थः प्रयोजनं यस्याः सा तत्संस्कारार्था, पलाशशाखा च तत्संस्कारार्था न भवति । न शाखया प्रस्तरस्योपकारो दृष्टः क्रियते । काष्ठं दह्यमानस्य तृणस्य नोपकारे वर्तते, तृणं तु काष्ठस्योपकुर्यात् । तस्मान्न शाखा प्रस्तरार्था ।

तस्माच्च विप्रयोगे स्यात् । ४७ ॥

'सह शाखया प्रस्तरं प्रहरति' इति यस्मात्प्रस्तरस्य शाखा नाङ्गं तस्मात् पौर्णमास्यां शाखायाः प्रस्तरस्य विप्रयोगे असंयोगेऽपि विना शाखया प्रस्तरः प्रहर्तव्यः स्यात् । किञ्च सवनीयेषु हविःषु सवनीयपशुतन्त्रं प्रसज्यते इति द्वादशे वक्ष्यते । अतः पाशुक एव प्रस्तरः सवनीयानां नान्यः । तस्य च प्रहरणं तदाद्युत्कर्षन्यायेन

आग्निमारुतादूर्ध्वं अनुयाजेषु उत्कृष्यमाणेषु उत्कृष्टं तृतीयसवने। शाखा च सवनीयहविरन्तर्गतपयस्यार्थमुत्पादिता अपूर्वत्वात् वेदिकरणन्यायेन नोत्कृष्यते। अतः सा प्रातःसवने एव प्रहर्तव्या विनाऽपि प्रस्तरेण। इति सिद्धान्तः।

उपवेषश्च पक्षे स्यात्। ४८॥

'सह शाखया प्रस्तरं प्रहरति' इत्यत्र शाखा न प्रस्तराङ्गं इति सिद्धान्ते सांनाय्यपक्षे विद्यमानायाः शाखायाः प्रतिपत्तिः इति सांनाय्यपक्षे एव उपवेषोऽपि स्यात्। तस्मात् कालार्थः संयोगः। वस्तुतस्तु 'उपवेषेण कपालान्युपदधाति' इति 'उपवेषेण अङ्गारान्निरुह्य दोहकुम्भीमधिश्रयति' इति च श्रवणात् उपवेषः सांनाय्यार्थः कपालोपधानार्थश्च। ततश्च पूर्णमासे दोहाभावेऽपि कपालोपधानं आत्मनिर्वृत्त्यर्थं उपवेषं प्रयोजयेत्। तत्र शाखाया अभावेऽपि वारणवृक्षस्योपवेषः कार्यः। इति कुतूहले उक्तम्। **के.**

* **प्रस्तरादिस्तुत्यर्थौ** यजमानशब्दः 'यजमानः प्रस्तरः', 'यजमान एककपालः' इति। **वि.** १।४।१३.

* **प्रस्तरप्रहरणं** 'इदं द्यावापृथिवी॰' इत्यादिना सूक्तवाकमन्त्रेण प्रस्तरस्य अग्नौ प्रक्षेपः। **वि.** ३।२।५, * प्रस्तरप्रहरणं देवतासंस्कारः। ३।२।५. * प्रस्तरप्रहरणम्। 'न च प्रहरणं यागमात्ररूपेऽवतिष्ठते। होम एव त्वयं स्पष्टः, प्रक्षेपाधिक्यचोदनात्॥ आघारादि यथा द्रव्यक्षारणाद्धोमतां गतम्। तथा प्रक्षेपरूपत्वात् हरणस्यापि (प्रहरणस्यापि) होमता॥' **वा.** ३।२।५।१२ पृ. ७६१. * प्रस्तरप्रहरणं प्रतिपत्तिः यागोऽपि। 'प्रतिपाद्येत प्रस्तरो यागश्च निर्वर्त्यते। प्रत्यक्षतः प्रतिपाद्यते, वचनात् इज्यां साधयति।' **भा.** ३।२।५।१५. * प्रस्तरप्रहरणम्। प्रस्तरद्रव्यस्य हविष्ट्वसंकीर्तनादग्न्यादीनां च देवतात्वात् यागोऽयं विज्ञायमानः प्रक्षेपाधिकत्वात् होम इत्यवधार्यते। **वा.** ३।२।५।१३ पृ. ७६३. * **प्रस्तरप्रहरणेन** सह दर्शे शाखाप्रहरणं प्रतिपत्तिः। सा च संनयत एव, न तु असंनयतः। **वि.** ६।४।१४. * **प्रस्तरप्रहरणस्य** स्रुगासादनोपयुक्तप्रस्तरप्रतिपत्त्यर्थत्वम्। **सु.** पृ. ६३४. * **प्रस्तरप्रहरणे** अस्थियज्ञे मृताधिकारपक्षे सूक्तवाकमन्त्रगतः यजमानाऽऽशासनपरो भागः 'आशास्तेऽयं यजमानोऽसौ' इत्यादिर्लुप्यते। (ऊहवाचिन्ता)। **वि.** १०।२।२१. * प्रस्तरप्रहरणे सूक्तवाकः दर्शपूर्णमासयोः मन्त्रः, न तु कालार्थः संयोगः। **भा.** ३।२।५।११–१५.

* **प्रस्तरप्रहरणकरणसूक्तवाके** बहुकर्तृके विकारे यजमानशब्द ऊहितव्यः। **भा.** ९।१।१४।४१.

* **प्रस्तरप्रहरणकाले** शाखाप्रहरणम्। ६।४।१४। ४३–४७. **मीको.** पृ. २०२४ 'दर्शे शाखाप्रहरणं॰' इति बिन्दौ द्रष्टव्यम्।

* **प्रस्तरप्रहरणन्यायः** (प्रस्तरप्रहरणाङ्गं सूक्तवाकः)। ३।२।५. 'सूक्तवाकन्यायः' इत्यत्र द्रष्टव्यम्।

* **प्रस्तारपङ्क्तिः** पङ्क्तिः। पादेषु अक्षराणि १२। १२।८।८। उदा॰ 'तस्याः समुद्रा अधि' (ऋसं. १।१६४।४२)। **के.**

* **प्रस्तावः** 'अष्टाक्षरेण प्रथमाया ऋचः प्रस्तौति, द्व्यक्षरेणोत्तरयोः' इति। **भा.** ९।२।३।१८, १०।६।१।२. * प्रस्तावः द्वितीया सामभक्तिः। तां प्रस्तोता गायति। **वि.** ३।५।८.

* **प्रस्तोता** उद्गातुः पुरुषः। द्वितीयवर्गस्थोऽयम्। अयं अर्धी दक्षिणार्धभाक् षट् गा लभते। **वि.** ३।७।१७, * 'प्रस्तोता प्रस्तौति'। ३।७।९, प्रस्तावं नाम द्वितीयं सामभागं गायति। ३।५।८, * '**प्रस्तोतारं** प्रतिप्रस्थाता दीक्षयति'। ३।७।१७.

* **प्रस्तोत्राद्य** एव उपगाः नाम, नान्ये के चित्। **वि.** ३।७।१४.

* **प्रस्तोतृप्रतिहर्तारौ** गातारौ न उद्गातारौ। **वा.** ३।५।८।२६.

* **प्रहरणं** (प्रस्तरस्य) प्रतिपत्तिः यागश्च। तत्र सूक्तवाकमन्त्रः अङ्गम्। **वा.** ३।२।६।१५. * प्रहरणं (प्रस्तरस्य) यजिः। मान्त्रवर्णिको देवताविधिः। ...... प्रहरतिर्यजतिः। एवं सूक्तवाकेन प्रस्तरः प्रहर्तुं शक्यते यदि प्रहरतिर्यजतिः अग्न्यादिदेवताकश्च। **भा.** ३।२।५।१३, * प्रहरणं शाखाया न प्रयोजकम्, न

चार्थकर्म, किन्तु प्रतिपत्तिः दर्शपूर्णमासादौ। तच्च पूर्णमासयागे नास्ति। ४।२।४।१०–१३. * प्रहरणं शाखायाः प्रस्तरप्रहरणकाले। ६।४।१४।४४–४८. * प्रहरणं शाखायाः प्रस्तरस्य च प्रतिपत्तिः। **भा.** ६।४।१४।४४, * प्रहरणं सोमान्ते स्वरोः अग्नीषोमीये उपात्तस्य तन्त्रतया प्रवृत्तस्य, नानुबन्ध्याकालस्य। ११।३। ५।८–१२. * **प्रहरणे** प्रस्तरस्य च प्रतिपत्तिः शाखाया अपि। तत्र अनियतकाले प्रहरणे प्राप्ते सह प्रहरति इति विधीयते 'सह शाखया प्रस्तरं प्रहरति' इति। **टुप्.** ४।२।४।११.

* **प्रहासः** अतादृशत्वेन जानतः तादृशत्वकथनम्। **मणि.** पृ. ११६.

ॐ प्रागपरोधान्मलवद्वाससः। ३।४।७।१८॥

दर्शपूर्णमासयोः श्रूयते 'मलवद्वाससा न संवदेत, नास्या अन्नमद्यात्' इति मलवद्वाससा सह संवादस्य प्रतिषेधोऽयं किं दर्शपूर्णमासाङ्गस्य उत पुरुषस्य सर्वत्र प्रतिषेध इति विचारे सिद्धान्तमाह। मलवद्वाससः रजस्वलायाः संवादादिप्रतिषेधः पुरुषस्य सर्वत्र। पुरुषार्थ एवायं न क्रत्वर्थः। प्राक् साङ्गप्रयोगारम्भात् प्रागेव तस्याः अपरोधात् अपरोधस्य उक्तत्वात् 'यस्य व्रत्येऽहन् पत्नी अनालम्भुका भवति तामपरुध्य यजेत' इति। तस्मात् पुरुषार्थः। इति सिद्धान्तः।

अन्नप्रतिषेधाच्च। १९॥

मलवद्वाससः नाम रजस्वलायाः स्त्रियाः 'नास्या अन्नमद्यात्, अभ्यञ्जनं वै स्त्रिया अन्नम्' इति श्रुत्या अन्नस्य अभ्यञ्जनापरपर्यायस्य लाटदेशप्रसिद्धस्य मिथुनभवनस्य प्रतिषेधाच्च संवादादिनिषेधस्य पुरुषधर्मत्वसिद्धिः। तस्मात् अयं निषेधः न क्रतुधर्मः किन्तु पुरुषार्थः प्रकरणादुत्कृष्टः इति सिद्धान्तः। **के.**

* **प्रागुपनयनात्** कामचारवादभक्षाः। **टुप्.** ६।२।६। २२. * 'प्राङ्नाभिवर्धनात् पुंसो जातकर्म विधीयते।' अयं पञ्चमलकारेण विधिः स्मार्तः। **बाल.** पृ. ४०. * प्राग् लोकंपृणायाः चित्रिण्याद्युपधानम्। **भा.** ५।३। ८।२०.

ॐ प्राग् लोकंपृणायास्तस्याः संपूरणार्थत्वात्। ५।३।८।२०॥

चित्रिण्यादय इष्टकाः मध्यमायां चितौ उपधेयाः इति पूर्वाधिकरणे समधिगतम्। मध्यमायामपि लोकंपृणायाः नाम इष्टकायाः प्रागेव उपधेयाः न परस्तात्। तस्याः लोकंपृणायाः चितेः संपूरणार्थत्वात्। चितेः संपूर्णं लोकंपृणया क्रियते। तस्मात् सा अन्ते एव उपनिधीयते एका अनेका वा। तत उत्तरं न काऽपि उपधातुं शक्यते। तस्मात् चित्रिण्यादयः मध्यमायां चितौ लोकंपृणायाः प्राक् उपधातव्याः इति सिद्धान्तः। **के.**

* **प्राकरणिकेन** अनारभ्याधीतं बाध्यते यथा सास्दश्यं पाञ्चदश्येन। **बाल.** पृ. १४१. * **प्राकरणिकानां** कृत्स्नानामङ्गं हस्तावनेजनं वाग्यमः मुष्टिकरणं इत्यादि। **वि.** ३।१।१४.

* **प्राकरणिकाङ्गता** उपवीतस्य दर्शपूर्णमासयोः। ३।१।११।२१.

ॐ प्राकरणिकाप्राकरणिकेष्टकासाधारण्यं इष्टकाधर्माणां अकृष्णत्वादीनाम्। चित्रिण्यादयोऽपि अग्न्यङ्गम्॥

अग्न्यङ्गमप्रकरणे तद्वत्। ३।६।१२।३५॥

भाष्यम्— अनारभ्याग्निमुच्यते 'चित्रिणीरुपदधाति, वज्रिणीरुपदधाति, भूतेष्टका उपदधाति' इति। सन्ति तु प्रकरणे इष्टकाधर्माः 'अखण्डामकृष्णलामिष्टकां कुर्यात्' इति, तथा 'भसनेष्टकाः संयुज्यात्' इति। तत्र संदेहः किमप्रकरणे समाम्नातानामिमे धर्माः कर्तव्या उत नेति। किं प्राप्तम्? न कर्तव्याः। कुतः? असंनिधानात्। इति प्राप्ते, उच्यते। अग्न्यङ्गमेवंजातीयकं तद्वदेव स्यात्, यद्वत् ग्रहाः। प्रकरणाद्धि वाक्यं बलवत्। अमूर्षां चेष्टकानामग्न्यर्थत्वात्।

शा— पूर्वत्र अंश्वदाभ्ययोः अनारभ्योत्पन्नयोरपि प्राकरणिकेन वाक्येन विनियोगोऽस्तीति प्रकरणसंस्पर्शायुक्तो धर्मसंबन्धः, चित्रिण्यादीनां तु विनियोगोऽप्यनारभ्यवादेनैवेति प्रकरणसंस्पर्शाभावान्न तद्धर्मसंबन्ध इति विशेषाशङ्का, प्रकरणसंस्पर्शाभावेऽपि प्रकृतापूर्वसंस्पर्शात् तत्साधननिवेशिनो धर्मास्तासामपि भवन्तीति सिद्धान्तः।

सोम— सूत्रार्थस्तु अप्रकरणे यदग्न्यङ्गं चित्रिण्यादिकं तदपि अंश्वदाभ्यग्रहब्रह्मधर्मयुक्तं स्यात् इति।

वि-– 'अखण्डादीष्टकाधर्माश्चित्रिण्यादिषु नोचिताः। सन्ति वा, वाक्यमप्यत्रानारभ्योक्तं ततो न ते ॥, प्रकृतापूर्वसंबन्धात्ताद्दशादपि वाक्यतः। अखण्डत्वादयोऽग्न्यर्थचित्रिण्यादिषु सन्ति ते ॥'

भाट्ट— इष्टकाधर्माणामकृष्णत्वादीनामनारभ्याधीतचित्रिण्यादीष्टकाविनियोगस्याप्यनारभ्याधीतत्वात् प्राकरणिकेष्टकामात्रधर्मत्वम्। **इति प्राप्ते**, पूर्ववदनुष्ठानसादेश्यात् इष्टकाप्रयोज्यचयनापूर्वसंबन्धित्वस्य तत्प्रयोज्यक्रत्वपूर्वसंबन्धित्वस्यैव वा लक्षणीयस्यानारभ्याधीतास्वप्यविशेषाच्चात्राप्युभयधर्मत्वम्।

मण्डन— 'स्युरिष्टका दूरगताः सधर्माः।'

शंकर— 'चित्रिण्याद्यग्निधर्मकम्।' १३

* **प्राकारन्यायः** । हृदयात् पुरीततं गच्छतो (जीवस्य) नाडीनां मार्गत्वोपपादनाय हि 'हृदयात् पुरीततमभिप्रतिष्ठन्ते' इत्युक्तम्। अतः प्राकारन्यायोऽत्र न प्रवर्तते। नहि 'प्रासादान्निर्गत्य प्राकारे शेते नृपतिः' इति वाक्यं प्राकारवेष्टितप्रासादमध्यगतपर्यङ्कशयनेनोपपादयितुं शक्यम् (शङ्काग्रन्थः)। **परिमल**. ३।२।२।७ **भ्रसू**., * 'प्राकारे शेते, प्रासादे शेते, पर्यङ्के शेते' अत्र शयने अधिकरणत्वेन त्रयाणामपि समुच्चयः। नाडीनां पुरीतत्परिवेष्टितहृदयपुण्डरीकमध्यगतब्रह्मप्राप्तौ मार्गत्वेन समुच्चयो घटते। पुरीततोऽपि **प्राकारन्यायेन** स घटते (सिद्धान्ते)। ३।२।२।७.

* **प्राकाशौ** अध्वर्युभागस्यैव निवर्तकौ, न तु कृत्स्नस्य क्रतुदाक्षिण्यस्य अश्वमेधे (इति भाष्यम्। वस्तुतस्तु राजसूये दशपेये तैत्तिरीयके प्राकाशवाक्यम्)। **भा**. १०।३।१७।६३–६४.

प्राकाशौ तथेति चेत्। १०।३।१७।६३॥

राजसूये दशपेये 'प्राकाशावध्वर्यवे ददाति' इति श्रुतम्। इमौ प्राकाशौ तथा धेनुवत् (१०।३।१४।५७) कृत्स्नस्य क्रतुदाक्षिण्यस्य निवर्तकौ। इति चेत् पूर्वपक्षी ब्रूयात्। प्राकाशौ ददाति इत्यन्वयः। अध्वर्युशब्दस्तु अवयुत्यानुवादः।

अपित्ववयवार्थत्वाद् विभक्तप्रकृतित्वाद् गुणेदन्ताविकारः स्यात्। ६४॥

पूर्वपक्षं अपितु इति शब्दो व्यावर्तयति। प्राकाशौ न कृत्स्नक्रतुदाक्षिण्यनिवर्तकौ। अवयवार्थत्वात् सर्वेषामृत्विजां समुदायरूपाया दक्षिणायाः अध्वर्युभागः अवयवो भवति। सोऽवयवः अर्थः प्रयोजनं ययोः तौ प्राकाशौ अवयवार्थौ। तयोर्भावः अवयवार्थत्वम्। विभक्तप्रकृतित्वात् विभक्ता 'इदमध्वर्योः' इति विभागयुक्ता प्रकृतिः ज्योतिष्टोमरूपा ययोः तौ प्राकाशौ विभक्तप्रकृती, तयोर्भावः विभक्तप्रकृतित्वं तस्मात्। यस्मात् प्रकृतौ अध्वर्युविभागः, तस्मात् विकृतावपि। प्राकाशयोः अवयवार्थत्वात् विभक्तप्रकृतित्वाच्च गुणेदन्ताविकारः स्यात् प्राकाशौ। किमिदं गुणेदन्ताविकार इति, गुणस्य अध्वर्युभागस्य इदन्ता इयत्ता परिमाणं गुणेदन्ता। इदमः भावः इदन्ता। गुणेदन्तायाः विकारः गुणेदन्ताविकारः। अध्वर्युभागस्य सर्वस्य विकारः प्राकाशौ इत्यर्थः। प्राकाशौ एव अध्वर्यवे ददाति नान्यत् इति श्रुतिवाक्यार्थः। तस्मात् प्राकाशौ अध्वर्युभागमात्रस्य निवर्तकौ न सर्वस्याः क्रतुदक्षिणायाः इति सिद्धान्तः। **के**.

* प्राकाशौ दीपस्तम्भौ इति केचित्। दर्पणौ इत्यपरे। अश्वमेधे (? राजसूये दशपेये) 'प्राकाशावध्वर्यवे ददाति'। **वि**. १०।३।१७. * प्राकाशौ सौवर्णदर्पणौ इति भट्टभास्करः। **सोम**. १०।३।१७. * **प्राकाशाभ्यां** अश्वमेधे विहिताभ्यां प्राकृताध्वर्युभागमात्रस्य बाधः। १०।३।१७।६३–६४.

* **प्राकाशाधिकरणे** अभ्युदितेष्टेः दर्शयागाभेदेऽपि तदवच्छिन्नभावनाऽन्तराभ्युपगमेन वाक्यभेदः परिहरिष्यते। **सु**. पृ. ७७३, * समस्तायाः ज्यौतिष्टोमिक्या दक्षिणायाः अश्वमेधे अतिदेशप्राप्तायाः **प्राकाशाधिकरणे** अध्वर्युभागमात्रविकारत्वमभिहितम्। पृ. ७६९.

प्राकाशन्यायः । राजसूयगते दशपेये दक्षिणारूपाभ्यां प्राकाशाभ्यां अध्वर्युभागस्यैव प्राकृतस्य बाधः॥

प्राकाशौ तथेति चेत्। १०।३।१७।६३॥

भाष्यम्—अश्वमेधे (? राजसूये) श्रूयते, 'हिरण्मयौ प्राकाशावध्वर्यवे ददाति' इति। तत्रैषोऽर्थः सांशयिकः, किं प्राकाशौ कृत्स्नस्य क्रतुदाक्षिण्यस्य निवर्तकौ, उताध्वर्युभागस्य निवर्तकाविति। कुतः संशयः? इह प्राकाशावित्येष यदि ददातिना संबध्यते, ततः कृत्स्नस्य क्रतुदाक्षिण्यस्य निवर्तकः। अथाध्वर्युणा, तदा अध्वर्युभागस्य। किं प्राप्तम्? कृत्स्नस्येति। तत्रैतद्वर्ण्यते, प्राकाशाविति शब्दो ददातिना संबध्यते इति। कुतः? एवं ददातिसंबन्धविधाने श्रुतिरनुगृहीता। अध्वर्युणा संबन्धे वाक्यम्। अपि च प्राकाशाविति द्वितीया कारकविभक्तिः सामर्थ्यादेव आख्यातेन संबध्यते, न नाम्ना। तस्मात् ददातिना संबन्धः। अध्वर्युसंबन्धे चाध्वर्युशब्दात् षष्ठी अभविष्यत्। तस्मादपि ददातिना संबन्धः। ददातिं लक्षयित्वा प्राकाशौ विधीयेते। तत्र न शक्यो ददातिरध्वर्युणा विशेष्टुम्। वाक्यं हि तदा भिद्येत। अपि च विशेषणे सत्यपि यदि ददातिरविशिष्टः पदान्तरेण संबध्यते, अविशिष्ट एव कार्ये प्राप्नोति। प्रयुज्यमानमपि हि विशेषणमशक्तं न विशेष्यं विशिनष्टि। तस्मात् योऽध्वरं युनक्ति सोऽध्वर्युरिहाभिप्रेतः। अतः कृत्स्नस्य क्रतुदाक्षिण्यस्य निवर्तकौ प्राकाशाविति।

टुप्— ददातिं (प्रकृतितः प्राप्तं) अनूद्य प्राकाशौ विधीयेते, हिरण्मयौ इति न विधीयते। कुतः? प्राकाशौ इति हिरण्मयावेव उच्येते, नान्यद्रव्यमयौ धेनुशब्दवत्। यदि प्राकाशाध्वर्युसंबन्धो भवेत् तथा सति अत्यन्तं वाक्यं स्यात्। न धात्वर्थो विधीयते, न धात्वर्थोऽन्यत्र, न धात्वर्थे किञ्चित्। कारकविभक्तिश्च श्रुत्यैव प्राकाशयोर्ददातिना संबन्धं ब्रवीति। अध्वर्युसंबन्धे (अध्वर्युशब्दात्) षष्ठी अभविष्यत्। अत्र (भाष्य–) ग्रन्थः 'अपि च विशेषणे सत्यपि यदि ददातिः अविशिष्टः पदान्तरेण संबध्यते, अविशिष्ट एव कार्ये प्राप्नोति' इति। (तस्य) कोऽभिप्रायः? (उत्तरं–) अस्मिन् वाक्ये ददातिमनूद्य प्राकाशौ विधीयेते। एतस्यां च अवस्थायां (अनुवादावस्थायां) ददातेर्विशेषणं (श्रूयमाणमपि) अविवक्षितम्, वाक्यभेदप्रसङ्गात्। प्रयुज्यमानमपि विशेषणमशक्तं विशेष्टुम्, न विशिनष्टि। कथं (अशक्तम्?) प्रधानभूतोऽत्र ददातिः। प्रधानभूतस्य च लिङ्गसंख्यमविवक्षितम्। (कथम्?) प्रत्ययः (तावत् साक्षात्) क्रियां विधत्ते, क्रिया (च) विधीयमाना कारकैर्विना न भवति, कारकाणि (च) स्वविशेषणैर्विना न भवन्ति। तस्मात् क्रिया (च) कारकाणि (च) कारकविशेषणानि च प्रत्ययेन परामृश्यन्ते, न (तु) यः क्रियां प्रति उद्दिश्यते। स प्रधानभूतः क्रियां प्रति, न तु स क्रियाङ्गम्। क्रिया (एव तु) तदर्था। तस्य (प्रधानभूतस्य) यत् लिङ्गसंख्यं तदनङ्गत्वात् क्रियायाः प्रत्ययेन न परामृश्यते। तस्मात् यत् क्रियार्थं प्रातिपदिकं उपादीयते तस्य यत् लिङ्गसंख्यं तदेव विवक्षितम्, क्रियाङ्गत्वात्। (प्रधानस्य तु ददातेः विशेषणं अध्वर्युः न विवक्षितम्। इत्ययं भाष्यार्थः। तस्मात् कृत्स्नविकारौ प्राकाशौ अध्वर्युशब्दस्तु अवयुत्यानुवाद इति)।

अपित्ववयवार्थत्वाद् विभक्तप्रकृतित्वाद् गुणेदन्ताविकारः स्यात्। ६४॥

भाष्यम्–– अपित्विति पक्षव्यावृत्तिः। दक्षिणावयवकार्यार्थौ प्राकाशौ, न कृत्स्नदक्षिणाकार्यार्थौ। विभक्ता हि तेषां भागा अध्वर्य्वादीनाम्। अयमध्वर्योर्भागः, इमेऽन्येषामिति। तस्मात्, गुणेदन्ताविकारः स्यात्। किमिदं गुणेदन्ताविकार इति? गुणस्येदन्ता गुणेदन्ता। इदम्भाव इदन्ता। गुणेदन्ताया विकारो गुणेदन्ताविकारः। अध्वर्योर्भागस्य निवर्तकौ प्राकाशौ। कथमिव? एकमिदं हि वाक्यं 'हिरण्मयौ प्राकाशौ' इति। नेयं प्रथमा, नापि दक्षिणाशब्देन संबन्धः, येन दक्षिणाकार्ये वर्तेयाताम्। का तर्ह्येषा? द्वितीया। ददातिनैव संबध्यते। तदेकं वाक्यं 'हिरण्मयौ प्राकाशावध्वर्यवे ददाति' इति। अध्वर्युसंप्रदानकेन ददातिना एतयोः संबन्धः। तस्मात्तत्राध्वर्युददातिभागं निवर्तयतः। यद्वा सर्वविशेषणविशिष्टो ददातिरपूर्वो विधीयते। दृष्टार्थत्वादध्वर्योः अन्यान् आनत्यर्थान् प्रत्याख्यास्यति। अथ यदुक्तं प्राकाशयोर्ददातिसंबन्धो विधीयते इति, तथाहि श्रुतिरनुगृहीता भविष्यतीति। नासौ वाक्यानपेक्षिणी श्रुतिः। असति ददातिना आनन्तर्ये नावकल्पते। यदप्युच्यते

कारकविभक्तिराख्यातेन संबन्धयोग्येति । योग्यत्वं दर्शनेन वाध्यते । दृश्यते त्वानन्तर्यं प्राकाशयोरध्वर्युशब्देन । यदप्युक्तं तत्संबन्धे षष्ठ्यभविष्यदिति । सत्यं प्राप्नोति षष्ठी, न तु तदभावे संबन्धो नास्त्यध्वर्युणा । गम्यते हि स वांक्येन । आह । चतुर्थीश्रुतिरत्र या, सा वाक्यमपबाधिष्यते इति । नाविधीयमाना बाधितुमुत्सहते । कथं तर्ह्यविधित्सिते संप्रदाने श्रूयते इति । सामर्थ्यप्राप्तस्यानुवादेनेति । तस्माददोषः । उक्तं वा सर्वविशेषणविशिष्टं दानं विधीयते इति । एवमन्येषामनिवृत्तौ यथाप्रकृतिभावे चोदकानुग्रहो भविष्यति । तस्मादध्वर्युभागस्य निवर्तकौ प्राकाशाविति ।

टुप्— न कृत्स्नस्य दाक्षिण्यस्य निवर्तकौ प्राकाशौ । कुतः ? यदि दक्षिणामनूद्य (प्राकाशौ प्रथमान्तौ) विधीयेयाताम्, ततः कृत्स्नाया दक्षिणाया निवर्तकौ स्यातां 'प्राकाशौ दक्षिणा (इति), तौ चाध्वर्यवे' (इति, पश्चात् वाक्यान्तरेण पुरुषापनयः स्यात्) यथा 'औदुम्बरः सोमचमसो दक्षिणा, स ब्रह्मणे देयः' इति (न तु एवमस्ति । कथम् ?) एकं चेदं वाक्यं प्राकाशौ (अध्वर्यवे ददाति) इति (चशब्दो हेतौ । प्राकाशौ इति–) न चेयं प्रथमा, यथा सोमचमसः इति । का तर्हि ? द्वितीया । सा (च) अध्वर्युददातिना संबध्यते (न ददातिमात्रेण), एकवाक्यत्वात् (अध्वर्युपदैकवाक्यत्वादित्यर्थः । तत्र च–) अध्वर्युप्राकाशयोर्ददातिना (ददातिपरेण विधिना) संबन्धो विधीयते । ('न ददातिमध्वर्युविशिष्टमुद्दिश्य । नापि ददातिमुद्दिश्य, अध्वर्युशब्दस्य अवयुत्यानुवाददोषात्, व्यवहितसंबन्धाच्च । किन्तु अध्वर्युमेवोद्दिश्य इति । तत्र चतुर्थ्यन्तोऽध्वर्युः संप्रदानभूतः । प्राकाशप्रातिपदिकं च द्वितीयान्तमध्वर्युं प्रति गुणभावेन, तयोः प्रातिपदिकयोः संबन्धात् चतुर्थी लभ्यते इति । ननु ददातिमनूद्य प्राकाशौ विधीयेते इत्युक्तम् । उच्यते । अध्वर्युपदसामर्थ्यात् तदानन्तर्येण योऽर्थः स ग्रहीतव्यः, न प्राकाशददात्योः संबन्धो ग्रहीतव्यः' इति आनन्दाश्रमीयपुस्तके अधिकम्, अस्मदीयलिखितपुस्तके तन्त्ररत्ने च अयं ग्रन्थो न उपलभ्यते) तत्र चतुर्थ्यन्ताध्वर्युसंबन्धो ग्रहीतव्यः (इयं पङ्क्तिः आनन्दाश्रमीये नास्ति) (नाध्वर्युः स्वरूपेण)। ननु श्रुत्यैव क्रियया कारकाणि संबध्यन्ते (तेन) ददातिप्राकाशयोः संबन्धो भविष्यति (न तु अध्वर्युप्राकाशयोः) । उच्यते । अविधीयमानत्वात् ददातेः वाक्यसंबन्ध एव बलवान् भवति । (एतदेव विवृणोति–) विधीयमानायां तु क्रियायां कारकाणि उद्भूतशक्तीनि भवन्ति । तानि च क्रियया संबध्यन्ते, कारकत्वात् । अविधीयमानायां तु (क्रियायां कारकाणि उद्भूतशक्तीनि) न भवन्ति । तत्र (अविवक्षिते श्रुत्यर्थे सति) आनन्तर्येण यः संबन्धो वाक्यलक्षणः (प्रतीयते) स एव ग्रहीतव्यः, न व्यवहितेन ददातिना, अध्वर्युपदेन व्यवधानात् प्राकाशयोः । 'नासौ वाक्यानपेक्षिणी श्रुतिः' इत्यादि (भाष्य–) ग्रन्थः अनेनैव (श्रुत्यर्थस्य अविधित्सितत्व-) न्यायेन नेयः । ('योग्यत्वं दर्शनेन बाध्यते' इति भाष्यं अर्थत उपादाय व्याचष्टे–) 'प्रसिद्धिः (कारकविभक्तिराख्यातसंबन्धिनी इति,) दर्शनेन बाध्यते' इत्ययमपि (ग्रन्थः) अविधीयमानत्वादेव नेयः (तस्मात् अध्वर्युणा संबन्धात् तद्भागस्यैव निवृत्तिः) ।

(उल्लङ्घितं 'एकां पञ्चेति' इत्यधिकरणं व्याचष्टे-) 'एकां गां' इत्येकशब्दस्य गोशब्देन संबन्धः, न ददातिना, अनूद्यमानत्वादेव क्रियायाः, इत्ययमेव न्यायः । (उपरितनमधिकरणत्रयमत्रैव स्थित्वा संक्षिप्य दर्शयति–) द्वितीयमधिकरणं (प्राकाशाधिकरणमपेक्ष्य द्वितीयम्) कृत्स्नस्य (दाक्षिण्यस्य निवर्तकोऽश्वः इति)। तृतीयमपि ('तथा च सोमचमसः' इति) कृत्स्नस्यैव (क्रतुदाक्षिण्यस्य निवर्तकम् । तत्र विशेषशङ्कामाह–) लिङ्गशङ्कानिवृत्त्यर्थं तु आरभ्यते । (यजुर्युक्ताधिकरणं तु–) न कृत्स्नविकारः, नेदन्ताविकारः (न भागविकारः), अध्वर्युभागनियमार्थं तु अन्त्यम् ।

शा— अश्वमेधे (वस्तुतस्तु राजसूये श्रूयते 'प्राकाशावध्वर्यवे ददाति' इति । तत्र संशयः, किं प्राकाशौ कृत्स्नस्य क्रतुदाक्षिण्यस्य निवर्तकौ, उत अध्वर्युभागस्य निवर्तकाविति । यदि 'प्राकाशौ ददाति' इति संबन्धः, ततः कृत्स्नस्य । अथ प्राकाशौ अध्वर्यवे इति, ततः

तद्भागस्यैव । तत्र '**तदानन्तर्यसंप्राप्तं बाधित्वाऽध्वर्युसंगमम् । द्वितीयाश्रुतिसामर्थ्याद्ददातीति क्रियान्वयः ॥**' दानं च चोदकप्राप्तमुद्दिश्यते । न चोद्देशमध्वर्युणा शक्यं विशेष्टुम् । तस्मात् 'अध्वरं युङ्क्ते' इत्येवमध्वर्युशब्दं कथञ्चित् ऋत्विङ्मात्रे व्याख्याय (अनुवादत्वात् कथञ्चित् व्याख्यानं न दोषः) दानमात्रे प्राकाशविधिः, इति कृत्स्ननिवृत्तिः । '**उच्यते, ऽध्वर्युसंबन्ध एव प्राकाशयोरिह । विधीयतेऽथवा पूर्वं दानं द्वाभ्यां विशेषितम् ॥**' अध्वर्युशब्दस्यानर्थक्यभयात् न दानमात्रे विधानम् । अतः क्रियान्वयनिमित्तो यः पश्चात्तनः संप्रदानस्याध्वर्योः संप्रदेयभूतयोश्च प्राकाशयोर्मिथः संबन्धः, स एव विधीयते । (चतुर्थीबलात् अध्वर्युविशिष्टं संप्रदानकारकमुद्दिश्य द्वितीयाबलात् प्राकाशविशिष्टं कर्मकारकं विधीयते । कारकस्य सापेक्षत्वात् उद्देश्यस्य अध्वर्युणा विशेषणेऽपि न वाक्यभेदः । प्रदेयसंप्रदानसंबन्धश्च दानक्रियाऽधीन इति ददात्यन्वितयोः पाष्ठिको यः संबन्धः, तत्र विधिपर्यवसानात्, तदुभयसंबन्धघटकत्वेन अपेक्षितदानक्रियोपस्थापकत्वात् ददातेर्नात्यन्तानर्थक्यम् । **केचित्तु** प्राकाशाध्वर्युशब्दार्थयोरेव स्वस्वामिभावसंबन्धो विधीयते । स च प्राकाशयोः अध्वर्यवे दानात् भवति, इत्यध्वर्युसंप्रदानत्वस्य प्राकाशकर्मत्वस्य दानत्वस्य च प्राप्तेः द्वितीयाचतुर्थीभ्यां सह ददातिरनुवादः इत्याहुः । तत्र क्रयादिसाधारणस्य स्वस्वामिभावसंबन्धस्य नियमेन दानाक्षेपकत्वासंभवात् तदपि विधेयं स्यात् इत्यपरितुष्यता ग्रन्थकारेण कारकसंबन्ध एवोपपादितः) । अथवा अध्वर्युशब्दस्य आनर्थक्यपरिजिहीर्षयैव दानान्तरमेवापूर्वं अध्वर्युप्राकाशविशिष्टं विधीयते । तेन च दृष्टार्थत्वात् अध्वर्य्वानतिसिद्धेः तद्भागः प्राकृतो निवर्तते इति न कृत्स्ननिवृत्तिः (अथवेतिपक्षः प्रौढवादः, विशिष्टविधेः केवलविध्यसंभवनिबन्धनत्वात्) ।

सोम— एकामित्यस्य ददात्यन्वयाभावात् कृत्स्नदाक्षिण्यानिवृत्तावपि इह तदन्वयसंभवात् कृत्स्ननिवृत्तिः इत्युत्थितेः **संगतिः** । प्राकाशौ इति, प्रकाशन्ते रूपाण्यत्र इत्यधिकरणे घञ् । 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' (पा० ६।३।१२२) इति उपसर्गस्य दीर्घः, छान्दसो वा । ततश्च सौवर्णदर्पणद्वयं प्राकाशौ इत्याह **भट्टभास्करः** । **सूत्रे** धेनुवत् सर्वनिवर्तकौ इति तथाशब्दार्थः ।

वि— 'किं प्राकाशौ बाधकौ स्तः कृत्स्नस्याध्वर्यवस्य वा ।, ददातियोगात् कृत्स्नस्य, न विशिष्टेन योगतः ॥' (विशिष्टेन संप्रदानविशिष्टदानक्रियया योगतः संबन्धात्) । प्राकाशौ दीपस्तम्भौ इत्येके । दर्पणावित्यपरे ।

भाट्ट— अश्वमेधे 'हिरण्मयौ प्राकाशावध्वर्यवे ददाति' इति श्रुतम् । तत्र तृतीयविधिप्रकारलिप्सया दानानुवादेनैव प्राकाशविधिः । न च हिरण्मयत्वस्यापि विधाने वाक्यभेदः, प्राकाशपदार्थस्यान्यद्रव्यकत्वाभावेन हिरण्मयत्वस्य नित्यप्राप्तत्वात् । उद्देश्यस्य च दानस्याध्वर्युणा विशेष्टुमशक्यत्वात्, 'अध्वरं युनक्ति' इति व्युत्पत्त्या अध्वर्युशब्दं ऋत्विङ्मात्रे कथञ्चिद्व्याख्याय प्राकृतदक्षिणामात्रस्य निवृत्तिः । **इति प्राप्ते**, अध्वर्युपदवैयर्थ्यापत्तिभिया तृतीयविधिप्रकारत्यागेनाध्वर्युसंप्रदानत्वमुद्दिश्य प्राकाशविधानम् । संप्रदानत्वं च न दानातिरिक्तक्रियायामिति योग्यतयैव दानस्याश्रयत्वसिद्धिः । यत्तु 'प्राकाशाध्वर्युसंबन्धो विधीयते' इति मूलम्, तस्याप्ययमेवार्थः, न तु अपदार्थस्याव्युत्पन्नस्य संबन्धस्य विधेयत्वमित्येवं यथाश्रुतः । अतश्च यथैव गोरुद्देशेनैकत्वविधिः, इन्द्रियोद्देशेन वा दधिविधिः, तथाऽत्रापि संप्रदानत्वमुद्दिश्य प्राकाशविधानेऽपि उद्देश्यविधेययोरुभयोर्भावनायामेवान्वयात् नाव्युत्पन्नान्वयः । यदि तु विभक्त्यर्थकर्मत्वद्वारैव सर्वत्र प्रातिपदिकार्थस्यैव गवादेर्भावनायामुद्देश्यत्वम्, न तु कर्मत्वसंसर्गेण विभक्त्यर्थसंप्रदानत्वस्येति विभाव्यते, अत एव न मैत्रावरुणादीनामपि संप्रदानत्वेनैवोद्देश्यत्वम्, अपि तु तत्त्वेन गुणत्वेऽपि पदान्तरकल्पनया तदवष्टम्भस्यैव तदित्युक्तम्, तदाऽस्तु अत्र चतुर्थविधिप्रकारस्यापि त्यागेन विशिष्टदानान्तरविधिरेव । **न च** तथापि चतुर्थ्या कर्मत्वलक्षणया अध्वर्योरेवोद्देश्यत्वेन प्राकाशभावनां प्रति अन्वयोपपत्तेर्न दानान्तरविधिकल्पना युक्ता इति **वाच्यम्**, तथात्वे दानस्यैव नित्यप्राप्त्य-

भावेनानुवादानुपपत्तेः । अतः षष्ठविधिप्रकाराङ्गीकारेणापि दानान्तरमेव संप्रदानप्राकाशोभयविशिष्टं पदान्तरकल्पनया विधेयसामर्थ्यानुरोधेन अध्वर्य्वानतिजनकत्वेन विधीयते, कार्यान्तरकल्पनायां प्रमाणाभावात् । अतश्च तज्जनकीभूतप्राकृतदानाभ्यासस्यैव निवृत्त्या तदीयभागस्यैव निवृत्तिः । वस्तुतस्तु लाघवादतिदेशप्रवृत्तेः पूर्वप्रवृत्त्यङ्गीकारेणोक्तदानाभ्यास एव उक्तविशेषणद्वयविशिष्टो विधीयते, पूर्ववदध्वर्य्वानतिसिद्ध्यर्थमिति प्राकृतदाननिवृत्त्यभावेऽपि प्राकृततद्भागनिवृत्तिः । सर्वथा न प्राकृतकृत्स्नदक्षिणानिवृत्तिरिति सिद्धम् ।

मण्डन-- ' प्राकाशबोधे न तु सर्वबाधः । '

शंकर— ' प्राकाशौ भागबाधकौ । '

* **प्राकाशन्यायेन** श्यामोऽश्वः ब्रह्मभागस्यैव बाधक इति पूर्वः पक्षः । वि. १०।३।१८.

* **प्राकाशशब्दवाच्यः** प्रदीपः । सु. पृ. ७६९.

' प्राकाश्यं स्वगुणोदयेन गुणिनो गच्छन्ति किं जन्मना ' इति न्यायः । यत्र निकृष्टजातिजोऽपि गुणी स्वगुणोदयेन ख्यातिं यायात् तत्रायं प्रचरतीति । **साहस्री.** ७९३.

* **प्राकृतमङ्गं** यत् विकृतौ श्रूयते, तदेव विकृतिः निराकाङ्क्षत्वात् स्वीकरोति । टुप्. १०।३।१।१. * प्राकृतं अर्थलोपेन बाध्यते, यथा कृष्णलचरौ अवघातः प्राकृतः चोदकप्राप्तः वैतुष्यरूपार्थलोपेन, यथा वा स्वयंदिते बर्हिषि लवनं प्राप्तिरूपार्थलोपेन । **बाल.** पृ. १३१, * प्राकृतं पर्युदासेन बाध्यते, यथा होतृवरणं प्राकृतं चोदकप्राप्तं पित्र्यायां ' न होतारं वृणीते ' इति पर्युदासेन । पृ. १३१. * प्राकृतं पूर्वं वैकृतमन्ते, यथा नक्षत्रेष्टिषु उपहोमेभ्यः प्राक् नारिष्ठहोमाः । ५।२।९।१७–२०. * प्राकृतं प्रत्याम्नानेन अनारभ्याधीतेन बाध्यते, यथा ' य इष्टया० ' इत्यनारभ्यविहितेन सद्यस्कालत्वेन विकृतिषु अतिदिष्टद्व्यहकालत्वम् । **बाल.** पृ. १३२, * प्राकृतं प्रत्याम्नानेन आरभ्याधीतेन बाध्यते, यथा कुशमयं बर्हिः प्राकृतं चोदकप्राप्तं श्येनादौ शरमयेन आरभ्याधीतेन । पृ. १३१. * प्राकृतं यत् वैकृतेन बाध्यते तत्रापि एतदेव कारणं ' न अबाधित्वा पूर्वविज्ञानं वैकृतं संभवति ' इति । प्राकृतं च पूर्वम् । यतो विकृतौ तदपेक्षा । **भा.** ६।५।१९।५४. * प्राकृतं वैकृतेन बाध्यते, प्राप्तबाधोऽत्र । **वा.** ३।३।७।१४ पृ. ८६०.

प्राकृताच्च पुरस्ताद्यत् । ५।२।११।२२ ॥

अग्निचयने ' सावित्राणि जुहोति ' इति सावित्रहोमा आम्नाताः । ततो महता प्रबन्धेन उखासंभरणादिकमाम्नातम् । पश्चात् ' आग्नावैष्णवमेकादशकपालं निर्वपेत् दीक्षिष्यमाणः ' इति दीक्षणीया आम्नाता । तत्र प्रकृतौ दीक्षणीया क्लृप्तोपकारत्वात् चयने शीघ्रं स्मर्यते, तस्मात् अग्निचयने दीक्षणीया प्राक् कर्तव्या, पश्चात् सावित्रहोमादयः इति पूर्वपक्षे उत्सूत्रे प्राप्ते सिद्धान्तमाह । चकारः ' स देशः स्यात् ' इति पूर्वसूत्रस्थस्यानुकर्षणार्थः । यत् सावित्रहोमादि प्राकृतात् दीक्षणीयाकर्मणः पुरस्तात् तस्य स एव दीक्षणीयायाः प्राचीन एव देशः स्यात्, न तु दीक्षणीयाया अन्ते । अग्निकाण्डे चोदकप्राप्तस्यापि दीक्षणीयादेः सावित्रादिभ्य ऊर्ध्वं पुनः पाठात् । तस्मात् सावित्रादयः पूर्वं पश्चाद्दीक्षणीया । **के.**

प्राकृतस्य गुणश्रुतौ सगुणेनाभिधानं स्यात् । १०।४।१४।२६॥

प्राकृतस्य प्रकृतिगतस्य देवताऽभिधानस्य विकृतौ गुणश्रुतौ गुणस्य श्रवणे सति सगुणेन देवताशब्देन आवाहनादिनिगदेषु अभिधानं स्यात् । तथा कर्तव्यम् । यथा पवमानहविःषु ' अग्निं पवमानमावह ', ' अग्निं पावकमावह ', ' अग्निं शुचिमावह ' इत्यादि वक्तव्यम् । न तु निर्गुणं केवलमग्निशब्दम् । इति सिद्धान्तः ।

अविकारो वाऽर्थशब्दानपायात् स्याद् द्रव्यवत् । २७ ॥

पवमानेष्टिषु ' अग्नये पवमानाय जुष्टं निर्वपामि, अग्नये पावकाय, अग्नये शुचये ' इतिरीत्या सर्वत्र प्राकृतस्य देवताभिधानस्य विकृतौ अविकारः स्यात् विकारो न स्यात् निर्गुणमभिधानं कर्तव्यम् । वाशब्दः इतरपक्षनिरासार्थः । अर्थशब्दानपायात् अर्थश्च शब्दश्च अर्थशब्दौ, तयोः अनपायात् अपायाभावात् । तत्र अर्थो देवता शब्दश्च अग्निशब्दः । अग्निशब्दस्तावत् उच्चारणीय एव । अथ पवमानादिगुणशब्दे सति असति वा सैव देवता

भवति, न तस्या अपायः । द्रव्यवत् यथा ' सा वा एषा सर्वदेवत्या यदजा वशा वायव्यामालभेत भूतिकामः ' इति अजावशाशब्देन चोदितेऽपि कर्मणि छागाशब्देन निगमा भवन्ति, न च तत्र अर्थश्च शब्दश्च अपेतो भवति तद्वत् । तस्मादविकारः स्यात् इति पूर्वः पक्षः ।

आरम्भासमवायाद्वा चोदितेनाभिधानं स्यादर्थस्य श्रुतिसमवायित्वादवचने च गुणशासनमनर्थकं स्यात् । २८ ॥

वाशब्दः पूर्वपक्षनिरासार्थः । आरम्भासमवायात् देवतायाः स्वेन रूपेण कर्मारम्भेण समवायस्य संबन्धस्य अभावात्, अर्थस्य देवतारूपस्य च श्रुतिसमवायित्वात् ' अग्नये पवमानायाष्टाकपालं निर्वपेत् ' इति श्रुत्या देवतारूपस्य अर्थस्य समवायित्वं साक्षात्संबन्धवत्त्वं अभिधीयते । तस्मात् चोदितेन विहितेन सगुणदेवतापदेन अर्थस्य देवतारूपस्य अभिधानं आवाहननिगदादिषु स्यात् । सगुणेन अवचने च पवमानादिगुणवाचकपदसहितेन अग्निपदेन अनभिधाने तु गुणशासनं विशेषणविधायकं पवमानादिपदं अनर्थकं स्यात् । तस्मात् सगुणेन अग्निपदेन निगदादिषु देवताया अभिधानं कर्तव्यम्, न निर्गुणेन इति सिद्धान्तः । **के.**

द्रव्येष्वारम्भगामित्वादर्थेऽविकारे सामर्थ्यात् । २९ ॥

पवमानेष्टिषु विशेषणपदरहितेन केवलेनाग्निपदेन आवाहनादिनिगदेषु देवताऽभिधानं कर्तव्यं इति पूर्वपक्षे ' द्रव्यवत् ' इति पदेन अजावशादृष्टान्त उक्तः (१०।४।१४।२७) तं वैषम्येण निरस्यति । ' सा वा एषा सर्वदेवत्या यदजा वशा, वायव्यामालभेत ' इति विहिते वशायागे अजाद्रव्यं स्वेन रूपेण समवायं गच्छति । तदेतदाह द्रव्येषु आरम्भगामित्वात् इति । अर्थे अविकारेऽपि छागारूपे द्रव्ये विकाररहितेऽपि अजावशारूपविशेषणरहिते केवले छागाशब्दे उच्चारितेऽपि इत्यर्थः । सामर्थ्यात् अभिधानसामर्थ्योपपत्तेस्तत्राविकारो युक्तः । प्रकृतपवमानेष्ट्यादौ तु देवतायाः स्वरूपेण कर्मसंबन्धाभावात् चोदनानुसारेण सगुणेनैवाभिधानं कर्तव्यं इति युक्तः सिद्धान्तः ।

कुतूहले तु द्रव्येषु द्रव्यनिर्देशात्मके अर्थे कार्ये कर्तव्ये अविकारः प्रकृतितः अवैषम्यं आश्रयणीयं छागाशब्देनैव द्रव्यं निर्देष्टव्यम् । न तु वशाशब्देन । सामर्थ्यात् चोदकस्य संगतार्थकत्वात् । वशाशब्देन द्रव्यनिर्देशाभावेऽपि विधौ वशाशब्दस्य संगतार्थकत्वात् इत्यप्यर्थः । कुतः ? आरम्भगामित्वात्, आरम्भः उपाकरणेन अजादिद्रव्यपरिग्रहः, तद्गामित्वात् । विधौ वशाशब्दाभावे हि अवशाऽपि परिगृह्येत, तद्व्यावृत्तये वशाग्रहणमावश्यकम् ! इति व्याख्यातम् । **के.**

* ' अग्नये पवमानायाष्टाकपालं निर्वपेत् ' इति विहिते किमग्निः पवमानादिगुणशब्दसहितेन अग्निशब्देनाभिधेयः केवलेन वेति संदिह्य **' प्राकृतस्य गुणश्रुतौ सगुणेनाभिधानं स्यात् '** इति सिद्धान्तेनोपक्रम्य, ' अविकारोवाऽर्थशब्दानपायात् स्याद् द्रव्यवत् ' (२७) इत्यनेनार्थस्याग्नेः चोदकप्राप्तस्य चाग्निशब्दस्य केवलाभिधानेऽपि अनपायात् यथा ' सा वा एषा सर्वदेवत्या यदजा वशा, वायव्यामालभेत भूतिकामः' इत्यजाशब्देनापि विहिते द्रव्ये वशाशब्दवाच्यवन्ध्यात्वगुणयुक्ते च अतिदेशप्राप्तौ न छागशब्देन निर्गुणेनाभिधानं तथेहापि अविकारः स्यात् इति पूर्वपक्षमुपन्यस्य ' आरम्भासमवायाद्वा चोदितेनाभिधानं स्यादर्थस्य श्रुतिसमवायित्वादवचने च गुणशास्त्रमनर्थकं स्यात् ' (२८) इत्यनेन अर्थस्य देवतायाः श्रुतिसमवायित्वात् आरम्भेण स्वरूपेण कर्मणि असमवायात् गुणानभिधाने च गुणशास्त्रस्य आनर्थक्यापत्तेः चोदितेन सगुणेन अभिधानं स्यात् इत्येवं निरस्य ' द्रव्येष्वेवारम्भगामित्वादर्थे विकारसामर्थ्यम् ' (२९) इत्यनेन आरम्भेण स्वरूपेण द्रव्येषु क्रियागामित्वात् विकारसहितस्यापि शब्दस्य द्रव्यरूपेऽर्थे सामर्थ्यमस्ति इति वैषम्यं वदता द्रव्येषु अर्थरूपेण कर्मणि समवायः अभ्युपगतः । सु. पृ. ४६८–४६९. * **प्राकृतानामङ्गानां** विकृतौ लुप्तार्थकानां बाधः । १०।१।१।१–३ वर्णकं १. * प्राकृतानामङ्गानां वैकृतेभ्यः प्राक् प्राप्तिः ' निर्देशात्तु विकृतावपूर्वस्यानधिकारः ' (३।८।१६।३२) इत्यत्र सिद्धा । सु. पृ. ६३४. **प्राकृते** यागे यागगतो व्यापारः

प्रयोगवचनेन कल्पितः संगृहीतश्च विद्यते । भा.१०।१। १।२.

* **प्राकृतधर्माः** विकृत्यपूर्वपदार्थानां नाङ्गम् । यूपावटस्तरणबर्हिर्न्यायः । बर्हिर्न्यायः । ३।८।१६।३२. ● **प्राकृतधर्माणां** विकृतावतिदेशो कार्ये नियामकम् । वि. ३।८।१७.

* **प्राकृतबर्हिःस्तरणमन्त्रे** हरितपदस्थाने रक्तपदस्योहो मौद्गे चरौ । ९।३।२।३.

* **प्राकृतवैकृतयोः** पौर्वापर्यनैमित्तिकन्यायेन पूर्वबाधः । टुप्. ६।५।१९।५४. * प्राकृतवैकृतयोर्यत्र युगपन्न संभवः, तत्र वैकृतेन प्राकृतं बाध्यते । भा. १०।३।४।२४.

* **प्राकृतव्रीह्यादिस्थानापन्नेषु** नीवारादिषु व्रीह्यादिधर्माणामूहेनानुष्ठानम् । ९।२।१२।३९.

* **प्रागभावः** । ' क्षीरे दध्यादि यन्नास्ति प्रागभावः स उच्यते । ' श्लोवा. अभावप्रामाण्यवादे २. * **प्रागभावे** प्रमाणाभावः । न च प्रागभावानङ्गीकारे उत्पन्नस्य पुनरुत्पत्तिप्रसङ्गः, शततन्तुकपटे द्वितन्तुकपटोत्पत्तिप्रसङ्गश्च इति वाच्यम् । तद्व्यक्तेरेव प्रतिबन्धकत्वाङ्गीकारात् । अक्लृप्तप्रागभावतद्धेतुत्वकल्पने गौरवात् ।

के चित्तु प्रागभावो नामावरूपः । किन्तु आद्यक्षणसंबन्धरूपोत्पत्तिपूर्वकालरूप एव प्रागभावः । तस्य उत्तरकालमेव नाशात् अनित्यत्वम् । अत एव घटो भविष्यति इति प्रतीतिः । नहि ' प्रागभावोऽस्ति ' इति कश्चित् प्रत्येति । अतः प्रागभावो नास्ति इति वदन्ति । मणि. पृ. २९.

प्रागाथिकं तु । ९।२।६।२५ ॥

अग्निष्टोमे ' बृहत् पृष्ठं भवति, रथंतरं पृष्ठं भवति ' इति श्रूयते । तत्र रथंतरस्य ' अभि त्वा शूर नोनुमः ' इति बृहती योनिः, 'न त्वावाँ अन्यः ' इति च पङ्क्तिः उत्तरा । ते एते द्वे ऋचौ मिलित्वा प्रगाथो भवति । एवं बृहतो योनिः ' त्वामिद्धि हवामहे ' इति बृहती, ' स त्वं नश्चित्र वज्रहस्त ' इति पङ्क्तिः उत्तरा, ते द्वे मिलित्वा प्रगाथो भवति । अनयोः बृहद्रथंतरयोः गानं भिन्नच्छन्दस्कयोः द्वयोरेव ऋचोः स्थाने भवति । तदुक्तं ' न वै बृहद्रथंतरमेकच्छन्दो यत्तयोः पूर्वा बृहती ककुभावुत्तरे ' इति । उत्तरे द्वे ऋचौ अक्षरतः ककुभौ भवतः इति । अत्र एवं विचार्यते यत् उत्तराग्रन्थे बृहद्रथंतरयोः येयं उत्तरा ऋक् पठिता तामपनीय तस्याः स्थाने द्वे वास्तविक्यौ ककुभौ आगमयितव्ये न वेति । आगमने तु ' ककुभावुत्तरे ' इति यदुक्तं तत् सार्थकं स्यात् नान्यथा । अत्र सिद्धान्तमाह । प्रागाथिकं गानं बृहद्रथंतरयोः कर्तव्यमिति । बृहतीपङ्क्त्योरेव प्रग्रथनेन तिस्रः ऋचः संपादनीयाः । संपादिते च उत्तरे द्वे ककुभौ भवतः तथा सति ' ककुभावुत्तरे ' इत्यपि उपपन्नम् । तुशब्दः पूर्वपक्षव्यावृत्यर्थः ।

अथ द्वितीयं वर्णकम् । अग्निष्टोमे 'त्रिच्छन्दा माध्यंदिनः पवमानः पञ्चसामा ' इत्युक्तम् । माध्यंदिने पवमानस्तोत्रे गायत्री बृहती त्रिष्टुप् इति त्रीणि छन्दांसि भवन्ति । गायत्रम्, आमहीयवम्, रौरवम्, यौधाजयम्, औशनं चेति पञ्च सामानि भवन्ति । तत्र रौरवयौधाजययोर्विचारः । तयोः ' पुनानः सोम धारयापो ' इति प्रथमा बृहती, ' दुहान ऊधर्दिव्यं मधु ' इति उत्तरा विष्टारपङ्क्तिः । किमेतां विष्टारपङ्क्तिं परित्यज्य तत्स्थाने अन्यतः उत्पत्तितो बृहत्यौ आगमय्य समासु गानं कर्तव्यं उत बृहतीविष्टारपङ्क्त्योरेव प्रग्रथनेन तिस्रो बृहतीः कृत्वा तासु गानं कर्तव्यं इति विचारे सिद्धान्तमाह । प्रागाथिकं गानं कर्तव्यमिति । नोत्पत्तितो बृहत्यौ आगमयितव्ये इति ।

अथ तृतीयं वर्णकम् । अग्निष्टोमे 'पञ्चच्छन्दा आर्भवः पवमानः सप्तसामा ' इति श्रुतम् । तृतीयसवनगते आर्भवे नाम पवमानस्तोत्रे गायत्री, अनुष्टुप्, उष्णिक्, ककुप्, जगती इति पञ्च छन्दांसि भवन्ति । गायत्रम्, संहितम्, श्यावाश्वम्, आन्धीगवम्, सफम्, पौष्कलम्, काव इति सप्त सामानि च भवन्ति । अत्र श्यावाश्वान्धीगवयोः साम्नोः ' पुरोजिती वो अन्धसः ' इति प्रथमा अनुष्टुप्, ' यो धारया पावकया ' इति द्वितीया गायत्री, ' तं दुरोषमभी नरः ' इति तृतीया गायत्री । एवमयं आनुष्टुभः प्रगाथः । अत्र गायत्रीद्वयं परित्यज्य अन्यत एव द्वे उत्पत्तितः अनुष्टुभौ आगमय्य समासु

गानं कर्तव्यं उत पठितगायत्र्योरेव अनुष्टुप्प्रकारं प्रग्रथनेन तृचं संपाद्य गानं कर्तव्यं इति विचारे सिद्धान्तमाह । प्रागाथिकमेव गानं कर्तव्यमिति ।

अथ चतुर्थं वर्णकम् । गवामयने अभीवर्तं ब्रह्मसाम । तच्च प्रगाथात्मकयोः द्वयोर्द्वयोर्ऋचोः पादप्रग्रथनेन जायमाने तृचे एव गातव्यम्, न तु प्रथमे प्रगाथे द्वितीयप्रगाथस्य प्रथमां ऋचमुपादाय, एवमुत्तरत्रापि कृत्वा जायमानेषु तृचेषु गानम् ।

स्वे च । २६ ॥

सिद्धान्ते हेत्वन्तरं आह । एवं सति स्वे छन्दसि गानं कृतं भवति । उत्तरापाठेन हि पङ्क्तिरेवोपदर्शिता तस्मात् ऋग्द्वयात्मके प्रगाथे एव गानम् ।

अथ द्वितीयं वर्णकम् । अग्निष्टोमे माध्यंदिने पवमानस्तोत्रे रौरवयौधाजययोः साम्नोर्गानं स्वे स्वीये बृहतीविष्टारपङ्क्त्यात्मके प्रगाथे एव कर्तव्यम् ।

अथ तृतीयं वर्णकम् । श्यावाश्वान्धीगवयोः स्वीये प्रगाथे एव गानं कर्तव्यम् ।

अथ चतुर्थं वर्णकम् । गवामयने अभीवर्तं ब्रह्मसाम । तच्च स्वे प्रगाथे एव पादप्रग्रथनेन संपादिते तृचे गेयम् ।

प्रगाथे च । २७ ॥

हेत्वन्तरमाह । एवं सति प्रगाथे गानं भविष्यति । प्रगाथशब्द उपपन्नो भविष्यति । प्रग्रथने कृते सति प्रगाथः संपद्यते नान्यथा ।

अथ द्वितीयं वर्णकम् । अग्निष्टोमे माध्यंदिने पवमाने रौरवयौधाजययोः साम्नोर्गानं बृहतीविष्टारपङ्क्त्यात्मके प्रगाथे एव कर्तव्यं न तु उत्पत्तिबृहत्यौ आगमयितव्ये ।

अथ तृतीयं वर्णकम् । अग्निष्टोमे आर्भवे पवमाने श्यावाश्वान्धीगवयोः साम्नोः आनुष्टुभे प्रगाथे एव गानं कर्तव्यम् । न तु उत्पत्तितः अनुष्टुभौ अन्यत आनेतव्ये ।

अथ चतुर्थं वर्णकम् । गवामयने अभीवर्तं ब्रह्मसाम । तच्च प्रगाथात्मके स्वीये पादप्रग्रथनेन संपादिते तृचे एव गेयम् ।

लिङ्गदर्शनाच्चाव्यतिरेकात् । २८ ॥

अग्निष्टोमे बृहद्रथंतरे सामनी प्रथमा बृहती द्वितीया पङ्क्तिः इति उत्तराग्रन्थपठितयोः द्वयोरेव ऋचोः गातव्ये । प्रग्रथनेन च ऋक्त्रयं संपद्यते । इति सिद्धान्त उक्तः । तत्र हेत्वन्तरमाह । ' एषा वै प्रतिष्ठिता बृहती या पुनःपदा, तद्यत् पादं पुनरारभते तस्मात् वत्सो मातरमभि हिंकरोति ' इति अर्थवादे पुनःपादारम्भलिङ्गदर्शनस्य अव्यतिरेकात् गत्यन्तराभावात् । किंवा व्यतिरेकः असंसर्गः अव्यतिरेकः संबन्धः प्रग्रथनेन स्वीयाभ्यां ऋग्भ्यामेव संबन्धः । लिङ्गदर्शनेन स्वीयाभ्यामेव ऋग्भ्यां संबन्धस्य ज्ञानात् नान्ये उत्पत्तिककुभौ आगमयितव्ये किन्तु प्रगाथे एव प्रग्रथनेन संपादिते तृचे बृहद्रथंतरे गातव्ये इति सिद्धान्तः । प्रग्रथनं तु ' अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः । ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥ ' इति यथाश्रुतबृहत्यां रथंतरं गेयम् । 'ईशानमिन्द्र तस्थुषो न त्वावां अन्यो न पार्थिवः । न जातो न जनिष्यते ॥ ' इति द्वितीयायां प्रग्रथनेन संपादितायां ककुभि रथंतरं गेयम् । ' न जातो न जनिष्यते अश्वायन्तो मघवन्निन्द्र वाजिनः । गव्यन्तस्त्वा हवामहे ॥ ' इति प्रग्रथनेन संपादितायां द्वितीयायां ककुभि आदितः तृतीयायां रथंतरं गेयम् । इति ।

बृहत्साम्नोऽपि इत्थमेव प्रग्रथनरीतिर्ज्ञेया ।

अथ द्वितीयं वर्णकम् । अग्निष्टोमे माध्यंदिने पवमाने रौरवयौधाजययोः साम्नोः गानं बृहतीविष्टारपङ्क्त्योः प्रगाथे प्रग्रथनेन बृहतीतृचात्मके संपादिते कर्तव्यं इत्यत्र अव्यतिरेकेण लिङ्गं दर्शयति ' षष्टिस्त्रिष्टुभो माध्यंदिनं सवनम्' इति । यदि प्रग्रथनेन बृहतीकारं गानं क्रियते ततः सर्वस्मिन् सवने या ऋचः समाम्नाताः ताः षष्टिर्भवन्ति । उत्पत्तिबृहत्योः आनीयमानयोस्तु अभ्यधिका भवेयुः । तस्मात् अन्यतो नानेतव्ये । प्रग्रथनमित्थम्– ' पुनानः सोम धारयापो वसानो अर्षसि । आ रत्नधा योनिमृतस्य सीदस्युत्सो देव हिरण्ययः ॥ ' इति बृहती पठितैव गातव्या । ' उत्सो देव हिरण्यय उत्सो देव हिरण्ययः । दुहान ऊधर्दिव्यं मधु प्रियं प्रत्नं सधस्थमासदत् ॥ ' इति संपादिता बृहती गातव्या । ' प्रत्नं सधस्थमासदत्प्रत्नं

सधस्थमासदत् । आपृच्छयं धरुणं वाज्यर्षति नृभिर्धृतो विचक्षणः ॥ ' इति संपादिता तृतीया बृहती गातव्या इति ।

अथ तृतीयं वर्णकम् । अग्निष्टोमे आर्भवे पवमाने श्यावाश्वान्धीगवयोः आनुष्टुभे एव प्रगाथे गानं कर्तव्यं इत्यत्र अन्यतिरेकेण लिङ्गं भवति ' चतुर्विंशतिर्जगत्यः तृतीयसवनं एका ककुप् ' इति । उत्पत्त्यनुष्टुभोरानयने तु एतल्लिङ्गं उपपद्यते । प्रग्रथनं तु ' पुरोजिती वो अन्धसः ' इत्यनुष्टुप् यथापाठं गातव्या । तस्या एव चतुर्थं पादं पुनरुपादाय ' यो धारया पावकया ' इत्यनया गायत्र्या संयोज्य गेयम् । पुनस्तस्याः चतुर्थं पादं पुनरादाय ' तं दुरोषं ' इत्यनया संयोज्य गेयम् । इति ।

अथ चतुर्थं वर्णकम् । गवामयने अभीवर्तं ब्रह्मसाम । तच्च द्वयोर्द्वयोः प्रगाथात्मकयोर्ऋचोः पादप्रग्रथनेन संपादिते तृचे गेयम् । न तु प्रथमस्य प्रगाथस्य ऋग्द्वयं द्वितीयस्य च प्रगाथस्य प्रथमां ऋचं गृहीत्वा जायमाने तृचे गेयम् । लिङ्गदर्शनाव्यतिरेकात् ' अन्या अन्या ऋचो भवन्ति ' इति ऋगन्यत्वविध्यात्मकलिङ्गदर्शनस्य अन्यतिरेकात् अविरोधात् । के.

* **प्राग्वंशः** ज्योतिष्टोमे पत्नीशाला । सु. पृ. ६४. * **प्राग्वंशे** आतिथ्या क्रियते । (प्राचीनवंशा चतुर्दिक्ष्वतीकाशा दक्षिणतो वर्षीयसी चतुर्दिक्षु अरत्निमात्रमध्यद्वारवती षोडशप्रक्रमन्यासा द्वादशप्रक्रमविस्तीर्णा दीर्घचतुरस्रा । तस्याः शालायाः दक्षिणतो व्रतश्रयणागारं भवति । पश्चात् पत्नीशाला । इयं शाला प्राग्वंशः इत्युच्यते) । वि. १२।१।२०.

* **प्राग्वंशदेशः** आतिथ्यायां स्तरणेन संस्कृतः, नोत्तरवेदिदेशः । भा. १२।१।२०।४४.

* **प्राची** दिक् इति न प्रत्यक्षेण प्रतीयते, नानुमानेन । शब्दादेव प्रतीयते । टुप्. १०।४।१२।२३ । ननु प्रत्यक्षैव दिक् । सत्यम्, परमतेन एतदुपन्यस्तं इत्यदोषः । रत्न. * ' **प्राचीमाहरति** ' इति शाखावादो न दिग्वादः । ४।२।२. ' शाखावादः ' इत्यत्र द्रष्टव्यम् । * ' प्राचीमाहरति ' वृक्षस्य प्राचीनां शाखामित्यर्थः । न तु प्राचीदिशं प्रति इति । याज्ञिकास्तु दिग्वादमाहुः । भाट्ट. ४।२।२.

* ' **प्राचीं देवा अभजन्त** ' इति ज्योतिष्टोमे दिग्विभागवाक्ये विधिरर्थवादो वा इति संशयः । अर्थवादः इति सिद्धान्तः । भा. ३।४।२।१०. * **प्राच्यां** दिशि ऐन्द्रीत्वव्यपदेशः, इन्द्रस्य पुराणेतिहासेषु प्राचीदिक्पालत्वस्मरणात् । सु. पृ. १०८८.

* **प्राक्त्व–ऋजुत्व–संततत्वानामाघारे** समुच्चयः, भिन्नकार्यत्वात् । भा. १२।३।३।९.

* ' **प्राङ्मुखोऽन्नानि** भुञ्जीत ' । अयं नियमविधिः पुरुषार्थः । बाल. पृ. २४.

* ' **प्राचीनप्रवणे** वैश्वदेवेन यजेत ' इति देशस्य नियमविधिः, नानुवादः । भा. ४।२।९।२३–२४.

* **प्राचीनवंशः** नाम मण्डपो दार्शिकीं वेदिमन्तर्भाव्य अवतिष्ठते ज्योतिष्टोमे । वि. ३।७।३, * प्राचीनवंशः । यस्य मण्डपविशेषस्य उपरिवंशाः प्रागग्रा भवन्ति सः । ३।४।६, * **प्राचीनवंशे** पश्चिमवह्नेः पूर्वप्रसिद्धमुख्यगार्हपत्यस्य प्राजहित इति पूर्वाचार्यसंज्ञा । १२।१।६, * प्राचीनवंशे पूर्वमवस्थापितः सोमो वैसर्जनहोमादूर्ध्वं हविर्धाने प्राणीयते । ५।१।१४, * प्राचीनवंशे समानयन्ति क्रीतं सोमम्, शकटे अवस्थाप्य । ४।२।१३.

* **प्राचीनवंशगतो** वह्निः वैसर्जनहोमादूर्ध्वं आग्नीध्रीये प्रणीयते । वि. ५।१।१४.

* **प्राचीनवंशशालायां** पूर्वभागे वर्तमानः आहवनीयः शालामुखीयो नाम । वि. १२।१।५.

* **प्राचीनावीतं** दक्षिणोत्तरवासोविन्यासलक्षणम् । सु. पृ. १३५३. * ' प्राचीनावीतं पितृणाम् ' इति दर्शपूर्णमासप्रकरणस्थवाक्ये प्राचीनावीतं वासोविषयम्, न तु त्रिवृत्सूत्रविषयम् । वि. ३।४।१, * प्राचीनावीतं पैतृके कर्मणि । ३।४।१.

* **प्राच्याः** अन्यदेशे निर्गतास्तत्रावस्थिताः होलाकादीन् कुर्वन्त्येव । भा. १।३।७।१९. * **प्राच्यैरेव** होलाकादयः कर्तव्या इति न नियमः, किन्तु सर्वधर्मः सः । १।३।७।१५–२३. * प्राच्यैः होलाकादयः क्रियन्ते । होलाका नाम वसन्तोत्सवः । वि. १।३।८.

* **प्राजहितः** प्राचीनवंशस्थः पश्चिमवह्निरूपः मुख्यगार्हपत्य एव । इयं च पूर्वाचार्यसंज्ञा । वि. १२।१।६. * **प्राजहितेऽग्नौ** मासाग्निहोत्रश्रपणम्, न शालामुखीये कौण्डपायिनामयने । १२।१।६।१३. * प्राजहिते एव अग्निहोत्रपाकः पशोः द्व्यहकालत्वे । संकर्ष. ३।२।२५. मीको. पृ. ९५ ' अग्निहोत्रपाकः पशोः ० ' इत्यत्र द्रष्टव्यम् ।

* **प्राजहितवादः** ' स वैव स्यात् ' इति ज्योतिष्टोमे । संकर्ष. ३।२।२१. मीको. पृ. १८३० ' ज्योतिष्टोमे स वैव स्यात् ' इत्यत्र द्रष्टव्यम् ।

* **प्राजापत्यं** अग्नीषोमीयं वैष्णवं वेति दर्शपूर्णमासयोरुपांशुयाजाज्यम् । भा. ५।४।६।२१, * प्राजापत्यं वैष्णवं वा उपांशुयाजाज्यं ब्राह्मणेन सोमात् प्राक् कर्तव्यम् । अग्नीषोमीयं तु उपांशुयाजाज्यं सोमात् प्राक् न कर्तव्यं इति उपांशुयाजस्य न उत्कर्षः । ५।४।६।१९–२१. * **प्राजापत्याः** सप्तदश पशवो यद्यपि क्रतुपशुभिः सहोपक्रान्ताः तथापि पर्यग्निकरणोत्तरं चिरं विलम्ब्य ब्रह्मसामकाले आलभ्यन्ते, क्रतुपशवस्तु प्रातरालभ्यन्ते । तत्र ' दैव्याः शमितारः ' इत्यध्रिगुप्रैष आवर्तनीयो न तन्त्रम् । वि. ११।४।२१. * प्राजापत्याः सप्तदश पशवः वाजपेये । तत्र एते सप्तदशैव यागाः, न तु सप्तदशपशुगुणकं एकं कर्म । २।२।७।२१. * ' **प्राजापत्यं** घृते चरुं निर्वपेत् शतकृष्णलमायुष्कामः ' इति श्रूयते । तस्मिन् हिरण्ये औषधस्य विध्यन्तो नाज्यस्य । ८।१।१८।३५–३९. * ' प्राजापत्यं घृते चरुं निर्वपेत् शतकृष्णलमायुष्कामः ' ' चत्वारि चत्वारि कृष्णलान्यवद्यति ' । इति कृष्णलानां हविष्ट्वम् । भा. १०।१।१०।४०, * **प्राजापत्यान्** पशून् प्रकृत्य ' तान् पर्यग्निकृतान् उत्सृजन्ति, ब्रह्मसाम्नि आलभन्ते ' इति श्रूयते । तत्र पूर्वः पर्यग्निकरणात् परेषां संस्काराणां प्रतिषेधार्थः उत्तरश्च तेषामेव कालान्तरे प्रतिप्रसवार्थः । ११।२।१२।५१–५३. * **प्राजापत्यैः** पशुभिः क्रतुपशूनां समुच्चयः वाजपेये । १०।४।३।६. ' वाजपेयोपदिष्टैः प्राजापत्यैः ' इत्यत्र द्रष्टव्यम् । * **प्राजापत्यस्य** उपांशुधर्मत्वं इति एकः पक्षः । ' प्रजापतिं मनसा ध्यायेत् ' इति तूष्णींभाव एव प्रजापतिधर्मः इत्यपि पक्षः । वि. १०।८।१७. * **प्राजापत्यानां** आलम्भः माध्यंदिने सवने ब्रह्मसामकाले श्रूयते । भा. ४।१।१४।३३.

प्राजापत्यानां पशूनां ब्रह्मसामकाले आलम्भोत्कर्षमात्रम् ॥

पर्यग्निकृतानामुत्सर्गे प्राजापत्यानां कर्मोत्सर्गः श्रुतिसामान्यादारण्यवत् तस्मात् ब्रह्मसाम्नि चोदनापृथक्त्वं स्यात् । ११।२।१२।५१॥

भाष्यम्—वाजपेये प्राजापत्यान् पशून् प्रकृत्य श्रूयते ' तान् पर्यग्निकृतानुत्सृजन्ति ', ' ब्रह्मसाम्न्यालभते ' इति । तत्र विचार्यते, ' तान् पर्यग्निकृतानुत्सृजन्ति ' इति किं अयं कर्मशेषप्रतिषेधः, ' ब्रह्मसाम्न्यालभते ' इति कर्मान्तरचोदना, अथवा पूर्वः पर्यग्निकरणात् परेषां संस्काराणां प्रतिषेधार्थः, उत्तरश्च तेषामेव कालान्तरे प्रतिप्रसवार्थ इति । किं प्राप्तम् ? कर्मोत्सर्गः । कर्मशेषप्रतिषेध इत्यर्थः । श्रुतिसामान्यात् आरण्यवत् । यथा ' पर्यग्निकृतानारण्यानुत्सृजन्ति ' इत्ययं कर्मशेषप्रतिषेध इत्युक्तम् ' शेषप्रतिषेधो वाऽर्थाभावादिडान्तवत् ' (९।४।१३।५२) इति । तया श्रुत्या तुल्येयं श्रुतिः । किमनयोस्तुल्यत्वम् ? तत्र कर्माणि चोदितानि ' वसन्ताय कपिञ्जलानालभेत ' इति । तेषु सर्वेषु प्राकृता गुणाः प्राप्ताः । तेषु प्राप्तेषु पर्यग्निकरणान्तं गुणकाण्डं पुनः श्रुतम् ' पर्यग्निकृतानुत्सृजति ' इति । निर्गुणं पुनर्वचनमितरपरिसंख्यापकं भवतीति कर्मशेषस्य प्रतिषेधकं विज्ञायते । एवमिहापि ' प्राजापत्यानालभेत ' इति चोदितानां कर्मणां तथैव सर्वाङ्गेषु प्राप्तेष्विदं पर्यग्निकरणान्तस्य गुणकाण्डस्य निर्गुणं पुनर्वचनं कर्मशेषस्य निवर्तकम् । यस्माच्चैवं तस्मात् ' ब्रह्मसाम्न्यालभते ' इति कर्मान्तरचोदना स्यात् । पूर्वापेक्षया ब्रह्मसाम्न्यालभते सप्तदश प्राजापत्यानिति ।

टुप्— ' पर्यग्निकृतानुत्सृजन्ति ' इति पर्यग्निकरणान्ताङ्गरीतिर्विधीयते । तयैते प्राजापत्या निराकाङ्क्षीक्रियन्ते गृहमेधीयवत् । ' ब्रह्मसाम्न्यालभते ' इति कर्मान्तरम् । तत्र यदेव द्रव्यदेवतं पूर्वेषु यागेषु तदेवानुषज्यते ।

संस्कारप्रतिषेधो वा वाक्यैकत्वे क्रतुसामान्यात् । ५२ ॥

भाष्यम्— न वा कर्मशेषप्रतिषेध इति । किं तर्हि ? संस्काराणां प्राप्तावसराणां तस्मादवसरात् प्रतिषिध्य ब्रह्मसाम्नि प्रतिप्रसवः । किं कारणम् ? वाक्यैकत्वे क्रतुसामान्यात् । एकमिदं वाक्यम् 'तान् पर्यग्निकृतानुत्सृजन्ति' 'ब्रह्मसाम्न्यालभते' इति । कथं ज्ञायते ? आलभत इति द्रव्यदेवतस्याश्रवणात् । समाने च क्रतौ वाक्यैकत्वं भवति । तदा हि केवल आलम्भो वक्तव्यः, द्रव्यदेवतस्योक्तत्वात् । अथ वाक्यभेदः स्यात्, ततः पूर्वेण कर्मशेषः प्रतिषिध्येत, परेण कर्मान्तरं चोद्येत । तत्र द्रव्यदेवतं वक्तव्यम् । यत्तु पूर्वोक्तं संभन्त्स्यत इति । तत् तत्रैव कृतार्थत्वादिह न संभन्त्स्येत । तस्मादेकं वाक्यम् । नन्वेकस्मिन्नपि क्रतौ पूर्वेण संस्काराः प्रतिषिध्यन्ते, परेण विधीयन्ते इत्यर्थभेदात् वाक्यभेद एव भवति । न हि 'ब्रह्मसाम्न्यालभते' इत्युक्ते अर्थादेव पर्यग्निकरणान्त उत्सर्गः सिद्धः । स न विधीयते । तमनूद्य आलम्भः केवल उत्कृष्येतेति नास्ति क्रतुसामान्ये वाक्यभेदः ।

टुप्— यथावसरं प्राप्ताः (पर्यग्निकरणोत्तरकालाः आलम्भादयः) संस्काराः अस्मिन् काले न कर्तव्याः (किन्तु ब्रह्मसाम्नि) इत्येवमपि वाक्यार्थे उपपद्यमाने अङ्गरीतिविधानं न गृह्णीमः, (तथा सति मिथः कर्मद्वये अस्य संबन्धाभावात्) वाक्यभेदात् (ततश्च कर्मभेदः, कर्मभेदाददृष्टभेदः इति) अदृष्टकल्पनाभयाच्च । यदा हि आलम्भोऽन्यस्मिन् काले विहितः तदा न्यायादेव सर्वसंस्काराणामुत्कर्षात् कः प्रसङ्गः अन्यस्मिन् (पर्यग्निकरण-) काले संस्काराणाम्, येन प्रतिषिध्येरन् । (तस्मादुत्कर्षमात्रविधिरिति एकवाक्यता । अतः न पर्यग्निकरणान्तं माध्यंदिने पुनरावर्तनीयम्) ।

वपानां चानभिघारणस्य दर्शनात् । ५३ ॥

भाष्यम्— 'सव्या वा एतर्हि वपा यदनभिघृता, ब्रह्म वै ब्रह्मसाम, यद्ब्रह्मसाम्न्यालभते तेनासव्यास्तेनाभिघृताः' इति । यदि संस्कारप्रतिषेधः, ततो जुह्वाः सवनीयप्रचारेण रेचितत्वात् प्रयाजशेषो नास्ति । तदभावादनभिघृतत्वं युज्यते । अथ कर्मशेषप्रतिषेधस्ततो ब्रह्मसाम्न्यालम्भः कर्मान्तरे । तत्र प्रयाजाः पुनरिज्यन्ते । तेषां शेषोऽस्ति । तेनाभिघारणं स्यात् । अनभिघारणदर्शनं नोपपद्येत । तस्मादपि संस्कारप्रतिषेधः ।

टुप्— यस्यापि 'ब्रह्मसाम्न्यालभते' इति कर्मान्तरम्, तस्यापि पशुपुरोडाशस्येव (तत्कालानां कर्मान्तराणामपि 'पशोश्च विप्रकर्षस्तन्त्रमध्ये विधानात्' इति न्यायात्) प्रासङ्गिकाः प्रयाजाः । तस्मादेतद्दर्शनमयुक्तम् । द्वयोरपि (वादिनोः प्रयाजाभावेन अनभिघारणस्य) तुल्यत्वात् । तत्र **केचित्** वर्णयन्ति । तेषां (पशूनाम्) द्वौ पक्षौ । एकः पक्षो (आश्विनग्रहग्रहणानन्तरं क्रतुपशुभिः सहोपकृतानां पशूनां पर्यग्निकरणान्तं कृत्वा तत उत्सृज्य) ब्रह्मसामकाले आलम्भः । द्वितीयः सह क्रतुपशुभिः समाप्तिः । अस्मिन् द्वितीये पक्षे वपानामभिघारणं विद्यते (संनिहितत्वात्) । यदा च माध्यंदिने (सवने) आलम्भः, तदा यत् तद्वपाभिघारणं तन्नास्ति, प्रयाजावसरे वपाया अनुत्पन्नत्वात् । यागैकत्वे योऽसौ अभिघारणसंस्कारो नान्तरीयको हविषि अनुभूतः तस्य इदानीं अविद्यमानत्वात् (दोषस्य) आशङ्कावचनम् ('सव्या वा एतर्हि' इति) उपपद्यते । कर्मान्तरपक्षे तु (तदीयवपाभिः) स धर्मः (अभिघारणाख्यः) अननुभूतपूर्वः । तत्र ('सव्या वा एतर्हि' इति) शङ्कैव नास्ति इति (दोषाशङ्कादर्शनात् अकर्मान्तरत्वं इति) । **इदमपि नोपपद्यते** । कर्मान्तरवादिनः अपि हविषां चोदकेन संस्कारः प्राप्नोति इति स इह नास्तीत्याशङ्कावचनमुपपद्यत एव इति । (तस्मादयुक्तमेवेदं लिङ्गं परमतत्वेन नेतव्यम् ।) ।

शा— अतः पर्यग्निकरणान्ताः प्राजापत्याः 'ब्रह्मसाम्न्यालभते' इति 'आज्येन शेषः' इतिवत् कर्मान्तरमिति मन्वानस्योत्तरम् '**नान्यकर्मविधिर्युक्तोऽनेकादृष्टप्रकल्पनात् । वाक्यभेदप्रसङ्गाच्च तस्मादुत्कर्षचोदना ॥**'

सोम— पूर्वत्र कर्तृभेदादापराग्निकहोमानामिव इह कालभेदादावृत्तिरित्युत्थितेः **संगतिः । सूत्रे** श्रुति-

सामान्यात् शब्दसारूप्यात् चोदनापृथक्त्वं कर्मान्तरविधिः इत्यर्थः ।

वि— 'पर्यग्निकरणे त्याग आलम्भो ब्रह्मसामनि । कर्मशेषनिषेधश्च कर्मान्तरविधिर्भवेत् ॥ किं वोत्कर्षोऽवशिष्टस्य, ह्यारण्योक्तिवदादिमः । अदृष्टवाक्यभेदासेर्द्व्याभावेन चान्तिमः ॥'

भाट्ट— वाजपेये प्राजापत्यान् पशून् प्रक्रम्य 'तान् पर्यग्निकृतानुत्सृजति', 'ब्रह्मसाम्न्यालभते' इति श्रुतम् । तत्र पूर्ववाक्येन 'पर्यग्निकृतानारण्यान् उत्सृजन्ति', 'पर्यग्निकृतं पात्नीवतमृत्सृजन्ति' इतिवत् पर्यग्निकरणान्ताङ्गरीतिविधानात् गृहमेधीयाज्यभागन्यायेनापूर्वत्वापत्तौ उत्तराङ्गानामकर्तव्यत्वावगतेः 'ब्रह्मसाम्न्यालभते' इति 'आज्येन शेषं संस्थापयति' इतिवत् कर्मान्तरविधिः । तत्र च तद्वदेव 'सप्तदश प्राजापत्यान् पशून्' इत्यस्यानुषङ्गेण द्रव्यदेवतालाभः । **इति प्राप्ते**, आश्विनग्रहग्रहणोत्तरं क्रतुपशुभिः सहोपाकृतानां प्राजापत्यानां ब्रह्मसामकाले पर्यग्निकरणोत्तरक्रियमाणालम्भोत्कर्षमात्रविधाने 'ब्रह्मसाम्न्यालभते' इत्यनेन कृते अर्थात् पर्यग्निकरणान्तस्य क्रतुपशुभिः सह करणावगतेः, तदन्ते उत्सर्गस्य प्राप्तत्वात् पूर्ववाक्यस्यानुवादतया अर्थवादत्वविधया उत्तरविध्येकवाक्यत्वप्रतीतेः, पूर्वोत्तरवाक्ययोर्वाक्यभेदमङ्गीकृत्य पूर्वस्मिन् परिसंख्याफलकतृतीयविधिप्रकाराङ्गीकरणे तूत्तरस्मिंश्च द्रव्यदेवताविशिष्टापूर्वकर्मविधिफलक–षष्ठविधिप्रकाराङ्गीकरणे गौरवापत्तेः, अतोऽत्र आलम्भोत्कर्षमात्रं विधीयते । तदा च तदुत्तराङ्गानामुत्कर्षः 'तदादि वाऽभिसंबन्धात्' (५।१।१२।२४) इति न्यायादेव लभ्यते । तेन अत्रारण्यन्यायासंभवात् न पर्यग्निकरणान्तानामङ्गानामावृत्तिः ।

अत एव प्राजापत्यवपानां क्रतुपशुभिः सह करणपक्षे 'सह पशून् आलभते वपानामभिघृतत्वाय' इति वदन् उत्कर्षपक्षे तन्मात्राभावं दर्शयति । पर्यग्निकरणान्ताङ्गरीतिविधाने तु वपानामेवाभावादभिघारमात्राभावदर्शनमसमञ्जसं स्यात् । एतदभिप्रायकमेव च 'वपानां चानभिघारणस्य दर्शनात्' इति सूत्रम् ।

यत्तु भाष्यकारेण इदम् 'सव्या वा एतर्हि वपा यदनभिघृता यद्ब्रह्मसाम्न्यालभते तेनाभिघृताः' इति लिङ्गं अकर्मान्तरत्वे प्रयाजशेषस्य क्रतुपशुवपाभिघारणेन रिक्तत्वादनभिघृतत्वं युज्यते, कर्मान्तरत्वे तु तदर्थं पुनः प्रयाजकरणात् तेनैव तद्वपाभिघारणोपपत्तेरनभिघृतत्वदर्शनं न युक्तमिति व्याख्यातम्, तत् कर्मान्तरत्वपक्षेऽपि माध्यंदिनकालीनपशुपुरोडाशसवनीयहविषामिव सवनीयतन्त्रमध्यपातित्वेन प्रसङ्गितया प्रयाजपुनःकरणानापत्तेरुपेक्षितम् ।

मण्डन— 'संस्कारो वार्यते पशौ ।'

शंकर— 'ब्रह्मसाम्नि न कर्मभित् ।'

* प्राजापत्यानां व्रतानां पुरुषार्थता । ४।१।३।३–६. * **प्राजापत्ये** शतकृष्णलचरौ औषधस्य विध्यन्तः । ८।१।१८।३५–३९. * **प्राजापत्येषु** एकादशिनीविध्यन्तातिदेशः वक्ष्यते 'तत्प्रवृत्तिर्गणेषु स्यात्' (८।१।८।१५) इत्यत्र । **सु.** पृ. ८१३. * प्राजापत्येषु क्रतुपशुषु च अग्निगोः आवृत्तिः कालभेदात् वाजपेये । **भा.** ११।४।२०।५४–५६. * 'प्राजापत्येषु च आम्नानात्' (१०।४।३।६) इत्यत्र वाजपेये उपदिष्टानां प्राजापत्यपशूनामतिदिष्टानां संस्थापशूनां च समुच्चयः उक्तः । **भा.** ४।१।१४।३३, **बाल.** पृ. १७७. * 'प्राजापत्येषु चाम्नानात्' इत्यादौ तत्र-तत्र अविरोधात् समुच्चयं वक्ष्यति (इति शङ्का) । **वा.** ३।६।१६।४२ पृ. १०६३.

प्राजापत्येषु चाम्नानात् । १०।४।३।६॥

प्रकृतौ क्रतुपशवः समाम्नाताः । वाजपेये च 'सप्तदश प्राजापत्यान् पशूनालभते' इति विहितम् । तत्र प्राजापत्येषु च आम्नानात् क्रतुपशुभिः समुच्चयः । आम्नायन्ते हि वाजपेये क्रतुपशवः 'ब्रह्मवादिनो वदन्ति नाग्निष्टोमो, नोक्थ्यो, न षोडशी, नातिरात्र इति, अथ कस्मात् वाजपेयेन सर्वे यज्ञक्रतवोऽवरुध्यन्ते ? पशुभिरिति ब्रूयात् । यदाग्नेयं पशुमालभते अग्निष्टोमं तेनावरुन्धे, ऐन्द्राग्नेनोक्थ्यम्, ऐन्द्रेण षोडशिनम्, सारस्वत्याऽतिरात्रम्, मारुत्या बृहत् स्तोत्रम् । एतावन्तो वै यज्ञक्रतवस्तान् पशुभिरेवावरुन्धे' इति समुच्चयं दर्शयति ।

तस्मात् प्राजापत्यानां क्रतुपशुभिः समुच्चयः । ग्रहाणामिवेति चशब्दार्थः । इति सिद्धान्तः । के.

* प्राजापत्येषु पशुषु कुम्भी तन्त्रम् । भा.११।४।११।३९. * प्राजापत्येषु पशुषु 'छागस्य वपाया मेदसः' इत्यत्र 'छागानां वपानां मेदसाम्' इत्यूहः । बाल. पृ. १२७. * प्राजापत्येषु पशुषु वाजपेये कुम्भीशूलवपाश्रपणीनां तन्त्रम् । ११।४।८।३३. * 'प्राजापत्येषु यागानामेकानेकत्वसंशये । कृतः प्रकृतिवच्छब्दवाक्यशेषेण निर्णयः ॥' वा. ३।१।१।१ पृ. ६५० .

* **प्राजापत्याङ्गप्रचारो** वाजपेये सर्वसोमोत्तरम् । ११।३।१५।४८–५४ .

* न च **प्राजापत्याधिकरण**– (२।२।७।२१) पूर्वपक्षन्यायात् एकपदोपादानात् सहितानां हृदयादीनां एकदेवतासंबन्धोपपत्तेः कथमनेकयागकल्पनं इति वाच्यम्। **कौ.** २।२।६।१७ पृ. २०९.

* **प्राजापत्यन्यायः ।** प्राजापत्यपशुधर्माणां पदार्थानुसमयो वाजपेये । ५।२।१. **मीको.** पृ. २४३७ 'पदार्थानुसमयन्यायः' इत्यत्र द्रष्टव्यम् । * एकदेवत्ये पशुगणे **प्राजापत्यन्यायेन** (५।२।१) दैवतावदानादिना प्रत्येकमनुसमयः । अन्ते च तन्त्रेण देवताहोमः । न च प्रकृतौ एकस्य पशोः दैवताद्यवदानत्रयं आनन्तर्येण कृतमिति इहापि तथैव कार्यमिति शङ्क्यम्, प्राजापत्यन्यायेनैव पश्वेकत्वस्य प्रकृतौ आर्थिकत्वेन चोदकविरोधाभावात् । **भाट्ट.** ५।२।६.

* **प्राजापत्यन्यायाभावः** चोदकाभावे । बाल. पृ. ८७.

* **प्राजापत्यपशूनां** क्रतुपशुभिः सहकरणत्वपक्षः ब्रह्मसामकालीनत्वपक्षश्च । **भाट्ट.** ४।१।१४. * प्राजापत्यपशूनां क्रतुपशूनां च वाजपेये प्रातःसवने सहोपक्रमः । प्रयाजानुष्ठानं उभयार्थं प्रातरेव । प्राजापत्यानां पर्यग्निकरणान्तमनुष्ठानं प्रातरेव, आलम्भस्तु माध्यंदिने ब्रह्मसाम्नि । तेषां प्रयाजाभिघारणं तु लुप्यते, अभिघारणस्य शेषप्रतिपत्तित्वात् । **वि.** ४।१।१४, * प्राजापत्यपशूनां धर्मसाहित्यं प्रयोगवचनेन परिकल्प्यते । ५।२।१. * प्राजापत्यपशूनां ब्रह्मसामकालीनत्वपक्षे प्रयाजशेषाभिघारणाभावः, 'सह पशूनालभते वपानामभिघृतत्वाय' इति लिङ्गात् । **भाट्ट.** ४।१।१४. * प्राजापत्यपशूनां वपायाः अभिघारणापेक्षैव नास्ति, ब्रह्मसाममाहात्म्येनैव तद्रूपायाः स्निग्धतायाश्च अभिघृततायाश्च सिद्धत्वात् । अत एव श्रूयते 'शम्या वा एतर्हि वपा यर्ह्यनभिघृता । ब्रह्म वै ब्रह्मसाम । यद् ब्रह्मसाम्न्यालभते तेनाशम्यास्तेनाभिघृताः' इति । शम्याः रूक्षाः । अशम्याः स्निग्धाः । **वि.** ४।१।१४. * प्राजापत्यपशूनां वसाहोमः तन्त्रं वाजपेये । ११।२।५।२५ .

⌛ प्राजापत्यपशूनां सवनीयपशूनां च शामित्रोऽग्निस्तन्त्रम् ॥

दैक्षे पशौ 'अग्निना पुरस्तादेति रक्षसामहपत्यै' इति श्रुतं पशोः शामित्रदेशनयनकाले वपानयनकाले चोल्मुकस्य नयनं प्रत्याहरणं च तद्वाजपेये प्राजापत्यानां क्रतुपशूनां च कालभेदेन प्रचारादावर्तेत, उभयेषामपि राक्षसापहननस्यावश्यकत्वात् । इति **प्राप्ते,** रक्षोऽपहननश्रुतेरर्थवादत्वेन श्रपणार्थताया एवोचितत्वात् कालान्तरे आनीतस्यापि श्रपणार्थत्वानपायात् तन्त्रम् । **संकर्ष.** १।१।९ .

* प्राजापत्यपशूनां साहित्यमवगतम् 'सप्तदश प्राजापत्यान् पशूनालभते' इति । **वि.** ५।२।१. * **प्राजापत्यपशुषु** अध्रिगुप्रैषस्य प्रत्येकमावृत्तिः वाजपेये । ११।४।२०. * प्राजापत्यपशुषु अभिघारणार्थं प्रयाजशेषधारणतत्पात्रे न कर्तव्ये वाजपेये । ४।१।१४।३३–३९.

⌛ प्राजापत्यपशुषु उत्कर्षे यूपोन्मोचनप्रभृति माध्यंदिने एव ॥

वाजपेये प्राजापत्यान् प्रकृत्य 'तान् पर्यग्निकृतान् उत्सृजते, ब्रह्मसाम्न्यालभते' इति श्रुतयोः पर्यग्निकरणसंज्ञपनयोर्मध्यवर्तिपदार्थः शामित्रदेशं प्रति प्रापणम्, स च क्रतुपशुभिः सह प्रातःसवने एव कार्यः, अध्रिगुप्रैषस्य तदानीमेव वक्तव्यत्वात् । अन्यथा प्रैषस्य आवृत्त्यापत्तेः । निष्ठाप्रत्ययोक्तस्य उत्सर्जनपूर्वत्वस्य व्यवधानेऽपि भुक्त्वा गत इत्यादाविव अविरोधात् । यूपादुन्मोचनमेव वोत्सर्गपदार्थ इति **कार्ष्णाजिनेर्मतेन प्राप्ते,** यूपादुन्मोचनादिप्राणवियोगान्तव्यापारस्य एकपदार्थत्वात् संज्ञपनकरणकभावनायाः सेतिकर्तव्यताकाया एवालम्भविधिनोत्कर्षात् उत्सृजतिरुत्तरव्यापारोपरममनुवदतीति क्त्वाप्रत्ययोक्तमव्यवहितपूर्वत्वं न बाधनीयम् । अध्रिगोस्त्वावृत्तिर्मनोतादेरिव युक्तैवेत्युक्तम् । **संकर्ष.** १।१।४.

* प्राजापत्यपशुषु उपाकरणे य ऐच्छिकः क्रमः स्वीकृतस्तेनैव नियोजनादय उत्तरसंस्काराः कर्तव्याः । **सोऽयं** प्रवृत्तिक्रमः । ५।१।५।८–१२. * प्राजापत्यपशुषु उपाकरणानन्तरमेव नियोजनं इति यथाप्रकृति अनुष्ठानम् । **भाट्ट.** ५।२।१. * प्राजापत्यपशुषु उपाकरणादीनां प्रकृतौ अनिरूपित एव क्रमो निरूप्यते प्रवृत्त्या । **रत्न.** ५।१।१।१. * प्राजापत्यपशुषु एकैकस्मिन् उपाकरणादीनां पदार्थानामावर्तनीयानां पदार्थानुसमयो वक्ष्यते (५।२।१) । **भाट्ट.** ५।१।५. * प्राजापत्यपशुषु कर्मशेषप्रतिषेधपूर्वपक्षेऽपि 'ब्रह्मसाम्न्यालभते' इति पर्यग्निकरणोत्तरकालीनानां संस्काराणां कालान्तरे अनुष्ठेयत्वश्रुतेः सर्वथा प्रतिषेधायोगेन पर्यग्निकरणोत्तरकालीनत्वमात्रं निषेधस्य एकादशे (११।२।१२।५१–५३) वक्ष्यते । **सु.** पृ. ९३९. * प्राजापत्यपशुषु दैवतावदानादिना अनुसमयः । **भाट्ट.** ५।२।६. * प्राजापत्यपशुषु पशुधर्माणां पदार्थानुसमयः कर्तव्यः (पङ्क्तिपरिवेषणन्यायेन) वाजपेये । ५।२।१।१–२. * प्राजापत्यपशुषु प्रत्यक्ष एवोपदेशः पूर्वषट्के चिन्तितः । **टुप्.** ७।१।१।१. * प्राजापत्यपशुषु प्रधानार्थानि स्विष्टकृदर्थानि इडाभक्षणार्थानि च इति त्रिविधानि अवदानानि त्रयः पदार्थाः । पदार्थानुसमयेनैव चानुष्ठानं कर्तव्यम्, न काण्डानुसमयेन । एवं सर्वत्र पशुगणे । **वि.** ५।२।६. * प्राजापत्यपशुषु संनिपत्योपकारकेषु पदार्थानुसमयः, न तु काण्डानुसमयः । सहभावात् पदार्थाभ्यासोऽवश्यंभावी । **टुप्.** ५।२।१।१–२ . * प्राजापत्यपशुषु सप्तदशसु कस्मिंश्चिन्नष्टे तत्स्थाने पुनरानीतस्यैव उपाकरणादयः संस्काराः कर्तव्याः, न तु पुनः सर्वेषाम् । **सोम.** २।२।७. * प्राजापत्यपशुषु सर्वेषामेव दैवतैः अवदानैः देवतानामनुसमयः सौविष्टकृतैः सौविष्टकृतानां ऐडैश्च ऐडानाम् । ५।२।६।१०–१२ .

* **प्राजापत्यवपानां** प्रयाजशेषाभिघारणं वैकल्पिकम् । बाल. पृ. १६३.

* '**प्राजापत्यवपाभिघारणार्थं** प्रयाजशेषधारणं न कर्तव्यम्, तदर्थं पात्रान्तरं नोत्पादनीयम्, प्राजापत्यवपाश्च न अभिघार्याः । **भा.**४।१।१४।३३–३९. * प्राजापत्यवपाभिघारणार्थं प्रयाजशेषस्थापनं चतुर्थे निरस्तं (४।१।१४) ब्रह्मसामकालपक्षे । बाल. पृ. १६३.

* **प्राजापत्यवसाहोमानां** तन्त्रेण अनुष्ठानम् । ११।२।५।२५ .

* **प्राजापत्यसप्तदशपशुप्रचारः** वाजपेये प्राकृतानां वैकृतानां च सर्वेषां सोमानामुपरिष्टात् कर्तव्यः । 'उपरिष्टात् सोमानां प्राजापत्यैश्चरन्ति' इति । ११।३।१५. 'वाजपेये सर्वसोमोत्तरम्' इत्यत्र द्रष्टव्यम् ।

* **'प्राणांस्तु सततं रक्षेद्दारैरपि धनैरपि'** इति न्यायेन प्राणस्य परमधनत्वम् । **कौषीतक्युपनिषत् – शंकरानन्द.** २।२.

* '**प्राणापानावेवात्मन् धत्ते**' ईदृशेन शब्देन फलविधानं न क्रियेत इति वक्ष्यामः (४।३।१।१–३) । **वा.** ३।४।५।१५.

* '**प्राणभृत** उपदधाति' अत्र प्राणभृच्छब्दस्य समुदायपरत्वात् न्यूनस्य अधिकार्थविषयत्वकल्पने गौणत्वदोषः । बाल. पृ. ३. * 'प्राणभृत उपदधाति' अत्र मन्त्रविधिरिति पूर्वपक्षः । लिङ्गप्रकरणप्राप्तमन्त्रानुवादेन इष्टकोपधानविधिरिति सिद्धान्तः । **वि.** १।४।१८. * 'प्राणभृत उपदधाति' इत्यत्र प्राणशब्दघटितमन्त्रोपधेया इष्टका एव । **संकर्ष.** २।१।२३. **मीको.** पृ. १०६५ 'इष्टका एव प्राणशब्द०' इत्यत्र द्रष्टव्यम् । * 'प्राणभृत उपदधाति' । प्रथममन्त्रे एव प्राणभृल्लिङ्गमाम्नायते 'अयं पुरोभुवस्तस्य प्राणो भौवायनः' इति । एकस्यैव मन्त्रस्य प्राणभृत्त्वेऽपि तत्सहचरिताः सर्वे मन्त्राः प्राणभृच्छब्देन लक्ष्यन्ते, तेन च पुनः तैर्मन्त्रैरुपधातव्या इष्टकाः उपलक्ष्यन्ते । तथा चात्र वाक्ये प्राणभृतः इष्टकाः । **वि.** १।४।१८.

ॐ प्राणभृदिष्टकार्थां मन्त्रा एव प्राणग्रहार्थाः ॥

प्राणग्रहान् प्रकृत्य ' प्राणा वै प्राणग्रहाः ' इत्यादिना स्तुत्वा तत्संनिधौ ' त्वे क्रतुमपि वृञ्जन्ति विश्वे ' इत्यादयो मन्त्राः पठिताः । तेषां च परस्पराकाङ्क्षया संबन्धः, मन्त्राणां ग्रहेभ्योऽल्पत्वेऽप्यावृत्त्या पूर्तिसंभवात् । इति प्राप्ते, ' ज्येष्ठा वा एता ब्राह्मणाः पुराविदामक्रन् ' इति तदर्थवादेषु तन्मन्त्राणां महर्षिलिङ्गत्वेन संस्तवात् तादृशानां च चयनप्रकरणे वसिष्ठविश्वामित्रभरद्वाजादिपदघटितत्वात् प्राणभृन्मन्त्राणां एवोपलम्भात् तेषामेव ग्रहणेऽपि करणत्वम् । अत एव ' प्राणभृत उपधाय संयत उपदधाति ' इति विधिशेषे ' प्राणानेवास्मिन् धित्वा संयद्भिः संयच्छति ' इति तेषामिष्टकानां प्राणग्रहाणां च प्राणत्वेन तुल्यः स्तव उपपद्यते । प्राणभृन्मन्त्राणां पञ्चाशत्संख्याकत्वेऽपि ' दश गृह्यन्ते ' इत्यवयुत्यानुवादः एकपर्यायापेक्षो युज्यते । **संकर्ष.** ३।३।१८.

* **प्राणभृन्न्यायः** । प्राणभृच्छब्देन इष्टकासमुदायो गृह्यते । १।४।१२।२३–६ . ' लिङ्गसमवायन्यायः ' इत्यत्र द्रष्टव्यम् । * ' घृतेष्टका उपदधाति ' इत्यादौ ' घृतं मिमिक्षिरे ' इत्यादिमन्त्रैरुपधानं मृन्मयीनामेव **प्राणभृन्न्यायेन** (संकर्ष. २।१।२३) विधीयते इति पूर्वपक्षः । **संकर्ष.** २।१।२४.

* **प्राणिनो** बहवः वातनिर्मितैर्लघुभिः सूक्ष्मैर्देहैः अन्तरिक्षे भ्रमन्ति भूम्याद्यनुग्रहात् । **वा.** ३।१।७।१२ पृ. ७०२ . * **प्राणिनां** सर्वेषां महाभूमिः गोपथ–राजमार्ग– जलाशयादिसहिता साधारणं स्वम् । **वि.** ६।७।२.

* **प्राणिद्रव्यकत्वं** पशुप्रकृतिलिङ्गम् । **बाल.** पृ. ११९.

ॐ प्रातस्तु षोडशिनि । ६।५।१४।४४ ॥

षोडशिसंस्थे ज्योतिष्टोमे अतिपन्नानां अग्निहोत्रहोमानां प्रतिहोमाः, प्रातः प्रातःकालीनहोममारभ्य कर्तव्याः । तत्र यागे अवभृथस्य रात्रौ अनुष्ठेयताप्राप्तेः सायंहोमानधिकारः । प्रातर्होमस्य अधिकारः प्राप्नोति । तेन प्रातर्होममारभ्यैवानुष्ठानम् । तुशब्दः पूर्ववैलक्षण्यार्थः । **के.**

* **प्रातरग्निहोत्रप्रभृति** प्रतिहोमानुष्ठानं षोडशिसंस्थे ज्योतिष्टोमे । ६।५।१४।४४. ' षोडशिसंस्थायां प्रातरग्निहोत्रं ' इत्यत्र द्रष्टव्यम् ।

* **प्रातरनुवाकं** होताऽनुब्रूते । **वि.** ३।७।९.

* **प्रातरनुवाकोत्तरं** ऐष्टिको निर्वापः, प्रोक्षणादिकं च अलङ्करणात् प्राचीनमङ्गजातं कृत्वा, पश्चात् सौमिकाः प्रचरणीहोमादयः कर्तव्याः, ततः सवनीयादयः, ततो बहिष्पवमानस्तोत्रम् । **वि.** ५।१।१२.

* **प्रातरनुवाकोपास्त्यभावपक्षे** अध्वर्योः अधिकरणमिदं न तु तदुपास्तिपक्षे । **सोम.** ५।१।१३.

* **प्रातरनुवाकप्रचरणीहोमयोः** सौमिकयोः पाठप्राप्तमनुक्रमं विच्छिद्य प्रैषबलात् ऐष्टिको निर्वापः प्रवृत्तः। तत्रैव प्रोक्षणादिकमपि अलङ्करणात् प्राक्तनं सर्वं कृत्वा ततः प्रचरणीहोमादयः कर्तव्याः । **वि.** ५।१।१३.

* **प्रातर्दोहयागः** दुग्धस्य उत्पत्तेः अप्रयोजकः उपादानपालनयोस्तु प्रयोजकः । **बाल.** पृ.१०६.

* **प्रात:सवनं** दैवान्मानुषाद्वा प्रतिबन्धादुत्कृष्यमाणं माध्यंदिनं सवनं उत्कर्षति । **भा.** ५।१।१७।३०, * **प्रात:सवने** अष्टाकपालः सवनीयपुरोडाशः । १०।५।२६।८८. * प्रातःसवने आज्यस्तोत्राणि चत्वारि पञ्चदशस्तोमकानि । **वि.** १।४।३ , * प्रातःसवने गायत्रं साम । २।३।१. * प्रातःसवने गौग्गुलवेन अभ्यञ्जते अञ्जनाभ्यञ्जने नाम सत्रे । **भा.** १०।४।६।१०. * प्रातःसवने ज्योतिष्टोमीये ऐन्द्रवायवः, मैत्रावरुणः, आश्विनः, शुक्रः, मन्थी, आग्रयणः, उक्थ्यः, ध्रुवः इत्यादयो ग्रहा गृह्यन्ते । वि २।३।१, ३।६।९ । प्रातःसवने उपांशुः, अन्तर्यामः, ऐन्द्रवायवः, मैत्रावरुणः, शुक्रः, मन्थी, आग्रयणः, उक्थ्यः, ध्रुवः, आश्विनः इति दश ग्रहा गृह्यन्ते । 'दशैतानध्वर्युः प्रातःसवने ग्रहान् गृह्णाति ' । **सोम.** २।२।६ पृ. १३८. * प्रातःसवने ज्योतिष्टोमगते बहिष्पवमानस्तोत्रे त्रिवृत्स्तोमः , तदुत्तरं आज्यस्तोत्राणि चत्वारि, तेषु पञ्चदशः स्तोमः । **वि.** १।४।३. * प्रातःसवने धाराग्रहेभ्यः पूर्वं अंशुग्रहः । **सोम.** २।३।९. * प्रातःसवने शुक्रामन्थिग्रहप्रचारे अच्छावाकचमसवर्जं नव चमसाः सवनमुखीयाः प्रथम-

मिन्द्राय हूयन्ते । इतरयोस्तु सवनयोर्दशदश । तत्र होत्रकाणां चमसेषु सकृत्सकृत् इन्द्राय हुतेषु तच्छेशेषु सत्स्वेव अभक्षितेषु पुनरपि द्रोणकलशात् सोममुन्नीय मित्रावरुणादिदेवताभ्यो हुत्वा तेषु चमसेषु हुतशेषः सोमो भक्ष्यते इति स्थितिः (**सत्याषाढः**– ८।७।१–३८) । **कु.** ३।२।१२।२७. * प्रातःसवने सादनसंमार्गादयो ग्रहधर्माः पठिता अपि सवनत्रयेऽपि संबध्यन्ते । **वि.** ३।६।९. * ' दशैतानध्वर्युः **प्रातःसवने** ग्रहान् गृह्णाति ' ज्योतिष्टोमे । **भा.** २।२।६।१७.

* **प्रात:सवनीयानां** पशोः वा तन्त्रे असंशयं पतिताः माध्यंदिनसवनीयतृतीयसवनीयपुरोडाशाः । **भा.** १२।२।१२।३२, * प्रातःसवनीयानां पुरोडाशानां तन्त्रं पाशुकेन तन्त्रेण प्रसङ्गसिद्धम् । १२।२।१२।३२.

* **प्रातर्होमस्य** सूर्यप्रजापती देवते । **वा.** २।२।५।१६ पृ. ५०७.

* **प्रातिपदिकं** अभिधात्री श्रुतिः । तत् द्विविधम्, ' अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ' इत्येकम्, ' कृत्तद्धितसमासाश्च ' (पा० १।२।४५–४६) इति द्वितीयम् । **बाल.** पृ. ४१. * प्रातिपदिकं आकृतिमात्राभिधायकम्, ' न चास्य (विशेषणस्य) प्रातिपदिकमभिधायकम्, आकृतिमात्राभिधायित्वात् ' । **वा.** ३।१।६।१२ पृ. ६७३. * प्रातिपदिकं जातिं ब्रूते लक्षणया तु द्रव्यम् । सर्वत्रैव लक्षणया लिङ्गसंख्ये प्रवर्तेते । **टुप्.** १२।१।१।१. * प्रातिपदिकं यद् बहुषु वर्तते ततो बहुवचनं भवति । **भा.** ३।५।८।२३. * प्रत्ययः प्रातिपदिकार्थमवश्यमुच्चारणीयः । न केवलं **प्रातिपदिकं** स्वार्थे वर्तते । **टुप्.** ६।४।६।२२. * स्त्रियां यत् **प्रातिपदिकं** वर्तते तस्मात् स्त्रीप्रत्ययो भवति । **भा.** ३।१।६।१२पृ. ६८१–६८२. * **प्रातिपदिकेन** अन्वयव्यतिरेकाभ्यां जात्यभिधानम् । **वा.** ३।४।४।१३ पृ. ९२०. * **प्रातिपदिकात्** उच्चरन्ती द्वितीयादिविभक्तिः प्रातिपदिकार्थो विशेषकः इत्याह । (प्रत्ययानां प्रकृत्यर्थानुरक्तस्वार्थबोधकत्वस्वाभाव्यात्) । **भा.** १।१।७।२५ पृ. ९९. * **प्रातिपदिकस्य** विशेष्ये वर्तमानस्य भावप्रत्ययार्थो निमित्तम् । **वा.** ३।१।६।१२ पृ. ६७४, * प्रातिपदिकस्य समुदायप्रसिद्धौ संभवन्त्यां अवयवप्रसिद्धिर्न युक्ता ' उद्गातॄणां ' इत्यादौ । ३।५।८।२६. * **प्रातिपदिकानां** सर्वेषां सत्तावाचित्वं आकृत्यधिकरणे निरस्तम् । **सु.** पृ. ५०६.

* **प्रातिपदिकार्थो** निरूप्यते । धातुप्रत्ययतदन्तभिन्नत्वे सति अर्थवच्छब्दत्वं प्रातिपदिकत्वम् । ' अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ' (पा० १।२।४५) इति सूत्रात् । विभक्त्यन्तानां तत्संज्ञावारणाय प्रत्ययान्तेति । एवं च पूर्वनिपातितेषदसमाप्त्यर्थक-बहुच्प्रत्यययुक्तबहुपटुशब्दस्य प्रातिपदिकसंज्ञा । तत्र तद्धितान्तत्वाभावेन तत्संज्ञायाः 'कृत्तद्धित०' इति सूत्रेण (पा० १।२।४६) अलाभात् । तद्धितयोगमात्रविवक्षायां ' पचतकि ' इत्यत्र अकच्प्रत्ययुक्तेऽपि तदापत्तेः । **न चैवं** कृत्तद्धितान्तेषु अनर्थकशशशृङ्गादिसमासेषु प्रातिपदिकत्वं न स्यादिति **वाच्यम्** । ' कृत्तद्धितसमासाश्च ' इति सूत्रेण तत्र संज्ञाविधानात् ।

अन्ये तु अर्थवत्सूत्रेण वाक्यसमासयोरपि संज्ञाप्राप्तौ कृत्सूत्रेण समासेषु पुनः संज्ञाकरणं वाक्यपरिसंख्यार्थमित्याहुः ।

तच्च प्रातिपदिकं चतुर्धा पूर्वमुक्तं रूढं यौगिकं योगरूढं यौगिकरूढं चेति । तच्चतुर्विधमपि जातिगुणक्रियायदृच्छाशब्दभेदात् चतुर्विधं इति महाभाष्यकाराः । वस्तुनिर्देशशब्दावधिकौ इति चन्द्रालोककारः ।

सर्वेषु द्रव्यवाचकघटादिपदेषु जातिरेव वाच्या, वाच्यतावच्छेदिका वा । इदं चाग्रे स्फुटीकरिष्यते । नीलशुक्लादिपदेषु गुणपदसमानाधिकरणेषु गुणिवाचिसमानाधिकरणेष्वपि गुण एव वाच्यो न नीलत्वादिजातिः; गुणिनि तदभावात् । नापि गुणी गौरवात् । लक्षणया सामानाधिकरण्याद्युपपत्तेश्च । वाच्यतावच्छेदको वा गुणः । एवं पाचकादिपदे पाकक्रियैव वाच्या, तस्या एव प्रतीतेः । तस्याश्चैकत्वात् वाच्यत्वं वाच्यतावच्छेदकत्वं वा । एवं दण्डी इत्यादौ दण्डसंबन्धो वाच्यो वाच्यतावच्छेदको वा । पाचकादिपदे पचनस्य विशेषणत्वेन भानात् इह दण्डसंबन्धस्य विशेषणत्वेन भानात् भेदः । डित्थादियदृच्छाशब्देषु शब्द एव वाच्यो वाच्यतावच्छेदको वा । एवं कंसपरिक्षितचामुण्डादि-

पदेषु निर्देश एव वाच्यः शक्यतावच्छेदको वा । निर्देशश्च वाचकवर्णानां स्वपरत्वम् । यथा ‘ कंसः ’ इत्यत्र कंकारसकारावेव कंसपदे प्रतीयेते । तत्र नरकपदान्तर्गतसानुस्वारककारेण नरकप्रतीतिः, समाश्रितपदान्तर्गतसकारेण च समाश्रितप्रतीतिः । तेन स्वोपस्थाप्यसानुस्वारककारसकारवत्पदवत्त्वसंबन्धेन ककारसकारावेव वाच्यौ वाच्यतावच्छेदकौ वा इति । एवं चामुण्डादिपदेऽपि चण्डमुण्डानयनवत्त्वादिसंबन्धेन वर्णत्रयमेव शक्यं शक्यतावच्छेदकं वा । एवं परिक्षितादिपदे ‘ परिक्षीणे कुले जातः ’ इत्यादिसंबन्धेन तत्तद्वर्णवत्त्वं बोध्यम् । एतेषु च जातिगुणक्रियासंबन्धासिद्धेर्न जात्यादिशब्दत्वम् , नापि यदृच्छाशब्दत्वम्, संबन्धप्रदर्शनात् । नापि यौगिकत्वम्, पिण्डार्थान्तःप्रविष्टार्थवाचकावयवारब्धत्वासंभवात् । नापि लक्षणा, संबन्धाग्रहात् । द्विरेफपदस्य भ्रमरपदादौ रेफद्वयसंबन्धज्ञानसत्त्वात् युक्ता लक्षणा । नापि लक्षितलक्षणा, लक्षणाया अभावात् । अतस्ते वर्णा एव शक्यतावच्छेदकाः शक्या वेति ।

अत्र **के चित्** । व्यक्तिसंकेतपक्षे सर्वासु व्यक्तिषु संकेत एको नाना वा । नाद्यः, आनन्त्यात् । नान्त्यः, व्यभिचारापत्तेः । गौः शुक्लः चलः इत्यादिपदानां व्यक्त्यैक्येन अर्थभेदाभावात् सहप्रयोगानुपपत्तेश्च । अतो धर्मे एव शक्तिः । हेतुताऽपि शक्तिग्रहस्य तत्तत्पदत्वधर्मितावच्छेदकगोत्वप्रकारकनिश्चयत्वेन । तत्र जातौ च निरवच्छिन्नैव प्रकारता इति लाघवम् । अन्यथा गोत्वधर्मितावच्छेदकतत्तत्पदप्रकारकनिश्चयत्वेन हेतुतायां तत्तत्पदत्वस्य प्रकारतावच्छेदकतया गौरवं इति जातावेव शक्तिर्युक्ता । आकाशादिपदे अनन्तशक्तिकल्पनाऽभावेन न धर्मे शक्तिः । एवं च सर्वत्र नानानीलपीतरूपव्यक्तिषु वर्तमाना नीलत्वपीतत्वादिजातिः नीलपीतादिपदवाच्या । चलना इत्यत्रापि चलनक्रियानिष्ठा जातिरेव । डित्थादिशब्दानामपि बालाद्यवस्थापरिणते नानाविरुद्धधर्माध्यासात् भिन्नडित्थाद्यर्थनिष्ठा डित्यत्वजातिरेव वाच्या । ‘ बालवृद्धशुकोदीरितशब्दभेदेन शब्दनिष्ठैव जातिर्वाच्या ’ इत्यपि **के चित्** ।

तत्राप्येवं विभागः, जातिरेव नामार्थः, उक्तयुक्त्या आक्षेपाच्च व्यक्तिलाभः । अर्थापत्तिः समानवित्तिवेद्यत्वं वा आक्षेपो निरूढलक्षणा वा । तेन वृत्त्या प्रकृत्युपस्थाप्यत्वस्य प्रकृत्यर्थत्वात् न प्रत्ययार्थान्वयाद्यनुपपत्तिः । ‘ शक्यादन्येन रूपेण भाने भवति लक्षणा ’ इति नियमस्य अप्रयोजकत्वादिति । एवं च घटशाब्दबोधे घटत्वशक्तिज्ञानत्वेन कारणतायां लाघवम् ।

अन्ये तु सर्वत्र व्यक्तिरेव पदार्थः । अशक्याया अपि जातेः उपलक्षणतया तदुपलक्षितव्यक्तिशक्त्यङ्गीकारेण न व्यभिचारानन्तशक्तिकल्पनादिदोषः । तदुक्तं ‘ आनन्त्येऽपि हि भावानामेकं कृत्वोपलक्षणम् । शब्दः सुकरसंबन्धो न च व्यभिचरिष्यति ॥ ’ इति ।

परे तु जातिविशिष्टा व्यक्तिर्वाच्या । अन्यथा घटत्वांशे शक्त्यभावेन घटत्वादेः शाब्दविषयत्वासंभवात् । **न च** घटविशेष्यकघटत्वप्रकारकबोधे जातिशक्तिज्ञानत्वेन व्यक्तिशक्तिज्ञानत्वेन वा हेतुत्वात् नायं दोष इति **वाच्यम्** । द्रव्यादिपदानामपि एवमापत्तौ घटादिपदात् द्रव्यत्वप्रकारकबोधापत्तेः । **न च** पदज्ञानस्य संबन्धिज्ञानविषया हेतुत्वेन येन रूपेण उपस्थितयोः संबन्धः तेन रूपेण उपस्थापकत्वनियमः । एवं च घटत्वांशे शक्त्यग्रहेऽपि तेनैव रूपेण उपस्थितिः इति **वाच्यम्** । उपस्थितस्य आकाशादेरपि अन्वयापत्तेरिति । एवं च द्विकं प्रातिपादिकार्थ इति ।

यद्वा जातिव्यक्तिलिङ्गानि इति त्रिकमर्थः । लिङ्गं द्वेधा, शास्त्रीयव्यवहारहेतुः लौकिकं च, अवयवसंस्थानविशेषवत्त्वं अन्त्यं तत्तद्व्यक्तिविशेषनिष्ठं व्यवस्थितम् , इयं व्यक्तिः, अयं पदार्थः, इदं वस्तु इति सर्वत्र व्यवहारात् । अव्यवस्थितं लिङ्गत्रितयनिबन्धनकार्योपयुक्तं आद्यम् । तच्च सत्त्वरजस्तमोगुणानां वृद्ध्यपचयस्थितिरूपमिति **पतञ्जलिस्वामिनः** । स्त्रीत्वपुंस्त्वनपुंसकत्वादिर्जातिरेव इत्यन्ये । तत्र लौकिके लिङ्गे शक्तिः । अलौकिके गौण्या प्रयोगः आरोपात् । ‘ पशुना यजेत ’ इत्यादौ मुख्यपुंस्त्वविवक्षणात् न स्त्रीपशुना यागप्रसङ्ग इत्याहुः । **अन्ये** तु पशुशब्दस्य लिङ्गत्रयसाधारण्येन प्रयोगेऽपि मान्त्रवर्णिक-

च्छागपदस्य व्यवस्थितप्रयोगेण लौकिकपुंस्त्वे शक्तिमादाय दोषोद्धार इत्याहुः ।

यद्वा शास्त्रीयं लिङ्गं शब्दनिष्ठमेव, लौकिकं तु अर्थनिष्ठम् । तत्र अर्थनिष्ठे शक्तिः । कुमारब्राह्मणपदानां तत्रैव प्रयोगात् । अत एव ‘ प्रास्मा अग्निं भरत ’ इत्यत्र उपस्थितव्यक्तिगतपुंस्त्वे शक्तिस्वीकारात् केवलमेष्यामूहः । शब्दगते लक्षणा इति ।

अत्र टाबादीनां ङीबादीनां शीप्रभृतीनां द्योतकत्वं अस्मिन्मते । ङीबादीनामेव वाचकत्वं इत्यपि **के चित्** ।

यद्वा जातिव्यक्तिलिङ्गसंख्या इति चतुष्कं प्रातिपदिकार्थः । ‘ दधि पश्य ’ इत्यादौ प्रातिपदिकादेव तत्प्रत्ययात् । एवं च विभक्तेर्द्योतकत्वमात्रम् । तेनैव च नामार्थप्रकारकशाब्दबोधे सुबादिजन्योपस्थितेर्हेतुत्वनिर्वाह इति दिक् । एतत् सर्वं महाभाष्ये ‘ सरूपाणामेकशेषः ’ (पा. १।२।६४) इति सूत्रे स्पष्टम् ।

आलङ्कारिकास्तु ‘ विषयत्वमनादृत्य शब्देनार्थः प्रकाश्यते ’ इतिमतावष्टम्भेन पञ्चकं प्रातिपदिकार्थः ।

परे तु शब्दस्यापि प्रातिपदिकार्थत्वात् षट्कं प्रातिपदिकार्थः । तथाहि -- ‘ गामुच्चारय ’ इत्यादिलौकिकप्रयोगे ‘ शिपिविष्टवतीषु रथंतरं गायति ’ इत्यादिवैदिकप्रयोगे च शब्दोऽपि भासते इति निर्विवादम् । वृत्तिविषय एव शाब्दबोधे विषयः इति नियमः । तथा च शब्दस्यापि शब्दशक्तिविषयतया भानं अङ्गीकार्यम् । तत्र घटादिपदे शब्दनिरूपिताऽपि शक्तिः भिन्ना कल्प्यते इति **के चित्** ।

अन्ये तु शक्तिविषयः अर्थो भासते । शक्तिविषयत्वं च आश्रयतानिरूपकतान्यतरसंबन्धेन शक्तिमत्त्वम् । तथा च अर्थशक्तिज्ञानेनैव पदस्यापि भानम् । तेन घटादिपदानां शक्तिसंबन्धेन घटत्वादिवत् पदमपि शक्यम् । एतावांस्तु विशेषः यत् संबन्धस्योभयनिरूप्यत्वेन संबन्धिद्वयोपस्थापकत्वाविशेषात् घटत्वाद्यवच्छिन्नशक्त्यैव घटादिवत् शब्दस्यापि तथैव वृत्त्या उपस्थितौ सत्यां अर्थबोधे तात्पर्ये सति तत्र विशेषणतया स शब्दो भासते । तत्रापि घटत्वादिरूपेण विशिष्य शक्तिग्रहवतां पदजात्युभयप्रकारकबोधः । नलयुधिष्ठिरादिपदवद्विशिष्य शक्तिग्रहाभावे तु व्यक्तिविशेष्यकः केवलपदप्रकारकः नलपदवाच्यः कश्चित् इत्याद्याकारको बोधः । यत्र तु उक्तोदाहरणेषु शब्दमात्रे तात्पर्यं तदा तत्र शक्त्या शब्दस्वरूपस्य प्राधान्येन भानमिति । एवं च क्वचित् तात्पर्यवशात् शब्द एव प्राधान्येन भासते क्वचित् तदभावे अर्थविशेषणत्वेन इति सिद्धम् ।

अत एव ‘ अग्निहोत्रं जुहोति ’ इत्यादौ तस्य विशेषणत्वेन अन्वयात् अग्निहोत्रनामकेन इति बोधः ।

एतेन अग्निहोत्रनामके निरूढलक्षणा इति निरस्तम् । अनुपपत्त्यभावात् । मत्वर्थलक्षणातौल्येन सिद्धान्तानुबन्धाच्च । अतः शब्दोऽपि वाच्यः । एवं च ‘ उदेति सविता ताम्रस्ताम्र एवास्तमेति च । संपत्तौ च विपत्तौ च महतामेकरूपता ॥ ’ इत्यादौ ‘ रक्त एवास्तमेति ’ इति यदा क्रियते तदा पदान्तरप्रतिपादितः स एवार्थः अर्थान्तरतयैव प्रतिभासते इति काव्यप्रकाशोक्तिः संगच्छते ।

अतः षट्कं प्रातिपदिकार्थः इति । तदुक्तम् ‘ ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा । तथैव सर्वशब्दानामेते पृथगवस्थिते ॥ ’ इति दिक् । **मणि. पृ. ११८–१२३.** * प्रातिपदिकार्थः प्रधानं विभक्त्यर्थो गुणः । सति प्रातिपदिकार्थे विभक्त्यर्थेन भवितव्यम् । **भा.** ९।३।५।१५. * प्रातिपदिकार्थो यद्यपि गौणः, प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्यात् , तथापि ‘ पौर्णमास्यां चतुर्होत्रा अभिमृशेत् ’ इत्यादौ अभिम्रष्टव्यविशेषानवगमात् समस्तस्रुवादिविषयसंशयोपप्लवे सति विशेषोऽन्यतः एव लब्धव्यः इति साकाङ्क्षत्वात् असंदिग्धपरिग्रहार्थं प्रथमगृहीतत्वेन च प्रातिपदिकार्थं मुख्यमाश्रित्य विभक्तिः सप्तम्यर्थेऽवकल्पते पौर्णमास्यामिति । **वा.** ३।७।३।१० . * ‘ प्रातिपदिकार्थः सत्ता ’ इति सत्त्ववाचित्वस्मृतिः । **सु.** पृ. ९५४. * गुणश्च विभक्त्यर्थः, प्रधानं **प्रातिपदिकार्थः** । प्रातिपदिकार्थविशेषो विभक्त्या अभिधीयते । **भा.** ९।३।५।१५. * **प्रातिपदिकार्थस्य** लिङ्गसंख्यापेक्षया प्राधान्यं स्मर्यते । **सु.** पृ. १०१४.

* **प्रातिपदिकार्थकारकत्व**वाचिनी विभक्तिः । **सु.** पृ. ७३९.

* 'प्रातिपदिकार्थ–लिङ्ग–परिमाण– वचनमात्रे प्रथमा' (पा० २।३।४६) इति सूत्रं प्रथमायाः लिङ्गपरिमाणवचनेषु शक्तिग्राहकं इति वैयाकरणाः। नेदं शक्तिग्राहकम्, किन्तु नेयं कारकविभक्तिः इति सूचनार्थम्। **मणि.** पृ. १२४–१२५.

* **प्रातिपदिकावृत्तिलक्षणः** वाक्यभेदः द्विविधः समासासमासभेदात्। **बाल.** पृ. १८१.

* **प्रातिपदिकत्वं** धातुप्रत्ययतदन्तभिन्नत्वे सति अर्थवच्छब्दत्वम्। **मणि.** पृ. ११८.

* **प्रातिपदिकविभक्त्योः** प्रातिपदिकं प्रधानम्, धर्मिवाचकत्वात्। विभक्तिस्तु कर्मत्व–करणत्वादिधर्मवाचकत्वात् गुणभूता। **वि.** ९।३।५.

* **प्रातिपदिकविशेषणं** हि स्त्रीशब्दः ('अजाद्यतष्टाप्' इत्यत्र)। स्त्रियां यत् प्रातिपदिकं वर्तते तत-ष्टाबादयः इति। **भा.** ९।१।९।३३.

* '**प्रातिशाख्यानि** वा यानि स्वाध्यायवदधीयते।' प्रातिशाख्यैः पुनः वेदसंहिताध्ययनानुगतस्वरसंधिप्रयतिविवृतिपूर्वाङ्गपराङ्गाद्यनुसरणात् वेदाङ्गत्वमाविष्कृतम्। **वा.** १।३।८।२४ पृ. २६५। सर्वानुदात्तपदसंहतिः प्रयतिः, असंहिता विवृतिः। स्वरितस्योदात्तोऽशः पूर्वाङ्गः, अनुदात्तः पराङ्गः। **सु.** पृ. २८७.

* मन्त्रशास्त्रे मातृकान्यासादौ दीर्घऌवर्णो यद्यपि स्वीकृतः, तथापि **प्रातिशाख्यन्यायेन** अन्यत्र असौ नोपयुज्यते एव (यथा तत्प्रातिशाख्योक्तं तच्छाखायामेव नान्यत्र तथा)। **शब्दकौस्तुभ.** २ ऋऌक्सूत्रे.

* **प्राथमिकहविःशेषात्** स्विष्टकृदाद्यनुष्ठानम्। ३।४।१६. **मीको.** पृ. २७५२ 'प्रथमोपस्थितन्यायः' इत्यत्र द्रष्टव्यम्।

* **प्रादाव्येनाग्निना** आहवनीयादेः संसर्गे प्रायश्चित्तम् 'अग्नये शुचयेऽष्टाकपालं निर्वपेत्' इति। **भा.** १२।४।७।२२.

* **प्राधान्यं** विना अनेकपदार्थवैशिष्ट्यायोगः। **सु.** पृ. ६८३. * प्राधान्यं स्तोत्रादीनाम्। **वि.** २।१।५. * **प्राधान्येनाभिधानं** तात्पर्येणाभिधानम्, न शेषित्वेन। **वा.** ३।४।४।१२ पृ. ९०३. * 'प्राधान्येन व्यपदेशा भवन्ति' इति न्यायेन ('सोमेन यजेत' इत्यत्र) वाक्यीयाङ्गत्वस्य श्रौताङ्गत्वस्य वा व्यवहारः। **मुरारि.** पृ. ११७२, * 'प्राधान्येन व्यपदेशा भवन्ति' इति न्यायेन ('ऐन्द्या गार्हपत्यमुपतिष्ठते' इत्यत्र) श्रौताङ्गत्वस्य व्यवहारः, न तु वाक्यीयाङ्गत्वस्य। पृ. ११७९.

* **प्राधान्यलक्षणं** साधकतमत्वम्। **सु.** पृ. ७४४.

* **प्राप्तस्य** पुनरुपदेशे न किञ्चित् प्रयोजनमस्ति। **भा.** १०।८।१४।४०. * प्राप्तस्य पुनर्वचनं तावन्मात्रफलं अनर्थकं इति सामर्थ्यात् प्रकर्षगतिर्विज्ञास्यते। यथा 'अभिरूपाय कन्या देया' इत्यत्र अभिरूपतराय इति गम्यते। **वा.** ३।३।१३।३४ पृ. ८८०. * प्राप्तस्य पुनः श्रवणं असति प्रयोजने अन्यस्मिन् परिसंख्यार्थमेव भवति। **भा.** ७।३।९।२५. * **प्राप्ते** कर्मणि अनेकार्थगुणविधानं न च संभवति। **वा.** २।२।९।२३ पृ. ५३९. * प्राप्ते कर्मणि **अनेकगुणविधौ** वाक्यभेदप्रसङ्गः। **वि.** २।३।११. * प्राप्ते कर्मण्यपि एकपदोपात्तानेकार्थविधिः शोणाद्युदाहरणैस्तत्र तत्र प्रतिपादितः। **वा.** ३।६।७।२२, * 'प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः। अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः ॥' कर्मोत्पत्तिवाक्ये हि प्रत्ययो भावनां अप्राप्तत्वात् विधातुमुपक्रमते। सा च यावत् धात्वर्थकारकैः न परिपूर्यते तावत् अनुष्ठातुमयोग्या इति न विधित्वपर्यवसानम्। तत्र भावना आत्मांशभूतावगतकारकसामान्यान्यथाऽनुपपत्त्या आक्षिप्तविशेषोपलिप्सायां स्ववाक्योच्चारितकारकविभक्त्यन्तपदप्रतीतैर्विशेषैः भावनामात्राकाङ्क्षिभिः वाक्यादेव विशेष्यते। प्रतिपदं च यावत्किञ्चिद् द्रव्याश्रितं जातिलिङ्गसंख्यादि तत्सर्वमेकपदोपादानलक्षणश्रुतिप्रतिलब्धविशेषणविशेष्यभावं अप्रतिपन्नपरस्परशेषशेषित्वं विभक्तिश्रुत्यैव कारकात्मना भावनार्थत्वं प्रतिपद्यते। एवं यावन्ति पदानि संनिकर्षविप्रकर्षस्थानि तानि सर्वाणि अनुषङ्गाधिकरणोक्तेन मार्गेण (२।१।१६) अनादृत्य संनिकर्षविप्रकर्षौ युगपत् संनिपतन्ति। ततः सर्वविशेषणविशिष्टां अनुष्ठानयोग्यां भावनामासाद्य विधिः समाप्यते। स च एकेनैव प्रयत्नेन तां विशिष्टां विदधाति, इति नानेकशक्तिकल्पनापत्तिदोषः। तथाहि, 'श्रौतव्यापारनानात्वे

शब्दानामतिगौरवम्। एकोक्त्यवसितानां तु नार्थाक्षेपो विरुध्यते ॥' विशिष्टायां भावनायां आधाय श्रौतं विधित्वं यदि अन्यत्रापि श्रुत्यैव पुनर्व्याप्रियेत, ततः पुनरुच्चारणदोषं अवैदिकत्वापत्त्या लभेत। अयं पुनः सकृद्विधाय निवृत्तव्यापारः स्वार्थान्यथानुपपत्त्या सर्वविशेषणेषु प्रत्येकनिष्ठानि विध्यन्तराण्याविर्भावयन् समाम्नायावगतैकरूपापरित्यागेनैव असकृदुच्चारणफले वर्तते। २।२।३।६ पृ. ४८५, * प्राप्ते कर्मणि संबन्धद्वयकरणे वाक्यं भिद्यते। ३।१।११।२१ पृ. ७३४. * 'प्राप्ते पुनरारम्भो नियमाय' इति न्यायेन 'यज्ञोपवीत्येवाधीयीत याजयेद्यजेत वा' इति विहिते पुनः 'उपव्ययते' इति विधिः दर्शपूर्णमासयोः पित्र्येऽपि कर्मणि यज्ञोपवीत्येव कुर्यात्। **सत्याश्रौ.** १।१।५७ **वैजयन्ती.** * प्राप्ते वचनं न विधिरिति गम्यते। प्राप्तस्यानुवादो भवितुमर्हति। **भा.** ६।३।१३।३१.

* **प्राप्तानुवादेन** हि अप्राप्तं विधेयमिति न्यायः। (स्पष्टार्थः)। **आभरणम्.** ३।३।९।१८ व्रसू.

* **प्राप्ताप्राप्तविवेकन्यायः**। 'अग्नीषोमीयेण यजेत पौर्णमासीम्, अमावास्यामभिचरन्' इति वाक्ये दार्शिकाग्नेयदेवतोद्देशेन भ्रातृव्यवत्प्रयोगे सोमसाहित्यविधिः प्राप्ताप्राप्तविवेकेन तथा पर्यवसानात्। इति पूर्वपक्षः। **संकर्ष.** १।२।१७. * प्राप्ताप्राप्तविवेकन्यायः। न च ('शाहौ' इत्यत्र) विशिष्टस्य विधेयत्वेऽपि प्राप्ताप्राप्तविवेकन्यायेन 'शा' शब्दे एव विधेयता पर्यवस्यति ...। **भूतिः.** पृ. १५८ **परि०** ४०.

* **प्राप्तपरिसंख्या** त्रिदोषा। अस्या भाष्यवार्तिकोक्तमुदाहरणं सिद्धान्ते नास्त्येव। पूर्वपक्षे तु गृहमेधीये पञ्चमे पक्षेऽस्ति। भाष्यकारान्तरमते तु सिद्धान्तेऽप्यस्ति यथा, दशमे अङ्गिरसां द्विरात्रे 'वैखानसं पूर्वेऽहन् साम भवति षोडश्युत्तरे' इति। तत्र द्विरात्रोत्तमाह्नानां अतिरात्रसंस्थत्वात् प्रकृत्यतिरात्रतः षोडशिविकल्पे प्राप्ते 'उत्तरेऽहन् द्विरात्रस्य गृह्यते' इति वाक्यान्तरेणानारभ्याधीतेन षोडश्युत्तरे इत्यनेन अङ्गिरसां द्विरात्रे एव परिसंख्यायते तेन द्विरात्रान्तरे विकल्पः इति। स्मार्तोदाहरणं तु अस्त्येव, यथा 'पञ्च पञ्चनखा भक्ष्याः' इति। **बाल.** पृ. २५.

* **प्राप्तबाधः** द्विविधः नित्यो वैकल्पिकश्चेति। **बाल.** पृ. १३१. * प्राप्तबाधः नाम 'साधारणस्य शास्त्रस्य विशेषविषयादिना। संकोचः क्लृप्तरूपस्य प्राप्तबाधोऽभिधीयते ॥' यत्र क्लृप्तस्यैव शास्त्रस्य सामान्यद्वारेण विशेषानुपसर्पतः क्वचित् विशेषयागादिना प्राप्तिरपोद्यते, तत्र प्राप्तबाधः। **न्यायमाला.** अङ्गनिर्णयः श्लो. १४. * प्राप्तबाधः, प्राकृताङ्गस्य विकृतौ चोदकप्राप्तस्य प्रत्याम्नानात् अर्थलोपात् प्रतिषेधाद्वा यो बाधः। यथा प्राकृतानां कुशानां प्रतिकूलशराम्नानात्, अवघातस्य कृष्णलेषु वैतुष्यरूपप्रयोजनस्य लोपात्, पित्र्येष्टौ होतृवरणस्य 'न होतारं वृणीते' इति प्रतिषेधात्। **मीन्या.** * प्राप्तबाधः यत्र अतिदेशसामान्यशास्त्रादिजनिते ज्ञाने अंशे सर्वविषये वा 'मिथ्येदं' इति प्रत्ययान्तरं भवति स प्राप्तबाधः। अयं प्रमेयापहारलक्षणो बाध इत्युच्यते। **बाल.** पृ. १३१. * प्रमाणतदाभास–नित्यनैमित्तिक–क्रत्वर्थपुरुषार्थ– पौर्वापर्य– प्राकृतवैकृत– सामान्यविशेष–निष्प्रयोजनसप्रयोजन–अल्पभूयस्त्व–सावकाशानवकाश – अङ्गप्रधान–तद्धर्मबाधेषु **प्राप्तबाधः**। **वा.** ३।३।७।१४ पृ. ८६१. * यत्र प्रापकप्रमाणं क्लृप्तं तत्र प्राप्तबाधः, यथा सामान्यशास्त्रस्य विशेषशास्त्रेण। प्राप्तबाधत्वं नाम क्लृप्तस्य बोधकस्य विशेषविषयताप्रतिबन्धकत्वम्। **कौ.** ३।३।७।१४ पृ. ३६८.

* **प्राप्तबाधभेदाः**, नित्याः २८+ वैकल्पिकाः ४८ =७६। यदा तु नित्यबाधभेदाः जातिद्रव्यगुणक्रियाविषयत्वेन भिन्ना निरूप्यन्ते तदा ते ११२ भवन्ति इति नित्याः ११२+वैकल्पिकाः ४८ = १६० इति प्राप्तबाधभेदा भवन्ति। **बाल.** पृ. १३४.

* **प्राप्त्यां** अधिकरणे प्रयोजनं न वक्तव्यम्। उत्तरविवक्षा तत्र प्रयोजनम्। **भा.** २।१।७।३२.

* **प्राप्तिपूर्वकं** हि दर्शनं भवति। **भा.** १२।४।१४।४१, * **प्राप्तिपूर्वकः** प्रतिषेधो भवति। १०।८।१०।२२.

* **प्राप्तिरूपं** वैदिकं कर्म यथा, पयो दोग्धि । दोहनं दुग्धप्राप्त्यर्थम् । **बाल.** पृ. ८४.

* **प्राप्यं** ईप्सितं कर्म । सतः अप्राप्तस्य प्रापणं प्राप्तिः । यथा ' पयो दोग्धि ' । **मणि.** पृ.१२९ .

* **प्राबल्यं** पदार्थस्य पदार्थधर्मापेक्षया । **वि.** १।३।४ . * प्राबल्यं पूर्वपूर्वस्य श्रुतिलिङ्गादीनाम् । ३।३।७।१४ . * प्राबल्यं श्रुतेः स्मृतिभ्यः । **वि.** १।३।२ .

* **प्राभाकराः** अनीश्वरवादिनः । **कु.** १।२।१।१८ पृ. २६. * **प्राभाकरैः** वृत्तिकारान्तरैश्च ' आम्नायस्य क्रियार्थत्वात् ' (१।२।१।१) इति सूत्रं सकलवेदाप्रामाण्यपरतया व्याख्यातम् । तन्न युक्तम् । **सु.** पृ. ६ .

* **प्राभाकरवत्** अस्माभिः द्रव्यहानेरङ्गहानेश्च प्रतिसमाधानमनपेक्ष्य नानुष्ठानमिष्यते । **सोम.** ६।१।९. * प्राभाकरवत् कार्य-नियोगापरपर्यायस्वतन्त्रापूर्वाभ्युपगमे परोक्ता दोषाः स्युः , नास्मदभिमतशक्तिरूपाभ्युपगमे । **सु.** पृ. ५९८ .

* **प्रामाण्यं** अकार्यबोधकवाक्यानाम् । १।२।१।१-१८. * प्रामाण्यं अप्रामाण्यं च ज्ञानस्य उभयं स्वतः इति सांख्याः , उभयं परतः इति तार्किकाः । अप्रामाण्यं स्वतः प्रामाण्यं तु परतः इति बौद्धाः । प्रामाण्यं स्वतः अप्रामाण्यं तु परतः इति मीमांसकाः । **वैद्यनाथ.** १।१।२।२ पृ. १४ . * प्रामाण्यं अर्थतथात्वरूपविषयधर्मः, यन्निमित्तौ ज्ञाने प्रमाण-बुद्धिव्यपदेशौ भवतः । तच्च स्वतो गृह्यते ज्ञानेनैव विषयीक्रियते घटादीव । **बाल.** पृ. ६ . * प्रामाण्यं आचमनादिस्मृतीनाम् । १।३।३।५-७. * प्रामाण्यम् । तार्किकास्तु प्रमाकरणं प्रमाणम् । प्रमात्वं च यथार्थानुभवत्वम् । याथार्थ्यं च तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वम् । अनुभवत्वं तु ' अनुभवामि ' इतिप्रतीतिसिद्धः साक्षात्कारानुमित्युपमितिशाब्दबोधसाधारणः स्मृतिव्यावृत्तो जातिविशेषः । न तु अगृहीतग्राहित्वं धारावाहिके अव्याप्तेः इत्याहुः । **तदेतदयुक्तम्** । ' अनुभवामि ' इतिप्रतीतिसिद्धानुभवत्वस्य साक्षात्कारे एव सत्त्वेन अनुमित्यादौ अव्याप्तेः । ' स्वर्गमनुभवामि ' ' पर्वते वह्निमनुभवामि ' इति प्रतीत्यभावेन अनुमित्यादौ तत्सत्त्वे मानाभावात् । तस्मात् अनधिगतार्थगन्तृत्वमेव अनुभवत्वम् । न च धारावाहिके अव्याप्तिः, तत्तत्क्षणविशिष्टघटादेः पूर्वपूर्वज्ञानागृहीतस्यैव उत्तरोत्तरज्ञानविषयत्वात् , ' इदानीं स्पृशामि ' ' इदानीं पश्यामि ' इत्यादिप्रतीत्या कालस्यापि षडिन्द्रियवेद्यत्वात् , कालान्यद्रव्यचाक्षुषत्वस्यैव रूपकार्यतावच्छेदकत्वात् , अनुभवानुसारेण कार्यकारणभावकल्पनात् अन्यथा लाघवात् चाक्षुषत्वस्यैव कार्यतावच्छेदकत्वापत्तेः ।

न च कालः अतिसूक्ष्मत्वात् कथं प्रत्यक्षग्राह्य इति वाच्यम् । ज्ञानधारायामुपरतायां ' किमत्र घटोऽवस्थितः ' इति पृष्टः सन् कथयति ' अस्मिन् क्षणे मयोपलब्धः ' इति ' प्रातरारभ्य एतावन्तं कालं मयोपलब्धः ' इति च । कालभेदे तु अगृहीते कथमेवं भवेत् । ' शतपत्रपत्रशतं मया सूच्या युगपद् भिन्नम् ' इति तु स्थूलकालविषयकम् ।

वस्तुतस्तु धारावाहिकस्थले तावत्कालव्यापिनी एकैव ज्ञानव्यक्तिः, कारणभेदाभावात् , तद्भेदकल्पने मानाभावात् , योग्यविभुविशेषगुणानां त्रिक्षणावस्थायित्वस्य परिभाषामात्रत्वात् ।

वस्तुतस्तु स्वसमानविषयकज्ञानानपेक्षोत्पत्तिकज्ञानत्वमेव अनधिगतार्थगन्तृत्वम् । अतः कालभेदस्य इन्द्रियवेद्यत्वाभावेऽपि न क्षतिः । दिनान्तरे गृहीतस्य घटादेः दिनान्तरे पुनर्ज्ञानमपि प्रमैव । याथार्थ्यमपि प्रमाणलक्षणे देयम् । तच्च तद्वति तत्प्रकारकत्वम् , विशेष्यावृत्त्यप्रकारकत्वं वा । अनुमितेरपि वह्निविशिष्टः पर्वतो विषयः इति अनधिगतार्थगन्तृत्वम् । न च पर्वतस्य अनुमितिविषयत्वे ' पर्वतमनुमिनोमि ' इत्यनुव्यवसायापत्तिः, विधेयताख्यविषयताशालिन एव ' अनुमिनोमि ' इत्यनुव्यवसायभाननियमात् । एवं उपमितावपि अनधिगतार्थगन्तृत्वं बोध्यम् । लौकिकशब्दजन्यज्ञानं तु न प्रमा, अनधिगतार्थगन्तृत्वाभावात् । न च लौकिकशब्दः प्रमाणम् , उक्तप्रमाकरणत्वाभावात् । लौकिके शब्दे तज्जन्यज्ञाने च प्रामाण्यव्यवहारस्तु तद्वति तत्प्रकारकत्वांशमादाय गौणः । आप्तत्वं च अत्रैवोपयुज्यते । वेदस्तु प्रमाणम् , तस्य उक्तलक्षणाक्रान्तत्वात् । 'व्रीहिमिर्यजेत ' इत्यादिवाक्येषु यागादिपदार्थविषये अप्रामाण्य-

मिष्टमेव । तदुक्तम् ' ब्राह्मणार्थो यथा नास्ति कश्चिद् ब्राह्मणकम्बले । देवदत्तादयो वाक्ये तथैव स्युरनर्थकाः ॥ ' इति (वा. १।३।८।२४ पृ. २७३) । (अत्र श्लोके **सुधा**– यथा ब्राह्मणशब्दे ब्रह्मशब्दार्थो नञर्थश्च णकारार्थ एव वा ज्ञानाख्यः अनिरुपाख्यश्च नास्ति, कम्बलशब्दे च कंशब्दार्थः बलशब्दार्थो वा नास्ति, तथा देवदत्तादयः शब्दाः वाक्ये अनर्थकाः स्युः इति टीकाकारश्लोकार्थः । पृ. ३०४) ।

प्रामाण्यं च स्वतः । अप्रामाण्यं तु परतः । स्वतस्त्वं च कारणगुणसंवाद्यर्थक्रियाज्ञानानधीनत्वम् । परतस्त्वं तु बाधकज्ञानकारणदोषविसंवादज्ञानाधीनत्वम् । याथार्थ्यघटितप्रामाण्यस्य स्वतस्त्वम् , अयाथार्थ्यरूपाप्रामाण्यस्य च परतस्त्वं ज्ञानग्राह्यत्वं कारणदोषादिज्ञानग्राह्यत्वं च क्रमेण बोध्यम् । **कु.** १।१।५।५ पृ. ६-७. * प्रामाण्यं नास्ति ' औदुम्बरी सर्वा वेष्टयितव्या ' इत्यादिस्मृतेः । **वि.** १।३।२. * प्रामाण्यं नास्ति प्रत्यक्षादेर्धर्मे । १।१।४।४. * प्रामाण्यं नास्ति बाह्यग्रन्थानाम् । **वा.** १।३।२।४ पृ. १९४. * प्रामाण्यं नास्ति वेदाविरुद्धस्यापि शाक्यवचनस्य । **भाट्ट.** १।३।३ वर्णकं २ . * प्रामाण्यं नास्ति श्रुतिविरुद्धायाः स्मृतेः । १।३।२।३-४. * प्रामाण्यं नास्ति स्वतः कल्पसूत्राणाम् । १।३।६।११-१४. * प्रामाण्यं परत उत्पद्यते (गुणतः) एवं ज्ञानान्तरेण गृह्यते च । अर्थक्रियादिज्ञानेषु तु अगत्या स्वतःप्रामाण्यग्रहाङ्गीकारः । इति नैयायिकाः । **मणि.** पृ. १४, * प्रामाण्यं प्रमाकरणत्वम् । पृ. ११. * प्रामाण्यं म्लेच्छप्रसिद्धशब्दार्थस्य आर्यप्रसिद्ध्यविरोधे । १।३।५ . * प्रामाण्यं यागनामतया उद्भिद्-बलभिद्- विश्वजित्-आदीनाम् । १।४।१।१. * प्रामाण्यं वाक्यार्थस्य पदार्थमूलतया । **भा.** १।१।७।२४-२६ . * प्रामाण्यं सदाचाराणां वसन्तोत्सवादीनाम् । **वा.** १।३।३।७ पृ. २०३ . * प्रामाण्यं स्मृतीनाम् । १।३।१।१-२ . * प्रामाण्यं स्वतः अप्रामाण्यं तु परतः । स्वतस्त्वं च कारणगुणसंवाद्यर्थक्रियाज्ञानानधीनत्वम् । परतस्त्वं तु बाधकज्ञानकारणदोषविसंवादज्ञानाधीनत्वम् । **कु.** १।१।५।५. * प्रामाण्यं स्वतः विधेः , अबोधकत्वसापेक्षत्वयोरप्रामाण्यकारणयोरभावात् । **वि.** १।१।५ . * 'परिच्छेदफलत्वाद्धि प्रामाण्यमुपजायते । ' **श्लोवा.** शब्दपरिच्छेदः १०४. * **प्रामाण्यस्य** स्वतस्त्वं कारणगुणसंवादार्थक्रियाज्ञानानधीनत्वम् । **बाल.** पृ. ५-६.

* **प्रामाण्याभावः** (अननुष्ठानलक्षणः) श्रुतिविरुद्धस्मृतीनाम् । **भा.** १।३।२।३-४.

* **प्रामाण्यपरीक्षा** धर्मे प्रमाणानाम् । **भा.** १।१।३।३.

* **प्रामाण्यवादः** । ज्ञानप्रामाण्यं ज्ञानहेतुभिन्नहेतुजन्यं ज्ञानग्राहकभिन्नज्ञानग्राह्यं च, उत्तरज्ञानसामग्रीजन्यं ज्ञानग्राहकसामग्रीग्राह्यं वेति चिन्त्यते ।

अत्र नैयायिकाः । ' प्रमात्वं ज्ञानसामान्यकारणभिन्नकारणजन्यतावच्छेदकं ज्ञानवृत्त्यनित्यधर्मत्वात् अप्रमात्ववत् ' इत्यनुमानेन प्रमात्वस्य इन्द्रियादिगतगुणजन्यत्वं सिध्यति । दोषाभावस्य कारणत्वे गौरवात् , ' पीतः शङ्खः ' इति शङ्खप्रमानुत्पत्तिप्रसङ्गाच्च । अन्वयव्यतिरेकाभ्यां तद्धेतुकत्वसिद्धेश्च । एवं च प्रमायां गुणः भ्रमे च दोषः कारणम् ।

किञ्च रङ्गादपि रजतज्ञानोत्पत्तिदर्शनात् न ज्ञानमात्रस्य तत्प्रकारकत्वावच्छिन्नतद्वद्विशेष्यकत्वनियमः । अतस्तत्र भिन्ना सामग्री वाच्या । ज्ञानसामान्यकारणजन्यत्वे जन्यज्ञानमात्रस्य प्रमात्वप्रसङ्गः । तेन प्रामाण्यं अप्रामाण्यं च परत उत्पद्यते । एवं ज्ञानान्तरेण गृह्यते । तच्च ' इदं ज्ञानं प्रमा, गुणवत्कारणजन्यत्वात् , अर्थक्रियासंवादात् , बाधाभावात् ' इत्याद्यनुमानम् । संवादत्वं च तद्विषयविषयकत्वम् । न चैवं वेदवाक्यजन्ययागस्वर्गसाध्यसाधनभावज्ञाने अर्थक्रियासंवादाभावात् न कदाऽपि प्रामाण्यनिश्चयः स्यादिति **वाच्यम्** । तेषां ईश्वरवाक्यजन्यतया गुणवत्कारणजन्यत्वेन तदनुमानात् । **न च** अर्थक्रियादिज्ञानेषु कथं प्रामाण्यनिश्चयः इति **वाच्यम्** । अगत्या तत्र स्वतःप्रामाण्यग्रहाङ्गीकारात् । तस्मात् परतः प्रामाण्यं निश्चीयते इत्याहुः ।

सिद्धान्तस्तु-- अनन्तगुणानां हेतुत्वमपेक्ष्य ज्ञानसामान्यसामग्रीजन्यत्वस्यैव उचितत्वात् दोषवदिन्द्रियजन्यस्यापि धर्म्यंशे प्रमात्वाच्च ।

एतेन गुणज्ञानज्ञाप्यत्वं दोषाभावज्ञानज्ञाप्यत्वं चापास्तम् । अनेकदोषाभावानां अननुगतत्वेन गौरवात् ।

अतो न ज्ञानोत्पत्तेः परतस्त्वम् । नापि ज्ञप्तेः परतस्त्वं संभवति । तथाहि, नोदकाहरणरूपार्थक्रियाज्ञानेन अर्थनिश्चयद्वारा पूर्वज्ञाने प्रामाण्यनिश्चयः । तस्यापि स्वप्नावस्थायां अर्थव्यभिचारेण तेन अर्थनिश्चयासंभवात् । नापि तज्जन्यसुखोत्पत्त्या, अयथार्थादपि स्वप्ने चन्दनलेपादिज्ञानात् सुखोत्पत्तेः तस्यापि अर्थव्यभिचारात् ।

किञ्च, उदकाहरणादिरूपार्थक्रियया व्याप्यविषया घटनिश्चयः । व्याप्तिश्च संबन्धरूपा इति नागृहीते संबन्धिनि ग्रहीतुं शक्यते । तत्र संबन्धिघटज्ञाने स्वत एव प्रामाण्यनिश्चयो वाच्यः । एवं गुणज्ञानसंवादज्ञानयोरपि । न च एताभ्यां विषयो निश्चेतुं शक्यते । न च तत्रापि ज्ञानान्तरेण प्रामाण्यनिश्चयः, अनवस्थापत्तेः ।

एवं च स्वत एव अर्थतथात्वनिश्चयो वाच्यः । एवं तर्हि घटादिज्ञानेऽपि स्वत एव प्रामाण्यम्, तस्यापराधाभावात् । तेन ज्ञानग्राहकेणैव तस्य ज्ञानं इति सिद्धं प्रामाण्यज्ञप्तेः स्वतस्त्वम् ।

किञ्च, ज्ञानं न प्रत्यक्षम् । तस्य प्रत्यक्षत्वे निर्विकल्पकप्रत्यक्षवारणाय–निष्प्रकारकत्व–निर्विशेष्यकत्व-निःसंसर्गकत्वानां विनिगमकाभावेन त्रयाणामपि प्रतिबन्धकत्वकल्पने गौरवात् । **न च** विशिष्टवैशिष्ट्यप्रत्यक्षे विशेषणतावच्छेदकप्रकारकनिश्चयस्य हेतुतया तदभावात् न निर्विकल्पकप्रत्यक्षतापत्तिः इति **वाच्यम्** । 'विशेष्ये विशेषणं' इति रीत्या 'एकत्रोभयं' इति रीत्या वा तादृशप्रत्यक्षे विशेषणतावच्छेदकप्रकारकनिश्चयस्य हेतुत्वाभावेन तद्रीत्या निर्विकल्पकप्रत्यक्षापत्तेर्दुर्वारत्वात् ।

एवं च आवश्यकप्रतिबध्यप्रतिबन्धकभावकल्पनमपेक्ष्य आत्मनिष्ठगुणप्रत्यक्षे तादात्म्येन ज्ञानस्यैव धर्माधर्मभावनानामिव ज्ञानभावनादृष्टसाधारणवैजात्यकल्पनया तज्जात्यवच्छेदेनैव वा प्रतिबन्धकत्वकल्पनमुचितम् । 'जानामि' इत्याद्यनुभवानामपि 'अनुभवामि' इत्युपनीतमानत्वम् ।

एवं च विषयनिष्ठज्ञाततया तन्निष्ठमेव ज्ञानं अनुमीयते 'घटो ज्ञानवान्, ज्ञाततावत्त्वात्' इति । तत्र घटत्वनिष्ठप्रकारतानिरूपितविशेष्यतासंबन्धेन ज्ञानानुमितौ तादृशप्रकारतानिरूपितविशेष्यतारूपप्रामाण्यग्रहः । **न च** ज्ञाततायाः प्रमात्वाव्याप्यतया तदनुमापकत्वासंभव इति **वाच्यम्** । प्रमात्वस्याननुमेयत्वात् । ज्ञानानुमाने समानसंवित्संवेद्यतया ज्ञानत्ववत् प्रमात्वस्य स्वतस्त्वसंभवात् ।

न च ज्ञाततायाः मानाभावः । तस्याः विषयज्ञानातिरिक्तायाः आवश्यकत्वात् । तथाहि । न तावत् विषयता ज्ञानस्वरूपा, घटप्रकारकभूतलविशेष्यकज्ञानात् भूतलप्रकारकघटविशेष्यकानुव्यवसायापत्तेः । नापि विषयस्वरूपा, विशिष्टज्ञानसमूहालम्बनयोः अवैलक्षण्यापत्तेः । अत उभयातिरिक्ता । सा च नित्या, लाघवात् । अन्यथा अनन्ततत्तद्विषयकज्ञानैः अनन्ततत्तद्विषयतोत्पत्तितन्नाशकल्पनात् गौरवापत्तेः । एवं च नष्टयुधिष्ठिरादिविषयकज्ञानोत्पत्तिरपि सुलभेति युक्तम् ।

अन्ये तु आत्मघटयोः व्याप्यतालक्षणः संबन्धो मानसप्रत्यक्षः स विषयता इत्याहुः । तेषां भावं नाकलयामः ।

अन्ये तु तत्तज्ज्ञानजन्या तत्तद्विषयनिष्ठा ज्ञातता । सा च नष्टभाविविषयनिष्ठाऽपि ।

न च असतः कथं कार्योत्पत्तिरिति **वाच्यम्** । द्वित्वादिवत् उत्पत्तौ बाधकाभावात् । **न च** तत्र नष्टद्वित्वस्य स्मरणमिति **वाच्यम्** । अननुभूतद्वित्वस्य स्मरणासंभवात् । **न च** यावदाश्रयप्रत्यक्षं विना कथं द्वित्वप्रत्यक्षमिति **वाच्यम्** । लाघवेन संयोगप्रत्यक्षे तस्य हेतुत्वाङ्गीकारेण व्यासज्यवृत्तिधर्मप्रत्यक्षे तस्य हेतुत्वाभावेन तत्प्रत्यक्षस्य सुवचत्वात् । **न चा**श्रयप्रत्यक्षं विना कथं तन्निष्ठगुणप्रत्यक्षं इति **वाच्यम्** । वायुप्रत्यक्षत्वाभावेऽपि तन्निष्ठस्पर्शप्रत्यक्षस्य त्वयैव (नैयायिकेन) अङ्गीकारात् । अतो द्वित्वबहुत्वयोर्भाविभूतपदार्थनिष्ठत्ववत् तत्तज्ज्ञानोत्पाद्यविषयताया अपि भाविभूतपदार्थनिष्ठत्वम् । न च द्वित्वादेर्गुणस्य समवायिकारणाभावेन भाविभूतयोः कथमुत्पत्तिरिति वाच्यम् । समवायसंबन्धेन भावकार्योत्पत्तौ तादात्म्यसंबन्धेन द्रव्यस्य जनकता इति समवायिकारणकार्यकारण-

भावस्य वक्तव्यत्वेन संख्यायाः पदार्थान्तरत्वेन विषयतावत् समवायेन उत्पत्त्यभावेन समवायिकारणानावश्यकत्वात् । संख्याया विषयतायाश्च 'अभावं जानामि' 'अभावौ द्वौ' 'चतुर्विंशतिर्गुणाः' इति प्रतीत्या अभावगुणादिनिष्ठतया स्वरूपसंबन्धेनैव उत्पत्त्यङ्गीकारेण समवायिकारणानावश्यकत्वात् । न च द्वित्वादीनामाकस्मिकत्वप्रसङ्गः । अपेक्षाबुद्धेरिव जनकतया नियामकत्वात् । अपेक्षाबुद्धेरभिव्यञ्जकत्वे तु नित्यतया न तदापत्तिप्रसङ्गोऽपि । न च कार्यसमवेतगुणत्वेन अनित्यत्वानुमानात् कथं नित्यत्वमिति वाच्यम् । एकत्वेनाङ्गीकृतासु अरुणादिव्यक्तिषु व्यभिचारात्, अनुकूलतर्काभावेन अप्रयोजकत्वाच्च । **न चा**श्रयाभावे विषयताद्वित्वादेः क्वावस्थानमिति **वाच्यम्** । कपालादिनाशे क्षणमात्रं घटादेरिव विषयताया अपि सत्त्वे बाधकाभावात्, अतो नष्टघटादावपि 'घटो ज्ञातः' इत्याद्यनुभवात् भूतभाविनिष्ठत्वं इति दिक् । अत एव ज्ञानजन्यज्ञाततावत्त्वात् 'घटं जानामि' इति कर्मत्वोपपत्तिः ।

तस्मादतिरिक्ता विषयता । किञ्च ज्ञानेच्छाकृतिसंस्काराणां समानविषयकत्वेनैव कार्यकारणभावे लाघवादपि विषयता अतिरिक्ता । सैव च ज्ञातता । तयैव ज्ञानं गृह्यते, तन्निष्ठप्रमात्वमपि इति स्वतस्त्वम् ।

ननु एवं 'इदं ज्ञानं प्रमा न वा' इति संदेहो न स्यात्, ज्ञानाग्रहे धर्मिज्ञानाभावात् तद्–ग्रहे तन्निष्ठप्रमात्वस्यापि ग्रहात्, इति चेन्न । नायं ज्ञानविशिष्टप्रमात्वसंशयः किन्तु विषयसंशय एवायम् । 'पुरोवर्तिनि रजतत्वमस्ति न वा' इति रजतादिज्ञानोत्तरं प्रमात्वस्मरणे रजतादिज्ञाननाशात् तत्संशयोपपत्तेः । यद्वा धर्मिज्ञानाभावेऽपि धर्मीन्द्रियसंनिकर्षमात्रेण संशयोत्पत्तिः । यद्वा सत्यपि प्रामाण्यज्ञाने दोषवशादेव तदुत्पत्तिः । दोषश्च अनभ्यासदशानापन्न(दशापन्न)त्वं इति । तस्मात् युक्तं ज्ञप्तिप्रामाण्यस्य स्वतस्त्वमिति ।

गुरवस्तु घटादिमात्रविषयकं न ज्ञानम्, सर्वज्ञानानां त्रिपुटीविषयकत्वाङ्गीकारात् । त्रिपुटी च ज्ञानात्मविषयरूपा । तेन सर्वज्ञानं 'घटं जानामि' इत्याद्यनुव्यवसायाकारमिति । स्वेनैव स्वस्य घटादिविषयकत्वग्रहणात् ततः प्रामाण्यं इत्याहुः ।

मुरारिमिश्रास्तु घटादिज्ञानोत्तरं 'घटं जानामि' इत्याद्यनुव्यवसायो जायते, तेन घटत्ववद्विशेष्यकत्वघटत्वप्रकारकत्वरूपप्रामाण्यग्रहः इत्याहुः ।

वस्तुतो जलादिज्ञानोत्तरं प्रवृत्त्या जलादिनिश्चयोत्तरं पूर्वज्ञाने प्रामाण्यं जानाति इति कश्चित् ।

कश्चित्तु (स्वमतं) ज्ञात्वा प्रामाण्यं प्रवर्तते इत्यनुभवात् 'जातं ज्ञानं प्रमा न वा' इत्यादिसंशयानुभवात् न ज्ञानमात्रे स्वतःप्रामाण्यनिश्चयो युक्तः । नापि परतःप्रामाण्यं क्वचित् सिद्धान्तभङ्गापादकम् । किन्तु कुत्रचित् स्वतःप्रामाण्यग्रहः, क्वचित् परतः इत्यननुगत एव प्रामाण्यग्रहः शक्तिग्रहवत् । तेन वेदजन्यज्ञाने संशयाभावात् स्वतःप्रामाण्यं तद्भिन्नज्ञाने तु परतःप्रामाण्यं ज्ञायते । अत एव स्मृतिजन्यज्ञाने सन्मूलकत्वगुणज्ञानादेव प्रामाण्यं सिद्धान्तेऽपि अङ्गीकृतं इति युक्तमुत्पश्यामः । **मणि. पृ. १३–१८.**

*** प्रामाण्यवादः** । सर्वज्ञानानि अधिकृत्य चिन्त्यते किं प्रामाण्यमप्रामाण्यं च उभयं स्वत एवावगम्यते, अथवा अन्यतरदपि स्वभावेन अनिरूपितं कारणगुणदोषप्रत्ययाभ्यामवगम्यते, आहोस्वित् अप्रामाण्यं स्वतोऽवगम्यते प्रामाण्यं तु कारणगुणज्ञानात् संवादज्ञानात् अर्थक्रियाज्ञानाद्वा अवधार्यते, उत प्रामाण्यं स्वतः प्राप्तं सत् अर्थान्यथात्वकारणदोषज्ञानाभ्यां अवगम्यमानेन अप्रामाण्येन अपोद्यते इति ।

तत्र सर्वकारणानां स्वकार्यशक्तेः स्वाभाविकत्वात् उभयमपि ज्ञानस्य स्वरसादेवावगम्यते इति **केचित्** । (एतच्च सत्कार्यवादिमतम् । तन्मते हि सर्वमेव कार्यजातं सत् उत्पद्यते, इति प्रामाण्याप्रामाण्यात्मकमपि स्वत एवेति) तदयुक्तम् । नहि ज्ञानं स्वविषयस्य तथात्वं अतथात्वं च युगपत् शक्नोति वेदयितुं विरोधात् । अथ काऽपि ज्ञानव्यक्तिः स्वप्रामाण्यं स्वतो बोधयति, काऽपि अप्रामाण्यं इत्युच्यते, तथापि न युक्तम् । कारणान्तरनिरपेक्षस्य ज्ञानस्यैव उपलम्भहेतुत्वे किं क्व ज्ञाने भवति इति न शक्यं विवेक्तुम् । अतो द्वयमपि स्वस्वभावेन अनिरूपितं कारणगुणदोषज्ञानाभ्यां

अवगम्यते, **इत्यपरे** (नैयायिकाः)। तदपि अपेशलम्। एवं हि गुणदोषावधारणात् प्राक् अन्यतरेणापि आकारेण अर्थं अनवगमयत् विज्ञानं निःस्वभावं स्यात् । तस्मात् अप्रामाण्यं स्वतः, प्रामाण्यं तु संवादज्ञानादिभिः इत्येतदेव युक्तम् (इति सौगताः) । तथाहि । न ज्ञानमुत्पन्नं इत्येतावता अर्थतथात्वावधारणं युक्तम्, व्यभिचारात् अनिश्चयाच्च । अप्रामाण्यमेव तस्यां वेलायां प्राप्तम् । पश्चात् कारणगुणज्ञानात् संवादज्ञानात् अर्थक्रियाज्ञानाद्वा प्रामाण्यावगमात् अपोद्यते । शब्दे च आप्तप्रणीतत्वं गुणः । न च वेदे तदस्ति, अपौरुषेयत्वाभ्युपगमात् । 'वनस्पतयः सत्रमासत' 'शृणोत ग्रावाणः' इत्येवमादीनां उन्मत्तप्रलपितकल्पत्वात् अप्रत्ययिततरप्रणीतत्वात् अप्रामाण्यमेव वेदानाम् । इति प्राप्ते, **अभिधीयते । 'परापेक्षं प्रमाणत्वं नात्मानं लभते क्वचित् । मूलोच्छेदकरं पक्षं को हि नामाध्यवस्यति ॥'** यदि हि सर्वमेव ज्ञानं स्वविषयतथात्वावधारणे स्वयमसमर्थं विज्ञानान्तरमपेक्षेत, ततः कारणगुण–संवाद– अर्थक्रियाज्ञानान्यपि स्वविषयभूतगुणाद्यवधारणे परमपेक्षेरन्, अपरमपि तथा, इति न कश्चिदर्थो जन्मसहस्रेणापि अध्यवसीयेत इति प्रामाण्यमेव उत्सीदेत् । अथ अर्थक्रियाज्ञानं स्वतःप्रमाणमिति चेत्, को विशेषः ? अव्यभिचार इति चेत्, न, स्वप्नावस्थायां असत्यपि उदकाहरणे अर्थक्रियाविज्ञानदर्शनात् । अथ सुखज्ञानमेव अर्थक्रिया, तच्च अव्यभिचारि एव । नहि क्वचिदपि असति सुखे सुखज्ञानमस्ति । **सत्यमेतत्**, न तु तेन पूर्वज्ञानस्य प्रामाण्याध्यवसानं संभवति, अप्रमाणेनापि प्रियासंगमविज्ञानेन स्वप्नावस्थायां सुखदर्शनात् । तस्मात् स्वतःप्रामाण्यं प्राप्तं अर्थान्यथात्वकारणदोषज्ञानाभ्यां अपोद्यते इत्यवश्यं अङ्गीकरणीयम् । एवं च शब्देन आप्तपुरुषसंस्पर्शकृतत्वात् दोषाणां अपौरुषेये वेदे तदभावात् साक्षाच्च अर्थान्यथात्वज्ञानाभावात् अनपोदितं प्रामाण्यं भवति ! पौरुषेयवचनानि तु पुरुषबुद्धिप्रभवत्वात् भ्रान्त्या विप्रलिप्सया वा प्रयुक्तानि मूलदोषेण दुष्टत्वात् अयथार्थानि भवन्ति इति वैषम्यम् । अनाप्तवचसां सत्येव अप्रामाण्ये वक्तृदोषाधीनत्वात् वेदे च तदभावात् प्रामाण्यं वक्तव्यम् । शा. तर्कपादे पृ. २०–२३ .

* **प्रामाण्यवादार्थः । 'विज्ञानस्य प्रमाणत्वं स्वतो निर्णीयते यथा । परतश्चाप्रमाणत्वं तथा न्यायोऽभिधीयते ॥ १ ॥'** स्वतः सर्वप्रमाणानामित्यारभ्य स्वतःप्रामाण्यं परतश्चाप्रामाण्यमाचार्यैर्निबद्धम् । तत्र व्याख्यातारो विवदन्ते— स्वशब्दः किमात्मवचन आत्मीयवचनो वा, तथा प्रामाण्यं किं स्वतो भवति किं वा भाति, तथा प्रामाण्यं नाम किं अर्थतथात्वं किं वा तथाभूतार्थनिश्चायकत्वमिति । तत्र च **'आत्मवाची स्वशब्दोऽयं स्वतो भाति प्रमाणता । अर्थस्य च तथाभावः प्रामाण्यमभिधीयते ॥ २ ॥'** तत्र के चित्तावदाहुः प्रामाण्यं नाम अर्थाव्यभिचारित्वं तथाभूतार्थविषयत्वमिति यावत् । तच्च ज्ञानानां स्वत एव जायते । स्वशब्दोऽयमात्मीयवचनः स्वीयादेव कारणात् तथाभूतार्थविषयत्वं ज्ञानस्य जायते, न गुणात् । अप्रामाण्यं तु अयथार्थविषयत्वलक्षणं न स्वीयादेव कारणाज्जायते, अपि तर्हि तद्गताद्दोषादिति परत इत्युच्यते ; यदि हि सत्यार्थविषयता गुणनिमित्ता स्यात् स्वकारणदोषात् त्वसत्यविषयतैव, तया सति दोषयुक्तात् गुणहीनादिन्द्रियादेः पीतशङ्खादिज्ञानेषु न किञ्चित् सत्यं गम्येत । गम्यते तु तत्रापि शङ्खस्वरूपादिकं सत्यम् । दोषाधीने त्वस्यायथार्थत्वे स्वकारणाधीने सत्यविषयत्वे सत्युभाभ्यां मिलिताभ्यां जायमानं सत्यासत्यार्थविषयकं भवतीत्युपपन्नम् । तस्मात् स्वीयात्कारणात् यथार्थत्वलक्षणं प्रामाण्यं जायते, न तु भाति । न हि ज्ञानमात्मानमात्मीयं वा प्रामाण्यमवगमयति, अर्थप्रकाशमात्रोपक्षीणत्वात् । परतस्तु कारणदोषादयथार्थत्वलक्षणमप्रामाण्यमिति दोषाभावाद्वेदस्य यथार्थत्वमिति । अस्मिंस्तु पक्षे 'जातेऽपि यदि विज्ञाने' (श्लोवा. चोदनासूत्रम् ४९) इत्यादिना अनवस्थाप्रसङ्गेन परतःप्रामाण्यदूषणं न घटते । गुणज्ञानाधीने हि प्रामाण्ये स्यादनवस्था । गुणस्वरूपायत्ते तु अनवगता एव गुणा इन्द्रियवत् ज्ञानप्रामाण्यं जनयन्ति इति न अनवस्थापत्तिः । तथा 'दोषाभावो गुणेभ्यश्चेन्ननु सैवास्थितिर्भवेत्'

(श्लोवा. चोदनासूत्रम् ६६) इति चोदयित्वा 'तदा न व्याप्रियन्ते हि ज्ञायमानतया गुणाः' (श्लोवा. चोदनासूत्रम् ६७) इति परिहरन् परपक्षे गुणज्ञानादेव प्रामाण्यम्, न गुणस्वरूपात् इति दर्शयति । तथा 'तस्माद् बोधात्मकत्वेन प्राप्ता बुद्धेः प्रमाणता । अर्थान्यथात्वहेतूत्थदोषज्ञानैरपोद्यते ॥' (श्लोवा. चोदनासूत्रम् ५३) इति वदन् सिद्धान्ते दोषज्ञानादेव अप्रामाण्यम्, न दोषस्वरूपात् इति व्यक्तमेव आह । तथा 'अपरे कारणोत्पन्नगुणदोषावधारणात्' (श्लोवा. चोदनासूत्रम् ३४) इत्यादयो बहवः श्लोका अस्मिन् पक्षे न संगच्छन्ते । अतो न वार्तिककाराभिमतोऽयं पक्षः । अन्ये त्वाहुः । अनधिगततथाभूतार्थनिश्चायकत्वं प्रामाण्यम् । तच्च ज्ञानानां स्वतः एव जायते । स्वशब्दश्चायमात्मवचनः । ज्ञानस्वरूपादेव तथाभूतार्थनिश्चयो जायते न गुणज्ञानात्, संवादज्ञानात्, अर्थक्रियाज्ञानाद्वा, अनवस्थाप्रसङ्गात् । अर्थान्यथात्वनिश्चयस्तु परतो दोषज्ञानात् अर्थान्यथात्वज्ञानाद्वेति परत इत्युच्यते इति । अस्मिन्नपि पक्षे स्वतः प्रामाण्यं जायते, न तु ज्ञायते । अत्रेदं वक्तव्यम्-- यदि प्रामाण्यस्य जन्मनि स्वयमेव कारणं ज्ञानम्, तथा सत्यप्रामाण्यस्यापि जन्मन्येव दोषज्ञानबाधकज्ञानयोः कारणत्वं वक्तव्यम् । तत्र कस्याप्रामाण्यं कारणदोषज्ञानाद्बाधकज्ञानाद्वा जायते ? न हि शुक्तौ रजतज्ञानस्य बाधकादिजन्यमप्रामाण्यम्, उत्पत्तावेव तस्याप्रमाणत्वात् । अतथाभूतार्थनिश्चयो ह्यप्रामाण्यम् । तच्च अप्रमाणज्ञानं स्वत एव भवतीति न तद्बाधकज्ञानादिकमपेक्षते । न ह्युत्पत्तौ प्रमाणं सत् पश्चाद्बाधकेनाप्रमाणीक्रियते, अपि तूत्पत्तावेवम्भूतमप्रामाण्यं बाधकेन ख्याप्यते, न त्वर्थस्यान्यथाभावाभावनिश्चयो बाधकेनैव जन्यते । सत्यम्, न तु तदेवाप्रामाण्यम् । नह्यर्थान्यथाभावनिश्चयः पूर्वज्ञानस्याप्रामाण्यम्, किन्तु वस्तुतोऽर्थस्यान्यथाभावः, अन्यथाभूते वा तथाभावनिश्चायकत्वम् । नैतदुभयमपि बाधकजन्यम्, स्वत एवार्थस्यान्यथाभावात्, स्वत एव चाप्रमाणज्ञानादन्यथाभूतेऽर्थे तथात्वनिश्चयात् । तथा चाप्रामाण्यमपि स्वत एवोत्पद्यते । 'तस्मात् बोधात्मकत्वेन प्राप्ता बुद्धेः प्रमाणता । अर्थान्यथात्वहेतूत्थदोषज्ञानैरपोद्यते ॥' (श्लोवा. चोदनासूत्रम् ५३) इति श्लोकोऽपि भवता इत्थं व्याख्येयः बुद्धेः स्वतो जातं प्रामाण्यं पश्चादपोद्यते इति । तच्चायुक्तम्, उत्पत्तावेवाप्रमाणत्वात् । अथ निश्चायकत्वं प्रामाण्यम्, तदभावोऽप्रामाण्यम्, तच्च बाधकेन निराक्रियते इति मतम् । तदयुक्तम् । न हि बाधकेन निश्चयस्य विनाशः क्रियते, तस्य स्वत एव विनश्वरत्वात् । तस्मादेवं वक्तव्यम् । **'बुद्धेः स्वीयं प्रमाणत्वं स्वत एवावगम्यते । परतश्चाप्रमाणत्वं दोषबाधकबोधतः ॥ ३ ॥'** नन्वत्रापि ग्रन्थविरोधो न्यायविरोधश्च स्यात् । तथाहि । न हि विज्ञानमात्मानं गृह्णाति, नतरामात्मीयं प्रामाण्यम्, अर्थग्रहणोपक्षीणत्वात् । तथा च 'ननु प्रमाणमित्येवं प्रत्यक्षादि न गृह्यते । न चेत्थमगृहीतेन व्यवहारोऽवकल्पते ॥' (श्लोवा. चोदनासूत्रम् ८२) इति प्रामाण्याग्रहणदोषं चोदयित्वा 'प्रमाणं ग्रहणात्पूर्वं स्वरूपेणैव संस्थितम् । निरपेक्षं स्वकार्येषु गृह्यते प्रत्ययान्तरैः ॥' (श्लोवा. चोदनासूत्रम् ८३) इति प्रमाणत्वाग्रहणमङ्गीकृत्यैव दोषप्रसङ्गं समाधत्ते, तद्विरुद्ध्यते प्रामाण्यस्यात्मना ग्रहणे । तथा 'निश्चायकवस्तुत्वात् प्रामाण्यं जन्यते गुणैः' इति निश्चयात्मकप्रामाण्योत्पादनं तु वस्तुस्वरूपत्वात् संवादकारणगुणज्ञानकार्यत्वेन अध्यवसानमिति पूर्वपक्षे प्रामाण्यस्य जन्मन्येव गुणानां कारणत्वमिति वदन् सिद्धान्तेऽपि जन्मैव स्वत इति दर्शयति । तस्मात् स्वतो भातीत्ययमपि पक्षोऽनुपपन्न इति ।

अत्राभिधीयते । यत्तावत् उक्तम् 'न ज्ञानं आत्मानं गृह्णाति, विषयप्रकाशकत्वात् । न चात्मन्यगृह्यमाणे तत्संबन्धितया प्रामाण्यं शक्यते ग्रहीतुम्' इति । यदि वयं ज्ञानं 'अहं प्रमाणम्' इत्येवं 'मदीयं वा प्रामाण्यम्' इत्येवं गृह्णातीति वदेम तदैवमुपालभ्येमहि, न त्वेवमस्माभिरुच्यते । यत् वस्तुतो ज्ञानस्य प्रामाण्यं यद्वशात् ज्ञानं प्रमाणं भवति तत् प्रमाणबुद्धिशब्दयोर्भावकतया लब्धप्रामाण्यपदाभिधानीयकमात्मनैव ज्ञानेन गृह्यत इत्युच्यते । किं पुनस्तत् अर्थतथात्वम् ? इदमेव हि ज्ञानस्य प्रामाण्यं यदर्थस्य तथाभूतत्वम्, अतथाभूतविषयस्य ज्ञानस्याप्रामाण्यात् । इदमेव चाप्रामाण्यं यदर्थस्यान्यथात्वम् । तेन

स्वत एव ज्ञानादर्थतथात्वरूपमात्मीयं प्रामाण्यं निश्चीयते, न तु गुणज्ञानात् संवादज्ञानात् अर्थक्रियाज्ञानाद्वा तदवगन्तव्यम् । अप्रामाण्यं त्वात्मीयमर्थान्यथात्वरूपं स्वतो नावगम्यते, न तु (? किन्तु) कारणदोषज्ञानात् साक्षादेव वा नैतदेवमिति ज्ञानादवगम्यते इत्येतदत्र प्रतिपाद्यते । आह च । 'मिथ्यैतत्सर्वविज्ञानमिति नाज्ञायि तेन हि । प्रमाणवद्धि तेनार्थस्तथैवेत्यवधारितः । अन्यथात्वं कुतस्तस्य सिद्धे ज्ञानान्तरादृते ॥' इति । तथा 'अप्रमाणं पुनः स्वार्थे प्रमाणमिव हि स्वतः । मिथ्यात्वं तस्य गृह्येत न प्रमाणान्तरादृते ॥ न ह्यर्थस्यातथाभावः पूर्वेणोक्तस्तथात्ववत् । तथात्वे ह्युपलब्धत्वान्निष्फला स्यात् पुनः प्रमा ॥ अन्यथात्वे त्वसिद्धत्वात् सावकाशं प्रमान्तरम् ॥' इति । तथा विचारोपक्रमे 'प्रमाणत्वाप्रमाणत्वे ज्ञानस्य स्वत एव किम् । अथवैकमपि स्पष्टं स्वभावेनानिरूपितम् ॥ पराश्रयादसंदिग्धमेकं पक्षं प्रपद्यते ॥' इति वदन् प्रमाणत्वाप्रमाणत्वनिरूपणमेव हि स्वतः परतो वेति चिन्त्यते इति स्पष्टमेवाह । यत् तु 'ननु प्रमाणमित्येवं प्रत्यक्षादि न गृह्यते । (न चेत्थमगृहीतेन व्यवहारोऽवकल्पते ॥) प्रमाणं ग्रहणात् पूर्वं स्वरूपेणैव संस्थितम् ।' (श्लोवा. चोदनासूत्रम् ८२–८३) इति वार्तिकं तत् प्रमाणमस्मीत्यनेन आकारेण अग्रहणात् तथा च प्रमाणमित्येवं प्रत्यक्षादि न गृह्यते इत्याह । ननु यदि प्रामाण्यं ज्ञानोत्पत्तिसमये अवगम्यते, यत् उत्पत्तौ प्रमाणतया न चकास्ति तदप्रमाणमित्युत्पत्तावेव परिशेषान्निश्चेतुं शक्यं विनापि कारणदोषबाधकप्रत्ययाभ्यां इति अप्रामाण्यमपि स्वत एवापद्येत ।

मैवं वोचः । न हि स्वशब्दोऽयं प्रामाण्यपरतया प्रयुक्तः प्रामाण्यादेव प्रामाण्यं भातीति, नापि प्रमाणपरतया । यदि हि तथा स्यात् ततोऽप्रमाणेषु प्रामाण्यानवभासात् परिशेषसिद्धमप्रामाण्यं स्यात् । विज्ञानपरस्तु स्वशब्दः विज्ञानादेव प्रामाण्यं भातीति । ततश्चाप्रमाणज्ञानादपि प्रामाण्यमेवात्मनोऽसदपि बोध्यत इति नाप्रामाण्यस्य परिशेषसिद्धिः । अप्रामाण्यं तु प्रतीतप्रामाण्यापवादरूपेण पश्चाद्बोध्यत इति । यथाऽऽह– 'यस्मात् स्वतः प्रमाणत्वं सर्वत्रौत्सर्गिकं स्थितम् । बाधकारणदुष्टत्वज्ञानाभ्यां तदपोद्यते इति ॥' स्थितं प्राप्तं प्रतिपन्नमित्यर्थः । सर्वत्रेति न केवलं प्रमाणेषु, ज्ञानमात्रे इति यावत् । तथा 'अप्रमाणमपि स्वार्थे प्रमाणमिव हि स्वतः ।' इति । न च प्रमाणज्ञानान्यधिकृत्य चिन्तेयं प्रमाणानां प्रामाण्यं स्वतः परतो वेति । किं तर्हि ? यानि तावत् स्थाणुर्वा पुरुषो वा इति परस्परोपमर्दकानेककोटिसंस्पर्शिज्ञानेभ्यः स्मृतिज्ञानेभ्यश्चातिरिक्तानि घटोऽयं पटोऽयमित्येवंरूपाणि ज्ञानानि तानि सर्वाण्यधिकृत्य चिन्तेयम् । 'सर्वविज्ञानविषयमिदं तावत्परीक्ष्यताम् ।' (श्लोवा. चोदनासूत्रम् ३३ प्रतीक्ष्यतामिति पाठः ।) इत्युपक्रम्यते । यदि प्रमाणान्येव विषयीकृत्य चिन्त्येत ततो विषयस्योभयवादिसिद्धत्वात् यान्युभयोः प्रमाणतया प्रसिद्धानि तेषां प्रामाण्यं स्वत इत्येतावत् सिद्धान्त्येत । ततश्च वेदस्योभयवादिसिद्धप्रामाण्याभावेन विचाराविषयत्वात् नास्य स्वतः प्रामाण्यं साधितं स्यात् । तत्र वेदप्रामाण्यानुपयोगिनी चिन्ता काकदन्तपरीक्षावदकर्तव्या स्यात् । ज्ञानमात्रं त्वधिकृत्य स्वतः प्रामाण्ये परतश्चाप्रामाण्ये साध्यमाने वेदस्यापि स्वतस्तावद्विषयतथात्वरूपं प्रामाण्यमवगतं स्यात् (? सत्) कारणदोषज्ञानादेरभावान्निरपवादं स्थितं भवतीति प्रयोजनवती चिन्ता ।

ननु नार्थतथात्वमात्रं प्रामाण्यम्, स्मृतेरपि तथात्वप्रसङ्गात् । सत्यम्, न तावन्मात्रम् । अस्मिंस्तु प्रकरणे तावन्मात्रमेव स्वतः परतो वेति चिन्त्यते । प्रमाणशब्दो ह्यधिगततया अननुसंधीयमानतथाभूतार्थनिश्चायकत्ववाची । तस्य भावः प्रामाण्यम् । कश्च तस्य भावः ? प्रमाणान्तराधिगततया अननुसंधीयमानत्वम्, तथाभावश्च अर्थस्य, ज्ञानस्य तन्निश्चयजनकता, इति त्रितयं मिलितं प्रमाणबुद्धिशब्दयोर्वाचकं प्रामाण्यम् । तत्र यदेतदर्थस्यावगततया अननुसंधीयमानत्वं तद्योग्यानुपलब्धिगम्यत्वेन न ज्ञानस्वरूपाद् गम्यते । न हि घटज्ञानं घटस्यान्यतः अनवगततां प्रतिपादयति । नापि गुणज्ञानादिभिस्तदवगतिः । तेन न तत्र स्वतः परतो वेति चिन्ता । यदेव तु नन्वतथाभूतमित्यनेनायथार्थत्वलक्षणमप्रामाण्यमाशङ्कितं तत्परिहारायार्थतथात्वलक्षणमेव प्रामाण्यं स्वत इति साध्यते । यस्तु 'निश्चयात्मकप्रामाण्योत्पादनम्' इति ग्रन्थः सोऽप्य-

विरुद्धः । तथाहि यदर्थतथात्वनिश्चायकं तदेव तद्विषयस्य निश्चयस्योत्पादकं भवति । यदेव हि ज्ञेयापेक्षया ज्ञापकं तदेव ज्ञानापेक्षया जनकं भवति । निश्चयोऽपि च प्रमाणशब्दप्रवृत्तिनिमित्तत्वात् प्रामाण्यमेव । 'तेन अर्थतथात्वलक्षणं प्रामाण्यं गुणज्ञानान्निश्चीयते' इति प्रतिपादयतः पूर्वपक्षिणो नासंगतः 'निश्चयात्मकप्रामाण्योत्पादनं तु वस्तुस्वरूपत्वात् संवादगुणज्ञानकार्यत्वेन स्वध्यवसानम्' इति ग्रन्थः । यदि पुनरिदमेव साक्षादुच्यते 'निश्चयात्मकं प्रामाण्यं स्वतो जायते' इति, तथा सत्यप्रामाण्यमपि परतो जायत इति वक्तव्यम् । अन्यथाऽस्य प्रतिपक्षत्वमेव न स्यात् । प्रामाण्यं स्वतो जायते, अप्रामाण्यं परतोऽवगम्यते इति । तस्मात् स्वतः परतश्च प्रामाण्यमप्रामाण्यं चावगम्यते इत्येव प्रकरणार्थः । एवं हि न्यायो ग्रन्थश्च समञ्जसो भवति ।

तदयमत्र **पूर्वोत्तरपक्षसंक्षेपः** । घटादघटाच्च घटज्ञानदर्शनान्न तन्मात्रेण घटो निश्चेतुं शक्यते । तेनार्थक्रियादर्शनादेव तद्धेतुभूतघटनिश्चयपुरःसरं पूर्वस्य घटज्ञानस्य घटादुत्पत्तिर्निश्चेतव्या । अर्थक्रियाज्ञानं तु अव्यभिचारात् स्वतःप्रामाण्यमर्थक्रियायां निश्चाययत् शक्नोति पूर्वज्ञानस्य प्रामाण्यं निश्चाययितुम् । तथा ज्ञानान्तरसंवादोऽपि नार्थतथात्वाभावे घटते इति ततोऽप्यर्थतथात्वनिश्चयः । तथा गुणवत्कारणजन्यं विज्ञानं यथार्थमेव भवतीति कारणगुणावधारणादपि शक्यतेऽर्थस्य तथाभावो निश्चेतुम् । तस्मात् परत एव ज्ञानस्य प्रामाण्यनिश्चयः, न स्वतः तस्यार्थतथात्वलक्षणं प्रामाण्यं निश्चेतुं शक्यम्, अनैकान्तिकत्वात् । अनिश्चिते चार्थे नास्ति प्रामाण्यमित्यप्रामाण्यमेव ज्ञानस्य स्वतः । किञ्च निश्चयप्रागभावो न दोषज्ञानेन शक्यते जनयितुम्, निश्चयस्तु वस्तुत्वाच्छक्यते गुणज्ञानादिना जनयितुम् । तस्मात् परत एवार्थतथात्वरूपप्रामाण्यं निश्चीयते इति पूर्वः पक्षः ।

सिद्धान्तस्तु न ज्ञानमव्यभिचारमुखेनैव अर्थं निश्चाययति, किन्तु स्वत एव । यदि हि स्वतो निश्चेतुं न शक्नुयात् तथा सति निश्चयात्यन्ताभाव एव स्यादित्यान्ध्यमेवाशेषस्य जगतो भवेत् । न हि स्वतोऽनिश्चितोऽर्थः परतो निश्चेतुं शक्यते, परस्यापि तद्वदेवासामर्थ्यात् । यथा हि घटज्ञानमसत्यपि घटे दृष्टमित्यनिश्चायकम्, तथा अर्थक्रियाज्ञानमप्यसत्यामेवार्थक्रियायां स्वप्नावस्थायां दृष्टमिति न तेनापि सा निश्चेतुं शक्या, नतरां तया घटनिश्चय इत्यायातमान्ध्यमशेषस्य जगतः । अथ अर्थक्रियाशब्देन नोदकाहरणादिकमुच्यते, किन्तु ज्ञानमेव सुखात्मकम्, सर्वं च सुखज्ञानं स्वात्मनि स्वत एव प्रमाणम्, अव्यभिचारात् इत्युच्यते । तथा सति भवतु नामार्थक्रियानिश्चयः, तथापि तु न तया पूर्वज्ञानस्य शक्यं याथार्थ्यं विज्ञातुम् । अयथार्थादपि स्वप्ने चन्दनलेपादिना सुखोत्पत्तेः । अपि च गृहीताविनाभावयाऽर्थक्रियया पूर्वज्ञानविषयस्य निश्चयः । अनुमानं ह्येतत् कार्यात् कारणगोचरम् । न चागृहीते संबन्धिनि संबन्धग्रहणसंभवः । तेन संबन्धग्रहणसमये अवश्यं घटज्ञानादेव घटनिश्चयोऽङ्गीकर्तव्यः । एवं गुणज्ञानसंवादज्ञानयोरपि वाच्यम् । न हि गुणज्ञानाद् गुणोऽपि निश्चेतुं शक्यते, किं पुनः पूर्वज्ञानप्रामाण्यम् । तथा संवादोऽपि । संवादो नाम तद्विषयं ज्ञानान्तरम् । तस्य पूर्वज्ञानात् को विशेषः येन पूर्वज्ञानानिश्चितमनेन निश्चीयते । यद्यपि वस्तुत्वाज्जन्यो निश्चयः तथापि ज्ञानेनैव जन्यते, नान्येन । तस्मात् स्वत एव प्रामाण्यं परतश्चाप्रामाण्यं दोषज्ञानाद्बाधकज्ञानाद्वा निश्चेयम् ।

ननु अवस्तुत्वान्न दोषजन्यमप्रामाण्यं भवति, अतज्जन्यं च न ततोऽवधारयितुं शक्यम् । उच्यते । न तावन्निश्चयप्रागभावरूपमप्रामाण्यं दोषैर्गम्यते इति ब्रूमः, किन्तु अर्थान्यथात्वरूपम् । तद्धि शक्यं दोषज्ञानेन निश्चेतुम्, दोषनिमित्तकत्वादयथार्थत्वस्य दुष्टेषु कारणेष्वयथार्थत्वदर्शनात् । वेदेऽपि स्वतस्तावत् प्रामाण्यं दोषाभावादनपोदितं स्थितम् ।

कथं पुनरवगम्यते दोषनिमित्तमयथार्थत्वम्, न गुणाभावनिमित्तमिति ? सर्वत्र हि गुणविधुरेषु दुष्टेषु च कारणेषु अयथार्थत्वं ज्ञायते । तत्र कुतोऽयं विवेकः दोष एव निमित्तं न गुणवैधुर्यमिति ? तस्माद्यद्यपि परत एवाप्रामाण्योपलक्षणं तथापि गुणाभावादेवोपलक्षणसंभवाद्वेदे च आप्तप्रणीतत्वगुणायोगात् स्वरसप्राप्तप्रामाण्यस्यापि

वेदस्य परत एव गुणाभावादप्रामाण्यमापद्यते इति । तदभिधीयते । दृष्टानुसारिणी हि कल्पना भवति, न दृष्टवैपरीत्येन । तेन वेदस्य स्वत एव प्राप्तं प्रामाण्यं यथा न विरुध्यते तथा चैतत् कल्पयितुं शक्यते । ततो विरुद्धं न कल्पयितुं युक्तम् । तेन यद्यपि प्रसिद्धेष्वयथार्थज्ञानेषु गुणाभावो दोषाश्च दृष्टाः, तथापि वेदे गुणाभावेऽपि प्रामाण्यदर्शनात् तन्मा बाधीति दोषनिमित्तमेवायथार्थत्वं शुक्तिरजतादिज्ञानानां कल्प्यते । अन्यथा हि ज्ञानत्वनिबन्धनमप्ययथार्थत्वं कल्प्येत, सर्वेष्वप्रमाणेषु ज्ञानत्वदर्शनात् । तत्र यथार्थेष्वपि प्रत्यक्षादिषु ज्ञानत्वदर्शनान्न तन्निमित्तमयथार्थत्वम् । एवं गुणाभावोऽपि यथार्थो वेदे दृष्टत्वात् नायथार्थत्वस्य निबन्धनम् । असिद्धं तस्य यथार्थत्वमिति चेत्, प्रत्यक्षादीनां वा कुतः सिद्धम् ? स्वत इति चेत्, तद्वेदेऽपि समानमन्यत्र नास्तिक्याभिनिवेशात् । तस्मान्न तन्निबन्धनं प्रामाण्यम् । अपि च शुक्तिकारजतादिज्ञाने गुणाभावेऽपि शुक्लभास्वरत्वादिरूपाणां तथाभूतानामेव दर्शनान्न गुणायत्तं यथार्थत्वं ज्ञानस्य । यदि तु स्वकारणादेव यथार्थत्वं दोषाच्चायथार्थत्वमिति । तथा सति शुक्तिकारजतादिज्ञानानि स्वकारणवशाद्दोषाच्च तथाभूतं शुक्लत्वादि अतथाभूतं च रजतत्वादिकं गोचरयन्तीत्युपपन्नं भवति । तस्मात् स्वतः सिद्धं प्रामाण्यं सर्वज्ञानानाम्, तच्च वेदस्यानपोदितमिति सिद्धम्। '**पार्थसारथिमिश्रेण स्वतःप्रामाण्यनिर्णयः । व्याख्याविवादसंजातमोहव्यावृत्तये कृतः ॥ ४ ॥** **रत्नमाला.** पृ. ३०–३९.

* **प्रायोवृत्त्या** भवति हि तद्बुद्धिः, यथा अम्ब्यप्राये लिखितः अम्ब्यः इति गम्यते । **भा.** ९।४।१२।५०.

* '**प्रायेणानृतवादित्वात् पुंसां भ्रान्त्यादिसंभवात्**' इति न्यायेन पुरुषविशेषप्रणीतवेदस्य प्रामाण्यानवधारणम्। **कु.** १।१।१।१.

§ '**प्रायेण भार्यादौःशील्यं स्नेहान्धो नेक्षते जनः**' इति न्यायः । स्पष्टार्थः । **साहस्री.** ९४९.

* प्रायेण यागानां दर्शपूर्णमासकाल्त्वम् । **भा.** ७।१।१।२.

§ '**प्रायेण सामग्र्यविधौ गुणानां पराङ्मुखी विश्वसृजः प्रवृत्तिः**' इति न्यायः । **साहस्री.** ७७२.

* **प्रायादपि** च अर्थनिश्चयो भवति । यथा अम्ब्यप्राये लिखितः अम्ब्य इति गम्यते । **भा.** २।३।६।१६.

* **प्रायदर्शनम्** । 'प्रायवचनाच्च' (२।२।४।१२) इत्यत्र प्रधानप्राये यत्रान्यानि प्रधानानि तत्र वचनात् इत्युक्तम् । तथा 'विशये प्रायदर्शनात्' (२।३।६।१६) इत्यत्र संस्कारप्राये यत्रान्ये संस्कारा गोदोहनादयः तत्रास्य दर्शनं इत्युक्तम् । 'वेदो वा प्रायदर्शनात्' (३।३।१।२) इत्यत्र तु वेदप्राये वाक्ये वेदोपक्रमे निगम्यमाना इमे शब्दाः श्रूयन्ते इत्यर्थः भाष्ये । **वा.** ३।३।१।२, * विनापि वाक्यग्रहणेन '**प्रायदर्शनात्**' इति वाक्यविनियोगः वक्ष्यते । ३।१।१।१ पृ. ६५३. * सर्ववेदान्तप्रत्ययत्वेन अन्यत्र विहितानां अन्यत्रोपासनविधानायोपादानात् **प्रायदर्शनन्यायेन** उपासनानामपि सर्ववेदान्तप्रत्ययत्वसिद्धिः । **शांभा.** ३।३।१।४ ब्रसू.

* '**प्रायवचनाच्च**' (२।२।४।१२) इत्यत्र हि प्रधानप्राये यत्रान्यानि प्रधानानि तत्र वचनात् इत्युक्तम्। **वा.** ३।३।१।२ पृ. ८०५.

* **प्रायणीयं** द्वादशाहे प्रथममहः गवामयने च प्रथममहः, तयोः प्रकृतिविकृतिभावो नास्ति इति न द्वादशाहप्रायणीयात् धर्मातिदेशः । **वि.** ७।३।२. * प्रयन्ति अनेन इति **प्रायणीयम्**, प्रवर्तन्ते अनेन सत्रे इति एष (प्रायणीय–)शब्दः गुणेन क्रियायोगेन तस्मिन् कर्मणि श्रुत्यैव प्रयुज्यते । **भा.** ७।३।२।५ । प्रयन्ति अनेनेति प्रायणीयमित्यनेन योगेन द्वादशाहे इयं संज्ञा प्रवृत्ता । गवामयनेऽप्ययं योगो विद्यत एवेति धर्मातिदेशो नास्ति। **टुप्.** ७।३।२।५. * प्रारम्य अयते गच्छति प्रवर्तते कर्म अनेनेति व्युत्पत्त्या 'प्राथम्यविशिष्टं कर्म' प्रायणीयं नाम । **वि.** ७।३।२. * **प्रायणीयोऽतिरात्रो** गवामयने द्वादशाहिकं प्रथममहः, तस्य धर्मो द्वादशोपसत्त्वम् । **भा.** ७।४।३।१९. * प्रायणीयो ज्योतिष्टोमे 'आदित्यः (अदितिदेवताकः) प्रायणीयः पयसि चरुः' इति विहितः । तत्र पयसि वत्सापाकरणादयः सांनाय्यधर्माः न कर्तव्याः, किन्तु उत्पवनादयः प्रणीताधर्माः कर्तव्याः । **वि.** ९।४।१०. * प्रयन्ति प्रारभन्ते अनेन इति **प्रायणीयः** । बाहुल्कात् करणे अनीयर् प्रत्ययः । प्रायणं आरम्भः, तत्र भवः इति वा प्रायणीयः । गहादिषु वेणुकादेराकृतिगणत्वात् छण् । तथा च प्राथम्यं प्रायणीयशब्दप्रवृत्तिनिमित्तम् । **सोम.** ७।३।२. * **प्रायणीयस्य** निष्कासे उदयनीयानिर्वापः अर्थकर्म संस्कारः । ११।२।१६।६७–६९. * प्रायणीयस्य पूर्वमप्राप्ततया द्रव्यम्, देवता, श्रपणाधारभूतं पयश्च इत्येवमनेकैर्गुणैर्विशिष्टं कर्म एकेन वाक्येन 'आदित्यः प्रायणीयः पयसि चरुः' इत्यनेन विधीयते ज्योतिष्टोमे । **वि.** ९।४।११. * **प्रायणीयेऽ**तिरात्रे पञ्च ऐकादशिनाः आलभ्यन्ते उदयनीये षट् । १०।६।४।६–१२. * प्रायणीये आदित्ये चरौ श्रूयते 'अग्नये स्विष्टकृते समवद्यति' इति 'आज्यादेकस्माच्च हविषोऽवद्यति' इति । **भा.** ३।५।१।३। 'आज्यस्य एनं चरुमभिपूर्य आज्यभागाः पथ्यादयश्चतस्रो देवता यष्टव्याः' इति । **वा.**, * प्रायणीये पथ्यादयश्चत्वारोऽपि यागाः द्रव्यसामान्यात् उपांशुयाजविकाराः। आदित्यश्चरुराग्नेयविकारः। ३।५।१।३. * प्रायणीये पयसि चरुः । तत्र पयसि प्रदानार्था धर्मा न कर्तव्याः । ९।४।९।३२–४०. * **प्रायणीयायां** चतुर्विंशतिमानं हिरण्यं दक्षिणा श्येने । **भा.** ८।१।९।१६, * प्रायणीयायां दार्शपौर्णमासिको विध्यन्तः प्रवृत्तः । ८।१।३।३. * प्रायणीयायां द्वादशाहगतायां ऐन्द्रवायवाग्रत्वम्। **वि.** १०।५।२३. * प्रायणीयायां प्राकृतानि समभ्यस्तानि कर्माणि क्रियन्ते । **वा.** १।२।१।१० पृ. १२६. * 'प्रायणीयायां मन्द्रं अनुब्रूयात्' अयं स्वरः प्रायणीयापूर्वप्रयुक्तः न परमापूर्वप्रयुक्तः ज्योतिष्टोमे । ९।१।२।२–३ वर्णकं २.

* **प्रायणीयनाम्नः** धर्मानतिदेशकत्वम् । ७।३।२।५–६. **मीको.** पृ २४८ 'अतिदेशो न प्रायणीयनाम्ना' इत्यत्र द्रष्टव्यम् ।

* **प्रायणीयन्यायः** । ९।४।९. **मीको.** पृ. ९०९ 'आदित्यपयोऽधिकरणम्' इत्यत्र द्रष्टव्यम् । * **प्रायणीयन्यायेन** (९।४।९।३२–४०) पशुकामेष्टौ दधिशृतयोः सप्तम्या श्रपणाधारत्वावगमात् प्रणीता धर्मा एव कार्याः । **वि.** ९।४।१२, * प्रायणीयन्यायेन (वि. ९।४।१०) सप्तमीनिर्दिष्टयोर्दधिशृतयोः प्रदेयद्रव्यधर्माः न कर्तव्याः, किन्तु प्रणीताधर्माः । इति पूर्वपक्षः । ९।४।११.

* **प्रायणीयशब्दः** परत्रापि श्रूयमाणो न धर्माणां ग्राहकः । **भा.** ७।३।२।५ । यत्र तु पञ्चमः षष्ठो वा प्रायणीयः तादृशो न पूर्वाधिकरणापवादः । **टुप्.**

* **प्रायणीयातिरात्रे** द्वादशाहगवामयनयोः ज्योतिष्टोमिको विध्यन्तः । **टुप्.** ७।४।३।१९.

* **प्रायणीयातिथ्ययोर्नियमेन** शंय्विडान्तत्वं ज्योतिष्टोमे । १०।७।१२।३८–३९. **मीको.** पृ. १८१७ 'ज्योतिष्टोमे प्रायणीया शंय्वन्ता' इत्यत्र द्रष्टव्यम् । * प्रायणीयातिथ्ययोः पूर्वाभ्यामेव शंय्विडाभ्यां शंय्विडान्तत्वं ज्योतिष्टोमे । १०।७।१३।४०–४२. **मीको.** पृ. १८१५ 'ज्योतिष्टोमे प्रायणीया पूर्वशंय्वन्ता' इत्यत्र द्रष्टव्यम् ।

* **प्रायणीयातिथ्यादौ** 'सप्तम्या तु तदाधारो यावान्मन्त्रः प्रयुज्यते । तस्य सर्वस्य मन्द्रादिस्वरयोगोऽङ्गमाश्रितः ॥' **वा.** ३।३।२।९ पृ. ८१२.

* **प्रायणीयादीनि** दर्शपूर्णमासप्रकृतिकानि चोदकप्राप्तानि अस्थियज्ञे । **भा.** १०।२।२१।५२. * **प्रायणीयादौ** सर्वस्वारे जीवद्दशायां क्रियमाणे सूक्तवाकान्तर्गतायुराशासनादेरनुष्ठानम् । १०।२।२५।६१–६२.

* **प्रायणीयादीष्टिषु** दार्शिकारण्यभोजनस्य सौमिकपयोव्रतादिना प्रसङ्गसिद्धिः । १२।१।१४।३०. **मीको.** पृ. ९७२ 'आरण्यभोजनन्यायः' इत्यत्र द्रष्टव्यम्। * प्रायणीयादीष्टिषु दार्शिकजागरणस्य सौमिकदीक्षाजागरणेन प्रसङ्गसिद्धिर्न भवति ज्योतिष्टोमे । १२।१।८।१७. * प्रायणीयादीष्टिषु दार्शिकव्रतानां नानुष्ठानं ज्योतिष्टोमे । १२।१।११।२०–२३. **मीको.** पृ. १८१८ 'ज्योतिष्टोमे प्रायणीयादिषु' इत्यत्र द्रष्टव्यम्। * प्रायणीयादीष्टिषु पत्नीसंनहनं सौमिकसंनहनेन प्रसङ्गसिद्धत्वात् पृथङ् न कार्यम् । १२।१।१३।२९. * प्रायणीयादीष्टिषु शेषभक्षणस्य सौमिकपयोव्रतादिना प्रसङ्गसिद्धिर्नास्ति । १२।१।१५।३१–३२.

* **प्रायणीयादिशब्दानां** यौगिकानां नास्त्यतिदेशकत्वम्, तत्र नाम्ना धर्मातिदेशो नास्ति । अग्निहोत्रादि-

शब्दानां तु कर्मनामधेयानां अतिदेशकत्वमस्ति । वि. ७।३।१-२.

* **प्रायणीयेष्टौ** पयसि प्रदेयधर्मा नानुष्ठेयाः । ९।४।९. **मीको.** पृ. ९०९ 'आदित्यपयोऽधिकरणम्' इत्यत्र द्रष्टव्यम् ।

* **प्रायणीयेष्टयादौ** अस्थियज्ञे मृताधिकारपक्षे प्रस्तरप्रहरणे सूक्तवाकमन्त्रगतः यजमानाऽऽशासनपरः 'आशास्तेऽयं यजमानोऽसौ' (असौ इति नाम गृह्णाति 'केशवशर्मा' इत्यादि) इत्यादिः लुप्यते (क्त्वाचिन्ता)। १०।२।२१।५३-५५.

* **प्रायणीयोदयनीययोः** ऐकादशिनानपेक्षमाणयोरपि भवति समासः । प्रधानस्य पदान्तरमपेक्षमाणस्यापि भवति समासः । **टुप्.** १०।६।४।८.

* **प्रायणीयोदयनीयैकादशिनीवत्** अवयवशः संबन्धो भवति (सूक्तवाके) । **वा.** ३।२।६।१९ । **सुधा—** प्रायणीये पञ्च, उदयनीये पञ्च अन्त्योऽपि आसन्नत्वात् उदयनीये एव इत्यवयवशः द्वादशाहे प्रायणीयोदयनीयान्वयो वक्ष्यते दशमे ।

* **प्रायणीयानिष्कासे** उदयनीयानिर्वापः उदयनीयासंस्कारः, नार्थकर्म नापि प्रतिपत्तिः । ११।२।१६. **मीको.** पृ. १११३ 'उदयनीयानिर्वापाधिकरणम्' इत्यत्र द्रष्टव्यम् ।

प्रायश्चित्तमधिकारे सर्वत्र दोषसामान्यात् । ६।५।१५।४५॥

दर्शपूर्णमासयोः अधिकारे 'भिन्ने जुहोति, स्कन्ने जुहोति' इत्यादि यत् किञ्चित् प्रायश्चित्तं उक्तं तत् सर्वत्र यत्रयत्र भिद्यते स्कन्द्यते वा तत्रतत्र अग्निहोत्रादावपि स्यात् । दोषसामान्यात् दोषस्य भेदनादेः समानत्वात् इति पूर्वः पक्षः ।

प्रकरणे वा शब्दहेतुत्वात् । ४६ ॥

पूर्वपक्षं सूत्रेण प्राप्तं वाशब्देन निरस्यन् सिद्धान्तमाह । प्रायश्चित्तं एवंजातीयकं प्रकरणे तस्मिन्नेव कर्तव्यं स्यान्नान्यत्र कर्मणि । शब्दहेतुत्वात् प्रकृतैकवाक्यतापादकप्रयोगवचनरूपस्य शब्दस्य तत्र हेतुत्वात् । तस्मात् यत् प्रायश्चित्तं यस्मिन् प्रकरणे उत्पन्नं तत् तत्रैव प्रकरणे स्यान्नान्यत्र फलान्तरकल्पनाप्रसङ्गात् । इति सिद्धान्तः ।

अतद्विकाराच्च । ४७ ॥

सिद्धान्ते हेत्वन्तरमाह । अग्निहोत्रस्य ज्योतिष्टोमादेर्वा अतद्विकारात् तद्विकारत्वाभावात् दर्शपूर्णमासविकारत्वाभावात् । भावप्रधानो निर्देशः । प्रकृतौ उत्पन्नं प्रायश्चित्तं विकृतौ तु स्यात् । चकारो हेत्वन्तरसमुच्चये । **के.**

* **प्रायश्चित्तं** अपच्छेदयौगपद्येऽपि । ६।५।१७। ४९-५०. **मीको.** पृ. ४९८ 'अपच्छेदयौगपद्येऽपि प्रायश्चित्तम्' इत्यत्र द्रष्टव्यम् । * प्रायश्चित्तमभ्युदितेष्टिरूपं चन्द्राभ्युदयनिमित्तकं असंनयतोऽपि भवति । ६।५।६. **मीको.** पृ. ५८३ 'अभ्युदितेष्टिरूपं चन्द्राभ्युदयनिमित्तकं' इत्यत्र द्रष्टव्यम् । * प्रायश्चित्तं कपालादेः एकदेशभेदनस्कन्दनादावपि । ६।४।४।१०-१६. **मीको.** पृ. २०३९ 'दर्शपूर्णमासयोः कपालादेः०' इत्यत्र द्रष्टव्यम् । * प्रायश्चित्तं कृत्स्नपुरोडाशदाहे । ६।४।५। १७-२१. * प्रायश्चित्तं पञ्चशराव ओदनः दर्शे दोहयोरेकनाशेऽपि । ६।४।६।२२-२३. **मीको.** पृ. ९९२ 'आर्तिन्यायः' इत्यत्र द्रष्टव्यम् । * प्रायश्चित्तं परनिमित्तकमनुष्ठेयं अपच्छेदपौर्वापर्ये । ६।५।१९।५४. * प्रायश्चित्तं पापाभिवृत्तस्य श्रूयते । **सोम.** ६।८।४. * प्रायश्चित्तं पुनराधानं उभयाग्निनाशे । ६।४।८।२६-२७. **मीको.** पृ. ९४ 'अग्निहोत्रे उभयाग्निनाशे' इत्यत्र द्रष्टव्यम् । * प्रायश्चित्तं पुरुषार्थे लौकिक एव यूपोपस्पर्शने न वैदिके । 'यद्येकं यूपमुपस्पृशेत् एष ते वायो इति ब्रूयात् । यदि द्वौ, एतौ ते वायू इति । यदि बहून् एते ते वायवः इति' । ९।३।३।९. **मीको.** पृ. ११८ 'अग्नीषोमीये पशौ यागसमाप्त्युत्तरम्' इत्यत्र द्रष्टव्यम्। * प्रायश्चित्तं प्रादान्येनाग्निना आहवनीयादेः संसर्गे 'अग्नये शुचयेऽष्टाकपालं निर्वपेत्' इति । **भा.** १२।४। ७।२२. * प्रायश्चित्तं यूपविरोहणे प्रकृतावपि । **संकर्ष.** १।३।१०. 'यूपविरोहणे प्रायश्चित्तं प्रकृतावपि' इत्यत्र द्रष्टव्यम् । * प्रायश्चित्तं विनष्टसंस्कारार्थम् । **भा.** ६।४। ४।११, * प्रायश्चित्तं (कर्मणि) व्यृद्धे । २।४।२।८. * प्रायश्चित्तं शकृत्संप्रवेध-लोहितनिरसन-लोपनिमित्तं

भवत्येव, शकृल्लोहितयोरभावे नाशे वा अग्नीषोमीयपशौ । **भाट्ट.** ४।१।१२. * प्रायश्चित्तं सोमेन्द्रश्यामाकचरुः वैदिकसोमपानव्यापदि । ३।४।१२।३२-३३. * **प्रायश्चित्तानि** द्विप्रकाराणि । कानि चित् वैगुण्यस्य प्रमादादापतितस्य समाधानार्थानि, कानि चित् निमित्ते कर्माङ्गानि । **भा.** १२।३।५।१६, * विध्यपराधे च प्रायश्चित्तानि विधीयन्ते, निमित्ते कर्माङ्गभूतानि, यथा 'भिन्ने जुहोति' इति । ६।३।१।७. * **प्रायश्चित्तानां** अदोषनिर्घातार्थानां समुच्चयः । १२।३।६।१७. 'समुच्चयाधिकरणम्' इत्यत्र अधिकरणं द्रष्टव्यम् ।

प्रायश्चित्तानां दोषनिर्घातार्थानां विकल्पः ॥

प्रायश्चित्तेषु चैकार्थ्यान्निष्पन्नेनाभिसंयोगस्तस्मात् सर्वस्य निर्घातः । १२।३।५।१६ ॥

भाष्यम्— प्रायश्चित्तानि द्विप्रकाराणि । कानिचिद्वैगुण्यस्य प्रमादादापतितस्य समाधानार्थानि । कानिचिन्निमित्ते कर्माङ्गानि । तत्र समाधानार्थानि यथा 'यद्यृक्तो यज्ञ आर्तिमियात्, भूः स्वाहेति गार्हपत्ये जुहुयात्, अथ यदि यजुष्टो दक्षिणाग्नौ भुवः स्वाहेति, यदि सामतः स्वः स्वाहेत्याहवनीये । यद्यविज्ञातो भूर्भुवः स्वः स्वाहेत्याहवनीय एव' इति । आर्तिमियात्, विनाशमियादित्यर्थः । कः पुनर्यज्ञस्य विनाशः ? शिष्टस्याक्रिया, प्रतिषिद्धसेवनं च । कथं पुनर्ज्ञायते विनष्टस्य समाधानार्थं तत् प्रायश्चित्तमिति ? वाक्यसंयोगात् । यद्यार्तिमियादिदं कुर्यात् । यदि तस्मिन् कृतेऽपि तत् विनष्टमेव, कोऽर्थस्तेन कृतेन । यस्त्वत्र ब्रूते, आर्तौ निमित्ते कर्माङ्गं प्रायश्चित्तमिति । स च वक्तव्यः । अङ्गं नाम तत्, यत् प्रधानं फलवत् करोति । प्रधानं च विनाशादफलत्वमापन्नम् । यदि तदनेन फलवत् क्रियते तत एतदङ्गम् । तच्चेदफलं प्रसक्तमेतेन फलवत् क्रियते, हन्त तर्हि जातस्य विनष्टस्य समाधानार्थम् । अथ न क्रियते, न तर्हि कर्माङ्गम् । तत्र यदुच्यते निमित्ते कर्माङ्गमिति तदेव नास्ति । अपि च तत्रतत्र नष्टसमाधानमेव वाक्यशेषे श्रूयते 'अग्निर्वै देवानां पथिकृत् स्वेन भागधेयेनोपासीरन् । स एवैनं पन्थानमपि नयति, स एनं व्रतमालम्भयति' इति । तस्मादेते दोषनिर्घातार्थाः । तेषु विकल्पः स्यात् । कुतः ? ऐकार्थ्यात् । कथमैकार्थ्यमेतेषाम् ? निष्पन्नेन दोषेण केवलस्य तस्यतस्याभिसंयोगः, 'यद्यृक्तो यज्ञ आर्तिमियात्, भूः स्वाहेति जुहुयात्' इति । तस्मात् सर्वस्य दोषस्यैकेन निर्घातः । एकेन चेन्निर्हतो दोषो द्वितीयादीनि प्रयोगान्तरार्थानि भवन्ति । एवं स्मार्तेष्वपि द्रष्टव्यम् ।

सोम— न नैमित्तिकमात्रस्य वैगुण्यसमाधानार्थत्वम्, किन्तु कर्मवैगुण्ये निमित्ते विधीयमानस्य । तेन भिन्नादिहोमानां न वैगुण्यसमाधानार्थत्वम् । **भवनाथस्तु** (प्रभाकरानुयायी) यज्ञार्तिरूपेण अङ्गान्वयः, न तु ऋगाद्यार्तितया इत्यैकार्थ्यमाह । **सूत्रार्थस्तु—** प्रायश्चित्तेषु यस्मात् निष्पन्नेन वैगुण्यरूपनिमित्तेन योगः, तस्मादैकार्थ्यम् । ततश्च एकेन सर्वस्य वैगुण्यस्य निर्घातः इति विकल्पः इति ।

वि— 'वैश्वानरे पथिकृते साहित्यं वा विकल्पनम् ।, साहित्यं स्याददृष्टाय, विकल्पः स्यात् समाधये ॥' वैगुण्यसमाधानाय ।

भाट्ट— प्रायश्चित्तानि कर्मवैगुण्यनिमित्तदोषनिर्घातार्थानि । तेषु यानि एकस्मिन्नेव वैगुण्ये अनेकानि निरपेक्षाणि तत्तद्वाक्यैर्विधीयन्ते तेष्वपि सत्यपि अदृष्टार्थत्वे पूर्ववत् विकल्पः । यथा 'यदि सामतो यज्ञ आर्तिमियात् सुवरित्याहवनीये जुहुयात्' इति कस्यांचिच्छाखायामध्वर्युकर्तृको होमः । अपरस्यां तु 'यदि सामतो यज्ञ आर्तिमियात् स्वरित्याहवनीये' इति ब्रह्मकर्तृको होमः । इदं चैकजातीययज्ञार्तावेव तत्परिहारार्थं प्रायश्चित्तद्वयम् । तथा दर्शपूर्णमासातिक्रमणे एव क्वचित्पाथिकृतीष्टिः, क्वचिच्च वैश्वानरीति । तदत्रापि दर्शपूर्णमासातिक्रमनिमित्तप्रत्यवायपरिहारार्थत्वमपेक्षितविधिवलात् वाक्यशेषात् च अवगम्यते । अतश्च व्रीहियवादिवदेव तत्तद्विनियोगविधिवेलायामेव एकवैगुण्यध्वंसरूपावान्तरकार्यनैरपेक्ष्येण साधनत्वावगमात् युक्तोऽत्रापि विकल्पः । न च कारणताऽवच्छेदकवैजात्यात् धर्मव्यवस्थासिद्धये च अवान्तरापूर्वभेदस्यावश्यकत्वात् कथं न प्रयाजादिवत् समुच्चयः । तद्भेदेऽपि नैरपेक्ष्येणैव विनियोगविधिदशायां उभयोस्तददृष्टयोः एकवैगुण्यध्वंसजनक-

त्त्वावगतेः प्रयाजादिवत् औत्तरकालिकेन प्रयोगविधिना समुच्चयाप्रतीतेः । नहि एकादशोक्तरीत्या (११।१।५) एकस्मिन् प्रधानोपकाराख्ये महाकार्ये प्रयाजादीनां सर्वेषामङ्गानां प्रयोगविधिना साहित्यावगमवत् अवान्तरकार्येऽपि साहित्यावगमः, तथात्वे उत्पत्तिविनियोगावगतनैरपेक्ष्यबाधापत्तेः । अतस्तस्य विनियोगवाक्यप्रमितावान्तरकार्यनिरूपितत्वस्य आवश्यकत्वात् युक्तो विकल्पः । न चैवमपि प्रकृते नैरपेक्ष्यस्य तत्तदवान्तरापूर्वनिरूपितत्वेनैवोपपत्तेः वैगुण्यध्वंसनिरूपितत्वे प्रमाणाभावः, तस्य वैगुण्यध्वंसनिरूपितनैरपेक्ष्यावगमोत्तरकालं धर्मव्यवस्थादिसिद्ध्यर्थं कल्पितस्य तद्बाधकत्वानुपपत्तेः ।

मण्डन— ' प्रायश्चित्तं स्याद् विकल्पेन नाशे । '

शंकर— ' दोषे प्रायश्चित्तयोश्च । ' विकल्पनम् ।

* **' प्रायश्चित्तेषु चैकार्थ्यात् '** (१२।३।५।१६) इत्यधिकरणे पाथिकृतस्य वैश्वानरद्वादशकपालस्य च विकल्पो वक्ष्यते, एकार्थत्वात् । **बाल. पृ. ८५.**

* ' प्रायश्चित्तेषु चैकार्थ्यात् ' इति न्यायेन एतेषां नैमित्तिकानां कर्मणां (चन्द्राभ्युदयेष्ट्यादीनां) स्वकाले क्रियमाणदर्शाङ्गत्वं प्रकरणात् । तच्च अकालोपक्रमनिमित्तदोषनिर्घातार्थत्वात् च द्वादशाधिकरणन्यायेन विकल्प्येत, इति प्राप्ते । **भाट्ट. ६।५।१.**

प्रायश्चित्तेषु चैकार्थ्यान्निष्पन्नेनाभिसंयोगस्तस्मात् सर्वस्य निर्घातः ।१२।३।५।१६॥

'यदि ऋक्तो यज्ञ आर्तिमियात् भूः स्वाहा इति गार्हपत्ये जुहुयात्' इत्यादिषु दोषनिर्घातार्थेषु प्रायश्चित्तेषु ऐकार्थ्यात् एककार्यत्वात् विकल्पः स्यात् । निष्पन्नेन दोषेण अभिसंयोगः तस्यतस्य प्रायश्चित्तस्य नाशकत्वेन भवति इति ऐकार्थ्यं भवति । तस्मात् अन्यतमेन प्रायश्चित्तेन सर्वस्य दोषस्य निर्घातः नाशो भवति । इति सिद्धान्तः । एवं स्मार्तेऽपि । **के.**

* **प्रायश्चित्ताचरणात्** दुःखेनाल्पेनापि सता महते दुःखान्तराय प्रवृत्तः सन् अधर्मो विनाश्यते इति वचनात् गम्यते । **वा. ३।८।३।९.**

* **प्रायश्चित्ततपांसि** यानि तेषां दोषापहारमात्रमेव फलम् । **वा ३।८।३।९.**

* **प्रायश्चित्तपशुः** (व्रात्यपशुः) आधानव्यवहितसोमानुष्ठाने सोमात् प्रागेव सोमाधिकारसिद्ध्यर्थं कर्तव्यः । न तेन व्यवधानं भवति । **टुप्. ५।४।३।६.**

* **प्रायश्चित्तरूपो** वैश्वानरयागः अग्निचयने संवत्सरमुख्याग्निधारणासंभवे नैमित्तिकः । **४।४।६।१२–१३.**

* **प्रायश्चित्तरूपज्योतिष्मतीष्टिः** दर्शपूर्णमासार्थोद्धृताग्निनाशेऽपि नानुष्ठेया । **९।४।६।२८.**

* **प्रायश्चित्तविधिः** । वैकल्पिकानामादित एवाङ्गीकरणात् आश्रितक्रमातिक्रमे प्रायश्चित्तविधिरुपपत्स्यते । **वा. २।४।२।२३.**

* **प्रायश्चित्तहोमाः** दर्शपूर्णमासयोः, फलीकरणहोमोत्तरं कपालोद्वासनात् प्राक् क्रियन्ते । **वि. १०।७।१२.**

* **प्रारब्धं** परिसमापनीयं गम्यते । **भा. १०।५।२।८.**

* **प्रारब्धकाम्यकर्मणो** नित्यकर्मणश्च श्रुतद्रव्यापचारे प्रतिनिधिना समापनम् । **६।३।४।१३–१७.**

* प्रारब्धकाम्यकर्मणः समाप्तिनियमः । **६।२।३। १४–१६.** ' शिष्टगर्हाधिकरणम् ' इत्यत्र द्रष्टव्यम् ।

* **प्रारब्धलौकिककर्मसमाप्तेः** अनियमः । **६।२।४। १७–१९.**

* **प्रावचनस्वरः** प्रवचनकालीनः स्वरः त्रैस्वर्यम् । **भा. १२।३।८।२०.**

* **प्रावाहणिः** यः प्रवाहयति । **भा. १।१।८।३१.**

* ' यदि **प्रावृषि** यजेत सकृदुपस्तृणीयात् द्विरभिघारयेत् ' । **भा. १०।४।२५।५६.**

* **प्रावृत्तिकः क्रमः** प्रयोजकवशः । **वा. ३।१।१।१ पृ. ६५१.** * प्रावृत्तिकः क्रमः प्राजापत्यपशुसंस्कारेषु द्वितीयादिषु, प्रथमे उपाकरणे तु इच्छया प्रवृत्तिः । **वि. ५।१।५.**

प्रावृत्तिकक्रमन्यायः ॥

प्रवृत्त्या तुल्यकालानां गुणानां तदुपक्रमात् । ५।१।५।८ ॥

भाष्यम्— वाजपेये ' सप्तदश प्राजापत्यान् पशूनालभते ' इति श्रूयते । तेषु पशुषु चोदकप्राप्ताः प्रोक्षणादयो धर्माः । तत्र प्रथमः पदार्थो यतः कुतश्चिदारब्धव्यः । द्वितीयादिषु भवति संशयः, किं तत एव द्वितीयोऽपि

पदार्थ आरब्धव्य उत द्वितीयादिष्वनियम इति । किं तावत् प्राप्तम् ? नियमकारिणः शास्त्रस्याभावादनियम इति ।

एवं प्राप्ते, ब्रूमः । यतः पूर्व आरब्धस्तत एव द्वितीयादयोऽपि पदार्था आरब्धव्या इति । कुत एतत् ? तदुपक्रमात् । सर्वे हि पदार्थाः प्रधानकालान्न विप्रकृष्टव्याः । प्रधानं हि चिकीर्षितम् । कृतं वा तेषां निमित्तम् । सहवचनं हि भवति पदार्थैः सह प्रधानं कर्तव्यमिति । बहुपदार्थसमाम्नानात् तु अवश्यम्भावी विप्रकर्षः । तथापि तु यावद्भिर्नाव्यवहितः शक्यः पदार्थः कर्तुं तावद्भिर्व्यवधानमवश्यं कर्तव्यम्, ततोऽभ्यधिकेन न व्यवधातव्यमिति । यदि द्वितीयं पदार्थमन्यत आरभेत, ततोऽधिकैरपि व्यवदध्यात् । तथा प्रयोगवचनं बाधेत । ननु तथा सति कश्चिदल्पैर्व्यवहितो भविष्यति । उच्यते । अनुमतानां व्यवधायकानां त्यागेन कश्चिदभ्यधिको गुणो भवतीति । तस्माद्यतः पूर्वपदार्थ आरब्धस्तत एवोत्तर आरम्भणीय इति ।

टुप्— 'वैश्वदेवीं कृत्वा प्राजापत्यैश्चरन्ति' इत्यस्मिन्काले उपादीयमानाः सेतिकर्तव्यताकाः इतरेतरयुक्ताः (वैश्वदेवानन्तरकाले करणत्वेन उपात्तत्वात्) सह कार्या इत्यवगते क्रमश्चिन्त्यते । तत्र प्रथमे पदार्थे अनियम (एव) । यतः कुतश्चित् (पशोरारभ्य) कर्तव्यः । द्वितीयस्तु (पदार्थः) किं प्रथमो यत आरब्धः तत एवारम्भणीयः उत (तत्रापि) अनियमः (एव) इति (संशयः) । श्रुत्यर्थपाठाभावादनियमे प्राप्ते (अभिधीयते–) प्रवृत्त्यैव नियमः । (प्रथमः पदार्थो येन क्रमेण कृतः स एवोत्तरेष्वपि नियम्येत ।) कुतः एतत् ? (इति प्रश्नभाष्यम् । प्रयोगविधिसमयोत्तरकालभाविनी प्रवृत्तिः कथं तद्व्यापारस्य नियन्त्री भवति इत्यर्थः ।) तदुपक्रमात् (इत्युत्तरभाष्यम्) । सर्वे हि पदार्थाः प्रधानकालात् न विप्रकृष्टव्याः । सहवचनं हि भवति पदार्थैः सह प्रधानं कर्तव्यं इत्येवं व्यवहितो ग्रन्थसंबन्धः (कर्तव्यः) । कथं (व्यवहितसंबन्धः ? उत्तरम् ––) प्रधानकालात् न विप्रकृष्टव्या इत्यस्य हि सहवचनं भवतीत्युपपत्तिः । (अतो योग्यार्थयोरनयोः ग्रन्थयोरव्यवायार्थं प्रधानं हि चिकीर्षितं इत्यादिभाष्यं अवश्यम्भावी विप्रकर्ष इत्यस्य अनन्तरं द्रष्टव्यम् ।) कथं (पदार्थैः सह प्रधानस्य वचनं यावता ' दर्शपूर्णमासाभ्यां यजेत ' इत्यादिषु प्रधानमात्रं श्रूयते ?) भवन्तं भावयेद्यागेनेत्थमिति ('यजेत' इत्यस्य अर्थः) । तत्र यस्यामेव वेलायां स्वर्गो भवने कर्तृत्वं प्रतिपद्यते तस्मिन्नेव क्षणे करणेतिकर्तव्यते अपि व्याप्रियेते । तस्मात् त्रितयस्य फलकरणेतिकर्तव्यत्वस्य (युगपत्) यजेतेत्यनेन कर्तव्यतोच्यते । शब्दवृत्तं तावदेवम्, वस्त्वप्येवमेव । यदि भूतकालं भाव्यम्, भविष्यति काले करणेतिकर्तव्यते, ततोऽनयोः करणेतिकर्तव्यतात्वमेव न स्यात् । (न हि पश्चाद्भावि करणम् ।) भविष्यति भाव्ये भूते (च) करणे अयमेव दोषः (न हि विनष्टं करणं भवतीति ।) करणेतिकर्तव्यतयोरपि विप्रकर्षे अयमेव दोषः । अतः शब्दवस्तुभ्यामेककालतैषाम् । तत्र यदि फलस्य कालः अवगम्येत, ततस्तदीयेन कालेन करणेतिकर्तव्यतयोः परिच्छेदः स्यात् । इह तु स्वर्गस्य अनवगतः कालः, करणेतिकर्तव्यतयोस्तु अवगतः । तयोस्तु कालेन स्वर्गभवनकालः परिच्छिद्यते । ततः प्रधाने सेतिकर्तव्यताके एकैकस्मिन् क्षणे सहकर्तव्ये प्राप्ते, एककर्ता बहूनि प्रधानानि इतिकर्तव्यतां वा असमर्थः कर्तुं यौगपद्येनेत्यवश्यम्भावी विप्रकर्षः । ईदृशेन विप्रकर्षेण क्रियमाणेन अपि सहैव पदार्थाः कृता भवन्ति । तत्र प्रधान-(आसत्ति–)नियमेन पदार्थाः प्राप्नुवन्ति आग्नेयादीनां सकाशे । तत्र श्रुत्यर्थपाठैः अनियमेन या आसत्तिः सा व्यावर्त्यते । (नियममात्रे श्रुत्यर्थादीनां व्यापारः, न तु क्रमस्वरूपे इत्यर्थः । अस्मिश्चावसरे उत्कृष्टं भाष्यं व्याख्यातव्यमित्याह–) अवश्यम्भाविनि विप्रकर्षे प्रधानं हि चिकीर्षितम्, कृतं वा तेषां निमित्तं इत्यर्थतो ग्रन्थसंबन्धः । (' चिकीर्षितं कृतं वा ' इत्यनयोः व्यवस्थां दर्शयति–) अग्न्यन्वाधानादीनां करिष्यमाणं प्रधानं निमित्तम्, स्विष्टकृदादीनां तु कृतम् । तेनैवं (अवश्यम्भाविनि विप्रकर्षे) केचित् पदार्थाः क्षणव्यवहिताः (प्रधानेन) अपेक्ष्यन्ते, केचिद् द्वाभ्याम्, केचित् बहुभिः । प्रकृतावयमर्थ इति (इह) विकृतावप्ययमेव न्यायः (चोदकप्राप्तेः) ।

अग्न्यन्वाधानादि प्रागुपाकरणात् साधारणं सर्वेषां (पशूनां) सकृत् कृतम् । उपाकरणादयोऽपि संनिपत्योपकारकाः साहित्येन (पशुभिः) अनुभवितव्याः, सहचोदितत्वात् तेषाम् ।

तदेवं यस्य प्रथममुपाकरणं क्रियते, तस्य पाठेन यद्यपि द्वितीयः पदार्थः (नियोजनरूपः) उपस्थाप्यते, तथापि सहवचनादिममर्थमाकाङ्क्षति, सजातीयेन षोडशक्षणाव्यवहितं द्वितीयं पदार्थम्, द्वितीयस्तु (पशुः) पञ्चदशभिरुपाकरणक्षणैरेकेन च (प्रथमस्यैव पशोः) नियोजनक्षणेन (व्यवहितं स्वीयं द्वितीयं पदार्थम्) । एवं तृतीयादयोऽपि (पशवः) सजातीयविजातीयव्यवहितानपेक्षन्ते । अन्त्यस्तु विजातीयक्षणाव्यवहितमेव अपेक्षते । संनिपत्योपकारकानालोच्य ईदृशी अपेक्षा (षोडशक्षणव्यवधानापेक्षा) प्रधानानां भवति । अत आह (भाष्यकारः–) यावद्भिर्नाव्यवहितः शक्यः पदार्थः कर्तुं तावद्भिः व्यवधानमवश्यम्, ततोऽभ्यधिकैस्तु न व्यवधातव्यम् । यद्येकं पदार्थं कृत्वा द्वितीयोऽपि तस्यैव क्रियेत, सहवचनं नोपपद्येत । एवं सर्वत्र योज्यम् । (उत्तरभाष्यं अनुभाषते–) उच्यते । अनुमतानां व्यवधायकानां त्यागे न कश्चिदप्यधिको गुणो भवतीति किमुक्तं भवति ? अनुमतैर्व्यवधायकैः परित्यज्यमानैर्दोष एव, अभ्यधिकैर्व्यवधाने अश्रुतकरणम्, न्यूनैरपि अश्रुतकरणमेव । तस्मात् साहित्यसंपत्तये यः क्रमोऽपेक्षितः स द्विधा (न्यूनैरधिकैश्च व्यवधाने) बाध्यते ।

सर्वमिति चेत् । ९ ॥

भाष्यम्— इति चेत् पश्यसि प्रधानाविप्रकर्षेण प्रयोगवचनानुग्रह इति । सर्वं तर्हि गुणकाण्डमेकस्मिन्नपवर्जयितव्यम्, यथा सौर्यादिषु ।

टुप्— यदि प्रधानानामस्त्या अङ्गानां विप्रकर्षो नेष्यते, एवं तर्ह्येकैकः पशुरवान्तरप्रयोगवचनेन निरपेक्षः पदार्थकाण्डेन संबध्यताम् । (उत्तरसूत्रेण कीदृशमुत्तरं दत्तं तद्दर्शयति–) उत्तरं तु सर्व एवैते (प्राजापत्याः पशवः) इतरेतरयुक्ता उपादीयन्ते ।

नाकृतत्वात् । १० ॥

भाष्यम्— नैतदेवम् । सहप्रयोग एव हि नानुष्ठितः स्यात् ।

क्रत्वन्तरवदिति चेत् । ११ ॥

भाष्यम्— अथ यदुक्तम्, यथा क्रत्वन्तरेषु सौर्यादिष्विति, तत् परिहर्तव्यम् ।

नासमवायात् । १२ ॥

भाष्यम्— न तेषामर्थात् क्रमः प्राप्नोति यो नियम्येत । अङ्गाश्रयो हि नियमो भवितुमर्हति । अनङ्गसमाश्रितस्य स्वयमङ्गता कल्प्येत ।

टुप्— ये लोकप्रयोगवचनपरिगृहीतास्तेषां क्रमो नियामकः । सौर्यः इतिकर्तव्यतां गृह्णन् ऐन्द्राग्ननिरपेक्षो गृह्णाति । अत ऐन्द्राग्नस्य येतिकर्तव्यता सा सौर्यस्यानङ्गम् । तस्मात् क्रमः परिच्छेदकत्वेन नापेक्ष्यते । अत आह– अङ्गाश्रयो हि नियमो भवितुमर्हति । अनङ्गसमाश्रितस्य स्वयमङ्गता कल्प्येत । येषां पदार्थानामङ्गत्वं नावगतं तेषामङ्गता निष्प्रमाणिका कल्प्येत । अङ्गाश्रितश्च क्रमः ।

शा— नियामकाभावात् प्रथमवत् द्वितीयादौ अपि अनियमः, इति प्राप्ते, सिद्धान्तमाह– '**प्रवृत्त्या वा नियम्येत प्रत्यासत्तेरनुग्रहात् । अन्यथा व्यवधानं स्यादनुज्ञाताधिकैरपि ॥**'

सोम— प्रथमपदार्थो येन क्रमेण कृतः तेनैव क्रमेण द्वितीयाद्यनुष्ठाने प्रतिपदार्थं षोडशभिः एव व्यवधानं भवति, इतरथा प्रथमपदार्थानुष्ठाने यः प्रथमः तस्य पशोः सर्वान्ते द्वितीयपदार्थानुष्ठाने द्वात्रिंशता व्यवधानम्, द्वितीयपशोः सर्वान्ते द्वितीयपदार्थानुष्ठाने एकत्रिंशता व्यवधानम्, तृतीयपशोः सर्वान्ते द्वितीयपदार्थानुष्ठाने त्रिंशता, इत्येवं अतिव्यवधानं स्यात्, अतः 'वैश्वदेवीं कृत्वा प्राजापत्यैश्चरन्ति' इति तृतीयाबलेन करणभूतानां प्राजापत्यानां साहित्यावगमात् सेतिकर्तव्यतानामेव करणत्वात् साङ्गानां पशूनां साहित्ये सति पदार्थानुसमयात् षोडशभिः पदार्थैः व्यवहितिः प्रत्यासत्तिः शास्त्रार्थः इति भावः । **सूत्रार्थस्तु**– तुल्यकालानां नियोजनादीनां प्रवृत्त्या क्रमः नियुज्येत, तदुपक्रमात् तेषामङ्गानां प्रधानसमीपे

अनुष्ठाननियमात् अङ्गानां प्रधानप्रत्यासन्नत्वात् इति यावत् ।

वि— 'उपाकृतानां किं सप्तदशानां यूपबन्धने । क्रमो नास्त्यस्ति वा, नास्ति नियामकविवर्जनात् ॥ आद्यसंस्कृत्यनुष्ठानं यत्क्रमेण स एव हि । क्रमोऽन्यत्र प्रवृत्तिस्तु क्रमस्यात्र नियामिका ॥'

भाट्ट— एवं 'सप्तदश प्राजापत्यान् पशूनालभते' इत्यादौ एकैकस्मिन् पशौ उपाकरणादीनां पदार्थानामावर्तनीयानां पदार्थानुसमयस्य वक्ष्यमाणत्वात् आद्य उपाकरणपदार्थो येन क्रमेण कृतस्तेनैव क्रमेण नियोजनादिद्वितीयप्रभृतिपदार्थाः कर्तव्याः । अन्यथा प्रकृतिप्राप्तस्य उपाकरणनियोजनयोरव्यवहितानन्तर्यस्यौपदेशिकपशुसाहित्यानुरोधेन षोडशक्षणव्यवधानेऽप्यधिकक्षणव्यवधानापत्तेः । अत्र ह्युत्पत्तिवाक्ये, 'वैश्वदेवीं कृत्वा प्राजापत्यैश्चरन्ति' इति प्रयोगवाक्ये च साङ्गानां सप्तदशयागानां साहित्यावगमादङ्गसाहित्यानुरोधेनैकैकाङ्गेन सप्तदशयागानां युगपदुपकर्तव्यत्वावगतेः आवर्तनीयाङ्गेषु चैकेन कर्त्रा युगपदुपकारासंभवादवश्यं षोडशक्षणव्यवधानेऽपि तदधिकव्यवधाने औपदेशिकसाहित्यस्यातिदेशिकानन्तर्यस्य च बाधः स्पष्ट एव । अत एव केषु चित् पशुषु न्यूनक्षणव्यवधानमपि दोष एव । अतः पूर्वपदार्थक्रम एव प्रयोगविध्यवगतप्रत्यासत्त्यनुगृहीतोत्तरपदार्थक्रमनियमे प्रमाणम् । अत्र पूर्वेत्युपलक्षणम् । उत्तरपदार्थप्रवृत्तिक्रमेणापि पूर्वपदार्थक्रमनियमस्य न्यायतौल्येन वक्ष्यमाणत्वात् ।

अयं च प्रवृत्तिक्रमोऽनुष्ठानकालीनोऽपि प्रयोगविधिप्रवृत्तेः पूर्वमपेक्षावशात् अवगम्यमानस्तदवगम्यप्रत्यासत्त्यनुगृहीतः पदार्थान्तरक्रमं बोधयति । ततश्च तद्विनियोजकवाक्यकल्पनया तस्याङ्गत्वेऽवधारिते प्रयोगविधिना प्रयोगविधानम् । तदुत्तरं च प्रयोगविधेः पर्यवसानमिति ध्येयम् । **न चेदं** सर्वं साहित्यानुरोधेन स्यात्, तत्रैव च प्रमाणाभावः बोधकशब्दाभावादिति **वाच्यम्** । एकेन पदेनानेकोपस्थितौ क्रियान्वये एककालावच्छिन्नत्वरूपसाहित्यस्यानुभूयमानस्य शाब्दत्वसिद्ध्यर्थं लक्षणाङ्गीकारात् । प्रतीयते हि, 'शतावधानवांश्चैत्रः' 'पृथिव्यां राजानो बहवः' इत्यादौ बहुत्वावच्छिन्नानामवधानादीनां चैत्राद्यन्वयोऽसति बाधके एककालावच्छिन्नः । अतः प्राजापत्यपदादौ तल्लक्षणेत्यपि ध्येयम् ।

मण्डन— 'प्रवृत्त्या पशुषु क्रमः ।'

शंकर— 'द्विपश्वादौ प्रवृत्तितः ।'

* **प्राशस्त्यं** अप्राशस्त्यं च । **ननु** किमिदं प्राशस्त्यमप्राशस्त्यं वा ? न तावत् गुणवत्त्वं दोषवत्त्वं वा, गुणदोषत्वयोरेव निर्वक्तुमशक्यत्वात् । नहि 'वायुर्वै क्षेपिष्ठा देवता' 'अपशवो वा अन्ये गोअश्वेभ्यः' इत्यादौ वायुक्षेपिष्ठत्वादिकं गुणः, अपशुत्वं गवाश्वगतप्राशस्त्याभाववत्त्वं वा दोषः । तज्ज्ञानस्य प्रवृत्तित्वावच्छिन्नं प्रति व्यभिचारित्वेन अनुपयोगित्वात्, क्षेपिष्ठत्वादेः शक्त्यैवोपस्थितत्वेन लाक्षणिकसिद्धान्तभङ्गापत्तेश्च । नापि स्वर्गनरकादिजनकत्वे, स्वर्गादिपदसमभिव्याहारादेव तत्सिद्धौ अर्थवादवैयर्थ्यापत्तेः । **इति चेत्** । क्रियाजन्यदुःखापेक्षया अधिकेष्टसाधनत्वं प्राशस्त्यम् । तज्जन्यसुखापेक्षया अधिकानिष्टजनकत्वं अप्राशस्त्यं इत्येवंविधयोस्तयोः उपपत्तेः । नहि अयमर्थः अन्यतः सिद्धः, विधिना इष्टानिष्टसाधनत्वमात्रस्यैव आक्षेपात् । अत एव यत्र नार्थवादः पठितः, तत्र विधिना तत् आक्षिप्यते एव । **न च** एवंविधतज्ज्ञानस्य प्रवृत्तिनिवृत्त्योः अनुपयोगः, एवंविधज्ञानाभावेऽपि प्राचीनकर्मवशेन तात्कालिकसुखदुःखयोः उत्कटरागद्वेषसत्त्वे प्रवृत्तिनिवृत्त्योः उदयसत्त्वात् । एवंविधज्ञानसत्त्वेऽपि च प्राचीनकर्मवशेनैव प्रवृत्तिनिवृत्त्योरनुदयाच्च इति **वाच्यम्** । तथात्वेऽपि एवंविधज्ञानसत्त्वे क्रियाजन्यतात्कालिकदुःखापेक्षया अधिके इष्टे प्रायशो लोके वेदे वा सर्वेषां पुरुषाणां उत्कटरागदर्शनेन तात्कालिकसुखापेक्षया अधिके दुःखे उत्कटद्वेषदर्शनेन च तज्ज्ञानस्य रुच्यरुच्यात्मकोत्कटरागद्वेषोपयोगित्वस्य सर्वसिद्धत्वात् । क्वचिदेव तु प्राचीनकर्मणः औत्कट्ये तत्सत्त्वेऽपि तदभावः, न तु सर्वत्र । अतः उत्कटप्राचीनकर्माभावे उक्तविधप्राशस्त्याप्राशस्त्यज्ञानस्य उत्कटरागद्वेषजनकत्वात् तद्द्वारा प्रवृत्तिनिवृत्त्योरुपयोगः । **न चैवं** यस्य स्वत एव रुच्यरुची, तं प्रति प्राशस्त्याप्राशस्त्यज्ञानस्य अनुपयोगेन सर्वान् पुरुषान् प्रति अनुपयोगः **इति वाच्यम्** । सर्वपुरुषान् प्रति अनुप-

योगेऽपि पुरुषविशेषं प्रति उपयोगेनैव अर्थवादप्रामाण्योपपत्तेः । स्वतःसिद्धस्मरणवतः मन्त्रजन्यस्मरणस्य अनुपयोगेऽपि मन्त्राम्नानवशेन तज्जन्यस्मरणस्य अभ्युदयकारित्वकल्पनवत् अर्थवादाम्नानबलेन तद्बोधितप्राशस्त्यस्य अभ्युदयकारित्वकल्पनोपपत्तेश्च ।

एवंविधप्राशस्त्यादेश्च लक्षणयैव अर्थवादैः प्रतिपादनात् लाक्षणिकत्वसिद्धान्तस्यापि न भङ्गः । सा च वाक्यलक्षणायां बाधकाभावात् अर्थवादस्थपदसमुदाये एकस्मिन्नेव वा पदे लक्षणा । इतरपदानि तात्पर्यग्राहकाणि इत्यन्यदेतत् ।

तच्च प्राशस्त्यमप्राशस्त्यं वा इतिकर्तव्यतात्वसंबन्धेन शाब्दभावनायामन्वेति इति बहवः । स्वरूपसंबन्धेन धात्वर्थादावेव अन्वेति इति **के चित्** । **वस्तुतस्तु** वक्ष्यमाणरीत्या अन्यसुबन्तार्थवदेव कार्यकारणभावकल्पनालाघवानुरोधेन प्राशस्त्यस्य स्वविषयकज्ञानजन्येष्टविषयकोत्कटरागजन्यत्वसंबन्धेन प्रवृत्तौ, अप्राशस्त्यस्य च स्वविषयकज्ञानजन्यानिष्टविषयकोत्कटद्वेषप्रयोज्याभावप्रतियोगित्वसंबन्धेन प्रवृत्तौ एव अन्वयः । **न चैवं** प्रधानार्थवादेनैव क्रियाजन्यतात्कालिकदुःखापेक्षया स्वफले आधिक्यसिद्धौ अङ्गार्थवादवैयर्थ्यम्, प्रधानजन्यफलापेक्षया अङ्गजन्यफलस्य भेदाभावात् क्रतूपकारे च आधिक्यासंभवात् इति **वाच्यम्** । तत्तदङ्गजन्यतात्कालिकदुःखकूटापेक्षया प्रधानफले आधिक्यबोधनार्थत्वात् । अतः विध्यर्थवादेषु प्रकृष्टफलकत्वरूपप्राशस्त्यलक्षणा । निषेधार्थवादेषु च प्रकृष्टदुःखजनकत्वरूपाप्राशस्त्यलक्षणा इति मूलग्रन्थोन्नीतः पन्थाः ।

वस्तुतस्तु अभ्यनुज्ञाविध्यर्थवादेषु 'नातिरात्रे षोडशिनं गृह्णाति ' इत्यादिनिषेधार्थवादेषु च नैवंविधप्राशस्त्याप्राशस्त्यलक्षणासंभवः । नहि ' हुतायां वपायां दीक्षितान्नमश्नीयात् ' इत्यत्र क्रियाजन्यानिष्टापेक्षया तृप्त्याख्यस्य फलस्य आधिक्यं बोधयितुं शक्यम्, निषेधप्रमितानिष्टस्य आधिक्यावश्यम्भावात् । क्रियाजन्यतात्कालिकदुःखापेक्षया आधिक्यस्य लोकसिद्धत्वेन निषेधसत्त्वे तज्ज्ञानस्य प्रवृत्त्यनुपयोगित्वात् । षोडशिग्रहणजन्यसुखापेक्षया तज्जन्यदुःखस्य आधिक्यं नैव संभावयितुं शक्यम् ।

अपि च श्येनार्थवादे श्येनजन्यतात्कालिकदुःखापेक्षया यदि अभिचाराधिक्यं बोध्यते तदा तज्ज्ञानस्य नैव प्रवृत्त्युपयोगित्वम् । श्येनप्रयोज्यनरकादिदुःखापेक्षया आधिक्यं तु नैव बोधयितुं शक्यम् । ' न हिंस्यात् ' इति निषेधार्थवादेन तस्य अभिचारापेक्षया आधिक्यबोधनाच्च ।

अतो विध्यर्थवादेषु विधेयतावच्छेदकसामानाधिकरण्येन बलवदनिष्टाननुबन्धित्वरूपं प्राशस्त्यं लक्ष्यते । निषेधार्थवादेषु च निषेध्यतावच्छेदकसामानाधिकरण्येन बलवदनिष्टानुबन्धित्वरूपप्राशस्त्यम् । अत्र अनिष्टे बलवत्त्वं उत्कटद्वेषविषयत्वम्, न तु आधिक्यम् । स्वर्गन्यूनेऽपि तात्कालिकदुःखे प्राचीनकर्मवशेन कदाचित् उत्कटद्वेषोदयात् । अत एव नैव तदा यागादौ प्रवर्तते । नरकन्यूनेऽपि च तात्कालिकसुखे प्राचीनकर्मवशेन उत्कटरागोदयाच्च । अत एव अभिचारादौ प्रवर्तते । अत एव यागादौ कदाचित् प्राचीनशुभकर्मवशात् बलवदनिष्टाननुबन्धित्वम्, न तु सर्वदा । अत एव विधेयतावच्छेदकसामानाधिकरण्येन इत्यनेन तस्य कालिकाव्याप्यवृत्तित्वं विवक्षितम् । एवं ' न कलञ्जं भक्षयेत् ' इत्यादौ कदाचिदेव शुभकर्मवशात् बलवदनिष्टानुबन्धित्वज्ञानम् । अतस्तत्रापि कालिकाव्याप्यवृत्तित्वसिद्ध्यर्थं निषेध्यतावच्छेदकेत्यादि । एतादृशाव्याप्यवृत्तित्वज्ञापनार्थमेव कौस्तुभादौ योग्यतापदम् । (**कौस्तुभे** तावत् ' तत्त्वं च – प्राशस्त्याप्राशस्त्यं च – बलवदनिष्टाननुबन्धित्वानुबन्धित्वयोग्यत्वम् ' इति पृ. २८ पं. १० । **भाट्टदीपिकायां** च आदिशब्दोक्तायां ' स्तुतिनिन्दापदवाच्ये प्राशस्त्याप्राशस्त्यापरपर्याये बलवदनिष्टाननुबन्धित्वानुबन्धित्वयोग्यत्वरूपे ' पृ. २२ पं. १५–१६) । एवंविधबलवदनिष्टाननुबन्धित्वज्ञानस्य च येन पुरुषेण यागे सर्वदैव बलवदनिष्टाननुबन्धित्वं बुद्धम्, तं प्रति तद्वृत्तिज्ञाने अप्रामाण्यज्ञानादिसंपादकतया उपयोगः । येन च कलञ्जभक्षणे बलवदनिष्टाननुबन्धित्वं सर्वदैव बुद्धम्, तं प्रति तद्वृत्तिज्ञाने अप्रामाण्यज्ञानसंपादकतया एवंविधबलवदनिष्टानुबन्धित्वज्ञानस्योपयोगः, अवच्छेदकावच्छेदेन तद्वत्ताबुद्धिं प्रति सामानाधिकरण्येन तदभाववत्तानिश्चयस्य विरोधित्वात् । अतश्च एतादृशप्राशस्त्यज्ञानस्य सामग्रीसंपादनद्वारा प्रवृत्तौ उपयोगः । तादृशाप्राशस्त्यज्ञानस्य च प्रवृत्तिसामग्रीविघटनद्वारा निवृत्तावुपयोगः । संभवति चेदमभ्यनुज्ञाविध्यर्थवादे, वपाहोमोत्तरदीक्षितान्नभोजनस्य निषेधप्रयुक्तानिष्टाननुबन्धित्वज्ञापनात् । न च तस्य दोषाभावरूपस्य विधिनैव आक्षेपात् कृतमर्थवादेन इति वाच्यम् । तेन तदाक्षेपेऽपि सामानाधिकरण्येन बलवदनिष्टाननुबन्धित्वस्य अर्थवादेन बोधनोपपत्तेः । एवं षोडशिग्रहणनिषेधार्थवादेऽपि ग्रहणजन्ये तात्कालिके स्वल्पेऽपि दुःखे सामानाधिकरण्येन उत्कटद्वेषविषयत्वाख्यं बलवत्त्वं बोध्यते इति न काचिदनुपपत्तिः ।

अतः एवंविधे स्तुतिनिन्दे क्वचित् ' वायुर्वै क्षेपिष्ठा ' इत्यादौ अर्थवादपदैः स्वशक्यार्थज्ञानजन्यशाब्दबोधविषयीभूतवाक्यार्थसंबन्धादेव लक्ष्येते । स च वाक्यार्थः ' क्षेपिष्ठत्वादिगुणको वायुः स्वदेवताककर्मजन्यं फलं शीघ्रं प्रयच्छति ' इत्येवंरूपः । अत्र हि ' स एव ' इत्यत्र एवकारस्य वैयर्थ्यपरिहारार्थं गमयत्येव इत्येवं योजना । ततश्च तेन औदासीन्यस्यापि व्युदासात् दाने शीघ्रत्वादिप्रतीतिः । शाब्दबोधश्च तात्पर्याविषयीभूत एव जन्यते गङ्गापदेन प्रवाहोपस्थितिवत् । फलगतशैघ्र्यज्ञानस्य च प्रायशः फले रागोत्कर्षजनकत्वदर्शनात् तत्संबन्धसत्त्वेन स्तुतिलक्षणासिद्धिः । एवमन्यत्रापि ऊह्यम् ।

यत्र तु अयोग्यतानिश्चयसत्त्वे नैतादृशशाब्दबोधः यथा ' यजमानः प्रस्तरः ' इत्यादौ अभेदान्वयस्य बाधितत्वात्, तत्र यजमानपदं यजमानकार्यकारित्वसमानजातीयकार्यकारित्वरूपगुणयोगेन प्रस्तरे गौणमङ्गीकृत्य ' यजमानः प्रस्तरः ' इतिवाक्यजन्यशाब्दबोधोत्तरं स्वकार्यकर्तृत्वरूपवाक्यार्थसंबन्धात् तेन वाक्येन बलवदनिष्टाननुबन्धित्वरूपस्तुतिलक्षणा ।

न च यजमानपदे गौणीमनङ्गीकृत्यैव बलवदनिष्टाननुबन्धित्वलक्षणां अङ्गीकृत्य तस्य प्रस्तरे अन्वयः किं न स्यात् इति वाच्यम् । यजमानपदस्य प्रस्तरवृत्तिनिरुक्तस्तुतिलक्षणायां शक्यसंबन्धाभावात् । अस्मन्मते सुबन्तयोः परस्परसंबन्धाभावेन प्रस्तरे अन्वयानुपपत्तेश्च ।

न चैवं तात्पर्याविषयीभूतशाब्दबोधदशायां गौण्या वृत्त्या उक्तस्य स्वकार्यकारित्वविशिष्टस्यापि अभेदसंबन्धेन प्रस्तरे अन्वयानापत्तिः । अध्याहृत–अस्ति–आख्यातार्थे एव उभयोरन्वयेन परस्परान्वयस्य पार्ष्ठिकत्वात् । तस्मात् अध्याहृताख्यातपदेन वाक्येन शाब्दबोधे जनिते पश्चात् तल्लक्षितप्राशस्त्यस्य विधौ अन्वयः ।

न चैवं पश्चादपि यजमानपदेनैव प्राशस्त्यवन्तं लक्षयित्वा तस्य पार्ष्ठिकान्वयलभ्यपरस्परसंबन्धाङ्गीकारेण अध्याहृताख्यातार्थे एव उभयान्वयो भवतु । पूर्वमेव यजमानपदे गौणीगर्भां स्तुतिलक्षणां अङ्गीकृत्य तदन्वयोपपत्तेः । एक एव वा शाब्दबोधोऽस्तु, कृतं विध्यन्वयेन, वाक्यैकवाक्यतया एव तदाकाङ्क्षितपूरणोपपत्तेः इति **वाच्यम्** । वाक्ये लक्षणामङ्गीकृत्य एकवाक्यत्वे संभवति वाक्यभेदस्य अन्याय्यत्वात् ।

न च अस्मदुक्तरीत्या अध्याहृताख्यातार्थान्वयेऽपि ' पश्य मृगो धावति ' इतिवत् एकाख्यातार्थस्य विध्याख्यातार्थे प्रकारतया अन्वयेनापि एकवाक्यतोपपत्तिः । आख्यातार्थस्य मुख्यविशेष्यत्वव्युत्पत्तिभङ्गभयेन ' स्योनं ते ' इतिवत् आख्यातद्वयसत्त्वे भिन्नवाक्यत्वस्यैव आपातात् । अन्यथा प्रयाजाद्यङ्गभावनाया अपि इतिकर्तव्यतात्वेन प्रधानभावनान्वयापत्तेः सर्वस्यापि एकवाक्यतापत्तिः । ' पश्य मृगो धावति ' इत्यादौ तु ' पश्य ' इत्यस्य कर्मान्वयं विना शाब्दबोधाजनकत्वात् युक्तो धावनभावनायाः कर्मत्वेन तस्यामन्वयः । नहि कर्मान्वयं विना शाब्दबोधापर्यवसानवत् इतरकारकान्वयं विना तदपर्यवसानम्, वाक्यमात्रस्य साकाङ्क्षत्वापत्तेः । तस्मात् यजमानपदमात्रे प्राशस्त्यलक्षणां अङ्गीकृत्य अध्याहृताख्यातार्थे अन्वयाङ्गीकारे वाक्यभेदापत्तेः वाक्ये लक्षणाङ्गीकरणम् ।

वस्तुतस्तु आख्यातद्वयसत्त्वे वाक्यभेदस्य अदोषत्वेन वाक्यलक्षणायां प्रमाणाभावः । तेन ' यजमानः प्रस्तरः ' इत्यादौ वाक्यैकवाक्यत्वेऽपि न काचित् क्षतिः । न चैवं ' जर्तिलयवाग्वा वा जुहुयात् ' इत्यादावपि प्राशस्त्यलक्षणया पयोहोमविध्येकवाक्यतानापत्तेः भिन्नवाक्यताऽऽपत्तिः, तत्र वाशब्देन एकवाक्यत्वप्रतीतेः । ' एकं वृणीते ' इत्यादावपि विधायकतया भिन्नवाक्यत्वस्य

विकल्पापादकतया अनुपपत्तेः अगत्या वाक्ये प्राशस्त्यलक्षणयाऽपि एकवाक्यत्वाङ्गीकरणम् । नहि तत्र ‘यजमानः प्रस्तरः’ इतिवत् एकस्मिन् पदे लक्षणामङ्गीकृत्य लक्षितप्राशस्त्यस्य उत्तरपदार्थे अन्वयः संभवति । अतस्तत्र वाक्ये एव लक्षणा । तेन यत्र एकस्मिन् पदे प्राशस्त्यलक्षणामङ्गीकृत्य तस्य इतरपदार्थान्वयं अङ्गीकृत्य वाक्यार्थपर्यवसानं तत्र अर्थवादविध्योः वाक्यैकवाक्यता । यत्र तु न तथा तत्र सर्वत्र वाक्य एव प्राशस्त्यलक्षणामङ्गीकृत्य पदार्थविधया उपस्थितस्य विध्याख्यातार्थे एव अन्वयात् विध्यर्थवादयोः पदैकवाक्यतैव इति युक्तमुत्पश्यामः । **रहस्य.** पृ. २०–२९.

* प्राशस्त्यं फलोत्कर्षरूपम् । इदं च बलवदनिष्टाननुबन्धित्वे पर्यवस्यति । **सोम.** १।२।१ पृ. ७. * प्राशस्त्यं स्तुतिपदवाच्यं बलवदनिष्टाननुबन्धित्वयोग्यतारूपम् । **भाट्ट.** १।२।१.

* **प्राशस्त्यरूपोऽर्थः** अनन्तरप्रवृत्तविध्युद्देशाकाङ्क्षितत्वात् प्रयोजनाकाङ्क्षां शक्नोति पूरयितुम् । **शा.** १।२।१ पृ. ६.

* **प्राशित्रावदानं** दर्शादौ ‘आग्नेयस्य मस्तकं विभज्य प्राशित्रमवद्यति’ इति सर्वेभ्यः । तत्र आग्नेयस्य मस्तकादेवावदानम्, अग्नीषोमीयादेस्तु मस्तकात् अन्यस्माद्वा इत्यनियमः । **भा.** ३।१।१५।२६–२७.

* **प्राशित्रादिभक्षाः** ज्योतिष्टोमगतेष्टिकेषु सन्त्येव, प्रतिपत्त्यर्थत्वात् । **वि.** १२।१।१५.

* **प्राशित्रादिभक्षणं** ऋत्विजामेव, नान्येषाम् । ६।४।३. * प्राशित्रादिभक्षणं गृहमेधीये नास्ति, स्विष्टकृदाज्यभागाभ्यां इतरेषां अङ्गानां परिसंख्यातत्वात् (पञ्चमपूर्वपक्षाभिप्रायेण परिसंख्यां कृत्वा–चिन्तेयम्)। १०।७।११.

* **प्राशित्रादिभक्षणोत्तरं** अनुयाजा दर्शपूर्णमासयोः । **वि.**१०।४।२१.

* **प्राशित्रेडादिभक्षाः** प्रतिपत्त्यर्थाः, न ऋत्विक्क्रयार्थाः । १०।२।९.

* **प्राशित्रभक्षः** प्रकृतौ द्वितीयः । **भा.**१०।२।३।१३. * प्राशित्रभक्षः शेषकार्यम् । **भा.** ३।४।१५।४२, **वा.** ३।४।१४।३७.

* **प्राशित्रभक्षार्थः** उपहारः । उपहारः उपहरणं समर्पणम् । **वि.** १०।२।४, * **प्राशित्रभक्षार्थमवत्तस्य** नाशे प्राशित्रभक्षणलोपः । ६।४।२.

* **प्राशित्रभक्षणं** दर्शपूर्णमासादौ । **वि.**१०।७।१२.

* **प्राशुभावः** अविलम्बः । **मीन्या.**

॥ प्रासङ्गिकं च नोत्कर्षेदसंयोगात् । ५।१।१५।२८॥

सवनीये पशौ ‘आग्निमारुतादूर्ध्वमनुयाजैश्चरन्ति’ इति वचनात् उत्कृष्यमाणा अनुयाजाः दाक्षिणाग्निकौ पिष्टलेपफलीकरणहोमौ अपि तदाद्युत्कर्षन्यायेन उत्कर्षन्ति न वेति विचारे संबन्धादुत्कर्षन्ति इति उत्सूत्रत्वेन प्राप्तं पूर्वपक्षं चशब्देन निरस्य सिद्धान्तयति । प्रासङ्गिकं पश्वर्थं सत् प्रसङ्गात् पशुपुराडाशे उपकारकं अनुयाजकर्म दाक्षिणाग्निकौ होमौ नोत्कर्षेत् । तयोः पाशुकैरनुयाजैः असंयोगात् असंबन्धात् । तस्मात् तयोः स्वस्थाने एवानुष्ठानम् । **के.**

॥ प्रासङ्गिके प्रायश्चित्तं न विद्यते परार्थत्वात् तदर्थे हि विधीयते । ९।४।६।२८॥

अग्निहोत्रे आम्नायते ‘अग्नये ज्योतिष्मतेऽष्टाकपालं निर्वपेत् यस्याग्निरुद्धृतोऽहुतेऽग्निहोत्रे उद्वायेत्’ इति । यदि दर्शार्थेन पौर्णमासार्थेन वा अग्निरुद्धृतः अहुते अग्निहोत्रे उद्वायेत् तदा किं ज्योतिष्मतीष्टिः कर्तव्या न वा इति विचारे सिद्धान्तमाह । दर्शार्थेन पौर्णमासार्थेन वा अग्नेरुद्धरणे प्रासङ्गिकत्वम् । तस्मिन् प्रासङ्गिके अग्नौ अनुगते (शान्ते सति) प्रायश्चित्तं ज्योतिष्मती न विद्यते न कर्तव्या । परार्थत्वात्, तत् उद्धरणं परार्थं दर्शपूर्णमासार्थम्, न स्वार्थं अग्निहोत्रार्थम् । हि यस्मात् तदर्थे स्वार्थे अग्निहोत्रार्थे अग्नौ उद्धृते अनुगते प्रायश्चित्तं विधीयते न परार्थे । तस्मात् अग्निहोत्रार्थमुद्धृते अनुगते एव प्रायश्चित्तं इति सिद्धान्तः । **के.**

* **प्रासङ्गिकचिन्ता** प्रकृताव्यवधायिका । **सु.** पृ. ९५०.

* **प्रासनं** (त्यागः) इडायाः इडापात्रे इडासंस्कार एव । **वि.** १०।७।५. * प्रासनं कृष्णविषाणायाश्चात्वाले द्वादशाहे उत्तमाहदक्षिणानयनोत्तरम् । प्रवृत्तिश्च तस्याः प्रथमाहदीक्षाकालं आरभ्य । ११।३।६।१५–१६. * प्रासनं कृष्णविषाणायाः न प्रयोजकम्, किन्तु प्रतिपत्तिकर्म, कण्डूयनं तु प्रयोजकम् । ४।२।७।१९.

॥ प्रासनवन्मैत्रावरुणाय दण्डप्रदानं कृतार्थत्वात् । ४।२।६।१६ ॥

ज्योतिष्टोमे ‘क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छति’ इति श्रुतम् । दीक्षायां दीक्षिताय प्रदत्तो दण्डः सोमक्रयोत्तरं मैत्रावरुणाय प्रदीयते । तदिदं दण्डप्रदानं प्रतिपत्तिर्वा अर्थकर्म वा इति विचारे पूर्वपक्षयति । प्रतिपत्तिः इति शब्दः पूर्वसूत्रादनुवर्तते । मैत्रावरुणाय दण्डप्रदानं प्रतिपत्तिः स्यात्, तस्य दीक्षायां कृतार्थत्वात् । एकत्र कृतार्थस्य द्रव्यस्य अन्यत्र विनियोगः प्रतिपत्तिर्भवति । प्रासनवत् । यथा दीक्षितस्य स्वाङ्गकण्डूयने कृतार्थायाः कृष्णविषाणायाः दक्षिणादानोत्तरं चात्वाले प्रासनं प्रक्षेपः प्रतिपत्तिः तद्वत् । अत्र भाष्ये यद्यपि ‘मैत्रावरुणाय दण्डदानं’ इत्येवोक्तं न तु दण्डप्रदानमिति तथापि विषयश्रुतौ ‘प्रयच्छति’ इति प्र–उपसर्गप्रयोगात् सूत्रेऽपि प्रदानशब्दप्रयोग एव युक्तो भवति इति अस्माभिरपि सूत्रे सर्वत्रोपलब्धः प्रदानशब्दप्रयोग एव स्वीकृत इति ध्येयम् ।

अर्थकर्म वा कर्तृसंयोगात् स्रग्वत् । १७ ॥

सिद्धान्तसूत्रम् । ज्योतिष्टोमे मैत्रावरुणाय औदुम्बरस्य दण्डस्य प्रदानं न पतिपत्तिः, किन्तु अर्थकर्म । कर्त्रा मैत्रावरुणेन प्रधानेन गुणभूतस्य दण्डस्य संयोगात् ‘मैत्रावरुणाय दण्डं प्रयच्छति’ इति श्रुत्या संयोगस्य प्रतिपादनात् । स्रग्वत् स्रजः इव स्रग्वत् । यथा ‘स्रजमुद्गात्रे’ इति उद्गात्रे स्रग्दानं अर्थकर्मैव राजसूये तद्वत् ।

कर्मयुक्ते च दर्शनात् । १८ ॥

सिद्धान्ते हेत्वन्तरपरं सूत्रम् । चकारो हेत्वन्तरसमुच्चयार्थः । कर्मयुक्ते प्रैषानुवचनरूपकर्मसंयुक्ते एव मैत्रावरुणे ‘दण्डी प्रैषानन्वाह’ इत्यनुवादवाक्ये दण्डस्य दर्शनादपि दण्डप्रदानं अर्थकर्म, न प्रतिपत्तिः इति सिध्यति । **के.**

* **प्रासादपर्यङ्कन्यायः** । नाडीपुरीतद्ब्रह्मणां प्रासादपर्यङ्कन्यायेन (प्रासादे शेते, पर्यङ्के शेते इत्यत्र अधिकरणयोः समुच्चयः ।) समुच्चये संभवति न पाक्षिकबाधापादको विकल्पः उपगन्तुं युक्तः (अयमेव प्राकारन्यायः) । **आभरणम्** . ३।२।२।७ ब्रसू.

॥ प्रासादवासिन्यायः । यथा एक एव देवदत्तः कालभेदेन प्रासादोपर्यधश्च वसन्नपि प्रासादवासप्राधान्येन प्रासादवासीत्युच्यते, तथा ‘मुखनासिकावचनोऽनुनासिकः’ (पा० १।१।८) इति सूत्रस्थमहाभाष्ये तु मुखग्रहणं शक्यमकर्तुम्, केनेदानीमुभयवचनानां सिद्धिर्भविष्यतीति, प्रासादवासिन्यायेनेति । तद्यथा केचित् प्रासादवासिनः, केचिद्भूमिवासिनः, केचिदुभयवासिनः । ये प्रासादवासिनो गृह्यन्ते ते प्रासादवासिग्रहणेन, ये भूमिवासिनो गृह्यन्ते ते भूमिवासिग्रहणेन, ये तूभयवासिनो गृह्यन्ते ते भूमिवासिग्रहणेन प्रासादवासिग्रहणेन च, एवमिहापि केचित् मुखवचनाः, केचिन्नासिकावचनाः, केचिदुभयवचनाः । तत्र ये मुखवचना गृह्यन्ते ते मुखग्रहणेन, ये नासिकावचना गृह्यन्ते ते नासिकाग्रहणेन, ये तूभयवचना गृह्यन्ते ते मुखग्रहणेन नासिकाग्रहणेन चेत्युक्तम् । **साहस्री.** ३६.

* **प्रियङ्गवः** दीर्घशूकाश्च (सक्तवः) पूर्वसस्ये क्षीणे भवन्ति । **भा.** १।३।४।९. * ‘प्रियङ्गवः शरत्पक्वास्तावद्गच्छन्ति हि क्षयम् । यदा वर्षासु मोदन्ते सम्यग्जाताः प्रियङ्गवः ॥ तदा नान्यौषधिग्लानिः सर्वासामेव मोदनात् ॥’ **वा.** १।३।४।९ पृ. २१८.

* **प्रियङ्ग्वधिकरणम्** । यववराहाधिकरणमेवेदम् । १।३।४।८–९. ‘यववराहाधिकरणम्’ इत्यत्र द्रष्टव्यम् ।

* **प्रीत्यर्थं** हि पुरुषो यतते । **भा.**६।१।१।२.

* **प्रेङ्खारोहणं** उत्सवादौ सदाचारः महाव्रते इव । **वा.** १।३।३।७ पृ. २०५.

* **प्रेताग्निहोत्रे** ‘अधस्तात् समिधं धारयन् अनुद्रवेत् उपरि हि देवेभ्यो धारयति’ अत्र दैविके हविषि स्रुग्दण्डस्योपरि समिद्धारणं अपूर्वत्वाद्विधीयते । तस्य च

प्रेताग्निहोत्रादुत्कर्षः, न तु उपरिधारणस्य स्तुत्यर्थं अनुवादः । **वि.** ३।४।५ । इदं समिद्धारणं स्रुग्दण्डोपरि इति बहवः । बिलस्योपरि इति **शा.** । शाखान्तरे बिलोपरिधारणवाक्यसद्भावात् इति **सोम.** । कृत्वाचिन्तेयं ' स्रुग्दण्डे निधाय समिधमनुद्रवति ' इति न्यायसुधाकृल्लिखितवचनसद्भावात् इति **भाट्ट.** । * प्रेताग्निहोत्रे ' प्राचीनावीती दोहयेत् यज्ञोपवीती हि देवेभ्यो दोहयति ' । अत्रोपवीतमनूद्य प्राचीनावीतं मृतस्य अग्निहोत्रदोहने विधीयते, न तु अत्रोपवीतस्य विधिः, प्राप्तत्वात् । उपवीतानुवादश्च प्राचीनावीतस्तुतये । **वि.** ३।४।४, * प्रेताग्निहोत्रे ' ये पुरोदञ्चो दर्भास्तान् दक्षिणाग्रान् स्तृणीयात् ' अत्रोत्तराग्रत्वमनूद्य दक्षिणाग्रत्वं विधीयते । उत्तराग्रत्वानुवादस्तु दक्षिणाग्रत्वस्तुतये । ३।४।४.

* **प्रेरणं** गुणादिना कर्मस्वरूपादुत्तार्य आत्माभिमुख्येन क्षेपः । **सु.** पृ. ८२०.

* **प्रेरणा** प्रवृत्त्युत्पादकव्यापारत्वात् भावनाशब्देन गीयते, भाव्योत्पादानुकूलस्य व्यापारस्य भावनात्वप्रसिद्धेः । व्यापारत्वं च तस्याः सिद्धरूपत्वे निर्व्यापारायाः प्रवृत्त्युत्पादकत्वासंभवेन, ज्ञानस्य च ज्ञेयव्यापारत्वायोगात् व्यापारान्तरकल्पनापत्तेः गौरवपरिहारार्थं कल्प्यते । प्रेषणाध्येषणादीनामपि पुरुषाशयविशेषाणां अनेनैव न्यायेन व्यापारत्वाध्यवसानं द्रष्टव्यम् । **के.** * प्रेरणा विधिः नियोगः शब्दभावना इत्येकोऽर्थः । **बाल.** पृ. ७५.

* ' **प्रैयङ्गवश्चरुः** ' इति वाक्यात् प्रधानयागसाधनचरुप्रकृतित्वप्रतीतेः प्रियङ्गूणां प्रधानमात्रार्थत्वम् , न प्रकरणात् । **सु.** पृ. ६३४. * **प्रैयङ्गवं** चरुं मारुतं निर्वपेत् पृश्नीनां दुग्धे ग्रामकामः । **भा.** १०।१।१०।४१.

* **प्रैयङ्गवन्यायेन** (यथा प्रैयङ्गवे चरौ प्रधानमात्रे प्रियङ्गुभिः व्रीहिनिवृत्तेः व्रीहिसाधनक एव अवघातः तथा) प्रधानमात्रे मांसेन पुरोडाशो निर्वर्तितः । **वा.** २।१।४।१२ पृ. ४१५.

प्रैषः अजैदग्निरित्यतः पृथक् उपप्रेष्य होतरिति ॥

पशौ अध्वर्युर्मैत्रावरुणं प्रेष्यति, स च ' अजैदग्निरसनद्वाजन् ' इत्यादिना ' उपप्रेष्य होतर्हव्या देवेभ्यः ' इत्यन्तेन मन्त्रेण होतारं प्रेष्यति, सोऽपि ' दैव्याः शमितार आरभध्वम् ' इत्यादिना मन्त्रेण शमितॄन् प्रेष्यतीति स्थितिः । एवं सति 'उपप्रेष्य होतर्हव्या देवेभ्यः' इत्यादिश्रुतेरुपप्रैषविषयकप्रैषविधौ तावन्मात्रस्य मन्त्रस्य अदर्शनात् ' अजैदग्निः ' इत्यस्यैवान्त्यप्रतीकोपादानेन विनियोगविधिः, प्रथमप्रतीक एवोपादेय इति नियमे मानाभावात् । ' षड्विंशतिरित्येव ब्रूयाद् ' इति मध्यमप्रतीकस्याप्युपादानादिति, 'अमृतमसि प्राणाय त्वेत्यभिव्यनक्ति' इत्यत्र ' आ नः प्राणः ' इति मन्त्रान्त्यप्रतीकस्याप्युपादानात् । **इति प्राप्ते,** ' एनानध्वर्युराह ' इति प्रकृत्य ' उपप्रेष्य ' इति विधेराम्नानादन्ते च ' सोऽन्वाहाजैदग्निरसनद्वाजन् इति ' इति श्रुतेश्चाध्वर्युप्रशास्त्रोः प्रैषकर्तृत्वतदर्थप्रतिपत्तृत्वयोरवगमात् तावन्मात्रस्य प्रत्येकमन्त्रत्वादेष प्रैष एव नोपप्रैषः । **संकर्ष.** २।३।८ .

प्रैषः अजैदग्निरिति अध्वर्योर्मैत्रावरुणं प्रति ॥

तस्मिन्नेव प्रैषे होतरिति संबोधनाल्लिङ्गाद्धोतारं प्रति एवायमुपप्रैषविषयकः प्रैषः । ' यदप्रतिरथं द्वितीयो होताऽन्वाह ' इत्यादौ इव द्वितीयादिपदसामानाधिकरण्याभावे मुख्यहोतुरेवोपस्थितेर्व्युत्पन्नत्वात् । **इति प्राप्ते,** ' अजैदग्निः ' इत्यस्य मैत्रावरुणवक्तृकत्वेन तत्रत्यस्य ' होतरुपप्रेष्य ' इत्यस्योक्तन्यायेनैव स्वस्मिन् प्रैषासंभवाच्च होतृुद्देश्यकत्वस्यावश्यकतया प्रैषद्वयस्य वैयर्थ्यापत्त्या ' अध्वर्यून् वृणीते ' इति निरुपपदानामपि गणेषु प्रयोगदर्शनाच्च मैत्रावरुणं प्रत्येवायं प्रैषः । अत एव ' यदध्वर्युर्होतारमुपप्रेष्यत्यथ कस्मान्मैत्रावरुण उपप्रैषं प्रतिपद्यते ' इति लिङ्गदर्शनमुपपद्यते । **संकर्ष.** २।३।९.

* प्रैषः आध्वर्यवः, प्रैषार्थस्तु आग्नीध्रः, न तु वैपरीत्यम् , दर्शपूर्णमासयोः । ३।८।१२।२४–२५ . **मीको.** पृ. २०७२ ' दर्शपूर्णमासादौ प्रैषः ' इत्यत्र द्रष्टव्यम् ।

' प्रैषः उक्थशा यज सोमस्य ' इति शस्त्रवन्मात्रे निवेश्यते ॥

' उक्थशा यज सोमस्येति स्तुतशस्त्रवतः सोमानाह ' इति विहितः प्रैषः स्तोत्रशस्त्रोभयवन्तो ये सोमयागाभ्यासास्तेष्वेव निविशते, न केवलाज्यादिशस्त्रवत्सु सोमयागाभ्यासेषु, द्वन्द्वावगतसाहित्यबलात् । **इति प्राप्ते,** स्तोत्रवदस्तोत्रवत्साधारण्येन शस्त्रवन्मात्रेऽस्य निवेशः । ' उक्थं शस्त्रं शंसतीत्युक्थशा ' इति मन्त्रलिङ्गात् । केवलखड्गधराणां केवलधनुर्धराणां च समवाये धनुःखड्गधरा इमे इति प्रयोगदर्शनाच्च । आज्यादिशस्त्रेष्वपि स्तोत्रत्वेनार्थवाददर्शनात् तदभिप्रायेण तेषामपि स्तुतशस्त्रवत्त्वोपपत्तेश्च । **संकर्ष.** २।३।१०.

प्रैषः ' उक्थशा यज सोमानां ' इति शस्त्रवत्स्वपि चमसैर्ग्रहैश्च युगपद्धूयमानेष्वेव सोमेषु निवेश्यः ॥

' उक्थशा यज सोमानामिति स्तुतशस्त्रवतः सोमानाह' इति बहुवचनान्तसोमपदघटितमन्त्रस्यापि उक्तन्यायेन शस्त्रवत्स्वेव निवेशाद्विकल्पः । **इति प्राप्ते,** शस्त्रवत्स्वपि ये चमसैर्ग्रहैश्च युगपद्धूयन्ते सोमास्तेष्वेवायं मन्त्रः स्यात् । द्रवादिद्रव्याणां तदाधारपात्रसंख्ययैव एकद्विबहुत्वादिव्यवहारदर्शनात् । एकवचनान्तमन्त्रस्तु केवलग्रहकरणकहोम एवेति लिङ्गाद् व्यवतिष्ठते । **संकर्ष.** २।३।११.

* प्रैषश्चानुवाक्या च यत्र सहोच्येते तत्र मैत्रावरुणः, न केवलप्रैषेषु केवलानुवचनेषु च । ३।७।२१।४३–४५. * प्रैषः ' देवान् यज ' इति अनुयाजेषु त्रितयसाधारण एव । **संकर्ष.** २।३।३. **मीको.** पृ. ४२४ ' अनुयाजेषु देवान् यज ' इत्यत्र द्रष्टव्यम् । * प्रैषो नित्यो दर्शपूर्णमासयोः ' प्रोक्षणीरासादय ' इति । **भा.** ६।८।८।२८. * प्रैषः प्रमाणान्तरप्रमितेऽर्थे पुरुषनिष्ठा पुरुषप्रवर्तना । **रहस्य.** पृ. १९. * प्रैषः प्राप्ते प्रवर्तनम् । अयमेव च विधिप्रैषयोर्विशेषः । प्रवर्तनस्मृतिः प्राप्ते, प्रैष इत्यभिधीयते । अप्राप्तप्रैषणं सर्वं विधित्वं प्रतिपद्यते ॥ ' **वा.** २।१।१।१ पृ. ३८२, **बाल.** पृ. ७६ .

प्रैषः ' बर्हिः स्तृणीहि ' इति सोमार्थः ॥

सवनीयस्य पशोः क्रमे ' अग्नीदग्नीन्विहर बर्हिः स्तृणीहि पुरोडाशानलङ्कुरु पशुनोदेहि ' इति प्रैषः श्रुतः । तत्र बर्हिःस्तरणं पश्वर्थं पुरोडाशार्थं च । उभयोरविशेषेण संनिधानात् आकाङ्क्षितत्वात् च, मध्यंदिनतृतीयसवनयोरप्येवमेव प्रैषदर्शनात् , तत्र च पशोरभावात् तदैकरूप्याय केवलपुरोडाशार्थमेव वा । **इति प्राप्ते,** ऐष्टिकेषु प्रत्यक्षस्य बर्हिर्विधेरभावात् ' अनुपृष्ठ्यं बर्हिः स्तृणाति ' इति सौमिकबर्हिर्विधेः सत्त्वाच्च तस्यैवायं स्तरणार्थः प्रैषः । **संकर्ष.** १।३।१५.

* प्रैषः यूपपरिव्याणे ' यूपाय परिवीयमाणायानुब्रूहि ' इति । **वा.** ३।८।१०।२१, * केवलोद्देशव्यापारेषु त्यक्तृत्वरहितेषु ' यज ' इति प्रैषो भवति । २।२।४।१० पृ. ४९२, * यावांश्च ब्राह्मणगतः प्रैषः स सर्वः प्राप्त्यभावाद्विधिरेव भवति । २।१।१।१ पृ. ३८२. * प्रैषाः व्यस्ता आध्वर्यवाः । **वि.** ३।७।२१. * प्रैषं विना मध्यमपुरुषायोगः । **सु.** पृ. १०९८.

प्रैषान् मैत्रावरुण एव ब्रूयात् ऋतुयाजेषु ॥

प्रातःसवने हि आदौ प्रस्थितयाज्यास्तदुत्तरकाले ऋतुयाज्याः । उत्तरसवनयोस्तु प्रस्थितयाज्या एव न ऋतुयाज्या इति स्थितिः । तत्र प्रस्थितयाज्यास्विव ऋतुयाज्येष्वपि प्रैषान् अध्वर्युर्विभज्य ब्रूयात् , प्रैषाणामाध्वर्यवसमाख्यानात् । **इति प्राप्ते,** प्रैषकाण्डोक्तनिगदोद्देशेन ' मैत्रावरुणः प्रेष्यति चानु चाह ' इति वचनेन प्रशास्तृवक्तृकत्वविधिः, स च प्रस्थितयाज्यासु व्यवतिष्ठते । **संकर्ष.** २।३।१३.

* **प्रैषाणां** सर्वेषां आध्वर्यवत्वम् । **वा.** ३।७।२१।४३. * **प्रैषेषु** अध्वर्युविकारो मैत्रावरुणः । **भा.** १०।७।६।१९. * ' प्रैषेषु च पराधिकारात् ' (३।८।११।२२) इत्यनेन प्रैषाभावात् पराधिकारो नास्ति इति । **वा.** ३।२।४।१०.

प्रैषेषु च पराधिकारात् । ३।८।११।२३ ॥

दर्शपूर्णमासयोः ' प्रोक्षणीरासादय इध्माबर्हिरुपसादय ' इत्यादयः प्रैषा आम्नाताः । ' इदं कुरु इदं च कुरु ' इति आज्ञापनं प्रैषः । आज्ञापितश्चार्थः प्रैषार्थः । अनयोः प्रैषप्रैषार्थयोः कर्ता एक एव स्यात् । आसादय इत्यादिः लोट् प्राप्तकाले अर्थे स्यात् । तत्तत् कर्म कर्तुं अयं कालः प्राप्त इति मनसि कृत्वा स्व आज्ञप्ता स्वं प्रत्येव आज्ञापयिष्यति इति पूर्वपक्षे उत्सूत्रे प्राप्ते, सिद्धान्तमाह । अन्य इति पदं अनुवर्तते । प्रैषेषु कर्ता प्रैषार्थकर्तुः सकाशात् अन्यः स्यात् । प्रैषार्थेषु च कर्ता प्रैषकर्तुः सकाशात् अन्यः स्यात् इति चकारार्थः । कुतः ?

पराधिकारात्, प्रैषो हि परस्मिन्नुपपद्यते नात्मनि । संभवति प्रैषे लोटः प्राप्तकालार्थत्वं स्वीकर्तुं न युक्तम् । प्रैषकर्तुः परस्य अन्यस्यैव प्रैषार्थकरणे अधिकारः न स्वस्यैव । तस्मात् प्रैषाणां कर्ता प्रैषार्थकर्तुरन्य एवेति सिद्धान्तः । के.

प्रैषेषु च पराधिकारात् । ३।८।११।२२ ॥

स्तो दर्शपूर्णमासौ । तत्र प्रैषः समाम्नातः 'प्रोक्षणीरासादय, इध्माबर्हिरुपसादय, स्रुवं च स्रुचश्च संमृड्ढि, पत्नीं संनह्याऽऽज्येनोदेहि' इति । तत्र संदेहः किं य एव प्रैषे स एव प्रैषार्थे उत अन्यः इति । प्रासङ्गिकं समाप्येदानीं प्रकृत एव समाख्याया लिङ्गेन विरोधश्चिन्त्यते ।

अत्रायं पूर्वपक्षः । 'प्रोक्षणीरासादय' इत्यादिप्रैषमन्त्रस्य प्रोक्षणासादनादिरूपस्य प्रैषार्थस्य समाख्यया अध्वर्युकर्तृकत्वमेव गम्यते । तेन द्वयोरेक एवाध्वर्युः कर्ता । न च आत्मनि प्रैषासंभवेन प्रैषरूपलिङ्गविरोधात् आध्वर्यवसमाख्याबाधेन भिन्नकर्तृकत्वमिति वाच्यम् । यतो नैवायं प्रैषः, किं तर्हि ? प्राप्तकालतायामयं लोट्प्रत्ययः । तत्रापि लोट्प्रत्ययानुशासनात्, तस्य चात्र प्रसंभवात् । ततः 'प्रोक्षणीरासादय' इति प्रोक्षण्यासादनरूपायाः प्राप्तकाल इत्यर्थो भवति । तथा च सति एक एवाध्वर्युः प्राप्तकालतां निर्दिश्य प्रोक्षण्यासादनं करिष्यति । भवतु प्रैषार्थत्वम्, तथाप्येक एवाध्वर्युः शरीरिशरीरयोरर्थान्तरत्वात् भेदमाश्रित्य प्रैषकः प्रैष्यश्च भविष्यतीति एककर्तृकत्वमेवेति । **एवं प्राप्ते, अभिधीयते** । भवेदेवं यदि प्राप्तकालतायामत्र लोट्प्रत्यय उपपद्यते । तथाहि, 'प्रोक्षणीरासादय' इति मध्यमपुरुषनिर्देशोऽयम् । अधमः च प्रैष्यो वक्तव्यः । स चान्तर्भावितयुष्मदर्थत्वात्पुरोवर्तिकर्तृविषय एव परं भवति । यथा 'माणवक, समिधमाहर' इति । प्राप्तकालायाश्च क्रियायाः प्राप्तकालता वक्तव्या । न च तत्र युष्मदर्थः कथञ्चिदपि संभवति, असंनिधानात् अचेतनत्वाच्च । न च प्राप्तकाल इति क्रियाया निर्देशः संभवेत् । तेन प्राप्तकालतेयं प्रथमपुरुष एव कथञ्चित् संभवति, न तु मध्यमोत्तमपुरुषयोः संभवति । संभवति तु प्रैषार्थत्वे, संनिहितस्य पुरुषान्तरस्य युष्मदर्थत्वोपपत्तेः । तेन प्रैषाभिधायकमन्त्रलिङ्गविरोधात् प्रैषार्थयोर्भिन्नकर्तृकत्वमेव । यत्तु शरीरिशरीरयोरर्थान्तराणां चाभेदे सति एकस्यैव प्रैषकत्वं प्रैष्यत्वं च भविष्यतीत्युक्तम्, तदयुक्तम्, प्रैषस्यादृष्टार्थत्वप्रसङ्गात् । विनापि प्रैषं शरीरिप्रयत्नादेव शरीरचेष्टोत्पत्तेः गौणत्वप्रसङ्गाच्च । श्रुत्यविरोधे मुख्यार्थत्वमेव मन्त्राणां न गौणत्वमित्यवधारितं गुणमुख्याधिकरणे । तस्मादेवमपि नैककर्तृकत्वं प्रैषप्रैषार्थयोः, किन्तु भिन्नकर्तृकत्वमेवेति सिद्धम् ।

प्रयोजनम्— पक्षोक्तम् । **सूत्रं तु** प्रैषेषु यः कर्ता ततोऽन्यः प्रैषार्थः प्रैषस्य स्वभावतोऽन्यविषयत्वादिति । **वौता.**

* सोमयागेष्वपि 'यज' इति शब्दः '**प्रैषेषु च पराधिकारात्**' इत्येवं निवर्तमानः मैत्रावरुणस्यैव । **वा.** ३।७।२१।४४. * वाग्विसर्गपूर्वपक्षवादिमते 'उत्तिष्ठन्न्वाह अग्नीदग्नीन् विहर' इत्यस्य मन्त्रस्य प्रैषत्वाभावेन अग्निविहरणादेः '**प्रैषेषु पराधिकारात्**' इति न्यायविषयत्वाभावात् आग्नीध्रकर्तृकत्वानुपपत्तिः, समाख्याया आध्वर्यवत्वात् । **कौ.** ३।२।४।१० पृ. २३९.

प्रैषांशस्य उद्धारः अनुवाक्यासु ऋतुग्रहेषु ॥

ऋतुग्रहे 'होता यक्षदिन्द्र होत्रात्' इत्यादीन् 'होतर्यज' इत्यन्तान् प्रैषान् आम्नाय 'प्रैषेण यजन्ति' इति आम्नातम् । तत्रापि यथासमाम्नातस्यैव मन्त्रत्वेन प्रदानाङ्गयोः येयजामहेवषट्कारयोः ऋगाद्यन्तमाणयोरिव योजनया प्रयोगे **प्राप्ते**, 'होता यक्षत्' 'होतर्यज' इत्यंशयोरनन्वितत्वेन तावुन्मूल्य तत्स्थाने तयोर्योगेन प्रयोगः । **संकर्ष.** २।४।२५.

* प्रैषाधिकरणम् (प्रैषप्रैषार्थौ भिन्नकर्तृकौ) । ३।८।११. **मीको.** पृ. २०५४ 'दर्शपूर्णमासयोः प्रैषप्रैषार्थौ' इत्यत्र द्रष्टव्यम् ।

* **प्रैषानुवचनं** मैत्रावरुणाय दण्डदानस्य प्रयोजकं सोमे । ४।२।६।१६-१८.

प्रैषानुवचनं मैत्रावरुणस्योपदेशात् । ३।७। २२।४३ ॥

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः 'यो दीक्षितो यदग्नीषोमीयं पशुमालभते' इति । तत्रेदमामनन्ति— 'तस्मान्मैत्रावरुणः प्रेष्यति चान्वाह' 'चानु चाह' इति भाष्यादौ पाठः इति । तत्र संशयः किं सर्वानुवचनेषु प्रैषेषु च मैत्रावरुणः स्यात् उत यत्रानुवचनं तत्र प्रैषः इति । सामान्यसमाख्याया विशेषसमाख्यया बाधे निरूपिते इदानीं यत्र वचनेन सामान्यसमाख्याया बाधः स किं सर्वविषयः उत एकदेशविषयः इति प्रसङ्गान्निरूप्यते ।

पूर्वपक्षस्तु सर्वप्रैषाणां आध्वर्यवसमाख्यया अध्वर्युकर्तृकत्वम् । सर्वानुवचनानां च हौत्रसमाख्यया होतृकर्तृत्वम् । एवं च सति प्रैषेषु वचनानि तान्युभयकर्तृकाणि प्राप्नुवन्ति । विशेषेण च प्रैषे वचनत उपदेशेन मैत्रावरुणोपादानं प्रतीयते । तत्र यद्यपि 'प्रेष्यति चान्वाह' इति चशब्दात्समुच्चयोऽवगम्यते, तथापि उद्देशगतत्वेन अविवक्षितत्वात् सकलप्रैषानुवचनमात्रोद्देशेनैव मैत्रावरुणो विधीयते इति । **एवं प्राप्ते, अभिधीयते ।**

पुरोनुवाक्याधिकारो वा प्रैषसंनिधानात् । ४४ ॥

अयमभिप्रायः । भवेदेवं यद्यत्र विशेषो नावगम्यते । तथाहि, वेदे पुरोनुवाक्याविधितः सप्रैषमनुवचनं प्रतीयते । तच्चैकपदार्थरूपत्वादेकेन कर्तव्यम् । न चानुवचनकर्ता होता प्रैषितुमर्हति । न चाध्वर्युरनुवचनं कर्तुमर्हति । प्रैषकर्ता हि प्रेषते । तेनैव पुरोनुवाक्यानुरूपं प्रैषानुवचनं कर्तृसापेक्षम् । तत्संनिधौ च 'मैत्रावरुणः प्रेष्यति चान्वाह' इति श्रूयमाणं अपेक्षितविधानात् संनिहितविषयमवधार्यते । किञ्च साहचर्यवशादपि यत्रैवापेक्षितं तत्र मैत्रावरुणविधानमुचितम् । 'मैत्रावरुणः प्रेष्यति चान्वाह' इत्यत्र सहचरित एव प्रैषानुवचनः प्रतीयते, पुरोनुवाक्यया च तयोः साहचर्यमवगम्यते । एवं प्रथमं प्रतीयते । तेन मैत्रावरुणविधिर्न केवलेष्वनुवचनेष्विति न सर्वत्र सामान्यसमाख्याबाध इति सिद्धम् ।

प्रयोजनम्— पक्षोक्तम् । **सूत्रं तु** पुरोनुवाक्यास्वेव मैत्रावरुणविधिः सप्रैषानुवचनत्वेन तासामेव संनिधानात् । **वौता.**

प्रैषानुवचनं मैत्रावरुणस्योपदेशात् । ३।७। २१।४३ ॥

पूर्वपक्षसूत्रम् । प्रैषाश्च अनुवचनानि च तेषां समाहारः प्रैषानुवचनम् । तत्र प्रत्येकं मैत्रावरुणस्य कर्म स्यात् । कुतः ? 'मैत्रावरुणः प्रेष्यति च अनु चाह' इति तस्य उपदेशात् । वाक्ये चकारौ उद्देश्यगतत्वात् अविवक्षितौ, तेन प्रैषानुवचनयोः समुच्चयो न विवक्षितः ।

पुरोऽनुवाक्याधिकारो वा प्रैषसंनिधानात् । ४४ ॥

वाशब्दः पूर्वपक्षनिरासार्थः । मैत्रावरुणस्य पुरोऽनुवाक्याधिकारः । यत्र प्रैषश्च अनुवाक्या च सह उच्येते तत्र मैत्रावरुणः । यत्र केवलानुवाक्या केवलो वा प्रैषः तत्र न मैत्रावरुणः । सूत्रस्थः पुरोऽनुवाक्याशब्दः प्रैषान्तानुवचनपरः । पुरोनुवाक्याऽधिकार एव मैत्रावरुणस्य कस्मात् ? प्रैषसंनिधानात् 'मैत्रावरुणः प्रेष्यति चानु चाह' इति विधौ अनुवाक्यायाः प्रैषस्य संनिधानात् । तस्मात् यत्र प्रैषसंनिहिता अनुवाक्या तत्रैव मैत्रावरुण इति ज्ञायते ।

अत्र **कुतूहलम्**— केवलानुवचनेषु हौत्रसमाख्यया होता प्राप्तः, केवलप्रैषेषु च आध्वर्यवसमाख्यया अध्वर्युः प्राप्तः । उभयात्मकेषु तु 'होता यक्षत्' इत्यादिषु मन्त्रेषु मन्त्रैकत्वेन कर्तृभेदासंभवात् अध्वर्योः होतुश्च प्रच्युतत्वात् अपेक्षितकर्तृविशेषत्वेन मैत्रावरुणस्य विधिः, इति ।

प्रातरनुवाके च होतृदर्शनात् । ४५ ॥

सिद्धान्ते हेत्वन्तरपरं सूत्रमिदम् । न केवलानुवचने मैत्रावरुणस्याधिकारः । कुतः ? प्रातरनुवाके केवलानुवचनात्मके होतुरेव कर्तुः दर्शनात् । 'यत्र होतुः प्रातरनुवाकमनुब्रुवत उपशृणुयात् तत्राध्वर्युर्गृह्णीयात् (अपः)' इति प्रातरनुवाके होतारं दर्शयति । चकारो हेत्वन्तरत्वसूचकः । के.

* **प्रैषानुवचने** सत्रे एक एव दण्डः । **भाट्ट.** ४।२।६.

प्रैषानुवचनाधिकरणम् । अग्नीषोमीये पशौ प्रैषानुवचनयोः समुच्चितयोः मैत्रावरुणः कर्ता ॥

प्रैषानुवचनं मैत्रावरुणस्योपदेशात् । ३।७।२१। ४३ ॥

भाष्यम्— अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः 'यो दीक्षितो यदग्नीषोमीयं पशुमालभते' इति । तत्रेदं समामनन्ति, 'तस्मान्मैत्रावरुणः प्रेष्यति चानु चाह' इति । तत्र संशयः किं सर्वानुवचनेषु सर्वप्रैषेषु च मैत्रावरुणः स्यात् उत यत्रानुवचने प्रैषः इति । किं तावत् प्राप्तम् ? सर्वानुवचनेषु अविशेषात् । न हि कश्चित् विशेष आश्रीयते, अस्मिन्ननुवचने मैत्रावरुणः अस्मिन् नेति । तस्मात् सर्वानुवचनेषु सर्वप्रैषेषु च मैत्रावरुणः स्यात् ।

वा— उपदेशात् सिद्धे समाख्याबाधे समस्तैकदेशविषयत्वेन विचारः । ज्योतिष्टोमप्रकरणे एव एतत् श्रूयते 'तस्मान्मैत्रावरुणः प्रेष्यति चानु चाह' इति । प्रदर्शनार्थं तु अग्नीषोमीये इत्युक्तम् । तत्र सर्वप्रैषाणामाध्वर्यवत्वं सर्वानुवचनानां च हौत्रसमाख्यानम् । तत् किमनेनोपदेशेन समस्तविषयः समाख्ययोर्बाधः, उत कचिदेवेति । किं प्राप्तम् ? प्रैषानुवचनोद्देशेन मैत्रावरुणोपादानात् उद्दिश्यमानयोश्च शब्दप्रतिपादितसाहित्यविवक्षानुपपत्तेः श्रूयमाणश्च चशब्दः समुच्चयान्वाचयमात्रं प्रतिपादयति नेतरेतरयोगसमाहारौ, नित्यं समासगम्यत्वात् । न चेह अन्वाचयलक्षणं उभयोस्तुल्यत्वात् उपपद्यते, इति समुच्चयः स्यात् । स च पृथगपि सर्वेषु अनुष्ठीयमानेषु संभवत्येव इति सामान्यवचनात् सर्वप्रत्ययः ।

पुरोनुवाक्याधिकारो वा प्रैषसंनिधानात् । ४४॥

भाष्यम्— पुरोनुवाक्यां वा मैत्रावरुणः अनुब्रूयात् । कुतः ? यत्र प्रैषश्चानुवाक्या च सहोच्येते तत्र मैत्रावरुणः । यत्र केवलानुवाक्या, न तत्र मैत्रावरुणः । यत्र वा केवलः प्रैषः तत्रापि न । यत्रोभे समुच्चीयेते तत्र स भवेत् । तथाहि समुच्चितयोः तं समामनन्ति, 'तस्मान्मैत्रावरुणः प्रेष्यति चानु चाह' इति । चशब्दात् समुच्चितयोरिति गम्यते ।

वा— न सर्वप्रैषानुवचनेषु असौ भवेत् । क तर्हि ? पुरोनुवाक्यासु । प्रैषान्तानि अनुवचनानि पुरोनुवाक्याः । ताश्च प्रकृत्य एतद्वचनं प्रवृत्तं 'तस्मात् मैत्रावरुणः' इति । ताश्च तादृश्यो हौत्रे एव पठिताः इति तस्यैव केवलस्य प्राप्नुवन्ति । यस्तु तासामन्ते यज इति शब्दः स इष्टिप्रकृतिकेषु तावत् अङ्गेषु अतिदेशेन अध्वर्योः प्राप्नोति । सोमयागेष्वपि 'प्रैषेषु च पराधिकारात्' इत्येवं निवर्तमानः 'तेषां यतो विशेषः स्यात्' (३।८।१०।२१) इत्येवं मैत्रावरुणस्यैव । अथवा प्रेषकस्य उभयत्र कर्तृत्वात् वक्ष्यमाणेन न्यायेन प्रेष्यत्वं मैत्रावरुणस्य कल्पयित्वा होतुरेव प्राप्नोति । तथा अध्वर्योः 'प्रेष्य' इति प्रैषान्तराम्नानात् 'यज' इत्येष निवर्तमानः प्रतिप्रस्थातुः प्राप्नोति । शेषाणि तु प्रैषानुवचनानि निर्ज्ञातकर्तृविशेषत्वात् निराकाङ्क्षाण्येव इति न तेषु मैत्रावरुणविधिः संभवति । पुरोनुवाक्यानां पुनः उभयांशपातित्वात् एकपदार्थत्वेन च नानाकर्तृत्वानुपपत्तेः होतुरध्वर्योश्च प्रच्यवमानानां साकाङ्क्षत्वात् संनिधानाच्च युक्तो मैत्रावरुणविधिः । एवं चशब्दोऽपि सहप्रयोगादपि प्रकृष्टार्थः समर्थितो भवति, प्रैषसंनिधानात् । न च 'प्रेष्य' इत्यादयोऽपि प्रैषाः तस्यैव आत्मविषयाः संभवन्ति ।

प्रातरनुवाके च होतृदर्शनात् । ४५ ॥

भाष्यम्— इतश्च पश्यामो न सर्वानुवचनेषु मैत्रावरुणः इति । कुतः ? यतः प्रातरनुवाके होतारं दर्शयति । कथम् ? यत्र होतुः प्रातरनुवाकमनुब्रुवत उपशृणुयात् तदाऽध्वर्युर्गृह्णीयात् इति । तस्मान्न सर्वानुवचनेषु मैत्रावरुण इति ।

शा— उपदेशात् सिद्धे समाख्याबाधे तद्विशेषचिन्ता । '**प्रैषानुवचनोद्देशात्साहित्यमविवक्षितम् । विधीयते प्रशास्ताऽतः समस्तव्यस्तयोस्तयोः ॥ नैवं समस्तयोरेव मैत्रावरुणचोदना । अज्ञातकर्तृकत्वेन व्यस्ते हि ज्ञातकर्तृके ॥**'

सोम— **सूत्रार्थस्तु—** सर्वे प्रैषाः सर्वाण्यनुवचनानि च मैत्रावरुणस्य कर्तव्यानि स्युः उपदेशात् इति ।

वि— 'यन्मैत्रावरुणः प्रेष्यत्यनु चाहेति बाधनम् । हौत्रादिकसमाख्यायास्तत् सर्वत्रोत कुत्र चित् ॥, आद्योऽस्तु वचना, न्मैवं साहित्योक्त्युपलम्भनात् । प्रैषानुवचने यत्र सहिते तत्र बाधनम् ॥'

भाट्ट— ज्योतिष्टोमे 'मैत्रावरुणः प्रेष्यति चान्वाह च' इति श्रुतम् । सन्ति च तत्र के चित् केवलाः प्रैषाः 'अग्नये समिध्यमानायानुब्रूहि' 'यूपायाज्यमानायानुब्रूहि' इत्यादयः । केवलानि च अनुवचनानि 'प्र वो वाजा अभिद्यवः' 'अञ्जन्ति त्वामध्वरे देवयन्तः' इत्यादीनि उपदेशातिदेशप्राप्तानि । प्रैषोत्तरत्वाच्च एषामनुवचनत्वम् । कानि चित्तु प्रैषत्वे सत्येव अनुवचनानि यथा 'होता यक्षत्' इत्यादीनि । एषां च 'प्रेष्य' इत्यध्वर्युप्रैषोत्तरभावित्वात् 'होतर्यज' इत्यन्ते प्रैषत्वाच्च उभयरूपत्वम् । तदिह मैत्रावरुणः प्रैषानुवचनोद्देशेन विधीयमानः सर्वत्र स्यात्, न तु प्रैषान्तानुवचनेष्वेव, उद्देश्यविशेषणस्य साहित्यस्याविवक्षितत्वात् । च-शब्दस्यापि प्रैषानुवचनरूपधर्मिसाहित्यपरत्वेन प्रैषत्वानुवचनत्वरूपधर्मयोः ऐकाधिकरण्यरूपसाहित्यबोधकत्वाभावात् । तस्य च प्रतिप्रधानं गुणावृत्तिन्यायेनैव अस्मन्मतेऽपि सिद्धेः अनुवादकत्वाच्च । अतश्च सर्वत्रैव समाख्याप्राप्तकर्त्रन्तरबाधेन वाक्यान्मैत्रावरुणनिवेशः । न चात्र अनेकोद्देशे वाक्यभेदो दोषः । 'अर्धमन्तर्वेदि मिनोति' इतिवदाख्यातैकत्वाभावात् । अत एव एकवाक्योपादानगम्यसाहित्यस्य उद्देश्यगतस्य अप्रतीतत्वादेव न विवक्षापत्तिः । **न चैवमपि** शुद्धप्रैषेषु अध्वर्युकर्तृकत्वस्य, शुद्धानुवचनेषु च होतृकर्तृकत्वस्यैव समाख्यया प्राप्तेः कर्त्रन्तरानपेक्षत्वादेव न मैत्रावरुणविधिः । प्रैषान्तानुवचनेषु तु प्रैषत्वेन अध्वर्युकर्तृकत्वस्य, अनुवचनत्वेन च होतृकर्तृकत्वस्य प्राप्तेः विरोधेन उभयोरपि निवृत्तौ, कर्त्रन्तरापेक्षायां तत्रैव मैत्रावरुणविधिः इति पार्थसारथ्युक्तं युक्तं इति वाच्यम् । प्रैषान्तानुवचनानामपि हौत्रे एव पाठस्य वार्तिकोक्तत्वेन अध्वर्युकर्तृकत्वाप्राप्तेः, उभयत्र पाठेन तत्प्राप्तावपि वा विकल्पेन उभयनिवेशोपपत्तेः निवृत्त्यप्रसङ्गाच्च । यदपि वार्तिके अग्नीषोमीयाद्यङ्गभूतेषु प्रैषान्तानुवचनेषु यज इतिशब्दस्य प्राकृतत्वात् तन्मात्रे अतिदेशेन अध्वर्योः प्राप्तिः, 'प्रेष्य' इति प्रैषान्तराम्नानाद्वा 'इतरमन्यः' इति न्यायेन (३।८।१०) प्रतिप्रस्थातुः, सोमाङ्गान्तर्वृत्तियजेतिशब्दे तु 'होतर्यज' इति लिङ्गानुरोधेन समाख्यां बाधित्वा मैत्रावरुणस्य, तदतिरिक्तपदार्थान्तरेषु होतुरेव । ततश्च अंशभेदेन नानाकर्तृप्राप्तेः एकपदार्थत्वेन च कर्तृद्वयासंभवात् प्रच्युतयोस्तयोः मैत्रावरुणविधिः इत्युक्तम्, तदपि 'यज' इति शब्दस्य अग्नीषोमीयादौ हौत्रे एव प्रत्यक्षपठितत्वेन समाख्यया आतिदेशिकाध्वर्य्वादिबाधेन होतृप्राप्तेः, तस्य च 'होतर्यज' इति लिङ्गेन बाधेऽपि तत्पुरुषस्य मैत्रावरुणस्यैव 'यज' इति शब्दे तदेकवाक्यतापन्नपदान्तरेषु च प्राप्तेरुपेक्षितम् । अबाधेऽपि वा समाख्याया दुर्बलत्वेन यजेतिशब्दे तदेकवाक्यतापन्नपदान्तरेषु च प्रतिप्रस्थातुरेवैकस्य प्राप्तेः न कर्त्रन्तरापेक्षा । एवं सोमाङ्गभूतेष्वपि बोध्यम् । अतः सर्वत्रैव मैत्रावरुणः । **इति प्राप्ते,** वाक्यभेदाङ्गीकारे अनुषङ्गापत्तेः चशब्दवैयर्थ्याच्च पदद्वयेन प्रैषान्तानुवचनान्येव 'अर्धमन्तर्वेदि' इतिवत् लक्षयित्वा तेष्वेव मैत्रावरुणविधानम् । चशब्देन च धर्मिणोः इतरेतरयोगस्य स्वरूपे कार्ये वा असंभवात्, समुच्चयस्य च न्यायादेव प्राप्तेः आनर्थक्यतदङ्गन्यायेन (३।१।९) धर्मयोरेव प्रैषत्वानुवचनत्वयोः इतरेतरयोगप्रतीतेः, निपातस्थले च परस्परान्वयस्य व्युत्पत्तिसिद्धत्वेन वाक्यभेदाभावात् लक्षणां विनैव परस्परयुक्तप्रैषत्वानुवचनत्वावच्छिन्नोद्देशेन मैत्रावरुणो विधीयते । अत एव प्रैषानुवचनान्यतरत्वावच्छिन्ने एव लक्षणोपपत्तेः न युक्तो वाक्यसंकोचः इत्यप्यपास्तम् । वस्तुतस्तु शुद्धानुवाक्यास्वपि कासु चित् मैत्रावरुणस्य याज्ञिकसंमतत्वात् चशब्दो न इतरेतरयोगार्थः, अपि तु धर्मिसमुच्चयार्थ एव सन् अनुवादः । न चैवं सार्वत्रिकत्वापत्तिः । 'अनुवादस्य सति संभवे संनिहितगामित्वम्' इति नियमेन यानि केवलान्यनुवचनानि प्रैषान्तानुवचनानि च तान्यधिकृत्य अयं विधिः प्रवृत्तः तद्विषयकत्वस्यैव अङ्गीकारात् ।

मण्डन– ‘प्रशास्ता न वदेदेकम्।’

शंकर– ‘प्रशास्ता क्वचिदेव तु।’ २२.

* प्रैषार्थस्य आग्नीध्रकर्तृकत्वं प्रैषस्य चाध्वर्युकर्तृकत्वम्। ३।८।१२।२४–२५.

* प्रैषप्रैषार्थौ तु विपर्ययेणाम्नातौ विपर्ययेण कर्तव्यौ (इति आर्थः क्रमः)। भा. ५।१।२।२, * प्रैषप्रैषार्थयोः भिन्नकर्तृकत्वम्। ३।८।११।२२.

* प्रैषमन्त्रः ‘अग्नीदग्नीन् विहर’ इति। बाल. पृ. ५९. * प्रैषमन्त्रे द्विबहुपत्नीके दर्शपूर्णमासप्रयोगे पत्नीशब्दे ऊहो न। ९।३।६।२१, एवं विकृतावपि। ९।३।७।२२.

* प्रैषयागाधिकरणन्यायात् (३।८।११।२३) ऋतुप्रैषेषु ‘इन्द्रं होत्रात्’ इत्यादय एव मन्त्रा भवन्ति। संकर्ष. ३।४।११.

* प्रोक्षणं अग्निचयने ‘हिरण्यशकलसहस्रेणाग्निं प्रोक्षति’ ‘दध्ना मधुमिश्रेणाग्निं प्रोक्षति’ इति। तच्च प्रोक्षणं न प्रतीष्टकं किन्तु सकृदेव, अग्नेरेकत्वात्। ९।१।८. * प्रोक्षणं अनवहन्तिरपि यः तत्कार्यापन्नः तत्र भवत्येव, यथा नखनिर्भिन्ने चरौ नखेषु प्रोक्षणं भवति। भा. ९।१।२।३ पृ. १६४५, * प्रोक्षणं अवहननं निर्वपणं इत्यादयः औषधधर्माः। ३।१।४।७. * प्रोक्षणं उलूखलमुसलयोरपूर्वप्रयुक्तम्। ९।१।२।२–३. * प्रोक्षणं किं हन्तिपिषिप्रयुक्तं उत अपूर्वप्रयुक्तं इति (संशयः)। भा. ९।१।२।२–३। वाक्यात् हन्तिपिष्यर्थे प्रोक्षणम्, प्रकरणादपूर्वार्थम्, वाक्यं च प्रकरणाद् बलीयः। इति पूर्वः पक्षः। वाक्यमबाधित्वा योऽर्थः स ग्रहीतव्यः। वाक्ये चोच्चारिते द्वैविध्यं भवति। प्रकरणपाठात् तण्डुलनिर्वृत्तिप्रणाड्या शक्यमपूर्वं लक्षयितुम्, शक्यते च व्रीह्यर्थे प्रोक्षणं प्रतिपत्तुम्। तत्र लक्षितलक्षणायां गृह्यमाणायां फलकल्पना न भवति। श्रुतिवृत्ते फलकल्पना स्यात्। तस्मात् फलकल्पनाभयात् लक्षितलक्षणयाऽपूर्वार्थे प्रोक्षणं इति सिद्धान्तः। टुप्. * प्रोक्षणं ज्योतिष्टोमे अग्नीषोमीयम् ‘अद्भ्यस्त्वौषधीभ्यो जुष्टं प्रोक्षामि इति पशुं प्रोक्षति’ इति। भा. ८।२।२।११, * प्रोक्षणं पुरोडाशधर्मः (पशुधर्मश्च)। ८।२।२।११, * प्रोक्षणं दर्शपूर्णमासयोः न द्रव्यप्रयुक्तम् (न व्रीहिस्वरूपप्रयुक्तं), किन्तु अपूर्वप्रयुक्तम्। ९।१।५।११–१९, * प्रोक्षणं प्राकृतोलूखलमुसलधर्मः राजसूये नैर्ऋते चरौ नखेषु भवति। ९।२।१२।४०, * प्रोक्षणं बर्हिषः संस्कारः। १२।१।१९।४२, * प्रोक्षणं यवमतीभिरद्भिः यूपधर्मः। १२।२।१०।२६. * प्रोक्षणं व्रीहिधर्मः। वि. ३।१।४. * प्रोक्षणस्य यूपावटबर्हिषि निवृत्तिः। टुप्. १०।१।३।५. * प्रोक्षणस्य स्वरुर्न प्रयोजकः अग्नीषोमीये पशौ। ४।२।१।१–६. * सांनाय्यपात्रप्रोक्षणस्य अङ्गं ‘शुन्धध्वं दैव्याय कर्मणे’ इति मन्त्रः संनिधिक्रमात् दर्शपूर्णमासादौ। वि. ३।३।५. * प्रोक्षणे मन्त्रः अध्वर्युप्रतिप्रस्थातृभ्यां भेदेन प्रयोक्तव्यः, न तन्त्रम्। वरुणप्रघासेषु विहारपृथक्त्वे। भा. १२।१।९।१८.

* प्रोक्षणादि आतिथ्याबर्हिषि कृतं सत् उपसत्सु अग्नीषोमीये च प्रसङ्गसिद्धं प्रतिकर्म न कर्तव्यम्। भा. १२।१।१९।४३–४४. * प्रोक्षणादयो धर्माः श्रुतिविनियुक्ताः अपूर्वप्रयुक्ताः, न तु द्रव्यसंख्याहेतुसमुदायप्रयुक्ताः। ९।१।५. मीको. पृ. २१७२ ‘द्रव्यसंख्याहेतुसमुदायन्यायः’ इत्यत्र द्रष्टव्यम्। * प्रोक्षणादयो व्रीहिधर्मा वाजपेये नीवारेषु भवन्ति। भा. ९।२।१२।४०. * प्रोक्षणादीनां पौरोडाशिकानां सौमिकपदार्थेभ्यः पूर्वभावित्वं ज्योतिष्टोमसुत्यायाम्। ५।१।१३।२५–२६. मीको. पृ. १७९४ ‘ज्योतिष्टोमे ऐष्टिकाः प्रोक्षणादयः’ इत्यत्र द्रष्टव्यम्। * प्रोक्षणादीनां संनिपत्योपकारकाणां प्रयोजकं अपूर्वं वाक्यविनियुक्तानाम्। ९।१।२।२–३.

* प्रोक्षणमन्त्रस्य वेदिविषयकस्य सकृत् प्रयोगो दर्शपूर्णमासयोः। ११।४।१५।४९–५०.

* प्रोक्षण्यः इति उपसर्गधातुप्रत्ययसमुदायस्य जातिनिमित्तता प्रयोगादनुमीयते। सेचनसंयोगात्तु उपसर्गधातुकरणप्रत्ययसहितः अप्सु प्रवर्तते इति (प्रोक्षणीभिः उद्वेजिताः स्म इति) प्रसिद्धिरनुगृहीता भविष्यति। भा. १।४।८।११, * ‘प्रोक्षणीरासादय’ इति प्रोक्षणीशब्दः यौगिकः, न संस्कारनिमित्तः, नापि जातिनिमित्तः। १।४।८।११. * ‘प्रोक्षणीरासादय, इध्माबर्हिरुपसादय०’ इत्यादिः प्रैषः आध्वर्यवं कर्म। आसादनादिकं तु आग्नीध्रम्। वि. ३।८।१३. * प्रोक्षणीभिः उद्वेजिताः स्म इति असंस्कृतास्वेवाप्सु कस्मिंश्चिद्देशे प्रवक्तारो भवन्ति। भा. १।४।८।११.

प्रोक्षणीष्वर्थसंयोगात्। १।४।८।११॥

‘प्रोक्षणीरासादय’ इत्यादिप्रैषमन्त्रे प्रोक्षणीशब्दः किं संस्कारनिमित्तकः उत जातिनिमित्तकः किंवा यौगिकः इति विचारे सिद्धान्तमाह। प्रोक्षणीषु अप्सु केवलासु प्रोक्षणीशब्दः यौगिकः स्यात्। अर्थसंयोगात् अवयवार्थसंयोगात्। प्रोक्ष्यते आभिः इति प्रोक्षण्यः इति योगः। येनयेन सेचनं क्रियते सा सर्वा प्रोक्षणी। तस्मात् प्रोक्षणीशब्दो यौगिकः इति सिद्धान्तः। के.

प्रोक्षणीष्वर्थसंयोगात्। १।४।९।११॥

‘प्रोक्षणीरासादय’ इति प्रोक्षणीशब्दं प्रति संदेहः, संस्कारशब्दो जातिनिमित्तो यौगिको वा इति। तत्रायं पूर्वपक्षिणोऽभिसंधिः। बर्हिराज्यशब्दवत् असंस्कृतास्वप्सु प्रोक्षणीशब्दप्रयोगादर्शनात् संस्कारवचनत्वमेव। इति **प्रथमः पूर्वः पक्षः।** तदयुक्तम्। मा नाम सर्वत्र प्रयुज्यताम्। प्रयुज्यते तावत् केषु चिद्देशविशेषेषु असंस्कृतास्वप्सु। तदुक्तं भाष्यकारेण ‘प्रोक्षणीभिरुद्वेजिताः स्मः इति कस्मिंश्चिद् देशे भवन्ति वक्तारः’ इति (पृ. ३४४)। अतो बर्हिराज्यन्यायेनैव न तावत् संस्कारवचनत्वम्। नापि यौगिकार्थत्वम्। प्रकर्षेण उक्ष्यते अनेन इत्यस्य योगस्य घृतमूत्रादिसाधारण्येन जलजातिविनिगमनाभावात्। किंच उपसर्गधातुप्रत्ययार्थपरामर्शेन यौगिकप्रतीतिर्विलम्बेनोपजायते। समुदायप्रसिद्धिस्तु अक्षरग्रहणमात्रापेक्षिणी नावयवानुसंधानमपेक्षते। अतस्ततो विप्रकृष्यते अवयवप्रसिद्धिः। तदुक्तम् ‘**अक्षरैरेव बध्यन्ते समुदायप्रसिद्धिषु। अर्थभागोपसंहारादितरा विप्रकृष्यते॥**’ इति (वा. १।४।८।११ पृ. ३४४)। अतः समुदायप्रसिद्धिबलेन बर्हिराज्यादिवत् जातिवचनत्वमेव। इत्येवं **प्राप्ते, अभिधीयते।** भवेदेवम्, यद्यत्र समुदायप्रसिद्धिः क्लृप्ता भवेत्। तत्रैव हि सा कल्प्यते, यत्रावयवार्थानुसारव्यतिरेकेण प्रयोगो दृश्यते, यथा वृक्षविशेषे अश्वकर्णशब्दस्य। तदुक्तम् ‘**असत्स्ववयवार्थेषु योऽन्यत्रार्थे प्रयुज्यते। तत्रानन्यगतित्वेन समुदायः प्रसिध्यति॥**’ (वा. पृ. ३४४) इति। अतः समुदायशक्तेः अक्लृप्तत्वात् क्लृप्तावयवशक्तिद्वारेणैव च प्रयोगोपपत्तेः प्रोक्षणीशब्दस्य यौगिकत्वमेव। **ननु** घृतमूत्रादिसाधारणत्वात् योगोऽतिव्यापकः। **सत्यम्।** ल्युडन्तात् प्रपूर्वकात् उक्षतेर्धातोः सेचनसमर्थं द्रवद्रव्यमात्रमेवावगम्यते, बहुवचनस्त्रीलिङ्गवशात्तु आप एव शब्दार्थः इति निश्चीयते। तेन ‘प्रोक्षणीरासादय’ इति वाक्यार्थसिद्धयौगिकत्वमेव प्रोक्षणीशब्दस्येति सिद्धम्।

प्रयोजनम्— विकृतौ यत्र श्रूयते ‘घृतं प्रोक्षणं भवति’ इति ‘प्रोक्षणीरासादय’ इति च प्रैषः अतिदेशप्राप्तः, तत्र यदि संस्कारवचनत्वं तदा ‘प्रोक्षणीरासादय’ इत्यविकृतस्यैव प्रयोगः। अथ जातिवचनत्वम्, तदा ऊहेन ‘घृतमासादय’ इति प्रयोगः। सिद्धान्ते तु यौगिकत्वेन वाच्यलिङ्गत्वात् घृतस्य नपुंसकलिङ्गत्वेन ‘प्रोक्षणमासादय’ इति प्रयोगः।

सूत्रं तु प्रोक्षणीषु यौगिकत्वं अर्थसंयोगात् अवयवार्थसंयोगादित्यर्थः। **तौता. १।४।९।१०.**

प्रोक्षण्यधिकरणम्॥

प्रोक्षणीष्वर्थसंयोगात्। १।४।८।११॥

भाष्यम्— ‘प्रोक्षणीरासादय’ इति श्रूयते। तत्र प्रोक्षणीशब्दं प्रति संदेहः, किं संस्कारनिमित्त उत जातिनिमित्त उत यौगिकः इति। तत्र संस्कारेषु सत्सु दर्शनात् संस्कारशब्दतायामवगम्यमानायामसंस्कृते शब्दलाभाज्जातिशब्दः। असंस्कृतास्वेवाप्सु प्रोक्षणीभिरुद्वेजिताः स्मः इति कस्मिंश्चिद्देशे भवन्ति वक्तारः। तेन जातिशब्दः इति प्राप्ते, यौगिक इत्युच्यते। कुतः? अर्थसंयोगात्। प्रोक्षण्य इत्युपसर्गधातुप्रत्ययसमुदायस्य जातिनिमित्तता प्रयोगादनुमीयते। सेचनसंयोगात् तूपसर्गधातुकरणप्रत्ययसहितोऽप्सु प्रवर्तत इति प्रसिद्धिरनुगृहीता भविष्यति। यदाऽन्यदपि सेचनं प्रोक्षणशब्देनोच्यते तदा तत्संयोगादेवाप्सु भविष्यतीति न समुदायार्थः कल्पयितुं शक्यते। तस्मात् यौगिकः। प्रयोजनम् ‘घृतं प्रोक्षणं भवति’

इति, यदि संस्कारशब्दः प्रोक्षणीरासादयेति प्रैषः, यदि जातिशब्दः, घृतमासादयेति, यदि यौगिकः प्रोक्षणमिति ।

वा— ननु समुदायप्रसिद्धेः श्रुतिस्थानीयत्वाद्वाक्यस्थानीयावयवप्रसिद्धिर्दुर्बला स्यात् । तथाहि । '**अक्षरैरेव बुध्यन्ते समुदायप्रसिद्धिषु । अर्थभागोपसंहारादितरा विप्रकृष्यते ॥' सत्यमेवमेतत् ।** अवश्यं त्ववयवानामपि स्वार्थे शक्तिराश्रयणीया तदनाश्रयणेऽवयवप्रसिद्धित्वाभावात् । तत्र च '**असत्स्ववयवार्थेषु योऽन्यत्रार्थे प्रयुज्यते । तत्रानन्यगतित्वेन समुदायः प्रसिध्यति ॥**' लब्धात्मिका हि समुदायप्रसिद्धिरवयवप्रसिद्धिं बाधते, तस्यास्त्वात्मलाभो यत्र प्रमाणान्तरेण पूर्वानुभूतावयवार्थरहितेऽर्थे शब्दप्रयोगो दृश्यते, यथाऽश्वत्वकर्णत्वरहिते वृक्षेऽश्वकर्णशब्दस्य । न ह्यत्र पूर्वशक्त्यनुसारेण प्रतीतिरुपपद्यते इत्यर्थापत्त्या शक्त्यन्तरं कल्प्यते । ततश्चोभयसंभवे अवयवार्थानुसंधानाद्विक्षिप्ताया अवयवप्रसिद्धेरक्षरश्रवणमात्रलभ्यत्वादियं बलीयसी भवति । अत्र पुनरप्सु प्रकर्षसेचनक्रियाकरणत्वसंभवादवयवशक्तिभिरेव वाक्यवत्प्रयोगोपपत्तेः शक्त्यन्तरे प्रमाणाभावात् समुदायप्रसिद्ध्यभावः । तथाहि '**भवेतां यदि वृक्षेषु वाजिकर्णौ कथञ्चन । अदृष्टां समुदायस्य कः शक्तिं जातु कल्पयेत् ॥**' तस्मान्नाप्सु समुदायप्रसिद्धिरिति द्रवद्रव्यमात्रसाधारणता । ननु संस्कारनिमित्तत्वेऽपि अप्सामानाधिकरण्यकृतत्वादीकारस्य घृतान्निवृत्तिः स्यात् । यदि हि प्रागीकारात्संस्कारनिमित्तताऽवगम्येत ततः स्त्रीप्रत्ययोऽयमाश्रयलिङ्गनिमित्त इत्यवधारणादन्यलिङ्गान्निवर्तेत । अयं पुनरन्यप्रयोगः संस्कारेष्वीकारान्त एवानवगतविभागो वेद्यादिवत् प्रयुक्त इत्यन्यादृशस्य वाचकत्वं नावधार्येत, तस्मादीकारान्तः स्यात् । यौगिकत्वे तु प्रागीकाराद्योगो गम्यते इति स्त्रीप्रत्ययोऽयं निमित्ताभावाद्घृते न प्रयोक्ष्यते, चोदकप्राप्तं तु प्रातिपदिकमात्रं प्रयोक्तव्यम् । न च द्रव्येष्वर्थसमवायाद्विधिशब्दप्रयोगनियमः, यतः प्रोक्षणशब्दबाधेन जातिपक्षवद् घृतमित्येव प्रयोगः स्यात् ।

शा— 'रूढिर्लब्धात्मिका योगं बाधते न त्वलब्धिका । तत्रैव चात्मलाभोऽस्या यत्र नावयवार्थता ॥ यथा वृक्षेऽश्वकर्णस्य सत्सु त्ववयवार्थेषु । **तत एवोपपन्नत्वादर्थापत्तिः परिक्षीणा ॥ नादृष्टा समुदायस्य शक्तिं कल्पयितुं क्षमा । सन्ति त्ववयवार्थाः प्रकृष्टोक्षणहेतुत्वात् ॥ स्त्रीलिङ्गत्वाच्च तेनात्र नात्मानं लभते रूढिः । वाक्यार्थे वाक्यवत् तस्मात् यौगिकः प्रोक्षणीशब्दः ॥'** (एतेषां चतुर्णामपि श्लोकानां वक्त्राख्यवृत्तिविशेषत्वं बोध्यम् । **सोम.**)

सोम— आपवादिकी **संगतिः । सूत्रार्थस्तु—** प्रोक्षणीषु अवयवार्थसंयोगात् योगत्वम्, न तु समुदायशक्तिः इति ।

वि— ' प्रोक्षणीः संस्कृतिर्जातिर्योगो वा, सर्वभूमिषु । तथोक्तेः संस्कृति, र्जातिः स्याद्रूढेः प्रबलत्वतः ॥ अन्योन्याश्रयतो नाद्यो न जातिः कल्प्यशक्तितः । योगः स्यात् क्लृप्तशक्तित्वात् क्लृप्तिर्व्याकरणाद् भवेत् ॥ '

भाट्ट— प्रोक्षणीशब्दस्यापि पूर्ववत् संस्कारवाचित्वे ' प्रोक्षणीभिरुद्वेजिताः स्मः ' इति लोके संस्कारं विहाय जातिमात्रे प्रयोगदर्शनात् रूढ्या जलत्ववाचित्वे **प्राप्ते,** क्लृप्तावयवयोगेनोपपत्तौ रूढिकल्पने प्रमाणाभावः । अत एवाश्वकर्णादिशब्दे योगबाधे एव तत्कल्पनम् । न चापामौदासीन्यावस्थायां प्रकृष्टोक्षणसाधनत्वरूपयोगाभावः । फलोपधानासंभवेऽपि उक्षणस्वरूपयोग्यत्वस्य संभवात् । न चैवं रथकारपदेऽपि रथकर्तृत्वयोग्यत्वरूपयोगसंभवेन जातिविशेषशक्तिकल्पनानुपपत्तिः । अनुशासनबलेन तत्कल्पनात् । कर्तृत्वस्वरूपयोग्यत्वस्य अव्यावर्तकत्वेन ' वर्षासु रथकारः ' इत्यस्य वैयर्थ्यापत्तेश्च । प्रोक्षणीशब्दे तु रूढिकल्पने प्रमाणाभावात् यौगिकत्वमेव ।

प्रयोजनं तु विकृतौ ' घृतं प्रोक्षणं ' इत्यादौ ' प्रोक्षणीरासादय ' इत्यविकृतः प्रयोगः संस्कारवाचित्वपक्षे । ' घृतमासादय ' इति जातिवाचित्वे । ' प्रोक्षणमासादय ' इति यौगिकत्वे द्रष्टव्यम् ।

मण्डन— ' यौगिकं प्रोक्षणीपदम् । '

शंकर— ' प्रोक्षण्यादि तु यौगिकम् । '

* अवयवप्रसिद्धेः विप्रकर्षोपपादनार्थम् ' अक्षरैरेव बुध्यन्ते ' इति **प्रोक्षण्यधिकरणवार्तिकोक्तं** दौर्बल्यं स्मारयति । **सु.** पृ. ८३३.

* **प्रोक्षण्यादिशब्दानां यौगिकता** । १।४।८.

* **प्रोक्षण्यासादनादीनां** अनाध्वर्यवता । वि. ३।८।१२.

* **प्रोक्षणीशब्दः** प्रकर्षसेचनयोग्यत्वकारणस्य द्रवत्वस्य अप्सु स्वाभाविकस्य भावात् उदासीनास्वपि तासु । **सु.** पृ. ९००.

* **प्रोक्षति** अग्नीषोमीयं पशुं ज्योतिष्टोमे ' अद्भ्यस्त्वौषधीभ्यो जुष्टं प्रोक्षामि ' इति । **भा.** ८।२।२।११.

* **प्रोत्साहनार्थानां** मन्त्राणां ' अगन्म स्वः सं ज्योतिषाऽभूम ' इत्यादीनां ' यदेव श्रद्धया करोति तदेव वीर्यवत्तरं भवति ' इति वाक्यावधारितकर्माङ्गभूतश्रद्धाजननार्थं अनुष्ठेयकर्मस्मृतिफलकत्वम् । **सु.** पृ. १०२.

* **प्रोत्साहनमन्त्राणां** याजमानत्वम् । ३।८।६। १५-१६. **मीको.** पृ. १०१२ ' आशीरधिकरणम् ' इत्यत्र द्रष्टव्यम् ।

* **प्लक्षशाखायाः** अग्नीषोमीये पशावेव विनियोगः । **संकर्ष.** १।३।१४. **मीको.** पृ. ११७ ' अग्नीषोमीये पशौ प्लक्षशाखायाः० ' इत्यत्र द्रष्टव्यम् ।

प्लवङ्गमगतिन्यायः । यथा पिपीलिकापेक्षया प्लवङ्गमः शाखाऽन्तरे उत्प्लवमानो द्वित्रिचतुरुत्प्लवैरुच्चतरमपि तारवफलं स्वल्पायासेन लभते, तथैव मध्यमाधिकारी अज्ञान्यपेक्षया जन्मान्तरीयशुद्धसंस्कारतया शुद्धमनस्कः सद्गुरुसकाशात् लब्धाध्यात्मविद्यश्चिद्घनानन्दीयरसं झटित्यास्वादते इति । **साहस्री.** ५१६.

फ

' **फलमत उपपत्तेः** ' (३।२।८।३८ ब्रसू.) इत्यधिकरणन्यायेन अतिथेः फलदातृत्वासंभवात् ईश्वर एव फलदाता । **परिमल.** ४।१।४।५ ब्रसू. * फलं अनुपादेयं कर्मभेदकम् । तस्य उदाहरणम् ' आग्नेयमष्टाकपालं निर्वपेद्रुक्कामः ' इत्यादि । **वा.** २।३।१२।२५. * फलं अपि पुरुषं प्रति शेषः इति जैमिनिः । **भा.** ३।१।३।५. * ' **फलमात्रेयो निर्देशादश्रुतौ ह्यनुमानं स्यात्** ' (४।३।८।१८) । ' पुरुषार्थे तु निर्देशात् फलमात्रेयदर्शनात् । ' पुरुषार्थस्य नियमस्य अवश्यकल्पनीयप्रयोजनत्वात् अर्थवादोपात्तमेव फलमाश्रयणीयम् । **वा.** १।३।८।२७ पृ. २८३. * अध्ययनकरणिकायां भावनायां नियोगः प्रतीयमानः नियोज्यविशेषं विना अपर्यवस्यन् अश्रुतस्वर्गादिपरित्यागेन ' **फलमात्रेयो निर्देशात्०** ' **इति न्यायेन** घृतकुल्यादिकमवलम्बते । **सिद्धान्तचन्द्रिका.** १।१।१. * सत्यपि चार्थवादसरूपत्वे पारार्थ्यानवधारणात् ' दुर्वर्णोऽस्य भ्रातृव्यो भवति ' इत्यादीनां फलविधित्वं वक्ष्यति ' फलमात्रेयो निर्देशात् ' **इति न्यायात्** । **वा.** ३।४।८।२४. * फलं करणमन्त्रप्रकाश्यं कर्मोपयोगि ऋत्विग्गामि । **भा.** ३।८।१४। २८-२९. * फलं करणमन्त्रप्रकाश्यं याजमानम् । ३।८।१३।२६-२८. * फलं क्रतुना इतिकर्तव्यतार्थित्वलक्षणेन प्रकरणेन गृह्यते, तदवश्यं क्रत्वर्थं भवति । **रत्न.** ५।१।१।१.

फलं चाकर्मसंनिधौ । २।३।१२।२५ ॥

अनारभ्य किञ्चित् श्रूयते ' आग्नेयमष्टाकपालं निर्वपेद्रुक्कामः, अग्नीषोमीयमेकादशकपालं निर्वपेद् ब्रह्मवर्चसकामः, ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः ' इति । तत्र संदिह्यते किं प्रकृतेष्वाग्नेयादिषु फलं विधीयते उत प्रकृतेभ्यः कर्मान्तरं इति । इदानीं यो नाम पूर्वोदाहरणे प्रकरणान्तरकृतं च कर्मभेदं मन्यते, न बुद्धिविच्छेदानुपादेयं प्रत्युपादनयोरेव, (अत्र ग्रन्थः अविस्पष्टः । अत्र अनुमितः ग्रन्थः एवं स्यात्— यो नाम पूर्वोदाहरणे प्रकरणान्तरकृतमेव भेदं मन्यते, न बुद्धिविच्छेदानुपादेयवस्तुसंबन्धकृतम्, तं प्रति अनयोरेव–) भेदकत्वप्रतिपादनार्थमिदमारभ्यते । तत्र पञ्चस्वनुपादेयेषु कालदेशयोरनुपादेयत्वं स्वभावादेव सुसंज्ञानम् । निमित्तस्यापि निमित्त-

त्वादेव । यस्मिन् देयनिष्पन्ने कर्मण्यस्य कार्यता तत् निमित्तम् (? यस्मिन् निष्पन्ने कर्मणोऽस्य कार्यता तत् निमित्तम्)। न च तदुपादेयं संभवति । तेनैतेषां तुल्यत्वात् पूर्वाधिकरणविषयत्वमेव । तत्र कालस्योदाहरणमुक्तमेव । देशस्यापि 'दक्षिणेन तीरेण सरस्वत्या आग्नेयेनाष्टाकपालेन' 'शम्यापरासमीयात्' इत्यादि । अत्र च यद्यप्यतिरात्रादिवत् यजिश्रवणं नास्ति, तथापि द्रव्यदेवतासंबन्धस्य यज्यनुमानव्यतिरेकेणापर्यवसानादग्निहोत्रादितुल्यत्वमेव इति कर्मान्तरत्वमेव । निमित्तस्यापि 'सत्रायावगूर्य विश्वजिता यजेत' 'साम्युत्थाने विश्वजित्' इत्याद्यपि पूर्वाधिकरण एव द्रष्टव्यम् । इह तु फलसंस्कार्ययोरेव वचनीयमस्तीति विचारविषयत्वम् । तत्र फलोदाहरणमुक्तमेव । तत् तुल्यन्यायतया संस्कार्यस्याप्यनुक्तमपि द्रष्टव्यम् । 'त्रैधातवीया दीक्षणीया भवति' इत्यादि ।

अत्र अयं पूर्वपक्षिणोऽभिसंधिः । फलस्य तावत् सुव्यापारनिष्पाद्यत्वान्नानुपादेयत्वम् । संस्कार्यस्यापि यजमानादेः क्रियासिद्ध्यर्थमुपादेयत्वमेव । तेन एतयोरनुपादानाभावात् न कर्मभेदः । **ननु** उपादेयत्वेऽप्येतयोः प्राप्तत्वेनाविधेयत्वात् कर्मैवात्र विधातव्यम् । तच्च न संविहितमिति अग्निहोत्रादितुल्यमेवेति । **मैवम्**, अग्निहोत्रे खलु जुहोतीत्याख्यातेन नामासंबद्धः प्रयोगो विधीयते । नामधेयं च तत्परतन्त्रत्वान्न पूर्वकर्मोत्पत्त्युपस्थापकमिति कर्मान्तरत्वम् । इह तु पूर्वावगतस्य कर्मणो द्रव्यदेवतासंबन्धेनैवोपस्थापितत्वात् तदेव कर्मफलस्य काम्यमानत्वेन उपादेयस्य च प्राप्तत्वेनाविधेयत्वेऽपि तस्मिन् विधीयमानं कर्म न भिद्यते इति वैषम्यम् । एवं 'त्रैधातवीया दीक्षणीया भवति' इत्यत्रापि 'मासं दर्शपूर्णमासाभ्यां यजेत' इतिवत् यज्यश्रवणात् त्रैधातवीयानाम्नस्तत्परतन्त्रत्वाभावात् पूर्वसिद्धस्य स्थानस्थितत्रैधातवीयोपस्थापकत्वमेव । तथाच प्रकरणं बाधित्वा वाक्येन पूर्वसिद्धैव त्रैधातवीया संस्कार्यभूता यजमानसंस्कारत्वेनैव दीक्षणीया ... ('कार्ये' इति त्रुटितं कल्प्यते) विधीयते । तेन प्रकरणान्तरन्यायस्याप्यनुपादेयं प्रत्युपादानबुद्धिविच्छेदरूपस्याभावात् अत्राप्यकर्मान्तरत्वमेवेति । **एवं प्राप्ते, अभिधीयते** । भवेदेवं यदि देशकालयोरिव फलसंस्कार्ययोरपि स्वभावसिद्धं अनुपादेयत्वं ब्रूमः । किं तर्हि ? समभिव्याहृतक्रियापेक्षम् । तथाहि अन्यार्थमनुत्पाद्यत्वं ह्यनुपादेयत्वम् । तत् देशकालनिमित्तानामेव परं स्वभावसिद्धम् । फलसंस्कार्ययोस्तु न समभिव्याहृतक्रियार्थमुत्पाद्यत्वम् । किं तर्हि ? क्रियाया एव तदर्थमुत्पादनमिति तदपेक्षमनुपादेयत्वमेव । नापि पूर्वावगतस्य कर्मणो द्रव्यदेवतासंबन्धेनोपस्थापनम् । यतो ह्यनुमानद्वारेण द्रव्यदेवतासंबन्धस्य यागप्रतिपादकत्वम् । न चैकस्यैव यजिपदस्य पूर्वोत्पत्त्युपस्थाने फलं प्रति विनियोगे चैकदा करणत्वं संभवतीति फलसमभिव्याहृतस्य कर्मणः श्रुतस्येवानुमितस्यापि अग्निहोत्रादिवत् अनुपादेयं प्रत्युपादान.....शब्दाभ्यां कर्मान्तरत्वमेव इति । **ननु** 'त्रैधातवीया दीक्षणीया भवति' इत्यत्र न यजिः श्रूयते । नापि द्रव्यदेवतासंबन्धेनानुमीयते, तदभावात् त्रैधातवीयापदस्य आख्यातपरतन्त्रत्वाभावात् अतिरात्रादिवाक्यवत् पूर्वकर्मोपस्थापकत्वमव्याहतमेवेति कथं कर्मान्तरत्वम् । उच्यते । स्यादेवं यदि सकृदुच्चरितत्रैधातवीयापदं पूर्वकर्मोपस्थापनं कार्यान्तरे च विनियोगं कर्तुमुत्सहते । तदत्र कार्यान्तरविनियोगस्य आवश्यकत्वात् अनपेक्षितपूर्वकर्मोपस्थापनं कर्मान्तरमेव विनियुक्तम् । अतिरात्रादिवाक्येषु विनियोजकोपस्थापकशब्दभेदोपपत्तिरिति प्रागेवैतदुक्तम् । एतच्च 'साम्युत्थाने विश्वजित्' इत्यत्रापि समानमिति सिद्धमत्रापि प्रकरणान्तरादेव कर्मभेद इति ।

प्रयोजनम्—पूर्वपक्षे दर्शपूर्णमासप्रयुक्तेन अपवर्गसंबन्धद्वयमेव फलान्तरमिति न पृथगनुष्ठानम् । सिद्धान्ते तु दर्शपूर्णमासप्रयोगाद्बहिरेव आग्नेयधर्मानुष्ठानमिति । सूत्रं तु अकर्मसंनिधौ श्रूयमाणं फलं कर्मभेदं करोतीत्यर्थः । **तौता.**

फलं चाकर्मसंनिधौ । २।३।१२।२५ ॥

अनारभ्य श्रूयते 'आग्नेयमष्टाकपालं निर्वपेत् रुक्कामः' 'ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः' इत्यादि । अत्र प्राकृतेषु आग्नेयादिषु फलविशेषो विधीयते इति पूर्वपक्षे सिद्धान्तमाह । अकर्मसंनिधौ प्राकृताग्नेयादिकर्मसंनिध्यभावे प्रकरणादन्यत्र श्रूयमाणं फलं कर्मभेदकं भवति । अनुवादे सति न शक्येत फलं विधातुम् ।

तस्मात् दार्शपौर्णमासिकात् कर्मान्तराण्येतानि इति सिद्धान्तः । एवं अश्वमेधे 'त्रैधातवीया दीक्षणीया' इति श्रूयते । तत्रापि संस्कार्यस्य यजमानस्य संस्कारार्था त्रैधातवीया कर्मान्तरमेव । **के.**

* अग्निहोत्रवाक्यं हि केवलगुणविधिः इति पक्षे एव परं 'सायं जुहोति' 'प्रातर्जुहोति' इति वाक्ययोः अनुपादेयकालसंबन्धात् कर्मविधिसंभवः, न तु अग्निहोत्रवाक्यं कर्मविधिः इति पक्षे । तदा 'सायं जुहोति' 'प्रातर्जुहोति' इत्यनयोः सत्यपि अनुपादेयकालसंबन्धे न कर्मान्तरविधायकत्वं '**फलं चाकर्मसंनिधौ**' इति न्यायस्य कर्मभेदप्रयोजकस्याभावात् । **सोम.** ६।४।४ पृ. ६४ . * अनुपादेयत्वे 'फलं चाकर्मसंनिधौ' इति न्यायेन कर्मान्तरविधिरेव स्यात् नाभ्यासविधिः । 'शतोक्थ्यं भवति' इत्यादौ शताभ्यासस्य । ८।३।४ . * फलं तावत् पुरुषस्योपकरोति न कर्मणः । उक्तं हि 'फलं च पुरुषार्थत्वात्' (३।१।३।५) इति । **भा.** ८।१।१३।२१ .

* '**फलं तु तत्प्रधानायाम्**' (४।३।१।३) इति च कामपदोपबद्धायां (चोदनायां) तदर्थत्वं (कामार्थत्वं) वक्ष्यते । वा. ३।४।५।१५ पृ. ९४६, * अवघातादिवदेव '**फलं तु सह चेष्टया (शब्दार्थोऽभावाद् विप्रयोगे स्यात्**' ३।१।४।१०) इत्येषोऽर्थः योजयितव्यः । ३।१।८।१७. * फलं देशः कालः निमित्तं संस्कार्यं इत्यनुपादेयपञ्चकम् । **बाल.** पृ. ८८.

फलं न विधेयम् ॥

यस्मिन् प्रीतिः पुरुषस्य तस्य लिप्साऽर्थलक्षणाऽविभागात् । ४।१।२।२ वर्णकं २ ॥

शा— (विचारशास्त्रे लक्षणकथनं नात्यन्तसंगतं इत्यनुशयेन भाष्यानुक्तमपि वर्णकान्तरमाह—) अथवा, फलांशस्य किं विधिः प्रयोजको वेति चिन्त्यते । विधेयभावनाविशेषणत्वात् करणादिवत् फलस्यापि विधेयत्वशङ्का । रागतस्तु प्रवृत्तिसिद्धेः अभिधेयत्वम् ।

सोम— **प्रयोजनम्**— पूर्वपक्षे श्येनयागफलस्याभिचारस्य हिंसात्मकस्य विधेयत्वेन तत्र 'न हिंस्यात्' इति निषेधाप्रवृत्तिः । सिद्धान्ते तु तत्प्रवृत्तिरिति । **सूत्रार्थः**— यस्मिन् स्वर्गादौ अनुभूयमाने पुरुषस्य प्रीतिः तृप्तिर्भवति, तस्य लिप्सा अर्थलक्षणा स्वारसिकी इति यावत् । फलस्य प्रीत्या अविभागात् इति ।

वि— 'फलं विधेयं नो वा, ऽऽद्यो भावनांशत्वतोऽन्यवत् ।, न भाव्यांशो विधेयः स्याद् रागात् तत्र प्रवर्तना ॥'

भाट्ट— यद्वा नानेन लक्षणकरणम् । अपि तु फलस्यापीतरांशवत् भावनाविशेषणत्वाद्विधेयत्वम् । न ह्यन्यांशयोरपि विशेषणत्वातिरिक्तं विधेयत्वम् । यदि तु विशिष्टभावनाविधौ अर्थादितरांशयोर्विधिरुच्येत तत् फलस्याप्यविशिष्टम् । इति **प्राप्ते**, विशिष्टभावनाविधाने आर्थिकविशेषणविधेरावश्यकत्वात्, तस्य च यदंशे अप्राप्तिस्तदंशे एव कल्पनात्, फलस्य च रागप्राप्तत्वेन तत्कल्पने प्रमाणाभावादविधेयत्वम् । **प्रयोजनं** पूर्वपक्षे श्येनफलस्याभिचारस्य विधेयत्वान्निषेधाविषयत्वम् । सिद्धान्ते तु रागप्राप्तत्वात् 'न हिंस्यात्' इति निषेधविषयत्वम् । **न** च हिंसाशब्दस्य मरणानुकूलव्यापारवाचित्वात्, तस्य च वैरिमरणाख्याभिचारफलकश्येनरूपस्य विहितत्वात् कथं निषेधविषयत्वमिति **वाच्यम्** । 'अभिचरन् यजेत' इति सामानाधिकरण्यात् श्येनसमानकर्तृकत्वावगतेः अभिचारपदस्य मरणानुकूलश्येनकर्तृनिष्ठविषदानादिरूपव्यापारवाचित्वावगतेस्तस्यैव श्येनफलत्वावसायात् रागप्राप्तस्य निषेधविषयत्वोपपत्तेः । एवं चावश्यं श्येनेन विषदानाद्युत्पत्तिः तेन वैरिमरणम्, न तु श्येनेनैव साक्षादिति ध्येयम् । यत्तु वैरिनिष्ठो मरणानुकूलव्यापार एवाभिचारपदार्थः, तत्र च यजमानस्य श्येनद्वारा प्रयोजककर्तृत्वमिति तस्य निषेधाविषयत्वेऽपि यजमानस्य पापोत्पत्तिरिति केनचिदुक्तम्, तत् श्येनस्यैव प्रयोजकव्यापारत्वात्, तस्य च विहितत्वात् तत्कर्तृत्वेन यजमाने पापोत्पत्त्यनुपपत्तेरुपेक्षितम् । यत्र तु 'वैरिमरणकामो यजेत' इति श्रुतम्, तत्र वैरिमरणानुकूलकर्तृनिष्ठलौकिकव्यापाराभावेऽपि वैरिमरणरूपपरानिष्टचिन्तनादेव पापमिति ध्येयम् । अभिचारार्थकर्मणस्तामसधर्मत्वस्मरणाद्वा तथा । प्रकृतेऽपि तथैवास्तु ।

शंकर—‘ विधेयं न फलं मतम् । ’ ३.

* फलं प्रति कर्माणि शेष इति जैमिनिः । भा. ३।१।३।४, * फलं प्रयोजकं गोदोहनस्य, न क्रतुः ।४।१।२।२ वर्णकं २. * फलं ‘ भद्रं ’ इति मन्त्रोक्तं अध्वर्युयजमानोभयगामि ज्योतिष्टोमे उपरवेषु । वि. ३।८।१६. * फलं यागादिकर्मणां स्वर्गादिकम् । ६।१।१।१—३. * फलं साध्यं प्रधानम् । वि. १।४।६. * उद्दिश्यमानं हि सर्वत्र फलं भवति । वा. १।४।५।८. * कर्मप्रयोगेण फलं भाव्यते । कथं ज्ञायते ? प्राक् कृतात् कर्मणः फलं नास्ति । यदि भवेत् कर्मानर्थक्यं स्यात् । कर्मोत्तरकाले च अस्तीति श्रुतितोऽवगम्यते । यच्च प्राक् कर्मणो नास्ति, कर्मोत्तरकालं च भवति, तत् तेन कर्मणा भाव्यते । कृषिवत् । भा. ११।१।४।२०, * यस्यैव प्रधानकर्मफलं तस्यैवाऽऽनुषङ्गिकमपि भवितुमर्हति । ६।२।२।१०, * साङ्गाद्धि फलं श्रूयते प्रधानात्, न केवलात् । शब्दश्च साङ्गात् फलमाहेति वक्ष्यामः । ६।३।२।९. * स्वातन्त्र्येण (अन्येच्छाधीनेच्छाया अविषयत्वेन अन्येच्छानधीनेच्छाविषयत्वेन वा) यन्मुख्यया वृत्त्या काम्यते तदेव कामशब्दोपबन्धात् फलं प्रतीमः । विस्तरेण चैतत् ‘ असाधकं तु तादर्थ्यात् ’ (६।१।१।२) इत्यत्र वक्ष्यामः । वा. १।४।२।२ पृ. ३३०. * फलेन व्याप्यमानः कर्ता भवति । टुप्. ६।३।८।२२. * ‘फलेभ्यो याति’ इयं कर्मणि चतुर्थी कारकसुप्विभक्तिरूपा विनियोक्त्री श्रुतिः । बाल. पृ. ४४. * फलस्य अविधेयत्वम् । वा. २।२।११।२५ पृ. ५४१, वि. पृ. ४३७. * फलस्य अवेष्टियागेन संबन्धो विधीयते, न कर्मान्तरम् ‘एतयाऽन्नाद्यकामं याजयेत् ’ इति । वि. २।३।१३. * फलस्य उद्देश्यतायाः स्वर्गकामाधिकरणसूत्रोक्तत्वात् भेदहेतुत्वं संभवति । सु. पृ. ९५८. * फलस्य कृत्स्नस्य भोक्तृत्वं सत्रे सर्वेषाम् । ६।२।१।१—२. * फलस्य पुरुषार्थत्वं कामपदोपादानादेव गम्यते । वा. ३।१।३।५. * फलस्य पुरुषार्थत्वव्यवहारो भाक्त इत्युक्तम् (३।१।३) । तदुद्देशेन विधीयमानयागादिस्तु भवति पुरुषार्थः । भाट्ट. ४।१।२. * फलस्य प्रकृतिगतस्य विकृतौ नातिदेशः । वि. ८।१।१३. * फलस्य प्रयोजनाकाररूपेण उद्देश्यत्वात् न विधेयत्वोपपत्तिः । सु. पृ. ९५८. * फलस्य यागं प्रति प्राधान्यात् तत्साधनं पुरुषमपि प्रति प्राधान्यम्, पुरुषं प्रति गुणत्वात् तदनुष्ठेये यागेऽपि गुणत्वम् । वा. ३।१।३।६. * फलस्य वृष्टिरूपस्य कामना यजमानस्यैव, ज्योतिष्टोमे सदोमाने । वि. ३।८।६. * विधित एव सर्वत्र फलस्य कर्तृगामित्वसिद्धिः । सोम. ६।२।२. * फलानां ऐहिकामुष्मिकोभयार्थता । बिन्दु. ४।३।१०. * फले एकस्मिन् चोदितानां तन्त्रेण इतिकर्तव्यता भविष्यति । टुप्. ११।४।५।१७. * फले पुरुषः सौन्दर्यं जानन् स्वयं रागादेव प्रवर्तते इति व्यर्थस्तत्र विधिः, यथा स्वर्गे । वि. ४।१।२ वर्णकं २. * फले यश्चोद्यते स इतिकर्तव्यतया संबध्यमान इतिकर्तव्यतां प्रति प्रधानम् । टुप्. ७।१।१।२. * फले हि निसर्गसुन्दरे स्वयमेव लिप्सा भवति । तत्साधने तु दुःखाकरे स्वतस्तावत् द्वेष एव, अवश्यं च साधने प्रवर्तमानस्य तत्रैव रुच्या भवितव्यम् । शा. १।२।१ पृ. ७. * फले हि स्वतः प्रवृत्तिः । फलार्थितया च प्रधाने । प्रधानोपकारकतया चाङ्गेषु । ऋजु. पृ. ३१.

* फलापूर्वं येन साक्षात् स्वर्गादिफलं जन्यते तत् । वि. २।१।२.

* फलार्थं वर्जनीयस्यानुष्ठानं न दोषापादकम् । सु. पृ. १६६.

* फलार्थता पुरुषप्रयत्नस्य स्वभावतः । भा. ६।१।१।१.

* फलार्थत्वात् अत्यग्निष्टोमादिसंस्थानां क्रतुभावनान्तर्भावो नास्ति, अग्निष्टोमसंस्था तु क्रतुभावनान्तर्गता । शा. ५।३।१३.

फलार्थत्वात् कर्मणः शास्त्रं सर्वाधिकारं स्यात् । ६।१।२।४॥

‘ दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत ’ इत्यादि शास्त्रं सर्वाधिकारं सर्वस्य प्राणिजातस्य अधिकारो यस्मिन्, तादृशं स्यात् । प्राणिमात्रस्य सुखकामुकत्वात् कर्मणश्च सुखरूपफलार्थत्वात् । योयः फलं कामयते तस्य सर्वस्य फलसाधनकर्मविधायके शास्त्रे अधिकारः स्यात् । तिरश्चां वनस्पतीनां देवानामृषीणां मनुष्याणामिति च । इति

पूर्वपक्षः । फलार्थित्वात् इति पाठे तु कर्मणः विधायकं शास्त्रं सर्वाधिकारं स्यात् सर्वस्य प्राणिमात्रस्य फलार्थित्वात् फलकामुकत्वात् इति सूत्रार्थः ।

कर्तुर्वा श्रुतिसंयोगात् विधिः कार्त्स्न्येन गम्यते । ५॥

पूर्वपक्षं सूत्रेण प्राप्तं वाशब्देन प्रत्याख्याय सिद्धान्तमाह । कार्त्स्न्येन कर्तुः साङ्गप्रधानानुष्ठानसमर्थस्य एव विधिः कर्मविधानं गम्यते । श्रुतिसंयोगात् उक्तेऽर्थे विधितात्पर्यात् । अथवा श्रुतिशब्दः कर्मणि क्तिन्नन्तः । तथा च श्रुतेन फलेन साङ्गस्य प्रधानस्यैव संयोगात् साधनत्वेन संबन्धात् । तस्मात् साङ्गप्रधानानुष्ठानसमर्थस्य कर्तुरेव शास्त्रे अधिकारः । न तिरश्चाम्, न वनस्पतीनाम्, न मनुष्याणामपि अन्धपङ्ग्वादीनाम् । के.

* फलार्थ-स्वतन्त्रार्थवादकल्प्यो विधिर्यथा—‘ यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति ’ इति । अत्र ‘ पर्णेन जुहूं कुर्यात् ’ इति विधिः कल्प्यः बाल. पृ. १२.

* फलावगम्या शब्दशक्तिः । वा. ३।४।४।१३ पृ. ९१४.

* फलादेः संनिधौ कर्मभेदकत्वाभावः (देशकालनिमित्तफलसंस्काराणाम्) । भा. २।३।१३।२६. * फलादीनां अनतिदेशः । ८।१।१३।२०—२२.

* फलादिसंबन्धेन समुदायत्वापादनं भवति, यथा राजसूयेन स्वाराज्यकामः । वा. २।२।१।१ पृ. ४६३.

* फलेच्छायां वीतायां अवाप्ते वा फले समाप्तिनियमो दृश्यते वृष्टिकामेष्ट्याम्, ‘ यदि वर्षेत् तावत्येव जुहुयात्, यदि न वर्षेत् श्वोभूते जुहुयात् ’ इति । भा. ४।३।९।२१.

* फलोत्पत्तिः निर्व्यापारात् जातिविशेषात् नावकल्पते । वा. ३।६।१।१.

* फलोत्सर्गन्यायात् (सर्वं फलं यजमानस्य इति) कर्त्रुत्सर्गन्यायो दुर्बलः प्रधानवाक्यगतात्मनेपदश्रुतेः । परिमल. ३।४।१३।४४ ब्रसू.

* फलोद्देशपूर्वकस्य अनुष्ठानस्य कादाचित्कत्वेऽपि तन्निरपेक्षानुष्ठानस्य नित्यता उपपन्ना । सु. पृ. ८७३.

* फलोपहितं कारणत्वं सहकार्यन्तरसाहित्यम् । मणि. पृ. ४५.

* फलैक्यं सौभरनिधनयोः (सौभरं साम) । अत्र निधनविशेषनियमविधिः । २।२।१३।२८—२९.

* फलकल्पना विश्वजिति अन्यथानुपपत्त्या । टुप्. ७।१।१।२. * फलकल्पनायाः प्रकरणसंबन्धकल्पना ज्यायसी । वा. ३।३।९।१८. * गुणे फलकल्पनायां यजतेर्न विवक्षा । भा. १।४।२।३.

* फलकामनातः विशेषग्रहणं काम्याग्निहोत्रेण नित्याग्निहोत्रस्य प्रसङ्गे । बाल. पृ. १४७.

* कर्मगोचरे अल्पस्य कर्मणः परिमाणसामान्येन फलगोचरे अल्पमेवोपतिष्ठते, मध्यमस्य मध्यमम्, महतो महत् इति स्थानमेव विनियोजकम् । वा.

* फलचमसः अनित्यः, ब्राह्मणपक्षे विधानाभावात् (राजन्यवैश्ययोरेव विधानात्) । वा. ३।६।१३।३६. * फलचमसः इज्याविकारः, न भक्षविकारः । भक्षस्तु फलचमसस्य अर्थादेव स्यात् । भा. ३।५।१९।४७—५१.

फलचमसो नैमित्तिको भक्षविकारः श्रुतिसंयोगात् । ३।५।१८।४७॥

ज्योतिष्टोमे श्रूयते ‘ यदि राजन्यं वैश्यं वा याजयेत् स यदि सोमं बिभक्षयिषेत् न्यग्रोधस्तिमिनीराहृत्य ताः संपिष्य दधन्युन्मृज्य तमस्मै भक्षं प्रयच्छेन्न सोमम् ’ इति । तत्र संदेहः किं फलचमसः सोमभक्षविकारः उत इज्याविकारः इति । प्रसक्तसोमभक्षणानुप्रसङ्गेन इदानीं फलचमसोऽपि भक्षणसंबन्धेन श्रूयमाणो विचार्यते ।

पूर्वपक्षस्तु, सोमस्य तावत् उभयसंबन्धः प्रतीयते यागसंबन्धो भक्षणसंबन्धश्च । तत्र तावद्यागसंबद्धस्य न सोमस्यायं फलचमसो विकारः, यागसंबन्धित्वेन अस्याश्रवणात् । किं तर्हि ? यदि सोमं बिभक्षयिषेत् ततः फलचमसमस्मै भक्षं प्रयच्छेदिति श्रुतेर्भक्षणसंबन्धिसोमविकार एव । तथाहि, पशौ श्रूयते ‘ त्र्यङ्गैः स्विष्टकृतं यजति ’ इति । हृदयाद्येकादशभिरङ्गैः प्रधानभूतः पशुयागो निर्वर्तितः । प्रकृतौ च सांनाय्ययागशेषस्यैव

स्विष्टकृतः प्रतिपादितत्वात् अत्राप्येकादशानां अवयवानां मध्ये यैः कैश्चित्त्रिभिरङ्गैरिष्टशेषैः स्विष्टकृद्यागः कर्तव्य इति पूर्वपक्षयित्वा, यागसंबन्धापेक्षस्य त्रित्वस्य अङ्गैः सह समासासंभवादेकादशसु मध्ये त्रयाणां अवान्तरसामान्यमङ्गानां निर्धारयितुमशक्तेर्न यागशेषाणामुपादानम् । किं तर्हि ? ' दोष्णो दक्षिणस्य पूर्वार्धादग्नये समवद्यति, गुदस्य मध्यतः, श्रोण्या जघनतः ' इत्येकेनाप्युद्देशेन संबन्धात् त्रीण्यवधारितानि । तैरेव विशेषैः स्विष्टकृद्यागः कर्तव्य इति सिद्धान्तितम् । तेन यथा शरैर्बर्हिषां विकारः, तथा इहापि इज्याशेषाणामनिज्याशेषैः विकार इति । तदुक्तं सूत्रकृता ' त्र्यङ्गैर्वा शरवद्विकारः स्यात् ' (१०।७।३।११) इति । अतोऽत्राप्यनिज्याशेषेण फलचमसेनेज्याशेषस्य सोमस्य विकारो न विरोत्स्यते । एवं च सति उत्पत्तिशिष्टः सोमः प्रधानकर्मणि यागे बाधितो न भविष्यति । ' न सोमम् ' इति अर्थप्राप्तभक्षणगतसोमनिवृत्त्यनुवादेनैव बाधात् अत्राप्युपपत्स्यते इति ।

ये त्वारादुपकारकं फलचमससाधनं भक्षणं विधीयत इति पूर्वपक्षयन्ति, तैश्च पूर्वपक्षवार्तिकाक्षराणि अनाकलितानि । न चायं पक्षो युक्त्याऽपि संगच्छते, अनेकदोषदुष्टत्वात् । तथाहि, फलचमसान्तं भक्षं प्रयच्छेदिति विनियोगभङ्गि (?) न भक्षणं कुर्यादिति । तथा सोमभक्षणस्य फलचमसेनातुल्यकार्यत्वेन अनिवर्तितत्वान्न सोममिति नायमर्थप्राप्तानुवादः, निषेधपरत्वे च वाक्यभेदः । विहितसोमभक्षणप्रतिषेधाद्वा अष्टदोषदुष्टविकल्पापत्तिः । तथा अदृष्टकल्पनादयश्च दोषा अप्यभिहिताः । सिद्धान्तसमये पक्षविकल्पमात्रेण यच्चिन्तितं तदेवात्र तैः पूर्वपक्षीकृतं इत्युपेक्षणीयमेवेति । तस्मात् भक्षश्रुतिसंयोगात् राजन्यवैश्यनिमित्तकः फलचमसो भक्षविकार इति । **एवं प्राप्ते, अभिधीयते ।**

इज्याविकारो वा संस्कारस्य तदर्थत्वात् । ४८ ॥

अयमभिप्रायः । भवेदेवं यदि पूर्वपक्षे फलचमसः प्रतिपत्तिसंबन्धार्हो भवेत् । द्विविधं हि द्रव्यमाकीर्णकरमिति प्रतिपत्तिमपेक्षते, कृतप्रयोजनत्वात् यथा सोमरसः पुरोडाशो वा, प्रयोजनार्थोपादाननान्तरीयकोपादानत्वात् यथा 'त्र्यङ्गैः स्विष्टकृतं यजति' इत्यादिषु त्र्यङ्गादि । न च पूर्वपक्षे फलचमसः कृतप्रयोजनः । नापि प्रयोजनार्थोपादाननान्तरीयकोपादान इति प्रतिपत्त्यपेक्षाभावान्न प्रतिपत्तिसंबन्धो घटते । त्र्यङ्गस्य तु पशुयागार्थोपात्तपशुनान्तरीयकोपादानस्य आकीर्णकरत्वेन प्रतिपत्त्यपेक्षायां वचनाभावे पुरुषेच्छाधीना या काचित् प्रतिपत्तिर्भवेत् । वचनसद्भावे तु यथावचनमेव प्रतिपत्तिर्भवति । तेन यागीयद्रव्यसंस्कारभक्षणसंबन्धान्यथानुपपत्त्या फलचमसस्य सोमवत् अवश्यं यागसाधनत्वं कल्पनीयम् । तत्रापि ' स यदि सोमं बिभक्षयिषेत् ' इति यजमानसंबन्धिभक्षणकीर्तनात् यावत् त्र्यङ्गेऽनुपयुज्यमानो यजमानभक्षणसंस्कारः प्रतिपद्येत, तावतैव यज्ञभागेनार्थापत्त्या संबन्ध इति यजमानचमस एव सोमं विकरोति, न ग्रहचमसान्तरेष्विति स्थितम् । नैमित्तिकत्वादुत्पत्तिशिष्टसोमबाधोऽपि न दोषः । एवं च सति क्रयाभिषवादिसंस्कृतेनैव यष्टव्यमित्यन्यत्र पादे प्रतिपादनीयम् । एवं ' यदि सोमं न विन्देत् पूतीकानभिषुणुयात् ' इत्यत्रापि सोमाभावे सोमसंबन्धिनोऽभिषवरूपसंस्कारस्य पूतीकेषु दर्शनात् पूतीकानां यागसाधनत्वमेतेनैव न्यायेनावगन्तव्यम् ।

प्रयोजनम्— पूर्वपक्षे यजमानस्य चमसेऽपि सोमेनैव यष्टव्यम् । भक्षणमात्रं तु फलचमसस्य । सिद्धान्ते तु फलचमसेनैव यष्टव्यम् । **सूत्रं तु** इज्यायां फलचमसेन सोमस्य विकारेण भक्षणमात्रं संस्कारस्य भक्षणरूपस्य तदर्थत्वात् यागसाधनद्रव्यार्थत्वात् इति । **तौता.**

फलचमसो नैमित्तिको भक्षविकारः श्रुतिसंयोगात् । ३।५।१९।४७ ॥

ज्योतिष्टोमे श्रूयते ' स (अध्वर्युः) यदि राजन्यं वैश्यं वा याजयेत्, स (राजन्यो वैश्यो वा) यदि सोमं बिभक्षयिषेत् न्यग्रोधस्तिमीराहृत्य ताः संपिष्य दधन्युन्मृज्य तमस्मै भक्षं प्रयच्छेत् न सोमम् ' इति । बिभक्षयिषेत् भक्षयितुमिच्छेत् । न्यग्रोधानां स्तिभीः अङ्कुरान् (न्यग्रोधफलानि वा) । अनेन वाक्येन राजन्यस्य वैश्यस्य वा फलचमस उक्तः । (फलचमसपदार्थः तत्प्रयोगश्च ' फलचमसः, स्वरूपं प्रयोगश्च ' इति

बिन्दौ द्रष्टव्यः ।) स किं भक्षविकारः उत इज्याविकारः, किं फलचमसं भक्षयेदित्यर्थः उत फलचमसेन यजेत इत्यर्थः इति संदेहे पूर्वपक्षमाह सूत्रम् । नैमित्तिकः राजन्येन वैश्येन वा निमित्तेन निर्वृत्तः फलचमसः भक्षस्यैव विकारः स्यात् नेज्यायाः । बिभक्षयिषेत् इति भक्षश्रुतिसंयोगात्, ' तमस्मै भक्षं प्रयच्छेत् ' इति च भक्षपदश्रुतिसंयोगात् ।

इज्याविकारो वा संस्कारस्य तदर्थत्वात् । ४८ ॥

सिद्धान्तप्रतिपादनार्थं सूत्रम् । वाशब्दः भक्षविकारत्वनिवृत्त्यर्थः । फलचमसः प्लाक्ष– आश्वत्थ– औदुम्बरफलैरभिपुतैः युक्तः चमसः इज्याविकार एव । यागार्थः सः, न केवलं भक्षार्थः । संस्कारस्य क्रयाभिषवादिसंस्कारस्य तदर्थत्वात् यागार्थत्वात् । सोमचमसेषु तथा दर्शनात् । तस्मात् यागार्थः फलचमसः ।

होमात् । ४९ ॥

ज्योतिष्टोमे राजन्यस्य वैश्यस्य वा यजमानस्य सतः यजमानचमसः न्यग्रोधफलचमसो भवति न सोमचमसः । स चायं फलचमसो यागार्थ एव विधीयते, भक्षस्तु शेषस्य वाक्यान्तरेण प्राप्तः स्यात् इति सिद्धान्ते हेत्वन्तरं वक्तुं सूत्रमिदम् । ' यदा अन्यांश्चमसान् जुह्वति, अथैतस्य दर्भतरुणकेन उपहत्य जुहोति ' इति होमात् होमस्य उक्तत्वात् यागविकार एव फलचमसः ।

चमसैश्च तुल्यकालत्वात् । ५० ॥

सिद्धान्ते हेत्वन्तरं वक्तुं सूत्रमिदम् । ' यदा अन्यांश्चमसान् उन्नयन्ति अथैनं चमसमुन्नयति ' इति वचनेन इतरैः सोमचमसैः तुल्यकालत्वं फलचमसस्योक्तम् । यदा सोमचमसानां उन्नयनं क्रियते तदैव फलचमसस्यापि उन्नयनमुक्तम् । उन्नयनं नाम अन्यपात्रस्थितात् सोमरसस्य पिष्टानां दधिमिश्रितानां न्यग्रोधफलानां च चमसे होमार्थं ग्रहणम् । ततश्च यागार्थ एव फलचमसः । तुल्यः कालो यस्य स तुल्यकालः फलचमसः । तस्य भावः, तस्मात् ।

लिङ्गदर्शनाच्च । ५१ ॥

सिद्धान्ते हेत्वन्तरं वक्तुं सूत्रमिदम् । ' तमस्मै भक्षं प्रयच्छेत् न सोमम् ' इति वाक्ये यागार्थस्य सतः सोमस्य ऋत्विजामिव राजन्यवैश्ययजमानस्यापि प्राप्तस्य भक्षस्य यः सिद्धो निषेधः तस्यानुवादः कृतो दृश्यते । तदिदं यागार्थत्वसाधकस्य लिङ्गस्य दर्शनम् । अस्मात् लिङ्गदर्शनाच्च सोमस्येव फलचमसस्यापि यागार्थत्वं सिध्यति । तस्मात् इज्याविकारः फलचमसो न भक्षविकारः । **के.**

* फलचमसः राजन्यस्य वैश्यस्य च ज्योतिष्टोमे, न सोमचमसः । ' स यदि राजन्यं वा वैश्यं वा याजयेत् स यदि सोमं बिभक्षयिषेत्, न्यग्रोधस्तिमीराहृत्य ताः संपिष्य दधनि उन्मृज्य तमस्मै भक्षं प्रयच्छेन्न सोमम् ' इति । फलचमसः सोमचमसस्य विकारः । **भा. ३।६।१३।३६.** * फलचमसः, स्वरूपं प्रयोगश्च । **ऐतरेय ब्राह्मणे** —— औदुम्बराणि आश्वत्थानि प्लाक्षाणि च फलानि ' एतानि अस्य (क्षत्रियादेरर्थे) पुरस्तात् (सोमक्रयात् प्रागेव) उपक्लृप्तानि भवन्ति, अथ सोमं राजानं क्रीणन्ति, ते (ऋत्विजः) राज्ञ एव आवृता (सोमस्य एव पद्धत्या) औपवसथात् (दिनात् पूर्वं) प्रतिवेशैश्चरन्ति (पूजां नैवेद्यसमर्पणं च कुर्वन्ति) ' । ३५।६।१–४ । ' तद्यत्र एतान् (सोमस्य) चमसान् उन्नयेयुः तदेतं यजमानचमसं उन्नयेत्, तस्मिन् (फलचमसे) द्वे दर्भतरुणके (द्वौ दृढौ दर्भौ) प्रास्ते स्याताम् (एकं प्रास्य ततो द्वितीयं इति रीत्या) तयोः (मध्ये) वषट्कृते अन्तःपरिधि पूर्वं (प्रास्तं दर्भं) (प्रास्येत् ' दधिक्राव्णो अकारिषं ' इत्येतया ऋचा सस्वाहाकारया, अनुवषट्कृते अपरं (चमसे पश्चात् प्रास्तं दर्भं) ' आ दधिक्राः शवसा पञ्च कृष्टीः ' इति । ३५।७।१। ' तद्यत्रैतान् चमसान् (सोमचमसान् भक्षार्थं) आहरेयुः, तदेतं यजमानचमसमाहरेत्, तान् यत्र उद्गृह्णीयुः तदेनं उपोद्गृह्णीयात् । तद्यदा इळां होता उपह्वयेत यदा चमसं भक्षयेत् (होता सोमचमसं,) अथ एनं (फलचमसं यजमानः) एतया भक्षयेत् ' ' यदत्र शिष्टं रसिनः सुतस्य यदिन्द्रो अपिबच्छचीभिः । इदं तदस्य मनसा शिवेन सोमं राजानमिह भक्षयामि ' इति । ३५।७।२–३ । ' शं न एधि हृदे पीतः प्र ण आयुर्जीवसे सोम तारीः ' इति आत्मनः प्रत्यभिमर्शः । ५ । ' आप्यायस्व समेतु ते, सं ते पयांसि समु यन्तु वाजाः '

इति (द्वाभ्यां) चमसमाप्याययति अभिरूपाभ्याम् ’ । ७ । ‘ तद्यत्र एतान् चमसान् सादयेयुः, तदेतं यजमानचमसं सादयेत् , तान् यत्र प्रकम्पयेयुः तदेनमनु प्रकम्पयेत् , अथैनमाहृतं भक्षयेत् ‘ नराशंसपीतस्य देव सोम ते मतिविद ऊमैः पितृभिर्भक्षितस्य भक्षयामि ’ इति प्रातः-सवने नाराशंसो भक्षः, ‘ऊर्वैः’ इति माध्यंदिने, ‘काव्यैः’ इति तृतीयसवने ’ (ऊहः कर्तव्यः) । ३५।८।१ । ‘ समान आत्मनः प्रत्यभिमर्शः, समानमाप्यायनं चमसस्य ’ । ९ । इति । अथ **सत्याषाढस्तु** आह– ‘ न वैश्यराजन्ययोः सोमभक्षणं विद्यते ८।७।४२ । यदि अब्राह्मणः सोमं पिपासेत् न्यग्रोधस्तिमिनीराहृत्य ताः संपिष्य दधनि उन्मृज्य यदन्यांश्चमसानुन्नयति अथैतं यजमानचमसं अत उन्नयति । यदन्यांश्चमसान् जुह्वति अथैतस्य दर्भतरुणेन उपहत्य अन्तःपरिधि आहवनीयादङ्गारं निर्वर्त्य ‘ अहं त्वदस्मि ’ इति जुहोति । यदन्यांश्चमसान् भक्षयन्ति अथैतस्य चमसस्य यजमानो भक्षयति ’ ८।७।४३ । इति । ❋ फलस्य न्यग्रोधमुकुलरूपस्य पिष्टं चम्यते भक्ष्यते यत्र स **फलचमसः** । **वि.** ३।६।१३. ❋ **फलचमसेन** सोमस्य अगत्या बाधः । **सु. पृ.** ८८३. ❋ **फलचमसस्य** सोमधर्माः स्युः, सोमविकारत्वात् । ३।६।१३।३६. ❋ फलचमसस्य स्थानापत्त्या सोमधर्मलाभः । वक्ष्यति हि ‘ नैमित्तिकमतुल्यत्वादसमानविधानं स्यात् ’ (३।६।१३।३७) ‘ धर्मस्यार्थकृतत्वात् ’ (९।२।१२। ४०) इति च । **वा.** ३।५।२०।५३. ❋ फलचमसस्य होमः दर्भतरुणकेन क्रियते ‘ दर्भतरुणकेनोपहत्य जुहोति ’ इति । **वि.** ३।५।१९. ❋ **फलचमसे** ऊहोऽपि कर्तव्य इत्युक्तं भवति । ‘ इन्द्राय त्वा वसुमते सोमं गृह्णामि ’ इति सोमपदस्थाने फलचमसपदप्रक्षेपः कर्तव्यो भवति । **वा.** ३।६।१३।३६ टिप्पणी च. ❋ फलचमसे गुणकामानां अप्रवृत्तिः । **भा.** ३।६।१३।३६.

❊ फलचमसाधिकरणम् ॥

फलचमसो नैमित्तिको भक्षविकारः, श्रुतिसंयोगात् । ३।५।१९।४७॥

भाष्यम्– ज्योतिष्टोमे श्रूयते ‘ स यदि राजन्यं वैश्यं वा याजयेत् , स यदि सोमं बिभक्षयिषेत् , न्यग्रोधस्तिमीराहृत्य ताः संपिष्य दधन्युन्मृज्य तमस्मै भक्षं प्रयच्छेन्न सोमम् ’ इति । तत्र संदेहः किं फलचमसो भक्षविकारः, उत इज्याविकार इति । किं फलचमसं भक्षयेदित्यर्थः, उत फलचमसेन यजेतेति । किं प्राप्तम् ? फलचमसो नैमित्तिको भक्षविकारः । भक्षणेन हि श्रुतेनैकवाक्यता भवतीति । तमस्मै भक्षं प्रयच्छेदिति, न तेन यजेतेति-शब्दोऽस्ति । तस्माद्भक्षविकारः ।

वा— योऽयं ज्योतिष्टोमे राजन्येन वैश्येन च निमित्तेन नैमित्तिकः फलचमसः श्रूयते, न्यग्रोधस्तिभीः न्यग्रोधाङ्कुरान् न्यग्रोधफलानि वा, ताः संपिष्य दधनि उन्मृज्य तमस्मै भक्षं प्रयच्छेत् , इति । स किं भक्षविकारः , उतेज्याविकार इति संदेहे, बिभक्षयिषेदिति श्रुतिसंयोगात् तमिति प्रकृतग्राहिश्रुतिसंयोगात् पुनरपि भक्षश्रुतिसंयोगात् , आनन्तर्यश्रुतेः समानवाक्योपादानाच्च भक्षो भूत्वा तत्समानस्थानं भक्षगतमेव सोमं विकुर्यान्न यागगतम् । नह्यन्यत्र श्रुतं अन्यविषयस्य बाधने समर्थम् । यागसंबन्धश्चास्य प्रकरणाद्विज्ञायते । तच्च दुर्बलम् । एवं च उत्पत्तिवाक्यशिष्टः सोमो यागादर्थकर्मणो न निवर्तिष्यते । प्रतिपत्तिबाधे तु विनाऽपि तावत् श्रुत्या मन्दोऽपराधः किमुत श्रुतावेव सत्याम् । तस्मात् भक्षविकारः ।

इज्याविकारो वा, संस्कारस्य तदर्थत्वात् । ४८॥

भाष्यम्— इज्याविकारो वा फलचमसः । फलचमसेन यजेतेत्यर्थः । कथम् ? यदेतद्भक्षणम्, एतत् सोमसंस्कारार्थम् । फलचमसस्यापि यदि भक्षणं फलचमससंस्कारार्थम् , फलचमसस्य अन्यत्रानुपयोगात् अनर्थकम् । अथ भक्षणं प्रधानं तथा ‘ न सोमम् ’ इत्यनुवादो नावकल्पते । यदि तु इज्याविकारो भवेत् ततः फलचमससंस्कारोऽवकल्पते । तस्मादिज्याविकारः । आह । कथं यजिसंबन्धे असति, इज्याविकारो भविष्यतीति । उच्यते । अस्ति यजिसंबन्धः । कथमिति ? ‘ यदि राजन्यं वैश्यं वा याजयेत् , न्यग्रोधस्तिभीः संपिष्य तमस्मै भक्षं प्रयच्छेत् ’ याजयितुमिति गम्यते । भक्षसंबन्धे हि न पूर्वमुत्तरेण संबध्यते । यदि सोमं भक्षणेन संस्कर्तुमिच्छेत् , न्यग्रोधस्तिभीः संस्कुर्यादिति । तस्मान्न

भक्षणसंबन्धः । यागो हि प्रकृतोऽस्ति, तेन सह संभन्त्स्यते, न दोषो भविष्यति । ननु ‘ तमस्मै भक्षं प्रयच्छेत् ’ इति वचनात् भक्षसाधनमिति गम्यते, न यागसाधनमिति, भक्षशब्दानन्तर्यात् । उच्यते । श्रूयमाणे संबन्धे अनर्थकमिति कृत्वा प्रकृतसंबन्धः इत्युच्यते । कथं तु भक्षसंबन्धः इति । यद्धि यागद्रव्यम् , भक्षयितव्यं तच्चोदकेन भवति, तस्मात् भक्षसंबन्धं लभते, भक्षसंबन्धेन च यागसंबन्धः एव लक्ष्यते । यदि तेन इज्यते ततः स भक्षो भवति । तस्मात् भक्षवचनात् सुतरां तेनेज्यते इति गम्यते । सैषा व्यवधारणकल्पना । तमस्मै भक्षं प्रयच्छेत् तमस्मै भक्षं कुर्यादित्यर्थः । यथा स भक्षो भवति, तथा कुर्यादिति । यदि च तेन इज्यते, ततोऽयं भक्षो भवति । तस्मात्तेन यष्टव्यमिति ।

वा— लिङ्गदर्शनेन तावत् भाष्यकार उपक्रमते । सति हि इज्याविकारत्वे सौमिकभक्षसंबन्धोऽस्य लभ्यते । ततश्च तत्स्थानापत्त्या निराकृतत्वात् । ‘ न गिरा गिरेति ब्रूयात् ’ इतिवत् ‘ न सोमम् ’ इत्यनुवादः सेत्स्यति । लिङ्गं तु एतत् नासत्यां यागसंबन्धप्राप्तौ साधकमिति मन्यमान आह ‘ कथमसति यजिसंबन्धे ’ तद्विकारत्वमिति । इतरस्तु दर्शयति, ‘ स यदि राजन्यं वैश्यं वा याजयेत् , न्यग्रोधस्तिभीराहृत्य, ताः संपिष्य, दधन्युन्मृज्य, ताभिर्याजयेत् ’ इति संबध्यते । नह्यवश्यं परत्रैव श्रुतेन आख्यातेन सह संबन्धो भवति । न च पाठापेक्षया पूर्वकालत्वं क्त्वाशब्देनोच्यते । भवति हि गच्छति भुक्त्वेत्यपि गमनमपेक्ष्य भोजनस्य पूर्वकालत्वम् । अतो वाक्येनैव यजिसंबन्धः । सत्यपि याजयतिसंबन्धे यजिसंबन्धः एवायं द्रष्टव्यः ‘ ग्रामकामं याजयेत् ’ इतिवत् । अङ्गकर्तुः प्राप्तत्वादेव निष्फलत्वेन चानुपदेश्यत्वात् । एवं च सति ‘ तमस्मै भक्षम् ’ इति ‘ न सोमम् ’ इति च उभयमपि प्राप्तमनुवदिष्यते ।

न त्वेषा योजनाऽवकल्पते । कथम् ? ‘ व्यवधानात् तमित्यस्य बाधादविधिशक्तितः । निमित्तत्वोपयुक्तस्य पुनश्च विधिकल्पना ॥ तृतीयार्थश्च कल्प्यः स्याद् द्वितीयार्थस्य बाधनम् । समस्तसोमबाधश्च यजिनिष्कर्षकल्पना ॥ ’ ‘ स यदि सोमं बिभक्षयिषेत् ’ इत्येतद्व्यवधाने सति याजयतिसंबन्धः कल्पयितव्यः, ‘ तमस्मै ’ इति च सर्वनाम्नः श्रुत्यैव प्रकृतग्रहणसामर्थ्यमानन्तर्यं च बाध्येयाताम् । ‘ स यदि राजन्यं वैश्यं वा याजयेत् ’ इत्यस्य यदिशब्दसंबन्धात् उपहतविधिशक्तिर्न फलचमससंयोगं विधत्ते । निमित्तत्वेन चोपयोगे सति निराकाङ्क्षीभूतस्य सतः पुनरत्यन्तविपरीतं विधित्वं कल्पनीयम् । ताभिर्याजयेदिति च । अत्यन्ताश्रुततृतीयार्थः कल्प्येत । तमस्मै इति च प्राधान्येन निर्देशः अवगम्यमानः अपह्नूयेत । प्रयच्छेदिति च अनन्यपरे विस्पष्टे विधौ सति नानुवादत्वाङ्गीकरणं युक्तम् । न च याजयतिशब्दात् उपसर्जनीभूतं यजिं निष्कृष्य फलचमससंबन्धो युक्तः । सर्वेण च ज्योतिष्टोमेन संबन्धात् समस्तं सोमं बाधित्वा तेनैव यागः क्रियेत, सर्वं विरुद्धं चैतत् । भाष्यकारोऽपि ‘ याजयितुमिति गम्यते ’ इत्याह, न याजयेदित्यनेन संबन्धम् । सूत्रकारोऽपि च ‘ संस्कारस्य तदर्थत्वात् ’ इति हेतुमाह, न याजयतिसंबन्धादिति । तस्मादयुक्तमेतत् ।

अन्ये तु— यागो हि प्रकृतोऽस्ति, इत्यतः वचनात् यागसंबन्धानवक्लृप्तिं मन्यमानाः ‘ तमस्मै प्रयच्छेत् ’, किमर्थम् ? प्रकरणात् ‘याजयितुम्’ इति गम्यते — इति वर्णयन्ति । तेषामपि तु समस्तसोमविकारत्वं तच्छब्दोपनीतस्ववाक्यावगतभक्षसंबन्धबाधः, ‘ तं ’ इति च पुंलिङ्गनिर्देशो न घटते । भक्ष्यव्यवहितेन च ‘ प्रयच्छेत् ’ इति आख्यातेन संबन्धः । तस्मात् भक्षसंबन्धापरित्यागेनैव सिद्धान्तोऽपि व्याख्येयः । कथम् ? ‘ **अपूर्वो वैष चोद्येत भक्षः प्रकृत एव वा । संस्कारोऽर्थक्रिया** (आरादुपकारिका) **न स्यात् संस्कारो यागसाधनम् ॥** ’ यदि तावत् अपूर्व एव भक्षः चोद्यते, ततोऽपि आरादुपकारकत्वं न भवति, अदृष्टकल्पनात् प्रकरणविनियोगविप्रकर्षात् असंबद्धोपकारित्वाच्च । तथा ‘ तं प्रयच्छेत् ’ इति द्वितीयया विस्पष्टं संस्कार्यत्वं गम्यते । अन्यथा हि तेनेति प्राप्नोति । तस्मात् संस्कारः । संस्कारस्य चैष स्वभावो यदुपयुक्तं उपयोक्ष्यमाणं वा द्रव्यमवलम्बते । तत्रापि भक्षितस्य पुनरुपयोगासंभवात् उपयुक्तसंस्कारत्वमेव ज्ञायते ।

तेन फलचमसः संस्कारभूतं भक्षमुपसर्पन्नेव शक्यो नियोक्तुम्, ' यदि क्वचिदुपयोगं गच्छसि, ततो भक्षणेन संस्क्रियसे नान्यथा ' इति । स चोपयुज्यमानत्वं प्रार्थयमानः प्रकरणात् यागोपयोगित्वं प्रतिपद्यते । तत्रापि यावति अनुपयुज्यमानो यजमानभक्षसंस्कारार्थत्वं न प्रतिपद्यते, तावतैव यज्ञभागेन अर्थापत्त्या संबध्यते इत्यवधारणात् यजमानचमसाभ्यासेनैव एकेन संबध्यते । नहि ग्रहचमसान्तरेषु अनुपयुज्यमानस्यास्य यजमानभक्षत्वं अनुपपन्नम् । अतः सोमोऽपि अनुग्रहीष्यते । **यद्वा** ज्योतिष्टोमप्रकरणेन संबद्धोऽयं भक्षशब्दः उच्चार्यमाणः प्रकृतं सोमभक्षमेव अवलम्बते । स च यागोपयुक्तद्रव्यशेषसंस्कारत्वेन प्रज्ञातः इति फलचमसमपि तादृशमेव संस्कर्तुं शक्नोति । न तु असौ इदानीं अन्यप्रयोजनः शक्यः कल्पयितुम् । न च तस्य कर्मान्तरत्वे किञ्चित् शब्दान्तरादिकारणमस्ति । **अपि च** ' स यदि सोमं विभक्षयिषेत् ' इति स्ववाक्योपात्तेनैव सोमभक्षणेन संबन्धो विज्ञायते । अन्यथा हि तदुपादानं व्यर्थमेव स्यात् । न च ' न सोमम् ' इत्यनुवादः अवकल्पते । यदि भक्षान्तरमेवेदं आरात् उपकारकं चोद्येत, ततः समानकार्यत्वाभावात् नैव सोमं निवर्तयेत् । अनिवर्तिते च तस्मिन् न प्रतिषेधानुवादः स्यात् । न च विधिर्युक्तः, वाक्यभेद-अनेकादृष्टकल्पनाप्रसङ्गात् । असंबद्धं च वाक्यं भवेत् । यदि सोमं भक्षणेन संस्कर्तुमिच्छेत्, ततः फलचमसभक्षणं आरादुपकारकं कुर्यात्, फलचमसं वा संस्कुर्यात् इति । यदा तु अयमर्थो गृह्यते ' येन भक्षणेन यथाभूतं सोमं संस्कर्तुमिच्छेत्, तेन तथाभूतमेव फलचमसं संस्कुर्यात् ' इति, **तदा** अर्थापत्त्या यजमानचमसयागाभ्यां असंबन्धः कृतो भवति । तस्मात् इज्यायामयं सोमविकारः इति सिद्धम् ।

' सैषा व्यवधारणकल्पना ' इति (भाष्यम्) । यथैव अश्वप्रतिग्रहेष्ट्यां ' यावतोऽश्वान् प्रतिगृह्णीयात् ' इति श्रुते प्रतिग्राहयेत् इति व्यवधार्य कल्पितम्, तथैवात्र ' भक्षं प्रयच्छेत् ' इति श्रुते यागसाधनं प्रयच्छेत् इति कल्प्यते । एतेन ' पूतीकानभिषुणुयात् ' इत्यादीनि व्याख्यातानि ।

होमात् । ४९ ॥

भाष्यम्-- होमविशेषवचनं भवति ' यदा अन्यान् चमसान् जुह्वति, अथैतस्य (फलचमसस्य) दर्भतरुणकेन (किञ्चित्स्थूलेन दृढेन प्रादेशमात्रेण दर्भेण) उपहत्य जुहोति ' इति । इज्याविकारे सति दर्भतरुणकेन इति जुहोतौ गुणवचनमवकल्पते । तस्मादपि इज्याविकारः ।

वा-- होमानुवादेन दर्भतरुणकविधिः इज्याविकारत्वे अवकल्पते ।

चमसैश्च तुल्यकालत्वात् । ५० ॥

भाष्यम्-- ' यदाऽन्यांश्चमसानुन्नयन्ति, अथैनं चमसमुन्नयन्ति ' इति । इज्याविकारे सति, उन्नयनदर्शनं युज्यते, न भक्षविकारे । तस्मादपि इज्याविकारः ।

वा— संदिग्धयागसाधनोन्नयनैकवाक्यता चैतत्तुल्यत्वे अवकल्पते, नान्यथात्वे ।

लिङ्गदर्शनाच्च । ५१ ॥

भाष्यम्— इतश्च पश्यामः इज्याविकारः इति । कुतः ? लिङ्गदर्शनात् । किं लिङ्गं भवति ? सोमप्रतिषेधानुवादः । ' तमस्मै भक्षं प्रयच्छेन्न सोमम् ' इति । इज्याविकारे सति सोमो न भक्ष्यते । तस्मात् पश्यामः इज्याविकारः इति ।

वा— सोमप्रतिषेधानुवादश्च लिङ्गमिति व्याख्यातम् ।

शा-- ' **यागार्थद्रव्यसंस्काररूपभक्षणसंगतेः । स्तिभिनीचमसो यागे द्रव्यमित्यवधार्यते ॥** ' (न्यग्रोधस्तिभिनीः न्यग्रोधफलानि तत्कल्कयुक्तः चमसः) ।

सोम— पूर्वत्र संपूर्णयष्टृत्वश्रवणात् यजमानस्य वषट्कारसंबन्धेऽपि इह फलचमसस्य न यागसंबन्धः अश्रवणात् इति प्रत्यवस्थानात् **संगतिः** । सूत्रे श्रुतिसंयोगात् श्रुतौ फलचमसस्य भक्षेणैव संयोगस्य अवगमात् इत्यर्थः ।

वि-- ' न्यग्रोधपिष्टं सोमस्य स्थाने क्षत्रियवैश्ययोः । भक्षमात्रे विकुर्यात् तत् सोमयागेऽपि वा तथा ॥, विभक्षयिषया वाक्यमुपक्रम्योपसंहृतम् । भक्षं यच्छेदिति ततो विकारो भक्षमात्रगः ॥ , फलाख्यचमसेनासौ यजेतेति श्रुतत्वतः । इज्यायां च विकारोऽस्ति यागार्था भक्षसंस्कृतिः ॥ '

भाट्ट— तत्रैव ' यदि राजन्यं वैश्यं वा याजयेत्, स यदि सोमं विभक्षयिषेत्, न्यग्रोधस्तिभिनीराहृत्य ताः संपिष्य दधन्युन्मृज्य तमस्मै भक्षं प्रयच्छेत्, न सोमम् ' इति श्रुतम् । तत्र द्वितीयो यदिशब्दो निसंदिग्धत्वपरः । आद्यस्तु निमित्तत्वपर एव । स्तिभिनीः अङ्कुरान् फलानि च । तत्रैतस्य फलचमसपदाभिधेयस्य किं भक्षणमात्रम्, किंवा यागोऽपीति चिन्तायाम्, निमित्तत्वेन अपक्षीणस्य यागस्य फलचमसान्वयित्वानुपपत्तेः तच्छब्दपरामृष्टस्य च तस्य भक्षान्वयश्रवणात् प्राप्तयागानुवादेन अनेकपेषणादिरूपगुणविधाने वाक्यभेदापत्तेश्च अनेकगुणविशिष्टं भक्षान्तरमेव फलचमसकरणकं विधीयते । फलचमसस्य विनियोगाभावेन संस्कार्यत्वानुपपत्तेः सक्तुन्यायेन विनियोगभङ्गस्य आवश्यकत्वात् । तदपि आरादुपकारकमपि यजमानसोमभक्षस्य बाधकम्, 'न सोमम् ' इत्यनुवादबलात्, ' न गिरा गिरेति ब्रूयात् ' इतिवत् एककार्यकारित्वाभावेऽपि बाधकत्वरूपाया एव स्थानापत्तेरङ्गीकारात् । अस्तु वा अयं स्वतन्त्र एव तन्निषेधः । **इति प्राप्ते**, यद्यपि भक्षान्तरमिदम्, तथापि तस्य न आरादुपकारकत्वम्, ' तम् ' इति द्वितीयानिर्देशेन फलचमससंस्कारार्थत्वप्रतीतेः । अनुपयुक्तस्य च संस्कारायोगेऽपि ' अध्वर्युं वृणीते ' इत्यादिवत् विनियोगकल्पना । तत्रापि ' स यदि सोमं विभक्षयिषेत् ' इत्याद्यनुवादबलात् यजमानकर्तृकसोमभक्षस्य च तावतैवोपपत्तौ सर्वत्र सोमबाधेन सर्वार्थत्वकल्पने प्रमाणाभावात् यजमानचमसयागाभ्याससाधनत्वमेव फलचमसस्य कल्प्यते इति न काचिदनुपपत्तिः । वस्तुतस्तु, भक्षान्तरत्वे प्रमाणाभावात् सोमभक्ष एव यजमानकर्तृकः पेषणदध्युन्मृज्युत्तरकालद्वयविशिष्टः फलचमससंस्कारकत्वेन विनियुज्यते । ' राजा राजसूयेन ' इतिवत्, ' तस्य वायव्यासु ' इतिवच्च विनियोगविशिष्टप्रयोगविधानात् अवाक्यभेदः । तस्य च यजमानचमसाभ्यासीयद्रव्यसंस्कारकभक्षसंस्कार्यत्वात् पूर्वोक्तयुक्तेश्च तदीयत्वानुमानात् कल्पितवाक्येन फलचमसस्य उक्तयागाभ्याससाधनत्वसिद्धिः । नैमित्तिकत्वाच्च तत्र नित्यसोमबाधकत्वम् । एवं च स्थानापत्त्यैव फलचमसे इतरसोमसंस्कारवत् यजमानभक्षस्यापि प्राप्तिसंभवे पूर्वप्रवृत्त्या तद्विध्यङ्गीकरणं गुणद्वयविधानार्थम्, फलचमसस्य यागसाधनत्वसिद्ध्यर्थं चेति द्रष्टव्यम् । एतेन ' यदि सोमं न विन्देत् पूतीकानभिषुणुयात् ' इत्यत्र अभिषवयुक्तपूतीकानामपि यागसाधनत्वं व्याख्यातम् । १५.

मण्डन— ' फलस्य भक्षणादि स्यात् । '

शंकर— ' स्तिभिनीचमसो यजौ । '

* **फलचमसाधिकरणे** स्थानापत्त्यतिदेशः निरूपितः । **बाल.** पृ. ११८.

* **फलचमसादौ** यत्र यागान्तरविध्यसंभवः प्रमाणान्तरप्रमितः तत्र निरवकाशेन नैमित्तिकेन नित्यापनयाभावेऽपि नित्यस्य बाधः । **भाट्ट.** ६।५।१ पृ. २८७ .

* **फलचमसन्यायः** (३।५।१९।४७–५१) आग्नेयहविःश्रपणसाधनत्वस्य नैमित्तिकसहश्रपणप्रयुक्तत्वेन नैमित्तिकतुल्यत्वात् फलचमसन्यायेन स्थानापत्त्यैव दधिशृतयोः प्रणीताधर्मप्राप्तिः, न तु व्रीहियवन्यायेन । **भाट्ट.** ९।२।१३।४४–४५.

* **फलचमसविधिः** । अयं विशेषविधिः दृष्टार्थः । **बाल.** पृ. २१.

* **फलतः** वाचनिको व्यवस्थितविकल्पो यथा, ज्योतिष्टोमसंस्थासु सौभरे ' हीष् इति वृष्टिकामाय निधनं कुर्यात्, ऊर्गित्यन्नाद्यकामाय, ऊ इति स्वर्गकामाय ' इति । **बाल.** पृ. १६०, * फलतः वाचनिकी व्यवस्था यथा ' मृण्मयेन प्रतिष्ठाकामस्य प्रणयेत् कांस्येन ब्रह्मवर्चसकामस्य ' इति । स्मार्ते तु– ब्रह्मयज्ञ एव फलविशेषार्थं ऋग्यजुःसामाध्ययनविधिः । पृ. १९, * फलतः व्यवस्थारूपः प्रतिषेधो यथा, ' यो ब्राह्मणायावगुरेत् तं शतेन यातयात्, यो निहनेत् सहस्रेण, यो लोहितं कुर्यात् यावतः प्रस्कन्द्य पांसून् संगृह्णीयात् तावतः संवत्सरान् सुवर्गं लोकं न प्रजानीयात्, तस्मान्न ब्राह्मणायावगुरेत् न हन्यात् न लोहितं कुर्यात् ' इति । पृ. ३५, * फलतो व्यवस्थितविकल्पो यथा– ज्योतिष्टोमे षोडशिसंस्थे 'सौभरमुक्थ्यानां ब्रह्मसाम भवति' इत्युक्थ्यत्रयब्रह्मस्तोत्रसाधनत्वेन नित्यं सौभरं विहितम् । ज्योतिष्टोमातिरात्रे तु ' यदि बृहत्सामातिरात्रः स्यात् सौभरमुक्थ्यानां ब्रह्मसाम कार्यम्' इति ब्रह्मसामत्वेनैव नैमित्तिकं

'यदि रथंतरसामा सौभरं कुर्यात्' इति चोक्थ्यत्रयेऽपि नैमित्तिकं विहितम्। ततो नित्यं नैमित्तिकं च सौभरं पुनः फलत्रयसाधनत्वेन विहितम् 'यो वृष्टिकामो योऽन्नाद्यकामो यः स्वर्गकामः स सौभरेण स्तुवीत' इति। सौभरस्य च नानाशाखीयस्य नानानिधनकस्याव्यवस्थितविकल्पे प्राप्ते 'हीषिति वृष्टिकामाय निधनं कुर्यात् ऊर्गित्यन्नाद्यकामाय ऊ इति स्वर्गकामाय' इति तत्तत्फले तत्तन्निधनकस्य सौभरस्य विधानात् फलतो व्यवस्थितविकल्पः। पृ. १६०.

* 'फलदेवतयोश्च' (९।१।३।४) इत्यत्र लिङ्गेन ये संयुक्ताः ते अपूर्वार्था न संभवन्ति इति पूर्वपक्षः। टुप्. ९।१।२।२. * 'फलदेवतयोश्च' कर्तव्यं इति साध्यभूतमपूर्वम्, अथवा विधेयत्वानुष्ठेयत्वाभ्यां भाव एव प्रत्ययवाच्योऽभिधीयते। (शङ्कते) साध्यांशोपनिपातात् स्वर्गादिफलं कर्तव्यमिति चेन्न। तस्य कालान्तरभावित्वेन प्रयोगासमवायित्वे सति तत्सिद्ध्यर्थापूर्वस्यैव कर्तव्यत्वावधारणात्। तेन अपूर्वं कृत्वा नान्यथेति। तथा च...... फलदेवतयोश्च इत्युपन्यस्य निराकरिष्यते (उपन्यस्य फलदेवतयोश्च इति निराकरिष्यते इत्यन्वयः। सुधा. पृ. १२५६ द्रष्टव्यम्)। वा. ३।३।७।१४ पृ. ८५१.

☸ फलदेवतयोश्च। ९।१।३।४॥

दर्शपूर्णमासयोः 'अगन्म स्वः सं ज्योतिषाऽभूम' इति फलसंबन्धो धर्मः श्रुतः। तथा 'अग्नेरहमुज्जितिमनूज्जेषम्, सोमस्याहमुज्जितिमनूज्जेषम्' इति देवतासंबन्धः। तत्र किं एते मन्त्राः स्वर्गाग्न्यादिप्रयुक्ताः उत अपूर्वप्रयुक्ताः इति विचारे पूर्वपक्षमाह। फलदेवतयोः फलस्य स्वर्गस्य, देवताया अग्न्यादेश्च मन्त्रप्रयोजकत्वं स्यात्। तथा च सौर्ययागे स्वर्गरूपफलस्य अग्निरूपदेवतायाश्च अभावेन प्रयोजकाभावात् मन्त्रनिवृत्तौ ऊहो न संभवति इति।

न चोदनातो हि तादृगुण्यम्। ५॥

सिद्धान्तसूत्रमिदम्। दर्शपूर्णमासयोः 'अगन्म स्वः सं ज्योतिषाऽभूम' इति मन्त्रः स्वर्गरूपफलप्रयुक्तः, 'अग्नेरहमुज्जितिमनूज्जेषम्' इत्यादिमन्त्रश्च अग्न्यादिदेवताप्रयुक्त इति पूर्वपक्षिणा यदुक्तम्, तन्न। हि यस्मात् चोदनातः अपूर्वस्यैव फलवत्त्वेन चोदनात् तादृगुण्यं तद्गुणत्वं मन्त्राणां फलवदपूर्वशेषत्वम्। तस्मात् अपूर्वप्रयुक्तत्वमेव मन्त्राणाम्। तथा च सौर्ये चरौ 'अगन्म ब्रह्मवर्चसम्, सूर्यस्याहमुज्जितिमनूज्जेषम्' इत्यूहसिद्धिः अपूर्वप्रयुक्तत्वस्य तत्रापि समानत्वात्। के.

☸ फलदेवताधिकरणम्। दर्शपूर्णमासयोः धर्माः फलप्रयुक्ताः॥

फलदेवतयोश्च। ९।१।३।४॥

भाष्यम्— दर्शपूर्णमासौ स्तः, 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति। तत्र फलसंबद्धो धर्मो देवतासंबद्धश्च श्रूयते। फलसंबद्धस्तावत् 'अगन्म स्वः सं ज्योतिषाऽभूम' इति। देवतासंबद्धोऽपि 'अग्नेरहमुज्जितिमनूज्जेषम्' 'सोमस्याहमुज्जितिमनूज्जेषम्' इत्यादिः। तत्र संशयः, किं स्वर्गसंबद्धस्य कर्मणः स्वर्ग एव प्रयोजकः, अग्न्यादिसंबद्धस्य अग्न्यादयः एव, उत उभयत्रापि अपूर्वं प्रयोजकमिति। यदि एवमभिसंबन्धः क्रियते गताः स्म स्वर्गम्, अग्न्यादीनां चोज्जितिमनूज्जेषं इति, ततः स्वर्गाग्न्यादिप्रयुक्तः। अथ एवं क्रियते आगता दर्शपूर्णमासफलम्, दर्शपूर्णमासदेवतायाश्च उज्जितिमनूज्जेषं इति ततः अपूर्वप्रयुक्तः। किं प्राप्तम्? स्वर्गाग्न्यादिप्रयुक्त इति। कुतः? मन्त्राम्नानसामर्थ्यात्। यस्य मन्त्रो वाचकः स इह वदितव्य इति गम्यते। श्रुत्या च स्वर्गाग्न्यादीनां वाचको मन्त्रः। लक्षणया दर्शपूर्णमासफलदेवतयोः। तस्मात् यत्फलदेवतं इति समधिगतं स्वर्गाग्न्यादि, तत्प्रयुक्तो धर्मः स्यादिति।

टुप्— (चतुष्कोणकंसात् बहिष्ठः असङ्लिखितपाठः, कंसस्थस्तु आनन्दाश्रमीयः अधिकाक्षरकः इति ज्ञेयम्। के.) दीक्षणीयापूर्वप्रयुक्तो वाङ्नियमः, न परमापूर्वप्रयुक्त इति पूर्वाधिकरणापवादोऽयम्। दीक्षणीयासिद्धान्तेनैव [फलदेवतयोश्च] इति अत्र पूर्वपक्षः। अग्निस्वरूपप्रयुक्तोऽयं [मन्त्रः] स्वर्गप्रयुक्तश्च, [लिङ्गेन हि अत्र विनियोगः। सामर्थ्यं च लिङ्गम्। स्वरूपे च मन्त्राणां सामर्थ्यम्, नापूर्वीयस्वरूपे। लक्षणा हि तथा स्यात्। न च प्रकरणवशेन लिङ्गबाधो युक्तः। तेन कामं वाक्यं

प्रकरणेन बाध्यताम्। लिङ्गं च ततो बलवत्तरम्, न ततो बाधितुं युक्तम्। तेन यथा वाङ्नियमो ज्योतिष्टोमार्थदीक्षणीयार्थः तथा मन्त्रोऽपि।] अथवा अयं [मन्त्रः] स्वसामर्थ्यादेव ['स्वसामर्थ्येन' इति पाठः तन्त्ररत्ने तु पञ्चम्यन्त एव पाठः] अग्निप्रकाशकः। तत्र योयोऽग्निः स सामर्थ्याविशेषात् प्रकाशनीयः। एवं प्रकरणबाधं सामर्थ्येन मन्यमानः पूर्वपक्षं करोति ['आरभते' इति पाठः। तन्त्ररत्ने तु करोति इत्येव पाठः] प्रोक्षणवत् तु उत्तरम्।

न चोदनातो हि तादृगुण्यम्। ५॥

भाष्यम्— नैतदस्ति स्वर्गाग्न्यादिप्रयुक्त इति। चोदनातः तादृगुण्यं स्यात्। यत् फलवत् चोद्यते तत् इतिकर्तव्यतया अनुबध्यते। अपूर्वं च फलवत्, न स्वर्गाग्न्यादि। तदर्थं वचनं सत् अदृष्टार्थं कल्प्येत। लक्षणया च अपूर्वफलदेवतावचने दृष्टोऽर्थः स्यात् प्रोत्साहनात्। एतस्मिन् पक्षान्तरे दृष्टे सति न स्वर्गाग्न्यादिवचनस्य अपूर्वकल्पना न्याय्या। शब्दार्थस्य च फलदेवतत्वेन संप्रतिपन्नत्वात् लक्षणा अदुष्टा। तस्मात् अपूर्वप्रयुक्त एवंजातीयको धर्म इति। किं भवति विचारस्य प्रयोजनम्? यथा पूर्वः पक्षः, सौर्ये कर्मणि अविकारेण मन्त्रः प्रयोक्तव्यः। यथा तर्हि सिद्धान्तः ऊहेन, 'अगन्म ब्रह्मवर्चसम्' 'सूर्यस्योज्जिति(स्याहमुज्जिति)मनूज्जेषम्' इति। फले पर्यवसितम्। देवतायामुत्तरा चिन्ता वर्तिष्यते।

शा— 'तत्र स्वर्गादिशेषत्वं भवेल्लिङ्गेन मन्त्रयोः। फलस्यादृष्टरूपत्वात्प्रधानत्वाच्च सर्वतः॥ अग्न्यादेर्योच्यमानस्य फलदायित्वसंभवात्। तादर्थ्यमेव मन्त्रस्य युक्तम्, नापूर्वशेषता॥ (सिद्धान्तमाह–) सत्यं फलस्य सर्वस्मात् प्राधान्यं न तु तावता। मन्त्रस्तद्रूपशेषः स्यादानर्थक्यप्रसङ्गतः॥'

सोम— पूर्वत्र यथा परमापूर्वार्थदीक्षणीयाऽपूर्वार्थत्वं वाङ्नियमस्य न परमापूर्वार्थत्वम्, एवं मन्त्रस्यापि अग्न्याद्यर्थत्वं न तद्द्वारा दर्शपूर्णमासार्थत्वं इत्युत्थितेः संगतिः।

वि— 'अगन्मादेः स्वर्गदेवौ हेतू यद्वाऽत्र चोदितम्।, आद्यो लिङ्गात्, मैवमङ्गस्यापूर्वाकाङ्क्षितत्वतः॥'

भाट्ट—पूर्वोक्ताया अपूर्वसंबन्धित्वेन उद्देश्यतायाः कचिदाक्षिप्य समाधानार्थं इदमधिकरणम्। दर्शपूर्णमासयोः 'अगन्म सुवः सुवरगन्म' इति स्वर्गप्रतिपादको मन्त्रः। 'अग्नेरहमुज्जितिमनूज्जेषम्' इत्यादिश्च अग्न्यादिप्रकाशको मन्त्रः श्रुतः। तयोश्च स्वर्गत्वाग्नित्वादिनैव स्वर्गाग्न्योः लिङ्गकल्प्यश्रुतौ उद्देश्यता उपस्थितत्वात्, न तु अपूर्वसंबन्धित्वेन मुख्ये एवार्थे विनियोगस्य औत्सर्गिकतायाः साधितत्वेन तेन रूपेण स्वर्गादिपदैः अनभिधानात्। न च स्वर्गादिस्वरूपे आनर्थक्यम्, साक्षात् फलरूपस्य तस्य अनिर्ज्ञातोपायत्वाविशेषेण तदर्थत्वे वैयर्थ्याभावात्। मन्त्रजन्यप्रकाशनव्यतिरेकेण इतराङ्गयुक्तप्रधानमात्रादेव उत्पत्तिसिद्धेः आनर्थक्यं अपूर्वेऽपि तुल्यम्। प्रयोगविधिना सर्वाङ्गसाहित्यावगतेः मन्त्रजन्यप्रकाशनव्यतिरेकेण अपूर्वानुत्पत्तिः इति तु स्वर्गेऽपि तुल्यम्। एवं देवतायामपि मन्त्रार्थवादेतिहासादिवशात् सत्यपि अपूर्वे तज्जनितदेवताप्रसादादेव फलोत्पत्त्यवगतेः प्रसादस्य च मन्त्रजन्यप्रकाशनव्यतिरेकेण उत्पत्तौ प्रमाणाभावात् तदर्थत्वम्। अत एव लिङ्गकल्प्यश्रुतिविनियोगविधौ उपस्थितत्वात् प्रसादाश्रयीभूताग्नेरेव तत्त्वेन उद्देश्यता, न तु अपूर्वीयदेवतात्वेन इति न सौर्यादौ ब्रह्मवर्चससूर्यादिपदोहः। इति प्राप्ते, न तावत् सर्वेषामेव अवघातादीनां अपूर्वार्थत्वमपहाय स्वर्गार्थत्वं शङ्कितुं शक्यम्, व्रीह्यादिपदेन प्रत्यासन्नतया तेषामर्थाधिकरणन्यायेन आग्नेयाद्युत्पत्त्यपूर्वसाधनत्वस्यैव लक्षणात्। एवं अपूर्वाङ्गीकारेण देवताप्रसादार्थत्वं अवघातादीनां निराकर्तव्यम्। देवताप्रसादस्य अपूर्वजन्यत्वेनाप्रत्यासन्नत्वात्। उदाहृतमन्त्रस्थलेऽपि च न स्वर्गमन्त्रस्य स्वर्गार्थत्वसंभवः। तद्धि किं दर्शपूर्णमासजन्यस्वर्गव्यक्तिं प्रत्येव मन्त्रजन्यप्रकाशनस्योपयोगः, उत स्वर्गव्यक्त्यन्तरं प्रति। नान्त्यः, तथात्वे दर्शपूर्णमासाङ्गत्वाभावात्सामान्यसंबन्धबोधकप्रमाणाभावेन लिङ्गकल्प्यश्रुतेरेव अकल्पनेन स्वर्गार्थत्वे एव प्रमाणाभावात्। न च स्वर्गाधिकार एव सामान्यसंबन्धबोधकं प्रमाणम्, स्वर्गस्य यागाख्य-

करणेनैव निराकाङ्क्षतया तदधिकारस्य अकल्पकत्वात् । न च मन्त्रस्य प्रयोजनाकाङ्क्षयैव लिङ्गेन श्रुतिकल्पनम्, वाचस्तोमे विनियोगेनैव तस्य निराकाङ्क्षत्वात् । अत एव लिङ्गमात्रेणापि न श्रुतिकल्पनम् । पाके समर्थस्यापि देवदत्तस्य आकाङ्क्षाऽभावे विनियोगादर्शनात् । नाद्यः । तथात्वे हि दर्शपूर्णमासजन्यस्वर्गव्यक्तीनां न स्वर्गत्वादिना उद्देश्यता, अतिप्रसङ्गात् । नापि दर्शपूर्णमासजन्यस्वर्गत्वेन, तस्यापूर्वद्वारकत्वेन गुरुभूतत्वात् । किंतु विजातीयापूर्वसंबन्धित्वेनैव । अत एव संनिपत्योपकारकत्वेऽपि स्वर्गप्रत्यासन्नत्वात् अपूर्वमपि परमापूर्वमेव, न तु अवान्तरापूर्वं उद्देश्यतावच्छेदककोटिप्रविष्टम् । स्वर्गत्वस्य तु व्रीहित्वादिवदेव अप्रवेशः गौरवात् । अतश्चैव मन्त्रलिङ्गकल्प्या श्रुतिः अनेन मन्त्रेण शक्तिजन्यबोधद्वारा परमापूर्वसाध्यं संस्कुर्यादिति । शक्तिजन्यबोधश्च वस्तुतः स्वर्गत्वप्रकारकः स्वर्गविशेष्यक एव द्वारतायां शक्तिजन्यबोधनत्वेन प्रविष्टः, न तु अपूर्वसंबन्धित्वप्रकारकः, तथात्वे शक्तिजन्यत्वानुपपत्तेः । अत एव ब्रह्मवर्चसादौ द्वाराभावात् स्वर्गपदलोपे ब्रह्मवर्चसविषयकशक्तिजन्यबोधसिद्ध्यर्थं ब्रह्मवर्चसपदोहः । इतरथा प्रकृतावेव लक्षणया स्वर्गपदेनापूर्वसंबन्धित्वप्रकारकबोधजनने ब्रह्मवर्चसस्यापि तेनैव रूपेण बोधोपपत्तेः ऊहानुपपत्तिः । अत एव पुत्राद्यर्थदर्शपूर्णमासप्रयोगेऽपि मन्त्रलोपः । तत्रापूर्वसाध्यफलस्य स्वर्गत्वेन बोधानुपपत्तेः । अत एव च 'मुख्य एवार्थे मन्त्राणां विनियोगः' इत्यप्युपपन्नम् । शक्तिजन्यबोधेन च अपूर्वसाध्ये ज्ञाततया आधानात् तस्य संस्कार्यत्वं उद्देश्यत्वापरपर्यायं नानुपपन्नम् । तादृशबोधस्य च स्वजन्यश्रद्धाजन्यादृष्टद्वारा परमापूर्व एव फलोत्पत्त्यनुकूलयोग्यताजननात् फले उपयोगः, न तु फलोत्पादकत्वम्, तथात्वे समप्राधान्यापत्त्या प्रकरणबाधापत्तेः इत्याद्यन्यत्र विस्तरः ।

एवं अग्न्यादिप्रकाशकमन्त्रेष्वपि स्वतन्त्राग्निप्रकाशनार्थत्वस्य अनुपयुक्तत्वात् सामान्यसंबन्धबोधकप्रमाणाभावाच्च पूर्ववत् तत्कल्पनाऽनुपपत्तेः अवश्यं आग्नेयसंबन्ध्यग्निप्रकाशनार्थत्वस्यैव कल्पनीयत्वात् आग्नेयस्वरूपे चानर्थक्येन प्रत्यासन्नतया तदुत्पत्त्यपूर्वीयदेवतात्वेनैव अग्न्यादेः उद्देश्यत्वकल्पना । न तु प्रसादाश्रयत्वेन, प्रसादस्य परमापूर्वजन्यत्वेन विप्रकृष्टत्वात्तद्देव प्रयोजकत्वानुपपत्तेः । अत एव नाग्नित्वादेरपि उद्देश्यताऽवच्छेदककोटिप्रवेशः गौरवात् । एवं च प्रसादाश्रयत्वस्यापि उद्देश्यताऽवच्छेदकत्वकल्पने ऊहसिद्धिः अप्रत्यूहैव । परन्तु प्रसादसामान्याश्रयत्वस्य अग्निहोत्रादौ अतिप्रसङ्गात् नोद्देश्यतावच्छेदकत्वम्, आग्नेयापूर्वजन्यप्रसादाश्रयत्वापेक्षया तदीयदेवतात्वस्य लघुत्वाच्च । अतश्चात्रापि अनेन मन्त्रेण शक्तिजन्यबोधद्वारा आग्नेयोत्पत्त्यपूर्वीयदेवतां संस्कुर्यात् इति लिङ्गकल्प्यश्रुतिं कल्पयित्वा ऊहसिद्धिः पूर्ववत् उपपादनीया । उपयोगोऽपि निर्वापादिमन्त्रेषु स्मृतिदार्ढ्येन त्यागकाले झटिति देवतास्मृतिद्वारा उत्पत्त्यपूर्वानुकूलयागनिष्ठयोग्यतासंपादने एव इत्यन्यत्र विस्तरः ।

मण्डन — 'स्वर्गस्तथाग्निश्च नहि प्रयोक्ता ।' (धर्मस्य) ४.

शंकर— 'निमित्ततोक्ताऽपूर्वस्य ।'

* **फलदेवताधिकरणेन** प्रोक्षणादीनामपूर्वप्रयुक्तताधिकरणस्य अगतार्थता । **सोम.** ९।१।५. * प्रोत्साहनार्थानामपि 'अगन्म सुवः' इत्यादीनां श्रद्धाजननार्थे अनुष्ठेयस्यापि कर्मसमवेतस्य फलादेः स्मृतेरपेक्षितत्वात् तदर्थत्वेन दृष्टविधयैवोक्तव्यापारसिद्धिः नवमे भाष्ये **फलदेवताधिकरणे** एवोपपादिता । **कौ.** १।२।४।४२.

* **फलदेवताप्रकाशकयोर्मन्त्रयोः** अपूर्वप्रयुक्तत्वम् । ९।१।३।४–५.

* **फलनियमकर्तृसमुदाया** उदाहरणम् । फलं स्वर्गः, नियमो यावज्जीविकोऽभ्यासः, कर्ता स्वर्गकामः, समुदायो दर्शपूर्णमासौ । तेषां सौर्यादिषु न प्रवृत्तिः । ८।१।१३।२०–२२. **मीको.** पृ. २५० 'अतिदेशो न फलनियम०' इत्यत्र द्रष्टव्यम् ।

* **फलपरत्वे** संभवति न स्तुतिपरत्वं इति न्यायः यदि आश्रीयेत तथा सति प्रयाजादिष्वपि वर्मकरणवादस्य फलपरतैव स्यात् । (पूर्वपक्षे) । **आभरणम्.** ३।३।२७।४२.

* फलप्रयुक्तत्वं नास्ति द्रव्यसंस्कारकर्मणाम्, तत्र फलश्रुतिरर्थवादः । ४।३।१।१–३.

* फलभवनकालः नासद्यत्वक्षः । वा. २।२।३।३ पृ. ४८३, सु. पृ. ७३३.

* फलभाज एव प्रधानकर्तृत्वं इति न्यायः । **परिमल.** ३।४।१३।४४ ब्रसू.

* फलभावनाकरणत्वं एकस्यैव । **मीन्या.**

§ फलभूमाधिकरणम् । अङ्गानां प्रयाजादीनां एकस्मिन् प्रयोगे सकृदनुष्ठानम् ॥

क्रतुवद्वाऽनुमानेनाभ्यासे फलभूमा स्यात् । ११।१।७।२९॥

भाष्यम्— प्रयाजादीनि उदाहृत्य चिन्त्यते । किं सकृत् प्रयोग एषां उत अश्रुताभ्यासोऽपि कर्तव्य इति । तत्र 'धर्ममात्रे त्वदर्शनाच्छब्दार्थेनापवर्गः स्यात्' (११।१।६।२८) इत्यनेन न्यायेन सकृत् प्रयोगे प्राप्ते एवमुच्यते, 'क्रतुवद्वाऽनुमानेनाभ्यासे फलभूमा स्यात्'। अभ्यासः कार्यः । कुतः ? यतः अभ्यासे फलभूमा स्यात् । कथं ज्ञायते ? अनुमानेन । किं तदनुमानम् ? प्राक् अङ्गप्रयोगात् प्रधानोपकारो नासीत् ऊर्ध्वं ततो भवति, तेन विज्ञायते नूनं अङ्गेन क्रियते इति । क्रियते चेत् पुनःपुनरपि करिष्यते । क्रतुवत्, तद्यथा कर्मसु सौर्यादिषु फलं कर्मणा क्रियते इति कर्माभ्यासे फलभूयस्त्वम्, एवमिहापि ।

सकृद्वा कारणैकत्वात् । ३० ॥

भाष्यम्— सकृत् वा अङ्गं प्रयोक्तव्यम्, नावृत्त्या । कुतः ? कारणैकत्वात् । एकं कारणमङ्गानां प्रधानेपूपकारः । कः पुनरसौ ? येन प्रधानानि फलं ददति । तच्चेत् सकृत्प्रयुक्तेनाङ्गेन कृतं जानाति प्रधानानि फलवन्तीति, पुनरङ्गस्याप्रयोगः । अथ न कृतम्, सुतरामप्रयोगः । येन सकृत्कृतेन नोपकृतम्, स पुनःक्रियमाण उपकरिष्यति इति का आशा ।

परिमाणं चानियमेन स्यात् । ३१ ॥

भाष्यम्— यदि चानियमः सकृदसकृद्वा प्रयोगः, ततः 'चतुर्दश पौर्णमास्यामाहुतयो हूयन्ते, त्रयोदशामावास्यायाम्' इति योऽयं नित्यवदाहुतिपरिमाणानुवादः, स न स्यात् । स तावत् भवतां पाक्षिकः कल्प्येत तथा चास्य रूपं बाध्येत । तस्मादनभ्यासः ।

फलस्यारम्भनिष्पत्तेः क्रतुषु स्यात् फलान्यत्वम् । ३२ ॥

भाष्यम्— यत्तु क्रतुवदिति, युक्तं यत् क्रतुषु अभ्यासः । फलस्य आरम्भनिष्पत्तेः । कर्मारम्भेण तत्र फलं निष्पद्यते । आरम्भान्तरेण अपरं निष्पत्स्यते इति । अङ्गस्य पुनः उक्तपरिमाणं फलं प्रधानानां फलवत्तासंपादनम् । तच्चेत् सकृत्कृतेन कृतम्, न भूयः क्रियाऽस्तीति । एवमपदिष्टो हेतुः । तस्मादनुपन्यासः (अभ्यासे दृष्टान्तस्य) ।

अर्थवांस्तु नैकत्वादभ्यासः स्यादनर्थको यथा भोजनमेकस्मिन्नर्थस्यापरिमाणत्वात् प्रधाने च क्रियार्थत्वादनियमः स्यात् । ३३ ॥

भाष्यम्— यदुक्तं सकृत्कृतेन अङ्गेन कृतत्वात् अर्थस्य अनर्थकोऽभ्यास इति । अत्र ब्रूमः ! अर्थवांस्तु अभ्यासः अङ्गग्रामस्य, नानर्थकोऽभ्यासः । कथं कृत्वा ? एकत्वादभ्यासः स्यादनर्थकः । यदि एकमेवार्थं अभ्यस्यमानमपि अङ्गं करोति, ततः अभ्यासोऽनर्थकः स्यात् । यथा भोजनमेकस्मिन् काले अभ्यस्यमानं एकमेव फलं तृप्तिं करोतीति नाभ्यस्यते । अथेह अर्थस्य अपरिमाणत्वम् । इयन्तमुपकारं करोत्यङ्गं इति न ज्ञायते । ननु यावता प्रधानं फलवद्भवति तावत् करोति इति गम्यते । सत्यमेवम् । किन्तु प्रधाने क्रियार्थत्वात् अनियमः स्यात् । प्रधानस्य फलक्रियार्थमङ्गम् । तत्तु प्रधानफलमपरिमितम् । तदङ्गोपकारस्य भूयस्त्वे भूयो भविष्यति । अल्पत्वे अल्पम् । अभ्यासे च असंशयं भूयानुपकारः स्यात् कार्यत्वात् तस्य । तस्मादनियमः स्यात् सकृद्वा प्रयोगः, अभ्यासो वेति ।

पृथक्त्वाद्विधितः परिमाणं स्यात् । ३४ ॥

भाष्यम्— यत्तु आहुतिसंख्या विरुध्यते इति, पृथक्त्वादुपकारस्य अभ्यासे न्यायप्राप्ते योऽयं आहुतिसंख्यानुवादः स विधितः स्यात्, आहुतिविधीनभिप्रेत्य 'चतुर्दश पौर्णमास्यां आहुतिविधयः, त्रयोदश अमा-

वास्थायाम् ' इति । नहि आहुतिसंख्या युज्येत । आहुतिविधिसंख्या तु लक्षणया उपपद्यते ।

अनभ्यासो वा प्रयोगवचनैकत्वात् सर्वस्य युगपच्छास्त्रादफलत्वाच्च कर्मणः स्यात् क्रियार्थत्वात् । ३५ ॥

भाष्यम्-- अनभ्यासो वा अङ्गानाम् । कुतः ? प्रयोगवचनैकत्वात् । एकः प्रयोगवचनः अङ्गानां प्रधानानां च । तस्यैकत्वात् सर्वस्य युगपच्छासनं ' अनेन कर्मणा साङ्गेन यजेत ' इति । सकृत्कृतैश्चाङ्गैः तत् साङ्गं जातमिति न पुनः क्रियायां हेतुरस्ति । ननु उपकारभूयस्त्वं भविष्यति । यदि अङ्गानि अदृष्टमुपकारं कुर्युः, ततः तदभ्यासे उपकारभूयस्त्वमनुमीयेत । दृष्टमेव तु अर्थं अङ्गानि कुर्वन्ति प्रधानस्याङ्गवत्ताम् । सा च अभ्यासेऽपि तावत्येव अङ्गवत्ता । सा चेह फलसंबद्धा साङ्गेन यजेत इति, नाङ्गानि । अङ्गानि तत्संपादनेन अर्थवन्ति । ननु एतदयुक्तमिव । यदा हि प्रयाजाः, न तदा प्रधानयजिः अपूर्वं वा । यदा च यजिः अपूर्वं च, न तदा प्रयाजाः । तदेवं अदृष्टरहिते समिदादिमात्रे सति अङ्गवत्तैव नास्ति, कुत उपकारः ? । अपि च यदि यजिमात्रमेवाङ्गेषु, नापूर्वफलमस्ति, ततः सोमाङ्गभूतानां इष्टिपशुबन्धानां चोदक एव नास्ति । असति हि अपूर्वे इतिकर्तव्यताकाङ्क्षा नास्ति । यजतेः प्रज्ञातेतिकर्तव्यताकत्वात् इतिकर्तव्यतां चोदको नातिदिशेत् । तत्रैतानि दर्शनानि नोपपद्येरन् । ' तस्यैकशतं प्रयाजानुयाजाः, न च समिष्टयजूंषि जुहोति, प्रहृत्य परिधीन् जुहोति हारियोजनम् ' इति । तस्मादियं **अन्या व्याख्या ।** अनभ्यासो वाऽङ्गानां प्रयोगवचनैकत्वात् । एकः प्रयोगवचनः अङ्गानां प्रधानानां च । तस्यैकत्वात् सर्वस्य अङ्गप्रधानकलापस्य युगपच्छासनम् । तत्र प्रधानानामनभ्यासः । कस्य हेतोः ? सकृत्कृतैः प्रधानैः कृतः श्रुत्यर्थः, ' दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत ' इति । कृते श्रुत्यर्थे यत् शास्त्रविहितं फलं तल्लब्धं इति न पुनः क्रियायां हेतुरस्ति । एवमङ्गेष्वपि सकृत्कृतेषु यदङ्गानां प्रापकं शास्त्रं तस्यार्थः कृतः । तस्मिन् कृते यत् शास्त्राधिगतं अङ्गफलं तल्लब्धमिदानीं इत्यवगन्तव्यम् । तथा च सति अभ्यासोऽनर्थकः । यत्तु फलभूयस्त्वं भविष्यतीति । तदयुक्तम् । दर्शपूर्णमासयोर्यत् फलं तद्भावनायां अङ्गोपकार उपयुज्यते, नापूर्वस्य फलस्योत्पत्तौ । यदि अपूर्वं फलं अङ्गैरुत्पाद्येत, अङ्गफलमेव तत् स्यात् । न चाङ्गानि फलवन्ति । प्रधानानां स्वकार्यं साधयतां अदृष्ट उपकारः तैः क्रियते । सकृत्कृतैश्चासौ कृतः । तस्मात् नाङ्गावृत्तौ फलभूयस्त्वमस्ति ।

टुप्-- भाव्यः स्वर्गः भावको यागः । इतिकर्तव्यता यागस्यानुग्रहं करोति, न फलसाधिका । तस्याः फलं न श्रूयते, करणात् फलमिति । सत्यम्, करणस्य फलं साधयतः अभ्यस्यमाना इतिकर्तव्यता महान्तमुपकारं करोति । तच्च महता उपकारेण अनुगृहीतं महत् फलं करोति । अत्राह, सकृत् इतिकर्तव्यता । कुतः ? भावनया करणेतिकर्तव्यते आकाङ्क्षिते । तत्र करणं फले व्याप्रियते, इतिकर्तव्यता करणमनुगृह्णती आकाङ्क्षिता । सकृत्कृतया च निराकाङ्क्षीकृता भावना । द्वितीयादिप्रयोगः केन आकाङ्क्ष्यते । तस्मात् सकृत् अत्र ग्रन्थः ' यदा प्रयाजाः, न तदा प्रधानयजिः अपूर्वं वा, यदा च यजिः अपूर्वं च न तदा प्रयाजाः ' इति (भाष्यग्रन्थः) एतदयुक्तम् । कथम् ? यस्मिन्नेव क्षणे स्वर्गो भवने कर्तृत्वं प्रतिपद्यते, तस्मिन्नेव करणमपि भावकत्वेन व्याप्रियते । इतिकर्तव्यताऽपि तस्मिन्नेव करणमनुगृह्णाति । यदि अन्यस्मिन् क्षणे स्वर्गो भवने कर्तृत्वं प्रतिपद्येत, करणमपि अन्यस्मिन् भावकम्, तथा सति भाव्यभावकसंबन्ध एव न स्यात् । तस्मात् यौगपद्यं स्वर्गयागयोः । एवमेव करणेतिकर्तव्यतयोः । तस्मादेषां तुल्यकालता । न च अवान्तरक्रियाः परस्याभिप्रेताः । भिन्नकाला अपि सत्यः प्रयाजादिक्रिया एवाभिप्रेताः । तच्चायुक्तम्, स्वरूपाणां भिन्नत्वादिति ।

अभ्यासो वा छेदनसंमार्गावदानेषु वचनात् सकृत्त्वस्य । ३६ ॥

भाष्यम्-- अभ्यासो वा अङ्गानाम् । कुतः ? पितृयज्ञे श्रूयते ' सकृदाच्छिन्नं बर्हिर्भवति ' इति । तथा अनुयाजे ' सकृत् परिधीन् संमार्ष्टि ' इति । स्विष्टकृति च ' उत्तरार्धात् सकृदवद्यति ' इति । तद्यत् असकृदङ्गानां प्रयोगः ततः एतानि वचनानि उपपद्यन्ते । तस्मादभ्यासः ।

अनभ्यासस्तु वाच्यत्वात् । ३७ ॥

भाष्यम्— अनभ्यासस्तु अङ्गानां यथोक्तेन न्यायेन । यत्तु छेदनादिषु वचनात् सकृत्त्वस्य अन्यत्र अभ्यासो विज्ञायते इति । अत्र ब्रूमः । यद्यपि अनभ्यासः, तथापि छेदनादिषु वाच्यं सकृत्त्वम् । दर्शपूर्णमासयोः ' असकृदाच्छिन्नं बर्हिर्भवति ' इति वचनात् । तत्प्रकृतित्वात् पितृयज्ञेऽपि असकृत् प्राप्तम् । तथा प्राप्ते सकृत्त्वं वाच्यम् । एवं प्रयाजेषु त्रिः संमार्ग उक्तः । सोऽनुयाजेषु पुनरावर्तते । तत्रापि त्रित्वे प्राप्ते सकृत्त्वं विधातव्यम् । तथा ' द्विर्हविषोऽवद्यति ' इत्यविशेषेणोक्ते स्विष्टकृत्यपि द्वित्वं प्राप्तं तत्र सकृत्त्वं विधीयते । तस्मात् छेदनादिषु सकृद्वचनात् नान्यत्र अभ्यासो विज्ञातुं न्याय्यः इति ।

शा— फलभूमार्थिना कर्माणि पुनःपुनः प्रयोक्तव्यानि इति स्थिते चिन्त्यते, किं एकस्मिन् प्रयोगे अङ्गानि पुनः पुनः प्रयुञ्जानस्य फलभूयस्त्वं भवति, नेति । तत्र अभ्यस्यमानानि अङ्गानि बहूनुपकारान् जनयन्ति, बहूपकारयुक्तं च प्रधानं फलभूयस्त्वाय भवति इति मन्वानस्योत्तरम् । समग्रकारणावृत्त्या हि कार्यमावर्तते, प्रधानं च साङ्गं फलसामग्री नाङ्गमात्रम्, अतस्तन्मात्रावृत्त्या न भूयः फललाभः । न च उपकारभूयस्तया फलभूयस्त्वं प्रमाणाभावात् । न चात्र अङ्गाभ्यासः शास्त्रीयः । नचाशास्त्रीयेण प्रयासगौरवेण फलभूमा शक्यते कल्पयितुम् । अतः फलभूमार्थिना साङ्गं प्रधानं अभ्यसितव्यम्, नाङ्गमात्रम्, नापि प्रधानमात्रम् ।

सोम— सूत्रार्थस्तु— अङ्गं फलभूमार्थमभ्यासमर्हति सफलत्वात्, सौर्यादिवत् इत्यनुमानेन अङ्गाभ्यासे फलभूमा स्यात् इति ।

वि— ' अङ्गेऽभ्यासो न वा, भूम्नाऽभ्यासो, नाङ्गे पृथक् फलम् । अङ्ग्यावृत्त्यैव भूमाऽतः प्रयोगेऽङ्गं सकृद्भवेत् ॥ '

भाट्ट— एकस्मिन्नेव प्रयोगे पुनः पुनः क्रियमाणैरङ्गैः प्रयासगौरवेण फलाधिक्यं मन्वानस्योत्तरम् । न तावत् फलान्तरोत्पत्तिः, एकस्मात् प्रधानात् एकस्यैव फलस्य उत्पत्तिनियमेन प्रधानावृत्त्यभावे सामग्र्यभावेन फलान्तरोत्पत्तौ प्रमाणाभावात् । नापि तस्यामेव फलव्यक्तौ अतिशयमात्रम् ' अतिरात्रे षोडशिनं गृह्णाति ' इत्यादिवत् फलभूमा । स हि यत्र तद्व्यतिरेकेण क्रतूपकारसिद्धिः प्रमाणप्रमिता, तत्रैव तद्विधिवैयर्थ्यभिया कल्प्यते, यथा षोडशिग्रहणात्, यथा वा ' एका देया, षड् देयाः ' इत्यादौ । प्रकृते तु अङ्गविधीनां सकृत्करणेन चरितार्थत्वात् क्रतोश्च एकक्रतूपकारमात्रापेक्षितया पुनरावृत्त्यनाक्षेपकतया पुरुषेच्छामात्रेणैव आवृत्तौ फलाधिक्ये प्रमाणाभावः । यत्र हि ' पशुमालभेत ' इत्यादौ महान् पशुरालभ्यते, यत्र स्वल्पः, तत्रापि न फले तारतम्यं इत्युक्तं भाष्ये (११।१।९।४४ अक्षरभेदेन)। तत्र प्रयाजादीनां पुनःकरणे का संभावना ? ' गां दद्यात् ' इत्यादौ तु समीचीनगोदाने फलाधिक्यमस्त्येव इति ध्येयम् ।

मण्डन-- ' अङ्गं प्रयाजादि सकृत् प्रकुर्यात् । '

शंकर-- ' नाङ्गावृत्त्या फलं बहु । '

* **फलभूमार्थी** बहुकृत्वः प्रयोगे प्रवर्तेत, संतुष्टः सकृत् । **भा.** ११।१।४।२४.

* **फलभेदः** कर्मभेदहेतुः । **सु. पृ.** ९१२.

ⵣ फलमुखगौरवं न दोषावहमिति न्यायः । यत्र गौरवे फलसंपत्तिर्भवेत् तत्रायं प्रवर्तते । यथा चायं न्यायो मुक्तावल्यां समासलक्षणानिरूपणप्रस्तावे निरूपितस्तथाहि, अत एव ' निषादस्थपतिं याजयेत् ' इत्यत्र न तत्पुरुषो लक्षणापत्तेः, किन्तु कर्मधारयः लक्षणाभावात् । न च निषादस्य संकरजातिविशेषस्य वेदानधिकाराद्याजनासंभव इति वाच्यम्, निषादस्य विद्याप्रयुक्तेस्तत एव कल्पनत्वात् लाघवेन मुख्यार्थान्वये तदनुपपत्त्या कल्पनायाः फलमुखगौरवतया इति दिक् । **साहस्री.** ४७६ .

* **फलमुखप्रतिपत्तिविधिकल्पनानुमतिः** श्रौतविधेः धारणाद्याक्षेपशक्तिकल्पनागौरवपरिहारार्थम् (' प्रयाजशेषेण हवींष्यभिघारयति ' इत्यत्र)। **भाट्ट.** ४।१।१४.

* **फलवत्** यच्चोद्यते तत् इतिकर्तव्यतया अनुबध्यते। **भा.** ९।१।४।९ .

फलवद्वोक्तहेतुत्वादितरस्य प्रधानं स्यात् । ४।४।४।७॥

'वैश्वदेवीं सांग्रहणीं निर्वपेद् ग्रामकामः' इति विधाय 'आमनमस्यामनस्य (आमनं असि आमनस्य इति पदच्छेदः) देवा इति तिस्र आहुतीर्जुहोति' इति आमनहोमा उक्ताः। ते किं सांग्रहणीष्ट्या समप्रधाना उत तस्या अङ्गं इति विचारे समप्रधाना इति उत्सूत्रं पूर्वपक्षे प्राप्ते वाशब्देन तं निरस्य सिद्धान्तयति। फलवत् सफलं सांग्रहणीकर्म इतरस्य आमनहोमत्रयस्य प्रधानं स्यात् आमनहोमत्रयं च अङ्गं स्यात्। उक्तहेतुत्वात् 'फलवत्संनिधावफलं तदङ्गम्' इति हेतोरुक्तत्वात्। उक्तो हेतुरस्य इति उक्तहेतु तादृशत्वात्। **के.**

* फलवद्धि अफलस्य प्रधानम्। **भा.** ४।४।४।७, * यत् फलवत् तत् पुरुषस्य चिकीर्षितम्। १०।६।१८।६७, * यो हि आरभ्य परिसमापयति स **फलवान्।** एष हि आख्यातार्थः। स हि उपक्रमप्रभृति अपवर्गपर्यन्तमाह। ६।३।९।२४ पृ. १४२२, * **फलवति** च प्रयासो विधीयमानोऽर्थवान् भवति। ७।१।१।१.

* **फलवदफलन्यायेन** अग्निहोत्रस्य अन्यलभ्यस्वर्गसंबन्धबोधनद्वारा तत्संनिधिसमाम्नातानां अनिर्दिष्टफलानां कर्मणां तदङ्गत्वप्राप्तिः। ('फलवत्संनिधौ अफलं तदङ्गम्' इति न्यायस्वरूपम्। 'पृथक्त्वे त्वभिधानयोर्निवेशः ०' ४।४।११।३४ इति सूत्रोन्नीतश्चायं न्यायः)। **रसायनम्.** पृ. ६७. * कर्मान्तरत्वे (रथंतरसामा, बृहत्सामा इति ज्योतिष्टोमात् कर्मान्तरं इति पक्षे) तस्य **फलवदफलन्यायेन** ज्योतिष्टोमाङ्गत्वात् ज्योतिष्टोमाङ्गत्वेन केवलरथंतरसामकं कर्मान्तरमनुष्ठेयम्। (इति पूर्वपक्षे)। **सोम.** २।३।१.

* **फलवत्त्वं** मुख्यलक्षणम्। 'तत्पुनर्मुख्यलक्षणं यत् फलवत्त्वम्'। **सूत्रं** ४।४।११।३४. * फलवत्त्वं विश्वजिदादीनाम्। ४।३।५।१०-१२.

* **फलवन्निगदा** अपि विधेयस्तावकाः। १।२।२. **मीको.** पृ. १३३६ 'औदुम्बराधिकरणम्' इत्यत्र द्रष्टव्यम्।

* **फलवन्निगदाधिकरणं** अर्थवादाधिकरणस्यैव शेषः। **सु.** पृ. ९३.

* '**फलवद्व्यवहाराङ्गभूतार्थप्रत्ययाङ्गता।** निष्फलत्वेन शब्दस्य योग्यत्वादवधार्यते॥' (श्लोवा. शब्दनित्यताधिकरणम् श्लो. २३८) इति न्यायः। **सु.** पृ. २३. अत्र **रत्नाकरः**— फलवतः गवानयनादिव्यापारस्य अङ्गभूतः अर्थप्रत्ययः तत्फलत्वेनैव फलवान्, शब्दस्योच्चारणसंस्कारभाजः स्वयमफलस्य फलवत्प्रत्ययाङ्गता अवगम्यते इति।

* '**फलवत्संनिधावफलं तदङ्गम्' इति न्यायः।** ['पृथक्त्वे त्वभिधानयोर्निवेशः, श्रुतितो व्यपदेशाच्च, तत्पुनर्मुख्यलक्षणं यत् फलवत्त्वम्, तत्संनिधावसंयुक्तं तदङ्गं स्यात्, भागित्वात् कारणस्य, अश्रुतश्चान्यसंबन्धः' ४।४।११।३४ इति सूत्रम्, तदवयवः 'तत्संनिधावसंयुक्तं तदङ्गं स्यात्' इति। तदर्थ एव फलवत्संनिधावफलं तदङ्गमिति न्यायः। **के.**] इतरत्तु (यागेभ्यः) फलवत्संनिधानात् तदङ्गं भवति। **शा.** ४।४।१. * 'फलवत्संनिधावफलं तदङ्गम्' इति न्यायः। ननु अन्योन्यविशेषणविशेष्यभावरहितानामपि अङ्गाङ्गिभावो भवतु। नेति ब्रूमः 'फलवत्०' इति न्यायवैषम्यात्। **नृसिंहपूर्वतापनीयोपनिषद्भाष्यम्** १।१. * सगुणवाक्यस्य निर्गुणवाक्यसंनिधौ पठितस्य '**फलवत्संनिधौ अफलं तदङ्गम्**' इति **न्यायेन** तदनुगुणतया नेयत्वम्। **अद्वैत.** २।४।२५९. * 'फलवत्संनिधावफलं तदङ्गम्' इति **न्यायात्** फलवद्विद्यासंनिध्याम्नातानां तदङ्गता। **न्यायनि.** ३।३।१४।२५ ब्रसू. * 'फलवत्संनिधावफलं तदङ्गम्' इति न्यायात् स्वतन्त्रफलवतः सोमस्य दर्शपूर्णमासाङ्गत्वासंभवः। **वि.** ४।३।१६. * निष्प्रपञ्चवाक्येष्वेव फलश्रवणात् 'फलवत्संनिधावफलं तदङ्गम्' इति **न्यायात्** सप्रपञ्चवाक्यानां तदेकवाक्यता इति (वृत्तिकारमतम्)। **न्यायनि.** ३।२।५।२१ ब्रसू. * सफला हि सर्वा विद्या आम्नाताः। तत्संनिधौ मन्त्राः कर्माणि च समाम्नातानि 'फलवत् संनिधावफलं तदङ्गम्' इति न्यायात् विद्याङ्गभावेन विज्ञायन्ते। **भामती.** ३।३।१४।२५ ब्रसू. * 'फलवत्संनिधौ अफलं तदङ्गम्'। फलवत्संनिधेस्तु आघारादीनि आरादुपकारकाणीति। **भा.** २।२।३।३, * फलवत्संनिधौ अफलं तदङ्गम्। लोकेऽपि निष्पन्नकार्यादिषु प्रयोजनवत्सु यदसंयुक्तं फलेन श्रूयते तत् तदङ्गं विज्ञायते इति मन्यमानाः उपवासं जपं वा उपदिश्यैव कृतिनो मन्यन्ते, न ब्रुवन्ते इदमस्य प्रयोजनवतोऽङ्गमिति। ४।१।३।६. * फलवत्संनिधौ अफलाम्नानं प्रधानकर्थभावग्रहणहेतुः। **सु.** पृ. १०७०.

फलवत्सहकारन्यायः। यथा आपस्तम्बसूत्रम्, तद्यथा— 'आम्रे फलार्थे निर्मिते छायागन्धे अनूत्पद्येते, एवं धर्मे चर्यमाणे अर्थादयोऽनूत्पद्यन्ते'। यथा 'आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभः' इत्यभिधानादतिसौरभ आम्रवृक्षोऽतिमधुरपक्वफलनमितशाखः समुपसन्नाय छायार्थिने जनाय फलं परिमलं चाप्रार्थितमपि ददाति, तथैकफलाकाङ्क्षया स्वेष्टदेवताराधनमन्यदपि फलं प्रयच्छतीति। एतत् समानविषयकलौकिकव्यवहारान्तरेष्वपि बोध्यम्। **साहस्री.** ४.

* **फलवाक्यस्य** स्वरूपेण फलविधिमात्रार्थत्वम्, उत्पत्तिविनियोगवाक्यैकवाक्यतया च प्रयोगविधानार्थत्वम्। **सु.** पृ. ७३५.

* **फलविधानमपि** वाक्यान्तरस्थेन विधिशब्देनापि भवति। **भा.** ४।३।५।१२. * फलविधानं हि ईदृशेन शब्देन ('प्राणापानावेवात्मन् धत्ते' इत्यादिना) न क्रियते इति वक्ष्यामः (४।३।१।१-३ इत्यत्र)। **वा.** ३।४।५।१५.

* **फलविधिः** अर्थवादः 'प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ति' इति। **बाल.** पृ. ५३. * फलविधिः 'खादिरं वीर्यकामस्य यूपं कुर्यात्, पालाशं ब्रह्मवर्चसकामस्य, बैल्वमन्नाद्यकामस्य' इति। **भा.** ४।३।१।१. * फलविधिः मन्त्रः त्रिविधः यजमानगामिफलविधिः, ऋत्विग्गामिफलविधिः, उभयगामिफलविधिश्चेति। **बाल.** पृ. ६२.

* **फलविधिसरूपः** अर्थवादः 'यस्य पर्णमयी जुहूर्भवति' इति। **बाल.** पृ. ५३, * फलविधिसरूपः मन्त्रः 'आयुर्दा अग्नेऽस्यायुर्मे देहि' इति। पृ. ६३.

* **फलश्रुतिः** अङ्गेषु स्तुतिरेव, न फलविधिः। **भा.** ४।३।८।१९. * फलश्रुतिः अन्यानर्थक्यप्रसङ्गविज्ञातपारार्थ्यापादितार्थवादत्वात् न फलप्रतिपत्तिक्षमा विज्ञायते। यथा 'योऽश्वमेधेन यजते, य उ चैनमेवं वेद' इति ज्ञानमात्रादेव ब्रह्महत्यातरणं यदि सिध्येत् को जातु चित् बहुद्रव्यव्ययायाससाध्यमश्वमेधं कुर्यात्। **वा.** १।३।८।२७ पृ. २८७. * फलश्रुतिः अर्थवादः आघारयोः। आघारो हि अङ्गकर्म क्रत्वर्थम्। **भा.** ४।३।१।१-४.

* '**फलश्रुतेस्तु कर्म स्यात् फलस्य कर्मयोगित्वात्**' (२।२।११।२५-२६) इत्यधिकरणे गुणकरणत्वं व्युत्पाद्यते। **सु.** पृ. ८४८.

फलश्रुतेस्तु कर्म स्यात् फलस्य कर्मयोगित्वात्। २।२।११।२५॥

'अग्निहोत्रं प्रकृत्य दध्नेन्द्रियकामस्य जुहुयात्' इति समामनन्ति। तत्र किं अग्निहोत्रहोमात् होमान्तरं दध्यादिहोमः उत दध्यादेर्गुणात् फलं इति विचारे पूर्वपक्षमाह। 'दध्ना जुहुयात्' इति कर्म होमान्तरं स्यात्, फलश्रुतेः। इन्द्रियपाटवं फलमत्र श्रूयते, तच्च कर्मणो न्याय्यम्। फलस्य कर्मयोगित्वात् फलस्य धात्वर्थभाव्यत्वात्। तस्मात् दधिविशिष्टो होमः फलाय विधीयते इति कर्मान्तरमेतत्। तुशब्दः पूर्वाधिकरणसिद्धान्तात् वैषम्यमाह।

अतुल्यत्वात्तु वाक्ययोर्गुणे तस्य प्रतीयेत। २६॥

पूर्वपक्षं तुशब्देन व्यावर्तयन् सिद्धान्तमाह। वाक्ययोः 'अग्निहोत्रं जुहुयात् स्वर्गकामः' 'दध्नेन्द्रियकामस्य जुहुयात्' इति वाक्ययोः अतुल्यत्वात् तुल्यत्वाभावात् तस्य अग्निहोत्रहोमस्य गुणे दधिरूपे फलसंबन्धः प्रतीयेत गुणात् फलं इति। स्वर्गकामवाक्ये होम एव स्वर्गार्थत्वेन विधीयते। इन्द्रियकामवाक्ये तु होमाश्रितस्य दध्नः इन्द्रियार्थत्वेन विधिः इति अतुल्यत्वम्। तस्मात् न कर्मान्तरविधिः किन्तु फलाय गुणविधिः। **के.**

फलश्रुतेस्तु कर्म स्यात् फलस्य कर्मयोगित्वात्। २।२।१०।२५॥

अग्निहोत्रं प्रकृत्य समामनन्ति 'दध्नेन्द्रियकामस्य जुहुयात्' इत्येवमादि। तत्र संदेहः किं अग्निहोत्रहोमात्

होमान्तरं दध्यादिहोमः उत दध्यादेर्गुणात् फलं इति । इदानीं पूर्वप्रतिपादितस्य गुणनिमित्तस्य भेदस्यापवादः क्रियते ।

अत्रायं **पूर्वपक्षिणोऽभिसंधिः** । भावार्थाधिकरणे ह्येतदवस्थितम्, आख्यातशब्दाः फलपदसंबन्धिनो न द्रव्यगुणशब्दाः । तदत्रापि तेनैव न्यायेन 'इन्द्रियं भावयेत्' इतीन्द्रियभावना साधनाकाङ्क्षिणी समानपदोपात्तं होम-(रूपधात्वर्थ)मेव करणतया गृह्णाति, न विप्रकृष्टं द्रव्यम् । न चैवं सति फले होमविधानाद्धोमे च दधिविधानाद्वाक्यभेदः, अगत्या 'दशापवित्रेण ग्रहं संमार्ष्टि' इतिवत् दधिमता होमेनेन्द्रियं भावयेदिति मत्वर्थलक्षण-(या विशिष्ट-)विधानेनैव कर्मान्तरविधानोपपत्तेः । ननु भवतु होमात् फलम्, तथापि प्रकृत एव होमः 'संनिधौ त्वविभागात्फलार्थेन पुनः श्रुतिः' (२।३।१३।२६) इति न्यायेन स्वर्गयावज्जीवयोरिवेन्द्रियफले विधीयताम् । **मैवम्** । दधिविशि(ष्टेन) होमेन उत्पत्तिवाक्यगतहोमस्वरूपाप्रत्यभिज्ञानात् । तदुक्तम्-- '**होमो हि प्रकृतः शुद्धः स्ववाक्यादवधारितः । सोऽस्मिन् दधिविशिष्टत्वान्नाविभागेन गम्यते ॥**' इति (वा. पृ. ५४०) । न च 'दध्ना जुहोति' इति दधिविशिष्टोऽपि होमो विद्यत एवेति तत्प्रत्यभिज्ञानमिति **वाच्यम्** । यतो गुणवाक्यं ह्येतत् । न च गुणवाक्यफलवाक्ययोरुत्पत्तिवाक्यापेक्षयोः परस्परनिरपेक्षत्वात् संबन्धोऽस्ति । तदुक्तम्-- '**तान्युत्पत्तिमपेक्षन्ते सा चाव्यवहिता यतः । गुणादीनां त्वसंबन्धाद्व्यवधिः स्यात् परस्परम् ॥**' इति । (वा. पृ. ५४१) ।

न च उत्पत्तिवाक्यावगतमेव कर्म गुणवाक्यापादितदधिसंबद्धं फले विधास्यतीति **वाच्यम्** । नित्यानित्यसंयोगविरोधात् । एवं ह्यत्र वचनव्यक्तिः । यदेन्द्रियकामः स्यात्तदा नित्यं केवलदधिविशिष्टहोमं (भावये-)दिति दधि वैकल्पिकत्वेन दशमे पक्षे संबध्यते । अतो यथाभूतो नित्यदधिविशिष्टो होम इन्द्रियकामवाक्ये प्रतीयते, तादृशस्याप्रत्यभिज्ञानात्, अनुपादेयं फलं प्रत्युपादानात् कर्मान्तरमेवेति । तदुक्तम् '**दध्यत्र दशमे पक्षे तद्धोमस्य विशेषणम् । नित्यं चेन्द्रियकामस्य तेनापि न निरूप्यते ॥**' इति (वा. पृ. ५४१) । **न च** प्रकृतहोमाश्रितस्यैव दध्नः फले विधानमस्ति, किं विधिगौरवमत्वर्थलक्षणाश्रयणेनेति **वाच्यम्** । दध्नः फलसंबन्धविधाने आश्रयसंबन्धविधाने च वाक्यभेदप्रसङ्गात् । **न च** प्रकरणादाश्रयलाभ इति **वाच्यम्** । 'असंयुक्तं प्रकरणात्' इति न्यायेन फलार्थस्य दध्नः प्रकरणग्रहणासंभवात् । **न च** विधिलक्षणप्रकरणादाश्रयलाभो भवतीति **वाच्यम्** । यतः शब्दो हि संनिधिवशात् विशेषान्वये प्रमाणम् । न तु संनिधानं नाम यागस्य प्रमा(णम)स्ति । न चात्र प्रकृताश्रयसंबन्धप्रतिपादकः शब्दः कश्चिदस्ति, श्रौतेन्द्रियकामवाक्यस्य उभयसंबन्धकरणे वाक्यभेदस्योक्तत्वात् । कल्पितशब्दस्य चाऽऽश्रयसंबन्धकरणे कल्पनैव दोष इति श्रुतस्यैव वाक्यस्य विशिष्टकर्मविधायकत्वमेव युक्तम् । तेनात्रेन्द्रियकामवाक्ये फलस्य श्रुतत्वात् कर्मान्तरमेव विधेयं भवेदिति । **एवं प्राप्तेऽभिधीयते ।**

अतुल्यत्वात्तु वाक्ययोर्गुणे तस्य प्रतीयेत ।२६॥

अयमभिप्रायः, भवेदेवं यदि भावार्थाधिकरणवदेव भावार्थविषयो विधिर्भवेत् । सर्वत्र खलु भावनास्थ एव विधिस्तादर्थ्यभेदेन तत्र तत्र भिद्यते । यत्र फलवर्ती भावनामासाद्य धात्वर्थपरो विधिर्भवति, तत्र धात्वर्थमेव फलकारणं करोति । यत्र तु स्ववाक्योपात्तविधेयगुणान्तरोपादानमप्यस्ति, तत्र विशिष्टविधिगौरवभिया गुणमात्रविधानलोलुपो यदि धात्वर्थप्राप्तिं पश्यति, तदा समस्तमनूद्य गुणमात्रमेव फले विधत्ते । अथ न पश्यति, तदा विशिष्टविधानं मत्वर्थलक्षणां च स्वीकुरुते इति स्थितम् । '**यावद्धि विधिसामर्थ्यं धात्वर्थादनपोद्धृतम् । तावद्यः फलसंबन्धः स धात्वर्थस्य गम्यते ॥ भवेत्फलश्रुतिर्या तु गुणसंचरिते विधौ । सा तद्गतविधिस्पृष्टा तेन यात्येकवाक्यताम् ॥**' (वा. पृ. ५४६) । तदिहापि प्रकृतधात्वर्थप्रत्यभिज्ञानात् तमुपेक्ष्य गुणसंक्रान्तो विधिः गुणमेव फले विधत्ते । धात्वर्थस्तु प्रत्ययप्रयोगार्थः प्रयुक्तः । (स च पूर्वो-)क्तेन धातुना प्रकरणप्राप्तोऽनूद्यते । एवं सति मत्वर्थलक्षणादोषो विशिष्टविधिगौरवं च न भविष्यति । **ननु** भवतु धात्वर्थस्य होमरूपस्य प्राप्तत्वात् अनुवादः, दधिहोमसंबधोऽप्यत्र

प्रतीयते । अवश्यं प्रतिपत्तव्यश्चासौ । न ह्यनाश्रितक्रियस्य फलसाधनत्वं संभवति । तदत्र 'दध्नेन्द्रियकामस्य जुहुयात्' इति वाक्ये प्रतीयमानो दधिहोमसंबन्धो न तावदनूद्यते, प्रागप्राप्तत्वात् । विधीयते चेत् तदैकस्य दध्नः फलसंबन्धविधाने होमसंबन्धविधाने च वाक्यभेदः स्यादिति । उच्यते, दधिहोमसंबन्धोऽप्यत्र प्राप्त एव अनूद्यते । तथाहि, दध्नेति तृतीयया करणत्वेनोपात्तं दधि विधीयते । कारकत्वं च धात्वर्थरूपक्रियाविशेषनिर्वर्तकत्वम् । तत्र कोऽसौ धात्वर्थरूपः क्रियाविशेषः । यन्निर्वर्तयतोऽस्य कारकीभूतस्य फलसाधनत्वमित्यपेक्षायां संनिधिप्रकरणोपनीतहोमरूप एव धात्वर्थः संबध्यते । तेन कारकीभूतदधिपदार्थपरामर्शादेव प्रकृतहोमसंबन्धोऽप्यस्य वाक्यात् प्रतीयमानोऽनूद्यत एव, फलसंबन्धः परं विधीयत इति कुतो वाक्यभेदः ? तदुक्तम् 'दधिसंबन्धोऽपि चास्य प्रकरणादेवाश्रयाश्रयिरूपः प्राप्तोऽनुवदिष्यते' (वा. पृ. ५४८) इति ।

न च वाच्यं केयमाश्रयसंबन्धविशेषापेक्षा, किं कारणत्वेन इतिकर्तव्यतात्वेन वा इति । यतो लब्धकरणभावस्य या तदनुग्रहाकाङ्क्षा भवति सा इह क्रियाविशेषान्वयिरूपं करणत्वमेव क्रियाविशेषान्तर्भावमन्तरेण प्रतीयत इति करणाकाङ्क्षेयं प्रविततरेत्यवधातव्यम् । इदं त्विह वक्तव्यम्-- किं धात्वर्थवद्भावनाऽप्यत्र सैवानूद्यते अन्या वा विधीयते ? न तावत् सैवानूद्यते, फलभेदेन साधनभेदेन च तस्याः प्रत्यभिज्ञानासंभवात् । न चान्या विधीयते, कर्मभेदप्रसङ्गादिति । उच्यते । न हि फलभेदेन साधनभेदेन भावना भिद्यते । किं तर्हि ? अनुबन्धभूतधात्वर्थभेदेन । तत्र तत्र अग्निहोत्रमित्युत्पत्तिवाक्यावगतानुबन्धभूतजुहोतिधात्वर्थावच्छिन्नरूपस्य स्वर्गकामवाक्ये यावज्जीववाक्ये इन्द्रियकामवाक्ये च प्रत्यभिज्ञानात् सैव भावना । फलकरणादिभेदेन तु भेदः तस्या उपकारक एव । न च वाच्यं कथं प्राप्तायां भावनायामिन्द्रियसंबन्धो दधिसंबन्धश्च विधीयते इति । यतो न क्वचिदपि भावनायाः फलसंबन्धो विधीयते । लिप्साधिकरण-(४।१।१) न्यायेन रागतः प्राप्तफलसंबन्धानुवादेन साधनमात्रविधानम् । तदुक्तं कारिकायाम्- '**फलांशे भावनायाश्च प्रत्ययो न विधायकः । वक्ष्यते जैमिनिश्चात्र तस्य लिप्सार्थलक्षणा ॥**' इति । अतो नात्र प्रकृतहोमाश्रयस्यैव दध्नः फले विधानमिति सिद्धं कर्मान्तरत्वम् ।

प्रयोजनम्-- पूर्वपक्षे दधिहोमत्वेनापूर्वत्वात् सकृदेव केवलदधिसाधनकहोमानुष्ठानम् । सिद्धान्ते तु होमभेदात् सायंप्रातरभ्यस्तो दधिसाधनको होम इति । **सूत्रं तु**-- कर्मफलसंबन्धगुणफलसंबन्धवाक्ययोः अतुल्यत्वात् तस्येन्द्रियफलस्य संबन्धो गुणे प्रतीयते । गुणादेव फलमित्यर्थः । **तौता.**

* **फलसंबन्धः** हेतुरपूर्वप्रतिपत्तेः । **वा.** २।१।१।१ पृ. ३७३ . * **फलसंबन्धेन** प्रतीयमाना मुख्याः, निष्फलाः शेषाः । वि.४।४।११ . * **फलसंबन्धस्य** अवेष्टौ 'एतयाऽन्नाद्यकामं याजयेत्' इति विधिः, न कर्मान्तरस्य । २।३।१३।२६ .

* **फलसंबन्धाभावे** प्राधान्यायोगः । **वि.** ४।४।४.

फलसंयोगस्त्वचोदिते न स्यादशेषभूतत्वात् । ४।३।१६।३८॥

'वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते' इति विधाय आम्नायते 'यस्मिन् जाते एतामिष्टिं निर्वपति पूत एव स तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवति' इति । तत्र संशयः, इयमिष्टिः कर्तुः पितुः फलाय पुत्रस्य फलाय वेति । कर्मकर्तुः कर्मफलेन संबन्धात् पितुः फलाय इति उत्सूत्रे पूर्वपक्षे प्राप्ते सिद्धान्तमाह । अचोदिते वाक्यशेषे अनुक्ते पितरि पूतत्वादिकस्य फलस्य संयोगो न स्यात् । अशेषभूतत्वात् पितुः फलवचने शेषत्वाभावात् । 'यस्मिन् जाते स पूतो भवति' इति च स्पष्टमेव जातस्य पुत्रस्य फलं ब्रूते । कर्तुः फलं इति तु उत्सर्गः । अत्र वचनेन अकर्तुरपि फलम् ।

अङ्गानां तूपघातसंयोगो निमित्तार्थः । ३९ ॥

ननु 'यत्रैकं कपालं नश्येदेको मासः संवत्सरस्यापेतः स्यात् । अथ यजमानः प्रमीयेत द्यावापृथिव्यमेककपालं निर्वपेत्' इति कपालनाशे निमित्ते आत्मनिःश्रेयसफलं कर्म एवं जातेष्टिरपि इति पूर्वपक्ष्याशङ्कां निराकरोति । अङ्गानां कपालादीनां उपघातसंयोगः नाशवचनं

निमित्तार्थः निमित्तार्थतयैव उपपद्यते, नान्यथा । न हि कपालनाशे तदन्वेषणार्थं इष्टिः क्रियते । जातेष्टेः तु अन्यथापि उपपद्यमानत्वात् पूतत्वादि फलं पुत्रगतमेव, न तु कर्तुः इति सिद्धान्तः ।

अथवा अनेन एकेन सूत्रेण वर्णकं द्वितीयम् । 'वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते' इति श्रुता इष्टिः किं पुत्रे जातमात्रे कर्तव्या उत जातकर्मोत्तरं इति संशये जातमात्रे इष्टिः इति च पूर्वपक्षे प्राप्ते, सिद्धान्तयति । तुशब्दः पूर्वपक्षं निरस्यति । अङ्गानां कालरूपस्याङ्गस्य उपघातः उदरान्निर्गमनं पुत्रजननं इति यावत् । उपघातस्य संयोगः केवलं निमित्तार्थः निमित्ते सति विधानार्थः । तस्मात् जातेष्टिः जातकर्मानुष्ठानोत्तरं कर्तव्या ।

अथ अनेनैव सूत्रेण तृतीयं वर्णकम् । इयं जातेष्टिः किं अन्तर्दशाहे कर्तव्या किंवा जननाशौचसमाप्त्युत्तरं पौर्णमास्याममावास्यायां वा कर्तव्या इति विचारे नियामकाभावात् अन्तर्दशाहे कर्तव्या इति पूर्वपक्षे प्राप्ते, सिद्धान्तयति । अङ्गानां उपघातसंयोगः कार्त्स्न्येन संयोगः निमित्तार्थः कामनानिमित्तविहितकर्मार्थः, काम्यकर्मसु सर्वाङ्गोपसंहारस्य आवश्यकत्वात् । **के.**

* '**फलसंयोगात्तु स्वामियुक्तं प्रधानस्य**' (३।७।२।६) इत्यनेनैव गतार्थत्वात् दीक्षाणामनुदाहरणत्वम् । **वा.** ३।७।५।११.

फलसंयोगात्तु स्वामियुक्तं प्रधानस्य । ३।७।२।६॥

ज्योतिष्टोमे वपनं पयोव्रतं तपश्चाम्नातानि । तेषां याजमानत्वं तृतीयस्याष्टमे पादे द्वितीयाधिकरणे सेत्स्यति । ते वपनादयो धर्माः किं कर्तरि संबद्धाः सन्तः अङ्गप्रधानार्थाः उत भोक्तरि संबद्धाः सन्तः केवलप्रधानार्था इति संशये कर्तृत्वांशेन अङ्गप्रधानार्था इति पूर्वाधिकरणन्यायेन पूर्वपक्षे प्राप्ते सिद्धान्तसूत्रमिदम् । तुशब्दः पूर्वाधिकरणसिद्धान्तप्रत्युदाहरणत्वसूचकः । स्वामियुक्तं यजमानसंयुक्तं यत् वपनादिधर्मजातं तत् भोक्तरि संबद्धं सत् प्रधानस्य केवलस्य भवितुमर्हति नाङ्गानाम् । फलसंयोगात् फलेन संयोगात् । एते हि धर्माः यजमानं फलभोगसमर्थं कुर्वन्ति । तस्मादेते प्रधानार्था एव । **के.**

फलसंयोगात्स्वामियुक्तं प्रधानस्य । ३।७।२।६ ॥

ज्योतिष्टोमे केशश्मश्रुणोर्वपनम्, पयोव्रतानि, तपश्च आम्नातानि । तेषु संदेहः किमङ्गप्रधानार्थानि उत प्रधानार्थानि इति । अस्मिन्नधिकरणे येषां संस्काराणां यजमानगामित्वं व्यवस्थास्यते, तेषामेव विषयत्वम् । अत्रायं पूर्वपक्षः । यद्यपि यजमानस्य द्वैरूप्यमस्ति यागकर्तृत्वं फलभोक्तृत्वं च, तथापि कर्तृत्वावगमपूर्वकत्वाद्भोक्तृत्वावगमस्य सर्वेषामेवाङ्गप्रधानानां उपकारापेक्षित्वात् कर्तृत्वांशोपनिपाते च यजमानस्य साक्षात्प्रयुक्त्या च साङ्गप्रधानकर्तृत्वेन साङ्गप्रधानोपकारोपपत्तेः कर्तृत्वांशोपनिपातात् अङ्गप्रधानार्थत्वमेव वपनादिसंस्काराणामिति । **एवं प्राप्ते, अभिधीयते** । भवेदेवं यदि कर्तृत्वांशोपनिपातिनः संस्कारा भवेयुः । भोक्तृत्वांशनिपातिनश्च ते । कर्तृत्वस्य संस्कारैर्विनापि अध्ययनमात्रनिष्पत्तित्वेनैव सर्वलोकसिद्धत्वात् । फलभोक्तृत्वं तु न संस्कारैर्विना भवतीति न प्रमाणान्तरसिद्धम् । तेन फलभोक्तृत्वांशे एव यजमानस्य योग्यतामादधानाः क्रियाः संस्कारा इत्युच्यन्ते । फलापूर्वस्य च प्रधानजन्यत्वात् प्रधानार्था एव यजमानसंस्काराः । तेन यथा यानि अदृष्टार्थान्यङ्गानि तैः फलभोक्तृत्वम्, न तत्र न्यायेन पूर्वपक्षो विशेषणम् (?) दृष्टार्थान्यङ्गानि दैक्षादीनि फलयोग्यतामादधानान्येवाङ्गानि भवन्ति, तथैतेऽपि संस्कारा इति सिद्धं यजमानसंस्काराणां केवलप्रधानार्थत्वमिति ।

प्रयोजनम्— पूर्वपक्षे यद्यङ्गार्थत्वमपि संस्काराणाम्, तदा दैक्षादयो ज्योतिष्टोमाङ्गानि विकारेष्वपि कर्तव्याः । सिद्धान्ते तु नेति । **सूत्रं तु** फलभोक्तृत्वात् स्वामिभूतयजमानसंयुक्तं वपनादि प्रधानस्यैवेति । **तौता.**

फलसंयोगाधिकरणम् । जातेष्टिः पुत्रगतपूतत्वादिफलप्रयुक्ता ॥

फलसंयोगस्त्वचोदिते न स्यादशेषभूतत्वात् । ४।३।१६।३८॥

भाष्यम्— 'वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे

जाते' इति विधाय आम्नायते, 'यस्मिन् जाते एतामिष्टिं निर्वपति, पूत एव स तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवति' इति । तत्र संदेहः किमात्मनिःश्रेयसाय, उत पुत्रनिःश्रेयसायेति । आत्मनिःश्रेयसायेति ब्रूमः । नेमानि फलदानि परस्य भवन्ति कर्माणि । कुतः ? आधाने आत्मनेपदनिर्देशात् । यथा 'यद्येकं कपालं नश्येदेको मासः संवत्सरस्यापेतः स्यात् । अथ यजमानः प्रमीयेत, द्यावापृथिवीयमेककपालं निर्वपेत् । यदि द्वे नश्येतां द्वौ मासौ संवत्सरस्यापेतौ स्याताम् । अथ यजमानः प्रमीयेत, आश्विनं द्विकपालं निर्वपेत् । संख्यायोद्वासयति, यजमानस्य गोपीथाय' इति कपालनाशे निमित्ते आत्मनिःश्रेयसफलं कर्म दर्शयति । एवमिहापि द्रष्टव्यम् । तस्मात् आत्मनिःश्रेयसार्थमिति । **एवं प्राप्ते, ब्रूमः** । फलसंयोगो न स्यात् पितुः । फलवचनं शेषभूतं पुत्रस्य, न पितुः । कथम् ? एवं श्रूयते, 'वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते । यदष्टाकपालो भवति, गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति । यन्नवकपालो भवति, त्रिवृतैवास्मिंस्तेजो दधाति । यदेकादशकपालस्त्रिष्टुभैवास्मिन् इन्द्रियं दधाति । यद् द्वादशकपालः, जगत्यैवास्मिन् पशून् दधाति । यस्मिञ्जाते एतामिष्टिं निर्वपति, पूत एव स तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवति' इति । यो जातस्तत्र फलं श्रूयते । नास्ति वचनस्यातिभारः । तस्मात् पुत्रस्य फलमिति । यदुक्तं न परस्य फलदान्येतानि कर्माणीति । तदुच्यते । यत् पुत्रस्य फलम्, आत्मनः सा प्रीतिः । तस्मादात्मनेपदं न विरुध्यते । एतामेव आत्मनः प्रीतिमभिप्रेत्य भवति वचनम्, 'आत्मा वै पुत्रः' इति । '**अङ्गादङ्गात्संभवसि हृदयादभिजायसे । आत्मा वै पुत्रनामाऽसि स जीव शरदः शतम् ॥**' इति ।

टुप्— अर्थवादो रात्रिसत्रन्यायेन फलप्रतिपत्त्यर्थ इति स्थिते, किं पुत्रजन्मनिमित्तं पितुः फलमुत पुत्रस्येति । पुत्रस्यैव । कुतः ? 'यस्मिञ्जात एतामिष्टिं निर्वपति, पूत एव सः' इति सर्वनाम्ना पुत्रस्य फलं प्रतिपाद्यते, पूत एव सः । कः ? यो जातः इति । अतो वचनसामर्थ्यात् पुत्रस्यैव फलम् । पवनादिसंयुक्तः पुत्रः इष्यते एव इत्यात्मनेपदमविरुद्धम् ।

अङ्गानां तूपघातसंयोगो निमित्तार्थः । ३९ ॥

भाष्यम्— अथ यदुक्तम्, 'यद्येकं कपालं नश्येत्' इत्येवमादि । तत्रोच्यते । अङ्गानां उपघातसंयोगो निमित्तार्थं उपपद्यते, नान्यथा । नहि कपाले नष्टे तदन्वेषणार्था इष्टिर्युक्ता । नहि काकिन्यां नष्टायां तदन्वेषणं कार्षापणेन क्रियते ।

शा— '**येनैव वाक्यशेषेण फलमेतत् प्रकल्प्यते । तेनैव पुत्रगामित्वप्रतिपत्तिरपि स्फुटा ॥**' १७ .

सोम— सोमस्य दर्शपूर्णमासोत्तरकालत्वे अभिहिते तत्प्रसङ्गात् उत्तराधिकरणे वैश्वानरेष्टेः कालो निरूपयिष्यते । तत्र कुमारविपत्तिप्रसङ्गात् जातकर्मानन्तरं इति करिष्यमाणः सिद्धान्तः पूतत्वादेः पुत्रगतत्वं विना नोपपद्यते इति तदुपयोगितया पुत्रगतत्वनिरूपणात् **संगतिः** । ननु पुत्रजननिमित्तकत्वात् अस्या इष्टेः प्रत्यवायपरिहार एव फलम्, न तु पूतत्वादिकमिति चेत्, उच्यते, विधेः फलाकाङ्क्षायां श्रुतत्वात् आर्थवादिकं पूतत्वादिकमेव फलत्वेन स्वीक्रियते । पूतत्वादिफलसंबन्धानन्तरं तावता नैमित्तिकत्वानिर्वाहात् तन्निर्वाहार्थं पश्चात् प्रत्यवायपरिहारः अश्रुतोऽपि फलत्वेन कल्प्यते इति पूतत्वादिकं प्रत्यवायपरिहारश्च इत्युभयमपि अत्र फलम् । तत्र च उत्पत्तौ निमित्तसंयुक्तस्यैव पूतत्वादिकं फलं इति निमित्तप्रयुक्तानुष्ठानानुसारितया पूतत्वादेः स्वातन्त्र्याभावात् एकस्मिन्नेव प्रयोगे पूतत्वादिफलपञ्चकं (पूतत्व–तेजस्वित्व–अन्नादत्व–इन्द्रियावित्व–पशुमत्त्वरूपं) भवति, न तु योगसिद्धिन्यायात् (४।३।१२) एकैकं फलम् । **सूत्रार्थस्तु**– वाक्यशेषगतफलभाक्त्वेन अचोदिते पितरि फलसंयोगो न स्यात्, तद्गतत्वेन अप्रतिपादितस्य फलस्य तं प्रति शेषत्वाभावात् इति । १७.

वि— 'वैश्वानरेष्टया पूतत्वं पितुः पुत्रस्य वा, ऽग्रिमः । कर्तुरेव फलं युक्तं कर्तृत्वं पितुरेव हि ॥, जाते यस्मिन्निष्टिमेतां निर्वपेत् तस्य पूतता । तच्चेप्सितं पितुस्तेन पिता तत्र प्रवर्तते ॥ '

भाट्ट— वैश्वानरेष्टिस्तावत्पूतत्वाद्यार्थवादिकफलार्था, सत्यपि निमित्तसंयोगेन अकरणे प्रत्यवाये भावनाभाव्यत्वेन

पापक्षयापेक्षया पूतत्वादेरेव लघुभूतस्यान्वयात् । सा च पुत्रगतपूतत्वादिफलप्रयुक्ता, उत कर्तृगतपूतत्वादिफलप्रयुक्तेति चिन्तायाम्, विधिना कर्तृसमीहितस्यैव आक्षेपात् आधानगतात्मनेपदेन च अग्निप्रयोज्यफलस्य आत्मगामित्वावगतेः इष्टिकर्तर्येव फलम् । न च 'यस्मिन् जाते' इत्यादिना धर्मिग्राहकप्रमाणेन पूतत्वादेः पुत्रगतत्वावसायः, तस्यापि 'स तेजस्वी' इति सर्वनाम्ना निर्वपतिकर्तुरेव समानाधिकरणविभक्तिनिर्दिष्टस्य परामर्शेनाविरोधित्वात् । **इति प्राप्ते,** यच्छब्दसमभिव्याहारे सति तच्छब्दस्य तदर्थपरामर्शित्वनियमेन पुत्रगतपूतत्वादेरेव फलत्वावसायात्, तस्यापि कर्तृसमीहितत्वेन विध्यात्मनेपदयोः अविरोधात् पुत्रगतपूतत्वादिप्रयुक्तैव सा । अकरणे प्रत्यवायस्तु कर्तृनिष्ठ एव । प्रयोजनं पुत्रमरणेऽपि जातेष्टिः, पितरि फलसंस्कारश्च पूर्वपक्षे । सिद्धान्ते नेति । १४.

मण्डन— 'पुत्रे फलं स्यात् जातेष्टेः ।' १७.

शंकर— 'जातेष्टौ पुत्रपूतता ।' फलम् । १७.

फलसंस्कार्याधिकरणम् । फलसंस्कार्यौ कर्मभेदकौ ॥

फलं चाकर्मसंनिधौ । २।३।१२।२५ ॥

भाष्यम्— अनारम्य किञ्चित् श्रूयते 'आग्नेयमष्टाकपालं निर्वपेद् रुक्कामः' 'अग्नीषोमीयमेकादशकपालं निर्वपेद् ब्रह्मवर्चसकामः' 'ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः' इति । अत्र संदिह्यते, किं प्राकृतेषु आग्नेयादिषु फलं विधीयते उत प्राकृतेभ्यः कर्मान्तराणि एतानि इति । किं प्राप्तम्? प्राकृतेषु फलविधिरिति । कुतः? विदिता आग्नेयादयः प्रत्यभिज्ञायन्ते । तस्मात् तेषामनुवादः फलसंबन्धार्थ इति । **एवं प्राप्ते, ब्रूमः** । फलं च भेदकं अकर्मसंनिधौ श्रूयमाणम् । कथम्? अनुवादे सति न शक्येत फलं विधातुम्, विधायकस्याभावात् । न हि अविधीयमान उपायो रुचो भवतीति गम्यते । अपि च रुक्कामेऽत्र विधीयमाने कामस्यानित्यत्वात् आग्नेयादीनां नित्यत्वात् संबन्धो नावकल्पेत । एवं सर्वत्र । तस्मात् कर्मान्तराणि ।

वा— एवं (षडपि भेदहेतवः पर्यवसिताः ।) संप्रति प्रकरणान्तरस्यैव प्रकारान्तरप्रदर्शनं क्रियते । यो नाम प्रकरणान्तरकृतमेव कालसंबन्धकृतं वा भेदं मन्यते, न असंनिधानानुपादेयवस्तुसंबन्धमात्रकृतम्, तं प्रति विस्पष्टीकरणार्थं 'फलं चाकर्मसंनिधौ' इत्यारभ्यते । तत्तु एतत् सप्तमं भेदाधिकरणम् । तत्र देशनिमित्तयोः अनुपादेयत्वं सुज्ञानं इति पूर्वाधिकरणे सिद्धत्वात् इहानुदाहरणम् । पूर्वत्रैव तु एवमादि दर्शयितव्यम् । 'सत्रायागूर्य विश्वजिता यजेत' 'साम्युत्थाने विश्वजित्' इत्यादीनि निमित्ते । देशेऽपि 'दक्षिणेन तीरेण सरस्वत्या आग्नेयेनाष्टाकपालेन' 'शम्यापरासमीयात्' इत्यादीनि । यद्यप्यत्रातिरात्रादिवदेव यज्यश्रवणं तथापि प्राक् यज्यनुमानात् तद्धितान्तपदयुक्तवाक्यापरिसमाप्तेः वाक्यान्तरस्य अनपेक्षणात् कर्मान्तरत्वम् । फलसंस्कार्ययोस्तु तुल्यहेतुत्वात् इह विचारः । तत्र फलमुदाहृतमेव । संस्कार्यमपि उदाहर्तव्यम् 'त्रैधातवीया दीक्षणीया' इति । यजमानसंस्कारार्थत्वेन उपादानात् । अनारभ्य किञ्चित् इति (भाष्यं) प्रकरणान्तरावरोधाभावज्ञापनार्थम् । तत्र यागोद्देशेन आहवनीयादिवत् फलं विधेयम् । शक्यं हि तत् पुरुषेण दर्शपूर्णमासस्थेनापि कामयितुं इति मत्वा आह (भाष्ये पूर्वपक्षी) प्राकृतेषु फलविधिरिति । सिद्धान्तवादी तु स्वर्गकामाधिकरणसिद्धं (६।१।१) 'प्रत्यर्थं चाभिसंयोगात्' (६।१।१।३) इति फलोद्देश्यत्वं मत्वा वदति 'न शक्येत फलं विधातुम्' इति । विधीयमानं क्रियाङ्गत्वात् अफलमेव प्राप्नोति । क्रियाऽपि वा विधीयमाना तादर्थ्ये प्रतिपद्यमाना निष्फलैव स्यात् । न च उभयोः उद्दिश्यमानयोः उपादीयमानयोर्वा संबन्धोऽस्ति इत्येकान्तेन फलमुद्दिश्य कर्म विधातव्यम् । ततश्च पूर्ववदेव सिद्धो भेदः । एतेन संस्कार्यमपि व्याचक्षीत । किञ्च '**न चानित्यस्य काम्यस्य नित्यैरग्न्यादिकर्मभिः । कथञ्चिदपि संबन्धः साध्यसाधनरूपतः** ॥' तस्मात् कर्मान्तराणीति सिद्धम् ।

शा— 'आग्नेयमष्टाकपालं निर्वपेद् रुक्कामः' इत्यनारभ्य श्रुतम्, तथा 'त्रैधातवीया दीक्षणीया' इत्यश्वमेधे । अत्रापि कर्मभेदः इति सिद्धान्तः ।

सोम— पूर्वन्यायातिदेशात् **संगतिः । प्रयोजनं** पूर्वपक्षे रुक्कामार्थे न पृथक् प्रयोगः, किन्तु गुणफलवत् दर्शपूर्णमासप्रयोगेणैव तत्सिद्धिः । सिद्धान्ते तु कर्मान्तरत्वात् पृथक् प्रयोग इति ।

वि— 'अष्टाकपालमाग्नेयं रुक्कामः प्राकृते फलम् । कर्मान्यद्वा, फलं भानात् पूर्वन्यायाप्रवेशनात् ॥, मा भूद् भिन्नं प्रकरणं कर्मान्तरमसंनिधेः । अनारभ्याधीतमेतद् रूपं त्वन्यूनमीक्षते ॥'

भाट्ट— फलस्य 'आग्नेयमष्टाकपालं निर्वपेद्रुक्कामः' इति (कर्मभेदकत्वम्) । संस्कार्यस्य तु 'औदुम्बरीं प्रोक्षति' इति व्रीहिप्रोक्षणात् कर्मान्तरम् ।

मण्डन— 'आग्नेयोऽन्यो रुगर्थिनः ।'

शंकर— 'फलसंस्कार्ययोस्तथा ।' भेदकत्वम् ।

* **फलसिद्धिः** आदित आरभ्य कृत्स्नाङ्गोपेतप्रधानप्रयोगाधीना । कु. ६।३।९।२४.

* **फलस्वाम्यं** कर्मजन्यफलभोक्तृत्वम् । **मीन्या.** * फलस्वाम्यं पुरुषविशेषणत्वेन श्रूयमाणाधिकारिविशेषणविशिष्टस्यैव । 'राजा राजसूयेन स्वाराज्यकामो यजेत' इत्यत्र राज्ञः सतः स्वाराज्यकामस्य फलस्वाम्यम् । **मीन्या.**

* **फलीकरणहोमः** पिष्टलेपहोमश्च प्रतिपत्तिकर्मणी । **भा.** ८।४।५।२७. * फलीकरणहोमः । व्रीह्यवघाते ये अवशिष्टाः कणाः, तान् जुह्वां चतुर्गृहीते आज्ये प्रक्षिप्य दक्षिणाग्नौ 'अग्नेऽदब्धायो०' (तैसं. १।१।१३।३) इति मन्त्रेण जुहोति । फलीकरणाः तण्डुलकणाः । (फलीकरणाः तण्डुलेषु क्रियमाणेषु अपनेया मालिन्यांशाः— **तैसंभा.**) । **वि.** ५।१।१५, * फलीकरणहोमः सवनीयपुरोडाशे अनुयाजैः सह आग्निमारुतादूर्ध्वं नोत्क्रष्टव्यः । ५।१।१५. * पिष्टलेप**फलीकरणहोमयोः** प्रकृतितोऽपि अनूयाजोत्तरत्वं नास्ति । **भाट्ट.** ५।१।१५.

* **फाल्गुनानि** नाम लताविशेषः सोमस्य प्रतिनिधिर्भवति । 'आदारांश्च फाल्गुनानि चाभिषुणुयात्' (तैब्रा. १।४।७) । सादृश्येन प्रतिनिधितया अनेकेषु द्रव्येषु प्राप्तेषु फाल्गुनानां नियमविधिरयम् । फल्गुनीनक्षत्रयुक्तपूर्णिमामासे येषां फलपर्णादिभिर्वृद्धिस्तादृशवल्लीविशेषाः फाल्गुनानि इति अस्माकं मतम् । सायणाचार्यैः तु लोकव्यवहारे फल्गु स्वल्पमेव प्रयोजनं येषां आर्द्रदूर्वाङ्कुरादीनां तृणानां तानि फाल्गुनानि इति । **के.** (वि. ६।३।१३). * '**फाल्गुन्यां** पौर्णमास्यां प्रयुङ्क्ते' इति वाक्येन चातुर्मास्यारम्भः विहितः । **संकर्ष.** ३।१।१८.

* **फाल्गुनीप्रतिपद्वसन्तोत्सवादीनां** न शास्त्रादृते नियमक्रियाप्रमाणमस्ति । **वा.** १।३।३।७ पृ. २०५ । फाल्गुनीपौर्णमास्यनन्तरायां प्रतिपदि वसन्तनिमित्त उत्सवः । **सु.** पृ. १८७.

ब

बकबन्धनन्यायः । बकबन्धनाय बकस्य शिरसि नवनीतस्थापनायासो यथा वृथा । नवनीतस्थापनकाले एव बन्धनस्य सुसाध्यत्वात् । (के.)

बकवृत्तिन्यायः । स्पष्टोऽर्थः । **साहस्री.** ९५७.

बधिरान्मन्दकर्णः श्रेयानिति न्यायः । स्पष्टार्थोऽयम् । **साहस्री.** ९९९.

बधिरकर्णजपन्यायः । यत्र क्रिया निष्फला तत्र अस्य प्रवृत्तिः । **साहस्री.** ३०८.

* बबर इति शब्दानुकृतिः (यथा मर्मरः) । **भा.** १।१।८।३१.

* बभ्रुः सौम्यः ऐकादशिनेषु तृतीयः पशुः अश्वमेधे ज्योतिष्टोमे च । **वि.** ८।१।७.

* बर्करत्वं -महिषत्व- (? मेषत्व)एकार्थसमवायिनी बाल्यावान्तरजातिः । सु. पृ. १४११.

* बर्कुः वार्ष्णिः । 'इति ह स्माह बर्कुर्वार्ष्णिः, माषानेव मह्यं पचत, न वा एतेषां हविर्गृह्णाति' । दर्शपूर्णमासप्रकरणे एतत् । वि. ६।७।१२.

* बर्हिः आतिथ्यायाः उपसदां अग्नीषोमीयस्य च साधारणं ज्योतिष्टोमे, न पशुस्योपदेशः न निरिष्टकस्य न वा धर्मविधिः । ४।२।१४।२९-३०. मीको. पृ. ८८४ 'आतिथ्योपसदग्नीषोमीयपशूनाम्' इत्यत्र द्रष्टव्यम् । * बर्हिः कुशमयं दर्शपूर्णमासयोः । वि. १०।४।२. * बर्हिश्च अङ्गप्रधानार्थम् । टुप्. ४।२।१४।२९. * बर्हिः दर्शपूर्णमासयोः असकृदाच्छिन्नं भवति । भा. ११।१।७।३७. * 'बर्हिर्देवसदनं दामि' इति मन्त्रः जातिविधिसरूपः । बाल. पृ. ६४. * 'बर्हिर्देवसदनं दामि' इति लवनमन्त्रः मुख्यस्य कुशमयादेर्लवनस्याङ्गम्, न तु उलपराजिशब्दितस्य गौणस्य लवनस्य । वि. ३।२।१. * बर्हिः निशियज्ञे अमावास्यातन्त्रात् पृथक् कार्यम् । भा. १२।२।५।१८. * 'बर्हिः प्रति समानयते जुह्वामौपभृतम्' इत्यनेन जुह्वामौपभृताज्यस्य समानयने कालमात्रं विधीयते । भाट्ट. ४।१।१५. * बर्हिः 'यज्ञस्य घोषदसि' इत्यस्मिन्ननुवाके (तैसं. १।१।१२) प्रोक्तैर्मन्त्रैर्दात्राच्छिन्नं सत् संपद्यते दर्शपूर्णमासयोः, राजसूये रत्निनां हविःषु मैत्राबार्हस्पत्ये तु 'स्वयंदितं (नं) बर्हिः' न तत्र छेदनादि मन्त्रा वा । वि. १०।१।१. * बर्हिः वेदिस्तरणार्थम् । भा. १२।२।५।१८. * बर्हिः वैश्वदेवपर्वणि 'त्रेधा संनद्धं बर्हिर्भवति' इति विहितम् । वि. ७।१।३, * बर्हिः सर्वं संस्कृतं वेदेरुपस्तरणे समाप्तं भवति इति कृत्वा पवित्रकरणं परिभोजनीयादर्भैः । ३।८।१८.

卐 'बर्हिः स्तृणीहि' इति प्रैषः सोमार्थः ॥

सवनीयस्य पशोः क्रमे 'अग्नीदग्नीन् विहर, बर्हिः स्तृणीहि, पुरोडाशानलंकुरु, पशुनोदेहि' इति प्रैषः श्रुतः । तत्र बर्हिःस्तरणं पश्वर्थं पुरोडाशार्थं च, उभयोरविशेषेण संनिधानात् आकाङ्क्षितत्वाच्च । मध्यंदिनतृतीयसवनयोरप्येवमेव प्रैषदर्शनात् तत्र च पशोरभावात् तदेकरूप्याय केवलपुरोडाशार्थमेव वा । इति प्राप्ते, ऐष्टिकेषु प्रत्यक्षस्य बर्हिर्विधेरभावात् 'अनुपृष्ठ्यं बर्हिः स्तृणाति' इति सौमिकबर्हिर्विधेः सत्त्वाच्च तस्यैवायं स्तरणार्थः प्रैषः । संकर्ष. १।३।१५

* पितृयज्ञे 'सकृदाच्छिन्नं बर्हिर्भवति' । भा. ११।१।७।३६. * सौमारौद्रे चरौ आभिचारिके 'शरमयं बर्हिर्भवति' । वि. १०।४।२. * बर्हिषा उपलक्षितकालस्य पौर्णमासे व्रतार्थं विधानं वत्सेन च दर्शे । ६।४।१२।३४-४०. मीको. पृ. २०६० 'दर्शपूर्णमासयोः व्रते' इत्यत्र द्रष्टव्यम् । * 'बर्हिषा पूर्णमासे व्रतमुपैति' इत्याद्युक्तकालस्य संनयदसंनयदुत्तमसाधारणत्वम् । ६।४।१३।४१-४३. * 'बर्हिषा यूपावटमवस्तृणाति' इति पशुगतं बर्हिः दर्शपूर्णमासगतबर्हिर्धर्माणां न ग्राहकम् । भा. ७।३।७।१८, * 'बर्हिषा यूपावटमवस्तृणाति' इति बर्हिषि प्राकृतबर्हिर्धर्मा न कर्तव्याः ज्योतिष्टोमे अग्नीषोमीये पशौ । ३।८।१६।३१. * बर्हिषः आतिथ्याङ्गस्य अग्नीषोमीयार्थे स्तरणकाले स्तरणमन्त्रस्यावृत्तिः कर्तव्या ज्योतिष्टोमे । १२।१।२०।४५. * बर्हिषः आतिथ्यादेशात् अग्नीषोमीयदेशे नयनकाले संनहनमन्त्रस्य हरणमन्त्रस्य च नावृत्तिः । १२।१।२१।४६-४७. * बर्हिषः प्रयाजस्य चतुर्थतां दर्शयति, 'चतुर्थोत्तमयोः प्रति समानयति' इत्युक्ते सति 'अतिहायेडो बर्हिः प्रतिसमानयति' इत्युक्तत्वात् । भा. ५।१।४।७. * बर्हिषः प्रसूनस्य नियम आग्रयणे जघन्यद्यावापृथिव्यानुरोधेन मुख्यस्याप्यैन्द्राग्नादेः विरोधाभावात् । १२।२।१४।३४. * बर्हिषः बर्हिर्धर्माणां च वेद्याः वेदिधर्माणां च विधिः विनियोगसाधारण्यविधिः । बाल. पृ. २०. * बर्हिषः लूनस्य संनहनहरणे उपादानार्थे । तत्र मन्त्रौ स्वीक्रियमाणस्यैव उपवर्णनारूपौ । भा. १२।१।२१।४६, * बर्हिषः वेदिस्तरणयोग्यस्य उपसादनं लवने प्रयोजनम् । ११।४।१४।४४, * बर्हिषः संस्काराः प्रोक्षणम्, अग्राणामुपपायनम्, मूलानामवसेचनम् । १२।१।१९।४२.

* बर्हिरधिकरणम् । ३।२।१।१-२. 'बर्हिर्न्यायः' इत्यत्र द्रष्टव्यम् ।

* बर्हिरनुयाजः नास्त्यवभृथे 'अपबर्हिषावनुयाजौ यजति' इति । वि. १०।७।१५.

卐 बर्हिराज्ययोरसंस्कारे शब्दलाभादतच्छब्दः । १।४।७।१०॥

'बर्हिर्लुनाति' 'आज्यं निर्वपति' इति बर्हिराज्यशब्दौ संस्कारनिमित्तौ जातिशब्दौ वा इति विचारे सिद्धान्तमाह । असंस्कारे संस्काराभावेऽपि लोकप्रसिद्धयोः बर्हिराज्ययोः पदार्थयोर्विषये शब्दलाभात् बर्हिःशब्दस्य आज्यशब्दस्य च लाभात् । अतच्छब्दः न संस्कारवाचकः बर्हिःशब्दः आज्यशब्दो वा । एवं पुरोडाश-आमिक्षा-धानादिशब्दा अपि द्रष्टव्याः । के.

卐 बर्हिराज्ययोरसंस्कारे शब्दलाभादतच्छब्दः । १।४।८।१०॥

बर्हिराज्ययोः पुरोडाशे च संदेहः किमेष संस्कारशब्द उत जातिनिबन्धन इति । अत्र प्रभाकरेण संगतिलोभात् अतःप्रभृति अधिकरणत्रयमेतत् इत्थमुपवर्णितम् । जातिनिमित्तसंस्कारनिमित्तयौगिकत्वानध्यवसायात् अप्रामाण्यं पूर्वपक्षे, सिद्धान्ते तु यथाभाष्यं प्रामाण्यमिति । तदयुक्तम् । वक्ष्यमाणपूर्वपक्षन्यायेनैव सर्वत्राध्यवसायसंभवात् यत्किञ्चिदेतत् । इति यथावार्तिकमेवाधिकरणं प्रस्तूयते । इदानीं कर्मनामधेयप्रसङ्गेन द्रव्यनामस्वपि प्रवृत्तिनिमित्तं अधिकरणत्रयेण निरूप्यते । तत्रैतदधिकरणे तावत् अयं पूर्वपक्षिणोऽभिसंधिः । 'बर्हिर्लुनाति' इत्येतद्वाक्यविहितलवनसंस्कृते कुशे बर्हिःशब्दं याज्ञिकाः प्रयुञ्जाना दृश्यन्ते । तथा 'आज्यं विलापयति' इत्येतद्वाक्यविहितविलापनसंस्कृते घृते आज्यम् । एवं 'पुरोडाशं प्रथयति' इत्येतद्वाक्यविहितप्रथनसंस्कृते पिष्टके पुरोडाशशब्दम् । तेन यथा 'यूपं छिनत्ति' इत्येतद्वाक्यविहितछेदनजनितसंस्कारवति काष्ठे यूपशब्दप्रयोगदर्शनात् यत् छिद्यते स यूपः इति संस्कारवचनत्वं यूपशब्दस्य, तथा यत् लूयते तद् बर्हिः, यद् विलाप्यते तदाज्यम्, यत् प्रथ्यते स पुरोडाशः इति सर्वत्र संस्कारवचनत्वमेव । ननु यूपशब्दस्य अलौकिकार्थत्वेन संस्कृतेष्वेव प्रयोगदर्शनात् भवतु संस्कारवचनत्वम् । बर्हिरादिशब्दानां तु असंस्कृतेष्वपि प्रयोगदर्शनात् कथं संस्कारवचनत्वम् । मैवम्, 'शास्त्रस्था वा तन्निमित्तत्वात्' इति न्यायेन शास्त्रस्थानामेव याज्ञिकानां प्रसिद्धिर्बलीयसी । सा तु संस्कृतगोचरैव । अतस्तद्विरोधवशात् शास्त्रस्थप्रसिद्धेर्गौणत्वेनाप्युपपत्तौ संस्कारवचनत्वं बर्हिरादिशब्दानामिति । एवं प्राप्ते, अभिधीयते । भवेदेवं यदि शास्त्रस्थाशास्त्रस्थप्रयोगयोर्विरोधो भवेत् । न चैतदस्ति । तथाहि, यस्यामेव कुशजातौ बर्हिःशब्दं अशास्त्रस्थाः प्रयुञ्जते सा जातिः शास्त्रस्थप्रयोगेऽपि अनपगतैव । तेनैव उभयप्रयोगानुगतैकजातिवचनत्वेनैव अविरोधात् सकलप्रयोगोपपत्तौ न क्वचित् गौणत्वम्, क्वचित् संस्कारवचनत्वं इत्युपपद्यते । तदुक्तम् 'एकदेशेऽपि यो दृष्टः शब्दो जातिनिमित्तकः । (जातिनिबन्धनः इति मूले पाठः) तदत्यागान्न तस्यास्ति निमित्तान्तरकल्पना ॥' इति (वा. पृ. ३४३) । एवं च सति 'बर्हिर्लुनाति' पूर्वसिद्धबर्हिरुद्देशेन लवनविधानात् 'यद् बर्हिः, तत् लुनाति' इति यथावस्थितवचनोपपत्तौ 'यत् लुनाति, तद् बर्हिः' इतिवचनव्यक्तिविपर्यासोऽपि न भविष्यति । यूपे तु गत्यन्तराभावात् तथाश्रितम् । तदुक्तम्, 'न च यूपादितुल्यत्वमन्यथाऽप्युपपत्तितः । लोकादलभ्यमानार्थास्ते ह्यगत्या तथाऽऽश्रिताः ॥' (वा. पृ. ३४३) इति ।

प्रयोजनम् — पूर्वपक्षे 'बर्हिषा यूपावटमवस्तृणाति' इति संस्कृतैरेवास्तरितव्यम् । सिद्धान्ते तु कुशमात्रेणैवेति । सूत्रं तु बर्हिराज्यपदार्थयोः असंस्कारे असत्यपि संस्कारे शब्दलाभात् बर्हिराज्यशब्दप्रयोगात् अतच्छब्दः असंस्कारशब्दो बर्हिःशब्दः आज्यशब्दश्चेति । तौता.

卐 बर्हिराज्याधिकरणम् । आज्याधिकरणम् । बर्हिराज्यशब्दौ जातिवचनौ तेन यूपावटस्तरणबर्हिः यूपाञ्जनाज्यं च लौकिकमेव असंस्कृतं ग्राह्यम् ॥

बर्हिराज्ययोरसंस्कारे शब्दलाभादतच्छब्दः । १।४।७।१०॥

भाष्यम्— बर्हिराज्ययोः पुरोडाशे च संदेहः किमेते संस्कारशब्दाः, उत जातिशब्दा इति । संस्कारशब्दा इति ब्रूमः । संस्कृतेषु तृणेषु बर्हिःशब्दमुपचरन्ति सर्वत्र, नासंस्कृतेषु । संस्कृते च घृते आज्यशब्दम् । तथा संस्कृते

पिष्टे पुरोडाशशब्दम् । नन्वसंस्कृतेऽपि कस्मिंश्चिद्देशे उपचर्यंते यथा वर्हिरादाय गावो गता इति भवन्ति वक्तारः । तथा आज्यं क्रय्यमिति, पुरोडाशेन मे माता प्रहेलकं ददातीति । सादृश्यात् तेषु प्रयोगः । यथोपशये यूपशब्दः । कुत एतत् ? यत एकदेशे हि शब्दप्रयोगः । तस्मात् संस्कारशब्दा इत्येवं प्राप्तम् । एवं **प्राप्ते, ब्रूमः ।** बर्हिरादिषु असंस्कृतेष्वपि शब्दलाभान्न संस्कारशब्दाः । ननूक्तं सादृश्यादेकदेशे भविष्यन्ति । तन्न । प्रसिद्धे हि संस्कारशब्दत्वे, सादृश्यादिति शक्यते वक्तुम् । तच्चा-प्रसिद्धम् । कथम् ? वर्हिरादिशब्दैरुद्दिश्य संस्कारा विधी-यन्ते । तेन सत्सु शब्देषु संस्कारैर्भवितव्यम्, सति च संस्कारे शब्दलाभः इतीतरेतराश्रयं भवति । न च अविहिताः संस्कारा भवन्ति, यानालोच्य लोकः प्रयुञ्जीत । तस्मान्न लोकाः संस्कृतेषु बर्हिरादीन् प्रयुञ्जते । तत एक-देशेऽपि जातिनिमित्ता दृष्टाः, सर्वत्र जातिनिमित्ता भवितुमर्हन्ति । न चालौकिकानां सतां वेदादेव पूर्वोत्तर-पदसंबन्धमनपेक्ष्य शक्यतेऽर्थोऽध्यवसातुम् । पूर्वोत्तरपदे अनर्थके मा भूतामित्येवं स परिकल्प्येत । अशक्यस्तु अनवगम्यमानः परिकल्पयितुम् । अर्थवती च ते पदे पूर्वोत्तरे लौकिकेन असंस्कृतप्रयोगेण भविष्यतः । तस्मा-ज्जातिशब्दा एवंजातीयकाः । **प्रयोजनम्** ‘ वर्हिषा यूपावटमवस्तृणाति ’ इति संस्कृतैरेव स्तरितव्यं यदि पूर्वः पक्षः , विपरीतं सिद्धान्ते ।

वा— नामधेयप्रस्तावेन द्रव्यनामसु निमित्तं प्रति अधिकरणत्रयमारभ्यते । तुल्यहेतुत्वात् पुरोडाशोऽपि उदाहृतः । तत्र ‘शास्त्रस्था वा तन्निमित्तत्वात्’ (१।३। ४।९) इति याज्ञिकानां संस्कृतेषु प्रयोगात् सार्वत्रिक-त्वादविगीतत्वाच्च संस्कारनिमित्तता । तथाहि, ‘ **पुरो-डाशादिभिर्लोके व्यवहारो न दृश्यते । तस्माद् यूपादिवद्वेदात्तेषां संस्कारहेतुता ॥** ’ तन्नास्ति । कुतः ? ‘ **एकदेशेऽपि यो दृष्टः शब्दो जाति-निबन्धनः । तदत्यागान्न तस्यास्ति निमित्तान्तर-कल्पना ॥** ’ ‘ये एव लौकिकाः शब्दास्ते एव वैदिकास्ते एवामीषामर्थाः ’ इति स्थितत्वात् (१।३।९ वर्णकं १) लोकप्रसिद्धिप्रतीक्षे वेदे यत्र एकदेशेऽपि जातिनिमित्तता लभ्यते, न तत्र पुनर्निमित्तान्तरशक्ति-कल्पना संभवति । संस्कृतेष्वपि जातेरनपगमात् तन्नि-मित्ततातिक्रमो न शक्यो वक्तुम् । अतश्च शास्त्रस्थैरप्य-विरोधान्न बाधः । किंच, ‘ **वेदेनापि च संस्कारात् प्रागेव च्छेदनादिकात् । तद्विधौ जातिशब्दत्व-माश्रितं लोकसंमतम् ॥** ’ तेन जातिमेते न व्यभि-चरन्ति । व्यभिचरन्ति तु संस्कारान्, अविहित-त्वात् लोकव्यवहारवेलायां संस्काराणामभावात् । ‘ **न च यूपादितुल्यत्वमन्यथाऽप्युपपत्तितः । लोकाद-लभ्यमानार्थास्ते ह्यगत्या तथाऽऽश्रिताः ॥** ’ यदि हि छेदनविधिवेलायां बन्धनविधौ वा कश्चिल्लौकि-कोऽर्थो लभ्येत, ततः किमेवं व्यवस्थितवचनव्यक्तिविप-र्ययेण कल्प्येत ‘ यच्छिद्यते स नूनं यूपः ’ इति । अस्ति च बर्हिरादेर्गतिस्तस्मादतुल्यता ।

शा— कर्मनामप्रसङ्गात् द्रव्यनाम्नां बर्हिराज्यपुरोडाश-शब्दानां संस्कृतेषु शास्त्रस्थैः सर्वैः प्रयुज्यमानानां असंस्कृतेऽपि जातिमात्रे कैश्चिदशास्त्रस्थैः प्रयुक्तानां किं संस्कारनिमित्तता यूपादिवत्, उत जातिवाचिता इति चिन्त्यते । तत्र पील्वादिवत् अश्ववालादिवच्च शास्त्रस्थ-याज्ञिकप्रसिद्धिः सार्वलौकिकी च अशास्त्रस्थम्लेच्छकति-पयप्रसिद्धेर्बलीयसी, इति संस्कारनिमित्तता । इति **प्राप्ते, ब्रूमः । ‘ अन्वयव्यतिरेकाभ्यामेतेषां जाति-वाचिता । व्यभिचारान्न संस्कारनिमित्तत्वं प्रक-ल्प्यते ॥** ’ तस्मात् जातिवचनाः । ८.

सोम— पूर्वत्र पुरोडाशविषयाग्नेयशब्दस्य विचारि-तत्वात् तत्प्रसङ्गेन पुरोडाशशब्दस्य, तत्तुल्ययोगक्षेमतया बर्हिराज्यशब्दयोश्च बुद्ध्युपारूढत्वात् तद्विषयो विचार इदानीं क्रियते इति समनन्तराधिकरण**संगतिः** प्रासङ्गिकी । **प्रयोजनम्–** संस्कारवाचित्वे ‘बर्हिषा यूपावटमवस्तृणाति’ इति यूपावटस्तरणबर्हिषि समन्त्रका लवनादयः, ‘ आज्येन यूपमनक्ति’ इति यूपाञ्जनार्थे आज्ये विलापनावेक्षणादयः, रौहिणपुरोडाशादौ समन्त्रकप्रथनादयश्च कर्तव्याः, जाति-मात्रवाचित्वे तु न कर्तव्या इति । **सूत्रार्थस्तु–** असंस्कारे संस्काराभावेऽपि बर्हिराज्ययोः शब्दलाभात् प्रयोगलाभात् अतच्छब्दः संस्कारव्यतिरिक्तजातिवाचकः बर्हिरादिशब्दः

इति । अत्र न्यायसाम्यात् सूत्रे बर्हिराज्यशब्दग्रहणमुप-लक्षणं इत्याश्रित्य पुरोडाशोऽप्युदाहृतः ।

वि— ‘ बर्हिराज्यपुरोडाशशब्दाः संस्कारवाचिनः । जात्यर्था वा, शास्त्ररूढेस्ते स्युः संस्कारवाचिनः ॥ , जातिं त्यक्त्वा न संस्कारे प्रयुक्ता लोकवेदयोः । विनाऽपि संस्कृतिं लोके दृष्टत्वाज्जातिवाचिनः ॥ ’ **गुरुमतमाह–** ‘ बर्हिरादौ निमित्तस्य दुर्वचत्वान्न मेति चेत् । , जातेस्तत्र निमित्तत्वात् तद्युक्ता चोदना प्रमा ॥ ’ न मा प्रमाणं इति चेत् । ८.

भाट्ट— बर्हिराज्य–पुरोडाशादिशब्दानां संस्कृतेषु शास्त्रस्थैः प्रयुज्यमानत्वात् यूपादिशब्दवत् संस्कारमात्र-वाचित्वे संस्कारविशिष्टकुशादिवाचित्वे वा **प्राप्ते,** जातिं विहाय कैरप्यप्रयुज्यमानत्वात् संस्कारं विनाऽपि लोके ‘ बर्हिरादाय गावो गताः ’ ‘ आज्यं क्रय्यम् ’ ‘ पुरो-डाशेन मे माता प्रहेलकं ददाति ’ इत्यादौ प्रयुज्यमानत्वात् अव्यभिचाराल्लाघवाच्च कुशादिजातिवाचित्वमेव ।

प्रयोजनं यूपावटास्तरणार्थबर्हिरादौ पूर्वपक्षे संस्कार-करणम् , सिद्धान्ते नेति ।

मण्डन— ‘ बर्हिःशब्दस्तृणं वक्ति । ’

शंकर— ‘ बर्हिराज्यादि जात्यर्थम् । ’ ८ .

* **न च बर्हिराज्याधिकरणन्यायेन** (१।४।७। १०) अनार्यव्यवहारादपि राजपदस्य क्षत्रियजातिपरत्वं स्यात् इति वाच्यम् । बर्हिराज्यस्थले अनार्यव्यवहारादपि जात्यर्थत्वम्, आर्यव्यवहारस्य जात्यव्यभिचारित्वात् , इदं पूर्वपक्षे । कु. २।३।२।३.

* **बर्हिराज्याधिकरणवार्तिकोक्तन्यायः** । ‘ एक-देशेऽपि यः शब्दो दृष्टो जातिनिबन्धकः । तदत्यागान्न तस्यास्ति निमित्तान्तरकल्पना ॥ ’ इति । तेन राज्यरहिते क्षत्रिये जातिनिमित्तत्वेनाभ्युपगतस्य राजशब्दस्य राज्य-योगिन्यपि क्षत्रिये जात्यत्यागात् अक्षत्रियेऽपि च क्षत्रिय-कार्यापत्त्या प्रयोगोपपत्तिः । **सु.** पृ. ९००.

* **बर्हिराज्यादिशब्देषु** एकदेशेऽपि जातिनिमि-त्तत्वे लभ्यमाने निमित्तान्तरं न कल्पनीयम् । **वा.** २।३।२।३ पृ. ५८१.

* **बर्हिरादीनि** यागद्रव्यधारणेन दृष्टेन उपकार-संबन्धेन उपकुर्वन्ति । **भा.** ११।२।१०।४५. * **बर्हि-रादीनां** अङ्गप्रधानसाधारण्यम् । ३।७।१।१ – ५ . ‘ वेदिबर्हिर्धर्मन्यायः ’ इत्यत्र द्रष्टव्यम् ।

* **बर्हिरास्तरणमन्त्रः** आतिथ्यायां ‘ ऊर्णाम्रदसं त्वा स्तृणामि ’ इत्यादिः स चाग्नीषोमीयबर्हिषि पुन-रावर्तनीयो देशभेदात् , बर्हिस्तु स्वरूपेण तदेव । **वि.** १२।१।२०.

* **बर्हिर्धर्मा** अङ्गप्रधानार्थाः न केवलं प्रधानार्थाः दर्शपूर्णमासयोः । वेदिबर्हिर्धर्मन्यायः । ३।७।१।१–५ । द्रव्यसंस्कारन्यायः । ३।८।१५।३१ (वेदिबर्हिर्धर्मन्याये द्रव्यसंस्कारन्याये च समानो विचारः । उत्तरविवक्षया च प्रापणात् न दोषः) ।

卐 **बर्हिर्न्यायः** । गौणमुख्याधिकरणम् । मन्त्रविनि-योगो मुख्यार्थे । लिङ्गविनियोगाधिकरणम् । लिङ्गाधि-करणम् ॥

अर्थाभिधानसामर्थ्यान्मन्त्रेषु शेषभावः स्यात् , तस्मादुत्पत्तिसंबन्धोऽर्थेन नित्यसंयोगात् । ३।२। १।१॥

भाष्यम्— इह मन्त्रा उदाहरणम् ‘ बर्हिर्देवसदनं दामि ’ इत्येवमादयः । किं मुख्ये एवाभिधेये मन्त्राणां विनियोगः, उत गौणेऽपीति । कः पुनर्मुख्यः को वा गौण इति । उच्यते । यः शब्दादेव अवगम्यते, स प्रथमोऽर्थो मुख्यः । मुखमिव भवतीति मुख्यः इत्युच्यते । यस्तु खलु प्रतीतादर्थात् केन चित् संबन्धेन गम्यते, स पश्चाद्भावात् जघनमिव भवतीति जघन्यः । गुण-संबन्धाच्च गौण इति । यद्येवं सर्व एव मुख्यः । सर्वो हि शब्दाद्गम्यते । यथैव हि अग्निर्ज्वलतीत्युक्ते ज्वलनसंप्रत्ययः । एवमेव अग्निर्माणवक इति शब्दे एवोच्चारिते माणवके संप्रत्ययः । अथोच्येत । यस्मिन् निरुपपदाच्छब्दात् संप्रत्ययः स मुख्यः, यस्मिन् सोपपदात् स गौण इति । नैतद्युक्तम् । यस्य हि शब्दस्य रूपं कस्य चिदर्थस्य निमि-त्तम्, सोपपदस्यापि तदेव रूपं निरुपपदस्यापि । न च शक्यं निमित्ते सति नैमित्तिकेन न भवितुम् । किमतः ? यद्येवम्, इदं न शक्यते वदितुं उपपदादृते न सोऽर्थो

भवति, उपपदे तु संजाते सोऽर्थः संजनिष्यते इति । न चासौ समुदायार्थः शक्यते विज्ञातुम् । अन्वयव्यतिरेकाभ्यां हि विभागोऽवगम्यते । अथ वाक्यार्थोऽयमित्युच्यते । नैवं शक्यम् । नहि अनन्वितः पदार्थो भवति वाक्यार्थः । तदेवं दृश्यताम् । अग्निशब्द एवायं ज्वलनवचनः । अग्निशब्दः एव माणवकस्याभिधातेति । तस्मान्न गौणो मुख्य इति कश्चिद्विशेषः । **अथोच्यते**, यः सुष्ठु प्रसिद्धः स मुख्यः, यो मनागिव स गौण इति । **इदमपि नोपपद्यते** । प्रसिद्धिर्नाम प्रज्ञानम् । न च प्रज्ञाने कश्चिद्विशेषोऽस्ति । **अथोच्येत** । यस्य बहुशः प्रयोगोऽस्ति स मुख्यः, अल्पशः प्रयुज्यमानो गौण इति । **नैतदेवम्** । अल्पशोऽपि प्रयुज्यमानो नासति सामर्थ्ये प्रत्याययेत् । अतः सोऽपि शब्दात् प्रतीयते इति मुख्य एव । **अत्रोच्यते** । अस्त्यत्र विशेषः । माणवको नाग्निशब्दात् प्रतीयते । कथमवगम्यते ? उक्तं ‘ अन्यायश्चानेकार्थत्वम् ’ इति । कथं न विपर्ययः ? उच्यते । अनादृत्यैव माणवकप्रत्ययं ज्वलनमग्निशब्दात् प्रतियन्तो दृश्यन्ते । न त्वनादृत्य ज्वलनप्रत्ययं माणवकमग्निशब्दात् प्रतियन्ति । कुत एतत् ? योयः अग्निसदृशो विवक्ष्यते, तत्रतत्राग्निशब्दो नियत इति । अत एव विगतसादृश्यात् अयं तु दृश्यते (विगतसादृश्यवति तु अयं दृश्यते ।) अतः अग्निसादृश्यं अस्य प्रवृत्तौ निमित्तम् । न च ज्वलने अप्रतीते तत्सादृश्यं प्रतीयते । तस्मात् ज्वलनस्य अग्निशब्दो निमित्तम्, न माणवकस्य । तस्मात् ज्वलने मुख्यः, न माणवके । एवमेव तृणप्रत्ययस्य बर्हिःशब्दो निमित्तम्, न तृणसदृशप्रत्ययस्य । तदेवं द्वैते सति मुख्यपरता शब्दस्य, उत गौणपरताऽपीति युक्तो विचारः । किं तावत् प्राप्तम् ? मुख्ये गौणे च विनियोगः । कुतः ? उभयस्य शक्यत्वात्, उभयमपि बर्हिःशब्देन शक्यते प्रत्याययितुं तृणं च तृणसदृशं च । तृणं साक्षात्, तृणसदृशं तृणप्रत्ययेन । यच्च नाम दर्शपूर्णमासयोः साधनभूतेन बर्हिःशब्देन शक्यते प्रत्याययितुम्, तत् सर्वं प्रत्याययितव्यम्, विनिगमनायां हेत्वभावात् । अपि च एवमाश्रीयमाणे पूषाद्यनुमन्त्रणादीनि दर्शपूर्णमासाभ्यां नोत्कृष्यन्ते । तत्रैव गौणेनाभिधानेन प्रकृतां देवतामभिवदिष्यन्ति । **एवं प्राप्ते, ब्रूमः** । मुख्ये एव विनियोक्तव्यो मन्त्रः, न गौणे इति । कुतः ? उभयाशक्यत्वात् । प्रकरणे हि समाम्नानात् प्रधानेन एकवाक्यतामुपैति । तत्रैतदापतति, यच्छक्नुयादनेन मन्त्रेण साधयितुम्, तथा साधयेदिति । स चासौ अर्थाभिधानसंयोगात् शक्नोत्युपकर्तुम्, न गौणमर्थं शक्नोत्यभिधातुम् । तस्मान्न गौणे विनियोगः । ननु मुख्यप्रत्ययात् शक्यते गौणः प्रत्याययितुम् । सत्यमेतत् । मुख्यप्रत्यायनेनैवास्य प्रयोजनवत्ता निर्वृत्तेति न गौणं प्रति विनियोगे किञ्चित् प्रमाणमस्ति । मुख्ये विनियोगेन तु आनर्थक्यं परिह्रियते । परिहृते आनर्थक्ये न गौणाभिधानमापतति । न हि अनभिधाय मुख्यं गौणमभिवदति शब्दः । अतः प्रमाणाभावान्न गौणे विनियुज्येत । **अपि च** गौणस्य प्रत्यायने सामर्थ्यात् बहवोऽभ्युपायाः प्राप्नुवन्ति । सामर्थ्यं च शब्दैकदेश इत्युक्तम्, ‘ अर्थाद्वा कल्पनैकदेशत्वात् ’ इति । तत्र मन्त्रे नियोगतो गौणं प्रति विनियुज्यमाने उपायान्तरं विना प्रमाणेन बाध्येत । मन्त्राम्नानं प्रमाणमिति चेत् । न तस्योपायान्तरनिवृत्तौ सामर्थ्यमस्ति । ननु मुख्येऽपि विनियुज्यमानस्यैष एव दोषः । नेत्युच्यते । यदि मुख्येऽपि न विनियुज्येत, नैव प्रधानस्योपकुर्यात् । तत्र च अस्योत्पत्तिरनर्थिकैव स्यात् । तस्मादस्ति गौणे मुख्ये च विशेषः । **अपि च** । यो गौणे मन्त्रं विनियुङ्क्ते स वक्तव्यः, किमर्थं मुख्यं प्रत्याययसीति । स चेत् ब्रूयात्, नान्यथा गौणप्रत्ययोऽस्तीति । प्रतिब्रूयादेनम्, अन्येऽपि गौणप्रत्ययस्याभ्युपायाः सन्तीति । अथ स एवमभियुक्तः प्रतिब्रूयात्, मुख्यप्रत्ययोऽपि पाक्षिकोऽभ्युपाय इति । ब्रूयादेनम्, न तर्हि नियोगतो गौणे विनियोजनीयः । यदा गौणप्रत्ययाय मुख्यमुपादत्ते, तदा एतदापतितं भवति, मुख्ये एव विनियोगः इति । अर्थेन च प्रतीतेन प्रयोजनम्, न प्रत्यायकेन मन्त्रेण । अतोऽन्येनाप्युपायेन गौणः प्रत्याययितव्यः । न स एव मन्त्रः आदर्तव्यः । अथापि मन्त्रेण प्रत्यायकेन प्रयोजनं स्यात् तथापि मुख्यप्रत्ययनेनैव निर्वृत्तं प्रयोजनमिति नतरां गौणे विनियुज्येत । तस्मात् मुख्यगौणयोर्मुख्ये कार्यसंप्रत्ययः इति सिद्धम् ।

वा–– इदानीं लिङ्गविनियोगः प्रस्तूयते । लिङ्गं नाम मन्त्राणामर्थप्रत्यायनसामर्थ्यम् । तच्च मुख्ये गौणे च केन चित् प्रकारेण विद्यते । तत्र विनियोगः किं मुख्ये एवार्थे भवति उत गौणेऽपीति संदेहे नैव गौणो नाम कश्चिदस्तीति मन्वान आह– ‘ कः पुनर्मुख्यः को वा गौणः ’ इति । तत्सिद्धिसूत्रे तु सिद्धे गौणे तन्निमित्तभेदः स्वार्थापरित्यागवृत्तित्वं च व्याख्यातं इत्ययमर्थाद्विचारः पूर्वं प्रत्येतव्यः । तत्र च ‘ **शब्दार्थस्यैव मुख्यत्वं मुखवत् प्रथमोद्गतेः । अर्थगम्यस्य गौणत्वं गुणागमनहेतुकम् ॥ शाखादिभ्यो य (पा० ५।३।१०३) इत्येवमिवार्थे मुख्य इत्ययम् । शब्दः शब्दाभिधेयत्वात् सर्वेष्वेव प्रसज्यते ॥** ’ परगुणानां परत्राभावादवश्यं गुणेभ्य आयातः इत्येवंलक्षणं गौणत्वं इत्यतः सर्व एव (अर्थः) शब्दे उच्चरिते अभिधीयमानत्वादनन्यगतिः शब्दशक्तिकल्पनां कुर्वन् अर्थान्तरेणाव्यवहितत्वात् प्रथममेव मुखमिव भवतीति मुख्यः । तत्र परपरिकल्पितानि तावत् गौणत्वकारणानि उपन्यस्यन्नाह––अथोच्येत यस्मिन्निरुपपदादित्यादि । ‘ **सर्वथा लक्षणं नाम यद् व्यवच्छेदकारणम् । पराधीनप्रवृत्तिश्च गौणो नित्यं प्रतीयते ॥** ’ (पराधीना शब्दप्रवृत्तिर्यस्मिन्नर्थे) । नहि यथा केवलादग्निशब्दात् ज्वलनप्रत्ययो भवति, एवं माणवकप्रत्ययः, पदान्तराधीनत्वात् । यत्रापि पदान्तरं न श्रूयते, तत्रापि अर्थप्रकरणादिलभ्यं तदेव व्याप्रियते इत्यव्यभिचारः । तदेव च सामान्यं नाम प्रवृत्तिहेतुर्गुण इति । नैतदेवम् । कुतः ? ‘ **शब्दार्थस्यैव साहित्यादभिव्यक्तिरियं कृता । अन्यस्य द्योतकत्वात्तु नापैतं मुख्यलक्षणम् ॥** ’ यथैव चक्षुषः प्रकाशानुग्रहापेक्षित्वेऽपि रूपमर्थः, यथा वा मुक्तसंशयस्य मुख्यस्य वर्णक्रममात्राग्रहणसंस्कारस्मृतिसंबन्धानुभवाद्यपेक्षित्वम्, तथा अत्रोपपदमपि नैव विना सामर्थ्यं नामापेक्षितुं शक्यते । अपेक्ष्यमाणमपि च द्योतकत्वेन इतिकर्तव्यतास्थानीयत्वान्न मुख्यतां विहन्ति । तेन विनाऽप्युपपदेन स तस्यार्थो भवत्येव, कथञ्चित्तु नाभिव्यज्यते । तद्यथा गवादिशब्दानां पृथिव्यादिः । अथोपपदस्य द्योतकत्वं परित्यज्य तुल्यकल्पतोच्यते, यस्मान्नित्यं माणवकाग्निशब्दसमुदायात् अस्यार्थस्य प्रतीतिः अतः अश्वकर्णादिवत् समुदायवाच्यत्वे सति अवयवस्य गौणत्वमिति । तदुच्यते । ‘ **न चासौ समुदायार्थः शक्यो वक्तुमिह त्वया । अन्वयव्यतिरेकाभ्यामर्थभेदो हि दृश्यते ॥** ’ तत्र समुदायप्रसिद्धिर्भवति, यत्रावयवार्थौ तिरोधाय त्यक्तभेदः समुदायः एव प्रतीयते । गम्यते तु अत्राग्निशब्दस्य पैङ्गल्यम्, माणवकशब्दस्य च पिण्डस्वरूपं विविक्तं वाच्यम् । अत उभावपि प्रात्यात्मिकयोरपि वाचकत्वात् मुख्याविति । इदानीमवयवानुसारेणैव समुदायार्थत्वं समर्थयमान आह– अनुगतस्वार्थपदद्वयगम्यत्वात् नीलोत्पलवद्वाक्यार्थः । अतश्च तस्य पदार्थप्रत्याय्यत्वात् शब्दं प्रति पूर्ववदेव गौणत्वमिति । तन्निराकरोति । ‘ **अग्निमाणवकत्वाभ्यां यद्येकोऽर्थो विशेषितः । नीलोत्पलवदिष्येत ततो वाक्यार्थता भवेत् ॥** ’ न तु अत्र तदीयो मुख्यार्थोऽग्नित्वमस्ति । न च भवतः पैङ्गल्यं वाच्यम्, अस्मत्पक्षाभेदप्रसङ्गात् । तस्मान्न वाक्यार्थः । तेन ज्वलने माणवकस्य च पैङ्गल्ये तुल्यवच्छब्दप्रवृत्तिरिति मुख्यत्वम् । माणवकस्येति भाष्ये पैङ्गल्यव्यतिरेकजनिता षष्ठी, नाभिधातृव्यतिरेकजनिता । न हि माणवकस्वरूपं अग्निशब्दाद्गम्यते । नहि पर्यायत्वे माणवकशब्दः प्रयुज्येत । अथोच्येत यः सुष्टु प्रसिद्ध इति मुक्त्वा उपपदव्यापारं यत्कृतं तस्याश्रयणमनाश्रयणं च, ते एव मन्दसुष्टुप्रसिद्धी गौणमुख्यविभागाय दर्शयति । तत्रोत्तरम्– ‘ **प्रसिद्धिरिति विज्ञानं न चास्योनातिरिक्तते । तस्मान्न तत्कृतः शक्यो विशेषो वक्तुमञ्जसा ॥** ’

इदानीं श्रोतृगतप्रसिद्धिभेदमूलं वक्तृगतं बह्वल्पप्रयोगित्वं विभागार्थं दर्शयति । यस्य च बहुशः प्रयोग इत्यादि । तन्निराक्रियते । ‘ **अल्पशोऽपि प्रयुक्तस्य सकृच्छक्तिर्निरूपिता । न निवर्तत इत्येवमुभयोस्तुल्यता पुनः ॥** ’ इहापि च गोशब्दस्य पृथिव्यादौ मन्दसुष्टुप्रसिद्धिप्रयोगौ दर्शयितव्यौ । तथा चाहुः– ‘ **मण्डकैर्बहुशस्तृप्तिः कदा चित् खण्डमोदकैः । न चात्र मण्डका मुख्या गौणा वा खण्डमोदकाः ॥** ’ इदानीं विशेषं कथयति । सत्यपि तावत्

माणवकसामानाधिकरण्ये अरुणाशब्दन्यायेन सति सादृश्येऽभिधानात् असति च अनभिधानात्, अन्यत्रासादृश्यवति वृत्तिदर्शनात् असति चादर्शनात्, विशेषणत्वात् अवश्यम्भाविप्रथमप्रत्यायने सादृश्यमेव प्रथमं प्रत्याययितव्यम्। न चानवगतेऽग्नौ तत् प्रतीयते इति प्रथमतरमग्नेरभिधानम्। ततश्च तत्संबन्धादेव शेषप्रतीतेर्व्यक्तिवत् अनभिधेयत्वम्। सन्ति चैवमादिषु कानि चित् रूपादिसामान्यानीत्युक्तम्। तस्मादस्ति गौणमुख्यविभागः इत्यारभ्यमधिकरणम्।

एते च तत्सिद्धिसूत्रोक्तैः सह नव गौणपक्षा द्रष्टव्याः। **'जहत्स्वार्थाभिधायित्वं संघातः परिकल्पना। तथा सोपपदा वृत्तिः समुदायप्रसिद्धिता। वाक्यार्थोऽल्पप्रसिद्धित्वमेवमल्पप्रयोगिता। अष्टावेतान्निराकृत्य साधिता गुणलक्षणा॥'** (१– स्वार्थं जहातीति जहत्स्वार्थः अर्थान्तराभिधायी च, तस्य भावो जहत्स्वार्थाभिधायित्वम्, गुणिरूपाग्न्यादिस्वार्थत्यागेन गुणरूपे पैङ्गल्यादौ वृत्तिः गौणत्वे कारणम्। २– अग्न्यादिजातिपैङ्गल्यादिगुणसंघातः अग्न्यादिशब्दवाच्यः सन् जातिरहितगुणमात्रे शब्दप्रवृत्तिहेतुत्वात् गौणत्वकारणम्। ३– अग्न्यादिशब्दवाच्यस्य अग्नित्वादेः माणवकादौ अग्न्यादिगुणदर्शनेन कल्पना गौणत्वकारणम्। ४– माणवकाद्युपपदसहायस्य अग्न्यादिशब्दस्य पैङ्गल्यादौ वृत्तिः अङ्गाख्यगुणभूतोपपदाधीनत्वात् गौणत्वकारणम्। ५– अग्निर्माणवकः इत्यादिशब्दस्य अवयवार्थानपेक्षवर्णसमुदायरूपेण पैङ्गल्यादौ या प्रसिद्धिः तस्याः भावः, समुदायावयवभूतस्य अग्न्यादिशब्दस्य पैङ्गल्यादौ प्रवृत्तिहेतुत्वात् गौणत्वकारणम्। ६– पैङ्गल्यादेः अग्निर्माणवकः इत्यादिवाक्यार्थत्वं अग्न्यादिशब्दस्य पैङ्गल्यादौ वाक्यावयवत्वाख्यगुणवत्त्वात् गौणत्वकारणम्। ७– अग्न्यादिशब्दस्य पैङ्गल्यादौ अल्पश्रोतृप्रसिद्धत्वं अङ्गाख्यगुणभूतोपपदापेक्षत्वनिमित्तात् गौणत्वकारणम्। ८– यस्मिन् पैङ्गल्यादौ अग्न्यादिशब्दस्य अल्पैर्वक्तृभिः प्रयोगः, सः अल्पप्रयोगी, तस्य भावः अल्पप्रयोगिता अल्पसिद्धत्ववत् गौणत्वकारणम्। एतान् गौणत्वकारणपक्षान् निरस्य अग्न्यादिशब्दवाच्येन अग्नित्वादिना अग्न्यादिगुणस्य पैङ्गल्यादेर्लक्षणा माणवकादौ अग्न्यादिगुणवति अग्निशब्दप्रवृत्तिहेतुत्वात् गौणशब्दवाच्यत्वरूपगौणत्वकारणत्वेन साधिता। **सुधा.** पृ. १०८३)

(पूर्वपक्षभाष्यं व्याचष्टे–) **'तत्र नित्यं परार्थत्वादुभयत्र प्रयोगिता। साक्षाद्ध्यभिधानस्य किञ्चिदभ्यधिकं फलम्॥'** एवं च सति गौण्या वृत्त्या पूषादिशब्दैः अग्न्याद्यभिधानात् अनुत्कर्षो भविष्यति। अन्यथा यत्र पूषादयस्तत्र नीयेरन्। तथा अग्न्यादिशब्दैः सूर्याद्यभिधानादविकारे सति आर्षचोदकोऽनुग्रहीष्यते। इत्येवं प्राप्ते, ब्रूमः। **'अर्थाभिधानसंयोगान्मन्त्राणां क्रतुशेषता। मुख्येन च कृतार्थानां न गौणे श्रुतिकल्पना॥'** 'अपिवा प्रयोगसामर्थ्यात्' (२।१।६।३१) इत्यनेन हि न्यायेन अभिधेये तावत् विनियोगाय मन्त्राः श्रुतिं परिकल्पयन्ति। तत्र यदि जहत्स्वार्था गौणी वृत्तिर्भवेत् ततस्तुल्यवदुभयत्रापि श्रुतिः कल्प्येत। यदि तु गौणमपि वदता पूर्वतरं स्वार्थोऽभिधेयः तदा तदतिक्रमकारणाभावात् तद्विनियोगश्रुतौ कल्पितायां निराकाङ्क्षेषु मन्त्रप्रकरणस्वाध्यायाध्ययनविधिषु न पुनः श्रुतिकल्पनहेतुरस्तीति न विनियोगः। किञ्च **'कृतार्थे मन्त्रपाठे च गौणानां स्मारकान्तरम्। अनिवारितसामर्थ्यप्राप्तं किमिति बाध्यते॥'** अपि च **'मुख्यः प्रत्याख्यते कस्माद्गौणेऽप्यर्थे विवक्षिते। अन्यथाऽनुपपत्त्या चेन्न ध्यानाद्युपपत्तितः॥ पाक्षिकत्वेऽप्यनित्यत्वात् पक्षेऽनर्थकता भवेत्। नित्यं मुख्यापरित्यागान्मत्पक्षश्चाऽऽश्रितो भवेत्॥ न चार्थप्रत्यये सिद्धे मन्त्रः कार्योऽभिधायकः। मन्त्राम्नानार्थवत्त्वं च मुख्येनार्थेन सेत्स्यति॥'** तेनैष सूत्रार्थः यस्मादर्थाभिधानसंयोगान्मन्त्रेषु शेषभावः तस्मादौत्पत्तिकेनैवार्थेनैषां संयोगः स्यात्। कुतः? तेनैवाव्यभिचारितया नित्यसंयोगात्।

संस्कारकत्वादचोदिते न स्यात्। २॥

भाष्यम्— अथ यदुक्तं पूषाद्यनुमन्त्रणादीनामुत्कर्षो न भविष्यतीति। युक्तस्तेषामुत्कर्षः। संस्कारको हि मन्त्रः। सोऽसति संस्कार्येऽनर्थकः इति यत्रार्थवांस्तत्र नाययिष्यते। न च कश्चिद्दोषो भविष्यति।

वा— अचोदिते पूषादौ, दर्शपूर्णमासयोर्यन्मन्त्रा न विनियुज्यन्ते, युक्तमेव तत्। संस्कारस्य संस्कार्यपरत्वात् लिङ्गेन च प्रकरणबाधात्। कथं पुनरेषामुत्कृष्टानां वैदिकैः कर्मभिर्योगः, कथं वा क्रत्वङ्गसामान्यविनियोगमन्तरेण लिङ्गं देवतायामेव केवलायां विनियोजकमिति? तदुच्यते। **'यागानुमन्त्रणानीति समाख्या क्रतुयोजिनी। तस्माच्छक्त्यनुरोधेन प्राप्तिस्तद्देवते क्रतौ॥'** यागानुमन्त्रणसमाख्या ह्येषां यागसंबन्धादृते अनुपपद्यमाना यागसामान्याङ्गत्वं गमयति। **'अतो विशेषचिन्तायामशक्येष्वनियोजनात्। शक्यार्थविनियोगाय लिङ्गव्यापारसंभवः॥'**

शा— **'अर्थानां स्मरणार्थत्वान्मन्त्राणां चापि शक्तितः। प्रतिप्रधानमावृत्तेर्गुणानामुभयार्थता॥'** तस्मादुभयत्र (मुख्ये गौणे च) विनियोगः। इति प्राप्ते, अभिधीयते। **'गौणे सदपि सामर्थ्यं न प्रमाणान्तराद् विना। आविर्भवति, मुख्ये तु शब्दादेवाविरस्ति तत्॥ तात्पर्यं च स्वतो मुख्ये, गौणार्थपरता पुनः। प्रमाणान्तरविज्ञेया तदभावान्न सिध्यति॥'**

सोम— **प्रयोजनम्**– मन्त्राणां गौणेऽपि विनियोगे प्राकृतानां मन्त्राणां गौण्या वृत्त्या वैकृतद्रव्यदेवताऽऽदिप्रकाशकत्वसंभवात् ऊहासिद्धिः, सिद्धान्ते तु मुख्यार्थत्वाय ऊहसिद्धिरिति। **सूत्रार्थस्तु**– यतः कारणात् अर्थाभिधानसंयोगात् अर्थाभिधानलक्षणद्वारसंयोगात् मन्त्रेषु क्रतुशेषत्वं स्यात्। तस्मात् उत्पत्तिसंयोगः औत्पत्तिकेन मुख्यार्थेनैव संयोगः स्यात्, तेनार्थेन नित्यसंयोगात् इति।

वि— 'देवोपसदनंबर्हिर्दामिगीर्मुख्यगौणयोः। तल्लिङ्गमर्थयोर्मन्त्रं नियुङ्क्ते मुख्य एव वा॥, शब्दार्थत्वाद् द्वयोस्तत्र युज्यते विनियोजनम्।, प्रथमावगतत्वेन मुख्ये तद् विनियम्यते॥'

भाट्ट— एवं श्रुत्युपयोगिविचारे वृत्ते अधुना लिङ्गोपयोगिविचारः प्रस्तूयते। तत्र लिङ्गं नाम अङ्गत्वघटकीभूतपरोद्देश्यत्वकृतिकारकत्ववाचकपदकल्पनानुकूला क्लृप्तपदपदार्थनिष्ठा योग्यता। यथा 'स्रुवेणाऽवद्यति' इत्यत्र स्रुवनिष्ठा द्रवद्रव्यपदकल्पनाऽनुकूला। एवं मन्त्रेषु स्वार्थवृत्त्युद्देश्यतावाचिपदकल्पनाऽनुकूला स्ववृत्तिकारकत्ववाचिपदकल्पनाऽनुकूला च योग्यता लिङ्गम्। सा च पदरूपश्रुतिकल्पकत्वात् तद्द्वारा तदर्थविनियोगे प्रमाणम्। तत्र वस्तुसामर्थ्यरूपस्य लिङ्गस्य विशेषविचारासंभवात् मन्त्रसामर्थ्यरूपस्य किं शक्ये एवार्थे विनियोजकत्वम्, उत जघन्यवृत्तिप्रतिपाद्येऽपीति संदेहे, क्रतुप्रकरणाम्नातमन्त्रस्य 'बर्हिर्देवसदनं दामि' इत्यादेर्मुख्ये इव जघन्येऽपि उलपराज्यादौ स्मारकाकाङ्क्षादिरूपसामग्र्यविशेषात् तत्साधारण्येनैव विनियोगः। 'यष्टीः प्रवेशय' इत्यादिवदाकाङ्क्षाऽऽदिरूपतात्पर्यग्राहकसत्त्वे मुख्यार्थाबाधस्य अकिञ्चित्करत्वात्। इति प्राप्ते, शक्यसंबन्धग्रहसापेक्षत्वेन जघन्यार्थप्रतीतेर्विलम्बितत्वात् प्रथमप्रतीतमुख्यविनियोगेन चरितार्थस्य मन्त्रादेः जघन्यार्थविनियोजकत्वानुपपत्तेः। अत एव तत्स्मारकाकाङ्क्षाया ध्यानाद्युपायान्तरेणैव निवृत्तिः। अत एव यत्र प्रकरणे मुख्यार्थोपयोगो न क्लृप्तः, तत्र मन्त्राम्नानबलादेव तत्कल्पना। यत्र तु विरोधिगुणान्तरावरोधः प्रकरणे, तत्र सामान्यसंबन्धबोधकप्रमाणसत्त्वे उत्कर्षः यथा दर्शपूर्णमासप्रकरणाम्नातपूषानुमन्त्रणमन्त्रादेः, यागानुमन्त्रणसमाख्याया एव सामान्यसंबन्धबोधकत्वात्। उत्कर्षस्याप्यसंभवे प्रकरणे एव जघन्यार्थे विनियोगः यथा मनोताऽऽदौ। अप्रयुक्तलक्षणादिना तस्याप्यसंभवे तदर्थाभिधानस्यैव अदृष्टार्थत्वं यथा जपादौ।

मण्डन— 'मन्त्रो न गौणे विनियोजनीयः।'

शंकर— 'गौण्या वृत्तेस्तथाऽस्तिता।'

* बर्हिन्यायः। 'द्रव्यसंस्कारः प्रकरणाविशेषात् सर्वकर्मणाम्' (३।८।१५।३१) इति सूत्रोक्तः धर्माणामङ्गप्रधानसाधारण्याख्यः। **सु.** ३।८।१९।३५. * बर्हिन्यायः। यूपावटस्तरणबर्हिः असंस्कृतम्– लौकिकम्। ३।८।१६. 'यूपावटस्तरणबर्हिन्यायः' इत्यत्र द्रष्टव्यम्।

* बर्हिःप्रहरणान्तं हारियोजनादि कर्म द्वादशाहे प्रथमादिनवमान्तेषु एकादशेऽहनि च न कर्तव्यम्, किन्तु पत्नीसंयाजान्ते विरामः कर्तव्यः। अवशिष्टं च द्वादशेऽहनि पत्नीसंयाजोत्तरं कर्तव्यम्। **वि.** ९।१।९.

* **बर्हिःप्रोक्षणादिना** आतिथ्यागतेन उपसदग्नीषोमीययोः प्रसङ्गसिद्धिः ज्योतिष्टोमे। १२।१।१९।४३ –४४.

* **बर्हिर्लवने** प्रतिमुष्टिलवनं मन्त्रावृत्तिः। **भा.** ११।४।१४।४४–४५.

* **बर्हिर्लवनादि** प्रकृतावपि न सर्वार्थम्। ३।८। १७. 'विधृतिपवित्राधिकरणम्' इत्यत्र द्रष्टव्यम्।

* **बर्हिःशब्दः** तृणप्रत्ययस्य निमित्तम्, न तृणसदृशप्रत्ययस्य। **भा.** ३।२।१।१ पृ. ७४९. * बर्हिःशब्दो न संस्कारवाचको नियमेन, यथा 'बर्हिरादाय गावो गताः' इत्यत्र। सर्वत्र तु अयं जातिवाची। अत एव 'बर्हिषा यूपावटमवस्तृणाति' अत्र विना संस्कारेण स्तरणसिद्धिः। **वि.** १।४।८. * बर्हिःशब्दः संस्कारशब्दः उत जातिशब्दः इति संदेहे जातिशब्दोऽयम्, न संस्कारशब्दः इति सिद्धान्तः। **भा.** १।४।७।१०, * **बर्हिःशब्देन** उभयमपि शक्यते प्रत्याययितुं तृणं च तृणसदृशं च, तृणं साक्षात्, तृणसदृशं च तृणप्रत्ययेन। ३।२।१।१ पृ. ७४९.

* **बर्हिःसंनहनमन्त्रः** 'इन्द्राण्यै संनहनम्' (तैसं. १।१।२।२) हरणमन्त्रश्च 'बृहस्पतेर्मूर्ध्ना हरामि' इति। आतिथ्यासंस्कृते बर्हिषि संनह्य अग्नीषोमीयदेशे नीयमाने, तौ मन्त्रौ न प्रयोज्यौ। तौ हि लवनदेशात् आनयने प्रयोज्यौ, न तु गार्हपत्यदेशात् आहवनीयदेशं प्रति आनयने। आतिथ्या गार्हपत्यदेशे क्रियते, अग्नीषोमीयपशुश्च आहवनीयदेशे। **वि.** १२।१।२१.

* **बर्हिःस्तरणमन्त्रे** प्राकृते हरितपदस्थाने रक्तपदस्य ऊहः मौद्गे चरौ। ९।३।२।३. **मीको.** पृ. १२२६ 'ऊहः रक्तपदस्य' इत्यत्र द्रष्टव्यम्।

* **बलाधिकरणे** (३।३।७।१४ बलाबलाधिकरणे) विदेवनादीनां स्थानात् अभिषेचनीयाङ्गत्वस्य प्रतिभासमानस्य प्रकरणावगतेन राजसूयाङ्गत्वेन बाधो वक्ष्यते। **सु.** पृ. १०५९.

* **बलाबलम्।** अविरोधे दुर्बलस्यापि ग्राह्यत्वम्। यदेव अत्यन्तं प्रमाणाभासमेव मृगतृष्णाज्ञानवद्भवति तत् सर्वदैव परिहर्तव्यम्। यत् पुनः बलवद्विरोधापेक्षं अप्रमाणं भवति तत् विरोधाभावात् प्रमाणमेवेत्यवधारणीयम्। **वा.** १।३।५।१० पृ. २२७, * बलाबलम्। 'एकसोपानवर्त्येको भूमिष्ठश्चापरस्तयोः। उभयोश्च जवस्तुल्यः प्रतिबन्धश्च नान्तरा॥ विरोधिनोस्तदैको हि तत्फलं प्राप्नुयात्तयोः। प्रथमेन गृहीतेऽस्मिन् पश्चिमोऽवतरेन्मुधा॥' ३।३।७।१४ पृ. ८३४, * बलाबलम्। 'काल्पनिक्याः प्रसिद्धेश्च या क्लृप्ता सा बलीयसी'। १।३।५।१० पृ. २२७. * बलाबलं क्रमविषयकश्रुत्यादीनां पञ्चमेऽध्याये उच्यते। **भा.** ५।१।१।१. * 'श्रुत्यादिसमवाये च वक्ष्यते यद् **बलाबलम्।** तच्छेषिण्यविरुद्धत्वाच्छेषगोचरमेव नः॥' **वा.** ३।१। १।१ पृ. ६५२. * श्रौत–आर्थज्ञानात् बाध्यबाधकत्वलक्षणं बलाबलमालोच्यते ('उच्चैर्ऋचा क्रियते' इत्यादौ), तच्च विरोधहेतुकत्वात् मुख्यपश्चाद्भावापेक्षम्, न विध्यर्थवादपदस्थत्वालोचनात् विपरीतं भवति। **सु.** पृ. ११७१.

बलाबलाधिकरणम्॥

श्रुति– लिङ्ग– वाक्य– प्रकरण– स्थान–समाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्। ३।३। ७।१४॥

भाष्यम्— उक्तानि विनियोगकारणानि श्रुतिः लिङ्गं वाक्यं प्रकरणं स्थानं समाख्यानमिति। तेषां समवाये किं बलीय इति चिन्त्यते। एकार्थवृत्तित्वात् वाचो युगपदसंबन्धात् द्वयोर्द्वयोः संप्रधारणा।

श्रुतिबलाबलविचारः— तत्र श्रुतिलिङ्गयोः किं श्रुतिर्बलीयसी, आहोस्विल्लिङ्गमिति। किं पुनरत्रोदाहरणम्? 'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इति। अत्र चिन्त्यते। किमिन्द्रस्य गार्हपत्यस्य वोपस्थानं कर्तव्यमित्यनियमः उत गार्हपत्यस्यैवेति। यदि तुल्यबले एते कारणे, ततो विकल्पः। अथ श्रुतिर्बलीयसी, गार्हपत्य एवोपस्थेयः। का पुनरत्र श्रुतिः? किं लिङ्गम्? श्रुतिर्गार्हपत्यशब्दश्रवणम्। लिङ्गं पुनः 'कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे' इति इन्द्रशब्दस्य विशिष्टदेवताभिधानसामर्थ्यम्। अथ किं वाक्यं नाम? संहत्य अर्थमभिदधति पदानि वाक्यम्। यद्येवमिदमपि वाक्यम् 'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इति, इदमपि 'कदा चन स्तरीरसि' इति। उभयत्रापि संहत्य

अर्थमभिदधति पदानि। तेन वाक्यस्य वाक्यस्य चैषा संप्रधारणा, न श्रुतिलिङ्गयोः। यदि वा, श्रुतिलिङ्गवाक्यानि विवेक्तव्यानि, इदं श्रुतिवाक्ययोरन्तरम्, इदं लिङ्गवाक्ययोरिति। तदभिधीयते, यत्तावच्छब्दस्यार्थमभिधातुं सामर्थ्यम्, तल्लिङ्गम्। यदर्थस्याभिधानं शब्दस्य श्रवणमात्रादेवावगम्यते, स श्रुत्याऽवगम्यते। श्रवणं श्रुतिः। एकार्थमनेकं पदं वाक्यमित्युक्तमेव। तदेतत् सर्वेष्वेव वाक्येषु समवेतं विविक्तं च दृश्यते। इह तावत्, 'कदा चन स्तरीरसि' इत्यनेन मन्त्रेण इन्द्र उपस्थातव्य इति नैतत् कस्य चिच्छब्दस्य श्रवणादेवावगम्यते। नापि शब्दान्तरस्य समीपे उच्चारितस्य सामर्थ्यमस्ति, येनैतदवगम्येत। एतस्यां खलु ऋचि इन्द्रशब्दो विद्यते, यो विशिष्टां देवतामवगमयितुं शक्नोति। तया चावगमितया प्रयोजनमस्तीति। तेनेन्द्रोपस्थाने इन्द्रशब्दः प्रयुज्यते। तदेकवाक्यत्वाच्च अविशिष्टानि पदानि। न त्वेवमस्यामृचि कस्य चिच्छब्दस्य सामर्थ्याद्गार्हपत्यस्योपस्थानं भवति। श्रवणादेव तु गार्हपत्यशब्दस्य वयमग्निं प्रतीमः, न लिङ्गात्। यदि तु लिङ्गं बलीयः, इन्द्र उपस्थातव्यः। यदि गार्हपत्यश्रवणम्, ततो गार्हपत्यः। एवं तर्हि लिङ्गवाक्ये विरुध्यमाने इह संप्रधार्ये, न श्रुतिलिङ्गे। इन्द्रशब्दस्य विशिष्टदेवताभिधानसामर्थ्यादिन्द्रोपस्थानम्, यदि लिङ्गं बलीयः, अथ नु वाक्यम्, गार्हपत्य उपस्थेयः। वाक्यं ह्येतत्, 'ऐन्द्र्या गार्हपत्यमुपतिष्ठते इति'। नैतदेवम्। यद्यपि एतद्वाक्यम्, श्रुतिरपि अत्रास्ति, या त्वत्र श्रुतिः, सा लिङ्गेन विरुध्यते, न यद्वाक्यम्। कथम्? बलीयस्यपि हि लिङ्गे, ऐन्द्र्योपतिष्ठते इत्येतद्गार्हपत्यशब्देन सह एकवाक्यतामुपैत्येव। यदि हि नोपेयात् ततो लिङ्गेन विरुध्येत। यस्तु गार्हपत्यश्रवणादेवार्थः प्रतीयते, स लिङ्गे बलीयसि परित्यक्तो भवति। नासौ उपस्थानेन संबध्यते। तदा हीन्द्रं गार्हपत्यशब्दोऽभिवदेदग्निसमीपं वा। अथ नु श्रुतिः प्रमाणं भवति, ततो लिङ्गेनावगतं इन्द्रोपस्थानं बाध्येत। तस्मात् श्रुतिलिङ्गयोरेवैष विरोधः, न लिङ्गवाक्ययोरिति। अथवा नात्रैकवाक्यत्वात् इन्द्रप्राधान्यं गार्हपत्यप्राधान्यं वोपस्थानस्य। कुतस्तर्हि? इन्द्रशब्दवत्त्वात् मन्त्रस्य इन्द्रप्राधान्यम्, द्वितीयाविभक्तिश्रवणात् गार्हपत्यप्राधान्यम्। तस्मात् श्रुतिलिङ्गयोर्विरोधः।

वा— (अस्मिन् अधिकरणे वार्तिकानुपूर्वी भाष्याद्यनुसारेण मनाक् परिवर्तिता इत्यवधेयम्।) इदानीं षण्णामपि श्रुत्यादीनां बलाबलं विचार्यते। तच्च भिन्नविषयाणां न संभवतीति समवाये एकार्थोपनिपातो विषयत्वेनोदाहृतः। तत्र केचिदाहुर्विरोधग्रहणं कर्तव्यमिति। कुतः? '**क्रीणात्यरुणयेत्यत्र समवाये हि सत्यपि। विरोधाभावतो नैव चिन्तयन्ति बलाबलम्॥**' एक एव ह्यरुणादिः शेषः श्रुत्या सामान्यक्रियासंबन्धी, वाक्येन तद्विशेषस्य क्रयस्य, प्रकरणेन ज्यौतिष्टोमिकस्य। सत्यपि वाचनिकप्रकरणसमवाये परस्परानुग्रहनिमित्तत्वादविरोध इति बलाबलविचारो न भवति, निर्विशेषसामान्यानुपपत्तेः। क्रयस्वरूपमात्रप्रयुक्तत्वे चानर्थकत्वात् अपेक्षिते हि श्रुतिवाक्याभ्यां वाक्यप्रकरणे। तस्मात् कर्तव्यं विरोधग्रहणमिति। न वा कर्तव्यम्। कुतः? '**समानविषयत्वं हि समवायोऽभिधीयते। न चैकार्थ्ये प्रमाणानां शेषाणामवगम्यते॥**' अरुणादौ तावत् नैव प्रमाणसमवायोऽस्ति। नह्येकत्र संभवमात्रं समवायः। किं तर्हि? विषयैकत्वम्। इह चारुणस्य क्रियासंबन्धः श्रुत्या। तस्य तु श्रुतिकल्पितक्रियाकारकसंबन्धस्य भूयोऽप्यपेक्षावशेन क्रयविषयत्वम्। तावता च प्रयोजनानवाप्तेः अपेक्षान्तरे सति अपूर्वसंबन्धवतः क्रयस्य ज्योतिष्टोमार्थत्वमिति विषयनानात्वम्। अतश्च सर्वेषां विनियोजकत्वमविरुद्धम्। न चात्र विप्रकृष्टग्रहणे संनिकृष्टस्य बाधो दृश्यते। नहि क्रयं गृह्णन् अरुणायाः क्रियासंबन्धं बाधते, नापि ज्योतिष्टोमे कुर्वन् क्रयसंबन्धम्। यत्र तु एकः शेषः, तावानेव च संबन्धान्तरविरोधिना एकेन प्रमाणेन अन्यशेष्यर्थो विज्ञायते, परेण तदबाधानुपपत्तिना शेष्यन्तरार्थः, एकसंबन्धे च कृतार्थस्य आकाङ्क्षाऽभावात् पुनर्विनियोगान्तरानुपपत्तिः, तत्र प्रमाणयोः परस्परापहार्यसमानविषयत्वलक्षणः समवायः। तथा यत्र शेषभेदेऽपि एकस्मिन्नेव शेषिणि तुल्योपकारनिबन्धनः एकेन प्रमाणेनान्यः शेषः साधनत्वेन प्रतीयते, अन्येनापरः, न चैकसाधितोपकारः शेषी शेषान्तरमपेक्षते, तत्रापि एकविषयापहारित्वात् समवायः। स च विरोधे एव सति

भवतीति समवायग्रहणेनैव सिद्धो विरोधः। यत्र पुनः स्पष्ट एव शेषभेदो यथा 'समिधो यजति' इत्यादिषु, यत्र वा तस्यैव किञ्चिदाधिक्यं भवति यथाऽरुणायां व्याख्यातम्, तथा यत्र शेषिभेदो यथाऽऽग्नेयादिष्वष्टाकपालादीनाम्, यत्र वा तद्गतमाधिक्यं यथा दर्शपूर्णमासाङ्गानामेवोपकारभेदः, तत्रापि विषयान्यत्वादसमवाय इति। यच्च श्रुत्या विनियुज्यते, यच्च समाख्यया, तत् सर्वं तुल्यम्। यस्तु सर्वाङ्गजन्य एकः प्रधानोपकारः, तत्र एषामपर्यायविधानादेकमेव प्रमाणम्, शेषत्वं चेति व्यापारभेदादसमवायः। तथा यत्र स एव शेषस्तस्मिन्नेव शेषिणि संनिकृष्टेन विप्रकृष्टेन च प्रमाणेन विनियुज्यते, तत्राप्येकस्यैव प्रमाणत्वेन इतरस्य प्रयोजनान्तरार्थत्वादसमवाय इति। तस्मात् विरोधविषयमेव समवायग्रहणम्। तत्र षण्णामप्येकत्रैव बलाबले कथयितव्ये क्रमवर्तित्वात् वाचो युगपदशक्तेरेकैकस्य संप्रधारणा। यत्तु द्वितीयोपादानं तत् प्रतियोगिना विना बलाबलकथनाशक्तेः तेनोच्यते– द्वयोर्द्वयोः इति। एकार्थवर्तित्वाद्वाचः इत्यस्य अपरा व्याख्या, येयं बलाबलवागेषा प्रत्येकं श्रुत्यादिषु समवैति न समुदाये। तानि हि शेषविनियोगेनार्थवन्ति न बलाबलम्। अतस्तस्याः प्रतिप्रधानवृत्तित्वादयौगपद्येन एकैकस्य संप्रधारणायां कर्तव्यायां द्वितीयोपादानं विरोधबलाबलबाधानां प्रतियोगिन्यनुपपत्तिं दर्शयितुमसंभवात् 'द्वयोर्द्वयोः संप्रधारणा' इत्युक्तम्। तत्र एकैकस्य पञ्चभिः पञ्चभिः सह विचारे कर्तव्ये यदेकैकेन सह क्रियते तद्बाधितबाध्यस्य बाधकबाधकेन बाधस्य सुज्ञानत्वात्। यानि हि श्रुतिबाध्यैर्लिङ्गादिभिर्बाध्यन्ते तानि श्रुत्या बाध्यन्तेतरामिति न तया सह संप्रधारयिष्यन्ते। तत्र प्रथमं तावत् क्रमप्राप्तं श्रुतिलिङ्गयोः संप्रधारणमिति। 'किमिहोदाहरणम्' इति केवलपदप्रयोगाभावात् सर्वत्र वाक्यत्वे सति न श्रुतिलिङ्गयोः स्वसामर्थ्यातिरेको लक्ष्यते इति मन्यमानस्य प्रश्नः। वक्ष्यमाणविवेकाभिप्रायेण आह — 'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इति। किमिन्द्रस्यैवोपस्थानं कर्तव्यम्, उत इन्द्रस्य गार्हपत्यस्य वा, अथवा समुच्चितयोः, अथवा गार्हपत्यस्य एवेति। यदि लिङ्गं बलीयः, तत इन्द्रोपस्थानम्। अथ तुल्यबलत्वं विरोधश्च, ततो विकल्पः। अथ तुल्यबलत्वेऽप्यविरोधः, ततः समुच्चयः। अथ विरोधः श्रुतिबलीयस्त्वं च, ततो गार्हपत्यस्यैवोपस्थानमिति। यत्तु सिद्धवत् गार्हपत्यार्थत्वाङ्गीकरणेन 'वचनात्त्वयथार्थमैन्द्री स्यात्' ३।२।२।३ इत्युक्तम्, तदिह स्थापयिष्यमाणश्रुतिबलीयस्त्वाभिप्रायेण। तेनैव सर्ववाक्यत्वाभिप्रायेण श्रुतिलिङ्गे अर्थे वाक्यत्वभ्रान्त्या पुनः पृच्छति 'का पुनरत्र श्रुतिः किं लिङ्गम्' इति। तत्रोत्तरं गार्हपत्यशब्दश्रवणं मन्त्रसामर्थ्यं चेति। परः पुनराह– यद्येवंविधपदसमूहात्मके श्रुतिलिङ्गे, हन्त तर्हि वाक्यं नाम न किञ्चिदप्यस्ति। तदुच्यताम्, अथ वाक्यं नाम किं (अथ किं वाक्यं नाम इति भाष्ये पाठः) इति। सिद्धान्तवादी तु तथैव शक्यविवेकज्ञानत्वं मन्यमान आह 'संहत्यार्थमभिदधति पदानि वाक्यम्' इति। यद्यपि च न संहतानां कश्चिदेकोऽभिधेयः, तथापि गम्यमानाभिप्रायेणोक्तम्। अथवा एकलक्ष्यमाणार्थप्रयुक्ततया संघातत्वमापादितानि यदा स्वार्थमभिदधति, तदा तद्भूतान्येव सन्ति वाक्यत्वं प्रतिपद्यन्ते इति। यद्येवं ततः उभयोरपि उदाहृतयोर्मन्त्रब्राह्मणयोर्वाक्यलक्षणयोगाद्वाक्ययोरियं संप्रधारणा, न श्रुतिलिङ्गयोरिति। यदि वा अवश्यं श्रुतिलिङ्गयोः विरोधः समर्थनीयस्ततः श्रुतिलिङ्गवाक्यानि लक्षणतो विवेक्तव्यानीदं नाम तेषां परस्परमन्तरमिति। तदभिधीयते– '**यच्छब्दस्योक्तिसामर्थ्यं तल्लिङ्गम्, त्रिविधा श्रुतिः। विध्युक्तिविनियोगाख्या, वाक्यं तु प्राङ्निदर्शितम्॥**' ननु सामर्थ्यपूर्वकत्वादुक्तिविधिविनियोगानाम्, 'ऐन्द्र्या गार्हपत्यम्' इत्यत्रापि शब्दसामर्थ्यमस्ति। 'कदा चन स्तरीरसि' इत्यत्रापि च इन्द्राभिधानमित्यविशेष एव श्रुतिलिङ्गयोः प्राप्नोति। तथाहि, '**विध्युक्तिविनियोगा हि न विना शब्दशक्तिभिः। न चेन्द्रशब्दसामर्थ्यमभिधाश्रुतिवर्जितम्॥**' सत्यमुभयत्र उभयमप्यस्ति। '**किं त्वैन्द्र्यां गार्हपत्यस्य नोक्तिः शक्त्याऽवगम्यते। इन्द्राङ्गत्वमतिश्चास्या नाक्षरश्रुतिकारिता॥**' या हि 'ऐन्द्र्या गार्हपत्यम्' इत्येषा शक्तिः, तया एतान्येव पदानि प्रत्यर्थं

लोके विनियुक्तानि, न मन्त्र ऐन्द्रो गार्हपत्याङ्गम्, अन्यत्र गतया शक्त्या अन्यस्याविनियोगात्। स्वसामर्थ्यप्रवृत्तैस्तु ब्राह्मणपदैः शक्त्या शक्त्यनपेक्षमङ्गत्वमभिधीयते। न चात्र सामर्थ्यं प्रथमं गृह्यते, निवृत्ताभिधानान्यथानुपपत्त्यैव तस्य गम्यमानत्वात्। तेन ज्ञाते विनियोगे शक्तिः कल्प्यते इति नासौ विनियोगकारणम्। यद्यपि वस्तुतः प्रथमं विद्यते, तथापि प्रमाणतः पश्चाद्गृह्यते, इति कारकहेतुत्वे सत्यपि ज्ञापकत्वेनाकारणमित्युच्यते। यदि तु पौरुषेयमिदं भवेत् तथा सति वक्तुरभिधानशक्तिज्ञानं विनियोगाभिधानात् प्रथमतरं भवेत्। न त्वेवमस्ति, वेदस्यापौरुषेयत्वात्। तस्मात् सर्वपुरुषाणां प्रतिपत्तृत्वात् पश्चात्तनं शक्तिज्ञानमित्यक्षरश्रवणकृतः एवायं गार्हपत्याङ्गत्वप्रत्ययः। 'कदा चन स्तरीरसि' इत्यत्र पुनर्यद्यपि इन्द्रशब्देनेन्द्रोऽभिधीयते, तथापि विनियोगो नाभिधीयते इति श्रुतेरव्यापारः। नह्यत्र कस्य चिच्छब्दस्य श्रवणात् इन्द्रस्य शेषित्वम्, मन्त्रस्य शेषत्वं प्रतीयते। यथेतरत्र द्वितीयाश्रवणात् गार्हपत्यस्य ईप्सिततमत्वमैन्द्र्याश्च तृतीयाश्रुत्या करणत्वम्। केवलं तु मन्त्रस्याभिधानसामर्थ्याद्विनियोगयोग्यता दृश्यते। न च तावता विनियोगोऽभिहितो भवति, न च विहितः, मन्त्रस्याविधायकत्वात्। ब्राह्मणवाक्ये तु अविधानं विधानं चोभयमपि निष्पन्नम्। ननु मन्त्रस्यापि अभिधानपूर्वकमेव सामर्थ्यकल्पनम्। सत्यमेवम्। न तु तद्विनियोगस्याभिधानम्। किं तर्हि? अर्थस्वरूपमात्रस्य। अन्यैव च तेन प्रथमं तदभिधानशक्तिः कल्प्यते, अन्या च तद्बलेन विनियोगशक्तिः। कथम्? '**यो हि यस्याभिधानाय शक्त इत्यवगम्यते। विनियोगेऽप्यसौ शक्तो न ह्यशक्तो नियुज्यते॥**' ततश्च द्वितीयसामर्थ्याद्विनियोगः कल्पयिष्यते, न प्रथमात्। प्रथमेन हि विनियोगनिरपेक्षमिन्द्राभिधानमात्रं कृतम्। अत इह ईदृशो विवेकः प्रतिपत्तव्यः। '**एकत्रासति सामर्थ्ये मन्त्रः शेषोऽभिधीयते। अन्यत्रानुक्तशेषत्वं सामर्थ्यं संप्रतीयते॥**' अविद्यमानमेव ऐन्द्र्या गार्हपत्याभिधानसामर्थ्यमभिहितविनियोगविधानात् कल्पनीयम्। विनियोगस्तु प्रथममेव क्लृप्तः। इन्द्रं प्रति तु सामर्थ्यं क्लृप्तमालोच्य विनियोगोऽभिहितो विहितो वेत्येतत् कल्पनीयम्। वाक्ये पुनः '**अर्थं प्रति न सामर्थ्यं न च शेषत्वमुच्यते। केवलः पदसंघातः प्रत्यक्षमुपलभ्यते॥**' कथम्भावदेशसामान्ययौगिकरूपाणां तु प्रकरणक्रमसमाख्यानां विवेकः सुज्ञान एवेति न पृष्टो न निरूपितः। तदेतत् सर्वेष्वेव वाक्येषु समवेतं विविक्तं च दृश्यते इति। नहि किञ्चिदपि वाक्यं शब्दसामर्थ्येनार्थाभिधानेन पदान्तरसंनिधानेन वा विना विद्यते। विवेकश्च पुरोदितः। क्व चित् कस्य चित् पूर्वतरप्रतीतेः। तद्दर्शयति, इह तावत् 'कदा चन स्तरीरसि' इति न विनियोगोऽभिधीयते, न पदान्तरसंनिधेर्वा गम्यते, किं तर्हि, एतस्यामृचीन्द्रशब्द इन्द्राभिधानसमर्थो विद्यते, शेषाणि च पदानि तेनैकवाक्यतां गतानीति समस्तो मन्त्र इन्द्राभिधानसमर्थो गम्यते। सोऽपि च इन्द्रः कर्माङ्गत्वादभिधानार्ह इत्यसत्यपि वचने भवत्यभिधीयतामित्युत्प्रेक्षा। (इन्द्रः अभिधीयतां इत्युत्प्रेक्षा भवति इत्यन्वयः)। गार्हपत्ये पुनर्विनैव मन्त्रसामर्थ्येन विनियोगं ब्राह्मणमभिधत्ते इति बलाबलं चिन्तयितव्यम्। अत्र के चिदाहुः— "एवं तर्हि लिङ्गवाक्ये' इत्येतस्मात्प्रागयं ग्रन्थो योजयितव्यः 'अथवा नात्रैकवाक्यत्वादिन्द्रप्राधान्यम्' इत्यादिः। कुतः? '**लिङ्गत्वमभ्युपेतं चेदिन्द्रोपस्थानकल्पने। उभयत्रापि वाक्यत्वं कथं भूयोऽवकल्पते॥**' यत्र वाक्यद्वयमेतदित्युपन्यस्तं तत्रैवैतद्युज्यते वक्तुम् 'अथवा नात्रैकवाक्यत्वात् इन्द्रप्राधान्यं गार्हपत्यप्राधान्यं वोपस्थानस्य' इति तथा ह्युभयत्राप्येकवाक्यत्वव्यापारनिराकरणमवकल्पते। अन्यथा तु मन्त्रस्य लिङ्गविनियोज्यत्वे पूर्वपक्षवादिनैवाभ्युपगते पुनस्तदनपेक्षमिन्द्रोपस्थानमप्येकवाक्यत्वकृतमेवेत्याशङ्क्य निराकरणमसंबद्धमेव स्यात्। तस्मात् प्रमादादुत्कृष्टस्य ग्रन्थस्य अपकृष्य व्याख्यानं कर्तव्यम्।" न त्ववश्यमेतदादर्तव्यम् (के चिन्मतम्)। भवत्येव हि बह्वीनां परिचोदनानां मध्ये परिचोदनापरिहारकालेऽपि पूर्वपरिचोदनापरिहारः। अपि च। यदा 'अथवा नात्रैकवाक्यत्वात्' इत्येतत् प्रथममुक्तम्, तदाऽपि पुनः 'एवं तर्हि लिङ्गवाक्ये' इत्यत्र वाक्यग्रहणमसंबद्धमेव स्यात्। ततो यथान्यासमवस्थिते अभ्युपेत्यवादमात्रेण पूर्वपक्षवादिनैकत्र लिङ्गत्वमुक्त-

मतोऽस्य वाक्यत्वानुशयशेषमपनयामीत्येवमाह 'अथवा नात्रैकवाक्यत्वात्' इति। यद्वा ब्राह्मणगतमेवैकवाक्यत्वमकारणं विवक्षन् प्रसङ्गान्मन्त्रेऽप्युक्तवानिति व्याख्येयम्। तत्र वाक्यं ह्येतत् 'ऐन्द्या गार्हपत्यमुपतिष्ठते' इत्यस्याभिप्रायः— यदैन्द्याः तृतीयाश्रुत्या शेषत्वमात्रमनवगतशेषिविशेषं प्रतीयते। यत्तु (यच्च) गार्हपत्यमिति द्वितीयया किमपि प्रति शेषित्वमात्रम्, न तस्य लिङ्गेन सह कश्चिद्विरोधः। पदान्तरसंबन्धे ह्यसति यथार्थमेव ऐन्द्याः करणत्वं स्यात्। गार्हपत्यस्य वा यां कां चिदाग्नेयीं प्रति शेषित्वं भवेत्। परस्परसंनिधानं तूभयोरिन्द्रोपस्थानं बाधते तच्च वाक्यमिति। नैतदेवं इति गार्हपत्याभिधानश्रुतिं तावदुपन्यस्यति। परस्परसंनिधानमपि हि श्रुतिं पीडयित्वा शक्यमविरोधेन नेतुम्। यदि तु गार्हपत्यशब्दो गृहपतेरयमित्येवं इन्द्रं अभिवदेत्, यज्ञसाधनत्वेन वा लक्षयेदग्निसमीपं वा, ततो लिङ्गाविरोधेनैव तत्संनिधिरुपपद्यते। यतस्त्वयं समुदायप्रसिद्ध्यभिधेयापरित्यागेन वर्तते, ततो विरुध्यते इति श्रुतिविरोधः। अथवा नात्रैकवाक्यत्वात् इति विभक्तिश्रुतिविरोधोपन्यासः। यदि हि सप्तम्यर्थे वा तृतीयार्थे वा द्वितीया वदेत्ततोऽपि नैव विरोधः स्यात्। यतस्तु ईप्सिततमत्वमाह तेन विरुध्यते। लिङ्गविरोधस्तु प्रागुक्त एव एकवाक्यत्वव्यापारनिराकरणमात्रार्थमुपन्यस्यते। कथं पुनर्यथोक्तेन न्यायेनोभयथा विरोधसंभवे श्रुतिलिङ्गविरोध एव परिगृह्यते, न वाक्यविरोधः। उच्यते। **'यथा शीघ्रप्रवृत्तित्वाल्लिङ्गादेर्बाधिका श्रुतिः। तथैव विनियोगेऽपि सैव पूर्वं प्रवर्तते॥'** यच्च शीघ्रतरं विनियुङ्क्ते, तस्यैव प्रतियोगिना सह विरोधो लक्ष्यते। ननु च श्रुतिमात्रं न विरुध्यते इत्युक्तम्। कथं न विरुध्यते, यदा प्रतिनियतावेतौ श्रुतिवाक्यसंबन्धौ एकः शेषशेषिरूपः, अन्यो विशेषणविशेष्यात्मकः। तत्र च श्रुतिरेवं वदति वाक्यलभ्यस्य विशेषस्यैवंविधं शेषशेषित्वमिति। लिङ्गं तु शेषशेषिसंबन्धेनैव सह विरुध्यते, न वाक्यगम्येन विशेषणविशेष्यभावेन। अतश्च निष्प्रतिद्वन्द्विना वाक्येन यदा विशेषणविशेष्यभावः कृतः, तदा श्रुत्या सह लिङ्गविरोध उपलभ्यमानो विचारयितव्यः। अथवा यदैव ऐन्द्या इत्युक्तम्, तदैव तदर्थशास्त्रन्यायेन इन्द्रव्यतिरिक्तः कोऽप्युपस्थातव्यः स च लिङ्गगम्येन्द्रविरोधीत्येतत्प्रतीयते। तस्मात् श्रुतिलिङ्गयोरेवैष विरोधः इत्युपपन्नो विचारः।

भाष्यम्— (श्रुतिलिङ्गाधिकरणे पूर्वः पक्षः) किं तावत् प्राप्तम्? तुल्यबले एते कारणे इति। कथम्? इदमपि कारणं इदमपि, श्रुतिरपि लिङ्गमपि। नहि विज्ञानस्य विज्ञानस्य च कश्चिद्विशेष उपलभ्यते रूपं प्रति, अस्य भङ्गुरस्येव रूपं अस्य दृढस्येवेति। ननु लिङ्गस्य भङ्गुरस्येव रूपम्। सविचिकित्सो हि भवति लिङ्गात् प्रत्ययः, निर्विचिकित्सः श्रुतेः। नैतद्युक्तम्। यतो लिङ्गात् सविचिकित्सः प्रत्ययः, तस्य च श्रुतेश्च नैव संप्रधारणा अस्ति। यतस्तु खलु लिङ्गान्निर्विचिकित्सः प्रत्ययः स श्रुत्या विकल्पितुमर्हति। ननु नैव कदा चित् लिङ्गान्निर्विचिकित्सः प्रत्ययोऽस्ति। नैतदेवम्। एवं हि सति नैव लिङ्गं नाम किञ्चित् प्रमाणमभविष्यत्। कामं मा भूत् प्रमाणम्। भवति तु संशयो लिङ्गपरिज्ञातेष्वर्थेषु। यदि वा विस्पष्टमेवाप्रामाण्यम्, न संशयः। कथम्? समर्थमेतत् इममर्थमभिनिर्वर्तयितुं इति लिङ्गादेतावदवगम्यते। न च यद्यस्य निर्वर्तनायालम्, तदसत्येव वचने तन्निर्वर्तयितुमर्हति। तस्मान्न लिङ्गं विनियोजकमिति।

अत्राभिधीयते। प्रकरणवतोऽर्थस्य संनिधाने यमर्थमामनन्ति, स तस्य साधनभूतः इत्येव गम्यते। कथं खलु उपकरिष्यतीति संदिह्यमाने, भवति सामर्थ्यात् परिनिश्चयः। यत्रायं समर्थस्तत्र शक्यो विनियोक्तुमिति। तस्माद्भवति लिङ्गं प्रमाणमिति। न च लिङ्गप्रामाण्ये विनिगमनायां हेतुरस्ति। तस्मात्तुल्यबले एते कारणे। 'कदा चन स्तरीरसि' इति लिङ्गादिन्द्र उपस्थातव्यः, श्रुतेर्गार्हपत्य इति। अविरोधात् खल्वपि इममेवार्थं प्रतिपद्यामहे। बलीयानपि हेतुः विरुध्यमानमबलीयांसं बाधितुमर्हति, नाविरुद्धम्। न च कश्चन विरोधः, यदिन्द्रमुपतिष्ठेतानेन मन्त्रेण गार्हपत्यमपि। नन्वयमेव विरोधः सकृदुपस्थानं चोदितं असकृदभिनिर्वर्त्यते इति। उपस्थेयभेदात् 'प्रतिप्रधानमावर्तन्ते गुणाः' इति न्याय एवैष न विरोधः। अयं तर्हि विरोधः। गार्हपत्ये उपस्थीयमाने अग्निवचन इन्द्रशब्दो गुणं क्रियायोगं वा अपेक्षमाणो

भवितुमर्हति। इन्द्रे तूपस्थातव्ये निरपेक्ष इन्द्रवचन एव। 'गौणमुख्ययोश्च मुख्ये संप्रत्ययः' इति। नेति ब्रूमः। विरोधे मुख्येन गौणो बाध्येत। न च कश्चिद्विरोधः। युगपदभिधाने हि विरुध्येयाताम्। इह च अन्यस्मिन् प्रयोगे अग्निवचनः अन्यस्मिन् इन्द्रवचनः। अतः तुल्यबले एते कारणे इति। **एवं प्राप्ते, ब्रूमः।** श्रुतिलिङ्गयोः श्रुतिर्बलीयसी। कुतः? अर्थविप्रकर्षात्। किमिदमर्थविप्रकर्षादिति। अर्थस्य विप्रकर्षः अर्थविप्रकर्षः। कः पुनरर्थः? श्रुत्यर्थः। गार्हपत्यमुपतिष्ठते इति संनिकृष्टः श्रुत्यर्थः। इन्द्र उपस्थेयः इति विप्रकृष्टः। कथम्? 'कदा चन स्तरीरसि' इत्यनेन मन्त्रेण इन्द्र उपस्थातव्य इति न श्रूयते। सत्यपि इन्द्राभिधानसामर्थ्ये वचनाभावादनुपस्थानीय इन्द्र इत्येव गम्यते। ननु इदमुक्तं प्रकरणाम्नानादङ्गमित्यवगम्यते, सामर्थ्याद्विनियोग इति। नैतदस्ति। उक्तमेवैतत् 'धर्मस्य शब्दमूलत्वादशब्दमनपेक्षं स्यात्' (१।३।१।१) इति। यदेतत् प्रकरणं लिङ्गं च, उभयमप्येतत् अशब्दम्। न चातिक्रान्तप्रत्यक्षविषये एवंलक्षणकेऽर्थे शब्दमन्तरेण परिच्छेदोऽवकल्पते। अतो मन्यामहे विप्रकृष्टं श्रुत्यर्थाल्लिङ्गमिति। **यद्येवम्,** श्रुतिर्यत्र विरोधिनी न विद्यते, तत्रापि न लिङ्गादर्थपरिच्छेदः। तत्रैतदेव नास्ति, लिङ्गं प्रमाणमिति। कुत एवैतेनैव श्रुतिविरोत्स्यते इति। तत्र श्रुतिलिङ्गयोर्बलीयस्त्वं प्रति संप्रधारणैव नोपपद्यते इति ब्रूमः। **अत्रोच्यते।** इतिकर्तव्यतार्थिनः प्रकरणवतोऽर्थस्य संनिधौ उपनिपतितो मन्त्रः आम्नानसामर्थ्यात् इतिकर्तव्यताकाङ्क्षस्य वाक्यशेषतामभ्युपेत्य (अभ्युपैति) एतेन मन्त्रेण यजेतेति। किमुक्तं भवति? यागेनाभीप्सिते साध्यमाने अनेन मन्त्रेणोपकुर्यादिति। न चान्तरेणेन्द्राभिधानं अयं मन्त्रः उपकर्तुं शक्नोति। तेनैतदुक्तं भवति, अनेन इन्द्रोऽभिधातव्यः इति। अतः श्रुतिमूल एवायमर्थः। यदि श्रुतिमूलो न श्रुत्यन्तरेण बाधितुं शक्यः। तदेतल्लिङ्गम्, यदि वा नैव प्रमाणम्, यदि वा श्रुत्या विकल्पितुमर्हतीति, नाप्यप्रमाणं भविष्यति, नापि विकल्पिष्यते इति ब्रूमः। कथम्? श्रुतिलक्षणोऽयमर्थ इत्युपपादितम्। तस्मात्प्रमाणम्। यतस्तु खलु आनुमानिकीमेकवाक्यतां लिङ्गसामर्थ्यं चापेक्ष्य श्रौतोऽयमर्थः, यदिन्द्रस्योपस्थानमनेन मन्त्रेणेत्यवगम्यते। प्रत्यक्षा तु श्रुतिर्गार्हपत्यमुपतिष्ठते इति। स एषोऽर्थविप्रकर्षः, प्रथमं तावल्लिङ्गज्ञानम्। ततः सामर्थ्याच्छब्देनायमर्थोऽभिहितो भवति; तदेतत् श्रुतिविरोधे नावकल्पते। विस्पष्टं ह्यवगतमेतदनेन मन्त्रेण गार्हपत्य उपस्थेय इति। तत्र विज्ञातं एतदेवमयमुपकरोति मन्त्र इति। एतस्मिंश्च निर्ज्ञाते कृतसामर्थ्ययोर्वाक्यप्रकरणयोर्नैतदेवं कल्पयितुं शक्यमिन्द्रोपस्थानं शब्देनाभिहितमिति। तस्मादर्थविप्रकर्षात् श्रुत्या लिङ्गं बाध्यते इति। विकल्पस्य चान्याय्यत्वात्। अन्याय्यश्च विकल्पः। तत्र ह्यभावः पक्षे। नित्यवत् च 'ऐन्द्या गार्हपत्यमुपतिष्ठते' इति श्रूयमाणे यदभावः पक्षे परिकल्प्यते, तदश्रुतं भवति। श्रुतं च हीयते। यावांश्च श्रुतस्यार्थस्य उत्सर्गे दोषस्तावान् अश्रुतपरिकल्पनायाम्। उभयत्र हि प्रसिद्धिर्बाध्यते। तस्मादन्याय्यत्वाद्विकल्पस्य श्रुतिलिङ्गयोः श्रुतिर्बलीयसीत्यवगच्छामः।

अथ यदुक्तं सति विरोधे न्याय्यो बाधः। न चात्रास्ति विरोध इति। अयमस्ति विरोधः। यदकृतसामर्थ्ययोर्वाक्यप्रकरणयोः इन्द्रोपस्थानवाचिनी श्रुतिर्भवति। कृतसामर्थ्ययोस्तु नावकल्पते। न च वाक्यप्रकरणाभ्यां युगपत् कृतसामर्थ्याभ्यामकृतसामर्थ्याभ्यां च शक्यं भवितुम्। तस्माद्विरोधः। विरोधे च श्रुतिर्लिङ्गाद्बलीयसीति।

वा— इदानीं साध्यशेषमनुक्रमिष्यामः। 'तत्र तुल्यबलत्वोक्तिः स्वतःप्रामाण्यविभ्रमात्। प्रदेशान्तरदृष्टं च रूपं तुल्यं द्वयोरपि॥' स्वत एव मन्त्ररूपं दृष्ट्वा श्रुत्यनुमानान्तरेणैव विनियोगबुद्धिर्भवति इति श्रुतितुल्यत्वम्। 'नहि विज्ञानस्य विज्ञानस्य च विशेष उपलभ्यते' इति मन्त्राम्नानवेलायां इन्द्रार्थत्वं ज्ञातम्, श्रुत्युच्चारणकालेऽपि गार्हपत्यार्थत्वम्, इत्युभयोः लब्धात्मनोः अविशिष्टत्वम्। नहि अविज्ञातरूपो मन्त्रः श्रुत्या शक्यो विनियोक्तुम्, इति श्रुत्या प्रथमं रूपनिरूपणं कर्तव्यम्। अतश्च तदवधारणवेलायां इन्द्रोपस्थानप्रत्ययो जातो न शक्यो निवर्तयितुमिति मन्यते। 'ननु लिङ्गस्य भङ्गुरस्येव रूपम्। सविचिकित्सो हि' इति श्रुतौ दृश्यमानायां अनुमानासंभवात् भङ्गुरत्वम्। सविचि-

कित्सो हि तु अयम्, विक्षेपजन्यत्वात्। नहि अस्य स्वतःप्रामाण्यं इत्यभिप्रायः। परः पुनः प्रत्ययोत्पादनं ऐकान्तिकं गृहीत्वा सविचिकित्सत्वं संदेहविपर्ययानध्यवसायानां अन्यतमं मन्यमान आह– '**नैतद्युक्तम्। यतो लिङ्गात् सविचिकित्सः प्रत्ययः। तस्य (च) श्रुतेश्च नैव संप्रधारणा अस्ति**' इति किमियं ऐन्द्री भवति न भवति, इत्यनिश्चितः। तस्य श्रुत्यविरोधे अप्रमाणत्वात् नैवं तया सह बलाबलचिन्ता। यतस्तु निर्विचिकित्स एकान्तेन एतद्देवत्योऽयं मन्त्र इति प्रत्ययः, स श्रुत्या सह तुल्यबलत्वाद्विकल्पितुमर्हति। ननु नैव कदा चिदिति। पूर्ववदेव कदा चिन्निर्विक्षेप इति मन्यते। इतरस्तु स्वाभिप्रेतमेव सविचिकित्सत्वं गृहीत्वाऽऽह '**एवं हि सति नैव लिङ्गं नाम किञ्चित् प्रमाणमभविष्यत्**' इति। सिद्धान्तवादी तु वदति यदि सविक्षेपप्रत्ययोत्पादनमात्रेण कुपितं लिङ्गं प्रामाण्यमेव मुञ्चति '**कामं मा भूत् प्रमाणम्, भवति तु संशयो लिङ्गपरिज्ञातेष्वर्थेषु**' इति। कथं पुनः सविक्षेपत्वं परित्यज्य संशय एव सविचिकित्सत्वमुदाह्रियते। कथं वा लिङ्गपरिज्ञातत्वं सिद्धवदभिधीयते। नैष दोषः। लिङ्गपरिज्ञातत्वं तावदविरोधवेलाभिप्रायम्, संदिग्धत्वं विरोधवेलायाम्। एतदुक्तं भवति। यदविरोधकाले लिङ्गस्यावगतं विनियोजकत्वम्, तत्र तथैव सर्वत्रैव अवतिष्ठते। किं तर्हि ? संदिह्यते। अन्यत्र अविरोधात् विनियोगोऽङ्गीकृतः, स इह किं तथैव भवति अथ केन चिद्व्यावर्तिष्यते इति। यदि वा विस्पष्टमेवाप्रामाण्यमिति। तावदेव संदेहो भवति यावत् प्रत्यक्षा श्रुतिर्नोपलभ्यते। तस्यां तु सत्यां इतरकल्पनानुपपत्तेरप्रामाण्यम्। लिङ्गे हि सामर्थ्यमात्रं प्रत्यक्षम्। न च तावता विनियोग उक्तो भवति। न चानुक्तस्य क्रियायां प्रामाण्यमस्ति। यथा सत्यपि सामर्थ्ये विप्रराजन्यौ न न वैश्यस्तोमं कुरुतः। तस्मान्न लिङ्गं विनियोजकमिति। परस्तु विरोधविषयमप्रामाण्याभिधानं अज्ञात्वा सार्वत्रिकमेवेदमुक्तमिति भीतः प्रामाण्यमार्गं दर्शयति 'प्रकरणवतोऽर्थस्य संनिधाने यमर्थमामनन्ति' इति। तदेतत् 'अपि वा प्रयोगसामर्थ्यान्मन्त्रोऽभिधानवाची स्यात्' इत्यत्र 'अविशिष्टस्तु वाक्यार्थः' इत्यत्र च वर्णितम्। अथवा सिद्धान्तवादिनाऽपि विरोधे सुखतरमप्रमाणत्वं वक्ष्यामीति मन्यमानेन प्रथमं स्वतन्त्रमेव तावदप्रामाण्यं दर्शितम्। तथाकृते स्वयमेवैतस्य श्रुत्यनुमानद्वारप्रामाण्यकल्पनमापत्स्यते। ततश्च मम सुजयो भविष्यति। तत्र इतरेण विरोधविषयमनादृत्य प्रामाण्यं तावदस्तीति निरूप्य तुल्यबलत्वमभिहितम्। अभ्युपगम्यापि बलाबलं अविरोधाद्बाधः। तत्रथोपदेशातिदेशाभ्यां प्रयाजाद्युपकारस्य प्रकृतिविकृत्यर्थत्वात् अविरोधः। सकृच्चोदितस्यासकृत्करणेऽपि प्रधानानुरोधेन गुणानुवृत्तेः सर्वश्रेष्ठत्वात्। इन्द्रशब्दस्य गार्हपत्ये गौणत्वादवयवप्रसिद्धेर्वा इन्द्रे मुख्यत्वात् समुदायप्रसिद्धेर्विरोध इति चेत्। न। प्रयोगभेदेन परिहारात्। युगपदुपदिश्यमानं ह्येतत् संभवासंभवाश्रयणाद्विरुध्यते। प्रयोगभेदे तु सति गार्हपत्याभिधानवेलायां यज्ञसाधनत्वं वा गुणं इन्दतिक्रियाख्यैश्वर्ययोगं वाऽङ्गीकृत्य प्रवर्त्स्यति। इन्द्राभिधानकाले तु मुख्य इत्यविरोधः। तस्मान्नास्ति बाधः, इति। **एवं प्राप्ते, ब्रूमः**। श्रुतिर्लिङ्गाद्बलीयसी। कुतः ? '**मन्त्रोऽयं गार्हपत्याङ्गं शब्देनैवाभिधीयते। इन्द्राङ्गत्वं तु सामर्थ्यादशब्दमनुमीयते ॥**' यत्तु प्रकरणात् सामर्थ्याच्चाङ्गत्वानुमानमुक्तम्, तच्छब्देनासंस्पृष्टं ईदृशेष्वर्थेषु अप्रमाणमित्युक्तम्। परस्तु सार्वत्रिकमेव लिङ्गस्याशाब्दत्वमुक्तमिति मन्यमानो न तर्हि विरोधाद्बाधः। किं तर्हि ? अप्रमाणत्वादेवेति विवक्षन् यद्येवमित्याह। सिद्धान्तवादी तु यथा प्रथमं पूर्वपक्षवादिना लिङ्गस्य प्रामाण्यं उक्तमासीत् तथेदानीं स्वयं प्रतिपादयति। भवति हि प्रकरणादेषोऽर्थः, यथा शक्नुयात्तथा यागस्य अनेनोपकुर्यादिति। न च स्वार्थाभिधानादन्यथा शक्नोति असावुपकर्तुमिति तत्र विनियोगश्चोदितो भवति। परस्तु मदीयमेवायं पूर्वोक्तिं मार्गमायातः, क्वेदानीं गमिष्यतीत्युत्साहेनाऽऽह '**यदि श्रुतिमूलः, न श्रुत्यन्तरेण बाधितुं शक्यः**'। तेन यदि तावत् अशाब्दोऽयमर्थः, ततो नैव प्रमाणम्। अथ शाब्दः, ततस्तुल्यबल इति। सिद्धान्तवादी तु द्वयमपि परिहरति–– नापीति। आनुमानिक्याः श्रुतेः अविरोधे सति आत्मलाभात् विरोधे चानुत्पादात्। यत्र हि प्रत्यक्षया श्रुत्या मन्त्रो न विनियोगं प्रति निराकाङ्क्षीकृतः तत्रास्य

विनियोगसिद्ध्यर्थं यावत् कल्प्यते तत्सर्वं आम्नानान्यथाऽनुपपत्तिमुद्रामुद्रितत्वात् वैदिकं भवति। यत्र विस्पष्टमेवावगतं अनेन गार्हपत्य उपस्थेय इति तत्र आम्नानप्रयोजनेन साध्ये प्रयोगोपकारे विज्ञाते नैतावत् कल्प्यमानं वेदः सहते अनेन इन्द्रोपस्थानं कर्तव्यमिति। तस्मात् दुर्बलं लिङ्गम्। किंच '**सर्वत्रैव विकल्पानामन्याय्यत्वमवस्थितम्। पक्षे हि सदसद्भावावेकत्रार्थे दुराश्रयौ ॥**' स्वतन्त्रया श्रुत्या नित्यमेव गार्हपत्योपस्थानं चोदितम्, लिङ्गेन स्वतन्त्रेण इन्द्रोपस्थानम्। तत्रान्यतराश्रयणे सति इतरच्चोदितं सन्न क्रियते, तदपेक्षया चेतरदचोदितं सत् कृतम्। तदकरणमप्यचोदितम्। श्रुतहान्यश्रुतकल्पनयोश्च तुल्यो दोषः। प्रसिद्धिबाधात्। चोदितस्य कर्तव्यता प्रसिद्धिः, इतरस्याकर्तव्यत्वम्, तदुभयमतिक्रम्येत। तस्मात्तावन्न विकल्पः। यस्तु विरोधपरिहारार्थं समुच्चयोऽभिहितस्तत्र ब्रूमः, अस्त्येव विरोधः। कथम् ? '**श्रुत्या ह्यत्र निराकाङ्क्षे मन्त्रप्रकरणे कृते। लिङ्गं साकाङ्क्षसाध्यार्थं तयैकान्ताद्विरुध्यते ॥**' एकोऽयं मन्त्र एकं च प्रकरणम्। सकृच्चाऽऽम्नातस्यैकरूप्येण भवितव्यम्। तत्र श्रुतिविनियोगवेलायां मन्त्रप्रकरणिनोर्निराकाङ्क्षत्वं भवेद्वा न वा। तद्यदि तावत् नास्ति, ततो विनियोग एवासिद्धः। नहि विनियुक्तस्याऽऽकाङ्क्षा युज्यते। अथ तु अस्ति, ततश्च आकाङ्क्षाऽधीनसिद्धित्वात् लैङ्गिकविनियोगानुपपत्तिः। युगपद्भावाश्रयणे हि अस्त्याकाङ्क्षा नास्ति वेति विप्रतिषिद्धं स्यात्। एवं सत्यपि तु यदि प्रमाणयोस्तुल्यप्रवृत्तित्वं भवेत्ततो विशेषाग्रहणान्न ज्ञायेत केन प्रथमतरं निराकाङ्क्ष इति। युगपदेव उभाभ्यां निराकाङ्क्षीक्रियमाणः उभयार्थो भवेत्। अस्ति तु प्रमाणयोर्विशेषः। श्रुतेः शीघ्रतरप्रवृत्तित्वात्। अतस्तया विनियुक्ते मन्त्रे, न लिङ्गस्यावकाशोऽस्तीति श्रुतिबलीयस्त्वसिद्धिः। '**सूत्रेण परदौर्बल्ये सूत्रिते सति, भाष्यकृत्। आर्थं पूर्वबलीयस्त्वं व्याचष्टे तदनादरात् ॥**' (पृ. ८४१–८४७).

(**श्रुतिप्राबल्यविचारः—**) किं तावत् प्राप्तम् ? सर्वप्रमाणानि तुल्यबलानि इत्यवगन्तव्यम्। कुतः ? '**क्वचिद्यस्य प्रमाणत्वं स्वशक्तेरवधारितम्। नह्यन्यापेक्षया तस्य सा शक्तिरपगच्छति ॥**' सर्वत्र प्रत्यक्षादावपि द्वय्येव गतिः प्रमाणस्वरूपं प्रमाणाभासं च। न तत्र यत् प्रमाणम्, तत् कदा चिदपि प्रमाणाभासो भवति। योऽपि तदाभासः, सोऽपि नैव प्रमाणं भवति। नित्यं च प्रमाणाभासबाधः, न प्रमाणस्यैव। न च तत्र बाध्यस्य प्रामाण्यमभ्युपगतम्। बाधनाक्षमत्वात् प्रमाणस्य। श्रुत्यादिषट्कस्य च समस्तस्य स्वविषये प्रामाण्यं स्थापितम्। न चैषां विषयान्तरसंचारोऽस्ति यत्र दौर्बल्यमाशङ्क्यते, न चैतदुपस्थापितं ज्ञानमनुत्पन्नं शक्यं च वेदितुम्। न चोत्पन्नस्य स्वरसभङ्गुरत्वात् उत्तरेण विनाशः। न च संस्कारापनयनम्। स्मृतिहेतोः संस्कारस्य सर्वत्रानुच्छेदात्। नाप्यनुष्ठानाख्यात् फलात् विनियोगः शक्यते कर्तुम्, अनुष्ठानप्रत्ययस्य दृढत्वात्। तस्मात् सर्वत्र तुल्यबलत्वाद्विकल्पः। '**बाधस्तु यदि कल्प्येत, विपरीतः प्रसज्यते। नहि पूर्वमबाधित्वा परेषां जन्म लभ्यते ॥**' श्रुत्यादीनां हि पूर्वं पूर्वं शीघ्रतरं प्रवर्तते। तेन पश्चात्तनस्य तदुपमर्देनैव आत्मलाभेन भवितव्यम्। अतश्च विपरीतबाधप्रसङ्गः। किञ्च, '**श्रुत्यादिना समर्थस्य विनियोगोऽपि कल्पते। न सामर्थ्यादिरूपं स्यादेकवाक्यादिभिर्विना ॥**' (यद्यपि श्रुत्या विनियोगः प्रतीयते, तथापि अशक्तस्य नावकल्पते इति अपिशब्दार्थः। सामर्थ्यैकवाक्यस्य तु आकाङ्क्षारूपाणां लिङ्ग–वाक्य–प्रकरणानां एकवाक्यत्वाकाङ्क्षासंनिधिरूपैः वाक्यप्रकरणस्थानैर्विना रूपमेव नास्तीत्यर्थः। सुधा. पृ. १२१८। अत्र यद्यपि आनन्दाश्रमीये 'योगोऽवकल्पते' इति पाठः, तथापि सुधाऽनुसार्येव पाठो ग्राह्यः। के.)। उत्पत्तिकाले यस्यान्यविषयसामर्थ्यमवधृतम्, न तस्य तद्विनियोगकाले परावर्तयितुं शक्यते। विनियोगस्तु सामर्थ्यानुसारीति युक्तमध्यवसातुम्। एवं यस्य येन सह संबन्ध एकवाक्यतया न विद्यते, न तस्य तद्विषया शक्तिः कल्प्यते। संबन्धे सति तदन्यथाऽनुपपत्त्यैव शक्तिसिद्धिरिति वाक्यस्य बलीयस्त्वम्। तथा सर्वत्रैकवाक्यत्वं आकाङ्क्षामूलम्। अतः तस्यामुपलभ्यमानायां तदेकान्तेन प्रतीयते। तदभावे तु नैतदस्तीति पूर्वतरभावित्वादाकाङ्क्षात्मकं प्रकरणमेव ज्यायः। तद्विरोधिनी तु या

अन्येन सह एकवाक्यताऽवगतिः, सा भ्रान्तिः । तथा सर्वाकाङ्क्षाः संनिहितावलम्बिन्यो भवन्ति । नह्यसंनिहितमपेक्षितुं संबन्धुं वा शक्यम्, अतो यत्र संनिधिः तत्र सर्वमिति बलीयस्त्वम् । सामाख्या पुनः प्रत्यक्षमेव संबन्धं वदति । तस्मात् विपरीतं बलाबलम् । अथवा विरोधे सत्येतच्चिन्त्यते । न च इह विरोधः । उभयत्रापि विनियोगोपपत्तेः । अतः समवायेऽपि सर्वेषां प्रामाण्यम् । **इति प्राप्ते, अभिधीयते** । श्रुत्यर्थविप्रकर्षात् परंपरमेषां बाध्यते इति । कुतः ? ' **विनियोक्त्री श्रुतिस्तावत् सर्वेष्वेतेषु संमता । धीस्तस्याः संनिकर्षेण विप्रकर्षेण च स्थिता ॥** ' यदि श्रुतिवल्लिङ्गादीनामपि स्वतन्त्राणां प्रामाण्यमभविष्यत्, तत एतदुपापत्स्यत । तेषां तु स्मृतिवत् श्रुत्यनुमानद्वारं प्रामाण्यम् । श्रुतिरेव ह्यत्रैकं प्रमाणम् । सा तु ग्रहणोपायषट्कानुरोधेन षोढाऽवतिष्ठते । कथं पुनरेषां स्वातन्त्र्येण प्रामाण्यं न भवति । उच्यते । 'चोदनालक्षणोऽर्थो धर्मः' (१।१।२।२) इति स्थापितम् । तथा चोक्तम् 'अशब्दमनपेक्षं स्यात्' (१।२।१।१) इति । तत्र प्रत्यक्षगृहीतानि यान्यक्षराणि विनियुञ्जते, सा श्रोत्रवृत्तित्वात् श्रुतिरित्युच्यते । यत्र तु अविनियोजकान्यक्षराणि प्रत्यक्षेण गृहीत्वा विनियोजकान्यर्थापत्त्या कल्प्यन्ते तत्र लिङ्गादीनि भवन्ति । ततश्चैवं अर्थविप्रकर्षो भवति । ऐन्द्रीविनियोगं हि प्रति श्रुतिलिङ्गयोः सह प्रस्थितयोर्यदा श्रुतेर्विनियोजकान्यक्षराणि दृश्यन्ते, तदा लिङ्गे स्मरणसमर्थानि, ततो यावत् तेषां प्रकरणाम्नानान्यथाऽनुपपत्त्या विनियोजकानि कल्पयितुमारभ्यन्ते, तावदितरैः प्रत्यक्षैर्विनियोगः प्रत्यायितः । तस्मिंश्च प्रतीते मन्त्रोऽपि प्रकरणिनं प्रति निराकाङ्क्षीभूतः । प्रकरण्यपि मन्त्रं प्रति । तथा सति प्रकरणाम्नानस्य अन्यथाऽप्युपपद्यमानत्वात् नेन्द्राभिधानश्रुतिकल्पनायामर्थापत्तिः प्रभवति । न च श्रुतिमन्तरेण विनियोगः सिध्यति । बहुधा वर्णितं चैतत्पुरस्तात्, यथा साकाङ्क्षे वेदार्थे यत्कल्प्यते, तद्वैदिकम्, नेतरदिति । तस्मात् श्रुतिर्बलीयसी । नहि तस्याः किञ्चिदन्यदपेक्षणीयमस्ति, यथा लिङ्गस्य श्रुतिरेवम् ! आह च । ' **नापेक्षा यस्य यत्रास्ति, स तस्माद्बलवान् भवेत् । यः पराधीनवृत्तिः स तद्बाधं कथमाचरेत् ॥** ' श्रुत्यादीनां हि पूर्वपूर्वमुत्तरोत्तरनिरपेक्षं प्रवर्तमानं बलवद्भवति, परंपरं तु पूर्वाधीनप्रामाण्यं न शक्नोति तस्यैव बाधं कर्तुम् । नहि श्रुतिमननुमाय लिङ्गादेः प्रामाण्यमध्यवसीयते इत्युक्तम् । ननु एतदप्युक्तम्, नासमर्थं विनियुज्यते इति । सत्यमुक्तम् । अयुक्तं तूक्तम् । कुतः ? ' **न श्रुतेर्विनियोक्तृत्वं लिङ्गाधीनं प्रतीयते । विज्ञाते विनियोगे तु तद्वशाच्छक्तिनिर्णयः ॥** ' विनियोगोत्तरकालं हि कथमेतत् साधयिष्यति इत्यपेक्षिते, यथा शक्नोतीत्यवधारणा भवति । तत्र यद्यपि स्वरूपेण तद्विषया शक्तिर्न दृश्यते, तथापि विनियोगदर्शनादेव अनुमीयते । तदुक्तम् ' वचनात्त्वयथार्थमैन्द्री स्यात् ' (३।२।२।३) इत्यत्र । **ननु** च प्रागविद्यमानसामर्थ्यस्य विनियोगो न संभवतीति पूर्वतरं सामर्थ्यमनुमातव्यम् । ततश्च प्रत्यक्षाल्लिङ्गात् दुर्बलत्वापत्तिः । **सत्यम्** । पूर्वभावित्वेन तत् कल्प्यते, न तु पूर्वमेव गम्यते । नह्यविनियुक्ताया ऐन्द्र्याः गार्हपत्याभिधानसामर्थ्यप्रतिपत्तिकारणमस्ति । निर्वृत्तविनियोगान्यथाऽनुपपत्त्या पूर्वमपि विद्यमानं पश्चादेव अनुमीयते । **ननु** एवमपि तुल्योऽर्थविप्रकर्षः । तथाहि, ' **विक्षेपो यावता लिङ्गे स्यात् श्रुतेरनुमापके । लिङ्गानुमानभूतायां तावतैव श्रुतावपि ॥** ' सर्वथा ह्यदृश्यमानानुमानेन प्रत्ययविप्रकर्षो भवति । तच्चोभयत्रापि समानम् । **सत्यमेतावत्समानम्**, न तु तत् बलाबलं प्रति उपयुज्यते । कुतः ? '**विनियोगाभिधानस्य दूरत्वाद्दुर्बलत्वधीः । तच्च पूर्वानुमायां स्यान्नोत्तरत्र कथञ्चन ॥** ' लिङ्गे हि प्राग्भाविना श्रुत्यनुमानेन विना विनियोगाभिधानाभावात् दूरत्वं भवति । श्रुतौ पुनरवगते विनियोगाभिधाने यस्मादेतदेवम्, तस्मात् नूनं किमपि सामर्थ्यमस्तीति पश्चात् प्रवर्तमानमनुमानम्, न विनियोगप्रत्ययविक्षेपं करोति । सहप्रस्थितयोर्हि प्रमाणयोर्येन विनियोगदेशाश्चिरेण प्राप्तो भवति, स विक्षेपो दौर्बल्यकरो भवति । अवधारिते तु विनियोगे, यद्यपि पश्चादनुमानसहस्रं भवति न तथापि कश्चिद्विप्रकर्षः । एतेन लिङ्गवाक्यादियुगलानि व्याख्येयानि । सर्वत्र हि परस्य पूर्वमननुमाय विनियोगानुपपत्तिः । पूर्वेण तु कृते विनियोगे परस्य नान्तरीयकं

सद्भावमात्रकल्पनमिति प्रतिपत्तिः । आह । श्रुतेस्तावत्प्रत्यक्षत्वेन लिङ्गात् बलीयस्त्वं युक्तम् । (पृ. ८२८ –८३१)

(**श्रुत्योर्विरोधे**–) । यथा चैषामर्थविप्रकर्षाद्विजातीयैः सह बलाबलमेवं सजातीयैरपि यत्र हेतुसामान्यं तत्र दर्शयितव्यम् । तद्यथा श्रुतेरेव तावत् सामान्यविशेषादिभावेन शेषविषयः समवायः । 'पुरोडाशं चतुर्धा करोति ' इत्यविशेषश्रवणात् अग्नीषोमीयादावपि प्राप्नुवत् ' आग्नेयं चतुर्धा ' इति विशेषश्रवणेन विशेषे चतुर्धाकरणमुपसंह्रियते । तथा शेषिसमवाये ' यदाहवनीये जुहोति ' इति सप्तमीश्रुत्या जुहोतिसामानाधिकरण्येन अवभृथेऽपि आहवनीयः प्राप्यमाणो विशेषसंयुक्तया ' अप्स्ववभृथेन ' इत्यनया बाध्यते । संदिग्धासंदिग्धत्वेन च बलाबलविशेषो भविष्यति । एवं पौर्वापर्यविरोधाङ्गगुणविरोधादिष्वपि श्रुतिद्वयमुदाहर्तव्यम् । ' **तथा पशवङ्गमेकत्वं पदश्रुत्या प्रतीयते । समानप्रत्ययश्रुत्या बलीयस्या क्रियाङ्गता ॥ तथा धात्वर्थकर्मत्वे पदश्रुत्योपपादिते । भावनाया विधिश्रुत्या पुरुषार्थस्य साध्यता ॥** ' (पृ. ८४०) ।

शेषशेषिसमवायश्च प्रत्येकं विविच्योदाहर्तव्यः । एवं तावत् प्रत्यक्षेषु श्रुत्यादिषु विचारितम् । एतयैव दिशा अनुमानादिगम्येष्वपि सजातीयविजातीयसमवाये विचारयितव्यम् । तत्र च प्रत्यक्षगम्यानामानुमानिकैः, आनुमानिकानां चानुमानिकैः सह पूर्वोक्तेनैव मार्गेण सजातीयविजातीयबलाबलं व्याख्येयम् । तद्यथा अतिदेशप्राप्ताः श्रुत्यादयः प्रत्यक्षैर्विकृतिषु बाधिष्यन्ते । विपरीतोऽपि चेह बाधो भवति । पूर्वपूर्वमपि ह्यानुमानिकं परेणपरेणापि प्रत्यक्षेण बाध्यते । यथा कृष्णलेषु सामर्थ्येनावघ्रातः । सर्ववस्तुविषयं च सामर्थ्यम्, लिङ्गं केवलं मन्त्रगतमेवावगन्तव्यम् । तथा च यान्यप्यन्यार्थदर्शनानि अनन्यगतीनि, तेषामपि लिङ्गत्वमभिधास्यते । का पुनरत्र लिङ्गस्य प्राप्तिः, अनन्यथासंभव इत्यादि । यत्र पुनः श्रुतिः आनुमानिकी लिङ्गं च प्रत्यक्षम्, तत्र कथम् । यथा स्मृतिवैदिकलिङ्गविरोधे । तत्र स्मृतेर्मूलान्तरमपि संभाव्यते, न तु लिङ्गस्येति तदेव बलवदित्यनुसर्तव्यम् । सर्वत्र दुर्बलस्यापि प्रमाणस्य बाधे यदि किञ्चिदनर्थकी भवति, ततो विपरीतो बाधो योजयितव्यः । तदुक्तम् ' व्रीहीन् प्रोक्षति ' इत्यत्र श्रुतिमुत्सृज्यापूर्वसाधनत्वग्रहणमिति । तथा ' **दुर्बलस्य प्रमाणस्य बलवानाश्रयो यदा । तदाऽपि विपरीतत्वं शिष्टाकोपे यथोदितम् ॥** ' सर्वप्रमाणानामेव अर्थद्वारः परस्परविरोधो न स्वरूपनिमित्तः । तत्र यदा पदार्थतद्धर्मविषये प्रमाणे विरुध्येते, तत्र यद्यपि प्रमाणतोऽन्यादृशं बलाबलम्, तथापि प्रमेयानुरोधेन तदाश्रयणात् स्वरूपदुर्बलेनापि बलवत् बाध्यमानं तदानुगुण्यं प्रतिपद्यते । तदुक्तमाचमनादयः पदार्थास्तेषां गुणः क्रम इति । तथा च लोके '**अत्यन्तबलवन्तोऽपि पौरजानपदा जनाः । दुर्बलैरपि बाध्यन्ते पुरुषैः पार्थिवाश्रितैः ॥** ' एवं सूत्रम्, श्रुतिलिङ्गविरोधोपपादनान्तं च भाष्यं व्याख्यातम् । (पृ. ८४१) ।

श्रुतिवाक्ययोर्विरोधे, अरुणादिवाक्यसामर्थ्यात् आनन्तर्यसामानाधिकरण्याभ्यां एकहायन्यादिशेषत्वं प्राप्नुवत् तृतीयाश्रुत्या क्रयसंबन्धित्वेन विज्ञायते । द्वितीयसोपानभूगतारोहकयोरिव ह्यत्र यावत् वाक्यं सामर्थ्यं कल्पयति, तावत् श्रुत्या विनियोगः कल्पितः, इति महदन्तरम् । **श्रुतिप्रकरणयोर्विरोधे** प्रकरणादेकविंशत्याद्यनुवचनानां दर्शपूर्णमासाङ्गत्वे प्राप्ते, श्रुत्यैव प्रतिष्ठाकामादिषु पुरुषार्थावधारणात् प्रकरणबाधः । अनुवचनानां च क्रियात्मकत्वादितिकर्तव्यतारूपत्वात् प्रकरणग्राह्यत्वेन तद्विरोधोदाहरणत्वम् । ' तिस्र एव साह्नस्योपसदो द्वादशाहीनस्य ' इति तु द्वादशत्वस्य अक्रियात्वात् अनितिकर्तव्यतात्मकत्वे सति कथम्भावरूपप्रकरणग्राह्यत्वानुपपत्तेः संनिधिमात्रेण प्रकरणकल्पनापूर्वकसंबन्धाध्यवसानात् श्रुतिस्थानविरोधोदाहरणत्वं युक्तमित्येके । तत्तु नैवमाश्रितम् । कुतः ? ' **यदि द्रव्यगता संख्या स्वतन्त्रा वा भवेदियम् । नेत्थम्भावेन गृह्येत क्रियारूपेण वर्जनात् ॥ इतिकर्तव्यतांशस्थां येनोद्दिश्योपसत्क्रियाम् । द्वादशत्वविधिस्तेन कथम्भावेन गृह्यते ॥ इहापि च कथम्भावविनियुक्तोपसद्गता । यावत् संख्यैकवाक्यत्वसामर्थ्यं कल्पयिष्यति ॥ तावत् प्रत्यक्षया श्रुत्या षष्ठ्याऽहीनाङ्गतां गता । नैव**

ह्यहर्गणादन्यदहान्यहीनमुच्यते ॥ ' श्रुतिक्रमविरोधे किमुदाहरणमिति । ' उच्यते रशनाधर्मा दर्भमय्यादयः क्रमात् । अग्नीषोमीयशेषाः स्युः श्रुत्या यूपाङ्गतां गताः ॥ एतद्यूपपरिव्याणशेषो हि रशना श्रुता । सह धर्मैर्न सा याति क्रमेण पशुशेषताम् ॥ यावत् प्रकरणादीनि तस्याः कल्पयति क्रमः । चतुर्भिस्तैर्व्यपेतत्वाच्छ्रुत्या तावत् स जीयते ॥ आकाङ्क्षामात्रमेवैकं यावत् कल्पयति क्रमः । दूरेण तावदप्राप्तां रशनां हरति श्रुतिः ॥ '

श्रुतिसमाख्ययोर्विरोधे किमुदाहरणम् । पौरोडाशिकमिति समाख्याते दर्शपूर्णमासकाण्डे पठितो मन्त्रः साधारणे प्रकरणे वर्तमानः क्रमेण चानुन्मीलितलिङ्गेन अविनियुज्यमानः पुरोडाशस्यैव वा प्राथम्यात् प्राप्नुवन्, श्रुत्या सांनाय्यार्थशाखाङ्गत्वेन विधीयते ' इषे त्वेति शाखां छिनत्ति ' इति । तत्रापि यावत् समाख्यया किञ्चित् सामान्यं कल्प्यते, तावत् श्रुत्या विनियुक्तत्वात् प्रकरणवाक्यसामर्थ्यश्रुतिषु अकल्पितास्वेव बाधः । (पृ. ८३५–८३६) ।

एवं तावदेकस्य शेषस्य अनेकं शेषिणं प्रति नीयमानस्य विरोध उदाहृतः । एतयैव तु दिशा अनेकस्य शेषस्य एकं शेषिणं प्रति नीयमानस्य विरोध इदानीमुदाहर्तव्यः । तद्यथा श्रुतिलिङ्गयोर्विरोधे 'ऐन्द्या गार्हपत्यमुपतिष्ठते ' इति मन्त्रकरणकव्यापारविधाने कृते लिङ्गात् कस्मिंश्चिदाग्नेये मन्त्रे शेषत्वेन प्राप्नुवति श्रुत्यैन्द्री विनियुज्यते । तदवरुद्धे चोपस्थाने नेतरस्यावकाशो विद्यते । श्रुतिवाक्ययोर्विरोधे यज्ञायज्ञीयप्रगाथैकवाक्यभूतगिरापदप्राप्तौ इरापदविधानमुदाहरणम् । तथा विश्वेषां देवानां श्रुत्या आमिक्षैव, शेषो हि तेषां वाक्येन वाजिनम्, तत् दुर्बलप्रमाणत्वात् तया श्रुत्या निराकृतम् । श्रुतिप्रकरणयोर्विरोधे प्रतिष्ठाकामदर्शपूर्णमासप्रयोगे प्रकरणात् पञ्चदशसंख्यासामिधेन्यनुवचने अङ्गत्वेन प्राप्ते श्रुत्या एकविंशतिसंख्यानुवचनान्तराङ्गत्वावगमात् प्राकरणिकनित्यानुवचनबाधः । श्रुतिक्रमविरोधे ' पशुकामप्रयोगे च क्रमेण चमसाङ्गता । श्रौताद् गोदोहनात्तत्र चमसस्य निराक्रिया ॥ ' श्रुतिसमाख्याविरोधे ' वाजपेयः समाख्यानात् प्राप्नोत्यध्वर्युकर्तृकः । श्रुत्या स्वाराज्यकामस्य तथाऽध्वर्योर्निराक्रिया ॥ ' तथा 'यजमानस्य याज्या' इत्युदाहरणम् । ऋतुयाजेषु हि हौत्रसमाख्यया होतुः प्राप्ता याज्या यजमानकर्तृकत्वेन कर्तृसंबन्धवाचिन्या षष्ठीश्रुत्या प्रतिपाद्यते । (पृ. ८३८) ।

शा— ननु लिङ्गवाक्ययोरेव (अत्र) विरोधः, न श्रुतिलिङ्गयोः । अत्राभिधीयते— ' सत्यं वाक्यविरोधोऽस्ति श्रुतिश्चापि विरुध्यते । सहिते हि विरुध्येते, न तु लिङ्गेन केवले ॥ ' इति श्रुतिलिङ्गयोरेवैष विरोधः । ' तत्र स्वतःप्रमाणत्वं लिङ्गादेः श्रुतिवन्मतम् । सामर्थ्यालोचनादेव तादर्थ्यं हि प्रतीयते ॥ गार्हपत्यार्थता श्रुत्येत्युभयोस्तुल्यकक्षता । तेन द्वयोरुपस्थानं विकल्पेन भविष्यति ॥ समुच्चयेन वा मन्त्रः प्रयुज्येत द्वयोरपि । प्रतिप्रधानमावृत्तिर्गुणानां न विरुध्यते ॥ यद्यपि स्याद् बलीयस्त्वं श्रुतेर्लिङ्गात्, तथापि तु । अविरोधादबाधः स्यात् संभवी हि समुच्चयः ॥ यद्वा सामर्थ्यरूपत्वात् लिङ्गं स्यात् प्रबलं श्रुतेः । वस्तुशक्त्यनुसारी हि सर्वः शब्दः प्रवर्तते ॥, अत्राभिधीयते सत्यं यद्यत्यन्तमशक्यता । गार्हपत्ये तु सामर्थ्यं गौणं मन्त्रस्य विद्यते ॥ गुणाद्वाऽप्यभिधानं स्यादित्यत्रैतद्धि साधितम् । तत्र तावद् बलीयस्त्वं लिङ्गस्य न च तुल्यता ॥ विनियोगः श्रुतेः पार्श्वे (समीपे) लिङ्गस्यारादसौ स्थितः । यावदेव हि मन्त्रार्थो मन्त्रेण प्रतिपाद्यते ॥, तावदेव श्रुतिर्मन्त्रं गार्हपत्यार्थतां नयेत् । मन्त्रार्थं मन्त्रतो बुद्ध्वा पश्चाच्छक्तिं निरूप्य च ॥ मन्त्राकाङ्क्षावशेनेन्द्रशेषत्वे श्रुतिकल्पना । श्रुत्या प्रत्यक्षया पूर्वं गार्हपत्याङ्गतां गते ॥ निराकाङ्क्षीकृते मन्त्रे निर्मूला श्रुतिकल्पना । तेन शीघ्रप्रवर्तिन्या श्रुत्या लिङ्गस्य बाधनम् ॥ प्रत्यक्षे चानुमाने च यथा लोके बलाबलम् । शीघ्रमन्थरवृत्तित्वात् तथेह श्रुतिलिङ्गयोः ॥ अविरोधादबाधो यो वर्णितः स न युज्यते । लिङ्गस्य हि प्रमाणत्वं मन्त्राकाङ्क्षानिबन्धनम् ॥ तां च श्रुतिर्निकृन्तन्ती नाविरोधेन

गच्छति । विरोधे च श्रुतिर्लिङ्गं बलीयस्त्वेन बाधते ॥ '

सोम –– एवं श्रुत्यादिभिः विनियोगप्रकारे कथिते सति अध्यायादौ उपक्षिप्तः बलाबलविचारः प्राप्तावसरः (इति संगतिः) ।

वि–– 'ऐन्द्र्योपस्थीयतां वह्निरितीन्द्राग्न्योर्विकल्पनम् । समुच्चयो वोत शक्र एवाग्निः केवलोऽथवा ॥, विकल्पः श्रुतिलिङ्गाभ्यां गुणावृत्त्या समुच्चयः । श्रुतिः शक्त्यनुसारेति शक्र एकोऽत्र लिङ्गतः ॥, शक्तिरुक्ता श्रुतिः शीघ्रा लिङ्गं श्रुत्यनुमापकम् । नैराकाङ्क्ष्यात्मके बोधे श्रुत्याऽग्नौ केवले स्थितिः ॥ '

भाट्ट–– तदेवं षट्प्रमाणेषु निरूपितेषु अधुना विरोधे बलाबलं निरूप्यते । विरोधश्चैकस्य शेषस्य शेषिद्वये प्रमाणद्वयसत्त्वे यथा ऐन्द्रीमन्त्रस्य श्रुत्या गार्हपत्याङ्गत्वे लिङ्गाच्च इन्द्राङ्गत्वे । यथा वा एकस्मिन् शेषिणि शेषद्वयविनियोजकप्रमाणद्वये यथा गार्हपत्ये श्रुत्या ऐन्द्रीमन्त्रः, लिङ्गादाग्नेयः । अयं च शेषद्वयविनियोगो द्वारैक्ये सत्येव बलाबलप्रयोजकः, न तु तद्भेदेऽपि, वाक्यप्रकरणाभ्यां वैमृधप्रयाजादीनां एकशेष्यर्थत्वेऽपि तदभावात् । यत्र तु एकस्य शेषस्य एकस्मिन्नेव शेषिणि प्रमाणद्वयम्, तत्र वैषम्ये प्रबलस्यैव प्रयोजनार्थं विनियोजकत्वम् । साम्ये तु एकस्य विनियोजकत्वम्, इतरस्य पुनःश्रुतित्वेन प्रयोजनान्तरकल्पनम् । नियामकाभावे द्वयोरभ्युदयशिरस्कत्वकल्पनं कर्मान्तरबोधकत्वं वा । एवं यत्र ' अरुणया क्रीणाति ' इत्यादौ आरुण्यस्यापूर्वसाधनीभूतक्रयार्थत्वे प्रमाणत्रयम्, तत्रापि श्रुतेरेव विनियोजकत्वम्, न त्वन्यस्य, वाक्योद्देश्यसमर्पकत्वमात्रत्वात् । अत एव न ' ऐन्द्या ' इत्यत्र लिङ्गवाक्यविरोधः । वाक्यस्य उद्देश्यमात्रसमर्पकत्वेन श्रुतिसहकारित्वेऽपि कृतिकारकत्वबोधकत्वरूपविनियोजकत्वाभावात् । प्रकरणं तु अपूर्वसाधनत्वलक्षणातात्पर्यग्राहकमात्रम् । न तु तदपि विनियोजकम्, गौरवात् । अत एव विनियोजकप्रमाणबलाबलमपि निरूप्यमेव ।

तदिह श्रुत्योर्विरोधे ऐन्द्रीमन्त्रस्य तृतीयया गार्हपत्याङ्गत्वमेव, न तु तद्धितश्रुत्या इन्द्राङ्गत्वम् । तस्य सूक्तताद्धितत्वेन प्राधान्येन कृतिकारकत्ववाचित्वाभावात् । अतश्च तस्य मुख्यश्रुतित्वाभावाद्दुर्बलत्वम् । एवं च तस्यैव मन्त्रस्य लिङ्गात् इन्द्राङ्गत्वमिति । लिङ्गविरोधेऽपि एतदेव उदाहरणम् । अत्र हि सर्वत्र उत्तरोत्तरस्य पूर्वपूर्वकल्पकत्वेन प्रामाण्यस्य तत्तन्निरूपणावसरे स्थापितत्वादुत्तरोत्तरस्य श्रुतिकल्पनं यावदवगतस्यैव पूर्वपूर्वेण शेषशेषिणो निराकाङ्क्षत्वापादनेन बाधः । न च अङ्गानां प्रकृत्यर्थत्वेन निराकाङ्क्षाणामपि विकृत्याकाङ्क्षयैवातिदेशकल्पनवत् इन्द्राद्याकाङ्क्षयैव लिङ्गस्य श्रुतिकल्पकत्वोपपत्तिः, तस्य ध्यानाद्युपायान्तरेणापि स्मृतिसिद्धेर्नियमेन विकृतिवदनाकाङ्क्षत्वात् । अतः श्रुत्या गार्हपत्याङ्गत्वमेव । न च श्रुतेः करणत्वमात्राभिधायकत्वेन गार्हपत्यनिरूपितत्वस्य वाक्याधीनत्वात् नायं श्रुतिलिङ्गविरोध इति वाच्यम् । तथात्वेऽपि ब्राह्मणवाक्यत्वेन मन्त्रलिङ्गापेक्षया ' यद्यप्यन्यदेवत्यः पशुः ' इतिवत् प्रबलत्वोपपत्तेः । वस्तुतस्तु यथा न केवलया श्रुत्या विरोधो नैवं वाक्येनापि, तस्यापि गार्हपत्यसमीपे इत्येवमुपपत्तेः । अतश्च उभयविरोधसत्त्वेऽपि ' प्रधानेन व्यपदेशा भवन्ति ' इति न्यायेन श्रुतिलिङ्गविरोधोदाहरणत्वम् ।

मण्डन — ' बलीयसी श्रुतिर्लिङ्गात् । '

शंकर–– ' श्रुत्या लिङ्गस्य बाधः स्यात् । '

(लिङ्गबलाबलविचारः––) भाष्यम्–– लिङ्गवाक्ययोर्विरोधे किमुदाहरणम् ? ' स्योनं ते सदनं कृणोमि घृतस्य धारया सुशेवं कल्पयामि । तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमानः ॥ ' इति । अत्र संदेहः किं कृत्स्नो मन्त्र उपस्तरणे पुरोडाशासादने च प्रयोक्तव्यः, उत कल्पयाम्यन्त उपस्तरणे, ' तस्मिन् सीद ' इत्येवमादिः पुरोडाशासादने इति । यदि वाक्यं बलीयस्ततः कृत्स्न उभयत्र । कथम्? ' सुशेवं कल्पयामि ' इत्येतदपेक्ष्य ' तस्मिन् सीद ' इत्येवमादिः पूर्वेणैकवाक्यतामुपैति यत् कल्पयामि तस्मिन् सीदेति । अथ लिङ्गं बलीयः, ततः कल्पयाम्यन्तः सदनकरणे । कथम् ? ' स्योनं ते सदनं कृणोमि ' इति सदनकरणमभिवदितुमयमलमिति । ' तस्मिन् सीद ' इत्ययमपि पुरोडाशं सादयितुमिति सादने विनियुज्यते । किं तावत्

प्राप्तम् ? तुल्यबले एते कारणे इति । यथा लिङ्गं प्रति श्रुतेर्बलीयस्त्वमुक्तम् , न तथा वाक्यं प्रति लिङ्गस्य उच्यते । अथवा वाक्यमेव लिङ्गात् बलीयः । कुतः ? तद्धि श्रुत्याऽपि बाध्यते । न च बलीयः कारणं शक्यते बाधितुम् । तेनास्य भङ्गुरतामध्यवस्यामः । यस्त्वेकेन बाध्यते, शक्योऽसौ अन्येनापि बाधितुमिति । एवं **प्राप्ते, ब्रूमः ।** लिङ्गवाक्ययोः लिङ्गं बलीय इति । कुतः ? अर्थविप्रकर्षात् । कोऽत्र अर्थविप्रकर्षः ? प्रकरणवतः संनिधौ आम्नानात् दर्शपूर्णमासाङ्गमयं मन्त्र इत्यवगम्यते । ‘ तस्मिन् सीद ’ इति पुरोडाशासादनाभिधानसामर्थ्यात् सादने विनियुज्यमाने कृतसामर्थ्यं मन्त्राम्नानमिति नास्ति प्रमाणम् , येन उपस्तरणेऽपि विनियुज्येत । तथा, ‘स्योनं ते सदनं कृणोमि’ इत्येषोऽपि प्रकरणाम्नानसामर्थ्यादेव दर्शपूर्णमासाङ्गतामापन्नः सामर्थ्यादेवोपस्तरणे विनियोगात् कृतप्रयोजनो न पुरोडाशासादने विनियोगमर्हति । न ह्यस्मिन् विनियुज्यमानस्य किञ्चिदपि प्रयोजनमस्ति । एवं उपस्तरणे ‘ तस्मिन् सीद ’ इत्यस्य नास्ति सामर्थ्यम् , पुरोडाशासादनेऽपि ‘ स्योनं ते ’ इत्यस्य । पूर्वेणैकवाक्यतामुपेत्योपस्तरणे सामर्थ्यम् । पूर्वस्य परेणैकवाक्यत्वात् सादने, न तु स्वरूपेणोभयोः । तदेषोऽर्थविप्रकर्षः, यत् ‘ स्योनं ते ’ इत्यस्य प्रत्यक्षं सदनकर्मणोऽभिधानसामर्थ्यं तन्मुख्यम् । ‘ तस्मिन् सीद ’ इत्यस्य पुनः पूर्वेण सहैकवाक्यतामुपगतस्य भवति जघन्यम् । तदत्र पूर्वस्य मन्त्रस्याभिधानसामर्थ्यादुपस्तरणे विनियोग उक्तो भवतीति संनिकृष्टो लिङ्गस्य श्रुत्यर्थः । उत्तरस्य तूपजनितेऽभिधानसामर्थ्ये ततः श्रुत्यर्थ इति लिङ्गान्तरितो विप्रकृष्टो भवति । एवमुत्तरस्य सादने संनिकृष्टः पूर्वस्य च लिङ्गान्तरितः । तस्मादर्थविप्रकर्षात् लिङ्गवाक्ययोर्लिङ्गं बलवत्तरम् । ततः स्योनमित्येष शब्दो यद्यप्युत्तरेण आकाङ्क्षित इति सादनेऽपि प्रयोगमर्हति, तथापि भित्त्वा वाक्यमुपस्तरणे एव विनियोक्तव्यः । ‘ तस्मिन् सीद ’ इत्येष च सादने । **ननु** ‘ स्योनं ते ’ इत्यस्य शब्दस्य यथैवोपस्तरणाभिधानसामर्थ्यं एवमुत्तरेणैकवाक्यतामुपगन्तुं सामर्थ्यम् । सामर्थ्यं च लिङ्गमित्युच्यते । तस्माद्विद्यमाने वाक्ये लिङ्गमेव बाधितं भवतीति । **सत्यमेवम्** । एतदपि लिङ्गम् । लिङ्गमपि खल्वेतदेवंलक्षणकं विप्रकृष्टार्थमेव भवति । लिङ्गादेकवाक्यता, तस्मादभिधानसामर्थ्यम्, ततः श्रुत्यर्थः इति विप्रकृष्टार्थता । विप्रकृष्टार्थता च बाधने हेतुभूता । तस्मान्नोत्तरेणैकवाक्यतां यास्यतीति । एवं ‘ तस्मिन् सीद ’ इत्युत्तरं न पूर्वेणापि । अपि चोत्तरेणैकवाक्यतामुपगतस्य न किञ्चिदपि दृष्टमस्ति कार्यम् । उपस्तरणप्रत्यायनं तु दृष्टम् । कुतः ? श्रुतत्वादुपस्तरणस्य सादनस्य च । एवमुत्तरस्य सादनप्रत्यायनम् , न तु पूर्वेणैकवाक्यतायाम् । न चैतौ पूर्वोत्तराभ्यामेकवाक्यतामन्तरेण पृथग् यथायथं कार्ये न कुरुतः । तस्मात् पूर्वः पूर्वत्र विनियोजनीयः, उत्तरः उत्तरत्रेति । अथ यदुक्तं श्रुत्याऽपि तद्बाधितमिति वाक्येनापि तद्बाधितव्यमिति । नैतदेवम् । नहि बाधितस्यान्येनापि बाधनमेव न्याय्यम् । बाधितं ह्यनुग्रहीतव्यमर्थवत्त्वाय । श्रुतिं प्रति विप्रकृष्टार्थम्, वाक्यं प्रति संनिकृष्टार्थम् । तस्माल्लिङ्गं बलीय इति ।

वा -- लिङ्गद्वयविरोधे ‘ स्योनं ते सदनं कृणोमि ’ इत्येवोदाहरणम् । द्वे हि तत्र लिङ्गे । परस्परैकवाक्यतागमनसामर्थ्यात्मकमेकम् , अभिधानशक्तिरूपमपरम् । एतच्च श्रुत्यनुमानस्य प्रत्यासन्नम् , विप्रकृष्टमितरत् वाक्यादपि जघन्यत्वात् इत्युक्तं भाष्ये (लिङ्गवाक्यविरोधोदाहरणे) । पृ. ८४० ।

लिङ्गवाक्ययोर्विरोधे एकं तावदिदं उदाहरणम् । ज्योतिष्टोमे हौत्रप्रवचनाधीताः प्रैषा वाक्येन मैत्रावरुणस्य विधीयन्ते ‘ तस्मान्मैत्रावरुणः प्रेष्यति चानु चाऽऽह ’ इति । तेषां मध्ये कश्चित् प्रैष एवं पठ्यते ‘प्रशास्तर्यज’ इति । सोऽयं स्वसामर्थ्येन मैत्रावरुणं नियुङ्क्ते । तत्र यदि वाक्यं बलीयः, ततो मैत्रावरुणः प्रेष्येत् । आत्मनि च प्रैषासंभवात् होता यजेत् । अथ तु लिङ्गं बलीयः, ततो मन्त्रेण मैत्रावरुणो नियोक्तव्यः । न चाऽऽत्मनैवाऽऽत्मानं नियोक्तुमर्हतीति परेण विनियोक्तव्यः । स च ‘ तेषां यतो विशेषः स्यात् ’ (३।८।१०।२२) इत्येवं विज्ञायते । सामान्यसमाख्यया पूर्वमयं होतुरेव प्रापितः सन् वाक्येन बाधितः आसीत् । तद्यदा वाक्यं लिङ्गेन बाध्यते, तदा समाख्ययैव प्रतिप्रसूतया होतृकर्तृकत्वं

विज्ञायते । प्रैषार्थकारी तु मैत्रावरुणो विज्ञायते एव । यद्यपि ‘ तस्मान्मैत्रावरुणः ’ इत्येतद्ब्राह्मणम् , तथाऽपि पदसंनिधिमात्रात्मकत्वेनाश्रुतित्वात् प्रत्यासन्नतरश्रुतिकल्पनेन लिङ्गेन बाध्यते । यदि हि मैत्रावरुणः प्रेष्येत् , ततः प्रशास्तृशब्दो होतरि अनर्थकः स्यात् । **ननु** च मैत्रावरुणोऽपि प्रेष्यमाणः ‘होता यक्षत्’ इत्यादिरेव अर्थशून्यः स्यात् । गौण इति चेन्न । प्रशास्तृशब्देऽप्येवं प्रसङ्गात् । अपि च पश्चात्तनत्वादुपजातविरोधः प्रशास्तृशब्द एव वरं गौणः, न प्रथमोच्चारितो विनैव विरोधेन होतृशब्दः । तस्माल्लिङ्गयोरेवैष विरोधो न लिङ्गवाक्ययोरिति । **अत्र ब्रूमः** । सर्वथा तावदनयोरन्यतरस्य विरोधे गौणत्वं कल्पनीयम् । तत्र प्रशास्तृशब्दस्य होतरि अत्यन्तमनिमित्तः प्रयोगः, होतृशब्दस्य तु होतृकार्यापन्नमैत्रावरुणेऽस्ति निमित्तम् । सर्वे एव प्रधानर्त्विग्वचनाः तत्पुरुषेषु प्रयुज्यमाना दृष्टाः, न तु विपर्ययः । तस्मात् प्रशास्तृलिङ्गत्वात् मन्त्रस्तमेव विनियुञ्जीत । न चैतद्वाक्यमत्यन्तमनर्थकमेव भवति । प्रैषान्तरेषु चरितार्थत्वात् । अतोऽस्मिन्विषये बाध्येतेति । ‘ स्योनं ते सदनं कृणोमि ’ इत्यत्रोदाहरणे (भाष्योक्ते) चोद्यते । **‘ भिन्ने एते यतो वाक्ये पुरस्तात्प्रतिपादिते । तस्मान्न समुदायोऽयं वाक्येन विनियुज्यते ॥ ’** सत्यपि विभज्यमानसाकाङ्क्षत्वे अर्थभेदाद्भिन्नवाक्यत्वेन एते पुरस्तात्प्रतिपादिते । तस्मान्न समुदायस्यैव सदनाभिघारणे पुरोडाशप्रतिष्ठापने च समुच्चयेन विकल्पेन वा विनियोग आशङ्कितव्यः । तत्र **के चिदाहुः** । नैवात्र सकलेन वाक्येन सह विचारः, किं तर्हि ? अंशेनैव सह । (अन्यथा समाधत्ते–) अथवा **‘ साकाङ्क्षावयवत्वेन प्रायेणेष्टैकवाक्यता । सिद्धा लिङ्गबलीयस्त्वात् प्रत्युक्ता भिन्नवाक्यता ॥ ’** ‘तस्मिन् सीद’ इत्येतत्कृतं साकाङ्क्षत्वमाश्रित्यैकवाक्यत्वेनोदाहृतमिदमेव प्रधानकारणम् । शक्यते हि तद्वशेन यथेष्टं विशेषणविशेष्यभावं कल्पयित्वा एकार्थत्वेनैकवाक्यत्वम् । यद्यथा, पूर्वस्य तावदुत्तरेण सह यदहं घृतस्य धारया सुसुखं तव सदनं कल्पयामि तस्मिन्नेवमितिकर्तव्यताके प्रतितिष्ठ त्वमितीतिकर्तव्यताविशिष्टपुरोडाशप्रतिष्ठापनमेकं प्रयोजनम् । अथवा पुरोडाशप्रतिष्ठापनफलं सदनाभिघारणं करोमीत्येवं विशिष्टफलसदनकरणं प्रकाशनं प्रयोजनमिति शक्यमेकवाक्यत्वम् । यत्तु पुरस्तादर्थनानात्वात् नानावाक्यत्वमुक्तम् , तदिह स्थितं लिङ्गबलीयस्त्वेन । यदि हि लिङ्गं बलीयः , ततः संभवदन्यतरविशेषणत्वेनैकवाक्यत्वं परित्यज्योभयोः प्रत्येकं स्वप्राधान्यं लिङ्गावगतमाश्रित्य विशेषणबुद्धितिरस्कारेण प्रयोजनभेदाद्वाक्यभेदो भवति । तेन अयं विनियोगद्वारेण वाक्यात्मलाभस्य लिङ्गप्राधान्यस्य अत्र बलाबलविचारः । तत्रापि प्रतीतेः लब्धात्मके वाक्ये सति बाधकप्रत्ययसदसद्भावविचार इति द्रष्टव्यम् । **किं प्राप्तम्** ? ‘ तुल्यबले ’ इति । तदा चेदृशं कर्म, कदा चिद्विभज्य मन्त्रौ प्रयोक्तव्यौ, कदा चित् समुदायोऽन्यतरत्र, कदा चित्त एवोभयत्रेति, ‘कथं पुनरयम्’ इत्थमनवस्थितः शास्त्रार्थो भवति ? सर्वथा यदि प्रमाणत एवमवगम्यते किं नो बाध्यते ? लिङ्गवाक्यतुल्यबलत्वालोचने सर्वमेतत् प्रतिभाति । यदा तु श्रुतिवत् लिङ्गात् प्रमाणान्तरत्वाद्वाक्यमेव बाधकमित्यवधार्यते, तदा नियत एव समुदायप्रयोग इति । **एवं प्राप्ते, ब्रूमः । ‘ स्योनादिः कल्पयाम्यन्तः स्वसामर्थ्येन शक्यते । निराकाङ्क्षः स्वकार्याय साकाङ्क्षत्वं पराश्रयम् ॥ ’** सर्वस्तावदादित आरभ्य विनियोगं निरीक्षते । तदिह कल्पयाम्यन्तः अस्य न कदा चित् परत्रापेक्षा दृश्यते इति तावति पर्यवसानं निश्चित्य प्रयोजनाकाङ्क्षानिवृत्तेः अभिघारणाङ्गत्वेनाऽऽश्रीयते । तेनैष तावत् प्रतिष्ठापनं यावन्न कदा चिन्नीयते, न च परस्य एतेन विना अनर्थकत्वापत्तिः, यतस्तद्वयेन नीयते, सोऽपि हि प्रतिष्ठापनाङ्गत्वेनार्थवान् भविष्यति । यद्यपि च तच्छब्दः पूर्वापेक्षः, तथापि प्रकाशितं निर्वृत्तं च पूर्ववाक्यार्थमालोच्य भिन्नस्यापि प्रवर्तमानस्य न कश्चिद्विरोधः । तद्यथा ‘ तप्ते पयसि दध्यानयति ’ इति संस्कारविधाने पर्यवसिते ‘ सा वैश्वदेव्यामिक्षा ’ इति वाक्यान्तरेणैव द्रव्यदेवतासंबन्धः क्रियते । तस्माद्भेदेन विनियोगस्य प्रत्यासन्नतरश्रुतित्वान्नेतरेतरविषयसंक्रान्तिर्विद्यते । एवमुपस्तरणे ‘ तस्मिन् सीद ’ इत्यस्य नास्ति सामर्थ्यमिति पूर्वेणैव गतार्थप्रायं सत् निरूपणदार्ढ्यार्थं पुनः परामृश्यते । यच्चैकत्रोक्तम् ,

तस्येतरत्राभावं दर्शयित्वा पुनरात्मधर्ममुपनीय इतरधर्मनिराकरणमिति ग्रन्थो निराकुलीकर्तव्यः । पूर्वः प्रस्तावः प्रमाणसदसद्भावाभ्याम्, मध्यमः शक्त्यशक्तिभ्याम्, अन्त्यश्च दृष्टार्थत्वादृष्टार्थत्वाभ्यामिति विवेकः । तस्मात् वाक्याल्लिङ्गं बलीय इति सिद्धम् । (पृ. ८४७–८५१) ।

अथ लिङ्गवाक्यादीनां अनुमीयमानश्रुतित्वात् अविशेषे सति किंकृतं बलाबलमिति ? तदुच्यते । '**एकद्वित्रिचतुष्पञ्चवस्त्वन्तरणकारितम् । श्रुत्यर्थं प्रति वैषम्यं लिङ्गादीनामपीष्यते ॥**' श्रुतिमात्रानुमानान्तरितो हि लिङ्गस्य श्रुत्यर्थः । वाक्यस्य पुनः लिङ्गश्रुत्यनुमानव्यवहितः । कथम् ? '**वाचकेनैकवाक्यत्वादिहातद्वाचिनां सताम् । कल्पयित्वाऽभिधाशक्तिं श्रुतिः पश्चात् प्रकल्प्यते ॥**' सर्वत्र हि मन्त्रे किञ्चिदेव पदं कर्मसमवेतमर्थं वदति । यथा 'अग्नये जुष्टं निर्वपामि' इत्यग्निनिर्वपामिपदे । शिष्टानि तु असमवेतार्थाभिधायित्वादप्रयोगार्हाणि सन्ति दृश्यमानैकवाक्यताऽन्यथाऽनुपपत्त्या अनुमितसामर्थ्याभिधानानि सन्ति स्वार्थमुपसर्जनीकृत्य तद्विशिष्टसमवेतार्थप्रकाशनेन प्रयोगार्थत्वं प्रतिपद्यन्ते । ततश्च श्रुतिमनुमाय विनियुज्यन्ते । तच्चाविरोधे सति सर्वमभ्यनुज्ञायते । यदा दृश्यमानैकवाक्यत्वयोर्मन्त्रयोः पृथक् पृथक् प्रकाशयितव्यौ अर्थौ कर्मसमवेतौ दृश्येते, तदा उभयोरपि भेदेन प्रकाशकापेक्षणात् प्रकाशकयोश्च प्रकाश्यापेक्षणात् विनियोगाय प्रस्थिते सति यस्य यत्र क्लृप्तं सामर्थ्यम्, स तत्र शीघ्रतरं प्राप्नुवन् नान्यत्रैकवाक्यतया नेतुं शक्यते । नाप्यन्येभ्यः तत्राऽऽगच्छद्भ्यः सोऽवकाशं ददाति । कथम् ? '**एकवाक्यतया यावत् सामर्थ्यमनुमीयते । सामर्थ्येन श्रुतिस्तावत् कल्प्यते विनियोजिका ॥**' समुदायो हि विनियुज्यमानो नावयवान् अविनियुज्य विनियोक्तुं शक्यते । तत्र पूर्वोत्तरयोर्भागयोरेकवाक्यत्वं प्रत्यक्षम्, नैकार्थाभिधानसामर्थ्यम् । भिन्नार्थाभिधानसामर्थ्यं तु आर्थे प्रत्ययदर्शनात् सिद्धम् । तत्र समुदायावयवविनियोगाय वाक्यसामर्थ्ययोः सहप्रस्थितयोः असमर्थविनियोगासंभवात् यावद्वाक्येन पूर्वो भाग उत्तरार्थाभिधानसमर्थः, उत्तरो वा पूर्वसमर्थः इत्यनुमीयते, तावत् प्रत्येकभागवर्तिना सामर्थ्येन पूर्वस्यापि स्वार्थे, परस्यापि स्वार्थे, श्रुतिरनुमिता । ततश्च यावदितरत्र विनियोजकश्रुत्यनुमानाय प्रयत्यते तावदिह विनियोगे सिद्धे निराकाङ्क्षत्वात् प्रकरणाम्नानस्य, न कश्चिदपि हेतुः श्रुत्यनुमाने इत्यनुपजातमूलो विनियोगो बाध्यते । मन्त्रस्यापि हि पूर्वस्य पूर्वत्रार्थे शीघ्रं विनियोगः, उत्तरस्य चिरेण । तथोत्तरोत्तरस्य शीघ्रं पूर्वस्य तत्र चिरेण । शीघ्रविनियुक्तश्च मन्त्रः चिरविनियोगं नाऽऽद्रियते । तथाऽर्थोऽपि प्रथमावगतमन्त्रावरुद्धो नेतरं गृह्णाति । स्वप्राधान्ये च संभवति न परोपसर्जनत्वं प्रतिपद्यते । तस्माल्लिङ्गं बलीयः, इति भित्त्वा वाक्यं विनियोग इति । **नन्वेवं सति** 'निर्वपामि' इत्यादिना क्लृप्तसामर्थ्येन शीघ्रतरप्राप्तेनावरुद्धेऽर्थे विप्रकृष्टप्राप्तानां 'देवस्य त्वा' इत्यादीनां बाधादविनियोगः प्राप्नोति । न चैषां भिन्नप्रयोजनत्वात् समुच्चयः, तथा सत्येकवाक्यत्वाभावात् । अवश्यं चैतैर्यथाकथञ्चिन्निर्वाप एव प्रकाशयितव्यो नान्यप्रकाशनम्, कर्मानङ्गत्वप्रसङ्गात् । अतः समानविषयत्वात् समवाये सति वाक्यप्राप्यपदान्तरबाधेन भवितव्यमिति । **अत्रोच्यते । 'पदान्तराणि यत्रार्थं वदेयुः कर्मवर्तिनम् । तत्रैवमितरेषां तु वाक्यमप्यगतेर्वरम् ॥'** यानि ह्यसमवेतार्थवचनानि, तानि यदि स्वतन्त्रीक्रियन्ते, ततोऽनर्थकानि भवन्ति । तेन क्लृप्तसंबन्धैर्निराकाङ्क्षीकृतोऽप्यर्थं इतरेषां साकाङ्क्षत्वात् पुनस्तत्प्रकाश्यत्वं प्रतिपद्यते । यथा प्रकरणपूरितानामपि क्रमेण पुनस्तद्धर्मप्राप्तिर्भवति । यथा प्रकृतौ निराकाङ्क्षीभूता धर्मा विकृतीर्गमिष्यन्ति । तथा च क्लृप्तौ व्याख्यातम् । तस्मादेवमादीन्यपि संबध्यन्ते । येषां तु प्रकाश्योऽर्थः समवेतो दृश्यते, तेषामनभिधेयेनासंबध्यमानानामपि अर्थवत्ताऽस्तीति नाऽऽनर्थक्यनिमित्तमवकाशं लभन्ते । सर्वेषामेव च श्रुत्यादीनामानर्थक्यप्रतिहतानां दुर्बलैरपि बाध्यत्वमिष्यते । तद्यथा व्रीह्यादीनां प्रोक्षणादीन् प्रति श्रुत्या शेषित्वं प्राप्नुवदपि अतिलङ्घ्य प्रकरणलभ्यापूर्वसाधनत्वकृतः संबन्धो भविष्यति । तेनावस्थितं वाक्यात् लिङ्गस्य बलीयस्त्वम् । तथा च भक्षानुवाके दर्शितम् । (पृ. ८३१–८३३) ।

एवं **लिङ्गस्य** प्रकरणादिविरोध उदाहर्तव्यः । तत्र **प्रकरणविरोधे** तावत् पूषानुमन्त्रणानि उदाहर्तव्यानि ।

यावच्च प्रकरणेनैकवाक्यत्वं कल्प्यते, तावल्लिङ्गेन श्रुतिः । तथा यावदितरत्र प्रकृताग्न्यादिप्रकाशनसामर्थ्यम्, तावदिह विनियोग इति बाधः । **लिङ्गक्रमयोर्विरोधः** स्तुतशस्त्राधिकरणे दर्शितः 'अर्थेन त्वपकृष्येत' (२।१।५।१४) इति । स्थितोदाहरणमपि यथा अभ्यनुज्ञापनाभ्यनुज्ञयोः प्रज्ञातक्रमयोः 'उपहूत उपह्वयस्व' इत्येवं मन्त्रावाम्नातौ । तौ देशसामान्यात्तथैवाङ्गतया प्राप्नुतः 'उपहूत' इति अनुज्ञापने 'उपह्वयस्व' इति अनुज्ञायाम् । न तु तथा सामर्थ्यमस्तीति विपरीतं शेषत्वम् । यावद्धि स्थानेन प्रकरणमुत्पाद्य एकवाक्यत्वं कल्प्यते, तावल्लिङ्गेन श्रुतिं कल्पयित्वा साधितो विनियोगः, इत्यकल्पितलिङ्गश्रुतिपदकस्यैव क्रमस्य बाधः । तथा परिव्याणकरणक्रियमाणानुवादिनोः 'परिवीरसि' 'युवा सुवासाः' इति अग्नीषोमीयपरिव्याणाङ्गत्वे प्राप्ते लिङ्गात् सवनीयार्थद्वितीयपरिव्याणाङ्गत्वमपि । कथं न मनोता अग्नीषोमीयक्रमबाधनसमर्थेन लिङ्गेन आग्नेयसवनीयपशुयागाङ्गमिति चेत् । न । 'वचनात्त्वयथार्थमैन्द्री स्यात्' (३।२।२।३) इतिवत् बलवत्तरश्रुतिकृतविनियोगकल्पितलक्षणाद्वारेणाग्नीषोमीयाङ्गत्वात् । एवं ह्याह 'यद्यप्यन्यदेवत्यः पशुराग्नेय्येव मनोता कार्या' इति । अनया हि श्रुत्या लिङ्गेनोत्कृष्यमाणा मनोता वारिता । द्विदेवत्येऽपि एकदेवत्यैव, न केवलाग्निदेवत्यत्वेनाग्नीषोमीयादुत्तारणीयेत्यर्थः । यद्वा एवकारं स्वस्थानादपनीय यथाक्रमं कार्यैवेत्यत्र संयोजना कार्येत्यवधार्यते । **लिङ्गसमाख्याविरोधे** तु भक्षानुवाके ग्रहणादिवाक्यानि समाख्यानाद्भक्षाङ्गत्वेन संबन्धसामान्यादिकल्पनया भक्षाङ्गत्वविनियोगाय प्रस्थितानि लिङ्गेन ग्रहणावेक्षणसम्यग्जरणेषु विनियुज्यन्ते इति स्थितम् । याज्यासमाख्यानाबाधेन च मनोर्ऋचां पृथुपाजवत्योश्च लिङ्गेन सामिधेनीत्वेन विनियोगः इत्युक्तम् । (पृ. ८३६–८३७) ।

(अनेकस्य शेषस्य शेष्येकत्वे) लिङ्गवाक्यविरोधे '**स्योनादेरपि शेषत्वं वाक्येन सदनं प्रति । सीदेत्यस्यैव लिङ्गेन तेनायं पूर्वबाधनः ॥ तथाऽभिघारणे तस्मिन्सीदेत्यस्यापि शेषता । स्योनादेरेव लिङ्गेन तस्मात्स परबाधनः ॥ अनेकशेषिशेषत्वात् पूर्वमेतावुदाहृतौ । अनेकशेषसंबन्धात् संप्रत्येकस्य शेषिणः ॥ पूर्वं स्योनं त इत्यादि सदने साभिघारणे । वाक्येनाङ्गतया प्राप्तं लिङ्गाच्छुद्धेऽभिघारणे ॥ तस्मिन्सीदेत्ययं वाक्यात् प्राप्तः शेषोऽभिघारणे । लिङ्गात्तु सदनस्यैव तत्रैवातः प्रयुज्यते ॥ एकैकस्मिंस्तु शेषत्वं वाक्यात्प्राप्तं द्वयोर्द्वयोः । एकैकस्य तु लिङ्गेन तच्च संप्रति गृह्यते ॥ एकस्मिन्नेव मार्गे तु यत् संकीर्णचतुष्टयम् । अभाणि भाष्यकारेण विवेक्तव्यं तदात्मना ॥**' **लिङ्गस्य प्रकरणक्रमसमाख्याविरोधे** निर्वापादिषु लिङ्गेन 'देवस्य त्वा' इत्यादिना प्रकरणप्राप्तमन्त्रान्तरबाधः । प्रथमस्य काम्यस्य ऐन्द्राग्नस्य क्रमात् सामिधेनीकार्यप्राप्तस्य याज्यानुवाक्यायुगलस्य लिङ्गेन बाधः । समाख्यया मनोर्ऋचां सोमारौद्रियेषु याज्यानुवाक्यात्वेन प्राप्तानां सोमरुद्रलिङ्गाभिर्याज्यानुवाक्याभिर्बाध इत्युदाहरणानि । (पृ. ८३८–८३९)

शा — 'यावन्ति हि प्रयुज्यन्ते पदानि सति संभवे । तेषां स्यादेकवाक्यत्वम्, वाक्यभेदो न युज्यते ॥ तस्मिन् सीदेति पूर्वोक्तसापेक्षत्वाच्च गम्यते । वाक्यैकत्व, मतः सर्वमुभयत्र प्रयुज्यते ॥ यद्वा तुल्यबलत्वं स्यादुभयोर्लिङ्गवाक्ययोः । श्रुत्या प्रत्यक्षया लिङ्गं कल्प्यश्रुति निराकृतम् ॥ कल्प्यश्रुतित्वमिह तु समानमुभयोरपि । तेन तुल्यबलत्वं स्यादिति प्राप्तेऽभिधीयते ॥ सत्यं कल्प्या श्रुतिः किन्तु लिङ्गादह्नाय कल्प्यते । वाक्येन प्रथमं लिङ्गं कल्पयित्वा ततः श्रुतिः ॥ कल्पनीये, त्यतो वाक्यात् श्रुत्यर्थो विप्रकृष्यते । संनिकृष्टस्तु लिङ्गस्य तेनैतत् प्रबलं ततः ॥'

वि — 'स्योनं त इति पूर्वार्धं तस्मिन् सीदेति चोत्तरम् । सदने सादने चायं सर्वो वाऽर्थे व्यवस्थिते ॥, तच्छब्दादेकवाक्यत्वे भवेदाद्यः, श्रुतिं प्रति । लिङ्गस्य संनिकृष्टत्वाद् वाक्यबाधे व्यवस्थितिः ॥, उदाहृतिरियं वाक्यबाधे न त्वैन्द्रियेत्यसौ । बाधादूर्ध्वं निरर्थत्वादप्रामाण्यप्रसङ्गतः ॥' ८.

भाट्ट— लिङ्गयोर्विरोधे मुख्यसामर्थ्येन गौणस्य बाधः । **लिङ्गवाक्ययोस्तु** 'स्योनं ते' इति सदनकरणप्रकाशकस्य पूर्वार्धस्य 'तस्मिन् सीद' इत्युत्तरार्धेन सादनप्रकाशकेन 'तस्मिन्' इति विभागे साकाङ्क्षेणैकवाक्यत्वात् सकलस्य मन्त्रस्य सदनसादनयोरन्यतरत्रोभयत्र वा प्रतिष्ठापने एव 'तस्मिन्' इति पदसंनिधिरूपेण वाक्येन विनियोगे प्रारीप्सिते ततः पूर्वप्रवृत्तेन लिङ्गेन तत्तदाख्यातस्य मुख्यविशेष्यकत्वेन स्वार्थबोधकस्य परोपसर्जनत्वकल्पने प्रमाणाभावात् तच्छब्दस्य च 'सा वैश्वदेवी' इतिवद्वाक्यान्तरोपस्थितार्थपरामर्शकत्वेनापि चरितार्थत्वात् प्रत्येकमेव विनियोगः इति ।

मण्डन— 'लिङ्गं वाक्यस्य बाधकम् ।'

शंकर— 'वाक्यस्यापि च लिङ्गतः ।' बाधः । ८.

(वाक्यबलाबलविचारः—) भाष्यम् – अथ **वाक्यप्रकरणयोर्विरोधे** कथमिति । किं पुनः प्रकरणं नाम ? कर्तव्यस्येतिकर्तव्यताकाङ्क्षस्य वचनं प्रकरणम् । प्रारम्भो हि स तस्या वचनक्रियायाः । स एष विध्यादिर्विध्यन्तापेक्षः । वाक्यं तूक्तमेव । तयोर्विरोधे किमुदाहरणम् ? सूक्तवाकनिगदः । तत्र हि पौर्णमासीदेवता अमावास्यादेवताश्चाऽऽम्नाताः । ताः परस्परेणैकवाक्यतां नाभ्युपयन्ति । तत्र लिङ्गसामर्थ्यात् पौर्णमासीप्रयोगादिन्द्राग्निशब्द उत्कृष्टव्योऽमावास्यायां प्रयोक्तव्यः । अथेदानीं संदिह्यते योऽस्य शेषः, 'अवीवृधेतां महो ज्यायोऽक्राताम्' इति, स किं यावत्कृत्वः सूक्तवाके समाम्नातः तावत्कृत्व उभयोः पौर्णमास्यमावास्ययोः प्रयोक्तव्यः प्रकरणं बलवत्तरमिति, उत यत्रेन्द्राग्निशब्द उत्कृष्य नीतस्तत्रैव प्रयोक्तव्यो वाक्यं बलवत्तरमिति । एवं सर्वेषु संशयः । किं तावत् प्राप्तम् ? तुल्यबले एते कारणे इति । कुतः ? इतरत्राप्याकाङ्क्षा, इतरत्रापि । तुल्यायामाकाङ्क्षायां नास्ति विनिगमनायां हेतुः । तस्मात्तुल्यबले इति । अथवा वाक्यं दुर्बलम् । बाधितं हि तल्लिङ्गेनेति । **एवं प्राप्ते, ब्रूमः** । प्रकरणाद्वाक्यं बलीयः । कथम् ? अर्थविप्रकर्षात् । कोऽत्रार्थविप्रकर्षः ? । वाक्ये एकैकं पदं विभज्यमानं साकाङ्क्षं भवति, कृत्स्नं परिपूर्णं भवति । तत्र प्रत्यक्ष एकवाक्यभावः । प्रकरणे तु अप्रत्यक्षः । कथम् ? इतिकर्तव्यताऽऽकाङ्क्षस्य समीपे उपनिपतितं पूर्णमिति तस्य प्रकृतस्य साकाङ्क्षत्वमवगम्यते । नैकवाक्यभूतमित्यनुमीयते । एकवाक्यतया चाभिधानसामर्थ्यमवकल्प्याभिहितोऽयमेवं भवतीति परिकल्पना । एषोऽत्रार्थविप्रकर्षः, यद्वाक्यस्य समासन्ना श्रुतिः, प्रकरणस्य विप्रकृष्टा । तस्मात् सूक्तवाकेन प्रस्तरं प्रहरति इति पौर्णमासीदेवतावाचिनाममावास्यादेवतावाचिनां च निष्कृष्य प्रयोगे, तच्छेषाणामपि निष्कृष्य प्रयोगः । तेन यद्यपि प्रकरणसामर्थ्यात् पौर्णमासीदेवतापदशेषाणाममावास्यादेवतावाचिभिः सह एकवाक्यताऽनुमीयते, प्रत्यक्षा तु अमावास्यादेवतापदैः सह । न च प्रत्यक्षविरोधेऽनुमानं संभवति । अर्थवति च प्रकरणे संजाते, न निराकाङ्क्षाणामाकाङ्क्षा शक्योपपादयितुम् । अथ यदुक्तम्, लिङ्गेनापि हि तद्बाध्यते । अतः प्रकरणेनापि बाधितव्यमिति । न यदन्येनापि बाध्यते, तद् भङ्गुरमन्यत्रापीत्यवगन्तव्यम् । अथ भङ्गुरं प्रमाणमेव नाभविष्यत् । किं चित्तु प्रति कस्य चित् प्रभावः । वाक्यस्य प्रकरणं प्रति बाधकशक्तिः, न तु लिङ्गं प्रति । लिङ्गं प्रति विप्रकृष्टार्थमेतत्, प्रकरणं प्रति संनिकृष्टार्थम् । तेन वाक्येन प्रकरणं बाध्यते इति ।

वा— वाक्ययोर्विरोधे 'पञ्चदश सामिधेनीरनुब्रूयात्' 'सप्तदश वैश्यस्य' इत्येतदुदाहरणम् । उभयत्रापि हि सामानाधिकरण्यादेकवाक्यत्वे कृते विनियोगे सति निमित्तविशेषसंयोगात् साप्तदश्यं बलीयो भवति । (पृ. ८४०) ।

किं पुनः प्रकरणं नामेति । सर्वत्र सिद्धवत्प्रकरणेन व्यवहारः, न चैतत्कचिन्निरूपितपूर्वम्, तदिहापि तावदस्य स्वरूपं निरूप्यताम् । निर्ज्ञातस्वरूपस्य हि बलाबलं सुज्ञायते इति । अथवा नैवास्य वाक्यक्रमाभ्यां भेदः । साकाङ्क्षपदसंनिधिमात्रं हि वाक्यमित्युच्यते । तच्च प्रकरणेऽप्यविशिष्टम् । न च वाक्यस्य पदेयत्तायां प्रमाणमस्ति । विभज्यमान– साकाङ्क्षसंहन्यमानैकप्रयोजन-मात्रोपलक्षणत्वात् । तेन वाक्यमेवैकमल्पपदं अपरं बहुपदम् । अवान्तरार्थवशीकृतानां महाप्रयोजनवशेन महासंघातापत्तेः । वक्ष्यति हि वाक्यं ह्येकं दर्शपूर्णमासाभ्यां सहधर्माणामिति । अथवा संनिध्यात्मकः क्रम इत्युच्यते । स च प्रकरणेऽप्य-

वश्यम्भावी संनिधिः । अतः क्रमादप्यभिन्नं प्रकरणमिति मन्यते । तदिदानीं तत्त्वभेदपर्यायैर्निरूपयति । तत्र तत्त्वं तावदुच्यते 'कर्तव्यस्येतिकर्तव्यताकाङ्क्षस्य वचनं प्रकरणम्' इति । कर्तव्यमिति साध्यभूतमपूर्वं अथवा विधेयत्वानुष्ठेयत्वाभ्यां भाव एव प्रत्ययवाच्योऽभिधीयते । साध्यांशोपनिपातात् स्वर्गादिफलं कर्तव्यमिति चेन्न । तस्य कालान्तरभावित्वेन प्रयोगासमवायित्वे सति तत्सिद्ध्यर्थापूर्वस्यैव कर्तव्यत्वावधारणात् । तेनापूर्वं कृत्वा नान्यथेति । तथा 'यज्ञकर्म प्रधानं तद्धि चोदनाभूतम्' (९।१।१।१) इति तस्यैव प्रयोजकत्वं वक्ष्यते । 'फलदेवतयोश्च' (९।१।३।४) इत्युपन्यस्य निराकरिष्यते । तत्र कथमित्यनुग्रहोपायाकाङ्क्षणमाकाङ्क्षेति घञन्तं व्याख्यायते । यद्वा इतिकर्तव्यतां आकाङ्क्षतीतिकर्तव्यताकाङ्क्षं भावापूर्वयोरेवैकम्, तस्य यद्वचनमिति समानाधिकरणे षष्ठ्यन्ते । वचनमिति शब्देन प्रत्यायनम् । एतदुक्तं भवति वस्तुरूपेण विद्यमानाऽप्याकाङ्क्षा न प्रकरणमित्यभिधीयते । किं तर्हि ? प्रतीयमाना । साऽपि च कर्तव्यतार्थोपसर्जनत्वेन गृह्यमाणा, न स्वातन्त्र्येण । तेन आकाङ्क्षाऽभिधीयमाना प्रकरणम्, आकाङ्क्षावती वा भावनेति द्रष्टव्यम् । इदानीमवयवव्युत्पत्त्यात्मकेन भेदेन कथयति । तत्र प्रशब्दस्तावत्प्रारम्भमाह, करणशब्दः क्रियाम्, प्रकरणं प्रक्रियेत्यर्थः । का पुनरिह क्रिया गृह्यते, तामाह 'वचनक्रियायाः' अर्थाभिधानक्रियाया इति यावत् । भावनाभिधानक्रियाया हि प्रयोगवाक्यप्रवृत्तिरारम्भः । फलकरणांशपूरणं पदद्वयमात्रसाध्यम्, इतिकर्तव्यतालाभस्त्वनेकवाक्यान्तरायत्तसिद्धिः । अतस्तत्समस्तालोचनापेक्षया कथम्भावः प्रकरणमभिधानविधानक्रिययोरारम्भ इत्युच्यते । करणशब्दश्च क्रियामात्रवाच्यपि सन् आगमविषयः प्रयुज्यमानोऽभिधानक्रियायां वर्तते । 'स एष विध्यादिः' इति पर्यायकथनम् । आद्यन्तयोः संबन्धिशब्दत्वात् किमपेक्ष्य आदित्वमित्यत आह 'विध्यन्तापेक्षः' इति । विध्यन्तो नाम इत्थम्भावरूपमितिकर्तव्यतावधारणम् । तस्य चानेकाङ्गवाक्यतदर्थ–तत्प्रयोजनालोचनमध्यस्य कथम्भाव आदिरित्याचार्याणां विध्यादित्वेन प्रसिद्धिः । तत्र च स्वपदगणेन कियत्यपि प्रयोजनेऽवसितानामेव वाक्यानां पुनः कार्यान्तरापेक्षावशेन संबन्ध इति वाक्याद्विशेषः । तत्र आदितः क्वचिदपि प्रयोजनलेशे विभज्यमानानां वृत्तिर्नास्ति, संबन्धेनैव अर्थलाभः । क्रमेण तु सह वैलक्षण्यमनन्तरमेव वक्ष्यामः । तस्मात् प्रमाणान्तरं प्रकरणम् । 'किमिह उदाहरणमिति' तेनैकवाक्यतानयनाभिप्रायेण पृच्छति । सिद्धान्तवादी तु विधायकस्मारकत्वेन भिन्नवृत्तित्वात् मन्त्रब्राह्मणयोर्न कथञ्चिदेकवाक्यता घटत इति सूक्तवाकमुदाहरति । लिङ्गाद्देवतापदेषु निष्कृष्टेषु तच्छेषाः किमुत्कृष्यन्तामथ तद्रहिता अपि प्रयुज्यन्तामिति । प्रकरणेन तावत् सर्वशेषा उभयत्र प्राप्नुवन्ति । लिङ्गमपि साधारणम् । द्विवचनैकवचनयोरुभयत्र विद्यमानार्थत्वात् । ननु चाऽऽत्मीयेनैव शेषेणावरुद्धेषु देवतापदेषु शेषान्तरमनवकाशमेव स्यात् । सत्यम् । एवमपि तु वाक्यप्रकरणयोर्विरोधो नैवापैति । प्रकरणेन ह्यपनीतदेवताकोऽपि शेषः प्रयोज्यः प्राप्नोति वाक्येनेतर इति वाक्यबलीयस्त्वादेव तदाश्रयणम् । असकृद्वा प्रकरणेन तावत्प्रयोगः प्राप्नोति । वाक्येन तु यथादेवतापदानुसारात् सकृदिति विरोधः । क्लृप्तसंबन्धत्वाच्च वाक्यं बलीयः । कथम्भावेन हि, इत्थं यजेतेति प्रकरणिना सह संबन्धमनुमाय यावदाम्नानं शेषप्रयोगः । तथा क्लृप्तप्रयोगशेषैरात्मीयैर्देवतापदैः सह पुनः संबन्धकल्पनमिति विप्रकर्षः । तस्माद्बाधः । ततश्च देवताशेषाणां नित्यमेवापकर्षः न पाक्षिकः । सर्वदा वा विनियोग इति सिद्धम् । (पृ. ८५१-८५४) ।

वाक्यप्रकरणयोः प्रकरणं अर्थविप्रकर्षात् दुर्बलम् । तथाहि, **'प्रत्यक्षा संगतिर्वाक्ये न च प्रकरणेऽस्त्यसौ । आकाङ्क्षातोऽनुमातव्या तावता विप्रकृष्टता ॥'** प्रकरणे हि स्वार्थपरिपूर्णानामङ्गाङ्गिवाक्यानामुपकार्योपकारकत्वाकाङ्क्षामात्रं दृश्यते । वाक्ये तु प्रत्यक्षः संबन्धः । ततश्च सहप्रस्थितयोर्यावत् प्रकरणेनैकवाक्यता कल्प्यते, तावद्वाक्येन अभिधानसामर्थ्यम् । यावदितरत्र वाक्येन सामर्थ्यम्, तावदिह सामर्थ्येन श्रुतिः । यावदितरत्र सामर्थ्येन श्रुतिः, तावदितरत्र श्रुत्या विनियोगोऽभिहित इति विच्छिन्नायामाकाङ्क्षायां श्रुत्यनुमाने मूलाभावाद्विहते ।

कल्पितमपि शेषत्वं निष्पत्तिमगत्वा अन्तरैव विलीयते। तस्माद्वाक्यं बलीयः।(पृ. ८३३)।

वाक्यक्रमयोर्विरोधे परिव्याणकरणक्रियमाणानुवादिपरिवीरसिपरिवीतपदव्यतिरिक्तपदानां 'युवा सुवासा आगात्, स उ श्रेयान्' इत्येवमादीनां लिङ्गविनियुक्तपरिवीतपदैकवाक्यत्वात् सवनीयपरिव्याणे विनियोगः। **वाक्यसमाख्ययोर्विरोधे** भक्षानुवाके एव 'सध्यासम्' इत्येवमादिषु ग्रहणादौ विनियुज्यमानेषु तदेकवाक्यगतशेषपदावृत्तिरुदाहर्तव्या। तथा आध्वर्यवादिसमाख्यानात् ज्योतिष्टोमादिप्रधानेषु तदर्थेष्वेव प्राप्नुवत्सु स्वर्गकामाद्येकवाक्यत्वादर्थिमात्रविषयत्वं विज्ञायते। ननु च श्रुतिरेवैषा भवेत्। नात्र कस्य चित् श्रवणादेतत् विज्ञायते लिङा कर्तुरनभिधानात्। किं तर्हि ? पदद्वयसंनिकर्षादेव एतत् लक्षणया सामानाधिकरण्यादवगम्यते। तस्मात् वाक्येनैव समाख्या बाध्यते इति। (पृ. ८३७)।

(अनेकस्य शेषस्य शेष्येकत्वे **वाक्यप्रकरणयोर्विरोधे** 'पूर्वेद्युरमावास्यायां वेदिं करोति' इत्युदाहरणम्। प्रकरणेन हि हविरभिवासनोत्तरकालं यत् विधानं तस्य ग्रहणं प्राप्नोति। अमावास्यासमभिव्याहारेण तु पूर्वेद्युः। न चात्र श्रुतित्वम्। नहि सप्तमी शेषशेषिसंबन्धं वदति। यत्तु अधिकरणत्वमभिधत्ते, तत् तत्कर्मणोऽनुपपन्नमेव। तस्मात् पदसंनिधानेनैष संबन्धः। स च शीघ्रतरं भवतीत्युक्तम्। **वाक्यक्रमयोर्विरोधे** किमुदाहरणम् ? ज्योतिष्टोमे काम्यनैमित्तिकेषु प्रतिपत्कल्पेषु प्रतीकग्रहणात् पादमात्रं श्रुत्या विनियुज्यते। तत्र द्वितीयपादात् प्रभृति यथासंख्यक्रमेण नित्यानामेवर्चां प्रसङ्गः। तद्यथा 'वृषा पवस्व धारया इति राजन्याय प्रतिपदं कुर्यात्' इत्यत्र 'पवमानायेन्दवे। अभि देवां इयक्षते' इत्येतावेव द्वितीयतृतीयपादौ प्राप्नुतः। वाक्याच्च 'मरुत्वते च मत्सरः। विश्वा दधान ओजसा' इति। ननु विभक्तिभेदादत्र लिङ्गविरोधः स्यात्। नैष दोषः। सर्वेषां सोमलिङ्गत्वात् विभक्तिभेदेन तु एकवाक्यत्वमेव नोपपद्यते। तद्यावत् आकाङ्क्षापूर्वकमेकवाक्यत्वादि कल्प्यते, तावदितरेण आनन्तर्यात् समानविषयत्वाच्च सामर्थ्यादि कल्पयित्वा विनियोगः कृत इति बलीयस्त्वम्। **वाक्यसमाख्ययोर्विरोधे** 'तस्मान्मैत्रावरुणः प्रेष्यति चानु चाऽऽह' इति हौत्रसमाख्याते प्रवचने प्रैषानुवचनमाम्नातम्। तस्य कर्तृविशेषाकाङ्क्षिणः समाख्यया होता प्राप्नोति, वाक्येन मैत्रावरुणः। एकेन च कृतार्थस्य न कर्त्रन्तरापेक्षा भवति। तत्र शीघ्रतरप्राप्ते मैत्रावरुणे प्रकरणकल्पनां यावत् प्राप्ता समाख्या बाध्यते। न चायं श्रुतिविरोधः। आख्यातपदेन कर्तुरनभिधानात्, मैत्रावरुणपदे च कारकविभक्तिप्रयोगाभावात्। (पृ. ८३९)।

शा— (**वाक्यप्रकरणयोर्विरोधे**) **ये तु** (प्राभाकराः) आरादुपकारकेष्वेव प्रकरणस्य व्यापारः, संनिपातिनां तु ग्राहकग्रहणाख्येन प्रमाणेन तार्तीयश्रुत्याद्यतिरिक्तेन अपूर्वार्थत्वम्, द्वारैदमर्थ्ये श्रुत्यादिभिः औपादानिकं क्रत्वर्थत्वम्, प्रकरणस्य तु न कश्चित् व्यापारः इति मन्यन्ते, **तेषामेवायं** सूक्तवाकपदानां श्रुत्या प्रकरणविनियुक्तानां प्रकरणाविनियुक्तत्वात् नेदं वाक्यप्रकरणविरोधोदाहरणं युक्तं इत्युपालम्भो नास्माकम्।

द्वयोरपि वाक्यप्रकरणयोः प्रमाणत्वात् श्रुतिकल्पनाधीनत्वसाम्यात्, अन्यस्य च विप्रकर्षकारणस्य अद्याप्यकथितत्वात् तुल्यबलतां मन्यन्ते। यद्वा प्रधानाकाङ्क्षा प्रकरणम्, प्रधानार्थं च सर्वम्, इति तन्निबन्धन एव विनियोगो बलीयान्। **इति प्राप्ते, अभिधीयते।**

'येनैकवाक्यता तत्र सामर्थ्यं गम्यते मनाक्।
सामर्थ्याच्च श्रुतिः, श्रुत्या विनियोगो,ऽपरत्र तु॥
पूर्वयोरेकवाक्यत्वं कल्प्यं स्यात् प्रक्रियावशात्।
ततो लिङ्गं, श्रुतिः पश्चाद्, विनियोगस्ततः परः॥' इति दुर्बलं वाक्यात् प्रकरणम्।

वि— 'अग्नीषोमाविदं हव्यमजुषेतामितीरितात्। अपच्छिन्द्येदमित्यादिः सर्वशेषो भवेन्न वा॥, प्रक्रियातो भवेत्, मैवं प्रक्रियाऽन्तरिता त्रिभिः। वाक्यं द्व्यन्तरितं तेन भवेत् प्रकरणाद् बलि॥' ९.

भाट्ट— वाक्ययोर्विरोधे उपांशुत्वस्य 'त्सरा वा एषा यज्ञस्य' इति वाक्येन यज्ञपदैकवाक्यत्वात् यज्ञभागधर्मत्वं 'तस्माद्यत्किञ्चित् प्राचीनमग्नीषोमीयात् तेनोपांशु चरन्ति' इत्यनेन संनिहितयत्किञ्चित्पदैकवाक्यतया

अवगतपदार्थधर्मत्वेन बाध्यते। **वाक्यप्रकरणविरोधे** च वैमृधस्य वाक्यावगतेन पौर्णमास्यङ्गत्वेन प्रकरणावगतदर्शाङ्गत्वबाधः।

यत्तु अग्नीषोमादिपदैकवाक्यतापन्नानां 'इदं हविः' इत्यादिपदानां अमावास्याङ्गदेवताप्रकाशनार्थत्वं प्राकरणिकं वाक्येन बाध्यते इति उदाहरणमुक्तं **मूले**। तत् श्रुतिलिङ्गविनियुक्तस्य सिद्धरूपत्वेन प्रकरणाविषयस्य च सूक्तवाकस्य मुख्यप्रकरणविनियोज्यत्वप्रसक्त्यभावे अपि अधिकाराख्यगौणप्रकरणस्य अपूर्वसाधनत्वलक्षणातात्पर्यग्राहकत्वस्य प्रसक्तत्वात् तद्बाधाभिप्रायेण द्रष्टव्यम्।

मण्डन— 'वाक्येन प्रक्रिया बाध्या।' ९.

शंकर— 'वाक्यात् प्रकरणं बाध्यम्।' ९.

(प्रकरणक्रमाधिकरणम्) भाष्यम्— अथ प्रकरणस्य क्रमस्य च विरोधे किमुदाहरणम् ? राजसूयप्रकरणे अभिषेचनीयक्रमे शौनःशेपाख्यानाद्याम्नातम्। यदि प्रकरणं बलवत् सर्वेषां तदङ्गम्, यदि क्रमः अभिषेचनीयस्यैव। किं तावत्प्राप्तम् ? तुल्यबले एते कारणे इति। कुतः ? न तावद्विशेषमुपलभामहे, येनावगच्छाम इदं बलीय इति। तस्मात्तुल्यबले एते कारणे इति। अपि च प्रकरणं वाक्येन बाधितम्। तस्माद्बाध्येत क्रमेणापीति। **एवं प्राप्ते, ब्रूमः**। प्रकरणं क्रमाद्बलीयः। कुतः ? अर्थविप्रकर्षात्। कोऽत्रार्थविप्रकर्षः। प्रकरणवतः साकाङ्क्षत्वात् तत्संनिधौ आम्नातेन परिपूर्णेनापि अवकल्पेतैकवाक्यत्वम्, न तु क्रमवतः क्रमे आम्नातेन। अनेकस्य आम्नायमानस्य संनिधिविशेषाम्नानमात्रं हि क्रमः। तत्र संनिधिविशेषाम्नानसामर्थ्यात् क्रमवतः संनिधौ आम्नातस्यानुपलभ्यमानमेव आकाङ्क्षावत्त्वमस्तीत्यवगन्तव्यम्। प्रकरणे तु प्रकरणवतः प्रत्यक्षम्। न च प्रकरणवता क्रमवता च यौगपद्येनैकवाक्यता संभवति आम्नातस्येति विरोधः। तत्र प्रकरणे प्रत्यक्षं साकाङ्क्षत्वम्, क्रमे आनुमानिकं बाधितुमर्हति। साकाङ्क्षत्वादेकवाक्यत्वम्, एकवाक्यत्वादभिधानसामर्थ्यम्, सामर्थ्यात् श्रुत्यर्थ इति संनिकृष्टः प्रकरणस्य श्रुत्यर्थः, विप्रकृष्टः क्रमस्य। तस्मात् क्रमप्रकरणयोः प्रकरणं बलवत्तरमिति। अथ यदुक्तं वाक्येनापि हि तद्बाधितमतोऽन्येनापि तद्बाधितव्यमिति। नैतत्। बाधितस्यानुग्रहो न्याय्यो न बाधितव्यमिति।

वा— प्रकरणयोर्विरोधे 'अभिक्रामं जुहोति' इत्युदाहरणम्। महाप्रकरणेन हि अस्य दर्शपूर्णमासार्थता। अवान्तरप्रकरणेन तु प्रयाजार्थता, तच्च बलीयः। तत्र हि प्रत्यासत्तेः अननुभूते महाप्रकरणसंस्पर्शे पूर्वतरं वाक्यस्थानीयः संबन्धः अवकल्पते। (पृ. ८४०)।

अथ क्रमप्रकरणयोर्विरोधे किमुदाहरणमिति। यथासंख्यलक्षणक्रमविरोधोदाहरणासंभवात् पुरस्तात् परस्ताद्वा आम्नातस्य संनिधिलक्षणेन अवान्तरप्रकरणेन प्राप्तेनैव किञ्चिदुदाहरणमिति विपर्ययदृढत्वेन अज्ञानसंशयौ अतिक्रम्यापि प्रश्नः। शक्यं तु इहावान्तरप्रकरणत्वप्रसङ्गनिराकरणमित्यभिप्रेत्योदाहरणोपन्यासः। राजसूयप्रकरणे अभिषेचनीयस्योपरि 'शौनःशेपमाख्यापयति' 'राजन्यं जिनाति' 'पष्ठौहीं दीव्यति' 'अभिषिच्यते' इत्येवमादीन्याम्नायन्ते। तेषां चाङ्गत्वे नैव कस्य चित् संदेहो विप्रतिपत्तिर्वा इति शेषिशेषसंबन्धनिश्चयार्थमिदं विचार्यते किं समस्तराजसूयस्य एतान्यङ्गानि, उताभिषेचनीयस्यैव, अथ विकल्पः समुच्चयपक्षासंभवादिति। प्रकरणस्य क्रमस्य च बलाबलात् एतद्विज्ञातव्यम्। **ननु** चाभिषेचनीयस्यावान्तरप्रकरणात् प्राप्तिरिति महाप्रकरणं बाध्येत। **नैष दोषः**। यदि अनिराकाङ्क्षीकृतेऽभिषेचनीये तेषां पाठः स्यात्, ततोऽवान्तरप्रकरणमवगम्येत। स तु प्रागेव विदेवनादिभ्यः प्राकृतैर्धर्मैः निराकाङ्क्षीकृतः। सत्यामपि प्रत्यासत्तौ अक्लृप्तोपकारानेतानुपकारापेक्षः क्रतुः उल्लङ्घ्य प्रकृतिमपेक्षते। तया च योग्योपकारप्रदानेन पूरिते कथम्भावे निवृत्तं प्रकरणम्। समीपाम्नातधर्मानर्थक्यापत्तिभयादेव पुनरुत्पाद्येत, ततश्च क्रमत्वं भवति। निराकाङ्क्षस्य हि सत आकाङ्क्षा यावदभिषेचनीयस्योत्पाद्यते तावत् राजसूयकथम्भावेन प्रत्यक्षेण सिद्धो विनियोगः। तदीयो हि कथम्भावः पवित्रादारभ्य क्षत्रस्य धृतिं यावदनुसृतः शक्नोति विदेवनादीनि संस्प्रष्टुम्। (पवित्रः क्षत्रस्य धृतिश्च सोमयागौ राजसूयान्तर्गतौ। तत्र क्षत्रस्य धृतिः अन्तिमः)। अतो नास्त्यत्र अवान्तरप्रकरणमभिषेचनीयस्य। यस्यां तु विकृतौ प्राकृतं किञ्चि-

दङ्गं संकीर्त्य तस्य पुरस्तात्परस्ताद्वा वैकृतमङ्गमाम्नायते, तत्र कथम्भावगृहीताङ्गमध्यवर्तित्वात् प्रकरणपाठो विज्ञायते । न चेह तदस्तीति क्रमस्यैव व्यापारः । ‘ संनिधावाम्नातेन परिपूर्णेनापि ’ इति–वाक्यार्थपूर्णत्वाभिप्रायम् । ‘ अनेकस्याऽऽम्नायमानस्य संनिधिविशेषाम्नानमात्रं हि क्रमः ’ इति केन चित्संनिधानस्य नान्तरीयकत्वं दर्शयति । यो हि बहूनामर्थेन आम्नायते, तस्य सर्वप्रधानप्रत्यासन्नप्रदेशासंभवादवश्यम्भाविनी केन चित्सह प्रत्यासत्तिः । न तु प्रकरणपाठस्य एवं नान्तरीयकत्वम् । अतः सह प्रवृत्तयोः क्रमप्रकरणयोः प्रकरणस्य शीघ्रतरं श्रुत्यर्थप्राप्तिरिति बलीयस्त्वम् । (पृ. ८५५) ।

तथा **क्रमप्रकरणयोः** क्रमस्य अर्थविप्रकर्षः । कथम् ? **‘आकाङ्क्षातः प्रभृत्येकं श्रुत्यर्थं प्रति गच्छति । तमपि त्वन्यतो लब्ध्वा श्रुतिरेकस्य कल्प्यते ।। ’** क्रमो नाम निरपेक्षाणां सतां पाठानुष्ठानदेशसाम्यमात्रम् । यदि तु आकाङ्क्षावतः संनिधौ आम्नायेत, ततः प्रकरणमेव स्यात् । अत्र च प्रायेण महाप्रकरणोपनिपातिन्यो विकृतय उदाहरणम् । तासु हि यत् प्राकृताङ्गमध्यपातित्वेन नोत्पन्नं तत् पुरस्तात् परस्ताद्वा अवस्थितक्रमभाग्भवति । प्रकरणस्य क्लृप्तोपकारैः प्राकृतैर्न्यावर्तितत्वात् । तत्र यन्निवृत्ताकाङ्क्षस्य कस्य चित् समीपे पठ्यते, अन्यस्य चाकाङ्क्षा, ततस्तदुभाभ्यां गृह्यमाणं यावत् क्रमवतो निवृत्तमसतीमाकाङ्क्षामुपजनयति, तावत् प्रकरणवता सहैकवाक्यतां गच्छति, यावच्च इतरत्र एकवाक्यता भवति, तावत् प्रकरणिनं प्रति उपकारसामर्थ्यकल्पना । यावत् इतरत्रासौ, तावदिह श्रुत्यनुमानम् । यावत् इतरत्र श्रुतिरनुमास्यते, तावदिह सिद्धे विनियोगे अनुमानबीजहीनेन अक्लृप्तश्रुति सर्वं अप्रमाणी भवति । (पृ. ८३३–८३४) ।

(अनेकस्य शेषस्य शेष्येकत्वे) **प्रकरणक्रमयोर्विरोधे** गिरापदेरापदे एव स्तोत्रापेक्षयोदाहरणम् । अग्निष्टोमसाम्नः क्रमेण गिरापदं प्राप्नोति, प्रकरणादिरापदम् । तच्च बलीयः । पूर्वं तु सामापेक्षयोदाहृतमासीदित्यसंकीर्णविषयत्वम् । **प्रक्रियासमाख्ययोर्विरोधे** ‘ तस्मान्मैत्रावरुणः प्रेष्यति चानु चाऽऽह ’ इत्येतदेव ज्योतिष्टोमं प्रति उदाहरणम् । तस्य हि समाख्यया होतृकर्तृकं प्रैषानुवचनं प्राप्नोति, प्रकरणात्तु मैत्रावरुणकर्तृकं निर्णीयते । प्रैषानुवचनस्वरूपापेक्षं च पूर्वत्रोदाहरणमिति भेदः । (पृ. ८३९–८४०) । (एकस्य शेषस्य शेष्यनेकत्वे तु) **प्रकरणसमाख्ययोर्विरोधे** पौरोडाशिकसमाख्यातब्राह्मणाम्नातानां प्रयाजादीनां प्रकरणात् सांनाय्योपांशुयाजार्थत्वं इत्युदाहरणम् । (पृ. ८३८) ।

सोम— तैत्तिरीयशाखायां अभिषेचनीयप्रयोगमध्ये ‘ दिशोऽभ्ययं राजाऽभूत् इति पञ्चाक्षान् प्रयच्छन्ति ’ ‘ शौनःशेपमाख्यापयते ’ इति विदेवनादीनाम्नाय तदनन्तरम् ‘ मारुतस्य चैकविंशतिकपालस्य वैश्वदेव्याश्चामिक्षायाः अग्नये स्विष्टकृते समवद्यति ’ इत्यभिषेचनीयाङ्गेषु इष्टिविशेषमाम्नाय ‘ अपां नप्त्रे स्वाहा, ऊर्जो नप्त्रे स्वाहा, अग्नये गृहपतये स्वाहा इति तिस्र आहुतीर्जुहोति ’ इत्यभिषेचनीयाङ्गहोमविशेष आम्नायते । तेन विदेवनादीनां अभिषेचनीयाङ्गसंदष्टतया आम्नातानां तदवान्तरप्रकरणेन अभिषेचनीयमात्रार्थत्वात् तेषां क्रमप्रकरणविरोधोदाहरणत्वं नोपपद्यते इति । **न च** शाखाऽन्तरे अभिषेचनीयप्रयोगपरिसमाप्त्युत्तरं आम्नानात् तदभिप्रायेण उदाहरणत्वमुपपद्यते इति **वाच्यम्** । अवान्तरप्रकरणस्य बलवत्त्वेन क्वचिच्छाखायां अवान्तरप्रकरणेन अभिषेचनीयमात्रार्थानां तेषां शाखान्तरे महाप्रकरणेन सर्वार्थत्वानुपपत्तेः । तस्मात् कृत्वाचिन्तया इदमुदाहरणं इत्याहुः । पृ. २४६.

वि-- ‘ राजसूयेऽभिषेच्याख्ययागे ये देवनादयः । तच्छेषास्तेऽखिलार्था वा, तच्छेषास्तस्य संनिधेः ।।, राजसूयकथम्भावानुवृत्तेः सर्वशेषता । कल्प्याकाङ्क्षाऽभिषेच्यस्य प्रक्रिया प्रबला ततः ।। ’ १०.

भाट्ट— प्रकरणयोर्विरोधे महाप्रकरणं अवान्तरप्रकरणेन । **प्रकरणक्रमयोर्विरोधे** ‘अक्षैर्दीव्यति ’ इत्यादिविदेवनादीनां संनिधानात् अभिषेचनीयाख्यसोमयागाङ्गत्वप्रसक्तौ प्रकरणात् राजसूयाङ्गत्वम् । न च अभिषेचनीयस्यापि फलवत्त्वेन प्रकरणाशङ्का, तस्य विकृतित्वेन क्लृप्तोपकारप्राकृताङ्गनिराकाङ्क्षस्य तदभावात् । **न च** विकृतावपि यत् प्राकृताङ्गानुवादेन वैकृतमङ्गं वाचनिकं विधीयते यथा पृषत्तादि, तस्यापि विकृतिगताङ्गाकाङ्क्षायामनिवृत्तायामेव विधेयत्वात् तत्संदष्टस्य तत्पूर्वभावित्वे सति प्रधानोत्तरभाविनः अपूर्वाङ्गस्य वा प्रकरणेनैव ग्रहणोपपत्तेः, विदेवनादीनां च अभिषेचनीयोत्तरमुक्तविधाभिषेकपूर्वभावित्वेन पाठात् प्रकरणग्रहणोपपत्तिरिति **वाच्यम्** । प्राकृताङ्गानुवादेन विहितस्याप्यपूर्वाङ्गस्य उपहोमवत् विकृत्याकाङ्क्षायां निवृत्तायामेव विधानात् । यस्य हि प्राकृतकार्यापन्नतया वैकृताङ्गस्य विधानं यथा औदुम्बरत्वशरादेः, तस्यैवानिवृत्ताकाङ्क्षायां विधानं तत्संदष्टस्यैव च तत्पूर्वभाविनो वा प्रधानोत्तराङ्गस्य विकृतिप्रकरणेन ग्रहणम् । अभिषेकस्य तु प्राकृतकार्यापन्नत्वाभावान्न तत्पूर्वपठितानां विदेवनादीनामभिषेचनीयप्रकरणग्राह्यत्वोपपत्तिः । वस्तुतस्तु अभिषेकस्य अपि स्वतन्त्रोत्पन्नस्य प्रकरणात् राजसूयाङ्गत्वावगतेः ‘ माहेन्द्रस्य स्तोत्रं प्रत्यभिषिच्यते ’ इत्यत्र प्रतिशब्दयोगेन कालार्थसंयोगः इति वक्ष्यते । अतो विदेवनाद्यभिषेकान्तानां सर्वेषामेव संनिधानादभिषेचनीयाङ्गत्वप्रसक्तौ प्रकरणेन तद्बाधः । न च राजसूयस्यापि प्रत्येकं विकृतित्वात् प्रकरणाभावः, पवित्रादारभ्य क्षत्रस्य धृतिं यावत् राजसूयत्वधर्मपुरस्कारेण वाचनिकाङ्गाम्नानात् तत्संदष्टविदेवनादीनां प्रकरणग्राह्यत्वोपपत्तेः । एवं प्रकरणस्य क्रमान्तरैरपि उदाहरणानि ऊह्यानि ।

मण्डन— ‘ प्रक्रिया बाधते क्रमम् । ’ १०.

शंकर-- ‘ स्थानं प्रकरणेन च । ’ बाध्यम् । १०.

(**क्रमबलाबलविचारः**) **भाष्यम्— अथ क्रमसमाख्ययोर्विरोधे** किमुदाहरणम् ? किं बलवत्तरमिति । पौरोडाशिकमितिसमाख्याते काण्डे सांनाय्यक्रमे ‘शुन्धध्वं दैव्याय कर्मणे ’ इति शुन्धनार्थो मन्त्रः समाम्नातः । तत्र संदिह्यते किं समाख्यानस्य बलीयस्त्वात् पुरोडाशपात्राणां शुन्धने विनियोक्तव्यः, उत क्रमस्य बलीयस्त्वात् सांनाय्यपात्राणामिति । किं तावत् प्राप्तम् ? तुल्यबले एते कारणे स्याताम् । कुतः ? अविशेषात् । यदि वा समाख्यैव बलीयसी । बाधितो हि क्रमः प्रकरणेनापीति । एवं प्राप्ते, **ब्रूमः** । क्रमो बलीयान् । कुतः ? अर्थविप्रकर्षात् । कः पुनरत्र अर्थविप्रकर्षः । निर्ज्ञाते प्रकरणेन केनापि सहैकवाक्यत्वे यत्संनिधावाम्नायते, तत्र आकाङ्क्षां परिकल्प्य तेनैकवाक्यतेत्यवगम्यते । लौकिकश्च शब्दः समाख्या । न च लोक एवंविधेष्वर्थेषु प्रमाणम् । तस्मात् क्रमो बलीयानिति । यद्येवं भवति एवंलक्षणकेषु क्रमेण विनियोगः, न त्वर्थविप्रकर्षात् क्रमो बलीयान् । कथम् ? द्वयोर्हि प्रमाणयोर्बलीयस्त्वं प्रति संप्रधारणम् । न चैवं सति समाख्या प्रमाणम् । लौकिकत्वाच्छब्दस्य पुरुषस्य प्रमाणता भवतीति । नैष दोषः । नात्राङ्गभावः पुरुषप्रामाण्याद्गम्यते । पौरोडाशिकशब्द एतस्य काण्डस्येत्येतदत्र पुरुषप्रमाणकम् । भवति चास्मिन्नर्थे पुरुषः प्रमाणम् । यथा सांनाय्यक्रमे आम्नानं पुरुषप्रमाणकम् । यथाप्रकरणमेकवाक्यत्वं वेदशब्दश्चायमिति । नह्येतेऽनिन्द्रियविषया अर्थाः । उपपद्यते एष्वभियुक्तानां प्रामाण्यम् । ये तु अनिन्द्रियविषयाः तेष्वभियुक्ता न प्रमाणम् । तस्मात् समाख्या कारणम् । कारणत्वे च सति बलीयस्त्वं परीक्ष्यमिति ।

उच्यते । अर्थविप्रकर्षस्तर्हि वक्तव्यः समाख्यायाः । अयमर्थविप्रकर्षः । उपदिश्यते हि क्रमे समाम्नानात् सांनाय्यसंबन्धः, नोपदिश्यते समाख्यायाम् । शब्दमुच्चार्यमाणमुपलभ्य अर्थापत्त्या नूनं अस्तीति कल्प्यते । तस्मात् पूर्ववदेवार्थविप्रकर्षात् क्रमेण समाख्या बाध्यते इति ।

वा— क्रमयोर्विरोधे काम्ये एव याज्याकाण्डे पौर्वापर्यप्रत्यासत्तिक्रमेण तयोरेव ऐन्द्राग्नीययोः युगलयोः अनियमेन इष्टिद्वयेऽपि अनियमेन प्राप्नुवतोः यथासंख्यक्रमेण अत्यन्तदेशसामान्येन प्रत्यासन्नत्वात् विनियोगो भवति । (पृ. ८४०) ।

‘ क्रमसमाख्ययोर्विरोधे किमुदाहरणम् ’ इति । अत्रापि अज्ञानसंशयकृतप्रश्नानन्तरं यौगिकत्वात् समाख्यायाः श्रुतिवत् शाब्दं संबन्धहेतुत्वमिति बलीयस्त्वं मन्यमानस्य विपर्यस्तमतेः प्रश्नः । पौरोडाशिकमिति समस्तमेव दर्शपूर्णमासकाण्डमभिधीयते । तत्र सांनाय्यपात्रशुन्धनक्रमे शुन्धध्वमिति मन्त्रः पठितः । स च प्रकरणाल्लिङ्गाच्च दार्शपौर्णमासिकपात्रशुन्धनार्थः इति सामान्येनावधारिते तद्विशेषे जिज्ञासायां संदिह्यते किं समाख्यया पुरोडाशपात्रार्थो भवति अथ क्रमेण सांनाय्यपात्रार्थ इति । यतरद्बलीयः, तेन विनि-

योक्ष्यते । तुल्यबलत्वाद्विकल्पः, विरोधाभावाद्वा समुच्चयः। क्रमस्य च दृष्टबाधस्य संबन्धानमिधायिनश्च अदृष्टबाधया संबन्धाभिधायिन्या च समाख्यया बाधः, इति प्राप्ते । अर्थविप्रकर्षात् समाख्या बाध्यते इति ब्रूमः । तथाहि, **'वैदिकं देशसामान्यं प्रत्यक्षं दृश्यते क्रमे । समाख्यायां तु सामान्यं कल्प्यत्वाद् विप्रकृष्यते ॥'** 'कः पुनरत्रार्थविप्रकर्षः' इति । समाख्यायामन्तर्णीतसंबन्धसंबन्ध्यभिधायित्वात् न संभवतीति मन्यते । 'निर्ज्ञाते प्रकरणेन केनापि सहैकवाक्यत्वे' इति । प्रकरणाविरोधिनं क्रमविनियोगं केवलसमाख्याप्रतियोगित्वेन च दर्शयति । कथं पुनः प्रकरणं न विरुध्यते, यदा तेन सर्वार्थत्वं ज्ञायमानमुत्सृज्य क्रमवशेन केवलसांनाय्यार्थत्वं विज्ञायते । नैष दोषः । यदि हि अप्रकृते वयं क्रमविनियोगमभ्युपगच्छेम, तत एवं स्यात् । इह तु प्रकरणेन दर्शपूर्णमासान्यतरार्थत्वेऽवधारिते तद्विशेषाकाङ्क्षायां केवल एव क्रमो व्याप्रियते इत्यविरोधः । ननु सर्वार्थत्वेनावधारणात् यतः कुतश्चिदपि निवृत्तौ प्रकरणं बाध्यते । न चावश्यं सर्वार्थत्वं प्रकरणेनावधार्यते, मन्त्रस्य एकेनापि संबध्य कृतार्थत्वात्, प्रकरणिनां च मन्त्रान्तरैरप्यर्थसिद्धेः। सामान्यविनियोगश्रुतिमात्रमेव च इह क्रमात् पूर्वतरं निष्पद्यते । तत्र यावद्विशेषश्रुतिमेकैकं प्रति कल्पयति तावत् क्रमेणापि कल्पितैवेति प्राकरणिकी विशेषश्रुतिरुपसंह्रियते । समाख्या पुनः क्रमविपरीतार्थत्वाद्विरुध्यते, विप्रकर्षाच्च दुर्बला । सर्वो हि संबन्धः केन चिदवान्तरसामान्येन भवति । न च मन्त्रपुरोडाशयोस्तद्वदक्लृप्तं किञ्चिदस्ति, यथा सांनाय्येन सह देशसामान्यम् । 'लौकिकस्तु शब्दः समाख्या' इति । भक्षानुवाके परिहृतमपि सत् वैदिकसंबन्धविप्रकर्षार्थमुपन्यस्यते । परस्तु लिङ्गानिराकरणोक्तेनैव मार्गेण मूलोत्कर्तनेनैव समाख्यां निराकृतां मन्यमान आह यद्येवमित्यादि । सिद्धान्तवादी तु भक्षानुवाकोक्तमेवोत्तरं दर्शयति । **'यदि ह्यङ्गाङ्गिभावोऽत्र पुरुषप्रत्ययाद्भवेत् । ततः स्यादप्रमाणत्वं स तु वैदिक एव नः ॥'** पौरोडाशिकशब्दो मन्त्रब्राह्मणयोरपठितत्वादवैदिको नाङ्गाङ्गिभावः । स च शब्दस्यावैदिकत्वेऽपि अनादिसंबन्धत्वाद्विद्यमानस्मृतिमूलत्वाच्च प्रमाणम् । पौरोडाशिकशब्दः अस्य वाचक इति नैतदतीन्द्रियम्, शब्दार्थव्यवहारिणां वृक्षादिष्विव प्रत्यक्षत्वात् । संभवति हि सर्वेषामन्यत उपलभ्य प्रयोगः । तद्दर्शयति 'भवति चास्मिन्नर्थे पुरुषः प्रमाणम् । यथा सांनाय्यक्रमे आम्नातं प्रकरणमेकवाक्यत्वम्, वेदशब्दश्चायम्' इति । सर्वत्र हि पुरुषान्तरस्थदर्शनपूर्विका पुरुषान्तराणां प्रवृत्तिः । समानदेशाम्नानं प्रकरणपाठं पदानां परस्परसंनिधिं संबन्धं वा न वेदो वदति । किं तर्हि ? पुरुषेष्वामनन्तु तथा दृश्यते, तैरप्येवमन्येभ्यो दृष्टमित्यनादित्वेऽपि सर्वेषां दर्शनसंभवात् अन्धपरम्परान्याये निवृत्ते भवति प्रामाण्यम् । अन्यथा हि वेदावेदप्रकरणाप्रकरणादीनि अप्रमाणकान्येव भवेयुः । अनेकपुरुषस्थत्वाच्च नात्र कस्य चित् स्वातन्त्र्यम्, यद्दोषेण दोषाशङ्का स्यात् । तस्माद्भवत्येवान्यत्र प्रामाण्ये अर्थविप्रकर्षादत्र बाधः । स चोक्तः सूत्रव्याख्यायाम् । एवमेतेषां यथाभाष्यमवस्थितानां श्रुत्यादीनां (मध्ये) **'बाधिकैव श्रुतिर्नित्यं समाख्या बाध्यते सदा । मध्यमानां तु बाध्यत्वं बाधकत्वमपेक्षया ॥'** (पृ. ८५५–८५८)।

तथा क्रमसमाख्ययोः क्रमे वेदकल्पितमेव अङ्गाङ्गिनोर्देशसामान्यनिमित्तं परस्परपर्युपस्थापनम् । सर्वत्र हि केन चिदभिन्नदेशेन संबन्धोऽवकल्पते । न च समाख्यानवतः किञ्चिद्देशसामान्यं वेदक्लृप्तमुपलभामहे । येन संबन्धाभिमुख्यसंभवः । ननु च समाख्या संबन्धमेवाभिदधाना प्रवर्तते, इति श्रुतितुल्या प्राप्नोति । नैतदेवम् । **'अन्य एव हि संबन्धः कल्प्यते यः समाख्यया । अन्यच्च शेषशेषित्वं यच्छ्रुत्या प्रतिपाद्यते ॥'** अर्थानां प्रथमं केन चित् प्रकारेणानवगतसंबन्धानां समाख्या प्रवर्तते । सा च शेषशेषित्वं तावन्नैव प्रतिपादयति । केन चित् संबन्धेनोपपद्यमानत्वात् संबन्धमात्रमपि नैवाभिधत्ते । नहि यौगिकैः संबन्धोऽभिधीयते इत्युक्तम् । समाख्याऽन्यथाऽनुपपत्त्याऽनुमीयते । संबन्धमात्रस्य चैतद्रूपं किञ्चिदभिन्नमेषामस्तीत्यवगमः । ततश्चाऽऽपन्नं क्रमात् जघन्यत्वम् । नहि

किञ्चित्तत्र सामान्यमनुमातव्यम्, देशसामान्यस्य प्रत्यक्षत्वात् । इह तु तत्पदस्याप्रत्यक्षत्वात् आनुमानिकत्वमिति विप्रकर्षः । समाख्या हि यावत् किञ्चित् सामान्यमस्तीति कल्पयति, तावत् क्रमेण नूनमनयोः का चिदपेक्षाऽस्ति, येनेत्थं समानदेशौ पठितौ इति प्रकरणं कल्प्यते । यावच्च किञ्चित् सामान्यमपेक्षां कल्पयति, तावदितरत्रैकवाक्यता क्लृप्ता । तथा यावदिहैकवाक्यता भवति, तावदितरत्र उपकारसामर्थ्यसिद्धिः । यावच्च इहोपकारसामर्थ्यकल्पना, तावदितरेण श्रुतिरुत्पादिता । ततश्च यावदिह श्रुतिमनुमातुमुपक्रमते, तावदितरत्र विनियोगे सिद्धे निराकाङ्क्षीभूते प्रकरणपाठे, सर्वमेतत् प्रचितमपि अपरिपक्वविच्छेदादामसस्यमिव लूनं निर्बीजं भवति । तस्मादर्थविप्रकर्षात्तु परं परं बाध्यत इति सिद्धम् । आह च । **'निःश्रेण्यारोहणप्राप्यं प्राप्तिमात्रोपपादि च । एकमेव फलं प्राप्तुमुभावारोहतो यदा ॥ एकसोपानवर्त्येको भूमिष्ठश्चापरस्तयोः । उभयोश्च जवस्तुल्यः प्रतिबन्धश्च नान्तरा ॥ विरोधिनोस्तदैको हि तत् फलं प्राप्नुयात्तयोः । प्रथमेन गृहीतेऽस्मिन् पश्चिमोऽवतरेन्मुधा ॥ तेन यद्यपि सामर्थ्यं प्रत्येकं सिद्धमन्यदा । तथाऽपि युगपद्भावे जघन्यस्य निराक्रिया ॥ अन्यथैव हि शून्येषु दुर्बलैरपि चर्यते । अन्यथा बलवद्ग्रस्तैः सर्वशक्तिक्षये सति ॥'** तस्मान्नैतदालम्बनं युक्तम्, यत् क्वचिदुत्तरेषां प्रामाण्यमिष्टम् । तस्माद्बलवद्विरोधेऽपि तेन भवितव्यमिति । यत्तु प्रमाणाभासो बाध्यते न प्रमाणमिति, तत्र ब्रूमः, अयमपि प्रमाणाभास एव । कथम् ? **'नैवैतेषां प्रमाणत्वमासीदत्र कदा चन । अन्यत्र दृष्टमेतत्तु समारोपेण कल्पितम् ॥'** नहि यत्र विषये बाधस्तत्रैषां प्रमाणत्वम् । किं तर्हि ? प्रदेशान्तरे केवलानामुपलक्षितं सामान्यतोदृष्टरूपेण अत्रापि प्रतिभाति । तत्तु बलीयसा अपहृतविषयत्वात् सीदतीति पश्चाद्भ्रान्तित्वेन अध्यवसीयते । अथवा यस्तत्रास्य व्यापार आसीत्तमिहापि प्रक्रमते एव । स तु बलवताऽन्येन विषयेऽपहृते मूलच्छेदाद्यदा तं न गच्छति, तत् किं क्रियताम् । तेन मृगतृष्णादिवदेवाप्राप्य प्रमाणमेव बाध्यते । अनुत्पन्नमेव चेह श्रुत्यभावात् शेषज्ञानं बाध्यते आन्तरालिकज्ञानमिथ्यात्वकल्पनया, इति नोत्पत्तिसामान्येन तुल्यबलत्वम् । अतश्च ज्ञानसंकरोच्छेदनादिरूपो बाधो नैव आशङ्कितव्यः । योऽपि च उत्पन्नबाधः, तमपि फलवियोगात्मना उपपादयिष्यामः ।

एवं तावत् द्वयोर्द्वयोर्विरोधे वर्णितम् । अर्थसिद्धत्वात्तु भाष्यकारेण इतरैः सह न प्रदर्शितम् । (पृ. ८३४–८३५)।

(अनेकस्य शेषस्य शेष्येकत्वे) **क्रमसमाख्ययोर्विरोधे** किमुदाहरणम् । काम्ययाज्याकाण्डाधीतयोरैन्द्राग्नयुगलयोरुभयोरपि विकल्पेन कर्मद्वयेऽपि प्रयोगः समाख्यानुरोधेन प्राप्नोति । क्रमबलीयस्त्वात्तु प्रथमस्य प्रथमं द्वितीयस्य द्वितीयमेवेति व्यवस्था । लिङ्गं तु पक्षद्वयेऽपि तुल्यार्थमिति क्रमसमाख्ययोरेव विरोधः । (एवं शेषैकत्वे शेष्येकत्वे च श्रुत्यादिसमवायश्चिन्तितः) । (पृ. ८४०) ।

समाख्ययोस्तु विरोधे सामान्यविशेषसमाख्ययोः सूत्रबद्धः एव बाधो भविष्यति 'तस्योपदेशसमाख्यानेन निर्देशः' इति (३।७।२०।४१, अधिकरणं तु **मीको.** पृ. १२५१ 'ऋत्विजां अनियतपदार्थ०' इति बिन्दौ द्रष्टव्यम्) । पृ. ८४१ ।

शा— (क्रमसमाख्ययोर्विरोधे) **'विशेषाग्रहणात् तुल्यबलत्वमुभयोर्भवेत् । संबन्धवाचिनीत्वेन समाख्या वा बलीयसी ॥ नैतदेवं समाख्या हि न संबन्धामिधायिनी । यद्यपि त्वभिधात्री स्यात्, प्रमाणं न तु तत्र सा ॥'** नहि यौगिकैः शब्दैः संबन्धोऽभिधीयते ।

वि— 'शुन्धध्वमिति मन्त्रोऽङ्गं पौरोडाशिकशोधने । सांनाय्यपात्रशुद्धौ वा, प्रथमोऽस्तु समाख्यया ॥, पौरोडाशिकमित्यत्र प्रकृत्या तद्धितेन वा । संनिध्यनुक्तितः कल्प्यः क्लृप्तत्वाच्चरमः क्रमात् ॥' ११.

भाट्ट— एवं **क्रमयोर्विरोधे** संनिधानेन याज्याद्वयस्य काम्यैन्द्राग्नद्वयाङ्गत्वे अनियमेन प्रसक्ते यथाक्रमं पाठात् आद्यस्य आद्याङ्गत्वम् । **क्रमसमाख्ययोर्विरोधे** पौरोडाशिकसमाख्याते काण्डे समाम्नातस्य 'शुन्धध्वम्' इति मन्त्रादेः संनिधानात् सान्नाय्याङ्गत्वम् । न च महाधि-

कारेण संनिधिबाधः, तस्यापि वाचनिकाङ्गसंदष्टत्वेन बलवत्त्वात्। न चैवं तस्य प्रकरणत्वापत्तिः, मन्त्रस्य सिद्धरूपत्वेन लिङ्गविनियोज्यत्वेन च प्रकरणाविषयत्वात्। संनिधानस्यापि समाख्यावदपूर्वसाधनत्वलक्षणातात्पर्यग्राहकत्वे एव बलाबलम्, न तु विनियोगे। तत्र तु उदाहरणान्तरं मृग्यम्।

एवं **समाख्ययोर्विरोधे** आध्वर्यवमिति सामान्यसमाख्यायाः याजमानमितिविशेषसमाख्यया बाधः। एवं व्यन्तरितत्र्यन्तरितादिप्रमाणस्य पूर्वैः सह विरोधे शेषानेकत्वे च उदाहरणानि कौस्तुभे द्रष्टव्यानि।

मण्डन—'क्रमः समाख्यां बाधेत।' ११.

शंकर—'स्थानात् समाख्या बाध्या स्यात्।' ११.

(बाधयोग्यताधिकरणम्। प्राप्तबाधाप्राप्तबाधविचारः—) भाष्यम्— अथ यत्तत्र तत्रोच्यते, इदमनेन बाध्यते, इदमनेनेति। तत्र यत् बाध्यते, तत् किं बाधकविषयं प्राप्तम्, उत अप्राप्तमिति। किं चातः? यद्यप्राप्तम्, किं बाध्यते? अथ प्राप्तम्, कथं शक्येत बाधितुम्? प्राप्तं बाधकविषयं पूर्वविज्ञानमिति ब्रूमः। कथम्? सामान्यस्य कारणस्य विद्यमानत्वात्। अथ कथं निवर्तते? नैव हि तत् निवर्तते। कथं तर्हि? मिथ्याज्ञानमिति प्रत्ययान्तरं भवति।

किं नु खल्वमिथ्याज्ञानस्य स्वरूपम्। यस्य बाधकः प्रत्ययो विमृश्यमाणस्यापि नोपपद्यते न तत् मिथ्या। तदेतेषां श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां पूर्वपूर्वं यत् कारणम्, तत् परंपरं प्रति बलीयो भवति। नैतस्योत्पन्नस्य विमृश्यमाणस्य बाधकं विज्ञानान्तरमस्ति। तस्मात्तेषां समवाये विरोधे परदौर्बल्यमर्थविप्रकर्षादिति।

वा— इदानीं बाधस्य स्वरूपमाक्षेपद्वारेण कथयति 'अथ यत्तत्र तत्रोच्यते द्वयोर्द्वयोर्विरोध इदमनेन बाध्यत इदमनेन' इति। श्रुत्या लिङ्गं लिङ्गेन वाक्यमित्यादि। तद्बाधकविषयं प्राप्तं बाध्येत अप्राप्तं वा। तद्यदि तावदप्राप्तम्, ततः समवाय एव नास्तीति किं बाध्येत? समवायसिद्ध्यर्थं त्वथ प्राप्तं बाध्यते, तत उभयोरपि प्राप्तप्रमेयत्वात्तुल्यबलत्वमिति न बाधस्य प्रामाण्यम्। तत्रोत्तरम्। **'सामान्यकारणात् प्राप्तं पूर्वं बाधकगोचरम्। बाधकेन बलीयस्त्वान्मृषैतदिति कल्प्यते॥'** यथैव मृगतृष्णादिज्ञानान्युत्पन्नानि मिथ्यात्वकल्पनया बाध्यन्ते हानोपादानादिफलवियोगाच्च बाध्यव्यपदेशं लभन्ते तथा लिङ्गादिना ज्ञानमप्युत्पन्नं सत् श्रुत्यादिज्ञानेनानुष्ठानरूपात् फलाद्वियुज्यमानं बाधिष्यते। न त्वेतदप्युपपद्यते। कुतः? **'बाधस्योक्तप्रकारत्वात् प्रश्नस्तावन्न युज्यते। स्थिते चाप्राप्तबाधत्वे प्राप्तबाधोऽपि नोत्तरम्॥'** तत्र नाम प्रश्नो भवति यत्प्रथमं नोक्तम्। एतानि तु लिङ्गादीन्यर्थविप्रकर्षात् अननुमितश्रुतीनि बाध्यन्ते इति ज्ञातत्वान्नैव प्रश्नमर्हन्ति। यद्यपि च पृच्छ्यते तथाऽप्यपसिद्धान्तेनोत्तरं न दातव्यम्। अननुमितश्रुतिबाधेन ह्यप्राप्तबाधः स्थितः। स इदानीं प्राप्तबाधोपवर्णनेन प्रत्युद्ध्रियेत विनोपपत्त्या। यदुच्यते 'सामान्यस्य कारणस्य विद्यमानत्वात्' इति। तल्लिङ्गादीनां साक्षादप्रमाणत्वात् प्रमाणभूतायाश्च श्रुतेरविद्यमानत्वादनुपपन्नम्। अथ तु तामनुमाय प्राप्तिरिष्यते ततो लब्धात्मकत्वादानुमानिक्याः श्रुतेः प्रत्यक्षायाश्च न कश्चिद्विशेष इति तुल्यबलत्वमेव प्राप्नोति। यदि वा मिथ्यात्वकल्पनरूपबाधाभ्युपगमाद्विरोधे सति तत्कल्पनाद्विपरीतबाधप्रसङ्गः। कथम्— **'पूर्वं परमजातत्वादबाधित्वैव जायते। परस्यानन्यथोत्पादान्न त्वबाधेन संभवः॥'**

श्रुत्यादौ शीघ्रतरत्वात् प्रथमं प्रवृत्ते लिङ्गादीनि प्रवर्तन्ते। तत्र यदि प्राप्तबाधसिद्ध्यर्थं पश्चात् प्रवर्तमानमपि लिङ्गं श्रुतिमनुमापयति ततः सा तुल्यविषयसंनिविष्टां पूर्वामबाधित्वा नाऽऽत्मानं लभत इति मृगतृष्णादिष्विव मिथ्यात्वं कल्पयन्त्येव जायमाना बाधिका स्यात्। तस्मान्नैष श्रुत्यादिषु ग्रन्थो घटत इति। यद्यप्यधिकरणान्तोपसंहारात्तद्विषयः प्रतिभाति तथापि सामर्थ्यात् पूषाद्यनुमन्त्रणवदुत्कृष्यते। विज्ञातप्रकारत्वात् नैवायमथ यत्तत्र तत्रेति श्रुत्यादिषु बाधः संबध्यते। किं तर्हि? बाधाधिकारादिहाऽऽचार्यस्य यावन्तः शास्त्रोपनिबद्धा बाधभेदास्ते सर्वे हृदयमनुप्राप्ताः। तेषां च न श्रुत्यादिसदृशो बाध उपपद्यते। सर्वत्र चैकरूपेण बाधमार्गेण भवितव्यम्। अतो यदि वा तदीयः प्रकारः श्रुत्यादिष्वस्तु श्रुत्यादिप्रकारो वा तेषु। तत्र श्रुत्यादिगतस्तावत्संप्रत्येव कथित इति किं तेन

पृष्टेन। ये त्वेतद्व्यतिरिक्तास्तेषु कथमिति मन्यमानो वदति 'अथ यत्तत्र तत्रोच्यते इदमनेन बाध्यते' प्रत्यक्षेणानुमानं मृगतृष्णादिप्रत्ययाश्च, यथास्वं षड्भिरपि प्रमाणैः प्रमाणाभासः, श्रुत्या स्मृतिः, आप्ताविगीतस्मृत्या अनाप्तविगीतस्मृतिः, अदृष्टार्थया दृष्टार्था, श्रुतिप्रभवया लिङ्गादिप्रभवाऽर्थवादप्रभवा च, स्मृत्याऽप्याचारः, सोऽप्ययुक्ततराचारेण, संदिग्धमसंदिग्धेन, दुर्बलाश्रयं बलवदाश्रयेण, उपसंहारस्थमुपक्रमस्थेन, अत्यन्तादृष्टार्थं नियमादृष्टार्थेन, आरादुपकारकत्वं सामवायिकत्वेन, अनेकार्थविधानमेकार्थविधानेन, अनेकशब्दार्थत्वमेकशब्दार्थत्वेन, बहुबाधोऽल्पबाधेन, वेदान्तरोत्पन्नं वेदान्तरविहितत्वेन, परशाखाविहितं स्वशाखाविहितेन, नित्यं नैमित्तिकेन, द्विप्रकारमप्येतत्क्रत्वर्थं पुरुषार्थेन, अनारभ्याधीतं प्रकरणाधीतेन, पौर्वापर्येण विरोधे पूर्वं परेण प्राकृतं वैकृतेन, प्रयोगवचनाश्रितं चोदकाश्रयेण, निष्प्रयोजनं सप्रयोजनेन, ब्राह्मणक्रमो मन्त्रक्रमेण, देवताश्रयं द्रव्याश्रयेण, पश्चादाम्नातं पूर्वाम्नातेन, अल्पं भूयसा, गौणं मुख्येन, समान्यविहितं विशेषविहितेन, सावकाशं निरवकाशेन, अङ्गं प्रधानेन, अङ्गधर्मः प्रधानधर्मेण, तत् सर्वमेव किं प्राप्तं बाध्यते, अथ श्रुत्यादिवदेव अप्राप्तमिति। तद्यदि तावत् श्रुत्यादिवत् सामान्यविशेषातिदेशोपदेशिकादिष्वपि अप्राप्तबाधः ततोऽवश्यं लिङ्गादाविव श्रुतेः विनियोजकस्य शास्त्रस्याभावोऽभ्युपगन्तव्यः। तथा सति तस्यैकत्वात् विरोधविषयवदितरत्राप्यभाव इति सार्वत्रिकबाधप्रसङ्गः। अथाविरोधापेक्षया सद्भावोऽभ्युपगम्येत तत इतरत्रापि सद्भाव एवेति तुल्यबलत्वापत्तिः। विशेषशास्त्राद्यनुपमर्देन चाऽऽत्मलाभाभावात् तदभ्युपगमे विपरीतबाधप्रसङ्गः। न ह्येकस्यैव शास्त्रस्य किञ्चित्प्रति सद्भावः किञ्चित्प्रत्यसत्त्वं इति युज्यते। तेन 'दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्याय', 'प्रकृतिवत् कुर्याच्छरमयं बर्हिः' इत्यादौ प्रतिब्राह्मणं प्रत्यङ्गं च शास्त्राभावादेकं शास्त्रम्। तद्यदि शरतक्रालोचनेन कुशकौण्डिन्ययोर्नास्तीत्यवधार्यते ततः प्रयाजादिमाठरादिष्वप्यप्रवृत्तिः। अथ तेष्वस्ति ततः कुशकौण्डिन्ययोरपि भवितव्यम्। अथ तौ प्रति नास्ति इतरान् प्रत्यस्तीत्येतदप्येकवस्तुनि विप्रतिषेधान्निष्प्रमाणकम्। न चात्र प्रतिपत्तृभेदो विद्यते। येन संबन्धग्रहणाग्रहणवदविरोधः स्यात्। न च सकृद्गृह्यमाणत्वाच्छास्त्रभेदोऽवगम्यते, येनान्यस्यैव सत्त्वमन्यस्य चासत्त्वमित्यभिधीयेत। व्यक्तिपक्षे च कदाचिदेतद्भवेत्। आकृतिपक्षे तु यागगतव्यापारातिदेशपक्षे च विषयैकत्वाद्युगपदेकमेव शास्त्रं प्रवर्तते। एतेनैवोत्कालनबाधनं प्रत्युक्तम्, ब्राह्मणप्रकृतिवच्छब्दयोः तुल्यहेतुत्वेन किञ्चिद्वर्जनासंभवात्। तथा च 'तद्वर्जं तु वचनप्राप्ते' (३।६।१।३) इत्युक्त्वा 'न चोदनार्थकार्त्स्न्यात्' (३।६।१।८)। इत्युत्तरं दास्यति। पौरुषेयेऽपि तावद्वाक्ये हृदयार्थतया, विना शब्दव्यापारेणैव तद्वर्जं मया प्रयुक्तमित्येवमीश्वराज्ञानुरूपेण भवेत्, न त्वेतद्वेदेऽवकल्पते। न चेह सामान्यशास्त्रात्परतो विशेषशास्त्राणि कल्प्यन्ते, येन सामान्यशास्त्रस्य तत्प्रकृतित्वमात्रमाश्रित्य विशेषशास्त्रापेक्षया सदसद्भावविरोधः परिह्रियेत। तस्मादवश्यम्भाविन्यैकरूप्ये नाभिप्रेतबाधोऽवकल्पते। अथ कथञ्चित् प्राप्तबाधमेव मिथ्यात्वकल्पनया आश्रित्यैवमादिष्वविरोध इत्युच्यते, तत एवं श्रुत्यादीनामपि प्राप्तबाधोऽङ्गीकर्तव्यः। तत्र चोक्तम् 'अतो न बाधमार्गैकरूप्यं घटते' इति। तदुच्यते। **'न बाधस्यैकरूपत्वमेषितव्यं नियोगतः। न किञ्चिद्विरुणद्धीह नानारूप्यं प्रमाणवत्॥'** यथैवैते पुरस्ताद्बाधगोचरा भेदा वर्णिता नैतेष्वैकरूप्यमङ्गीकृतं तथाऽत्र न बाधप्रकारनानात्वेऽपि गम्यमाने कश्चिद्विरोधः। तत्र श्रुत्यादिषु तावद्यथोक्त एवाप्राप्तबाधः। न च तत्र किञ्चिद्विरुध्यते। तद्विषयप्राप्त्यन्तरानभ्युपगमात्। येऽप्येतच्छायानुपातिनोऽर्थविप्रकर्षादेव स्मृत्यादिबाधा भवन्ति तेऽपि हेतुसामर्थ्यकथनात् श्रुत्यादिबाधेनैव व्याख्याताः। ये तु प्रमाणतदाभासनित्यनैमित्तिकक्रत्वर्थपुरुषार्थपौर्वापर्यप्राकृतवैकृतसामान्यविशेषनिष्प्रयोजनसप्रयोजनाल्पभूयस्त्वसावकाशानवकाशाङ्गप्रधानतद्धर्मबाधास्तेष्विदमुक्तं प्राप्तं बाध्यते इति। 'कथमिति' श्रुत्यादिवैलक्षण्यविस्मितस्य प्रश्नः। उत्तरमाह 'सामान्यस्य कारणस्य विद्यमानत्वात्' इति। दर्शितमेतद्ब्राह्मणप्रकृतिवच्छब्दयोः। यत्तु प्राप्तस्य ज्ञान-

स्यानुत्पादोच्छेदसंस्कारविच्छेदानामशक्यत्वान्नास्ति बाधनमिति। तत्राऽऽह ‘ नैव निवर्तते। किं तर्हि ? मिथ्याज्ञानमेतदिति प्रत्ययान्तरं भवति ’ इति। शास्त्रान्तरं ह्यनन्यगति दृष्ट्वा मृगतृष्णादिवदेव सामान्यापहृतबुद्धेर्ममेयं भ्रान्तिः पूर्वमेतद्विषयपरिकल्पनया जातेत्यध्यवस्यति। तस्मात् प्रयाजादिमाठरादिप्राप्तिवेलायामुपजाताऽपि कुशकौण्डिन्यबुद्धिर्भ्रान्तिरिति निश्चित्य फलविमुक्तत्वानुबद्धमर्थं शास्त्रं वा बाधितुं मन्यते। किं नु खलु अमिथ्याज्ञानस्य रूपमिति— यद्युत्पन्ना अपि प्रत्ययाः प्रत्ययान्तरैरित्थं निराक्रियन्ते ततोऽन्यत्रापि क आश्वास इति मन्यते। तत् कथयति। यस्यान्वेषणेऽपि कृते बाधकप्रत्ययान्तरं नोत्पद्यत इति। यत्तु कारणदोषज्ञानं द्वितीयमुपलक्षणं तल्लोकविषयत्वान्न वेदे संभवतीति नोपन्यस्तम्। प्रासङ्गिकमुक्त्वा, इदानीमधिकरणमुपसंहृत्य अधिकरणान्तरमारभ्यते।

शा— ‘ अथ यत् तत्रतत्र ’ इत्यादिभाष्यस्य श्रुत्यादिविषयत्वं (‘ बाध्यस्योक्तप्रकारत्वात् प्रश्नस्तावन्न युज्यते।) **स्थिते चाप्राप्तबाधत्वे प्राप्तबाधोऽपि नोत्तरम् ॥** ’ इत्यनेन वार्तिकेन दूषितम्। के चन (प्राभाकरीयाः) अस्य दूषणस्य सामान्यतः प्राप्तिं मन्वानाः विशेषमपश्यन्तः स्मृतिप्रमोषनिमित्तं प्राप्तिज्ञानं व्यपदिशन्ति विशेषावगमात् तेषां निवर्तते इत्यनेन न कश्चिदपि परिहारलेशः। नहि विप्रकृष्टप्रमाणं संनिकृष्टप्रमाणात् प्राक् प्राप्तं व्यवहारमपि निवर्तयति। यतः तन्निवर्तकता संनिकृष्टस्य स्यात्। अतो नेदं उपदेशबाधविदां अभिधानम्, अपि तु अतद्विदां इत्युपरम्यते। (**सोम**– अत्र ‘ सामान्यतः प्राप्तिं ’ इत्यारभ्य ‘ निवर्तते ’ इत्यन्तः गुरुग्रन्थः ऋजुविमलायां तथा लेखनात्। तत्र च गुरुग्रन्थे अपेक्षितं पूरयितुं ग्रन्थकारेण (शा.) ‘ के चन ’ इत्युक्तम्। तस्य च ‘ व्यपदिशन्ति ’ इत्यनेन अन्वयः। ‘ अस्य दूषणस्य ’ इत्येतत् ‘ न कश्चित् परिहारलेशोऽभिहितः ’ इत्यनेन संबध्यते। ‘ इत्यनेन ’ इत्यादिः प्राभाकरग्रन्थदूषणार्थः।) ‘ **श्रुत्यादीनामतः षण्णामेकार्थोपनिपातिनाम्। पूर्वपूर्वं बलीयः स्यात् दुर्बलं चोत्तरोत्तरम् ॥** ’

वि— ‘ बाधो न युक्तो युक्तो वा, प्राप्त्यप्राप्त्योर्न युज्यते।, अप्रवृत्तं प्रसक्तं यद् धिया तस्यास्तु बाध्यता ॥ प्रमाणतः प्रसक्तस्य बाधो दाशमिकोऽत्र तु। विभ्रमेण प्रसक्तस्य तस्मादप्राप्तबाधनम् ॥ ’ ३।३।१२.

भाट्ट— स चायं श्रुतिलिङ्गादिबाधोऽप्राप्तबाधः। तत्त्वं च अङ्गताबोधकलिङ्गादिकल्प्यप्रमाणप्रतिबन्धकत्वम्। पूर्वपूर्वप्रमाणेन हि अङ्गत्वेऽवधारिते निराकाङ्क्षत्वादुत्तरोत्तरतः पूर्वपूर्वप्रमाणकल्पनैव नोदेतीति सोऽयमप्राप्तबाधः। एवं गृहमेधीये ‘ आज्यभागौ यजति ’ इत्यादावपि। अन्यत्र तु सामान्यविशेषनित्यनमित्तिकभावादौ प्राप्तबाधः। तत्त्वं च क्लृप्तस्य बोधकस्य विशेषविषयताप्रतिबन्धकत्वम्। सामान्यशास्त्रादेर्हि विशेषशास्त्रादिना पदहोमादिविषयतामात्रं प्रतिबध्यते, न तु सामान्यशास्त्रमपि। तस्य क्लृप्तत्वेनाकल्पनीयत्वात्, होमान्तरेष्वपि आहवनीयाभावापत्त्या मिथ्यात्वस्यापि कल्पयितुमशक्यत्वाच्च। अत एव येन सामान्यशास्त्रमेव पूर्वमालोचितम्, तस्य विशेषादर्शनजनितभ्रमः एव विशेषविषयताविषयको विशेषशास्त्रेण बाध्यते। एवं यत्रापि ‘ न तौ पशौ करोति ’ इत्यादौ शास्त्रप्राप्तस्य निषेधः, तत्रापि प्रापकशास्त्रस्य यद्यपि निषेधस्य प्राप्तिसापेक्षत्वेनोपजीव्यत्वादत्यन्तबाधानुपपत्तेर्विशेषविषयत्वमावश्यकम्, तथापि तत्र विकल्पाङ्गीकारादभावपक्षे विशेषविषयत्वप्रतिबन्धान्नोक्तलक्षणाव्याप्तिः। यथा च तत्र रागप्राप्तनिषेधवत् भ्रान्तिप्राप्तस्य बाधमङ्गीकृत्य न विकल्पः, तथा कौस्तुभे द्रष्टव्यम्। वक्ष्यते च अत्रापि दशमे। अतः सिद्धं बाधस्य द्वैविध्यम्।

मण्डन— ‘ बाधः प्राप्ते क्वचिद् भवेत्। ’ १२.

शंकर— ‘ प्राप्तबाधस्तयेरितः। ’ १२.

* **बलाबलाधिकरणे** प्रत्यक्षलिङ्गविरोधे स्मृतिकल्पितश्रुतेः याथार्थ्यनिश्चयाभावेन दुर्बलत्वं वार्तिककृतैव वक्ष्यते। **कौ.** १।३।४।९, * बलाबलाधिकरणे लिङ्गबलीयस्त्वं वक्ष्यते। ३।२।९।२४ पृ. २७०, * यत्तु **बलाबलाधिकरणे** शाखान्तरीयस्य दुर्बलत्वाभिधानं तत् मूलानवगमेऽपि यत्र परोक्तिमात्रेण पदार्थावगमः तत्र मूलावगमपर्यन्तं बाध्यते इत्येवंपरम्। २।४।२।२३.

* टीकायामपि (भामत्यां) **बलाबलाधिकरणानुक्रमणे** ऐन्द्रीमन्त्रादीनां प्रथमप्रवृत्तश्रुत्यादिभिः निराकाङ्क्षीकरणेन अप्राप्तबाध एव वर्णितः। **परिमल.** ३।३।१४।२५ पृ. ८०२.

* श्रुतिर्हि वाक्याद् बलीयसी **बलाबलाधिकरणोक्तन्यायात्। वैद्यनाथः.**

* प्रकरणोत्तरप्रमाणानां **बलाबलाधिकरणवक्ष्यमाणन्यायेन** मन्थरप्रवृत्तत्वात् अङ्गताबोधकत्वानुपपत्तिः। **कौ.** ३।३।४।११.

* **बलाबलाधिकरणवार्तिके** संदंशस्य भेदत्रयं उक्तम्। **बाल.** पृ. १०.

* तद्धितश्रुतिदौर्बल्यस्य **बलाबलाधिकरणसिद्धत्वेन** ऐन्द्र्यधिकरणविषयत्वाभावः। **कौ.** ३।२।२।३.

* **बलाबलचिन्तायाः** विरोधविषयत्वम्। **सु.** पृ. १२०६.

* **बलाबलपरीक्षा** चोदकनामधेययोः ‘ न वा क्त्वभिधानात् ० ’ (७।४।२।१५) इत्यत्र सिद्धा। **भा.** १२।२।७।२२.

* **बलाबलविचारः।** ‘ भिन्नकक्षागते ये च प्रमाणे तत्र धावतः। तयोः शीघ्रेण निर्णीते मन्थरं न प्रवर्तते ॥ तद्धि दूरमपि प्राप्तमेकमप्यगतं पदम्। इतरेण गते नादावेकान्तेनैव जीयते ॥ यत्र शीघ्रतरं नास्ति तस्यार्थस्यापहारकम्। चिरेणापि व्रजेत्तत्र दुर्बलं न निवार्यते ॥ नहि येन प्रमाणत्वं लब्धपूर्वं कदा चन। तेन तत्सर्वदा लभ्यमित्याज्ञापयतीश्वरः ॥ ’ **वा.** १।३।२।३ पृ. १७३.

* **बलभित्।** ‘ पञ्चदशो बलभिद्भवति रथंतरसामा उत्सेधब्रह्मसामा ’ (तल्वकारीयताण्डकादिब्राह्मणेषु)। **कु.** १।४।६।७. * ‘ **बलभिदा** यजेत ’ इति बलभिच्छब्दः कर्मनामधेयम्। **भा.** १।४।१।१–२.

* **बलभिच्छब्दस्य** यागनामतया प्रामाण्यम् ‘ बलभिदा यजेत ’ इत्यत्र। **वि.** १।४।१.

* **बलवत्** प्रयोगकालावगतक्रमात् देवतासामान्यं उत्पत्तिसमयावगतम्। **संकर्ष.** २।३।५. * ‘ नापेक्षा यस्य यत्रास्ति स तस्माद् **बलवान्** भवेत्। यः पराधीनवृत्तिः स तद्बाधं कथमाचरेत् ॥ ’ श्रुत्यादीनां हि पूर्वं पूर्वं उत्तरोत्तरनिरपेक्षं प्रवर्तमानं बलवद्भवति, परंपरं तु पूर्वाधीनप्रामाण्यं न शक्नोति तस्यैव बाधं कर्तुम्। नहि श्रुतिमननुमाय लिङ्गादेः प्रामाण्यमध्यवसीयते। **वा.** ३।३।७।१४ पृ. ८३०. * **बलवता** प्रमाणेन प्रधानकथम्भावं बाधित्वा अङ्गगुणत्वावगमे संदंशसंभवः। सर्वेषां च अवान्तरप्रकरणित्वेनाभिमतानां श्रुत्यादिभिः प्राक् तदङ्गमुक्त्वा पश्चादपि तदङ्गपरामर्शसद्भावात् न क्वचित् संदंशाभावः शङ्कनीयः। **सु.** पृ. १०७०. * ‘ **बलवति हेतौ प्रयुक्ते दुर्बलोपन्यासः क्लिष्टो भवति** ’ इति **न्यायः।** ननु ‘ प्रयोगचोदनाभावात् ’ (१।३।१०।३०) इत्यनेनैव शब्दार्थैकत्वसिद्धेः ‘ अविभागात् ’ इत्यनर्थकम्, हेत्वन्तराभिधानार्थत्वे वा शब्दैक्यमात्रविषयत्वेन अव्यापकतया दौर्बल्यात् ‘ बलवति भवति ’ इति न्यायेन पूर्वमुपन्यस्येत इत्याशङ्का। **सु.** पृ. ३३५.

* **बलवदाश्रयेण** दुर्बलाश्रयं बाध्यते। अप्राप्तबाधोऽयम्। **वा.** ३।३।७।१४ पृ. ८६०, **बाल.** पृ. १४०. * **बलवदाश्रयात्** दुर्बलस्यापि लिङ्गस्य प्रबलायाः श्रुतेरपि अन्यथानयनम् ‘ आकाशस्तल्लिङ्गात् ’ इत्यत्र ‘ शिष्टाकोपे यथोदितम् ’ इति न्यायेन। **पराक्रमः.** ६२।१–२.

* **बलवदाश्रितस्य** दुर्बलस्य प्रबलत्वम्। ‘ दुर्बलस्य प्रमाणस्य बलवानाश्रयो यदा। तदापि विपरीतत्वं शिष्टाकोपे यथोदितम् (१।३।३) ॥ अत्यन्तबलवन्तोऽपि पौरजानपदा जनाः। दुर्बलैरपि बाध्यन्ते पुरुषैः पार्थिवाश्रितैः ॥ ’ यदा पदार्थतद्धर्मविषये प्रमाणे विरुध्येते तत्र यद्यपि प्रमाणतोऽन्यादृशं बलाबलं तथापि प्रमेयानुरोधेन तदाश्रयणात् स्वरूपदुर्बलेनापि बलवद् बाध्यमानं तदानुगुण्यं प्रतिपद्यते। तदुक्तं आचमनादयः पदार्थाः क्रमः तेषां धर्मः। **वा.** ३।३।७।१४ पृ. ८४१.

* **बलीयः** देवताघटितसादृश्यापेक्षया द्रव्यघटितसादृश्यम् । ८।१।१७।३२-३४. * **बलीयानपि** हेतुः विरुध्यमानमबलीयांसं बाधितुमर्हति नाविरुद्धम् । **भा.** ३।३।७।१४ पृ. ८४३-८४४.

* **बलीयस्त्वं** श्रुतिलिङ्गादीनां पूर्वपूर्वस्य । **भा.** ३।३।७।१४.

* **बलीवर्दाभ्यर्चनं** तद्धावनादिकं च ज्येष्ठपौर्णमास्यां उदीच्याः कुर्वन्ति । अस्योत्सवस्य ' उदृषभयज्ञः ' इति नामधेयम् । **वि.** १।३।८.

* **बल्वजाः** तृणविशेषः । **सोम.** २।१।४ पृ. १०८.

* **बहिरिन्द्रियाणि** प्राप्यकारीणि । **ऋजु.** पृ. २४२ .

* **बहिष्पवमानं** ज्योतिष्टोमे प्रातःसवने स्तोत्रविशेषः। **वि.** १।३।५ वर्णकं ३. * बहिष्पवमानं पवमानार्थमन्त्रकत्वात् बहिःसंबन्धाच्च । **भा.** १।४।२।३. * बहिष्पवमानं सदसो बहिःप्रसर्पद्भिः प्रयुज्यते इति ' बहिष्पवमानम् ' इत्युच्यते । वि. १।४।२, * ' त्रिवृद् **बहिष्पवमानम्** ' अत्र त्रिवृच्छन्दस्य ऋचां नवकमित्यर्थः । १।३।५ वर्णकं ३ वार्तिकमतम् . * ' त्रिवृद्बहिष्पवमानम् ' इति बहिष्पवमानशब्दः नामधेयम्, न गुणविधिः । **भा.** १।४।२।३ . * **बहिष्पवमानस्य** अविवृद्धस्तोमः अग्निष्टोमे प्रातःसवने । वि. १०।५।७, * **बहिष्पवमाने,** अतिरात्रे चोदकप्राप्ते, ' एकविंशेनातिरात्रेण प्रजाकामं याजयेत्, त्रिणवेनौजस्कामम्, त्रयस्त्रिंशेन प्रतिष्ठाकामम् ' इति कामभेदेन एकविंश-त्रिणव-त्रयस्त्रिंशाः स्तोमा विहिताः । ५।३।४. * बहिष्पवमाने अतिरात्रगते एकविंशादिकाम्यस्तोमेषु संख्यापूरणाय आगमिततृचानां अन्ते निवेशः । ५।३।४ **मीको.** पृ. २५८ ' अतिरात्रे काम्यस्तोमविवृद्धौ० ' इत्यत्र द्रष्टव्यम् । * बहिष्पवमाने अतिरात्रगते एकविंश-त्रिणव-त्रयस्त्रिंशेषु काम्यस्तोमेषु ऊर्ध्वगानार्थं संख्यापूरणाय के चित् तृचाः आगमयितव्याः । वि. ५।३।४, * बहिष्पवमाने अतिरात्रगते काम्यस्तोमेषु ऊर्ध्वगानमेव । ऊर्ध्वगानं आवृत्तिं विना ऋचां पाठक्रमेण गानम् । ५।३।४, * बहिष्पवमाने अतिरात्रगते, माध्यंदिने विवृद्धस्तोमः एकविंशः । तत्र सामागमेन स्तोमपूरणम्, न ऋगागमेन । आगमितसामनिवेशश्च नान्त्ये त्रिष्टुपछन्दस्के तृचे, किन्तु 'उच्चा ते जातमन्धसः' इति गायत्रे तृचे एव । ५।३।५. * बहिष्पवमाने अपच्छेदे, द्वादशाहादौ अहर्गणे, सर्वोऽहर्गणो नावर्तनीयः, किन्तु तदेवैकं अहरावर्तनीयं प्रायश्चित्तत्वेन, यस्मिन्नपच्छेदः संजातः । ६।५।२१।५६. * बहिष्पवमाने आदौ उद्गात्रपच्छेदः, ततः प्रतिहर्त्रपच्छेदः एवं क्रमेणापच्छेदद्वये उत्तरापच्छेदनिमित्तकं सर्वस्वदानं तस्मिन्नेव प्रयोगे कर्तव्यम्, पुनः प्रयोगस्तु नास्त्येव । अपच्छेदन्यायः । ६।५।१९. * बहिष्पवमाने उद्गात्रपच्छेदनिमित्तकं प्रायश्चित्तम् ' यद्युद्गाताऽपच्छिद्येतादक्षिणो यज्ञः संस्थाप्यः, अथान्य आहृत्यः, तत्र तत् दद्यात् यत् पूर्वस्मिन् दास्यन् स्यात् ' इति । वि. ६।५।१७. * बहिष्पवमाने उद्गातृ-प्रतिहर्त्रोः युगपदपच्छेदेऽपि अस्त्येव प्रायश्चित्तम् । ६।५।१७. * बहिष्पवमाने उद्गातृ-प्रतिहर्त्रोः युगपदपच्छेदे प्रायश्चित्तद्वयं प्राप्तमेव, तथापि विरुद्धत्वात् समुच्चयासंभवात् विकल्पेन किञ्चिदेकमनुष्ठेयम् । वि. ६।५।१८, * बहिष्पवमाने 'एकं हि तत्र साम ' इति सामैकत्वम् । १०।५।७, * बहिष्पवमाने ज्योतिष्टोमीये तृचेषु त्रिषु ऊर्ध्वगानेन त्रिवृत् स्तोमो भवति, नात्र आवृत्तगानम् । ५।३।४, * बहिष्पवमाने ज्योतिष्टोमीये तृचात्मकेषु त्रिषु सूक्तेषु गायत्रं साम गीयते । १।४।३, * बहिष्पवमाने ज्योतिष्टोमीये त्रयस्तृचाः ' उपास्मै गायता० ' ' दविद्युतत्या रुचा० ' 'पवमानस्य ते०' इति स्तोत्रिय-अनुरूप-पर्यासनामकाः क्रमेण । तेषु ऊर्ध्वगानं त्रिवृत्स्तोमे । तासामेव ऋचां नवानां आवृत्तगानं तु पञ्चदशसप्तदशादिस्तोमेषु भवति । १।४।३.

बहिष्पवमाने तु ऋगागमः सामैकत्वात् । १०।५।७।२६॥

त्रिवृद्धस्तोमकेषु एकविंशत्रिणवाद्यतिरात्रेषु बहिष्पवमाने तु न सामागमः, किन्तु ऋगागमः । ' यदुत्तरयोः पवमानयोस्तृचायतृचाय हिं करोति अथ कस्मात्

बहिष्पवमाने सकृदेव हिं करोतीति, एकं हि तत्र सामेति ब्रूयात् स्वारमेव गायत्रं (स्वरसामैव) गायति ' इति वचनात् सामैकत्वात् सामागमो न संभवति । नापि अभ्यासेन संख्यापूरणं ' पराग्बहिष्पवमानेन स्तुवीत ' इत्यनभ्यासवचनेन पराक्शब्देन अभ्यासस्य श्रुत्यैव निषिद्धत्वात् तस्मात् ऋगागमः । **के.**

* भाष्यकारेण विवृद्धस्तोमेषु क्रतुषु **'बहिष्पवमाने तु ऋगागमः सामैकत्वात्'** इति न्यायेन आगम्यमानानां ऋचां क्रमानियमः आशङ्कितः । **तन्त्ररत्न.** ५।१।६।१३. * बहिष्पवमाने द्वादशाहगतषाडहिके द्वितीयेऽहनि विवृद्धस्तोमके पञ्चदशे आगमितवृषण्वत्तृचाः अनुरूपपर्यासयोर्मध्ये निवेशनीयाः ' स्तोत्रियानुरूपौ तृचौ भवतः, वृषण्वन्तस्तृचा भवन्ति, तृच उत्तमः पर्यासः ' इति वचनात् । वि. ५।३।४, * बहिष्पवमाने प्रतिहर्त्रपच्छेदनिमित्तं प्रायश्चित्तं सर्वस्वदक्षिणत्वम् । ' यदि प्रतिहर्ताऽपच्छिद्येत सर्ववेदसं दद्यात् ' । ६।५।१८, * बहिष्पवमाने प्रथमतः प्रतिहर्त्रपच्छेदः पश्चादुद्गात्रपच्छेदः तथा प्रथमप्रयोगः अदक्षिणः समापनीयः । द्वितीयः प्रयोगश्च कर्तव्यः, तत्र च सर्वस्वमेव देयम्, न तु द्वादशशतम् । ६।५।२०. * बहिष्पवमाने प्रातःसवने ऋत्विजः सदसो बहिः प्रसर्पन्ति । (' अत्र सूत्रं उदञ्चः प्रह्वाः बहिष्पवमानाय पञ्चर्त्विजः समन्वारब्धाः सर्पन्ति, अध्वर्युं प्रस्तोताऽन्वारभते, प्रस्तोतारं प्रतिहर्ता, प्रतिहर्तारमुद्गाता, उद्गातारं ब्रह्मा, ब्रह्माणं यजमानः ' इति । तैसं. भा. ३।१।१०) । अध्वर्युः प्रस्तोता उद्गाता प्रतिहर्ता ब्रह्मा यजमानः प्रशास्ता चेति एते क्रमेण पुरोगन्तुः कच्छं पाश्चात्त्यो गृहीत्वा पिपीलिकापङ्क्तिवद्गच्छन्ति । वि. ६।५।१७. " बहिष्पवमानस्तोत्रार्थं हविर्धानात् बहिर्गच्छतां अन्वारम्भः श्रुतः ' अध्वर्युं प्रस्तोता संतनुयात्, प्रस्तोतारमुद्गाता, उद्गातारं प्रतिहर्ता, प्रतिहर्तारं ब्रह्मा, ब्रह्माणं यजमानः, यजमानं प्रशास्ता ' इति " । **सोम.** ६।५।१७. अध्वर्युं प्रस्तोताऽन्वारभते, प्रस्तोतारं प्रतिहर्ता, प्रतिहर्तारमुद्गाता, उद्गातारं ब्रह्मा, ब्रह्माणं यजमानः (उद्गातारं यजमानः), यजमानं ब्रह्मा इत्येकेषाम् । **सत्याश्रौ.** ८।४।४४. * बहिष्पवमाने रथंतरपृष्ठं विश्वजिति सर्वपृष्ठे । **भा.** ७।३।३।८. * बहिष्पवमाने विवृद्धस्तोमकेषु क्रतुषु साम अभ्यसितव्यम् । ऋगागमेन संख्या पूरयितव्या । १०।५।७।२६. ' विवृद्धस्तोमके क्रतौ ' इत्यत्र अधिकरणं द्रष्टव्यम् ।

* माध्यंदिनार्भवपवमानयोः **बहिष्पवमानवत्** ऋगागमनं न भवति, किन्तु सामागमेन स्तोमपूरणं इति दशमे (१०।५।६।१५-२५) वक्ष्यते । वि. ५।३।५.

* बहु । ननु आपेक्षिकमेतत् बहु अधिकं इति । यदेव हि बहु तदेव अन्यापेक्षया अबहु भवति । सत्यमेवम् । यत्तु यदपेक्ष्य बहु न तत् तदेव अपेक्ष्य अबहु । **भा.** ११।१।८।३८. * ' बहुः समुद्रः, बहुरोदनः ' इत्यत्र वैपुल्यं महत्त्वं वा शब्दस्यार्थः । **वा.** ३।४।४।१३ पृ. ९२५.

बहुभ्यः श्रोतव्यं बहुधेति न्यायः । अयं न्यायः सत्सु बहुषु गुरुष्वत्र कश्चिदेको ब्रह्मवित्तमो लभ्यते, ततः संसारभ्रमापनोदकं सम्यग्ज्ञानं सलक्षणं सिध्यतीत्यभिप्रायकोऽस्ति । न तु बहुभ्यो ज्ञानं संपादनीयमिति, ' श्रोत्रियं ब्रह्मनिष्ठम् ' इत्येकवचनश्रवणात्, ' उपासीदेकमेव सद्गुरुं ब्रह्मवित्तमम् ' इत्येकवचनात् चेति । **साहस्री.** ५३१.

बहूनामनुग्रहो न्याय्य इति न्यायः । यथाहुः- ' बहूनामप्यसाराणां मेलनं कार्यसाधकम् । तृणैः संपाद्यते रज्जुस्तया नागोऽपि बध्यते ॥ ' इति । **साहस्री.** ३६५.

बहूनामनुरोधो न्याय्य इति न्यायः । साहस्री. ५६७.

बहूनामनुसरणं न्याय्यमिति न्यायः । साहस्री. ३६६.

बहूनां तु प्रवृत्तेऽन्यमागमयेदवैगुण्यात् । ६।३।८।२२॥

बहूनां स्वामिनां सत्ररूपे कर्मणि प्रवृत्ते, अन्यतमे स्वामिनि अपचरति सति अन्यमागमयेत् अपचरतः स्वामिनः प्रतिनिधिम् । अवैगुण्यात्, ल्यब्लोपे पञ्चमी,

अवैगुण्यं संपादयितुम् । प्रतिनिष्यभावे वैगुण्यं स्यात् । ' तथा स्वामिनः ' इत्यस्य अपवादाधिकरणमिदम् । अपवादसूचनार्थमेव तुशब्दः । **के.**

* बहूनां पुरतो नृत्यन्नर्तकः सर्वेषां सुखं युगपन्निर्वर्तयति । **वि.** ११।१।१० . * '**बहूनां स्यात् सधर्मत्वम्** ' **इति न्यायः** (' भूयसां स्यात् सधर्मत्वम् ' १२।२।७।२२ इति न्यायः इत्यर्थः) । न च ' बहूनां स्यात् सधर्मत्वम् ' इति न्यायेन अनेकेषु देशाद्यबाध एव अष्टानां तन्त्रित्वतात्पर्यग्राहकः इति वाच्यम् । **भाट्ट.**११।२।८. * **बहुषु** च सामान्यं विशेषाश्च भवन्ति । **भा.**९।१।६।२५ .

* **बह्वनुग्रहन्यायः** (भूयोऽनुग्रहन्यायः । १२।२।७।२२) । तस्मात् दहराकाशो ब्रह्म इति बह्वनुग्रहन्यायेन निर्णयः, नोपसंहारप्राबल्येन । **पराक्रमः** . ५७।१, * तस्मात् सिद्धमेतत् दहराधिकरणे नोपसंहारप्राबल्योपजीवनमस्ति न वा सूत्रकारमतिप्राप्तम् , उत्तरेभ्यः इति बहुवचनेन **बह्वनुग्रहन्यायस्यैव सूचनात्** । ६२।१.

* **बह्वश्वप्रतिग्रहस्थले** चतुष्कपालेषु काण्डानुसमयेनानुष्ठानम् ' काण्डानुसमयन्यायः ' । ५।२।२.

* **बहुकर्तृकत्वं** सत्रस्य । १०।६।१४।४५–५०.

* **बहुकृत्वोऽपि** चोच्चार्यमाणो नान्यार्थो भवति । यत्प्रथमे उच्चारणे गम्यते शततमेऽपि तदेव गम्यते । **भा.** २।२।२।२. * प्राक्सिद्धचोदनाप्रामाण्यमेव ' **बहुकृत्वोऽपि** पथ्यं वेदितव्यम् ' इत्येवं पुनः कथितमनेन सूत्रेण । **शा.** ५।१।१.

* **बहुक्षीरादिवाक्येषु** (' इयं गौः क्रेतव्या, बहुक्षीरा ' इत्यादिषु) रूपभङ्गेनापि पुरुषार्थपर्यवसायित्वं दृश्यते । **सु.** पृ. २१.

बहुच्छिद्रघटप्रदीपन्यायः । अयं श्रीशंकराचार्यैः संक्षेपेण भाष्यतात्पर्यप्रकाशके श्रीमद्दक्षिणामूर्तिस्तोत्रेऽभिहितः । तथाहि ' नानाच्छिद्रघटोदरस्थितमहादीपप्रभाभास्वरं, ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिः स्पन्दते । जानामीति तमेव भान्तमनुभात्येतत्समस्तं जगत् , तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ' इति । **साहस्री.** ३६३.

* **बहुत्वं** किमित्युच्यते । बहुत्वं वृद्धिः उपचयः आधिक्यम् । कथं कृत्वा ? बृंहतिरयं वृद्ध्यर्थः । तस्यौणादिक उकारः प्रत्ययः ' बृंहेर्नलोपश्च ' इति । तस्य रूपं बहु इति । बहु–वृद्धं–अधिकं इत्यर्थः । **भा.** ११।१।८।३८, * बहुत्वं चापेक्षिकम् , किञ्चिदपेक्ष्य ततोऽधिकं बहु इत्युच्यते । असत्यामपेक्षायां अपरिपूर्णमेतत् । ६।७।११।२४. * बहुत्वं श्रूयमाणं यागभेदं कुर्यात् , यथा ' प्राजापत्यान् ' इति ' वारुणान् ' इति च । **टुप्.** ५।२।२।३.

* **बहुत्ववत्** । ' सत्रादुदवसाय पृष्ठशमनीयेन यजेरन् ' इत्यत्र बहुत्वं यथा अविवक्षितं तथा 'यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणान् ' इत्यत्र बहुत्वमविवक्षितम्, निमित्तेयत्ताप्रतिपादनेन नैमित्तिकेयत्ताया अवगतत्वात् । **सोम.** ५।१।१.

* **बहुदेवत्ये पशौ** एकवचनान्तमेधपतिशब्दस्य द्विवचनान्तेन विकल्पः । **भा.** ९।३।१३।४२–४३.

* **बहु–द्वि–एकशब्दाः** संख्यावचनाः , तामनभिधाय संख्येये वृत्त्यसंभवात् इत्याकृत्यधिकरणे स्थापितम् । **वा.** ३।४।४।१३ पृ. ९२४.

* **बहुद्विपत्नीके** दर्शपूर्णमासप्रयोगे प्रैषमन्त्रे पत्नीशब्दे ऊहो न । ९।३।६।२१.

* **बहुपत्नीकः** द्विपत्नीकश्चास्ति यजमानः । **भा.** ९।३।६।२०.

* **बहुबाधः** अल्पबाधेन बाध्यते, (अप्राप्तबाधः) यथा अश्वप्रतिग्रहेष्टौ । प्रतिग्रहीतृविषयत्वे ' वरुणाय ' इति चतुर्थ्याः पञ्चम्यर्थत्वम् , ' अनयत् ' इत्यस्य प्रतिग्रहार्थत्वम् , ' स त्वां देवताम् ' इत्यत्र तच्छब्दस्य अप्राधान्यनिर्दिष्टवरुणपरामर्शित्वम् , वरुणस्य दातृत्वे च अदेवतात्वात् देवताशब्दायोगः इति बहुबाधः । दातुरिष्टिपक्षे तु प्रतिगृह्णातिमात्रस्य स्वार्थत्वत्यागः । **बाल.** पृ. १४० . * ' **बहुबाधादल्पबाधो वरम्** ' **इति न्यायः** । यत्तु ' सृष्टीरुपदधाति ' इत्यत्र उपसंहारानुसारेण समुदायलक्षणाश्रयणं तत् ' बहुबाधादल्पबाधो वरम् ' इति न्यायात् । तल्लक्षणानाश्रयणे हि प्रत्येकं

असृष्टिलिङ्गकमन्त्रोपधेयेष्टकास्तुतीनां इष्टकासाद्दश्यकीर्तनस्य सर्वथा बाधः स्यात् । **पराक्रमः**. ४१।१–२, * **बहुबाधस्य** अन्याय्यत्वम् । ५५।२.

* **बहुभवनकामस्य** पञ्चशारदीयः अहीनः । **भा.** ११।२।१३।५४.

बहुयाजी नाम सोमयाजी एव ॥

बहुयाजिपदेन यागबाहुल्यप्रतीतेः बहुयष्टैव ग्राह्यः । सहस्रदक्षिणयागकर्तर्यपि सहस्रद इति प्रयोगदर्शनाद्बहुदक्षिणपौण्डरीकादियाजी वा ग्राह्यः । **इति प्राप्ते**, ऐष्टिकपाशुककर्माण्यपेक्ष्य सोमस्येतिकर्तव्यताबाहुल्याद्विश्वसृजामयनान्ताखिलविकृत्यनुगतत्वाच्च सोमयाज्येव बहुयाजी । अत एव ' यो ब्राह्मणो बहुयाजी स्यात् तस्य कुम्भ्यां गृह्णीयात् ' इति विधाय ' स हि गृहीतवसतीवरीकः ' इति विवरणमुपपद्यते । **संकर्ष.** ४।२।३.

बहुराजकपुरन्यायः । यथा एकस्मिन्पुरे यदा बहवो राजानस्तदा तेषामैकमत्याभावेन प्रजानां क्लेशस्तथा एकस्मिन् देहे नानेन्द्रियाणां कर्तृत्वे स्वीकृते मिथो विरोधान्नैकमपि सिध्येत् । तथाहि, यदा चक्षुर्दर्शनाय प्रवर्तमानं भवति तदाऽन्यानि इन्द्रियाणि स्वस्वक्रियया निर्वाहोद्यतानि भवन्ति चेत् तदा दर्शनादि नैकमपि जायते, एवं विवक्षायामस्य प्रवृत्तिरिति । **साहस्री.** १९.

* **बहुलक्षणा** अल्पलक्षणया बाध्यते । **बाल.** पृ. १४३.

बहुवृकाकृष्टमृगन्यायः । यथा बहूनां वृकाणां प्रत्येकं भोक्तृत्वे बहूनामैकमत्यासंभवेन विरुद्धादिक्रियया मृगदेहस्योन्मथनप्रसङ्गस्तथा प्रकृतेऽपि । **साहस्री.** १८.

* **बहुवैयर्थ्यं** दोषः । **वि.** ३।१।५.

* **बहुवचनं** एकस्यैव पूजार्थे । **भा.** १०।४।२५।५३ . * बहुवचनं साधारण्येन वर्तते त्रित्वादिषु, यथा अक्षशब्दः साधारणवचनो विदेवनादिषु । अथवा यत्र एकत्वद्वित्वे न स्तः तत्रायं वर्तते । एतस्मिन् पक्षे सामान्यवचनोऽयम् । (पूर्वस्मिंस्तु पक्षे बहुवचनस्य नानार्थत्वापत्तिः , अत्र तु द्वित्वाधिक्यं सामान्यं तदर्थः इति न नानार्थत्वम्) । सिद्धान्तेऽपि अयमेव शब्दार्थो न व्यावर्तते । **टुप्** . ११।१।८।३८ . * यद् बहुषु प्रातिपदिकं वर्तते ततो **बहुवचनं** भवति । **भा.** ३।५।८।२३ , * यथा लोके पृथक्त्वेनापि कुर्वाणानां बहुवचनं दृश्यते । ' देवश्चेद् वर्षेत् बहवः कृषिं कुर्युः , सस्यं चेत् संपद्येत बहवो ब्राह्मणा यजेरन् ' इति । तथा वेदेऽपि प्रयोगदर्शनम् ' सत्रादुदवसाय पृष्ठशमनीयेन यजेरन् ' इति । १०।६।१४।४५ । लोके अन्यतः प्रवृत्तस्य अर्थस्य अनुवादभूतः शब्द उच्चार्यमाणः सामान्यक्रियासंबन्धाभिसमीक्षया उच्चरितः इति गम्यते । तथा भिन्नानि उदवसानानि उपलक्ष्य क्रियामात्रं विधीयते तद्बहुत्वं च समानकर्तृत्वादेव प्राप्तमनूद्यते इत्युक्तमेव । १०।६।१४।४८ . * **बहुवचनेन** त्रय एव कपिञ्जला ग्राह्या नाधिकाः । ११।१।८।३८–४६ . * बहुवचनेन त्रयश्चत्वारः पञ्च वा सर्वे एते संख्याविशेषाः प्राप्यन्ते । सर्वे तस्य वाच्याः सर्वत्र प्रयोगात् । (प्राथम्यात्तु त्रित्वं नियम्येत, कारणादतिक्रमः स्यात् ।) । **भा.** ११।१।८।३८.

बहुवचनेन सर्वप्राप्तेर्विकल्पः स्यात् । ११।१।८।३८॥

' वसन्ताय कपिञ्जलानालभते ' इति श्रूयते । तत्र कपिञ्जलान् इति बहुवचनेन त्रित्वचतुष्ट्वादीनां सर्वासां संख्यानां प्राप्तेः बहुत्वे सर्वासामन्तर्भावात् कपिञ्जलसंख्यासु विकल्पः स्यात् त्रयो वा चत्वारो वा पञ्च वा आलब्धव्याः इति पूर्वः पक्षः ।

दृष्टः प्रयोग इति चेत् । ३९ ॥

बहुवचनस्य न त्रित्वमेव वाच्यम् , यतः ' चत्वारो ब्राह्मणाः ' ' पञ्च भूतानि ' इति चतुरादिषु बहुवचनस्य प्रयोगो दृष्टः । तस्मात् बहुवचनेन का संख्या विवक्षिता इति विचारः कर्तव्यः इति चेत् ।

तथेह । ४० ॥

तथा बहुवचनस्य चतुरादिषु प्रयोगवत् कपिञ्जलशब्दस्य कपोते मयूरे च प्रयोगो दृष्टः । तस्मात् ' वसन्ताय कपिञ्जलानालभेत ' इति वाक्यस्थकपिञ्जलपदार्थस्य विचारः कर्तव्यः स्यात् । न तु स कृतः । ततः संख्याविचारोऽपि मा भूत् ।

भक्त्येति चेत् । ४१ ॥

मैवम् । महति कपोते अल्पे मयूरे च कपिञ्जलशब्दः भक्त्या गुणवृत्त्या प्रयुज्यते । तस्मात् कपिञ्जलप्रातिपदिकार्थो न विचार्यः । इति चेत् ।

तथेतरस्मिन् । ४२ ॥

यथा महाकपोतादौ कपिञ्जलशब्दो गौण्या प्रयुज्यते तथा बहुवचनमपि चतुरादिषु लक्षणया प्रयुज्येत । बहुत्वसामान्यं तु बहुवचनार्थः । तस्मात् कपिञ्जलेषु संख्याया विकल्पः इति पूर्वः पक्षः ।

प्रथमं वा नियम्येत कारणादतिक्रमः स्यात् । ४३ ॥

वाशब्देन पूर्वपक्षनिरासः । बहुत्वान्तर्गतासु संख्यासु प्रथमं त्रित्वं नियम्येत । त्रय एव कपिञ्जला आलब्धव्या नाधिका इति । विशेषात् कारणात्तु त्रित्वस्य अतिक्रमः स्यात् । यथा 'षड् देया द्वादश देयाश्चतुर्विंशतिर्देयाः' इत्यादौ । तस्मात् अत्र बहुवचनस्य त्रित्वे पर्यवसानम् ।

श्रुत्यर्थाविशेषात् । ४४ ॥

कपिञ्जलानां त्रित्वे स्वीकृते श्रुत्यर्थस्य न कश्चित् विशेषः । त्रित्वस्यापि बहुवचनश्रुत्यर्थत्वात् । तस्मात् त्रय एव आलब्धव्याः । नेदं सूत्रं किन्तु भाष्यं इति बहवः ।

तथा चान्यार्थदर्शनम् । ४५ ॥

'कृष्णा याम्याः, अवलिप्ता रौद्राः, नभोरूपाः पार्जन्याः, तेषामैन्द्राग्नो दशमः' इति अन्यार्थे अश्वमेधे पशुविशेषविधानार्थं दर्शनं बहुवचनस्य उत्सर्गतः त्रित्वमर्थः इति दर्शयति । यदि याम्या यमदेवताकास्त्रयः रुद्रदेवताकास्त्रयः पर्जन्यदेवताकाश्च त्रयः स्युः तदैव नियोगेन ऐन्द्राग्नो दशमः स्यान्नान्यथा । तस्मात् त्रित्वनियमः ।

प्रकृत्या च पूर्ववत् तदासत्तेः । ४६ ॥

प्रकृत्या अग्नीषोमीयेण । प्रकृतिगतेन एकत्वेन तदासत्तेः तस्य त्रित्वस्य आसत्तेः संनिधानात् कपिञ्जलान् इति बहुवचनेन त्रित्वमेव निश्चीयते । पूर्ववत् इत्यनेन लिङ्गान्तरमुक्तम् । गृहमेधीये श्रूयते 'ओदनानुद्धरति' इति । तत्र मध्यमस्येति निरुपपदं त्रयाणां मध्यमस्य इति ज्ञायते । तस्मात् त्रीनेव कपिञ्जलानालमेत नाधिकान् इति सिद्धान्तः । के.

* **बहुवचनस्य** असति बाधके त्रित्वे पर्यवसानम् । ११।१।८।३८-४६. **मीको.** पृ. १३५८ 'कपिञ्जलाधिकरणम्' इत्यत्र द्रष्टव्यम् । * बहुवचनस्य पश्चात् श्रुतत्वेन प्रातिपदिकं प्रति गुणत्वम् । **सु.** पृ. १०४९.

* **बहुवचनान्तस्य** पाशमन्त्रस्य विकल्पेन प्रकरणे एव निवेशः । ९।३।५।१५-२०.

* **बहुवचनान्तैकवचनान्तपाशमन्त्रयोर्द्विवचनान्तेनोहः** द्विपशुकायां विकृतौ । ९।३।४।१०-१४.

* **बहुवचनस्थले,** अवश्यम्भावित्वे प्रथमभावित्वे लाघवे च संभवति अधिकग्रहणे दोषवत्त्वे च सति त्रित्वमेव ग्राह्यं न चतुष्ट्वादि । **वि.** ११।१।८.

卐 **बहुसपत्नीकन्यायः** । यथा बहुसपत्नीकः पुरुषः सर्वासां पत्नीनां युगपत् कामनाकरणेऽशक्तो दुःखमनुभवति, तथा नानेन्द्रियविषयभोगेन तत्तदिन्द्रियपरोऽपि युगपत्कार्यप्राप्तौ दुःखमनुभवतीति । यथा चोक्तम्- 'जिह्वैकतोऽमुमपकर्षति कर्हि तर्षा, शिश्नोऽन्यतस्त्वगुदरं श्रवणं कुतश्चित् । घ्राणोऽन्यतश्चपलदृक् क्व च कर्मशक्तिर्बह्व्यः सपत्न्य इव गेहपतिं लुनन्ति ॥' इति । **साहस्री.** ४६९.

* **बहुव्रीहिः** मत्वर्थकः इति के चित्, नेत्यन्ये । **मणि.** पृ. १५०. * बहुव्रीहिः समानाधिकरणानां इति स्मृतिः । **रत्नाकरः.** पृ. ४४६. * चित्राणां गवामयं इतीदृशेऽर्थे **बहुव्रीहिः** वर्तते । संबन्धविशिष्टाभिर्गोभिः देवदत्तादिर्विशिष्टः इति समासार्थो विशयते । बहुव्रीहौ अपि न संबन्धप्राधान्यम् । स च अन्यपदार्थः संबन्धी योग्यतावशेन जातिद्रव्यगुणक्रियाणामन्यतमः परिगृह्यते । **वा.** ३।१।६।१२ पृ. ६७७. * **बहुव्रीहेः** अन्यपदार्थे शक्तिः इति निरूपणम् । अरुणाधिकरणे (३।१।६।१२) बहुव्रीहेः अन्यपदार्थे शक्तिः इत्युक्तं 'अतश्च दण्डिशब्देन संबन्ध्येवोच्यते यथा । तथैव यौगिकैः शब्दैः पिङ्गाक्ष्यादिपदैरपि ॥' इत्युपक्रमात् (वा. पृ. ६७७), 'तस्मादुपपन्नं पिङ्गाक्ष्यादीनां द्रव्यवचनत्वम्' इति चोपसंहारात् (वा. पृ. ६७९) । इन्द्रपीत-निषादस्थपत्यधि-

करणद्वयपर्यालोचनात्तु (३।२।११, ६।१।१३) लाक्षणिकः अन्यपदार्थः इति भाति । तथाहि, आद्ये इन्द्रपीतशब्दः सोमविशेषणं तत्पुरुषः, तत्र पूर्वपदार्थमात्रलक्षणापत्तेः, न बहुव्रीहिः सवनविशेषणम्, तत्र पदद्वयेऽपि अन्यपदार्थलक्षणाऽऽपत्तेः इति पूर्वपक्षिते बहुव्रीहौ अन्यपदार्थः शक्यः इत्येवोत्तरं वाच्यम् । तत्तु अनुक्त्वा हताहुतसमुदायवाचिनः इन्द्रपीतशब्दस्य तदवयवे लक्षणापत्तिं तत्पुरुषे वदतः सिद्धान्तिनः पूर्वपक्ष्युक्ता बहुव्रीहौ अन्यपदार्थलक्षणा अभिमतेति गम्यते । निषादस्थपत्यधिकरणे च तत्पुरुषात् कर्मधारयबलीयस्त्वेन सिद्धान्तितम् । तत्र बहुव्रीहौ अन्यपदार्थस्य शक्यत्वे विद्याप्रयुक्तिलाघवात् कर्मधारयं हित्वा निषादः स्थपतिर्यस्य इत्येवं बहुव्रीह्यापत्त्या पूर्वपक्षः परावर्तेतेति । तत्र लक्षणापक्षे बहुव्रीह्यादेः अरुणशब्दस्य च द्रव्यलक्षकत्वाविशेषे किं विनिगमकम्, यत् बहुव्रीह्यादेरेव द्रव्याभिधायिता, नारुणपदस्येति । प्रत्युत बहुव्रीहौ लक्षणायाः समस्यमानानेकपदालोचनापेक्षत्वेन विलम्बितत्वात् न तेन द्रव्यविधिः स्यात्, किन्तु गुणशब्देनैव इति क्रयसाधनद्रव्यनिवेशस्य पूर्वोत्तरपक्षयोः साम्यात् तदाक्षेपपूर्वपक्षस्य वाक्यीयतत्सिद्धिसिद्धान्तस्य च अयोगात् अरुणाऽधिकरणमनुपपन्नं स्यात् इति वाच्यत्वपक्ष एव संमतः । न च लक्षणा न्याय्या । तत्र हि किं आकृतिन्यायः 'नागृहीतविशेषणा' इत्ययं बीजम्, 'अनन्यलभ्यः शब्दार्थः' इति कर्त्रधिकरणन्यायो वा ? नाद्यः, आकृतिन्यायो हि तत्र प्रवर्तते, यः शब्दः कदाचिदपि विशेषणमात्रे दृष्टप्रयोगः । तेन पाचक-नप्तृ-स्नुषा-कुलालादिशब्दाः न तत्रोदाहरणं इत्युक्तम् । अतो बहुव्रीहेरपि विशेषणमात्रे कदा चिदपि अप्रयोगात् न आकृतिन्यायः इति विशिष्टवाचितैव । न द्वितीयः, तत्रापि हि आक्षेपतः अन्यलभ्यत्वं वा स्यात् लक्षणया वा ? नाद्यः, पिङ्गाक्ष्यादौ क्वचिद्व्यभिचारेण आक्षेपसंभवेऽपि चित्रग्वादौ व्यभिचारेण आक्षेपायोगात् । न द्वितीयः, नियमतः शक्तिग्रहापेक्षे शब्दे 'अनन्यलभ्यो हि शब्दार्थः' इति न्यायस्याप्रवृत्तेः । अन्यथा पङ्कजादिपदे पद्मस्य लक्षणया प्रतीतिसंभवात् अनन्यलभ्यन्यायादवाच्यता स्यात् । अस्ति च चित्रग्वादिबहुव्रीहेः अन्यपदार्थयोगे शक्तिग्रहापेक्षेति । तत्पुरुषे तु न राजसंबन्धिनि राजशब्दस्य शक्तिग्रहापेक्षा । यत्तु इन्द्रपीत-निषादस्थपत्यधिकरणपर्यालोचनात् बहुव्रीहेः षष्ठीतत्पुरुषात् कर्मधारयाच्च इष्टं दौर्बल्यं न सिध्येदितुक्तम्, तन्न । कर्मधारये तावत् यावन्तः श्रुतपदार्थाः तावतां वाक्यार्थे अन्वयः । बहुव्रीहौ तु एकस्यैव इति दौर्बल्यम् । षष्ठीतत्पुरुषादौ तु एकस्यैव उत्तरपदार्थस्य वाक्यार्थे अन्वयः, बहुव्रीहावपि एकस्यैव इति साम्यं यद्यपि, तथापि तत्पुरुषे एकस्यैव त्यागः, बहुव्रीहौ तु अनेकत्यागः इति दौर्बल्यम् । अतः 'सर्वत्र यौगिकैः शब्दैर्द्रव्यमेवाभिधीयते ।' इति वार्तिकं (पृ. ६७५) बहुव्रीहिविषयमपि न कृत्तद्धितमात्रविषयं इति सर्वमनवद्यम् । 'गौतमीयैर्निरस्तान्यपदार्थस्येह वाच्यता । बहुव्रीहौ जैमिनीये मते त्विष्टोपपादिता ॥' इति बहुव्रीहौ अन्यपदार्थवाच्यतानिरूपणम् । **बाल.** पृ. ९३-९४. * बहुव्रीहेः अन्यपदार्थे शक्तिरेव, न तु लक्षणा इति अरुणाधिकरणवार्तिके (३।१।६।१२) व्यवस्थापितम् । **सोम.** ३।२।२०. * बहुव्रीहेः मत्वर्थो वा अभिधेयः द्रव्यं वा इति संशये 'बहुव्रीहिसमासोऽयं मतुबर्थं विधीयते' इति पूर्वः पक्षः । 'बहुव्रीहिरतो द्रव्यमभिधेयं न तद्गुणः' इति सिद्धान्तः । **वा.** ३।१।६।१२ पृ. ६७३-६७९, * बहुव्रीहेर्मत्वर्थविषयत्वात् एकहायन्यादिशब्दैः संबन्धोऽभिधीयते । इति पूर्वः पक्षः । पृ. ६७४. * बहुव्रीहेः सर्वनामार्थवृत्तित्वम् । **सु.** पृ. ७८०.

* **बहुव्रीहौ** अवयवार्थविशिष्टान्यपदार्थरूपे द्रव्ये एव शक्तिः इति प्राञ्चः । अन्यपदार्थे पदद्वयस्य लक्षणा इति तु बहवः । **भाट्ट.** ३।१।६ पृ. १९०. * बहुव्रीहौ पूर्वपदप्रकृतिस्वरः । **वि.** ३।२।११.

* **बहुव्रीह्यभिधेयलाक्षणिकत्वविचारः । मीको.** पृ. ६०८ 'अरुणान्यायः' इति भाष्यीयाधिकरणे द्रष्टव्यः ।

* **बहुव्रीहिविचारः** 'समासवादः' इति बिन्दौ मणिग्रन्थे द्रष्टव्यः ।

* बहुव्रीहिसमासार्थः किमभिधेयः लाक्षणिको वेति चिन्तायां लाक्षणिक इति के चित्, अभिधेय इति सिद्धान्तः। **वा. पृ. ६७८–७९.**

* **बहुव्रीहिसमासार्थविचारः। मीको. पृ. ६०८** 'अरुणान्यायः' इति भाष्यीयाधिकरणे द्रष्टव्यः।

* **बह्वृचाः** अध्यापकाः महाव्रतप्रतिपादकं आश्वलायननिर्मितं कल्पसूत्रं अरण्येऽधीयानाः 'पञ्चममारण्यकं' इति वेदत्वेन व्यवहरन्ति। तच्च कर्तृविस्मरणमूलकम्। **वि.** ९।२।१ वर्णकं २. * **बह्वृचैरेव** वासिष्ठं धर्मसूत्रं परिगृहीतम्। **वा.** १।३।७।१५.

* **बह्वृचब्राह्मणे** (अध्वर्युब्राह्मणे इति वार्तिकं) 'यावज्जीवमग्निहोत्रं जुहोति' इति जीवनं निमित्तीकृत्य नित्योऽग्निहोत्रप्रयोगो विधीयते, न तु काम्ये कालरूपधर्मः। २।४।१।१–७.

☒ **बाणोष्ट्रीन्यायः।** यथा कश्चिदुष्ट्रपतिरजगरेण वेष्टितमुष्ट्रं रक्षन् बाणैरजगरं जघानेति लौकिकी गाथा, तथा निषेधवाक्यानि बाधावधित्वेनाऽऽत्मानं रक्षयन्ति अनात्मानं बाधन्ते इति। **साहस्री. १०४.**

* **बाणवन्तः** परिधयः यत्र तत्र बाणवन्त एव उत्पादयितव्याः सिद्धान्ते। पालाशास्तु पूर्वपक्षे। **भा.** २।१।४।१२.

* **बादरिः** आचार्यः सर्वाधिकारं (चातुर्वर्ण्याधिकारं) शास्त्रं मन्यते स्म। **भा.** ६।१।७।२७.

☒ **बादर्यधिकरणम्॥**

द्रव्यगुणसंस्कारेषु बादरिः। ३।१।३।३॥

भाष्यम्— बादरिराचार्योऽत्र द्रव्यगुणसंस्कारेष्वेव शेषशब्द इति मेने, न यागफलपुरुषेषु। द्रव्यं क्रियार्थम्। यदि प्रयोजनवती क्रिया व्यक्तं सा द्रव्येण निर्वर्तयितव्या। तस्या निर्वृत्तिर्द्रव्यादृते न भवतीति तन्निर्वृत्तये द्रव्यमेषितव्यं भवति। तस्मात् क्रियार्थं द्रव्यम्। गुणः शक्नोति विशिष्टं द्रव्यं चोदितं लक्षयितुम्। लक्षितेन च तेन प्रयोजनम्। विशिष्टस्य क्रियासाधनत्वात्। तस्मात् सोऽपि द्रव्यद्वारेण क्रियाया उपकरोतीति क्रियार्थ एव। संस्कारो नाम स भवति, यस्मिन् जाते पदार्थो भवति योग्यः कस्यचिदर्थस्य। तेनापि क्रियायां कर्तव्यायां प्रयोजनमिति सोऽपि परार्थः। तस्माद्द्रव्यगुणसंस्काराः परार्थत्वाच्छेषभूता न तु यागफलपुरुषाः। यागस्तावत्कर्तव्यः पुरुषस्य। न हि तस्मिन्निर्वर्तिते किञ्चिदपरमस्ति कर्तव्यम्। स हि पुरुषार्थः। यदन्यद् द्रव्यादि तत्, तदर्थं तस्य शेषभूतम्। स तु न किञ्चिदभिनिर्वर्तयितुं क्रियते। फलमपि न तेन क्रियते। तस्मिंस्तु कृते स्वयमेव तद्भवति। तस्मिन्कृते फलमस्य भवतीत्येतावद्गम्यते। नास्ति शब्दो यागेन क्रियते फलमिति। तस्माद्यागो न शेषभूतः कस्य चिदर्थस्य। फलमपि न पुरुषं प्रत्युपदिश्यते। यः स्वर्गं कामयते स यागं कुर्यादित्येतावच्छब्देनोपदिश्यते, नाऽऽत्मनः परस्य वेति। स्वर्गं प्रतीच्छामात्रेण स्वर्गकाम इति भवति। तस्मात् पुरुषं प्रति गुणभावेन न श्रूयते स्वर्गः। तस्मात्सोऽपि न शेषभूतः। न चेत् फलयागौ गुणभावेन चोद्येते, कस्य पुरुषः प्रधानभूतो भवति। प्रत्यक्षश्चास्य द्रव्यत्वात् कर्म प्रति गुणभावः। तस्माद्द्रव्यगुणसंस्कारेष्वेव शेषभावं बादरिर्मेने इति।

वा— इदानीं शेषत्वस्य विषयं कथयति। तत्र बादरिमतेन तावत्त्रय एव शेषाः। द्रव्यं हि 'द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसंबन्धः' इति स्वभावत एव शेषभूतं नियमान्निष्प्रयोजनत्वेन केवलं व्यावर्त्यते। गुणोऽप्यरुणादिः क्रियायाः स्वसाधनभूतद्रव्यपरिच्छेदसामर्थ्यात् उत्पत्त्यैव शेषः। तथा संस्कारोऽप्यवहन्त्यादिः यागसाधनपुरोडाशादिनिर्वृत्तये चोदितानां व्रीह्यादीनां स्वरूपेणायोग्यत्वादवहतानां योग्यत्वादवहतानां योग्यत्वमापादयन् उत्पत्त्यैवाङ्गं भवतीति। न तु यागादावौत्पत्तिकं शेषत्वं दृश्यते। न च शब्देन चोद्यते। यागस्तावत् सर्वकारकैरनुष्ठीयते। न चान्यत्र व्याप्रियमाणो दृश्यते। फले इति चेत्, न। चिरनिर्वृत्ते यागे फलोत्पत्तिप्रतीतेः। ननु च भावार्थाधिकरणे करणत्वं यागस्योक्तम्। सत्यमुक्तं न तु साधितम्। स्वर्गकामाधिकरणाधीनसिद्धिना तेन नामपदकरणत्वमात्रनिराकरणात्। अत इदानीमसिद्धावस्थैनैव करणत्वेन व्यवहरति। फलमपि यागं प्रति साध्यमानत्वात् प्रधानम्, पुरुषं प्रति त्वस्य शेषभावो नैवोपात्तः, काम्यमानत्वेन सुतरां प्रधानत्वात्।

पुरुष एव तु कामं द्रव्यत्वाद्यागे गुणत्वेन स्यात्। तस्माद् द्रव्यगुणसंस्कारेष्वेव शेषभाव इति।

कर्माण्यपि जैमिनिः फलार्थत्वात्। ४॥

भाष्यम्— जैमिनिस्तु खल्वाचार्यः कर्माण्यपि शेषभूतानि मन्यते स्म, न बादरिरिवावधारणामनुमेने। स हि ददर्श, न यागः कर्तव्यतया चोद्यते। फलकामस्य तु तत्साधनोपायत्वेनेति। एवं श्रुतोऽर्थः परिगृहीतो भविष्यति, अर्थवांश्चोपदेशः। एनमेवार्थं षष्ठेऽध्याये सूत्रैरेव साधयिष्यति। इह तु तत्सिद्धेनैव फलार्थत्वेन शेषभावं यागस्याऽऽपादयति स्म। तस्मादनवधारणा, द्रव्यगुणसंस्काराः शेषभूताः, यागोऽपि शेषभूतः फलं प्रतीति।

वा— गतार्थमेतत्।

फलं च पुरुषार्थत्वात्। ५॥

भाष्यम्— फलमपि पुरुषं प्रत्युपदिश्यते। यः स्वर्गो मे भवेदित्येवं कामयते तस्य यागः। न यः स्वर्गः स आत्मानं लभेतेति। कुतः? आत्मनेपदप्रयोगात्। कर्त्रभिप्राये एतद्भवति। क्रियाफलमनुभवेत् कथं पुरुष इति यागः प्रयुज्यते। तस्मात् फलं पुरुषार्थं यागात् श्रूयते, नाऽऽत्मनिर्वृत्त्यर्थम्। तस्माच्छेषभूतमिति।

वा— कामपदोपादानादेव फलस्य पुरुषार्थत्वं गम्यते। न हि कश्चिद्बुद्धिपूर्वकार्येवं कामयते स्वर्ग आत्मानं लभतामिति। किं तर्हि? ममोपभोग्यः स्यादिति। पुनश्चाऽऽत्मनेपदनिर्देशात् कर्तुरेवोपभोग्यो नान्यस्य इति गम्यते। तेनोपभोक्तारं प्रति फलमपि शेषभूतम्।

पुरुषश्च कर्मार्थत्वात्। ६॥

भाष्यम्— पुरुषोऽप्यौदुम्बरीसंमानादिषु गुणभूतः श्रूयते। तस्मादनवधारणैषा द्रव्यगुणसंस्कारेषु शेषत्वं बादरिर्मेने इति। अथेदानीमत्र भगवान् वृत्तिकारः परिनिश्चिकाय। द्रव्यगुणसंस्कारेष्वेव नियतो यजिं प्रति शेषभावः, आपेक्षिक इतरेषाम्। यागस्य द्रव्यं प्रति प्रधानभावः, फलं प्रति गुणभावः। फलस्य यागं प्रति प्राधान्यम्, पुरुषं प्रति गुणता। पुरुषस्य फलं प्रति प्रधानता, औदुम्बरीसंमानादि प्रति गुणत्वम्। तस्मात् संमताऽवधारणा, द्रव्यगुणसंस्कारा यागं प्रति नियोगतो गुणभूता एवेति।

वा— पुरुषोऽपि यजेतेत्याख्यातेन गुणभूत आक्षिप्तः। औदुम्बरीसंमानादौ विहित इति शेषः। एवं चतुःसूत्रेणाधिकरणेन समस्तः शेषत्वविषयः प्रतिपादितः। अत्र चोद्यते। यत्तावत् 'द्रव्यगुणसंस्कारेषु' इत्यत्र 'न तु यागफलपुरुषेषु शेषत्वम्' इत्यभिधायान्ते पुरुषस्य शेषित्वनिराकरणं तदसंबद्धम्। यत्तु 'प्रत्यक्षश्चास्य द्रव्यत्वात्कर्म प्रति गुणभावः' इति, तदपि व्याहतं पुनरुक्तं च, पूर्वमेवाभिहितत्वात्। न च यागफलाभ्यां शेषत्वनिराकरणवद्भयां सहास्यातुल्यप्रवृत्तित्वादुच्चारणं युक्तम्। तस्मादसदेतत्। यदप्यधिकरणसमाप्तावुक्तम् 'अथेदानीमत्र भगवान् वृत्तिकारः परिनिश्चिकाय' इति, तदपि प्रथममेव द्रव्यगुणसंस्काराणां निरपेक्षशेषत्वाभिधानात् कर्मफलपुरुषाणां च द्रव्यादीनि प्रति प्राधान्येऽवस्थिते सूत्रैरेव परस्परापेक्षशेषत्वप्रतिपादनादुक्तार्थमिति मन्दफलं दृश्यते। तेनैवं परिहर्तव्यम्। अस्याधिकरणस्य व्याख्यानद्वयं कृतम्। तत्र प्रथमं तावत् स्वमतेन 'शेषः परार्थत्वात्' इत्यभिहिते बादरिमतमुपकारलक्षणशेषत्वाभिप्रायेण द्रव्यगुणसंस्कारेष्वेव शेषत्वमित्येवं पूर्वपक्षीकृत्य जैमिनिमतमेव सिद्धान्तत्वेन वर्णितम्। तथा च पूर्वत्र दृष्टोपकारानुक्रमणमेव भाष्ये दृश्यते। तत्र च पुरुषस्य द्रव्यत्वात् प्रत्यक्षमेव क्रियानिर्वृत्तिहेतुत्वादिष्टमेव शेषत्वम्। यागफलयोस्तु न किञ्चित्प्रति प्रत्यक्षं साधनत्वमुपलभ्यते इत्यशेषत्वम्। यत्तु न यागफलपुरुषेष्विति त्रयाणामपि भाष्ये संकीर्तनम्, न तत् प्रकृतशेषपदानुषङ्गादेवं कल्पयितव्यं न तेषां शेषत्वमिति। किं तर्हि? यत्सिद्धान्तवादिसंमतं तन्न भवतीत्येवं संबन्धः। सर्वत्र हि पूर्वपक्षवादिना सिद्धान्तवादिमतं प्रतिषेद्धव्यं न यत्किञ्चित्। शेषत्वमेव हि असौ तदभिप्रेतमेवेति प्रतिषेधति, न स्वरूपमात्रेण। सिद्धान्तवादिनश्चैतन्मतं यदुत यागफलपुरुषाणां द्व्याकारत्वं किञ्चिदपेक्ष्य शेषत्वं किञ्चिदपेक्ष्य शेषित्वमिति, तत् बादरिमतानुसारी भाष्यकारः प्रतिषेधति, न तु यागफलपुरुषेषु सिद्धान्तवादिसंमतं द्व्याकारत्वम्। यागफलयोरेकान्तेनैव शेषित्वात् पुरुषस्य चात्यन्तशेषत्वात्। सर्वथा य एवैक आकारः प्रतिषिद्धस्तेनैव तद्द्व्याकारत्वनिराकरणं शक्यमिति त्रयाणामपि

एतावता तुल्यधर्मत्वात् सह निर्देशः । 'कर्माण्यपि जैमिनिः' इत्यादिभिरन्तर्णीतद्व्याकारमेव शेषत्वं प्रतिपादितम्, पारार्थ्यलक्षणशेषत्वाङ्गीकरणात् । नन्वेवं सति पुरुषस्य द्रव्यत्वात् पूर्वपक्षवादिनैवाभ्युपगम्य शेषत्वम्, शेषित्वे निराकृते सिद्धान्तवादिना तदेव प्रतिपादनीयमिति न वक्तव्यं 'पुरुषश्च कर्मार्थत्वात्' इति । नैष दोषः । तेन हि यागफलयोरशेषत्वात्तस्य शेषित्वं निराकृतम् । ततश्च यावदेव सूत्रद्वयेन यागफलयोः शेषत्वं प्रतिपादितं तावदेव यागोपसर्जनं फलं प्रति प्रधानत्वादुभौ प्रति केवलं शेषित्वमेव प्रसक्तमिति प्रलीने द्व्याकारत्वे पुनः शेषत्वप्रतिप्रसवार्थमुच्यते 'पुरुषश्च कर्मार्थत्वात्' इति । अथवा परेणोपकारद्वारेण शेषत्वमभ्युपगतम्, तदयुक्तं मन्यमानः फलयागयोरिवास्यापि पारार्थ्यकृतमेवेति प्रतिपादयिष्यन्नाह 'पुरुषश्च कर्मार्थत्वात्' न तदुपकारित्वादिति । वृत्तिकारमतेन सूत्रचतुष्टयमन्यथा व्याख्यास्यन्नाह 'अथात्र भगवान्' इति । नैवेदानीं बादरिमतं पूर्वपक्षः । किं तर्हि ? 'शेषः परार्थत्वात्' इति सामान्येन लक्षणमुक्त्वा तस्यैव विषयप्रदर्शनद्वारेणोत्तरः प्रपञ्चः क्रियते । तत्र पूर्वव्याख्यायां द्रव्यगुणसंस्कारेष्वेव शेषत्वमित्येवमवधारणं पूर्वपक्षे कृतम् । इदानीं तु सिद्धान्तरूपेणैव बादरिमतमप्रतिषेधेनानुमतं कृत्वा लक्षणप्रपञ्चाभ्यां शेषत्वं वर्णयिष्यते । द्रव्यगुणसंस्कारेषु शेषत्वमेवेत्यवधारयति । अतश्च द्रव्यगुणसंस्काराः शेषत्वेन नियताः शेषित्वं न प्रतिपद्यन्ते । शेषत्वं पुनरनियतत्वात् यागफलपुरुषेष्वप्यस्त्येवेति तत्प्रतिपादनार्थान्युत्तरसूत्राण्यवकल्पन्ते । तस्मादापेक्षिकशेषशेषित्वमात्रमेवैभिः सूत्रैः प्रतिपाद्यते । तथा च भाष्ये दर्शितम् । ततश्च द्विप्रकार एष शेषविषयो नैयमिक आपेक्षिकश्चेत्युक्तं भवति । ननु च द्रव्यगुणसंस्काराणामपि स्वाङ्गानि प्रति प्रधानत्वाद्यागं च प्रति गुणभावादापेक्षिकमेव शेषशेषित्वम् । तथा हि '**व्रीह्यादीनां प्रधानत्वमवघातादिषु स्थितम् । मुसलादीन्यपेक्ष्यैवमवघातप्रधानता ॥**' व्रीह्यादयो ह्यवघातादीन् प्रति प्रधानभूताः, पुरोडाशनिर्वृत्तिं प्रति गुणभूताः । तथा गुणः संख्यादिः संख्येयं प्रति परिच्छेदाच्छेषः । येषां तु गुणानां निष्पाद्या सा तान् प्रति शेषिणी । तथा संस्कारः संमार्गावघातादिरग्निव्रीह्यादेः शेषः, स्वसाधनानामिध्मसंनहनोलूखलमुसलादीनां शेषी । तस्मान्नावधारणं सिध्यतीति । तदुच्यते । '**द्रव्यादेर्यत्र शेषत्वं तत्र नैवास्ति शेषिता । फलयागनराणां तु द्व्याकारत्वं परस्परम् ॥**' द्रव्यगुणसंस्कारा हि फलवन्तं यागं प्रति नियोगतः शेषभूताः । सत्यपि स्वाङ्गानि प्रति शेषित्वे तं प्रति नास्तीत्यभिधीयते । अत एव भाष्यकारोऽपि 'नियोगतो यजिं प्रति शेषभावः' इत्याह, न ब्रवीति 'नियतः शेषभावः' इति । 'आपेक्षिक इतरेषाम्' इत्यत्रापि यजिं प्रतीत्यनुवर्तते । तथा ह्येकैकस्य द्वौ द्वौ प्रति गुणत्वं प्राधान्यं च दृश्यते । यागस्य तावद् द्रव्यात्मकं निर्वर्तकं पुरुषं प्रति प्राधान्यम्, फलं प्रति गुणता । यश्च फलं प्रति गुणः स शक्यते फलस्य स्वामिनं पुरुषमपि प्रति सुतरां गुण इति वक्तुम् । तथा यस्य पुरुषं प्रति प्राधान्यं तस्य तदुपसर्जनं फलं प्रति सुतरां तदित्यपि शक्यनिरूपणम् । एवं फलस्य यागं प्रति प्राधान्यात्तत्साधनं पुरुषमपि प्रति प्राधान्यम्, पुरुषं प्रति गुणत्वात्तदनुष्ठेये यागेऽपि गुणत्वम् । तथा पुरुषस्य फलं प्रति प्राधान्यात्तत्साधनं यागमपि प्रति प्रधानत्वम् । यागं च प्रति गुणभावात्तत्साध्ये फलेऽपि गुणत्वम् । नत्वेवं द्रव्यगुणसंस्कारेष्विति विशेषः । यत्त्विदं पारम्पर्येणापि शेषत्वं प्राधान्यं चोक्तम्, इदमर्थलक्षणं वस्तुमात्ररूपेणेत्यवगन्तव्यम् । न व्यवहारार्थम् । मा भूत् अङ्गत्वांशेन विकृतौ फलपुरुषयोरपि अतिदेशात्सिद्धान्तविरोधः । तस्मादेतावत्प्रकार एव वक्ष्यमाणप्रपञ्चशेषत्वविषयसंक्षेप इति सिद्धम् ।

शा— '**बादरिर्द्रव्यसंस्कारगुणेष्वेवाह शेषताम् । श्रुत्यादेर्दर्शनाच्चैते कर्मणामुपकारकाः ॥**' जैमिनिस्तु उपकारलक्षणस्य शेषत्वस्य उक्तदोषत्वात् पारार्थ्यमेव शेषत्वं इत्यभिप्रेत्य कर्मणामपि पारार्थ्यात् शेषत्वमाह ।

वि— 'किं द्रव्यगुणसंस्कारमात्रं शेषोऽथवा फलम् । पुमान् कर्म च पक्षौ द्वावादेयौ मतभेदतः ॥ शेषत्वमुपकारित्वं द्रव्यादावाह बादरिः । पारार्थ्यं शेषता तच्च सर्वेष्वस्तीति जैमिनिः ॥'

भाट्ट— यद्यपि पारार्थ्यमङ्गत्वं तथापि न यागादेर्लक्ष्यता, समानपदश्रुत्या यागादेरेव भावनाभाव्यत्वेन तस्य स्वर्गोद्देशेन विहितत्वाभावात् । विधेः प्रवृत्तिस्वरूपयोग्यत्वेनैव लिङर्थतया इष्टसाधनत्वानाक्षेपकत्वात् । आक्षेपकत्वेऽपि वा भ्रमप्रमासाधारण्येनेष्टसाधनत्वज्ञानस्यैव कारणतया इष्टसाधनत्वसिद्धौ प्रमाणाभावाच्च । स्वर्गकामपदस्य तु 'परस्त्रीकामः प्रायश्चित्तं कुर्यात्' इतिवत् कर्तृपरत्वादिनाऽप्युपपत्तेर्न भाव्यपरत्वावश्यकता । अतो न यागादेर्लक्ष्यत्वम् । वस्तुतस्तु उपकारकत्वमेव शेषत्वम् । तदर्थेऽप्यपकारके शेषत्वव्यवहाराभावात् । तच्च श्रुतिलिङ्गवाक्यरूपप्रमाणत्रयगम्यमेव । अत एव व्रीह्यादेर्द्रव्यस्य आरुण्यादेर्गुणस्य अवघातादेः संस्कारस्य चोपकारकत्वदर्शनाच्छेषत्वम् । प्रोक्षणादिसंस्कारस्य तु लिङ्गेनाङ्गत्वासंभवेऽपि श्रुतिवाक्याभ्यामङ्गत्वप्रतीतेस्तद्बलेनैव उपकारकत्वकल्पनया शेषत्वोपपत्तिरिति तेषामेव लक्ष्यत्वम् । इति प्राप्ते, नोपकारकत्वं शेषत्वम्, गोदोहनदध्यानयनादेरपि प्रणयनवाजिनयागाङ्गत्वापत्तेः । अपि तु पारार्थ्यमेव । अपकारकस्थले तु तदपकारस्यैवेष्टत्वेन उद्देश्यता, न तु तस्येति न तदर्थेऽप्यपकारके शेषत्वव्यवहारः । तदपि श्रुत्यादिषट्प्रमाणगम्यमिति वक्ष्यते । अतश्च वाक्याद्यागोऽपि फलाङ्गम् । तथा हि यद्यपि विधेः स्वरूपयोग्यतयैव प्रवृत्त्यनुकूलत्वं लिङाऽवगम्यते, तथापि कदा चिदपि प्रवृत्त्यभावे विधिवैयर्थ्यापत्तेः अवश्यं कदा चित् तया भवितव्यम् । तथा चेष्टसाधनताज्ञानं विना तदसंभवात् तस्य च बाधकाभावे भ्रमत्वायोगात् इष्टसाधनत्वं तावद्यागस्य विधिबलादवगम्यते । इष्टविशेषसाधनत्वं च स्वर्गकामादिपदसमभिव्याहारादिति यागस्य स्वर्गाङ्गत्वसिद्धिः । एवं फलस्यापि भोक्तृपुरुषाङ्गत्वम् । भोक्ता च उत्सर्गतो विधिवशात् कामनावशात् आत्मनेपदवशाच्च कर्तैव । प्रमाणसत्त्वे त्वन्यः । अत्राङ्गत्वव्यवहारो भाक्त इति तु ध्येयम् । पुरुषः पुनः कर्तृत्वादिना यागाद्युद्देश्यकक्रतिकारकत्वात् वाक्यादेव तदङ्गमित्यविवादमेव ।

मण्डन— 'कर्माद्यपि फलादिनः ।' शेषः ।

शंकर— 'निरस्तो बादरेः पक्षः ।'

* बादर्यधिकरणं द्वेधा व्याख्यातम् । उपकारलक्षणशेषत्वाभिप्रायेण द्रव्यादिष्वेव शेषत्वमिति शेषत्वावधारणया बादरिमतं पूर्वपक्षं कृत्वा कर्मादिष्वपि शेषत्वमस्ति पारार्थ्यलक्षणत्वात् इति जैमिनिमतं सिद्धान्तितं प्रथमे व्याख्याने । द्वितीये तु बादरिमतमपि सिद्धान्तमङ्गीकृत्य द्रव्यादिषु शेषत्वमेवेति नियम्य कर्मादिषु शेषत्वं शेषित्वं चेति । **तन्त्ररत्न.** ४।१।२।२.

* वार्तिककृता तु **बादर्यधिकरणादौ** (अध्ययनस्य) संस्कारकर्मत्वमपि उक्तम् । **कौ.** १।२।१।७.

*** बाधः** अग्निहोत्रार्थोद्धरणमन्त्रस्य दर्शार्थाग्न्युद्धरणे । **भाट्ट.** ९।४।७. * बाधः अजस्य धेनुवत्सऋषभशब्दोपदिष्टगोद्रव्येण । **भा.** १०।२।२९।६९. * बाधः अध्रिगुप्रैषस्य सारस्वत्यां मेष्याम् । कृत्वाचिन्ता । ९।१।१७. 'मेष्यधिकरणम्' इत्यत्र द्रष्टव्यम् । * बाधः अन्वारम्भणीयायाः दीक्षणीयादिविकृतिषु ज्योतिष्टोमे । १०।१।२।४. **मीको.** पृ. ९७४ 'आरम्भणीयायाः ज्योतिष्टोमाद्यङ्ग०' इत्यत्र द्रष्टव्यम् । * बाधः अन्वारम्भणीयायाः राजसूयेऽनुमत्यादीष्टौ । १०।१।३।५. **मीको.** पृ. ९७७ 'आरम्भणीयायाः राजसूय०' इत्यत्र द्रष्टव्यम् । * बाधः अन्वाहार्यदक्षिणाया आग्रयणोपदिष्टवासोवत्सदक्षिणया । १०।३।६।३४. **मीको.** पृ. ८५४ 'आग्रयणे उपदिष्ट०' इत्यत्र द्रष्टव्यम् । * बाधः अभिघारणस्य अन्वाहार्यस्थानापन्नयोराग्रयणे वासोवत्सयोः । १०।३।१०।३८. **मीको.** पृ. ८५५ 'आग्रयणे वासोवत्सयोः०' इत्यत्र द्रष्टव्यम् । * बाधः अभिघारणस्य शतकृष्णलचरौ । १०।२।२।३–१३. * बाधः अभ्यूहस्य सौर्ये चरौ । १०।१।१८।५६. * बाधः अवघातस्य कृष्णलचरौ । १०।१।१।१–३ वर्णकं २. **मीको.** पृ. ६७९ 'अवघातस्य कृष्णलचरौ०' इत्यत्र द्रष्टव्यम् । * बाधः अवज्वलनस्य सौर्ये चरौ । १०।१।१९।६०. 'सौर्ये चरौ अवज्वलनस्य बाधः' इत्यत्र द्रष्टव्यम् । * बाधः अविवृद्धस्तोमकक्रतूपदिष्टसामभिः प्राकृतसाम्नाम् । १०।४।१०।२०. * बाधः आतिदेशिककृत्स्नक्रतुदक्षिणायाः भूसंज्ञकैकाहे औपदेशिकधेनुदक्षिणया । १०।३।१४।५६–५८. **मीको.** पृ. २२७७ 'धेनुन्यायः' इत्यत्र द्रष्टव्यम् । * बाधः

आधानादिसंस्काराणां अग्निचयनप्रकरणे श्रुतस्य ज्वलद्वृक्षाग्राद्याहृतस्य काम्यस्याग्नेः । १२।४।९. **मीको.** पृ. ४८ 'अग्निचयने श्रुतस्य०' इत्यत्र द्रष्टव्यम् । * बाधः आरम्भणीयायाः आरम्भणीयायाम् । १०।१।४।६–८. **मीको.** पृ. ९७८ 'आरम्भणीयान्यायः' इत्यत्र द्रष्टव्यम् । * बाधः उत्पत्तिप्रतिबन्धः प्रत्यक्षेण अनुमानस्य । सु. पृ. १३७. * बाधः उपधानस्य सौर्ये चरौ । १०।१।१६।५७. 'सौर्ये चरौ उपधानस्य बाधः' इत्यत्र द्रष्टव्यम् । * बाधः उपस्तरणाभिघारणयोः कृष्णलेषु । १०।२।२. **मीको.** पृ. १४७६ 'कृष्णलचरौ उपस्तरणाभिघारणयोः०' इत्यत्र द्रष्टव्यम् । * बाधः ऊहस्य (ऊहो न) चातुर्मास्येषु अनुयाजदेवताप्रकाशनार्थं प्राकृतावाहनमन्त्रस्य, किन्तु अविकारेणैव प्रयोगः । १०।४।२५।५१–६०. * बाधः ऊहस्य । मनोतामन्त्रस्य वायव्यादिपशौ नोहः । १०।४।२१।४३. * बाधः ऋतपेये विहितसोमचमसदक्षिणया कृत्स्नक्रतुदक्षिणायाः पुरुषान्तरस्य च । १०।३।२०।७२–७३. **मीको.** पृ. १२४२ 'ऋतपेये सोमचमसेन' इत्यत्र द्रष्टव्यम् । * बाधः काम्येन भ्राष्ट्राद्यग्निना नित्यस्योख्याग्नेश्चयने । १२।४।७।१७–२५. **मीको.** पृ २४ 'अग्निचयनगतेन ज्वलद्वृक्षाग्राद्याहृतेन' इत्यत्र द्रष्टव्यम् । * बाधः । क्लृप्तमूलानां प्रमाणानां प्राप्तबाधो भवति, न कल्प्यमूलानां इत्युक्तम् ३।३।७।१४। **वा.** ३।७।२३।५१. * बाधः गिरापदस्य इरापदेन ज्योतिष्टोमे यज्ञायज्ञीये । ९।१।१८।५०–५३. **मीको.** पृ. १५६१ 'गिरापदस्य इरापदेन' इत्यत्र द्रष्टव्यम् । * बाधः गुणकामानामस्थियज्ञस्य मृताधिकारिकत्वपक्षे । १०।२।२०. **मीको.** पृ. ७६० (३) 'अस्थियज्ञस्य मृताधिकारित्वपक्षे' इत्यत्र द्रष्टव्यम् । * बाधः चतुर्धाकरणादीनां शतकृष्णलचरौ । १०।२।७।२२. **मीको.** पृ. १४७९ 'कृष्णलचरौ चतुर्धाकरणस्य' इत्यत्र द्रष्टव्यम् । * बाधः (अभावः) चित्रेष्टौ तण्डुलेषु प्राकृतव्रीहियवान्यतरनियमस्य । १०।२।३१।७१. * बाधः तक्षणादीनां साद्यस्क्रे खलेवाल्याम् । १०।२।३२।७२–७३. **मीको.** पृ. १५३५ 'खलेवाल्यां तक्षणजोषणादि' इत्यत्र द्रष्टव्यम् । * बाधः दशमेऽध्याये उच्यते । **वि.** प्रस्तावना. पृ. ५. * बाधः द्विविधः अप्राप्तबाधः प्राप्तबाधश्चेति । तत्र तार्तीयो बाधः अप्राप्तबाधः । **मीन्या.** * बाधः न अजद्रव्यस्य वायव्यपशौ उपदिष्टेन श्वेतगुणेन । १०।२।३०।७०. **मीको.** पृ. २१५४ 'द्रव्यस्य गुणेन न बाधः' इत्यत्र द्रष्टव्यम् । * बाधः न अञ्जनाभ्यञ्जनाख्यसत्रोपदिष्टगौग्गुलवाभ्यञ्जनादिना प्राकृतनवनीताभ्यञ्जनस्य । १०।४।६।१०–१२. * बाधः न अतिदिष्टानां क्रतुपशूनां वाजपेयोपदिष्टप्राजापत्यपशुभिः । १०।४।३।६. * बाधः न अतिदिष्टैन्द्रवायवादिग्रहाणां अश्वमेधोपदिष्टसौवर्णराजतग्रहाभ्याम् । १०।४।२।३–५. * बाधः न अध्वर्योः दास्यादिभागान्तरस्य वाजपेयश्रुतयजुर्युक्तरथेन । १०।३।२१।७४–७५. * बाधः न अवघातस्य महापितृयज्ञे धानासु । १०।२।३४।७५. 'महापितृयज्ञे धानासु' इत्यत्र द्रष्टव्यम् । * बाधः न आतिदेशिकोपगानकर्तृणामृत्विजां गवामयनगत– महाव्रतोपदिष्टोपगानकर्त्रीभिः पत्नीभिः । १०।४।५।८–९. * बाधः न आमिक्षायागस्विष्टकृतः । **संकर्ष.** १।४।२. **मीको.** पृ. ९५५ 'आमिक्षायागस्विष्टकृतो०' इत्यत्र द्रष्टव्यम् । * बाधः न एकादिदीक्षापक्षाणां साग्निचित्ये क्रतौ । **संकर्ष.** २।१।२९. **मीको.** पृ. २६ 'अग्निचयनविशिष्टे क्रतौ' इत्यत्र द्रष्टव्यम् । * बाधः न क्रत्वर्थानामस्थियज्ञस्य मृताधिकारिकत्वपक्षे । १०।२।१९।५१. **मीको.** पृ. ७६० (५) 'अस्थियज्ञस्य मृताधिकारिपक्षे क्रत्वर्थानाम्' इत्यत्र द्रष्टव्यम् । * बाधः न क्रतुदक्षिणायाः अग्निचेतृदक्षिणया । **संकर्ष.** १।१।८. **मीको.** पृ. ५६ 'अग्निचेतृदक्षिणया न क्रतुदक्षिणाबाधः' इत्यत्र द्रष्टव्यम् । * बाधः न नक्षत्रेष्ट्यादौ उपदिष्टैरुपहोमादिभिः आतिदेशिकानां नारिष्ठहोमादीनाम् । १०।४।१।१–२. * बाधः न निर्वापस्य अग्निहोत्रहवण्यभावेऽपि पवमानेष्टिषु । १०।२।२७।६४. **मीको.** पृ. १५९२ 'गुणलोपन्यायः' इत्यत्र द्रष्टव्यम् । * बाधः न पयोव्रतादेः आतिदेशिकस्य पृष्ठ्यषडहे उपदिष्टेन मध्वशनेन । १०।४।१।१–२. * बाधः न पर्यूहणादिसंस्काराणां साद्यस्क्रे खलेवाल्याम् । १०।२।३३. **मीको.** पृ. १५३६ 'खलेवाल्यां पर्यूहणादि' इत्यत्र द्रष्टव्यम् । * बाधः न पाकस्य कृष्णलचरौ । १०।२।१।१–२.

मीको. पृ. १४७५ 'कृष्णलेषु मुख्यपाकासंभवात्' इत्यत्र द्रष्टव्यम् । * बाधः न प्राकृताङ्गान्तराणां अवभृथे विहितेनाप्सु तृणप्रासनेन । १०।३।१।१–१२. * बाधः न प्राकृताङ्गान्तराणां चातुर्मास्येषु विहितैर्नवप्रयाजैः । १०।३।१।१–१२. * बाधः न प्राकृताङ्गान्तराणां वायव्यपशौ विहितेन आघारमन्त्रेण । १०।३।१।१–१२. * बाधः न प्राकृताङ्गान्तराणां सोमेऽग्नीषोमीये पशौ विहितैरेकादशप्रयाजैः । १०।३।१।१–१२. **मीको.** पृ. १०७ 'अग्नीषोमीयपश्वादौ प्रयाजादिषु' इत्यत्र द्रष्टव्यम् । * बाधः न प्राकृतसाम्नां विवृद्धस्तोमकक्रतूपदिष्टसामभिः । १०।४।१०।२०. 'विवृद्धस्तोमकक्रतुषु उपदिष्टैः सामभिः' इत्यत्र द्रष्टव्यम् । * बाधः न बृहस्पतिसवादिगतौपदेशिकबार्हस्पत्यादिग्रहैः आतिदेशिकैन्द्रवायवादिग्रहाणाम् । १०।४।२।३–५. * बाधः न भक्षणस्य शतकृष्णलचरौ । १०।२।३।१४–१७. **मीको.** पृ. १४८० 'कृष्णलचरौ भक्षाणां न बाधः' इत्यत्र द्रष्टव्यम् । * बाधः न मन्थे पेषणस्य महापितृयज्ञे । १०।२।३४।७५. 'महापितृयज्ञे धानासु' इत्यत्र द्रष्टव्यम् । * बाधः न महाव्रते तार्प्यादिभिः प्राकृताहतवाससः । १०।४।७।१३–१५. * बाधः न महाव्रतगतस्तोत्रान्तरसाधनीभूतश्लोकादिसामभिः प्राकृतसाम्नाम् । १०।४।८।१६–१७. * बाधः न विषुवति विहितेनार्कग्रहेण आतिदेशिकानामैन्द्रवायवादिग्रहाणाम् । १०।४।२।३–५. * बाधः न श्येने उपदिष्टैर्लोहितोष्णीषत्वादिभिः आतिदेशिकस्योपवीतस्य । १०।४।१।१–२. * बाधः न सत्रे ऋतुयाज्यावरणहिरण्यदानयोः अदृष्टार्थयोः । १०।२।२६।६३. **मीको.** पृ. १२४६ 'ऋतुयाज्यावरणहिरण्यदानयोः' इत्यत्र द्रष्टव्यम् । * बाधः न सर्वस्वारे यजमानजीवद्दशायां क्रियमाणप्रायणीयाऽऽदौ सूक्तवाकान्तर्गतायुराशासनादेः । १०।२।२५।६१–६२. 'सर्वस्वारे यजमानयावज्जीवद्दशायाम्' इत्यत्र द्रष्टव्यम् । * बाधः न सांग्रहणेष्टिविहितामनहोमैरातिदेशिकानुयाजानाम् । १०।४।४।७. * बाधः नाम चोदकप्रापितस्य उद्धननाद्यनुष्ठेयत्वप्रत्ययस्य भ्रान्तित्वेन निश्चयः । **वि.** १०।१।१. * बाधः नाम यदेव इदमिति निश्चितं विज्ञानं (तत्) कारणान्तरेण मिथ्येति कल्प्यते । **भा.** १०।१।१।१. * बाधः नित्यस्य काम्येन । १२।४।७।१७–२५. * बाधः नित्यप्रयोगीयगोगतद्वादशशतसंख्यामात्रस्य ज्योतिष्टोमे नैमित्तिकैकादिगोदक्षिणया । १०।३।१५।५९, ६२. 'सोमापहारादौ एकादिगोदक्षिणया' इत्यत्र द्रष्टव्यम् । * बाधः नैर्ऋतचरुविहितकृष्णव्रीहिभिः प्राकृतयवानाम् । १०।७।१९।६४–७१. * बाधः पदार्थनिवृत्तिः । **वि.** १०।१।१ प्रस्तावे. * बाधः परिक्रयस्य (ऋत्विजां) सत्रे । १०।२।११।३६–३९. 'सत्रे ऋत्विक्परिक्रयस्य बाधः' इत्यत्र द्रष्टव्यम् । * बाधः पाकस्य आग्रयणेऽन्वाहार्यस्थानापन्नस्य वत्से । १०।३।८।३६. **मीको.** पृ. ८५३ 'आग्रयणे अन्वाहार्यस्थानापन्नेऽपि वत्से' इत्यत्र द्रष्टव्यम् । * बाधः पाकस्य वाससि आग्रयणे अन्वाहार्यस्थानापन्नेऽपि । १०।३।९।३७. **मीको.** पृ. ८५३ 'आग्रयणे अन्वाहार्यस्थानापन्नेऽपि वाससि' इत्यत्र द्रष्टव्यम् । * बाधः पुनराधानश्रुतदक्षिणया आधानसामान्यविहितैकादिदक्षिणायाः । १०।३।५।३०–३३. **मीको.** पृ. २४०१ 'नैमित्तिके पुनराधाने' इत्यत्र द्रष्टव्यम् । * बाधः पेषणस्य सौर्ये चरौ । १०।१।१२।५२–५३. 'सौर्ये चरौ पेषणस्य बाधः' इत्यत्र द्रष्टव्यम् । * बाधः प्रकृतिप्राप्तद्रव्यदेवतादीनां विकृत्युपदिष्टद्रव्यदेवताभिः । १०।७।१७।५८–६०. **मीको.** पृ. १४४३ 'काम्यासु विकृतिषु उपदिष्टैः' इत्यत्र द्रष्टव्यम् । * बाधः प्रकृतिप्राप्तयवानां सोमारौद्र–घृतपक्वचरुविहितशुक्लव्रीहिभिः । १०।७।१९।६४–७१. 'सोमारौद्रादियागे श्रूयमाणैः' इत्यत्र द्रष्टव्यम् । * बाधः । प्रत्यक्षेणानुमानं मृगतृष्णादिप्रत्ययाश्च बाध्यन्ते यथास्वं षड्भिरपि प्रमाणैः प्रमाणाभासः, श्रुत्या स्मृतिः, आप्ताविगीतस्मृत्या अनाप्तविगीतस्मृतिः, अदृष्टार्थया दृष्टार्था, श्रुतिप्रभवया लिङ्गादिप्रभवा अर्थवादप्रभवा च, स्मृत्याऽपि आचारः, सोऽपि अभियुक्ततराचारेण, संदिग्धमसंदिग्धेन, दुर्बलाश्रयं बलवदाश्रयेण, उपसंहारस्थमुपक्रमस्थेन, अत्यन्तादृष्टार्थं नियमादृष्टार्थेन, आरादुपकारकत्वं सामवायिकत्वेन, अनेकार्थविधानं एकार्थविधानेन, अनेकशब्दार्थत्वं एकशब्दार्थत्वेन, बहुबाधः अल्पबाधेन, वेदान्तरोत्पन्नं

वेदान्तरविहितत्वेन, परशाखाविहितं स्वशाखाविहितेन, नित्यं नैमित्तिकेन, द्विप्रकारमप्येतत् क्रत्वर्थं पुरुषार्थेन, अनारभ्याधीतं प्रकरणाधीतेन, पौर्वापर्येण विरोधे पूर्वं परेण, प्राकृतं वैकृतेन, प्रयोगवचनाश्रितं चोदकाश्रयेण, निष्प्रयोजनं सप्रयोजनेन, ब्राह्मणक्रमो मन्त्रक्रमेण, देवताश्रयं द्रव्याश्रयेण, पश्चादाम्नातं पूर्वाम्नातेन, अल्पं भूयसा, गौणं मुख्येन, सामान्यविहितं विशेषविहितेन, सावकाशं निरवकाशेन, अङ्गं प्रधानेन, अङ्गधर्मः प्रधानधर्मेण । **वा.** ३।३।७।१४ पृ. ८६०. * बाधः प्रत्यक्षश्रुत्या विरुद्धया अनुमितायाः स्मृतेः । **वि.** १।३।५ वर्णकं २. * बाधः प्रथनस्य **सौर्ये चरौ** । १०।१। १७।५८. '**सौर्ये चरौ** प्रथनश्लक्ष्णीकरणयोः' इत्यत्र द्रष्टव्यम् । * बाधः प्राकृतस्य अजद्रव्यस्य धेनुवत्सऋषभशब्दोपदिष्टगोद्रव्येण द्यावापृथिव्यादौ । १०।२।२९।६९. **मीको.** पृ. २२८१ 'धेनुवत्सर्षभाधिकरणम्' इत्यत्र द्रष्टव्यम् । * बाधः प्राकृतानामङ्गानां विकृतौ लुप्तार्थकानाम् । १०।१।१।१–३. 'विकृतौ लुप्तार्थानाम्' इत्यत्र द्रष्टव्यम् । * बाधः प्राकृताध्वर्युभागमात्रस्य अश्वमेधगतप्राकाशाभ्याम् । १०। ३।१७।६३–६४. **मीको.** पृ. २८३६ 'प्राकाशन्यायः' इत्यत्र द्रष्टव्यम् । * बाधः प्राकृतकृत्स्नक्रतुदक्षिणायाः उपहव्यक्रतूपदिष्टाश्वदक्षिणया । १०।३।१८।६५–६७. 'श्यावाश्वाधिकरणम्' इत्यत्र द्रष्टव्यम् । * बाधः प्राकृतकृत्स्नक्रतुदक्षिणायाः ऋतपेयविहितसोमचमसदक्षिणया । १०।३।१९।६८–७१. **मीको.** पृ. १२४० 'ऋतपेये विहितया' इत्यत्र द्रष्टव्यम् । * बाधः प्राकृतवेदियूपयोः प्राकृतवाजिनासादनपशुनियोजनानुवादेन विहिताभ्यामुत्करपरिधिभ्यां सौमिकेषु चातुर्मास्येषु । १०।३। ३।१८–२२. **मीको.** पृ. १६९४ 'चातुर्मास्येषु सौमिकेषु' इत्यत्र द्रष्टव्यम् । * बाधः प्राकृतसर्वक्रयद्रव्यस्य, साद्यस्क्रे विहितेन साण्डेन त्रिवत्सेन बाधः । १०।३। १६।६०–६१. **मीको.** पृ. १९७१ 'त्रिवत्साधिकरणम्' इत्यत्र द्रष्टव्यम् । * बाधः प्राकृतसाम्नां अविवृद्धस्तोमक्रतुषु उपदिष्टैः सामभिः । १०।४।१०।२०. 'विवृद्धस्तोमक्रतुषु उपदिष्टैः सामभिः' इत्यत्र द्रष्टव्यम् । * बाधः प्राकृतहविषः सौर्यचरौ चरुशब्दवाच्यौदनेन । १०।१।१०।३६–४६. **मीको.** पृ. १६८४ 'चरुशब्दवाच्येनौदनेन' इत्यत्र द्रष्टव्यम् । * बाधः । भविष्यत्प्राप्तिप्रतिबन्ध एव श्रुतिलिङ्गादिबाधे बाधपदार्थः । **वि.** ३।३।७. * बाधः भस्माङ्गारोर्ध्वारोपणस्य **सौर्ये चरौ** । १०।१। १८।५९. '**सौर्ये चरौ** भस्मसहितानाम्' इत्यत्र द्रष्टव्यम् । * बाधः वरणस्य सत्रे । १०।२।१०।३५. 'वरणं सत्रे नास्ति' इत्यत्र द्रष्टव्यम् । * बाधः वाजपेये माहेन्द्रस्तोत्रोपाकरणसाधनरथघोषादिना प्राकृतदर्भमन्त्रयोः । १०।४। ३।१–२ वर्णकं ३. 'रथघोषाधिकरणम्' इत्यत्र द्रष्टव्यम् । * बाधः विकृतिषु चोदकप्राप्तस्य द्व्यहकालत्वस्य 'य इष्ट्या पशुना०' इति वचनेन । **वि.** ५।४।७. * बाधः विकृतिविशेषे श्रूयमाणैः **कौत्सादिभिः** प्राकृतसाम्नाम् । १०।४।८।१७ वर्णकं २. **मीको.** पृ. १४९३ 'कौत्सकाण्ववसिष्ठस्य०' इत्यत्र द्रष्टव्यम् । * बाधः विकृतिविशेषे श्रूयमाणकौत्सादिसामभिः तत्समसंख्यानां प्राकृतसाम्नां बाधः, न सर्वेषाम् । १०।४।९।१८–१९. **मीको.** पृ. १४९४ 'कौत्सादिन्यायः' इत्यत्र द्रष्टव्यम् । * बाधः विशेषेण सामान्यस्य । **भा.** १२।४।७।२०. * बाधः विषयसंकोचात्मकः । सामान्यमात्रे पर्यवसितस्य विधेः अर्थवादविरोधात् विषयसंकोचात्मको बाधोऽभ्युपगम्यते । **सु.** पृ. ५२५. * बाधः वैकृतौदुम्बरत्वेन प्राकृतखादिरत्वादेः । १०।७।१८।६१–६३. **मीको.** पृ. १५३९ 'खादिरत्वस्य प्राकृतस्य' इत्यत्र द्रष्टव्यम् । * बाधः वैश्वदेवचरौ आवाहनकाले विष्ण्वावाहनस्य । १०।१। ३।१–३ वर्णकं ३. 'वैश्वदेवीयदेवताऽऽवाहनकाले विष्णोः' इत्यत्र द्रष्टव्यम् । * बाधः व्युद्धरणस्य सौर्ये चरौ । १०।१।२०।६१. 'सौर्ये चरौ व्युद्धरणस्य बाधः' इत्यत्र द्रष्टव्यम् । * बाधः श्लक्ष्णीकरणस्य सौर्ये चरौ । १०।१।१७।५८. * बाधः संतापनस्य सौर्ये चरौ । १०।१।१५।५६. '**सौर्ये चरौ** संतापनस्य बाधः' इत्यत्र द्रष्टव्यम् । * बाधः संयवनस्य सौर्ये चरौ । १०।१।१३।५४. 'सौर्ये चरौ संयवनस्य बाधः' इत्यत्र द्रष्टव्यम् । * बाधः संवपनस्य सौर्ये चरौ । १०।१।१४। ५५. 'सौर्ये चरौ संवपनस्य बाधः' इत्यत्र द्रष्टव्यम् ।

* बाधः समाख्यादिविशेषेण सामान्यसमाख्यातकर्तुः । ३।७।२०।४१–४२. * बाधः । समुच्चयासंभवे च बाधविकल्पौ, न संभवति समुच्चये । **भा.** १०।३। ४।२६. * बाधः साद्यस्के खलेवाल्यां खादिरत्वनियमस्य । १०।२।३१।७१. * बाधः साद्यस्के खलेवाल्यां यूपाहुतेः । १०।१।५।९. 'यूपाहुतिन्यायः' इत्यत्र द्रष्टव्यम् । * बाधः साद्यस्के स्थाण्वाहुतेः । १०।१।६। १०–१३. 'स्थाण्वाहुतिन्यायः' इत्यत्र द्रष्टव्यम् । * बाधः सामान्यविशेषात्मकः । **वा.** २।२।१३।२९. * बाधः सामान्यविहितस्य आहवनीयस्य ज्योतिष्टोमादौ विशेषविहितेन वर्त्मना । १०।८।८।१६. **मीको.** पृ. १८३९ 'ज्योतिष्टोमादौ वर्त्मादिना' इत्यत्र द्रष्टव्यम् । * बाधः सामान्यविहितस्याहवनीयस्य राजसूये विहितया वल्मीकवपया । १०।८।८।१६. * बाधः सौमारौद्रयागे उपदिष्टैः शरैः आतिदेशिकानां कुशानाम् । १०।४।१।१–२ वर्णकं २. * आधानस्य सोमपूर्वकत्वपक्षे सोमस्य विहितकालबाधः । ५।४।५।१५–१६. * एकार्थानां विकल्पो वा बाधो वा भवति । **भा.** १०।४। २।३. * तत्र अबाधो द्विविधः अभ्युच्चयपर्यन्तः केवलश्च । अभ्युच्चयो वैकृतैः प्राकृतानां समुच्चयः । यत्र वैकृतेन प्राकृतस्य बाधप्रसक्तौ अबाधः प्रतिपाद्यते सः अभ्युच्चयपर्यन्तः । तत्र प्राकृतवैकृतयोरुभयोरपि अनुष्ठेयत्वात् । यत्र तु न वैकृतं किञ्चित्, किन्तु प्राकृतस्यैव लुप्तद्वारत्वादिशङ्कया बाधप्रसक्तौ अबाधो व्युत्पाद्यते स केवलः । तत्र प्राकृतमात्रस्यैव अनुष्ठेयत्वेन अभ्युच्चयाभावात् । यथा खलेवाल्यादौ पर्यूहणादेः । **सोम.** १०।१।१. * दुर्बलस्य च बाधो न्याय्यो न बलीयसः । **भा.** १२। १।२।७. * यः कस्य चित् स्वयमनाकाङ्क्षित एव संकोचः बलादन्येन कार्यते स एव तस्य तत्कृतो बाधः । यथा आहवनीयशास्त्रस्य पदशास्त्रेण । **पराक्रमः.** २८।२. * श्रुतिलिङ्गादिविरोधे प्रमाणानुत्पत्तिलक्षणो बाधः । उपक्रमवशेन उपसंहारशब्दकल्पनायां लक्षणापरिग्रहेण शब्दार्थविज्ञानस्य धर्मबाधः (यथा वेदोपक्रमवशात् ऋगादिशब्दस्य । धर्मस्य श्रुत्यर्थपरत्वस्य बाधः) नित्यकाम्ययोः (पाञ्चदश्यैकविंशत्यनुवचनयोः) प्राकृतवैकृतयोश्च (कुशशरयोः) पौर्वापर्यनैमित्तिकन्यायेन पूर्वबाधः । सामान्यविशेषेषु सामान्याश्रयस्य विशेषे लक्षणया कार्यप्राप्तिः विशेषाश्रयस्य तु श्रुत्या, श्रुत्या च लक्षणाप्राप्तं बाध्यते तत्र वाच्यसंबन्धविज्ञानबाधः (विज्ञानस्य लक्षणाप्राप्तस्य श्रौतेन विज्ञानेन बाधः) । वैकल्पिकयोस्तु एकनिमित्ताश्रयणात् इतरेतरबाधः । **टुप्.** ६।५। १९।५४. * सत्यां गतौ बाधो न युक्तः । **सु.** पृ. ८८३. * समानविषयमात्रे हि बाधो विज्ञायते । **वा.** ३।६।१।५.

* **बाधाभ्युच्चयौ** दशमाध्यायार्थः । **टुप्.** ७।१। १।१.

* **बाधोन्नीतः** उपाधिः 'वह्निरनुष्णः कृतकत्वात्' इत्यत्र वह्नीतरत्वम् । **मणि.** पृ. ३५.

* **बाधनिश्चयस्य** शाब्दभिन्नमेव प्रतिबध्यं इत्यालङ्कारिकाः । **मणि.** पृ. ६८.

* **बाधपक्षस्य** अबाधपक्षसंभवे अनङ्गीकार्यत्वम् । **सु.** २।१।१३।३८.

* **बाधप्रकाराः** अनुत्पत्ति-विनाश-संस्कारोच्छेद-फलापहाराः । **सु.** पृ. १२१८.

* **बाधप्रकारनानात्वे**ऽपि गम्यमाने न कश्चित् विरोधः । यथैवैते पुरस्तात् बाधगोचरा भेदा वर्णिताः नैतेषु ऐकरूप्यं अङ्गीकृतम् । **वा.** ३।३।७।१४ पृ. ८६१.

* **बाधप्रमाणानि** प्रत्याम्नान– प्रतिषेध–अर्थलोपरूपाणि त्रीणि । **मणि.** पृ. १३.

* **बाधप्रसङ्गः** । (उक्थ्यादिसंस्थानां) विकारपक्षे तु ज्ञायते प्राकृतस्य पूर्वतरं क्लृप्तिः इति अवश्यावहेये अन्यतरस्मिन् कर्मणि विप्रकृष्टं प्राकृतमेव हातव्यं भवति इति बाधप्रसङ्गः । **वा.** ३।६।१६।४२ पृ. १०६५.

* **बाधभेदाः** सर्वे आनर्थक्यप्रतिघाते विपरीतो बाधो भवति इति द्वैगुण्यमापन्ना भवन्ति संख्यया । तेन ४८४ इति भेदाः । **बाल.** पृ. १४५, * **अप्राप्तबाधभेदाः** शास्त्रीयाः । अप्राप्तबाधः पुनः पञ्चधा, श्रुत्या स्मृतिः बाध्यते, श्रुत्या आचारः, स्मृत्या आचारः, श्रौतमन्त्रलिङ्गेन स्मृतिः, श्रौतार्थवादगतलिङ्गेन आचारः

इति । पृ. १३८-१३९, * अप्राप्तबाधभेदाः शास्त्रीयाः क्रमप्रमाणेषु श्रुति–अर्थ–पाठ--स्थान–मुख्य–प्रवृत्तिषु । श्रुतिः अर्थादीन् बाधते इति ५ बाधभेदाः । अर्थेन पाठादीनां चतुर्णां बाधात् ४ बाधभेदाः । पाठेन स्थानादीनां त्रयाणां बाधात् ३ बाधभेदाः । स्थानेन मुख्य-प्रवृत्त्योः बाधात् २ बाधभेदौ । मुख्येन प्रवृत्तेः बाधात् १ बाधभेदः । सर्वेषां उदाहरणानि तु न सन्ति । पृ. १३६, * अप्राप्तबाधभेदाः शास्त्रीयाः । श्रुत्या लिङ्गादीनि पञ्च बाध्यन्ते । लिङ्गेन वाक्यादीनि चत्वारि । वाक्येन प्रकरणादीनि त्रीणि । प्रकरणेन क्रमादिद्वयम् । क्रमेण समाख्या इति । तथा – श्रुत्यादिषु द्वाभ्यां प्रमाणाभ्याम्, एकः शेषः द्वयोः शेषिणोः विनियुज्यते तत्र दुर्बलप्रबलेन बाधः इति ५ भेदाः । एवं एकस्मिन् शेषिणि द्वयोः शेषयोः प्रमाणद्वयेन विनियोगे प्रबलेन दुर्बलस्य बाधः इति ५ मिलित्वा १० । पृ. १३४, * अप्राप्त-बाधभेदाः ७ शास्त्रीयाः । १ श्रुत्या श्रुतिः प्रबलया दुर्बला बाध्यते, २ श्रुत्या श्रुतिः असंदिग्धया संदिग्धा, ३ लिङ्गेन लिङ्गम् , ४ वाक्येन वाक्यम् , ५ प्रकरणेन प्रकरणम् , ६ क्रमेण क्रमः, ७ समाख्यया समाख्या । एते च सप्त शेषशेषिभेदेन द्विगुणा भवन्ति । पृ. १३५, * अप्राप्तबाधभेदाः शास्त्रीयाः स्मृत्या । श्रुतिप्रभवया स्मृत्या लिङ्गादिसमाख्यान्तप्रभवा स्मृतिः बाध्यते । अत्र श्रुतिलिङ्गादीनां बाधानां पञ्चदशभेदत्वात् तत्तन्मूलकस्मृतिविषयेऽपि १५ एव भेदा भवन्ति । तत्रापि शेषसमवाये पञ्चदश शेषिसमवाये च पञ्चदश इति ३० भेदाः । पृ. १४०, * अप्राप्तबाधभेदाः शास्त्रीयाः स्मृत्याचारसंबद्धाः षट्, आप्तस्मृत्या अनाप्तस्मृतिः बाध्यते, अविगीतस्मृत्या विगीतस्मृतिः, अदृष्टार्थस्मृत्या दृष्टार्था स्मृतिः, आप्ताचारेण अनाप्ताचारः, अविगीता-चारेण विगीताचारः, अदृष्टार्थेन आचारेण दृष्टार्थ आचारः । बाल. पृ. १३९.

* **बाधभेदनिरूपणम्** (ते च भेदाः ५५९ भवन्ति) । बाधो निवृत्तिः अननुष्ठानं इति यावत् । स च द्विविधः, प्राप्तबाधः अप्राप्तबाधश्चेति । यत्र अतिदेशसा-मान्यशास्त्रादिजनिते ज्ञाने अंशे सर्वविषये वा 'मिथ्येदं' इति प्रत्ययान्तरं भवति स प्राप्तबाधः । यत्र तु लिङ्गादौ श्रुतिकल्पनाप्रतिबन्धात् ज्ञानोत्पत्तिरेव प्रतिबध्यते असौ अप्राप्तबाधः इति । अनयोश्च मध्ये पूर्वो मिश्रैः 'प्रमेया-पहारलक्षणो बाधः' इत्यपि व्यवहृतः । उत्तरश्च 'मूलो-च्छेदलक्षणः' इत्यपि । तत्र प्राप्तबाधोऽपि द्विविधो नित्यो वैकल्पिकश्च । तत्र नित्यस्तावत् एकविंशति-भेदः । तद्यथा [१] प्रत्यक्षेण तदाभासो बाध्यते । [२] अनुमानेन तदाभासः । [३] शब्देन तदा-भासः । [४] उपमानेन तदाभासः । [५] अर्थापत्त्या तदाभासः । [६] अभावेन तदाभासः । एते षट् लौकिका बाधाः । अथ शास्त्रीयाः । [१] नित्यं नैमित्तिकेन, यथा दर्शपूर्णमासयोः 'पञ्चदश सामिधेनीरनुब्रूयात्' इति नित्यं पाञ्चदश्यं 'सप्तदश वैश्यस्य' इति वैश्यनिमित्तकेन साप्तदश्येन वैश्यकर्तृके प्रयोगे बाध्यते । [२] उभयमपि क्रत्वर्थं पुरुषार्थेन, यथा– पूर्वोक्तं पाञ्चदश्यं साप्तदश्यं च 'एकविंशतिमनुब्रूयात् प्रतिष्ठा-कामस्य' इति काम्येन एकविंशतित्वेन बाध्यते । [३] पूर्वं परेण, यथा– 'यद्युद्गाताऽपच्छिद्येत अदक्षिणो यज्ञः परिसमाप्यते, यत् पूर्वस्मिन् दास्यन् स्यात् तद्दद्यात् । यदि प्रतिहर्ता सर्ववेदसं दद्यात्' इति द्वयोर्निमित्तयोः द्वे नैमित्तिके विहिते, तत्र निमित्तयोः पौर्वापर्ये परेण नैमि-त्तिकेन पूर्वनैमित्तिकं बाध्यते । [४] प्राकृतमर्थलोपेन बाध्यते, यथा– कृष्णलचरौ अवघातः प्राकृतश्चोदकप्राप्तो वैतुष्यरूपार्थलोपात् । यथा वा स्वयंदिते बर्हिषि लवनं प्राप्तिरूपार्थलोपात् । [५] प्राकृतमेव पर्युदासेन बाध्यते, यथा 'न होतारं वृणीते' इति पित्र्यायां श्रुतम्, तत्र वैधनिषेधे विकल्पप्रसक्तेः पर्युदासत्वं नित्य-बाधार्थं दशमे उक्तम् । (१०।८।१।१–४) । [६] प्राकृतमेव प्रत्याम्नानेन बाध्यते, तदपि आरभ्या-धीतेन अनारभ्याधीतेन वेति द्विधा । आद्योदा-हरणं यथा– 'कुशमयं बर्हिर्भवति' इति प्रकृतितः प्राप्ताः कुशाः 'शरमयं बर्हिर्भवति' इति विकृतौ (सौमारौद्रादौ) विहितैः शरैर्बाध्यन्ते ! (७) द्वितीयो-दाहरणं यथा– 'य इष्ट्या' इत्यनारभ्य विहितेन सद्यस्कालत्वेन विकृतिषु अतिदिष्टद्वैयहकालस्य बाधः ।

[८] सामान्यविहितं विशेषविहितेन बाध्यते । तदपि विधेयभेदे विधेयैक्ये वेति द्विधा । तत्राद्योदाहरणं यथा–पदेन आहवनीयस्य बाधः । [९] द्वितीयोदाहरणं उपसंहारः । [१०] सामान्यविशेषबाधो न वाक्यानेकत्वे एव, किन्तु वाक्यैक्येऽपि, यथा– सप्तमे (७।३।५।१६) उक्तं 'वारुण्या निष्कासेन' इति द्रव्यविशेषेण अवभृथ-नाम्ना सामान्यतोऽतिदिष्टः पुरोडाशो बाध्यते । [११] निष्प्रयोजनं सप्रयोजनेन बाध्यते, यथा निगदेषु पर-संबोधनार्थेषु तदर्थं कल्पितविधिनाऽपि प्राप्तेन उच्चैस्त्वेन उपांशुत्वम् 'उपांशु यजुषा' इत्यनेन प्राप्तं बाध्यते । [१२] अल्पं भूयसा बाध्यते, यथा– पञ्चदशरात्रे नाम्नां मिथश्चिन्तायां (१२।२।७।२२) एकं अग्निष्टु-न्नाम आग्नेयीसुब्रह्मण्याप्रवर्तकं अनेकैन्द्रीसुब्रह्मण्याप्रवर्तकेन ज्योतिरादिनाम्ना बाध्यते । [१३] सावकाशं निरवकाशेन, यथा – 'यत्किञ्चित् प्राचीनं' इति वीप्सार्थकयत्कि-ञ्चिच्छब्दवशेन अग्नीषोमीयप्राग्भावि–पदार्थविशेषोद्देशेन विहितं दीक्षणीयातोऽन्यत्रापि सावकाशमुपांशुत्वं दीक्षणी-यादिमात्रार्थेन 'यावत्या' इति स्वरेण अन्यत्र निरव-काशेन बाध्यते । तथा विशेषसमाख्यया सामान्यसमा-ख्याबाधोऽपि तार्तीयः (३।७।२०।४१–४२) अत्रो-दाहरणम् । [१४] अङ्गं प्रधानेन बाध्यते, यथा– पवमानेष्टिषु अग्निहोत्रहवणी निर्वापेण बाध्यते । अङ्गधर्मः प्रधानधर्मेण बाध्यते, यथा– दीक्षणीयायाः पर्वकालत्वं सुत्यापर्वकालत्वेन । [१५] उपादेयं अनुपादेयेन, यथा –सांतपनीयोत्कर्षे अग्निप्रणयनं कालेन बाध्यते ।

त इमे पञ्चदश शास्त्रीयबाधभेदाः, पूर्वे च लौकिकाः षट्, इति एकविंशतिर्बाधभेदाः ।

प्रसङ्गलक्षणोऽपि बाधः प्राप्तबाध एव । स तु सप्त-विधः । [१] प्रधानप्रसङ्ग एकः प्रकारो यथा– काम्यार्थेन अग्निहोत्रादिप्रयोगेण नित्यतत्प्रयोगस्य प्रसङ्ग-सिद्धिः । अङ्गप्रसङ्गस्तु षोढा । तद्यथा औपदेशिकेनाङ्गेन औपदेशिकस्य प्रसङ्गः । [२] तत्रापि नैमित्तिकेन नित्यस्य यथा– वैश्यनिमित्तकसाप्तदश्येन नित्यस्य पाञ्च-दश्यस्य । [३–४] तथा काम्येन नित्यस्य नैमित्ति-कस्य च यथा– प्रतिष्ठार्थेन एकविंशतित्वेन पाञ्चदश्यस्य नित्यस्य, वैश्यनिमित्तकस्य च साप्तदश्यस्य । [५] औपदेशिकेन आतिदेशिकस्य यथा– दर्शार्थेन प्रयाजा-दिना निशीष्ट्यर्थस्य प्रयाजादेः । [६] आतिदेशिकेन आतिदेशिकस्य यथा– पश्वर्थेन प्रयाजादिना पशुपुरो-डाशार्थस्य प्रयाजादेः । [७] आतिदेशिकेन औपदेशि-कस्य यथा – 'एकविंशतिमनुब्रूयात् प्रतिष्ठाकामस्य' इति काम्ये अनुवचनान्तरे नित्यानुवचनप्रकृतिके अति-दिष्टाभिः सामिधेनीभिः प्राकृतसामिधेनीकार्यस्य अग्नि-समिन्धनस्य प्रसङ्गतः सिद्धेः तासां बाधः ।

ते इमे सप्त प्रसङ्गलक्षणाबाधाः पूर्वैः एकविंशति-संख्यैः बाधैः सह अष्टाविंशतिर्बाधभेदाः सिद्धाः । वैकल्पिकस्तु प्राप्तबाधः पूर्वमुद्दिष्टः, सोऽपि विभक्त-विभागेन चतुर्विधः । तथाहि औपदेशिकेन औपदे-शिकस्य कश्चित् । सोऽपि चतुर्धा, भावयोः भावाभाव-योश्च । द्विविधोऽपि चायं प्रकृतौ विकृतौ चेति । [१] तत्र प्रकृतौ उपदिष्टयोर्भावयोर्यथा– व्रीहियवयोः । [२] विकृतौ उपदिष्टयोर्भावयोर्यथा– 'खादिरो यूपो भवति' 'बैल्वो यूपो भवति' इति । [३] प्रकृतौ उपदिष्टयोः भावाभावयोर्यथा– 'अग्निहोत्रे न दध्यधिश्रयेत्, अधि-श्रयेदित्येके' इति । [४] विकृतौ उपदिष्टयोः भावा-भावयोर्यथा – 'अतिरात्रे षोडशिनं गृह्णाति, नातिरात्रे षोडशिनं गृह्णाति' इति ।

कश्चित्तु उपदिष्टेन अतिदिष्टस्य वैकल्पिको बाधः, स तु त्रिविधः उपदिष्टेन भावेनातिदिष्टस्य भावस्य वैकल्पिको बाधः । [५] यथा पित्र्यायां 'द्वौ त्रीन् वा परिधीन् परिदध्यात्' इत्यापस्तम्बसूत्रम् । अत्र हि प्राकृतपरिधानानुवादेन त्रित्वस्यापि विधौ वाक्यभेदापत्तेः परिधिद्वयमेव वैकल्पिकतया विधीयते, तदभावपक्षे अतिदेशप्राप्तमेव परिधित्रित्वमनूद्यते । [६] उपदिष्टेन भावेन अतिदिष्टस्याभावस्य वैकल्पिको बाधः, स च तत्र यत् प्रकृतौ किञ्चिन्नियमेन निषिद्धम्, विकृतौ तदेव वैकल्पिकतया विधीयते, तादृशमुदाहरणं मृग्यम् । [७] उपदिष्टेनाभावेन अतिदिष्टस्य भावस्य वैकल्पिको बाधो यथा – पशौ आज्यभागौ अतिदेशतः प्राप्तौ 'न तौ पशौ

करोति' इति निषेधात् बाध्येते। उपदिष्टेनाभावेन अतिदिष्टस्याभावस्य वैकल्पिको बाधो नैव संभवति इति।

ते एते वैकल्पिकाः सप्त बाधभेदाः। एकचत्वारिंशत्तु वैकल्पिकबाधभेदाः द्वादशाध्यायार्थनिरूपणे एकचत्वारिंशद्विधविकल्पोक्त्या अर्थात् वक्ष्यन्ते। तेन इमे सप्त वैकल्पिकबाधभेदाः तैः एकचत्वारिंशत्संख्यैः वैकल्पिकबाधभेदैः सह अष्टाचत्वारिंशद्वैकल्पिकबाधभेदाः, पूर्वोक्ताश्च अष्टाविंशतिः नित्यबाधभेदाः मिलित्वा षट्सप्ततिः प्राप्तबाधभेदाः सिद्धाः। यदा तु वक्ष्यमाणैकचत्वारिंशद्वैकल्पिकबाधभेदवत् पूर्वोक्ताः अष्टाविंशतिसंख्या अपि नित्यबाधभेदाः जातिद्रव्यगुणक्रियादिविषयत्वेन भिन्ना निरूप्यन्ते, तदा ते द्वादशोत्तरं शतं भवन्ति। तेनैते नित्यैः अष्टाचत्वारिंशत्संख्यैः प्राप्तबाधभेदैः सह षष्ट्यधिकं शतं प्राप्तबाधभेदाः सिद्धाः। इति प्राप्तबाधभेदनिरूपणम्।

अथ अप्राप्तबाधभेदा उच्यन्ते। ते च विभक्तत्रिभागेन पञ्चविंशत्यधिकं शतचतुष्टयं भवन्ति। तथाहि, प्रत्यक्षेण अनुमानादीनि पञ्च बाध्यन्ते इति ते पञ्च बाधभेदाः। प्रत्यक्षव्यतिरिक्तानां तु मध्ये यदेव प्रथमं प्रवृत्तम्, तेनोत्तरस्य उत्पत्तिप्रतिबन्धः एव भवति। तेन अनुमानकृताश्चत्वारो बाधभेदाः, उपमानकृताश्चत्वारः, शब्दकृताश्चत्वारः, अर्थापत्तिकृताश्चत्वारः, अभावकृताश्चत्वारः। यौगपद्ये तु द्वयोर्द्वयोः प्रमाणयोः सामग्र्योरेकविषयत्वेन विरोधे अन्योन्यप्रतिबन्धात् प्रमाणसंप्लव एव ज्ञानानुत्पत्तिलक्षणः इति नैयायिकाः। ते इमे लौकिकाः पञ्चविंशतिर्बाधभेदाः।

अथ शास्त्रीयाः अप्राप्तबाधभेदा उच्यन्ते। श्रुत्या लिङ्गादीनि पञ्च बाध्यन्ते, लिङ्गेन वाक्यादीनि चत्वारि, वाक्येन प्रकरणादीनि त्रीणि, प्रकरणेन क्रमादिद्वयम्, क्रमेण समाख्या इति ते एते पञ्चदश बाधभेदाः, यत्र एकः शेषो द्वयोः शेषिणोः द्वाभ्यां प्रमाणाभ्यां विनियुज्यते तत्रापि संभवन्ति, यथा एका ऐन्द्री श्रुत्या गार्हपत्ये, लिङ्गेन इन्द्रे, तथा यत्र एकस्मिन् शेषिणि द्वौ शेषौ द्वाभ्यां प्रमाणाभ्यां विनियुज्येते, तत्रापि संभवन्ति, यथा— एकस्मिन् गार्हपत्ये शेषिणि श्रुत्या ऐन्द्री, लिङ्गेन या का चित् प्रकृता आग्नेयी सामान्यसंबन्धापेक्षत्वात् इति त्रिंशत्। ते च पूर्वोक्तैः पञ्चविंशतिसंख्यैः लौकिकैः प्रत्यक्षादिबाधभेदैः सह पञ्चपञ्चाशत् बाधभेदाः संपन्नाः।

[१] श्रुत्यादिषु च यथा विजातीयैर्विजातीयानां बाधः, एवं सजातीयैः सजातीयानामपि बाधः। तद्यथा श्रुत्या तावत् श्रुतिर्बाध्यते, तदुक्तम् 'तथा पश्वङ्गमेकत्वं पदश्रुत्या प्रतीयते। समानप्रत्ययश्रुत्या बलीयस्या क्रियाङ्गता॥' इति (वा. पृ. ८४०)। [२] तथा असंदिग्धश्रुत्या संदिग्धश्रुतिबाधो यथा— आमिक्षायागे वैश्वदेवी इत्यसंदिग्धतद्धितश्रुत्या वाजिभ्यः इति चतुर्थी पञ्चमीत्वेन संदिग्धायाः श्रुतेर्बाधो गुणाधिकरणे (२।२।९।२३) उक्तः। [३] लिङ्गेनापि लिङ्गं बाध्यते, यथा—'स्योनं ते सदनं कृणोमि' इत्यत्र मन्त्रे उभयोरर्थयोः कर्मसमवेतस्वस्वार्थप्रकाशनसामर्थ्येन 'तस्मिन्' इत्येकवाक्यतोपगमनसामर्थ्यात्मकं लिङ्गं बाध्यते। [४] वाक्येनापि वाक्यं बाध्यते, यथा— 'प्रोक्षिताभ्यामुलूखलमुसलाभ्यामवहन्ति' इत्यत्र प्रोक्षिताभ्यां इति तृतीयायाः क्तप्रत्ययोक्तोलूखलमुसलगतकरणकारकानुवादित्वात् श्रौतविनियोगाभावेन वाक्यीयविनियोगे सति असौ वैयधिकरण्यान्नावघाते, किन्तु उलूखलमुसलयोरेव इति नवमे 'उत्पत्तिसंयोगात्' इत्यधिकरणे (संस्कारे युज्यमानानां० ९।१।२।२–३ इत्यधिकरणे) वक्ष्यते।

यत्तु अत्र (वाक्ययोर्विरोधे) वार्तिके उदाहरणमुक्तं (३।३।७।१४ पृ. ८४०) 'पञ्चदश सामिधेनीरनुब्रूयात्' 'सप्तदश सामिधेनीरनुब्रूयाद्वैश्यस्य' इति। 'उभयत्रापि हि सामानाधिकरण्यात् एकवाक्यत्वकृते विनियोगे सति निमित्तविशेषसंयोगात् साप्तदश्यं बलीयो भवति' इति। तदयुक्तम्। निमित्तनैमित्तिकन्यायेनैव तत्र बाधसिद्धेः। किञ्च नैमित्तिकत्वेन बाधः प्राप्तबाधः, तेन वाक्यान्तरत्वे अपूर्वे नित्यपाञ्चदश्यज्ञानोत्पत्तेः स एव युक्तः, वाक्ययोस्तु अन्योन्यं बाधः अप्राप्तबाधः, स वाक्यैकत्वे एव युक्तः अवघातसमभिव्याहारनिमित्तबोधानुत्पत्तेः इति। [५] प्रकरणेन प्रकरणं बाध्यते, यथा— 'अभिक्रामं जुहोति' इत्यवान्तरप्रकरणेन महाप्रकरणम्। महाप्रकरण-

मपि महाप्रकरणेन बाध्यते, यथा ज्योतिष्टोमप्रकरणेन नित्यानित्यसंयोगविरोधसहकृतेन संस्थाप्रकरणम्। [६] क्रमेणापि क्रमो बाध्यते, यथा— ऐन्द्राग्नयोः कर्मणोः ऐन्द्राग्नयोश्च याज्याऽनुवाक्यायुगलयोः यथासंख्यक्रमेण देशसामान्यलक्षणेन पौर्वापर्यप्रत्यासत्तिक्रमो युगलयोरनियमेन कर्मद्वये प्रापको बाध्यते। [७] समाख्ययाऽपि समाख्या बाध्यते, यथा— विशेषसमाख्यया सामान्यसमाख्यायाः। यथोक्तं तृतीये 'तस्योपदेशसमाख्यानेन निर्देशः' (३।७।२०।४१) इत्यधिकरणे।

ते एते सप्त बाधभेदाः शेषशेषिभेदेन द्विगुणाः, पूर्वोक्तैः पञ्चपञ्चाशत्संख्यैः अप्राप्तबाधभेदैः सह द्विषष्टिः अप्राप्तबाधभेदाः सिद्धाः।

शब्दान्तरादीनां तु मिथः समवायाभावात् न बाधभेदाः संभवन्ति। क्रमप्रमाणानामपि श्रुतिलिङ्गादिवत् षण्णां पञ्चदश बाधभेदाः। तत्र तु तार्तीयवत् न सूत्रक्रमेण बलाबलम्, किन्तु अन्यथा। तथा च निरालम्बनवादे श्रुत्यर्थपाठस्थानमुख्यासत्तिप्रवृत्तिभिः इत्ययथासूत्रमनुक्रम्य विरोधे सति दौर्बल्यमेतेषामपि पूर्ववत् इत्युक्तम्। पूर्ववत् श्रुतिलिङ्गादिवदित्यर्थः। सूत्रक्रमेण बलाबले सति अवदानाभिघारणासादनेषु प्रवृत्तिक्रमात् मुख्यक्रमस्य बलीयस्त्वं पञ्चमोक्तं (५।४।२।२–४) विरुध्येतेति। ते च श्रुत्यर्थादीनां षण्णां पञ्चदश बाधभेदा एवम्— श्रुतिः पञ्चभ्योऽपि बलीयसी इति स्पष्टमेव, तेन श्रुत्या अर्थादीनां पञ्चानां पञ्च बाधाः॥ अर्थाख्यप्रयोजनविरोधे यागादीनामप्रसरात् तैः क्रमकल्पनाऽसंभवात् अर्थेन पाठादीनां चतुर्णां चत्वारो बाधाः॥ पाठः स्थानादित्रिभ्यो बलवान् इति स्फुटमेव। स हि श्रुतिवत् आम्नातेन प्रत्यक्ष एव। स्थानादिषु तु न तदस्ति। श्रुतिस्तु साक्षात् क्रमविषयैव, न पाठः, इति श्रुतितो भेदः। तेन ते त्रयो बाधाः॥ स्थानमपि मुख्यप्रवृत्तिभ्यां प्रबलं इत्यसंदिग्धम्। पाठे हि क्रमवतोर्ज्ञाने प्रत्यक्षक्रमेण जाते अनुभवक्रमेण स्मृतिः, तत्क्रमेण चानुष्ठानक्रमः। स्थाने तु आश्विनग्रहणेन सवनीयमात्रज्ञानम्, पश्वन्तरस्य तु चोदकादवश्यकर्तव्यत्वात् 'सह पशून्' इति साहित्यसंपत्त्यै सवनीयानन्तर्याक्षेपमात्रं परिशेषात् प्रयोगविधिना, न तु पश्वन्तरस्य सवनीयानन्तरं ज्ञानं पाठेनेवास्ति। मुख्यक्रमे तु मुख्यस्यैव ज्ञानमस्ति, न तु क्रमवतोरन्यतरस्यापि पाठेनेव ज्ञाने स्तः। एवं प्रवृत्तावपि क्रमवद्भ्यां पूर्वयोरेव ज्ञाने सिद्धे, न तु क्रमवतोरन्यतरस्यापि पाठेनेव, तेन तौ द्वौ बाधौ॥ मुख्यक्रमोऽपि प्रवृत्तेः प्रबलः। पूर्वो हि प्रधानानां अङ्गासत्त्यर्थः, उत्तरस्तु अङ्गानामेव परस्परप्रत्यासत्त्यर्थः, इति अङ्गगुणविरोधन्यायादेव (१२।२।९।२०) अयं बाधः सिद्धः॥ इति पञ्चदशैते बाधाः। तदेते पञ्चदशापि बाधाः 'विप्रतिपत्तौ वा प्रकृत्यन्वयाद्यथाप्रकृति' इति सूत्रे (५।१।१०।१८) तन्त्ररत्ने उक्ताः। 'श्रुत्यादिचतुष्टयं मुख्यप्रवृत्तिभ्यां सर्वत्र बलीयः। षण्णामपि हि श्रुत्यादीनां पूर्वपूर्वबलीयस्त्वं तत्रतत्र साधयिष्यते' इति। अत्रोदाहरणानि। तत्र श्रुत्या अर्थबाधे स्थितोदाहरणाभावात् कृत्वाचिन्तान्यायेन उदाहरणमुक्तं तन्त्ररत्ने 'क्रमकोपोऽर्थशब्दाभ्यां' इत्यधिकरणे (५।४।१।१) 'श्रुत्यर्थयोर्विरोधस्तु नैव क्व चन संभवी। यथाश्रुत्येव हि न्याय्यमर्थस्य परिकल्पनम्॥ कृत्वाऽग्निहोत्रं पक्तव्या यवागूरिति हि श्रुते। पाकोऽदृष्टार्थ एव स्यादनुष्ठानं च पश्चिमम्॥' इति। अनुष्ठानं च पश्चिमं होमोत्तरं स्यात् इत्यनुषङ्गः॥ अर्थेन तु पाठबाधः क्रमकोपाधिकरणे (५।४।१।१) एव 'अग्निहोत्रं जुहोति' 'यवागूं पचति' इत्युदाहृत्य सिद्धान्तितः। इति अर्थतो दुर्बलस्य पाठस्य श्रुतितो दौर्बल्यं कैमुतिकन्यायेन अर्थादेव सिद्धं इति तदुदाहरणानुक्तिः॥ एवं अस्मदुक्तबलाबलरीत्या पाठात् दुर्बलस्य स्थानस्य, श्रुत्यर्थाभ्यां सुतरां दौर्बल्यं कैमुतिकन्यायसिद्धम्। तत्र तु श्रुतिस्थानयोः अर्थस्थानयोश्च बाधोदाहरणे पञ्चमे अनुक्तत्वात् न स्तः इति गम्यते॥ पाठेन स्थानबाधे तूदाहरणं 'प्राकृताच्च पुरस्ताद्यत्' इत्यधिकरणे (५।२।११।२२) उक्तम्। सावित्रहोमोखासंभरणाद्यपूर्वपदार्थान् विधाय दीक्षणीयादयः प्राकृताः सगुणाः श्रुताः, तत्र प्राकृतेन दीक्षणीयाप्राचीनेन पदार्थेनोपस्थितानां दीक्षणीयादीनां स्थानेन प्रागनुष्ठाने ततः प्राक् पाठः सावित्रहोमादेर्न स्यात् इति पाठक्रमेण स्थानात् क्रमो बाध्यते इति॥

पाठेन मुख्यक्रमबाधे तूदाहरणं 'प्रकृतौ तु स्वशब्दत्वात्०' इत्यधिकरणे (५।१।८।१५) उक्तम्। अग्नीषोमीयनिर्वापः आज्यनिर्वापोत्तरं मुख्यक्रमात् प्राप्तः औषधनिर्वापत्वेन आज्यनिर्वापात् प्राक् पाठात्तथैव कार्यः इति ।। मुख्यक्रमेण प्रवृत्तिक्रमबाधे तूदाहरणं 'अवदानाभिघारणासादनेष्वानुपूर्व्यं प्रवृत्त्या स्यात्' इत्यधिकरणे (५।४।२।२–४) उक्तम्। सांनाय्यधर्मा हि पूर्वे प्रवृत्ताः पश्चादाग्नेयधर्माः, प्रदानं तु आग्नेयस्य प्रथमम्, पश्चात् सांनाय्यस्य ततः स्विष्टकृदवदानम्। प्रयाजशेषाभिघारणं वेद्यामासादनं तु सांनाय्यस्य पूर्वं प्रवृत्तिक्रमात् प्राप्तम्, मुख्यक्रमात्तु आग्नेयस्य पूर्वं कार्यमिति ।। एवं पञ्चदशानां बाधानां मध्ये अर्थेन पाठबाधः, पाठेन स्थानबाधः, पाठेन मुख्यबाधः, मुख्येन प्रवृत्तिबाधश्च इत्येतेषां चतुर्णां बाधभेदानामुदाहरणानि चत्वारि चतुर्ष्वधिकरणेषु विशेषत उदाहृतान्युक्तानि। आद्यबाधभेदोदाहरणं च 'क्रमकोपोऽर्थशब्दाभ्याम्' इति जैमिनिनैव कृत्वाचिन्तयोपनिबद्धमुक्तम्। इतरेषां तु दशानां बाधभेदानामुदाहरणानि अनुपलम्भात् पञ्चमे नोक्तानि अस्माभिश्चेतं ।। श्रुत्यर्थादिषु च श्रुतिलिङ्गादिवत् सजातीयानामपि अन्योन्यबाधाः श्रुत्योः, अर्थयोः, स्थानयोः, मुख्ययोः, प्रवृत्त्योश्च इत्येवंविधाः उदाहरणासंभवात् पञ्चमे न चिन्तिताः। पाठयोस्तु विधिमन्त्रगतयोर्मन्त्रगतो बलवान् इत्युक्तं 'मन्त्रतस्तु विरोधे स्यात्' इत्यधिकरणे (५।१।९।१६) अग्नीषोमीयब्राह्मणं प्राक् पठितम्, पश्चादाग्नेयब्राह्मणम्, मन्त्रकाण्डे तु प्रागाग्नेयस्य याज्यानुवाक्यायुगलम्, ततोऽग्नीषोमीयस्य, तत्र मन्त्रपाठक्रमेण विधिपाठक्रमबाधात् आग्नेयः पूर्वमनुष्ठेयः पश्चादग्नीषोमीयः इति । ते एते षोडश बाधभेदाः पूर्वोक्तैर्द्विषष्टिसंख्यैः बाधभेदैः सह अष्टसप्ततिः अप्राप्तबाधभेदाः सिद्धाः ।

तथा श्रुत्या स्मृतिर्बाध्यते। यथा– 'औदुम्बरीं स्पृष्ट्वोद्गायेत्' इति श्रुत्या 'औदुम्बरी सर्वा वेष्टयितव्या' इति स्मृतिः ।। तथा श्रुत्या आचारो बाध्यते। यथा– अपशब्दप्रयोगरूप आचारः 'तस्माद् ब्राह्मणेन न म्लेच्छितवै' इति निषेधरूपया श्रुत्या ।। तथा स्मृत्याऽपि आचारो बाध्यते । यथा– 'मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च । समानप्रवरां चैव त्यक्त्वा चान्द्रायणं चरेत् ।।' इति स्मृत्या मातुलकन्यापरिणयनाचारो दाक्षिणात्यानाम् ।। तथा प्रत्यक्षवैदिकलिङ्गेन स्मृतिर्बाध्यते । अत्रोदाहरणं सोमेश्वरेणोक्तम् । मातुलकन्योद्वाहनिषेधस्मृतिः पूर्वोक्ता श्रौतलिङ्गेन बाध्यते । श्रौतलिङ्गत्रयं च तत्रोक्तम्। 'गर्भे नु नौ जनिता दंपती कर्देवस्त्वष्टा सविता विश्वरूपः' इत्येकम्, 'आ याहीन्द्र पथिभिरीळितेभिः' इत्यपरं मन्त्ररूपम्, वाजसनेयके 'स्रुचौ व्यूहति, प्राचीं जुहूं प्रतीचीमुपभृतम्' इति स्रुग्व्यूहनविधिवाक्यशेषरूपम् 'तस्मात् समानादेव पुरुषादत्ता चाद्यश्च जायते, उत तृतीये संगच्छामहै, चतुर्थे संगच्छामहै' इति तृतीयम् । तदर्थः तन्निरासश्च शास्त्रदीपिकाप्रकाशेऽस्मत्कृतो विस्तरभयान्न इहोक्तः । इदं तु तत्रोदाहरणं 'आशसनं विशसनमथो अधिविकर्तनम्। सूर्यायाः पश्य रूपाणि तानि ब्रह्मानुशुन्धति ।।' इति । सूर्याख्याया नववध्वाः आशसनविशसनविकर्तनाख्य — वस्त्रत्रयधारणविषयश्रौतमन्त्रलिङ्गेन 'सूर्याविदे वधूवस्त्रं दद्यात्' इति स्मृतेः एकवस्त्रधारणार्थायाः बाधः ।। तथा प्रत्यक्षवैदिकलिङ्गेन आचारो बाध्यते। यथा यववराहाधिकरणे (१।३।४।८–९) 'यदा वा अन्या ओषधयो म्लायन्ते अथैते मोदमाना इवोत्तिष्ठन्ति' इत्यर्थवादलिङ्गेन प्रियङ्गुषु यवशब्दप्रयोगरूप आचारो बाध्यते ।। एवं श्रुतिस्मृत्याचारसंबद्धाः पञ्च बाधभेदाः पूर्वोक्तैः अष्टसप्ततिसंख्यैः बाधभेदैः सह त्र्यशीतिः अप्राप्तबाधभेदाः सिद्धाः ।

तथा [१] आप्तस्मृत्या अनाप्तस्मृतिर्बाध्यते, यथा 'नात्मानं घातयेत्' इति मन्वादिस्मृत्या 'केदारे पातयेद्देहं' इति पाखण्डयादिस्मृतिः ।। [२] तथा अविगीतस्मृत्या विगीतस्मृतिर्बाध्यते, यथा– 'न स्तेनः स्यात्' इत्यनया 'तथैव सप्तमे भक्ते भक्तानि षडनश्नता । अश्वस्तनविधानेन हर्तव्यं हीनकर्मणः ।।' इत्याप्तस्मृतिरपि दण्डाभावमात्रपरा अल्पदोषपरा च ।। [३] अदृष्टार्थस्मृत्या दृष्टार्था स्मृतिर्बाध्यते, यथा– 'न जातु ब्राह्मणं हन्यात्' इत्यनया 'जिघांसन्तं जिघांसीयात्' इत्यात्मरक्षणादिदृष्टार्था ।। [४] एवं आप्ताचारेण अनाप्ताचारो

बाध्यते, यथा– पील्वधिकरणे (१।३।५ शा.) उक्तं वृक्षविषयपीलुशब्दप्रयोगरूपाचारेण हस्तिविषयम्लेच्छरूपानासप्रयोगरूपाचारबाधः इति ।। [५] तथा अविगीताचारेण विगीताचारो बाध्यते, यथा– दाक्षिणात्यानां मांसभक्षणवर्जनाचारः प्राच्यादीनां च मांसभक्षणाचारः । तत्रोभाभ्यां आचाराभ्यां श्रुत्यनुमानं सामान्यत एव स्यात् दाक्षिणात्यप्राच्याद्युपपदकल्पनायाः होलाकाधिकरणन्यायेन (१।३।७।१५–२३) निरस्तत्वात् । ततश्च किं विकल्पः उत अन्यतरेणान्यतरबाधः, बाधेऽपि केन कस्य इति वीक्षायां लोभादिमूलकत्वेन भक्षणाचारस्य विगीतस्य असंभवल्लोभादिमूलकेन अविगीतेन वर्जनाचारेण बाधः ।। [६] तथा अदृष्टार्थेन आचारेण दृष्टार्थः आचारो बाध्यते, यथा– वसन्तोत्सवाद्याचारेण 'अपिवा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन्' इति वर्णके (१।३।३।७ शा.) श्रुतिकल्पनोक्तेः अदृष्टार्थेन तत्समानकालीनस्य यस्य कस्य चित् दृष्टार्थस्याचारस्य बाधः ।।

तदेते षट् स्मृत्याचारसंबद्धा बाधभेदाः पूर्वोक्तैः त्र्यशीतिसंख्यैर्बाधभेदैः सह एकोननवतिः बाधभेदाः सिद्धाः ।

तथा ऐन्द्या इतिवत् तृतीयादिप्रभवया स्मृत्या लिङ्गादिसमाख्यान्तप्रभवा बाध्यते । यथा 'पुत्रं प्रतिग्रहीष्यन् निवेशनस्य मध्ये व्याहृतिभिर्हुत्वा' इत्याद्यया होमादीतिकर्तव्यतायुक्तपुत्रप्रतिग्रहादिविषयत्वात् विधिश्रुतितृतीयाश्रुतिप्रभवया स्मृत्या 'न शेषो अग्ने अन्यजातमस्ति' इत्यादेः शेषः अपत्यं अन्योत्पादितं नास्ति इत्यर्थत्वेन दत्तकपुत्रनिषेधलिङ्गत्वात् तत्प्रभवा 'यस्य ये बीजिनो जातास्तस्य ते नेतरस्य तु' इत्याद्या इति ।

तेन एतेऽपि पञ्चदश भेदाः शेषसमवाये, पञ्चदश च शेषिसमवाये इति त्रिंशत् । ततश्चैते पूर्वोक्तैः एकोननवतिबाधभेदैः सह एकोनविंशत्यधिकं शतं अप्राप्तबाधभेदाः सिद्धाः ।

[१] तथा विधिप्रभवया स्मृत्या अर्थवादप्रभवा सा बाध्यते, यथा – 'मा गामनागामदितिं वधिष्ट' इतिविधिप्रभवया 'गां न हन्यात्' इत्यनया 'तद्यदेवादो मनुष्यराज आगते अन्यस्मिन् वाऽर्हति, उक्षाणं वा वेहतं वा क्षदन्ते' इत्यर्थवादप्रभवा 'महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेत्' इति ।। [२] तथा संदिग्धमसंदिग्धेन, यथा– शर्कराञ्जनं केन इति संदिग्धं घृतस्तुत्या ।। [३] तथा दुर्बलाश्रयं बलवदाश्रयेण बाध्यते, यथा– दुर्बलक्रमाश्रयं 'वेदं कृत्वा वेदिं करोति' इति वेदवाक्यं बलवत्पदार्थाश्रयेण 'क्षुते आचामेत्' इति स्मृतिवाक्येन ।। [४] तथा उपसंहारस्थं उपक्रमस्थेन, यथा– 'उच्चैर्ऋचा' इत्याद्युपसंहारस्थं ऋगादिपदं वेदोपक्रमेण ।। [५] तथा अत्यन्तादृष्टार्थं नियमादृष्टार्थेन, यथा– अवघाते आज्यसांनाय्यार्थत्वमौषधार्थत्वेन ।। [६] आरादुपकारित्वं संनिपातित्वेन, यथा– पशुपुरोडाशादौ ।। [७] अनेकार्थविधानं अल्पार्थविधानेन बाध्यते, यथा– 'दध्ना जुहोति' इत्यादौ विशिष्टविधिर्गुणविधिना ।। [८] तथा अनेकार्थत्वं एकार्थत्वेन बाध्यते, यथा– आकृत्यधिकरणे (१।३।९।३०–३५ वर्णकं २) ।। [९] तथा अनेकशब्दत्वं एकशब्दत्वेन बाध्यते, यथा– व्याकरणाधिकरणे (१।३।८।२४–२९) ।। [१०] बहुबाधः अल्पबाधेन बाध्यते, यथा– अश्वप्रतिग्रहेष्टेः प्रतिग्रहीतृविषयत्वे 'वरुणाय' इति चतुर्थ्याः पञ्चम्यर्थत्वम्, 'अनयत्' इत्यस्य च प्रतिग्रहार्थत्वम् 'स त्वां देवतां' इति च तच्छब्दस्य अप्राधान्यनिर्दिष्टवरुणपरामर्शित्वम्, दातृत्वे च वरुणस्यादेवतात्वात् देवताशब्दायोगः इति बहुबाधः । दातुरिष्टिपक्षे प्रतिगृह्णातिमात्रस्य स्वार्थत्यागः ।। [११] तथा वेदान्तरोत्पन्नं वेदान्तरविहितत्वेन बाध्यते, यथा– आधाने सामवेदोत्पन्नं वारवन्तीयादि उच्चैस्त्वेन प्राप्तं यजुर्वेदविहितत्वेन उपांशुत्वप्राप्त्या ।। [१२] तथा परशाखाविहितं स्वशाखाविहितेन बाध्यते, यथा– उदितहोमादि अनुदितहोमादिना ।। [१३] अनारभ्याधीतं प्राकरणिकेन बाध्यते, यथा– अनारभ्याधीतं साप्तदश्यं पाञ्चदश्येन । ननु इह मित्रविन्दादौ उपसंहारेणैव प्रकृतौ अनारभ्याधीतसाप्तदश्यबाधः सिद्धः, न प्रकरणाधीतपाञ्चदश्येन, इत्यसंकीर्णमुदाहरणं वाच्यं यत्र प्रकरणाधीतेनैव अनारभ्यवादो बाध्यते इति। तदुच्यते। अग्नौ श्रुतं 'यद् वेदिसंमितान् मिनुयात्' इति यूपैकादशिनीमानम्, तत्र

अप्राप्तत्वात् यच्छब्दत्यागेन विधिरङ्गीकृतो वार्तिकमते, तेन ज्योतिष्टोमे अग्निविधिना प्रकरणाधीतेन बाधितः 'रथाक्षमात्राणि यूपान्तरालानि भवन्ति' इत्यनारभ्यवादाः विकृतीः अग्निरहिताः गच्छति इति । तदिदं शाखान्तराधिकरणे उक्तं (२।४।२।८) ॥ [१४] तथा प्रयोगवचनाश्रयं चोदकाश्रयेण बाध्यते, यथा– श्येने प्राकृताङ्गेषु उद्गातुः कर्तृत्वं चोदकप्राप्तेन नानर्त्विक्कर्तृकत्वेन ॥ [१५] तथा देवताश्रयं द्रव्याश्रयेण बाध्यते, यथा– ऐन्द्रपुरोडाशे देवतासामान्यात् सांनाय्यविध्यन्तः स्यात्, स तु द्रव्यसामान्यात् प्रवृत्तेनाग्नेयविध्यन्तेन बाध्यते ॥ [१६] पश्चादाम्नातं पूर्वाम्नातेन, यथा– अध्वरकल्पायां आग्नावैष्णवद्वादशकपालस्य ऐन्द्राग्नविकारत्वात् आमावास्यतन्त्रेण सरस्वत्यां आज्यभागायां प्राप्तं पौर्णमासतन्त्रम् ॥ [१७] श्रुत्या लक्षणा बाध्यते, यथा– उद्भिदादौ नामत्वे श्रुत्या यजिसामानाधिकरण्यात् गुणविधौ प्रसक्ता मत्वर्थलक्षणा, निषादस्थपत्यादौ च ॥ [१८] श्रुत्यैव गौण्यपि बाध्यते, यथा – बर्हिर्मन्त्रप्रकाश्यं गौणं कुशसदृशं उलपादि मुख्यकुशरूपार्थेन ॥ [१९] लक्षणयाऽपि गौणी बाध्यते, यथोक्तं तद्व्यपदेशाधिकरणे (१।४।४।५) पूर्वपक्षे 'मत्वर्थोपादानेन कर्मणि प्रवृत्तौ अत्यन्तविप्रकृष्टा गौणता स्यात्' इति (वा. पृ. ३३६)। न चैतत् पूर्वपक्षोक्तिमात्रम्, सिद्धान्ते क्लृप्तत्वेन गौण्यङ्गीकरणात् अक्लृप्तत्वे दौर्बल्यस्य संमतत्वात्। दौर्बल्यबीजं तु लक्षणायां शक्यसंबन्धमात्रापेक्षणात्, गौण्यां शक्यसंबन्धिगुणसंबन्धापेक्षणात् । अत्र स्थितोदाहरणं सप्तमे (७।३।१४।३५–३६) 'पृष्ठैरुपतिष्ठते' इत्यत्र चित्राधिकरणन्यायेन स्तोत्रवचनः पृष्ठशब्द इति निर्विवादम् । स 'मासमग्निहोत्रम्' इतिवत् गौण्या हिङ्कारादिपृष्ठधर्मातिदेशार्थः इत्याशङ्क्य गौणीतो बलीयस्या लक्षणया मन्त्रा एव करणतया विधीयन्ते इति सिद्धान्तितम् । ननु 'उपान्मन्त्रकरणे' इति मन्त्रकरणके 'अभिधानेऽर्थे प्रयोजने विवक्षिते उपपूर्वात् तिष्ठतेः आत्मनेपदस्मरणात् अभिधानार्थे अग्निसमीपे तिष्ठेत् इत्याख्यातपदार्थावगमात् समीपस्थितौ च पृष्ठधर्माणां हिङ्कारादीनां अप्राकृतकार्यतापत्तेरनतिदेशः

इति न्यायान्तरेणैव सिद्धान्तः उक्तः, न लक्षणाप्राबल्यात्, इति चेत् । सत्यम्। तथापि न्यायद्वयेन सिद्धान्तसाधनं न विरुध्यते । यथा–नैमित्तिकेन साप्तदश्यादिना नित्यपाञ्चदश्यादिबाधे, यथा वा काम्येन 'एकविंशतिमनुब्रूयात् प्रतिष्ठाकामस्य' इत्यादिना नित्यनैमित्तिकयोर्बाधे तार्तीये इति ॥ [२०] तथा लक्षणानामपि मध्ये लक्षणया लक्षितलक्षणा बाध्यते, यथोक्तं नवमे (९।१।२।२–३ वर्णकं २) 'यावत्या वाचा कामयीत तावत्या दीक्षणीयायामनुब्रूयात्' इत्यादिः स्वरयोर्नियमो न लक्षितलक्षणया ज्योतिष्टोमापूर्वार्थः, किन्तु लक्षणया दीक्षाऽपूर्वार्थः एवेति ॥ [२१] तथा लक्षणानां मध्ये अजहत्स्वार्थया जहत्स्वार्था बाध्यते, पूर्वस्यां मुख्यार्थस्य वाक्यार्थान्वयात् उत्तरस्यां तदभावात् । एतद्बीजं गौणीतो मत्वर्थलक्षणायाः बलीयस्त्वाय तद्व्यपदेशाधिकरणपूर्वपक्षे वार्तिककृतोक्तं (वा. पृ. ३३६) 'गुणविधिपक्षे हि स्वार्थापरित्यागेनैव श्येनपदं तद्वन्तं उत्तरकाले लक्षयति, आरम्भोच्चारणकाले तु स्वार्थमेव विनियुङ्क्ते, भवतस्तु श्येनार्थानुपयोगात् आदित एव सादृश्यविवक्षया पदं प्रवृत्तं इत्यभ्युपगमात् श्रुतिबाधप्रसङ्गः' इति । एतच्च बीजं जहत्स्वार्थाजहत्स्वार्थलक्षणयोरपि बलाबले तुल्यम् । तत्रोदाहरणं 'सूक्तवाकेन प्रस्तरं प्रहरति' इति । अत्र हि श्रुतिविनियुक्तस्य सूक्तवाकस्य करणत्वात् तत्प्रकाश्यानां देवतानां संयोगे कल्पिते तदुपपत्त्यर्थं कल्पितो यागः प्रहरतिना लक्ष्यते, तत्र यागमात्रं न लक्ष्यते, किन्तु प्रक्षेपविशेष्यकः इति । गौतमीयास्तु यत्र शक्यलक्ष्ययोः उभयोरपि प्राधान्यं 'काकेभ्यो दधि रक्ष्यताम्' इत्यादौ तत्रैव अजहत्स्वार्था लक्षणा इत्याहुः । तत् परिभाषामात्रम्। तदिदमुदाहरणं प्रकृतिरूपैकशब्दविषयम् ॥ [२२] प्रकृतिप्रत्ययरूपशब्दभेदविषयं तु उदाहरणं यथा– 'प्रोद्गातृणां' इत्यत्र उद्गातृप्रातिपदिकं उद्गीथाख्यद्वितीयसामभक्तेर्गातुरेकस्यैव मुख्यस्य पुरुषस्याभिधायकम्, तत्र उद्गात्रादिपुरुषत्रयलक्षणा अजहत्स्वार्था बहुवचने तु एकत्वलक्षणा जहत्स्वार्था, सा पूर्वया बाध्यते इत्युक्तं तृतीये (३।५।८। २३–२६) ॥ [२३] तथा निरूढलक्षणया अनि-

रूढलक्षणा बाध्यते, उदाहरणं मृग्यम् ॥ [२४] तथा एकलक्षणया अनेकलक्षणा बाध्यते, यथा– दशमे (१०।४।१ वर्णकं २) 'रथघोषेण' इत्यत्र समाहारद्वन्द्वः इति पूर्वपक्षे पदद्वयलक्षणा स्यात्, तत्पुरुषे तु पूर्वपदे एवेति स एव युक्तः इति सिद्धान्तितम् ॥ [२५] तथा अल्पलक्षणया बहुलक्षणाया बाधः 'बहुबाधः अल्पबाधेन' इत्यत्रोदाहृतः ॥ [२६] तथा क्लृप्तया लक्षणया अक्लृप्ता लक्षणा बाध्यते, यथा– 'ऋग्भिः प्रातर्दिवि देव ईयते यजुर्वेदे तिष्ठति मध्ये अह्नः । सामवेदेनास्तमये महीयते वेदैरशून्यस्त्रिभिरेति सूर्यः ॥' इत्यत्र ऋगादिशब्दानां वेदपरा लक्षणा क्लृप्ता, इति 'उच्चैरृचा क्रियते' इत्यत्र ऋगादिशब्दा एव वेदपराः, न वेदपदं ऋगादिलक्षकं तल्लक्षणाया अक्लृप्तत्वादिति ॥ [२७] तथा लक्षणयोरपि कार्यलक्षणया धर्मलक्षणा बाध्यते, यथा– 'त्रैधातव्या दीक्षणीया' इति ॥ [२८] तथा गौणीनामपि मध्ये भूम-लिङ्गसमवायाभ्यां या गौणी तया इतरा गौणी बाध्यते। पूर्वस्यां मत्वर्थलक्षणायामिव शक्यस्यापि वाक्यार्थान्वयात्, उत्तरस्यां तदभावात् ॥ [२९] भूमलिङ्गसमवाययोरपि पूर्वया उत्तरा बाध्यते । पूर्वस्यां बहूनां शक्यानां वाक्यार्थान्वयात्, उत्तरस्यां तदभावात् ॥ [३०] तथा नियमविधिना अपूर्वविधिः बाध्यते, यथा 'उपांशु यजुषा' इति निगदेषु अपूर्वविधित्वापत्तेः यजुरन्तरेषु नियमविधिरेव अङ्गीकृतः ॥ [३१] तथा नियमविधिनैव परिसंख्याविधिर्बाध्यते, यथा– 'ऋतौ भार्यामुपगच्छेत्' इति ॥ [३२] तथा मन्त्रक्रमेण ब्राह्मणक्रमो बाध्यते, यथोक्तं मन्त्रतस्तु विरोधे स्यात्' (५।१।९।१६) इति ॥ [३३] तथा उत्पत्तिशिष्टेन उत्पन्नशिष्टं बाध्यते, यथा– आमिक्षया वाजिनम् ॥ [३४] तथा अनुवादेन विधित्वं (विध्यन्तर्गतिः) यथा– अवभृथे 'अग्नीवरुणौ स्विष्टकृतौ यजति' इति स्विष्टकृच्छब्दलक्षिते स्विष्टकृत्त्वविशिष्टाग्निकार्ये अग्नीवरुणयोर्विधौ विशिष्टस्थानापत्तेः अस्विष्टकृच्छब्दकं वचनं कार्यं इति पूर्वपक्षिते यजतिना प्राकृतस्विष्टकृद्यागमेव उद्दिश्य अग्नीवरुणयोः विधौ एकविशेष्यस्थानापत्तिरेव, द्वयोरिति विशेषणं प्राप्तमेवानूद्यते स्विष्टकृतौ इति इत्युक्तं दशमे (१०।४।१७।३४–३५)। ईदृगसंकीर्णोदाहरणादेव अनेकार्थविधिः अल्पार्थविधानेन इत्यनेनागतार्थता ॥ [३५] तथा अर्थवादत्वेन विधित्वं बाध्यते । अर्थवादायोगाद्धि विधिरुक्तः 'उपरि हि देवेभ्यो धारयति' इति । तथा 'विष्णुरुपांशु यष्टव्यः' इत्यादौ ॥ [३६] तथा प्रतिप्रसवविधिना नियमविधिर्बाध्यते, यथा– 'घृते श्रपयति' इति श्रपणप्रतिप्रसवस्य घृतनियमस्य च एकत्र वाक्ये कर्तुमशक्यत्वात् पूर्वेणोत्तरबाधे उत्पत्तिवाक्यप्राप्तघृतानुवादः इत्युक्तं दशमद्वितीयपादाद्ये ॥ [३७] तथा प्रतिप्रसवविधिना अपूर्वविधिरपि बाध्यते, यथा– 'पूषा प्रपिष्टभागः' इति पेषणस्य चरौ प्रतिप्रसवेन पशौ पुरोडाशे चापूर्वविधिः ॥ [३८] तथा वैदिकत्वसामान्योपस्थितेन अवैदिकं बाध्यते, यथा– अश्वप्रतिग्रहेष्टेर्निमित्तं वैदिकं दानम्, न लौकिकम् ॥ [३९] तथा अनपेक्षितविधिः अपेक्षितविधिना बाध्यते, यथा– सोमवमनेष्टिः वैदिकसोमस्य वमने, न तु लौकिकस्य ॥ [४०] तथा देवताविधौ तद्धितेन चतुर्थी बाध्यते, यथा– 'वैश्वदेवी' इति तद्धितेन आमिक्षायाः विश्वैर्देवैः संबन्धं बोधयता 'वाजिभ्यः' इति चतुर्थी वाजिनस्य विश्वैर्देवैः संबन्धं बोधयन्ती ॥ [४१] तथा तद्धितेनैव मन्त्रवर्णो बाध्यते, यथा– 'पात्नीवतं गृह्णाति' इति तद्धितेन निरपेक्षस्य पत्नीवतो देवतात्वं बोधयता 'अग्नाऽऽऽइ पत्नीवऽऽऽन्' इति आध्वर्यवमन्त्रवर्णः त्वष्टुर्देवतात्वप्रापकः ॥ [४२] तथा तद्धितेन द्वितीया बाध्यते, मृग्यमुदाहरणम् ॥ [४३] तथा चतुर्थ्या मन्त्रवर्णो बाध्यते, यथा– सोमेश्वरमते अग्निहोत्रे 'यदग्नये च प्रजापतये च सायं जुहोति' इति चतुर्थ्या केवलस्याग्नेर्देवतात्वप्रापिकया 'अग्निर्ज्योतिः' इति मन्त्रवर्णो ज्योतिष्ट्वविशिष्टस्याग्नेः देवतात्वप्रापकः ॥ [४४] तथा चतुर्थ्यैव द्वितीयाऽपि बाध्यते, मृग्यमुदाहरणम् ॥ [४५] तथा मन्त्रवर्णेन द्वितीया बाध्यते, यथा– उपांशुयाजे अग्नीषोमीययाज्यामन्त्रवर्णेन 'तावब्रूतामाज्यस्यैव नौ' इति द्वितीया ॥ [४६] तथा प्रतिनिधिनियमेन द्रव्यनियमविधिर्बाध्यते, यथा– पूतीकेषु ॥ [४७] तथा प्रतिनिधिनियमेनैव

अभावे विधिरपि बाध्यते, यथा– पूतीकेष्वेव ॥ [४८] तथा अनुषङ्गेण अध्याहारो बाध्यते, यथा– 'या ते अग्ने रजाशया' इत्यादौ ॥ [४९] तथा क्लृप्तया रूढ्या योगो बाध्यते, यथा– 'रथकारः' इति ॥ [५०] तथा अन्यत्र योगेन रूढिः बाध्यते, यथा– प्रोक्षणीशब्दे ॥ [५१] तथा क्लृप्तजातिवाचित्वेन संस्कारनिमित्तत्वं बाध्यते, यथा– बर्हिराज्यपुरोडाशादौ ॥ [५२] तथा क्लृप्तयोगेन संस्कारनिमित्तत्वं बाध्यते, यथा– प्रोक्षणीशब्दे एव ॥ तथा यौगिक–प्रसजद्वाक्यभेद–तत्प्रख्य–तद्व्यपदेशेषु नामधेयत्वेन गुणविधित्वं बाध्यते । निरूढेषु तु गुणविधित्वेनैव नामधेयत्वं बाध्यते सोमादिषु । एते पञ्च बाधभेदाः द्विपञ्चाशद्भिः सह सप्तपञ्चाशत् अप्राप्तबाधभेदाः पूर्वोक्तैः एकोनविंशत्यधिकशतसंख्यैः अप्राप्तबाधभेदैः सह षट्सप्तत्यधिकं शतं अप्राप्तबाधभेदाः सिद्धाः । तथा पूर्वोक्ताः षट्षष्ट्यधिकं शतं प्राप्तबाधभेदाः, एते च षट्सप्तत्यधिकं शतं अप्राप्तबाधभेदाः, मिलित्वा शतद्वयं द्विचत्वारिंशच्च बाधभेदा भवन्ति ।

एतेषामपि च सर्वेषां बाधभेदानां आनर्थक्यप्रतिघाते विपरीतो बाधो भवति, तेन सर्वेऽपि द्वैगुण्यमापन्नाः सन्तः चत्वारि शतानि चतुरशीतिश्च संभाव्यन्ते । तद्यथा 'व्रीहीनवहन्ति' इत्यत्र व्रीहिमात्रावघातप्रापिका श्रुतिः प्रकरणेन बाध्यते । एवं तत्रैव लक्षणया मुख्यवृत्तिरपि (बाध्यते)। श्येनादौ च उपमानानर्थक्यात् गौण्या मत्वर्थलक्षणा बाध्यते । न केवलं तार्तीयप्रमाणमेव आनर्थक्यप्रतिघातेन बाध्यते, किन्तु द्वैतीयकमपि यथा अभ्युदितेष्टौ 'ये स्थविष्ठाः, येऽणिष्ठाः' इत्यनयोर्वाक्ययोः अनेकार्थोपादानात् वाक्यभेदापत्तेः गुणेन कर्मभेदस्य प्रसक्तस्य 'सह श्रपयति' इति विध्यानर्थक्यात् बाधः । श्रुत्यादीनां च आनर्थक्याभावेऽपि उत्तरोत्तरेण अन्यथाऽनुपपत्त्यादिसहकृतेन पूर्वस्यपूर्वस्य बाधो भवति । तत् सोदाहरणं प्रपञ्चयामः । तद्यथा लिङ्गेन श्रुतिबाधे तावत्, 'स्रुवेणावद्यति' 'स्वधितिनाऽवद्यति' इति स्रुवादिरेकः शेषः श्रुत्या द्रवावदाने इतरावदाने वा अनेकत्र शेषिणि प्राप्तः, लिङ्गेन द्रवावदाने एव नियमनात् शेष्यन्तरे बाध्यते । तथा एकस्मिन् शेषिणि द्रवावदानादौ श्रुत्यैव स्रुवः करणान्तरं च अनेकशेषः प्राप्तः, तत्र लिङ्गेन स्रुवमेव नियच्छता करणान्तरं श्रौतमपि बाध्यते ॥ वाक्येन लिङ्गबाधे 'देवस्य त्वा' इति मन्त्रे सवित्रादिदेवताप्रकाशनसामर्थ्यं तमंशं सवित्रादौ विनियुञ्जानं वाक्येन प्रकृताग्निदेवत्यनिर्वापे विनियुञ्जानेन बाध्यते । पशौ च 'हिरण्यगर्भः समवर्तताग्रे इत्याघारमाघारयति' इत्याघारयतेः पूर्वाघारविषयता हिरण्यगर्भमन्त्रलिङ्गात् आशङ्क्य उत्तराघारे 'इन्द्र ऊर्ध्वोऽध्वरे' इति मन्त्रजन्यनियमादृष्टस्य क्लृप्तत्वात् तद्विषयतानिश्चये तत्समभिव्याहारात्मकात् वाक्यात् लिङ्गं बाध्यते इति दशमे (१०।३।२।१३–१७) स्थितम् ॥ प्रकरणेन वाक्यबाधे श्येने 'निवीता ऋत्विजः प्रचरन्ति' इति विहितं निवीतं तार्तीयवेदिबर्हिस्तद्धर्मन्यायेन (३।७।१।१–५) वाक्यात् अङ्गप्रधानार्थं प्रसक्तं श्येनप्रकरणात् प्रधानमात्रार्थं भवति । अत एव दशमे (१०।४।१।१–२ वर्णकं १) तदङ्गेषु ऐष्टिकेषु चोदकप्राप्तमुपवीतं भिन्नविषयं इति नारिष्ठहोमबाधसमुच्चयचिन्ताविषयः इति वक्ष्यते । ननु एवं निवीतं अङ्गान्तरेऽपि न स्यात्, किञ्च तार्तीयबर्हिर्वेदिन्यायवैषम्यम् । उच्यते । सौमिकदीक्षादक्षिणवत् प्रधानार्थमेव सत् कर्तृद्वारा प्रयोगाङ्गत्वात् प्रसङ्गादङ्गान्तरेषु उपकरिष्यति इति न तदर्थमपि वाक्यमायासनीयम् । प्रधानहविषि तु वेदिबर्हिषोरासादितेन अङ्गहविरासादितं भवति, इति तदर्थमपि वाक्यस्य पृथगायासेन भाव्यम्, इति तार्तीयन्यायवैषम्यमिति ॥ क्रमेण प्रकरणबाधे 'दर्विनामासि' इति मन्त्रं आग्नेयादिष्वपि विनियुञ्जानं प्रकरणं उपांशुयाजमात्रे विनियुञ्जानेन यथासंख्याम्नानक्रमेण बाध्यते । न चाक्रियात्मको मन्त्रः अर्थाभिधानक्रियावेशेन ग्राह्यः । अयं चास्पष्टलिङ्गः अस्यार्थस्याभिधायकः इत्यज्ञानात् कथं प्रकरणविषय इति वाच्यम् । मिश्रमते उच्चारणावेशेनैव ग्रहणसंभवात् । अन्यत् प्रकाशे ज्ञेयम् ॥ समाख्यया क्रमबाधे ज्योतिष्टोमे वरणोपात्तानामृत्विजां संनिधानात् सर्वत्राव्यवस्थया कर्तृत्वे प्राप्ते समाख्यया व्यवस्था ॥ एवमेकान्तरितादावपि इति पञ्चदश एतेऽपि बाधाः । तेऽपि शेषिशेषभेदात् द्विगुणाः त्रिंशत्, पूर्वैः

चतुरशीत्यधिकशतचतुष्टयसंख्यैः सह चतुर्दशाधिकानि पञ्च शतानि बाधभेदा भवन्ति ॥ तथा प्रत्यक्षैः श्रुत्यादिभिः आनुमानिकानां श्रुत्यादीनां बाधः, यथा– श्येनादौ 'शरमयं बर्हिः' इति प्रत्यक्षश्रुत्या 'बर्हिषि हवींष्यासादयति' इत्यानुमानिकश्रुतेः । त इमे पञ्चदश बाधाः ॥ तथा आनुमानिकैः श्रुत्यादिभिः आनुमानिकानां तेषां बाधः, यथा– पशौ अनुमेयैः प्रयाजादिविनियोजकैः श्रुत्यादिभिः पशुपुरोडाशे तद्विनियोजकानां आनुमानिकानां श्रुत्यादीनाम् । तेऽपि पञ्चदश बाधाः ॥ तथा आनुमानिकानां श्रुत्यादीनां प्रत्यक्षैर्लिङ्गादिभिर्बाधः, यथा– कृष्णलेषु सामर्थ्येन 'व्रीहीनवहन्ति' इत्यतिदेशानुमितश्रुतेः । तेऽपि पञ्चदश ॥ एवं पञ्चचत्वारिंशत् बाधभेदाः पूर्वोक्तैः चतुर्दशाधिकपञ्चशतबाधभेदैः सह एकोनषष्ट्यधिकं शतपञ्चकं बाधभेदाः भवन्ति ॥ 'ये केऽपि तत्रतत्र स्युर्बाधा न्यायसहस्रगाः । तत्रैवान्तर्भवन्तीति न भेदान्तरसंभवः ॥' प्रमाणानामिव च न्यायानामपि अन्योन्यं तत्र बाध्यबाधकभावो भवति, तं वाक्यभेदनिरूपणग्रन्थानन्तरं निरूपयिष्यामः । इति दशमाध्यायार्थसंग्रहः । बाल. पृ. १३१–१४७.

* **बाधमार्गेण** सर्वत्र एकरूपेण भवितव्यम् । (इदं पूर्वपक्षे । सिद्धान्ते तु) 'न बाधस्यैकरूपत्वमेषितव्यं नियोगतः । न किञ्चिद्विरुणद्धीह नानारूप्यं प्रमाणवत् ॥' वा. ३।३।७।१४ पृ. ८५९.

* **बाधयोग्यताधिकरणं मीको.** पृ. २९४२ इत्यत्र बलाबलाधिकरणे द्रष्टव्यम् ।

* **बाधविकल्पौ** तुल्यार्थयोः भवतः । **वा.** १।२।१।७ पृ. १२०.

* **बाधस्वरूपविचारः** । **भा.** ३।३।७।१४, **वा.** पृ. ८५८. **मीको.** पृ. २९४२ इत्यत्र बलाबलाधिकरणे द्रष्टव्यः ।

* **बाधकम्** । तद्धि बाधकं भवति यदबाधमानमप्रयोजनं भवति । **भा.** १०।६।२।३. * **बाधकः** हेत्वाभासः । 'हेत्वाभासाः' इति बिन्दौ द्रष्टव्यम् । **मणि.** पृ. ४२.

* 'बाधकबाधे बाध्यस्य निरपवादत्वात्' इति न्यायेन आश्रयकृतबलाबलस्य पुनरुज्जीवनादपि न म्लेच्छप्रसिद्धार्थग्रहणसिद्धिः । पूर्वपक्षे । **कौ.** १।३।५।१०.

* **बाधितबाध्यस्य** बाधकबाधकेन बाधस्य सुज्ञानत्वात् यानि हि श्रुतिबाध्यैर्लिङ्गादिभिः बाध्यन्ते तानि श्रुत्या बाध्यन्तेतराम् । **वा.** ३।३।७।१४ पृ. ८२३.

* **बाध्याबाध्यविवेकः** सर्वस्वारे अस्थियज्ञवत् । १०।२।२४।६०.

* **बाध्यबाधकभावः** । (अत्र उदाहरणग्रन्थः सुधास्थः इत्यवधेयम्)। यत् तत्र तत्र उच्यते इदमनेन बाध्यते (इति तदित्थम्) प्रत्यक्षेण अनुमानं यथा स्तम्भोऽयमित्यादिना बाह्यार्थविषयप्रत्यक्षेण निरालम्बनानुमानम्, मृगतृष्णादिप्रत्ययाश्च । यथास्वं षड्भिरपि प्रमाणैः प्रमाणाभासः । श्रुत्या स्मृतिः— यथा 'औदुम्बरीं स्पृष्ट्वोद्गायेत्' इति श्रुत्या 'औदुम्बरी सर्वा वेष्टयितव्या' इति स्मृतिः । आप्तस्मृत्या अनाप्तस्मृतिः– आप्तस्य मन्वादेः अविगीतया 'नात्मानं घातयेत् प्राज्ञः' इत्याद्यया स्मृत्या 'केदारे पातयेद्देहम्' इत्याद्यनाप्तपाखण्ड्यादिस्मृतिः । अविगीतस्मृत्या विगीतस्मृतिः–'भार्याश्चतस्रो विप्रस्य' इत्याद्याप्तस्मृतिरपि 'यदुच्यते द्विजातीनां शूद्राद्दारोपसंग्रहः । न तन्मम मतम्' इति याज्ञवल्क्यादिस्मृतिभिः (१।५६) विगीता । अदृष्टार्थया स्मृत्या दृष्टार्था– 'न जातु ब्राह्मणं हन्यात्' इत्यादिस्मृत्या 'जिघांसन्तं जिघांसीयात्' इत्यात्मरक्षणार्था । श्रुतिप्रभवया लिङ्गादिप्रभवा– 'पुत्रं प्रतिग्रहीष्यन् बन्धूनाहूय राज्ञे निवेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वा प्रतिगृह्णीयात्' (वसिष्ठस्मृतिः १५।६) इत्याद्यया होमादीतिकर्तव्यतायुक्तपुत्रप्रतिग्रहादिविषयत्वादिप्रभवया 'न शेषो अग्ने अन्यजातमस्ति' इत्यादेः दत्तकपुत्रनिषेधादिलिङ्गत्वात् तत्प्रभवा । श्रुतिप्रभवया स्मृत्या अर्थवादप्रभवा स्मृतिः– 'तद्यथा मनुष्यराज आगतेऽन्यस्मिन् वार्हति उक्षाणं वा वेहतं वा क्षदन्ते' इत्याद्यर्थवादप्रभवा 'महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेत्' इत्याद्या 'मा गामनागामदितिं

वधिष्ट ' इत्यादिविधिश्रुतिप्रभवया ' गोब्राह्मणानलाम्भांसि नोच्छिष्टो न पदा स्पृशेत् । न निन्दाताडने कुर्यात् ' इत्याद्यया । स्मृत्या आचारः— ' सूर्याविदे वधूवस्त्रं दद्यात् ' इत्यादिस्मृत्या विवाहचतुर्थेऽहनि वधूवस्त्रपरिधानाद्याचारः । अभियुक्ततराचारेण अभियुक्ताचारः— वृद्धव्यवहाराभियुक्तानामपि म्लेच्छानां हस्त्यादौ पील्वादिशब्दप्रयोगाचारः अभियुक्ततराणामार्याणां वृक्षविषयकप्रयोगाचारेण । संदिग्धं असंदिग्धेन— ' अक्ताः शर्कराः ' इति संदिग्धं असंदिग्धेन घृतस्तवनेन । दुर्बलाश्रयं बलवदाश्रयेण – दुर्बलाश्रयं ' वेदं कृत्वा वेदिं करोति ' इति वेदवाक्यं बलवत्पदार्थाश्रयेण क्षुतादिनिमित्ताचमनवाक्येन । उपक्रमस्थेन उपसंहारस्थम्— उपसंहारस्थं ऋगादिपदं उपक्रमस्थेन वेदपदेन । अत्यन्तादृष्टार्थं नियमादृष्टार्थेन — सांनाय्याज्ययोः अत्यन्तादृष्टार्थं अवघातादि औषधे नियमादृष्टार्थेन अवघातादिना । आरादुपकारकत्वं सामवायिकत्वेन— पशुपुरोडाशस्य आरादुपकारित्वं संनिपत्योपकारित्वेन । अनेकार्थविधानं एकार्थविधानेन— 'दध्ना जुहोति' इति विशिष्टविधिपक्षे विशेषणविशेष्यरूपानेकार्थविधानं गुणविधिपक्षे एकार्थविधानेन । अनेकशब्दार्थत्वं एकशब्दार्थत्वेन— एकस्य अर्थस्य अनेकगोगाव्यादिशब्दत्वं एकगोशब्दत्वेन । एकस्य च शब्दस्य अनेकव्यक्त्याकृत्यर्थत्वं एकाकृत्यर्थत्वेन । बहुबाधः अल्पबाधेन— प्रतिग्रहीतुरिष्टिः इति पक्षे वरुणायेति चतुर्थ्याः पञ्चम्यर्थत्वेन, ' अश्वमनयत् ' इति नयतेश्च प्रतिगृह्णात्यर्थत्वेन कल्पनात् ' स स्वां देवतां ' इति च तच्छब्दस्य अप्राधान्यनिर्दिष्टवरुणपरामर्शित्वात् दातृत्वे च वरुणस्य देवतात्वाभावेन देवताशब्दस्य अविवक्षितार्थत्वात् बहुबाधः, दातुरिष्टिः इति पक्षे प्रतिगृह्णातिमात्रस्य दाने कल्प्यत्वात् अल्पबाधेन । वेदान्तरोत्पन्नं वेदान्तरविहितेन— सामवेदोत्पन्नवारवन्तीयादेः उपांशुत्वं यजुर्वेदविहितत्वेन उच्चैस्त्वरूपेण । परशाखाविहितं स्वशाखाविहितेन— अग्नीषोमीयादेर्द्वादशकपालत्वादि एकादशकपालत्वादिना । नित्यं नैमित्तिकेन— नित्यं सामिधेनीपाञ्चदश्यं वैश्यनिमित्तेन साप्तदश्येन । क्रत्वर्थे पुरुषार्थेन— नित्यं पाञ्चदश्यं नैमित्तिकवशात् साप्तदश्यं पुरुषार्थेन एकविंशत्यादिना । अनारभ्याधीतं प्रकरणाधीतेन— साप्तदश्यं पाञ्चदश्येन । पौर्वापर्यविरोधे पूर्वं परेण— सर्वस्वदाक्षिण्यादाक्षिण्यनिमित्तभूतप्रतिहर्त्रुद्गात्रपच्छेदपौर्वापर्यात् सर्वस्वदाक्षिण्यादाक्षिण्ययोः पौर्वापर्येणापद्यमानयोः विरोधे पूर्वं परेण । प्राकृतं वैकृतेन— प्राकृतं बर्हिरादि वैकृतेन शरादिना । प्रयोगवचनाश्रितं चोदकाश्रयेण— श्येने प्रकृतेष्वङ्गेषु उद्गातृकर्तृकत्वं चोदकाश्रयेण नार्त्विक्कर्तृकत्वेन । निष्प्रयोजनं सप्रयोजनेन— निगदेषु परसंबोधनार्थेषु उपांशुत्वं सप्रयोजनेन उच्चैस्त्वेन । ब्राह्मणक्रमः मन्त्रक्रमेण— आग्नेयाग्नीषोमीययोर्ब्राह्मणक्रमः मन्त्रक्रमेण । देवताश्रयं द्रव्याश्रयेण— देवताश्रयं ऐन्द्रपुरोडाशादौ सांनाय्यविध्यन्तादि द्रव्याश्रयेण औषधविध्यन्तादिना । पश्चादाम्नातं पूर्वाम्नातेन— पश्चादाम्नातं उपांशुयाजविकारभूतं सारस्वतं कर्म अमावास्यायां उपांशुयाजं अङ्गीकृत्य अमावास्यातन्त्रप्रवर्तकतया भासमानं पूर्वाम्नातेन अग्नीषोमीयविकारभूतेन आग्नावैष्णवेन पौर्णमासतन्त्रप्रवर्तकेन । अल्पं भूयसा— अल्पं पञ्चदशरात्रे अग्निष्टुत्कर्म आग्नेयीसुब्रह्मण्याप्रवर्तकं भूयसा ज्योतिरादिना ऐन्द्रीसुब्रह्मण्याप्रवर्तकेन । गौणं मुख्येन— गौणं बर्हिः मन्त्रप्रकाश्यं कुशसदृशं मुख्येन कुशेन । सामान्यविहितं विशेषविहितेन— आहवनीयादि, विशेषविहितेन पदादिना । सावकाशं निरवकाशेन— सावकाशं यत्किञ्चित् प्राचीनमग्नीषोमीयात् प्राग्भाविपदार्थविहितं उपांशुत्वम्, दीक्षणीयादिमात्राङ्गतया विहितेन स्वरेण अन्यत्र निरवकाशेन । अङ्गं प्रधानेन— अङ्गं अग्निहोत्रहवणी प्रधानेन निर्वापेण । अङ्गधर्मः प्रधानधर्मेण— दीक्षणीयादौ पर्वकालत्वं प्रधानधर्मेण सुत्यायाः पर्वकालत्वेन बाध्यते । वा. ३।३।७।१४ पृ. ८५९–८६०, सु. पृ. १२७३–१२७५. * बाध्यबाधकभावः । ' यत् यस्यैव बाध्यं तत् तस्यैव बाधकं न हि भवितुमर्हति ' । बृहती. पृ. १७८. * बाध्यबाधकभावः । यस्तु एकेन बाध्यते, शक्योऽसौ अन्येनापि बाधितुमिति । भा. ३।३।७।१४ पृ. ८४९ । नैतदेवम् । नहि बाधितस्य अन्येनापि बाधनमेव न्याय्यम् । बाधितं हि अनुग्रहीतव्यं अर्थवत्त्वाय ।

पृ. ८५१. * बाध्यबाधकभावः विशेषवाचिनोर्द्वयोर्नास्ति । टुप्. ९।१।६।२५. * बाध्यबाधकभावः शास्त्रयोः यत्र परस्परनिरपेक्षता । मीन्या.

* **बाध्यबाधकभावविचारः** । भा. ३।३।७।१४ पृ. ८५८–८६२. मीको. पृ. २९४२ इत्यत्र बलाबलाधिकरणे द्रष्टव्यः ।

* **बार्हते** तृचे बृहतीविष्टारपङ्क्त्योरेव प्रग्रथनेन संपादिते, रौरवयौधाजयसाम्नोर्गानं ज्योतिष्टोमे । ९।२।६।२५–२८ वर्णकं २.

* **बार्हद्गिरं** गवामयने समाम्नायते । टुप्. ६।१।७।२८. * ' बार्हद्गिरं ब्राह्मणस्य ब्रह्मसाम कुर्यात्, पार्थुरश्मं राजन्यस्य, रायोवाजीयं वैश्यस्य ' अयं कर्तृतः वाचनिकव्यवस्थाविधिः । बाल. पृ. १८–१९. * 'बार्हद्गिरं ब्राह्मणस्य ब्रह्मसाम कुर्यात्, पार्थुरश्मं राजन्यस्य, रायोवाजीयं वैश्यस्य ' इति नैमित्तिकमेव न नित्यम्, द्वादशाहे । नित्यं तु ' अभीवर्तो ब्रह्मसाम ' । भा. ४।३।२।४.

* **बार्हस्पत्यः** ग्रहः बृहस्पतिसवे । वि. १०।४।३. * बार्हस्पत्यश्चतुर्थः काम्यः पशुः चरकसौत्रामण्यां इति सत्याषाढः । के. * बार्हस्पत्यः चरुः अध्वरकल्पायां आग्नेयविकारः । वि. ५।१।१०. * बार्हस्पत्यश्चरुर्ब्रह्मणो गृहे राजसूये । भा. ११।२।३।१३, * ' बार्हस्पत्यमनूच्य वाग् यन्तव्या ' । जपोऽयम् । १२।४।१।१. * ' बार्हस्पत्यं गृह्णाति ' इति श्रुत्यैव विधानम् । द्वाभ्यां विशेषणाभ्यां विशिष्टः तद्धितार्थो विधीयते, नोपसर्जनम् । टुप्. १०।४।२।३. * ' बार्हस्पत्यं चरुं ' (निर्वपेत्) । इदं तृतीयं हविः, प्रातश्च, माध्यंदिने च तृतीयसवने च अध्वरकल्पायाम् । भा. ११।२।४।१९. * ' बार्हस्पत्यं चरुं शितिपृष्ठो दक्षिणा ' इयं पञ्चमी अवेष्टिः राजसूये । भाट्ट. ११।४।३. * ' यदि ब्राह्मणो यजेत, बार्हस्पत्यं मध्ये निधायाऽऽहुतिमाहुतिं हुत्वाऽभिघारयेत् ' (इदमवेष्टौ) । भा. ११।४।३।८, * **बार्हस्पत्यस्य** आग्नेयविकारस्य धर्माः पूर्वं कार्याः, सरस्वत्याज्यस्य उपांशुयाजाज्यविकारस्य धर्माः पश्चात्, प्रयोगवचनात् चोदकस्य बलवत्त्वात्, अध्वरकल्पायाम् । ५।१।१०।१७–१८. * ऐन्द्राबार्हस्पत्ये द्विविधयाज्यानुवाक्ययोर्विकल्पः । १२।४।२।३–४.

* **बार्हस्पत्यादिग्रहैः** बृहस्पतिसवादौ उपदिष्टैः आतिदेशिकानां ऐन्द्रवायवादिग्रहाणां समुच्चयः । १०।४।२।३–५. मीको. पृ. १६४४ ' ग्रहसमुच्चयन्यायः ' इत्यत्र द्रष्टव्यम् ।

* **बार्हस्पत्यचरुः** प्रथमभाविनः आग्नेयस्य विकारः, सारस्वताज्यं च पश्चाद्भाविनः उपांशुयाजाज्यविकार इति अन्तरङ्गत्वात् अध्वरकल्पायां पूर्वं बार्हस्पत्यचरुनिर्वापः पश्चात् सारस्वताज्यधर्माः । ५।१।१०. मीको. पृ. ३५५ ' अध्वरकल्पान्यायः ' इत्यत्र द्रष्टव्यम् ।

* **बार्हस्पत्यचरुनिर्वापात्** पूर्वं आग्नावैष्णवनिर्वापः ततो बार्हस्पत्यचरुनिर्वापः वैकृतमुख्यक्रमानुरोधात् अध्वरकल्पायाम् । भाट्ट. ५।१।१०.

' बालादपि सुभाषितं ग्राह्यम् ' इति न्यायः । इति भारविः । साहस्री. ९६४.

बालाग्रशतभागोऽपि न कल्प्यो निष्प्रमाणकः । प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबहून्यपि ॥ ' इति न्यायः । साहस्री. ३८२.

* **बाहुप्रशंसापरत्वं** अध्रिगुप्रैषगतप्रशंसाशब्दस्य । ९।४।४।२३–२४.

* **बाह्यार्थसद्भावः** निरालम्बनवादनिरासेन औत्पत्तिकसूत्रे एव भाष्ये उक्तः । बाल. पृ. ६.

* **बाह्यग्रन्थानामप्रामाण्यम्** । यद्वा यान्येतानि त्रयीविद्भिर्न परिगृहीतानि किञ्चित्तन्मिश्रधर्मकञ्चुकच्छायापतितानि लोकोपसंग्रहलाभपूजाख्यातिप्रयोजनपराणि त्रयीविपरीतासंबद्धदृष्टशोभादिप्रत्यक्षानुमानोपमानार्थापत्तिप्राययुक्तिमूलोपनिबद्धानि सांख्ययोगपाञ्चरात्रपाशुपतशाक्यग्रन्थपरिगृहीतधर्माधर्मनिबन्धनानि विषचिकित्सावशीकरणोच्चाटनोन्मादनादिसमर्थकतिपयमन्त्रौषधिकादाचित्कसिद्धिनिदर्शनबलेन अहिंसासत्यवचनदमदानदयादिश्रुतिस्मृतिसंवादिस्तोकार्थगन्धवासितजीविकाप्रायार्थान्तरोपदेशीनि यानि च बाह्यतराणि म्लेच्छाचारमिश्रकभोजनाचरणनिबन्धनानि तेषामेवैतच्छ्रुतिविरोधहेतुदर्शनाभ्यामन-

पेक्षणीयत्वं प्रतिपाद्यते । न चैतत्क्वचिदधिकरणान्तरे निरूपितम् । न चावक्तव्यमेव, गव्यादिशब्दवाचकत्वबुद्धिवदतिप्रसिद्धत्वात् । ‘ **यदि ह्यनादरेणैषां न कल्प्येताप्रमाणता । अशक्यैवेति मत्वाऽन्ये भवेयुः समदृष्टयः ॥ शोभासौकर्यहेतूक्तिकलिकालवशेन वा । यज्ञोक्तपशुहिंसादित्यागभ्रान्तिमवाप्नुयुः ॥** ’ ब्राह्मणक्षत्रियप्रणीतत्वाविशेषेण वा मानवादिवदेव श्रुतिमूलत्वमाश्रित्य सचेतसोऽपि श्रुतिविहितैः सह विकल्पमेव प्रतिपद्येरन् । ‘ **तेन यद्यपि लभ्येत स्मृतिः काचिद्विरोधिनी । मन्वाद्युक्ता तथाऽप्यस्मिन्नेतदेवोपयुज्यते ॥ त्रयीमार्गस्य सिद्धस्य ये ह्यत्यन्तविरोधिनः । अनिराकृत्य तान् सर्वान् धर्मशुद्धिर्न लभ्यते ॥ महाजनगृहीतत्वं पित्राद्यनुगमादि च । तेऽपि द्वीपान्तरापेक्षं वदन्त्येव स्वदर्शने ॥** ” तत्र श्रद्धामात्रमेवैकं व्यवस्थानिमित्तम्, सर्वेषां स्वपितृपितामहादिचरितानुयायित्वात् । यैश्च मानवादिस्मृतीनामप्युत्सन्नवेदशाखामूलत्वमभ्युपगतं तान् प्रति सुतरां शाक्यादिभिरपि शक्यं तन्मूलत्वमेव वक्तुम् । को हि शक्नुयादुत्सन्नानां वाक्यविषयेयत्तानियमं कर्तुम् । ततश्च यावत् किञ्चित् कियन्तमपि कालं कैश्चित् आद्रियमाणं प्रसिद्धिं गतम्, तत्प्रत्यक्षशाखाविसंवादेऽपि उत्सन्नशाखामूलत्वावस्थानमनुभवतुल्यकक्षतया प्रतिभायात् । अत आह– ‘ विरोधे त्वनपेक्ष्यं स्यात् ’ इति । पारतन्त्र्यं तावदेषां स्मर्यमाणपुरुषविशेषप्रणीतत्वात्तैरेव प्रतिपन्नं शब्दकृतकत्वादिप्रतिपादनादराच्च पार्श्वस्थैरपि ज्ञायते ।

वेदमूलत्वं पुनस्ते तुल्यकक्षमूलत्वाक्षमयैव लज्जया च मातापितृद्वेषिदुष्टपुत्रवत् नाभ्युपगच्छन्ति । अन्यच्च स्मृतिवाक्यमेकमेकेन श्रुतिवचनेन विरुध्येत । शाक्यादिवचनानि तु कतिपयदमदानादिवचनवर्जं सर्वाण्येव समस्तचतुर्दशविद्यास्थानविरुद्धानि त्रयीमार्गव्युत्थितविरुद्धाचरणैश्च बुद्धादिभिः प्रणीतानि । त्रयीबाह्येभ्यश्चतुर्थवर्णनिरवसितप्रायेभ्यो व्यामूढेभ्यः समर्पितानीति न वेदमूलत्वेन संभाव्यन्ते । स्वधर्मातिक्रमेण च येन क्षत्रियेण सता प्रवक्तृत्वप्रतिग्रहौ प्रतिपन्नौ स धर्ममविप्लुतमुपदेक्ष्यतीति कः समाश्वासः । उक्तं च ‘ **परलोकविरुद्धानि कुर्वाणं दूरतस्त्यजेत् । आत्मानं योऽतिसंधत्ते सोऽन्यस्मै स्यात्कथं हितः ॥** ’ इति । बुद्धादेः पुनरयमेव व्यतिक्रमोऽलङ्कारबुद्धौ स्थितः । येनैवमाह ‘ **कलिकलुषकृतानि यानि लोके मयि निपतन्तु विमुच्यतां तु लोकः ।** ’ इति । स किल लोकहितार्थं क्षत्रियधर्ममतिक्रम्य ब्राह्मणवृत्तं प्रवक्तृत्वं प्रतिपद्य प्रतिषेधातिक्रमासमर्थैर्ब्राह्मणैरननुशिष्टं धर्मं बाह्यजनाननुशासद्धर्मपीडामप्यात्मनोऽङ्गीकृत्य परानुग्रहं कृतवानित्येवंविधैरेव गुणैः स्तूयते तदनुशिष्टानुसारिणश्च सर्वे एव श्रुतिस्मृतिविहितधर्मातिक्रमेण व्यवहरन्तो विरुद्धाचारत्वेन ज्ञायन्ते । ‘ **तेन प्रत्यक्षया श्रुत्या विरोधे ग्रन्थकारिणाम् । ग्रहीत्राचरितृणां च ग्रन्थप्रामाण्यबाधनम् ॥** ’ न ह्येषां पूर्वोक्तेन न्यायेन श्रुतिप्रतिबद्धानां स्वमूलश्रुत्यनुमानसामर्थ्यमस्ति । ‘ **न च शाखान्तरोच्छेदः कदाचिदपि विद्यते । प्रागुक्ताद्वेदनित्यत्वान्न चैषां दृष्टमूलता ॥** ’ न हि यथोपनयनादिस्मृतीनां शाखान्तरदृष्टश्रुतिसंवादः । एवं चैत्यकरणतद्वन्दनशूद्रसंप्रदानकदानादीनां संवादः संभवति । मूलान्तरकल्पनं च प्रागेव प्रत्याख्यातम् । ‘ **लोभादिकारणं चात्र बह्वेवान्यत्प्रतीयते । यस्मिन् संनिहिते दृष्टे नास्ति मूलान्तरानुमा ॥ शाक्यादयश्च सर्वत्र कुर्वाणा धर्मदेशनाम् । हेतुजालविनिर्मुक्तां न कदा चन कुर्वते ॥ न च तैर्वेदमूलत्वमुच्यते गौतमादिवत् । हेतवश्चाभिधीयन्ते ये धर्मे दूरतः स्थिताः ॥ एत एव च ते येषां वाङ्मात्रेणापि नार्चनम् । पाखण्डिनो विकर्मस्था हैतुकाश्चैत एव हि ॥** ’ एतदीया ग्रन्था एव च मन्वादिभिः परिहार्यत्वेनोक्ताः । ‘ **या वेदबाह्याः स्मृतयो याश्च काश्चित् कुदृष्टयः । सर्वास्ता निष्फलाः प्रोक्तास्तमोनिष्ठा हि ताः स्मृताः ॥** ’ तस्माद्धर्मं प्रति त्रयीबाह्यमेवंजातीयकं प्रामाण्येनानपेक्ष्यं स्यादिति सिद्धम् । **वा. पृ.** १९४–१९६ .

* **बिडालव्रतन्यायः** । एवं तर्हि सौगताद्यागमार्थोऽपि कश्चिदहिंसादिः सर्वदर्शनान्तःपातिभिः अनुष्ठीयते एव कैश्चित् इति सोऽपि महाजनपरिगृहीतः स्यात् । न । संदेहात् । किमयमहिंसादिः वैदिक एवार्थो बिडालव्रतन्यायेन श्रद्धापादनाय शौद्धोदनिप्रभृतिभिरुपनिबद्धः आहो स्वयंदृष्ट एवेति । **सना. ध. प्र. पृ.** २४६.

* **बिदाः** पञ्चावत्तिनः । वि. १०।७।२०.

* **बिभेतेः अर्थः** अपह्नवानुकूलक्रिया । **मणि.** पृ. १४०.

⧗ **बिलवर्तिगोधान्यायः** । यथा बिले गर्ते वर्तमानाया गोधाया विभजनं विभाजकधर्मेण निर्देशो न संभवति, तस्या अदृष्टत्वात्, एवमज्ञातपरसिद्धान्तस्य तद्दूषणाय प्रवृत्तिर्भवतीत्येवं विवक्षायामस्य प्रवृत्तिरिति । अत्र गोधापदं बिलनिवासिनां सर्पादीनामुपलक्षणं ज्ञेयमिति । **साहस्री.** ४९८.

⧗ **बिल्वखल्वाटन्यायः** । व्याख्यातोऽयं न्यायः श्लोकेन, तद्यथा– “खल्वाटो दिवसेश्वरस्य किरणैः संतापितो मस्तके, वाञ्छन् देशमनातपं विधिवशाद्बिल्वस्य मूलं गतः । तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः, प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यान्त्यापदः ॥ ’ ‘ तत्रापदां भाजनम् ’ इति वा पाठान्तरमिति । **साहस्री.** ११३.

⧗ **बिल्वविभजनन्यायः** । अनवबुद्धार्थे प्रवृत्तिरशक्येति यत्र विवक्षा तत्रायं प्रवर्तते । **साहस्री.** २२५.

* ‘ **बीजाद्योनिर्बलीयसी** ’ इति न्यायः । ननु स्त्र्यपराधेऽपि ‘ बीजाद्योनिर्बलीयसी ’ इति न्यायेन मातृब्राह्मण्यमात्रेण क्षेत्रिब्राह्मण्येन वा पुत्रे ब्राह्मण्यसिद्धेः कथं दुर्ज्ञानता इत्याशङ्क्य । सु. पृ. ६३. * **बीजे बीजे** अवहननमन्त्रस्य आवृत्तिः नानाबीजेष्टौ राजसूये । ११।४।१३।४६.

⧗ **बीजाङ्कुरन्यायः** । ‘ अङ्कुरोऽभिनवोद्भिदि ’ इत्यमरः । बीजं विना नाङ्कुरो जायते, अङ्कुरं विना च न बीजोत्पत्तिरिति । एवं यत्र परस्परकार्यकारणभावस्तत्रायं न्यायः प्रवर्तते । तथा च बीजजातीयं प्रत्यङ्कुरजातीयम्, अङ्कुरजातीयं च प्रति बीजजातीयं कारणम् । अतो बीजाङ्कुरप्रवाहानादितया च यद्बीजं प्रति यदङ्कुरस्य कारणत्वं तदङ्कुरं प्रति तद्बीजस्य न कारणत्वमतो नान्योन्याश्रयः । एवं च प्रामाणिकत्वात् गृह्यते, यत्र च न प्रामाणिकत्वं तत्र नानादित्वकल्पनेति । प्रामाणिकप्रवाहस्यैव अनादित्वकल्पना, नान्यस्येति सिद्धान्तात् सूचितं च । तथा च **शारीरकभाष्ये** ‘ तत्कृतधर्माधर्मनिमित्तं सशरीरत्वमिति चेन्न, शरीरसंबन्धस्य धर्माधर्मयोस्तत्कृतत्वस्य चेतरेतराश्रयत्वप्रसङ्गादन्धपरम्परैवैषा कल्पना ’ इति । ‘ आत्मनः शरीरसंबन्धे जाते धर्माधर्मोत्पत्तिः, तस्यां च सत्यां संबन्धरूपजन्मेत्यन्योन्याश्रयादेकस्यासिद्धया द्वितीयस्यासिद्धिः स्यादिति परिहरति– नेत्यादिना । न त्वेतद्देहजन्यधर्माधर्मकर्मण एतद्देहसंबन्धहेतुत्वे स्यादन्योन्याश्रयः । पूर्वदेहकर्मण एतद्देहसंबन्धोत्पत्तिः, पूर्वदेहश्च तत्पूर्वदेहकर्मणः, तद्देहसंबन्धोत्पत्तिः तत्पूर्वदेहकृतकर्मण इति बीजाङ्कुरवदनादित्वान्नायं दोष इत्यत आह– अन्धेति । अप्रामाणिकीत्यर्थः । न हि बीजादङ्कुरस्ततो बीजान्तरं च यथा प्रत्यक्षेण गृह्यते, तथा आत्मनो देहसंबन्धः पूर्वकर्मकृतः प्रत्यक्षः, नाप्यास्ते कश्चिदागमः, प्रत्युत ‘ असङ्गो हि ’ इत्यादिश्रुतिः सर्वकर्तृत्वं वारयतीति भावः ’ इति **आनन्दगिरिः** । **साहस्री.** २१७.

* ‘ **बीजाभावे कुतः फलम्** ’ इति न्यायेन अद्वैतत्वमात्मनो विशदयति । **उपदेशसाहस्री.** पद्य. १९।९ रामतीर्थः, * ‘ बीजाभावे फलाभावः ’ इति न्यायेन शोकमोहकारणस्याज्ञानस्य निवृत्तौ आत्मनः जन्मादि नहि भवेत् इति विनिश्चयः वेदविदाम् । १०।१२.

* **बीजावापः** अग्निचयने । कृष्टे अग्निक्षेत्रे नानाबीजानामावपनं क्रियते । तत्र क्रमं विनैव केचित् तत्प्रकरणस्थाः चतुर्दश मन्त्राः ग्राह्याः, न आदित एव । १०।५।५. **मीको.** पृ. ४५५ ‘ अन्त्यलोपापवादाधिकरणम् ’ इत्यत्र द्रष्टव्यम् । * बीजावापः कृष्णाजिने स्थापितोलूखले । स चावघातपदार्थावयवः । **वि.** ५।२।७.

⧗ **बीजवृक्षन्यायः** । यथा बीजात् वृक्षो भवति, वृक्षात् बीजमिति । **साहस्री.** २१६.

* **बुद्धे(ज्ञाते)** अपि उच्चारणविशेषोऽवकल्प्यते । **भा.** १।२।४।३१–३.

* **बुद्धादिवचसां** असंभवन्मूलानां प्रामाण्यसंभावना अपि नैव भवति । **वैद्यनाथः**. १।१।२।२ पृ. १६.

* **बुद्धिः** अनुमेया मीमांसकस्य (मते)। ऋजु. पृ. ६०. * बुद्धिः । निराकारा तु नो बुद्धिः आकारवान् बाह्योऽर्थः । साकारा बुद्धिः इति बौद्धाः । निराकारा इति मीमांसकाः । बुद्धिः प्रत्यक्षा इति बौद्धाः । अप्रत्यक्षा इति मीमांसकाः । **भा.** १।१।५।५. * बुद्धिः निराकारा । सा च अर्थे ज्ञाते सति ज्ञाततालिङ्गकानुमानात् अनुमेया । अनुमानं चेत्थम् । घटः विषयतासंबन्धेन ज्ञानविशिष्टः, स्वरूपसंबन्धेन ज्ञाततावत्त्वात् इति । ज्ञातता नाम ज्ञानजन्यो ज्ञेयनिष्ठोऽतिशयविशेषः । स च मानसप्रत्यक्षविषयः । **वैद्यनाथः**. १।१।५।५ पृ. ३३. * न चार्थरहिता **बुद्धिः** आत्माकारमात्रमनुभवन्ती जायते इत्युक्तं शून्यवादे । **वा.** १।४।१२।२३ पृ. ३५८. * न च व्यवहारं विना परबुद्धिरनुमातुं शक्यते । ऋजु. पृ. १६. * नहि अज्ञाते अर्थे कश्चित् **बुद्धिमुपलभते** । ज्ञाते तु अनुमानात् अवगच्छति । **भा.** १।१।५।५ पृ. ३२. * **बुद्ध्या** विषयीकृतस्य बाधः संभवति । **वि.** ३।३।१२. * **बुद्धेः** इव विषयप्रकाशने । विषयप्रकाशनं फलम्, बुद्धिः करणम्, व्यापारश्चात्र बुद्धेर्जन्मैव नान्यः । यद्धि जन्मानन्तरमेव जनयति तस्य तत्र जन्मैव व्यापारः । **रत्न.** ६।१।१।३. * न च अर्थव्यपदेशमन्तरेण **बुद्धेः** रूपोपलम्भनम् । तस्मान्न व्यपदेश्या बुद्धिः । **भा.** १।१।५।५ पृ. ३४. * **पूर्वबुद्धेः** क्षणिकत्वात् स्वरूपेण नाशोऽपि संस्कारद्वारा अनपायः । **सु.** पृ. ६९४. * **बुद्धीनां** क्षणिकत्वम् । **वा.** १।२।४।३७. **बुद्धौ** संनिहितं यत् तल्लिङ्गमित्युक्तम् (८।१।१७।३३)। **भा.** ८।१।१७।३४.

* **बुद्धिकर्मणी** न प्रत्यक्षे तस्मान्न ते प्रत्यभिज्ञायेते । बुद्धिकर्मणोः कार्यैकगम्ययोः प्रत्यभिज्ञा नास्ति । ऋजु. पृ. २४७.

* **बुद्धिपूर्वकारी** तावत् कर्तुमेव नाध्यवस्यति न च प्रयतते । अबुद्धिपूर्वकारिणा तु अज्ञातवस्तुना पुंसा यदृच्छया प्रयत्नाख्ये व्यापारे कृतेऽपि वस्तुनिष्पत्तिर्नैकान्ताद्भवति । **सु.** ३।७ पृ. ३३. * **बुद्धिपूर्वकारी** पुरुषः न च पुरुषार्थरहितं व्यापारं वचनशतेनापि उक्तोऽनुतिष्ठति । **वा.** २।१।१।१ पृ. ३८३.

* ‘ **बुधन्वानाग्नेयः** कार्यः ’ इत्यत्र तद्धितान्ते आग्नेयपदे उपसर्जनीभूतो देवतावाचकोऽग्निशब्दः बुधन्वच्छब्देन विशेष्टुं नार्हति । तथा च मन्त्रपरं वाक्यम् । आग्नेयः आज्यभागः , बुधन्वान् बुधधातुघटितमन्त्रयुक्तः कार्य इत्यर्थः । पवमानेष्टिषु आज्यभागदेवौ न सगुणौ, तेन अग्नेः बुधन्वान् इति विशेषणं न संभवति । ‘ अग्निं स्तोमेन बोधय ’ इति मन्त्रो बुधन्वान् । (‘ अग्निं स्तोमेन वर्धय ’ इति माट्ट., परंतु तैसं., ऋसं., अत्र ‘ बोधय ’ इत्येव) । **वि.** १०।४।१७.

बुधन्वान् पवमानवद् विशेषनिर्देशात् । १०।४।१५।३० ॥

पवमानेष्टिषु आज्यभागयोः ‘ बुधन्वानाग्नेयः कार्यः , पावकवान् सौम्यः ’ इति श्रूयते । तत्र त्यागादिषु बुधन्वान् अग्निः , पावकवान् सोमश्च अभिधातव्यः सगुणः । ‘ बुधन्वतेऽग्नय इदं न मम ’ ‘ बुधन्वानग्निरिदं हविरजुषत ’ इति, तथा ‘ पावकवते सोमायेदं न मम ’ ‘ पावकवान् सोम इदं हविरजुषत ’ इति । विधौ तथा विशेषस्य निर्देशात् । पवमानवत्, यथा पवमानेष्टिषु पवमानादिविशेषणविशिष्टोऽग्निशब्द उच्चार्यते तद्वत् इति पूर्वः पक्षः ।

मन्त्रविशेषनिर्देशान्न देवताविकारः स्यात् । ३१ ॥

पूर्वपक्षे सूत्रेण प्राप्ते सिद्धान्तमाह । न देवताविकारः स्यादयम् । मन्त्रविशेषनिर्देशात् मन्त्रविशेषस्य निर्देशोऽयं बुधन्वानाग्नेयः कार्य इत्यादिः । ‘ अग्निं स्तोमेन बोधय समिधानो अमर्त्यम् ’ इत्यादिः मन्त्रः बुधधातुमत्त्वात् बुधन्वान् उच्यते । तथा च मन्त्रनिर्देशोऽयं न देवतानिर्देशः इति सिद्धान्तः । **के.**

* **बुभुक्षमाणाः** के चित् क्रीतराजकस्य भोजनमाचरितवन्तः । **भा.** १।३।२।४ पृ. १८६.

बुभुक्षितः किं द्विकरेण भुङ्क्ते इति न्यायः । अयं लालसातिशये वर्तते । यथा ‘ जागर्ति लोको ज्वलति प्रदीपः सखीजनः पश्यति कौतुकं मे ।

क्षणैकमात्रं कुरु कान्त धैर्यं बुभुक्षितः किं द्विकरेण भुङ्क्ते ॥ ’ इति । **साहस्री**. ६४१.

बुभुक्षितः किं न करोति पापं (दरिद्रः किं न कुरुते) **इति न्यायः । साहस्री**. ६४३, ६४४.

बुभुक्षितं न प्रतिभाति किञ्चिदिति न्यायः । उक्तं च– ‘ जागर्तु लोको ज्वलतु प्रदीपः सखीजनः पश्यतु कौतुकं ते । क्षणैकमात्रं न करोमि धैर्यं बुभुक्षितं न प्रतिभाति किञ्चित् ॥ ’ इति । **साहस्री**. ६४२.

* **बुभुक्षोः** अभोजने पित्तक्षोभः । **वि.** ६।३।२ .

* **बुभूषतः** सर्वस्तोमातिरात्रः , कातीये । **बाळ.** पृ. ३४.

* **बृसयशब्दः** बृहच्छब्दार्थं गमयति ‘ सरस्वति देवनिदो निबर्हय प्रजां विश्वस्य बृसयस्य मायिनः ’ इत्यत्र । **भा.** १०।१।९।३२.

* **बृहत्** आर्भवपवमाने, विश्वजिति सर्वपृष्ठे । **भा.** १०।६।५।१४, * बृहदेव पृष्ठं विकृतिविशेषे । १०।७।१६।५१–५७, * **बृहतः** (साम्नः) योनिः बृहती (छन्दः) ‘ त्वामिद्धि हवामहे० ’ इति । उत्तरा पङ्क्तिः ‘ स त्वं नश्चित्र ’ इति । ९।२।६।२५.

* **बृहदन्तः** पृष्ठगणः । **रत्न.** १०।५।२५।८५.

* **बृहदादीनां** सर्वेषां विश्वजिति नैकत्र निवेशः । **भा.** १०।६।८।२४.

* **बृहद्गानं** प्रागाथिकम् । बृहतीपङ्क्त्योः प्रग्रथनं ककुप्कारम् । **भा.** ९।२।६।२५ वर्णकं १.

* ‘ **बृहत्तमं** अपरिमितं स्वर्गकामश्चिन्वीत ’ । **संकर्ष.** २।१।३०.

* **बृहद्धर्माः** चित्रादिस्तुतौ निबद्धाः बृहति भवेयुः, न रथंतरे । **भा.** ९।२।१५।४७ .

* **बृहत्पृष्ठं** आर्भवे पवमाने विश्वजिति । **भा.** ७।३।३।८. * **बृहत्पृष्ठस्य** प्रतिपत् ‘ अग्रवती ’ ज्योतिष्टोमे । ‘ उपवतीं रथंतरपृष्ठस्य प्रतिपदं कुर्यात् अग्रवतीं बृहत्पृष्ठस्य ’ । ‘ प्रयुजो वाचो अग्नियः ’ इति अग्नियवती ऋक् प्रतिपत् । **वि.** १०।५।१६ .

* ‘ **बृहद्रथंतरं** पृष्ठं भवति ’ इति न बृहत्साधनकं न रथंतरसाधनकमिति । नैव तत्र बृहत् निमित्तं भवति रथंतरं वा । **भा.** ६।६।१।९, * **बृहद्रथंतराभ्यां** अन्यतरेण पृष्ठं साधितं ज्योतिष्टोमे । १०।६।८।२४, * **बृहद्रथंतरयोः** एकस्मिन् कर्मणि विकल्पः, एकार्थत्वात् । १२।३।४।१०–१५. * बृहद्रथंतरयोः प्रत्येकमेकैकस्यैव गवामयनगतपृष्ठ्यषडहे अनुष्ठानम् । १०।६।३।४–५. **मीको.** पृ. १५५० ‘गवामयने पृष्ठ्ये षडहे०’ इत्यत्र द्रष्टव्यम् । * बृहद्रथंतरयोः संसवे, गोसवे, अपचितौ, पृष्ठस्तोत्र एव समुच्चित्य निवेशः । १०।६।८।२४–२६. ‘ संसवादौ उभयसामके क्रतौ ’ इत्यत्र द्रष्टव्यम् । * बृहद्रथंतरयोः संसवादौ प्रधानक्रियापेक्षं साहित्यम् । तत्र व्यस्तयोरपि क्रियमाणयोः साहित्यं न विरुध्यते । एकं साम किञ्चित् स्तोत्रमभिनिर्वर्तयिष्यति द्वितीयमपि अपरम् । प्रधानोपकारापेक्षं साहित्यमिति समस्तसंयोगो न विरोत्स्यते । इति चेत् । **तत्राभिधीयते** । यत्र परस्परसव्यपेक्षयोर्योगो भवति तत्रैतदेवं न्याय्यम्, येन क्रियावयवेन आरम्भेण मध्येनावसानेन वा योगः तेन सहितयोः, न पृथक्त्वः । यथैव अनेनोपकर्तव्यं इत्यवगम्यते एवमितरसहितेनेति । ते च शक्नुतः सहिते पृष्ठं संस्कर्तुम् । अतः तयोः साहित्यमेव युक्तम् । **भा.** १०।६।८।२५. * बृहद्रथंतरयोः स्वयोन्युत्तराप्रग्रथनेन संपादितककुभोरेव गानं (ज्योतिष्टोमे) । ९।२।६।२५–२८. **मीको.** पृ. १८२२ ‘ ज्योतिष्टोमे बृहद्रथंतरयोः ’ इत्यत्र द्रष्टव्यम् । * बृहद्रथंतरयोर्हि ऋक्संस्कारत्वेन विनियोगः । **भा.** १०।६।८।२५.

* **बृहद्रथंतरादिशब्दाः** सामविशेषवाचिनः । सामशब्दस्तु सामान्यवाची गानमात्रे वर्तते, न तु गानविशिष्टायामृचि । **वि.** ९।२।१.

बृहद्रथंतरोभयसामके क्रतौ रथंतरादिधर्माणां प्रकृतिवद् व्यवस्था ॥

उभयसाम्नि चैवमेकार्थापत्तेः ।९।२।१७।४८ ॥

भाष्यम्— सन्त्युभयसामानः क्रतवः । ‘ संसव उभे कुर्यात्, गोसव उभे कुर्यात्, अपचितावप्येकाहे उभे बृहद्रथंतरे कुर्यात् ’ इति श्रूयते । सन्ति तु प्रकृतौ बृहद्धर्मा रथंतरधर्माश्च । त इह चोदकेन प्राप्यन्ते । तत्र संशयः किमुभयसाम्नि उभयधर्माः कर्तव्याः अथवा

इहापि तथैव व्यवतिष्ठेरन् इति । किं प्राप्तम् ? उभयसाम्नि चैवं स्यात् । यथा कण्वरथंतरे । उभे ह्यत्र सामनी पृष्ठकार्ये वर्तेते, नैकैकम् । तस्मान्नैकैकधर्मान् लभेत । उभे ह्यत्र संहते, उभे धर्मैः संयुज्येयाताम् । उभे हि ते संहते, एकार्थापत्तेः पृष्ठकार्ये वर्तेते इति ।

स्वार्थत्वाद्वा व्यवस्था स्यात् प्रकृतिवत् । ४९ ॥

भाष्यम्— वाशब्दः पक्षं व्यावर्तयति । न चैतदस्ति बृहद्रथंतरयोः संहतयोरुभये धर्माः कर्तव्या इति । रथंतरे रथंतरधर्मा बृहति बृहद्धर्माः । कुतः ? स्वार्थत्वाद्धर्माणाम् । रथंतरधर्मा रथंतरार्थाः, बृहद्धर्मा बृहदर्थाः । साम्नोश्चैते धर्माः, न पृष्ठस्य । तच्च साम प्रयुज्यते रथंतरं बृहद्वा । रथंतरे प्रयुज्यमाने तद्धर्माः प्रयोक्तव्याः, बृहत्यपि प्रयुज्यमाने बृहद्धर्माः । सामप्रयुक्ता एवैते धर्माः । साम्नाऽपि हि दृष्टमदृष्टं च क्रियते । तस्मात् सामापि धर्मप्रयोजने समर्थम् । अतो व्यवस्था धर्माणां प्रकृतिवत् । तथा प्रकृतौ रथंतरे प्रयुज्यमाने तदङ्गं प्रयुज्यते । बृहति तदङ्गम् । एवमिहापीति ।

टुप्— पृष्ठानुवादेन कण्वरथंतरविधिः, यत् पृष्ठं तत् कण्वरथंतरमिति । बृहद्रथंतरे च न पृष्ठानुवादेन विधीयेते । चोदकेन विकल्पेन प्राप्नुवती वचनेन समुच्चीयेते (अन्यथा अप्राकृतकार्यता स्यात् ।) तस्माद्यथाप्राप्ते प्रयोक्तव्ये । यद्यपि च पृष्ठशब्दो नोच्चारितस्तथापि पृष्ठसाधने प्रकृतौ दृष्टे इति विकृतावपि पृष्ठसाधने एव भवतः । नान्यस्मिन् देशे प्रयोक्तव्ये इति ।

शा— द्वाभ्यामपि संहत्य एकैकस्य कार्यं साध्यते इति द्वयोरपि धर्मप्राप्तावुच्यते— ' **चोदकेन विकल्पेन प्राप्तयोः पृष्ठयोरिह । स्वधर्मयुक्तयोरेव समुच्चयविधिस्त्वयम् ॥** '

सोम— यथा कण्वरथंतरे उभयधर्माः तद्वत् इहापि उभयत्र उभयधर्मा इति कण्वरथंतरे विकल्पेऽपि इह समुच्चयः इति च उत्थानात् **संगतिः । सूत्रार्थस्तु**— उभयसाम्नि संसवादावपि एवं कण्वरथंतरादिवदुभयस्यैव एकार्थापत्तेरुभयधर्माः स्युः इति ।

वि— ' द्विसामके द्वयोर्धर्मसांकर्यं वा व्यवस्थितिः । पृष्ठैक्यात् संकरो, मैवं धर्माणां सामगत्वतः ॥ '

भाट्ट— यत्र संसवगोसवश्येनादौ बृहद्रथंतरयोः प्रकृतित एव विकल्पे प्राप्ते ' उभे बृहद्रथंतरे भवतः ' इति श्रुतम् । तत्र यन्मते तावदेकं पृष्ठस्तोत्रं साधनसाम्नोरेव च तस्मिन् विकल्पः, तदा तेन वचनेन तयोः समुच्चयमात्रविधानादेकस्मिन्नेव सप्तदशस्तोमके पृष्ठेंऽशतः सामद्वयम् , तत्र च व्यवस्थिता एव तत्तद्धर्माः । यदा तु प्रकृतावेव पृष्ठस्तोत्रद्वयं वैकल्पिकं इह च तयोरेव बृहद्रथंतरपदलक्षितयोः समुच्चयस्तदा तत्तत्सामकपृष्ठद्वयस्य प्रत्येकं सप्तदशस्तोमकस्य करणाद्धर्माणां व्यवस्थैव । नह्यत्रैकैककार्ये समुचितस्तोत्रद्वयविधानम् , येनैकैककार्ये उभयविधानात् उभयत्रोभयधर्माः स्युः । विशिष्टविधिगौरवादप्राकृतकार्यतापत्तेश्च यथावस्थितयोरेव समुच्चयमात्रविधानाङ्गीकरणात् । अतः तत्तत्साम्नि तत्तद्धर्मा एव संमीलनादयः ।

नैमित्तिकग्रहाग्रतानियमस्तु सत्यपि सामद्वये तयोर्विरोधित्वाभावेन निमित्तत्वाभावान्न भवति इत्युक्तं कौस्तुभे । अत्र च पृष्ठद्वयजन्यापूर्वस्यैकजातीयत्वेऽपि समुच्चयानुरोधेन व्यक्तिद्वयोत्पत्तिरिति ध्येयम् । इदं च पृष्ठद्वयसमुच्चयोदाहरणं संसवगोसवादिरूपं मूले कृत्वाचिन्तयेति द्रष्टव्यम् ।

वस्तुतस्तु तेषु ' उभे बृहद्रथंतरे भवतः ' इति प्रकृत्य ' पवमानं रथंतरं कुर्यात् बृहत्पृष्ठं भवति ' इति पञ्चविंशब्राह्मणानुरोधेन लाट्यायनिकल्पे रथंतरस्य पवमानस्तोत्रे निवेशाभिधानात् न पृष्ठस्तोत्रे उभयोः साम्नोर्न वा एकस्मिन् क्रतावुभयोः पृष्ठस्तोत्रयोः समुच्चयः । अत एव पवमानेऽपि रथंतरं विधीयमानं न संमीलनादीन् धर्मान् गृह्णाति । रथंतरस्य तैर्विनाऽपि जायमानत्वेन रथंतरस्वरूपे आनर्थक्यात् अपूर्वसाधनत्वलक्षणायां पृष्ठजनकसंस्कारसमूहसाधनत्वस्यैव लक्षणीयत्वात् । तदभावे यूपावटास्तरणबर्हिर्वेदप्राकृतकार्यापत्ते रथंतरादावप्राप्तेः ।

अत एव यैर्विना रथंतरमेव पठितुं न शक्यं यथा स्तोभादिभिः तत्रेतराक्षेपकत्वे प्रमाणाभावात् यदा तदाश्रयभूता ऋचोऽपि ऋगन्तरग्राहकप्रमाणाभावे आक्षिप्येरन् तदा तदङ्गभूतस्तोभादीनां ' प्रधानं नीयमानं हि तत्राङ्गान्यपकर्षति ' इति न्यायेनानुष्ठाने न काचन क्षतिः ।

अतः क्रत्वन्तरे एतादृशवाक्यसत्त्वे स्तोत्रान्तरे विनियोगाभावे चेदमधिकरणं द्रष्टव्यम् ।

मण्डन— ' व्यवस्थोभयसामके । ' २४.

शंकर— ' द्विसाम्नि चाङ्गभेदः स्यात् । ' २८.

* **बृहद्रथंतरधर्माणां** अविरुद्धानां वैश्यस्तोमे कण्वरथंतरे समुच्चयः । ९।२।१६।४७. **मीको.** पृ. १३५१ ' कण्वरथंतरे अविरुद्धानां० ' इत्यत्र द्रष्टव्यम् ।

✠ बृहद्रथंतरधर्माणां व्यवस्थया तत्तत्सामगानकाले अनुष्ठानम् ॥

एकार्थत्वादविभागः स्यात् ९।२।१५।४५ ॥

भाष्यम्— ज्योतिष्टोमे समामनन्ति ' बृहत्पृष्ठं भवति ' ' रथंतरं पृष्ठं भवति ' इति । व्यक्तो हि बृहद्रथंतरयोर्विकल्पः । यस्मिन् कार्ये रथंतरं प्रवर्तते, तस्मिन्नेव कार्ये बृहत्पृष्ठसिद्धिद्वारेण धर्मा विहिताः । तस्मात् बृहद्धर्मा रथंतरधर्माश्चोभयत्र कर्तव्या इति । बृहद्ग्रहणं रथंतरग्रहणं च लक्षणार्थं भविष्यति ।

टुप् — पृष्ठशब्दः स्तुतेरभिधाता । सा (स्तुतिः) चादृष्टार्थेत्युक्तम् (स्तुतशस्त्राधिकरणे) । तस्माद्वचनाद्विकल्पः बृहद्वा पृष्ठं रथंतरं वा इति । तत्र स्तुतिरदृष्टाय, साम ऋगक्षराभिव्यक्त्या दृष्टोपकारि । तस्माद्ये साम्न्युपनिबद्धा धर्मा उच्चैर्गेयत्वादयस्तेषामुभयत्र (बृहति रथंतरे च) संबन्धो न व्यवस्था । यथा व्रीहिसंबद्धं प्रोक्षणं न व्रीहिष्वेवावतिष्ठते (यवेष्वपि भवति) एवमिहापि ।

निर्देशाद्वा व्यवतिष्ठेरन् । ४६ ॥

भाष्यम्— निर्देशाद्वा रथंतरे रथंतरधर्माः कर्तव्याः ' नोच्चैर्गेयम् , न च बलवद्गेयम् ', ' रथंतरे प्रस्तूयमाने संमीलयेत् ', ' स्वर्दृशं प्रतिवीक्षेत ' इत्येवमादयः । बृहद्धर्माश्च ' बृहति उच्चैर्गेयम् ', ' बृहति गीयमाने समुद्रं मनसा ध्यायेत् ' इत्येवमादयः । एवं निर्देशोऽर्थवान् भविष्यति । इतरथा रथंतरग्रहणं च बृहद्ग्रहणं च प्रदर्शनार्थं स्यात् । तथा लक्षणा भवेत् । न च श्रुतिसंभवे लक्षणा न्याय्या । यदुच्यते अर्थैकत्वाद् बृहद्रथंतरयोरिति । सत्यमेकोऽर्थः पृष्ठसिद्धिः । एतदप्यस्ति अन्यथा बृहता साध्यते पृष्ठम् , अन्यथा रथंतरेणेति । यथा पर्वणि विभज्यमाने द्वावप्युपायौ । यथा, द्वौ पुरुषावन्तयोर्गृहीत्वाऽऽकर्षतः , यद्वा तीक्ष्णेन शस्त्रेण छेदनम् । तत्र यच्छस्त्रस्य तीक्ष्णीकरणं द्रव्यं तच्छेदनाभ्युपाये संबध्यते, नाऽऽकर्षणाभ्युपाये तदर्थापन्नेऽपि । एवं बृहद्धर्मा रथंतरे तदर्थापन्ने भवेयुर्वा न वेति जायते विचारणा । तत्र निर्देशसामर्थ्यादिदमवगच्छामः , अन्यथा बृहत् साधयति, अन्यथा रथंतरमिति । प्रत्यक्षं खल्वप्यन्यदुपलभामहे । रथंतरं शूरादिकां संस्तुतिं कुर्वत् पृष्ठं साधयति, बृहत् चित्रादिकाम् । तस्माद्रथंतरधर्माः शूरादिकायां स्तुतौ निबद्धा रथंतरे प्रस्तूयमाने भवेयुर्न बृहति । बृहद्धर्मा अपि चित्रादिकायां स्तुतौ निबद्धा बृहति भवेयुः , न रथंतरे । तस्माद्व्यवस्था धर्माणामिति ।

टुप्— 'अन्यथा बृहता साध्यते पृष्ठमन्यथा रथंतरेण ' इति । (अनुभाषितं भाष्यं चोदयति—) नन्वेवं ब्रुवता व्रीहियवयोरपि धर्मव्यवस्थेत्युक्तं भवति । अन्यथा व्रीहयः साधयन्त्यन्यथा वा यवा इति । उच्यते । व्रीहयस्तण्डुलनिर्वृत्तिं कुर्वन्ति । ततः पिष्टानि, तेभ्यः पुरोडाशाद्यागः, यागादपूर्वम् । यवेष्वेतत्तुल्यं सर्वम् । किमतः ? एतदतो भवति । व्रीहियवयोरत्यन्तदृष्टार्थत्वान्नापूर्वभेदः । तस्मादपूर्वं यागसाधनद्वारेण धर्माभिलाषि । उभौ च व्रीहियवौ यागसाधनम् । अत उभयत्र धर्माः । नास्ति व्यवस्था । व्रीहिस्थानीयं साम, प्रोक्षणस्थानीया उच्चैर्गेयत्वादयः । तत्र यद्यपि साम दृष्टोपकारि, तथापि यस्योपकारि (तत्पृष्ठनिवर्तकम्) । ते च स्तुती भेदेन चोदिते । अदृष्टार्थत्वाच्च तयोरपूर्वभेदः । अपूर्वप्रयुक्ताश्च धर्माः । नन्वेकस्मिन्नेवापूर्वे द्वे अपि स्तुती चोद्येते । एकार्थत्वाच्च तयोर्विकल्पो व्रीहियवयोरिव । तस्मान्न व्यवस्था । उच्यते । न निष्पन्नमपूर्वमास्ते, यत्रैते चोद्येते । किन्तु आभ्यामेवापूर्वं जन्यते । तत्रादृष्टार्थत्वात् स्तुत्योः, यदेव शूरादिकया जन्यते तदेव चित्रादिकयेति । कुत एतत् ? तस्मात् चित्रादिका यथा साधयति, येन साधनेनोपगृहीता, शूरादिकाऽपि तैः साधयिष्यतीति नास्त्येतत् । अत एव वचनाद्विकल्पः । अनैकार्थ्यात् । तस्माद्यथा श्रयणानामपूर्वभेदाद् व्यवस्था, एवमिहापि । व्रीहियवौ न साक्षादपूर्वस्य साधकौ । यागादपूर्वम् । स चाग्नेयादि-

भिरुत्पादितो व्रीहियववाक्ययोर्द्रव्यविधानायानूद्यते । न तु ताभ्यां यागोत्पत्तिः क्रियते । येन यागभेदोऽपूर्वभेदश्च स्यात् । तस्मात् तत्रापूर्वस्य भिन्नत्वाद्युक्ता व्यवस्था । **अन्ये** त्वाहुः । यद्यपि साम दृष्टोपकारि, स्तोभास्त्वदृष्टोपकारिणः । तस्मात् स्तोभप्रयुक्ता उच्चैर्गेयत्वादयः । अतो व्यवस्था । तथा च वक्ष्यति (भाष्यकारः–) ‘ साम्नाऽपि दृष्टमदृष्टं च क्रियते ’ इति । **तदयुक्तम्** । रथंतरशब्दः स्तोभलक्षणार्थः स्यात् । अपि च स्तोभाश्चोच्चैर्गेयत्वादयश्च साम्नि गुणभूताः ‘ गुणानां च परार्थत्वादसंबन्धः ’ (३।१।१२।२२) इत्युक्तम् । अरुणान्यायोऽपि (३।१।६।१२) नास्ति, स्तोभानामुच्चैस्त्वादीनां च परस्परनिराकाङ्क्षत्वात् । यत्तु ‘ साम्नाऽपि दृष्टमदृष्टं च ’ इति ऋगक्षराभिव्यक्त्या दृष्टम्, येन पुनरदृष्टार्थो स्तुतिमुत्पादयति तेनादृष्टम् ।

शा — **‘ उभयोरेककार्यत्वात्कार्यसाधनगोचराः । धर्मा द्वयोर्द्वयेऽपि स्युर्व्रीहिधर्मा यवेष्विव ॥ ’** इति प्राप्ते, ब्रूमः– **‘ साम्नोर्व्यवस्थया यस्मान्निर्देशो मीलनादिषु । तस्मान्न संकरो युक्तो न त्वेवं प्रोक्षणादिषु ॥ ’**

सोम— यदि कार्यसाधनत्वप्रयुक्ता धर्माः तदा रथंतरबृहतोः एककार्यत्वात् तद्धर्मसंकरः स्यादित्युत्थितेः **संगतिः** । वचनं चात्र ‘ रथंतरं बृहद् वा पृष्ठं कार्यम् ’ इत्येवंरूपमिति मीमांसकप्रवादः । **सूत्रार्थस्तु**– रथंतरबृहतोरेकार्थत्वात् धर्माणामविभागः संकरः स्यादिति ।

वि–– ‘ बृहद्रथंतरे धर्मैः संकीर्णे वा व्यवस्थिते । पृष्ठैक्यात् संकरो धर्मे निर्देशादेर्व्यवस्थितिः ॥ ’

भाट्ट— ज्योतिष्टोमे ‘ पृष्ठैः स्तुवते ’ इत्यनेन षट् पृष्ठस्तोत्राणि विहितानि । तत्र बृहद्रथंतरसामसाध्ययोः ‘ बृहद्वा रथंतरं वा पृष्ठं भवति ’ इति वचनाद्विकल्पः । तथा नौधसश्यैतसाध्ययोरपि । तथा च नियतानि चत्वारीत्यादि चित्राधिकरणे कौस्तुभे स्पष्टम् । तत्र च रथन्तरपुरस्कारेण केचिद्धर्मा विहिताः । ‘ रथन्तरे प्रस्तूयमाने संमीलयेत्, नोच्चैर्गेयम् ’ इत्यादयः । केचिच्च बृहत्पुरस्कारेण ‘ बृहति प्रस्तूयमाने समुद्रं मनसा ध्यायेत्, उच्चैर्गेयम् ’ इत्याद्याः । अतः उभयत्रापि साम्नः शेषित्वमेव, न तु निमित्तत्वं उच्चैस्त्वादिप्रायपाठात् । ते किमुभयत्रापि संकीर्णा उत व्यवस्थिता इति चिन्तायाम्, सत्यपि स्तोत्रभेदे तज्जन्यादृष्टस्य लाघवादेकजातीयस्यैव कल्पनादेकापूर्वसाधनीभूतार्थत्वेन धर्माणामवघातादिवत् संकरः । न ह्यनयोः प्रयाजानूयाजवत् समुच्चयः येनादृष्टवैजात्यमावश्यकं स्यात् । अत एव विकल्पवचनस्याप्यदृष्टैक्य एव तात्पर्यमित्यपि सुवचम् । अतश्चापूर्वस्यैकत्वात् तत्तत्स्तोत्रसाम्नोश्च स्वरूपेणाप्रवेशाद्युक्तो धर्मसंकरः । अत एव रथन्तरस्य ‘ अभि त्वा शूर ’ इत्यस्यामृच्युत्पन्नत्वेन शूरादिप्रकारस्य, बृहतश्च ‘ त्वामिद्धि हवामहे ’ इत्यस्यां उत्पन्नत्वेन आवाहनादिप्रकारस्य च भेदेऽपि न प्रवेशः । अस्य ऋक्साधनताप्रकारत्वेन सामसाधनताघटकत्वाभावाच्च । न हि ऋगर्थभेदेऽपि साम्नः अक्षराभिव्यञ्जकता भिद्यते । कण्वरथन्तरे प्रकारद्वयस्याप्यभावेन धर्मप्राप्त्यनापत्तेश्च । अत एव केषुचिद्धर्मेषु रथन्तरस्योपादानं केषुचित् बृहत इति प्रतिनियतनिर्देशाद्रथन्तरत्वादिविवक्षया धर्मव्यवस्थेत्यप्यपास्तम् ।

न चैवमपि रथंतरादिगीतेः ऋगक्षरवृत्त्यंशस्य दृष्टार्थत्वेऽपि स्तोभाक्षरवृत्त्यंशस्य अदृष्टार्थत्वात् तददृष्टयोश्च गीतिभेदेन भेदात् तत्तदपूर्वसाधनत्वलक्षणया धर्माणां प्रकृतौ न सांकर्यम्, कण्वरथंतरस्य बृहद्रथंतरस्थानापन्नत्वेन तद्गतस्तोभाश्रितगीत्यंशस्य प्राकृतस्तोभाश्रितगीत्यंशजन्यादृष्टार्थत्वेनैव हिरण्यगर्भमन्त्रन्यायेन कल्पनात् तत्रापि धर्मप्राप्त्युपपत्तिरिति **वाच्यम्** । एवमपि ऋगक्षराधिरूढगीत्यंशे उच्चैस्त्वादिरूपधर्मसांकर्यस्यानिवारणात् । न च तथापि सामद्वयजन्यनियमादृष्टभेदात् तन्नियमादृष्टसाधनत्वस्यैव च तद्धर्मविधावुद्देश्यतावच्छेदकत्वात् कण्वरथंतरे च हिरण्यगर्भमन्त्रन्यायेन तद्भेदाभावात् सांकर्याद्यनापत्तिरिति **वाच्यम्** । नियमादृष्टस्य नियमजन्यत्वेन सामजन्यत्वाभावात् । तज्जन्यत्वेऽपि वा दृष्टप्रयोजनस्यैवाक्षराभिव्यक्त्यादेः पुरःस्फूर्तिकतया साधनतद्धर्मप्रयोजकत्वेन नियमादृष्टस्य तत्प्रयोजकत्वाभावात् । इतरथा कृष्णलचरावपि अवघाततद्धर्मप्राप्त्यापत्तेः । **इति प्राप्ते**, सत्यपि स्तोत्रद्वयजन्यापूर्वैक्ये अवान्तरकार्यभेदात् व्यवस्थासिद्धिः । तथा हि स्तोत्रत्वं

तद्व्याप्यवैजात्यं वा न तावत् प्रतिगुणाभिधानव्यक्तिविश्रान्तम्, द्वादशस्तोत्रत्वानुपपत्तेः, अपि तु तत्तत्स्तोमकगुणाभिधानव्यक्तिषु व्यासज्यवृत्ति, तासां च न यौगपद्यं क्षणिकत्वात् क्रमिकत्वाच्च । अतस्तत्तद्गुणाभिधानेभ्यः संस्काररूपाण्यदृष्टानि उत्पद्यन्ते । तैश्च सकलगुणसमूहालम्बनात्मिका तत्तद्विजातीयस्तोत्रत्वावच्छिन्ना अभिधानव्यक्तिरेका उत्पद्यते इत्यवश्यं वाच्यम्, तत्र च विजातीयस्तोत्रजनकतावच्छेदकतया संस्कारेष्वपि वैजात्यावश्यंभावात्, दीक्षणीयावाङ्नियमन्यायेन तत्तत्संकारसमूहप्रयुक्ता एव तत्तद्धर्मा इति न प्रकृतौ सांकर्यम् । कण्वरथंतरे च हिरण्यगर्भमन्त्रन्यायेन तत्तत्संस्कारसमूहद्वयजनकतयैव ऋगन्तरजन्यसप्तदशसंख्याकगुणाभिधानव्यक्तिविधानात् तत्तत्संस्कारसमूहप्रयुक्तधर्मप्राप्त्युपपत्तिरिति सर्वमनाकुलम् ।

मण्डन— ‘ साम्नो धर्मा व्यवस्थिताः । ’

शंकर— ‘ पृष्ठसाम्नोरङ्गभेदः । ’

* **बृहद्रथंतरसामा** (पृष्ठ्यः षडहः गवामयने) अनेकपदबहुव्रीहिरयम् । न द्वन्द्वगर्भो बहुव्रीहिः । तथा च केषु चिदहःसु रथंतरं केषु चित् बृहत् । न समस्ते सामनी विधीयेते । **भा.** १०।६।३।४–५. * **बृहद्रथंतरसाम्नोरेव** प्रकृतौ अङ्गत्वेन विधानं न तु तद्योन्योः । अतो विकृतौ तद्योन्योर्नातिदेशः । **वि.** १०।४।२४ .

* **बृहत्साम** एकच्छन्दस्कं नास्ति । तस्याऽऽधारश्च काकुभः प्रगाथः । प्रथमा बृहती, द्वितीया पङ्क्तिः । तयोः प्रग्रथनेन एका बृहती द्वे ककुभौ च संपद्यन्ते, तासु बृहद् गातव्यम् । (चिन्त्यमिदम् । ऋसं. सर्वानुक्रमण्यां हि काकुभः प्रगाथः ककुप्–सतोबृहतीभ्यां सिध्यतीत्युक्तम् । तत्र सतोबृहती पङ्क्तिजातीयत्वात् कथञ्चित् पङ्क्तिरिति वक्तुं शक्यम्, परंतु ककुप् उष्णिक्जातीया न बृहतीजातीया इति । **के.**) । **वि.** ९।२।६, * बृहत्साम ज्योतिष्टोमे पृष्ठस्तोत्रे रथंतरेण सह विकल्पितम् । ७।३।३, * बृहत्साम ‘ त्वामिद्धि हवामहे ’ इत्येतस्यां योनौ उत्पन्नम् । १०।४।२४, * बृहत्साम विश्वजिति षडहात् ‘ विश्वजित्सर्वपृष्ठः ’ इति सर्वशब्दात् प्राप्तम् । ७।३।२, * बृहत्साम षडहे द्वितीयेऽहनि पृष्ठनिष्पादकम् । ७।३।२. * **बृहत्सामा** यदि सोमः स्यात् शुक्राग्रान् ग्रहान् गृह्णीयात् ज्योतिष्टोमे । **भा.** १०।५।१५।५८ वर्णकं १. * बृहत्सामा सोमः माध्यंदिने पृष्ठस्तोत्रे यस्य सोमयागस्य बृहत् साम सः । एवं रथंतरसामा । **वि.** १०।५।१५.

* **बृहत्सामता** ज्योतिष्टोमे पृष्ठार्था । **भा.** १०।६। ६।१६.

* **बृहत्सामत्वेन** उत्तमत्वं निमित्तीकृत्य वेदे बहुशः स्तुतिः दृश्यते । **संकर्ष.** ४।१।८. * **बृहत्सामत्वे,** पृष्ठस्तोत्रे ज्योतिष्टोमगते, शुक्राग्रत्वम् । **वि.** २।३।१.

* **बृहत्सामधर्माः** ‘ उच्चैर्गेयम् ’, ‘ बलवद्गेयम् ’, ‘ बृहति स्तूयमाने मनसा समुद्रं ध्यायेत् ’ इत्यादयः । **वि.** ९।२।१५.

* **बृहती** । गायत्रीबृहत्यनुष्टुप्सु एव आगम्यमानानां साम्नां निवेशः विवृद्धस्तोमकेषु क्रतुषु माध्यंदिनार्भवपवमानयोः । न तु अन्त्ये तृचे । **भा.** ५।३।५। १३–१४. * बृहती पादेषु अक्षराणि ८।८।१२।८. उदा० ‘ मा चिदन्यत्० ’ (ऋसं. ८।१।१), किंवा ९।९। ९।९. उदा० ‘ तं त्वा वयं पितो० ’ (ऋसं. १।१८७। ११) । **के.** * **बृहत्योरेव** उत्तराग्रन्थपठितयोस्त्रैशोकसाम्नोर्गानं द्वादशाहे । अतिजगतीषु इति बहुवचनं तु प्रथमाया अतिजगत्याः सप्तकृत्वोऽभ्यासात् । **भा.** ९।२।५।२१–२४ वर्णकं २.

* **बृहतीपङ्क्त्योः** एव प्रग्रथनेन रथंतरस्य गानम् । **भा.** ९।२।६।२५–२८ वर्णकं १.

* **बृहतीविष्टारपङ्क्त्योः** एव प्रग्रथनेन संपादिते बार्हते तृचे रौरवयौधाजयसाम्नोर्गानं ज्योतिष्टोमे । **भा.** ९।२।६।२५–२८ वर्णकं २.

* **बृहतीशब्दो** द्रव्यवचनः । शब्दो द्रव्यमित्यर्थः । **संकर्ष.** ४।४।४.

* **बृहस्पतिसवः** । ‘ ब्राह्मणो बृहस्पतिसवेन यजेत ’ इति प्रसिद्धो बृहस्पतिसवः । ‘ वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत ’ इत्यत्र तु वाजपेयाङ्गत्वेन विहितो बृहस्पतिसवः कर्मान्तरमेव प्रसिद्धबृहस्पतिसवात् । धर्मातिदेशार्थस्तु कर्मान्तरे बृहस्पतिशब्दप्रयोगः मासाग्निहोत्रवत् । ४।३।

१२।२९–३१. * बृहस्पतिसवः वाजपेयाङ्गम् । ४।३। १२।२९–३१. ‘ बृहस्पतिसवन्यायः ’ इत्यत्र द्रष्टव्यम् । * बृहस्पतिसवः वाजपेयाङ्गोऽपि स्वकाले (वसन्ते) कर्तव्यः । **भा. ४।३।१७।४०–४१.** * **बृहस्पतिसवस्य** ज्योतिष्टोमविकृतित्वात् वसन्तकालश्चोदकप्राप्तः । **वि. ४।३।२०.** * **बृहस्पतिसवे** ‘ बार्हस्पत्यं ग्रहं गृह्णाति ’ । अस्य प्राकृतैः ग्रहैः समुच्चयः । १०।४।२। ३–५.

बृहस्पतिसवादौ दाशतयीभ्यः उत्पन्नगायत्रीणामानयनम् ॥

गायत्रीषु प्राकृतीनामवच्छेदः प्रकृत्यधिकारात्संख्यात्वादग्निष्टोमवदव्यतिरेकात् तदाख्यत्वम् । ८।३।६।१२ ॥

भाष्यम्— उपचयश्चिन्तितः । अपचय इदानीं चिन्त्यते । इदं श्रूयते ‘ वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत ’ इति । तत्रेदं समाम्नातम् ‘ गायत्रमेतदहर्भवति ’ इति । अत्र विचार्यते । किं प्राकृतीनां त्रिष्टुब्जगतीनामक्षरावलोपं कृत्वा गायत्रं तदहः कर्तव्यम् , उत उत्पत्तिगायत्रीणां दाशतयीभ्यः आगमं कृत्वेति । अत्र सूत्रेणैवोपक्रमः । गायत्रीषु प्राकृतीनामवच्छेदः । गायत्रीषु श्रूयमाणासु ‘ गायत्रमेतदहर्भवति ’ इति प्राकृतीनां त्रिष्टुब्जगतीनामवच्छेदोऽक्षरावलोपः कर्तव्यः । कुतः ? प्रकृत्यधिकारात् । चोदकेनात्र प्राकृत्यस्त्रिष्टुब्जगत्यः प्राप्ताः अधिकृता विद्यन्ते । यदि अन्यासामृचामागमः क्रियेत, प्राकृतः प्रत्ययो बाध्येत ।

ननु प्रत्यक्षश्रुताः गायत्र्यः । ताभिश्चोदकप्राप्ता इतरा बाधितव्याः । नेत्याह । कस्मात् ? संख्यात्वात् । अयं गायत्रीशब्दः संख्यावाचकः । कथं ज्ञायते ? अव्यतिरेकाच्चतुर्विंशतिसंख्यामेष न व्यभिचरति । न कचिच्चतुर्विंशतिसंख्यया विना दृष्टः । चतुर्विंशतिसंख्याहीनासु त्रिष्टुब्जगतीषु न कदाचिद्भवति । तस्मात् संख्याशब्दोऽयम् । संख्याशब्दश्चेदक्षरावलोपः कर्तव्यः । अग्निष्टोमवत् । यथा ‘ शताग्निष्टोमं भवति ’ इत्युक्ते द्वादशाहिकानामह्नामुक्थ्यावलोपः क्रियते । एवमिहापि ।

तं नित्यवच्च पृथक्सतीषु तद्वचनम् । १३ ॥

भाष्यम्— तं नित्यवत्संख्यामात्रं ब्रुवन्तं गायत्रीशब्दं मत्वा, पृथक्सतीषु पृथग्भूतासु गायत्रीभ्यो जगतीषु, अगायत्रीषु तद्वचनं भवति, गायत्रीवचनं भवति ‘ ये हि द्वे गायत्र्यौ सैका जगती ’ इति । यदि संख्यायां गायत्रीशब्दस्ततो जगत्यां द्वे चतुर्विंशतिसंख्ये इत्येतद्वचनमुपपद्यते । अथ ऋचि ततो द्वे ऋचौ जगत्यां न स्तः इत्येतद्वचनमनुपपन्नं स्यात् । तस्मादपि संख्यायां गायत्रीशब्दः । तथेदमपरं च दर्शनम् । ‘ तिस्रोऽनुष्टुभश्चतस्रो गायत्रीः करोति ’ इति ।

न विंशतौ दशेति चेत् । १४ ॥

भाष्यम्— अथ कश्चिद् ब्रूयात् , न विंशतौ दशसंख्याऽस्ति । न संख्या संख्यान्तरे वर्तते । गुणो हि संख्या । न च गुणा गुणेषु वर्तन्ते । एवमष्टाचत्वारिंशत्संख्यायां चतुर्विंशतिसंख्या नास्ति । तस्मात् संख्यार्थेऽपि गायत्रीशब्दे ‘ एका जगती द्वे गायत्र्यौ ’ इत्येतदनुपपन्नमेव । यश्चोभयोर्दोषो नासावेकस्य वाच्यः ।

ऐकसंख्यमेव स्यात् । १५ ॥

भाष्यम्— अत्रोच्यते । न ब्रूमः संख्यायां संख्या वर्तत इति । किं तर्हि ? अष्टाचत्वारिंशत्संख्यापरिच्छिन्नेष्वक्षरेषु अवयवभूते द्वे चतुर्विंशतिसंख्ये, न तु द्वे ऋचौ इति । न च संख्या संख्यान्तरं निवर्तयति । यदि निवर्तयेदैकसंख्यमेव स्यात् । यस्य दश गावस्तस्य द्वौ पञ्चकौ गवामित्येतद्वचनं न स्यात् । भवति च तत् । तस्मान्न संख्या संख्यान्तरं निवर्तयति ।

एवं वा । न विंशतौ दशेति चेत् । यद्यपि संख्यायां गायत्रीशब्दः , एवमपि नाक्षरावलोपः कर्तव्यः । किं कारणम् ? विंशतौ दश विद्यन्ते । किमतः ? इदं तावदतः । येन विंशतिरुपात्ताः, उपात्तास्तेन दश भवन्ति । एवं येन त्रिष्टुब्जगत्यः प्रयुक्ताः, प्रयुक्तास्तेन तदन्तर्गता गायत्र्यो भवन्ति । तस्मादविकारेण प्रयोगः । एवं चोदकानुग्रहश्च भवति । गायत्रं चाहः कृतं भवति ।

ऐकसंख्यमेव स्यात् । अत्राऽऽह जगत्यां त्रिष्टुभि चोपात्तायां न गायत्र्य उपात्ता भवन्ति । कथम् ? साधनं परिच्छिन्दती संख्या कर्मणि अङ्गीभवति । न जगत्याः

त्रिष्टुभो वाऽवयवः साधनम् । किं तर्हि ? त्रिष्टुब्जगत्यः । अथोच्येत ‘ गायत्रमेतदहर्भवति ’ इति वचनादवयव एवात्र साधनमिति । तथा सति अक्षरावलोप एव प्राप्नोति, उत्तरस्यावयवस्य अनङ्गत्वात् । न चानङ्गेऽनुपादीयमाने चोदको बाध्यते । तस्मात् यदुक्तम्, यद्यपि संख्यायां गायत्रीशब्दः, एवमप्यविकारेण प्रयोग इति, एतदयुक्तम् । दर्शयति च नोत्तरस्यां संख्यायामुपात्तायां पूर्वाः संख्या उपात्ता भवन्तीति, यदयम् ‘ एका च दश च शतं च सहस्रं च परार्धं च ’ इति सर्वसंख्या अनुक्रामति । यदि चोत्तरस्यां संख्यायामुपात्तायां पूर्वाः संख्या उपात्ता भवन्ति, ऐकसंख्यमेव स्यात् । एकैव परार्धसंख्या भवेत् । सा हि सर्वाभ्य उत्तरा । यतस्त्वेकाद्या अप्यनुक्रान्ताः । अतो विज्ञायते, नोत्तरस्यां संख्यायामुपात्तायां पूर्वाः संख्या उपात्ता भवन्तीति ।

गुणाद्वा द्रव्यशब्दः स्यादसर्वविषयत्वात् ।१६॥

भाष्यम्— नैतदेवं संख्यायां गायत्रीशब्द इति । कथं तर्हि ? गुणाद् द्रव्यशब्दः स्यात् । चतुर्विंशत्यक्षरयुक्तस्य द्रव्यस्य वाचकः । कस्मात् ? असर्वविषयत्वात् । यदि संख्याशब्दः स्यात्, सर्वस्मिंश्चतुर्विंशतिसंख्यासंख्येये वर्तेत गोयूथादौ । न च वर्तते । तस्मान्न संख्याशब्दः ।

गोत्ववच्च समन्वयः । १७ ॥

भाष्यम्— यथा गौरिति सत्यपि गमननिमित्ते सामान्यद्रव्याभिधाने सास्नादिमत्येव समन्वयः, नान्यत्रेति तद्वचन एव गोशब्दो विज्ञायते । एवमयमप्यृग्वचन एव विज्ञातुं न्याय्यः ।

संख्यायाश्च शब्दवत्त्वात् । १८ ॥

भाष्यम्— चतुर्विंशतिसंख्यावाचकः शब्दोऽस्ति, चतुर्विंशतिरिति । नास्यापरेण गायत्रीशब्देनार्थः । संज्ञाया व्यवहारार्थत्वादेकेन व्यवहारसिद्धेः ।

इतरस्याश्रुतित्वाच्च । १९ ॥

भाष्यम्— इतरस्य ऋग्द्रव्यस्याश्रुतित्वात् । अशब्दत्वादित्यर्थः । तस्यापि व्यवहारार्थेन संज्ञाशब्देन प्रयोजनम् । तत्रायं गायत्रीशब्दोऽर्थवान् भवति । संख्यायां निष्प्रयोजनः । तस्मादपि ऋक्शब्दो न्याय्यः । अतो गायत्रीणामृचामागमः कर्तव्य इति ।

द्रव्यान्तरेऽनिवेशादुक्थ्यलोपे विशिष्टं स्यात् । २० ॥

भाष्यम्— यदुपवर्णितम्, अग्निष्टोमवदिति, तत्र ब्रूमः । अग्निष्टोमशब्दस्य द्रव्यान्तरे कस्मिंश्चिन्निवेशो नास्ति । यथा गायत्रीशब्द ऋग्द्रव्ये । अयं हि केवलाग्निष्टोमान्ततां ब्रूते । न चोक्थ्यलोपमन्तरेण द्वादशाहिकानामह्नामग्निष्टोमान्तता भवतीत्यवश्यकार्य उक्थ्यलोपः । अयं पुनर्गायत्रीशब्दः ऋग्द्रव्यस्य वाचकः इत्युक्तम् । न चाक्षरावलोपेन तदृग्द्रव्यं प्राप्यते । तस्माद्विषमोऽयमुपन्यास इति ।

अशास्त्रलक्षणत्वाच्च । २१ ॥

भाष्यम्— अशास्त्रलक्षणानि चोक्थस्तोत्राणि शताग्निष्टोमे, तानि शास्त्रलक्षणयाऽग्निष्टोमान्ततया बाध्यन्ते । इह पुनर्विपरीतम् , शास्त्रलक्षणा गायत्र्यः, आनुमानिक्यस्त्रिष्टुब्जगत्यः । ता न शक्नुवन्ति गायत्रीं बाधितुम् ।

उत्पत्तिनामधेयत्वाद् भक्त्या पृथक्सतीषु स्यात् । २२ ॥

भाष्यम्— अथ यदुक्तम्, संख्यायां गायत्रीशब्दो दृष्टः ‘ ये हि द्वे गायत्र्यौ, सैका जगती ’ इति । तस्य कः परिहारः ? उच्यते । औत्पत्तिकमेतदृचो नामधेयमित्युक्तम् । अत उत्पत्तिनामधेयत्वाद्योऽयं जगत्यवयवे चतुर्विंशत्यक्षरे पदसंचये प्रयोगः, स भक्त्या विज्ञेयः । न ह्येकस्य शब्दस्यानेकार्थता सत्यां गतौ न्याय्या । कया पुनर्भक्त्या ? परिमाणसामान्यात् । यत्परिमाणं द्वयोर्गायत्र्योस्तदेकस्या जगत्याः । अत एतदुक्तम् ‘ ये हि द्वे गायत्र्यौ सैका जगती ’ इति । यथा, यौ द्वौ कौरवौ स एको वाहीक इति । एतच्च गायत्रीद्वयप्रशंसार्थं वचनम् । कथम् ? इदं श्रूयते, ‘ द्वाभ्यां गायत्रीभ्यां वैश्यस्येति । तदेतदयुक्तमिवोच्यते । जगत्या वैश्यस्य कार्यम्, जागतो हि वैश्यः । तदेतद्द्वाभ्यां गायत्रीभ्यां क्रियते, जगत्यैव तत्कृतं भवति, ये हि द्वे गायत्र्यौ सैका जगती ’ इति । तस्मादहेतुरयं संख्यार्थत्वे गायत्रीशब्दस्य ।

वचनमिति चेत् । २३ ॥

भाष्यम्— शक्यं तावत्तत्रैतद्वक्तुम् , यत्रानुवादो गायत्रीशब्दः । यत्र तु विधिस्तत्र कथम् ? यथा ‘ तिस्रोऽनुष्टुभः चतस्रो गायत्रीः करोति ’ इति ।

कः पुनर्विधौ विशेषः ? विधौ शब्दार्थेन व्यवहारो भवति । तिस्रोऽनुष्टुभश्चतस्रो गायत्र्यो न शक्याः कर्तुम् । शक्यास्तु चतस्रश्चतुर्विंशतयः । तस्मात्तत्र संख्यायां गायत्रीशब्द इति ।

यावदुक्तम् । २४ ॥

भाष्यम्— अथ ब्रूमः । इहैवैकत्र संख्यार्थो नान्यत्र । क्वचिद्दर्शनात् । आह । यद्येवम्, न संख्यावचनः । कथमिह संख्यार्थो जात इति । उच्यते । लक्षणयाऽपि विधानं भवति । यथा लोके अमी पिष्टपिण्डाः सिंहाः क्रियन्तामिति, वेदेऽपि 'पृष्ठैरुपतिष्ठते' इति । न च तत्र सिंहशब्दः प्रतिकृतिवचनो दृष्ट इत्यन्यत्रापि प्रतिकृतिवचनो विज्ञायते, पृष्ठशब्दो वा पृष्ठसाधनमन्त्रवचनः, न च लक्षणया प्रयोगे शब्दार्थः परिच्छिद्यते । यत्कारणम्, स्वार्थे एव वर्तमानोऽर्थान्तरं लक्षयति । स्वार्थं जहन्नैव लक्षयेत् । तस्मादयमप्यहेतुः ।

अपूर्वे च विकल्पः स्याद्यदि संख्याविधानम् । २५ ॥

भाष्यम्— अपूर्वे च दर्शपूर्णमासकर्मणि विकल्पः स्यात्, यदि संख्यायां गायत्रीशब्दः । तत्र हि श्रूयते 'गायत्र्या परिदध्यात्' इति । एवं श्रुते, आजुहोतायाश्चतुर्विंशत्यक्षरस्य पदसंचयस्य च विकल्पः स्यात् । विकल्पे पक्षे आजुहोताया बाधः । स चायुक्तः सत्यां गतौ । तस्मादपि नैतत्संख्याविधानम् ।

ऋग्गुणत्वान्नेति चेत् । २६ ॥

भाष्यम्— अत्रोच्यते । न प्रकृतौ विकल्पो भविष्यति । कुतः ? ऋग्गुणत्वात् । ऋग्गुणो हि तत्र प्रयोगोऽङ्गीकृतः । ऋचस्तस्य सामिधेन्य आम्नाताः । यदि अनृचा परिदधीत, ऋग्गुणत्वं बाध्येत । तस्मात्तत्राऽऽजुहोतयैव परिधास्यति । तथा सति गायत्र्या परिहितं भविष्यति । ऋग्गुणत्वं चोपसंगृहीतम् ।

तथा पूर्ववति स्यात् । २७ ॥

भाष्यम्— पूर्ववत्यपि बृहस्पतिसवे तथा स्यात्, यथा अपूर्वे । अत्रापि ऋग्गुणकः प्रयोगोऽङ्गीकृतश्चोदकेन । तत्रापि ऋक्षूपादीयमानासु गायत्रं चैवाहः कृतं भवति, ऋग्गुणकत्वं च न बाधितम् । तस्मान्नाक्षरावलोपः ।

गुणावेशश्च सर्वत्र । २८ ॥

भाष्यम्— तुशब्दस्य स्थाने चशब्दः । दृष्टश्च तुशब्दस्यार्थे चशब्दः यथा, किञ्चेह भवति इति । गुणस्य चतुर्विंशतिसंख्यायाः सर्वत्राऽऽवेशः कृत्स्नायामाजुहोतायाम्, नावयवे । अतस्तस्यामुपादीयमानायामृग्गुणत्वं चोपगृहीतं भवति, संख्या च । बृहस्पतिसवे पुनर्या ऋचश्चोदकेनाङ्गीकृताः, तासां अवयवे चतुर्विंशतिसंख्या निविष्टा । तस्मिन्नुपादीयमाने ऋग्गुणत्वमनुपात्तं भवति । प्रकृतिगायत्रीषु तूपात्तं भवति । तस्मान्न संख्याभिधाने गायत्रीशब्दे प्रकृतिगायत्रीणामागमः प्राप्नोति ।

अपर आह । इदं तावदयं संख्यावादी प्रष्टव्यः । कस्मादक्षरगतायामेव संख्यायां भवानवस्थितः, न पुनरन्यसंख्येयगतायामपि, ग्रहगतायां चमसगतायां वा यावताऽविशेषेण श्रुतम् 'गायत्रमेतदहर्भवति' इति । एवं सति सर्वत्र गुणावेशः संख्यावेशः प्राप्नोति ।

निष्पन्नग्रहणान्नेति चेत् । २९ ॥

भाष्यम्— स चेद् ब्रूयात्, यत्रायं निष्पन्नो गायत्रीशब्दः, प्रसिद्धः इत्यर्थः । तस्य ग्रहणं न्याय्यम् । अयं चाक्षरगतायामेव संख्यायां प्रसिद्धो न सर्वत्र । तस्मान्न सर्वसंख्येयगतो गृह्यत इति ।

तथेहापि स्यात् । ३० ॥

भाष्यम्— स वक्तव्यः । यथाऽक्षरगतायामेव संख्यायां दृष्टो नान्यत्र, एवमृक्ष्वेव दृष्टो नान्यस्मिंश्चतुर्विंशत्यक्षरे गद्ये वा । यथा चाक्षरेष्वेव दृष्ट इति नानक्षरे विज्ञायते । एवमृक्षु दृष्ट इति नानृक्षु विज्ञातुं न्याय्यः ।

यदि वाऽविशये नियमः प्रकृत्युपबन्धनाच्छरेष्वपि प्रसिद्धः स्यात् । ३१ ॥

भाष्यम्— अत्राऽऽह । यद्यप्ययमृक्षु गायत्रीशब्दः, एवमप्यक्षरावलोप एव कार्यः । किं कारणम् ? प्रकृत्युपबन्धनात् । चोदकेनात्र प्राकृत्यस्त्रिष्टुब्जगत्यः प्रापिताः । ता इमा नोज्झिता भविष्यन्ति । गायत्रीशब्दश्च संख्यासामान्याच्छक्नोति तदवयवान् वक्तुम् । एवमुभौ विधी अनुगृहीतौ भविष्यतः प्राकृतो वैकृतश्चेति । अत उत्तरं पठति । यद्यविशये असंशयेऽपि, गायत्रीषु विहितासु प्रकृत्युपबन्धनादगायत्र्यां गायत्रीशब्दः कल्प्यते, शरेष्वपि

'शरमयं बर्हिर्भवति' इति कुशेषु शरशब्दः कल्पयितव्यः । कौशमेव बर्हिः कार्यम् । वक्तव्यो वा विशेषः ।

दृष्टः प्रयोग इति चेत् । ३२ ॥

भाष्यम्— अयं विशेषो दृष्टः । चतुर्विंशतिसंख्यायामक्षरगतायां गायत्रीशब्दस्य प्रयोगः 'ये द्वे गायत्र्यौ सैका जगती' इति । तेन शक्यते कल्पयितुम् ।

तथा शरेष्वपि । ३३ ॥

भाष्यम्— शरशब्दस्यापि कुशेषु प्रयोगो दृश्यते, शरवणमेवेदं कुशवनमिति ।

भक्त्येति चेत् । ३४ ॥

भाष्यम्— अत्रोच्यते । स तत्र शरशब्दो भाक्तः प्रयुज्यते । दीर्घत्वात् पृथुपत्रत्वात् सादृश्यवादोऽसौ, शरवणमेवेदं कुशवनमिति । स्वार्थे वर्तमानः सादृश्यं गमयति । स्वार्थं जहत् कथं गमयेत् । तस्माच्छरेष्वेव तत्र शरशब्दस्य प्रयोगो न कुशेष्विति ।

तथेतरस्मिन् । ३५ ॥

भाष्यम्— तथेतरस्मिन्नपि 'ये द्वे गायत्र्यौ सैका जगती' इति भाक्त एव गायत्रीशब्द इत्युक्तम् । सोऽपि स्वार्थ एव वर्तमानस्तत्सदृशं गमयतीति, ऋक्ष्वेव प्रयुक्तो न संख्यायाम् । तस्मान्न संख्यायां गायत्रीशब्दः । अतो नाक्षरावलोपः कर्तव्यः ।

अर्थस्य चासमाप्तत्वान्न तासामेकदेशे स्यात् । ३६ ॥

भाष्यम्— अपि च त्रिष्टुब्जगतीनामेकदेशो वाक्यमपरिसमाप्तं भवति । न चापरिसमाप्तेन वाक्येनार्थः कश्चिदभिधीयते । अर्थाभिधानार्थश्च मन्त्रप्रयोगः । तत्र मन्त्रप्रयोग एवानर्थकः स्यात् । तस्मान्न तासां त्रिष्टुब्जगतीनामेकदेशे गायत्रीशब्दः स्यात् । तस्मादुत्पत्तिगायत्रीणामेव दाशतयीभ्य आगमः कर्तव्य इति ।

शा— '**संख्यामात्राभिधायित्वे सर्वत्रैव प्रसज्यते । मन्त्रान्तरे घटादौ च तस्मात्संख्यान्वितामृचम् ॥ अष्टाक्षरैस्त्रिभिः पादैर्युक्तामभिदधात्यसौ । तिस्रोऽनुष्टुभ इत्यत्र गौणः शब्दो न मुख्यतः ॥**' तस्मादुत्पत्तिगायत्र्य आनेयाः । पूर्वाधिकरणे उपचयश्चिन्तितः, तत्प्रसङ्गादपचयोऽयं चिन्तितः ।

सोम— **सूत्रार्थस्तु**– 'गायत्रं भवति' इति गायत्रीषु श्रुतासु प्राकृतीनां त्रिष्टुभादीनामवच्छेदः अक्षरावलोपः चोदकेन प्राकृतीनामधिकारात् संनिधानात् । न च प्रत्यक्षाभिस्ताभिः प्राकृतीनां बाधनं शङ्कनीयम् । संख्यात्वाद् गायत्रीशब्दार्थस्य संख्यामात्ररूपत्वे तद्विरोधाभावात् । यथा 'शताग्निष्टोमं भवति' इत्यत्र द्वादशाहिकानामह्नां उक्थ्यावलोपः तथा अत्रापि अक्षरावलोपः इति । गायत्रीशब्दस्य संख्यावाचित्वं च संख्याया अव्यभिचारात् ।

वि— 'अहर्गायत्रमित्यत्र वर्णलोप ऋचोऽथवा । आद्यः संख्योक्तितो, मैवं गद्यादौ तत्प्रसङ्गतः ॥'

भाट्ट— बृहस्पतिसवे प्रकृतितो गायत्रत्रैष्टुभादिनानाछन्दःसु प्राप्तेषु छन्दोऽन्तरपरिसंख्यार्थं 'गायत्रमेतदहर्भवति' इति श्रुतम् । तत्र गायत्र्यादिशब्दानां चतुर्विंशत्याद्यक्षरसंख्यामात्रवाचित्वात् नागृहीतविशेषणान्यायेन लक्षणयाऽपि ऋक्षु प्रयोगोपपत्तेस्तत्रापि न शक्तिः । अतश्च प्राकृतीष्वेव ऋक्षु अधिकाक्षरलोपं कृत्वा चतुर्विंशत्यक्षराण्येव पठनीयानि । अत एव 'ये हि द्वे गायत्र्यौ सैका जगती' इति लिङ्गमपि संख्यावाचित्वपक्षे उपपद्यते, न ऋग्वाचित्वपक्षे, 'तिस्रोऽनुष्टुभश्चतस्रो गायत्र्यो भवन्ति' इति च । अन्ततः शताग्निष्टोमे उक्थ्यादिस्तोत्रलोपवदिहाप्यधिकाक्षरावलोपप्रसक्तौ न गायत्र्यादिशब्दानां संख्यामात्रवाचित्वम्, तथात्वे घटादिसंख्यायामपि प्रयोगापत्तेः । प्रयोगानुसारेणाक्षरसंख्यावाचित्वे तेनैव ऋग्विशेषस्य वाच्यतापत्तेः । इतरथा तावत् अक्षरगद्येऽपि प्रयोगापत्तेः । अतोऽष्टाक्षरपादत्रययुक्तः ऋङ्मन्त्रविशेष एव गायत्र्यादिपदवाच्यः । निरुक्तलिङ्गेषु तु संख्यामात्रे लाक्षणिकः । तेन दाशतयीभ्य एवोत्पन्नगायत्र्य आनेया नाक्षरावलोपः । तथात्वे वाक्यार्थपरिपूर्त्यभावेनार्थप्रकाशकत्वानुपपत्तेश्च । पूर्वाधिकरणे अधिकागमरूपोपचयश्चिन्तितः, तत्प्रसङ्गात् इहापचयश्चिन्त्यत इति नात्र तथाऽध्यायसंगतौ यतितव्यम् ।

मण्डन— ‘ गायत्रता नाक्षरलोपने स्यात् । ’

शंकर— ‘ गायत्री वर्णलोपान्न । ’

* **बृहस्पतिसवादिविकृतौ** औपदेशिकैः ग्रहणैः (ग्रहैः) आतिदेशिकानामैन्द्रवायवादिग्रहाणां समुच्चयः । १०।४।२।३–५. **मीको.** पृ. १६४४ ‘ ग्रहसमुच्चयन्यायः ’ इत्यत्र द्रष्टव्यम् ।

बृहस्पतिसवन्यायः । सौत्रामण्यादेः अग्निचयनाद्यङ्गता ॥

समवाये चोदना संयोगस्यार्थवत्त्वात् । ४।३। १२।२९ ॥

भाष्यम्— ‘ अग्निं चित्वा सौत्रामण्या यजेत ’ ‘वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत ’ इति । तत्र संदेहः किमङ्गप्रयोजनसंबन्ध एष उत कालार्थः संयोग इति । अङ्गप्रयोजनसंबन्ध इति ब्रूमः । एवं हि श्रुतिविनियुक्तोऽर्थः । इतरथा कालो लक्ष्येत । श्रुतिलक्षणाविशये च श्रुतिर्न्याय्या, न लक्षणा । तस्मादग्न्यङ्गं सौत्रामणी, वाजपेयाङ्गं बृहस्पतिसव इति ।

टुप्— यदि वाजपेयः पारार्थ्येनोच्चार्येत, त्रिप्रकारयाऽपि श्रुत्या हीयेत । तस्मादङ्गत्वायोच्चार्यमाणः स्वार्थः, तेनाङ्गाङ्गिसंबन्धः ।

कालश्रुतौ काल इति चेत् । ३० ॥

भाष्यम्— एवं चेत्पश्यसि, अङ्गप्रयोजनसंबन्ध इति । अथ कालविधानं कस्मान्न भवति । कालविधिरूपो हि शब्दः, चित्वा चयनेऽभिनिर्वृत्ते इति ।

टुप्— अङ्गाङ्गित्वे हि बृहस्पतिसवः कर्मान्तरम् , तस्यापूर्वान्तरम् , धर्मलक्षकत्वं च । तस्मादेवमादिदोषपरिहाराय निर्ज्ञातस्य बृहस्पतिसवस्य वाजपेयेन कालो लक्ष्यते । इष्ट्वेति च कालाभिधाने समर्थः शब्दः ।

नासमवायात् प्रयोजनेन स्यात् । ३१ ॥

भाष्यम्— नैतदेवम् । असमवायात् । शब्दप्रयोजनेन शब्दार्थेनेत्यर्थः । शब्दार्थश्रयनम् । तेनासमवायः स्यात् सौत्रामण्याः, वाजपेयेन च बृहस्पतिसवस्य । प्रकरणं च बाध्येत । अग्निप्रकरणे श्रूयमाणोऽग्नेर्धर्मो गम्यते यागः । वाजपेयप्रकरणे च वाजपेयस्य । इतरथा तयोः प्रकरणेऽन्यस्य धर्मः कालो गम्येत । तस्मादङ्गप्रयोजनसंबन्धः इति ।

टुप्— प्रकरणान्तरत्वादविपरिवृत्तिः । अविपरिवृत्तिश्चेत् कथं कालोऽस्य विधीयते ? यदि ‘ बृहस्पतिसवेन यजेत ’ इत्यनेन विपरिवृत्तिः, ततस्तत्रैव क्षीणत्वान्न कालविधिः । अथ कालविधिः, न विपरिवृत्तिः । तस्मात् प्रकरणान्तरे श्रुतं कर्मान्तरं विधीयते । तच्च वाजपेयाङ्गम् । तत्र प्रधानकालत्वादङ्गानां प्रधानकालत्वे प्राप्ते वचनात् वाजपेयेन साङ्गेन बृहस्पतिसववर्जितेनापूर्वं कृत्वा तत इदं कर्तव्यमिति ।

शा— **‘ उभयोर्वाजपेयस्य बृहस्पतिसवस्य च । प्रज्ञातफलयोर्नैव मिथोऽङ्गाङ्गित्वसंभवः ॥ न च कर्मान्तरं युक्तं लक्षणा हि तथा भवेत् । क्त्वाप्रत्ययेन कालस्तु श्रुत्यैवोक्तो न लक्षणा ॥ ’** इति प्राप्ते, ब्रूमः । **‘ वाजपेयश्रुतेरेव स्यादत्यन्तपरार्थता । तत्प्रक्रिया च बाध्येत, न च दूरगतं प्रति ॥ कालः शक्य उपादातुम्, काले कर्म हि चोद्यते । काले च चोद्यमानं सत् कर्माविपरिवर्तनात् ॥ प्रसिद्धात् कर्मणो भिन्नमनिर्ज्ञातप्रयोजनम् । वाजपेयाङ्गभावेन वाक्येनैव विधीयते ॥ ’**

सोम— यथा पूर्वत्र पश्वादिफलकत्वमात्रावेदकशब्दस्वारस्यात् अनियमः एवमिह क्त्वास्वारस्यात् कालविधिः इति प्रत्यवस्थानात् संगतिः । **सूत्रार्थस्तु**— ‘ वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत ’ इत्यादिषु समवाये अङ्गाङ्गिभावलक्षणे चोदना स्यात् वाजपेयादिसंयोगस्यार्थवत्त्वात् ।

वि— ‘ इष्ट्वा तु वाजपेयेन बृहस्पतिसवं यजेत् । कालं वा बोधयेद् वाक्यमुताङ्गत्वस्य बोधकम् ॥, क्त्वाश्रुत्या भाति कालोऽत्र, मैवमङ्गत्वबोधनम् ! श्रुतेर्मुख्यं प्रक्रिया च तथा सत्यनुगृह्यते ॥ ’ ‘ अग्निं चित्वा ’ इत्यत्राप्येवं योजनीयम् । १३.

भाट्ट— ‘ अग्निं चित्वा सौत्रामण्या यजेत ’ ‘ वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत ’ इत्यग्निवाजपेयप्रकरणे श्रुतम् । तत्र प्रकरणान्तरन्यायेन (२।३।११) प्रसिद्धसौत्रामणिबृहस्पतिसवापेक्षया कर्मान्तरमेव तत्तद्धर्मकं अग्निवाजपेयपूर्वकालकत्वविशिष्टं विधीयते । तस्य च फलापेक्षायां प्रकरणादिना अग्निवाजपेयाङ्गत्वं अविवादमेव इति तत्तत्प्रयुक्तत्वं तत्तत्कर्मान्तरस्य । समाप्तेऽपि बृहस्पतिसवाद्यतिरिक्ताङ्गविशिष्टवाजपेयादिप्रयोगे तदुत्तराङ्गं इदं फलानुकूलयोग्यतायाः परमापूर्वनिष्ठायाः जननार्थं न विरुध्यते ।

मण्डन— ‘ सौत्रामणी चितेरङ्गम् । ’

शंकर— ‘ बृहस्पतिसवाङ्गता (वाजपेये) । ’

* न च अत्र (‘ दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत’ इत्यत्र) **बृहस्पतिसवन्यायेन** सोमधर्मककर्मफलकं कर्मान्तरं विधीयते इति शक्यं वक्तुम्, सोमशब्दस्य बृहस्पतिसवशब्दवत् नामत्वाभावेन धर्मातिदेशकत्वाभावात् । वि. ४।३।१६. * सत्राणां फलवत्त्वात् अफलोऽयं पृष्ठशमनीयः बृहस्पतिसवन्यायेन सत्राङ्गम्, (इति पूर्वपक्षे) । **भाट्ट.** १०।२।११.

* **बृहस्पतिसववत् ।** बृहस्पतिसवस्य वाजपेयाङ्गत्वेऽपि स्वकाले वसन्ते कर्तव्यबृहस्पतिसवात् पूर्वमेव शरदि वाजपेयानुष्ठानमात्रेण तत्साध्यं परमापूर्वमुत्पद्यते, उत्पन्नं च परमापूर्वं बृहस्पतिसवेन पश्चात् फलमुखीक्रियते यथा तथा आधानमात्रादेव अग्नयो निष्पद्यन्ते पवमानहविर्भिस्तु तेषां फलवत्त्वसंपादनमात्रं इति पूर्वपक्षः । **सोम.** ५।३।९. * न च स्थापकत्वम्, **बृहस्पतिसववत्** पवमानेष्टीनां आधानप्रयोगबहिर्भावेऽपि तद्वत् आधानकरणकभावनाबहिर्भावस्य अश्रुतत्वेन स्थापकत्वकल्पनानुपपत्तेः (बृहस्पतिसवः वाजपेयप्रयोगबहिर्भूतः, वाजपेयकरणकभावनाबहिर्भावस्य श्रुतत्वात् च बृहस्पतिसवस्य स्थापकत्वकल्पनोपपत्तिः ‘ तद्वत् न ’ इति व्यतिरेकोपमान्ते) । **भाट्ट.** ५।३।९.

* **बृहस्पतिसववर्जितेन** साङ्गेन अपूर्वं कृत्वा ततः इदं (बृहस्पतिसवरूपं कर्म) कर्तव्यम् । **टुप्.** ४।३।१२। ३१.

* **वैल्वः** यूपः अग्नीषोमीये पशौ ब्रह्मवर्चसकामेन कर्तव्यः । **भा.** ३।६।३।१०, * ‘ बैल्वं अन्नाद्यकामस्य यूपं कुर्यात् ’ इति फलविधिः । ४।३।१।१–४.

* **बौद्धाः** ज्ञानस्य प्रामाण्यं परतः अप्रामाण्यं तु स्वत इति वदन्ति । **वैद्यनाथः.** १।१।२।२ पृ. १४. * **बौद्धैः** ज्ञानसंतानस्य आत्मत्वाभ्युपगमात् तस्य च अद्रव्यत्वेन अपरिमाणपक्षोऽपि संभवति । **सु.** पृ. ६१७. * **बौद्धस्य** दर्शने समवायिकारणं नाम नास्ति, न तस्य क्षणिकेषु स्कन्धेषु विज्ञानरूपवेदनासंज्ञासंस्कारसंज्ञकेषु भुक्तपूर्वा बुद्धिरुत्पद्यते । पूर्वभोक्तुः अधुनातनभोक्तुश्च अन्यत्वात् । **ऋजु.** पृ. १६४. **बौद्धानां** सर्वं जगद्नित्यमेव सर्वात्मना पृथग्भूतं च इति अनित्यत्वपृथक्त्वैकान्तप्रतिपादनम् । **सु.** पृ. १३१.

* **बौद्धाधिकरणम्** (२।२।५।२८–३२ ब्रसू.) । उपवासवाची योषधशब्दः इति बौद्धाधिकरणे उक्तम् । **कल्पतरु.** २।४।१।१ ब्रसू.

* **बौद्धादिभिः** परमाण्वाद्यात्मककारणाभ्युपगमात् शरीरसंतानाद्यात्मककल्पनाच्च तद्व्यतिरिक्तकारणादिनिषेधः क्रियते । परमाणुशरीरादिष्वेव प्रधानात्मादिशब्दवृत्तिरिति । **वा.** १।४।१२।२३ पृ. ३६०.

* **बौद्धादिग्रन्थात्** अवगम्य अनुष्ठितस्यापि वेदार्थस्य श्रेयःसाधनत्वाभावः । वेदादेव अवगम्य अनुष्ठितं कर्म श्रेयः साधयति इति नियमः । **सु.** पृ. १८३.

* **बौद्धादितर्काणामपि** पूर्वपक्षप्रतिपादनार्थत्वेन उपयोगः । **सु.** पृ. १३१.

* **बौद्धादिवचसां** अप्रामाण्यम् । **वा.** १।३।३। ५–७ पृ. २०१.

* **बौद्धभाषितं** विहारारामण्डलकरणवैराग्यध्यानाभ्यासाहिंसासत्यवचनदमदानदयादि तस्य धर्मं प्रति अप्रमाणता । **वा.** १।३।३।७ पृ. २०१.

* **बौद्धमते** ब्राह्मणं (वेदः) अप्रमाणमेव । **वैद्यनाथः.** १।१।५।५ .

* **बौद्धसिद्धान्तः** (कश्चित्) स्वच्छं चिन्मात्रं नैसर्गिकं ज्ञानरूपम् । तत्तु वासनोपप्लवात् अविद्यमाननीलाद्याकारं प्रकाशते इति । (योगाचाराणामयम्) । **भा.** १।१।५।५ वृत्तिग्रन्थः .

* **बौद्धस्मृतिः** अहिंसाविषये प्रमाणम्, अहिंसायाः श्रुतिविहितत्वात् इति पूर्वपक्षः । स्वरूपेण धर्मस्यापि

बौद्धोक्तत्वेन अधर्म एव । ततो न बौद्धस्मृतिः अहिंसायामपि प्रमाणम् । यथा श्वदृतौ गोपयः । वि. वार्तिकमतम् १।३।४ वर्णकं २.

* **बौधायनकल्पसूत्रं** पौरुषेयमेव वेदमूलत्वात्तु प्रमाणम् । वि. १।३।७.

* **बौधायनीयं** आपस्तम्बीयं च धर्मगृह्यसूत्रं तैत्तिरीयैरेव प्रतिपन्नम् । **वा.** १।३।७।१५.

* **ब्रह्मा** आहवनीयस्य दक्षिणतोऽवस्थितः कृताकृतप्रत्यवेक्षणेन अनुज्ञावचनेन च अनुगृह्णाति । **भा.** ११।२।१०।४५. * ब्रह्मा ऋत्विक् आधाने उद्गात्रा सह विकल्प्यते कल्पसूत्राद्यनुसारेण । तदापि गानस्यैव विकल्पः । **भाट्ट.** १०।८।६. * ब्रह्मा ऋत्विक् । तस्य पुरुषास्त्रयः ब्राह्मणाच्छंसी, अग्नीत्, पोता चेति । वि. ३।७।१७, * ब्रह्मा ऋत्विक । प्रथमगणस्थोऽयम्, पूर्णां दक्षिणां द्वादश गाः लभते । ३।७।१७. * ब्रह्मा प्रवृत्ते कर्मणि म्रियते प्रणीताप्रणयनकाले । अथवा अमावास्यायां वेदिकरणं पूर्वेद्युः वचनेनोपदिष्टम् । तस्मिन्नपकृष्यमाणे परिग्रहोऽप्यपकृष्टः प्रसवोऽपि ब्रह्मवरणमपि । पौर्णमास्यां प्रणयनकाले ब्रह्मवरणम्, अमावास्यायां पूर्वेद्युः । **भा.** १२।१।१८।३६, ३९. * ब्रह्मा वेदत्रयोक्तस्य प्रत्यवेक्षणं करोति । वि. ३।७।१७. * ब्रह्मा सारस्वतं ग्रहं आदत्ते सौत्रामण्याम् । 'उत्तरेऽग्नौ पयोग्रहान् जुहुति, दक्षिणेऽग्नौ सुराग्रहान्' । **भा.** ३।५।३।१४. * 'वासिष्ठो ब्रह्मा' इति वाक्यं न वासिष्ठस्य ब्रह्माधिकारत्वबोधकम् । 'रश्मिरसि क्षयाय त्वा' इत्यादयो मन्त्राः स्तोमभागाः । तानधीयानः स्वयमवासिष्ठोऽपि ब्रह्मतामर्हति इति स्तोमभागप्रशंसारूपे अर्थवादे 'वासिष्ठो ब्रह्मा' इति पठितत्वात् । **वि.** ६।६।४,* **ब्रह्माणं** अध्वर्युर्दीक्षयति द्वादशाहे दीक्षायाम् ।३।७।१७. * 'ब्रह्माणं वृणीते' । **भा.** ३।७।९।२४. * **ब्रह्मणा** युगपदुपहूतानां सर्वभक्षाणां स्वस्वकाले भक्षणं शतकृष्णलचरौ । १०।२।६।२१. **मीको.** पृ. १४८१ 'कृष्णलचरौ युगपदुपहूताः०' इत्यत्र द्रष्टव्यम् । * **ब्रह्मणे** एव श्यावाश्वो दक्षिणा उपहव्याख्ये एकाहे । इतरेभ्य ऋत्विग्भ्यस्तु न किमपि शास्त्रीयं देयम्, लौकिकेन तु दानेन आनतिः । वि. १०।३।१८. * ब्रह्मणे परिहारः सर्वभक्षाणां पुरुषान्तरेभ्योऽपनीय शतकृष्णलचरौ । १०।२।५।१९-२०. **मीको.** पृ. १४८२ 'कृष्णलचरौ सर्वे शेषभक्षाः०' इत्यत्र द्रष्टव्यम् । * ब्रह्मणे ये सकृद्दत्ताः कृष्णलानां इडादिभागाः, ते तेन सकृदेव न भक्षणीयाः, किन्तु स्वस्वकाले । १०।२।६।२१. * **ब्रह्मणोऽपि** जगत्सृष्टौ कालादृष्टादिसापेक्षत्वम्, वैषम्यनैर्घृण्येन सापेक्षत्वात् इति न्यायात् । **पराक्रमः.** ५३।२. * ब्रह्मणः ऋत्विजः अध्वर्यूद्गातृहोतॄणां प्रयोगेषु प्रसक्तं वैकल्यं समाधातुं वेदत्रयाध्ययनमपेक्षितम् । वि. ६।३।१४. * ब्रह्मणः (ब्राह्मणस्य) गृहे बार्हस्पत्यश्चरुः राजसूये । **भा.** ११।२।३।१३, * ब्रह्मणः तन्त्रं चातुर्मास्यगतवरुणप्रघासेषु विहारद्वये । ११।२।१०।४४-४८.

* **ब्रह्मादिष्वेव** षोडशसु सप्तदशसु वा ऋत्विक्शब्दस्य नियमः । ३।७।१७.

* **ब्रह्मभक्षाणां** युगपत्परिहरणं शतकृष्णलचरौ । १०।२।४।१८. **मीको.** पृ. १४७९ 'कृष्णलचरौ ब्रह्मभक्षाः' इत्यत्र द्रष्टव्यम् । * **ब्रह्मभक्षे** चतुर्धाकरणादीनामभावः । १०।२।७।२२.

* **ब्रह्मभागो** न दक्षिणा, दक्षिणावयवो हि सः । **भा.** १०।३।१९।७१.

* **ब्रह्मयजमानौ** दक्षिणत आसाते कर्मणः क्रियमाणस्य । **भा.** १।४।१२।२३-१.

* **ब्रह्मवरणं** ज्योतिष्टोमे ऐष्टिकेषु कर्मसु दार्शिकं चोदकप्राप्तं सौमिकेन प्रसङ्गसिद्धमेव । **भा.** १२।१।१८।३६-३९, * ब्रह्मवरणं दृष्टार्थम्, तत् सौमिकेनैव कृतत्वात् न कर्तव्यम् । १२।१।१८।४१. * ब्रह्मवरणम् । पौर्णमास्यां प्रणीताप्रणयनात् पूर्वं ब्रह्मणः कर्तव्याभावात् अप्रवृत्तावपि अमावास्यायां पूर्वेद्युर्वेदिकरणाङ्गभूतानुज्ञादानाय अस्त्येव प्रणीताप्रणयनात्पूर्वं ब्रह्मणः प्रवृत्तिः । इदं च पूर्वपरिग्रहेऽपि ब्रह्मानुज्ञा अस्ति इति पक्षे । उत्तरपरिग्रहमात्रे ब्रह्मानुज्ञापक्षे पूर्वेद्युः प्रसवदानाय ब्रह्मणः प्रवृत्त्यसंभवात् इति ध्येयम् । न च परेद्युः हविरासादनोत्तरकाले आम्नाताया वेदेः पूर्वेद्युरपकर्षे सति

तदन्तापकर्षन्यायात् तत्पूर्वस्य ब्रह्मवरणस्यापि अपकर्षावश्यम्भावात् अमावास्यायां अप्रवृत्तस्यैव ब्रह्मणो वरणं इति वाच्यम् । पञ्चमे 'तथाऽपूर्वम्' (५।१।१६।२९) इत्यत्र वेद्यपकर्षे तदन्तापकर्षो नास्ति, किन्तु श्रुतमात्रापकर्षः इति व्यवस्थापितत्वात् । सत्यम्, न तदन्तापकर्षः तथापि साङ्गस्य वेदिकरणस्य अपकर्षात् ब्रह्मवरणस्य अपकर्षप्रयोगाङ्गकर्तृसंस्कारतया ब्रह्मकर्तृकसर्वप्रयोगाङ्गत्वात् ब्रह्मकर्तृकप्रसवस्यापि अङ्गत्वात् इति प्रसववत् प्रसवाङ्गभूतब्रह्मवरणस्यापि अपकर्षः । **सोम.** १२।१।१८. * ब्रह्मवरणं सोमाङ्गेष्टिपश्वादिषु कर्तव्यं न वेति विचारः 'होतृवरणं दार्शिकं ज्योतिष्टोमे' इत्यधिकरणे १२।१।१८।३६-३९ सूत्रेषु द्रष्टव्यः ।

* **ब्रह्मवादिनः** नाम ब्राह्मणा एव, ब्रह्मवादिशब्दस्य तच्छीलतद्धर्मतत्साधुकारित्वनिमित्तत्वात् । यस्यैव च प्रवचनं स एव तच्छीलः तद्धर्मः तत्साधुकारी वा भवति, न क्षत्रियवैश्यौ । **वा.** १।३।३।७ पृ. २१०.

* **ब्रह्मविदः** पुरुषं जगत्कारणं मन्यन्ते । **सु.** पृ. १३१. * **ब्रह्मविदां** एष निश्चयः, यदुपलभ्यते तदसत्, यन्नोपलभ्यते तत् तत्त्वमिति । नमस्तेभ्यः । विदुषि नोत्तरं वाच्यमिति । **बृहती.** पृ. १७६.

* '**ब्रह्महा** अश्वमेधेन यजेत' इति यो लोभात् पतितयाजनमङ्गीकृत्य याजयिष्यति तदपेक्षं विधानम्, न तु तद्विधानान्यथानुपपत्त्या याजनं इतरेषामपि विहितमिति कल्प्यते । **वा.** ३।४।१०।२८. * ब्रह्महा द्वादशाब्दानि, 'पूर्वयोर्वर्णयोर्वेदाध्यायिनं हत्वा' अत्र पुरुषार्थः उपसंहारविधिः । **बाल.** पृ. १७.

* **ब्रह्मचर्यम्** । अष्टाचत्वारिंशद्वर्षाणि वेदब्रह्मचर्यचरणं 'जातपुत्रः कृष्णकेशोऽग्नीनादधीत' इत्यनेन विरुद्धम् । (भा. १।३।२।३ पृ. १६९) । अपुंस्त्वं प्रच्छादयन्तश्च (के चित्) अष्टाचत्वारिंशद्वर्षाणि वेदब्रह्मचर्यं चरितवन्तः । (भा. १।३।२।४ पृ. १८६) । अष्टाचत्वारिंशद्वर्षं वेदब्रह्मचर्याचरणस्यापि स्मृतावेव पक्षान्तरविकल्पोपनिबन्धनादाश्रमान्तरविषयत्वसंभवाद्वा विरोधाभावः । तथाहि '**वेदानधीत्य वेदौ वा वेदं वाऽपि यथाक्रमम्** । (मनु. ३।२) **सामर्थ्याश्रमयोग्यत्वमङ्गीकृत्यैतदुच्यते** ॥' (वा. पृ. १९२) । **सुधा.** (पृ. १६८)--योऽल्पेन कालेन बहून् वेदानध्येतुं समर्थः, तं प्रति बहुवेदपक्षः । असमर्थं प्रति अल्पवेदपक्षः इति सामर्थ्यमङ्गीकृत्य, गार्हस्थ्याश्रमायोग्यं प्रति बहुवेदपक्षः तद्योग्यं प्रति अल्पवेदपक्षः इति आश्रमयोग्यत्वमङ्गीकृत्य अपेक्ष्य एतत् मनुना उच्यते इत्यर्थः । 'षट्त्रिंशदाब्दिकं चर्यं गुरौ त्रैवेदिकं व्रतम् । तदर्धिकं पादिकं वा ग्रहणान्तिकमेव वा ॥' (३।१) इति मनुनैवोक्तत्वात् । ग्रहणान्तिकपक्षे सामर्थ्यापेक्षा । वर्षसंख्यापक्षे तु आश्रमयोग्यत्वापेक्षा इति विवेकोऽवसीयते ॥ **वा.** (पृ.१९२)-गौतमेनापि 'द्वादशवर्षाण्येकवेदब्रह्मचर्यं चरेत्' इति प्रथमकल्पं आशुगार्हस्थ्यप्रतिपत्त्यर्थमुक्त्वा द्वितीयकल्पे 'द्वादश प्रतिवेदं वा सर्वेषु' इति अष्टाचत्वारिंशत्परिग्रहः कृतः । '**तत्रैवं शक्यते वक्तुं येऽन्धपङ्ग्वादयो नराः । गृहस्थत्वं न शक्ष्यन्ति कर्तुम्, तेषामयं विधिः ॥ नैष्ठिकब्रह्मचर्यं वा परिव्राजकताऽपि वा । तैरवश्यं ग्रहीतव्या तेनादावेतदुच्यते ॥ उपकुर्वाणकेनैव याप्यः कालो बहुस्ततः । संप्राप्य ज्ञानभूयस्त्वं पवित्रैः क्षीणकल्मषैः ॥ सर्वाश्रमातिरिक्तेन स्वाध्यायेनैव शोधितः । स्तोकैरप्याश्रमाचारैर्गतिमिष्टां गमिष्यति** ॥'

द्वैपायनादयश्चाहुः । '**परिनिष्ठितकार्यस्तु स्वाध्यायेनैव हि द्विजः । कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते** ॥' (मैत्रः हिंसारहितः) । यानि च प्रतिदिनप्रयुज्यमानऋक्सामयजुर्ब्राह्मणकल्पव्याख्यानादिब्रह्मयज्ञनिमित्तानि फलानि क्रत्वधिकृतपुरुषेभ्यः अन्यानर्थक्यप्रसङ्गात् व्यावृत्तानि जपध्यानमात्राधिकृतब्रह्मचारिपरिव्राजकविषयत्वेन अवतिष्ठन्ते तान्यपि स्वाध्यायविज्ञानभूयस्त्वेन भूयिष्ठानि भविष्यन्ति इति प्रतिवेदब्रह्मचर्योपदेशः । यो वा कश्चित् मेधावितया शीघ्रमेव वेदचतुष्टयमप्यधीत्य यथोपपत्तिकालं तदर्थज्ञानाभियोगं अपरित्यजन् 'ग्रहणान्तं वा' इत्येतत्पक्षाश्रयणेन गृहस्थो भवेत् तं प्रति द्वादशाष्टाचत्वारिंशद्वर्षपक्षौ अनेनैव स्मरणेन पूर्वपक्षीकृतौ इति नातीव श्रुतिविरुद्धत्वेन उदाहर्तव्यौ ॥

* **ब्रह्मचर्यकाले** एवावश्यं समस्तो वेदोऽध्येतव्यः । यदि तु कश्चिदशक्तो नाधीते सकलं अग्निहोत्रदर्शपूर्णमासमात्रं कथञ्चिदधिगच्छति न तस्य तत्रानधिकारः । **वा.** ३।८।८।१८.

* **ब्रह्मचारिणा** मांसं न भक्षयितव्यमित्युक्ते दर्विगतमपि लेपं वर्जयन्ति । अदृष्टार्थं ब्रह्मचारिणो मांसाभक्षणम् । तत्र यावदपि मांसरसमात्रं विदितं भवति तस्यापि दोषः न श्लेष्मप्रकोपादि किञ्चिद् दृष्टमपेक्षते । **भा.** ९।४।९।४०. * **ब्रह्मचारिणः** अवकीर्णित्वे 'स गर्दभं पशुमालमेत' इति विहितो गर्दभः पशुः, स च लौकिकेऽग्नौ । **वि.** ६।८।४, * ब्रह्मचारिणो नाधानाधिकारः । ६।८।४. * ब्रह्मचारिणः विधवानियोगः अनुचितः । **सु.** पृ. १८५. * **ब्रह्मचारिणां** मधु मांसं च प्रतिषिध्यते 'मधु मांसं च वर्जयेत्' इति । **भा.** १०।६।१२।३२. * ब्रह्मचारिणां मध्वशननिषेधः पुमर्थः । **वि.** १०।६।१२.

* **ब्रह्मयज्ञे** एव ऋग्यजुःसामाध्ययनविधिः फलविशेषार्थः । इयं फलतो वाचनिकी व्यवस्था । **बाल.** पृ. १९.

* **ब्रह्मवर्चसकामः** । 'त्रिवृदग्निष्टुदग्निष्टोमः तस्य वायव्यासु एकविंशमग्निष्टोमसाम कृत्वा ब्रह्मवर्चसकामः यजेत'। **भा.** २।२।१२।२७, * 'अग्नीषोमीयमेकादशकपालं निर्वपेत् श्यामाकं **ब्रह्मवर्चसकामः**'। १०।७।१७।५८, * 'सोमारौद्रं घृते चरुं निर्वपेत् शुक्लानां व्रीहीणां ब्रह्मवर्चसकामः'। १०।७।१९।६४, * **ब्रह्मवर्चसकामेन** अग्नीषोमीये पशौ बैल्वो यूपः कर्तव्यः । ३।६।३।१०. * **ब्रह्मवर्चसकामैः** व्रीहिभिरेव यागः सोमारौद्रयागे । १०।७।१९।६४–७१. * **ब्रह्मवर्चसकामस्य** आधाने पवमानहविषां त्रयाणां सह प्रयोगः 'यो ब्रह्मवर्चसकामः स्यात् तस्य सर्वाणि हवींषि निरुप्याणि' इति । **भा.** ११।४।४।११–१४, * ब्रह्मवर्चसकामस्य कांस्येन प्रणयेत् । ४।३।२।४. * ब्रह्मवर्चसकामस्य गायत्रचिते सांवत्सरिके चयने गायत्राण्येव आग्नेयसूक्तानि ग्राह्याणि नेतरच्छन्दस्कानि । **संकर्ष.** २।१।३७. * ब्रह्मवर्चसकामस्य चतुर्विंशतिमनुब्रूयात् सामिधेनीः दर्शपूर्णमासयोः । **भा.** १०।५।८।२७. * ब्रह्मवर्चसकामस्य त्रिवृदतिरात्रः कातीये। **बाल.** पृ. ३४. * ब्रह्मवर्चसकामस्य सर्वाणि हवींषि सह निरुप्याणि । तत्र निर्वापे सहचोदिते वचनात् तन्त्रं भवति । **टुप्.** ११।४।४।१४. * 'पालाशं **ब्रह्मवर्चसकामस्य**' (यूपं कुर्यात्) इति फलविधिः । **भा.** ४।३।११।१–४, * 'वृक्षाग्राज्ज्वलतः ब्रह्मवर्चसकामस्याऽऽहृत्यावदध्यात्' चयने उख्यमग्निम् । १२।४।७।१७.

* **ब्रह्मसाम** अभीवर्तं अविशेषेणाम्नातम् । **भा.** ६।१।७।३१. * ब्रह्मसाम उक्थ्यस्तोत्राणां त्रयाणां मध्यमम्। **सोम.** २।२।१३. * ब्रह्मसाम ज्योतिष्टोमे उक्थ्यानां सौभरं विहितम् । **वा.** २।२।१३।२८. * ब्रह्मसाम बार्हद्गिरं नाम ब्राह्मणस्य कुर्यात्, पार्थुरश्मं राजन्यस्य, रायोवाजीयं वैश्यस्य इति ज्योतिष्टोमे नैमित्तिकमेव न नित्यम् । नित्यं तु 'अभीवर्तो ब्रह्मसाम'। ४।३।२।४. * ब्रह्मसाम वैराजम् । विश्वजिति सर्वपृष्ठे । **भा.** १०।६।५।१४. * '**ब्रह्मसाम्नि** आलभते' (वाजपेये प्राजापत्यान् पशून् प्रकृत्य श्रूयते इदम्) इति कर्मान्तरं इति पूर्वपक्षः । **टुप्.** ११।२।१२।५१.

* **ब्रह्मसामकाले** प्राजापत्यानां पशूनां आलम्भोत्कर्षमात्रविधानम् । ११।२।१२।५१–५३. **मीको.** पृ. २८४५ 'प्राजापत्यानां पशूनाम्०' इत्यत्र द्रष्टव्यम् ।

* **ब्रह्मसामगानं** गवामयने द्वयोर्द्वयोर्ऋचोः प्रग्रथनेन । ९।२।६।२५–२८ वर्णकं ४. **मीको.** पृ. १५४७ 'गवामयने द्वयोर्द्वयोर्ऋचोः०' इत्यत्र द्रष्टव्यम् ।

* **ब्रह्मसूत्रस्य** 'नित्ययज्ञोपवीती' इति स्मृत्युक्तस्य पुरुषधर्मत्वम् । **सु.** पृ. १३५५.

* **ब्रह्महत्या** । 'ब्राह्मणस्त्रीवधे को वा ब्रह्महत्यां निषेधति । प्रायश्चित्तान्तरं त्वस्याः स्त्रीत्वमात्रनिबन्धनम् ॥' न वाचनिकप्रायश्चित्ताल्पत्वेन ब्राह्मणीवधप्रतिषेध एव नास्तीत्याशङ्कितव्यम् । **वा.** १।३।३।७ पृ. २१३.

* **ब्रह्महत्यातिरिक्तमहापातककारिणां** अपरिहरणं उदीच्यानां दाक्षिणात्यानां च अनाचारः । **वा.** १।३।३।७ पृ. २०४.

* '**ब्रह्महत्याऽश्वमेधाभ्यां** न परं पुण्यपापयोः । आभूतसंप्लवान्तं च फलमिष्टं तयोर्द्विज ॥' इति स्मरणम् । **सु.** पृ. ६६.

* **ब्रह्महत्यादीनां** अनवगतनरकफलानां प्रतिषेधोत्तरकालभाविना वैदिकत्वेनैव नरकप्राप्तिसमर्था अपूर्वकल्पनोपपत्तिः । **वा.** २।१।२।५ पृ. ३९७.

* **ब्राह्मणं** विधायकम् । **भा.** १०।८।१०।२०, * 'ब्राह्मणम्' इति शब्दः विधीनां अर्थवादानां च समानः। ७।१।३।१८, * तद्धि तेषां **ब्राह्मणं** येन विधीयन्ते । ७।१।३।१७, * मन्त्राश्च ब्राह्मणं च वेदः । २।१।८।३३. * "विधायकं सदप्यर्थं ब्राह्मणं स्मारयिष्यति । 'मन्त्रतस्तु विरोधे स्यात्' (५।१।९।१६) इत्यत्रैतद्वदिष्यते ॥" **वा.** २।१।६।३०. * '**ब्राह्मणः** न हन्तव्यः' इति । तत्र अर्थात् हननं प्राप्तं कुर्या वा न वेति । यदा करोति तदा प्रतिषिध्यते न हन्तव्य इति । तत्र अर्थप्राप्तस्य शास्त्रेण नित्यबाधः । **टुप्.** १०।८।१।१. * ब्राह्मणः परिव्राट् वानप्रस्थः इति धर्मभेदात् संज्ञाव्यवस्था । **भा.** ८।२।५।२४. * 'ब्राह्मणो बृहस्पतिसवेन यजेत' इत्यत्र यथा पुरुषविशेषविधिः तथा 'स्वर्गकामो यजेत' इत्यत्र पुरुषविशेषविधिर्न संभवति । **सोम.** ६।१।१. * ब्राह्मणः स्तूयते 'आग्नेयो वै ब्राह्मणः' इत्यत्र आग्नेयत्वेन । मुखजन्यत्वमुभयोर्धर्मः । तथा हि 'प्रजापतिरकामयत प्रजाः सृजेयेति, स मुखतस्त्रिवृतं निरमिमीत, तमग्निर्देवताऽन्वसृज्यत, गायत्री छन्दः, रथंतरं साम, ब्राह्मणो मनुष्याणाम्, अजः पशूनाम्, तस्मात्ते मुख्याः, मुखतो ह्यसृज्यन्त' इति । **वि.** १।४।१४. * ब्राह्मणः । स्वभार्यायां ब्राह्मण्यां ब्राह्मणादुत्पन्नत्वलक्षणमेव ब्राह्मण्यम् । तच्च मात्रेकसमधिगम्यम्, इतरस्य तु दुर्विज्ञानम् । **कु.** १।२।१।१३. * 'अष्टसु प्रक्रमेषु **ब्राह्मणोऽ**ग्निमादधीत'। **भा.** ६।१।७।२८, * 'वसन्ते ब्राह्मणोऽग्नीनादधीत'। ६।१।७।२६, * '**ब्राह्मणौ** आनय' इति प्रयोगः पुंसि सद्वितीये दृष्टः तथा वसानौ आदधीयातां इति पुमान् सद्वितीयः स्यात् (इदं पूर्वपक्षे)। ६।१।५।२२. * '**ब्राह्मणा आगताः परिव्राजका अप्यागताः**' इति **न्यायः** ब्राह्मणपरिव्राजकन्यायः एवायम् । 'सर्वेषां शास्त्राणां सर्वेषां प्रउगाणां' इति ब्राह्मणम् । अत्र सायणः —'ब्राह्मणा आगताः० इति न्यायेन वैशिष्ट्यविवक्षायां प्रउगाणां पृथक् निर्देशः'। इति । **ऐआ.** १।५।१४. * ब्राह्मणा एव दर्शपूर्णमासयोः अन्वाहार्यदक्षिणायां दृश्यन्ते 'यद्ब्राह्मणा यदन्वाहार्यमाहरन्ति' इति । **भा.** १२।४।१५।४७, * ब्राह्मणा एव दर्शपूर्णमासयोः पुरोडाशस्य चतुर्धाकरणे निर्दिष्टाः 'ब्राह्मणानामिदं हविः सौम्यानाम्' इति । १२।४।१५।४६. * ब्राह्मणाः बहुश्रुताः । 'न ते निर्माल्यतां यान्ति विनियोज्याः पुनः पुनः'। **सु.** पृ. ११२१. * ब्राह्मणाः । 'याजनाध्यापनप्रतिग्रहाः ब्राह्मणस्यैव वृत्त्युपायाः' इति स्मृत्यालोचनया अन्यजातीयानां आर्त्विज्यनिषेधावगतिः । 'तस्माद्वाऽप्येतर्हि यज्ञः सयुग् भूत्वा देवेभ्यो हव्यं वहति ब्राह्मणेन च छन्दोभिश्च' इति च ब्राह्मणानामेव आर्त्विज्यश्रुतेः । 'एता वै प्रजा हुतादो यद् ब्राह्मणाः' इति लिङ्गात् ब्राह्मणकृतस्यैव आर्त्विज्यस्य अपूर्वसाधनत्वावगतिः । **सु.** ३।७ पृ. ३४. * '**ब्राह्मणं** न हन्यात्' इति अयं विशेषप्रतिषेधः । **बाल.** पृ. ३३. * 'वसन्ते **ब्राह्मणं** उपनयीत'। **भा.** ६।१।७।३३. * **ब्राह्मणेन** (वाक्येन) एकवाक्यत्वे अमन्त्रत्वम् । **वा.** १।४।१।१. * 'ब्राह्मणेन निष्कारणः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इयं कर्तरि तृतीया कारकविभक्तिरूपा विनियोक्त्री श्रुतिः । **बाल.** पृ. ४४. * **ब्राह्मणाय** सुराग्रहशेषः सौत्रामण्यां पातुं दीयते । ब्राह्मणलाभाभावे वल्मीकवपायां वा शतातृण्णायां वा अवनीयते । **वि.** ३।५।३. * 'यो **ब्राह्मणाय** अवगुरेत् तं शतेन यातयात्' इत्यादि क्रत्वर्थं पुरुषार्थं वेति संशये पुरुषार्थे पुरुषमात्रधर्मः इति सिद्धान्तः, दर्शपूर्णमासयोः । ३।४।६।१७. * '**ब्राह्मणेभ्यो** दधि दीयताम्, तक्रं कौण्डिन्याय' इत्यत्र तक्रविधिः न दधिविधिं अपेक्षते प्रवर्तितुम् । तक्रकौण्डिन्यन्यायः अयमेव । **भामती.** ३।३।१५।२६. * 'ब्राह्मणेभ्यो दधि दीयताम्, तक्रं कौण्डिन्याय' इत्यादौ ब्राह्मणशब्दस्य जातिवाचित्वात् कौण्डिन्यशब्दस्य व्यक्तिवाचित्वात् विशेषेण सामान्यस्य बाधः इति प्रयोजनं संभवति । **सोम.**

१।३।१० वर्णकं १. * **ब्राह्मणस्य** अग्नीषोमीयपुरोडाशस्यैव सोमादुत्कर्षः । 'यदेवादः पौर्णमासं हविः' इत्यादिवाक्येन उपांशुयाजाज्यमपि ब्राह्मणेन सोमात् प्राक् अग्नीषोमीयं न कर्तव्यम् , प्राजापत्यं वैष्णवं वा कर्तव्यमेवेति न तस्योत्कर्षः दर्शपूर्णमासयोः । **भा.** ५।४।६।१९, * ब्राह्मणस्य अतिरात्रे षोडशी गृह्यते । १०।५।५।३४. * ब्राह्मणस्य अपि सोमपूर्वत्वेष्टिपूर्वत्वरूपकल्पद्वयम् । ५।४।४।१०–१४, १७–१८. **मीको.** पृ. १०९३ 'उत्कर्षाधिकरणम्' इत्यत्र द्रष्टव्यम् । * ब्राह्मणस्य न अभिषेकः । 'अभिषेकोऽपि धर्मज्ञैः क्षत्रियस्यैव पठ्यते । सहासौ राजशब्देन, तेन नाक्षत्रिये मतः (राज्याभिषेकः) ॥' । **वा.** २।३।२।३ पृ. ५८२. * ब्राह्मणस्य ज्योतिष्टोमे पयोव्रतं क्रत्वर्थम् । **भा.** ४।३।४।८–९.

ब्राह्मणस्य तु सोमविद्याप्रजमृणवाक्येन संयोगात् । ६।२।११।३२ ॥

'सोमेन यजेत' इति सोमयाग उक्तः । 'तस्मात् स्वाध्यायोऽध्येतव्यः' इति विद्या उक्ता । 'प्रजातन्तुं मा व्यवच्छेत्सीः' इति प्रजा उक्ता । सोमश्च विद्या च प्रजा च तेषां समाहारः सोमविद्याप्रजम् । ब्राह्मणस्य इत्युपलक्षणम् । तदिदं सोमविद्याप्रजं ब्राह्मणादेस्त्रैवर्णिकस्य नित्यं स्यात् । 'जायमानो ह वै ब्राह्मणस्त्रिभिर्ऋणवा जायते, ब्रह्मचर्येण ऋषिभ्यः, यज्ञेन देवेभ्यः, प्रजया पितृभ्यः इति । स वै तर्हि अनृणो यदा यज्वा ब्रह्मचारी प्रजावान्' इति ऋणवाक्येन सोमविद्याप्रजानां संयोगात् । यथा ऋणस्य प्रत्यर्पणं नित्यं तथा सोमाद्यपि नित्यम् । तुशब्दः अनित्यत्वशङ्काव्यावृत्त्यर्थः । 'तुशब्दः अप्यर्थः । ब्राह्मणस्य तु ब्राह्मणस्यापि इत्यर्थः । तेन क्षत्रियवैश्ययोः संग्रहः' इति कुतूहलम् । **के.**

* ब्राह्मणस्य तेजःसंस्तवः । **भा.** ६।६।२।१४. * ब्राह्मणस्य द्रव्यार्जने प्रतिग्रह–याजन–अध्यापनान्येव नियतानि । उपायान्तरात्तु प्रत्यवायः । **वि.** ४।१।२ वर्णकं ४. * ब्राह्मणस्य पौर्णमासीगताग्नीषोमीयस्य हविषः सोमादूर्ध्वमुत्कर्षः । पौर्णमासेष्टेरेव उत्कर्षः इत्येकदेशिमतम् । ५।४।४।१०–१४, १७–१८. * ब्राह्मणस्य प्रतिग्रहविधिः दायशिलोञ्छाद्यसंभवे दोषाभावमात्रबोधकतया अभ्यनुज्ञाविधिरेव । न नियमविधिः , नापि परिसंख्याविधिः । **भाट्ट.** ४।१।२. * ब्राह्मणस्य बार्हद्गिरं ब्रह्मसाम कुर्यात् इति ज्योतिष्टोमे नैमित्तिकमेव न नित्यम् । **भा.** ४।३।२।४, * ब्राह्मणस्य बार्हद्गिरं ब्रह्मसाम द्वादशाहे । ६।६।३।१७. * ब्राह्मणस्य मधुसीध्वोः नाम माध्वीगौडीसुरयोः पैष्ट्याश्च निषेधः । अन्नसुरायाः त्रैवर्णिकानां प्रतिषेधः । **वा.** १।३।३।७ पृ. २०९–२१०. * ब्राह्मणस्य राजसूयाधिकारो नास्ति । **वि.** ११।४।३. * ब्राह्मणस्य विधायकस्यापि ब्रह्मयज्ञे ब्राह्मणेन विनियोगः दृश्यते । **सु.** पृ. ६६६. * **ब्राह्मणानामेव** ऋत्विक्त्वं न राजन्यवैश्ययोः । १२ ४।१५।४२–४७. **मीको.** पृ. २८४ 'अधिकारः आर्त्विज्ये ब्राह्मणस्यैव' इत्यत्र द्रष्टव्यम् । * ब्राह्मणानामेव राजसूयदशपेये राजन्यचमसानुप्रसर्पणम् । ३।५। २०।५२–५३. * ब्राह्मणानामेव सत्रेऽधिकारः । ६।६।३। १६–२३. **मीको.** पृ ३०२ 'अधिकारः सत्रे ब्राह्मणानामेव' इत्यत्र द्रष्टव्यम् । * ब्राह्मणानां त्र्यार्षेयभिन्नानां मनुवत् कल्पः । **संकर्ष.** ३।४।५. 'मनुवत्कल्पः त्र्यार्षेयभिन्नब्राह्मणानाम्' इत्यत्र द्रष्टव्यम् । * **ब्राह्मणे** न तावत् सर्वेषामेव (मन्त्राणां) विनियोगोऽस्ति । **वा.** २।१।१४।४६, * ब्राह्मणे भूयांसः प्रत्यया विधायकाः, अल्पे तु अविधायकाः । २।१।६।३१. * ब्राह्मणे मन्त्राः भाषिकेण स्वरेण उपदिष्टाः । कर्मप्रयोगे तु त्रैस्वर्येणैव प्रयोक्तव्याः । १२।३।८।२०–२२. * '**ब्राह्मणेषु** चरेद्भैक्षम्' इत्यनेन उपसंहारेण व्यावर्तितस्य क्षत्रियादेः 'चातुर्वर्ण्यं चरेद् भैक्षम्' इति उपसंहारव्यावर्तितविषयः अभ्यनुज्ञाविधिः । **बाल.** पृ. १७.

* **ब्राह्मणाभिधः** विधिरेव । **वा.** १।२।४।४५.

* **ब्राह्मणावगोरणे** शतसंवत्सरं यातनाप्राप्तिः । **वि.** ३।४।१०.

* **ब्राह्मणावगोरणनिषेधस्य** ऋत्विगानमनार्थं प्रसक्तावपि ब्राह्मणमात्रविषयत्वावसायात् प्रकरणादुत्कर्षः । **सु.** पृ. १२३–१२४.

* **ब्राह्मणादेः** जातपुत्रस्य अनाहिताग्नेः वयोऽर्धातिक्रमे अवश्यं विहिताग्निहोत्राद्यननुष्ठाननिमित्तप्रत्यवाय-

वत् आधानाननुष्ठाननिमित्तोऽपि अपरः प्रत्यवायो भवति । **सु.** पृ. ९१४–९१५. * **ब्राह्मणादिषु** स्थानापत्त्या अनुमानेन वा राजशब्दः । **वा.** ३।५।८।२६.

* **ब्राह्मणादिकर्तृकायाः** अवेष्टेः कर्मान्तरत्वम् । **भा.** २।३।२।३. * ब्राह्मणादिकर्तृकाया अवेष्टेः राजसूयात् भिन्नतन्त्रता । ११।४।३।९–१२. **मीको.** पृ. ७१३ 'अवेष्टेः ब्राह्मणादिकर्तृकायाः ०' इत्यत्र द्रष्टव्यम् ।

* **ब्राह्मणादिशब्दवत्** । ब्राह्मणादिशब्दा यथा विशेषसमर्पकाः, न तथा स्वर्गकामशब्दः । **सोम.** ६।१।१.

* **ब्राह्मणोत्पन्नमन्त्राणां** भाषिकस्वरनियमः । १२।३।९।२३–२४. **मीको.** पृ. १४९७ 'ऋतौ ब्राह्मणोत्पन्नानाम्०' इत्यत्र द्रष्टव्यम् ।

* **ब्राह्मणोपेताः** क्षत्रियाः ब्राह्मणेन पुत्रत्वेन स्वीकृताः ब्राह्मणवृत्त्या जीवन्तः । तेषामपि आर्षेयवरणं स्वजातीयमेव । **संकर्ष.** ३।४।७. **मीको.** पृ. १००५ 'आर्षेयवरणं राजोपेतब्राह्मणोपेतयोः०' इत्यत्र द्रष्टव्यम् ।

* **ब्राह्मणकर्तृका** अवेष्टिः 'यदि ब्राह्मणः यजेत बार्हस्पत्यं मध्ये निधाय आहुतिमाहुतिं हुत्वा अभिघारयेत्' इति । **भा.** ११।४।३।८.

* **ब्राह्मणक्रमो** मन्त्रक्रमेण बाध्यते, अप्राप्तबाधः । **वा.** ३।३।७।१४ पृ. ८६०, **बाल.** पृ. १४३. * **ब्राह्मणक्रमस्य** प्रथमभावित्वेऽपि अनुष्ठाने विप्रकृष्टत्वाद्दुर्बलत्वम्, मन्त्रक्रमस्य तु अनुष्ठानसंनिकर्षात् प्राबल्यम्, तेन दर्शपूर्णमासयोः आग्नेयधर्माः प्रथमम्, ततः अग्नीषोमीयधर्माः इति क्रमः । **सोम.** ५।१।९.

* **ब्राह्मणक्षत्रियविशां** ऋणत्रयापाकरणं नित्यम् । **वि.** ६।२।११.

* **ब्राह्मणगतं** आख्यातपदं प्रधानगुणयोरन्यतरस्य विधायकम् । **वि.** २।१।६. * **ब्राह्मणगतान्यपि** आख्यातानि क्वचिन्न विधायकानि, यथा 'यस्योभयं हविरार्तिमार्च्छेत्' इत्यादीनि । **वा.** २।१।६।३०, * **ब्राह्मणगतानां** मन्त्रगतानां चाख्यातशब्दानां येषां शब्दान्तरेण विधिशक्तिरपगच्छति तेषामभिधायकत्वम् । २।१।६।३१.

ब्राह्मणप्रामन्यायः । साहस्री. २७.

* **ब्राह्मणत्वं** इत्यादि । मातापितृसंबन्धवशस्य अपत्ये ब्राह्मण्यादिप्रत्ययः तावत् संदेहबाधरहितः स्वसंवेद्यः । न च निर्विषयः प्रत्ययोऽस्ति इत्युक्तम् । न चास्य संतानविशेषजन्यत्वं विषयः । निरालम्बनशब्दप्रयोगायोगेन जातिव्यतिरिक्तस्य संतानान्तरव्यावृत्तस्य विशेषस्य असंभवात् । न च अस्मदग्राह्यद्वित्रसंतानमात्रे संतानः समाप्यते । येन संबन्धिविशेषेणेव संबन्धः संतानिविशेषेण संतानो विशेष्टुं शक्यते । उत्पाद्योत्पादकक्रमेण अवस्थिताः पुरुषा एव हि संतानशब्दवाच्याः, न संतानाख्यं किञ्चित् वस्तु अस्ति । तस्मात् सर्वेषु ब्राह्मणेषु अनुस्यूतं प्रत्येकसमवेतं ब्राह्मणप्रत्ययविषयभूतं किञ्चिदवश्यमेष्टव्यम् । तस्मात् समानाकारेष्वपि पिण्डेषु विलक्षणब्राह्मणप्रत्ययवेद्यब्राह्मण्यादिजातिः नापह्नोतुं शक्यते । न चासौ शास्त्रस्य विषयः । प्रमाणान्तराग्रहीतायां जातौ अगृहीतसंबन्धत्वेन ब्राह्मण्यादिपदार्थाज्ञानात् । 'ब्राह्मणात् ब्राह्मण्यां यो जायते स ब्राह्मणः' इति वाक्यार्थानवधारणात् । संबन्धाग्रहणादेव नानुमेयत्वम् । सदृशानुपपद्यमानार्थाभावात् उपमानार्थापत्त्यसंभवात् पारिशेष्यात् प्रत्यक्षत्वम् । उत्पादकजातिज्ञानात् तु प्रागप्रतीतेः तस्य सहकारित्वं कल्प्यते । **सु.** पृ. १०–११. * **ब्राह्मणत्वस्य** न उपवीताध्ययनादि निमित्तम्, वर्णत्रयसाधारणत्वात् । अध्यापनाद्यपि भिन्नाचारक्षत्रियवैश्यप्रतियोगित्वात् संदिग्धम् । सर्वं च दुष्टशूद्रेषु संभाव्यमानत्वादनिश्चितम् । नापि तपआदीनां समुदायो ब्राह्मण्यम्, न तज्जनितः संस्कारः, न तदभिव्यङ्ग्या जातिः । किं तर्हि ? मातापितृजातिज्ञानाभिव्यङ्ग्या प्रत्यक्षसमधिगम्या । **वा.** १।२।१।२.

* **ब्राह्मणत्वादिः** न शास्त्रविषयः, लोकप्रसिद्धत्वात् वृक्षत्वादिवत् । **वा.** १।२।१।२, * **ब्राह्मणत्वादयः** (जातयः) येषामपि आचारनिमित्ताः तेषामपि दृष्टविरोधस्तावदस्त्येव । न तु आचारनिमित्तवर्णविभागे प्रमाणं किञ्चित् । सिद्धानां हि ब्राह्मणादीनां आचारा विधीयन्ते, तत्रेतरेतराश्रयता भवेत् । स एव शुभाचारकाले ब्राह्मणः, पुनरशुभाचारकाले शूद्र इत्यनवस्थितत्वम् ।

'मासेन शूद्रीभवति' इत्येवमादीनि कर्मनिन्दावचनानि, अथवा वर्णत्रयकर्महानिप्रतिपादनार्थानीति वक्तव्यम् । १।२।१।२, * **ब्राह्मणत्वादेः** उत्पादकजातिस्मरणं कारणम् (ज्ञापकं) । अयं चोत्पाद्योत्पादकसंबन्धो मातुरेव प्रत्यक्षः, अन्येषां तु अनुमानाप्तोपदेशाद्यवगतः कारणं भवति । स्त्र्यपराधात्तु दुर्ज्ञानोऽयं संबन्धः । न च स्त्रीणां क्वचिद्व्यभिचारदर्शनात् सर्वत्रैव कल्पना युक्ता । तस्मात् दर्शनस्मरणपारम्पर्यानुगृहीतप्रत्यक्षगम्यानि ब्राह्मणत्वादीनि । १।२।१।२.

ब्राह्मणपरिव्राजकन्यायः । अयं यत्र सामान्यवाचकं सहप्रयुक्तविशेषवाचकपदवत्त्वात्तदर्थाऽन्यपरतया नीयते तत्र प्रवर्तते । यथा 'ब्राह्मणा भोज्यन्ताम्' इत्यत्र परिव्राजकानामपि ब्राह्मणत्वाद्ब्राह्मणपदं परिव्राजकेतरब्राह्मणपरमिति । **साहस्री. २०३.** * ब्राह्मणपरिव्राजकन्यायः । ननु च राजराजन्यशब्दयोः तत्र तत्र कर्मभेदोपदेशेन स्मृतिविदां याज्ञिकानां च भेदेन प्रसिद्धिर्दृष्टा । सत्यं दृष्टा, सा तु ब्राह्मणपरिव्राजकन्यायेन राजन्यशब्दस्य अभिषिक्तविशेषगामित्वेन सामर्थ्यलभ्यत्वात् । **वा. २।३।२।३ पृ. ५८३.** * ब्राह्मणपरिव्राजकन्यायः । ब्राह्मणा भोज्यन्ताम्, परिव्राजकास्त्वन्तः इत्यत्र सत्येव परिव्राजकानां ब्राह्मण्ये पूजानिमित्तो विशेषः । **वि. २।१।१३.** * **ब्राह्मणपरिव्राजकन्यायेन** नितरां गद्यन्ते उच्चैरुच्चार्यन्ते इतिव्युत्पत्तिसिद्धगुणविशेषनिबन्धन एव यजुषामेव केषाञ्चित् निगदव्यपदेशः । **कु. २।१।१३।४०.** * भेदव्यपदेशस्तु कर्माचरणयोः **ब्राह्मणपरिव्राजकन्यायेनाप्युपपद्यते** । **शांभा. ३।१।२।११ ब्रसू.** * 'यथाकारी यथाचारी' इति करणाचरणयोर्भेदनिर्देशः ब्राह्मणपरिव्राजकन्यायेन इति भाष्ये उक्तम् । **कल्पतरु. ३।१।२।११ ब्रसू.**

* **ब्राह्मणपरिव्राजकवत्** धर्मविशेषस्यापि मोक्षस्य भेदेनोपादानम् । **सु. पृ. १२७.** * यथा इतो ब्राह्मणा भोज्यन्तां इतः परिव्राजकाः इति । **भा.** । **ब्राह्मणपरिव्राजकवत्** गुणेन व्यपदेशः (केषां चित् यजुषामेव निगदाः इति) । **वा. २।१।१३।४३.**

* **ब्राह्मणपाठात्** अनुष्ठानबहिर्भूतात् मन्त्रपाठः अनुष्ठानसमवेतः प्रबलः । यथा आग्नेयाग्नीषोमीयपुरोडाशयोः । ५।१।९।१६. * **ब्राह्मणपाठस्य** मन्त्रपाठात् विप्रकर्षः । 'समिधो यजति' इत्यनेन पदार्थो विहितः, सोऽनुष्ठानवेलायां येन वाक्येन विहितः तद्वाक्यं स्मारयति । तेन वाक्येन स्मृतेन अनुष्ठानवेलायां पदार्थः स्मारितः सन् अनुष्ठीयते । द्वितीयं पदार्थं न स्मारयति, किन्तु अनुष्ठानोत्तरकालं योऽसौ कृतः पदार्थः तमालोचयति, स चालोच्यमानः येन ब्राह्मणखण्डकेन विहितः तत्स्मारयति, तच्च स्वादुत्तरं ब्राह्मणखण्डकं स्मारयति पाठात् । तत् ब्राह्मणं पुनः पदार्थं विदधाति । अनुष्ठानवेलायां तावत् स्मारकमपेक्षितव्यम् । अयमत्र विप्रकर्षः । मन्त्रः पुनः परिसमाप्यमानः उत्तरं मन्त्रं पर्युपस्थापयति । स च पर्युपस्थाप्यमानः उत्तरं पदार्थं पर्युपस्थापयन्नेव पर्युपतिष्ठते । तस्मात्तत्र अपेक्षाऽभावात् नास्ति विप्रकर्षः । **टुप्. ५।१।१०।१६.**

* **ब्राह्मणराजन्यवैश्यानां** सर्वे अध्ययनवन्तो विद्वांसश्च । नह्यविद्वान् विहितोऽस्ति ! ऋणापाकरणं च सर्वेषां कर्म । 'जायमानो वै ब्राह्मणः' इति ब्राह्मणग्रहणं प्रदर्शनार्थं इत्युक्तम् (६।२।११।३१) । **भा. १२।४।१५।४२.**

ब्राह्मणलक्षणम् ॥

शेषे ब्राह्मणशब्दः । २।१।८।३३ ॥

भाष्यम्—अथ किंलक्षणं ब्राह्मणम् ? मन्त्राश्च ब्राह्मणं च वेदः । तत्र मन्त्रलक्षणे उक्ते परिशेषसिद्धत्वात् ब्राह्मणलक्षणमवचनीयम् । मन्त्रलक्षणवचनेनैव सिद्धम् । यस्यैतल्लक्षणं न भवति, तद्ब्राह्मणमिति परिशेषसिद्धं ब्राह्मणम् । **वृत्तिकारस्तु** शिष्यहितार्थं प्रपञ्चितवान् इतिकरणबहुलम् ('इषे त्वेति बर्हिरादत्ते' इति) । इत्याहोपनिबद्धम् ('अश्विनोर्बाहुभ्यामित्याह' इति) । आख्यायिकास्वरूपम् ('प्रजापतेस्त्रयस्त्रिंशद्दुहितर आसन्' इति) । हेतुः 'शूर्पेण जुहोति तेन ह्यन्नं क्रियते' इति । निर्वचनम् 'तद्दध्नो दधित्वम्' । निन्दा 'उपवीता वा एतस्याग्नयः' । प्रशंसा 'वायुर्वै क्षेपिष्ठा देवता' इति । संशयः 'होतव्यं गार्हपत्ये न होतव्यम्' इति । विधिः 'यजमानसंमितौदुम्बरी भवति' । परकृतिः 'माषान्मे पचत' इति । पुराकल्पः 'उल्मुकैर्ह स्म पूर्वे समाजग्मुः' इति । व्यवधारणकल्पना 'यावतोऽश्वान् प्रतिगृह्णीयात्' इति । **'हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः । परक्रिया पुराकल्पो व्यवधारणकल्पना ॥ उपमानं दशैते तु विधयो ब्राह्मणस्य तु । एतत्स्यात्सर्ववेदेषु नियतं विधिलक्षणम् ॥'**

एतदपि प्रायिकम् । इतिकरणबहुलो मन्त्रोऽपि कश्चित् 'इति वा इति मे मनः' इति । इत्याहोपनिबद्धश्च 'भगं भक्षीत्याह' । आख्यायिकास्वरूपं च 'उग्रो ह भुज्युम्' इति । हेतुः 'इन्द्रवो वामुशन्ति हि' इति । निर्वचनम् 'तस्मादापो अनु स्थन' इति । निन्दा 'मोघमन्नं विन्दते अप्रचेताः' इति । प्रशंसा 'अग्निर्मूर्धा' इति । संशयः 'अधः स्विदासीदुपरि स्विदासीत्' इति । विधिः 'पृणीयादिन्नाधमानाय' इति । परकृतिः 'सहस्रमयुता ददत्' इति । पुराकल्पः 'यज्ञेन यज्ञमयजन्त देवाः' इति ।

वा— 'परिशेषसिद्धत्वात् ब्राह्मणलक्षणमवचनीयम्' इति । सूत्रमिदमनारभ्यमिति प्रतिभाति । तत्र शेषशब्दप्रयोगात् लक्षणानभिधानाच्च सूत्रव्याख्यानमेवेदमिति द्रष्टव्यम् । किमर्थं पुनः सूत्रमारभ्यते ? नाऽऽरभ्येत, यदि मन्त्रब्राह्मणात्मक एव वेद इति सर्वेषां प्रसिद्धं भवेत् । येषां तु अप्रसिद्धं तेषां तृतीयादिप्रकारनिराकरणार्थं द्वैराश्यमेव वेदस्य इति प्रतिपादयितुमाह—'शेषे ब्राह्मणशब्दः' इति । एकपुरुषकर्तृकमुपाख्यानं परकृतिः । बहुकर्तृकं पुराकल्पः । यत्रान्यथा अर्थः प्रतिभातः पौर्वापर्यालोचनेन व्यवधार्यान्यथा कल्प्यते सा व्यवधारणकल्पना, तद्यथा 'प्रतिगृह्णीयात्' इति श्रुतं 'प्रतिग्राहयेत्' इति कल्पयिष्यते । विधिलक्षणमित्यत्र ब्राह्मणवाची विधिशब्दः ।

शा— मन्त्रात्मकस्य वेदस्य लक्षणमुक्तम् । तत्प्रसङ्गात् ब्राह्मणलक्षणाभिधानम् ।

मी. को. ३७५

वि— 'नास्त्येतद्ब्राह्मणेत्यत्र लक्षणं विद्यतेऽथवा ।, नास्तीयन्तो वेदभागा इति क्लृप्तेरभावतः ॥, मन्त्रश्च ब्राह्मणं चेति द्वौ भागौ तेन मन्त्रतः । अन्यद्ब्राह्मणमित्येतद् भवेद् ब्राह्मणलक्षणम् ॥'

भाट्ट— 'एतद्ब्राह्मणान्येव पञ्च हवींषि' इति वेदप्रयुक्तब्राह्मणशब्दार्थपरिज्ञानार्थं तल्लक्षणमपि प्रसङ्गादेव । मन्त्रातिरिक्तवेदत्वमेव ब्राह्मणत्वम् ।

मण्डन— 'मन्त्रेतरो ब्राह्मणशब्दवाच्यः ।'

शंकर— 'लक्षणं ब्राह्मणस्य च ।'

* **ब्राह्मणलक्षणं** चातुर्मास्येषु 'एतद्ब्राह्मणान्येव पञ्च हवींषि' इति वेदप्रयुक्तब्राह्मणशब्दार्थपरिज्ञानार्थम् । **भाट्ट. २।१।९.**

* **ब्राह्मणवत्यः** इष्टकाः मध्यमायां चितौ उपधेयाः । ५।३।७।१७–१९.

ब्राह्मणवसिष्ठन्यायः । यथा 'ब्राह्मणा आयाताः, वसिष्ठोऽप्यायातः' इत्यत्र प्रथमवाक्येनैव ब्राह्मणत्वेन रूपेण वसिष्ठस्याप्यागमनस्य सिद्धौ यत् 'वसिष्ठोऽप्यायातः' इति वाक्यान्तरं प्रयुज्यते, तत्पूर्ववाक्यघटकब्राह्मणपदोपात्तवसिष्ठेतरयावद्व्यावृत्तधर्मविशेषबोधनपरतया पर्यवस्यतीति । अस्योदाहरणानि यथा महाभाष्ये 'हलन्त्यम्' (पा. १।३।३) इति सूत्रे 'व्यवसितान्त्यं हलित्संज्ञं भवतीति वक्तव्यम्' इति वार्तिकस्थव्यवसितपदं व्याख्यातम् 'के पुनर्व्यवसिताः ? धातुप्रातिपदिकप्रत्ययनिपातागमादेशाः' इति । अत्र प्रातिपदिकपदेनैव प्रातिपदिकत्वेन रूपेण निपातानामपि संग्रहे सिद्धे प्रकृतन्यायेन निपातपदोपादानमिति शेखरकारादयः । **साहस्री. २०४.**

* **ब्राह्मणवाक्यस्य** मन्त्रलिङ्गेन न बाधः, मन्त्रस्य ब्राह्मणविहितार्थप्रकाशकत्वेन तत्परतन्त्रत्वात् । अन्यथा मनोतामन्त्रस्यापि सामान्यसंबन्धग्राहिप्रमाणसत्त्वेन लिङ्गात् सवनीयाङ्गत्वापत्तौ 'यद्यप्यन्यदेवत्यः पशुः आग्नेय्येव मनोता कार्या' इति वाक्यावगताग्नीषोमीयाङ्गत्वबाधापत्तेः । **कौ. ३।३।७।१४ पृ. ३५९.** * **ब्राह्मणवाक्ये** तु अविधानं विधानं चोभयमपि निष्पन्नम् । **वा. ३।३।७।१४ पृ. ८२५.**

* ब्राह्मणविहितानां एकार्थानां मन्त्राणां विकल्पः, न तु समुच्चयः । १२।३।१५।३१–३५. 'मन्त्राणां ब्राह्मणविनियुक्तानाम्०' इत्यत्र द्रष्टव्यम् ।

ॾ ब्राह्मणविहितेषु च संख्यावत् सर्वेषामुपदिष्टत्वात् । १२।३।१५।३१॥

चकारेण समुच्चयोऽनुवर्त्यते । ब्राह्मणविहितेषु ब्राह्मणे ये मन्त्रा विहिताः 'उरु प्रथस्वेति पुरोडाशं प्रथयति' इत्यादयः तेषु समुच्चयः स्यात् । सर्वेषां उपदिष्टत्वात् यो न प्रयुज्येत तस्योपदेशो बाधितः स्यात् । तस्मात् समुच्चयः इति पूर्वः पक्षः ।

याज्यावषट्कारयोश्च समुच्चयस्य दर्शनं तद्वत् । ३२ ॥

'याज्याया अधि वषट् करोति' इति याज्यायाः वषट्कारस्य च समुच्चयस्य दर्शनं भवति । तत् यद्वत् प्रमाणं तद्वत् ब्राह्मणविहितानां मन्त्राणां उपदेशः समुच्चये प्रमाणम् । इति पूर्वपक्षे दृष्टान्तप्रदर्शनं कृतम् ।

विकल्पो वा समुच्चयस्याश्रुतित्वात् । ३३ ॥

विकल्पो वा ब्राह्मणविहितानां मन्त्राणां स्यात्, न समुच्चयः । समुच्चयस्य अश्रुतित्वात् श्रुतिशून्यत्वात् विधानाभावात् । संख्याश्रवणे तु विधिबलात् समुच्चयः । तस्मात् एकार्थत्वात् विकल्पः इति सिद्धान्तः ।

गुणार्थत्वादुपदेशस्य । ३४ ॥

'उरु प्रथस्वेति पुरोडाशं प्रथयति' इत्यादेरुपदेशस्य गुणार्थत्वात् । मन्त्रेण पुरोडाशप्रथनस्य स्तुत्यर्थः उपदेशः । नैवासौ मन्त्रप्राप्त्यर्थं उपदेशः । तस्मान्न समुच्चयः ।

वषट्कारे नानार्थत्वात् समुच्चयः । ३५ ॥

यदुक्तं याज्यावषट्कारयोश्चेति तत्र वषट्कारे याज्यायां च नानार्थत्वात् समुच्चयः । याज्या देवतास्तुत्यर्था स्मरणार्था च, वषट्कारस्तु प्रदानार्थः इति तयोः नाना भिन्नौ अर्थौ । तस्मात् ब्राह्मणविहितानां मन्त्राणां विकल्प इति सिद्धान्तः । **के.**

* ब्राह्मणवैश्यौ राजसूये नाधिकारिणौ । राजन्यस्यैव सः । **भा.** ११।४।४।१०. * ब्राह्मणवैश्ययोरपि प्रजापालनेन राजशब्द उपचरितो भवति । (तथा च राज्यकर्तृत्वं ब्राह्मणवैश्ययोरपि संभवति) । वि. २।३।२. * ब्राह्मणवैश्ययोः यद्यपि न शास्त्रदृष्ट्या राज्ययोगः, क्षत्रियस्यैव परिपालनविधानात्, तथापि शास्त्रोल्लङ्घनेन ब्राह्मणवैश्ययोरपि राज्ययोगो दृश्यते । **सोम.** २।३।२.

* ब्राह्मणशब्दः 'ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्' इत्यादौ जातिवाचिनोऽपि ब्राह्मणशब्दस्य परिव्राजकब्राह्मणविशेषगामित्वम् । 'प्रब्रूयात् ब्राह्मणश्चैषां' इत्याद्याश्रमान्तरस्थब्राह्मणविहितप्रवचनादिकर्मणः कर्मान्तरोपदेशः न विरुध्यते । **सु.** पृ. ९०५.

ॾ ब्राह्मणश्रमणन्यायः । श्रमणो बौद्धयतिः । यथा श्रमणस्य अशास्त्रीयविधिना त्यक्तशिखासूत्रकक्षादेस्त्यक्तनित्यादिकर्मणश्च इदानीं ब्राह्मणत्वाभावेऽपि भूतपूर्वेण ब्राह्मणत्वेन निर्देशः, तथा शिवसारूप्यप्राप्तानामपि प्राक्तनया मानवसंज्ञया निर्देश इत्युदाहरणसंगतिरिति । **साहस्री.** १६८.

* 'ब्राह्मणीवधे को वा ब्रह्महत्यां निषेधति । प्रायश्चित्तान्तरं तस्याः स्त्रीत्वमात्रनिबन्धनम् ॥' न वाचनिकप्रायश्चित्तात्पत्वेन ब्राह्मणीवधप्रतिषेध एव नास्तीत्याशङ्कितव्यम् । **वा.** १।३।३।७ पृ. २१३.

* ब्राह्मणाच्छंसी इन्द्रं 'इन्द्र त्वा वृषभं वयम्' इति पुनरभ्युन्नीते होमे यजति । **भा.** ३।२।१२।३०. * ब्राह्मणाच्छंसी ब्रह्मणः पुरुषः । द्वितीयवर्गस्थोऽयम्, अर्धी दक्षिणार्धे षट् गाः लभते । वि. ३।७।१७, * 'ब्राह्मणाच्छंसिनं प्रतिप्रस्थाता दीक्षयति' द्वादशाहे दीक्षायाम् । ३।७।१७. * ब्राह्मणाच्छंसिनः रैवतं साम पृष्ठं विश्वजिति । **भा.** ७।३।३।८.

* ब्राह्मणीनां सुरापानं निषिद्धम् 'तस्माद् ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत्' इत्यनेनैव । **वा.** १।३।३।७ पृ. २११.

* ब्राह्मण्यम् । 'सर्वर्णेभ्यः सवर्णासु जायन्ते हि सजातयः ।' (यास्मृ. १।९०) 'विन्नास्वेष विधिः स्मृतः' (यास्मृ. १।९२) इति स्मृतिसिद्धं ब्राह्मणात् स्वभार्यायां ब्राह्मण्यामुत्पन्नत्वलक्षणं ब्राह्मण्यं मातुरेव एकस्याः सुविज्ञानम् । इतरस्य तु दुर्विज्ञानम् । **कु.** १।२।१।१३.

* 'ब्राह्मौदनिके अग्नौ अरणी संताप्य तदुपोह्य भस्म अग्निं मन्थति, सैव साग्नेः संततिः' इति मन्थनमाम्नातम् । **संकर्ष.** ३।२।१, * ब्राह्मौदनिके अग्नौ गार्हपत्यत्वमेव आधाने । तत्रारणी निष्टप्य मथित्वा सर्वेण मथितेन गार्हपत्यः आधेयः, न तु सर्वे । ३।२।१.